# garuDapurANa

# ગરુડપુરાણ

## Document Information

Text title : garuDapuraNa

File name : garuDapurANa.itx

Category : purana, deities_misc

Location : doc_purana

Transliterated by : GRETIL

Latest update : August 28, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# ગરુડપુરાણ

શ્રીગણાધિપતયે નમઃ ।
સરસ્વત્યૈનમઃ ।
અથ શ્રીગરુડમહાપુરાણં પ્રારભ્યતે ।
તત્રાદૌ કર્મકાણ્ડાખ્યઃ પૂર્વખણ્ડઃ પ્રારભ્યતે ।

ૐ નારાયણં નમસ્કૃત્ય નરં ચૈવ નરોત્તમમ્ ।
દેવીં સરસ્વતીં ચૈવ તતો જયમુદીરયેત્ ॥ મંગલાચરણમ્ .૧॥

ૐ અજમજરમનન્તં જ્ઞાનરૂપં મહાન્તં શિવમમલમનાદિં ભૂતદેહાદિહીનમ્ ।
સકલકરણહીનં સર્વભૂતસ્થિતં તં હરિમમલમમાયં સર્વગં વન્દ એકમ્ ॥ ૧,૧.૧॥

નમસ્યામિ હરિં રુદ્રં બ્રહ્માણં ચ ગણાધિપમ્ ।
દેવીં સરસ્વતીં ચૈવ મનોવાક્કર્મભિઃ સદા ॥ ૧,૧.૨॥

સૂતં પૌરાણિકં શાન્તં સર્વશાસ્ત્રવિશારદમ્ ।
વિષ્ણુભક્તં મહાત્માનં નૈમિશારણ્યમાગતમ્ ॥ ૧,૧.૩॥

તીર્થયાત્રાપ્રસઙ્ગેન ઉપવિષ્ટં શુભાસને ।
ધ્યાયન્તં વિષ્ણુમનઘં તમભ્યર્ચ્યાસ્તુવન્કવિમ્ ॥ ૧,૧.૪॥

શૌનકાદ્યા મહાભાગા નૈમિષીયાસ્તપોધનાઃ ।
મુનયો રવિસઙ્કાશાઃ શાન્તા યજ્ઞ પરાયણાઃ ॥ ૧,૧.૫॥

ઋષય ઊચુઃ ।
સૂત ! જાનાસિ સર્વં ત્વં પૃચ્છામસ્ત્વામતો વયમ્ ।
દેવતાનાં હિ કો દેવ ઈશ્વરઃ પૂજ્ય એવ કઃ ॥ ૧,૧.૬॥

કો ધ્યેયઃ કો જગત્સ્રષ્ટા જગત્પાત્તિ ચ હન્તિ કઃ ।
કસ્માત્પ્રવર્તતે ધર્મો દુષ્ટહન્તા ચ કઃ સ્મૃતઃ ॥ ૧,૧.૭॥

તસ્ય દેવસ્ય કિં રૂપં જગત્સર્ગઃ કથં મતઃ ।

કૈર્વ્રતૈઃ સ તુ તુષ્ટઃ સ્યાત્કેન યોગેન વાપ્યતે ॥ ૧,૧.૮॥

અવતારાશ્ચ કે તસ્ય કથં વંશાદિસમ્ભવઃ ।
વર્ણાશ્રમાદિધર્માણાં કઃ પાતા કઃ પ્રવર્તકઃ ॥ ૧,૧.૯॥

એતત્સર્વં તથાન્યચ્ચ બ્રૂહિ સૂત ! મહામતે ! ।
નારાયણકથાઃ સર્વાઃ કથયાસ્માકમુત્તમાઃ ॥ ૧,૧.૧૦॥

સૂત ઉવાચ ।
પુરાણં ગારુડં વક્ષ્યે સારં વિષ્ણુકથા શ્રયમ્ ।
ગરુડોક્તં કશ્યપાય પુરા વ્યાસાચ્છ્રુતં મયા ॥ ૧,૧.૧૧॥

એકો નારાયણો દેવો દેવાનામીશ્વરેશ્વરઃ ।
પરમાત્મા પરં બ્રહ્મ જન્માદ્યસ્ય યતો ભવેત્ ॥ ૧,૧.૧૨॥

જગતો રક્ષણાર્થાય વાસુદેવોઽજરોઽમરઃ ।
સ કુમારાદિરૂપેણ અવતારાન્કરોત્યજઃ ॥ ૧,૧.૧૩॥

હરિઃ સ પ્રથમં દેવઃ કૌમારં સર્ગમાસ્થિતઃ ।
ચચાર દુશ્ચરં બ્રહ્મન્બ્રહ્મચર્યમખણ્ડિતમ્ ॥ ૧,૧.૧૪॥

દ્વિતીયં તુ ભવાયાસ્ય રસાતલગતાં મહીમ્ ।
ઉદ્ધરિષ્યન્નુપાદત્તે યજ્ઞેશઃ સૌકરં વપુઃ ॥ ૧,૧.૧૫॥

તૃતીયમૃષિસર્ગં તુ દેવર્ષિત્વમુપેત્ય સઃ ।
તન્ત્રં સાત્વતમાચષ્ટે નૈષ્કર્મ્યં કર્મણાં યતઃ ॥ ૧,૧.૧૬॥

નરનારાયણો ભૂત્વા તુર્યે તેપે તપો હરિઃ ।
ધર્મસં રક્ષણાર્થાય પૂજિતઃ સ સુરાસુરૈઃ ॥ ૧,૧.૧૭॥

પઞ્ચમઃ કપિલો નામ સિદ્ધેશઃ કાલવિપ્લુતમ્ ।
પ્રોવાચ સૂરયે સાઙ્ખ્યં તત્ત્વગ્રામવિ નિર્ણયમ્ ॥ ૧,૧.૧૮॥

ષષ્ઠમત્રેરપત્યત્વં દત્તઃ પ્રાપ્તોઽનસૂયયા ।
આન્વીક્ષિકીમલર્કાય પ્રહ્લાદાદિભ્ય ઊચિવાન્ ॥ ૧,૧.૧૯॥

તતઃ સપ્ત આકૂત્યાં રુચેર્યજ્ઞોઽભ્યજાયત ।
સુત્રામાદ્યૈઃ સુરગણૈર્યષ્ટ્વા સ્વાયમ્ભુવાન્તરે ॥ ૧,૧.૨૦॥

અષ્ટમે મેરુદેવ્યાં તુ નાભેર્જાત ઉરુક્રમઃ ।
દર્શયન્વર્ત્મ નારીણાં સર્વાશ્રમનમસ્કૃતમ્ ॥ ૧,૧.૨૧॥

ઋષિભિર્યાચિતો ભેજે નવમં પાર્થિવં વપુઃ ।
દુગ્ધૈર્મહૌષધૈર્વિપ્રાસ્તેન સંજીવિતાઃ પ્રજાઃ ॥ ૧,૧.૨૨ ॥

રૂપં સ જગૃહે માત્સ્યં ચાક્ષુષાન્તરસમ્પ્લવે ।
નાવ્યારોપ્ય મહીમય્યામપાદ્વૈવસ્વતં મનુમ્ ॥ ૧,૧.૨૩ ॥

સુરાસુરાણામુદધિં મથ્નતાં મન્દરાચલમ્ ।
દધ્રે કમઠરૂપેણ પૃષ્ઠ એકાદશે વિભુઃ ॥ ૧,૧.૨૪ ॥

ધાન્વન્તરં દ્વાદશમં ત્રયોદશમમેવ ચ ।
આપ્યાયત્સુરાનન્યાન્મોહિન્યા મોહયંસ્ત્રિયા ॥ ૧,૧.૨૫ ॥

ચતુર્દશં નારસિંહં ચૈત્ય (વૈર) દૈત્યેન્દ્રમૂર્જિતમ્ ।
દદાર કરજૈરુગ્રૈરેરકાં કટકુદ્યથા ॥ ૧,૧.૨૬ ॥

પઞ્ચદશં વામનકો ભૂત્વાગાદધ્વરં બલેઃ ।
પાદ ત્રયં યાચમાનઃ પ્રત્યાદિત્સુસ્ત્રિવિષ્ટપમ્ ॥ ૧,૧.૨૭ ॥

અવતારે ષોડશમે પશ્યન્બ્રહ્મદ્રુહો નૃપાન્ ।
ત્રિઃ સપ્તકૃત્વઃ કુપિતો નિઃ ક્ષત્રામકરોન્મહીમ્ ॥ ૧,૧.૨૮ ॥

તતઃ સપ્તદશે જાતઃ સત્યવત્યાં પરાશરાત્ ।
ચક્રે વેદતરોઃ શાખાં દૃષ્ટ્વા પુંસોઽલ્પમેધસઃ ॥ ૧,૧.૨૯ ॥

નરદેવત્વમાપન્નઃ સુરકાર્યચિકીર્ષયા ।
સમુદ્રનિગ્રહાદીનિ ચક્રે કાર્યાણ્યતઃ પરમ્ ॥ ૧,૧.૩૦ ॥

એકોનવિંશે વિંશતિમે વૃષ્ણિષુ પ્રાપ્ય જન્મની ।
રામકૃષ્ણાવિતિ ભુવો ભગવાનહરદ્ભરમ્ ॥ ૧,૧.૩૧ ॥

તતઃ કલેસ્તુ સન્ધ્યાન્તે સમોહાય સુરદ્વિષામ્ ।
બુદ્ધો નામ્ના જિનસુતઃ કીકટેષુ ભવિષ્યતિ ॥ ૧,૧.૩૨ ॥

અથ સોઽષ્ટમસન્ધ્યાયાં નષ્ટપ્રાયેષુ રાઞ્જસુ ।
ભવિતા વિષ્ણુયશસો નામ્ના કલ્કી જગત્પતિઃ ॥ ૧,૧.૩૩ ॥

અવતારા હ્યસંખ્યેયા હરેઃ સત્ત્વનિધેર્દ્વિજાઃ ।
મનુવેદવિદો હ્યાદ્યાઃ સર્વે વિષ્ણુકલાઃ સ્મૃતાઃ ॥ ૧,૧.૩૪ ॥

તસ્માત્સર્ગાદયો જાતાઃ સમ્પૂજ્યાશ્ચ વ્રતાદિના ।

પુરાણં ગારુડં વ્યાસઃ પુરાસૌ મેઽબ્રવીદિદમ્ ॥ ૧,૧.૩૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે કર્મકાણ્ડે
એતત્પુરાણપ્રવૃત્તિહેતુનિરૂપણં નામ પ્રથમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨
ઋષય ઊચુઃ ।
કથં વ્યાસેન કથિતં પુરાણં ગારુડં તવ ।
એતત્સર્વં સમાખ્યાહિ પરં વિષ્ણુકથાશ્રયમ્ ॥ ૧,૨.૧॥

સૂત ઉવાચ ।
અહં હિ મુનિભિઃ સાર્ધં ગતો બદરિકાશ્રમમ્ ।
તત્ર દૃષ્ટો મયા વ્યાસો ધ્યાયમાનઃ પરેશ્વરમ્ ॥ ૧,૨.૨॥

તં પ્રણમ્યોપવિષ્ટોઽહં પૃષ્ટવાન્હિ મુનીશ્વરમ્ ।
સૂત ઉવાચ ।
વ્યાસ બ્રૂહિ હરે રૂપં જગત્સર્ગાદિકં તતઃ ॥ ૧,૨.૩॥

મન્યે ધ્યાયસિ તં યસ્માત્તસ્માજ્જાનાસિ તં વિભુમ્ ।
એવં પૃષ્ટો યથા પ્રાહ તથા વિપ્રા?નિબોધત ॥ ૧,૨.૪॥

વ્યાસ ઉવાચ ।
શૃણુ સૂત ! પ્રવક્ષ્યામિ પુરાણં ગારુડં તવ ।
સહ નારદદક્ષાદ્યૈર્બ્રહ્મા મામુક્તવાન્યથા ॥ ૧,૨.૫॥

સૂત ઉવાચ ।
દક્ષનારદમુખ્યૈસ્તુ યુક્તં ત્વાં કથમુક્તવાન્ ।
બ્રહ્મા શ્રીગારુડં પુણ્યં પુરાણં સારવાચકમ્ ॥ ૧,૨.૬॥

વ્યાસ ઉવાચ ।
અહં હિ નારદો દક્ષો ભૃગ્વાદ્યાઃ પ્રણિપત્ય તમ્ ।
સારં બ્રૂહીતિ પપ્રચ્છુર્બ્રહ્માણં બ્રહ્મલોકગમ્ ॥ ૧,૨.૭॥

બ્રહ્મોવાચ ।
પુરાણં ગારુડં સારં રુદ્રં ચ માં યથા ।
સુરૈઃ સહાબ્રવીદ્વિષ્ણુસ્તથાહં વ્યાસ વચ્મિતે ॥ ૧,૨.૮॥

વ્યાસ ઉવાચ ।

કથં રુદ્રં સુરૈઃ સાર્ધમબ્રવીદ્વૈ હરિઃ પુરા ।
પુરાણં ગારુડં સારં બ્રૂહિ બ્રહ્મન્મહાર્થકમ્ ॥ ૧,૨.૯॥

બ્રહ્મોવાચ ।
અહં ગતોઽદ્રિં કૈલાસમિન્દ્રાદ્યૈર્દૈવતૈઃ સહ ।
તત્ર દૃષ્ટો મયા રુદ્રો ધ્યાયમાનઃ પરં પદમ્ ॥ ૧,૨.૧૦॥

પૃષ્ટો નમસ્કૃતઃ કિં ત્વં દેવં ધ્યાયસિ શઙ્કર? ।
ત્વત્તો નાન્યં પરં દેવં જાનામિ બ્રૂહિ માં તતઃ ॥ ૧,૨.૧૧॥

સારાત્સારતરં તત્ત્વં શ્રોતુકામઃ સુરૈઃ સહ ।
રુદ્રૌવાચ ।
અહં ધ્યાયામિ તં વિષ્ણું પરમાત્માનમીશ્વરમ્ ॥ ૧,૨.૧૨॥

સર્વદં સર્વગં સર્વં સર્વપ્રાણિહૃદિસ્થિતમ્ ।
ભસ્મોદ્ધૂલિતદેહસ્તુ જટામણ્ડલમણ્ડિતઃ ॥ ૧,૨.૧૩॥

વિષ્ણોરારાધનાર્થં મે વ્રતચર્યા પિતામહ ।
તમેવ ગત્વા પૃચ્છામઃ સારં યં ચિન્તયામ્યહમ્ ॥ ૧,૨.૧૪॥

વિષ્ણું જિષ્ણું પદ્મનાભં હરિં દેહવિવર્જિતમ્ ।
શુચિં શુચિષદં હંસં તત્પદં પરમેશ્વરમ્ ॥ ૧,૨.૧૫॥

યુક્ત્વા સર્વાત્મનાત્માનં તં દેવં ચિન્તયામ્યહમ્ ।
યસ્મિન્વિશ્વાનિ ભૂતાનિ તિષ્ઠન્તિ ચ વિશન્તિ ચ ॥ ૧,૨.૧૬॥

ગુણભૂતાનિ ભૂતેશે સૂત્રે મણિગણા ઇવ ।
સહસ્રાક્ષં સહસ્રાઙ્ઘ્રિં સહસ્રોરું વરાનનમ્ ॥ ૧,૨.૧૭॥

અણીયસામણીયાંસં સ્થવિષ્ઠં ચ સ્થવીયસામ્ ।
ગરીયસાં ગરિષ્ઠં ચ શ્રેષ્ઠં ચ શ્રેયસામપિ ॥ ૧,૨.૧૮॥

યં વાક્યેષ્વનુવાક્યેષુ નિષત્સૂપનિષત્સુ ચ ।
ગૃણન્તિ સત્યકર્માણં સત્યં સત્યેષુ સામસુ ॥ ૧,૨.૧૯॥

પુરાણ પુરુષઃ પ્રોક્તો બ્રહ્મા પ્રોક્તો દ્વિજાતિષુ ।
ક્ષયે સઙ્કર્ષણઃ પ્રોક્તસ્તમુપાસ્યમુપાસ્મહે ॥ ૧,૨.૨૦॥

યસ્મિંલ્લોકાઃ સ્ફુરન્તીમે જલે શકુનયો યથા ।
ઋતમેકાક્ષરં બ્રહ્મ યત્તત્સદસતઃ પરમ્ ॥ ૧,૨.૨૧॥

અર્ચયન્તિ ચ યં દેવા યક્ષરાક્ષસપન્નગાઃ ।
યસ્યાગ્નિરાસ્યં દ્યૌર્મૂર્ધા ખં નાભિશ્ચરણૌ ક્ષિતિઃ ॥ ૧,૨.૨૨॥

ચન્દ્રાદિત્યૌ ચ નયને તં દેવં ચિન્તયામ્યહમ્ ।
યસ્ય ત્રિલોકી જઠરે મસ્ય કાષ્ઠાશ્ચ બાહવઃ ॥ ૧,૨.૨૩॥

યસ્યોચ્છ્વાસશ્ચ પવનઃ તં દેવં ચિન્તયામ્યહમ્ ।
યસ્ય કેશેષુ જીમૂતા નદ્યઃ સર્વાઙ્ગસન્ધિષુ ॥ ૧,૨.૨૪॥

કુક્ષૌ સમુદ્રાશ્ચત્વારસ્તં દેવં ચિન્તયામ્યહમ્ ।
પરઃ કાલાત્પરો યજ્ઞાત્પરઃ સદસતશ્ચયઃ ॥ ૧,૨.૨૫॥

અનાદિરાદિર્વિશ્વસ્ય તં દેવં ચિન્તયામ્યહમ્ ।
મનસશ્ચન્દ્રમા યસ્ય ચક્ષુષોશ્ચ દિવાકરઃ ॥ ૧,૨.૨૬॥

મુખાદગ્નિશ્ચ સંજજ્ઞે તં દેવં ચિન્તયામ્યહમ્ ।
પદ્ભ્યાં યસ્ય ક્ષિતિર્જાતા શ્રોત્રાભ્યાં ચ તથા દિશઃ ॥ ૧,૨.૨૭॥

મૂર્ધભાગાદ્દિવં યસ્ય તં દેવં ચિન્તયામ્યહમ્ ।
સર્ગશ્ચ પ્રતિસર્ગશ્ચ વંશો મન્વન્તરાણિ ચ ॥ ૧,૨.૨૮॥

વંશાનુચરિતં યસ્માત્તં દેવં ચિન્તયામ્યહમ્ ।
યં ધ્યાયામ્યહમેતસ્માદૂજામઃ સારમીક્ષિતુમ્ ॥ ૧,૨.૨૯॥

બ્રહ્મોવાચ ।
ઇત્યુક્તોઽહં પુરા રુદ્રઃ શ્વેતદ્વીપનિવાસિનમ્ ।
સ્તુત્વા પ્રણમ્ય તં વિષ્ણું શ્રોતુકામ સ્થિતઃ સુરૈઃ ॥ ૧,૨.૩૦॥

અસ્માકં મધ્યતો રુદ્ર ઉવાચ પરમેશ્વરમ્ ।
સારાન્ત્સારતરં વિષ્ણું પૃષ્ટવાંસ્તં પ્રણમ્ય વૈ ॥ ૧,૨.૩૧॥

બ્રહ્મોવાચ ।
યથા પપ્રચ્છ માં વ્યાસ સ્તથાસૌ ભગવાન્ભવઃ ।
પપ્રચ્છ વિષ્ણું દેવાદ્યૈઃ શ ૃણ્વતામમરૈઃ સહ ॥ ૧,૨.૩૨॥

રુદ્ર ઉવાચ ।
હરે કથય દેવેશ ! દેવદેવઃ ક ઈશ્વરઃ ।
કો ધ્યેયઃ કશ્ચ વૈ પૂજ્યઃ કૈર્વ્રતૈ સ્તુષ્યતે પરઃ ॥ ૧,૨.૩૩॥

કૈર્ધર્મૈઃ કૈશ્ચ નિયમૈઃ કયા વા ધર્મપૂજયા ।

કેનાચારેણ તુષ્ટઃ સ્યાત્કિં તદ્રૂપં ચ તસ્ય વૈ ॥ ૧,૨.૩૪॥

કસ્માદ્દેવાજ્જગજ્જાતં જગત્પાલયતે ચકઃ ।
કીદૃશૈરવતારૈશ્ચ કસ્મિન્યાતિ લયં જગત્ ॥ ૧,૨.૩૫॥

સર્ગશ્ચ પ્રતિસર્ગશ્ચ વંશો મન્વન્તરાણિ ચ ।
કસ્માદ્દેવાત્પ્રવર્તન્તે કસ્મિમન્નેતત્પ્રતિષ્ઠિતમ્ ॥ ૧,૨.૩૬॥

એતત્સર્વં હરે ! બ્રૂહિ યચ્ચાન્યદપિ કિઞ્ચન ।
પરમેશ્વરમાહાત્મ્યં યુક્તયોગાદિકં તથા ॥ ૧,૨.૩૭॥

તથાષ્ટાદશ વિદ્યાશ્ચ હરી રુદ્રં તતોઽબ્રવીત્ ।
હરિરુવાચ ।
શ઼ૃણુ રુદ્ર ! પ્રવક્ષ્યામિ બ્રહ્મણા ચ સુરૈઃ સહ ॥ ૧,૨.૩૮॥

અહં હિ દેવો દેવાનાં સર્વલોકેશ્વરેશ્વરઃ ।
અહં ધ્યેયશ્ચ પૂજ્યશ્ચ સ્તુત્યોહં સ્તતિભિઃ સુરૈઃ ॥ ૧,૨.૩૯॥

અહં હિ પૂજિતો રુદ્ર ! દદામિ પરમાં ગતિમ્ ।
નિયમૈશ્ચ વ્રતૈસ્તુષ્ટ આચારેણ ચ માનવૈઃ ॥ ૧,૨.૪૦॥

જગત્સ્થિતેરહં બીજં જગત્કર્તા ત્વહં શિવ ! ।
દુષ્ટનિગ્રહકર્તા હિ ધર્મગોપ્તા ત્વહં હર ! ॥ ૧,૨.૪૧॥

અવતારૈશ્ચ મત્સ્યાદ્યૈઃ પાલયામ્યખિલં જગત્ ।
અહં મન્ત્રાશ્ચ મન્ત્રાર્થઃ પૂજાધ્યાનપરો હ્યહમ્ ॥ ૧,૨.૪૨॥

સ્વર્ગાદીનાં ચ કર્તાહં સ્વર્ગાદીન્યહમેવ ચ ।
યોગી યોગોહમેવાદ્યઃ પુરાણાન્યહમેવચ ॥ ૧,૨.૪૩॥

જ્ઞાતા શ્રોતા તથા મન્તા વક્તા વક્તવ્યમેવ ચ ।
સર્વઃ સર્વાત્મકો દેવો ભુક્તિમુક્તિકરઃ પરઃ ॥ ૧,૨.૪૪॥

ધ્યાનં પૂજોપહારોઽહં મણ્ડલાન્યહમેવ ચ ।
ઇતિહાસાન્યહં રુદ્ર ! સર્વવેદા હ્યહં શિવ ! ॥ ૧,૨.૪૫॥

સર્વજ્ઞાનાન્યહં શમ્ભો ! બ્રહ્માત્માહમહં શિવ ! ।
અહં બ્રહ્મા સર્વલોકઃ સર્વદેવાત્મકો હ્યહમ્ ॥ ૧,૨.૪૬॥

અહં સાક્ષાત્સદાચારો ધર્મોઽહં વૈષ્ણવો હ્યહમ્ ।
વર્ણાશ્રમાસ્તથા ચાહં તદ્ધર્મોઽહં પુરાતનઃ ॥ ૧,૨.૪૭॥

યમોઽહં નિયમો રુદ્ર ! વ્રતાનિ વિવિધાનિ ચ ।
અહં સૂર્યસ્તથા ચન્દ્રો મઙ્ગલાદીન્ચહં તથા ॥ ૧,૨.૪૮॥

પુરા માં ગરુડઃ પક્ષી તપસારાધયદ્ભુવિ ।
તુષ્ટ ઊચે વરં બ્રૂહિ મત્તો વવ્રે વરં સ તુ ॥ ૧,૨.૪૯॥

ગરુડ ઉવાચ ।
મમ માતા ચ વિનતા નાગૈર્દાસીકૃતા હરે ।
યથાહં દેવ તાઞ્જિત્વા ચામૃતં હ્યાનયામિ તત્ ॥ ૧,૨.૫૦॥

દાસ્યાદ્વિમોક્ષયિષ્યામિ યથાહં વાહનસ્તવ ।
મહાબલો મહાવીર્યઃ સર્વજ્ઞો નાગદારણઃ ॥ ૧,૨.૫૧॥

પુરાણસંહિતાકર્તા યથાહં સ્યાં તથા કુરુમ્ ।
વિષ્ણુરુવાચ ।
યથા ત્વયોક્તં ગરુડ તથા સર્વં ભવિષ્યતિ ॥ ૧,૨.૫૨॥

નાગદાસ્યાન્માતરં ત્વં વિનતાં મોક્ષયિષ્યસિ ।
દેવાદીન્સકલાઞ્જિત્વા ચામૃતં હ્યાનયિષ્યસિ ॥ ૧,૨.૫૩॥

મહાબલો વાહનસ્ત્વં ભવિષ્યસિ વિષાર્દનઃ ।
પુરાણં મત્પ્રસાદાચ્ચ મમ માહાત્મ્યવાચકમ્ ॥ ૧,૨.૫૪॥

યદુક્તં મત્સ્વરૂપં ચ તવ ચાવિર્ભવિષ્યતિ ।
ગારુડં તવ નામ્ના તલ્લોકે ખ્યાતિં ગમિષ્યતિ ॥ ૧,૨.૫૫॥

યથાહં દેવદેવાનાં શ્રીઃ ખ્યાતો વિનતાસુત ।
તથા ખ્યાતિં પુરાણેષુ ગારુડં ગારુડૈષ્યતિ ॥ ૧,૨.૫૬॥

યથાહં કીર્તનીયોઽથ તથા ત્વં ગરુડાત્મના ।
માં ધ્યાત્વા પક્ષિમુખ્યેદં પુરાણં ગદ ગારુડમ્ ॥ ૧,૨.૫૭॥

ઇત્યુક્તો ગરુડો રુદ્ર ! કશ્યપાયાહ પૃચ્છતે ।
કશ્યપો ગારુડં શ્રુત્વા વૃક્ષં દગ્ધમજીવયત્ ॥ ૧,૨.૫૮॥

સ્વયં ચાન્યમના ભૂત્વા વિદ્યયાન્યાન્ચ જીવયત્ ।
યક્ષિ ઓંઉંસ્વાહાજાપી વિદ્યયં ગારુડી પરા ।
ગરુડોક્તં ગારુડં હિ શ ृણુ રુદ્ર ! મદાત્મકમ્ ॥ ૧,૨.૫૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રીગરુડમહાપુરાણોત્પત્તિનિરૂપણં નામ દ્વિતીયોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩

સૂત ઉવાચ ।
ઇતિ રુદ્રાબ્જજો વિષ્ણોઃ શુશ્રાવ બ્રહ્મણો મુનિઃ ।
વ્યાસો વ્યાસાદહં વક્ષ્યેહં તે શૌનક નૈમિષે ॥ ૧,૩.૧॥

મુનીનાં શ઼ૃણ્વતાં મધ્યે સર્ગાદ્યં દેવપૂજનમ્ ।
તીર્થં ભુવનકોશં ચ મન્વન્તરમિહોચ્યતે ॥ ૧,૩.૨॥

વર્ણાશ્રમાદિધર્માશ્ચ દાનરાજાદિધર્મકાઃ ।
વ્યવહારો વ્રતં વંશા વૈદ્યકં સનિદાનકમ્ ॥ ૧,૩.૩॥

અઙ્ગાનિ પ્રલયો ધર્મકામાર્થજ્ઞાનમુત્તમમ્ ।
સપ્રપઞ્ચં નિષ્પ્રપઞ્ચં કૃતં વિષ્ણોર્નિગદ્યતે ॥ ૧,૩.૪॥

પુરાણે ગારુડે સર્વં ગરુડો ભગવાનથ ।
વાસુદેવપ્રસાદેન સામર્થ્યાતિશયૈર્યુતઃ ॥ ૧,૩.૫॥

ભુત્વા હરેર્વાહનં ચ સર્ગાદીનાં ચ કારણમ્ ।
દેવાન્વિજિત્ય ગરુડો હ્યમૃતાહરણં તથા ॥ ૧,૩.૬॥

ચક્રે ક્ષુધા હૃતં યસ્ય બ્રહ્માણ્ડમુદરે હરેઃ ।
યં દૃષ્ટ્વા સ્મૃતમાત્રેણ નાગાન્દીનાં ચ સંક્ષયઃ ॥ ૧,૩.૭॥

કશ્યપો ગારુડાદ્વૃક્ષં દગ્ધં ચાજીવયદ્યતઃ ।
ગરુડઃ સ હરિસ્તેન પ્રોક્તં શ્રીકશ્યપાય ચ ॥ ૧,૩.૮॥

તચ્છ્રીમદ્ગારુડં પુણ્યં સર્વદં પઠતસ્તવ ।
વક્ષ્યે વ્યાસં નમસ્કૃત્ય શ઼ૃણુ શૌનક તદ્યથા ॥ ૧,૩.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષયનિરૂપણં નામ તૃતીયોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪

રુદ્ર ઉવાચ ।

સર્ગશ્ચ પ્રતિસર્ગશ્ચ વંશો મન્વન્તરાણિ ચ ।
વંશાનુચરિતં ચૈવ એતદ્બ્રૂહિ જનાર્દન ॥ ૧,૪.૧॥

હરિરુવાચ ।
શ‍ૃણુ રુદ્ર પ્રવક્ષ્યામિ સર્ગાદીન્પાપનાશનામ્ ।
સર્ગસ્થિતિલયાન્તાં તાં વિષ્ણોઃ ક્રીડાં પુરાતનીમ્ ॥ ૧,૪.૨॥

નરનારાયણો દેવો વાસુદેવો નિરઞ્જનઃ ।
પરમાત્મા પરં બ્રહ્મ જગજ્જનિલયાદિકૃત્ ॥ ૧,૪.૩॥

તદેતત્સર્વમેવૈતવ્દ્યક્તાવ્યક્તસ્વરૂપવત્ ।
તથા પુરુષરૂપેણ કાલરૂપેણ ચ સ્થિતમ્ ॥ ૧,૪.૪॥

વ્યક્તં વિષ્ણુસ્તથાવ્યક્તં પુરુષઃ કાલ એવ ચ ।
ક્રીડતો બાલકસ્યેવ ચેષ્ટાસ્તસ્ય નિશામય ॥ ૧,૪.૫॥

અનાદિનિધનો ધાતા ત્વનન્તઃ પુરુષોત્તમઃ ।
તસ્માદ્ભવતિ ચાવ્યક્તં તસ્માદાત્માપિ જાયતે ॥ ૧,૪.૬॥

તસ્માહુદ્ધિર્મનસ્તસ્માત્તતઃ ખં પવન સ્તતઃ ।
તસ્માત્તેજસ્તતસ્ત્વાપસ્તતો ભૂમિસ્તતોઽભવત્ ॥ ૧,૪.૭॥

અણ્ડો હિરણ્મયો રુદ્ર તસ્યાન્તઃ સ્વયમેવ હિ ।
શરીરગ્રહણં પૂર્વં સૃષ્ટ્યર્થં કુરુતે પ્રભુઃ ॥ ૧,૪.૮॥

બ્રહ્મા ચતુર્મુખો ભૂત્વા રજોમાત્રાધિકઃ સદા ।
શરીરગ્રહણં કૃત્વાસૃજદેતચ્ચરાચરમ્ ॥ ૧,૪.૯॥

અણ્ડસ્યાન્તર્જગત્સર્વં સદેવાસુરમાનુષમ્ ।
સ્રષ્ટા સૃજતિ ચાત્માનં વિષ્ણુઃ પાલ્યં ચ પાતિ ચ ॥ ૧,૪.૧૦॥

અપસંહ્રિયતે ચાન્તે સંહર્તા ચ સ્વયં હર ।
બ્રહ્મા ભૂત્વાસૃજદ્વિષ્ણુર્જગત્પાતિ હરિઃ સ્વયમ્ ॥ ૧,૪.૧૧॥

રુદ્રરૂપી ચ કલ્પાન્તે જગત્સંહરતેઽખિલમ્ ।
બ્રહ્મા તુ સૃષ્ટિકાલેઽસ્મિઞ્જમધ્યગતાં મહીમ્ ॥ ૧,૪.૧૨॥

દંષ્ટ્રયોદ્ધરતિ જ્ઞાત્વા વારહીમાસ્થિતસ્તનૂમ્ ।
દેવાદિસર્ગાન્વક્ષ્યેઽહં સંક્ષેપાચ્છૃણુ શઙ્કર ! ॥ ૧,૪.૧૩॥

(૧)પ્રથમો મહતઃ સર્ગો વિરૂપો બ્રહ્મણસ્તુ સઃ ।

(૨) નન્માત્રાણાં દ્વિતીયસ્તુ ભૂતસર્ગો હિ સ સ્મૃતઃ ॥ ૧,૪.૧૪॥

(૩)વૈકારિકસ્તૃતીયસ્તુ સર્ગસ્ત્વૈન્દ્રિયકઃ સ્મૃતઃ ।
ઇત્યેષ પ્રાકૃતઃ સર્ગઃ સમ્ભૂતો બુદ્ધિપૂર્વકઃ ॥ ૧,૪.૧૫॥

(૪)મુખ્યસર્ગશ્ચતુર્થસ્તુ મુખ્યા વૈ સ્થાવરાઃ સ્મૃતાઃ ।
(૫)તિર્યક્સ્રોતાસ્તુ યઃ પ્રોક્તસ્તિર્યગ્યોન્યઃ સ ઉચ્યતે ॥ ૧,૪.૧૬॥

(૬) તદૂર્ધ્વસ્તોતસાં ષષ્ઠો દેવસર્ગસ્તુ સ સ્મૃતઃ ।
(૭) તતોઽર્વાક્સ્રોતસાં સર્ગઃ સપ્તમઃ સ તુ મા નુષઃ ॥ ૧,૪.૧૭॥

(૮)અષ્ટમોઽનુગ્રહઃ સર્ગઃ સાત્ત્વિકસ્તામસસ્તુ સઃ ।
પઞ્ચૈતે વૈકૃતાઃ સર્ગાઃ પ્રાકૃતાસ્તુ ત્રયઃ સ્મૃતાઃ ॥ ૧,૪.૧૮॥

પ્રાકૃતો વૈકૃતશ્ચાપિ (૯) કૌમારો નવમઃ સ્મૃતઃ ।
સ્થાવરાન્તાઃ સુરાદ્યાસ્તુ પ્રજા રુદ્ર ! ચતુર્વિધાઃ ॥ ૧,૪.૧૯॥

બ્રહ્મણઃ કુર્વતઃ સૃષ્ટિં જજ્ઞિરે માનસાઃ સુતાઃ ।
તતો દેવાસુરપિતૄન્માનુષાંશ્ચ ચતુષ્ટયમ્ ॥ ૧,૪.૨૦॥

સિસૃક્ષુરમ્ભાંસ્યેતાનિ સ્વમાત્માનમયૂયુજત્ ।
વ્યક્તાત્મનસ્તમોમાત્રાદુદ્રિક્તાસ્તત્પ્રજાપતેઃ ॥ ૧,૪.૨૧॥

સિસૃક્ષોર્જઘનાત્પૂર્વમસુરા જજ્ઞિરે તતઃ ।
ઉત્સસર્જ તતસ્તાં તુ તમોમાત્રાત્મિકાં તનૂમ્ ॥ ૧,૪.૨૨॥

તમોમાત્રા તનુસ્ત્યક્તા શઙ્કરાભૂદ્વિભાવરી ।
યક્ષોપક્ષાંસિ તદ્દેહે પ્રીતિમાપુસ્તતઃ સુરાઃ ॥ ૧,૪.૨૩॥

સત્ત્વોદ્રિક્તાસ્તુ મુખતઃ સંભૂતા બ્રહ્મણો હર ! ।
સત્ત્વપ્રાયા તનુસ્તેન સન્ત્યક્તા સાપ્યભૂદ્દિનમ્ ॥ ૧,૪.૨૪॥

તતો હિ બલિનો રાત્રાવસુરા દેવતા દિવા ।
સત્ત્વમાત્રાં તનું ગૃહ્ય પિતરશ્ચ તતોઽભવન્ ॥ ૧,૪.૨૫॥

સા ચોત્સૃષ્ટાભવત્સન્ધ્યા દિનનક્તાન્તરસ્થિતિઃ ।
રજોમાત્રાં તનું ગૃહ્ય મનુષ્યાસ્ત્વભવંસ્તતઃ ॥ ૧,૪.૨૬॥

સા ત્યક્તા ચાભવજ્જ્યોત્સ્ના પ્રાક્સન્ધ્યા યાભિધીયતે ।
જ્યોત્સ્ના રાત્ર્યહની સન્ધ્યા શરીરાણિ તુ તસ્ય વૈ ॥ ૧,૪.૨૭॥

રજોમાત્રાં તનુ ગૃહ્ય ક્ષુદભૂત્કોપ એવ ચ ।
ક્ષુત્તૃટ્ક્ષામા અમૃગ્ભક્ષા રાક્ષસા રક્ષણાચ્ચ યે ॥ ૧,૪.૨૮॥

યક્ષાખ્યા જક્ષણાજ્જ્ઞેયાઃ સર્પા વૈ કેશસર્પણાત્ ।
જાતાઃ કોપેન ભૂતાસ્તે ગન્ધર્વા જજ્ઞિરે તતઃ ॥ ૧,૪.૨૯॥

ગાયન્તો જજ્ઞિરે વાચં ગન્ધર્વાપ્સરસશ્ચ યે ।
સ્વર્ગં દ્યૌર્વક્ષસશ્ચક્રે સુખતોઽજાઃ સ મુષ્ટવાન્ ॥ ૧,૪.૩૦॥

સૃષ્ટવાનુદરાદ્ગાશ્ચ પાર્શ્વાભ્યાં ચ પ્રજાપતિઃ ।
પદ્ભ્યાં ચૈવાન્ત્યમાતઙ્ગાન્મહિષોષ્ટ્રાવિકાંસ્તથા ॥ ૧,૪.૩૧॥

ઓપધ્યઃ ફલમૂલિન્યો રોમભ્યસ્તસ્ય જજ્ઞિરે ।
ગૌરજઃ પુરુષો મેધ્યો હ્યશ્વાશ્વતરગર્દભાઃ ॥ ૧,૪.૩૨॥

એતાન્ગ્રામ્યાન્પશૂન્પ્રાહુરારણ્યાંશ્ચ નિબોધ મે ।
શ્વાપદં દ્વિખુરં હસ્તિવાનરાઃ પક્ષિપઞ્ચમાઃ ॥ ૧,૪.૩૩॥

ઔદકાઃ પશવઃ ષષ્ઠાઃ સપ્તમાશ્ચ સરીસૃપાઃ ।
પૂર્વાદિભ્યો મુખેભ્યસ્તુ ઋગ્વેદાદ્યાઃ પ્રજજ્ઞિરે ॥ ૧,૪.૩૪॥

આસ્યાદ્વૈ બ્રાહ્મણા જાતા બાહુભ્યાં ક્ષત્રિયાઃ સ્મૃતાઃ ।
ઊરુભ્યાં તુ વિશઃ સૃષ્ટાઃ શૂદ્રઃ પદ્ભ્યામ જાયત ॥ ૧,૪.૩૫॥

બ્રહ્મલોકો બ્રાહ્મણાનાં શાક્રઃ ક્ષત્રિયજન્મનામ્ ।
મારુતં ચ વિશાં સ્થાનં ગાન્ધર્વં શૂદ્રજન્મનામ્ ॥ ૧,૪.૩૬॥

બ્રહ્મચારિવ્રતસ્થાનાં બ્રહ્મલોકઃ પ્રજાયતે ।
પ્રાજાપત્યં ગૃહસ્થાનાં યથાવિહિતકારિણામ્ ॥ ૧,૪.૩૭॥

સ્થાનં સપ્તઋષીણાં ચ તથૈવ વનવાસિનામ્ ।
યતીનામક્ષયં સ્થાનં યદૃચ્છાગામિનાં સદા ॥ ૧,૪.૩૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સૃષ્ટિવર્ણનં નામ ચતુર્થોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫

ઇરિરુવાચ ।

કૃત્વેહામુત્રસંસ્થાનં પ્રજાસર્ગં તુ માનસમ્ ।

અથામૃજત્પ્રજાકર્તૄન્ભાનસાંસ્તનયાન્પ્રભુઃ ॥ ૧,૫.૧॥

ધર્મં રુદ્રં મનું ચૈવ સનકં ચ સનાતનમ્ ।
ભૃગું સનત્કુમારં ચ રુચિં શ્રદ્ધાં તથૈવ ચ ॥ ૧,૫.૨॥

મરીચિમત્ર્યઙ્ગિરસૌ પુલસ્ત્યં પુલહં ક્રતુમ્ ।
વસિષ્ઠં નારદં ચૈવ પિતૄન્બર્હિષદસ્તથા ॥ ૧,૫.૩॥

અગ્નિષ્વાત્તાંશ્ચ કવ્યાદાનાજ્યપાંશ્ચ સુકાલિનઃ ।
ઉપહૂતાંસ્તથા દીપ્યાં (પ્રા) સ્ત્રીંશ્ચ મૂર્તિવિવર્જિતાન્ ॥ ૧,૫.૪॥

ચતુરો મૂર્તિયુક્તાંશ્ચ અઙ્ગુષ્ઠાદ્દક્ષમીશ્વરમ્ ।
વામાં ગુષ્ઠાત્તસ્ય ભાર્યામસૃજત્પદ્મસમ્ભવઃ ॥ ૧,૫.૫॥

તસ્યાં તુ જનયામાસ દક્ષો દુહિતરઃ શુભાઃ ।
દદૌ તા બ્રહ્મપુત્રેભ્યઃ સતીં રુદ્રાય દત્તવાન્ ॥ ૧,૫.૬॥

રુદ્ર પુત્રા બભૂવુર્હિ અસંખ્યાતા મહાબલાઃ ।
ભૃગવે ચ દદૌ ખ્યાતિં રૂપેણાપ્રતિમાં શુભામ્ ॥ ૧,૫.૭॥

ભૃગોર્ધાતાવિધાતારૌ જનયામાસ સા શુભા ।
શ્રિયં ચ જનયામાસ પત્ની નારાયણસ્ય યા ॥ ૧,૫.૮॥

તસ્યાં વૈ જનયામાસ બલોન્માદૌ હરિઃ સ્વયમ્ ।
આયતિર્નિયતિશ્ચૈવ મનોઃ કન્યે મહાત્મનઃ ॥ ૧,૫.૯॥

ધાતાવિધાત્રોસ્તે ભાર્યે તયોર્જાતૌ સુતાવુભૌ ।
પ્રાણશ્ચૈવ મૃકણ્ડુશ્ચ માર્કણ્ડેયો મૃકણ્ડુતઃ ॥ ૧,૫.૧૦॥

પત્નિ મરીચેઃ સમ્ભૂતિઃ પૌર્ણમાસમસૂયત ।
વિરજાઃ સર્વગશ્ચૈવ તસ્ય પુત્રૌ મહાત્મનઃ ॥ ૧,૫.૧૧॥

સ્મૃતેશ્ચાંઙ્ગિરસઃ પુત્રાઃ પ્રસૂતાઃ કન્યકાસ્તથા ।
સિનીવાલી કુહૂશ્ચૈવ રાકા ચાનુમતિસ્તથા ॥ ૧,૫.૧૨॥

અનસૂયા તથૈવાત્રેર્જજ્ઞે પુત્રાનકલ્મષાન્ ।
સોમં દુર્વાસસં ચૈવ દત્તાત્રેયં ચ યોગિનમ્ ॥ ૧,૫.૧૩॥

પ્રીત્યાં પુલસ્ત્યભાર્યાયાં દત્તોલિસ્તત્સુતોઽભવત્ ।
કર્મશશ્ચાર્થવીરશ્ચ સહિષ્ણુશ્ચ સુતત્રયમ્ ॥ ૧,૫.૧૪॥

ક્ષમા તુ સુષુવે ભાર્યા પુલહસ્ય પ્રજાપતેઃ ।
ક્રતોશ્ચ સુમતિર્ભાર્યા બાલખિલ્યાનસૂયત ॥ ૧,૫.૧૫॥

ષષ્ટિર્યાનિ સહસ્રાણિ ઋષીણામૂર્ધ્વરેતસામ્ ।
અઙ્ગુષ્ઠપર્વમાત્રાણાં જ્વલદ્ભાસ્કરવર્ચસામ્ ॥ ૧,૫.૧૬॥

ઊર્જાયાં તુ વસિષ્ટસ્ય સપ્તાજાયન્ત વૈ સુતાઃ ।
રજોગાત્રોર્ધ્વબાહુશ્ચ શરણશ્ચાનઘસ્તથા ॥ ૧,૫.૧૭॥

સુતપાઃ શુક્ર ઇત્યેતે સર્વે સપ્તર્ષયોઽમલાઃ ।
સ્વાહાં પ્રાદાત્સ દક્ષોઽપિ શશરીરાય વહ્નયે ॥ ૧,૫.૧૮॥

તસ્માત્સ્વાહા સુતાંલ્લેભે ત્રીનુદારૌજસો હર ! ।
ફાવકં પવમાનં ચ શુચિં ચાપિ જલાશિનઃ ॥ ૧,૫.૧૯॥

પિતૃભ્યશ્ચ સ્વધા જજ્ઞે મેનાં વૈતરણીં તથા ।
તે ઉભે બ્રહ્મવાદિન્યૌ મેનાયાં તુ હિમાચલઃ ॥ ૧,૫.૨૦॥

મૈનાકં જનયામાસ ગૌરીં પૂર્વં તુ યા સતી ।
તતો બ્રહ્માત્મસમ્ભૂતં પૂર્વં સ્વાયંભુવં પ્રભુઃ ॥ ૧,૫.૨૧॥

આત્માનમેવ કૃતવાન્પ્રજાપાલ્યં મનું હર ! ।
શતરૂપાં ચ તાં નારીં તપોનિહતકલ્મષામ્ ॥ ૧,૫.૨૨॥

સ્વાયમ્ભુવો મનુર્દેવઃ પત્નિત્વે જગૃહે વિભુઃ ।
તસ્માચ્ચ પુરુષાદ્દેવી શતરૂપા વ્યજાયત ॥ ૧,૫.૨૩॥

પ્રિયવ્રતોત્તાનપાદૌ પ્રસૂત્યાકૂતિસંજ્ઞિતે ।
દેવહૂતિં મનુસ્તાસુ આકૂતિં રુચયે દદૌ ॥ ૧,૫.૨૪॥

પ્રસૂતિં ચૈવ દક્ષાય દવહૂતિં ચ કર્દમે ।
રુચેર્યજ્ઞો દક્ષિણાભૂદ્દક્ષિણાયાં ચ યજ્ઞતઃ ॥ ૧,૫.૨૫॥

અભવન્દ્વાદશ સુતા યામા નામ મહાબલાઃ ।
ચતુર્વોશતિકન્યાશ્ચ સૃષ્ટવાન્દક્ષ ઉત્તમાઃ ॥ ૧,૫.૨૬॥

શ્રદ્ધા ચલા ધૃતિસ્તુષ્ટિઃ પુષ્ટિર્મેધા ક્રિયા તથા ।
બુદ્ધિર્લજ્જા વપુઃ શાન્તિરૃદ્ધિઃ કીર્તિસ્ત્નયોદશી ॥ ૧,૫.૨૭॥

પત્ન્યર્થં પ્રતિજગ્રાહ ધર્મો દાક્ષાયણીપ્રભુઃ ।
ખ્યતિઃ સત્યથ સમ્ભૂતિઃ સ્મૃતિઃ પ્રીતિઃ ક્ષમા તથા ॥ ૧,૫.૨૮॥

સન્નતિશ્ચાનસૂયા ચ ઊર્જા સ્વાહા સ્વધા તથા ।
ભૃઘુર્ભવો મરીચિશ્ચ તથા ચૈવાઙ્ગિરા મુનિઃ ॥ ૧,૫.૨૯॥

પુલસ્ત્યઃ પુલહશ્ચૈવ ક્રતુશ્ચર્ષિવરસ્તથા ।
આત્રિર્વસિષ્ઠો વહ્નિશ્ચ પિતરશ્ચ યથાક્રમમ્ ॥ ૧,૫.૩૦॥

ખ્યાત્યાદ્યા જગૃહુઃ કન્યા મુનયો મુનિસત્તમાઃ ।
શ્રદ્ધા કામં ચલા દર્પં નિયમં ધૃતિરાત્મજમ્ ॥ ૧,૫.૩૧॥

સન્તોષં ચ તથા તુષ્ટિર્લોભં પુષ્ટિરસૂયત ।
મેધા શ્રુતં ક્રિયા દણ્ડં લયં વિનયમેવ ચ ॥ ૧,૫.૩૨॥

બોધં બુદ્ધિસ્તથા લજ્જા વિનયં વપુરાત્મજમ્ ।
વ્યવસાયં પ્રજજ્ઞે વૈ ક્ષેમં શાન્તિરસૂયત ॥ ૧,૫.૩૩॥

સુખમૃદ્ધિર્યશઃ કીર્તિરિત્યેતે ધર્મસૂનવઃ ।
કામસ્ય ચ રતિર્ભાર્યા તત્પુત્રો હર્ષ ઉચ્યતે ॥ ૧,૫.૩૪॥

ઈજે કદાચિદ્યજ્ઞેન હયમેધેન દક્ષકઃ ।
તસ્ય જામાતરઃ સર્વે યજ્ઞં જગ્મુર્નિમન્ત્રિતાઃ ॥ ૧,૫.૩૫॥

ભાર્યભિઃ સહિતાઃ સર્વે રુદ્રં દેવીં સતીં વિના ।
અનાહૂતા સતી પ્રાપ્તા દક્ષેણૈવાવમાનિતા ॥ ૧,૫.૩૬॥

ત્યક્ત્વા દેહં પુનર્જાતા મેનાયાં તુ હિમાલયાત્ ।
શમ્ભોર્ભાર્યાભવદ્ગૌરી તસ્યાં જજ્ઞે વિનાયકઃ ॥ ૧,૫.૩૭॥

કુમારશ્ચૈવ ભૃઙ્ગીશઃ ક્રુદ્ધો રુદ્રઃ પ્રતાપવાન્ ।
વિધ્વંસ્ય યજ્ઞં દક્ષં તુ તં શશાપ પિનાકધૃક્ ।
ધ્રુવસ્યાન્વયસમ્ભૂતો મનુષ્યસ્ત્વં ભવિષ્યસિ ॥ ૧,૫.૩૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પ્રજાકર્ત્રાદિસૃષ્ટિર્નામ પઞ્ચમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬

હરિરુવાચ ।

ઉત્તાનપાદાદભવત્સુરુચ્યામુત્તમઃ સુતઃ ।

સુનીત્યાં તુ ધ્રુવઃ પુત્રઃ સ લેભે સ્થાનમુત્તમમ્ ॥ ૧,૬.૧॥

મુનિપ્રસાદાદારાધ્ય દેવદેવં જનાર્દનમ્ ।
ધ્રુવસ્ય તનયઃ શ્લિષ્ટિર્મહાબલપરાક્રમઃ ॥ ૧,૬.૨॥

તસ્ય પ્રાચીનવર્હિસ્તુ પુત્રસ્તસ્યાપ્યુદારધીઃ ।
દિવઞ્જયસ્તસ્ય સુતસ્તસ્ય પુત્રો રિપુઃ સ્મૃતઃ ॥ ૧,૬.૩॥

રિપોઃ પુત્રસ્તથા શ્રીમાંશ્ચાક્ષુષઃ કીર્તિતો મનુઃ ।
રુરુસ્તસ્ય સુતઃ શ્રીમાનઙ્ગસ્તસ્યાપિ ચાત્મજઃ ॥ ૧,૬.૪॥

અઙ્ગસ્ય વેણઃ પુત્રસ્તુ નાસ્તિકો ધર્મવર્જિતઃ ।
અધર્મકારી વેણ(ન) શ્ચ મુનિભિશ્ચ કુશૈર્હતઃ ॥ ૧,૬.૫॥

ઊરું મમન્થુઃ પુત્રાર્થે તતોઽસ્ય તનયોઽભવત્ ।
હ્રસ્વોઽતિમાત્રઃ કૃષ્ણાઙ્ગો નિષીદેતિ તતોઽબ્રુવન્ ॥ ૧,૬.૬॥

નિષાદસ્તેન વૈ જાતો બિન્ધ્યશૈલનિવાસકઃ ।
તતોઽસ્ય દક્ષિણં પાણિં મમન્થુઃ સહસા દ્વિજાઃ ॥ ૧,૬.૭॥

તસ્માત્તસ્ય સુતો જાતો વિષ્ણોર્માનસરૂપધૃક્ ।
પુથુરિત્યેવનામા સ વેણપુત્રો દિવં યયૌ ॥ ૧,૬.૮॥

દુદોહ પૃથિવીં રાજા પ્રજાનાં જીવનાય હિ ।
અન્તર્ધાનઃ પૃથોઃ પુત્રો તહવિર્ધાનસ્તદાત્મજઃ ॥ ૧,૬.૯॥

પ્રાચીનવહર્સ્તત્પુત્રઃ પૃથિવ્યામેકરાડ્બભૌ ।
ઉપયેમે સમુદ્રસ્ય લવણસ્ય સ વૈ સુતામ્ ॥ ૧,૬.૧૦॥

તસ્માત્સુષાવ સામુદ્રી દશ પ્રાચીનબર્હિષઃ ।
સર્વે પ્રાચેતસા નામ ધનુર્વેદસ્ય પારગાઃ ॥ ૧,૬.૧૧॥

અપૃથગધર્મચરણાસ્તેઽતપ્યન્ત મહત્તપઃ ।
દશવર્ષસહસ્રાણિ સમુદ્રસલિલેશયાઃ ॥ ૧,૬.૧૨॥

પ્રજાપતિત્વં સમ્પ્રાપ્ય ભાર્યા તેષાં ચ મારિષ ।
અભવદ્ભવશાપેન તસ્યાં દક્ષોઽભવત્તતઃ ॥ ૧,૬.૧૩॥

અસૃજન્મનસા દક્ષઃ પ્રજાઃ પૂર્વં ચતુર્વોધાઃ ।
નાવર્ધન્ત ચ તાસ્તસ્ય અપધ્યાતા હરેણ તુ ॥ ૧,૬.૧૪॥

મૈથુનેન તતઃ સૃષ્ટિં કર્તુમૈચ્છત્પ્રજાપતિઃ ।
અસિક્નીમાવહદ્ભાર્યાં વીરણસ્ય પ્રજાપતેઃ ॥ ૧,૬.૧૫॥

તસ્ય પુત્રસહસ્રં તુ વૈરણ્યાં સમપદ્યત ।
નારદોક્તા ભુવશ્ચાન્તં ગતા જ્ઞાતું ચ નાગતાઃ ॥ ૧,૬.૧૬॥

દક્ષપુત્રસહસ્રં ચ તેષુ નષ્ટેષુ સૃષ્ટવાન્ ।
શવલાશ્વાસ્તેઽપિ ગતા ભ્રાતૃણાં પદવીં હર ! ॥ ૧,૬.૧૭॥

દક્ષઃ ક્રુધ્દ્ધઃ શશાપાથ નારદં જન્મ ચાપ્સ્યસિ ।
નારદો હ્યભવત્પુત્રઃ કશ્યપસ્ય મુનેઃ પુનઃ ॥ ૧,૬.૧૮॥

યજ્ઞે ધ્વસ્તેઽથ દક્ષોઽપિ શશાપોગ્રં મહેશ્વરમ્ ।
સ્તુત્વાત્વામુપચારૈશ્ચ પૂજયિષ્યન્તિ શઙ્કર ॥ ૧,૬.૧૯॥

જન્માન્તરેઽપિ વૈરેણ તે વિનશ્યન્તિ શઙ્કર ! ।
તસ્માદ્વૈરં ન કર્તવ્યં કદાચિદપિ કેનચિત્ ।
અસિક્ન્યાં (મહિષ્યાં) જનયામાસ દક્ષો દુહિતરો હ્યથ ॥ ૧,૬.૨૦॥

ષષ્ટિં કન્યા રૂપયુતા દ્વે ચૈવાઙ્ગિરસે દદૌ ।
દ્વે પ્રાદાત્સ કૃશાશ્વાય દશ ધર્માય ચાપ્યથ ॥ ૧,૬.૨૧॥

ચતુર્દશ કશ્યપાય અષ્ટાવિંશાતિમિન્દવે ।
પ્રદદૌ બહુપુત્રાય સુપ્રભાં ભામિનીં તથા ॥ ૧,૬.૨૨॥

મનોરમાં ભાનુમતીં વિશાલાં બહુદામથ ।
દક્ષઃ પ્રાદાન્મહાદેવ ! ચતસ્રોઽરિષ્ટનેમયે (ને) ॥ ૧,૬.૨૩॥

સ કૃશાશ્વાય ચ પ્રાદાત્સુપ્રજાં ચ તથા જયામ્ ।
અરુન્ધતી વસુર્યાર્(જા) મી લમ્બા ભાનુર્મરુદ્વતી ॥ ૧,૬.૨૪॥

સઙ્કલ્પા ચ મુહૂર્તા ચ સાધ્યા વિશ્વા ચ તા દશ ।
ધર્મપત્ન્યઃ સમાખ્યાતાઃ કશ્યપસ્ય વદામ્યહમ્ ॥ ૧,૬.૨૫॥

અદિતિર્દિતિર્દનુઃ કાલા હ્યનાયુઃ સિંહિકા મુનિઃ ।
કદ્રૂઃ સાધ્યા હરા ક્રોધા વિનતા સુરભિઃ ખગા ॥ ૧,૬.૨૬॥

વિશ્વેદેવાસ્તુ વિશ્વાયાઃ સાધ્યા સાધ્યાન્વ્યજાયત ।
મરુત્વત્યાં મરુત્વન્તો વસોસ્તુ વસવસ્તથા ॥ ૧,૬.૨૭॥

ભાનોસ્તુ ભાનવો રુદ્ર ! મુહૂર્તાચ્ચ મુહૂર્તજાઃ ।

લમ્બાયાશ્ચૈવ ઘોષોઽથ નાગવીથિસ્તુ યા (જા) મિતઃ ॥ ૧,૬.૨૮॥

પૃથિવીવિષયં સર્વમરુત્વત્યાં વ્યજાયત ।
સઙ્કુલ્પાયાસ્તુ સર્વાત્મા જજ્ઞે સંકલ્પ એવ હિ ॥ ૧,૬.૨૯॥

આપો ધ્રુવશ્ચ સોમશ્ચ ધરશ્ચૈવાનિલોઽનલઃ ।
પ્રત્યૂષશ્ચ પ્રભાસશ્ચ વસવો નામભિઃ સ્મૃતાઃ ॥ ૧,૬.૩૦॥

આપસ્ય પુત્રો વેતુણ્ડિઃ (ણ્ડઃ) શ્રમઃ શ્રાન્તો ધ્વનિસ્તથા ।
ધ્રુવસ્ય પુત્રો ભગવાન્કાલો લોકપ્રકાલનઃ ॥ ૧,૬.૩૧॥

સોમસ્ય ભગવાન્વર્ચા વર્ચસ્વી યેન જાયતે ।
ધરસ્ય પુત્રો દ્રુહિણો હુતહવ્યવહસ્તથા ॥ ૧,૬.૩૨॥

મનોહરાયાં શિશિરઃ પ્રાણોઽથ રમણસ્તથા ।
અનિલસ્ય શિવા ભાર્યા તસ્યાઃ પુત્રઃ પુલોમજઃ ॥ ૧,૬.૩૩॥

અવિજ્ઞાતગતિશ્ચૈવ દ્વૌ પુત્રાવનિલસ્ય તુ ।
અગ્નિપુત્રઃ કુમારસ્તુ શરસ્તમ્બે વ્યજાયત્ ॥ ૧,૬.૩૪॥

તસ્ય શાખો વિશાખશ્ચ નૈગમેયશ્ચ પૃષ્ટજઃ ।
અપત્યં કૃત્તિકાનાં તુ કાર્તિકેય ઇતિ સ્મૃતઃ ॥ ૧,૬.૩૫॥

પ્રત્યુષસ્ય વિદુઃ પુત્રમૃષિં નામ્ના તુ દેવલમ્ ।
વિશ્વકર્મા પ્રભાસસ્ય વિખ્યાતો દેવવર્ધકિઃ ॥ ૧,૬.૩૬॥

અજૈકપાદહિર્બુધ્ન્યસ્ત્વષ્ટા રુદ્રશ્ચ વીર્યવાન્ ।
ત્વષ્ટુશ્ચાપ્યાત્મજઃ પુત્રો વિશ્વરૂપો મહાતપાઃ ॥ ૧,૬.૩૭॥

હરશ્ચ બહુરૂપશ્ચ ત્ર્યમ્બકશ્ચાપરાજિતઃ ।
વૃષાકપિશ્ચ શમ્ભુશ્ચ કપર્દે રૈવતસ્તથા ॥ ૧,૬.૩૮॥

મૃગવ્યાધશ્ચ શર્વશ્ચ કપાલી ચ મહામુને ! ।
એકાદશૈતે કથિતા રુદ્રાસ્ત્રિભુવનેશ્વરાઃ ॥ ૧,૬.૩૯॥

અદિત્યાં કશ્યપાચ્ચૈવ સૂર્યા દ્વાદશ જજ્ઞિરે ।
વિષ્ણુઃ શક્રોઽર્ય્યમા ધાતા ત્વષ્ટા પૂષા તથૈવ ચ ॥ ૧,૬.૪૦॥

વિવસ્વાન્સવિતા ચૈવ મિત્રો વરુણ એવ ચ ।
અશુમાંશ્ચ ભગશ્ચૈવ આદિત્યા દ્વાદશ સ્મૃતાઃ ॥ ૧,૬.૪૧॥

સપ્તવિંશતિઃ સોમસ્ય પત્ન્યો નક્ષત્રસંજ્ઞિતાઃ ।
હિરણ્યકશિપુર્દિત્યાં હિરણ્યાક્ષોઽભવત્તદા ॥ ૧,૬.૪૨॥

સિંહિકા ચાભવત્કન્યા વિપ્રચિત્તિપરિગ્રહા ।
હિરણ્યકશિપોઃ પુત્રાશ્ચત્વારઃ પૃથુલૌજસઃ ॥ ૧,૬.૪૩॥

અનુહ્રાદશ્ચ હ્રાદશ્ચ પ્રહ્રાદશ્ચૈવ વીર્યવાન્ ।
સંહ્રાદશ્ચાવમસ્તેષાં પ્રહ્રાદો વિષ્ણુતત્પરઃ ॥ ૧,૬.૪૪॥

સંહ્રાદપુત્ર આયુષ્માઞ્છિબિર્વાષ્કલ એવ ચ ।
વિરોચનશ્ચ પ્રાહ્રાદિર્બલિર્જજ્ઞે વિરોચનાત્ ॥ ૧,૬.૪૫॥

બલેઃ પુત્રશતં ત્વાસીદ્બાણજ્યેષ્ઠં વૃષધ્વજ ! ।
હિરણ્યાક્ષસુતાશ્ચાસન્સર્વ એવ મહાબલાઃ ॥ ૧,૬.૪૬॥

ઉત્કુરઃ શકુનિશ્ચૈવ ભૂતસન્તાપનસ્તથા ।
મહાનાગો મહાબાહુઃ કાલનાભસ્તથાપરઃ ॥ ૧,૬.૪૭॥

અભવન્દનુપુત્રાશ્ચ દ્વિમૂર્ધા શઙ્કુરસ્તથા ।
અયોમુખઃ શઙ્કુશિરાઃ કપિલઃ શમ્બરસ્તથા ॥ ૧,૬.૪૮॥

એકચક્રો મહાબાહુસ્તારકશ્ચ મહાબલઃ ।
સ્વર્ભાનુર્વૃષપર્વા ચ પુલોમા ચ મહાસુરઃ ॥ ૧,૬.૪૯॥

એતે દનોઃ સુતાઃ ખ્યાતા વિપ્રચિત્તિશ્ચ વીર્યવાન્ ।
સ્વર્ભાનોઃ સુપ્રભા કન્યા શર્મિષ્ઠા વાર્ષપર્વણી ॥ ૧,૬.૫૦॥

ઉપદાનવી હયશિરાઃ પ્રખ્યાતા વરકન્યકાઃ ।
વૈશ્વાનરસુતે ચોભે પુલોમા કાલકા તથા ॥ ૧,૬.૫૧॥

ઉભે તે તુ મહાભાગે મારીચેસ્તુ પરિગ્રહઃ ।
તાભ્યાં પુત્રસહસ્રાણિ ષષ્ટિર્દાનવસત્તમાઃ ॥ ૧,૬.૫૨॥

પૌલોમાઃ કાલકઞ્જાશ્ચ મારીચતનયાઃ સ્મૃતાઃ ।
સિંહિકાયાં સમુત્પન્ના વિપ્રચિત્તિસુતાસ્તથા ॥ ૧,૬.૫૩॥

વ્યંશઃ શલ્યશ્ચ બલવાન્નભશ્ચૈવ મહાબલઃ ।
વાતાપિર્નમુચિશ્ચૈવ ઇલ્વલઃ ખસૃમાંસ્તથા ॥ ૧,૬.૫૪॥

અઞ્જ (ન્ત) કો નરકશ્ચૈવ કાલ નાભસ્તથૈવ ચ ।
નિવાતકવચા દૈત્યાઃ પ્રહ્રાદસ્ય કુલેઽભવન્ ॥ ૧,૬.૫૫॥

ષટ્સુતાશ્ચ મહાસત્ત્વાસ્તામ્રાયાઃ પરિકીર્તિતાઃ ।
શુકી શ્યેની ચ ભાસી ચ સુગ્રીવી શુચિગૃધ્રિકે ॥ ૧,૬.૫૬॥

શુકી શુકાનજનયદુલૂકી પ્રત્યલૂકકાન્ ।
શ્યેની શ્યેનાંસ્તથા ભાસી ભાસાન્ગૃધ્રાંશ્ચ ગૃધ્ર્યપિ ॥ ૧,૬.૫૭॥

શુચ્યૌદકાન્પક્ષિગણાન્સુગ્રીવી તુ વ્યજાયત ।
(અશ્વાનુષ્ટાન્ગર્દભાંશ્ચ તામ્રાવંશઃ પ્રકીર્તિતઃ ॥ ૧,૬.૫૮ ॥)
વિનતાયાસ્તુ પુત્રૌ દ્વૌ વિખ્યાતૌ ગરુડારુણૌ ।
સુરસાયાઃ સહસ્રં તુ સર્પાણામમિતૌજસામ્ ॥ ૧,૬.૫૯॥

કાદ્રવેયાશ્ચ ફણિનઃ સહસ્રમમિતૌજસઃ ।
તેષા પ્રાધાના ભૂતેશ ! શેષવાસુકિતક્ષકાઃ ॥ ૧,૬.૬૦॥

શઙ્ખઃ શ્વેતો મહાપદ્મઃ (શઙ્ખઃ) કમ્બલાશ્વતરૌ તથા ।
એલાપત્રસ્તથા નાગઃ કર્કોટકધનઞ્જયૌ ॥ ૧,૬.૬૧॥

ગણં ક્રોધવશં વિદ્ધિ તે ચ સર્વે ચ દંષ્ટ્રિણઃ ।
ક્રોધા તુ જનયામાસ પિશાચાંશ્ચ મહાબલાન્ ॥ ૧,૬.૬૨॥

ગાસ્તુ વૈ જનયામાસ સુરભિર્મહિષાંસ્તથા ।
ઇરા વૃક્ષલતાબલ્લીસ્તૃણજાતીશ્ચ સર્વશઃ ॥ ૧,૬.૬૩॥

ખગા ચ યક્ષરક્ષાંસિ મુનિરપ્સરસસ્તથા ।
અરિષ્ટા તુ મહાસત્ત્વાન્ગન્ધર્વાન્સમજીજનત્ ॥ ૧,૬.૬૪॥

દેવા એકોનપઞ્ચાશન્મરુતો હ્યભવન્નિતિ ।
એકજ્યો તિશ્ચ દ્વિજ્યોર્તિચતુર્જ્યોતિસ્તથૈવ ચ ॥ ૧,૬.૬૫॥

એકશુક્રો દ્વિશુક્રશ્ચ ત્રિશુક્રશ્ચ મહાબલઃ ।
ઈદૃક્સદૃક્તથાન્યાદૃક્તતઃ પ્રતિસદૃક્તથા ॥ ૧,૬.૬૬॥

મિતશ્ચ સમિતશ્ચૈવ સુમિતશ્ચ મહાબલઃ ।
ઋતજિત્સત્યજિચ્ચૈવ સુષેણઃ સેનજિત્તથા ॥ ૧,૬.૬૭॥

અતિમિત્રોઽપ્યમિત્રશ્ચ દૂરમિત્રોઽજિતસ્તથા ।
ઋતશ્ચ ઋતધર્મા ચ વિહર્તા વરુણો (ચમસો) ધ્રુવઃ ॥ ૧,૬.૬૮॥

વિધારણશ્ચ દુર્મેધા અયમેકગણઃ સ્મૃતઃ ।

ઈદૃશશ્ચ સદૃક્ષશ્ચ એતાદૃક્ષો મિતાશનઃ ॥ ૧,૬.૬૯॥

એતેનઃ પ્રસદૃક્ષશ્ચ સુરતશ્ચ મહાતપાઃ ।
હેતુમાન્પ્રસવસ્તદ્વત્સુરભશ્ચ મહાયશાઃ ॥ ૧,૬.૭૦॥

નાદિરુગ્રો ધ્વનિર્ભાસો બિમુક્તો વિક્ષિપઃ સહઃ ।
દ્યુતિર્વસુરનાધૃષ્યો લાભ કામો જયી વિરાટ્ ॥ ૧,૬.૭૧॥

ઉદ્વેષણો ગણો નામ વાયુસ્કન્ધે તુ સપ્તમે ।
એતત્સર્વં હરે રૂપં રાજાનો દાનવાઃ સુરાઃ ॥ ૧,૬.૭૨॥

સૂર્યાદિ પરિવારેણ મન્વાદ્યા ઈજિરે હરિમ્ ॥ ૧,૬.૭૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઉત્તાનપાદવંશાદિવર્ણનં નામ ષષ્ઠોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭
રુદ્ર ઉવાચ ।
સૂર્યાદિપૂજનં બ્રૂહિ કૃતં સ્વાયમ્ભુવાદિભિઃ ।
ભુક્તિમુક્તિપ્રદં સારં વ્યાસ ! સંક્ષેપતઃ પરમ્ ॥ ૧,૭.૧॥

હરિરુવાચ ।
સૂર્યાદિપૂજાં વક્ષ્યામિ ધર્મકામાદિકારિકામ્ ॥ ૧,૭.૨॥

ૐ સૂર્યાસનાય નમઃ ।
ૐ નમઃ સૂર્યમૂર્તયે ।
ૐ હ્રાં હ્રીં સઃ સૂર્યાય નમઃ ।
ૐ સોમાય નમઃ ।
ૐ મઙ્ગલાય નમઃ ।
ૐ બુધાય નમઃ
ૐ બૃહસ્પતયે નમઃ ।
ૐ શુક્રાય નમઃ ।
ૐ શનૈશ્ચરાય નમઃ ।
ૐ રાહવે નમઃ ।
ૐ કેતવે નમઃ ।
ૐ તેજશ્ચણ્ડાય નમઃ ॥ ૧,૭.૩॥

આસનાવાહનં પાદ્યમર્ઘ્યમાચમનં તથા ।
સ્નાનં વસ્ત્રોપવીતઞ્ચ ગન્ધપુષ્પં ચ ધૂપકમ્ ॥ ૧,૭.૪॥

દીપકં ચ નસ્કારં પ્રદક્ષિણવિસર્જને ।
સૂર્યાદીનાં સદા કુર્યાદિતિ મન્ત્રૈર્વૃષધ્વજ ! ॥ ૧,૭.૫॥

ૐ હ્રાંશિવાય નમઃ ।
ૐ હ્રાં શિવમૂર્તયે શિવાય નમઃ ।
ૐ હ્રાં હૃદયાય નમઃ ।
ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ ।
ૐ હ્રૈં કવચાય હું ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ અસ્ત્રાય નમઃ ।
ૐ હ્રાં સદ્યોજાતય નમઃ ।
ૐ હ્રીં વામદેવાય નમઃ ।
ૐ હ્રૂં અઘોરાય નમઃ ।
ૐ હ્રૈં તત્પુરુષાય નમઃ ।
ૐ હ્રૌં ઈશાનાય નમઃ ।
ૐ હ્રીં ગૌર્યૈ નમઃ ।
ૐ હ્રૌં ગુરુભ્યો નમઃ ।
ૐ હ્રૌં ઇન્દ્રાય નમઃ ।
ૐ હ્રૌં ચણ્ડાય નમઃ ।
ૐ હ્રાં અઘોરાય નમઃ ।
ૐ વાસુદેવાસનાય નમઃ ।
ૐ વાસુદવમૂર્તયે નમઃ ।
ૐ અં ૐ નમો ભગવતે વાસુદેવાય નમઃ ।
ૐ આં ૐ નમો ભગવતે સઙ્કર્ષણાય નમઃ ।
ૐ અં ૐ નમો ભગવતે પ્રદ્યુમ્નાય નમઃ ।
ૐ અઃ ૐ નમો ભગવતે અનિરુદ્ધાય નમઃ ।
ૐ નારાયણાય નમઃ ।
ૐ તત્સબ્દ્રહ્મણે નમઃ ।
ૐ હ્રાં વિષ્ણવે નમઃ ।

ૐ ક્ષ્રૌં નમો ભગવતે નરસિંહાય નમઃ ।

ૐ ભૂઃ ૐ નમો ભગવતે વરાહાય નમઃ ।

ૐ કં ટં પં શં વૈનતેયાય નમઃ ।

ૐ જં ખં રં સુદર્શ નાય નમઃ ।

ૐ ખં ઠં ફં ષં ગદૈયૌ નમઃ ।

ૐ વં લં મં ક્ષં પાઞ્ચજન્યાય નમઃ ।

ૐ ઘં ઢ ભં હં શ્રિયૈ નમઃ ।

ૐ ગં ડં વં સં પુષ્ટ્યૈ નમઃ ।

ૐ ધં ષં વં સં વનમાલાયૈ નમઃ ।

ૐ સં દં લં શ્રીવત્સાય નમઃ ।

ૐ ઠં ચં ભં યં કૌસ્તુભાય નમઃ ।

ૐ ગુરુભ્યો નમઃ ।

ૐ ઇન્દ્રાદિદિક્પાલેભ્યો નમઃ ।

ૐ વિષ્વક્સેનાય નમઃ ॥ ૧,૭.૬॥

આસનાદીન્હરેરતૈર્મન્ત્રૈર્મન્ત્રૈર્દદ્યાદ્વૃષધ્વજ ! ।
વિષ્ણુશક્ત્યાઃ સરસ્વત્યાઃ પૂજાં શ ृણુ શુભપ્રદામ્ ॥ ૧,૭.૭॥

ૐ હ્રીં સરસ્વત્યૈ નમઃ ।

ૐ હ્રાં હૃદયાય નમઃ ।

ૐ હ્રીં શિરસે નમઃ ।

ૐ હ્રૂં શિખાયૈ નમઃ ।

ૐ હ્રૈં કવચાય નમઃ ।

ૐ હ્રૌં નેત્રત્રયાય નમઃ ।

ૐ હ્રઃ અસ્ત્રાય નમઃ ॥ ૧,૭.૮॥

શ્રદ્ધા ઋદ્ધિઃ કલા મેધા તુષ્ટિઃ પુષ્ટિઃ પ્રભા મતિઃ ।
ૐ હ્રીઙ્કારાદ્યા નમોઽન્તાશ્ચ સરસ્વત્યાશ્ચ શક્તયઃ ॥ ૧,૭.૯॥

ક્ષેત્રપાલાય નમઃ ।

ૐ ગુરુભ્યો નમઃ ।

ૐ પરમગુરુભ્યો નમઃ ॥ ૧,૭.૧૦॥

પદ્મસ્થાયાઃ સરસ્વત્યા આસનાદ્યં પ્રકલ્પયેત્ ।
સૂર્યાદીનાં સ્વકૈર્મન્ત્રૈઃ પવિત્રારોહણં તથા ॥ ૧,૭.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સૂર્યાદીનાં સરસ્વત્યાશ્ચ પૂજનં નામ સપ્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮
હરિરુવાચ ।
ભૂમિષ્ઠે મણ્ડપે સ્નાત્વા મણ્ડલે વિષ્ણુમર્ચયેત્ ।
પઞ્ચરઙ્ગિકચૂર્ણેન વજ્રનાભં તુ મણ્ડલમ્ ॥ ૧,૮.૧॥

ષોડશૈઃ કોષ્ઠકૈસ્તત્ર સમ્મિતં રુદ્ર? કારયેત્ ।
ચતુર્થપઞ્ચકોણેષુ સૂત્રપાતં તુ કારયેત્ ॥ ૧,૮.૨॥

કોણસૂત્રાદુભયતઃ કોણા યે તત્ર સંસ્થિતાઃ ।
તેષુ ચૈવ પ્રકુર્વીત સૂત્રપાતં વિચક્ષણઃ ॥ ૧,૮.૩॥

તદનન્તરકોણેષુ એવમેવ હિ કારયેત્ ।
પ્રથમા નાભિરુદ્દિષ્ટા મધ્યે રેખાપ્રસંગમે ॥ ૧,૮.૪॥

અન્તરેષુ ચ સર્વેષુ અષ્ટૌ ચૈવ તુનાભયઃ ।
પૂર્વમધ્યમનાભિ ભ્યામથં સૂત્રં તુ ભ્રામયેત્ ॥ ૧,૮.૫॥

અન્તરા સ દ્વિજશ્રેષ્ઠઃ પાદોનં ભ્રામયેદ્ધર ! ।
અનેન નાભિસૂત્રસ્ય કર્ણિકાં ભ્રામયેચ્છિવ ! ॥ ૧,૮.૬॥

કર્ણિકાયા દ્વિભાગેન કેસરાણિ વિચક્ષણઃ ।
તદગ્રેણ સદા વિદ્વાન્દલાન્યેવ સમાલિખેત્ ॥ ૧,૮.૭॥

સર્વેષુ નાભિક્ષેત્રષુ માનેનાનેન સુવ્રત ! ।
પદ્માનિ તાનિ કુર્વીત દેશિકઃ પર માર્થવિત્ ॥ ૧,૮.૮॥

આદિસૂત્રવિભાગેન દ્વારાણિ પરિકલ્પયેત્ ।
દ્વારશોભાં તથા તત્ર તદર્ધેન તુ કલ્પયેત્ ॥ ૧,૮.૯॥

કર્ણિકાં પીતવર્ણેન સિતરક્તાદિકેસરૈઃ ।
અન્તરં નીલવર્ણેન દલાનિ અસિતેન ચ ॥ ૧,૮.૧૦॥

કૃષ્ણવર્ણેન રજસા ચતુરશ્રં પ્રપૂરયેત્ ।
દ્વારાણિ શુક્લવર્ણેન રેખાઃ પઞ્ચ ચ મણ્ડલે ॥ ૧,૮.૧૧॥

સિતા રક્તા તથા પીતા કૃષ્ણા ચૈવ યથાક્રમમ્ ।

કૃત્વૈવ મણ્ડલઞ્ચાદૌ ન્યાસં કૃત્વાર્ચયેદ્ધરિમ્ ॥ ૧,૮.૧૨॥

હૃન્મધ્યે તુ ન્યસેદ્વિષ્ણું કણ્ઠે સઙ્કર્ષણં તથા ।
પ્રદ્યુમ્નં શિરસિ ન્યસ્ય શિખાયામનિરુદ્ધકમ્ ॥ ૧,૮.૧૩॥

બ્રહ્માણં સર્વગાત્રેષુ કરયોઃ શ્રીધરં તથા ।
અહં વિષ્ણુરિતિ ધ્યાત્વા કર્ણિકાયાં ન્યસેદ્ધરિમ્ ॥ ૧,૮.૧૪॥

ન્યસેત્સઙ્કર્ષણં પૂર્વે પ્રદ્યુમ્નં ચૈવ દક્ષિણે ।
અનિરુદ્ધં પશ્ચિમે ચ બ્રિહ્માણં ચોત્તરે ન્યસેત્ ॥ ૧,૮.૧૫॥

શ્રીધરં રુદ્રકોણેષુ ઇન્દ્રાદીન્દિક્ષુ વિન્યસેત્ ।
તતોઽભ્યર્ચ્ય ચ ગન્ધાદ્યૈઃ પ્રાપ્નુયાત્પરમં પદમ્ ॥ ૧,૮.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુપૂજોપયોગિવજ્રનાભમણ્ડલનિરૂપણં નામાષ્ટમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯
હરિરુવાચ ।
સમયે (યા) દીક્ષિતઃ શિષ્યો બદ્ધનેત્રસ્તુ વાસસા ।
અષ્ટાહુતિશતં તસ્ય મૂલમન્ત્રેણ હોમયેત્ ॥ ૧,૯.૧॥

દ્વિગુણં પુત્રકે હોમં ત્રિગુણં સાધકે મતમ્ ।
નિર્વાણદેશિકે રુદ્ર ! ચતુર્ગુણમુદાહૃતમ્ ॥ ૧,૯.૨॥

ગુરુવિષ્ણુદ્વિજસ્ત્રીણાં હન્તા બધ્યસ્ત્વ(શ્ચ)દીક્ષિતૈઃ ।
અથ દીક્ષાં પ્રવક્ષ્યામિ ધર્માધર્મક્ષયઙ્કરીમ્ ॥ ૧,૯.૩॥

ઉપવેશ્ય બહિઃ શિષ્યાન્ધારણં તેષુ કારયેત્ ।
વાયવ્યા કલયા રુદ્ર શોષ્યમાણાન્વિચિન્તયેત્ ॥ ૧,૯.૪॥

આગ્નેય્યા દહ્યમાનાંશ્ચ પ્લાવિતાનમ્ભસા પુનઃ ।
તેજસ્તેજાસિ તં જીવમેકીકૃત્ય સમાક્ષિપેત્ ॥ ૧,૯.૫॥

પ્રાણવં ચિન્તયેદ્વ્યોમ્નિ શરીરેઽન્યત્તુ કારણમ્ ।
એકૈકં યો જયેત્તત્ર ક્ષેત્રજ્ઞં દેહકારણાત્ ॥ ૧,૯.૬॥

ઉત્પાદ્ય યોજયેત્પશ્ચાદેકૈકં વૃષભધ્વજ ।
મણ્ડલાદિષ્વશક્તસ્તુ કલ્પયિત્વાઽર્ચયેદ્ધરિમ્ ॥ ૧,૯.૭॥

ચતુર્દ્વારં ભવેત્તચ્ચ બ્રહ્મતીર્થાદનુક્રમાત્ ।
હસ્તં પદ્મં સમાખ્યાતં પત્રાણ્યઙ્ગુલયઃ સ્મૃતાઃ ॥ ૧,૯.૮॥

કર્ણિકા તલહસ્તન્તુ નખાન્યસ્ય તુ કેસરાઃ ।
તત્રાર્ચયેદ્ધરિં ધ્યાત્વા સૂર્યેન્દ્વગ્ન્યન્તરેવ ચ ॥ ૧,૯.૯॥

તં હસ્તં પાતયેન્મૂર્ધ્નિ શિષ્યસ્ય તુ સમાહિતઃ ।
હસ્તે વિષ્ણુઃ સ્થિતો યસ્માદ્વિષ્ણુહસ્તસ્તતસ્ત્વયમ્ ।
નશ્યન્તિ સ્પર્શનાત્તસ્ય પાતકાન્યખિલાનિ ચ ॥ ૧,૯.૧૦॥

ગુરુઃ શિષ્યં સમભ્યર્ચ્ય નેત્રે બધ્દ્વે તુ વાસસા ।
દેવસ્ય પ્રમુખં કૃત્વા પુષ્પમેવાર્પયેત્તતઃ ।
પુષ્પં નિપતિતં યત્ર મૂર્ધ્નો દેવસ્ય શાર્ઙ્ગિણઃ ॥ ૧,૯.૧૧॥

તન્નામ કારયેત્તસ્ય સ્ત્રીણાં નામાઙ્કિતં સ્વયમ્ ।
શૂદ્રાણાં દાસસંયુક્તં કારયેત્તુ વિચક્ષણઃ ॥ ૧,૯.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુદીક્ષાનિદૃ નામ નવમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦
હરિરુવાચ ।
૨ શ્યાદિપૂજાં પ્રવક્ષ્યામિ સ્થણ્ડિલાદિષુ સિદ્ધયે ।
શ્રીં હ્રીં મહાલક્ષ્મ્યૈ નમઃ ।
શ્રાં શ્રીં શ્રૂં શ્રૈં શ્રૌં શ્રઃ ક્રમાદ્ધૃદયં ચ શિરઃ શિખામ્ ।
કવચં નેત્રમસ્ત્રં ચ આસનં મૂર્તિમર્ચયેત્ ॥ ૧,૧૦.૧॥

મણ્ડલે પદ્મગર્ભે ચ ચતુર્દ્વારિ રજોऽન્વિતે ।
ચતુઃ ષષ્ટ્યન્તમષ્ટાદિ ખાક્ષે ખાક્ષ્યાદિ મણ્ડલમ્ ॥ ૧,૧૦.૨॥

ખાક્ષીન્દુસૂર્યગં સર્વં ખાદિવેદેન્દુવર્તનાત્ ।
લક્ષ્મીમઙ્ગાનિ ચૈકસ્મિન્કોણે દુર્ગાં ગણં ગુરુમ્ ॥ ૧,૧૦.૩॥

ક્ષેત્રપાલમથાગ્ન્યાદૌ હોમાગ્જુહાવ કામભાક્ ।
ૐ ઘં ટં ડં હં શ્રીમહાલક્ષ્મ્યૈ નમઃ ॥ ૧,૧૦.૪॥

અનેન પૂજયેલ્લક્ષ્મીં પૂર્વોક્તપરિવારકૈઃ ।
ૐ સૈં સરસ્વત્યૈ નમઃ ।

ॐ હ્રીં સૈં સરસ્વત્યૈ નમઃ ॥ ૧,૧૦.૫॥

ॐ હ્રીં વદવદવાગ્વાદિનિસ્વાહા ॐ હ્રીં સરસ્વત્યૈ નમઃ ॥ ૧,૧૦.૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
લક્ષ્મ્યર્ચનનિરૂપણં નામ દશમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧
હરિરુવાચમ્ ।
નવવ્યૂહાર્ચનં વક્ષ્યે યદુક્તં કશ્યપાય હિ ।
જીવમુત્ક્ષિપ્ય મૂર્ધન્યં નાભ્યાં વ્યોમ્નિનિવેશયેત્ ॥ ૧,૧૧.૧॥

તતોરમિતિ બીજેન દહેદ્ભૂતાત્મકં વપુઃ ।
યમિત્યનેન બીજેન તચ્ચ સર્વ વિનાશયેત્ ॥ ૧,૧૧.૨॥

લમિત્યનેન બીજેન પ્લાવયેત્સચરાચરમ્ ।
વમિત્યનેન બીજેન ચિન્તયેદમૃતં તતઃ ॥ ૧,૧૧.૩॥

તતો બુદ્બુદમધ્યે તુ પીતવાસાશ્ચતુર્ભુજઃ ।
અહં મતસ્તથાત્માનં ધ્યાનેન પરિચિન્તયેત્ ॥ ૧,૧૧.૪॥

મન્ત્રન્યાસં તતઃ કુર્યાત્ત્રિવિધં કરદેહયોઃ ।
દ્વાદશાક્ષરબીજેન ઉક્તબીજૈરનન્તરમ્ ॥ ૧,૧૧.૫॥

ષડઙ્ગેન તતઃ કુર્યાત્સાક્ષાદ્યેન હરિર્ભવેત્ ।
દક્ષિણાઙ્ગુષ્ઠમારભ્ય મધ્યાઙ્ગુષ્ઠન્દલે ન્યસેત્ ॥ ૧,૧૧.૬॥

મધ્યે બીજદ્વયં ન્યસ્ય ન્યસેદઙ્ગે તતઃ પુનઃ ।
હૃચ્છિરસિ શિખાવર્મવક્ત્રાક્ષ્યુદહપૃષ્ઠતઃ ॥ ૧,૧૧.૭॥

બાહ્વોશ્ચ કરયોર્જાન્વોઃ પાદયોશ્ચાપિ વિન્યસેત્ ।
પદ્માકારૌ કરૌ કૃત્વા મધ્યેઽઙ્ગુષ્ઠં નિવેશયેત્ ॥ ૧,૧૧.૮॥

ચિન્તયેત્તત્ર સર્વેશં પરં તત્ત્વમનામયમ્ ।
ક્રમાચ્ચૈતાનિ બીજાનિ તર્જન્યાદિષુ વિન્ય સેત્ ॥ ૧,૧૧.૯॥

તતો મૂર્ધાક્ષિવક્ત્રેષુ કણ્ઠે ચ હૃદયે તથા ।
નાભૌ ગુહ્યે તથા જાન્વોઃ પાદયોર્વિન્યસેત્ક્રમાત્ ॥ ૧,૧૧.૧૦॥

પાણ્યોઃ ષડઙ્ગબીજાનિ ન્યસ્ય કાયે તતો ન્યસેત્ ।

અઙ્ગુષ્ઠાદિકનિષ્ઠાન્તં વિન્યસેદ્બીજપઞ્ચકમ્ ॥ ૧,૧૧.૧૧॥

કરમધ્યે નેત્રબીજમઙ્ગન્યાસઽપ્યયં ક્રમઃ ।
હૃદયે હૃદયં ન્યસ્ય શિરઃ શિરસિ વિન્યસેત્ ॥ ૧,૧૧.૧૨॥

શિખાયાં તુ શિખાં ન્યસ્ય કવચં સર્વતસ્તનૌ ।
નેત્રં નેત્રે વિધાતવ્યમસ્ત્રઞ્ચ કરયોર્દ્વયોઃ ॥ ૧,૧૧.૧૩॥

તેનૈવ ચ દિશો બદ્ધ્વા પૂજા વિધિમથાચરેત્ ।
હૃદયે ચિન્તયેત્પૂર્વં યોગપીઠં સમાહિતઃ ॥ ૧,૧૧.૧૪॥

ધર્મં જ્ઞાનં ચ વૈરાગ્યમૈશ્વર્યં ચ યથાક્રમમ્ ।
આગ્નેયાદૌ ચ પૂર્વાદાવધર્માદીંશ્ચ વિન્યસેત્ ॥ ૧,૧૧.૧૫॥

એભિઃ પરિચ્છન્નતનું પીઠભૂતં તદાત્મકમ્ ।
અનન્તં વિન્સેત્પશ્ચાત્પૂર્વકાયોન્નતં સ્થિતમ્ ॥ ૧,૧૧.૧૬॥

તતો વિધાત્સરોજાતં દલાષ્ટસમદિગ્દલમ્ ।
સિતાબ્જં શતપત્રાઢ્યં વિપ્રકીર્ણોર્ધકર્ણિકમ્ ॥ ૧,૧૧.૧૭॥

ધ્યાત્વા વેદાદિના પશ્ચાત્સૂર્યસોમાનલાત્મનામ્ ।
મણ્ડલાનિ ક્રમાદેવમુપર્યુપરિ ચિન્તયેત્ ॥ ૧,૧૧.૧૮॥

તતઃ પૂર્વાદિદિક્સંસ્થાઃ શક્તીઃ કેશવગોચરાઃ ।
વિમલાદ્યા ન્યસેદષ્ટૌ નવમીં કર્ણિકાગતામ્ ॥ ૧,૧૧.૧૯॥

એવં ધ્યાત્વા સમભ્યર્ચ્ય યોગપીઠમનન્તરમ્ ।
મનસાવાહ્ય તત્રેશં હરિં શાર્ઙ્ગ ન્યસેત્પુનઃ ॥ ૧,૧૧.૨૦॥

હૃદયાદીનિ પૂર્વાદિચતુર્દિગ્દલયોગતઃ ।
મધ્યે નેત્રં તુ કોણેષુ અસ્ત્રમન્ત્રં ન્યસેત્તતઃ ॥ ૧,૧૧.૨૧॥

સઙ્કર્ષણાદિબીજાનિ પૂર્વાદિક્રમયોગતઃ ।
દ્વારિ પૂર્વે પરે ચૈવ વૈનતેયં તુ વિન્યસેત્ ॥ ૧,૧૧.૨૨॥

સુદર્શનં સહસ્રારં દક્ષિણે દ્વારિ વિન્યસેત્ ।
શ્રિયં દક્ષિણતો ન્યસ્ય લક્ષ્મીમુત્તરતસ્તથા ॥ ૧,૧૧.૨૩॥

દ્વાર્યત્તરે ગદાં ન્યસ્ય શઙ્ખં કોણેષુ વિન્યસેત્ ।
દેવદક્ષિણતઃ શાર્ઙ્ગ વામે ચૈવ સુધીર્ન્યસેત્ ॥ ૧,૧૧.૨૪॥

તદ્વત્ખડ્ગં તથા ચક્રં ન્યસેત્પાર્શ્વદ્વયોર્દ્વયમ્ ।
તતોઽન્તર્લોકપાલાંશ્ચ સ્વદિગ્ભેદેન વિન્યસેત્ ॥ ૧,૧૧.૨૫॥

વજ્રાદીન્યાયુધાન્યેવ તથૈવ વિનિવેશયેત્ ।
ઊર્ધ્વં બ્રિહ્મ તથાનન્તમધશ્ચ પરિચિન્તયેત્ ॥ ૧,૧૧.૨૬॥

સર્વં ધ્યાત્વેતિ સમ્પૂજ્ય મુદ્રાઃ સન્દર્શયેત્તતઃ ।
અઞ્જલિઃ પ્રથમા મુદ્રા ક્ષિપ્રં દેવપ્રસાધની ॥ ૧,૧૧.૨૭॥

વન્દની હૃદયાસક્તાત્સાર્ધં દક્ષિણતોન્નતા ।
ઊર્ધાઙ્ગુણ્ઠો વામમુષ્ટિર્દક્ષિણાઙ્ગુષ્ઠબન્ધનઃ ॥ ૧,૧૧.૨૮॥

સવ્યસ્ય તસ્ય ચાઙ્ગુષ્ઠો યઃ સ ઉદ્ધઃ પ્રકીર્તિતઃ ।
તિસ્રઃ સાધારણા હ્યેતા મૂર્તિભેદેન કલ્પિતાઃ ॥ ૧,૧૧.૨૯॥

કનિષ્ઠાદિપ્રમોકેણ અષ્ટૌ મુદ્રા યથાક્રમમ્ ।
અષ્ટાનાં પૂર્વબીજાનાં ક્રમશસ્ત્વવધારયેત્ ॥ ૧,૧૧.૩૦॥

અઙ્ગુષ્ઠેન કનિષ્ઠાન્તં નામયિત્વાઙ્ગુલિત્રયમ્ ।
મુદ્રેયં નરસિંહસ્ય ન્યુબ્જં કૃત્વા કરદ્વયમ્ ॥ ૧,૧૧.૩૧॥

સવ્યહસ્તં તથોત્તાનં કૃત્વોર્ધ્વં ભ્રામયેચ્છનૈઃ ।
નવમીયં સ્મૃતા મુદ્રા વરાહાભિમતા સદા ॥ ૧,૧૧.૩૨॥

મુષ્ટિદ્વયમથોત્તાનમૃજ્વૈકૈકેન મોચયેત્ ।
ઉત્કુઞ્ચયેત્સર્વમુક્તા અઙ્ગમુદ્રેયમુચ્યતે ॥ ૧,૧૧.૩૩॥

મુષ્ટિદ્વયમથો બદ્ધ્વા એવમેવાનુપૂર્વશઃ ।
દશાનાં લોકપાલાનાં મુદ્રાશ્ચ ક્રમયોગતઃ ॥ ૧,૧૧.૩૪॥

સુરમાદ્યં દ્વિતીયં ચ ઉપાન્ત્યઞ્ચાન્ત્યમેવ ચ ।
વાસુદેવો બલઃ કામો હ્યનિરુદ્ધો યથાક્રમમ્ ॥ ૧,૧૧.૩૫॥

પ્રણવસ્તત્સદિત્યેતધું ક્ષ્રૌં ભૂરિતિ મન્ત્રકાઃ ।
નારાયણસ્તથા બ્રહ્મા વિષ્ણુઃ સિંહો વરાહરાટ્ ॥ ૧,૧૧.૩૬॥

સિતારુણહરિદ્રાભા નીલશ્યામલ્લોહિતાઃ ।
મેઘાગ્નિમદુપિઙ્ગાભા વર્ણતો નવનામકાઃ ॥ ૧,૧૧.૩૭॥

કં ટં પં શં ગરુત્માન્સ્યાજ્જં ખં વં ચ સુદર્શનમ્ ।
ષં ચં ફં ષં ગદાદેવી વં લં મં ક્ષં ચ શઙ્ખકમ્ ॥ ૧,૧૧.૩૮॥

ઘં ઢં ભં હં ભવેચ્છ્રીશ્ચ ગં જં વં શં ચ પુષ્ટિકા ।
ઘં વં ચ વનમાલા સ્યાચ્છ્રી વત્સં દં સં ભવેત્ ॥ ૧,૧૧.૩૯॥

છં ડં પં યં કૌસ્તુભઃ પ્રોક્તશ્ચાનન્તો હ્યહમેવ ચ ।
ઇત્યઙ્ગાનિયથાયોગં દેવદેવસ્ય વૈ દશા ॥ ૧,૧૧.૪૦॥

ગરુડોઽમ્બુજસંકાશો ગદા ચૈવાસિતાકૃતિઃ ।
પુષ્ટિઃ શિરીષપુષ્પાભા લક્ષ્મીઃ કાઞ્ચનસન્નિભા ॥ ૧,૧૧.૪૧॥

પૂર્ણચન્દ્રનિભઃ શઙ્ખઃ કૌસ્તુભસ્ત્વરુણદ્યુતિઃ ।
ચક્રં સૂર્યસહસ્રાભં શ્રીવત્સઃ કુન્દસન્નિભઃ ॥ ૧,૧૧.૪૨॥

પઞ્ચવર્ણનિભા માલા હ્યનન્તો મેઘસન્નિભઃ ।
વિદ્યુદ્રૂપાણિ ચાસ્ત્રાણિ યાનિ નોક્તાનિ વર્ણતઃ ॥ ૧,૧૧.૪૩॥

અર્ઘ્યપાદ્યાદિ વૈ દદ્યાત્પુણ્ડરીકાક્ષવિદ્યયા ॥ ૧,૧૧.૪૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નવવ્યૂહાર્ચનં નામૈકાદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨

હરિરુવાચ ।
પૂજાનુક્રમસિદ્ધ્યર્થં પૂજાનુક્રમ ઉચ્યતે ।
ૐ નમ ઇત્યાદૌ સંસ્મૃતિઃ પરમાત્મનઃ ॥ ૧,૧૨.૧॥

યં રં વં લમિતિ કાયશુદ્ધિઃ ।
ૐ નમ ઇતિ ચતુર્ભુજાત્મનિર્માણમ્ ॥ ૧,૧૨.૨॥

તતસ્ત્રિવિધઃ કરકાયન્યાસઃ ।
તતો હૃદિસ્થયોગપીઠપૂજા ।
ૐ અનન્તાય નમઃ ।
ૐ ધર્માય નમઃ ।
ૐ જ્ઞાનાય નમઃ ।
ૐ વૈરાગ્યાય નમઃ ।
ૐ ઐશ્વર્યાય નમઃ ।
ૐ અધર્માય નમઃ ।

ૐ અજ્ઞાનાય નમઃ ।

ૐ અવૈરાગ્યાય નમઃ ।

ૐ અનૈશ્વર્યાય નમઃ ।

ૐ પદ્માય નમઃ ।

ૐ આદિત્યમણ્ડલાય નમઃ ।

ૐ ચન્દ્રમણ્ડલાય નમઃ ।

ૐ વહ્નિમણ્ડલાય નમઃ ।

ૐ વિમલાયૈ નમઃ ।

ૐ ઉત્કર્ષિણ્યૈ નમઃ ।

ૐ જ્ઞાનાયૈ નમઃ ।

ૐ ક્રિયાયૈ નમઃ ।

ૐ યોગાયૈ નમઃ ।

ૐ પ્રહ્વ્યૈ નમઃ ।

ૐ સત્યાયૈ નમઃ ।

ૐ ઈશાનાયૈ નમઃ ।

ૐ સર્વતોમુખ્યૈ નમઃ ।

ૐ સંગોપાઙ્ગાય હરેરાસનાય નમઃ ।

તતઃ કર્ણિકાયામ્-અં વાસુદેવાય નમઃ ।

આં હૃદયાય નમઃ ।

ઇં શિરસે નમઃ ।

ઊં શિખાયૈ નમઃ ।

ઐં કવચાય નમઃ ।

ઔં નેત્રત્રયાય નમઃ ।

અઃ ફટસ્ત્રાય નમઃ ।

આં સઙ્કર્ષણાય નમઃ ।

અં પ્રદ્યુમ્નાય નમઃ ।

અઃ અનિરુદ્ધાય નમઃ ।

ૐ અઃ નારાયણાય નમઃ ।

ૐ તત્સબ્દહ્મણે નમઃ ।

ૐ હું વિષ્ણવે નમઃ ।

ક્ષ્ૌં નરસિંહાય ભૂર્વરાહ્ય કં વૈનતેયાય જં ખં વં સુદર્શનાય

ખં ચં ફં ષં ગદાયૈ વં લં મં ક્ષં પાઞ્ચજન્યાય ઘં ઢં

ભં હં શ્રિયૈ ગં ડં વં શં પુષ્ટ્યૈ ધં વં
વનમાલાયૈ દં શં શ્રીવત્સાય છં ડં યં કૌસ્તુભાય શં શાર્ઙ્ગાય
ઇં ઇષુધિભ્યાં ચં ચર્મણે ખં ખડ્ગાય ઇન્દ્રાય સુરાય પર્તયે અગ્નયે
તેજોધિપતયેયમાયધર્માધિપતયેક્ષંનૈરૃતાયરક્ષોધિપતયે વરુણાય
જલાધિપતયે યોં વાયવે પ્રાણાધિપતયે ધાં ધનદાય ધનાધિપતયે
હાં ઈશાનાય વિદ્યાધિપતયે ૐ વજાય શક્ત્યૈ ૐ
દણ્ડાય ખડ્ગાય ૐ પાશાય ધ્વજાય ગદાયૈ ત્રિશૂલાય લં અનન્તાય
પાતાલાધિપતયે ખં બ્રહ્મણે સર્વલોકાધિપતયે ૐ નમો ભગવતે વાસુદેવાય નમઃ ।
ૐ ૐ નમઃ ।
ૐ નં નમઃ ।
ૐ મોં નમઃ ।
ૐ ૐ ભં નમઃ ।
ૐ ગં નમઃ ।
ૐ વં નમઃ ।
ૐ તેં નમઃ ।
ૐ વાં નમઃ ।
ૐ સું નમઃ ।
ૐ દેં નમઃ ।
ૐ વાં નમઃ ।
ૐ યં નમઃ ।
ૐ ૐ નમઃ ।
ૐ નં નમઃ ।
ૐ મોં નમઃ ।
ૐ નાં નમઃ ।
ૐ રાં નમઃ ।
ૐ ણાં નમઃ ।
ૐ યં નમઃ ।
ૐ નંનોં ભગવતેં વાંસુંદેવાયં ૐ નમો નારાયણાય નમઃ ।
ૐ પુરુષોત્તમાય નમઃ ॥ ૧,૧૨.૩॥

નમસ્તે પુણ્ડરીકાક્ષ નમસ્તે વિશ્વભાવન ।
સુબ્રહ્મણ્ય નમસ્તેઽસ્તુ મહાપુરુષ પૂર્વજ ॥ ૧,૧૨.૪॥

હોમકર્ણણિ ચૈતેષાં સ્વાહાન્તમુપકલ્પયેત્ ।
એવં જપ્ત્વા વિધાનેન શતમષ્ટોત્તરં તથા ॥ ૧,૧૨.૫॥

અર્ઘં દત્ત્વા જિતં તેન પ્રણામં ચ પુનઃ પુનઃ ।
તતોઽગ્નાવપિ સમ્પૂજ્યં તં યજેત યથાવિધિ ॥ ૧,૧૨.૬॥

દેવદેવં સ્વબીજેન અઙ્ગાદિભિરથાચ્યુતમ્ ।
પૂર્વમુલ્લિખ્ય ચાભ્યુક્ષ્ય પ્રણવેન તુ મન્ત્રવિત્ ॥ ૧,૧૨.૭॥

ભ્રામયિત્વાનલં કુણ્ડે પૂજયેચ્ચ શુભૈઃ ફલૈઃ ।
પૂર્વં તત્સકલં ધ્યાત્વા મણ્ડલે મનસા ન્યસેત્ ॥ ૧,૧૨.૮॥

વાસુદેવાખ્યતત્ત્વેન હુત્વા ચાષ્ટોત્તરં શતમ્ ।
સંકર્ષણાદિબીજેન યજેત્ષટ્કં તથૈવ ચ ॥ ૧,૧૨.૯॥

ત્રયન્ત્રયં તથાઙ્ગાનામેકૈકાન્દિક્પતીંસ્તથા ।
પૂર્ણાહુતિં તથૈવાન્તે દદ્યાત્સમ્યગુપસ્થિતઃ ॥ ૧,૧૨.૧૦॥

વાગતીતે પરે તત્ત્વે આત્માનં ચ લયં નયેત્ ।
ઉપવિશ્ય પુનર્મુદ્રાં દર્શયિત્વા નમેત્પુનઃ ॥ ૧,૧૨.૧૧॥

નિત્યમેવંવિધં હોમં નૈમિત્તે દ્વિગુણં ભવેત્ ।
ગચ્છગચ્છ પરં સ્થાનં યત્ર દેવો નિરઞ્જનઃ ॥ ૧,૧૨.૧૨॥

ગચ્છન્તુ દેવતાઃ સર્વાઃ સ્વસ્થાનસ્થિતિહેતવે ।
સુદર્શનઃ શ્રીહરિશ્ચ અચ્યુતઃ સ ત્રિવિક્રમઃ ॥ ૧,૧૨.૧૩॥

ચતુર્ભુજો વાસુદેવઃ ષષ્ઠઃ પ્રદ્યુમ્ન એવ ચ ।
સંકર્ષણઃ પૂરુષોઽથ નવવ્યૂહો દશાત્મકઃ ॥ ૧,૧૨.૧૪॥

અનિરુદ્ધો દ્વાદશાત્મા અથ ઊર્ધ્વમનન્તકઃ ।
એતે એકાદિભિશ્ચક્રૈર્વિજ્ઞેયા લક્ષિતાઃ સુરાઃ ॥ ૧,૧૨.૧૫॥

ચક્રાઙ્કિતૈઃ પૂજિતઃ સ્યાન્દ્રૃહે રક્ષેત્સદાનરૈઃ ।
ૐ ચક્રાય સ્વાહા, ૐ વિચક્રાય સ્વાહા, ૐ સુચક્રાય સ્વાહા, ૐ મહાચક્રાય સ્વાહા,
ૐ મહાચક્રાય અસુરાન્તકૃથું ફટોં હું સહસ્રાર હું ફટ્ ॥ ૧ ૧૨.૧૬॥

દ્વારકાચક્રપૂજેયં ગૃહે રક્ષાકરી શુભા ॥ ૧,૧૨.૧૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પૂજાનુક્રમનિરૂપણં નામ દ્વાદશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૩

હરિરુવાચ ।

પ્રવક્ષ્યામ્યધુના હ્યેતદ્વૈષ્ણવં પઞ્જરં શુભમ્ ।
નમોનમસ્તે ગોવિન્દ ચક્રં ગૃહ્ય સુદર્શનમ્ ॥ ૧,૧૩.૧॥

પ્રાચ્યાં રક્ષસ્વ માં વિષ્ણો ! ત્વામહં શરણં ગતઃ ।
ગદાં કૌમોદકીં ગૃહ્ણ પદ્મનાભ નમોઽસ્ત તે ॥ ૧,૧૩.૨॥

યામ્યાં રક્ષસ્વ માં વિષ્ણો ! ત્વામહં શરણં ગતઃ ।
હલમાદાય સૌનન્દે નમસ્તે પુરુષોત્તમ ॥ ૧,૧૩.૩॥

પ્રતીચ્યાં રક્ષ માં વિષ્ણો ! ત્વામહ શરણં ગતઃ ।
મુસલં શાતનં ગૃહ્ય પુણ્ડરીકાક્ષ રક્ષ મામ્ ॥ ૧,૧૩.૪॥

ઉત્તરસ્યાં જગન્નાથ ! ભવન્તં શરણં ગતઃ ।
ખડ્ગમાદાય ચર્માથ અસ્ત્રશાસ્ત્રાદિકં હરે ! ॥ ૧,૧૩.૫॥

નમસ્તે રક્ષ રક્ષોઘ્ન ! ઐશાન્યાં શરણં ગતઃ ।
પાઞ્ચજન્યં મહાશઙ્ખમનુઘોષ્યં ચ પઙ્કજમ્ ॥ ૧,૧૩.૬॥

પ્રગૃહ્ય રક્ષ માં વિષ્ણો આગ્ન્યેય્યાં રક્ષ સૂકર ।
ચન્દ્રસૂર્યં સમાગૃહ્ય ખડ્ગં ચાન્દ્રમસં તથા ॥ ૧,૧૩.૭॥

નૈરૃત્યાં માં ચ રક્ષસ્વ દિવ્યમૂર્તે નૃકેસરિન્ ।
વૈજયન્તીં સ્મપ્રગૃહ્ય શ્રીવત્સં કણ્ઠભૂષણમ્ ॥ ૧,૧૩.૮॥

વાયવ્યાં રક્ષ માં દેવ હયગ્રીવ નમોઽસ્તુ તે ।
વૈનતેયં સમારુહ્ય ત્વન્તરિક્ષે જનાર્દન ! ॥ ૧,૧૩.૯॥

માં રક્ષસ્વાજિત સદા નમસ્તેઽસ્ત્વપરાજિત ।
વિશાલાક્ષં સમારુહ્ય રક્ષ માં ત્વં રસાતલે ॥ ૧,૧૩.૧૦॥

અકૂપાર નમસ્તુભ્યં મહામીન નમોઽસ્તુ મે ।
કરશીર્ષાદ્યઙ્ગુલીષુ સત્ય ત્વં બાહુપઞ્જરમ્ ॥ ૧,૧૩.૧૧॥

કૃત્વા રક્ષસ્વ માં વિષ્ણો નમસ્તે પુરુષોત્તમ ।
એતદુક્તં શઙ્કરાય વૈષ્ણવં પઞ્જરં મહત્ ॥ ૧,૧૩.૧૨॥

પુરા રક્ષાર્થમીશાન્યાઃ કાત્યાયન્યા વૃષધ્વજ ।
નાશાયામાસ સા યેન ચામરાન્મહિષાસુરમ્ ॥ ૧,૧૩.૧૩॥

દાનવં રક્તબીજં ચ અન્યાંશ્ચ સુરકણ્ટકાન્ ।
એતજ્જપન્નરો ભક્ત્યા શત્રૂન્વિજયતે સદા ॥ ૧,૧૩.૧૪॥

ઇતિ શ્રીગારુડે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુપઞ્જરસ્તોત્રં નામ ત્રયોદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪
હરિરુવાચ ।
અથ યોગં પ્રવક્ષ્યામિ ભુક્તિમુક્તિકરં પરમ્ ।
ધ્યાયિભિઃ પ્રોચ્યતે ધ્યેયો ધ્યાનેન હરિરીશ્વરઃ ॥ ૧,૧૪.૧॥

તચ્છૃણુષ્વ મહેશાન સર્વપાપવિનાશનમ્ ।
વિષ્ણુઃ સર્વેશ્વરોઽનન્તઃ ષડ્ભિર્ભૂપરિવર્જિતઃ ॥ ૧,૧૪.૨॥

વાસુદેવો જગન્નાથો બ્રહ્માત્માસ્મ્યહમેવ હિ ।
દેહિદેહસ્થિતો નિત્યઃ સર્વદેહવિવર્જિતઃ ॥ ૧,૧૪.૩॥

દેહધર્મવિહીનશ્ચ ક્ષરાક્ષરવિવર્જિતઃ ।
ષડ્વિધેષુ સ્થિતો દ્રષ્ટા શ્રોતા ઘ્રાતા હ્યતીન્દ્રિયઃ ॥ ૧,૧૪.૪॥

તદ્ધર્મરહિતઃ સ્રષ્ટા નામગોત્રવિવર્જિતઃ ।
મન્તા મનઃ સ્થિતો દેવો મનસા પરિવર્જિતઃ ॥ ૧,૧૪.૫॥

મનોધર્મવિહીનશ્ચ વિજ્ઞાનં જ્ઞાનમેવ ચ ।
બોદ્ધા બુદ્ધિસ્થિતઃ સાક્ષી સર્વજ્ઞો બુદ્ધિવર્જિતઃ ॥ ૧,૧૪.૬॥

બુદ્ધિધર્મવિહીનશ્ચ સર્વઃ સર્વગતો મનઃ ।
સર્વપ્રાણિવિનિર્મુક્તઃ પ્રાણધર્મવિવર્જિતઃ ॥ ૧,૧૪.૭॥

પ્રાણપ્રાણો મહાશાન્તો ભયેન પરિવર્જિતઃ ।
અહઙ્કારાદિહીનશ્ચ તદ્ધર્મપરિવર્જિતઃ ॥ ૧,૧૪.૮॥

તત્સાક્ષી તન્નિયન્તા ચ પરમાનન્દરૂપકઃ ।
જાગ્રત્સ્વપ્નસુષુપ્તિસ્થસ્તત્સાક્ષી તદ્વિવર્જિતઃ ॥ ૧,૧૪.૯॥

તુરીયઃ પરમો ધાતા દૃગ્રૂપો ગુણવર્જિતઃ ।

મુક્તો બુદ્ધોઽજરો વ્યાપી સત્ય આત્માસ્મ્યહં શિવઃ ॥ ૧,૧૪.૧૦॥

એવં યે માનવા વિજ્ઞા ધ્યાયન્તીશં પરં પદમ્ ।
પ્રાપ્નુયુસ્તે ચ તદ્રૂપં નાત્ર કાર્યા વિચારણા ॥ ૧,૧૪.૧૧॥

ઇતિ ધ્યાનં સમાખ્યાતં તવ શઙ્કર સુવ્રત ।
પઠેદ્ય એતત્સતતં વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧,૧૪.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ધ્યાનયોગો નામ ચતુર્દશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫
રુદ્ર ઉવાચ ।
સંસારસાગરાદ્ઘોરામુચ્યતે કિં જપન્પ્રભો ।
નરસ્તન્મે પરં જપ્યં પથય ત્વં જનાર્દન ॥ ૧,૧૫.૧॥

હરિરુવાચ ।
પરેશ્વરં પરં બ્રહ્મ પરમાત્માનમવ્યયમ્ ।
વિષ્ણું નામસહસ્રેણ સ્તુવન્મુક્તો ભવેન્નરઃ ॥ ૧,૧૫.૨॥

યત્પ વિત્રં પરં જપ્યં કથયામિ વૃષધ્વજ ! ।
શ ૃણુષ્વાવહિતો ભૂત્વા સર્વપાપવિનાશનમ્ ॥ ૧,૧૫.૩॥

ૐ વાસુદેવો મહાવિષ્ણુર્વામનો વાસવો વસુઃ ।
બાલચન્દ્ર નિભો બાલો બલભદ્રો બલાધિપઃ ॥ ૧,૧૫.૪॥

બલિબન્ધનકૃદ્વેધા (૧૧)વરેણ્યો વેદવિત્કિવિઃ ।
વેદકર્તા વેદરૂપો વેદ્યો વેદપરિપ્લુતઃ ॥ ૧,૧૫.૫॥

વેદાઙ્ગવેત્તા વેદેશો(૨૦) બલાધારો બલાર્દનઃ ।
અવિકારો વરેશશ્ચ વરુણો વરુણાધિપઃ ॥ ૧,૧૫.૬॥

વીરહા ચ બૃહદ્વીરો વન્દિતઃ પરમેશ્વરઃ (૩૦) ।
આત્મા ચ પરમાત્મા ચ પ્રત્યગાત્મા વિયત્પરઃ ॥ ૧,૧૫.૭॥

પદ્મનાભઃ પદ્મનિધિઃ પદ્મહસ્તો ગદાધરઃ ।
પરમઃ (૪૦)પરભૂતશ્ચ પુરુષોત્તમ ઈશ્વરઃ ॥ ૧,૧૫.૮॥

પદ્મજઙ્ઘઃ પુણ્ડરીકઃ પદ્મમાલાધરઃ પ્રિયઃ ।

પદ્માક્ષઃ પદ્મગર્ભશ્ચ પર્જન્યઃ (૫૦)પદ્મસંસ્થિતઃ ॥ ૧,૧૫.૯॥

અપારઃ પરમાર્થશ્ચ પરાણાં ચ પરઃ પ્રભુઃ ।
પણ્ડિતઃ પણ્ડિતેડ્યશ્ચ પવિત્રઃ પાપમર્દકઃ ॥ ૧,૧૫.૧૦॥

શુદ્ધઃ (૬૦)પ્રકાશરૂપશ્ચ પવિત્રઃ પરિરક્ષકઃ ।
પિપાસાવર્જિતઃ પાદ્યઃ પુરુષઃ પ્રકૃતિસ્તથાઃ ॥ ૧,૧૫.૧૧॥

પ્રધાનં પૃથિવીપદ્મં પદ્મનાભઃ (૭૦)પ્રિયપ્રદઃ ।
સર્વેશઃ સર્વગઃ સર્વઃ સર્વવિત્સર્વદઃ સુરઃ ॥ ૧,૧૫.૧૨॥

સર્વસ્ય જગતો ધામ સર્વદર્શો ચ સર્વભૃત્(૮૦) ।
સર્વાનુગ્રહકૃદ્દેવઃ સર્વભૂતહૃદિ સ્થિતઃ ॥ ૧,૧૫.૧૩॥

સર્વપૂજ્યશ્ચ સર્વાદ્યઃ સર્વદેવનમસ્કૃતઃ ।
સર્વસ્ય જગતો મૂલં સકલો નિષ્કલોઽનલઃ (૯૦) ॥ ૧,૧૫.૧૪॥

સર્વગોપ્તા સર્વનિષ્ઠઃ સર્વકારણકારણમ્ ।
સર્વધ્યેયઃ સર્વમિત્રઃ સર્વદેસ્વવરૂપધૃક્ ॥ ૧,૧૫.૧૫॥

સર્વાધ્યક્ષઃ સુરાધ્યક્ષ સુરાસુરનમસ્કૃતઃ ।
દુષ્ટાનાં ચ સુરાણાં ચ સર્વદા ઘાતકોઽન્તકઃ (૧૦૧) ॥ ૧,૧૫.૧૬॥

સત્યપાલશ્ચ સન્નાભઃ સિદ્ધેશઃ સિદ્ધવન્દિતઃ ।
સિદ્ધસાધ્યઃ સિદ્ધસિદ્ધઃ સાધ્યસિદ્ધો (સિદ્ધિસિદ્ધ) હૃદીશ્વરઃ ॥ ૧,૧૫.૧૭॥

શરણં જગતશ્ચૈવ (૧૧૦)શ્રેયઃ ક્ષેમસ્તથૈવ ચ ।
શુભકૃચ્છોભનઃ સૌમ્યઃ સત્યઃ સત્યપરાક્રમઃ ॥ ૧,૧૫.૧૮॥

સત્યસ્થઃ સત્યસઙ્કલ્પઃ સત્યવિત્સત્ય (ત્પ) દસ્તથા (૧૨૧) ।
ધર્મો ધર્મી ચ કર્મો ચ સર્વકર્મવિવર્જિતઃ ॥ ૧,૧૫.૧૯॥

કર્મકર્તા ચ કર્મૈવ ક્રિયા કાર્યં તથૈવ ચ ।
શ્રીપતિર્નૃપતિઃ (૧૩૧)શ્રીમાન્સર્વસ્ય પતિરૂર્જિતઃ ॥ ૧,૧૫.૨૦॥

સદેવાનાં પતિશ્ચૈવ વૃષ્ણીનાં પતિરીડિતઃ ।
પતિર્હિરણ્યગર્ભસ્ય ત્રિપુરાન્તપતિસ્તથા ॥ ૧,૧૫.૨૧॥

પશૂનાં ચ પતિઃ પ્રાયો વસૂનાં પતિરેવ ચ (૧૪૦) ।
પતિરાખણ્ડલસ્યૈવ વરૂણસ્ય પતિસ્તથા ॥ ૧,૧૫.૨૨॥

વનસ્પતીનાં ચ પતિરનિલસ્ય પતિસ્તથા ।
અનલસ્ય પતિશ્ચૈવ યમસ્ય પતિરેવ ચ ॥ ૧,૧૫.૨૩॥

કુબેરસ્ય પતિશ્ચૈવ નક્ષત્રાણાં પતિસ્તથા ।
ઓષધીનાં પતિશ્ચૈવ વૃક્ષાણાં ચ પતિસ્તથા (૧૫૦) ॥ ૧,૧૫.૨૪॥

નાગાનાં પતિરર્કસ્ય દક્ષસ્ય પતિરેવ ચ ।
સુહૃદાં ચ પતિશ્ચૈવ નૃપાણાં ચ પતિસ્તથા ॥ ૧,૧૫.૨૫॥

ગન્ધર્વાણાં પતિશ્ચૈવ અસૂનાં પતિરુત્તમઃ ।
પર્વતાનાં પતિશ્ચૈવ નિમ્નગાનાં પતિસ્તથા ॥ ૧,૧૫.૨૬॥

સુરાણાં ચ પતિઃ શ્રેષ્ઠઃ (૧૬૦) કપિલસ્ય પતિસ્તથા ।
લતાનાં ચ પતિશ્ચૈવ વીરુધાં ચ પતિસ્તથા ॥ ૧,૧૫.૨૭॥

મુનીનાં ચ પતિશ્ચૈવ સૂર્યસ્ય પતિરુત્તમઃ ।
પતિશ્ચન્દ્રમસઃ શ્રેષ્ઠઃ સુક્રસ્ય પતિરેવ ચ ॥ ૧,૧૫.૨૮॥

ગ્રહાણાં ચ પતિશ્ચૈવ રાક્ષસાનાં પતિસ્તથા ।
કિન્નરાણાં પતિશ્ચૈવ (૧૭૦)દ્વિજાનાં પતિરુત્તમઃ ॥ ૧,૧૫.૨૯॥

સરિતાં ચ પતિશ્ચૈવ સમુદ્રાણાં પતિસ્તથા ।
સરસાં ચ પતિશ્ચૈવ ભૂતાનાં ચ પતિસ્તથા ॥ ૧,૧૫.૩૦॥

વેતાલાનાં પતિશ્ચૈવ કૂષ્માણ્ડાનાં પતિસ્તથા ।
પક્ષિણાં ચ પતિઃ શ્રેષ્ઠઃ પશૂનાં પતિરેવ ચ ॥ ૧,૧૫.૩૧॥

મહાત્મા (૧૮૦)મઙ્ગલો મેયો મન્દરો મન્દરેશ્વરઃ ।
મેરુર્માતા પ્રમાણં ચ માધવો મલવર્જિતઃ ॥ ૧,૧૫.૩૨॥

માલાધરો (૧૯૦)મહાદેવો મહાદેવેન પૂજિતઃ ।
મહાશાન્તો મહાભાગો મધુસૂદન એવ ચ ॥ ૧,૧૫.૩૩॥

મહાવીર્યો મહાપ્રાણો માર્કણ્ડેયર્ષિવન્દિતઃ(૨૦૦) ।
માયાત્મા માયયા બદ્ધો માયયા તુ વિવર્જિતઃ ॥ ૧,૧૫.૩૪॥

મુનિસ્તુતો મુનિર્મૈત્રો (૨૧૦)મહાના (૨ા) સો મહાહનુઃ ।
મહાબાહુર્મહાદાન્તો મરણેન વિવર્જિતઃ ॥ ૧,૧૫.૩૫॥

મહાવક્ત્રો મહાત્મા ચ મહાકાયો મહોદરઃ ।
મહાપાદો મહાગ્રીવો મહામાની મહામનાઃ ॥ ૧,૧૫.૩૬॥

મહાગતિર્મહાકીર્તિર્મહારૂપો (૨૨૨)મહાસુરઃ ।
મધુશ્ચ માધવશ્ચૈવ મહાદેવો મહેશ્વરઃ ॥ ૧,૧૫.૩૭॥

મખેજ્યો મખરૂપી ચ માનનીયો (૨૩૦)મખેશ્વરઃ ।
મહાવાતો મહાભાગો મહેશોઽતીતમાનુષઃ ॥ ૧,૧૫.૩૮॥

માનવશ્ચ મનુશ્ચૈવ માનવાનાં પ્રિયઙ્કરઃ ।
મૃગશ્ચ મૃગપૂજ્યશ્ચ (૨૪૦)મૃગાણાં ચ પતિસ્તથા ॥ ૧,૧૫.૩૯॥

બુધસ્ય ચ પતિશ્ચૈવ પતિશ્ચૈવ બૃહસ્પતેઃ ।
પતિઃ શનૈશ્ચરસ્યૈવ રાહોઃ કેતોઃ પતિસ્તથા ॥ ૧,૧૫.૪૦॥

લક્ષ્મણો લક્ષણશ્ચૈવ લમ્બૌષ્ઠો લલિતસ્તથા(૨૫૦) ।
નાનાલઙ્કારસંયુક્તો નાનાચન્દનચર્ચિતઃ ॥ ૧,૧૫.૪૧॥

નાનારસોજ્જવલદ્વક્ક્રો નાનાપુષ્પોપશોભિતઃ ।
રામો રમાપતિશ્ચૈવ સભાર્યઃ પરમેશ્વરઃ ॥ ૧,૧૫.૪૨॥

રત્નદો રત્નહર્તા ચ(૨૬૦)રૂપી રૂપવિવર્જિતઃ ।
મહારૂપોગ્રરૂપશ્ચ સૌમ્યરૂપસ્તથૈવ ચ ॥ ૧,૧૫.૪૩॥

નીલમેઘનિભઃ શુધ્ધઃ સાલમેઘનિભસ્તથા ।
ધૂમવર્ણઃ પતિવર્ણો નાનારૂપો(૨૭૦)હ્યવર્ણકઃ ॥ ૧,૧૫.૪૪॥

વિરૂપો રૂપદશ્ચૈવ શુક્લવર્ણસ્તથૈવ ચ ।
સર્વવર્ણો મહાયોગી યજ્ઞો (યાજ્યો) યજ્ઞકૃદેવ ચ ॥ ૧,૧૫.૪૫॥

સુવર્ણવર્ણવાંશ્ચૈવ સુવર્ણાખ્યસ્તથૈવ ચ (૨૮૦)સુવર્ણાવયવશ્ચૈવ
સુવર્ણઃ સ્વર્ણમેખલઃ ॥ ૧,૧૫.૪૬॥

સુવર્ણસ્ય પ્રદાતા ચ સુવર્ણેશસ્તથૈવ ચ ।
સુવર્ણસ્ય પ્રિયશ્ચૈવ (૨૯૦)સુવર્ણાઢ્યસ્તથૈવ ચ ॥ ૧,૧૫.૪૭॥

સુપર્ણો ચ મહાપર્ણો સુપર્ણસ્ય ચ કારણ્(૨૯૦) ।
વૈનતેયસ્તથાદિત્ય આદિરાદિકરઃ શિવઃ ॥ ૧,૧૫.૪૮॥

કારણં મહતશ્ચૈવ પ્રધાનસ્ય ચ કારણમ્ ।
બુધ્ધીનાં કારણં ચૈવ કારણં મનસસ્તથા ॥ ૧,૧૫.૪૯॥

કારણં ચૈતસશ્ચૈવ(૩૦૦)અહઙ્કારસ્ય કારણમ્ ।

ભૂતાનાં કારણં તદ્વત્કારણં ચ વિભાવસોઃ ॥ ૧,૧૫.૫૦॥

આકાશકારણં તદ્વત્પૃથિવ્યાઃ કારણં પરમ્ ।
અણ્ડસ્ય કારણં ચૈવ પ્રકૃતેઃ કારણં તથા ॥ ૧,૧૫.૫૧॥

દેહસ્ય કારણં ચૈવ ચક્ષુષશ્ચૈવ કારણમ્ ।
શ્રોત્રસ્ય કારણં(૩૧૦) તદ્વત્કારણં ચ ત્વચસ્તથા ॥ ૧,૧૫.૫૨॥

જિહ્વાયાઃ કારણં ચૈવ પ્રાણસ્યૈવ ચ કારણમ્ ।
હસ્તયોઃ કારણં તદ્વત્પાદયોઃ કારણં તથા ॥ ૧,૧૫.૫૩॥

વાચશ્ચકારણં તદ્વત્પાયોશ્ચૈવ તુકારણમ્ ।
ઇન્દ્રસ્ય કારણં ચૈવ કુબેરસ્ય ચ કારણમ્ ॥ ૧,૧૫.૫૪॥

યમસ્ય કારણં ચૈવ (૩૨૦)ઈશાનસ્ય ચ કારણમ્ ।
યક્ષાણાં કારણં ચૈવ રક્ષસાં કારણં પરમ્ ॥ ૧,૧૫.૫૫॥

નૃપાણાં કારણં શ્રેષ્ઠં ધર્મસ્યૈવ તુ કારણમ્ ।
જન્તૂનાં કારણં ચૈવ વસૂનાં કારણં પરમ્ ॥ ૧,૧૫.૫૬॥

મનૂનાં કારણં ચૈવ પક્ષિણાં કારણં પરમ્ ।
મુનીનાં કારણં શ્રેષ્ઠ(૩૩૦)યોગિનાં કારણં પરમ્ ॥ ૧,૧૫.૫૭॥

સિધ્દ્વાનાં કારણં ચૈવ યક્ષાણાં કારણં પરમ્ ।
કારણં કિન્નરાણાં ચ(૩૪૦) ગન્ધર્વાણાં ચ કારણમ્ ॥ ૧,૧૫.૫૮॥

નદાનાં કારણં ચૈવ નદીનાં કારણં પરમ્ ।
કારણં ચ સમુદ્રાણાં વૃક્ષાણાં કારણં તથા ॥ ૧,૧૫.૫૯॥

કારણં વીરુધાં ચૈવ લોકાનાં કારણં તથા ।
પાતાલ કારણં ચૈવ દેવાનાં કારણં તથા ॥ ૧,૧૫.૬૦॥

સર્પાણાં કારણં ચૈવ(૩૫૦)શ્રેયસાં કારણં તથા ।
પૂશનાં કારણં ચૈવ સર્વેષાં કારણં તથા ॥ ૧,૧૫.૬૧॥

દેહાત્મા ચેન્દ્રિયાત્મા ચ આત્મા બુધ્દ્વિસ્તથૈવ ચ ।
મનસશ્ચ તથૈવાત્મા ચાત્માહઙ્કારચેતસઃ ॥ ૧,૧૫.૬૨॥

જાગ્રતઃ સ્વપતશ્ચાત્મા (૩૬૦)મહદાત્મા પરસ્તથા ।
પ્રધાનસ્ય પરાત્મા ચ આકાશાત્મા હ્યપાં તથા ॥ ૧,૧૫.૬૩॥

પૃથિવ્યાઃ પરમાત્મા ચ રસસ્યાત્મા તથૈવ ચ ।
ગન્ધસ્ય પરમાત્મા ચ રૂપસ્યાત્મા પરસ્તથા ॥ ૧,૧૫.૬૪॥

શબ્દાત્મા ચૈવ (૩૭૦)વાગાત્મા સ્પર્શાત્મા પુરુષસ્તથા ।
શ્રોત્રાત્મા ચ ત્વગાત્મા ચ જિહ્વાયાઃ પરમસ્તથા ॥ ૧,૧૫.૬૫॥

ઘ્રાણાત્મા ચૈવ હસ્તાત્મા પાદાત્મા પરમસ્તથા(૩૮૦) ।
ઉપસ્થસ્ય તથૈવાત્મા પાય્વાત્મા પરમસ્તથા ॥ ૧,૧૫.૬૬॥

ઇન્દ્રાત્મા ચૈવ બ્રહ્માત્મા રુદ્રા(શાન્તા)ત્મા ચ મનોસ્તથા ।
દક્ષપ્રજાપતેરાત્મા સત્યા (સ્રષ્ટા)ત્મા પરમસ્તથા ॥ ૧,૧૫.૬૭॥

ઈશાત્મા(૩૯૦)પરમાત્મા ચ રૌદ્રાત્મા મોક્ષવિદ્યતિઃ ।
યત્નવાંશ્ચ તથા યત્નશ્ચર્મો ખડ્ગી મુરાન્તકઃ ॥ ૧,૧૫.૬૮॥

હ્રીપ્રવર્તનશીલશ્ચ યતીનાં ચ હિતે રતઃ ।
યતિરૂપી ચ (૪૦૦)યોગી ચ યોગિધ્યેયો હરિઃ શિતિઃ ॥ ૧,૧૫.૬૯॥

સંવિન્મેધા ચ કાલશ્ચ ઊષ્મા વર્ષા મ(ન) તિસ્તથા(૪૧૦) ।
સંવત્સરો મોક્ષકરો મોહપ્રધ્વંસકસ્તથા ॥ ૧,૧૫.૭૦॥

મોહકર્તા ચ દુષ્ટાનાં માણ્ડવ્યો વડવામુખઃ ।
સંવર્તઃ કાલકર્તા ચ ગૌતમો ભૃગુરઙ્ગિરાઃ (૪૨૦) ॥ ૧,૧૫.૭૧॥

અત્રિર્વસિષ્ઠઃ પુલહઃ પુલસ્ત્યઃ કુત્સ એવ ચ ।
યાજ્ઞવલ્ક્યો દેવલશ્ચ વ્યાસશ્ચૈવ પરાશરઃ ॥ ૧,૧૫.૭૨॥

શર્મદશ્ચૈવ(૪૩૦) ગાઙ્ગેયો હૃષીકેશો બૃહચ્છ્રવાઃ ।
કેશવઃ ક્લેશહન્તા ચ સુકર્ણઃ કર્ણવર્જિતઃ ॥ ૧,૧૫.૭૩॥

નારાયણો મહાભાગઃ પ્રાણસ્ય પતિરેવ ચ (૪૪૦) ।
અપાનસ્ય પતિશ્ચૈવ વ્યાનસ્ય પતિરેવ ચ ॥ ૧,૧૫.૭૪॥

ઉદાનસ્ય પતિઃ શ્રેષ્ઠઃ સમાનસ્ય પતિસ્તથા ।
શબ્દસ્ય ચ પતિઃ શ્રેષ્ઠઃ સ્પર્શસ્ય પતિરેવ ચ ॥ ૧,૧૫.૭૫॥

રૂપાણાં ચ પતિશ્ચાદ્યઃ ખડ્ગપાણિર્હલાયુધઃ(૪૫૦) ।
ચક્રપાણિઃ કુણ્ડલી ચ શ્રીવત્સાંકસ્તથૈવ ચ ॥ ૧,૧૫.૭૬॥

પ્રકૃતિઃ કૌસ્તુભગ્રીવઃ પીતામ્બરધરસ્તથા ।
સુમુખો દુર્મુખશ્ચૈવ મુનખેન તુ વિવર્જિતઃ ॥ ૧,૧૫.૭૭॥

અનન્તોઽનન્તરૂપશ્ચ(૪૬૧)સુનખઃ સુરમન્દરઃ ।
સુકપોલો વિભુર્જિષ્ણુર્ભ્રાજિષ્ણુશ્ચૈષુધીસ્તથા ॥ ૧,૧૫.૭૮॥

હિરણ્યકશિપોર્હન્તા હિરણ્યાક્ષવિમર્દકઃ (૪૭૦) ।
નિહન્તા પૂતનાયાશ્ચ ભાસ્કરાન્તવિનાશનઃ ॥ ૧,૧૫.૭૯॥

કેશિનો દલનશ્ચૈવ મુષ્ટિકસ્ય વિમર્દકઃ ।
કંસદાનવભેત્તા ચ ચાણૂરસ્ય પ્રમર્દકઃ ॥ ૧,૧૫.૮૦॥

અરિષ્ટસ્ય નિહન્તા ચ અક્રૂરપ્રિય એવ ચ ।
અક્રૂરઃ ક્રૂરરૂપશ્ચ(૪૮૦)અક્રૂરપ્રિયવન્દિતઃ ॥ ૧,૧૫.૮૧॥

ભગહા ભગવાન્ભાનુસ્તથા ભાગવતઃ સ્વગવતઃ સ્વયમ્ ।
ઉદ્ધવશ્ચોદ્ધવસ્યેશો હ્યુદ્ધવેન વિચિન્તિતઃ ॥ ૧,૧૫.૮૨॥

ચક્રધૃક્ચ્યઞ્ચલશ્ચૈવ(૪૯૦) ચલાચલવિવર્જિતઃ ।
અહં કારોપમાશ્ચિત્તં ગગનં પૃથિવી જલમ્ ॥ ૧,૧૫.૮૩॥

વાયુશ્ચક્ષુસ્તથા શ્રોત્રં(૫૦૦)જિહ્વા ચ ઘ્રાણમેવ ચ ।
વાક્પાણિપાદજવનઃ પાયૂપસ્થસ્તથૈવ ચ ॥ ૧,૧૫.૮૪॥

શઙ્કરશ્ચૈવ સર્વશ્ચ ક્ષાન્તિદઃ ક્ષાન્તિકૃન્નરઃ (૫૧૧) ।
ભક્તપ્રિયસ્તતા ભર્તા ભક્તિમાન્ભક્તિવર્ધનઃ ॥ ૧,૧૫.૮૫॥

ભક્તસ્તુતો ભક્તપરઃ કીર્તિદઃ કીર્તિવર્ધનઃ ।
કીર્તિર્દીપ્તિઃ (૫૨૦) ક્ષમાકાન્તિર્ભક્તશ્ચૈવ (૫૩૦) દયા પરા ॥ ૧,૧૫.૮૬॥

દાનં દાતા ચ કર્તા ચ દેવદેવપ્રિયઃ શુચિઃ ।
શુચિમા ન્સુખદો (૫૩૧)મોક્ષઃ કામશ્ચાર્થઃ સહસ્રપાત્ ॥ ૧,૧૫.૮૭॥

સહસ્રશીર્ષા વૈદ્યશ્ચ મોક્ષદ્વારં તથૈવ ચ ।
પ્રજાદ્વારં સહસ્રાક્ષઃ સહસ્રકર એવ ચ(૫૪૦) ॥ ૧,૧૫.૮૮॥

શુક્રશ્ચ સુકિરીટી ચ સુગ્રીવઃ કૌસ્તુભસ્તથા ।
પ્રદ્યુમ્નશ્ચાનિરુદ્ધશ્ચ હયગ્રીવશ્ચ સૂકરઃ ॥ ૧,૧૫.૮૯॥

મત્સ્યઃ પરશુરામશ્ચ(૫૫૦)પ્રહ્લાદો બલિરેવચ ।
શરણ્યશ્ચૈવ નિત્યશ્ચ બુદ્ધો મુક્તઃ શરીરભૃત્ ॥ ૧,૧૫.૯૦॥

ખરદૂષણહન્તા ચ રાવણસ્ય પ્રમર્દનઃ ।

સીતાપતિશ્ચ (૫૬૦)વર્ધિષ્ણુર્ભરતશ્ચ તથૈવ ચ ॥ ૧,૧૫.૯૧॥

કુમ્ભેન્દ્રજિન્નિહન્તા ચ કુમ્ભકર્ણપ્રમર્દનઃ ।
નરાન્તકાન્તકશ્ચૈવ દેવાન્તકવિનાશનઃ ॥ ૧,૧૫.૯૨॥

દુષ્ટાસુરનિહન્તા ચ શમ્બરારિસ્તથૈવ ચ ।
નરકસ્ય નિહન્તા ચ ત્રિશીર્ષસ્ય વિનાશનઃ (૫૭૦) ॥ ૧,૧૫.૯૩॥

યમલાર્જુનભેત્તા ચ તપોહિતકરસ્તથા ।
વાદિત્રં ચૈવ વાદ્યં ચ બુદ્ધશ્ચૈવ વરપ્રદઃ ॥ ૧,૧૫.૯૪॥

સારઃ સારપ્રિયઃ સૌરઃ કાલહન્તૃનિકૃન્તનઃ(૫૮૦) ।
અગસ્ત્યો દેવલશ્ચૈવ નારદો નારદપ્રિયઃ ॥ ૧,૧૫.૯૫॥

પ્રાણોઽપાનસ્તથા વ્યાનો રજઃ સત્ત્વં તમઃ (૫૯૦)શરત્ ।
ઉદાનશ્ચ સમાનશ્ચ ભેષજં ચ ભિષક્તથા ॥ ૧,૧૫.૯૬॥

કૂટસ્થઃ સ્વચ્છરૂપશ્ચ સર્વદેહવિવર્જિતઃ ।
ચક્ષુરિન્દ્રિયહીનશ્ચ વાગિન્દ્રિયવિવર્જિતઃ(૬૦૦) ॥ ૧,૧૫.૯૭॥

હસ્તેન્દ્રિયવિહીનશ્ચ પાદાભ્યાં ચ વિવર્જિતઃ ।
પાયૂપસ્થવિહીનશ્ચ મરુતાપવિવર્જિતઃ ॥ ૧,૧૫.૯૮॥

પ્રબોધેન વિહીનશ્ચ બુદ્ધ્યા ચૈવ વિ વર્જિતઃ ।
ચેતસા વિગતશ્ચૈવ પ્રાણેન ચ વિવર્જિતઃ ॥ ૧,૧૫.૯૯॥

અપાનેન વિહીનશ્ચ વ્યાનેન ચ વિવર્જિતઃ(૬૧૦) ।
ઉદાનેન વિહીનશ્ચ સમાનેન વિવર્જિતઃ ॥ ૧,૧૫.૧૦૦॥

આકાશેન વિહીનશ્ચ વાયુના પરિવર્જિતઃ ।
અગ્નિના ચ વિહીનશ્ચ ઉદકેન વિવર્જિતઃ ॥ ૧,૧૫.૧૦૧॥

પૃથિવ્યા ચ વિહીનશ્ચ શબ્દેન ચ વિવર્જિતઃ ।
સ્પર્શેન ચ વિહીનશ્ચ સર્વરૂપવિવર્જિતઃ(૬૨૦) ॥ ૧,૧૫.૧૦૨॥

રાગેણ વિગતશ્ચૈવ અઘેન પરિવર્જિતઃ ।
શોકેન રહિતશ્ચૈવ વચસા પરિવર્જિતઃ ॥ ૧,૧૫.૧૦૩॥

રજો વિવર્જિતશ્ચૈવ વિકારૈઃ ષડ્ભિરેવ ચ ।
કામેન વર્જિતશ્ચૈવ ક્રોધેન પરિવર્જિતઃ ॥ ૧,૧૫.૧૦૪॥

લોભેન વિગતશ્ચૈવ દમ્ભેન ચ વિવર્જિતઃ ।
સૂક્ષ્મશ્ચૈવ (૬૩૦)સુસૂક્ષ્મશ્ચ સ્થૂલાત્સ્થૂલતરસ્તથા ॥ ૧,૧૫.૧૦૫॥

વિશારદો બલાધ્યક્ષઃ સર્વસ્ય ક્ષોભકસ્તથા ।
પ્રકૃતેઃ ક્ષોભકશ્ચૈવ મહતઃ ક્ષોભકસ્તથા ॥ ૧,૧૫.૧૦૬॥

ભૂતાનાં ક્ષોભકશ્ચૈવ બુદ્ધેશ્ચ ક્ષોમકસ્તથા ।
ઇન્દ્રિયાણાં ક્ષોભકશ્ચ(૬૪૦)વિષયક્ષોભકસ્તથા ॥ ૧,૧૫.૧૦૭॥

બ્રહ્મણઃ ક્ષોભકશ્ચૈવ રુદ્રસ્ય ક્ષોભકસ્તથા ।
અગમ્યશ્ચક્ષુરાદેશ્ચ શ્રોત્રાગમ્યસ્તથૈવ ચ ॥ ૧,૧૫.૧૦૮॥

ત્વચા ન ગમ્યઃ કૂર્મશ્ચ જિહ્વાગ્રાહ્યસ્તથૈવ ચ ।
ઘ્રાણોન્દ્રિયાગમ્ય એવ વાચાગ્રાહ્યસ્તથૈવ ચ (૬૫૦) ॥ ૧,૧૫.૧૦૯॥

અગમ્યશ્ચૈવ પાણિભ્યાં પદાગમ્યસ્તથૈવ ચ ।
અગ્રાહ્યો મનસશ્ચૈવ બુદ્ધ્યાગ્રાહ્યો હરિસ્તથા ॥ ૧,૧૫.૧૧૦॥

અહં બુદ્ધ્યા તથા ગ્રાહ્યશ્ચેતસા ગ્રાહ્યા એવ ચ ।
શઙ્ખપાણિશ્ચાવ્યયશ્ચ ગદાપાણિસ્તથૈવ ચ (૬૬૦) ॥ ૧,૧૫.૧૧૧॥

શાર્ઙ્ગપાણિશ્ચ કૃષ્ણશ્ચ જ્ઞાનમૂર્તિઃ પરન્તપઃ ।
તપસ્વી જ્ઞાનગમ્યો હિ જ્ઞાની જ્ઞાનવિદેવ ચ ॥ ૧,૧૫.૧૧૨॥

જ્ઞેયશ્ચ જ્ઞેયહીનશ્ચ (૬૭૦) જ્ઞપ્તિશ્ચૈતન્યરૂપકઃ ।
ભાવો ભાવ્યો ભવકરો ભાવનો ભવનાશનઃ ॥ ૧,૧૫.૧૧૩॥

ગો વિન્દો ગોપતિર્ગોપઃ(૬૮૦)સર્વગોપીસુખપ્રદઃ ।
ગોપાલો ગોગતિશ્ચૈવ ગોમતિર્ગોધરસ્તથા ॥ ૧,૧૫.૧૧૪॥

ઉપેન્દ્રશ્ચ નૃસિંહશ્ચ શૌરિશ્ચૈવ જનાર્દનઃ ।
આરણેયો(૬૯૦) બૃહદ્ભાનુર્બૃહદ્દીપ્તિસ્તથૈવ ચ ॥ ૧,૧૫.૧૧૫॥

દામોદરસ્ત્રિકાલશ્ચ કાલજ્ઞઃ કાલવર્જિતઃ ।
ત્રિસન્ધ્યો દ્વાપરં ત્રેતા પ્રજાદ્વારં(૭૦૦)ત્રિવિક્રમઃ ॥ ૧,૧૫.૧૧૬॥

વિક્રમો દણ્ડ(૨) હસ્તશ્ચ હ્યેકદણ્ડી ત્રિદણ્ડધૃક્ ।
સામભેદસ્તથોપાયઃ સામરૂપી ચ સામગઃ ॥ ૧,૧૫.૧૧૭॥

સામવેદોઃ(૭૧૦)હ્યથર્વશ્ચ સુકૃતઃ સુતરૂપણઃ ।
અથર્વવેદવિચ્ચૈવ હ્યથર્વાચાર્ય એવ ચ ॥ ૧,૧૫.૧૧૮॥

ઋગ્રૂપી ચૈવ ઋગ્વેદ ઋગ્વેદેષુ પ્રતિષ્ઠિતઃ ।
યજુર્વેદો(૭૨૦)યજુર્વેદવિદેકપાત્ ॥ ૧,૧૫.૧૧૯॥

બહુપાચ્ચ સુપાચ્ચૈવ તથૈવ ચ સહસ્રપાત્ ।
ચતુષ્પાચ્ચ દ્વિપાચ્ચૈવ સ્મૃતિર્ન્યાયો યમો બલી(૭૩૦) ॥ ૧,૧૫.૧૨૦॥

સન્યાસી ચૈ સન્નયાસશ્ચતુરાશ્રમ એવ ચ ।
બ્રહ્મચારી ગૃહસ્થશ્ચ વાનપ્રસ્થશ્ચ ભિક્ષુકઃ ॥ ૧,૧૫.૧૨૧॥

બ્રાહ્મણઃ ક્ષત્રિયો વૈશ્યઃ (૭૪૦)શૂદ્રો વર્ણસ્તથૈવ ચ ।
શીલદઃ શીલસમ્પન્નો દુઃશીલપરિવર્જિતઃ ॥ ૧,૧૫.૧૨૨॥

મોક્ષોઽધ્યાત્મસમાવિષ્ટઃ સ્તુતિઃ સ્તોતા ચ પૂજકઃ ।
પૂજ્યો(૭૫૦)વાક્કરણં ચૈવ વાચ્યં ચૈવ તુ વાચકઃ ॥ ૧,૧૫.૧૨૩॥

વેત્તા વ્યાકરણં ચૈવ વાક્યં ચૈવ ચ વાક્યવિત્ ।
વાક્યગમ્યસ્તીર્થવાસી(૭૬૦) તીર્થસ્તીર્થી ચ તીર્થવિત્ ॥ ૧,૧૫.૧૨૪॥

તીર્થાદિભૂતઃ સાંખ્યશ્ચ નિરુક્તં ત્વધિદૈવતમ્ ।
પ્રણવઃ પ્રણવેશશ્ચ પ્રણવેન પ્રવન્દિતઃ(૭૭૦) ॥ ૧,૧૫.૧૨૫॥

પ્રણવેન ચ લક્ષ્યો વૈ ગાયત્રી ચ ગદાધરઃ ।
શાલગ્રામનિવાસી ચ (૭૮૦)શાલગ્રામસ્તથૈવ ચ ॥ ૧,૧૫.૧૨૬॥

જલશાયી યોગશાયી શેષશાયી કુશેશયઃ ।
મહીભર્તા ચ (૭૯૦) કાર્યં ચ કારણં પૃથિવીધરઃ ॥ ૧,૧૫.૧૨૭॥

પ્રજાપતિઃ શાશ્વતશ્ચ કામ્યઃ કામયિતા વિરાટ્ ।
સમ્રાટ્પૂષા(૮૦૦) તથા સ્વર્ગો રથસ્થઃ સારથિર્બલમ્ ॥ ૧,૧૫.૧૨૮॥

ધની ધનપ્રદો ધન્યો યાદવાનાં હિતે રતઃ ।
અર્જુનસ્ય પ્રિયશ્ચૈવ હ્યર્જુનો(૮૧૦)ભીમ એવ ચ ॥ ૧,૧૫.૧૨૯॥

પરાક્રમો દુર્વિષહઃ સર્વશાસ્ત્રવિશારદઃ ।
સારસ્વતો મહાભીષ્મઃ પારિજાતહરસ્તથા ॥ ૧,૧૫.૧૩૦॥

અમૃતસ્ય પ્રદાતા ચ ક્ષીરોદઃ ક્ષીરમેવ ચ (૮૨૦) ।
ઇન્દ્રાત્મજસ્તસ્ય ગોપ્તા ગોવર્ધનધરસ્તથા ॥ ૧,૧૫.૧૩૧॥

કંસસ્ય નાશનસ્તદ્વદ્ધસ્તિપો હસ્તિનાશનઃ ।

શિપિવિષ્ટઃ પ્રસન્નશ્ચ સર્વલોકાર્તિનાશનઃ ॥ ૧,૧૫.૧૩૨॥

મુદ્રો(૮૩૦)મુદ્રા કરશ્ચૈવ સર્વમુદ્રાવિવર્જિતઃ ।
દેહી દેહસ્થિતશ્ચૈવ દેહસ્ય ચ નિયામકઃ ॥ ૧,૧૫.૧૩૩॥

શ્રોત્રા શ્રોત્રનિયન્તા ચ શ્રોતવ્યઃ શ્રવણં તથા ।
ત્વક્સ્થિતશ્ચ(૮૪૦)સ્પર્શયિત્વા સ્પૃશ્યં ચ સ્પર્શનં તથા ॥ ૧,૧૫.૧૩૪॥

રૂપદ્રષ્ટા ચ ચક્ષુઃ સ્થો નિયન્તા ચક્ષુષસ્તથા ।
દૃશ્યં ચૈવતુ જિહ્વાસ્થો રસજ્ઞશ્ચ નિયામકઃ (૮૫૦) ॥ ૧,૧૫.૧૩૫॥

ઘ્રાણસ્થો ઘ્રાણકૃદ્ઘ્રાતા ઘ્રાણેન્દ્રિયનિયામકઃ ।
વાક્સ્થો વક્તા ચ વક્તવ્યો વચનં વાઙ્નિયામકઃ ॥ ૧,૧૫.૧૩૬॥

પ્રાણિસ્થઃ (૮૬૦)શિલ્પ કૃચ્છિલ્પો હસ્તયોશ્ચ નિયામકઃ ।
પદવ્યશ્ચૈવ ગન્તા ચ ગન્તવ્યં ગમનં તથા ॥ ૧,૧૫.૧૩૭॥

નિયન્તા પાદયોશ્ચૈવ પાદ્યભાક્ચ વિસર્ગકૃત્(૮૭૦) ।
વિસર્ગસ્ય નિયન્તા ચ હ્યુપસ્થસ્થઃ સુખં તથા ॥ ૧,૧૫.૧૩૮॥

ઉપસ્થસ્ય નિયન્તા ચ તદાનન્દકરશ્ચ હ ।
શત્રુઘ્નઃ કાર્તવીર્યશ્ચ દત્તાત્રેયસ્તથૈવ ચ ॥ ૧,૧૫.૧૩૯॥

અલર્કસ્ય હિતશ્ચૈવ કાર્તવીર્યનિકૃન્તનઃ (૮૮૦) ।
કાલનેમિર્મહાનેમિર્મેઘો મેઘપતિસ્તથા ॥ ૧,૧૫.૧૪૦॥

અન્નપ્રદોઽન્નરૂપી ચ હ્યન્નાદોઽન્નપ્રવર્તકઃ ।
ધૂમકૃદ્ધૂમરૂપશ્ચ(૮૯૦) દેવકીપુત્ર ઉત્તમઃ ॥ ૧,૧૫.૧૪૧॥

દેવક્યાનન્દનો નન્દો રોહિણ્યાઃ પ્રિય એવ ચ ।
વસુદેવપ્રિયશ્ચૈવ વસુદેવસુતસ્તથા ॥ ૧,૧૫.૧૪૨॥

દુન્દુભિર્હાસરૂપશ્ચ પુષ્પહાસસ્તથૈવ ચ (૯૦૦) ।
અટ્ટહાસપ્રિયશ્ચૈવ સર્વાધ્યક્ષઃ ક્ષરોઽક્ષરઃ ॥ ૧,૧૫.૧૪૩॥

અચ્યુતશ્ચૈવ સત્યેશઃ સત્યાયાશ્ચ પ્રિયો વરઃ ।
રુક્મિણ્યાશ્ચ પતિશ્ચૈવ રુક્મિણ્યા વલ્લભસ્તથા ॥ ૧,૧૫.૧૪૪॥

ગોપીનાં વલ્લભશ્ચૈવ(૯૧૦)પુણ્યશ્લોકશ્ચ વિશ્રુતઃ ।
વૃષાકપિર્યમો ગુહ્યો મકુલશ્ચ બુધસ્તથા ॥ ૧,૧૫.૧૪૫॥

રાહુઃ કેતુર્ગ્રહો ગ્રાહો(૯૨૦) ગજેન્દ્રમુખમેલકઃ ।
ગ્રાહસ્ય વિનિહન્તા ચ ગ્રામી રક્ષકસ્તથા ॥ ૧,૧૫.૧૪૬॥

કિન્નરશ્ચૈવ સિદ્ધશ્ચ છન્દઃ સ્વચ્છન્દ એવ ચ ।
વિશ્વરૂપો વિશાલાક્ષો(૯૩૦) દૈત્યસૂદન એવ ચ ॥ ૧,૧૫.૧૪૭॥

અનન્તરૂપો ભૂતસ્થો દેવદાનવસંસ્થિતઃ ।
સુષુપ્તિસ્થઃ સુષુપ્તિશ્ચ સ્થાનં સ્થાનાન્ત એવ ચ ॥ ૧,૧૫.૧૪૮॥

જગત્સ્થશ્ચૈવ જાગર્તા સ્થાનં જાગરિતં તથા (૯૪૦) ।
સ્વપ્રસ્થઃ સ્વપ્રવિત્સ્વપ્નસ્થાનં સ્વપ્નસ્તથૈવ ચ ॥ ૧,૧૫.૧૪૯॥

જાગ્રત્સ્વપ્નસુષુપ્તૈશ્ચ વિહીનો વૈ ચતુર્થકઃ ।
વિજ્ઞાનં વેદ્યરૂપં ચ જીવો જીવયિતા તથા (૯૫૦) ॥ ૧,૧૫.૧૫૦॥

ભુવનાધિપતિશ્ચૈવ ભુવનાનાં નિયામકઃ ।
પાતાલવાસી પાતાલં સર્વજ્વરવિનાશનઃ ॥ ૧,૧૫.૧૫૧॥

પરમાનન્દરૂપી ચ ધર્માણાં ચ પ્રવર્તકઃ ।
સુલભો દુર્લભશ્ચૈવ પ્રાણાયામપરસ્તથા(૯૬૦) ॥ ૧,૧૫.૧૫૨॥

પ્રત્યાહારો ધારકશ્ચ પ્રત્યાહારકરસ્તથા ।
પ્રભા કાન્તિસ્તથા હ્યર્ચિઃ શુદ્ધસ્ફટિકસન્નિભઃ ॥ ૧,૧૫.૧૫૩॥

અગ્રાહશ્ચૈવ ગૌરશ્ચ સર્વઃ(૯૭૦)શુચિરભિષ્ટુતઃ ।
વષટ્કારો વષડ્વૌષટ્સ્વધા સ્વાહા રતિસ્તથા ॥ ૧,૧૫.૧૫૪॥

પક્તા નન્દયિતા(૯૮૦)ભોક્તા બોદ્ધા ભાવયિતા તથા ।
જ્ઞાનાત્મા ચૈવ દેહાત્મા ભૂ(ઉ) મા સર્વેશ્વરેશ્વરઃ ॥ ૧,૧૫.૧૫૫॥

નદી નન્દી ચ નન્દીશો(૯૯૦)ભારતસ્તરુનાશનઃ ।
ચક્રપઃ શ્રીપતિશ્ચૈવ નૃપાણાં ચક્રવર્તિનામ્ ॥ ૧,૧૫.૧૫૬॥

ઈશશ્ચ સર્વદેવાનાં દ્વારકાસંસ્થિતસ્તથા ।
પુષ્કરઃ પુષ્કરાધ્યક્ષઃ પુષ્કરદ્વીપ એવ ચ (૧૦૦૦) ॥ ૧,૧૫.૧૫૭॥

ભરતો જનકો જન્યઃ સર્વાકારવિ વર્જિતઃ ।
નિરાકારો નિર્નિમિત્તો નિરાતઙ્કો નિરાશ્રયઃ (૧૦૦૮) ॥ ૧,૧૫.૧૫૮॥

ઇતિ નામસહસ્રં તે વૃષભધ્વજ કીર્તિતમ્ ।
દેવસ્ય વિષ્ણોરીશસ્ય સર્વપાપવિનાશનમ્ ॥ ૧,૧૫.૧૫૯॥

પઠન્દ્વિજશ્ચ વિષ્ણુત્વં ક્ષત્રિયો જયમાપ્નુયાત્ ।
વૈશ્યો ધનં સુખં શૂદ્રો વિષ્ણુભક્તિસમન્વિતઃ ॥ ૧,૧૫.૧૬૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રીવિષ્ણુસહસ્રનામસ્તોત્રનિરૂપણં નામ પઞ્ચદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬
રુદ્ર ઉવાચ ।
પુનર્ધ્યાનં સમાચક્ષ્વ શઙ્ખચક્રગદાધર ।
વિષ્ણોરીશસ્ય દેવસ્ય શુદ્ધસ્ય પરમાત્મનઃ ॥ ૧,૧૬.૧॥

હરિરુવાચ ।
શૃણુ રુદ્ર ! હરેર્ધ્યાનં સંસારતરુનાશનમ્ ।
દૃશિરૂપમનન્તં ચ સર્વવ્યાપ્યજમવ્યયમ્ ॥ ૧,૧૬.૨॥

અક્ષરં સર્વગં નિત્યં મહબ્દ્રહ્માસ્તિ કેવલમ્ ।
સર્વસ્ય જગતો મૂલં સર્વગં પરમેશવરમ્ ॥ ૧,૧૬.૩॥

સર્વભૂતહૃદિસ્થં વૈ સર્વભૂતમહેશ્વરમ્ ।
સર્વાધારં નિરાધારં સર્વકારણકારણમ્ ॥ ૧,૧૬.૪॥

અલેપકં તથા મુક્તં મુક્તયોગિવિચિતિતમ્ ।
સ્થૂલદેહવિહીનં ચ ચક્ષુષા પરિવર્જિતમ્ ॥ ૧,૧૬.૫॥

વાગિન્દ્રિયવિહીનં ચ પ્રાણિધર્મવિવર્જિતમ્ ।
પાદેન્દ્રિયવિહીનં ચ વાગ્ધર્મપરિવર્જિતમ્ ।
પાયૂપસ્થવિહીનં ચ સર્વેન્દ્રિય વિવર્જિતમ્ ॥ ૧,૧૬.૬॥

મનોવિરહિતં તદ્વન્મનોધર્મવિવર્જિતમ્ ।
બુદ્ધ્યા વિહીનં દેવેશં ચેતસા પરિવર્જિતમ્ ॥ ૧,૧૬.૭॥

અહઙ્કારવિહીનં વૈ બુદ્ધિધર્મવિવર્જિતમ્ ।
પ્રાણેન રહિતં ચૈવ હ્યપાનેન વિવર્જિતમ્ ॥ ૧,૧૬.૮॥

વ્યાનાખ્યવાયુહીનં વૈ પ્રાણધર્મવિવર્જિતમ્ ।
હરિરુવાચ ।
પુનઃ સૂર્યર્ચનં વક્ષ્યે યદુક્તં ભૃગવે પુરા ॥ ૧,૧૬.૯॥

ૐ ખખોલ્કાય નમઃ ।
સૂર્યસ્ય મૂલમન્ત્રોઽયં ભુક્તિમુક્તિપ્રદાયકઃ ॥ ૧,૧૬.૧૦॥

ૐ ખખોલ્કાય ત્રિદશાય નમઃ ।
ૐ વિચિ ઠઠ શિરસે નમઃ ।
ૐ જ્ઞાનિને ઠઠ શિખાયૈ નમઃ ।
ૐ સહસ્રરશ્મયે ઠઠ કવચાય નમઃ ॥ ૧,૧૬.૧૧॥

ૐ સર્વતેજોઽધિપતયે ઠઠ અસ્ત્રાય નમઃ ।
ૐ જ્વલજ્વલ પ્રજ્વલપ્રજ્વલ ઠઠ નમઃ ॥ ૧,૧૬.૧૨॥

અગ્નિપ્રાકારમન્ત્રોઽયં સૂર્યસ્યાઘવિનાશનઃ ।
ૐ આદિત્યાય વિદ્મહે, વિશ્વભા વાય ધીમહિ, તન્નઃ સૂર્ય પ્રચોદયાત્ ॥ ૧,૧૬.૧૩॥

સકલીકરણં કુર્યાદ્રાયત્ર્યા ભાસ્કરસ્ય ચ ।
ધર્માત્મને ચ પૂર્વસ્મિન્યમા યેતિ ચ દક્ષિણે ॥ ૧,૧૬.૧૪॥

દણ્ડનાયકાય તતો દૈવતાયેતિ ચોત્તરે ।
શ્યામપિઙ્ગલમૈશાન્યામાગ્નેય્યાં દીક્ષિતં યજેત્ ॥ ૧,૧૬.૧૫॥

વજ્રપાણિં ચ નૈરૃત્યાં ભૂર્ભુવઃસ્વશ્ચ વાયવે ।
ૐ ચન્દ્રાય નક્ષત્રાધિપતયે નમઃ ।
ૐ અઙ્ગારકાય ક્ષિતિસુતાય નમઃ ।
ૐ બુધાય સોમસુતાય નમઃ ।
ૐ વાગીશ્વરાય સર્વવિદ્યાધિપતયે નમઃ ।
ૐ શુક્રાય મહર્ષયે ભૃગુસુતાય નમઃ ।
ૐ શનૈશ્ચરાય સૂર્યાત્મજાય નમઃ ।
ૐ રાહવે નમઃ ।
ૐ કેતવે નમઃ ॥ ૧,૧૬.૧૬॥

પૂર્વાદીશાનપર્યન્તા એતે પૂજ્યા વૃષધ્વજ ।
ૐ અનૂકાય નમઃ ।
ૐ પ્રથમનાથાય નમઃ ।
ૐ બુદ્ધાય નમઃ ॥ ૧,૧૬.૧૭॥

ૐ ભગવન્નપરિમિતમયૂખમાલિન્! સકલજગત્પતે ! સપ્તાશ્વવાહન !

ચતુર્ભુજ ! પરમસિદ્ધિપ્રદ ! વિસ્ફુલિઙ્ગપિઙ્ગલ !
તત એહ્યેહિ ઇદમર્ઘ્યં મમ શિરસિ ગતં ગૃહ્ણગૃહ્ણ તેજોગ્રરૂપમનગ્ન !
જ્વલજ્વલ ઠઠ નમઃ ॥ ૧,૧૬.૧૮॥

અનેનાવાહ્ય મન્ત્રેણ તતઃ સૂર્યં વિસર્જયેત્ ।
ૐ નમો ભગવતે આદિત્યાય સહસ્ર કિરણાય ગચ્છ સુખં પુનરાગમનાયેતિ ॥ ૧,૧૬.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
હરિધ્યાનસૂર્યાર્ચનયોર્નિરૂપણં નામ ષોડશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭

હરિરુવાચ ।
પુનઃ સૂર્યાર્ચનં વક્ષ્યે યદુક્તં ધનદાય હિ ।
અષ્ટપત્રં લિખેત્પદ્મં શુચૌ દેશે સકર્ણિકમ્ ॥ ૧,૧૭.૧॥

આવાહનીં તતો બદ્ધ્વા મુદ્રામાવાહયેદ્રવિમ્ ।
ખખોલ્કં સ્થાપ્ય મુદ્રાં તુ સ્થાપયેન્મન્ત્રરૂપિણીમ્ ॥ ૧,૧૭.૨॥

આગ્નેય્યાં દિશિ દેવસ્ય હૃદયં સ્થાપયેચ્છિવ ! ।
ઐશાન્યાં તુ શિરઃ સ્થાપ્યં નૈરૃત્યાં વિન્યસેચ્છિખામ્ ॥ ૧,૧૭.૩॥

પૌરન્દર્યાં ન્યસેદ્વર્મમેકાગ્રસ્થિતમાનસઃ ।
વાયવ્યાં ચૈવ નેત્રં તુ વારુણ્યામસ્ત્રમેવ ચ ॥ ૧,૧૭.૪॥

ઐશાન્યાં સ્થાપયેત્સોમં પૌરન્દર્યાં તુ લોહિતમ્ ।
આગ્નેય્યાં સોમતનયં યામ્યાં ચૈવ બૃહસ્પતિમ્ ॥ ૧,૧૭.૫॥

નૈરૃત્યાં દાનવગુરું વારુણ્યાં તુ શનૈશ્ચરમ્ ।
વાયવ્યાં ચ તથા કેતું કૌબેર્યાં રાહુમેવ ચ ॥ ૧,૧૭.૬॥

દ્વિતીયાયાં તુ કક્ષાયાં સૂર્યાન્દ્વાદશ પૂજયેત્ ।
ભગઃ સૂર્યોઽર્યમા ચૈવ મિત્રો વૈ વરુણસ્તથા ॥ ૧,૧૭.૭॥

સવિતા ચૈવ ધાતા ચ વિવસ્વાંશ્ચ મહાબલઃ ।
ત્વષ્ટા પૂષા તથા ચેન્દ્રો દ્વાદશો વિષ્ણુરુચ્યતે ॥ ૧,૧૭.૮॥

પૂર્વાદાવર્ચયેદ્દેવાનિન્દ્રાદીઞ્છ્રદ્ધયા નરઃ ।
જયા ચ વિજયા ચૈવ જયન્તિ ચાપરાજિતા ।

શેષશ્ચ વાસુકિશ્ચૈવ નાગાનિત્યાદિ પૂજયેત્ ॥ ૧,૧૭.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સૂર્યાર્ચન વિધિર્નામ સપ્તદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮
સૂત ઉવાચ ।
ગરુડોક્તં કશ્યપાય વક્ષ્યે મૃત્યુઞ્જયાર્ચનમ્ ।
ઉદ્ધારપૂર્વકં પુણ્યં સર્વદેવમયં મતમ્ ॥ ૧,૧૮.૧॥

ઓઙ્કારં પૂર્વમુદ્ધૃત્ય જુ(હુ)ઙ્કારં તદનન્તરમ્ ।
સવિસર્ગં તૃતીયં સ્યાન્મૃત્યુદારિદ્યમર્દનમ્ ॥ ૧,૧૮.૨॥

ઈશવિષ્ણવર્કદેવ્યાદિકવચં સર્વસાધકમ્ ।
અમૃતેશં મહામન્ત્રન્ત્ર્યક્ષરં પૂજનં સમમ્ ।
જપનાન્મૃત્યુહીનાઃ સ્યુઃ સર્વપાપવિવર્જિતાઃ ॥ ૧,૧૮.૩॥

શતજપ્યાદ્વેદફલં યજ્ઞતીર્થફલં લભેત્ ।
અષ્ટોત્તરશતાજ્જાપ્યાત્રિસન્ધ્યં મૃત્યુ શત્રુજિત ॥ ૧,૧૮.૪॥

ધ્યાયેચ્ચ સિતપદ્મસ્થં વરદં ચાભયં કરે ।
દ્વાભ્યાં ચામૃતકુમ્ભં તુ ચિન્તયેદમૃતેશ્વરમ્ ॥ ૧,૧૮.૫॥

તસ્યૈવાઙ્ગગતાં દેવીમમૃતામૃતભાષિણી(વિનિ) મ્ ।
કલશં દક્ષિણે હસ્તે વામહસ્તે સરોરુહમ્ ॥ ૧,૧૮.૬॥

જપેદષ્ટસહસ્રં વૈ ત્રિસન્ધ્યં માસમેકતઃ ।
જરામૃત્યુમહાવ્યાધિશત્રુચ્છિવશાન્તિદમ્ ॥ ૧,૧૮.૭॥

આહ્વાનં સ્થાપનં રોધં સન્નિધાનં નિવેશનમ્ ।
પાદ્યમા ચમનં સ્નાનમર્ધ્યં સ્રગનુલેપનમ્ ॥ ૧,૧૮.૮॥

દીપાંબરં ભૂષણં ચ નૈવદ્યં પાનવીજનમ્ ।
માત્રામુદ્રાજપધ્યાનં દક્ષિણા ચાહુતિઃ સ્તુતિઃ ॥ ૧,૧૮.૯॥

વાદ્યં ગતિં ચ નૃત્યં ચ ન્યાસયોગં પ્રદક્ષિણમ્ ।
પ્રણતિર્મન્ત્રશય્યા ચ વન્દનં ચ વિસર્જનમ્ ॥ ૧,૧૮.૧૦॥

ષડઙ્ગાદિપ્રકારેણ પૂજનં તુ ક્રમોદિતમ્ ।

પરમેશમુખોદ્ગીતં યો જાનાતિ સ પૂજકઃ ॥ ૧,૧૮.૧૧॥

અર્ઘ્યપાત્રાર્ચનં ચાદાવસ્ત્રેણૈવ તુ તાડનમ્ ।
શોધનં કવચેનૈવ અમૃતીકરણં તતઃ ॥ ૧,૧૮.૧૨॥

પૂજા ચાધારશક્ત્યાદેઃ પ્રાણાયામં તથાસને ।
પીઠસુદ્ધિં તતઃ કુર્યાચ્છોષણાદ્યૈસ્તતઃ સ્મરેત્ ॥ ૧,૧૮.૧૩॥

આત્માનં દેવરૂપં ચ કરાઙ્ગન્યાસકં ચરેત્ ।
આત્માનં પૂજયેત્પશ્ચાજ્યો તીરૂપં હૃદબ્જતઃ ॥ ૧,૧૮.૧૪॥

મૂર્તૌ વા સ્થણ્ડિલે વાપિ ક્ષિપેત્પુષ્પં તુ ભાસ્વરમ્ ।
આહ્વાનદ્વારપૂજાર્થં પૂજા ચાધારશક્તિતઃ ॥ ૧,૧૮.૧૫॥

સાન્નિધ્યકરણં દેવે પરિવારસ્ય પૂજનમ્ ।
અઙ્ગષટ્કસ્ય પૂજા વૈ કર્તવ્યા ચ વિપશ્ચિતૈઃ ॥ ૧,૧૮.૧૬॥

ધર્માદયશ્ચ શક્રાદ્યાઃ સાયુધાઃ પરિવારકાઃ ।
યુગવેદમુહૂર્તાશ્ચ પૂજેયં ભુક્તિમુક્તિકૃત્ ॥ ૧,૧૮.૧૭॥

માતૃકાશ્ચ ગણાંશ્ચાદૌ નન્દિગઙ્ગે ચ પૂજયેત્ ।
મહાકાલં ચ યમનાં દેહલ્યાં પૂજયેત્પુરા ॥ ૧,૧૮.૧૮॥

ૐ અમૃતેશ્વર ૐ ભૈરવાય નમઃ ।
એવં ૐ જું હંસઃ સૂર્યાય નમઃ ॥ ૧,૧૮.૧૯॥

એવં શિવાય કૃષ્ણાય બ્રહ્મણે ચ ગણાય ચ ।
ચણ્ડિકાયૈ સરસ્વત્યૈ મહાલક્ષ્માદિ પૂજયેત્ ॥ ૧,૧૮.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
અમૃતેશમૃત્યુઞ્જયપૂજનં નામાષ્ટાદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯
સૂત ઉવાચ ।
પ્રાણેશ્વરં ગારુડં ચ શિવોક્તં પ્રવદામ્યહમ્ ।
સ્થાનાન્યાદૌ પ્રવક્ષ્યામિ નાગદષ્ટો ન જીવતિ ॥ ૧,૧૯.૧॥

ચિતાવલ્મીકશૈલાદૌ કપે ચ વિવરે તરોઃ ।
દંશે રેખાત્રયં યસ્ય પ્રચ્છન્નં સ ન જીવતિ ॥ ૧,૧૯.૨॥

ષષ્ઠ્યાં ચ કર્કટે મેષે મૂલાશ્લેષામઘાદિષુ ।
કક્ષાશ્રોણિગલે સન્ધૌ શઙ્ખકર્ણોદરાદિષુ ॥ ૧,૧૯.૩॥

દણ્ડી શસ્ત્રધરો ભિક્ષુર્નગ્નાદિઃ કાલદૂતકઃ ।
બાહૌ ચ વક્ષે ગ્રીવાયાં દષ્ટાયાં ન હિ જીવતિ ॥ ૧,૧૯.૪॥

પૂર્વં દિનપતિર્ભુઙ્ક્તે અર્ધયામં તતોઽપરે ।
શેષા ગ્રહાઃ પ્રતિદિનં ષટ્સંખ્યા પરિવર્તનૈઃ ॥ ૧,૧૯.૫॥

નાગભોગઃ ક્રમાજ્જ્ઞેયો રાત્રૌ બાણવિવર્તનૈઃ ।
શેષોઽર્કઃ ફણિપશ્ચન્દ્રસ્તક્ષકો ભૌમ ઈરિતઃ ॥ ૧,૧૯.૬॥

કર્કોટો જ્ઞો ગુરુઃ પદ્મો મહાપદ્મશ્ચ ભાર્ગવઃ ।
શઙ્ખઃ શનૈશ્ચરો રાહુઃ કુલિકશ્ચાહયો ગ્રહાઃ ॥ ૧,૧૯.૭॥

રાત્રૌ દિવા સુરગુરોર્ભાગે સ્યાદમરાન્તકઃ ।
પઙ્ગોઃ કાલે દિવા રાહુઃ કુલિકેન સહ સ્થિતઃ ॥ ૧,૧૯.૮॥

યામાર્ધસન્ધિસંસ્થાં ચ વેલાં કાલવતીં ચરેત્ ।
બાણદ્વિષડ્વહ્નિવાજિયુગભૂરેકભાગતઃ? ॥ ૧,૧૯.૯॥

દિવા ષડેદનેત્રાદ્રિપઞ્ચત્રિમાનુષાંશકૈઃ ।
પાદાઙ્ગુષ્ઠે પાદપૃષ્ઠે પાદપૃષ્ઠે ગુલ્ફે જાનુનિ લિઙ્ગકે ॥ ૧,૧૯.૧૦॥

નાભૌ હૃદિ સ્તનતટે કણ્ઠે નાસાપુટેઽક્ષિણિ ।
કર્ણયોશ્ચ ભ્રુવોઃ શઙ્ખે મસ્તકે પ્રતિપત્ક્રમાત્ ॥ ૧,૧૯.૧૧॥

તિષ્ઠચ્ચન્દ્રશ્ચ જીવેચ્ચ પુંસો દક્ષિણભાગકે ।
કાયસ્ય વામભાગે તુ સ્ત્રિયા વાયુવહાત્કરાત્ ॥ ૧,૧૯.૧૨॥

અમૃતસ્તત્કૃતો મોહો નિવર્તેત ચ મર્દનાત્ ।
આત્મનઃ પરમં બીજં હંસાખ્યં સ્ફટિકામલમ્ ॥ ૧,૧૯.૧૩॥

દાતવ્યં વિષપાપઘ્નં બીજં તસ્ય ચતુર્વિધમ્ ।
વિન્દુપઞ્ચસ્વરયુતમાદ્યમુક્તં દ્વિતીયકમ્ ।
ષષ્ઠારૂઢં તૃતીયં સ્યાત્સવિસર્ગં ચતુર્થકમ્ ।
ૐ કુરુ કુલે સ્વાહા ॥ ૧,૧૯.૧૪॥

વિદ્યા ત્રૈલોક્યરક્ષાર્થં ગરુડેન ધૃતા પુરા ।
વધેપ્સુર્નાગનાગાનાં મુખેઽથ પ્રણવં ન્યસેત્ ॥ ૧,૧૯.૧૫॥

ગલે કુરુ ન્યસેદ્ધીમાન્કુલે ચ ગુલ્ફયોઃ સ્મૃતઃ ।
સ્વાહા પાદયુગે ચૈવ યુગહા ન્યાસ ઈરિતઃ ॥ ૧,૧૯.૧૬॥

ગૃહે વિવિખિતા યત્ર તન્નાગાઃ સંત્યજન્તિ ચ ।
સહસ્રમન્ત્રં જપ્ત્વા તુ કર્ણે સૂત્રં ધૃતં તથા ॥ ૧,૧૯.૧૭॥

યદ્ગૃહે શર્કરા જપ્તા ક્ષિપ્તા નાગાસ્ત્યજન્તિ તત્ ।
સપ્તલક્ષસ્ય જપ્યાદ્ધિ સિદ્ધિઃ પ્રાપ્તા સુરાસુરૈઃ ॥ ૧,૧૯.૧૮॥

ૐ સુવર્ણરેખે કુક્કુટવિગ્રહરૂપિણિ સ્વાહા ।
એવઞ્ચાષ્ટદલે પદ્મ દલે વર્ણયુગં લિખેત્ ॥ ૧,૧૯.૧૯॥

નામૈતદ્વારિધારાભિઃ સ્નાતો દષ્ટો વિષં ત્યજેત્ ।
ૐ પક્ષિ સ્વાહા ॥ ૧,૧૯.૨૦॥

અઙ્ગુષ્ઠાદિ કનિષ્ઠાન્તં કરે ન્યસ્યાથ દેહકે ।
કે (કૈ) વક્ત્રે હૃદિ લિઙ્ગે ચ પાદયોર્ગરુડસ્ય હિ ॥ ૧,૧૯.૨૧॥

નાક્રામન્તિ ચ તચ્છાયાં સ્વપ્નેઽપિ વિષપન્નગાઃ ।
યસ્તુ લક્ષં જપેચ્ચાસ્યાઃ સ દૃષ્ટ્વા(ષ્ટ્યા) નાશયેદ્વિષમ્ ॥ ૧,૧૯.૨૨॥

ૐ હ્રી હ્રૌ હ્રીં ભિ(ભી) રુણ્ડાયૈ સ્વાહા ।
કર્ણે જપ્તા ત્વિયં વિદ્યા દષ્ટકસ્ય વિષં હરેત્ ॥ ૧,૧૯.૨૩॥

અ આ ન્યસેત્તુ પાદાગ્રે ઇ ઈ ગુલફેઽથ જાનુનિ ।
ઉ ઊ એ ઐ કટિતટે ઓ નાભૌ હૃદિ ઔ ન્યસેત્ ॥ ૧,૧૯.૨૪॥

વક્ત્રે અમુત્તમાઙ્ગે અઃ ન્યસેદ્વૈ હંસસંયુતાઃ ।
હંસો વિષાદિ ચ હરેજ્જપ્તો ધ્યાતોઽથ પૂજિતઃ ॥ ૧,૧૯.૨૫॥

ગરુડોઽહમિતિ ધ્યાત્વા કુર્યાદ્વિષહરાં (રીં) ક્રિયામ્ ।
હમન્ત્રં ગાત્રવિન્યસ્તં વિષાદિહરમીરિતમ્ ॥ ૧,૧૯.૨૬॥

ન્યસ્ય હંસં વામકરે નાસામુખનિરોધકૃત્ ।
મન્ત્રો હરેદ્દષ્ટકસ્ય ત્વઙ્માંસાદિગતં વિષમ્ ॥ ૧,૧૯.૨૭॥

સ વાયુના સમાકૃષ્ય દષ્ટાનાં ગરલં હરેત્ ।
તનૌ ન્યસેદ્દષ્ટકસ્ય નીલકણ્ઠાદિ સંસ્મરેત્ ॥ ૧,૧૯.૨૮॥

પીતં પ્રત્યઙ્ગિરામૂલં તણ્ડુલદ્ભિર્વિષાપહમ્ ।
પુનર્નવાફલિનીનાં મૂલં વક્ત્રજમીદૃશમ્ ॥ ૧,૧૯.૨૯॥

મૂલં શુક્લબૃહત્યાસ્તુ કર્કોટ્યાગૈરિકર્ણિકમ્ ।
અદ્ભિર્ઘૃષ્ટઘૃતોપેતલેપોઽયં વિષમર્દનઃ ॥ ૧,૧૯.૩૦॥

વિષમૃદ્ધિં ન વ્રજેચ્ચ ઉષ્ણં પિબતિ યો ઘૃતમ્ ।
પઞ્ચાઙ્ગં તુ શિરીષસ્ય મૂલં ગૃઞ્જનજં તથા ॥ ૧,૧૯.૩૧॥

સર્વાઙ્ગલેપતશ્ચાપિ પાનાદ્વા વિષહૃદ્ભવેત્ ।
હ્રીં ગોનસાદિવિષહૃત્ ॥ ૧,૧૯.૩૨॥

હૃલ્લલાટવિસર્ગાન્તં ધ્યાતં વશ્યા દિકૃદ્ભવેત્ ।
ન્યસ્તં યોનૌ વશેત્કન્યાં કુર્યાન્મદજલાવિલમ્ ॥ ૧,૧૯.૩૩॥

જપ્ત્વા સપ્તાષ્ટસાહસ્રં ગરુત્માનિવ સર્વગઃ ।
કવિઃ સ્યાચ્છ્રુતિધરી ચ વશ્યાઃ સ્ત્રીશ્ચાયુરાપ્નુયાત્ ।
વિષહૃત્સ્યાત્તથા તદ્વન્મણિર્વ્યાસઃ સ્મૃતો ધ્રુવમ્ ॥ ૧,૧૯.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સર્પવિષહરોપાય(પ્રાણેશ્વરવિદ્યા) નિરૂપણં નામૈકોનવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦
સૂત ઉવાચ ।
વક્ષ્યે તત્પરમં ગુહ્યં શિવોક્તં મન્ત્રવૃન્દકમ્ ।
પાશં ધનુશ્ચ ચક્રં ચ મુદ્ગરં શૂલપટ્ટિશમ્ ॥ ૧,૨૦.૧॥

એતૈરેવાયુધૈર્યુદ્ધે મન્ત્રૈઃ શત્રૂઞ્જયેન્નૃપઃ ।
મન્ત્રોદ્ધારઃ પદ્મપાત્રે આદિ પૂર્વાદિકે લિખેત્ ॥ ૧,૨૦.૨॥

અષ્ટવર્ગં ચાષ્ટમં ચ ખ્યાતમીશાનપત્રકે ।
ૐ કારો બ્રહ્મ બીજં સ્યાદ્ધ્રીઙ્કારો વિષ્ણુરેવ ચ ॥ ૧,૨૦.૩॥

હ્રીઙ્કા રશ્ચ શિવઃ શૂલે ત્રિશાખે તુ ક્રમાન્ન્યસેત્ ।
ૐ હ્રીં હ્રીં ॥ ૧,૨૦.૪॥

શૂલં ગૃહીત્વા હસ્તેનાભ્રામ્ય ચાકાશસમુખમ્ ।
તદ્દર્શનાન્દ્રહા નાગા દૃષ્ટ્વા વા નાશમાપ્નુ યુઃ ॥ ૧,૨૦.૫॥

ધૂમારક્તે કરં મધ્યે ધ્યાત્વા ખે ચિન્તયેન્નરઃ ।

દુષ્ટા નાગા ગ્રહા મેઘા વિનશ્યન્તિ ચ રાક્ષસાઃ ॥ ૧,૨૦.૬॥

ત્રિલોકાન્રક્ષયેન્મન્ત્રો મર્ત્યલોકસ્ય કા કથા ।
ૐ જૂં સૂં હૂં ફટ્ ॥ ૧,૨૦.૭॥

ખાદિરાન્કીલકાનષ્ટૌ ક્ષેત્રે સમન્ત્ર્ય વિન્યસેત્ ।
ન તત્ર વજ્રપાતસ્ય સ્ફૂર્જથ્વાદેરુપદ્રવઃ ॥ ૧,૨૦.૮॥

ગરુડોક્તૈર્મહામન્ત્રૈઃ કીલકાનષ્ટ મન્ત્રયેત્ ।
એકવિંશતિવારાણિ ક્ષેત્રે તુ નિખનેન્નિશિ ॥ ૧,૨૦.૯॥

વિદ્યુન્મૂષકવજ્રાદિસમુપદ્રવ એવ ચ ।
હરક્ષમલવરયૂ બિન્દુયુક્તઃ સદાશિવઃ ॥ ૧,૨૦.૧૦॥

ૐ હ્રાં સદાશિવાય નમઃ ।
તર્જન્યા વિન્યસેત્પિણ્ડં (ણ્ડે) દાડિમીકુસુમપ્રભમ્ ॥ ૧,૨૦.૧૧॥

તસ્યૈવ દર્શનાદ્દુષ્ટા મેઘવિદ્યુદ્દ્વિપાદયઃ ।
રાક્ષસા ભૂતડાકિન્યઃ પ્રદ્રવન્તિ દિશો દશ ॥ ૧,૨૦.૧૨॥

ૐ હ્રીં ગણેશાય નમઃ ।
(ૐ હ્રીં) સ્તમ્ભનાદિચક્રાય નમઃ ।
ૐ ઐં બ્રહયૈન્ત્રૈ લોક્યડામરાય નમઃ ॥ ૧,૨૦.૧૩॥

ભૈરવં પિણ્ડમાખ્યાતં વિષપાપગ્રહાપહમ્ ।
ક્ષેત્રસ્ય રક્ષણં ભૂતરાક્ષસાદેઃ પ્રમર્દનમ્ ॥ ૧,૨૦.૧૪॥

ૐ નમઃ ।
ઇન્દ્રવજ્રં કરે ધ્યાત્વા દુષ્ટમેઘાદિવારણમ્ ।
વિષ શત્રુગણા ભૂતા નશ્યન્તે વજ્રમુદ્રયા ॥ ૧,૨૦.૧૫॥

ૐ ક્ષું(ક્ષ) નમઃ ।
સ્મરેત્પાશં વામહસ્તે વિષભૂતાદિ નશ્યતિ ।
ૐ હ્રાં (હ્રો) નમઃ ।
હરેદુચ્ચારણાન્મન્ત્રો વિષમેઘગ્રહાદિકાન્ ॥ ૧,૨૦.૧૬॥

ધ્યાત્વા કૃતાન્તં ચ દહેચ્છેદકાસ્ત્રેણ વૈ જગત્ ।
ૐ ક્ષણં (ક્ષ્મ) નમઃ ।
ધ્યાત્વા તુ ભૈરવં કુર્યાન્દ્રહભૂતવિષાપહમ્ ॥ ૧,૨૦.૧૭॥

ॐ લસદ્દિજિહ્વાક્ષ સ્વાહા ।
ક્ષેત્રાદૌ ગ્રહભૂતાદિવિષપક્ષિનિવારણમ્ ॥ ૧,૨૦.૧૮॥

ॐ ક્ષ્વ (ક્ષ્ણં) નમઃ ।
રક્તેન પટહે લિખ્ય શબ્દાત્રેસુર્ગ્રહાદયઃ ।
ॐ મર મર મારયમારય સ્વાહા ।
ॐ હું ફટ્સ્વાહા ॥ ૧,૨૦.૧૯॥

શૂલં ચાષ્ટશતૈર્મન્ત્ર્ય ભ્રામણાચ્છત્રુવૃન્દહૃત્ ।
ઊર્ધ્વશક્તિનિપાતેન અધઃ શક્તિં નિકુઞ્ચયેત્ ॥ ૧,૨૦.૨૦॥

પૂરકે પૂરિતા મન્ત્રાઃ કુમ્ભકેન સુમન્ત્રિતાઃ ।
પ્રણવેનાપ્યાયિતાસ્તે મનવસ્તદુદીરિતાઃ ।
એવમાપ્યાયિતા મન્ત્રા ભૃત્યવત્ફલદાયકાઃ ॥ ૧,૨૦.૨૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષાદિહરમન્ત્રવૃન્દનિરૂપણં નામ વિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧
સૂત ઉવાચ ।
પઞ્ચવક્ત્રાર્ચનં વક્ષ્યે પૃથ ગ્યદ્ભુક્તિમુક્તિદમ્ ।
ॐ ભૂર્વિષ્ણવે આદિભૂતાય સર્વાધારાય મૂર્તયે સ્વાહા ॥ ૧,૨૧.૧॥

સદ્યોજાતસ્ય ચાહ્વાનમનેન પ્રથમં ચરેત્ ।
ॐ હાં સદ્યોજાતાયૈવ કલા હ્યષ્ટૌ પ્રકીર્તિતાઃ ॥ ૧,૨૧.૨॥

સિદ્ધિરૃદ્ધિર્ધૃતિર્લક્ષ્મીર્મેધા કાન્તિઃ સ્વધા સ્થિતિઃ (૮) ।
ॐ હીં વામદેવાયૈવ કલાસ્તસ્ય ત્રયોદશ ॥ ૧,૨૧.૩॥

રજા રક્ષા રતિઃ પાલ્યા કાન્તિ સ્તૃષ્ણા મતિઃ ક્રિયા ।
કામા બુદ્ધિશ્ચ રાત્રિશ્ચ ત્રાસની મોહિની તથા (૧૩) ॥ ૧,૨૧.૪॥

મનોન્મની અઘોરા ચ તથા મોહા ક્ષુધા કલાઃ ।
નિદ્રા મૃત્યુશ્ચ માયા ચ (૮)અષ્ટસંખ્યા ભયઙ્કર ॥ ૧,૨૧.૫॥

ॐ હૈં તત્પુરુષાયૈવ (ષાય) નિવૃત્તિશ્ચ પ્રતિષ્ઠા ચ વિદ્યા શાન્તિર્ન કેવલા ॥ ૧,૨૧.૬॥

ॐ હૌં ઈશાનાય નમો નિશ્ચલા ચ નિરઞ્જના ।

શશિની ચાઙ્ગના ચૈવ મરીચિજ્વાલિની તથા ॥ ૧,૨૧.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પઞ્ચવક્ત્રપૂજનં નામૈકવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨
સૂત ઉવાચ ।
શિવાર્ચનં પ્રવક્ષ્યામિ બુક્તિમુક્તિકરં પરમ્ ।
શાન્તં સર્વગતં શૂન્યં માત્રાદ્વાદશકે સ્થિતમ્ ॥ ૧,૨૨.૧॥

પઞ્ચ વક્ત્રાણિ હ્રસ્વાનિ દીર્ઘાણ્યઙ્ગાનિ બિન્દુના ।
સવિસર્ગં વદેદસ્ત્રં શિવ ઊર્ધ્વં તથા પુનઃ ॥ ૧,૨૨.૨॥

ષષ્ઠેનાધો મહામન્ત્રો હૌમિત્યેવાખિલાર્થદઃ ।
હસ્તાભ્યાં સંસ્પૃશેત્પાદાવૂર્ધ્વં પાદાન્મસ્તકમ્ ॥ ૧,૨૨.૩॥

મહામુદ્રા હિ સર્વેષાં કરાઙ્ગન્યાસમાચરેત્ ।
તાલહસ્તેન પૃષ્ઠં ચ અસ્ત્રમન્ત્રેણ શોધયેત્ ॥ ૧,૨૨.૪॥

કનિષ્ઠામાદિતઃ કૃત્વા તર્જન્યઙ્ગાનિ વિન્યસેત્ ।
પૂજનં સમ્પ્રવક્ષ્યામિ કર્ણિકાયાં ત્હૃદમ્બુજે ॥ ૧,૨૨.૫॥

ધર્મં જ્ઞાનં ચ વૈરાગ્યમૈશ્વર્યાદિ ત્હૃદાર્ચયેત્ ।
આવાહનં સ્થાપનં ચ પાદ્યમર્ઘ્યં હૃદાર્પયેત્ ॥ ૧,૨૨.૬॥

આચામં સ્નપનં પૂજામેકાધારણતુલ્યકમ્? ।
અગ્નિકાર્યવિધિં વક્ષ્યે અસ્ત્રેણોલ્લેખનં ચરેત્ ॥ ૧,૨૨.૭॥

વર્મણાભ્યુક્ષણં કાર્યં શક્તિન્યાસં હૃદા ચરેત્ ।
ત્હૃદિ વા શક્તિગર્તે ચ પ્રક્ષિપેજ્જાતવેદસમ્ ॥ ૧,૨૨.૮॥

ગર્ભાધાનાદિકં કૃત્વા નિષ્કૃતિં ચારસ્ય પશ્ચિમામ્ ।
હૃદા કૃત્વા સર્વકર્મ શિવં સાંગં તુ હોમયેત્ ॥ ૧,૨૨.૯॥

પૂજયેન્મણ્ડલે શમ્ભું પદ્મગર્ભે ગરાઙ્કિતમ્ ।
ચતુઃ ષષ્ટ્યન્તમષ્ટાદિ ખાક્ષિ ખાદ્યાદિમણ્ડલમ્ ॥ ૧,૨૨.૧૦॥

ખાક્ષીન્દ્રસૂર્યગં સર્વખાદિવેદેન્દુ (દેવેન્દુ) વર્તનમ્ ।
આગ્નેય્યાં કારયેત્કુણ્ડમર્ધચન્દ્રનિભં શુભમ્ ॥ ૧,૨૨.૧૧॥

અગ્નિશાસ્ત્ર પરાયુસ્થો ત્હૃદયાદિગણોચ્યતે ।
અસ્ત્રં દિશા સુપદ્મસ્ય કર્ણિકાયાં સદાશિવઃ ॥ ૧,૨૨.૧૨॥

દીક્ષાં વક્ષ્યે પઞ્ચતત્ત્વે સ્થિતાં ભૂમ્યાદિકાં પરે ।
નિવૃત્તિર્ભૂપ્રતિષ્ઠાદ્યૈર્વિદ્યાગ્નિઃ શાન્તિવન્નિજઃ ॥ ૧,૨૨.૧૩॥

શાન્ત્યતીતં ભવેદ્વ્યોમ તત્પરં શાન્તમવ્યયમ્ ।
એકૈકસ્ય શતં હોમા હત્યેવં પઞ્ચ હોમયેત્ ॥ ૧,૨૨.૧૪॥

પશ્ચાત્પૂર્ણાહુતિં દત્ત્વા પ્રા(પ્ર)સોદન શિવં સ્મરેત્ ।
પ્રાયશ્ચિત્તવિશુદ્ધ્યર્થમેકૈકાષ્ટાહુતિં ક્રમાત્ ॥ ૧,૨૨.૧૫॥

હોમયેદસ્ત્રબીજેન એવં દીક્ષાં સમાપયેત્ ।
યજનવ્યતિરેકેણ ગોપ્યં સંસ્કારમુત્તમમ્ ॥ ૧,૨૨.૧૬॥

એવં સંસ્કારશુદ્ધસ્ય શિવત્વં જાયતે ધ્રુવમ્ ॥ ૧,૨૨.૧૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શિવાર્ચનપ્રકારો નામ દ્વાવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩
સૂત ઉવાચ ।
શિવાર્ચનં પ્રવક્ષ્યામિ ધર્મકામાદિસાધનમ્ ।
ત્રિભિર્મન્ત્રૈરાચામેત્તુ સ્વાહાન્તૈઃ પ્રણવાદિકૈઃ ॥ ૧,૨૩.૧॥

ૐ હાં આત્મતત્ત્વાય વિદ્યાતત્ત્વાય હીં તથા ।
ૐ હૂં શિવતત્ત્વાય સ્વાહા હૃદા સ્યાચ્છ્રોત્રવન્દનમ્ ॥ ૧,૨૩.૨॥

ભસ્મસ્નાનં તર્પણં ચ ૐ હાં સ્વાહા સર્વમન્ત્રકાઃ ।
સર્વે દેવાઃ સર્વમુનિર્નમોઽન્તો વૌષડન્તકઃ ॥ ૧,૨૩.૩॥

સ્વધાન્તાઃ સર્વપિતરઃ સ્વધાન્તાશ્ચ પિતામહાઃ ।
ૐ હાં પ્રપિતામહેભ્યસ્તથા માતામહાદયઃ ॥ ૧,૨૩.૪॥

હાં નમઃ સર્વમાતૃભ્યસ્તતઃ સ્યાત્પ્રાણસંયમઃ ।
આચામં માર્જનં ચાથો ગાયત્રીં ચ જપેત્તતઃ ॥ ૧,૨૩.૫॥

ૐ હાં તન્મહેશાય વિદ્મહે, વાગ્વિશુદ્ધાય ધીમહિ,
તન્નો રુદ્રઃ પ્રચોદયાત્ ॥ ૧,૨૩.૬॥

સૂર્યોપસ્થાનકં કૃત્વા સૂર્યમન્ત્રૈઃ પ્રપૂજયેત્ ।
ૐ હાં હીં હૂં હૈં હૌં હઃ શિવસૂર્યાય નમઃ ।
ૐ હં ખખોલ્કાય સૂર્યમૂર્તયે નમઃ ।
ૐ હ્રાં હ્રીં સઃ સૂર્યાય નમઃ ॥ ૧,૨૩.૭॥

દણ્ડિને પિઙ્ગલે ત્વાતિભૂતાનિ ચ તતઃ સ્મરેત્ ।
અગ્ન્યાદૌ વિમલેશાનમારાધ્ય પરમં સુખમ્ ॥ ૧,૨૩.૮॥

યજેત્પદ્માં ચ રાં દીપ્તાં રીં સૂક્ષ્માં રૂં જયાં ચ રેં ।
ભદ્રાં ચ રૈં વિભૂતિં રોં વિમલાં રૌમમોઘિ (રોધિ) કામ્ ॥ ૧,૨૩.૯॥

રં વિદ્યુતાં ચ પૂર્વાદૌ રા (રં) મધ્યે સર્વતોમુખીમ્ ।
અર્કાસનં સૂર્યમૂર્તૌ હ્રાં હૂં (હ્રીં) સઃ સૂર્યમર્ચયેત્ ॥ ૧,૨૩.૧૦॥

ૐ આં હૃદર્કાય ચ શિરઃ શિખા ચ ભૂર્ભુવઃ સ્વરોમ્ ।
જ્વાલિનીં હૃં કવચસ્ય ચાસ્ત્રં રાજ્ઞાં ચ દીક્ષિતામ્ ॥ ૧,૨૩.૧૧॥

યજેત્સૂર્યહૃદા સર્વાન્સોં સોમં મં ચ મઙ્ગલમ્ ।
બં બુધં બૃં બૃહસ્પતિં ભં ભાર્ગવં શં શનૈશ્ચરમ્ ॥ ૧,૨૩.૧૨॥

રં રાહું કં યજેત્કેતું ૐ તેજશ્ચણ્ડમર્ચયેત્ ।
સૂર્યમભ્યર્ચ્ય ચાચમ્ય કનિષ્ઠાતોઽઙ્ગકાંન્યસેત્ ॥ ૧,૨૩.૧૩॥

હાં હૃચ્છિરો હૂં શિખા હૈં વર્મ હૌં ચૈવ નેત્રકમ્ ।
હોઽસ્ત્રં શક્તિસ્થિતિં કૃત્વા ભૂતશુદ્ધિં પુનર્ન્યસેત્ ॥ ૧,૨૩.૧૪॥

અર્ઘ્યપાત્રં તતઃ કૃત્વા તદદ્ભિઃ પ્રોક્ષયેદ્યજેત્ ॥ ૧,૨૩.૧૫॥

આત્માનં પદ્મસંસ્થં ચ હૌં શિવાય તતો બહિઃ ।
દ્વારે નન્દિમહાકાલૌ ગઙ્ગા ચ યમુનાથ ગૌઃ ॥ ૧,૨૩.૧૬॥

શ્રીરસ્ત્રં વાસ્ત્વધિપતિં બ્રહ્માણં ચ ગણં ગુરુમ્ ।
શક્ત્યનન્તૌ યજેન્મધ્યે પૂર્વાદૌ ધર્મકાદિકમ્ ॥ ૧,૨૩.૧૭॥

અધર્માદ્યં ચ વહ્ન્યાદૌ મધ્યે પદ્મસ્ય કર્ણિકે ।
વામાજ્યેષ્ઠા ચ પૂર્વાદૌ રૌદ્રી કાલી ચ પૂર્ષદઃ ॥ ૧,૨૩.૧૮॥

ૐ હૌં કલવિકરિણ્યૈ બલવિકરિણી તતઃ ।
બલપ્રમથિની સર્વભૂતાનાં દમની તતઃ ॥ ૧,૨૩.૧૯॥

મનોન્મની યજેદેતાઃ પઠિમધ્યે શિવાગ્રતઃ ।

શિવાસનં મહામૂર્તિં મૂર્તિમધ્યે શિવાય ચ ॥ ૧,૨૩.૨૦॥

આવાહનં સ્થાપનં ચ સન્નિધાનં નિરોધનમ્ ।
સકલીકરણં મુદ્રાદર્શનં ચાર્ઘ્યપાદ્યકમ્ ॥ ૧,૨૩.૨૧॥

આચામાભ્યઙ્ગમુદ્વર્તં સ્નાનં નિર્મથનં ચરેત્ ।
વસ્ત્રં વિલેપનં પુષ્પં ધૂપં દીપં ચરું દદેત્ ॥ ૧,૨૩.૨૨॥

આચામં મુખવાસં ચ તામ્બૂલં હસ્તશોધનમ્ ।
છત્રચામરપાવિત્રં પરમીકરણં ચરેત્ ॥ ૧,૨૩.૨૩॥

રૂપકપેન ચૈકાહજપો જાપ્યસમર્પણમ્ ।
સ્તુતિર્નતિર્હૃદાદ્યૈશ્ચ જ્ઞેયં નામાઙ્ગ પૂજનમ્ ॥ ૧,૨૩.૨૪॥

અગ્નીશરક્ષો વાયવ્યે મધ્યે પૂર્વાદિતન્ત્રકમ્ ।
ઇન્દ્રાદ્યાંશ્ચ યજેચ્ચણ્ડં તસ્મૈ નિર્માલ્યમર્પયેત્ ॥ ૧,૨૩.૨૫॥

ગુહાયાતિગુહ્યગોપ્તા ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવ તત્પ્રસાદાત્ત્વયિ સ્થિતિઃ ॥ ૧,૨૩.૨૬॥

યત્કિઞ્ચિત્ક્રિયતે કર્મ સદા સુકૃતદુષ્કૃતમ્ ।
તન્મે શિવપદસ્થસ્ય રુદ્ર ક્ષપય શઙ્કર ॥ ૧,૨૩.૨૭॥

શિવો દાતા શિવો ભોક્તા શિવઃ સર્વમિદં જગત્ ।
શિવો જયતિ સર્વત્ર યઃ શિવઃ સોઽહમેવ ચ ॥ ૧,૨૩.૨૮॥

યત્કૃતં યત્કરિષ્યામિ તત્સર્વં સુકૃતં તવ(તસ્તવમ્) ।
ત્વં ત્રાતા વિશ્વનેતા ચ નાન્યોનાથોઽસ્તિમેશિવ ॥ ૧,૨૩.૨૯॥

અથાન્યેન પ્રકારેણ શિવપૂજાં વદામ્યહમ્ ।
ગણઃ સરસ્વતી નન્દી મહાકાલોઽથગઙ્ગયા ॥ ૧,૨૩.૩૦॥

પવનાસ્ત્રં વાસ્ત્વધિપો દ્વારિ પૂર્વાદિતસ્ત્વિમે ।
ઇન્દ્રાદ્યાઃ પૂજનીયાશ્ચ તત્ત્વાનિ પૃથિવી જલમ્ ॥ ૧,૨૩.૩૧॥

તેજો વાયુર્વ્યોમ ગન્ધો રસરૂપે ચ શબ્દકઃ ।
સ્પર્શો વાક્પાણિ પાદં ચ પાયૂપસ્થં શ્રુતિત્વચમ્ ॥ ૧,૨૩.૩૨॥

ચક્ષુર્જિહ્વા ઘ્રાણમનો બુદ્ધિશ્ચાહં પ્રકૃત્યપિ ।
પુમાન્નાગો બુદ્ધિવિદ્યે કલા કાલો નિયત્યપિ ॥ ૧,૨૩.૩૩॥

માયા ચ શુદ્ધ વિદ્યા ચ ઈશ્વરશ્ચ સદાશિવઃ ।
શક્તિઃ શિવશ્ચ તાઞ્જ્ઞાત્વા મુક્તો જ્ઞાની શિવો ભવેત્ ॥ ૧,૨૩.૩૪॥

યઃ શિવઃ સ હરિર્બ્રહ્મા સોઽહં બ્રહ્માસ્મિ શઙ્કર ॥ ૧,૨૩.૩૫॥

ભૂતશુદ્ધિં પ્રવક્ષ્યામિ યયા શુદ્ધઃ શિવો ભવેત્ ।
હૃત્પદ્મે સદ્યોમન્ત્રઃ સ્યાન્નિવૃત્તિશ્ચ કલા ઇડા ॥ ૧,૨૩.૩૬॥

પિઙ્ગલા દ્વે ચ નાડ્યૌ તુ પ્રાણોઽપાનશ્ચ મારુતૌ ।
ઇન્દ્રો દેહો બ્રહ્મહેતુશ્ચતુરસ્ત્રં ચ મણ્ડલમ્ ॥ ૧,૨૩.૩૭॥

વક્ત્રેણ લાઞ્છિતં વાયુમેકોદ્ધાતગુણાઃ શરાઃ ।
ત્દૃત્સ્થાનસાદૃશ્યરુતં શતકોટિપ્રવિસ્તરમ્ ॥ ૧,૨૩.૩૮॥

ૐ હ્રીં પ્રતિષ્ઠાયૈ હૂં હ્રઃ ફટ્ ।
ૐ હ્રીં હૂં વિદ્યાયૈ હૂં હ્રઃ ફટ્ ।
ચતુરશીતિકોટીનામુચ્છ્રયં ભૂમિતન્ત્રકમ્ ॥ ૧,૨૩.૩૯॥

તન્મધ્યે ભવવૃક્ષં ચ આત્માનં ચ વિચિન્તયેત્ ।
અધોમુખીં તતઃ પૃથ્વીં તત્તચ્છુધ્દં ભવેદ્ધ્રુવમ્ ॥ ૧,૨૩.૪૦॥

વામા દેવી પ્રતિષ્ઠા ચ સુષુમ્ના ધારિકા તથા ।
સમાનોદાનવરુણા દેવતા વિષ્ણુ કારણમ્ ॥ ૧,૨૩.૪૧॥

અદ્ધાતાશ્ચ ગુણા વેદાઃ શ્વેતં ધ્યાનં તથૈવ ચ ।
એવં કુર્યાત્કણ્ઠપદ્મમર્ધચન્દ્રાખ્યમણ્ડલમ્ ॥ ૧,૨૩.૪૨॥

પદ્માઙ્કિતં દ્વિવિંશતિકકોટિવિસ્તીર્ણમૌ સ્મરેત્ ।
ચતુર્નવત્યુચ્છ્રયં ચ આત્માનં ચ અધોમુખમ્ ॥ ૧,૨૩.૪૩॥

તાલુસ્થાનં ચ પદ્મં ચ અઘોરો વિદ્યયાન્વિતઃ ।
નાભ્યો(ડ્યો) ષ્યયોર્હસ્તિજિહ્વાધ્યાનો નાગોઽગ્નિદેવતા ॥ ૧,૨૩.૪૪॥

રુદ્રહેતુસ્ત્રિરુદ્ધાતાસ્ત્રિગુણા રક્તવર્ણકમ્ ।
જ્વાલાકૃતે ત્રિકોણં ચ ચતુઃ કોટિશતાનિ ચ ॥ ૧,૨૩.૪૫॥

વિસ્તીર્ણં ચ સમુત્સેધં રુદ્રતત્ત્વં વિચિન્તયેત્ ।
લલાટે વૈ તત્પુરુષઃ શાન્તિર્યઃ શાદ્વલં બુધાઃ (વૃષા) ॥ ૧,૨૩.૪૬॥

કૂર્મશ્ચ કૃકરો વાયુર્દેવ ઈશ્વરકારણમ્ ।
દ્વિરુદ્ધાતો ગુણૌ દ્વૌ ચ ધૂમ્રષટ્કોણમણ્ડલમ્ ॥ ૧,૨૩.૪૭॥

બિન્દ્વઙ્કિતં ચાષ્ટકોટિવિસ્તીર્ણં ચોચ્છ્રયસ્તથા ।
ચતુર્દશાધિકં કોટિવાયુતત્ત્વં વિચિન્તયેત્ ॥ ૧,૨૩.૪૮॥

દ્વાદશતિ સરસિજે શાન્ત્ય તીતાસ્તથેશ્વરાઃ ।
કુહૂશ્ચ શઙ્ખિની નાડ્યો દેવદત્તો ધનઞ્જયઃ ॥ ૧,૨૩.૪૯॥

શિખૈશાનકારણં ચ સદાશિવ ઇતિ સ્મૃતઃ ।
ગુણ એકસ્તથોદ્ધાતઃ શુદ્ધસ્ફટિકવત્સ્મરેત્ ॥ ૧,૨૩.૫૦॥

ષોડશકોટિવિસ્તીર્ણં પઞ્ચવિંશતિકોચ્છ્રયમ્ ।
વર્તુલં ચિન્તયેવ્યોમ ભુતશુદ્ધિરુદાહૃતા ॥ ૧,૨૩.૫૧॥

ગુણયો ગુરુર્બીજગુરુઃ શક્તયનન્તૌ ચ ધર્મકઃ ।
જ્ઞાનવૈરાગ્યમૈશ્વર્યૈસ્તતઃ પૂર્વાદિપત્રકે ॥ ૧,૨૩.૫૨॥

અધોર્ધ્વવદને દ્વે ચ પદ્મકર્ણિકકેસરમ્ ।
વામાદ્યા આત્મવિદ્યા ચ સદા ધ્યાયેચ્છિવાખ્યકમ્ ॥ ૧,૨૩.૫૩॥

તત્ત્વં શિવાસને મૂર્તિર્હૈ હૌં વિદ્યાદેહાય નમઃ ।
બદ્ધપદ્માસનાસીનઃ સિતઃ ષોડશવાર્ષિકઃ ॥ ૧,૨૩.૫૪॥

પઞ્ચવક્ત્રઃ કરાગ્રૈઃ સ્વૈર્દશભિશ્ચૈવ ધારયન્ ।
અભયં પ્રસાદં શક્તિં શૂલં ખટ્વાઙ્ગમીશ્વરઃ ॥ ૧,૨૩.૫૫॥

દક્ષૈઃ કરૈર્વામકૈશ્ચ ભુજઙ્ગં ચાક્ષસૂત્રકમ્ ।
ડમરુકં નીલોત્પલં બીજપૂરકમુત્તમમ્ ॥ ૧,૨૩.૫૬॥

ઇચ્છાજ્ઞાનક્રિયાશક્તિસ્ત્રિનેત્રો હિ સદાશિવઃ ।
એવં શિવાર્ચનધ્યાની સર્વદા કાલવર્જિતઃ ॥ ૧,૨૩.૫૭॥

ઇહાહોરા વચારેણ ત્રીણિ વર્ષાણિ જીવતિ ।
દિનદ્વયસ્ય ચારેણ જીવેદ્વર્ષદ્વયં નરઃ ॥ ૧,૨૩.૫૮॥

દિનત્રયસ્ય ચારેણ વર્ષમેકં સ જીવતિ ।
નાકાલે શીતલે મૃત્યુરુષ્ણે ચૈવ તુ કારકે ॥ ૧,૨૩.૫૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શિવાર્ચનનિરૂપણં નામ ત્રયોવિંશોઽધ્યાયઃ
(ઇતિ શિવાદિપૂજા સમાપ્તા) ।

શ્રીગરુડમહાપુરાણમ્- ૨૪

સૂત ઉવાચ ।

વક્ષ્યે ગણાદિકાઃ પૂજાઃ સર્વદા સ્વર્ગદાઃ પરાઃ ।
ગણાસનં ગણમૂર્તિં ગણાધિપતિમર્ચયેત્ ॥ ૧,૨૪.૧॥

ગામાદિહૃદયાદ્યઙ્ગં દુર્ગાયા ગુરુપાદુકાઃ ।
દુર્ગાસનં ચ તન્મૂર્તિં હ્રીં દુર્ગે રક્ષણીતિ ચ ॥ ૧,૨૪.૨॥

ત્હૃદાદિકં નવ શક્ત્યો રુદ્રચણ્ડા પ્રચણ્ડયા ।
ચણ્ડોગ્રા ચણ્ડનાયિકા ચણ્ડા ચણ્ડવતી ક્રમાત્ ॥ ૧,૨૪.૩॥

ચણારૂપા ચણ્ડિકાખ્યા દુર્ગેદુર્ગેઽથ રક્ષિણિ ।
વજ્રખડ્ગાદિકા મુદ્રાઃ શિવાદ્યા વહ્નિદેશતઃ ॥ ૧,૨૪.૪॥

સદાશિવમહાપ્રેતપદ્માસન મથાપિ વા ।
ઐં ક્લીં (હ્રીં) સૌસ્ત્રિપુરાયૈ નમઃ ।
ૐ હ્રાં હ્રીં ક્ષેં ક્ષૈં સ્ત્રીં સ્કીં રોં સ્ફેં સ્ફીં શાં
પદ્માસનં ચ મૂર્તિં ચ ત્રિપુરાત્હૃદયાદિકમ્ ॥ ૧,૨૪.૫॥

પીઠામ્બુજે તુ બ્રાહયાદીર્બ્રહ્માણી ચ મહેશ્વરી ।
કૌમારી વૈષ્ણવી પૂજ્યા વારાહી ચેન્દ્રદેવતા ॥ ૧,૨૪.૬॥

ચામુણ્ડા ચણ્ડિકા પૂજ્યા ભૈરવાખ્યાંસ્તતો યજેત્ ।
અસિતાઙ્ગોરુરુશ્ચણ્ડઃ ક્રોધ ઉન્મત્તભૈરવઃ ॥ ૧,૨૪.૭॥

કપાલી ભીષણશ્ચૈવ સંહારશ્ચાષ્ટ ભૈરવાઃ ।
રતિઃ પ્રીતિઃ કામદેવઃ પઞ્ચ બાણાશ્ચ યોગિની ॥ ૧,૨૪.૮॥

વટુકં દુર્ગયા વિઘ્નરાજો ગુરુશ્ચ ક્ષેત્રપઃ ।
પદ્મગર્ભે મણ્ડલે ચ ત્રિકોણે ચિન્તયેદ્ધૃદિ ॥ ૧,૨૪.૯॥

શુક્લાં વરદાક્ષસૂત્રપુસ્તાભયસમન્વિતામ્ ।
લક્ષજપ્યાચ્ચ હોમાચ્ચ ત્રિપુરા સિદ્ધિદા ભવેત્ ॥ ૧,૨૪.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ત્રિપુરાદિપૂજાનિરૂપણં નમ્ચતુર્વિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૫
સૂત ઉવાચ ।
ઐં ક્લીં શ્રીં સ્ફેં ક્ષૈં અનન્તશક્તિપાદુકાં પૂજયામિ નમઃ ॥ ૧,૨૫.૧॥

ઐં શ્રીં ક્લૈં ક્ષૈં આધારશક્તિપાદુકાં પૂજયામિ નમઃ ।
ૐ હ્રૂં કાલાગ્નિરુદ્રપાદુકાં પૂજયામિ નમઃ ॥ ૧,૨૫.૨॥

ૐ હ્રીં હું હાટકેશ્વરદેવપાદુકાં પૂજયામિ નમઃ ।
ૐ હ્રીં શેષભટ્ટારકપાદુકાં પૂજયામિ નમઃ ॥ ૧,૨૫.૩॥

ૐ હ્રીં શ્રીં પૂથિવીતત્સવર્ણભુવનદ્વીપસમુદ્રદિશામનન્તાખ્યમાસનં
પદ્માસનં પૂજયામિ નમઃ ॥ ૧,૨૫.૪॥

હ્રીં શ્રીં નિવૃત્ત્યાદિ કલા પૃથિવ્યાદિતત્ત્વ મનન્તાદિભુવનમોઙ્કારાદિવર્ણમ્ ।
હકારાદિનવાત્મકપદઃ સદ્યોદાતાદિમન્ત્રઃ હ્રાં હૃદયાદ્યઙ્ગઃ ।
એવં મન્ત્રમહેશ્વર સિદ્ધવિદ્યાત્મકઃ પરામૃતાર્ણવઃ સર્વભૂતો
દિક્સમસ્તષડઙ્ગઃ સદાશિવાર્ણવપયઃ પૂર્ણોદધિપક્ષશ્રીમાનાસ્પદાત્મકઃ
વિદ્યોમાપૂર્ણજ્ઞત્વકર્તૃત્વલક્ષણજયેષ્ઠાચક્રરુદ્રશક્ત્યાત્મકકર્ણિ કઃ ।
નવશક્તિશિવાદિભિર્મૂલમણ્ડલત્રયકુજાત્મકોત્પન્નાપદ્માસનપાદુકાં પૂજયામિ નમઃ ॥ ૧,૨૫.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
આસનપૂજાનિરૂપણં નામ પઞ્ચવિંશોઽધ્યાયઃ

શ્રીગરૂડમહાપુરાણમ્- ૨૬
સૂત ઉવાચ ।
અનન્તરં કરન્યાસઃ ।
વિદ્યાકરી શુદ્ધિઃ કાર્યા ।
પદ્મમુદ્રાં બદ્ધ્વા મન્ત્રન્યાસં કુર્યાત્ ।
કૈં કનિષ્ઠાયૈ નમઃ ।
નૈં અનામિકાયૈ નમઃ ।
મૈં મધ્યમાયૈ નમઃ ।
તૈં તર્જન્યૈ નમઃ ।
અં અઙ્ગુષ્ઠાયૈ નમઃ ।
લાં કરતલાયૈ નમઃ ।

વાં કરપૃષ્ઠાયૈ નમઃ ॥ ૧,૨૬.૧॥

અથ દેહન્યાસઃ ।
સ્મંસ્મં મણિબન્ધાય નમઃ ।
ઐં હ્રીં શ્રીં કરાસ્ફાલાય નમઃ ।
મહાતેજોરૂપં હુંહુઙ્કારેણ કરાસ્ફાલનં કુર્યાત્ ॥ ૧,૨૬.૨॥

ઐં હ્રીં શ્રીં હ્રીં સ્ફેં નમો ભગવતે સ્ફેં કુબ્જીકાયૈ નમઃ ।
હ્રં હ્રીં હ્રૌં ઙઞણનમે અઘોરામુખિ હ્રાં હ્રીં કિલિકિલિ વિચ્ચે
સ્થૌલ્યક્રોશી હ્રીં હ્રીં શ્રીં ઐં નમો ભગવતે ઉર્ધ્વવક્ત્રાય નમઃ ।
સ્ફેં કુબ્જિકાયૈ પૂર્વવક્ત્રાય નમઃ ।
હ્રીં શ્રીં હ્રીં ઙાઞણનમે દક્ષિણવક્ત્રાય નમઃ ।
ૐ હ્રીં શ્રીં કિલિકિલિ પશ્ચિમવક્ત્રાય નમઃ ।
ૐ અખોરમુખિ ઉત્તરવક્ત્રાય નમઃ ।
ૐ નમો ભગવતે હૃદયાય નમઃ ક્ષૈં (ક્ષેં ઐં) કુબ્જિકાયૈ શિરસે સ્વાહા ।
હ્રીં ક્રીં હ્રીં આં ઙ ઞ ણ નમે શિખાયૈ વષટ્ ।
અઘોરામુખિ કવચાય હું ।
હૈં હૈં ઇં નેત્રત્રયાય વૌષટ્ ।
કિલિકિલિ વિચ્ચે અસ્ત્રાય ફટ્ ॥ ૧,૨૬.૩॥

(૧) ઐં હ્રીં શ્રીં અખણ્ડમણ્ડલાકારમહાશૂલમણ્ડલમાય નમઃ
(૨) ઐં હ્રીં શ્રીં વાયુમણ્ડલાય નમઃ ।
(૩) ઐં હ્રીં શ્રીં સોમમણ્ડલાય નમઃ ।
(૪) ઐં હ્રીં શ્રીં મહાકુલબોધાવલિમણ્ડલાય નમઃ
(૫) ઐં હ્રીં શ્રીં મહાકૌલમણ્ડલાય નમઃ ।
(૬) ઐં હ્રીં શ્રીં ગુરુમણ્ડલાય નમઃ
(૭) ઐં હ્રીં શ્રીં સામમણ્ડલાય નમઃ
(૮) ઐં હ્રીં શ્રીં સમગ્ર
(૯)સિધ્ધ (૧૦)યોગીનીપીઠાપપીઠ
(૧૧) ક્ષેત્રેપક્ષેત્રમહાસન્તાનમણ્ડલાય નમઃ ।
એવં મણ્ડલાનાં દ્વાદશકં ક્રમેણ પૂજયમ્ ॥ ૧,૨૬.૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે આચારકાણ્ડે
કરન્યાસાદિનિરૂપણં નામ ષડ્વિંશોऽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૭

સૂત ઉવાચ ।

ૐ કણિચિકીણિક્કાણી ચર્વાણી ભૂતહારિણિ ફણિવિષિણિ વિરથનારાયયણિ

ઉમે દહદહ હસ્તે ચણ્ડે રૌદ્રે માહેશ્વરિ મહામુખિ જ્વાલામુખિ

શઙ્કુકર્ણિ શુકમુણ્ડે શત્રું હનહન સર્વનાશિનિ સ્વેદય

સર્વાઙ્ગશોણિતં તન્નિરીક્ષાસિ મનસા દેવિ સમોહયસમોહય

રુદ્રસ્ય હૃદયે જાતા રુદ્રસ્ય ત્દૃદયે સ્થિતા ।

રુદ્રો રૌદ્રેણ રૂપેણ ત્વં દેવિ રક્ષરક્ષ માં હૂં માં હૂં ફફફ

ઠઠઃ સ્કન્દમેખલાબાલગ્રહશત્રુવિષહારી ૐ શાલે માલે હરહર

વિષોઙ્કારરહિવિષવેગે હાં હાં શવરિ હું શવરિ

આકૌલવેગેશે સર્વે વિગ્ચમેઘમાલે સર્વનાગાદિવિષહરણમ્ ॥ ૧,૨૭.૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નાગાદિવિવિધવિષહર મન્ત્રનિરૂપણં નામ સપ્તવિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૮

સૂત ઉવાચ ।

ગોપાલપૂજાં વક્ષ્યામિ ભુક્તિમુક્તિપ્રદાયિનીમ્ ।
દ્વારે ધાતા વિધાતા ચ ગઙ્ગાયમુનયા સહ ॥ ૧,૨૮.૧ ।
શઙ્ખપદ્મનિધી ચૈવ સારઙ્ગઃ શરભઃ શ્રિયા ।
પૂર્વે ભદ્રઃ સુભદ્રો દ્વૌ દક્ષે ચણ્ડપ્રચણ્ડકૌ ॥ ૧,૨૮.૨॥

પશ્ચિમે બલપ્રબલૌ જયશ્ચ વિજયો યજેત્ ।
ઉત્તરે શ્રીશ્ચતુર્દ્વારે ગણો દુર્ગા સરસ્વતી ॥ ૧,૨૮.૩॥

ક્ષેત્રસ્યાગ્ન્યાદિકોણેષુ દિક્ષુ નારદપૂર્વકમ્ ।
સિદ્ધો ગુરુર્નલકૂવરં કોણે ભગવતં યજેત્ ॥ ૧,૨૮.૪॥

પૂર્વે વિષ્ણું વિષ્ણુતપો વિષ્ણુશક્તિં સમર્ચયેત્ ।
તતો વિષ્ણુપરીવારં મધ્યે શક્તિં ચ કૂર્મકમ્ ॥ ૧,૨૮.૫॥

અનન્તં પૃથિવીં ધર્મં જ્ઞાનં વૈરાગ્યમગ્નિતઃ ।
ઐશ્વર્યં વાયુપૂર્વં ચ પ્રકાશાત્માનમુત્તરે ॥ ૧,૨૮.૬॥

સત્ત્વાય પ્રકૃતાત્મને રજસે મોહરૂપિણે ।

તમસે કન્દ પદ્માય યજેત્કં કાકતત્ત્વકમ્ ॥ ૧,૨૮.૭॥

વિદ્યાતત્ત્વં પરં તત્ત્વ સૂર્યેદુવહ્નિમણ્ડલમ્ ।
વિમલાદ્યા આસનં ચ પ્રાચ્યાં શ્રીં હ્રીં પ્રપૂજયેત્ ॥ ૧,૨૮.૮॥

ગોપીજનવલ્લભાય સ્વાહાન્તો મનુરુચ્યતે ।
અઙ્ગાનિ યથા-આચ ક્રં ચ સુચક્રં ચ વિચક્રં ચ તથૈચ ॥ ૧,૨૮.૯॥

ત્રૈલોક્યરક્ષકં ચક્રમસુરારિસુદર્શનમ્ ।
હૃદાદિપૂર્વકોણષુ અસ્ત્રં શક્તિં ચ પૂર્વતઃ ॥ ૧,૨૮.૧૦॥

રુક્મિણી સત્યભામા ચ સુનન્દા નાગ્નજિત્યપિ ।
લક્ષ્મણા મિત્રવિન્દા ચ જામ્બવત્યા શુશીલયા ॥ ૧,૨૮.૧૧॥

શઙ્ખચક્રગદાપદ્મં મુસલં શાર્ઙ્ગમર્ચયેત્ ।
ખડ્ગં પાશાઙ્કુશં પ્રાચ્યાં શ્રીવત્સં કૌસ્તુભં યજેત્ ॥ ૧,૨૮.૧૨॥

મુકુટં વલમાલાં ચ ઐન્દ્રાદ્યાન્ધ્વજમુખ્યકાન્ ।
કુમુદાદ્યાન્વિષ્વક્સેનં શ્રિયા કૃષ્ણં સહાર્ચયેત્ ।
જપ્યાદ્ધ્યાનાત્પૂજનાચ્ચ સર્વાન્કામાનવાપ્નુયાત્ ।

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રીગોપાલપૂજાનિરૂપણં નામાષ્ટાવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૯
હરિરુવાચ ।
ત્રૈલોક્યમોહિનીં વક્ષ્યે પુરુષોત્તમમુખ્યકામ્ ।
પૂજામન્ત્રાઞ્છ્રીધરાદ્યાન્ધર્મકામાદિદાયકાન્ ॥ ૧,૨૯.૧॥

ૐ હ્રીં શ્રીં ક્લીં હ્રૂં ૐ નમઃ ।
પુરુષોત્તમ અપ્રતિરૂપ લક્ષ્મીનિવાસ જગત્ક્ષોભણ સર્વસ્ત્રીહૃદયદારણ
ત્રિભુવનમદોન્માદનકર સુરાસુરમનુજ સુંદરી જનમનાંસિ તાપયતાપય
શોષયશોષય મારયમારય સ્તમ્ભયસ્તમ્ભય
દ્રાવયદ્રાવય આકર્ષય આકર્ષય, પરમસુભગ સર્વસૌભાગ્યકર
સર્વકામપ્રદ અમુકં હનહન ચક્રેણ ગદયા ખડ્ગેન
સર્વબાણૈર્ભિંધિભિન્ધિ પાશેન કુટ્ટકુટ્ટ અઙ્કુશેન તાડયતાડય
તુરુતુરુ કિં તિષ્ઠસિ તારયતારય યાવત્સમીહિતં મે સિદ્ધં ભવતિ

હ્રીં (હૂં) ફટ્ નમઃ ॥ ૧,૨૯.૨॥

ૐ શ્રીં (શ્રીઃ) શ્રીધરાય ત્રૈલોક્યમોહનાય નમઃ ।
ક્લીં પુરુષોત્તમાય ત્રૈલોક્યમોહનાય નમઃ ॥ ૧,૨૯.૩॥

ૐ વિષ્ણવે ત્રૈલોક્યમોહનાય નમઃ ।
ૐ શ્રીં ક્લીં ત્રૈલોક્યમોહનાય વિપ્ણવે નમઃ ॥ ૧,૨૯.૪॥

ત્રૈલોક્યમોહના મન્ત્રાઃ સર્વે સર્વાર્થસાધકાઃ ।
સર્વે ચિન્ત્યા પૃથગ્વાપિ વ્યાસાત્સંક્ષેપતોઽથ વા ॥ ૧,૨૯.૫॥

આસનં મૂર્તિમન્ત્રં ચ હોમાદ્યઙ્ગષડઙ્ગકમ્ ।
ચક્રં ગદાં ચ ખડ્ગં ચ મુસલં શમખશર્ઙ્ગકમ્ ॥ ૧,૨૯.૬॥

શરં પાશં ચાઙ્કુશં ચ લક્ષ્મીગરુડસંયુતમ્ ।
વિષ્વક્સેનં વિસ્તરાદ્ધ્યાનરઃ સર્વમવાપ્નુયાત્ ॥ ૧,૨૯.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ત્રૈલોક્યમોહિની(શ્રીધર) પૂજનવિધિર્નામૈકોનત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૦
સૂત ઉવાચ ।
વિસ્તરેણ પ્રવક્ષ્યામિ શ્રીધરસ્યાર્ચનં શુભમ્ ।
પરિવારશ્ચ સર્વેષાં સમોજ્ઞેયો હિ પણ્ડિતૈઃ ॥ ૧,૩૦.૧॥

ૐ શ્રાં હૃદયાય નમઃ ।
ૐ શ્રીંશિરસે સ્વાહા ।
ૐ શ્રૂ શિખાયૈ વષટૂ ।
ૐ શ્રૈં કવચાય હું ।
ૐ શ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ શ્રઃ અસ્ત્રાય ફટિતિ ॥ ૧,૩૦.૨॥

દર્શયેદાત્મનો મુદ્રાં શઙ્ખચક્રગદાદિકામ્ ।
ધ્યાત્વાત્માનં શ્રીધરાખ્યં શઙ્ખચક્રગદાધરમ્ ॥ ૧,૩૦.૩॥

તતસ્તં પૂજયેદ્દેવં મણ્ડલે સ્વસ્તિકાદિકે ।
આસનં પૂજયેદાદૌ દેવદેવસ્ય શાર્ઙ્ગિણઃ ।
એભિર્મન્ત્રૈર્મહાદેવ તાન્મત્રાઞ્છૃણુ શઙ્કર ॥ ૧,૩૦.૪॥

ॐ શ્રીધરાસનદેવતાઃ આગચ્છતા ।

ॐ સમસ્તપરિવારાયચ્યુતાસનાય નમઃ ॥ ૧,૩૦.૫॥

ॐ ધાત્રે નમઃ ।

ॐ વિધાત્રે નમઃ ।

ॐ ગઙ્ગાયૈ નમઃ ।

ॐ યમુનાયૈ નમઃ ।

ॐ આધારશક્તયૈ નમઃ ।

ॐ કૂર્માય નમઃ ।

ॐ અનન્તાય નમઃ ।

ॐ પૃથિવ્યૈ નમઃ ।

ॐ ધર્માય નમઃ ।

ॐ જ્ઞાનાય નમઃ ।

ॐ વૈરાગ્યાય નમઃ ।

ॐ ઐશ્વર્યાય નમઃ ।

ॐ અધર્માય નમઃ ।

ॐ અજ્ઞાનાય નમઃ ।

ॐ અવૈરાગ્યાય નમઃ ।

ॐ અનૈશ્વર્યાય નમઃ ।

ॐ કન્દાય નમઃ ।

ॐ નાલાય નમઃ ।

ॐ પદ્માય નમઃ ।

ॐ વિમલાયૈ નમઃ ।

ॐ ઉત્કર્ષિણ્યૈ નમઃ ।

ॐ જ્ઞાનાયૈ નમઃ ।

ॐ ક્રિયાયૈ નમઃ ।

ॐ યોગાયૈ નમઃ ।

ॐ પ્રહ્વ્યૈ નમઃ ।

ॐ સત્યાયૈ નમઃ ।

ॐ ઈશાનાયૈ નમઃ ।

ॐ અનુગ્રહાયૈ નમઃ ॥ ૧,૩૦.૬॥

અર્ચયિત્વા સમં રુદ્ર હરિમાવાહ્ય સંયજેત્ ।
મન્ત્રૈરેભિર્મહાપ્રાજ્ઞઃ સર્વપાપપ્રણાશનૈઃ ॥ ૧,૩૦.૭॥

ॐ હ્રીં શ્રીધરાય ત્રૈલોક્યમોહનાય વિષ્ણવે નમઃ આગચ્છ ॥ ૧,૩૦.૮॥

ॐ શ્રિયૈ નમઃ ।

ॐ શ્રાં હૃદયાય નમઃ ।

ॐ શ્રીં શિરસે નમઃ ।

ॐ શ્રૂં શિખાયૈ નમઃ ।

ॐ શ્રૈં કવચાય નમઃ ।

ॐ શ્રૌં નેત્રત્રયાય નમઃ ।

ॐ શ્રઃ અસ્ત્રાય નમઃ ।

ॐ શઙ્ખાય નમઃ ।

ॐ પદ્માય નમઃ ।

ॐ ચક્રાય નમઃ ।

ॐ ગદાયૈ નમઃ ।

ॐ શ્રી વત્સાય નમઃ ।

ॐ કૌસ્તુભ્ય નમઃ ।

ॐ વનમાલાયૈ નમઃ ।

ॐ પીતામ્બરાય નમઃ ।

ॐ વ્રહ્મણે નમઃ ।

ॐ નારદાય નમઃ ।

ॐ ગુરુભ્યો નમઃ ।

ॐ ઇન્દ્રાય નમઃ ।

ॐ અગ્નયે નમઃ ।

ॐ યમાય નમઃ ।

ॐ નિરૃતયે નમઃ ।

ॐ વરુણાય નમઃ ।

ॐ વાયવે નમઃ ।

ॐ સોમાય નમઃ ।

ॐ ઈશાનાય નમઃ ।

ॐ અનન્તાય નમઃ ।

ॐ બ્રહ્મણે નમઃ ।

ૐ સત્ત્વાય નમઃ ।
ૐ રજસે નમઃ ।
ૐ તમસે નમઃ ।
ૐ વિષ્વક્સેનાય નમઃ ॥ ૧,૩૦.૯॥

અભિષેકં તથા વસ્ત્રં તતો યજ્ઞોપવીતકમ્ ।
ગન્ધં પુષ્પં તથા ધૂપં દીપમન્નં પ્રદક્ષિણમ્ ॥ ૧,૩૦.૧૦॥

દદ્યાદેભિર્મહામન્ત્રૈઃ સમપ્યાર્થ જપેન્મનુમ્ ।
શતમષ્ટોત્તરં ચાપિ જપ્ત્વા હ્યથ સમર્પયેત્ ॥ ૧,૩૦.૧૧॥

તતો મુહૂર્તમેકન્તુધ્યાયેદ્દેવં હૃદિ સ્થિતમ્ ।
શુદ્ધસ્ફટિકસંકાશં સૂર્યકોટિસમપ્રભમ્ ॥ ૧,૩૦.૧૨॥

પ્રસન્નવદનં સૌમ્યં સ્ફુરન્મકરકુણ્ડલમ્ ।
કિરીટિનમુદારાઙ્ગં વનમાલાસમન્વિતમ્ ॥ ૧,૩૦.૧૩॥

પરબ્રહ્મસ્વરૂપં ચ શ્રીધરં ચિન્તયેત્સુધીઃ ।
અનેન ચૈવ સ્તોત્રેણ સ્તુવીત પરમેશ્વરમ્ ॥ ૧,૩૦.૧૪॥

શ્રીનિવાસાય દેવાય નમઃ શ્રીપતયે નમઃ ।
શ્રીધરાય સશાર્ઙ્ગાય શ્રીપ્રદાય નમોનમઃ ॥ ૧,૩૦.૧૫॥

શ્રીવલ્લભાય શાન્તાય શ્રીમતે ચ નમોનમઃ ।
શ્રીપર્વતનિવાસાય નમઃ શ્રેયસ્કરાય ચ ॥ ૧,૩૦.૧૬॥

શ્રેયસાં પતયે ચૈવ હ્યાશ્રમાય નમોનમઃ ।
નમઃ શ્રેયઃ સ્વરૂપાય શ્રીકરાય નમોનમઃ ॥ ૧,૩૦.૧૭॥

શરણ્યાય વરેણ્યાય નમો ભૂયો નમોનમઃ ।
સ્તોત્રં કૃત્વા નમસ્કૃત્ય દેવદેવં વિસર્જયેત્ ॥ ૧,૩૦.૧૮॥

ઇતિ રુદ્ર સમાખ્યાતા પૂજા વિષ્ણોર્મહાત્મનઃ ।
યઃ કરોતિ મહાભક્ત્યા સ યાતિ પરમં પદમ્ ॥ ૧,૩૦.૧૯॥

ઇં યઃ પઠતેઽધ્યાયં વિષ્ણુપૂજાપ્રકાશકમ્ ।
સ વિધૂયેહ પાપાનિ યાતિ વિષ્ણોઃ પરં પદમ્ ॥ ૧,૩૦.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રીધરા (વિષ્ણવર્) ચનવિધિર્નામ ત્રિંશોઽધ્યાયઃ

શ્રી ગરુડમહાપુરાણમ્- ૩૧

રુદ્ર ઉવાચ ।

ભૂય એવં જગન્નાથ પૂજાં કથય મે પ્રભો ।

યયા તરેયં સંસારસાગરં હ્યતિદુસ્તરમ્ ॥ ૧,૩૧.૧॥

હરિરુવાચ ।

અર્ચનં વિષ્ણુદેવસ્ય વક્ષ્યામિ વૃષભધ્વજ ।

તચ્છૃણુષ્વ મહાભાગ ભુક્તિમુક્તિપ્રદં શુભમ્ ॥ ૧,૩૧.૨॥

કૃત્વા સ્નાનં તતઃ સન્ધ્યાં તતો યાગગૃહં વ્રજેત્ ।

પ્રક્ષાલ્ય પાણી પાદૌ ચ આચમ્ય ચ વિશેષતઃ ॥ ૧,૩૧.૩॥

મૂલમન્ત્રં સમસ્તં તુ હસ્તયોર્વ્યાપકં ન્યસેત્ ।

મૂલમન્ત્રં ચ દેવસ્ય શ ૃણુ રુદ્ર વદામિ તે ॥ ૧,૩૧.૪॥

ૐ શ્રીં હ્રીં શ્રીધરાય વિષ્ણવે નમઃ ।

અયં મન્ત્રઃ સુરેશસ્ય વિષ્ણોરીશસ્ય વાચકઃ ॥ ૧,૩૧.૫॥

સર્વવ્યાધિહરશ્ચૈવ સર્વગ્રહહરસ્તથા ।

સર્વપાપહરશ્ચૈવ બુક્તિમુક્તિપ્રદાયકઃ ॥ ૧,૩૧.૬॥

અઙ્ગન્યાસં તતઃ કુર્ય્યાન્દેભિર્મન્ત્રૌર્વિચક્ષણઃ ।

ૐ હાં હૃદયાય નમઃ ।

ૐ હીં શિરસે સ્વાહા ।

ૐ હૂં શિખાયૈ વષટ્ ।

ૐ હૈં કવચાય હું ।

ૐ હૌં નેત્રત્રયાય વૌષટ્ ।

ૐ હઃ અસ્ત્રાય ફટ્ ॥ ૧,૩૧.૭॥

ઇતિ મન્ત્રઃ સમાખ્યાતો મયા તે પ્રભવિષ્ણુના ।

ન્યાસં કૃત્વાત્મનો મુદ્રાં દર્શયેદ્વિજિતાત્મવાન્ ॥ ૧,૩૧.૮॥

તતો ધ્યાયેત્પરં વિષ્ણુ ત્દૃત્કોટરસમાશ્રિતમ્ ।

શઙ્ખચક્રસમાયુક્તં કુન્દેન્દુધવલં હરિમ્ ॥ ૧,૩૧.૯॥

શ્રીવત્સકૌસ્તુભયુતં વનમાલાસમન્વિતમ્ ।

રત્નહારકિરીટેન સંયુક્તં પરમેશ્વરમ્ ॥ ૧,૩૧.૧૦॥

અહં વિષ્ણુરિતિ ધ્યાત્વા કૃત્વા વૈ શોધનાદિકમ્ ।
યં ક્ષૌં રમિતિ બીજૈશ્ચ કઠિની કૃત્ય નામભિઃ ॥ ૧,૩૧.૧૧॥

અણ્ડમુત્પાદ્ય ચ તતઃ પ્રણવેનૈવ ભેદયેત્ ।
તત્ર પૂર્વોક્તરૂપં તુ ભાવયિત્વા વૃષધ્વજ ॥ ૧,૩૧.૧૨॥

આત્મપૂજાં તતઃ કુર્યાદ્ગન્ધપુષ્પાદિભિઃ શુભૈઃ ।
આવાહ્ય પૂજયેત્સર્વા દેવતા આસનસ્ય યાઃ ॥ ૧,૩૧.૧૩॥

મન્ત્રૈરેભિર્મહાદેવ તન્મન્ત્રં શ◌ૃણુ શઙ્કર ।
વિષ્ણવાસનદેવતા આગચ્છત ॥ ૧,૩૧.૧૪॥

ૐ સમસ્તપરિવારાયાચ્યુતાય નમઃ ।
ૐ ધાત્રે નમઃ ।
ૐ વિધાત્રે નમઃ ।
ૐ ગઙ્ગાયૈ નમઃ ।
ૐ યમુનાયૈ નમઃ ।
ૐ શઙ્ખનિધયે નમઃ ।
ૐ પદ્મનિધયે નમઃ ।
ૐ ચણ્ડાય નમઃ ।
ૐ પ્રચણ્ડાય નમઃ ।
ૐ દ્વારશ્રિયૈ નમઃ ।
ૐ આધારશક્ત્યૈ નમઃ ।
ૐ કૂર્માય નમઃ ।
ૐ અનન્તાય નમઃ ।
ૐ શ્રિયૈ નમઃ ।
ૐ ધર્માય નમઃ ।
ૐ જ્ઞાનાય નમઃ ।
ૐ વૈરાગ્યાય નમઃ ।
ૐ ઐશ્વર્યાય નમઃ ।
ૐ અધર્માય નમઃ ।
ૐ અજ્ઞાનાય નમઃ ।
ૐ અવૈરાગ્યાય નમઃ ।
ૐ અનૈશ્વર્યાય નમઃ ।

ૐ સં સત્ત્વાય નમઃ ।

ૐ રં રજસે નમઃ ।

ૐ તં તમસે નમઃ ।

ૐ કં કન્દાય નમઃ ।

ૐ નં નાલાય નમઃ ।

ૐ લાં પદ્માય નમઃ ।

ૐ અં અર્કમણ્ડલાય નમઃ ।

ૐ સોં સોમમણ્ડલાય નમઃ ।

ૐ વં વહ્નિમણ્ડલાય નમઃ ।

ૐ વિમલાયૈ નમઃ ।

ૐ ઉત્કર્ષિણ્યૈ નમઃ ।

ૐ જ્ઞાનાયૈ નમઃ ।

ૐ ક્રિયાયૈ નમઃ ।

ૐ યોગાયૈ નમઃ ।

ૐ પ્રહ્વ્યૈ નમઃ ।

ૐ સત્યાયૈ નમઃ ।

ૐ ઈશાનાયૈ નમઃ ।

ૐ અનુગ્રહાયૈ નમઃ ॥ ૧,૩૧.૧૫ ॥

ગન્ધપુષ્પાદિભિસ્ત્વેતૈર્મન્ત્રૈરેતાસ્તુ પૂજયેત્ ।
પૂજયિત્વા તતો વિષ્ણું સૃષ્ટિસંહારકારિણમ્ ॥ ૧,૩૧.૧૬ ॥

આવાહ્ય મણ્ડલે રુદ્ર પૂજયેત્પ રમેશ્વરમ્ ।
અનેન વિધિના રુદ્ર સર્વપાપહરં પરમ્ ॥ ૧,૩૧.૧૭ ॥

યથાત્મનિ તથા દેવે ન્યાસં કુર્વીત ચાદિતઃ ।
મુદ્રાં પ્રદર્શયેત્પશ્ચાદર્ઘ્યાદીનર્પયેત્તતઃ ॥ ૧,૩૧.૧૮ ॥

સ્નાનાં કુર્યાત્તતો વસ્ત્રં દદ્યાદાચમનં તતઃ ।
ગન્ધપુષ્પં તથા ધૂપં દીપં દદ્યાચ્ચરું તતઃ ॥ ૧,૩૧.૧૯ ॥

પ્રદક્ષિણં તતો જપ્યં તતસ્તસ્મિન્સર્પયેત્ ।
અઙ્ગાદીનાં સ્વમન્ત્રૈશ્ચ પૂજાં કુર્વીત સાધકઃ ॥ ૧,૩૧.૨૦ ॥

દેવસ્ય મૂલમન્ત્રેણેત્યેવં વિદ્ધિ વૃષધ્વજ ।
મન્ત્રાઞ્છૃણુ ત્રિનેત્ર ત્વં કથ્યમાનાન્મયાધુના ॥ ૧,૩૧.૨૧ ॥

ॐ હાં હૃદયાય નમઃ ।

ॐ હીં શિરસે નમઃ ।

ॐ હૂં શિખાયૈ નમઃ ।

ॐ હૈં કવચાય નમઃ ।

ॐ હૌં નેત્રત્રયાય નમઃ ।

ॐ હઃ અસ્ત્રાય નમઃ ।

ॐ શ્રિયૈ નમઃ ।

ॐ શઙ્ખાય નમઃ ।

ॐ પદ્માય નમઃ ।

ॐ ચક્રાય નમઃ ।

ॐ ગદાયૈનમઃ ।

ॐ શ્રીવત્સાય નમઃ ।

ॐ કૌસ્તુભાય નમઃ ।

ॐ વનમાલાયૈ નમઃ ।

ॐ પીતામ્બરાય નમઃ ।

ॐ ખડ્ગાય નમઃ ।

ॐ મુસલાય નમઃ ।

ॐ પાશાય નમઃ ।

ॐ અઙ્કુશાય નમઃ ।

શાર્ઙ્ગાય નમઃ ।

ॐ શરાય નમઃ ।

ॐ બ્રહ્મણે નમઃ ।

ॐ નારાદાય નમઃ ।

ॐ પૂર્વસિદ્ધેભ્યો નમઃ ।

ॐ ભાગવતેભ્યો નમઃ ।

ॐ ગુરુભ્યો નમઃ ।

ॐ પરમગુરુભ્યો નમઃ ।

ॐ ઇન્દ્રાય સુરાધિપતયે સવાહનપરિવારાય નમઃ ।

ॐ અગ્નયે તેજોઽધિપતયે સવાહનપરિવારાય નમઃ ।

ॐ યમાય પ્રેતાધિપતયે સવાહનપરિવારાય નમઃ ।

ॐ નિરૃતયે રક્ષોઽધિપતયે સવાહનપરિવારાય નમઃ ।

ॐ વરુણાય જલાધિપતયે સવાદનપરિવારાય નમઃ ।

ॐ વાયવે પ્રાણાધિપતયે સવાહનપરિવારાય નમઃ ।
ॐ સોમાય નક્ષત્રાધિપતયે સવાહનપરિવારાય નમઃ ।
ॐ ઈશાનાય વિદ્યાધિપતયે સવાહનપરિવારાય નમઃ ।
ॐ અનન્તાય નાગાધિપતયે સવાહનપરિવારાય નમઃ ।
ॐ બ્રહ્મણે લોકાધિપતયે સવાહનપરિવારાય નમઃ ।
ॐ વજ્રાય હું ફટ્ નમઃ ।
ॐ શક્ત્યૈ હું ફટ્ નમઃ ।
ॐ દણ્ડાય હું ફટ્ નમઃ ।
ॐ ખડ્ગાય હું ફટ્ નમઃ ।
ॐ પાશાય હું ફટ્ નમઃ ।
ॐ ધ્વજાય હું ફટ્ નમઃ ।
ॐ ગદાયૈ હું ફટ્ નમઃ ।
ॐ ત્રિશૂલાય હું ફટ્ નમઃ ।
ॐ ચક્રાય હું ફટ્ નમઃ ।
ॐ પદ્માય હું ફટ્ નમઃ ।
ॐ વૈં વિષ્વક્સેનાય નમઃ ॥ ૧,૩૧.૨૨॥

એભિમન્ત્રૈર્મહાદેવ પૂજ્યા અઙ્ગાદયો નરૈઃ ।
પૂજયિત્વા મહાત્માનં વિષ્ણું બ્રહ્મસ્વરૂપિણમ્ ॥ ૧,૩૧.૨૩॥

સ્તુવીત ચાનયા સ્તુત્યા પરમાત્માનમવ્યયમ્ ।
વિષ્ણવે દેવદેવાય નમો વૈ પ્રભવિષ્ણવે ॥ ૧,૩૧.૨૪॥

વિષ્ણવે વાસુદેવાય નમઃ સ્થિતિકરાય ચ ।
ગ્રસિષ્ણવે નમશ્ચૈવ નમઃ પ્રલયશાયિને ॥ ૧,૩૧.૨૫॥

દેવાનાં પ્રભવે ચૈવ યજ્ઞાનાં પ્રભવે નમઃ ।
મુનીનાં પ્રભવે નિત્યં યક્ષાણાં પ્રભવિષ્ણવે ॥ ૧,૩૧.૨૬॥

જિષ્ણવે સર્વદેવાનાં સર્વગાય મહાત્મને ।
બ્રહ્મેન્દ્રરુદ્રવન્દ્યાય સર્વેશાય નમોનમઃ ॥ ૧,૩૧.૨૭॥

સર્વલોકહિતાર્થાય લોકાધ્યક્ષાય વૈ નમઃ ।
સર્વગોપ્ત્રે સર્વકર્ત્રે સર્વદુષ્ટવિનાશિને ॥ ૧,૩૧.૨૮॥

વરપ્રદાય શાન્તાય વરેણ્યાય નમોનમઃ ।
શરણ્યાય સુરૂપાય ધર્મકામાર્થદાયિને ॥ ૧,૩૧.૨૯॥

સ્તુત્વા ધ્યાયેત્સ્વહૃદયે બ્રહ્મરૂપિણમવ્યયમ્ ।
એવં તુ પૂજયેદ્વિષ્ણું મૂલમન્ત્રેણ શઙ્કર ॥ ૧,૩૧.૩૦॥

મૂલમન્ત્રં જપેદ્વાપિ યઃ સ યાતિ નરો હરિમ્ ।
એતત્તે કથિતં રુદ્ર વિષ્ણોરર્ચનમુત્તમમ્ ॥ ૧,૩૧.૩૧॥

રહસ્યં પરમં ગુહ્યં ભુક્તિમુક્તિપ્રદં પરમ્ ।
એતદ્યશ્ચ પઠેદ્વિદ્વાન્વિષ્ણુભક્તઃ પુમાન્હર ।
શ‍ૃણુયાચ્છ્રાવયેદ્વાપિ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧,૩૧.૩૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુપૂજાવિધિર્નામૈકત્રિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૨
મહેશ્વર ઉવાચ ।
પઞ્ચતત્ત્વાર્ચનં બ્રૂહિ શઙ્ખચક્રગદાધર ।
યેન વિજ્ઞાનમાત્રેણ નરો યાતિ પરં પદમ્ ॥ ૧,૩૨.૧॥

હરિરુવાચ ।
પઞ્ચતત્ત્વાર્ચનં વક્ષ્યે તવ શઙ્કર સુવ્રત ।
મઙ્ગલ્યં મઙ્ગલં દિવ્યં રહસ્યં કામદં પરમ્ ॥ ૧,૩૨.૨॥

તચ્છૃણુષ્વ મહાદેવ પવિત્રં કલિનાશનમ્ ।
એક એવાવ્યયઃ શાન્તઃ પરમાત્મા સનાતનઃ ॥ ૧,૩૨.૩॥

વાસુદેવો ધ્રુવઃ શુદ્ધઃ સર્વવ્યાપી નિરઞ્જનઃ ।
સ એવ માયાયા દેવ પઞ્ચધા સંસ્થિતો હરિઃ ॥ ૧,૩૨.૪॥

લોકાનુગ્રહકૃદ્વિષ્ણુઃ સર્વદુષ્ટવિનાશનઃ ।
વાસુદેવસ્વરૂપેણ તથા સઙ્કર્ષણેન ચ ॥ ૧,૩૨.૫॥

તથા પ્રદ્યુમ્નરૂપેણાનિરુદ્ધાખ્યેન ચ સ્થિતઃ ।
નારાયણસ્વરૂપેણ પઞ્ચધા હ્યદ્વયઃ સ્થિતઃ ॥ ૧,૩૨.૬॥

એતેષાં વાચકાન્મન્ત્રાનેતાઞ્છૃણુ વૃષધ્વજ ! ।
ૐ અં વાસુદેવાય નમઃ ।
ૐ આં સંકર્ષણાય નમઃ ।

ૐ અં પ્રદ્યુમ્નાય નમઃ ।
ૐ અનિરુદ્ધાય નમઃ ।
ૐ ૐ નારાયણાય નમઃ ॥ ૧,૩૨.૭॥

પઞ્ચ મન્ત્રાઃ સમાખ્યાતા દેવાનાં વાચકાસ્તવ ।
સર્વપાપહરાઃ પુણ્યાઃ સર્વરોગવિનાશનાઃ ॥ ૧,૩૨.૮॥

અધુના સમ્પ્રવક્ષ્યામિ પઞ્ચતત્ત્વાર્ચનં શુભમ્ ।
વિધિના યેન કર્તવ્યં યૈર્વા મન્ત્રૈશ્ચ શઙ્કર ! ॥ ૧,૩૨.૯॥

આદૌ સ્નાનં પ્રકુર્વીત સ્નાત્વા સન્ધ્યાં સમાચરેત્ ।
અર્ચનાગારમાસાદ્ય પ્રક્ષાલ્યાર્ઙ્ઘ્યાદિકં તથા ॥ ૧,૩૨.૧૦॥

આચમ્યોપવિશેત્પ્રાજ્ઞો બદ્ધાસનમભીપ્સિતમ્ ।
શોષણાદિ તતઃ કુર્યાદં ક્ષૈં રમિતિ મન્ત્રકૈઃ ॥ ૧,૩૨.૧૧॥

સામાન્યં કઠિનીકૃત્ય ચાણ્ડમુત્પાદયેત્તતઃ ।
વિભિદ્યાણ્ડં તતો હ્યણ્ડે ભાવયેત્પરમેશ્વરમ્ ॥ ૧,૩૨.૧૨॥

વાસુદેવં જગન્નાથં પીતકૌશેયવાસસમ્ ।
સહસ્રાદિત્યસઙ્કાશં સ્ફુરન્મકરકુણ્ડલમ્ ॥ ૧,૩૨.૧૩॥

આત્મનો હૃદિ પદ્મે તુ ધ્યાયેત્તુ પરમેશ્વરમ્ ।
તતઃ સંકર્ષણં દેવમાત્માનં ચિન્તયેત્પ્રભુમ્ ॥ ૧,૩૨.૧૪॥

પ્રદ્યુમ્નમનિરુદ્ધં ચ શ્રીમન્નારાયણં તતઃ ।
ઇન્દ્રાદીંશ્ચ સુરાંસ્તસ્માદ્દેવદેવાત્સમુત્થિતાન્ ॥ ૧,૩૨.૧૫॥

ચિન્તયેચ્ચ તતો ન્યાસં કય્યાન્દ્વૈ કારયોર્દ્વયોઃ ।
વ્યાપકં મૂલમન્ત્રેણ ચાઙ્ગન્યાસં તતઃ પરમ્ ॥ ૧,૩૨.૧૬॥

અઙ્ગમન્ત્રૈર્મહાદેવ ! તાન્મન્ત્રાઞ્શ્ૃણુ સુવ્રત ! ।
ૐ આં હૃદયાય નમઃ ।
ૐ ઈં શિરસે નમઃ ।
ૐ ઊં શિખાયૈ નમઃ ।
ૐ ઐં કવચાય નમઃ ।
ૐ ઔં નેત્રત્રયાય નમઃ ।
ૐ અઃ અસ્ત્રાય ફટ્ ॥ ૧,૩૨.૧૭॥

ૐ સમસ્તપરિવારાયાચ્યુતાય નમઃ ।

ૐ ધાત્રે નમઃ ।

ૐ વિધાત્રે નમઃ ।

ૐ આધારશક્તયૈ નમઃ ।

ૐ કૂર્માય નમઃ ।

ૐ અનન્તાય નમઃ ।

ૐ પૃથિવ્યૈનમઃ ।

ૐ ધર્માય નમઃ ।

ૐ ધર્માય નમઃ ।

ૐ જ્ઞાનાય નમઃ ।

ૐ વૈરાગ્યાય નમઃ ।

ૐ ઐશ્વર્યાય નમઃ ।

ૐ અજ્ઞાનાય નમઃ ।

ૐ અનૈશ્વર્યાય નમઃ ।

ૐ અં અર્કમણ્ડલાય નમઃ ।

ૐ સોં સોમમણાડલાય નમઃ ।

ૐ વં વહ્નિમણ્ડલાય નમઃ ।

ૐ વં વાસુદેવાય પરબ્રહ્મણે શિવાય તેજોરૂપાય વ્યાપિને સર્વદેવાધિદેવાય નમઃ ।

ૐ પાઞ્ચજન્યાય નમઃ ।

ૐ સુદર્શવનાય નમઃ ।

ૐ ગદાયૈ નમઃ ।

ૐ પદ્માય નમઃ ।

ૐ શ્રિયૈ નમઃ ।

ૐ હ્રિયૈ નમઃ ।

ૐ પુષ્ટ્યૈ નમઃ ।

ૐ ગીત્યૈ નમઃ ।

ૐ શક્ત્યૈ નમઃ ।

ૐ પ્રીત્યૈ નમઃ ।

ૐ ઇન્દ્રાય નમઃ ।

ૐ અગ્નયે નમઃ ।

ૐ યમાય નમઃ ।

ૐ નિરૃતયે નમઃ ।

ૐ વરુણાય નમઃ ।
ૐ વાયવે નમઃ ।
ૐ સોમાય નમઃ ।
ૐ ઈશાનાય નમઃ ।
ૐ અનન્તાય નમઃ ।
ૐ બ્રહ્મણે નમઃ ।
ૐ વિષ્વક્સેનાય નમઃ ॥ ૧,૩૨.૧૮॥

એતે મન્ત્રાઃ સમાખ્યાતાસ્તવ રુદ્ર સમાસતઃ ।
પૂજા ચૈવ પ્રકર્તવ્યા મણ્ડલે સ્વસ્તિકાદિકે ॥ ૧,૩૨.૧૯॥

ૐ પદ્માય નમઃ ।
અઙ્ગન્યાસં ચ કૃત્વા તુ મુદ્રાઃ સર્વાઃ પ્રદર્શયત્ ।
આત્માનં વાસુદેવં ચ ધ્યાત્વા ચૈવ પરેશ્વરમ્ ॥ ૧,૩૨.૨૦॥

આસનં પૂજયેત્પશ્ચાદાવાહ્ય વિધિવન્નરઃ ।
દ્વારે ધાતુર્વિધાતુશ્ચ પૂજા કાર્યા વૃષધ્વજ ॥ ૧,૩૨.૨૧॥

ગરુડં પૂજયેદગ્રે વાસુદેવસ્ય શઙ્કર ।
શઙ્ખાદિપદ્મપર્યન્તં મધ્યદેશે પ્રપૂજયેત્ ॥ ૧,૩૨.૨૨॥

ધર્મં જ્ઞાનં ચ વૈરાગ્યમૈશ્વર્યં પૂર્વદેશતઃ ।
આગ્નેયાદિષ્વર્ચયેદ્વૈ અધર્માદિચતુષ્ટયમ્ ॥ ૧,૩૨.૨૩॥

મણ્ડલત્રયમધ્યે તુ કીર્તિતા હ્યસનસ્થિતિઃ ।
પૂર્વાદિપદ્મપત્રેષુ પૂજ્યાઃ સંકર્ષણાદયઃ ॥ ૧,૩૨.૨૪॥

કર્ણિકાયાં વાસુદેવં પૂજયેત્પરમેશ્વરમ્ ।
પાઞ્ચજન્યાદયઃ પૂજ્યાઃ ઐશાન્યાદિષુ સંસ્થિતાઃ ॥ ૧,૩૨.૨૫॥

શક્તયશ્ચૈવ પૂર્વાદૌ દેવદેવસ્ય શઙ્કર ।
ઇન્દ્રાદયો લોકપાલાઃ પૂજ્યાઃ પૂર્વાદિષુ સ્થિતાઃ ॥ ૧,૩૨.૨૬॥

અધો નાગ તદૂર્ધ્વ તુ બ્રહ્માણં પૂજયેત્સુધીઃ ।
ઇતિ સ્થાનક્રમો જ્ઞેયો મણ્ડલે શઙ્કર ત્વયા ॥ ૧,૩૨.૨૭॥

આવાહ્ય મણ્ડલે દેવં કૃત્વા ન્યાસં તુ તસ્ય ચ ।
મુદ્રાં પ્રદર્શ્ય પાદ્યદીન્દદ્યાન્મૂલેન શઙ્કર ॥ ૧,૩૨.૨૮॥

સ્નાનં વસ્ત્રં તથાચામં ગન્ધં પુષ્પં ચ ધૂપકમ્ ।
દીપં નૈવેદ્યમાચામં નમસ્કારં પ્રદક્ષિણમ્ ।
કુર્યાચ્છઙ્કર મૂલેન જપં ચાપિ સમર્પયેત્ ॥ ૧,૩૨.૨૯॥

દં સ્તોત્રં જપેત્પશ્ચાદ્વાસુદેવમનુસ્મરન્ ।
ૐ નમો વાસુદેવાય નમઃ સકર્ષણાય ચ ॥ ૧,૩૨.૩૦॥

પ્રદ્યુમ્નાયાદિદેવાયાનિરુદ્ધાય નમોનમઃ ।
નમો નારાયણાયૈવ નરાયણાં પતયે નમઃ ॥ ૧,૩૨.૩૧॥

નરપૂજ્યાય કીર્ત્યાય સ્તુત્યાય વરદાય ચ ।
અનાદિનિધનાયૈવ પુરાણાય નમોનમઃ ॥ ૧,૩૨.૩૨॥

સૃષ્ટિસંહારકર્ત્રે ચ બ્રહ્મણઃ પતયે નમઃ ।
મનો વૈ વેદવેદ્યાય શઙ્ખચક્રધરાય ચ ॥ ૧,૩૨.૩૩॥

કલિકલ્મષહર્ત્રે ચ સુરેશાય નમોનમઃ ।
સંકારવૃક્ષચ્છેત્રે ચ માયાભેત્રે નમોનમઃ ॥ ૧,૩૨.૩૪॥

વહુરૂપાય તીર્થાય ત્રિગુણાયાગુણાય ચ ।
બ્રહ્મવિષ્ણવીશરૂપય મોક્ષદાય નમોનમઃ ॥ ૧,૩૨.૩૫॥

મોક્ષદ્વારાય ધર્માય નિર્માણાય નમોનમઃ ।
સર્વકામપ્રદાયૈવ પરબ્રહ્મસ્વરૂપિણે ॥ ૧,૩૨.૩૬॥

સંસારસાગરે ઘોરે નિમગ્નં માં સમુદ્ધર ।
ત્વદન્યો નાસ્તિ દેવેશ નાસ્તિ ત્રાતા જગત્પ્રભો ॥ ૧,૩૨.૩૭॥

ત્વામવ સર્વગં વિષ્ણું ગતોઽહં શરણં ગતઃ ।
જ્ઞાનદીપપ્રદાનેન તમોમુક્તં પ્રકાશય ॥ ૧,૩૨.૩૮॥

એવં સ્તુવીત દેવેશં સર્વક્લેશવિનાશનમ્ ।
અન્યૈશ્ચવાદકેઃ સ્તાત્રૈઃ સ્તુત્વા વૈ નીલલોહિત ॥ ૧,૩૨.૩૯॥

પઞ્ચતત્ત્વસમાયુક્તં ધ્યાયોદ્વિષ્ણું નરો હૃદિ ।
વિસર્જયત્તતા દેવમિતિ પૂજા પ્રકીર્તિતા ॥ ૧,૩૨.૪૦॥

સર્વકામપ્રદા શ્રેષ્ઠા વાસુદેવસ્ય શઙ્કર ।
એતત્પૂજનમાત્રેણ કૃતકૃત્યો ભવેન્નરઃ ॥ ૧,૩૨.૪૧॥

ઇદં ચ યઃ પઠેદ્રુદ્ર પઞ્ચતત્ત્વાર્ચનં નરઃ ।

શ્ૃણુયાચ્છ્રવાયેદ્વાપિ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧,૩૨.૪૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પઞ્ચતત્ત્વા(વિષ્ણવર્) ચ નવિધિર્નામ દ્વાત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૩
રુદ્ર ઉવાચ ।
સુદર્શનસ્ય પૂજાં મે વદ શઙ્ખગદાધર ।
ગ્રહરોગાદિકં સર્વં યત્કૃત્વા નાશમેતિ વૈ ॥ ૧,૩૩.૧॥

હરિરુવાચ ।
સુદર્શનસ્ય ચક્રસ્ય શ્ૃણુ પૂજાં વૃષધ્વજ ।
સ્નાનમાદૌ પ્રકુર્વીત પૂજયેચ્ચ હરિં તત ॥ ૧,૩૩.૨॥

મૂલમન્ત્રેણ વૈ ન્યાસં મૂલમન્ત્રં શ્ૃણુષ્વચ ।
સહસ્રારં હું ફટ્નમો મન્ત્રઃ પ્રણવપૂર્વકઃ ॥ ૧,૩૩.૩॥

કથિતઃ સર્વદુષ્ટાનાં નાશકો મન્ત્રભેદકઃ ।
ધ્યાયેત્મુદર્શનં દેવં હૃદિ પદ્મેઽમલે શુભે ॥ ૧,૩૩.૪॥

શઙ્ખચક્રગદાપદ્મધરં સૌમ્યં કિરીટિનમ્ ।
આવાહ્ય મણ્ડલે દેવં પૂર્વોક્તવિધિના હર ॥ ૧,૩૩.૫॥

પૂજયેદ્ગન્ધપુષ્પાદ્યૈરુપચારૈર્મહેશ્વર ।
પૂજયિત્વા જપેન્મન્ત્રં શતમષ્ટોત્તરં નરઃ ॥ ૧,૩૩.૬॥

એવં યઃ કુરુતે રુદ્ર ! ચક્રસ્યાર્ચનમુત્તમમ્ ।
સર્વરોગવિનિર્મુક્તો વિષ્ણુલોકં સમાપ્નુયાત્ ॥ ૧,૩૩.૭॥

એતત્સ્તોત્રં જપેત્પશ્ચાત્સર્વવ્યાધિવિનાશનમ્ ।
નમઃ સુદર્શનાયૈવ સહસ્રાદિત્યવર્ચસે ॥ ૧,૩૩.૮॥

જ્વાલામાલાપ્રદીપ્તાય સહસ્રારાય ચક્ષુષે ।
સર્વદુષ્ટવિનાશાય સર્વપાતકમર્દિને ॥ ૧,૩૩.૯॥

સુચક્રાય વિચક્રાય સર્વમન્ત્રવિભેદિને ।
પ્રસવિત્રે જગદ્ધાત્રે જગદ્વિધ્વંસિને નમઃ ॥ ૧,૩૩.૧૦॥

પાલનાર્થાય લોકાનાં દુષ્ટાસુરવિનાશિને ।

ઉગ્રાય ચૈવ સૌમ્યાય ચણ્ડાય ચ નમોનમઃ ॥ ૧,૩૩.૧૧॥

નમશ્ચક્ષુઃ સ્વરૂપાય સંસારભયભેદિને ।
માયાપઞ્જરભેત્રે ચ શિવાય ચ નમોનમઃ ॥ ૧,૩૩.૧૨॥

ગ્રહાતિગ્રહરૂપાય ગ્રહાણાં પતયે નમઃ ।
કાલાય મૃત્યવે ચૈવ ભીમાય ચ નમોનમઃ ॥ ૧,૩૩.૧૩॥

ભક્તાનુગ્રહદાત્રે ચ ભક્તગોપ્ત્રે નમોનમઃ ।
વિષ્ણુરૂપાય શાન્તાય ચાયુધાનાં ધરાય ચ ॥ ૧,૩૩.૧૪॥

વિષ્ણુશસ્ત્રાય ચક્રાય નમો ભૂયો નમોનમઃ ।
ઇતિ સ્તોત્રં મહાપુણ્યં ચક્રસ્ય તવ કીર્તિતમ્ ॥ ૧,૩૩.૧૫॥

યઃ પઠેત્પરયા ભક્ત્યા વિષ્ણુલોકં સ ગચ્છતિ ।
ચક્રપૂજાવિધિં યશ્ચ પઠેદ્રુદ્ર જિતોન્દ્રિયઃ ।
સ પાપં ભસ્મસાત્કૃત્વા વિષ્ણુલોકાય કલ્પતે ॥ ૧,૩૩.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સુદર્શનપૂજાવિધિર્નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૪
રુદ્ર ઉવાચ ।
પુનર્દેવાર્ચનં બ્રૂહિ હૃષીકેશ ગદાધર ।
શ‍ૃણ્વતો નાસ્તિ તૃપ્તિર્મે ગદતસ્તવ પૂજનમ્ ॥ ૧,૩૪.૧॥

હરિરુવાચ ।
હયગ્રીવસ્ય દેવસ્ય પૂજનં કથયામિ તે ।
તચ્છૃણુષ્વ જગન્નાથો યેન વિષ્ણુઃ પ્રતુષ્યતિ ॥ ૧,૩૪.૨॥

મૂલમન્ત્રં મહાદેવ હયગ્રીવસ્ય વાચકમ્ ।
પ્રવક્ષ્યામિ પરં પુણ્યં તદાદૌ શ‍ૃણુ શઙ્કર ॥ ૧,૩૪.૩॥

ૐ સૈં ક્ષૈં શિરસે નમઃ ઇતિ પ્રણવસંયુતઃ ।
અયં નવાક્ષરોમન્ત્રઃ સર્વવિદ્યાપ્રદાયકઃ ॥ ૧,૩૪.૪॥

અસ્યાઙ્ગાનિ મહાદેવ તાઞ્છૃણુષ્વ વૃષધ્વજ ।
ૐ ક્ષાં હૃદયાય નમઃ ।

ॐ ક્ષીં શિરસે સ્વાહાશિરઃ પ્રોક્તં ક્ષૂં વષટ્તથા ॥ ૧,૩૪.૫॥

ॐ કારયુક્તા દેવસ્ય શિખા જ્ઞેયા વૃષધ્વજ ।
ॐ ક્ષૈં કવચાય હું વૈ કવચં પરિકીર્તિતમ્ ॥ ૧,૩૪.૬॥

ॐ ક્ષૈં નેત્રત્રયાય વૌષટ્નેત્રં દેવસ્ય કીર્તિતમ્ ।
ॐ હઃ અસ્ત્રાય ફટસ્ત્રં દેવસ્ય કીર્તિતમ્ ॥ ૧,૩૪.૭॥

પૂજાવિધિં પ્રવક્ષ્યામિ નન્મે નિગદતઃ શ◌ૃણુ આદૌ સ્નાત્વા તથાચમ્ય
તતો યાગગૃહં વ્રજેત્ ॥ ૧,૩૪.૮॥

તતઃ પ્રવિશ્ય વિધિવત્કુર્યાદ્ભં શોષણાદિકમ્ ।
યં ક્ષૈં રમિતિ બીજૈશ્ચ કઠિનીકૃત્ય લમિતિ ॥ ૧,૩૪.૯॥

અણ્ડમુત્પાદ્ય ચ તતઃ ॐ કારેણૈવ ભેદયેત્ ।
અણ્ડમધ્યે હયગ્રીવમાત્માનં પરિચિન્તયેત્ ॥ ૧,૩૪.૧૦॥

શઙ્ખકુન્દેન્દુધવલં મૃણાલરજતપ્રભમ્ ।
ગોક્ષીરસદૃશં તદ્વત્સૂર્યકોટિસમપ્રભમ્ ।
શઙ્ખં ચક્રં ગદાં પદ્મં ધારયન્તં ચતુર્ભુજમ્ ॥ ૧,૩૪.૧૧॥

કિરીટિનં કુણ્ડલિનં વનમાલાસમંન્વિતમ્ ।
સુચક્રં સુકપોલં ચ ષીતામ્બરધરં વિભુમ્ ॥ ૧,૩૪.૧૨॥

ભાવયિત્વા મહાત્માનં સર્વદેવૈઃ સમન્વિતમ્ ।
અઙ્ગમન્ત્રૈસ્તતો ન્યાસં મૂલમન્ત્રેણ વૈ તથા ॥ ૧,૩૪.૧૩॥

તતશ્ચ દર્શયેન્મુદ્રાં શઙ્ખપદ્માદિકાં શુભામ્ ।
ધ્યાયેદ્ધ્યાત્વાર્ચયેદ્વિષ્ણું મૂલમન્ત્રેણ શઙ્કર ॥ ૧,૩૪.૧૪॥

તતશ્ચાવાહયેદ્રુદ્ર દેવતા આસનસ્ય યાઃ ।
ॐ હયગ્રીવાસનસ્ય આગચ્છત ચ દેવતાઃ ॥ ૧,૩૪.૧૫॥

આવાહ્ય મણ્ડલે તાસ્તુ પૂજયેત્સ્વસ્તિકાદિકે ।
દ્વારે ધાતુર્વિધાતુશ્ચ પૂજા કાર્યા વૃષધ્વજ ॥ ૧,૩૪.૧૬॥

સમસ્તપરિવારાય અચ્યુતાય નમ ઇતિ ।
અસ્ય મધ્યેઽર્ચનં કાર્યં દ્વારે ગઙ્ગાઞ્ચ પૂજયેત્ ॥ ૧,૩૪.૧૭॥

યમુનાં ચ મહાદેવીં શઙ્ખપદ્મનિધી તથા ।
ગરુડં પૂજયેદગ્રે મધ્યે શક્તિઞ્ચ પૂજયેત્ ॥ ૧,૩૪.૧૮॥

આધારાખ્યાં મહાદેવ તતઃ કૂર્મં સમર્ચયેત્ ।
અનન્તં પૃથિવીં પશ્ચાદ્ધર્મજ્ઞાને(નૌ) તતોઽર્ચયેત્ ॥ ૧,૩૪.૧૯॥

વૈરાગ્યમથ ચૈશ્વર્યમાગ્નેયાદિષુ પૂજયેત્ ।
અધર્માજ્ઞાનાવૈરાગ્યાનૈશ્ચર્ગ્યાદીંસ્તુ પૂર્વતઃ ॥ ૧,૩૪.૨૦॥

સત્ત્વં રજસ્તમશ્ચૈવ મધ્યદેશેઽથ પૂજયેત્ ।
કન્દં નાલં ચ પદ્મં ચ મધ્યે ચૈવ પ્રપૂજયેત્ ॥ ૧,૩૪.૨૧॥

અર્કસોમાગ્નિસંજ્ઞાનાં મણ્ડલાનાં હિ પૂજનમ્ ।
મધ્યદેશે પ્રકર્તવ્યમિતિ રુદ્ર પ્રકીર્તિતમ્ ॥ ૧,૩૪.૨૨॥

વિમલોત્કર્ષિણી જ્ઞાના ક્રિયાયોગે વૃષધ્વજ ।
પ્રહ્વી સત્યા તથેશાનાનુગ્રહૌ શક્તયો હ્યમૂઃ ॥ ૧,૩૪.૨૩॥

પૂર્વાદિષુ ચ પત્રેષુ પૂજ્યાશ્ચ વિમલાદયઃ ।
અનુગ્રહા કર્ણિકાયાં પૂજ્યા શ્રેયોઽર્થિભિર્નરૈઃ ॥ ૧,૩૪.૨૪॥

પ્રણવાદ્યૈર્નમોઽન્તૈશ્ચ ચતુર્થ્યન્તૈશ્ચ નામભિઃ ।
મન્ત્રૈરેભિર્મહાદેવ આસનં પરિપૂજયેત્ ॥ ૧,૩૪.૨૫॥

સ્નાનગન્ધપ્રદાનેન પુષ્પધૂપપ્રદાનતઃ ।
દીપનૈવેદ્યદાનેન આસનસ્યાર્ચનં શુભમ્ ॥ ૧,૩૪.૨૬॥

કર્તવ્યં વિધિનાનેન ઇતિ તે હર કીર્તિતમ્ ।
તતશ્ચાવાહયેદ્દેવં હયગ્રીવં સુરેશ્વરમ્ ॥ ૧,૩૪.૨૭॥

વામનાસાપુટેનૈવ આગચ્છન્તં વિચિન્તયેત્ ।
આગચ્છતઃ પ્રયોગેણ મૂલમન્ત્રેણ શઙ્કર ॥ ૧,૩૪.૨૮॥

આવાહનં પ્રકર્તવ્યં દેવદેવસ્ય શઙ્ખિનઃ ।
આવાહ્યમણ્ડલે તસ્ય ન્યાસં કુર્યાદતન્દ્રિતઃ ॥ ૧,૩૪.૨૯॥

ન્યાસં કૃત્વા ચ તત્રસ્થં ચિન્તયેત્પરમેશ્વરમ્ ।
હયગ્રીવં મહાદેવં સુરાસુરનમસ્કૃતમ્ ॥ ૧,૩૪.૩૦॥

ઇન્દ્રાદિલોકપાલૈશ્ચ સંયુક્તં વિષ્ણુમવ્યયમ્ ।
ધ્યાત્વા પ્રદર્શયેન્મુદ્રાઃ શઙ્ખચક્રાદિકાઃ શુભાઃ ॥ ૧,૩૪.૩૧॥

પાદ્યાર્ઘ્યાચમનીયાનિ તતો દદ્યાચ્ચ વિષ્ણવે ।

સ્નાપયેચ્ચ તતો દેવં પદ્મનાભમનામયમ્ ॥ ૧,૩૪.૩૨॥

દેવં સંસ્થાપ્ય વિધિવદ્વસ્ત્રં દદ્યાદ્વૃષધ્વજ ।
તતો હ્યાચમનં દદ્યાદુપવીતં તતઃ શુભમ્ ॥ ૧,૩૪.૩૩॥

તતશ્ચ મણ્ડલે રુદ્ર ધ્યાયેદ્દેવં પરેશ્વરમ્ ।
ધ્યાત્વા પાદ્યાદિકં ભૂયો દદ્યાદ્દેવાય શઙ્કર ॥ ૧,૩૪.૩૪॥

દદ્યાદ્ભૈરવદેવાય મૂલમન્ત્રેણ શઙ્કર ।
ૐ ક્ષાં હૃદયાય નમઃ અનેન હૃદયં યજેત્ ॥ ૧,૩૪.૩૫॥

ૐ ક્ષીં શિરસે નમશ્ચ શિરસઃ પૂજનં ભવેત્ ।
ૐ ક્ષૂં શિખાયૈ નમશ્ચ શિખામેતેન પૂજયેત્ ॥ ૧,૩૪.૩૬॥

ૐ ક્ષૈં કવચાય નમઃ કવચં પરિપૂજયેત્ ।
ૐ ક્ષૌં નેત્રાય નમશ્ચ નેત્રં ચાનેન પૂજયેત્ ॥ ૧,૩૪.૩૭॥

ૐ ક્ષઃ અસ્ત્રાય નમ ઇતિ અસ્ત્રં ચાનેન પૂજયેત્ ।
હૃદયં ચ શિરશ્ચૈવ શિખાં ચ કવચં તથા ॥ ૧,૩૪.૩૮॥

પૂર્વાદિષુ પ્રદેશેષુ હ્યેતાસ્તુ પરિપૂજયેત્ ।
કોણેષ્વસ્ત્રં યજેદ્રુદ્ર નેત્રં મધ્યે પ્રપૂજયેત્ ॥ ૧,૩૪.૩૯॥

પૂજયેત્પરમાં દેવીં લક્ષ્મીં લક્ષ્મીપ્રદાં શુભામ્ ।
શઙ્ખં પદ્મં તથા ચક્રં ગદાં પૂર્વાદિતોઽર્ચયેત્ ॥ ૧,૩૪.૪૦॥

ખડ્ગં ચ મુસલં પાશમઙ્કુશં સશરં ધનુઃ ।
પૂજયેત્પૂર્વતો રુદ્ર એભિર્મન્ત્રૈઃ સ્વનામકૈઃ ॥ ૧,૩૪.૪૧॥

શ્રીવત્સં કૌસ્તુભં માલાં તથા પીતામ્બરં શુભમ્ ।
પૂજયેત્પૂર્વતો રુદ્ર શઙ્ખચક્રગદાધરમ્ ॥ ૧,૩૪.૪૨॥

બ્રહ્માણં નારદં સિદ્ધં ગુરું પરગુરું તથા ।
ગુરોશ્ચ પાદુકે તદ્વત્પરમસ્ય ગુરોસ્તથા ॥ ૧,૩૪.૪૩॥

ઇન્દ્રં સવાહનં ચાથ પરિવારયુતં તથા ।
અગ્નિં યમં નિરૃતિં ચ વરુણં વાયુમેવ ચ ॥ ૧,૩૪.૪૪॥

સોમમીશાનમેવં વૈ બ્રહ્માણં પરિપૂજયેત્ ।
પૂર્વાદિકોર્ધ્વપર્યન્તં પૂજયેદ્વૃષભધ્વજ ॥ ૧,૩૪.૪૫॥

વજ્રં શક્તિં તથા દણ્ડં ખડ્ગં પાશં ધ્વજં ગદામ્ ।
ત્રિશૂલં ચક્રપદ્મે ચ આયુધાન્યથ પૂજયેત્ ॥ ૧,૩૪.૪૬॥

વિષ્વક્સેનં તતો દેવમૈશાન્યાં દિશિ પૂજયેત્ ।
એભિર્મન્ત્રૈર્નમોઽન્તૈશ્ચ પ્રણવાદ્યૈર્વૃષધ્વજ ॥ ૧,૩૪.૪૭॥

પૂજા કાર્યા મહાદેવ હ્યનન્તસ્ય વૃષધ્વજ ।
દેવસ્ય મૂલમન્ત્રેણ પૂજા કાર્યા વૃષધ્વજ ॥ ૧,૩૪.૪૮॥

ગન્ધં પુષ્પં તથા ધૂપં દીપં નૈવેદ્યમેવ ચ ।
પ્રદક્ષિણં નમસ્કારં જપ્યં તસ્મૈ સમર્પયેત્ ॥ ૧,૩૪.૪૯॥

સ્તુવીત ચાન્યા સ્તુત્યા પ્રણવાદ્યૈર્વૃષધ્વજ ।
ૐ નમો હયશિરસે વિદ્યાધ્યક્ષાય વૈ નમઃ ॥ ૧,૩૪.૫૦॥

નમો વિદ્યાસ્વરૂપાય વિદ્યાદાત્રે નમોનમઃ ।
નમઃ શાન્તાય દેવાય ત્રિગુણાયાત્મને નમઃ ॥ ૧,૩૪.૫૧॥

સુરાસુરનિહન્ત્રે ચ સર્વદુષ્ટવિનાશિને ।
સર્વલોકાધિપતયે બ્રહ્મરૂપાય વૈ નમઃ ॥ ૧,૩૪.૫૨॥

નમશ્ચેશ્વરવન્દ્યાય શઙ્ખચક્રધારય ચ ।
નમ આદ્યાય દાન્તાય સર્વસત્ત્વહિતાય ચ ॥ ૧,૩૪.૫૩॥

ત્રિગુણાયાગુણાયૈવ બ્રહ્મવિષ્ણુસ્વરૂપિણે ।
કર્ત્રે હર્ત્રે સુરેશાય સર્વગાય નમોનમઃ ॥ ૧,૩૪.૫૪॥

ઇત્યેવં સંસ્તવં કૃત્વા દેવદેવં વિચિન્તયેત્ ।
હૃત્પદ્મે વિમલે રુદ્ર શઙ્ખચક્રગદાધરમ્ ॥ ૧,૩૪.૫૫॥

સૂર્યકોટિપ્રતીકાશં સર્વાવયવસુન્દરમ્ ।
હયગ્રીવોમહીશેશં પરમાત્માનમવ્યયમ્ ॥ ૧,૩૪.૫૬॥

ઇતિ તે કથિતા પૂજા હયગ્રીવસ્ય શઙ્કર ।
યઃ પઠેત્પરયા ભક્ત્યા સ ગચ્છેત્પરમં પદમ્ ॥ ૧,૩૪.૫૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
હયગ્રીવપૂજાવિધિર્નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૩૫

હરિરુવાચ ।
ન્યાસાદિકં પ્રવક્ષ્યામિ ગાયત્ર્યાઃ શૃણુ શઙ્કર ।
વિશ્વામિત્રઋષિશ્ચૈવ સવિતા ચાથ દેવતા ॥ ૧,૩૫.૧॥

બ્રહ્મશીર્ષા રુદ્રશિખા વિષ્ણોર્હૃદયસંશ્રિતા ।
વિનિયોગૈકનયના કાત્યાયનસગોત્રજા ॥ ૧,૩૫.૨॥

ત્રૈલોક્યચરણા જ્ઞેયા પૃથિવીકુક્ષિસંસ્થિતા ।
એવં જ્ઞાત્વા તુ ગાયત્રીં જપેદ્દ્વાદશલક્ષકમ્ ॥ ૧,૩૫.૩॥

ત્રિપદાષ્ટાક્ષરા જ્ઞેયા ચતુષ્પાદા ષડક્ષરા ।
જેપ ચ ત્રિપદા ગ્રોક્તા અર્ચને ચ ચતુષ્પદા ॥ ૧,૩૫.૪॥

ન્યાસે જપે તથા ધ્યાને અગ્નિકાર્યે તથાર્ચને ।
ગાયત્રીં વિન્યસેન્નિત્યં સર્વપાપગ્રણાશિનીમ્ ॥ ૧,૩૫.૫॥

પાદાંસુષ્ઠે ગુલ્ફમધ્યે જઙ્ઘયોર્વિદ્ધિ જાનુનોઃ ।
ઊર્વોર્ગુહ્યે ચ વૃષણે નાડ્યાં નાભૌ તનૂદરે ॥ ૧,૩૫.૬॥

સ્તનયોર્હૃદિ કણ્ઠૌષ્ઠમુખે તાલુનિ ચાંસયોઃ ।
નેત્રે ભ્રુવાર્લલાટે ચ પૂર્વસ્યાં દક્ષિણોત્તરે ॥ ૧,૩૫.૭॥

પશ્ચમે મૂર્ધ્નિ ચાકારં ન્યસેદ્વર્ણાન્વદામ્યહમ્ ।
ઇન્દ્રનીલં ચ વહ્નિં ચ પીતં શ્યામં ચ કાપિલમ્ ॥ ૧,૩૫.૮॥

શ્વેતં વિદ્યુત્પ્રભં તારં કૃષ્ણં રક્તં ક્રમેણ તત્ ।
શ્યામં શુક્લં તથા પીતં શ્વેતં વૈ પદ્મરાગવત્ ॥ ૧,૩૫.૯॥

શઙ્ખવર્ણં પાણ્ડુરં ચ રક્તં ચાસવસન્નિભમ્ ।
અર્કવર્ણસમં સૌમ્યં શઙ્ખાભં શ્વેતમેવ ચ ॥ ૧,૩૫.૧૦॥

યદ્યત્સ્પૃશતિ હસ્તેન યચ્ચ પશ્યતિ ચક્ષુષા ।
પૂતં ભવતિ તત્સર્વં ગાયત્ર્યા ન પરં વિદુઃ ॥ ૧,૩૫.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગાયત્રીન્યાસનિરૂપણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૩૬
હરિરુવાચ ।

સન્ધ્યાવિધિં પ્રવક્ષ્યામિ શ‍ૃણુ રુદ્રાઘનાશનમ્ ।
પ્રાણાયામત્રયં કૃત્વા સન્ધ્યાસ્નાનમુપક્રમેત્ ॥ ૧,૩૬.૧॥

સપ્રણવાં સવ્યાહૃતિં ગાયત્રીં શિરસા સહ ।
ત્રિઃ પઠેદાયતપ્રણઃ પ્રાણાયામઃ સ ઉચ્યતે ॥ ૧,૩૬.૨॥

મનોવાક્કાયજં દોષં પ્રાણાયામૈર્દહેદ્દ્વિજઃ ।
તસ્માત્સર્વેષુ કાલેષુ પ્રાણાયામપરો ભવેત્ ॥ ૧,૩૬.૩॥

સાયમગ્નિશ્ચ મેત્યુક્ત્વા પ્રાતઃ સૂર્યેત્યપઃ પિબેત્ ।
આપઃ પુનન્તુ મધ્યાહ્ને ઉપસ્પૃશ્ય યથાવિધિ ॥ ૧,૩૬.૪॥

આપોહિષ્ઠેત્યૃચા કુર્યાન્માર્જનં તુ કુશોદકૈઃ ।
પ્રણવેન તુ સંયુક્તં ક્ષિપેદ્વારિ પદેપદે ॥ ૧,૩૬.૫॥

રજસ્તમઃ સ્વમોહોત્થાઞ્જાગ્રત્સ્વપ્નસુષુપ્તિજાન્ ।
વાઙ્મનઃ કર્મજાન્દોષાન્નવૈતાન્નવભિર્દહેત્ ॥ ૧,૩૬.૬॥

સમુદ્ધૃત્યોદકં પાણૌ જપ્ત્વા ચ દ્રુપદાં ક્ષિપેત્ ।
ત્રિપડષ્ટૌ દ્વાદશધા વર્તયેદઘમર્ષણમ્ ॥ ૧,૩૬.૭॥

ઉદુત્યઞ્ચિત્રમિત્યાભ્યામુપતિષ્ઠેદ્દિવાકરમ્ ।
દિવા રાત્રૌ ચ યત્પાપં સર્વં નશ્યતિ તત્ક્ષણાત્ ॥ ૧,૩૬.૮॥

પૂર્વસંધ્યાં જપંસ્તિષ્ઠેત્પશ્ચિમામુપવિશ્ય ચ ।
મહાવ્યાહૃતિસંયુક્તાં ગાયત્રીં પ્રણવાન્વિતામ્ ॥ ૧,૩૬.૯॥

દશભિર્જન્મજનિતં શતેન તુ પુરા કૃતમ્ ।
ત્રિયુગં તુ સહસ્રેણ ગાયત્રી હન્તિ દુષ્કૃતમ્ ॥ ૧,૩૬.૧૦॥

રક્તા ભવતિ ગાયત્રી સાવિત્રી શુક્લવર્ણિકા ।
કૃષ્ણા સરસ્વતી જ્ઞેયા સંધ્યાત્રયમુદાહૃતમ્ ॥ ૧,૩૬.૧૧॥

ૐ ભૂર્વિન્યસ્ય હૃદયે ૐ ભુવઃ શિરસિ ન્યસેત્ ।
ૐ સ્વરિતિ શિખાયાં ચ ગાયત્ર્યાઃ પ્રથમં પદમ્ ॥ ૧,૩૬.૧૨॥

વિન્યસેત્કવચે વિદ્વાન્દ્વિતીયં નેત્રયોર્ન્યસેત્ ।
તૃતીયેનાઙ્ગવિન્યાસં ચતુર્થં સર્વતો ન્યસેત્ ॥ ૧,૩૬.૧૩॥

સંધ્યાકાલે તુ વિન્યસ્ય જપેદ્વૈ વેદમાતરમ્ ।
શિવસ્તસ્યાસ્તુ સર્વાઙ્ગે પ્રાણાયામપરં ન્યસેત્ ॥ ૧,૩૬.૧૪॥

ત્રિપદા યા તુ ગાયત્રી બ્રહ્મવિષ્ણુમહેશ્વરી ।
વિનિયોગમૃષિચ્છન્દો જ્ઞાત્વા તુ જપમારભેત્ ॥ ૧,૩૬.૧૫ ॥

સર્વપાપવિનિર્મુક્તો બ્રહ્મલોકમવાપ્નુયાત્ ।
પરોરજસિ સાવદોં તુરીયપદમીરિતમ્ ॥ ૧,૩૬.૧૬ ॥

તં હન્તિ સૂર્યઃ સન્ધ્યાયાં નોપાસ્તિં કુરુતે તુ યઃ ।
તુરીયસ્ય પદસ્યાપિ ઋષિર્નિર્મલ એવ ચ ॥ ૧,૩૬.૧૭ ॥

છન્દસ્તુ દેવી ગાયત્રી પરમાત્મા ચ દેવતા ॥ ૧,૩૬.૧૮ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સંધ્યાવિધિર્નામ ષટ્ત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૭
હરિરુવાચ ।
ગાયત્રી પરમા દેવી ભુક્તિમુક્તિપ્રદા ચ તામ્ ।
યો જપેત્તસ્ય પાપાનિવિનશ્યન્તિ મહાન્ત્યપિ ॥ ૧,૩૭.૧ ॥

ગાયત્રીકલ્પમાખ્યાસ્યે ભુક્તિમુક્તિપ્રદં ચ તત્ ।
અષ્ટોત્તરં સહસ્રં વા અથવાષ્ટશતં જપેત્ ॥ ૧,૩૭.૨ ॥

ત્રિસન્ધ્યં બ્રહ્મલોકીસ્યાચ્છતં જપ્ત્વા જલં પિબેત્ ।
સંધ્યાયાં સર્વપાપઘ્નીં દેવીમાવાહ્ય પૂજયેત્ ॥ ૧,૩૭.૩ ॥

ભૂર્ભુવઃ સ્વઃ સ્વમન્ત્રેણ યુતાં દ્વાદશનામભિઃ ।
ગાયત્ર્યૈ નમઃ ।
સાવિત્ર્યૈ સરસ્વત્યૈ નમોનમઃ ॥ ૧,૩૭.૪ ॥

વેદમાત્રે ચ સાંકૃત્યૈ બ્રહ્માણી કૌશિકી ક્રમાત્ ।
સાધ્વ્યૈ સર્વાર્થસાધિન્યૈ સહસ્રાક્ષ્યૈ ચ ભૂર્ભુવઃ ॥ ૧,૩૭.૫ ॥

સ્વરેવં જુહુયા દગ્નૌ સમિદાજ્યં હવિષ્યકમ્ ।
અષ્ટોત્તરસહસ્રં વાપ્યથવાષ્ટશન્ત ઘૃતમ્ ॥ ૧,૩૭.૬ ॥

ધર્મકામાદિસિદ્ધ્યર્થં જુહુયાત્સર્વકર્મસુ ।
પ્રતિમાં ચન્દનસ્વર્ણનિર્મિતાં પ્રતિપૂજ્ય ચ ॥ ૧,૩૭.૭ ॥

યથા લક્ષં તુ જપ્તવ્યં પયોમૂલફલાશનૈઃ ।
અયુતદ્વયહોમેન સર્વકામાનવાપ્નુયાત્ ॥ ૧,૩૭.૮॥

ઉત્તરે શિખરે જાતા ભૂમ્યાં પર્વત વાસિની ।
બ્રહ્મણા સમનુજ્ઞાતા ગચ્છ દેવિ યથાસુખમ્ ॥ ૧,૩૭.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગાયત્રીકલ્પનિરૂપણં નામ સપ્તત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૮
હરિરુવાચ ।
નવમ્યાદૌ યજેદ્દુર્ગાં હ્રીં દુર્ગે રક્ષિણીતિ ચ ।
માતર્માતર્વરે દુર્ગે સર્વકામાર્થસાધનિ ॥ ૧,૩૮.૧॥

અનેન બલિદાનેન સર્વકામાન્પ્રયચ્છ મે ।
ગૌરી કાલી ઉમા દુર્ગા ભદ્રા કાન્તિઃ સરસ્વતી ॥ ૧,૩૮.૨॥

મઙ્ગલા વિજયા લક્ષ્મીઃ શિવા નારાયણી ક્રમાત્ ।
માર્ગે તૃતીયામારભ્ય પૂજયેન્ન વિયોગભાક્ ॥ ૧,૩૮.૩॥

અષ્ટાદશભુજાં ખેટકં ઘણ્ટાં દર્પણં તર્જનીમ્ ।
ધનુર્ધ્વજં ડમરુકં પરશું પાશમેવ ચ ॥ ૧,૩૮.૪॥

શક્તિમુદ્ગરશૂલાનિ કપાલશરકાઙ્કુશાન્ ।
વજ્ર ચક્રં શલાકાં ચ અષ્ટાદશભુજાં સ્મરેત્ ॥ ૧,૩૮.૫॥

મન્ત્રઃ શ્રીભગવત્યાશ્ચ પ્રવક્ષ્યામિ જપાદિકમ્ ॥ ૧,૩૮.૬॥

ૐ નમો ભગવતિ ચામુણ્ડે શ્મશાનવાસિનિ કપાલહસ્તે મહાપ્રેતસમારૂઢે
મહાવિમાનમાલાકુલે કાલરાત્રિ બહુગણપરિવૃતે મહામુખે બહુભુજે
સુઘણ્ટાડમરુકિઙ્કિણીકે અટ્ટાટ્ટહાસે કિલિકિલિ હું
સર્વનાદશબ્દબહુલે ગજચર્મપ્રાવૃતશરીરે રુધિરમાંસદિગ્ધે
લોલગ્રજિહ્વે મહારાક્ષસિ રૌદ્રદંષ્ટ્રાકરાલે ભીમાટ્ટાટ્ટહાસે
સ્ફુરિતવિદ્યુત્સમપ્રભે ચલચલ કરાલનેત્રે હિલિહિલિ લલજ્જિહ્વે હ્રૈં હ્રીં
ભૃકુટિમુખિ ૐ કારભદ્રાસને કપાલમાલાવેષ્ટિતે
જટામુકુટશશાઙ્કધારિણિ અટ્ટાટ્ટહાસે કિલિકિલિ હુંહું દંષ્ટ્રાઘોરાન્ધકારિણિ
સર્વવિઘ્નવિનાશિનિ ઇદં કર્મ સાધય સાધય શીઘ્રં કુરુકુરુ

કહકહ અઙ્કુશે સમનુપ્રવેશય વર્ગંવર્ગં (વઙ્ગવઙ્ગ)
કમ્પયકમ્પય ચલચલ ચાલયચાલય રુધિરમાંસમદ્યપ્રિયે
હનહન કુટ્ટકુટ્ટ છિન્દછિન્દ મારયમારય અનુબૂમ અનુબૂમ વજ્રશરીરં
સાધયસાધય ત્રૈલોક્યગતમપિ દુષ્ટમદુષ્ટં વા
ગૃહીતમગૃહીતમાવેશય આવેશય ક્રામયક્રમય નૃત્યનૃત્ય બન્ધબન્ધ
વલ્ગવલ્ગ કોટરાક્ષિ ઉર્ધ્વકેશિ ઉલૂકવદને કરકિઙ્કિણિ
કરઙ્કમાલાધારિણિ દહદહ પચપચ ગૃહ્ણગૃહ્ણ મણ્ડલમધ્યે
પ્રવેશયપ્રવેશય કિં વિલમ્બસિ બ્રહ્મસત્યેન વિષ્ણુસત્યેન ઋષિસત્યેન
રુદ્રસત્યેન આવેશય આવેશય કિલિકિલિ ખિલિખિલિ મિલિમિલિ ચિલિચિલિ
વિકૃતરૂપધારિણિ કૃષ્ણભુજઙ્ગ વેષ્ટિતશરીર સર્વગ્રહાવેશિનિ
પ્રલમ્ભોષ્ઠિ ભ્રૂમગ્નનાસિકે વિકટમુખિ કપિલજટે બ્રાહ્મિ
ભઞ્જભઞ્જ જ્વલજ્વલ કાલમુખિ ખલખલ ખરખરઃ પાતયપા તય
રક્તાક્ષિ ઘૂર્ણાપયઘૂર્ણાપય ભૂમિં પાતયપાતય શિરો ગૃહ્ણગૃહ્ણ
ચક્ષુર્મોલયમીલય ભઞ્જભઞ્જ પાદૌ ગૃહ્ણગૃહ્ણ મુદ્રાં
સ્ફોટયસ્ફોટય હું હૂં ફક્વિદારય વિદારય ત્રિશૂલેન
ભેદયભેદય વજ્રેણ હનહન દણ્ડેન તાડયતાડય ચેક્રણ છેદયછેદય
શક્તિના ભેદયભેદય દંષ્ટ્રયા દંશયદંશય કીલકેન કીલય કીલય
કર્તારિકયા પાટયપાટય અઙ્કુશેન ગૃહ્ણગૃહ્ણ
બ્રહ્માણિ એહિ એહિ માહેશ્વરિ એહિ એહિ કૌમારિ એહિ એહિ વારાહિ એહિ એહિ
ઐન્દ્રિ એહિ એહિ ચામુણ્ડે એહિ એહિ વૈષ્ણાવિ એહિ એહિ હિમવન્તચારિણિ એહિ એહિ
કૈલાસવારીણિ એહિ એહિ પરમન્ત્રં છિન્ધિછિન્ધિ કિલિકિલિ બિમ્બે અઘોરે
ઘોરરૂપિણિ ચામુણ્ડે રુરુક્રોધાન્ધવિનિઃ) સૃતે અસુરક્ષયઙ્કરિ
આકાશગામિનિ પાશેન બન્ધબન્ધ સમયે તિષ્ઠતિષ્ઠ મણ્ડલં
પ્રવેશયપ્રવેશય પાતયપાતય ગૃહ્ણગૃહ્ણ મુખં બન્ધબન્ધ
ચક્ષુર્બન્ધયબન્ધય હૃદયં બન્ધબન્ધ હસ્તપાદૌ ચ
બન્ધબન્ધ દુષ્ટગ્રહાન્સર્વાન્બન્ધબન્ધ દિશાં બન્ધબન્ધ
વિદિશાં બન્ધબન્ધ ઊર્ધ્વં બન્ધબન્ધ અધસ્તાદ્બન્ધબન્ધ ભસ્મના
પાનીયેન મૃતિકયા સર્ષપૈર્વા આવેશય આવેશય
પાતયપાતય ચામુણ્ડે કિલિકિલિ વિચ્છેહ્રીં(હું) ફટ્સ્વાહ્ ॥ ૧,૩૮.૭॥

અષ્ટોત્તરપદાનાં હિ માલા મન્ત્રમયી જપઃ ।
એકૈકપદમષ્ટસહસ્રધા ત્રિમધુરાક્તતિલાષ્ટસહસ્રહામેઃ ॥ ૧,૩૮.૮॥

મહામાંસેન-ત્રિમધુરાક્તેન અષ્ટોત્તરસહ્સત્રં ચ એકૈકં ચ પદં યજેત્ ।
તિલાંસ્ત્રિમધુરાક્તાંશ્ચ સહસ્રં ચાષ્ટ હોમયેત્ ॥ ૧,૩૮.૯॥

મહામાંસં ત્રિમધુરાદથ વા સર્વકર્મકૃત્ ।
વારિસર્ષપભસ્માદિક્ષેપાદ્યુદ્ધાદિકે જયઃ ॥ ૧,૩૮.૧૦॥

અષ્ટાવિંશભુજા ધ્યેયા અષ્ટાદશભુજાથવા ।
દ્વાદશાષ્ટભુજા વાપિ ધ્યેયા વાપિ ચતુર્ભુજા ॥ ૧,૩૮.૧૧॥

અસિખેટાન્વિતૌ હસ્તૌ ગદાદણ્ડયુતૌ પરૌ ।
શરચાપયુતૌ ચાન્યૌ ખડ્ગમુદ્ગરસંયુતૌ ॥ ૧,૩૮.૧૨॥

ખડ્ખઘણ્ટાન્વિતૌ ચાન્યૌ ધ્વજદણ્ડયુતૌ પરૌ ।
અન્યૌ પરશુચક્રાઢ્યૌ ડમરુદર્પણાન્વિતૌ ॥ ૧,૩૮.૧૩॥

શક્તિહસ્તાશ્રિતૌ ચાન્યૌ રટોણી મુસલાન્વિતૌ ।
પાશતોમરસંયુક્તૌ ઢક્કાપણવસંયુતૌ ॥ ૧,૩૮.૧૪॥

તર્જયન્તી પરેણૈવ અન્યં કલકલધ્વનિમ્ ।
અભયસ્વસ્તિકાદ્યૌ ચ મહિષઘ્ની ચ સિંહગા ॥ ૧,૩૮.૧૫॥

જય ત્વં કિલ ભૂતેશે સર્વભૂતસમાવૃતે ।
રક્ષ માં નિજભૂતેભ્યો વલિં ગૃહ્ણ નમોઽસ્તુ તે ॥ ૧,૩૮.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દુર્ગાજપપૂજાબલિમન્ત્રનિરૂપણં નામાષ્ટત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૯

રુદ્ર ઉવાચ ।
પુનર્દેવાર્ચનં બ્રૂહિ સંક્ષેપેણ જનાર્દન ।
સૂર્યસ્ય વિષ્ણુરૂપસ્ય ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧,૩૯.૧॥

વાસુદેવ ઉવાચ ।
શ‍ૃણુ સૂર્યસ્ય રુદ્ર ત્વં પુનર્વક્ષ્યામિ પૂજનમ્ ।
ૐ ઉચ્ચૈઃ શ્રવસે નમઃ ૐ અરુણાય નમઃ ।
ૐ દણ્ડિને નમઃ ।
ૐ પિઙ્ગલાય નમઃ ।
એતે દ્વારે પ્રપૂજ્યા વૈ એપિર્મન્ત્રૈર્વૃષધ્વજ ॥ ૧,૩૯.૨॥

ॐ અં પ્રભૂતાય નમઃ ।
ઇમં તુ પૂજયેન્મધ્યે પ્રભૂતામલસંજ્ઞકમ્ ।
ॐ અં વિમલાય નમઃ ।
ॐ અં સારાય નમઃ ।
ॐ અંઆધારાય નમઃ ।
ॐ અં પરમમુખાય નમઃ ।
ઇત્યાગ્નેયાદિકોણેષુ પૂજ્યા વૈ વિમલાદયઃ ॥ ૧,૩૯.૩॥

ॐ પદ્માય નમઃ ।
ॐ કર્ણિકાયૈ નમઃ ।
મધ્યે તુ પૂજયેદ્રુદ્ર પૂર્વાદિષુ તથૈવ ચ ।
દીપ્તાદ્યાઃ પૂજયેન્મધ્યે પૂજયેત્સર્વતોમુખીઃ ।
ॐ વાં (રાં) દીપ્તાયૈ નમઃ ।
ॐ વીં (રીં) સૂક્ષ્માયૈ નમઃ ।
ॐ વૂં (રૂં ભદ્રાયૈ નમઃ ।
ॐ વૈં (રૈં) જયાયૈ નમઃ ।
ॐ વૌં (રૌં) વિભૂત્યૈ નમઃ ।
ॐ વં (રં) અધોરાયૈ નમઃ ।
ॐ વં (રં) વૈદ્યુતાયૈ નમઃ ।
ॐ વઃ (રઃ) વિજયાયૈ નમઃ ।
ॐ રો સર્વતોમુખ્યૈ નમઃ ॥ ૧,૩૯.૪॥

ॐ અર્કાસનાય નમઃ ।
ॐ હ્રાં સૂર્યમૂર્તયે નમઃ ।
એતાસ્તુ પૂજયેન્મધ્યે હૃન્મન્ત્રાઞ્છૃણુ શઙ્કર ।
ॐ હં સં ખં ખખોલ્કાય ક્ષ્રાં ક્ષ્રીં સઃ સ્વાહા સૂર્યમૂર્તયે નમઃ ।
અનેનાવાહનં કુર્યાત્સ્થાપનં સન્નિધાપનમ્ ।
સન્નિરોપનમન્ત્રેણ સકલીકરણં તથા ॥ ૧,૩૯.૫॥

મુદ્રાયા દર્શનં રુદ્ર મૂલમન્ત્રેણ વા હર ।
તેજોરૂપં રક્તવર્ણં સિતપદ્મોપરિ સ્થિતમ્ ।
એકચક્રરથારૂઢં દ્વિબાહું ધૃતપઙ્કજમ્ ॥ ૧,૩૯.૬॥

એવં ધ્યાયેત્સદા સૂર્યં મૂલમન્ત્રં શૃણુષ્વ ચ ।
ૐ હ્રાં હ્રીં સઃ સૂર્યાય નમઃ ॥ ૧,૩૯.૭॥

વારત્રયં પદ્મમુદ્રાં બિમ્બમુદ્રાં ચ દર્શયેત્ ।
ૐ આં હૃદયાય નમઃ ।
ૐ અર્કાય શિરસે સ્વાહા ।
ૐ અઃ ભૂર્ભુવઃ સ્વઃ જ્વાલિનિ શિખાયૈ વષટ્ ।
ૐ હું કવચાય હું ।
ૐ ભાં નેત્રાભ્યાં વૌષટ્ ।
ૐ વઃ અસ્ત્રાય ફડિતિ ॥ ૧,૩૯.૮॥

આગ્નેય્યામથવૈશાન્યાં નૈરૃત્યામર્ચયેદ્ધર ।
ત્દૃયદયાદિ હિ વાયવ્યાં નેત્રં ચાન્તઃ પ્રપૂજયેત્ ॥ ૧,૩૯.૯॥

દિસ્વસ્ત્રં પૂજયેદ્રુદ્ર સોમં તુ શ્વેતવર્ણકમ્ ।
દલે પૂર્વેઽર્ચયેદ્રુદ્ર બુધં ચામીકરપ્રભમ્ ॥ ૧,૩૯.૧૦॥

દક્ષિણે પૂજયેદ્રુદ્ર પતિવર્ણં ગુરું યજેત્ ।
પશ્ચિમે ચૈવ ભૂતેશં ઉત્તરે ભાર્ગવં સિતમ્ ॥ ૧,૩૯.૧૧॥

રક્તમઙ્ગારકં ચૈવ આગ્નેયે પૂજયેદ્ધર ।
શનૈશ્ચરં કૃષ્ણવર્ણં નૈરૃત્યાં દિશિ પૂજયેત્ ॥ ૧,૩૯.૧૨॥

રાહું વાયવ્યદેશે તુ નન્દ્યાવર્તનિભિં હર ।
ઐશાન્યાં ધૂમ્રવર્ણં તુ કેતું સં પરિપૂજયેત્ ॥ ૧,૩૯.૧૩॥

એભિર્મન્ત્રૈર્મહાદેવ તચ્છૃણુષ્વ ચ શઙ્કર ॥ ૧,૩૯.૧૪॥

ૐ સોં સોમાય નમઃ ।
ૐ બું બુધાય નમઃ ।
ૐ બૃં બૃહસ્પતયે નમઃ ।
ૐ ભં ભાર્ગવાય નમઃ ।
ૐ અં અઙ્ગારકાય નમઃ ।
ૐ શં શનૈશ્ચરાય નમઃ ।
ૐ રં રાહવે નમઃ ।
ૐ કં કેતવે નમ ઇતિ ॥ ૧,૩૯.૧૫॥

પાદ્યાદીન્મૂલમન્ત્રેણ દત્ત્વા સૂર્યાય શઙ્કર ।

નૈવેદ્યાન્તે ધેનુમુદ્રાં દર્શયેત્સાધકોત્તમઃ ॥ ૧,૩૯.૧૬॥

જપ્ત્વા ચાષ્ટસહસ્રં તુ તચ્ચ તસ્મૈ સમર્પયેત્ ।
ઐશાન્યાં દિશિ ભૂતેશ તેજશ્ચણ્ડં તુ પૂજયેત્ ॥ ૧,૩૯.૧૭॥

ૐ તેજશ્ચંણ્ડાય હું ફટ્સ્વધા સ્વાહા પૌષટ્ ।
નિર્માલ્યં ચાર્પયેત્તસ્મૈ હ્યર્ઘ્યં દદ્યાત્તતો હર ॥ ૧,૩૯.૧૮॥

તિલતણ્ડુલસંયુક્તં રક્તચન્દનચર્ચિતમ્ ।
ગન્ધોદકેન સમિશ્રં પુષ્પધૂપસમન્વિતમ્ ॥ ૧,૩૯.૧૯॥

કૃત્વા શિરસિ તત્પાત્રં જાનુભ્યામવનિં ગતઃ ।
દર્ઘ્યં તુ સૂર્યાય ત્દૃન્મન્ત્રેણ વૃષધ્વજ ॥ ૧,૩૯.૨૦॥

ગણં ગુરૂન્પ્રપૂજ્યાથ સર્વાન્દેવાનન્પ્રપૂજયેત્ ।
ૐ ગં ગણપતયે નમઃ ।
ૐ અં ગુરુભ્યો નમઃ ॥ ૧,૩૯.૨૧॥

સૂર્યસ્ય કથિતા પૂજા કૃત્વૈતાં વિષ્ણુલોકભાક્ ॥ ૧,૩૯.૨૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સૂર્યાર્ચનપ્રકારો નામૈકોનચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૦
શઙ્કર ઉવાચ ।
માહેશ્વરીં ચ મે પૂજાં વદ શઙ્ખગદાધર ।
યાં જ્ઞાત્વા માનવાઃ સિદ્ધિં ગચ્છન્તિ પરમેશ્વર ॥ ૧,૪૦.૧॥

હરિરુવાચ ।
શ ૃણુ માહેશ્વરીં પૂજાં કથ્યમાનાં વૃષધ્વજ ।
આદૌ સ્નાત્વા તથાચમ્ય હ્યાસને ચોપવિશ્ય ચ ॥ ૧,૪૦.૨॥

ન્યાસં કૃત્વા મણ્ડલે વૈ પૂજયચ્ચે મહેશ્વરમ્ ।
મન્ત્રૈરેતૈર્મહેશાન પરિવારયુતં હરમ્ ॥ ૧,૪૦.૩॥

ૐ હાં શિવાસનદેવતા આગચ્છતેતિ ।
અનેનાવાહયેદ્રુદ્ર દેવતા આસનસ્ય યાઃ ॥ ૧,૪૦.૪॥

ૐ હાં ગણપતયે નમઃ ।

ૐ હાં સરસ્વત્યૈ નમઃ ।

ૐ હાં નન્દિને નમઃ ।

ૐ હાં મહાકાલાય નમઃ ।

ૐ હાં ગઙ્ગાયૈ નમઃ ।

ૐ હાં લક્ષ્મ્યૈ નમઃ ।

ૐ હાં મહાકલાયૈ નમઃ ।

ૐ હાં અસ્ત્રાય નમ ઇતિ ॥ ૧,૪૦.૫॥

એતે દ્વારે પ્રપૂજ્યા વૈ સ્નાનગન્ધાદિભિર્હર ।

ૐ હાં બ્રહ્મણે વાસ્ત્વધિપતયે નમઃ ।

ૐ હાં ગુરુભ્યો નમઃ ।

ૐ હાં આધારશક્ત્યૈ નમઃ ।

ૐ હાં અનન્તાય નમઃ ।

ૐ હાં ધર્માય નમઃ ।

ૐ હાં જ્ઞાનાય નમઃ ।

ૐ હાં વૈરાગ્યાય નમઃ ।

ૐ હાં ઐશ્વર્યાય નમઃ ।

ૐ હાં અધર્માય નમઃ ।

ૐ હાં અજ્ઞાનાય નમઃ ।

ૐ હાં અવૈરાગ્યાય નમઃ ।

ૐ હાં અનૈશ્વર્યાય નમઃ ।

ૐ હાં ઉર્ધ્વચ્છન્દાય નમઃ ।

ૐ હાં અધશ્છન્દાય નમઃ ।

ૐ હાં પદ્માય નમઃ ।

ૐ હાં કર્ણિકાયૈ નમઃ ।

ૐ હાં વામાયૈ નમઃ ।

ૐ હાં જ્યેષ્ઠાયૈ નમઃ ।

ૐ હાં રૌદ્ર્યૈ નમઃ ।

ૐ કાલ્યૈ નમઃ ।

ૐ હાં કલવિકરણ્યૈ નમઃ ।

ૐ બલપ્રમથિન્યૈ નમઃ ।

ૐ હાં સર્વભૂતદમન્યૈ નમઃ ।

ॐ હાં મનોન્મન્યૈ નમઃ ।

ॐ હાં મણ્ડલત્રિતયાય નમઃ ।

ॐ હાં હૌં હં શિવમૂર્તયે નમઃ ।

ॐ હાં વિદ્યાધિપતયે નમઃ ।

ॐ હાં હીં હૌં શિવાય નમઃ ।

ॐ હાં હૃદયાય નમઃ ।

ॐ શિરસે નમઃ ।

ॐ હૂં શિખાયૈ નમઃ ।

ॐ હૈં કવચાય નમઃ ।

ॐ હૌં નેત્રત્રયાય નમઃ ।

ॐ હઃ અસ્ત્રાય નમઃ ।

ॐ સદ્યોજાતાય નમઃ ॥ ૧,૪૦.૬॥

ॐ હાં સિદ્ધ્યૈ નમઃ ।

ॐ હાં ઋદ્ધ્યૈ નમઃ ।

ॐ હાં વિદ્યુતાયૈ નમઃ ।

ॐ હાં લક્ષ્મ્યૈ નમઃ ।

ॐ હાં બોધાયૈ નમઃ ।

ॐ હાં કાલ્યૈ નમઃ ।

ॐ હાં સ્વધાયૈ નમઃ ।

ॐ હાં પ્રભાયૈ નમઃ ॥ ૧,૪૦.૭॥

સત્યસ્યાષ્ટૌ કલા જ્ઞેયાઃ પૂજ્યાઃ પૂર્વાદિષુ સ્થિતાઃ ॥ ૧,૪૦.૮॥

ॐ હાં વામદેવાય નમઃ ।

ॐ હાં રજસે નમઃ ।

ॐ હાં રક્ષાયૈ નમઃ ।

ॐ હાં રત્યૈ નમઃ ।

ॐ હાં કન્યાયૈ નમઃ ।

ॐ હાં કામાયૈ નમઃ ।

ॐ હાં જનન્યૈ નમઃ ।

ॐ હાં ક્રિયાયૈ નમઃ ।

ॐ હાં વૃદ્ધ્યૈ નમઃ ।

ॐ હાં કાર્યાયૈ નમઃ ।

ॐ રા(ધા) ત્ર્યૈ નમઃ ।
ॐ હાં ભ્રામણ્યૈ નમઃ ।
ॐ હાં મોહિન્યૈ નમઃ ।
ॐ હાં ક્ષ(ત્વ)રાયૈ નમઃ ।
વામદેવકલા જ્ઞેયાસ્ત્રયો દશ વૃષધ્વજ ॥ ૧,૪૦.૯॥

ॐ હાં તત્પુરુષાય નમઃ ।
ॐ હાં નિવૃત્ત્યૈ નમઃ ।
ॐ હાં પ્રતિષ્ઠાયૈ નમઃ ।
ॐ હાં વિદ્યાયૈ નમઃ ।
ॐ હાં શાન્ત્યૈ નમઃ ।
જ્ઞેયાસ્તત્પુરુષસ્યૈવ ચતસ્રો વૃષભધ્વજ ॥ ૧,૪૦.૧૦॥

ॐ હાં તૃષ્ણાયૈ નમઃ ।
કલાષટ્કં હ્યઘોરસ્ય વિજ્ઞેયં ભૈરવં હર ॥ ૧,૪૦.૧૧॥

ॐ હાં ઈશાનાય નમઃ ।
ॐ હાં સમિત્યૈ નમઃ ।
ॐ હાં અઙ્ગદાયૈ નમઃ ।
ॐ હાં કૃષ્ણાયૈ નમઃ ।
ॐ હાં મરીચ્યૈ નમઃ ।
ॐ હાં જ્વાલાયૈ નમઃ ।
ઈશાનસ્ય કલાઃ પઞ્ચ જાનીહિ વૃષભધ્વજ ॥ ૧,૪૦.૧૨॥

ॐ હાં શિવપરિવારેભ્યો નમઃ ।
ॐ હાં ઇન્દ્રાય સુરાધિપતયે નમઃ ।
ॐ હાં અગ્નયે તેજોઽધિપતયે નમઃ ।
ॐ હાં યમાય પ્રેતાધિપતયે નમઃ ।
ॐ હાં નિરૃતયે રક્ષોઽધિપતયે નમઃ ।
ॐ હાં વરુણાય જલાધિપતયે નમઃ ।
ॐ હાં વાયવે પ્રાણાધિપતયે નમઃ ।
ॐ હાં સોમાય નેત્રાધિપતયે નમઃ ।
ॐ હાં ઈશાનાય સર્વવિદ્યાધિપતયે નમઃ ।
ॐ હાં અનન્તાય નાગાધિપતયે નમઃ ।

ૐ હાં બ્રહ્મણે સર્વલોકાધિપતયે નમઃ ।
ૐ હાં ધૂલિચણ્ડેશ્વરાય નમઃ ॥ ૧,૪૦.૧૩॥

આવાહનં સ્થાપનં સન્નિધાનં ચ શઙ્કર ।
સન્નિરોધં તથા કુર્યાત્સકલીકરણં તથા ॥ ૧,૪૦.૧૪॥

તત્ત્વન્યાસં ચ મુદ્રાયા દર્શનં ધ્યાનમેવ ચ ।
પાદ્યમાચમનં હ્યર્ઘ્યં પુષ્પાણ્યભ્યઙ્ગદાનકમ્ ॥ ૧,૪૦.૧૫॥

તત ઉદ્વર્તનં સ્નાનં સુગન્ધં ચાનુલેપનમ્ ।
વસ્ત્રાલં કારભોગાંશ્ચ હ્યઙ્ગન્યાસં ચ ધૂપકમ્ ॥ ૧,૪૦.૧૬॥

દીપં નૈવેદ્યદાનં ચ હસ્તોદ્વર્તનમેવ ચ ।
પાદ્યાર્ઘ્યાચમનં ગન્ધં તામ્બૂલં ગીતવાદનમ્ ॥ ૧,૪૦.૧૭॥

નૃત્યં છત્રા દિકરણં મુદ્રાણાં દર્શનં તતા ।
રૂપં ધ્યાનં જપઞ્ચાથ એકવદ્ભાવ એવ ચ ॥ ૧,૪૦.૧૮॥

મૂલમન્ત્રેણ વૈ કુર્યાજ્જપપૂજાસમર્પણમ્ ।
માહેશી કથિતા પૂજા રુદ્ર પાપવિનાસિની ॥ ૧,૪૦.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મહેશ્વરપૂજાવિધિર્નામ ચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૧
વાસુદેવ ઉવાચ ।
ૐ વિશ્વાવસુર્નામ ગન્ધર્વઃ કન્યાનામધિપતિર્લભામિ
તે કન્યાં સમુત્પાદ્ય તસ્મૈ વિશ્વવાસવે સ્વાહા ।
સ્ત્રીલાભો મન્ત્રજાપ્યાચ્ચ કાલરાત્રિં વદામ્યહમ્ ॥ ૧,૪૧.૧॥

ૐ નમો ભગવતિ ઋક્ષકર્ણિ ચતુર્ભુજે ઊર્ધ્વકેશિ ત્રિનયને
કાલરાત્રિ માનુષાણાં વસારુધિરભોજને અમુકસ્ય પ્રાપ્તકાલસ્ય મૃત્યુપ્રદે હું
ફઠનહન દહદહ માંસરુધિરં પચપચ ઋક્ષપત્નિ સ્વાહા
। ન તિથિર્ન ચ નક્ષત્રં નોપવાસો વિધીયતે ॥ ૧,૪૧.૨॥

ક્રુદ્ધો રક્તેન સમાજર્ય કરૌ તાભ્યાં પ્રગૃહ્ય ચ ।
પ્રદોષે સંજપેલ્લિઙ્ગમામપાત્રં ચ મારયેત્ ।
ૐ નમઃ સર્વતોયન્ત્રાણ્યેતદ્યથા જમ્ભનિ મોહનિ સર્વશત્રુવિદારિણિ

રક્ષરક્ષ મામમુકં સર્વભયોપદ્રવેભ્યઃ સ્વાહા ।
શુક્રે નષ્ટે મહાદેવ વક્ષ્યેઽહં દ્વિજપાદિહ ॥ ૧,૪૧.૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વશ્યાદિસાધિકમન્ત્રનિરૂપણં નામૈકચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૨
હરિરુવાચ ।
પવિત્રારોપણં વક્ષ્યે સિવસ્યાશિવનાશનમ્ ।
આચાર્યઃ સાધકઃ કુર્યાત્પુત્રકઃ સમયી હર ॥ ૧,૪૨.૧॥

સંવત્સરકૃતાં પૂજાં વિઘ્નેશો હરતેઽન્યથા ।
આષાઢે શ્રાવણે માઘે કુર્યાદ્ભાદ્રપદેઽપિ વા ॥ ૧,૪૨.૨॥

સૌવર્ણરૌપ્યતામ્રં ચ સૂત્રં કાર્પાસિકં ક્રમાત્ ।
જ્ઞેયં કુજાદૌ સંગ્રાહ્યં કન્યયા કર્તિતં ચ યત્ ॥ ૧,૪૨.૩॥

ત્રિગુણં ત્રિગુણીકૃત્ય તતઃ કુર્યાત્પવિત્રકમ્ ।
ગ્રન્થયો વામદેવેન સત્યેન ક્ષાલયેચ્છિવ ॥ ૧,૪૨.૪॥

અઘોરેણ તુ સંશોધ્ય બધ્દસ્તત્પુરુષાદ્ભવેત્ ।
ધૂપયેદીશમન્ત્રેણ તન્તુદેવા ઇતિ (મે) સ્મૃતાઃ ॥ ૧,૪૨.૫॥

ૐ કારશ્ચન્દ્રમા વહ્નિર્બ્રહ્મા નાગઃ શિખિધ્વજઃ ।
રવિર્વિષ્ણુઃ શિવઃ પ્રોક્તઃ ક્રમાત્તન્તુષુ દેવતાઃ ॥ ૧,૪૨.૬॥

અષ્ટોત્તરશતં કુર્યાત્પઞ્ચાશત્પઞ્ચવિંશતિમ્ ।
રુદ્રોઽત્તમાદિ વિજ્ઞેયં માનં ચ ગ્રન્થયો દશ ॥ ૧,૪૨.૭॥

ચતુરઙ્ગુલાન્તરાઃ સ્યુર્ગ્રન્થિનામાનિ ચ ક્રમાત્ ।
પ્રકૃતિઃ પૌરુષી વીરા ચતુર્થી ચાપરાજિતા ॥ ૧,૪૨.૮॥

જયા ચ વિજયા રુદ્રા અજિતા ચ સદાશિવા ।
મનોન્મની સર્વમુખી દ્વ્યઙ્ગુલાઙ્ગુલતોઽથવા ॥ ૧,૪૨.૯॥

રઞ્જયેત્કુઙ્કુમાદ્યૈસ્તુ કુર્યાદ્ગન્ધૈઃ પવિત્રકમ્ ।
સપ્તમ્યાં વા ત્રયોદશ્યાં શુક્લપક્ષે તથેતરે ॥ ૧,૪૨.૧૦॥

ક્ષીરાદિભિશ્ચ સંસ્નાપ્ય લિઙ્ગં ગન્ધાદિભિર્યજેત્ ।

દદ્યાદ્ગન્ધપવિત્રં તુ આત્મને બ્રહ્મણે હર ॥ ૧,૪૨.૧૧॥

પુષ્પં ગન્ધયુતં દદ્યાન્મૂલેનેશાનગોચરે ।
પૂર્વે ચ દણ્ડકાષ્ઠં તુ ઉત્તરે ચામલકીફલમ્ ॥ ૧,૪૨.૧૨॥

મૃત્તિકાં પશ્ચિમે દદ્યાદ્દક્ષિણે ભસ્મ ભૂતયઃ ।
નૈરૃતેઽગુરું દદ્યાચ્છિખામન્ત્રેણ મન્ત્રવિત્ ॥ ૧,૪૨.૧૩॥

વાયવ્યાં સર્ષપં દદ્યાત્કવચેન વૃષધ્વજ ।
ગૃહં સંવેષ્ટ્ય સૂત્રેણ દદ્યાદ્ગન્ધપવિત્રકમ્ ॥ ૧,૪૨.૧૪॥

હોમં કૃત્વા ગ્રેય દત્ત્વા દદ્યાદ્ભૂતબલિં તથા ।
આમન્ત્રિતોઽસિ દેવેશ ગણૈઃ સાર્ધં મહેશ્વર ॥ ૧,૪૨.૧૫॥

પ્રાતસ્ત્વાં પૂજયિષ્યામિ અત્ર સન્નિહિતો ભવ ।
નિમન્ત્ર્યાનેન તિષ્ઠેત્તુ કુર્વન્ગીતાદિકં નિશિ ॥ ૧,૪૨.૧૬॥

મન્ત્રિતાનિ પવિત્રાણિ સ્થાપયેદ્દેવપાર્શ્વતઃ ।
સ્નાત્વાદિત્યં ચતુર્દશ્યાં પ્રાગ્રુદ્રં ચ પ્રપૂજયેત્ ॥ ૧,૪૨.૧૭॥

લલાટસ્થં વિશ્વરૂપં ધ્યાત્વાત્માનં પ્રપૂજયેત્ ।
અસ્ત્રેણ પ્રોક્ષિતાન્યેવં હૃદયેનાર્ચિતાન્યથ ॥ ૧,૪૨.૧૮॥

સંહિતામન્ત્રિતાન્યેવ ધૂપિતાનિ સમર્પયેત્ ।
શિવતત્ત્વાત્મકં ચાદૌ વિદ્યાતત્ત્વાત્મકં તતઃ ॥ ૧,૪૨.૧૯॥

આત્મતત્ત્વાત્મકં પશ્ચાદ્દેવકાખ્યં તતોઽર્ચયેત્ ।
ૐ હૌં હૌં શિવતત્ત્વાય નમઃ ।
ૐ હીં(હીઃ) વિદ્યાતત્ત્વાય નમઃ ॥ ૧,૪૨.૨૦॥

ૐ હાં (હૌઃ) આત્મતત્ત્વાય નમઃ ।
ૐ હાં હીં હૂં ક્ષૌં સર્વતત્ત્વાય નમઃ ।
કાલાત્મના ત્વયા દેવ યદ્દૃષ્ટં મામકે વિધૌ ॥ ૧,૪૨.૨૧॥

કૃતં ક્લિષ્ટં સમુત્સૃષ્ટં હુતં ગુપ્ત ચ યત્કૃતમ્ ।
સર્વાત્મનાત્મના શમ્ભો પવિત્રેણ ત્વદિચ્છયા ॥ ૧,૪૨.૨૨॥

પૂરયપૂરય મખવ્રતં તન્નિયમેશ્વરાય સર્વતત્ત્વાત્મકાય
સર્વકારણપાલિતાય ૐ હાં હીં હૂં હૈં હૌં શિવાય નમઃ ॥ ૧,૪૨.૨૩॥

પૂર્વૈરનેન યો દદ્યાત્પવિત્રાણાં ચતુષ્ટયમ્ ।

દત્ત્વા વહ્નેઃ (વરે) પવિત્રં ચ ગુરવે દક્ષિણાં દિશેત્ ॥ ૧,૪૨.૨૪॥

બલિં દત્ત્વા દ્વિજાન્ભોજ્ય ચણ્ડં પ્રાચ્યૈ વિસર્જયેત્ ॥ ૧,૪૨.૨૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શિવપવિત્રારોપણં નામ દ્વિચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૩
હરિરુવાચ ।
પવિત્રારોપણં વક્ષ્યે ભુક્તિમુક્તિપ્રદં હરેઃ ।
પુરા દેવાસુરે યુદ્ધે બ્રહ્માદ્યાઃ શરણં યયુઃ ॥ ૧,૪૩.૧॥

વિષ્ણુશ્ચ તેષાં દેવાનાં ધ્વજં ગ્રૈવેયકં દદૌ ।
એતૌ દૃષ્ટ્વા વિનઙ્ક્ષ્યન્તિ દાનવાનબ્રવીદ્ધરિઃ ॥ ૧,૪૩.૨॥

વિષ્ણૂક્તે હ્યબ્રવીન્નાગો વાસુકેરનુજસ્તદા ।
વૃણીત ચ વપિત્રાખ્યં વરં ચેદં વૃષધ્વજ ॥ ૧,૪૩.૩॥

ગ્રૈવેયં હરિદત્તં તુ મન્નામ્ના ખ્યાતિમેષ્યતિ ।
ઇત્યુક્તે તેન તે દેવાસ્તન્નામ્ના તદ્વરં વિદુઃ ॥ ૧,૪૩.૪॥

પ્રાવૃટ્કાલે તુ યે મર્ત્યા નાર્ચિષ્યન્તિ પવિત્રકૈઃ ।
તેષાં સાંવત્સરી પૂજા વિફલા ચ ભવિષ્યતિ ॥ ૧,૪૩.૫॥

તસ્માત્સર્વેષુ દેવેષુ પવિત્રારોપણં ક્રમાત્ ।
પ્રતિપત્પૌર્ણમાસ્યાન્તા યસ્ય યા તિથિરુચ્યતે ॥ ૧,૪૩.૬॥

દ્વાદશ્યાં વિષ્ણવે કાર્યં શુક્લે કૃષ્ણેઽથ વા હર ।
વ્યતીપાતેઽયને ચૈવ ચન્દરસૂર્યગ્રહે શિવ ॥ ૧,૪૩.૭॥

વિષ્ણવે વૃદ્ધિકાર્યે ચ ગુરોરાગમને તથા ।
નિત્યં પવિત્રમુદ્દિષ્ટં પ્રાવૃટ્કાલે ત્વવશ્યકમ્ ॥ ૧,૪૩.૮॥

કૌશેયં પટ્ટસૂત્રં વા કાર્પાસં ક્ષૌમમેવ વા ।
કુશસૂત્ર દ્વિજાનાં સ્યાદ્રાજ્ઞા કૌશેયપટ્ટકમ્ ॥ ૧,૪૩.૯॥

વૈશ્યાનાં ચીરણં ક્ષૌમં શૂદ્રાણાં શણવલ્કજમ્ ।
કાર્પાસં પદ્મજં ચૈવ સર્વેષાં શસ્તમીશ્વર ॥ ૧,૪૩.૧૦॥

બ્રાહ્મણ્યા કર્તિતં સૂત્રં ત્રિગુણં ત્રિગુણીકૃતમ્ ।

ॐ કારોऽથ શિવઃ સોમો હ્યગ્નિર્બ્રહ્યા ફણી રવિઃ ॥ ૧,૪૩.૧૧॥

વિઘ્નેશો વિષ્ણુરિત્યેતે સ્થિતાસ્તન્તુષુ દેવતાઃ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ ત્રિસૂત્રે દેવતાઃ સ્મૃતાઃ ॥ ૧,૪૩.૧૨॥

સૌવર્ણે રાજતે તામ્રે વૈણવે મૃન્મયે ન્યસેત્ ।
અઙ્ગુષ્ઠેન ચતુઃ ષષ્ટિઃ શ્રેષ્ઠં મધ્યં તદર્ધતઃ ॥ ૧,૪૩.૧૩॥

તદર્ધા તુ કનિષ્ઠા સ્યાત્સૂત્રમષ્ટોત્તરં શતમ્ ।
ઉત્તમં મધ્યમં ચૈવ કન્યસં પૂર્વવત્ક્રમાત્ ॥ ૧,૪૩.૧૪॥

ઉત્તમોંऽગુષ્ઠમાનેન મધ્યમો મધ્યમેન તુ ।
કન્યસે ચ કનિષ્ઠેન અઙ્ગુલ્યા ગ્રન્થયઃ સ્મૃતાઃ ॥ ૧,૪૩.૧૫॥

વિમાને સ્થણ્ડિલે ચૈવ એતત્સામાન્યલક્ષણમ્ ।
શિવોદ્ધૃતં પવિત્રં તુ પ્રતિમાયાં ચ કારયેત્ ॥ ૧,૪૩.૧૬॥

હૃન્નાભિરૂ(રુ) રુમાને ચ જાનુભ્યામવલમ્બિની ।
અષ્ટોત્તરસહસ્રેણ ચત્વારો ગ્રન્થયઃ સ્મૃતાઃ ॥ ૧,૪૩.૧૭॥

ષટ્ત્રિં(ડ્વિં) શચ્ચ ચતુર્વિંશદ્વાદશ ગ્રન્થયોऽથવા ।
ઉત્તમાદિષુ વિજ્ઞેયાઃ પર્વભિર્વા પવિત્રકમ્ ॥ ૧,૪૩.૧૮॥

ચર્ચિતં કુઙ્કુમેનૈવ હરિદ્રાચન્દનેન વા ।
સોપવાસઃ પવિત્રન્તુ પાત્રસ્થમધિવાસયેત્ ॥ ૧,૪૩.૧૯॥

અશ્વત્થપત્રપુટકે અષ્ટદિક્ષુ નિવેશિતમ્ ।
દણ્ડકાષ્ઠં કુશાગ્રં ચ પૂર્વે સઙ્કર્ષણેન તુ ॥ ૧,૪૩.૨૦॥

રોચનાકુઙ્કુમેનવ પ્રદ્યુમ્નેન તુ દક્ષિણે ।
યુદ્ધાર્થો ફલસિદ્ધ્યર્થમનિરુદ્ધેન પશ્ચિમે ॥ ૧,૪૩.૨૧॥

ચન્દનં નીલયુક્તં ચ તિલભસ્માક્ષતં તથા ।
આગ્નેયાદિષુ કોણેષુશ્ર્યાદીનાં તુ ક્રમાન્ન્યસેત્ ॥ ૧,૪૩.૨૨॥

પવિત્રં વાસુદેવેન અભિમન્ત્ર્ય સકૃત્સકૃત્ ।
દૃષ્ટ્વા પુનઃ પ્રપૂજ્યાથ વસ્ત્રેણાચ્છાદ્ય યત્નતઃ ॥ ૧,૪૩.૨૩॥

દેવસ્ય પુરતઃ સ્થાપ્યં પ્રતિમામણ્ડલસ્ય વા ।
પશ્ચિમે દક્ષિણે ચૈવ ઉત્તરે પૂર્વવત્ક્રમાત્ ॥ ૧,૪૩.૨૪॥

બ્રાહ્માદીંશ્ચાપિ સંસ્થાપ્ય કલશં ચાપિ પૂજયેત્ ।
અસ્ત્રેણ મણ્ડલં કૃત્વા નૈવેદ્યઞ્ચ સમર્પયેત્ ॥ ૧,૪૩.૨૫॥

અધિવાસ્ય પવિત્રં તુ ત્રિસૂત્રેણ નવેન વા (ચ) ।
વેદિકાં વેષ્ટયિત્વા તુ આત્માનમ કલશં ધૃતમ્ ॥ ૧,૪૩.૨૬॥

અગ્નિકુણ્ડં વિમાનં ચ મણ્ડપં ગૃહમેવ ચ ।
સૂત્રમેકં તુ સંગૃહ્ય દદ્યાદ્દેવસ્ય મૂર્ધાનિ ॥ ૧,૪૩.૨૭॥

દત્ત્વા પઠેદિમં મન્ત્રં પૂજયિત્વા મહેશ્વરમ્ ।
આવાહિતોઽસિ દેવેશ પૂજાર્થં પરમેશ્વર ॥ ૧,૪૩.૨૮॥

તત્પ્રભાતેઽર્ચયિષ્યામિ સામગ્યાઃ સન્નિધૌ ભવ ।
એકરાત્રં ત્રિરાત્રં વા અધિવાસ્ય પવિત્રકમ્ ॥ ૧,૪૩.૨૯॥

રાત્રૌ જાગરણં કૃત્વા પ્રાતઃ સમ્પૂજ્ય કેશવમ્ ।
આરોપયેત્ક્રમેણૈવ જ્યેષ્ઠમધ્યકનીયસમ્ ॥ ૧,૪૩.૩૦॥

ધૂપયિત્વા પવિત્રં તુ મન્ત્રેણૈવાભિમન્ત્રયેત્ ।
પ્રજપ્તગ્રન્થિકં ચૈવ પૂજયેત્કુસુમાદિભિઃ ॥ ૧,૪૩.૩૧॥

ગાયત્ર્યા ચાર્ચિતં તેન દેવં સમ્પૂજ્ય દાપયેત્ ।
સમં પુત્રકલત્રાદ્યૈઃ સૂત્રપુચ્છં તુ ધારયેત્ ॥ ૧,૪૩.૩૨॥

વિશુદ્ધગ્રન્થિકં રમ્યં મહાપાતકનાશનમ્ ।
સર્વપાપક્ષયં દેવ તવાગ્રે ધારયામ્યહમ્ ॥ ૧,૪૩.૩૩॥

એવં ધૂપાદિનાભ્યર્ચ્ય મધ્યમાદીન્ત્સમર્પયેત્ ।
પવિત્રં વૈષ્ણવં તેજઃ સર્વપાતકનાશનમ્ ॥ ૧,૪૩.૩૪॥

ધર્મકામાર્થસિદ્ધ્યર્થં સ્વકણ્ઠે ધારયામ્યહમ્ ।
વનમાલાં સમભ્યર્ચ્ય સ્વેન મન્ત્રેણ દાપયેત્ ॥ ૧,૪૩.૩૫॥

નૈવેદ્યં વિવિધં દત્ત્વા કુસુમાદેર્બલિં હરેત્ ।
અગ્નિં સંતર્પ્ય તત્રાપિ દ્વાદશાઙ્ગુલમાનતઃ ॥ ૧,૪૩.૩૬॥

અષ્ટોત્તરશતેનૈવ દદ્યાદેકપવિત્રકમ્ ।
આદૌ દત્ત્વાર્ઘ્યમાદિત્યે તત્ર ચૈકં પવિત્રકમ્ ॥ ૧,૪૩.૩૭॥

વિષ્વક્સેનં તતઃ પ્રાર્ચ્ય સુરુમર્ઘ્યાદિભિર્હર ।
દેવસ્યાગ્રે પઠેન્મન્ત્રં કૃતાઞ્જલિપુટઃ સ્થિતઃ ॥ ૧,૪૩.૩૮॥

જ્ઞાનતોઽજ્ઞાનતો વાપિ પૂજનાદિ કૃતં મયા ।
તત્સર્વં પૂર્ણમેવાસ્તુ ત્વત્પ્રસાદાત્સુરેશ્વર ॥ ૧,૪૩.૩૯॥

મણિવિદ્રુમમાલભિર્મન્દારકુસુમાદિભિઃ ।
ઇયં સાંવત્સરી પૂજા તવાસ્તુ ગરુડધ્વજ ॥ ૧,૪૩.૪૦॥

વનમાલા યથા દેવ કૌસ્તુભં સતતં હૃદિ ।
તદ્વત્પવિત્રં તન્તૂનાં માલાં ત્વં હૃદયે ધર ॥ ૧,૪૩.૪૧॥

એવં પ્રાર્થ્ય દ્વિજાન્ભોજ્ય દત્ત્વા તેભ્યશ્ચ દક્ષિણામ્ ।
વિસર્જયેત્તુ તેનૈવ સાયાહ્ને ત્વપરેઽહનિ ॥ ૧,૪૩.૪૨॥

સાંવત્સરીમિમાં પૂજાં સમ્પાદ્ય વિધિવન્મયા ।
વ્રજેઃ પવિત્રકેદાનીં વિષ્ણુલેકં વિસર્જિતઃ ॥ ૧,૪૩.૪૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુપવિત્રારોપણં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૪

હરિરુવાચ ।
પૂજયિત્વા પવિત્રાદ્યૈર્બ્રહ્મ ધ્યાત્વા હરિર્ભવેત્ ।
બ્રહ્મધ્યાનં પ્રવક્ષ્યામિ માયાયન્ત્રપ્રમર્દકમ્ ॥ ૧,૪૪.૧॥

યચ્છેદ્વાઙ્મનસં પ્રાજ્ઞસ્તં યજેજ્જ્ઞાનમાત્મનિ ।
જ્ઞાનં મહતિ સંયચ્છેદ્ય ઇચ્છેજ્જ્ઞાનમાત્માનિ ॥ ૧,૪૪.૨॥

દેહેન્દ્રિયમનોબુદ્ધિપ્રાણાહઙ્કારવર્જિતમ્ ।
વર્જિતં ભૂતતન્માત્રૈર્ગુણજન્માશનાદિભિઃ ॥ ૧,૪૪.૩॥

સ્વપ્રકાશં નિરાકારં સદાનં દમનાદિ યત્ ।
નિત્યં શુદ્ધં બુદ્ધમૃદ્ધં સત્યમાનન્દમદ્વયમ્ ॥ ૧,૪૪.૪॥

તુરીયમક્ષરં બ્રહ્મ અહમસ્મિ પરં પદમ્ ।
અહં બ્રહ્મેત્યવસ્થાનં સમાધિરપિ (રિતિ) ગીયતે ॥ ૧,૪૪.૫॥

આત્માનં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
બુદ્ધિં ચ સારથિં વિદ્ધિ મનઃ પ્રગ્રહમેવ ચ ।

ઇન્દ્રિયાણિ હયાનાહુર્વિષયાસ્તેષુ ગોચરાઃ ॥ ૧,૪૪.૬॥

આત્મેન્દ્રિયમનોયુક્તો ભોક્તેત્યાર્મનીષિણઃ ।
યસ્તુ વિજ્ઞાન બાહ્મેન યુક્તેન મનસા સદા ॥ ૧,૪૪.૭॥

સ તુ તત્પદમાપ્નોતિ સ હિ ભૂયો ન જાયતે ।
વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહવાન્નરઃ ॥ ૧,૪૪.૮॥

સ્વર્ધુન્યાઃ પારમાપ્નોતિ તદ્વિષ્ણોઃ પરમં પદમ્ ।
અહિંસાદિર્યમઃ પ્રોક્તઃ શૌચાદિર્નિયમઃ સ્મૃતઃ ॥ ૧,૪૪.૯॥

આસનં પદ્મકાદ્યુક્તં પ્રાણાયામો મરુજ્જયઃ ।
પ્રત્યાહા રો જયઃ પ્રોક્તો ધ્યાનમીશ્વરચિન્તનમ્ ॥ ૧,૪૪.૧૦॥

મનોધૃતિર્ધારણા સ્થાત્સમાધિર્બ્રહ્મણિ સ્થિતિઃ ।
પૂર્વં ચેતઃ સ્થિરં ન સ્યાત્તતોમૂર્તિં વિચિન્તયેત્ ॥ ૧,૪૪.૧૧॥

હૃત્પદ્મકર્ણિકામધ્યે શઙ્ખચક્રગદાબ્જવાન્ ।
શ્રીવત્સકૌસ્તુભયુતો વનમાલાશ્રિયા યુતઃ ॥ ૧,૪૪.૧૨॥

નિત્યઃ શુદ્ધો ભૂતિયુક્તઃ સત્યાનન્દાહ્વયઃ પરઃ ।
આત્માહં પરમં બ્રહ્મ પરમં જ્યોતિરેવ તુ ॥ ૧,૪૪.૧૩॥

ચતુર્વિંશતિમૂર્તિઃ સ શાલગ્રામશિલાસ્થિતઃ ।
દ્વારકાદિશિલાસંસ્થો ધ્યેયઃ પૂજ્યોઽપ્યહં ચ સઃ ॥ ૧,૪૪.૧૪॥

મનસોઽભીપ્સિતં પ્રાપ્ય દેવો વૈમાનિકો ભવેત્ ।
નિષ્કામો મુક્તિમાપ્નોતિ મૂર્તિં ધ્યાયયંસ્તુવઞ્જપન્ ॥ ૧,૪૪.૧૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બ્રહ્મમૂર્તિધ્યાનનિરૂપણં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૫

હરિરુવાચ ।

પ્રસંગાત્કથયિષ્યામિ શાલગ્રામસ્ય લક્ષણમ્ ।
શાલગ્રામશિલાસ્પર્શાત્કોટિજન્માઘનાશનમ્ ॥ ૧,૪૫.૧॥

શખચક્રગદાપદ્મી (હસ્તઃ) (કેશવાખ્યો) ગદાધરઃ ।
સબ્જકૌમાદકીચક્રશઙ્ખી (નારાયણો) વિભુઃ ॥ ૧,૪૫.૨॥

સચક્રશઙ્ખાબ્જગદો (માધવઃ) શ્રીગદાધરઃ ।
ગદબ્જશઙ્ખચક્રી વા (ગોવિન્દો)ઽર્ચ્યો ગદાધરઃ ॥ ૧,૪૫.૩॥

પદ્મશઙ્ખારિગાદિને (વિષ્ણુરૂપાય) તે નમઃ ।
સશઙ્ખાબ્જગદાચક્ર (મધુસૂદનમૂર્તયે) ॥ ૧,૪૫.૪॥

નમો ગદારિશઙ્ખાબ્જયુક્ત(ત્રૈવિક્રમાય) ચ ।
સારિકૌમોદકીપદ્મશઙ્ખ(વામનમૂર્તયે) ॥ ૧,૪૫.૫॥

ચક્રાબ્જશઙ્ખગાદિને નમઃ (શ્રીધરમૂર્તયે) ।
(હૃષીકેશાયા)ઽબ્જગદાશઙ્ખિને ચક્રિણે નમઃ ॥ ૧,૪૫.૬॥

સાબ્જચક્રગદાશઙ્ખ(પદ્મનાભસ્વરૂપિણે) ।
શઙ્ખચક્રગદાપદ્મિન્(દામોદર) મનોનમઃ ॥ ૧,૪૫.૭॥

સારિશઙ્ખગદાબ્જાય (વાસુદેવાય) વૈ નમઃ ।
શઙ્ખાબ્જચક્રગાદિને નમઃ (સઙ્કર્ષણાય) ચ ॥ ૧,૪૫.૮॥

સુશઙ્ખસુગદાબ્જારિધૃતે (પ્રદ્યુમ્નમૂર્તયે) ।
નમો(ઽનિરુદ્ધાય) ગદાશઙ્ખાબ્જારીવિધારિણે ॥ ૧,૪૫.૯॥

સાબ્જશઙ્ખગદાચક્ર(પુરુષોત્તમમૂર્તયે) ।
નમો(ઽધોક્ષજરૂપાય) ગદાશઙ્ખારિપદ્મિને ॥ ૧,૪૫.૧૦॥

(નૃસિંહમૂર્તયે) પદ્મગદાશઙ્ખારિધારિણે ।
પદ્મારિશઙ્ખગદિને નમોઽ(સ્ત્વચ્યુતમૂર્તયે) ॥ ૧,૪૫.૧૧॥

સશઙ્ખચક્રાબ્જગદં (જનાર્દન) મિહાનયે ।
(ઉપેન્દ્રઃ) સગદઃ સારિઃ પદ્મશઙ્ખિન્નમોનમઃ ॥ ૧,૪૫.૧૨॥

સુચક્રાબ્જગદાશઙ્ખયુક્તાય (હરિમૂર્તયે) ।
સગદાબ્જારિશઙ્ખાય નમઃ (શ્રીકૃષ્ણમૂર્તયે) ॥ ૧,૪૫.૧૩॥

શાલગ્રામશિલાદ્વારગતલગ્નદ્વિચક્રધૃક્ ।
શુક્લાભો(વાસુદેવાખ્યઃ) સોઽવ્યાદ્વઃ શ્રીગદાધરઃ ॥ ૧,૪૫.૧૪॥

લગ્નદ્વિચક્રો રક્તાભઃ પૂર્વભાગસ્તુપુષ્કલઃ ।
સંકર્ષણોઽથ(પ્રદ્યુમ્નઃ) સૂક્ષ્મચક્રસ્તુ પીતકઃ ॥ ૧,૪૫.૧૫॥

સ દીર્ઘઃ સશિરશ્છિદ્રો યો(ઽનિરુદ્ધસ્તુ) વર્તુલઃ ।
નીલો દ્વારિ ત્રિરેખશ્ચ અથ (નારાયણો)ઽસિતઃ ॥ ૧,૪૫.૧૬॥

મધ્યે ગાદકૃતી રેખા નાભિચક્રો (ક્ર) મહોન્નતઃ ।
પૃથુવક્ષા (નૃસિંહો) વઃ કપિલોઽવ્યાત્ત્રિબિન્દુકઃ ॥ ૧,૪૫.૧૭॥

અથવા પઞ્ચબિન્દુસ્તત્પૂજનં બ્રહ્મચારિણઃ ।
(વરાહઃ) શક્તિલિઙ્ગોઽવ્યાદ્વિષમદ્વયચક્રકઃ ॥ ૧,૪૫.૧૮॥

નીલસ્ત્રિરેખઃ સ્થૂલોઽથ (કૂર્મમૂર્તિઃ સ બિન્દુમાન્ ।
(કૃષ્ણઃ) સ વર્તુલાવર્તઃ પાતુ વો નતપૃષ્ઠકઃ ॥ ૧,૪૫.૧૯॥

(શ્રીધરઃ) પઞ્ચરેખોઽવ્યા (દ્વનમાલી) ગાદાઙ્કિતઃ ।
(વામનો) વર્તુલો હ્રસ્વો વા (રા) મચક્રઃ સુરેશ્વરઃ ॥ ૧,૪૫.૨૦॥

નાનાવર્ણોઽનેકમૂર્તિર્નાગભોગી (ત્વનન્તકઃ) ।
સ્થૂલો (દામોદરો) નીલો મધ્યેવક્રઃ સુનીલકઃ ॥ ૧,૪૫.૨૧॥

સંકીર્ણદ્વારકઃ સોઽવ્યાદથ બ્રહ્મા સુલોહિતઃ ।
સદીર્ઘરેખઃ સુષિર એકચક્રામ્બુજઃ પૃથુઃ ॥ ૧,૪૫.૨૨॥

પૃથુચ્છિદ્રઃ સ્થૂલચક્રઃ(કૃષ્ણો) (વિષ્ણુશ્ચ) બિલ્વવત્ ।
હયગ્રીવોઽઙ્કુશાકારઃ પઞ્ચરેખઃ સકૌસ્તુભઃ ॥ ૧,૪૫.૨૩॥

(વૈકુણ્ઠો મણિરત્નાભ એકચક્રામ્બુજોઽસિતઃ ।
(મત્સ્યો) દીર્ઘોઽમ્બુજાકારો દ્વારરેખશ્ચ પાતુ વઃ ॥ ૧,૪૫.૨૪॥

રામચક્રો દક્ષરેખઃ શ્યામોવોઽવ્યા (ત્રિવિક્રમઃ) ।
શાલગ્રામે દ્વારકાયાં સ્થિતાય ગદિન નમઃ ॥ ૧,૪૫.૨૫॥

એકદ્વારશ્ચતુશ્ચક્રો વનમાલાવિભૂષિતઃ ।
સ્વર્ણરેખાસમાયુક્તો ગોષ્પદેન વિરાજિતઃ ॥ ૧,૪૫.૨૬॥

કદમ્બકુસુમાકારો (લક્ષ્મીનારાયણો)ઽવતુ ।
એકેન લક્ષિતો યોવ્યાદ્ગદાધારી (સુદર્શનઃ) ॥ ૧,૪૫.૨૭॥

(લક્ષ્મીનારાયણો) દ્વાભ્યાન્ત્રિભિર્મૂર્તિ(સ્ત્રિવિક્રમઃ) ।
ચતુર્ભિશ્ચ (ચતુર્વ્યૂહો) (વાસુદેવશ્ચ) પઞ્ચભિઃ ॥ ૧,૪૫.૨૮॥

(પ્રદ્યુમ્નઃ) ષડ્ભિરેવ સ્યાત્(સંકર્ષણ) ઇતસ્તતઃ ।
(પુરુષોત્તમો)ઽષ્ટભિઃ સ્યા(ન્નવવ્યૂહો) નવાઙ્કિતઃ ॥ ૧,૪૫.૨૯॥

(દશાવતારો) દશભિરનિરુદ્ધોઽવતાદથ ।

(દ્વાદશાત્મા) દ્વાદશભિરત ઊર્ધ્વ(મનન્તકઃ) ॥ ૧,૪૫.૩૦॥

વિષ્ણોર્મૂર્તિમયં સ્તોત્રં યઃ પઠેત્સ દિવં વ્રજેત્ ।
(બ્રહ્મા) ચતુર્મુખો દણ્ડી કમણ્ડલુયુગાન્વિતઃ ॥ ૧,૪૫.૩૧॥

(મહેશ્વરઃ) પઞ્ચવક્રો દશબાહુર્વૃષધ્વજઃ ।
યથાયુધસ્તથા ગૌરી ચણ્ડિકા ચ સરસ્વતી ॥ ૧,૪૫.૩૨॥

મહાલક્ષ્મીર્માતરશ્ચ પદ્મહસ્તો (દિવાકરઃ) ।
ગજાસ્યશ્ચ ગણઃ સ્કન્દઃ ષણ્મુખોનેકધા ગુણાઃ ॥ ૧,૪૫.૩૩॥

એતેઽર્ચિતાઃ સ્થાપિતાશ્ચ પ્રાસાદે વાસ્તુપૂજિતે ।
ધર્માર્થકામમોક્ષાદ્યાઃ પ્રાપ્યન્તે પુરુષેણ ચ ॥ ૧,૪૫.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શાલગ્રામમૂર્તિલક્ષણં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૬
હરિરુવાચ ।
વાસ્તું સંક્ષેપતો વક્ષ્યે ગૃહાદૌ વિઘ્નનાશનમ્ ।
ઈસાનકોણાદારભ્ય હ્યેકાશીતિપદે યજેત્ ॥ ૧,૪૬.૧॥

ઈશાને ચ શિરઃ પાદૌ નૈરૃતેઽગ્ન્યનિલે કરૌ ।
આવાસવાસવેશ્માદૌ પુરે ગ્રામે વણિક્પથે ॥ ૧,૪૬.૨॥

પ્રાસાદારામદુર્ગેષુ દેવાલયમઠેષુ ચ ।
દ્વાવિંશતિ સુરાન્બાહ્યે તદન્તશ્ચ ત્રયોદશ ॥ ૧,૪૬.૩॥

ઈશશ્ચૈવાથ પર્જન્યો જયન્તઃ કુલિશાયુધઃ ।
સૂર્યઃ સત્યો ભૃગુશ્ચૈવ આકાશો વાયુરેવ ચ ॥ ૧,૪૬.૪॥

પૂષા ચ વિતથશ્ચૈવ ગ્રહક્ષેત્રયમાવુભૌ ।
ગન્ધર્વો ભૃગુરાજસ્તુ મૃગઃ પિતૃગણસ્તથા ॥ ૧,૪૬.૫॥

દૌવારિકોઽથ સુગ્રીવઃ પુષ્પદન્તો ગણાધિપઃ ।
અસુરઃ શેષપાપૌ (દૌ) ચ રોગો ઽ઼હિમુખ (ખ્ય) એવ ચ ॥ ૧,૪૬.૬॥

ભલ્લાટઃ સોમસર્પૌ ચ અદિતિશ્ચદિતિસ્તથા ।
બહિર્દ્વાત્રિંશદેતે તુ તદન્તશ્ચતુરઃ શ઼ૃણુ ॥ ૧,૪૬.૭॥

ઈશાનાદિચતુષ્કોણસંસ્થિતાન્પૂજયેદ્બુધઃ ।
આપશ્ચૈવાથ સાવિત્રી જયો રુદ્રસ્તથૈવ ચ ॥ ૧,૪૬.૮॥

મધ્યે નવપદે બ્રહ્મા તસ્યાષ્ટૌ ચ સમીપગાન્ ।
દેવાનેકોત્તરાનેતાન્પૂર્વાદૌ નામતઃ શ‍ૃણુ ॥ ૧,૪૬.૯॥

અર્યમા સવિતા ચૈવ વિવસ્વાન્વિબુધાધિપઃ ।
મિત્રોઽથ રાજયક્ષ્મા ચ તથા પૃથ્વીધરઃ ક્રમાત્ ॥ ૧,૪૬.૧૦॥

અષ્ટમશ્ચાપવત્સશ્ચ પરિતો બ્રહ્મણઃ સ્મૃતાઃ ।
ઈશાનકોણાદારભ્ય દુર્ગે ચર્(જ્ઞેયો) વંશ ઉચ્યતે ॥ ૧,૪૬.૧૧॥

આગ્નેયકોણાદારભ્ય વંશો ભવતિ દુર્ધરઃ ।
અદિતિં હિમવન્તં ચ જયન્તં ચ ઇદં ત્રયમ્ ॥ ૧,૪૬.૧૨॥

નાયિકા કાલિકા નામ શક્રાદ્રન્ધર્વગાઃ પુનઃ ।
વાસ્તુદેવાન્પૂજયિત્વા ગૃહપ્રાસાદકૃદ્ભવેત્ ॥ ૧,૪૬.૧૩॥

સુરેજ્યઃ પુરતઃ કાર્યો યસ્યાગ્નેય્યાં મહાનસમ્ ।
કપિનિર્ગમને (ણી)?યેન પૂર્વતઃ સત્રમણ્ડપમ્ ॥ ૧,૪૬.૧૪॥

ગન્ધપુષ્પગૃહં કાર્યમૈશાન્યાં પટ્ટસંયુતમ્ ।
ભાણ્ડાગારં ચ કૌબેર્યાં ગોષ્ઠાગારં ચ વાયવે ॥ ૧,૪૬.૧૫॥

ઉદગાશ્રયં ચ વારુણ્યાં વાતાયનસમન્વિતમ્ ।
સમિત્કુશેન્ધનસ્થાનમાયુધાનાં ચ નૈરૃતે ॥ ૧,૪૬.૧૬॥

અભ્યાગતાલયં રમ્યસશય્યાસનાપદુકમ્ ।
તોયાગ્નિદીપસદ્ભૃત્યૈર્યુક્તં દક્ષિણતો ભવેત્ ॥ ૧,૪૬.૧૭॥

ગૃહાન્તરાણિ સર્વાણિ સજલૈઃ કદલીગૃહૈઃ ।
પઞ્ચવર્ણૈશ્ચ કુસુમૈઃ શોભિતાનિ પ્રકલ્પયેત્ ॥ ૧,૪૬.૧૮॥

પ્રાકારં તદ્બહિર્દદ્યાત્પઞ્ચહસ્તપ્રમાણતઃ ।
એવં વિષ્ણવાશ્રમં કુર્યાદ્વનૈશ્ચોપવનૈર્યુતમ્ ॥ ૧,૪૬.૧૯॥

ચતુઃ ષષ્ટિપદો વાસ્તુઃ પ્રાસાદાદૌ પ્રપૂજિતઃ ।
મધ્યે ચતુષ્પદો બ્રહ્મા દ્વિપ દાસ્ત્વર્યમાદયઃ ॥ ૧,૪૬.૨૦॥

કર્ણે ચૈવાથ શિખ્યાદ્યાસ્તથા દેવાઃ પ્રકીર્તિતાઃ ।
તેભ્યો હ્યુભયતઃ સાર્ધાદન્યેઽપિ દ્વિપદાઃ સુરાઃ ॥ ૧,૪૬.૨૧॥

ચતુઃ ષષ્ટિપદા દેવા ઇત્યેવં પરિકીર્તિતાઃ ।
ચરકી ચ વિદારી ચ પૂતના પાપરાક્ષસી ॥ ૧,૪૬.૨૨॥

ઈશાનાદ્યાસ્તતો બાહ્યે દેવાદ્યા હેતુકાદયઃ ।
હૈતુકસ્ત્રિપુરાન્તશ્ચ અગ્નિવેતાલકૌ યમઃ ॥ ૧,૪૬.૨૩॥

અગ્નિજિહ્વઃ કાલકશ્ચ કરાલો હ્યકપાદકઃ ।
ઐશાન્યાં ભીમરૂપસ્તુ પાતાલે પ્રેતનાયકઃ ॥ ૧,૪૬.૨૪॥

આકાશે ગન્ધમાલી સ્યાત્ક્ષેત્રપાલાંસ્તતો યજેત્ ।
વિસ્તારાભિહતં દૈર્ઘ્યં રાશિં વાસ્તોસ્તુ કારયેત્ ॥ ૧,૪૬.૨૫॥

કૃત્વા ચ વસુભિર્ભાગં શેષં બદ્ધા યમાદિશેત્ ।
પુનર્ગુણિતમષ્ટાભિરૃભાગં તુ ભાજયેત્ ॥ ૧,૪૬.૨૬॥

યચ્છેષં તદ્ભવેદૃક્ષં ભાગૈર્હૃત્વાવ્યયં ભવેત્ ।
ઋક્ષં ચતુર્ગુણં કૃત્વા નવભિર્ભાગહારિતમ્ ॥ ૧,૪૬.૨૭॥

શેષમંશં વિજાનીયાદ્દેવલસ્ય મતં યથા ।
અષ્ટાભિર્ગુણિતં પિણ્ડં ષષ્ટિભિર્ભાગાહરિતમ્ ॥ ૧,૪૬.૨૮॥

યચ્છેષં તદ્ભવેજ્જીવં મરણં ભતહારિતમ્ ।
વાસ્તુક્રોડે ગૃહં કુર્યાન્ન પૃષ્ઠે માનવઃ સદા ॥ ૧,૪૬.૨૯॥

વામપાર્શ્વેન સ્વાપિતિ નાત્ર કાર્યા વિચારણા ।
સિંહકન્યાતુલાયાં ચ દ્વારં શુધ્યેદથોત્તરમ્ ॥ ૧,૪૬.૩૦॥

એવં ચ વૃશ્ચિકાદૌ સ્યાત્પૂર્વદક્ષિણપશ્ચિમમ્ ।
દ્વારં દીર્ઘાર્ધવિસ્તારં દ્વારાણ્યષ્ટૌ સ્મૃતાનિ ચ ॥ ૧,૪૬.૩૧॥

સન્તાનપ્રેષ્યનીચત્વં સ્વયાનં સ્વર્ણભૂષણમ્ ।
સુતહીનં તુ રૌદ્રેણ વીર્યઘ્નં દક્ષિણે તથા ॥ ૧,૪૬.૩૨॥

વહ્નૌ બધશ્ચાયુર્વૃદ્ધિંપુત્રલાભસુતૃપ્તિદઃ ।
ધનદે નૃપપીડાદમર્થઘ્નં રોગદં જલે ॥ ૧,૪૬.૩૩॥

નૃપભી તિર્મૃતાપત્યં હ્યનપત્યં ન વૈરદમ્ ।
અર્થદં ચાર્થહાન્યૈ ચ દોષદં પુત્રમૃત્યુદમ્ ॥ ૧,૪૬.૩૪॥

દ્વારાણ્યુત્તરસંજ્ઞાનિ પૂર્વદ્વારાણિ વચ્મ્યહમ્ ।

અગ્નિભીતિર્બહુ કન્યાધનસમાનકોપદમ્ ॥ ૧,૪૬.૩૫॥

રાજઘ્નં કોપદં પૂર્વે ફલતો દ્વારમીરિતમ્ ।
ઈશાનાદૌ ભવેત્પૂર્વમગ્નેય્યાદૌ તુ દક્ષિણમ્ ॥ ૧,૪૬.૩૬॥

નૈરૃત્યાદૌ પશ્ચિમં સ્યાદ્વાયવ્યાદૌ તુ ચોત્તરમ્ ।
અષ્ટભાગે કૃતે ભાગે દ્વારાણાં ચ ફલાફલમ્ ॥ ૧,૪૬.૩૭॥

અશ્વત્થપ્લક્ષન્યગ્રોધાઃ પૂર્વાદૌ સ્યાદુદુમ્બરઃ ।
ગૃહસ્ય શોભનઃ પ્રોક્ત ઈશાને ચૈવ સાલ્મલિઃ ।
પૂજિતો વિઘ્નહારી સ્યાત્પ્રાસાદસ્ય ગૃહસ્ય ચ ॥ ૧,૪૬.૩૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વાસ્તુમાનલક્ષણં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૭
સૂત ઉવાચ ।
પ્રાસાદાનાં લક્ષણં ચ વક્ષ્યે શૌનક તચ્છૃણુ ।
ચતુઃ ષષ્ટિપદં કૃત્વા દિગ્વિદિક્ષૂપલક્ષિતમ્ ॥ ૧,૪૭.૧॥

ચતુષ્કોણં ચતુર્ભિશ્ચ દ્વારાણિ સૂર્યસંખ્યયા ।
ચત્વારિંશાષ્ટભિશ્ચૈવ ભિત્તીનાં કલ્પના ભવેત્ ॥ ૧,૪૭.૨॥

ઊર્ધ્વક્ષેત્રસમા જઙ્ઘા જઙ્ઘાર્ધદ્વિગુણં ભવેત્ ।
ગર્ભવિસ્તારવિસ્તીર્ણઃ શુકાઙ્ઘ્રિશ્ચ વિધીયતે ॥ ૧,૪૭.૩॥

તત્રિભાગેન કર્તવ્યઃ પઞ્ચભાગેન વા પુનઃ ।
નિર્ગમસ્તુ શુકાઙ્ઘ્રેશ્ચ ઉચ્છ્રાયઃ શિખરાર્ધગઃ ॥ ૧,૪૭.૪॥

ચતુર્ધા શિખરં કૃત્વા ત્રિભાગે વેદિબન્ધનમ્ ।
ચતુર્થે પુનરસ્યૈવ કણ્ઠમામૂલસાધનમ્ ॥ ૧,૪૭.૫॥

અથ વાપિ સમં વાસ્તું કૃત્વા ષોડશભાગિકમ્ ।
તસ્ય મધ્યે ચતુર્ભાગમાદૌ ગર્ભં તુ કારયેત્ ॥ ૧,૪૭.૬॥

ચતુર્ભાગેન ભિત્તીનામુચ્છ્રાયઃ સ્યાત્પ્રમાણતઃ ॥ ૧,૪૭.૭॥

દ્વિગુણઃ શિખરોચ્છ્રાયો ભિત્ત્યુચ્છાયાચ્ચ માનતઃ ।
શિખરાર્ધસ્ય ચૈર્ધેન વિધેયાસ્તુ પ્રદક્ષિણાઃ ॥ ૧,૪૭.૮॥

ચતુર્દિક્ષુ તથા જ્ઞેયો નિર્ગમસ્તુઃ તથા બુધૈઃ ।
પઞ્ચભાગેન સંભજ્ય ગર્ભમાનં વિચક્ષણઃ ॥ ૧,૪૭.૯॥

ભાગમેકં ગૃહીત્વા તુ નિર્ગમં કલ્પયેત્પુનઃ ।
ગર્ભસૂત્રસમો ભાગાદગ્રતો મુખમણ્ડપઃ ॥ ૧,૪૭.૧૦॥

એતત્સામાન્યમુદ્દિષ્ટં પ્રાસાદસ્ય હિ લક્ષણમ્ ।
લિઙ્ગમાનમથો વક્ષ્યે પીઠો લિઙ્ગસમો ભવેત્ ॥ ૧,૪૭.૧૧॥

દ્વિગુણેન ભવેદ્ગર્ભઃ સમન્તાચ્છૌનક ધ્રુવમ્ ।
તદ્વિધા ચ ભવેદ્ભીતિર્જઙ્ઘા તદ્વિસ્તરાર્ધગા ॥ ૧,૪૭.૧૨॥

દ્વિગુણં શિખરં પ્રોક્તં જઙ્ઘાયાશ્ચૈવ શૌનક ।
પીઠગર્ભાવરં કર્મ તન્માનેન શુકાઙ્ઘ્રિકમ્ ॥ ૧,૪૭.૧૩॥

નિર્ગમસ્તુ સમાખ્યાતઃ શેષં પૂર્વવદેવ તુ ।
લિઙ્ગમાનં સ્મૃતં હ્યેતદ્દ્વારમાનમથોચ્યતે ॥ ૧,૪૭.૧૪॥

કરાગ્રં વેદવત્કૃત્વા દ્વારં ભાગાષ્ટમં ભવેત્ ।
વિસ્તરેણ સમાખ્યાતં દ્વિગુણંસ્વેચ્છયા ભવેત્ ॥ ૧,૪૭.૧૫॥

દ્વારવત્પીઠમધ્યે તુ શેષં સુષિરકં ભવેત્ ।
પાદિકં શેષિકં ભિત્તિર્દ્વારાર્ધેન પરિગ્રહાત્ ॥ ૧,૪૭.૧૬॥

તદ્વિસ્તારસમા જઙ્ઘા સિખરં દ્વિગુણં ભવેત્ ।
શુકાઙ્ઘ્રિઃ પૂર્વવજ્જ્ઞેયા નિર્ગમોચ્છ્રાયકં ભવેત્ ॥ ૧,૪૭.૧૭॥

મણ્ડપે માનમેતત્તુ સ્વરૂપં ચાપરં વદે ।
ત્રૈવેદં કારયેત્ક્ષેત્રં યત્ર તિષ્ઠન્તિ દેવતાઃ ॥ ૧,૪૭.૧૮॥

ઇત્થં કૃતેન માનેન બાહ્યભાગવિનિર્ગતમ્ ।
નેમિઃ પાદેન વિસ્તીર્ણા પ્રાસાદસ્ય સમન્તતઃ ॥ ૧,૪૭.૧૯॥

ગર્ભં તુ દ્વિગુણં કુર્યાન્નેમ્યા માનં ભવેદિહ ।
સ એવ ભિત્તેરુત્સેધો શિખરો દ્વિગુણો મતઃ ॥ ૧,૪૭.૨૦॥

પ્રાસાદાનાં ચ વક્ષ્યામિ માનં યોનિં ચ માનતઃ ।
વૈરાજઃ પુષ્પકાખ્યશ્ચ કૈલાસો માલિકાહ્વયઃ ॥ ૧,૪૭.૨૧॥

ત્રિવિષ્ટપં ચ પઞ્ચૈતે પ્રાસાદાઃ સર્વયોનયઃ ।
પ્રથમશ્ચતુરશ્રો હિ દ્વિતીયસ્તુ તદાયતઃ ॥ ૧,૪૭.૨૨॥

વૃત્તો વૃત્તાયતશ્ચાન્યોઽષ્ટાશ્રશ્ચેહ ચ પઞ્ચમઃ ।
એતેભ્ય એવ સમ્ભૂતાઃ પ્રાસાદાઃ સુમનોહરાઃ ॥ ૧,૪૭.૨૩॥

સર્વપ્રકૃતિભૂતેભ્યશ્ચત્વારિંશત્તથૈવ ચ ।
મેરુશ્ચ મન્દરશ્ચૈવ વિમાનશ્ચ તથાપરઃ ॥ ૧,૪૭.૨૪॥

ભદ્રકઃ સર્વતા ભદ્રો રુચકો નન્દનસ્તથા ।
નન્દિવર્ધનસંજ્ઞશ્ચ શ્રીવત્સશ્ચ નવેત્યમી ॥ ૧,૪૭.૨૫॥

ચતુરશ્રાઃ સમુદ્ભૂતા વૈરાજાદિતિ ગમ્યતામ્ ।
વલભી ગૃહરાજશ્ચ શા લાગૃહં ચ મન્દિરમ્ ॥ ૧,૪૭.૨૬॥

વિમાનં ચ તથા બ્રહ્મમન્દિરં ભવનં તથા ।
ઉત્તમ્ભં શિબિકા વેશ્મ નવૈતે પુષ્પકોદ્ભવાઃ ॥ ૧,૪૭.૨૭॥

વલયો દુન્દુભિઃ પદ્મો મહાપદ્મસ્તથાપરઃ ।
મુકુલી ચાસ્ય ઉષ્ણીષી શઙ્ખશ્ચ કલશસ્તથા ॥ ૧,૪૭.૨૮॥

ગુવાવૃક્ષસ્તથાન્યશ્ચ વૃત્તાઃ કૈલાસસમ્ભવાઃ ।
ગજોઽથ વૃષભો હંસો ગરુડઃ સિંહનામકઃ ॥ ૧,૪૭.૨૯॥

ભૂમુખો ભૂધરશ્ચૈવ શ્રીજયઃ પૃથિવીધરઃ ।
વૃત્તાયતાઃ સમુદ્ભૂતા નવૈતે મણિકાહ્વયાત્ ॥ ૧,૪૭.૩૦॥

વજ્રં ચક્રં તથાન્યચ્ચ મુષ્ટિકં વભ્રુસંજ્ઞિતમ્ ।
વક્રઃ સ્વસ્તિકખડ્ગૌ ચ ગદા શ્રીવૃક્ષ એવ ચ ॥ ૧,૪૭.૩૧॥

વિજયો નામતઃ શ્વેતસ્ત્રિવિષ્ટિપસમુદ્ભવાઃ ।
ત્રિકોણં પદ્મમર્ધેન્દુશ્ચતુષ્કોણં દ્વિરષ્ટકમ્ ॥ ૧,૪૭.૩૨॥

યત્ર તત્ર વિધાતવ્યં સંસ્થાનં મણ્ડપસ્ય તુ ।
રાજ્યં ચ વિભવશ્ચૈવઃ હ્યાયુર્વર્દ્ધનમેવ ચ ॥ ૧,૪૭.૩૩॥

પુત્રલાભઃ સ્ત્રિયઃ પુષ્ટિસ્ત્રિકોણાદિક્રમાદ્ભવેત્ ।
કુર્યાદ્ધ્વજાદિકં ખ્યાતદ્વારિ ગર્ભગૃહં તથા ॥ ૧,૪૭.૩૪॥

મણાડપઃ સમસંખ્યાભિર્ગુણિતઃ સૂત્રકસ્તથા ।
મણ્ડપસ્ય ચતુર્થાંશાદ્ભદ્રઃ કાર્યો વિજાનતા ॥ ૧,૪૭.૩૫॥

સ્પર્ધાગવાક્ષકોપેતો નિર્ગવાક્ષોઽથ વા ભવેત્ ।

સાર્ધભિત્તિપ્રમાણેન ભિતિમાનેન વા પુનઃ ॥ ૧,૪૭.૩૬॥

ભિત્તેર્દ્વૈગુણ્યતો વાપિ કર્તવ્યા મણ્ડપાઃ ક્વચિત્ ।
પ્રાસાદે મઞ્ચરી કાર્યા ચિત્રા વિષમભૂમિકા ॥ ૧,૪૭.૩૭॥

પરિમાણવિરોધેન રેખાવૈષમ્યભૂષિતા ।
આધારસ્તુ ચતુર્ધારશ્ચતુર્મણ્ડપશોભિતઃ ॥ ૧,૪૭.૩૮॥

શતશૃઙ્ગસમાયુક્તો મેરુઃ પ્રાસાદ ઉત્તમઃ ।
મણ્ડપાસ્તસ્ય કર્તવ્યા ભદ્રૈસ્ત્રિભિરલઙ્કૃતાઃ ॥ ૧,૪૭.૩૯॥

ઘચનાકારમાનાનાં ભિન્નાભિન્ના ભવન્તિ તે ।
કિયન્તો યેષુ ચાધારા નિરાધારાશ્ચ કેચન ॥ ૧,૪૭.૪૦॥

પ્રતિચ્છન્દકભેદેન પ્રાસાદાઃ સમ્ભવન્તિ તે ।
અન્યોન્યાસંકરાસ્તેષાં ઘટનાનામભેદતઃ ॥ ૧,૪૭.૪૧॥

દેવતાનાં વિશેષાય પ્રાસાદા બહવઃ સ્મૃતાઃ ।
પ્રાસાદે નિયમો નાસ્તિ દેવતાનાં સ્વયમ્ભુવામ્ ॥ ૧,૪૭.૪૨॥

તાનેવ દેવતાનાં ચ પૂર્વમાનેન કારયેત્ ।
ચતુરશ્રાયતાસ્તત્ર ચતુષ્કોણસમન્વિતાઃ ॥ ૧,૪૭.૪૩॥

ચન્દ્રશાલાન્વિતા કાર્યા ભેરીશિખરસંયુતા ।
પુરતો વાહનાનાં ચ કર્તવ્યા લગ્ન(ઘુ) મણ્ડપાઃ ॥ ૧,૪૭.૪૪॥

નાટ્યશાલા ચ કર્તવ્યા દ્વારદેશસમાશ્રયા ।
પ્રસાદે દેવતાનાં ચ કાર્યા દિક્ષુ વિદિક્ષ્વપિ ॥ ૧,૪૭.૪૫॥

દ્વારપાલાશ્ચ કર્તવ્યા મુખ્યા ગત્વા પૃથક્પૃથક્ ।
કિઞ્ચિદદૂરતઃ કાર્યા મઠાસ્તત્રોપજીવિનામ્ ॥ ૧,૪૭.૪૬॥

પ્રાવૃતા જગતી કાર્યા ફલપુષ્પજલાન્વિતા ।
પ્રસાદેષુ સુરાંસ્થાપ્ય પૂજાભિઃ પૂજયેન્નરઃ ।
વાસુદેવઃ સર્વદેવઃ સર્વભાક્તદ્ગૃહાદિકૃત્ ॥ ૧,૪૭.૪૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશે આચારકાણ્ડે
પ્રાસાદલિઙ્ગમણ્ડપાદિલક્ષણનિરૂપણંનામ સપ્તચત્વારિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૪૮

સૂત ઉવાચ ।
પ્રતિષ્ઠાં સર્વદેવાનાં સંક્ષેપેણ વદામ્યહમ્ ।
સુતિથ્યાદૌ સુરમ્યાં ચ પ્રતિષ્ઠાં કારયેદ્ગુરુઃ ॥ ૧,૪૮.૧॥

ઋત્વિગ્ભિઃ સહ ચાચાર્યં વરયેન્મધ્યદેશગમ્ ।
સ્વશાખોક્તવિધાનેન અથ વા પ્રણવેન તુ ॥ ૧,૪૮.૨॥

પઞ્ચભિર્બહુભિર્વાથ કુર્યાત્પાદ્યાર્ઘ્યમેવ ચ ।
મુદ્રિકાભિસ્તથા વસ્ત્રૈર્ગન્ધમાલ્યાનુલેપનૈઃ ॥ ૧,૪૮.૩॥

મન્ત્રન્યાસં ગુરુઃ કૃત્વા તતઃ કર્મ સમારભેત્ ।
પ્રાસાદસ્યાગ્રતઃ કુર્યાન્મણ્ડપં દશહસ્તકમ્ ॥ ૧,૪૮.૪॥

કુર્યાદ્વાદશહસ્તં વા સ્તમ્ભૈઃ ષોડશભિર્યુતમ્ ।
ધ્વજાષ્ટકૈશ્ચતુર્હસ્તાં મધ્યે વેદિં ચ કારયેત્ ॥ ૧,૪૮.૫॥

નદીસંગમતીરાત્થાં વાલુકાં તત્ર દાપયેત્ ।
ચતુરશ્રં કાર્મુકાભં વર્તુલં કમલાકૃતિ ॥ ૧,૪૮.૬॥

પૂર્વાદિતઃ સમારભ્ય કર્તવ્યં કુણ્ડપઞ્ચકમ્ ।
અથવા ચતુરશ્રાણિ સર્વાણ્યેતાનિ કારયેત્ ॥ ૧,૪૮.૭॥

શાન્તિકર્મિધાનેન સર્વકામાર્થસિદ્ધયે ।
શિરઃ સ્થાને તુ દેવસ્ય આચાર્યો હોમમાચરેત્ ॥ ૧,૪૮.૮॥

ઐશાન્યાં કેચિદિચ્છન્તિ ઉપલિપ્યાવનિં શુભામ્ ।
દ્વારાણિ ચૈવ ચત્વારિ કૃત્વા વૈ તોરણાન્તિકે ॥ ૧,૪૮.૯॥

ન્યગ્રોધોદુમ્બરાશ્વત્થબૈલ્વપાલાશખાદિરાઃ ।
તોરણાઃ પઞ્ચહસ્તાશ્ચ વસ્ત્રપુષ્પાદ્યલઙ્કૃતાઃ ॥ ૧,૪૮.૧૦॥

નિખનેદ્ધસ્તમેકકં ચત્વારશ્ચતુરો દિશઃ ।
પૂર્વદ્વારે મૃગેન્દ્રં તુ હયરાજં તુ દક્ષિણે ॥ ૧,૪૮.૧૧॥

પશ્ચિમે ગોપતિર્નામ સુરશાર્દૂલમુત્તરે ।
અગ્નિમીલેતિ હિ મન્ત્રેણ પ્રથમં પૂર્વતો ન્યસેત્ ॥ ૧,૪૮.૧૨॥

ઈષેત્વેતિહિ મન્ત્રેણ દક્ષિણસ્યાં દ્વિતીયકમ્ ।
અગ્નાયાહિમન્ત્રેણ પશ્ચિમસ્યાં તૃતીયકમ્ ॥ ૧,૪૮.૧૩॥

શન્નોદેવીતિ મન્ત્રેણ ઉત્તરસ્યાં ચતુર્થકમ્ ।

પૂર્વે અમ્બુદવત્કાર્યા આગ્નેય્યાં ધૂમરૂપિણી ॥ ૧,૪૮.૧૪॥

યામ્યાં વૈ કૃષ્ણરૂપા તુ નૈરૃત્યા શ્યામલા (ધૂસરા) ભવેત્ ।
વારુણ્યાં પાણ્ડુરા જ્ઞેયા વાયવ્યાં પીતવર્ણિકા ॥ ૧,૪૮.૧૫॥

ઉત્તરે રક્તવર્ણા તુ શુક્લેશી ચ પતાકિકા ।
બહુરૂપા તથા મધ્યે ઇન્દ્રવિદ્યેતિ પૂર્વકે ॥ ૧,૪૮.૧૬॥

આગ્નિં સંસુપ્તિમન્ત્રેણ યમોનાગેતિ દક્ષિણે ।
પૂજ્યા રક્ષોહનોવેતિ પશ્ચિમે ઉત્તરેઽપિ ચ ॥ ૧,૪૮.૧૭॥

વાત ઇત્યભિષિચ્યાથ આપ્યાયસ્વેતિ ચોત્તરે ।
તમીશાનમતશ્ચૈવ વિષ્ણોર્નુકેતિ મધ્યમે ॥ ૧,૪૮.૧૮॥

કલશૌ તુ તતો દ્વૌદ્વૌ નિવેશ્યૌ તોરણાન્તિકે ।
વસ્ત્રયુગ્મસમાયુક્તાશ્ચન્દનાદ્યૈઃ સ્વલઙ્કૃતાઃ ॥ ૧,૪૮.૧૯॥

પુષ્પૈર્વિતાનૈર્બહુલૈરાદિવર્ણાભિમન્ત્રિતાઃ ।
દિક્પાલાશ્ચ તતઃ પૂજ્યાઃ શાસ્ત્રદૃષ્ટેન કર્મણા ॥ ૧,૪૮.૨૦॥

ત્રાતારમિન્દ્રભન્ત્રેણ અગ્નિર્મૂર્ધેતિ ચાપરે ।
અસ્મિન્વૃક્ષ ઇતં ચૈવ પ્રચારીતિ પરા સ્મૃતા ॥ ૧,૪૮.૨૧॥

કિઞ્ચેદધાતુ આચત્વાભિત્વાદેતિ ચ સપ્તમી ।
ઇમારુદ્રેતિ દિક્પાલાન્પૂજયિત્વા વિચક્ષણઃ ॥ ૧,૪૮.૨૨॥

હોમદ્રવ્યાણિ વાયવ્યે કુર્યાત્સોપસ્કરાણિ ચ ।
શઙ્ખાઞ્છાસ્ત્રોદિતાઞ્છ્વેતાન્નેત્રાભ્યાં વિન્યસેદ્ગુરુઃ ॥ ૧,૪૮.૨૩॥

આલોકનેન દ્રવ્યાણિ શુદ્ધિં યાન્તિ ન સંશયઃ ।
ત્દૃદયાદીનિ ચાઙ્ગાનિ વ્યાહૃતિપ્રણવેન ચ ॥ ૧,૪૮.૨૪॥

અસ્ત્રં ચૈવ સમસ્તાનાં ન્યાસોઽયં સર્વકામિકઃ ।
અક્ષતાન્વિષ્ટરં ચૈવ અસ્ત્રેણૈવાભિમન્ત્રિતાન્ ॥ ૧,૪૮.૨૫॥

વિષ્ટરેણ સ્પૃશેદ્દ્રવ્યાન્યાગમણ્ડપસંભૃતાન્ ।
અક્ષતાન્વિકિરેત્પશ્ચાદસ્ત્રપૂતાન્સમન્તતઃ ॥ ૧,૪૮.૨૬॥

શક્રીં દિશમથારભ્ય યાવદીશાનગોચરમ્ ।
અવકીર્યાક્ષતાન્સંવાંલ્લેપયેન્મણ્ડપં તતઃ ॥ ૧,૪૮.૨૭॥

ગન્ધાદ્યૈરર્ઘ્યપાત્રે ચ મન્ત્રગ્રામં ન્યસેદ્ગુરુઃ ।
તેનાર્ઘ્યપાત્રતોયેન પ્રોક્ષયેદ્યાગમણ્ડપમ્ ॥ ૧,૪૮.૨૮॥

પ્રતિષ્ઠા યસ્ય દેવસ્ય તદાખ્યં કલશં ન્યસેત્ ।
ઐશાન્યાં પૂજયેદ્યામ્યે અસ્ત્રેણૈવ ચ બર્ધનીમ્ ॥ ૧,૪૮.૨૯॥

કલશં વર્ધનીં ચૈવ ગ્રહાન્વાસ્તોષ્પતિં તથા ।
આસનેતાનિ સર્વાણિ પ્રણવાખ્યં જપેદ્ગુરુઃ ॥ ૧,૪૮.૩૦॥

સૂત્રગ્રીવં રત્નગર્ભં વસ્ત્રયુગ્મેન વેષ્ટિતમ્ ।
સર્વૌષધીગન્ધલિપ્તં પૂજયેત્કલશં ગુરુઃ ॥ ૧,૪૮.૩૧॥

દેવસ્તુ કલશે પૂજ્યો વર્ધન્યા વસ્ત્રમુત્તમમ્ ।
વર્ધન્યા તુ સમાયુક્તં કલશં ભ્રામયેદનુ ॥ ૧,૪૮.૩૨॥

વર્ધનીધારયા સિઞ્ચન્નગ્રતો ધારયેત્તતઃ ।
અભ્યર્ચ્ય વર્ધનીકુમ્ભં સ્થણ્ડિલે દેવમર્ચયેત્ ॥ ૧,૪૮.૩૩॥

ઘટં ચાવાહ્ય વાયવ્યાં ગણાનાં ત્વેતિ સદ્ગણમ્ ।
દેવમીશાનકોણે તુ જપેદ્વાસ્તોષ્પતિં બુધઃ ॥ ૧,૪૮.૩૪॥

વાસ્તોષ્પતીતિ મન્ત્રેણ વાસ્તુદોષોપશાન્તયે ।
કુમ્ભસ્ય પૂર્વતો ભૂતં ગણદેવં બલિં હરેત્ ॥ ૧,૪૮.૩૫॥

પઠેદિતિ ચ વિદ્યાશ્ચ કુર્યાદાલમ્ભનં બુધઃ ।
યોગેયોગેતિ મન્ત્રેણાસ્તરણં શાદ્વલૈઃ કુશૈઃ ॥ ૧,૪૮.૩૬॥

ઋત્વિગ્ભિઃ સાર્ધમાચાર્યઃ સ્નાનપીઠે ગુરુસ્તદા ।
વિવિધૈર્બ્રહ્મઘોષૈશ્ચ પુણ્યાહજયમઙ્ગલૈઃ ॥ ૧,૪૮.૩૭॥

કૃત્વા બ્રહ્મરથે દેવં પ્રતિષ્ઠન્તિ તતો દ્વિજાઃ ।
ઐશાન્યામાનયેત્પીઠમણ્ડપે વિન્યસેદ્ગુરુઃ ॥ ૧,૪૮.૩૮॥

ભદ્રઙ્કર્ણેત્યથ સ્નાત્વા સૂત્રવલ્કલજેન તુ ।
સંસ્નાપ્ય લક્ષણોદ્ધારં કુર્યાત્તૂર્યાદિ (દૂરાભિ) વાદનૈઃ ॥ ૧,૪૮.૩૯॥

મધુસર્પિઃ સમાયુક્તં કાંસ્યે વા તામ્રભાજને ।
અક્ષિણી ચાઞ્જયેચ્ચાસ્ય સુવર્ણસ્ય શલાકયા ॥ ૧,૪૮.૪૦॥

અગ્નિર્જ્યોતીતિ મન્ત્રેણ નેત્રોદ્ઘાટં તુ કારયેત્ ।
લક્ષણે ક્રિયમાણે તુ નામૈકં સ્થાપકો વ(દ) દેત્ ॥ ૧,૪૮.૪૧॥

ઇમમેગઙ્ગેમન્ત્રેણ નેત્રયોઃ શીતલક્રિયા ।
અગ્નિર્મૂર્ધેતિ મન્ત્રેણ દદ્યાદ્વલ્મી કમૃત્તિકામ્ ॥ ૧,૪૮.૪૨॥

બિલ્વોદુમ્બરમશ્વત્થં વટં પાલાશમેવ ચ ।
યજ્ઞાયજ્ઞેતિ મન્ત્રેણ દદ્યાત્પઞ્ચકષાયકમ્ ॥ ૧,૪૮.૪૩॥

પઞ્ચગવ્યં સ્નાપયેચ્ચ સહદેવ્યાદિ ભિસ્તતઃ ।
સહદેવી બલા ચૈવ શતમૂલી શતાવરી ॥ ૧,૪૮.૪૪॥

કુમારી ચ ગુડૂચી ચ સિંહી વ્યાઘ્રી તથૈવ ચ ।
યા ઓષધીતિ મન્ત્રેણ સ્નાનમોષધિમજ્જલૈઃ ॥ ૧,૪૮.૪૫॥

યાઃ ફલિનીતિ મન્ત્રેણ ફલસ્નાનં વિધીયતે ।
દ્રુપદાદિવેતિ મન્ત્રેણ કાર્યમુદ્વર્તનં બુધૈઃ ॥ ૧,૪૮.૪૬॥

કલશેષુ ચ વિન્યસ્ય ઉત્તરાદિષ્વનુક્રમાત્ ।
રત્નાનિ ચૈવ ધાન્યાનિ ઓષધીં શતપુષ્પિકામ્ ॥ ૧,૪૮.૪૭॥

સમુદ્રાંશ્ચૈવ વિન્યસ્ય ચતુરશ્ચતુરો દિશઃ ।
ક્ષીરં દધિ ક્ષીરોદસ્ય ઘૃતોદસ્યેતિ વા પુનઃ ॥ ૧,૪૮.૪૮॥

આપ્યાયસ્વ દધિક્રાવ્ણો યા ઔષધીરિતીતિ ચ ।
તેજોઽસીતિ ચ મન્ત્રૈશ્ચ કુમ્ભં ચૈવાભિમન્ત્રયેત્ ॥ ૧,૪૮.૪૯॥

સમુદ્રાખ્યૈશ્ચતુર્ભિશ્ચ સ્નાપયેત્કલશૈઃ પુનઃ ।
સ્નાતશ્ચૈવ સુવેષશ્ચ ધૂપો દેયશ્ચ ગુગ્ગુલુઃ ॥ ૧,૪૮.૫૦॥

અભિષેકાય કુમ્ભેષુ તત્તત્તીર્થાનિ વિન્યસેત્ ।
પૃથિવ્યાં યાનિ તીર્થાનિ સરિતઃ સાગરાસ્તથા ॥ ૧,૪૮.૫૧॥

યા ઓષધીતિ મન્ત્રેણ કુમ્ભં ચૈવાભિમન્ત્રયેત્ ।
તેન તોયેન યઃ સ્નાયાત્સ મુચ્યેત્સર્વપાતકૈઃ ॥ ૧,૪૮.૫૨॥

અભિષિચ્ય સમુદ્રૈશ્ચ ત્વર્ઘ્યં દદ્યાત્તતઃ પુનઃ ।
ગન્ધદ્વારેતિ ગન્ધં ચ ન્યાસં વૈ વેદમન્ત્રકૈઃ ॥ ૧,૪૮.૫૩॥

સ્વશાસ્ત્રવિહિતૈઃ પ્રાપ્તૈર્યુવંવસ્ત્રેતિ વસ્ત્રકમ્ ।
કવિહાવિતિ મન્ત્રેણ આનયેન્મણ્ડપં શુભમ્ ॥ ૧,૪૮.૫૪॥

શમ્ભવાયેતિ મન્ત્રેણ શય્યાયાં વિનિવેશયેત્ ।

વિશ્વતશ્ચક્ષુર્મન્ત્રેણ કુર્યાત્સકલનિષ્કલમ્ ॥ ૧,૪૮.૫૫॥

સ્થિત્વા ચૈવ પરે તત્ત્વે મન્ત્રન્યાસં તુ કારયેત્ ।
સ્વશાસ્ત્રવિહિતો મન્ત્રો ન્યાસસ્તસ્મિંસ્તથોદિતઃ ॥ ૧,૪૮.૫૬॥

વસ્ત્રેણાચ્છાદયિત્વા તુ પૂજનીયઃ સ્વભાવતઃ ।
યથાશાસ્ત્રં નિવેદ્યાનિ પાદમૂલે તુ દાપયેત્ ॥ ૧,૪૮.૫૭॥

અથ પ્રણવસંયુક્તં વસ્ત્રયુગ્મેન વેષ્ટિતમ્ ।
કલશં સહિરણ્યં ચ શિરઃ સ્થાને નિવેદયેત્ ॥ ૧,૪૮.૫૮॥

સ્થિત્વા કુણ્ડસમીપેઽથ અગ્નેઃ સ્થાપનમાચરેત્ ।
સ્વશાસ્ત્રવિહિતૈર્મન્ત્રૈર્વેદોક્તૈર્વાથ વા ગુરુઃ ॥ ૧,૪૮.૫૯॥

શ્રીસૂક્તં પાવમાન્યં ચ વાસદામ્યસવાજિનમ્ ।
વૃષાકપિં ચ મિત્રં બહ્વૃચઃ પૂર્વતો જપેત્ ॥ ૧,૪૮.૬૦॥

રુદ્રં પુરુષસૂક્તં ચ શ્લોકાધ્યાયં ચ શુક્રિયમ્ ।
બ્રહ્માણં પિતૃમૈત્રં ચ અધ્વર્યુર્દક્ષિણે જપેત્ ॥ ૧,૪૮.૬૧॥

વેદવ્રતં વામદેવ્યં જ્યેષ્ઠસામ રથન્તરમ્ ।
ભેરુણ્ડાનિ ચ સામાનિ છન્દોગઃ પશ્ચિમે જપેત્ ॥ ૧,૪૮.૬૨॥

અથર્વશિરસં ચૈવ કુમ્ભસૂક્તમથર્વણઃ ।
નીલરુદ્રાંશ્ચ મૈત્રં ચ અથર્વશ્ચોત્તરે જપેત્ ॥ ૧,૪૮.૬૩॥

કુણ્ડં ચાસ્ત્રેણ સમ્પ્રોક્ષ્ય આચાર્યસ્તુ વિશેષતઃ ।
તામ્રપાત્રે શરાવે વા યથાવિભવતોઽપિ વા ॥ ૧,૪૮.૬૪॥

જાતવેદસમાનીય અગ્રતસ્તં નિવેશયેત્ ।
અસ્ત્રેણ જ્વાલયેદ્વહ્નિં કવચેન તુ વેષ્ટયેત્ ॥ ૧,૪૮.૬૫॥

અમૃતીકૃત્ય તં પશ્ચાન્મન્ત્રૈઃ સર્વૈશ્ચ દેશિકઃ ।
પાત્રં ગૃહ્ય કરાભ્યાં ચ કુણ્ડં ભ્રામ્ય તતઃ પુનઃ ॥ ૧,૪૮.૬૬॥

વૈષ્ણવેન તુ યોગેન પરં તેજસ્તુ નિઃ ક્ષિપેત્ ।
દક્ષિણે સ્થાપયેદ્બ્રહ્મ પ્રણીતાગ્ચોત્તરેણ તુ ॥ ૧,૪૮.૬૭॥

સાધારણેન મન્ત્રેણ સ્વસૂત્રવિહિતેન વા ।
દિક્ષુદિક્ષુ તતો દદ્યાત્પરિધિં વિષ્ટરૈઃ સહ ॥ ૧,૪૮.૬૮॥

બ્રહ્મવિષ્ણુહરેશાનાઃ પૂજ્યાઃ સાધારણેન તુ ।
દર્ભેષુ સ્થાપયેદ્વહ્નિં દર્ભૈશ્ચ પરિવેષ્ટિતમ્ ॥ ૧,૪૮.૬૯॥

દર્ભતોયેન સંસ્પૃષ્ટો મન્ત્રહીનોઽપિ શુધ્યતિ ।
પ્રાગગ્રૈરુદગગ્રૈશ્ચ પ્રત્યગગ્રૈરખણ્ડિતૈઃ ॥ ૧,૪૮.૭૦॥

વિતતૈર્વેષ્ટિતો વહ્નિઃ સ્વયં સાન્નિધ્યમાવ્રજેત્ ।
અગ્નેસ્તુ રક્ષણાર્થાય યદુક્તં કર્મ ન્ત્રવિત્ ॥ ૧,૪૮.૭૧॥

આચાર્યાઃ કેચિદિચ્છન્તિ જાતકર્માદ્યનન્તરમ્ ।
પવિત્રં તુ તતઃ કૃત્વા કુર્યાદાજ્યસ્ય સંસ્કૃતિમ્ ॥ ૧,૪૮.૭૨॥

આચાર્યોઽથ નિરીક્ષ્યાપિ નીરાજ્યમભિમન્ત્રિતમ્ ।
આજ્યભાગાભિઘારાન્તમવેક્ષેતાજ્યસિદ્ધયે ॥ ૧,૪૮.૭૩॥

પઞ્ચપઞ્ચાહુતીર્હુત્વા આજ્યેન તદનન્તરમ્ ।
ગર્ભાધાનાદિતસ્તાવદ્યાવદ્ગૌદાનિકં ભવેત્ ॥ ૧,૪૮.૭૪॥

સ્વશાસ્ત્રવિહિતૈર્મન્ત્રૈઃ પ્રણવેનાથ હોમયેત્ ।
તતઃ પૂર્ણાહુતિં દત્ત્વા પૂર્ણાત્પૂર્ણમનારેથઃ ॥ ૧,૪૮.૭૫॥

એવમુત્પાદિતો વહ્નિઃ સર્વકર્મસુ સિદ્ધિદઃ ।
પૂજયિત્વા તતો વહ્નિં કુણ્ડેષુ વિહરેત્તથા ॥ ૧,૪૮.૭૬॥

ઇન્દ્રાદીનાં સ્વમન્ત્રૈશ્ચ તથાહુતિશતંશતમ્ ।
પુર્ણાહુતિં શતસ્યાન્તે સર્વેષાં ચૈવ હોમયેત્ ॥ ૧,૪૮.૭૭॥

સ્વામાહુતિમથાજ્યેષુ હોતા તત્કલશે ન્યસેત્ ।
દેવતાશ્ચૈવ મન્ત્રાંશ્ચ તથૈવ જાતવેદસમ્ ॥ ૧,૪૮.૭૮॥

આત્માનમેકતઃ કૃત્વા તતઃ પૂર્ણાં પ્રદાપયેત્ ।
નિષ્કૃષ્ય બહિરાચાર્યો દિક્પાલાનાં બલિં હરેત્ ॥ ૧,૪૮.૭૯॥

ભૂતાનાં ચૈવ દેવાનાં નાગાનાં ચ પ્રયોગતઃ ।
તિલાશ્ચ સમિધશ્ચૈવ હોમદ્રવ્યં દ્વયં સ્મૃતમ્ ॥ ૧,૪૮.૮૦॥

આજ્યં તયોઃ સહકારિ તત્પ્રધાનં યદક્ષુ(ક્ષ)યોઃ ।
પરુષસુક્તં પૂર્વેણૈવ રુદ્રચૈવ તુ દક્ષિણે ॥ ૧,૪૮.૮૧॥

જ્યેષ્ઠસામ ચ ભારુણ્ડં તન્નયામીતિ પશ્ચિમે ।
નીલરુદ્રો મહામન્ત્રઃ કુમ્ભસૂક્તમથર્વણઃ ॥ ૧,૪૮.૮૨॥

હુત્વા સહસ્રમેકૈકં દેવં શિરસિ કલ્પયેત્ ।
એવં મધ્યે તથા પાદે પૂર્ણાહુત્યા તથા પુનઃ ॥ ૧,૪૮.૮૩॥

શિરઃ સ્થાનેષુ જુહુયાદાવિશેચ્ચાપ્યનુક્રમાત્ ।
વેદાનામાદિમન્ત્રૈર્વા મન્ત્રૈર્વા દેવનામભિઃ ॥ ૧,૪૮.૮૪॥

સ્વશાસ્ત્રવિહિતૈર્વાપિ ગાયત્ર્યા વાથ તે દ્વિજાઃ ।
ગાયત્ર્યા વાથવાચાર્યો વ્યાહૃતિપ્રણવેન તુ ॥ ૧,૪૮.૮૫॥

એવં હોમવિધિં કૃત્વા ન્યસેન્મન્ત્રાંસ્તુ દેશિકઃ ।
ચરણાવગ્નિમીલએ તુ ઇષેત્વો ગુલ્ફયોઃ સ્થિતાઃ ॥ ૧,૪૮.૮૬॥

અગ્ન આયાહિ જઙ્ઘે દ્વે શન્નોદેવીતિ જાનુની ।
બૃહદ્રથન્તરે ઊરૂ ઉદરેષ્વાતિલો (સ્વાતિનો) ન્યસેત્ ॥ ૧,૪૮.૮૭॥

દીર્ઘાયુષ્ટ્વાય હૃદયે શ્રીશ્ચતે ગલકે ન્યસેત્ ।
ત્રાતારમિન્દ્રમુરસિ નેત્રાભ્યાં તુ ત્રિયમ્બકમ્ ॥ ૧,૪૮.૮૮॥

મૂર્ધાભવ તથા મૂર્ધ્નિ આલગ્નાદ્ધોમમાચરેત્ ।
ઉત્થા પયેત્તતો દેવમુત્તિષ્ઠબ્રહ્મણસ્પતે ! ॥ ૧,૪૮.૮૯॥

વેદપુણ્યાહશબ્દેન પ્રાસાદાનાં પ્રદક્ષિણમ્ ।
પિણ્ડિકાલંભનં કૃત્વા દેવસ્યત્વેતિ મન્ત્રવિત્ ॥ ૧,૪૮.૯૦॥

દિક્પા લાન્સહ રત્નૈશ્ચ ધાતૂનોષધયસ્તથા ।
લૌહબીજાનિ સિદ્ધાનિ પશ્ચાદ્દેવં તુ વિન્યસેત્ ॥ ૧,૪૮.૯૧॥

ન ગર્ભે સ્થાપયેદ્દેવં ન ગર્ભં તુ પરિત્યજેત્ ।
ઈષન્મધ્યં પરિત્યજ્ય તતો દોષાપહં તુ તત્ ॥ ૧,૪૮.૯૨॥

તિલસ્ય તુષમાત્રં તુ ઉત્તરં કિઞ્ચિદાનયેત્ ।
ૐ સ્થિરો ભવ શિવો ભવ પ્રજાભ્યશ્ચ નમોનમઃ ॥ ૧,૪૮.૯૩॥

દેવસ્ય ત્વા સવિતુર્વઃ ષડ્ભ્યો વૈ વિન્યસેદ્ગુરુઃ ।
તત્ત્વવર્ણકલામાત્રં પ્રજાનિ ભુવનાત્મજે ॥ ૧,૪૮.૯૪॥

ષડ્ભ્યો વિન્યસ્ય સિદ્ધાર્થં ધ્રુવાર્થૈરભિમન્ત્રયેત્ ।
સમ્પાતકલશેનૈવ સ્નાપયેત્સુપ્રતિષ્ઠિતમ્ ॥ ૧,૪૮.૯૫॥

દીપધૂપસુગન્ધૈશ્ચ નૈવેદ્યૈશ્ચ પ્રપૂજયેત્ ।

અર્ઘ્યં દત્ત્વા નમસ્કૃત્ય તતો દેવં ક્ષમાપયેત્ ॥ ૧,૪૮.૯૬॥

પાત્રં વસ્ત્રયુગં છત્રં તથા દિવ્યાઙ્ગુલીયકમ્ ।
ઋત્ત્વિગ્ભ્યશ્ચ પ્રદાતવ્યા દક્ષિણા ચૈવ શક્તિતઃ ॥ ૧,૪૮.૯૭॥

ચતુર્થીં જુહુયાત્પશ્ચાદ્યજમાનઃ સમાહિતઃ ।
આહુતીનાં શતં હુત્વા તતઃ પૂર્ણાં પ્રદાપયેત્ ॥ ૧,૪૮.૯૮॥

નિષ્ક્રમ્ય બહિરાચાર્યો દિક્પાલાનાં બલિં હરેત્ ।
આચાર્યઃ પુષ્પહસ્તસ્તુ ક્ષમસ્વેતિ વિસર્જયેત્ ॥ ૧,૪૮.૯૯॥

યાગાન્તે કપિલાં દદ્યાદાચાર્યાય ચ ચામરમ્ ।
મુકુટં કુણ્ડલં છત્રં કેયૂરં કટિસૂત્રકમ્ ॥ ૧,૪૮.૧૦૦॥

વ્યજનં ગ્રામવસ્ત્રાદીન્સોપસ્કારં સુમણ્ડપમ્ ।
ભોજનં ચ મહાત્કુર્યાત્કૃતકૃત્યશ્ચ જાયતે ।
યજમાનો વિમુક્તઃ સ્યાત્સ્થાપકસ્ય પ્રસાદતઃ ॥ ૧,૪૮.૧૦૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દેવપ્રતિષ્ઠાદિનિરૂપણં નામાષ્ટચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૯
ઇતિ પ્રતિષ્ઠાપ્રકરણં સમાપ્તમ્ ।
બ્રહ્મોવાચ ।
સર્ગાદિકૃદ્ધરિશ્ચૈવ પૂજ્યઃ સ્વાયમ્ભુવાદિભિઃ ।
વિપ્રાદ્યૈઃ સ્વેન ધર્મેણ તદ્ધર્મં વ્યાસ ! વૈ શ◌ૃણુ ॥ ૧,૪૯.૧॥

યજનં યાજનં દાનં બ્રાહ્મણસ્ય પ્રતિગ્રહઃ ।
અધ્યાપનં ચાધ્યયનં ષટ્કર્માણિદ્વિજોત્તમે ॥ ૧,૪૯.૨॥

દાનમધ્યયનં યજ્ઞો ધર્મઃ ક્ષત્રિયવૈશ્યયોઃ ।
દણ્ડસ્તસ્ય કૃષિર્વૈશ્યસ્ય શસ્યતે ॥ ૧,૪૯.૩॥

શુશ્રૂષૈવ દ્વિજાતીનાં શૂદ્રાણાં ધર્મસાધનમ્ ।
કારુકર્મ તથાઽજીવો પાકયજ્ઞોઽપિ ધર્મતઃ ॥ ૧,૪૯.૪॥

ભિક્ષાચર્યાથ શુશ્રૂષા ગુરોઃ સ્વાધ્યાય એવ ચ ।
સન્ધ્યાકર્માગ્નિકાર્યઞ્ચ ધર્મોઽયં બ્રહ્મચારિણઃ ॥ ૧,૪૯.૫॥

સર્વેષામાશ્રમાણાં ચ દ્વૈવિધ્યં તુ ચતુર્વિધમ્ ।
બ્રહ્મચાર્યુપકુર્વાણો નૈષ્ઠિકો બ્રહ્મતત્પરઃ ॥ ૧,૪૯.૬॥

યોઽધીત્ય વિધિવદ્વેદાન્ગૃહસ્થાશ્રમમાવ્રજેત્ ।
ઉપકુર્વાણકો જ્ઞેયો નૈષ્ઠિકો મરણાન્તિકઃ ॥ ૧,૪૯.૭॥

અગ્નયોઽતિથિશુશ્રૂષા યજ્ઞો દાનં સુરાર્ચનમ્ ।
ગૃહસ્થસ્ય સમાસેન ધર્મોઽયં દ્વિજસત્તમ ! ॥ ૧,૪૯.૮॥

ઉદાસીનઃ સાધકશ્ચ ગૃહસ્થો દ્વિવિધો ભવેત્ ।
કુટુમ્બભરણે યુક્તઃ સાધકોઽસૌ ગૃહી ભવેત્ ॥ ૧,૪૯.૯॥

ઋણાનિ ત્રીણ્યપાકૃત્ય ત્યક્ત્વા ભાર્યાધનાદિકમ્ ।
એકાકી યસ્તુ વિચરેદુદાસીનઃ સ મૌક્ષિકઃ ॥ ૧,૪૯.૧૦॥

ભૂમૌ મૂલફલાશિત્વં સ્વાધ્યાયસ્તપ એવ ચ ।
સંવિભાગો યથાન્યાયં ધર્મોઽયં વનવાસિનઃ ॥ ૧,૪૯.૧૧॥

તપસ્તપ્યતિ યોઽરણ્યે યજેદ્દેવાઞ્જુહોતિ ચ ।
સ્વાધ્યાયે ચૈવ નિરતો વનસ્થસ્તાપસોત્તમઃ ॥ ૧,૪૯.૧૨॥

તપસા કર્શિતોઽત્યર્થં યસ્તુ ધ્યાનપરો ભવેત્ ।
સન્યાસી સ હિ વિજ્ઞેયો વાનપ્રસ્થાશ્રમે સ્થિતઃ ॥ ૧,૪૯.૧૩॥

યોગાભ્યાસરતો નિત્યમારુરુક્ષુર્જિતેન્દ્રિયઃ ।
જ્ઞાનાય વર્તતે ભુક્ષુઃ પ્રોચ્યતે પારમેષ્ઠિકઃ ॥ ૧,૪૯.૧૪॥

યસ્ત્વાત્મરતિરેવ સ્યાન્નિત્યતૃપ્તો મહામુનિઃ ।
સમ્યક્ચ દમસમ્પન્નઃ સ યોગી ભિક્ષુરુચ્યતે ॥ ૧,૪૯.૧૫॥

ભૈક્ષ્યં શ્રુતં ચ મૌનિત્વં તપો ધ્યાનં વિશેષતઃ ।
સમ્યક્ચ જ્ઞાનવૈરાગ્યં ધર્મોઽયં ભિક્ષુકે મતઃ ॥ ૧,૪૯.૧૬॥

જ્ઞાનસન્યાસિનઃ કેચિદ્વેદસન્યાસિનોઽપરે ।
કર્મસન્યાસિનઃ કેચિત્ત્રિવિધઃ પારમેષ્ઠિકઃ ॥ ૧,૪૯.૧૭॥

યોગી ચ ત્રિવિધો જ્ઞેયો ભૌતિકઃ ક્ષત્ર એવચ ।
તૃતીયોઽન્ત્યાશ્રમી પ્રોક્તો યોગમૂર્તિસમાસ્થિતઃ ॥ ૧,૪૯.૧૮॥

પ્રથમા ભાવના પૂર્વે મોક્ષે ત્વક્ષ(દુષ્ક) રભાવના ।
તૃતીયે ચાન્તિમા પ્રોક્તા ભાવના પારમેશ્વરી ॥ ૧,૪૯.૧૯॥

ધર્માત્સંજાયતે મોક્ષો હ્યર્થાત્કામોઽભિજાયતે ।
પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ દ્વિવિધં કર્મ વૈદિકમ્ ॥ ૧,૪૯.૨૦॥

જ્ઞાનં પૂર્વં નિવૃત્તં સ્યાત્પ્રવૃત્તં ચાગ્નિદેવકૃત્ ।
ક્ષમા દમો દયા દાનમલોભા (ભો) ભ્યાસ એવ ચ ॥ ૧,૪૯.૨૧॥

આર્જવં ચાન્સૂયા ચ તીર્થાનુસરણં તથા ।
સત્યં સંતોષ આસ્તિક્યં તથા ચેન્દ્રિયનિગ્રહઃ ॥ ૧,૪૯.૨૨॥

દેવતાભ્યર્ચનં પૂજા બ્રાહ્મણાનાં વિશેષતઃ ।
અહિંસા પ્રિયવાદિત્વમપૈશુન્યમરૂક્ષતા ॥ ૧,૪૯.૨૩॥

એતે આશ્રમિકા ધર્માશ્ચતુર્વર્ણ્યં બવીમ્યતઃ ।
પ્રાજાપત્યં બ્રાહ્મણાનાં સ્મૃતં સ્થાનં ક્રિયાવતામ્ ॥ ૧,૪૯.૨૪॥

સ્થાનમૈન્દ્રં ક્ષત્રિયાણાં સંગ્રામેષ્વપલાયિનામ્ ।
વૈશ્યાનાં મારુતં સ્થાનં સ્વધરમમનુવર્તતામ્ ॥ ૧,૪૯.૨૫॥

ગાન્ધર્વં શૂદ્રજાતીનાં પરિચારે ચ વર્તતામ્ ।
અષ્ટાશીતિસહસ્રાણામૃષીણામૂર્ધ્વરેતસામ્ ॥ ૧,૪૯.૨૬॥

સ્મૃતં તેષાં તુ યત્સ્થાનં તદેવ વન (ગુરુ) વાસિનામ્ ।
સપ્તર્ષીણાં તુ યત્સ્થાનં સ્થાનં તદ્વૈ વનૌકસામ્ ॥ ૧,૪૯.૨૭॥

યતીનાં યતચિત્તાનાં ન્યાસિનામૂર્ધ્વરેતસામ્ ।
આનન્દં બ્રહ્મ તત્સ્થાનં યસ્માન્નાવર્તતે મુનિઃ ॥ ૧,૪૯.૨૮॥

યોગિનામમૃતસ્થાનં વ્યોમાખ્યં પરમાક્ષરમ્ ।
આનન્દમૈશ્વરં યસ્માન્મુક્તો નાવર્તતે નરઃ ॥ ૧,૪૯.૨૯॥

મુક્તિરષ્ટાઙ્ગવિજ્ઞાનાત્સંક્ષેપાત્તદ્વદે શ‍ૃણુ ।
યમાઃ પઞ્ચ ત્વહિંસાદ્યા અહિંસા પ્રાણ્યહિંસનમ્ ॥ ૧,૪૯.૩૦॥

સત્યં ભૂતહિતં વાક્યમસ્તેયં સ્વાગ્રહં પરમ્ ।
અમૈથુનં બ્રહ્મચર્યં સર્વત્યાગોઽપરિગ્રહઃ ॥ ૧,૪૯.૩૧॥

નિયમાઃ પઞ્ચ સત્યાદ્યા બાહ્યમાભ્યન્તરં દ્વિધા ।
શૌચં તુષ્ટિશ્ચ સન્તોષસ્તપશ્ચોન્દ્રિયનિગ્રહઃ ॥ ૧,૪૯.૩૨॥

સ્વાધ્યાયઃ સ્યાન્મન્ત્રજાપઃ પ્રણિધાનં હરેર્યજિઃ ।

આસનં પદ્મકાદ્યુક્તં પ્રાણાયામો મરુજ્જયઃ ॥ ૧,૪૯.૩૩॥

મન્ત્રધ્યાન તો ગર્ભો વિપરીતો હ્યગર્ભકઃ ।
એવં દ્વિધા ત્રિધાપ્યુક્તં પુરણાત્પૂરકઃ સ ચ ॥ ૧,૪૯.૩૪॥

કુમ્ભકો નિશ્ચલત્વાચ્ચ રેચનાદ્રેચકસ્ત્રિધા ।
લઘુર્દ્વાદશમાત્રઃ સ્યાચ્ચતુર્વિંશતિકઃ પરઃ ॥ ૧,૪૯.૩૫॥

ષટ્ત્રિંશન્માત્રિકઃ શ્રેષ્ઠઃ પ્રત્યાહારશ્ચ રોધનમ્ ।
બ્રહ્માત્મચિન્તા ધ્યાનં સ્યાદ્ધારણા મનસો ધૃતિઃ ॥ ૧,૪૯.૩૬॥

અહં બ્રહ્મેત્યવસ્થાનં સમાધિર્બ્રહ્મણઃ સ્થિતિઃ ।
અહમાત્મા પરં બ્રહ્મ સત્યં જ્ઞાનમનન્તકમ્ ॥ ૧,૪૯.૩૭॥

બ્રહ્મ વિજ્ઞાનમાનન્દઃ સ તત્ત્વમસિ કેવલમ્ ।
અહં બ્રહ્માસ્મ્યહં બ્રહ્મ અશરીરમાનિન્દ્રિયમ્ ॥ ૧,૪૯.૩૮॥

અહમનોબુદ્ધિમહદહઙ્કારાદિવર્જિતમ્ ।
જાગ્રત્સ્વપ્નસુષુમ્યાદિયુક્તજ્યોતિસ્તદીયકમ્ ॥ ૧,૪૯.૩૯॥

નિત્યં શુદ્ધં બુદ્ધમુક્તં સત્યમાનન્દમદ્વયમ્ ।
યોઽસાવાદિત્યપુરુષઃ સોઽસાવહમખણ્ડિતમ્ ।
ઇતિ ધ્યાયન્વિમુચ્યેત્બ્રાહ્મણો ભવબન્ધનાત્ ॥ ૧,૪૯.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વર્ણાશ્રમધર્મનિરૂપણં નામૈકોનપઞ્ચાશત્તમોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫૦
બ્રહ્મોવાચ ।
અહન્યહનિ યઃ કુર્યાત્ક્રિયાં સ જ્ઞાનમાપ્નુયાત્ ।
બ્રાહ્મે મુહૂર્તે ચોત્થાય ધર્મમર્થં ચ ચિન્તયેત્ ॥ ૧,૫૦.૧॥

ચિન્તયેદ્ધૃદિ પદ્મસ્થમાનન્દમજરં હરિમ્ ।
ઉષઃ કાલે તુ સમ્પ્રાપ્તે કૃત્વા ચાવશ્યકં બુધઃ ॥ ૧,૫૦.૨॥

સ્નાયાન્નદીષુ શુદ્ધાસુ શૌચં કૃત્વા યથાવિધિ ।
પ્રતઃ સ્નાનેન પૂયન્તે યેઽપિ પાપકૃતો જનાઃ ॥ ૧,૫૦.૩॥

તસ્માત્સર્વપ્રયત્નેન પ્રાતઃ સ્નાનં સમાચરેત્ ।

પ્રાતઃ સ્નાનં પ્રશંસન્તિ દૃષ્ટાદૃષ્ટકરં હિ તત્ ॥ ૧,૫૦.૪॥

સુખાત્સુપ્તસ્ય સતતં લાલાદ્યાઃ સંસ્ત્રવન્તિ હિ ।
અતો નૈવાચરેત્કર્માણ્યકૃત્વા સ્નાનમાદિતઃ ॥ ૧,૫૦.૫॥

અલક્ષ્મીઃ કાલકર્ણો ચ દુઃસ્વપ્નં દુર્વિચિન્તિતમ્ ।
પ્રતઃ સ્નાનેન પાપાનિ ધૂયન્તે નાત્ર સંશયઃ ॥ ૧,૫૦.૬॥

ન ચ સ્નાનં વિના પુંસાં પ્રાશસ્ત્યં કર્મ સંસ્મૃતમ્ ।
હોમે જપ્યે વિશેષેણ તસ્માત્સ્નાનં સમાચરેત્ ॥ ૧,૫૦.૭॥

અશક્તાવશિરસ્કં તુ સ્નાનમસ્ય વિધીયતે ।
આર્દ્રેણ વાસસા વાપિ માર્જનં કાયિકં સ્મૃતમ્ ॥ ૧,૫૦.૮॥

બ્રાહ્મમાગ્નેયમુદ્દિષ્ટં વાયવ્યં દિવ્યમેવ ચ ।
વારુણં યૌગિકં તદ્વત્ષડ્ગં સ્નાનમાચરેત્ ॥ ૧,૫૦.૯॥

બ્રાહ્મં તુ માર્જનં મન્ત્રૈઃ કુશૈઃ સોદકબિન્દુભિઃ ।
આગ્નેયં ભસ્મનાઽપાદમસ્તકાદ્દેહધૂનનમ્ ॥ ૧,૫૦.૧૦॥

ગવાં હિ રજસા પ્રોક્તં વાયવ્યં સ્નાનમુત્તમમ્ ।
યત્તુ સાતપવર્ષેણ સ્નાનં તદ્દિવ્યમુચ્યતે ॥ ૧,૫૦.૧૧॥

વારુણં ચાવગાહં ચ માનર્સ ત્વાત્મવેદનમ્ ।
યૌગિકં સ્નાનમાખ્યાતં યોગેન હરિચિન્તનમ્ ॥ ૧,૫૦.૧૨॥

આત્મતીર્થમિતિ ખ્યાતં સેવિતં બ્રહ્મવાદિભિઃ ।
ક્ષીરવૃક્ષસમુદ્ભૂતં માલતીસમ્ભવં શુભમ્ ॥ ૧,૫૦.૧૩॥

અપામાર્ગં ચ વિલ્વં ચ કરવીરં ચ ધાવને ।
ઉદઙ્મુખઃ પ્રાઙ્મુખો વા ભક્ષયેદ્દન્તધાવનમ્ ॥ ૧,૫૦.૧૪॥

પ્રક્ષાલ્ય ભુક્ત્વા તજ્જહ્યાચ્છુચૌ દેશે સમાહિતઃ ।
સ્નાત્વા સન્તર્પયેદ્દેવાનૃષીન્પિતૃગણાંસ્તથા ॥ ૧,૫૦.૧૫॥

આચમ્ય વિધિવન્નિત્યં પુનરાચમ્ય વાગ્યતઃ ।
સમાર્જ્ય મન્ત્રૈ રાત્માનં કુશૈઃ સોદકબિન્દુભૈઃ ॥ ૧,૫૦.૧૬॥

આપોહિષ્ઠાવ્યાહૃતિભિઃ સાવિત્ર્યા વારુણૈઃ શુભૈઃ ।
ઓઙ્કારવ્યાહૃતિયુતાં ગાયત્રીં વેદમાતરમ્ ॥ ૧,૫૦.૧૭॥

જપ્ત્વા જલાઞ્જલિં દદ્યાદ્ભાસ્કરં પ્રતિ તન્મનાઃ ।
પ્રાક્કૂલેષુ તતઃ સ્થિત્વા દર્ભેષુ સુસમાહિતઃ ॥ ૧,૫૦.૧૮॥

પ્રાણાયામં તતઃ કૃત્વા ધ્યાયેત્સન્ધ્યામિતિ શ્રુતિઃ ।
યા સન્ધ્યા સા જગત્સૂતિર્માયાતીતા હિ નિષ્કલા ॥ ૧,૫૦.૧૯॥

ઐશ્વરી કેવલા શક્તિસ્તત્ત્વત્રયસમુદ્ભવા ।
ધ્યાત્વા રક્તાં સિતાં કૃષ્ણાં ગાયત્રીં વૈ જપેદ્બુધઃ ॥ ૧,૫૦.૨૦॥

પ્રાઙ્મુખઃ સતતં વિપ્રઃ સન્ધ્યોપાસનમાચરેત્ ।
સન્ધ્યાહીનોઽશુચિર્નિત્યમનર્હઃ સર્વકર્મસુ ॥ ૧,૫૦.૨૧॥

યદન્યત્કુરુતે કિઞ્ચિન્ન તસ્ય ફલભાગ્ભવેત્ ।
અનન્યચેતસઃ સન્તો બ્રાહ્મણા વેદપારગાઃ ॥ ૧,૫૦.૨૨॥

ઉપાસ્ય વિધિવત્સન્ધ્યાં પ્રાપ્તાઃ પૂર્વપરાં ગતિમ્ ।
યોઽન્યત્ર કુરુતે યત્નં ધર્મ કાર્યે દ્વિજોત્તમઃ ॥ ૧,૫૦.૨૩॥

વિહાય સન્ધ્યાપ્રણતિં સ યાતિ નરકાયુતમ્ ।
તસ્માત્સર્વપ્રયત્નેન સન્ધ્યોપાસનમાચરેત્ ॥ ૧,૫૦.૨૪॥

ઉપાસિતો ભવેત્તેન દેવો યોગતનુઃ પરઃ ।
સહસ્રપરમાં નિત્યાં શતમધ્યાં દશાવરામ્ ॥ ૧,૫૦.૨૫॥

ગાયત્રીં વૈ જપેદ્વિદ્વાન્પ્રાઙ્મુખઃ પ્રયતઃ શુચિઃ ।
અથોપતિષ્ઠેદાદિત્યમુદયસ્થં સમાહિતઃ ॥ ૧,૫૦.૨૬॥

મન્ત્રૈસ્તુ વિવિધૈઃ સૌરૈઃ ઋગ્યજુઃસામસંજ્ઞિતૈઃ ।
ઉપસ્થાય મહાયોગં દેવદેવં દિવાકરમ્ ॥ ૧,૫૦.૨૭॥

કુર્વીત પ્રણતિં ભૂમૌ મૂર્ધાનમભિમન્ત્રિતઃ ।
ૐ ખખોલ્કાય શાન્તાય કારણત્રયહેતવે ॥ ૧,૫૦.૨૮॥

નિવેદયામિ ચાત્માનં નમસ્તે જ્ઞાનરૂપિણે ।
ત્વમેવ બ્રહ્મ પરમમાપો જ્યોતી રસોઽમૃતમ્ ॥ ૧,૫૦.૨૯॥

ભૂર્ભુવઃ સ્વસ્ત્વમોઙ્કારઃ સર્વો રુદ્રઃ સનાતનઃ ।
એતદ્વૈ સૂર્યહૃદયં જપ્ત્વા સ્તવનમુત્તમમ્ ॥ ૧,૫૦.૩૦॥

પ્રાતઃ કાલે ચ મધ્યાહ્ને નમસ્કુર્યાદ્દિવાકરમ્ ।
અથાગમ્ય ગૃહં વિપ્રઃ (પશ્ચાત્) સમાચમ્ય યથાવિધિ ॥ ૧,૫૦.૩૧॥

પ્રજ્વાલ્ય વહ્નિં વિધિવજ્જુહુયાજ્જાતવેદસમ્ ।
ઋત્વિક્પુત્રોઽથ પત્ની વા શિષ્યો વાપિ સહોદરઃ ॥ ૧,૫૦.૩૨॥

પ્રાપ્યાનુજ્ઞાં વિશેષેણ જુહુયાદ્વા યથાવિધિ ।
વિના મ (ત) ન્ત્રેણ યત્કર્મ નામુત્રેહ ફલપ્રદમ્ ॥ ૧,૫૦.૩૩॥

દૈવતાનિ નમસ્કુર્યાદુપહારાન્નિવેદયેત્ ।
ગુરું ચૈવાપ્યુપાસીત હિતં ચાસ્ય સમાચરેત્ ॥ ૧,૫૦.૩૪॥

વેદાભ્યાસં તતઃ કુર્યાત્પ્રયત્નાચ્છક્તિતો દ્વિજઃ ।
જપેદ્ધાધ્યાપયેચ્છિષ્યાન્ધારયેદ્વૈ વિચારયેત્ ॥ ૧,૫૦.૩૫॥

અવેક્ષેત ચ શાસ્ત્રાણિ ધર્માદીનિ દ્વિજોત્તમઃ ।
વૈદિકાંશ્ચૈવ નિગમાન્વેદાઙ્ગાનિ ચ સર્વશઃ ॥ ૧,૫૦.૩૬॥

ઉપયાદીશ્વરં ચૈવ યોગક્ષેમપ્રાસિદ્ધયે ।
સાધયેદ્વિવિધાનર્થાન્કુટુમ્બાર્થં તતો દ્વિજઃ ॥ ૧,૫૦.૩૭॥

તતો મધ્યાહ્નસમયે સ્નાનાર્થં મૃદમાહરેત્ ।
પુષ્પાક્ષતાંસ્તિલકુશાન્ગોમયં શુદ્ધમેવ ચ ॥ ૧,૫૦.૩૮॥

નદીષુ દેવખાતેષુ તડાગેષુ સરઃ સુ ચ ।
સ્નાનં સમાચરેન્નૈવ પરકીયે કદાચન ॥ ૧,૫૦.૩૯॥

પઞ્ચ પિણ્ડાનનુદ્ધૃત્ય સ્નાનં દુષ્યન્તિ નિત્યશઃ ।
મૃદૈકયા શિરઃ ક્ષાલ્યં દ્વાભ્યાં નાભેસ્તથોપરિ ॥ ૧,૫૦.૪૦॥

અધશ્ચ તિસૃભિઃ ક્ષાલ્યં પાદૌ ષટ્ભિસ્તથૈવ ચ ।
મૃત્તિકા ચ સમુદ્દિષ્ટા વૃદ્ધામલકમાત્રિકા ॥ ૧,૫૦.૪૧॥

ગોમયસ્ય પ્રમાણં તુ તેનાઙ્ગં લેપયેત્તતઃ ।
પ્રક્ષાલ્યાચમ્ય વિધિવત્તતઃ સ્નાયાત્સમાહિતઃ ॥ ૧,૫૦.૪૨॥

લેપયિત્વા તુ તીરસ્થસ્તલ્લિઙ્ગૈરેવ મન્ત્રતઃ ।
અભિમન્ત્ર્ય જલં મન્ત્રૈરાલિઙ્ગૈર્વારુણૈઃ શુભૈઃ ॥ ૧,૫૦.૪૩॥

ત્નાનકાલે સ્મરેદ્વિષ્ણમાપો નારાયણો યતઃ ।
પ્રેક્ષ્ય ઓઙ્કારમાદિત્યં ત્રિર્નિમજ્જેજ્જલાશયે ॥ ૧,૫૦.૪૪॥

આચાન્તઃ પુનરાચામેન્મન્ત્રેણાનેન મન્ત્રવિત્ ।

અન્તશ્ચરસિ ભૂતેષુ ગુહાયાં વિશ્વતોમુખઃ ॥ ૧,૫૦.૪૫॥

ત્વં યજ્ઞસ્ત્વં વષટ્કાર આપો જ્યોતી રસોઽમૃતમ્ ।
દ્રુપદાં વા ત્રિરભ્યસ્યેવ્યાહૃતિપ્રણવાન્વિતામ્ ॥ ૧,૫૦.૪૬॥

સાવિત્રીં વા જપે દ્વિદ્વાંસ્તથા ચૈવાઘમર્ષણમ્ ।
તતઃ સમાર્જનં કુર્યાદાપોહિષ્ઠામયોભુવઃ ॥ ૧,૫૦.૪૭॥

ઇદમાપઃ પ્રવહતવ્યાહૃતિભિસ્તથૈવ ચ ।
તતોઽભિમન્ત્રિતં તોપમાપો હિષ્ઠાદિમન્ત્રકૈઃ ॥ ૧,૫૦.૪૮॥

અન્તર્જલમવાઙ્મગ્નો જપેત્ત્રિરઘમર્ષણમ્ ।
દ્રુપદાં વાથ સાવિત્રરિં તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૧,૫૦.૪૯॥

આવર્તયેદ્વા પ્રણવં દેવદેવં સ્મરેદ્ધરિમ્ ।
અપઃ પાણૌ સમાદાય જપ્ત્વા વૈ માર્જને કૃતે ॥ ૧,૫૦.૫૦॥

વિન્યસ્ય મૂર્ધ્નિ તત્તોયં મુચ્યતે સર્વપાતકૈઃ ।
સન્ધ્યામુપાસ્ય ચાચમ્ય સંસ્મરેન્નિત્યમીશ્વરમ્ ॥ ૧,૫૦.૫૧॥

અથોપતિષ્ઠેદાદિત્યમૂર્ધ્વપુષ્પાન્વિતાઞ્જલિમ્ ।
પ્રક્ષિપ્યાલોકયેદ્દેવમુદયન્તં ન શક્યતે ॥ ૧,૫૦.૫૨॥

ઉદુત્યં ચિત્રમિત્યેવં તચ્ચક્ષુરિતિ મન્ત્રતઃ ।
હંસઃ શુચિષદેતેન સાવિત્ર્યા ચ વિશેષતઃ ॥ ૧,૫૦.૫૩॥

અન્યૈઃ સૌરૈર્વૈદિકૈશ્ચ ગાયત્રીં ચ તતો જપેત્ ।
મન્ત્રાંશ્ચ વિવિધાન્પશ્ચાત્પ્રાક્કૂલે ચ કશાસને ॥ ૧,૫૦.૫૪॥

તિષ્ઠંશ્ચ વીક્ષ્યમાણોઽર્કં જપં કુર્યાત્સમાહિતઃ ।
સ્ફટિકાબ્જાક્ષરુદ્રાક્ષૈઃ પુત્રજીવસમુદ્ભવૈઃ ॥ ૧,૫૦.૫૫॥

કર્તવ્યા ત્વક્ષાલા સ્યાદન્તરા તત્ર સા સ્મૃતા ।
યદિ સ્યાત્ક્લિન્નવાસા વૈ વારિમધ્યગતશ્ચરેત્ ॥ ૧,૫૦.૫૬॥

અન્યથા ચ શુચૌ ભૂમ્યાં દર્ભેષુ ચ સમાહિતઃ ।
પ્રદક્ષિણં સમાવૃત્ય નમસ્કૃત્ય તતઃ ક્ષિતૌ ॥ ૧,૫૦.૫૭॥

આચમ્ય ચ યથાશાસ્ત્રં શક્ત્યા સ્વાધ્યાયમાચરેત્ ।
તતઃ સન્તર્પયેદ્દેવાનૃષીન્પિતૃગણાંસ્તથા ॥ ૧,૫૦.૫૮॥

આદાવોઙ્કારમુચ્ચાર્ય નમોઽન્તે તર્પયામિ ચ ।
દેવાન્બ્રહ્મઋષીંશ્ચૈવ તર્પયેદક્ષતોદકૈઃ ॥ ૧,૫૦.૫૯॥

પિતૃન્દેવાન્મુનીન્ભક્ત્યા સ્વસૂત્રોક્તવિધાનતઃ ॥ ૧,૫૦.૬૦॥

દેવર્ષીંસ્તર્પયેદ્ધીમાનુદકાઞ્જલિભિઃ પિતૃત્ ।
યજ્ઞોપવીતી દેવાનાં નિવીતી ઋષિતર્પણે ॥ ૧,૫૦.૬૧॥

પ્રાચીનાવીતી પિત્ર્યે તુ તેન તીર્થેન ભારત ।
નિષ્પીડ્ય સ્નાનવસ્ત્રં વૈ સમાચમ્ય ચ વાગ્યતઃ ॥ ૧,૫૦.૬૨॥

સ્વૈર્મન્ત્રૈરર્ચયેદ્દેવાન્પુષ્પૈઃ પત્રૈસ્તથામ્બુભિઃ ।
બ્રહ્માણં શઙ્કરં સૂર્યં તથૈવ મધુસૂદનમ્ ॥ ૧,૫૦.૬૩॥

અન્યાંશ્ચાભિમતાન્દેવાન્ભક્ત્યા ચાક્રોધનો હર ! ।
પ્રદદ્યાદ્વાથ પુષ્પાદિ સૂક્તેન પુરુષેણ તુ ॥ ૧,૫૦.૬૪॥

આપો વા દેવતાઃ સર્વાસ્તેન સમ્યક્સમર્ચિતાઃ ।
ધ્યાત્વા પ્રણવપૂર્વં વૈ દેવં વારિસમાહિતઃ ॥ ૧,૫૦.૬૫॥

નમસ્કારેણ પુષાપાણિ વિન્યસેદ્વૈ પૃથક્પૃથક્ ।
નર્તે હ્યારાધનાત્પુણ્યં વિદ્યતે કર્મ વૈદિકમ્ ॥ ૧,૫૦.૬૬॥

તસ્માત્તત્રાદિમધ્યાન્તે ચેતસા ધારયેદ્ધરિમ્ ।
તદ્વિષ્ણોરિતિ મન્ત્રેણ સૂક્તેન પુરુષેણ તુ ॥ ૧,૫૦.૬૭॥

નિવેદયેચ્ચ આત્માનં વિષ્ણવેઽમલતેજસે ।
તદાધ્યાત્મમનાઃ શાન્તસ્તદ્વિષ્ણોરિતિ મન્ત્રતઃ ॥ ૧,૫૦.૬૮॥

અપ્રેતે સશિરા વેતિયજેત્વા પુષ્પકે હરિમ્ ।
દેવયજ્ઞં પિતૃયજ્ઞં તથૈવ ચ ।
માનુષં બ્રહ્મયજ્ઞં ચ પઞ્ચ યજ્ઞાન્સમાચરેત્ ॥ ૧,૫૦.૬૯॥

યદિ સ્યાત્તર્પણાદર્વાગ્બ્રયજ્ઞં કુતો ભવેત્ ।
કૃત્વા મનુષ્યયજ્ઞં વૈ તતઃ સ્વાધ્યાયમાચરેત્ ॥ ૧,૫૦.૭૦॥

વૈશ્વદેવસ્તુ કર્તવ્યો દેવયજ્ઞઃ સ તુ સ્મૃતઃ ।
ભૂતયજ્ઞઃઋ સ વૈ જ્ઞેયો ભૂતેભ્યો યસ્ત્વયં બલિઃ ॥ ૧,૫૦.૭૧॥

શ્વભ્યશ્ચ શ્વપચેભ્યશ્ચ પતિતાદિભ્ય એવ ચ ।
દદ્યાદ્ભૂમૌ બહિસ્ત્વન્નં પક્ષિભ્યશ્ચ દ્વિજોત્તમઃ ॥ ૧,૫૦.૭૨॥

એકં તુ ભોજયેદ્વિપ્રં પિતૄનુદ્દિશ્ય સત્તમાઃ ।
નિત્યશ્રાદ્ધં તદુદ્દિશ્ય પિતૃયજ્ઞો ગતિપ્રદઃ ॥ ૧,૫૦.૭૩॥

ઉદ્ધૃત્ય વા યથાશક્તિ કિઞ્ચિદન્નં સમાહિતઃ ।
વેદતત્ત્વાર્થવિદુષે દ્વિજાયૈવોપપાદયેત્ ॥ ૧,૫૦.૭૪॥

પૂજયેદતિથિં નિત્યં નમસ્યેદર્ચયોદ્વિજમ્ ।
મનોવાક્કર્મભિઃ શાન્તં સ્વાગતૈઃ સ્વગૃહં તતઃ ॥ ૧,૫૦.૭૫॥

ભિક્ષામાહુર્ગ્રાસમાત્રમન્નં તત્સ્યાચ્ચતુર્ગુણમ્ ।
પુષ્કલં હન્તકારં તુ તચ્ચતુર્ગુણમુચ્યતે ॥ ૧,૫૦.૭૬॥

ગોદોહમાત્રકાલં વૈ પ્રતીક્ષ્યો હ્યતિથિઃ સ્વયમ્ ।
અભ્યાગતાન્યથાશક્તિ પૂજયેદતિથિં તથા ॥ ૧,૫૦.૭૭॥

ભિક્ષાં વૈ ભિક્ષવે દદ્યાદ્વિધિવદ્બ્રહ્મચારિણે ।
દદ્યાદન્નં યથાશક્તિ અર્થિભ્યો લોભવર્જિતઃ ॥ ૧,૫૦.૭૮॥

ભુઞ્જતિ બન્ધુભિઃ સાર્ધં વાગ્યતોઽન્નમકુત્સયન્ ।
અકૃત્વા તુ દ્વિજઃ પઞ્ચ મહાયજ્ઞાન્દ્વિજોત્તમઃ ॥ ૧,૫૦.૭૯॥

ભુઞ્જતે ચેત્સ મૂઢાત્મા તિર્યગ્યોનિં ચ ગચ્છતિ ।
વેદાભ્યાસોઽન્વહં શક્ત્યા મહાયજ્ઞક્રિયાક્ષમાઃ ॥ ૧,૫૦.૮૦॥

નાશયન્ત્યાશુ પાપાનિ દેવાનામર્ચનં તથા ।
યો મોહાદથ વાલસ્યાદકૃત્વા દેવતાર્ચનમ્ ॥ ૧,૫૦.૮૧॥

ભુઙ્ક્તે સ યાતિ નરકાન્ત્સૂકરેષ્વેવ જાયતે ।
અશૌચં સમ્પ્રવક્ષ્યામિ અશુચિઃ પાતકી સદા ॥ ૧,૫૦.૮૨॥

અશૌચં ચૈવ સંસર્ગાચ્છુદ્ધિઃ સંસર્ગવર્જનાત્ ।
દશાહં પ્રાહુરાશૌચં સર્વેવિપ્રા વિપશ્ચિતઃ ॥ ૧,૫૦.૮૩॥

મૃતેષુ વાથ જાતેષુ બ્રાહ્મણાનાં દ્વિજોત્તમ ।
આદન્તજનનાત્સદ્ય આચૂડાદેકરાત્રકમ્ ॥ ૧,૫૦.૮૪॥

ત્રિરાત્રમૌપનયનાદ્દશરાત્રમતઃ પરમ્ ।
ક્ષત્રિયો દ્વાદશહેન દશભિઃ પઞ્ચભિર્વિશઃ ॥ ૧,૫૦.૮૫॥

શુધ્યેન્માસેન વૈ શૂદ્રો યતીનાં નાસ્તિ પાતકમ્ ।

રાત્રિભિર્માસતુલ્યાભિર્ગર્ભસ્રાવેષુ શૌચકમ્ ॥ ૧,૫૦.૮૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નિત્યકર્માશૌચયોર્નિરૂપણં નામ પઞ્ચાશત્તમોઽધ્યાયઃ

મેદ્સ્કિપ્

---

શ્રીગરુડમહાપુરાણમ્- ૫૧

બ્રહ્મોવાચ ।

અથાતઃ સમ્પ્રવક્ષ્યામિ દાનધર્મમનુત્તમમ્ ।
અર્થાનામુચિતે પાત્રે શ્રદ્ધયા પ્રતિપાદનમ્ ॥ ૧,૫૧.૧॥

દાનં તુ કથિતં તજ્જ્ઞૈર્ભુક્તિમુક્તિફલપ્રદમ્ ।
ન્યાયેનોપાર્જયેદ્વિત્તં દાનભોગફલં ચ તત્ ॥ ૧,૫૧.૨॥

અધ્યાપનં યાજનં ચ વૃત્તમાહુઃ પ્રતિગ્રહમ્ ।
કુસીદં કૃષિવાણિજ્યં ક્ષત્રવૃત્તોઽથ વર્જયેત્ ॥ ૧,૫૧.૩॥

યદ્દીયતે તુ પાત્રેભ્યસ્તદ્દાનં પરિકીર્તિતમ્ ।
નિત્યં નૈમિત્તિકં કામ્યં વિમલં દાનમીરિતમ્ ॥ ૧,૫૧.૪॥

અહન્યહનિ યત્કિઞ્ચિદ્દીયતેઽનુપકારિણે ।
અનુદ્દિશ્ય ફલં તસ્માદ્બ્રાહ્મણાય તુ નિત્યશઃ ॥ ૧,૫૧.૫॥

યત્તુ પાપોપશાન્ત્યૈ ચ દીયતે વિદુષાં કરે ।
નૈમિત્તિકં તદુદ્દિષ્ટન્દાનં સદ્ભિરનુષ્ઠિતમ્ ॥ ૧,૫૧.૬॥

અપત્યવિજયૈશ્વર્યસ્વર્ગાર્થં યત્પ્રદીયતે ।
દાનં તત્કામ્યમાખ્યાતમૃષિભિર્ધર્માચિન્તકૈઃ ॥ ૧,૫૧.૭॥

ઈશ્વરપ્રીણનાર્થાય બ્રહ્માવિત્સુપ્રદીયતે ।
ચેતસા સત્ત્વયુક્તેન દાનં તદ્વિમલં શિવમ્ ॥ ૧,૫૧.૮॥

ઇક્ષુભિઃ સન્તતાં ભુમિં યવગોધૂમશાલિનીમ્ ।
દદાતિ વેદવિદુષે સ ન ભૂયોઽભિજાયતે ॥ ૧,૫૧.૯॥

ભૂમિદાનાત્પરં દાનં ન ભૂતં ન ભવિષ્યતિ ।
વિદ્યાં દત્ત્વા બ્રાહ્મણાય બ્રહ્મલોકે મહીયતે ॥ ૧,૫૧.૧૦॥

દદ્યાદહરહસ્તાસ્તુ શ્રદ્ધયા બ્રહ્મચારિણે ।
સર્વપાપવિનિર્મુક્તો બ્રહ્મસ્થાનમવાપ્નુયાત્ ॥ ૧,૫૧.૧૧॥

વૈશાખ્યાં પૌર્ણમાસ્યાં તુ બ્રાહ્મણાન્સપ્ત પઞ્ચ ચ ।
ઉપોષ્યાભ્યર્ચયેદ્વિદ્વાન્મધુના તિલસર્પિષા ॥ ૧,૫૧.૧૨॥

ગન્ધાદિભિઃ સમભ્યર્ચ્ય વાચયેદ્વા સ્વયં વદેત્ ।
પ્રીયતાં ધર્મરાજેતિ યથા મનસિ વર્તતે ॥ ૧,૫૧.૧૩॥

યાવજ્જીવં કૃતં પાપં તત્ક્ષણાદેવ નશ્યતિ ।
કૃષ્ણાજિને તિલાન્કૃત્વા હિરણ્યમધુસર્પિષા ॥ ૧,૫૧.૧૪॥

દદાતિ યસ્તુ વિપ્રાય સર્વં તરતિ દુષ્કૃતમ્ ।
ઘૃતાન્નમુદકં ચૈવ વૈશાખ્યાં ચ વિશેષતઃ ॥ ૧,૫૧.૧૫॥

નિર્દિશ્ય ધર્મરાજાય વિપ્રેભ્યો મુચ્યતે ભયાત્ ।
દ્વાદશ્યામર્ચયેદ્વિષ્ણુમુપોષ્યાઘપ્રણાશનમ્ ॥ ૧,૫૧.૧૬॥

સર્વપાપવિનિર્મુક્તો નરો ભવતિ નિશ્ચિતમ્ ।
યો હિ યાં દેવતામિચ્છેત્સમારાધયિતું નરઃ ॥ ૧,૫૧.૧૭॥

બ્રાહ્મણાન્પૂજયેદ્યત્નાદ્ભોજયેદ્યોષિતઃ સુરાન્ ।
સન્તાનકામઃ સતતં પૂજયેદ્વૈ પુરન્દરમ્ ॥ ૧,૫૧.૧૮॥

બ્રહ્મવર્ચસકામસ્તુ બ્રાહ્મણાન્બ્રહ્મનિશ્ચયાત્ ।
આરોગ્યકામોઽથ રવિં ધનકામો હુતાશનમ્ ॥ ૧,૫૧.૧૯॥

કર્મણાં સિદ્ધિકામસ્તુ પૂજયેદ્વૈ વિનાયકમ્ ।
ભોગકામો હિ શશિનં બલકામઃ સમીરણમ્ ॥ ૧,૫૧.૨૦॥

મુમુક્ષુઃ સર્વસંસારાત્પ્રયત્નેનાર્ચયેદ્ધરિમ્ ।
અકામઃ સર્વકામો વા પૂજયેત્તુ ગદાધરમ્ ॥ ૧,૫૧.૨૧॥

વારિદસ્તૃપ્તિમાપ્નોતિ સુખમક્ષય્યમન્નદઃ ।
તિલપ્રદઃ પ્રજામિષ્ટાં દીપદશ્ચક્ષુરુત્તમમ્ ॥ ૧,૫૧.૨૨॥

ભૂમિદઃ સર્વમાપ્નોતિ દીર્ઘમાયુર્હિરણ્યદઃ ।
ગૃહદોઽગ્ર્યાણિ વેશ્માનિ રૂપ્યદો રૂપમુત્તમમ્ ॥ ૧,૫૧.૨૩॥

વાસોદશ્ચાન્દ્રસાલોક્યમશ્વિસાલોક્યમશ્વદઃ ।
અનડુદ્ઃ શ્રિયં પુષ્ટાં ગોદો બ્રધ્નસ્ય વિષ્ટપમ્ ॥ ૧,૫૧.૨૪॥

યાનશય્યાપ્રદો ભાર્યામૈશ્વર્યમભયપ્રદઃ ।

ધાન્યદઃ શાવતં સૌખ્યં બ્રહ્મદો બ્રહ્મ શાશ્વતમ્ ॥ ૧,૫૧.૨૫॥

વેદવિત્સુ દદજ્જ્ઞાનં સ્વર્ગલોકે મહીયતે ।
ગવાં ઘાસપ્રદાનેન સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૧,૫૧.૨૬॥

ઇન્ધનાનાં પ્રદાનેન દીપ્તાગ્નિર્જાયતે નરઃ ।
ઔષધં સ્નેહમાહારં રોગિરોગપ્રશાન્તયે ॥ ૧,૫૧.૨૭॥

દદાનો રોગરહિતઃ સુખી દીર્ઘાયુરેવ ચ ।
અસિપત્રવનં માર્ગં ક્ષુરધારાસમન્વિતમ્ ॥ ૧,૫૧.૨૮॥

તીક્ષ્ણા તપં ચ તરતિચ્છત્રોપાનત્પ્રદો નરઃ ।
યદ્યદિષ્ટતમં લોકે યચ્ચાસ્ય દયિતં ગૃહે ॥ ૧,૫૧.૨૯॥

તત્તદ્ગુણવતે દેયં તદેવાક્ષયમિચ્છતા ।
અયેન વિષુવે ચૈવ ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૧,૫૧.૩૦॥

સંક્રાન્ત્યાદિષુ કાલેષુ દત્તં ભવતિ ચાક્ષયમ્ ।
પ્રયાગાદિષુ તીર્થેષુ ગયાયાં ચ વિશેષતઃ ॥ ૧,૫૧.૩૧॥

દાનધર્માત્પરો ધર્મો ભૂતાનાં નહે વિદ્યતે ।
સ્વર્ગાયુર્ભૂતિકામેન દાનં પાપોપશાન્તયે ॥ ૧,૫૧.૩૨॥

દીયમાનં તુ યો મોહાદ્ગોવિપ્રાગ્નિસુરેષુ ચ ।
નિવારયતિ પાપાત્મા તિર્યગ્યોનિં વ્રજેન્નરઃ ॥ ૧,૫૧.૩૩॥

યસ્તુ દુર્ભિક્ષવેલાયામન્નાદ્યં ન પ્રયચ્છતિ ।
મ્રિયમાણેષુ વિપ્રેષુ બ્રહ્મહા સ તુ ગર્હિતઃ ॥ ૧,૫૧.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દાનધર્મનિરૂપણં નામૈકપઞ્ચાશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫૨
બ્રહ્મોવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ પ્રાયશ્ચિત્તવિધિં દ્વિજાઃ ।
બ્રહ્મહા ચ સુરાપશ્ચ સ્તેયી ચ ગુરુતલ્પગઃ ॥ ૧,૫૨.૧॥

પઞ્ચ પાતકિનસ્ત્વેતે તત્સંયોગી ચ પઞ્ચમઃ ।
ઉપપાપાનિ ગોહત્યાપ્રભૃતીનિ સુરા જગુઃ ॥ ૧,૫૨.૨॥

બ્રહ્મહા દ્વાદશાબ્દાનિ કુટીં કૃત્વા વને વસેત્ ।
કુર્યાદનશનં વાથ ભૃગોઃ પતનમેવ ચ ॥ ૧,૫૨.૩॥

જ્વલન્તં વા વિશેદગ્નિં જલં વા પ્રવિશેત્સ્વયમ્ ।
બ્રાહ્મણાર્થે ગવાર્થે વા સમ્યક્પ્રાણાન્પરિત્યજેત્ ॥ ૧,૫૨.૪॥

દત્ત્વા ચાન્નં ચ વિદુષે બ્રહ્મહત્યાં વ્યપોહતિ ।
અશ્વમેધાવભૃથકે સ્નાત્વા વા મુચ્યતે દ્વિજઃ ॥ ૧,૫૨.૫॥

સર્વસ્વં વા વેદવિદે બ્રાહ્મણાય પ્રદાપયેત્ ।
સરસ્વત્યાસ્તરઙ્ગિણ્યાઃ સઙ્ગમે લોકવિશ્રુતે ॥ ૧,૫૨.૬॥

શુદ્ધ્યે ત્રિષવણસ્નાતસ્ત્રિરાત્રોપોષિતો દ્વિજઃ ।
સેતુબન્ધે નરઃ સ્નાત્વા મુચ્યતે બ્રહ્મહત્યયા ॥ ૧,૫૨.૭॥

કપાલમોચને સ્નાત્વા વારાણસ્યાં તથૈવ ચ ।
સુરાપસ્તુ સુરાં પીત્વા અગ્નિવર્ણાં દ્વિજોત્તમઃ ॥ ૧,૫૨.૮॥

પયો ઘૃતં વા ગોમૂત્રં તસ્માત્પાપાત્પ્રમુચ્યતે ।
સુવર્ણસ્તેયી મુક્તઃ સ્યાન્મુસલેન હતો નૃપૈઃ ॥ ૧,૫૨.૯॥

ચીરવાસા દ્વિજોઽરણ્યે ચરેદ્બ્રહ્મહણવ્રતમ્ ।
ગુરુભાર્યાં સમારુહ્ય બ્રાહ્મણઃ કામમોહિતઃ ॥ ૧,૫૨.૧૦॥

અવગૂહેત્સ્ત્રિયં તપ્તાં દીપ્તાં કાર્ષ્ણાયસીં કૃતામ્ ।
ગુર્વઙ્ગનાગામિનશ્ચ ચરેયુર્બ્રહ્મહવ્રતમ્ ॥ ૧,૫૨.૧૧॥

ચાન્દ્રાયણાનિ વા કુર્યાત્પઞ્ચ ચત્વારિ વા પુનઃ ।
પતિતેન ચ સંસર્ગં કુરુતે યસ્તુ વૈ દ્વિજઃ ॥ ૧,૫૨.૧૨॥

સ તત્પાપાપનોદાર્થં તસ્યૈવ વ્રતમાચરેત્ ।
તપ્તકૃચ્છ્રં ચરેદ્વાથ સંવત્સરમતન્દ્રિતઃ ॥ ૧,૫૨.૧૩॥

સર્વસ્વદાનં વિધિવત્સર્વપાપવિશોધનમ્ ।
ચાન્દ્રાયણં ચ વિધિના કૃતં ચૈવાતિકૃચ્છ્રકમ્ ॥ ૧,૫૨.૧૪॥

પુણ્યક્ષેત્રે ગયાદૌ ચ ગમનં પાપનાશનમ્ ।
અમાવસ્યાં તિથિં પ્રાપ્ય યઃ સમારાધયેદ્ભવમ્ ॥ ૧,૫૨.૧૫॥

બ્રાહ્મણાન્ભોજયિત્વા તુ સર્વપાપૈઃ પ્રમુચ્યતે ।
ઉપોષિતશ્ચતુર્દશ્યાં કૃષ્ણપક્ષે સમાહિતઃ ॥ ૧,૫૨.૧૬॥

યમાય ધર્મરાજાય મૃત્યવે ચાન્તકાય ચ ।
વૈવસ્વતાય કાલાય સર્વભૂતક્ષયાય ચ ॥ ૧,૫૨.૧૭॥

પ્રત્યેકં તિલસંયુક્તાન્દદ્યાત્સપ્ત જલાઞ્જલીન્ ।
સ્નાત્વા નદ્યાં તુ પૂર્વાહ્ણે મુચ્યતે સર્વપાતકૈઃ ॥ ૧,૫૨.૧૮॥

બ્રહ્મચર્યમધઃ શય્યામુપવાસં દ્વિજાર્ચનમ્ ।
વ્રતેષ્વેતેષુ કુર્વીત શાન્તઃ સંયતમાનસઃ ॥ ૧,૫૨.૧૯॥

પષ્ઠ્યામુપોષિતો દેવં શુક્લપક્ષે સમાહિતઃ ।
સપ્તમ્યામર્ચયેદ્ભાનું મુચ્યતે સર્વપાતકૈઃ ॥ ૧,૫૨.૨૦॥

એકાદશ્યાં નિરાહારઃ સમભ્યર્ચ્ય જનાર્દનમ્ ।
દ્વાદશ્યાં શુક્લપક્ષસ્ય મહાપાપૈઃ પ્રમુચ્યતે ॥ ૧,૫૨.૨૧॥

તપો જપસ્તીર્થસેવા દેવબ્રાહ્મણપૂજનમ્ ।
ગ્રહણાદિષુ કાલેષુ મહાપાતકનાશનમ્ ॥ ૧,૫૨.૨૨॥

યઃ સર્વપાપયુક્તોઽપિ પુણ્યતીર્થેષુ માનવઃ ।
નિયમેન ત્યજેત્પ્રાણાન્મુચ્યતે સર્વપાતકૈઃ ॥ ૧,૫૨.૨૩॥

બ્રહ્મઘ્નં વા કૃતઘ્નં વા મહાપાતકદૂષિતમ્ ।
ભર્તારમુદ્ધરેન્નારી પ્રવિષ્ટા સહ પાવકમ્ ॥ ૧,૫૨.૨૪॥

પતિવ્રતા તુ યા નારી ભર્તુઃ શુશ્રૂષણોત્સુકા ।
ન તસ્યા વિદ્યતે પાપમિહ લોકે પરત્ર ચ ॥ ૧,૫૨.૨૫॥

તથા રામસ્ય સુભગા સીતા ત્રૈલોક્યવિશ્રુતા ।
પત્ની દાશરથેર્દેવી વિજિગ્યે રાક્ષસેશ્વરમ્ ॥ ૧,૫૨.૨૬॥

ફલ્ગુતીર્થાદિષુ સ્નાતઃ સર્વાચારફલં લભેત્ ।
ઇત્યાહ ભગવાન્વિષ્ણુઃ પુરા મમ યતવ્રતાઃ ॥ ૧,૫૨.૨૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પ્રાયશ્ચિત્તનિરૂપણં નામ દ્વિપઞ્ચાશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫૩
સૂત ઉવાચ ।

એવં બ્રહ્માબ્રવીચ્છ્રુત્વા હરેરષ્ટનિધીંસ્તથા ।
તત્ર પદ્મમહાપદ્મૌ તથા મકરકચ્છપૌ ॥ ૧,૫૩.૧॥

મુકુન્દકુ(ન) ન્દૌ નીલશ્ચ શઙ્ખશ્ચૈવાપરો નિધિઃ ।
સત્યામૃદ્ધૌ ભવન્ત્યેતે સ્વરૂપં કથયામ્યહમ્ ॥ ૧,૫૩.૨॥

પદ્મેન લક્ષિતશ્ચૈવ સાત્ત્વિકો જાયતે નરઃ ।
દાક્ષિણ્યસારઃ પુરુષઃ સુવર્ણાદિકસંગ્રહમ્ ॥ ૧,૫૩.૩॥

રુપ્યાદિ કુર્યાદ્દધ્યાત્તુ યતિદૈવાદિયજ્વનામ્ ।
મહાપદ્માઙ્કિતો દદ્યાદ્ધનાદ્યં ધાર્મિકાય ચ ॥ ૧,૫૩.૪॥

નીધી પદ્મમહાપદ્મૌ સાત્ત્વિકૌ પુરુષૌ સ્મૃતી ।
મકરેણાઙ્કિતઃ ખડ્ગબાણકુન્તાદિસંગ્રહી ॥ ૧,૫૩.૫॥

દદ્યાચ્છ્રુતાય મૈત્રીં ચ યાતિ નિત્યં ચ રાજભિઃ ।
દ્રવ્યાર્થં શત્રુણા નાશં સંગ્રામે ચાપિ સંવ્રજેત્ ॥ ૧,૫૩.૬॥

મકરઃ કચ્છપશ્ચૈવ તામસૌ તુ નિધી સ્મૃતૌ ।
કચ્છપી વિશ્વસેન્નૈવ ન ભુઙ્ક્તેન (ના) દદાતિ ચ ॥ ૧,૫૩.૭॥

નિધાનમુર્વ્યાં કુરુતે નિધિઃ સોપ્યેકપૂરુષઃ ।
રાજસેનમુકુન્દેન લક્ષિતા રાજ્યસંગ્રહી ॥ ૧,૫૩.૮॥

ભુક્તભોગો ગાયનેભ્યો દદ્યાદ્વેશ્યાદિકાસુ ચ ।
રજસ્તમોમયો નન્દી આધારઃ સ્યાત્કુલસ્ય ચ ॥ ૧,૫૩.૯॥

સ્તુતઃ પ્રીતો ભવતિ વૈ બહુભાર્યા ભવન્તિ ચ ।
પૂર્વમિત્રેષુ શૈથિલ્યં પ્રીતિમન્યૈઃ કરોતિ ચ ॥ ૧,૫૩.૧૦॥

નીલન ચાઙ્કિતઃ સત્ત્વતેજસા સંયુતો ભવેત્ ।
વસ્ત્રધાન્યાદિસંગ્રાહી તડાગાદિ કરોતિ ચ ॥ ૧,૫૩.૧૧॥

ત્રિપૂ(પૌ) રુષો નિધિશ્ચૈવ આમ્રારામાદિ કારયેત્ ।
એકસ્ય સ્યાન્નિધિઃ શઙ્ખઃ સ્વયં ભુઙ્ક્તે ધનાદિ(ન્ત)કમ્ ॥ ૧,૫૩.૧૨॥

કદન્નભુક્પરિજનો ન ચ શોભનવસ્ત્રધૃક્ ।
સ્વપોષણપરઃ શઙ્ખી દદ્યાત્પરનરે વૃથા ॥ ૧,૫૩.૧૩॥

મિશ્રાવલોકનાન્મિશ્રસ્વભાવફલદાયિનઃ ।
નિધીનાં રૂપમુક્તં તુ હરિણાપિ હરાદિકે ।

હરિર્ભુવનકોશાદિ યથોવાચ તથા વદે ॥ ૧,૫૩.૧૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નવનિધિવર્ણનં નામ ત્રિપઞ્ચાશત્તમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૫૪
હરિરુવાચ ।
અગ્નીધ્રશ્ચાગ્નિબાહુશ્ચ બપુષ્માન્ધ્યુતિમાંસ્તથા ।
મેધામેધાતિથિર્ભવ્યઃ શબલઃ પુત્ર એવ ચ ॥ ૧,૫૪.૧॥

જ્યોતિષ્માન્દશમો જાતઃ પુત્રા હ્યેતે પ્રિયવ્રતાત્ ।
મેધાગ્નિબાહુપુત્રાસ્તુ ત્રયો યોગપરાયણાઃ ॥ ૧,૫૪.૨॥

જાતિસ્મરા મહાભાગા નૈરાજ્યાય મમો દષુઃ ।
વિભજ્ય સપ્ત દ્વીપાનિ સપ્તાનાં પ્રદદૌ નૃપઃ ॥ ૧,૫૪.૩॥

યોજનાનાં પ્રમાણેન પઞ્ચાશત્કોટિરાપ્લુતા ।
જલોપરિ મહી યાતા મૌરિવાસ્તે સરિજ્જલે ॥ ૧,૫૪.૪॥

જમ્બૂપ્લક્ષાહ્વયૌ દ્વીપૌ શાલ્મલશ્ચાપરો હર ।
કુશઃ ક્રૌઞ્ચસ્તથા શાકઃ પુષ્કરશ્ચૈવ સપ્તમઃ ॥ ૧,૫૪.૫॥

એતે દ્વીપાઃ સમુદ્રૈસ્તુ સપ્ત સપ્તભિરાવૃતાઃ ।
લવણેક્ષુસુરાસર્પિર્દાધિદુગ્ધજલૈઃ સમમ્ ॥ ૧,૫૪.૬॥

દ્વીપાત્તુ દ્વિગુણો દ્વીપઃ સમુદ્રશ્ચ વૃષધ્વજ ।
જમ્બૂદ્વીપે સ્થિતો મેરુર્લક્ષયોજનવિસ્તૃતઃ ॥ ૧,૫૪.૭॥

ચતુરશીતિસાહસ્રૈર્યોજનૈરસ્ય ચોચ્છ્રયઃ ।
પ્રવિષ્ટઃ ષોડશાધસ્તાદ્દ્વત્રિંશન્મૂર્ધ્નિ વિસ્તૃતઃ ॥ ૧,૫૪.૮॥

અધઃ ષોડશસાહસ્રઃ કર્ણિકાકારસંસ્થિતઃ ।
હિમવાન્હેમકૂટશ્ચ નિષધશ્ચાસ્ય દક્ષિણે ॥ ૧,૫૪.૯॥

નીલઃ શ્વેતશ્ચ શૃઙ્ગી ચ ઉત્તરે વર્ષપર્વતાઃ ।
પ્લક્ષાદિષુ નરા રુદ્ર યે વસન્તિ સનાતનાઃ ॥ ૧,૫૪.૧૦॥

શઙ્કરાથ ન તેષ્વસ્તિ યુગાવસ્થા કથઞ્ચન ।
જમ્બૂદ્વીપેશ્વરાત્પુત્રા હ્યગ્નીધ્રાદભવન્નવ ॥ ૧,૫૪.૧૧॥

નાભિઃ કિંપુરુષશ્ચૈવ હરિવર્ષમિલા વૃતઃ ।
રમ્યો હિરણમયાખ્યશ્ચ કુરુર્ભદ્રાશ્વ એવ ચ ॥ ૧,૫૪.૧૨॥

કેતુમાલો નૃપસ્તેભ્યસ્તત્સંજ્ઞાન્ખણ્ડકાન્દદૌ ।
નાભેસ્તુ મેરુદેવ્યાં તુ પુત્રોઽભૂદૃષભો હર ॥ ૧,૫૪.૧૩॥

તત્પુત્રો ભરતો નામ શાલગ્રામે સ્થિતો વ્રતી ।
સુમતિર્ભરતસ્યાભૂત્તત્પુત્રસ્તૈજસોઽભવત્ ॥ ૧,૫૪.૧૪॥

ઇન્દ્રદ્યુમ્નશ્ચ તત્પુત્રઃ પરમેષ્ઠી તતઃ સ્મૃતઃ ।
પ્રતીહારશ્ચતત્પુત્રઃ પ્રતિહર્તા તદાત્મજઃ ॥ ૧,૫૪.૧૫॥

સુતસ્તસ્માદથૈ જાતઃ પ્રસ્તારસ્તત્સુતો વિભુઃ ।
પૃથુશ્ચ તત્સુતો નક્તો નક્તસ્યાપિ ગયઃ સ્મૃતઃ ॥ ૧,૫૪.૧૬॥

નરો ગયસ્ય તનયસ્તત્પુત્રોભુદ્વિરાડગતઃ ।
તતો ધીમાન્મહાતેજા ભૌવનસ્તસ્ય ચાત્મજઃ ॥ ૧,૫૪.૧૭॥

ત્વષ્ટા ત્વષ્ટુશ્ચ વિરજા રજસ્તસ્યાપ્યભૂત્સુતઃ ।
શતજિદ્રજસસ્તસ્ય વિષ્વગ્જ્યોતિઃ સુતઃ સ્મૃતઃ ॥ ૧,૫૪.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભુવનકોશવર્ણનોપયોગિપ્રિયવ્રતવંશનિરૂપણં નામ ચતુઃ પઞ્ચશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫૫

હરિરુવાચ ।
મધ્યે ત્વિલાવૃતો વર્ષો ભદ્રાશ્વઃ પૂર્વતોઽદ્ભુતઃ ।
પૂર્વદક્ષૈણતો વર્ષો હિરણ્વાન્વૃષભધ્વજ ॥ ૧,૫૫.૧॥

તતઃ કિમ્પુરુષો વર્ષો મેરોર્દક્ષિણતઃ સ્મૃતઃ ।
ભારતો દક્ષિણે પ્રોક્તો હરિર્દક્ષિણપાશ્ચિમે ॥ ૧,૫૫.૨॥

પશ્ચિમે કેતુમાલશ્ચ રમ્યકઃ પશ્ચિમોત્તરે ।
ઉત્તરે ચ કુરોર્વર્ષઃ કલ્પવૃક્ષસમાવૃતઃ ॥ ૧,૫૫.૩॥

સિદ્ધિઃ સ્વાભાવિકી રુદ્ર ! વર્જયિત્વા તુ ભારતમ્ ।
ઇન્દ્રદ્વીપઃ કશેરુમાંસ્તામ્રવર્ણો ગભસ્તિતમાન્ ॥ ૧,૫૫.૪॥

નાગદ્વીપઃ કટાહશ્ચ સિંહલો વારુણસ્તથા ।

અયં તુનવમસ્તેષાં દ્વીપઃ સાગરસંવૃતઃ ॥ ૧,૫૫.૫॥

પૂર્વે કિરાતાસ્તસ્યાસ્તે પશ્ચિમે યવનાઃ સ્થિતાઃ ।
અન્ધ્રા દક્ષિણતો રુદ્ર ! તુરષ્કાસ્ત્વપિ ચોત્તરે ॥ ૧,૫૫.૬॥

બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ સૂદ્રાશ્ચાન્તરવાસિનઃ ।
મહેન્દ્રો મલયઃ સહ્યઃ શુક્તિમાનૃક્ષપર્વતઃ ॥ ૧,૫૫.૭॥

વિન્ધ્યશ્ચ પારિયાત્રશ્ચ સપ્તાત્ર કુલપર્વતાઃ ।
વેદસ્મૃતિર્નર્મદા ચ વરદા સુરસા શિવા ॥ ૧,૫૫.૮॥

તાપી પયોષ્ણી સરયૂઃ કાવેરી ગોમતી તથા ।
ગોદાવરી ભીમરથી કૃષ્ણવેણી મહાનદી ॥ ૧,૫૫.૯॥

કેતુમાલા તામ્રપર્ણી ચન્દ્રભાગા સરસ્વતી ।
ઋષિકુલ્યા ચ કાવેરી મત્તગઙ્ગા પયસ્વિની ॥ ૧,૫૫.૧૦॥

વિદર્ભા ચ શતદ્રૂશ્ચ નદ્યઃ પાપહરાઃ શુભાઃ ।
આસાં પિબન્તિ સલિલં મધ્યદેશાદયો જનાઃ ॥ ૧,૫૫.૧૧॥

પાઞ્ચાલાઃ કુરવો મત્સ્યા યૌધેયાઃ સપટચ્ચરાઃ ।
કુન્તયઃ શૂરસેનાશ્ચ મધ્યદેશજનાઃ સ્મૃતાઃ ॥ ૧,૫૫.૧૨॥

વૃષધ્વજ ! જનાઃ પાદ્માઃ સૂતમાગધચેદયઃ ।
કાશય (ષાયા) શ્ચ વિદેહાશ્ચ પૂર્વસ્યાં કોસલાસ્તથા ॥ ૧,૫૫.૧૩॥

કલિઙ્ગવઙ્ગપુણ્ડ્રાઙ્ગા વૈદર્ભા મૂલકાસ્તથા ।
વિન્ધ્યાન્તર્નિલયા દેશાઃ પૂર્વદક્ષિણતઃ સ્મૃતાઃ ॥ ૧,૫૫.૧૪॥

પુલન્દાશ્મકજીમૂતનયરાષ્ટ્રનિવાસિનઃ ।
કર્ણાર્(ના)ટકમ્બોજઘણા દક્ષિણાપથવાસિનઃ ॥ ૧,૫૫.૧૫॥

અમ્બષ્ઠદ્રવિડા લાટાઃ કામ્ભોજા સ્ત્રીમુખાઃ શકાઃ ।
આનર્તવાસિનશ્ચૈવ જ્ઞેયા યક્ષિણપશ્ચિમે ॥ ૧,૫૫.૧૬॥

સ્ત્રીરાજ્યાઃ સૈન્ધવા મ્લેચ્છા નાસ્તિ કા યવનાસ્તથા ।
પશ્ચિમેન ચ વિજ્ઞેયા માથુરા નૈષધૈઃ સહ ॥ ૧,૫૫.૧૭॥

માણ્ડવ્યાશ્ચ તુષારાશ્ચ મૂલિકાશ્વમુખાઃ ખશાઃ ।
મહાકેશા મહાનાસા દેશાસ્ત્વૂત્તરપશ્ચિમે ॥ ૧,૫૫.૧૮॥

લમ્બ (મ્પા) કા સ્તનનાગાશ્ચ માદ્રગાન્ધારબાહ્લિકાઃ ।
હિમાચલાલયા મ્લેચ્છા ઉદીચીં દિશમાશ્રિતાઃ ॥ ૧,૫૫.૧૯॥

ત્રિગર્તનીલકોલાત (ભ) બ્રહ્મપુત્રાઃ સટઙ્કણાઃ ।
અભીષાહાઃ સકાશ્મીરા ઉદક્પર્વેણ કીર્તિતાઃ ॥ ૧,૫૫.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભુવનકોશવર્ણનં નામ પઞ્ચપઞ્ચાશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫૬

હરિરુવાચ ।
સપ્ત મેધાતિથેઃ પુત્રાઃ પ્લક્ષદ્વીપેશ્વરસ્ય ચ ।
જ્યેષ્ઠઃ શાન્તભવો નામ શિશિરસ્તદન્તરઃ ॥ ૧,૫૬.૧॥

સુખોદયસ્તથા નન્દઃ શિવઃ ક્ષેમક એવ ચ ।
ધ્રુવશ્ચ સપ્તમસ્તેષાં પ્લક્ષદ્વીપેશ્વરા હિ તે ॥ ૧,૫૬.૨॥

ગોમેદશ્ચૈવ ચન્દ્રશ્ચ નારદો દુન્દુભિસ્તથા ।
સોમકઃ સુમનાઃ શૈલો બૈભ્રાજશ્ચાત્ર સપ્તમઃ ॥ ૧,૫૬.૩॥

અનુતપ્તા શિખી ચૈવ વિપાશા ત્રિદિવા ક્રમુઃ ।
અમૃતા સુકૃતા ચૈવ સપ્તૈતાસ્તત્ર નિમ્નગાઃ ॥ ૧,૫૬.૪॥

વપુષ્માઞ્છાલ્મલસ્યેશસ્તત્સુતા વર્ષનામકાઃ ।
શ્વેતોઽથ હરિતશ્ચૈવ જીમૂતો રોહિતસ્તથા ॥ ૧,૫૬.૫॥

વૈદ્યુતો માનસશ્ચૈવ સપ્રભશાચપિ સપ્તમઃ ।
કુમુદશ્ચોન્નતો દ્રોણો મહિષોઽથ બલાહકઃ ॥ ૧,૫૬.૬॥

ક્રૌઞ્ચઃ કકુદ્માન્હ્યેતે વૈ ગિરયઃ સરિતસ્ત્વિમાઃ ।
યોનિતોયા વિતૃષ્ણા ચ ચન્દ્રા શુક્લ વિમોચની ॥ ૧,૫૬.૭॥

વિધૃતિઃ સપ્તમી તાસાં સ્મૃતાઃ પાપપ્રશાન્તિદાઃ ।
જ્યોતિષ્મતઃ કુશદ્વીપે સપ્ત પુત્રાઃ શ◌ૃણુષ્વતાન્ ॥ ૧,૫૬.૮॥

ઉદ્ભિદો વેણુમાંશ્ચૈવ દ્વૈરથો લમ્બનો ધૃતિઃ ।
પ્રભાકરોઽથ કપિલસ્તન્નામા વર્ષપદ્ધતિઃ ॥ ૧,૫૬.૯॥

વિદ્રુમો હેમશૈલશ્ચ દ્યુતિમાન્પુષ્પવાંસ્તથા ।

કુશેશયો હરિશ્ચૈવ સપ્તમો મન્દરાચલઃ ॥ ૧,૫૬.૧૦॥

ધૂતપાપા શિવા ચૈવ પવિત્રા સન્મતિસ્તથા ।
વિદ્યુદભ્રા મહી ચાન્યા સર્વપાપહરાસ્ત્વિમાઃ ॥ ૧,૫૬.૧૧॥

ક્રૌઞ્ચદ્વીપે દ્યુતિમતઃ પુત્રાઃ સપ્ત મહાત્મનઃ ।
કુશલો મન્દગશ્ચોષ્ણઃ પીવરોઽથોન્ધકારકઃ ॥ ૧,૫૬.૧૨॥

મુનિશ્ચ દુન્દુભિશ્ચૈવ સપ્તૈતે તત્સુતા હર ।
ક્રૌઞ્ચશ્ચ વામનશ્ચૈવ તૃતીયશ્ચાન્ધ (થ) કારકઃ ॥ ૧,૫૬.૧૩॥

દિવાવૃત્પઞ્ચમશ્ચાન્યો દુન્દુભિઃ પુણ્ડરીકવાન્ ।
ગૌરી કુમુદ્વતી ચૈવ સન્ધ્યા રાત્રિર્મનોજવા ॥ ૧,૫૬.૧૪॥

ખ્યાતિશ્ચ પુણ્ડરીકા ચ સપ્તૈતા વર્ષનિમ્નગાઃ ।
શાકદ્વીપેશ્વરાદ્ભવ્યાત્સપ્ત પુત્રાઃ પ્રજજ્ઞિરે ॥ ૧,૫૬.૧૫॥

જલદ્શ્ચ કુમારશ્ચ સુકુમારોરુણી બકઃ ।
કુસુમોદઃ સમોદાર્કિઃ સપ્તમશ્ચ મહાદ્રુમઃ ॥ ૧,૫૬.૧૬॥

સુકુમારી કુમારી ચ નલિની ધેનુકા ચ યા ।
ઇક્ષુશ્ચ વેણુકા ચૈવ ગભસ્તી સપ્તમી તથા ॥ ૧,૫૬.૧૭॥

શબલાત્પુષ્કરેશાચ્ચ મહાવીરશ્ચ ધાતકિઃ ।
અભૂદ્વર્ષદ્વયં ચૈવ માનસોત્તરપર્વતઃ ॥ ૧,૫૬.૧૮॥

યોજનાનાં સહસ્રાણિ ઊર્ધ્વં પઞ્ચાશદુચ્છ્રિતઃ ।
તાવચ્ચૈવ ચ વિસ્તીર્ણઃ સર્વતઃ પરિમણ્ડલઃ ॥ ૧,૫૬.૧૯॥

સ્વાદૂદકેનોદધિના પુષ્કરઃ પરિવેષ્ટિતઃ ।
સ્વાદૂદકસ્ય પુરતો દૃશ્યતે લોકસંસ્થિતિઃ ॥ ૧,૫૬.૨૦॥

દ્વિગુણા કાઞ્ચની ભૂમિઃ સર્વજન્તુવિવર્જિતા ।
લોકાલોકસ્તતઃ શૈલો યોજનાયુતાવિસ્તૃતઃ ।
તમસા પર્વતો વ્યાપ્તસ્તમોઽપ્યણ્ડકટાહતઃ ॥ ૧,૫૬.૨૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભુવનકોશવર્ણનં નામ ષટ્પઞ્ચાશત્તમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૫૭

હરિરુવાચ ।
સપ્તતિસ્તુ સહસ્રાણિ ભૂમ્યુચ્છ્રાયોઽપિ કથ્યતે ।
દશસાહસ્રમેકૈકં પાતાલં વૃષભધ્વજ ॥ ૧,૫૭.૧॥

અતલં વિતલં ચૈવ નિતલં ચ ગભસ્તિમત્ ।
મહાખ્યં સુતલં ચાગ્ર્યં પાતાલં ચાપિ સપ્તમમ્ ॥ ૧,૫૭.૨॥

કૃષ્ણા શુક્લારુણા પીતા શર્કરા શૈલકાઞ્ચના ।
ભૂયસ્તત્ર દૈતેયા વસન્તિ ચ ભુજઙ્ગમાઃ ॥ ૧,૫૭.૩॥

રૌદ્રે તુ પુષ્કરદ્વીપે નરકાઃ સન્તિ તાઞ્છૃણુ ।
રૌરવઃ સૂકરો રોધસ્તાલો વિનશનસ્તથા ॥ ૧,૫૭.૪॥

મહાજ્વાલસ્તપ્તકુમ્ભો લવણોઽથિ વિમોહિતઃ ।
રુધિરાખ્યો વૈતરણી કૃમિશઃ કૃમિભો જનઃ ॥ ૧,૫૭.૫॥

અસિપત્રવનઃ કૃષ્ણો નાનાભક્ષશ્ચ દારુણઃ ।
તથા પૂયવહઃ પાપો વહ્નિજ્વાલસ્ત્વધઃ શિરાઃ ॥ ૧,૫૭.૬॥

સંદંશઃ કૃષ્ણસૂત્રશ્ચ તમશ્ચાવીચિરેવ ચ ।
શ્વભોજનોઽથાપ્રતિષ્ઠોષ્ણવીચિર્નરકાઃ સ્મૃતાઃ ॥ ૧,૫૭.૭॥

પાપિનસ્તેષુ પચ્યન્તે વિષશસ્ત્રાગ્નિદાયિનઃ ।
ઉપર્યુપરિ વૈ લોકા રુદ્ર ! ભૂતાદયઃ સ્થિતાઃ ॥ ૧,૫૭.૮॥

વારિવહ્ન્યનિલાકાશૈર્વૃતં ભૂતાદિના ચ તત્ ।
તદણ્ડં મહતા રુદ્ર ! પ્રધાનેન ચ વેષ્ટિતમ્ ॥ ૧,૫૭.૯॥

અણ્ડં દશગુણં વ્યાપ્તં નારાયણઃ સ્થિતઃ ॥ ૧,૫૭.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે ભુવનકોશગતાપાતલનરકાદિનિરૂપણં નામ સપ્તપઞ્ચાશત્તમોઽધ્યાયઃ

મેદ્સ્કિપ્

---

શ્રીગરુડમહાપુરાણમ્- ૫૮
હરિરુવાચ ।
વક્ષ્યે પ્રમાણસંસ્થાને સૂર્યાદીનાં શ્‍ૃણુષ્વ મે ।
યોજાનાનાં સહસ્રાણિ ભાસ્કરસ્ય રથો નવ ॥ ૧,૫૮.૧॥

ઈષાદણ્ડસ્તથૈવાસ્ય દ્વિગુણો વૃષભધ્વજ ।

સાર્ધકોટિસ્તથા સપ્ત નિયુતાન્યધિકાનિ ચ ॥ ૧,૫૮.૨॥

યોજનાનાં તુ તસ્યાક્ષસ્તત્ર ચક્રં પ્રતિષ્ઠિતમ્ ।
ત્રિનાભિમતિ પઞ્ચારે ષણ્નેમિન્યક્ષયાત્મકે ॥ ૧,૫૮.૩॥

સંવત્સરમયે કૃત્સ્નં કાલચક્રં પ્રતિષ્ઠિતમ્ ।
ચત્વારિંશત્સહસ્રાણિ દ્વિતીયોઽક્ષો વિવસ્વતઃ ॥ ૧,૫૮.૪॥

પઞ્ચાન્યાનિ તુ સાર્ધાનિ સ્યન્દનસ્ય વૃષધ્વજ ।
અક્ષપ્રમાણમુભયોઃ પ્રમાણં તુ યુગાર્ધયોઃ ॥ ૧,૫૮.૫॥

હ્રસ્વોઽક્ષસ્તદ્યુગાર્ધેન ધ્રુવાધારે રથસ્ય વૈ ।
દ્વિતીયેઽક્ષે તુ તચ્ચક્રં સંસ્થિતં માનસાચલે ॥ ૧,૫૮.૬॥

ગાયત્રી સબૃહત્યુષ્ણિગ્જગતીત્રિષ્ટુબેવ ચ ।
અનુષ્ટુપ્પઙ્ક્તિરિત્યુક્તાશ્છન્દાંસિ હરયો રવેઃ ॥ ૧,૫૮.૭॥

ધાતા ક્રતુસ્થલા ચૈવ પુલસ્ત્યો વાસુકિસ્તથા ।
રથકૃદ્ગ્રામણીર્હેતિસ્તુમ્બુરુશ્ચૈત્રમાસકે ॥ ૧,૫૮.૮॥

અર્યમા પુલહશ્ચૈવ રથોજાઃ પુઞ્જિકસ્થલા ।
પ્રહેતિઃ કચ્છનીરશ્ચ નારદશ્ચૈવ માધવે ॥ ૧,૫૮.૯॥

મિત્રોઽત્રિસ્તક્ષકો રક્ષઃ પૌરુષેયોઽથ મેનકા ।
હાહા રથસ્વનશ્ચૈવ જ્યેષ્ઠે ભાનો રથે સ્થિતાઃ ॥ ૧,૫૮.૧૦॥

વરુણો વસિષ્ઠો રમ્ભા સહજન્યા કુહૂર્બુધઃ ।
રથચિત્રસ્તથા શુક્રો વસન્ત્યાષાઢસંજ્ઞિતે । ॥ ૧,૫૮.૧૧॥

ઇન્દ્રો વિશ્વાવસુઃ સ્રોત(શ્રોત્ર) એલાપત્રસ્તથાઙ્ગિરાઃ ।
પ્રમ્લોચા ચ નભસ્યેતે સર્પાશ્ચાર્કે તુ સન્તિ વૈ ॥ ૧,૫૮.૧૨॥

વિવસ્વાનુગ્રસેનશ્ચ ભૃગુરાપૂરણસ્તથા ।
અનુમ્લોચાશઙ્ખપાલૌ વ્યાઘ્રો ભાદ્રપદે તતા ॥ ૧,૫૮.૧૩॥

પૂષા ચ સુરુચિર્ધાતા ગૌતમોઽથ ધનઞ્જયઃ ।
સુષેણોઽન્યો ઘૃતાચી ચ વસન્ત્યાશ્વયુજે રવૌ ॥ ૧,૫૮.૧૪॥

વિશ્વાવસુર્ભરદ્વાજઃ પર્જન્યૈરાવતૌ તદા ।
વિશ્વાચી સેનજિચ્ચાપઃ (પિ) કાર્તિકે ચાધિકારિણઃ ॥ ૧,૫૮.૧૫॥

અંશુશ્ચ કાશ્યપસ્તાર્ક્ષ્યો મહાપદ્મસ્તથોર્વશી ।
ચિત્રસેનસ્તથા વિદ્યુન્માર્ગશીર્ષાધિકારિણઃ ॥ ૧,૫૮.૧૬॥

ક્રતુર્ભર્ગસ્તથોર્ણાયુઃ સ્ફૂર્જઃ કર્કોટકસ્તથા ।
અરિષ્ટનેમિશ્ચૈવાન્યા પૂર્વચિત્તિવર્રાત્સરાઃ ।
પૌષમાસે વસન્ત્યેતે સપ્ત ભાસ્કરમણ્ડલે ॥ ૧,૫૮.૧૭॥

ત્વષ્ટાથ જમદગ્નિશ્ચ કમ્બલોઽથ તિલોત્તમા ।
બ્રહ્માપેતોઽથ ઋતજિદ્ધૃતરાષ્ટ્રશ્ચ સપ્તમઃ ।
માઘમાસે વસન્ત્યેતે સપ્ત ભાસ્કરમણ્ડલે ॥ ૧,૫૮.૧૮॥

વિષ્ણુરશ્વતરો રમ્ભા સૂર્યવર્ચાશ્ચ સત્યજિત્ ।
વિશ્વામિત્રસ્તથા રક્ષો યજ્ઞાપેતો હિ ફાલ્ગુને ॥ ૧,૫૮.૧૯॥

સવિતુર્મણ્ડલે બ્રહ્મન્વિષ્ણુશક્ત્યુપબૃંહિતાઃ ।
સ્તુવન્તિ મુનયઃ સૂર્યં ગન્ધર્વૈર્ગીયતે પુરઃ ॥ ૧,૫૮.૨૦॥

નૃત્યન્ત્યોઽપ્સરસો યાન્તિ સૂર્યસ્યાનુનિશાચરાઃ ।
વહન્તિ પન્નગા યક્ષૈઃ ક્રિયતેઽભીષુસંગ્રહઃ ॥ ૧,૫૮.૨૧॥

બાલખિલ્યાસ્તથૈવૈનં પરિવાર્ય સમાસતે ।
રથસ્ત્રિચક્રઃ સોમસ્ય કુન્દાભાસ્તસ્ય વાજિનઃ ॥ ૧,૫૮.૨૨॥

વામદક્ષિણતો યુક્તા દશ તેન ચરત્યસૌ ।
વાર્ય (ય્વ) ગ્રનિદ્રવ્યસમ્ભૂતો રથશ્ચન્દ્રસુતસ્યચ ॥ ૧,૫૮.૨૩॥

પિશઙ્ગૈસ્તુરગૈર્યુક્તઃ સોઽષ્ટાભિર્વાયુવેગિભિઃ ।
સવરૂથઃ સાનુકર્ષો યુક્તો ભૂમિભવૈર્હયૈઃ ॥ ૧,૫૮.૨૪॥

સોપાસંગપતાકસ્તુ શુક્રસ્યાપિ રથો મહાન્ ।
રથો ભૂમિસુતસ્યાપિ તપ્તકાઞ્ચનસન્નિભઃ ॥ ૧,૫૮.૨૫॥

અષ્ટાશ્વઃ કાઞ્ચનઃ શ્રીમાન્ભૌમસ્યાપિ રથો મહાન્ ॥ ૧,૫૮.૨૬॥

પદ્મરાગારુણૈરશ્વૈઃ સંયુક્તો વહ્નિસંભવૈઃ ।
અષ્ટાભિઃ પાણ્ડરૈર્યુક્તૈર્વાજિભિઃ કાઞ્ચને રથે ॥ ૧,૫૮.૨૭॥

તિષ્ઠંસ્તિષ્ઠતિ વર્ષં વૈ રાશૌરાશૌ બૃહસ્પતિઃ ।
આકાશસમ્ભવૈરશ્વૈઃ શવલૈઃ સ્યન્દનં યુતમ્ ॥ ૧,૫૮.૨૮॥

સમારુહ્ય શનૈર્યાતિ મન્દગામી શનૈશ્ચરઃ ।

સ્વર્ભાનોસ્તુરગા હ્યષ્ટૌ ભૃઙ્ગાભા ધૂસરં રથમ્ ॥ ૧,૫૮.૨૯॥

સકૃદ્યુક્તાસ્તુ ભૂતેશબહન્ત્યવિરતં શિવ ।
તથા કેતુરથસ્યાશ્વા અષ્ટૌ તે વાતરંહસઃ ॥ ૧,૫૮.૩૦॥

પલાલધૂમવર્ણાભા લાક્ષારસનિભારુણાઃ ।
દ્વીપનદ્યદ્રયુદન્વન્તો ભુવનાનિહરેસ્તનુઃ ॥ ૧,૫૮.૩૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભુવનકોશનિરૂપણં નામાષ્ટપઞ્ચાશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫૯
(અથ જ્યોતિઃ શાસ્ત્રમ્)

સૂત ઉવાચ ।
જ્યોતિશ્ચક્રં ભુવો માનમુક્ત્વા પ્રોવાચ કેશવઃ ।
ચતુર્લક્ષં જ્યોતિષસ્ય સારં રુદ્રાય સર્વદઃ ॥ ૧,૫૯.૧॥

હરિરુવાચ ।
કૃત્તિકાસ્ત્વગ્નિદેવત્યા રોહિણ્યો બ્રહ્મણઃ સ્મૃતાઃ ।
ઇલ્વલાઃ સોમદેવત્યા રૌદ્રં ચાર્દ્રમુદાહૃતમ્ ॥ ૧,૫૯.૨॥

પુનર્વસુસ્તથાદિત્યસ્તિષ્યશ્ચ ગુરુદૈવતઃ ।
અશ્લેષાઃ સર્પદેવત્યા મઘાશ્ચ પિતૃદેવતાઃ ॥ ૧,૫૯.૩॥

ભાગ્યાશ્ચ પૂર્વફલ્ગુન્ય અર્યમા ચ તથોત્તરઃ ।
સાવિત્રશ્ચ તથા હસ્તા ચિત્રા ત્વષ્ટા પ્રકીર્તિતઃ ॥ ૧,૫૯.૪॥

સ્વાતી ચ વાયુદેવત્યા નક્ષત્રં પરિકીર્તિતમ્ ।
ઇન્દ્રાગ્નિદેવતા પ્રોક્તા વિશાખા વૃષભધ્વજ ॥ ૧,૫૯.૫॥

મૈત્રમૃક્ષમનૂરાધા જ્યેષ્ઠા શાક્રં પ્રકીર્તિતમ્ ।
તથા નિરૃતિદેવત્યો મૂલસ્તજ્જ્ઞૈરુદાહૃતઃ ॥ ૧,૫૯.૬॥

આપ્યાસ્ત્વાષાઢપૂર્વાસ્તુ ઉત્તરા વૈશ્વદેવતાઃ ।
બ્રાહ્મશ્ચૈવાભિજિત્પ્રોક્તઃ શ્રવણા વૈષ્ણવઃ સ્મૃતઃ ॥ ૧,૫૯.૭॥

વાસવસ્તુ તથા ઋક્ષં ધનિષ્ઠા પ્રોચ્યતે બુધૈઃ ।
તથા શતભિષા પ્રોક્તં નક્ષત્રં વારુણં શિવ ॥ ૧,૫૯.૮॥

આજં ભાદ્રપદા પૂર્વા અહિર્બુધ્ન્યસ્તથોત્તરા ।
પૌષ્ણં ચ રેવતી ઋક્ષમશ્વયુક્ચાશ્વદૈવતમ્ ॥ ૧,૫૯.૯॥

ભરણ્યૃક્ષં તથા યામ્યં પ્રોક્તાસ્તે ઋક્ષદેવતાઃ ।
બ્રહ્માણી સંસ્થિતા પૂર્વે પ્રિતપન્નવમીતિથૌ ॥ ૧,૫૯.૧૦॥

માહેશ્વરી ચોત્તરે ચ દ્વિતીયા દશામીતિથૌ ।
પઞ્ચમ્યાં ચ ત્રયોદશ્યાં વારાહી દક્ષિણે સ્થિતા ॥ ૧,૫૯.૧૧॥

ષષ્ઠ્યાં ચૈવ ચતુર્દશ્યામિન્દ્રાણી પશ્ચિમે સ્થિતા ।
સપ્તમ્યાં પૌર્ણમાસ્યાં ચ ચામુણ્ડા વાયુગોચરે ॥ ૧,૫૯.૧૨॥

અષ્ટમ્યમાવાસ્યયોગે મહાલક્ષ્મીશગોચરે ।
એકાદશ્યાં તૃતીયાયામગ્નિકોણે તુ વૈષ્ણવી ॥ ૧,૫૯.૧૩॥

દ્વાદશ્યાં ચ ચતુર્થ્યાં તુ કૌમારી નૈરૃતે તથા ।
યોગિનીસુમુખેનૈવ ગમનાદિ ન કારયેત્ ॥ ૧,૫૯.૧૪॥

અશ્વિનીમૈત્રરેવત્યો મૃગમૂલપુનર્વસુ ।
પુષ્યા હસ્તા તથા જ્યેષ્ઠા પ્રસ્થાને શ્રેષ્ઠમુચ્યતે ॥ ૧,૫૯.૧૫॥

હસ્તાદિપઞ્ચઋક્ષાણિ ઉત્તરાત્રયમેવ ચ ।
અશ્વિની રોહિણી પુષ્યા ધનિષ્ઠા ચ પુનર્વસૂ ॥ ૧,૫૯.૧૬॥

વસ્ત્રપ્રાવરણે શ્રેષ્ઠો નક્ષત્રાણાં ગણઃ સ્મૃતઃ ।
કૃત્તિકા ભરણ્યશ્લેષા મઘા મૂલવિશાખયોઃ ॥ ૧,૫૯.૧૭॥

ત્રીણિ, પૂર્વા તથા ચૈવ અધોવક્રાઃ પ્રકીર્તિતાઃ? ।
એષુ વાપીતડાગાદિકૂપભૂમિતૃણાનિ ચ ॥ ૧,૫૯.૧૮॥

દેવાગારસ્ય ખનનં નિધાનખનનં તથા ।
ગણિતં જ્યોતિષારમ્ભં ખનિબિલપ્રવેશનમ્ ॥ ૧,૫૯.૧૯॥

કુર્યાદધોગતાન્યેવ અન્યાનિ ચ વૃષધ્વજ ।
રેવતી ચાશ્વિની ચિત્રા સ્વાતી હસ્તા પુનર્વસૂ ॥ ૧,૫૯.૨૦॥

અનુરાધા મૃગો જ્યેષ્ઠા એતે પાર્શ્વમુખાઃ સ્મૃતાઃ ।
ગજોષ્ટ્રાશ્વબલીવર્દદમનં મહિષસ્ય ચ ॥ ૧,૫૯.૨૧॥

બીજાનાં વપનં કુર્યાદ્ગમનાગમનાદિકમ્ ।
ચક્રયન્ત્રરથાનાં ચ નાવાદીનાં પ્રવાહણમ્ ॥ ૧,૫૯.૨૨॥

પાર્શ્વેષુ યાનિ કર્માણિ કુર્યાદિતેષુ તાન્યપિ ।
રોહિણ્યાર્દ્રાં તથા પુષ્યા ધનિષ્ઠા ચોત્તરાત્રયમ્ ॥ ૧,૫૯.૨૩॥

વારુણં શ્રવણં ચૈવ નવ ચોર્ધ્વમુખાઃ સ્મૃતાઃ ।
એષુ રાજ્યાભિષેકં ચ પટ્ટબન્ધં ચ કારયેત્ ॥ ૧,૫૯.૨૪॥

ઊર્ધ્વમુખ્યાન્યુચ્છ્રિતાનિ સર્વાણ્યેતેષુ કારયેત્ ।
ચતુર્થી ચાશુભા ષષ્ઠી અષ્ટમી નવમી તથા ॥ ૧,૫૯.૨૫॥

અમાવાસ્યા પૂર્ણિમા ચ તદ્વાદશી ચ ચતુર્દશી ।
અશુક્લા પ્રતિપચ્છ્રેષ્ઠા દ્વિતીયા ચન્દ્ર સૂનુના ॥ ૧,૫૯.૨૬॥

તૃતીયા ભૂમિપુત્રેણ ચતુર્થી ચ શનૈશ્ચરે ।
ગુરૌ શુભા પઞ્ચમી સ્યાત્ષષ્ઠીમઙ્ગલશુક્રયોઃ ॥ ૧,૫૯.૨૭॥

સપ્તમી સોમપુત્રેણ અષ્ટમી કુજભાસ્કરૌ ।
નવમી ચન્દ્રવા(સૌ) રેણ દશમી તુ ગુરૌ શુભા ॥ ૧,૫૯.૨૮॥

એકાદશ્યા ગુરુશુક્રૌ દ્વાદશ્યાં ચ પુનર્બુધઃ ।
ત્રયોદશી શુક્રભૌમૌ શનૌ શ્રેષ્ઠા ચતુર્દશી ॥ ૧,૫૯.૨૯॥

પૌર્ણમાસ્યપ્યમાવાસ્યા શ્રેષ્ઠા સ્યાચ્ચ બૃહસ્પતૌ ।
દ્વાદશીં દહતે ભાનુઃ શશી ચૈકાદશીં દહેત્ ॥ ૧,૫૯.૩૦॥

કુજો દહેચ્ચ દશામીં નવમીં ચ બુધો દહેત્ ।
અષ્ટમીં દહતે જીવઃ સપ્તમીં ભાર્ગવો દહેત્ ॥ ૧,૫૯.૩૧॥

સૂર્યપુત્રો દહેત્ષષ્ઠીં ગમનાદ્યાસુ નાસ્તિ વૈ ।
પ્રતિપન્નવમીષ્વેવ ચતુર્દશ્યષ્ટમીષુ ચ ॥ ૧,૫૯.૩૨॥

બુધવારેણ પ્રસ્થાનં દૂરતઃ પરિવર્જયેત્ ।
મેષે કર્કટકે ષષ્ઠી કન્યાયાં મિથુનેઽષ્ટમી ॥ ૧,૫૯.૩૩॥

વૃષે કુમ્ભે ચતુર્થી ચ દ્વાદશી મકરે તુલે ।
દશમી વૃશ્ચિકે સિંહે ધનુર્મીને ચતુર્દશી ॥ ૧,૫૯.૩૪॥

એતા દગ્ધા ન ગન્તવ્યં પીડાદિઃ કિલ માનવૈઃ ।
વિશાખાત્રયમાદિત્યે પૂર્વાષાઢાત્રયે શશી ॥ ૧,૫૯.૩૫॥

ધનિષ્ઠાત્રિતયં ભૌમે બુધે વૈ રેવતીત્રયમ્ ।

રોહિણ્યાદિત્રયં જીવે શુક્રે પુષ્યાત્રયં શિવ ॥ ૧,૫૯.૩૬॥

શનિવારે વર્જયેચ્ચ ઉત્તરાફલ્ગુનીત્રયમ્ ।
એષુ યોગેષુ ચોત્પાતમૃત્યુરોગાદિકં ભવેત્ ॥ ૧,૫૯.૩૭॥

મૂલેઽર્કઃ શ્રવણે ચન્દ્રઃ પ્રોષ્ઠપદ્યુત્તરે કુજઃ ।
કૃત્તિકાસુ બુધશ્ચૈવ ગુરૌ રુદ્ર પુનર્વસુઃ ॥ ૧,૫૯.૩૮॥

પૂર્વફલ્ગુની શુક્રે ચ સ્વાતિશ્ચૈવ શનૈશ્ચરે ।
એતે ચામૃતયોગાઃ સ્યુઃ સર્વકાર્યપ્રસાધકાઃ ॥ ૧,૫૯.૩૯॥

કાલં પ્રવક્ષ્યન્નિ?શક્તિદા? નેષ્ટમન્દ? ।
પર્વાદિસ્તુ જ્ઞેયઃ કાલઃ કાલવિશારદૈઃ ॥ ૧,૫૯.૪૦॥

એકીકૃત્યાક્ષરાન્માત્રં નામ્નોઃ સ્ત્રીપુંસયોસ્ત્રિભિઃ ।
ભાગે દ્વિશેષે સ્ત્રીનાશઃ પુસઃ સ્યાદેકશૂન્યયોઃ ॥ ૧,૫૯.૪૧॥

વિષ્કમ્ભે ઘટિકાઃ પઞ્ચ શૂલે સપ્ત પ્રકીર્તિતાઃ ।
ષડ્ગણ્ડે ચાતિગણ્ડે ચ નવ વ્યાઘાતવજ્રયોઃ ॥ ૧,૫૯.૪૨॥

વ્યતીપાતે ચ પરિઘે વૈધૃતે ચ દિનેદિને ।
એતે મૃત્યુયુતા હ્યેષુ સર્વકર્માણિ વર્જયેત્ ॥ ૧,૫૯.૪૩॥

હસ્તેઽર્કશ્ચ ગુરુઃ પુષ્યે અનુરાધા બુધે શુભા ।
રોહિણી ચ શનૌ શ્રેષ્ઠા સૌમં સોમેન વૈ શુભમ્ ॥ ૧,૫૯.૪૪॥

શુક્રે ચ રેવતી શ્રેષ્ઠા અશ્વિની મઙ્ગલે શુભા ।
એતેષુ સિદ્ધિયોગા વૈ સર્વદોષવિનાશનાઃ ॥ ૧,૫૯.૪૫॥

ભાર્ગવે ભપરણી ચૈવ સોમે ચિત્રા વૃષધ્વજ ! ।
ભૌમે ચૈ વોત્તરાષાઢા ધનિષ્ઠા ચ બુધે હર ! ॥ ૧,૫૯.૪૬॥

ગરૌ શતભિષા રુદ્ર ! શુક્રે વૈ રોહિણી તથા ।
શનૌ ચ રેવતી શમ્ભો ! વિષયોગાઃ પ્રકીર્તિતાઃ ॥ ૧,૫૯.૪૭॥

પુષ્યઃ પુનર્વસુશ્ચૈવ રેવતી ચિત્રયા સહ ।
શ્રવણં ચ ધનિષ્ઠા ચ હસ્તાશ્વનીમૃગાસ્તથા ॥ ૧,૫૯.૪૮॥

કુર્યાચ્છતભિષાયાં ચ જાતકર્માદિ માનવઃ ।
વિશાખા ચોત્તરાત્રીણિ મઘાર્દ્રા ભરણી તથા ।
આશ્લેષા કૃત્તિકા રુદ્ર ! પ્રસ્થાને મરણપ્રદાઃ ॥ ૧,૫૯.૪૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે નક્ષત્રતદ્દેવતાદગ્ધયોગાદિનિરૂપણં નામૈકોનષષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૦

હરિરુવાચ ।

ષડાદિત્યે દશા જ્ઞેયા સોમે પઞ્ચદશ સ્મૃતાઃ ।
અષ્ટાવઙ્ગારકે ચવ બુધૈ સ્પતદશ સ્મૃતાઃ ॥ ૧,૬૦.૧॥

શનૈશ્ચરે દશ જ્ઞેયા ગુરોરેકોનવિંશતિઃ ।
રાહોર્દ્વાદશવર્ષાણિ એકવિંશતિર્ભાર્ગવે ॥ ૧,૬૦.૨॥

રવેર્દશા દુઃખદા સ્યાદુદ્વેગનૃપનાશકૃત્ ।
વિભૂતિદા સોમદશા સુખમિષ્ટાન્નદા તથા ॥ ૧,૬૦.૩॥

દુઃખપ્રદા કુજદશા રાજ્યાદેઃ સ્યાદ્વિનાશિની ।
દિવ્યસ્ત્રીદા બુધદશા રાજ્યદા કોશવૃદ્ધિદા ॥ ૧,૬૦.૪॥

શનેર્દશા રાજ્યનાશબન્ધુદુઃખકરી ભવેત્ ।
ગુરોર્દશા રાજ્યદા સ્યાત્સુખધર્માદિદાયિની ॥ ૧,૬૦.૫॥

રાહોર્દશા રાજ્યનાશવ્યાધિદા દુઃખદા ભવેત્ ।
હસ્ત્યશ્વદા શુક્રદશા રાજ્યસ્ત્રીલાભદા ભવેત્ ॥ ૧,૬૦.૬॥

મેષ અઙ્ગારકક્ષેત્રં વૃષઃ શુક્રસ્ય કીર્તિતઃ ।
મિથુનસ્ય બુધો જ્ઞેયઃ સોમઃ કર્કટકસ્ય ચ ॥ ૧,૬૦.૭॥

સૂર્યક્ષેત્રં ભવેત્સિંહઃ કન્યા ક્ષેત્રં બુધસ્ય ચ ।
ભાર્ગવસ્ય તુલા ક્ષેત્રં વૃશ્ચિકોઙ્ગારકસ્ય ચ ॥ ૧,૬૦.૮॥

ધનુઃ સુર ગુરોશ્ચૈવ શનેર્મકરકુમ્ભકૌ ।
મીનઃ સુરગુરોશ્ચૈવ ગ્રહક્ષેત્રં પ્રકીર્તિતમ્ ॥ ૧,૬૦.૯॥

પૌર્ણમાસ્યાદ્વયં તત્ર પૂર્વાષાઢાદ્વયં ભવેત્ ।
દ્વિરાષાઢઃ સ વિજ્ઞેયો વિષ્ણુઃ સ્વપિતિ કર્કટે ॥ ૧,૬૦.૧૦॥

અશ્વિની રેવતી ચિત્રા ધનિષ્ઠા સ્યાદલઙ્કૃતૌ ।
મૃગાહિકપિમાર્જારશ્વાનઃ સૂકરપક્ષિણઃ ॥ ૧,૬૦.૧૧॥

નકુલો મૂષકશ્ચૈવ યાત્રાયાં દક્ષિણે શુભઃ ।
વિપ્રકન્યા શિવા એષાં શઙ્ખભેરીવસુન્ધરાઃ ॥ ૧,૬૦.૧૨॥

વેણુસ્ત્રીપૂર્ણકુમ્ભાશ્ચ યાત્રાયાં દર્શનં શુભમ્ ।
જમ્બૂકોષ્ટ્રખરાદ્યાશ્ચ યાત્રાયાં વામકે શુભાઃ ॥ ૧,૬૦.૧૩॥

કાર્પાસૌષધિતૈલં ચ પક્કાઙ્ગારભુજઙ્ગમાઃ ।
મુક્તકેશી રક્તમાલ્યનગ્નાદ્યશુભમીક્ષિતમ્ ॥ ૧,૬૦.૧૪॥

હક્કાય લક્ષણં વક્ષ્યે લભત્પૂર્વે મહાફલમ્ ।
આગ્નેયે શોકસન્તાપૌ દક્ષિણે હાનિમાપ્નુયાત્ ॥ ૧,૬૦.૧૫॥

નૈરૃત્ય શોકસન્તાપૌ મિષ્ટાન્નં ચૈવ પશ્ચિમે ।
અર્થં પ્રાપ્નોતિ વાયવ્યે ઉત્તરે કલહોભવેત્ ॥ ૧,૬૦.૧૬॥

ઈશાને મરણં પ્રોક્તં હિક્કાયાશ્ચફલાફલમ્ ।
વિલિખ્ય રવિચક્રં તુ ભાસ્કરો નરસન્નિભઃ ॥ ૧,૬૦.૧૭॥

યસ્મિન્નૃક્ષે વસદ્ભાનુસ્તદાન્દિ ત્રીણિ મસ્તકે ।
ત્રયં વક્રે પ્રદાતવ્યમેકૈકં સ્કન્ધયોર્ન્યસેત્ ॥ ૧,૬૦.૧૮॥

એકૈકં બાહુયુગ્મે તુ એકૈક હસ્તયોર્દ્વયોઃ ।
હૃદયે પઞ્ચ ઋક્ષાણિ એકં નાભૌ પ્રદાપયેત્ ॥ ૧,૬૦.૧૯॥

ઋક્ષમેકં ન્યસેદ્ગુહ્યે એકૈકં જાનુકે ન્યસેત્ ।
નક્ષત્રાણિ ચ શેષાણિ રવિપાદે નિયોજયેત્ ॥ ૧,૬૦.૨૦॥

ચરણસ્થેન ઋક્ષેણ અલ્પાયુર્જાયતે નરઃ ।
વિદશગમનં જાનૌ ગુહ્યસ્થે પરદારવાન્ ॥ ૧,૬૦.૨૧॥

નાભિસ્થેનાલ્પસન્તુષ્ટો હૃત્સ્થેન સ્યાન્મહેશ્વરઃ ।
પાણિસ્થેન ભવેચ્ચૌરઃ સ્થાનભ્રષ્ટો ભવેદ્ધ્રુજ ॥ ૧,૬૦.૨૨॥

સ્કન્ધસ્થિતે ધનપતિર્મુખે મિષ્ટાન્નમાપ્નુયાત્ ।
મસ્તકે પટ્ટવસ્ત્રં સ્યાન્નક્ષત્રં યદિ સ્થિતમ્ ॥ ૧,૬૦.૨૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડં પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે ગ્રહદશાદિનિરૂપણં નામ ષષ્ટિતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૬૧

હરિરુવાચ ।

સપ્તમોપચયાદ્યસ્થશ્ચન્દ્રઃ સર્વત્ર શોભનઃ ।

શુક્લપક્ષે દ્વિતીયસ્તુ પઞ્ચમો નવમસ્તથા ॥ ૧,૬૧.૧॥

સમ્પૂજ્યમાનો લોકૈસ્તુ ગુરુવદ્દૃશ્યતે શશી ।

ચન્દ્રસ્ય દ્વાદશાવસ્થા ભવન્તિ શ ૃણુ તા અપિ ॥ ૧,૬૧.૨॥

ત્રિષુત્રિષુ ચ ઋક્ષેષુ અશ્વિન્યાદિ વદામ્યહમ્ ।

પ્રવાસસ્થં પુનર્દૃષ્ટં મૃતાવસ્થં જયાવહમ્ ॥ ૧,૬૧.૩॥

હાસ્યાવસ્થં નતા(ક્રીડા) વસ્થં પ્રમોદાવસ્થમેવ ચ ।

વિષાદાવસ્થભોગસ્થે જ્વરાવસ્થં વ્યવસ્થિતમ્ ॥ ૧,૬૧.૪॥

કમ્પા(ન્યા) વસ્થં સુખાવસ્થં દ્વાદશાવસ્થગં ભવેત્ ।

પ્રવાસો હાનિમૃન્યૃ ચ જયો હાસેરતિઃ સુખમ્ ॥ ૧,૬૧.૫॥

શોકો ભોગો જ્વરઃ કમ્પઃ સુખં ચેતિ ક્રમાત્ફલમ્ ।

જન્મસ્થઃ કુરુતે તુષ્ટિં દ્વિતીયે નાસ્તિ નિર્વૃતિઃ ॥ ૧,૬૧.૬॥

તૃતીયે રાજસન્માનં ચતુર્થે કલહાગમઃ ।

પઞ્ચમેન મૃગાઙ્કેન સ્ત્રીલાભો વૈ તથા ભવેત્ ॥ ૧,૬૧.૭॥

ધનધાન્યાગમઃ ષષ્ઠે રતિઃ પૂજા ચ સપ્તમે ।

અષ્ટમે પ્રાણસન્દેહો નવમે કોશસઞ્ચયઃ ॥ ૧,૬૧.૮॥

દશમે કાર્યનિષ્પત્તિર્ધ્રુવમેકાદશે જયઃ ।

દ્વાદશેન શશાઙ્કેન મૃત્યુરેવ ન સંખયઃ ॥ ૧,૬૧.૯॥

કૃત્તિકાદૌ ચ પૂર્વેણ સપ્તર્ક્ષાણિ ચ વૈ વ્રજેત્ ।

મઘાદૌ દક્ષિણે ગચ્છેદનુરાધાદિ પશ્ચિમે ॥ ૧,૬૧.૧૦॥

પ્રશસ્તા ચોત્તર યાત્રા ધનિષ્ઠાદિષુ સપ્તસુ ।

અશ્વિની રેવતી ચિત્રા ધનિષ્ઠા સમલઙ્કૃતૌ ॥ ૧,૬૧.૧૧॥

મૃગાશ્વિચિત્રાપુષ્યાશ્ચ મૂલા હસ્તા શુભાઃ સદા ।

કન્યાપ્રદાને યાત્રાયાં પ્રતિષ્ઠાદિષુ કર્મસુ ॥ ૧,૬૧.૧૨॥

શુક્રચન્દ્રૌ હિ જન્મસ્થૌ શુભદૌ ચ દ્વિતીયકે ।

શશિજ્ઞશુક્રજીવાશ્ચ રાશૌ રાશૌ ચાથ તૃતીયકે ॥ ૧,૬૧.૧૩॥

ભૌમમન્દશશાઙ્કાર્કા બુધઃ શ્રેષ્ઠશ્ચતુર્થકે ।

શુક્રજીવૌ પઞ્ચમે ચ ચન્દ્રકેતુસમાહિતૌ ॥ ૧,૬૧.૧૪॥

મન્દાકારૈ ચ કુજઃ ષષ્ઠે ગુરુચન્દ્રૌ ચ સપ્તમે ।
જ્ઞશુક્રાવષ્ટમે શ્રેષ્ઠૌ નવમસ્થો ગુરુઃ શુભઃ ॥ ૧,૬૧.૧૫॥

અર્કાર્કિચન્દ્રા દશમે ગ્રહા એકાદશે ખિલાઃ ।
બુધોઽથ દ્વાદશે ચૈવ ભાર્ગવઃ સુખદો ભવેત્ ॥ ૧,૬૧.૧૬॥

સિંહેન મકરઃ શ્રેષ્ઠઃ કન્યયા મેષ ઉત્તમઃ ।
તુલયા સહ મીનસ્તુ કુમ્ભેન સહકર્કટઃ ॥ ૧,૬૧.૧૭॥

ધનુષા વૃષભઃ શ્રેષ્ઠો મિથુનેન ચ વૃશ્ચિકઃ ।
એતત્ષડષ્ટકં?પ્રીત્યૈ ભવત્યેવ ન સંશયઃ ॥ ૧,૬૧.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે ગ્રહાણાં શુભાશુભસ્થાનાદિનિરૂપણં નામૈકપષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૨
MISSING
ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે લગ્નઘટિકા પ્રમાણાદિનિરૂપણં નામ દ્વિષષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૩
હરિરુવાચ ।
નરસ્ત્રીલક્ષણં વક્ષ્યે સંક્ષપાચ્છૃણુ શઙ્કર ।
અસ્વેદિનૌ મૃદુતલૌ કમલોદરસન્નિભૌ ॥ ૧,૬૩.૧॥

શ્લિષ્ટાઙ્ગુલી તામ્રનખૌ સુગુલ્ફૌ શિરયોજ્ઝિતૌ ।
કૂર્મોન્નતૌ ચ ચરણૌ સ્યાતાં નૃપવરસ્ય હિ ॥ ૧,૬૩.૨॥

વિરૂક્ષપાણ્ડુરનખૌ વક્રૌ ચૈવ શિરાનતૌ ।
સૂર્પાકારૌ ચ ચરણૌ સંખુષ્કૌ વિરલાઙ્ગુલી ॥ ૧,૬૩.૩॥

દુઃખદારિદ્યદૌ સ્યાતા નાત્ર કાર્યા વિચારણા ।
અલ્પરોમયુતા શ્રેષ્ઠા જઙ્ઘા હસ્તિકરોપમા ॥ ૧,૬૩.૪॥

રોમૈકૈકં કૂપકે સ્યાદ્ભૂપાનાં તુ મહાત્મનામ્ ।

દ્વેદ્વે રોમ્ણી પણ્ડિતાનાં શ્રોત્રિયાણાં તથૈવ ચ ॥ ૧,૬૩.૫॥

રોમત્રયં દરિદ્રાણાં રોગી નિર્માંસજાનુકઃ ।
અલ્પલિઙ્ગી ચ ધનવાન્સ્યાચ્ચ પુત્રાદિવર્જિતઃ ॥ ૧,૬૩.૬॥

સ્થૂલલિઙ્ગો દરિદ્રઃ સ્યાદ્દુઃખ્યેકવૃષણી ભવેત્ ।
વિષમેસ્ત્રીચઞ્ચલો વૈ નૃપઃ સ્યાદ્વૃષણે સમે ॥ ૧,૬૩.૭॥

પ્રલમ્બવૃષણોઽલ્પાયુર્નિર્દ્રવ્યઃ કુમણિર્ભવેત્ ।
પાણ્ડુરૈર્મલિનૈશ્ચૈવ મણિભિશ્ચ સુખી નરઃ ॥ ૧,૬૩.૮॥

નિઃ સ્વાઃ સશબ્દમૂત્રાઃ સ્યુર્નૃપા નિઃશબ્દધારયા ।
ભોગાઢ્યાઃ સમજઠરા નિઃ સ્વાઃ સ્યુર્ઘટસન્નિભાઃ ॥ ૧,૬૩.૯॥

સર્પોદરા દરિદ્રાઃ સ્યૂ રેખાભિશ્ચાયુરુચ્યતે ।
લલાટે યસ્ય દૃશ્યન્તે તિસ્રો રેખાઃ સમાહિતાઃ ॥ ૧,૬૩.૧૦॥

સુખી પુત્રસમાયુક્તઃ સ ષષ્ટિં જીવતે નરઃ ।
ચત્વારિંશચ્ચ વર્ષાણિ દ્વિરેખાદર્શનાન્નરઃ ॥ ૧,૬૩.૧૧॥

વિંશત્યબ્દં ત્વેકરેખા આકર્ણાન્તાઃ શતાયુષઃ ॥ ૧,૬૩.૧૨॥

સપ્તત્યાયુર્દ્વિરેખા તુ ષષ્ટ્યાયુસ્તિસૃભિર્ભવેત્ ।
વ્યક્તાવ્યક્તાભી રેખાભિર્વિંશત્યાયુર્ભવેન્નરઃ ॥ ૧,૬૩.૧૩॥

ચત્વારિંશચ્ચ વર્ષાણિ હીનરેખસ્તુ જીવતિ ।
ભિન્નાભિશ્ચૈવ રેખાભિરપમૃત્યુર્નરસ્ય હિ ॥ ૧,૬૩.૧૪॥

ત્રિશૂલં પટ્ટિશં વાપિ લલાટે યસ્ય દૃશ્યતે ।
ધનપુત્ર સમાયુક્તઃ સ જીવેચ્છરદઃ શતમ્ ॥ ૧,૬૩.૧૫॥

તર્જન્યા મધ્યમાઙ્ગુલ્યા આયૂરેખા તુ મધ્યતઃ ।
સમ્પ્રાપ્તા યા ભવેદ્રુદ્ર ! સ જીવેચ્છરદઃ શતમ્ ॥ ૧,૬૩.૧૬॥

પ્રથમા જ્ઞાનરેખા તુ હ્યઙ્ગુષ્ઠાદનુવર્તતે ।
મધ્યમામૂલગા રેખા આયૂરેખા અતઃ પરમ્ ॥ ૧,૬૩.૧૭॥

કનિષ્ઠિકાં સમાશ્રિત્ય આયૂરેખા સમાવિશેત્ ।
અચ્છિન્ના વા વિભક્તા વા સ જીવેચ્છરદઃ શતમ્ ॥ ૧,૬૩.૧૮॥

યસ્ય પાણિતલે રેખા આયુસ્તસ્ય પ્રકાશયેત્ ।

શતવર્ષાણિ જીવેચ્ચ ભોગી રુદ્ર ! ન સંશયઃ ॥ ૧,૬૩.૧૯॥

કનિષ્ઠિકાં સમાશ્રિત્ય મધ્યમાયામુપાગતા ।
ષષ્ઠિવર્ષાયુષં કુર્યાદાયૂરેખા તુ માનવમ્ ॥ ૧,૬૩.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે સામુદ્રિકે પુંલ્લક્ષણનિરૂપણં નામ ત્રિષષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૪
હરિરુવાચ ।
યસ્યાસ્તુ કુઞ્ચિતાઃ કેશા મુખં ચ પરિમણ્ડલમ્ ।
નાભિશ્ચ દક્ષિણાવર્તા સા કન્યા કુલવર્ધિની ॥ ૧,૬૪.૧॥

યા ચ કાઞ્ચનવર્ણાભા રક્તહસ્તસરોરુહા ।
સહસ્રાણાં તુ નારીણાં ભવેત્સાપિ પતિવ્રતા ॥ ૧,૬૪.૨॥

વક્રકેશા ચ યા કન્યા મણ્ડલાક્ષી ચ યા ભવેત્ ।
ભર્તા ચ મ્રિયતે તસ્યા નિયતં દુઃખભાગિની ॥ ૧,૬૪.૩॥

પૂર્ણચન્દ્રમુખી કન્યા બાલસૂર્યસમપ્રભા ।
વિશાલનેત્રા બિમ્બોષ્ઠી સા કન્યા લભતે સુખમ્ ॥ ૧,૬૪.૪॥

રેખાભિર્બહુભિઃ ક્લેશં સ્વલ્પાભિર્ધનહીનતા ।
રક્તાભિઃ સુખમાપ્નોતિ કૃષ્ણાભિઃ પ્રેષ્યતાંવ્રજેત્ ॥ ૧,૬૪.૫॥

કાર્યે ચ મન્ત્રી સત્સ્ત્રી સ્યાત્સતી (ખી) સ્યાત્કરણેષુ ચ ।
સ્નેહેષુ ભાર્યા માતા સ્યાદ્વેશ્યા ચ શયને શુભા ॥ ૧,૬૪.૬॥

અઙ્કુશં કુણ્ડલં ચક્રં યસ્યાઃ પાણિતલે ભવેત્ ।
પુત્રં પ્રસૂયતે નારી નરેન્દ્રં લભતે પતિમ્ ॥ ૧,૬૪.૭॥

યસ્યાસ્તુ રોમશૌ પાર્શ્વૌ રોમશૌ ચ પયોધરૌ ।
અન્નતૌ ચાધરોષ્ઠૌ ચ ક્ષિપ્રં મારયતે પતિમ્ ॥ ૧,૬૪.૮॥

યસ્યાઃ પાણિતલે રેખા પ્રાકારસ્તોરણં ભવેત્ ।
અપિ દાસકુલે જાતા રાજ્ઞીત્વમુપગચ્છતિ ॥ ૧,૬૪.૯॥

ઉદ્વૃત્તા કપિલા યસ્ય રોમરાજી નિરન્તરમ્ ।
અપિ રાજકુલે જાતા દાસીત્વમુપગચ્છતિ ॥ ૧,૬૪.૧૦॥

યસ્યા અનામિકાઙ્ગુષ્ઠૌ પૃથિવ્યાં નૈવ તિષ્ઠતઃ ।
પતિં મારયતે ક્ષિપ્રં સ્વેચ્છાચારેણ વર્તતે ॥ ૧,૬૪.૧૧॥

યસ્યા ગમનમાત્રેણ ભૂમિકમ્પઃ પ્રજાયતે ।
પતિં મારયતે ક્ષિપ્રં સ્વેચ્છાચારેણ વર્તતે ॥ ૧,૬૪.૧૨॥

ચક્ષુઃ સ્નેહેન સૌભાગ્યં દન્તસ્નેહેન ભોજનમ્ ।
ત્વચઃ સ્નેહેન શાય્યાં ચ પાદસ્નેહેન વાહનમ્ ॥ ૧,૬૪.૧૩॥

સ્નિગ્ધોન્નતૌ તામ્રનખૌ નાર્યાશ્ચ ચરણૌ શુભૌ ।
મત્સ્યાङ્કુશાબ્જચિહ્નૌ ચ ચક્રલાઙ્ગલલક્ષિતૌ ॥ ૧,૬૪.૧૪॥

અસ્વેદિનૌ મૂદુતલૌ પ્રશસ્તૌ ચરણૌ સ્ત્રિયાઃ ।
શુભે જઙ્ઘે વિરોમે ચ ઊરૂ હસ્તિકરોપમૌ ॥ ૧,૬૪.૧૫॥

અશ્વત્થપત્રસદૃશં વિપુલં ગુહ્યમુત્તમમ્ ।
નાભિઃ પ્રશસ્તા ગમ્ભીરા દક્ષિણાવર્તિકા શુભા ।
અરોમા ત્રિવલી નાર્યા હૃત્સ્તનૌ રોમવર્જિતૌ ॥ ૧,૬૪.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે સામુદ્રિકે સ્ત્રીલક્ષણનિરૂપણં નામ ચતુઃ ષષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૫
હરિરુવાચ ।
સમુદ્રોક્તં પ્રવક્ષ્યામિ નરસ્ત્રીલક્ષણં શુભમ્ ।
યેન વિજ્ઞાતમાત્રેણ અતીતાનાગતાપ્રમા ॥ ૧,૬૫.૧॥

અસ્વેદિનૌ મૃદુતલૌ કમલોદરસન્નિભૌ ।
શ્લેષ્ટાઙ્ગુલી તામ્રનખૌ પાદાવિષ્ણૌ શિરોજ્ઝિતૌ ॥ ૧,૬૫.૨॥

કૂર્મોન્નતૌ ગૂઢગુલ્ફૌ સુપાષ્ર્ણો નૃપતેઃ સ્મૃતૌ ।
શૂ(સર્) પાકારૌ વિરૂક્ષૌ ચ વક્રૌ પાદૌ શિરાલકૌ ॥ ૧,૬૫.૩॥

સંશુષ્કૌ પાણ્ડુરનખૌ નિઃ સ્વસ્ય વિરલાઙ્ગુલી ।
માર્ગાયોત્કણ્ટકૌ પાદૌ કષાયસદૃશૌ તથા ॥ ૧,૬૫.૪॥

વિચ્છિત્તિદૌ ચ વંશસ્ય બ્રહ્મઘ્નૌ શઙ્કુ (પક્વ) સન્નિભૌ ।
અગમ્યાગમને પ્રીતૌ જઙ્ઘા વિરલરોમિકા ॥ ૧,૬૫.૫॥

મૃદુરોમા સમા જઙ્ઘા તથા કરિકરપ્રભા ।
ઊરવો જાનવસ્તુલ્યા નૃપસ્યોપચિતાઃ સ્મૃતાઃ ॥ ૧,૬૫.૬॥

નિઃ સ્વસ્ય સૃગાલજઙ્ઘા રૌમૈકૈકં ચકૂપકે ।
નૃપાણાં શ્રોત્રિયાણાં ચ દ્વેદ્વે શ્રિયે ચ ધીમતામ્ ॥ ૧,૬૫.૭॥

ત્ર્યાદ્યૈર્નિઃ સ્વા માનવાઃ સ્યુર્દુઃસ્વભાજશ્ચ નિન્દિતાઃ ।
કેશાશ્ચ વૈ કુઞ્ચિતાશ્ચ પ્રવાસે મ્રિયતે નરઃ ॥ ૧,૬૫.૮॥

નિર્માંસજાનુઃ સૌભાગ્યમલ્પૈર્નિમ્નૈ રતિઃ સ્ત્રિયાઃ ।
વિકટૈશ્ચ દરિદ્રાઃ સ્યુઃ સમાંસૈ રાજ્યમેવ ચ ॥ ૧,૬૫.૯॥

મહદ્ભિરાયુરાખ્યાતં હ્યલ્પલિઙ્ગો ધની નરઃ ।
અપત્યરહિતશ્ચૈવ સ્થૂલલિઙ્ગો ધનોજ્ઝિતઃ ॥ ૧,૬૫.૧૦॥

મેઢ્રે વામનતે ચૈવ સુતાર્થરહિતો ભવેત્ ।
વક્રેઽન્યથા પુત્રવાન્ત્સ્યાદ્દારિદ્ર્યં વિનતેત્વધઃ ॥ ૧,૬૫.૧૧॥

અલ્પે ત્વતનયો લિઙ્ગેશિરાલેઽથ સુખી નરઃ ।
સ્થૂલગ્રન્થિયુતે લિઙ્ગે ભવેત્પુત્રાદિસંયુતઃ ॥ ૧,૬૫.૧૨॥

કોશગૂઢે દીર્ઘૈર્ભુગ્નૈશ્ચ ધનવર્જિતઃ ।
બલવાન્યુદ્ધશીલશ્ચ લઘુશેક્તઃ સ એવ ચ ॥ ૧,૬૫.૧૩॥

દુર્બલસ્ત્વેકવૃષણો વિષમાભ્યાઞ્ચલઃ સ્ત્રિયામ્ ।
સમાભ્યાં ક્ષિતિપઃ પ્રોક્તઃ પ્રલમ્બેન શતાબ્દવાન્ ॥ ૧,૬૫.૧૪॥

ઉદ્વૃ (ધ્દ્) તાભ્યાં ચ બદ્ધાયૂ રૂક્ષૈર્મણિભિરીશ્વરઃ ।
પાણ્ડરૈર્મણિભિર્નિઃ સ્વા મલિનૈઃ સુખભાગિનઃ ॥ ૧,૬૫.૧૫॥

સશબ્દનિઃ શબ્દમૂત્રાઃ સ્યુર્દરિદ્રાશ્ચ માનવાઃ ।
એકદ્વિત્રિચતુઃ પઞ્ચષડ્ભિર્ધારાભિરેવ ચ ॥ ૧,૬૫.૧૬॥

દક્ષિણાવર્તચલિતમૂત્રા ભિશ્ચ નૃપાઃ સ્મૃતાઃ ।
વિકીર્ણમૂત્રા નિઃ સ્વાશ્ચ પ્રધાનસુખદાયિકાઃ ॥ ૧,૬૫.૧૭॥

એકધારાશ્ચ વનિતાઃ સ્નિગ્ધૈર્મણિભિરુન્નતૈઃ ।
સમૈઃ સ્ત્રીરત્નધનિનો મધ્યે નિમ્નૈશ્ચ કન્યકાઃ ॥ ૧,૬૫.૧૮॥

શુષ્કૈર્નિશ્વા વિશુષ્કૈશ્ચ દુર્ભગાઃ પરિકીર્તિતાઃ ।
પુષ્પગન્ધે નૃપાઃ શુક્રે મધુગન્ધે ધનં બહુઃ ॥ ૧,૬૫.૧૯॥

પુત્રાઃ શુક્રે મત્સ્યગન્ધે તનુશુક્રે ચ કન્યકાઃ ।
મહાભોગી માંસગન્ધે યજ્વા સ્યાન્મદગન્ધિનિ ॥ ૧,૬૫.૨૦॥

દરિદ્રઃ ક્ષારગન્ધે ચ દીર્ઘાયુઃ શીઘ્રમૈથુની ।
અશીઘ્રમૈથુન્યલ્પાયુઃ સ્થૂલસ્ફિક્સ્યાદ્ધનોજ્ઝિતઃ ॥ ૧,૬૫.૨૧॥

માંસલસ્ફિક્સુખી સ્યાચ્ચ સિંહસ્ફિક્ભૂપતિઃ સ્મૃતઃ ।
ભવેત્સિંહકટી રાજા નિઃ સ્વઃ કપિકટિર્નરઃ ॥ ૧,૬૫.૨૨॥

સર્પોદરા દરિદ્રાઃ સ્યુઃ પિઠરૈશ્ચ ઘટૈઃ સમૈઃ ।
ધનિનો વિપુલૈઃ પાર્શ્વૈર્નિઃ સ્વા રક્તૈશ્ચ નિમ્નગૈઃ ॥ ૧,૬૫.૨૩॥

સમકક્ષાશ્ચ ભોગાઢ્યા નિમ્નકક્ષા ધનોજ્ઝિતાઃ ।
નૃપાશ્ચોન્નતકક્ષાઃ સ્યુર્જિહ્મા વિષમકક્ષકાઃ ॥ ૧,૬૫.૨૪॥

મત્સ્યોદરા બહુધના નાભિભિઃ સુખિનઃ સ્મૃતાઃ ।
વિસ્તીર્ણાભિર્બહુલાભિર્નિમ્નાભિઃ ક્લેશભાગિનઃ ॥ ૧,૬૫.૨૫॥

બલિમધ્યગતા નાભિઃ શૂલબાધાં કરોતિ હિ ।
વામાવર્તશ્ચ સાધ્યં વૈ મેધાં દક્ષિણતસ્તથા ॥ ૧,૬૫.૨૬॥

પાર્શ્વાયતા ચિરાયુર્દા તૂપવિષ્ટા ધનેશ્વરમ્ ।
અધો ગવાઢ્યં કુર્યાચ્ચ નૃપત્વં પદ્મકર્ણિકા ॥ ૧,૬૫.૨૭॥

એકબલિઃ શતાયુઃ સ્યાચ્છ્રીભોગી દ્વિવલિઃ સ્મૃતઃ ।
ત્રિવલિઃ ક્ષ્માપ આચાર્ય ઋજુભિર્વાલિભિઃ સુખી ॥ ૧,૬૫.૨૮॥

અગમ્યાગામી જિહ્મબલિર્ભૂપાઃ પાર્શ્વૈશ્ચ માંસલૈઃ ।
મૃદુભિઃ સુસમૈશ્ચૈવ દક્ષિણાવર્તરોમભિઃ ॥ ૧,૬૫.૨૯॥

વિપરીતૈઃ પરપ્રેષ્યા નિર્દ્રવ્યાઃ સુખવર્જિતાઃ ।
અનુદ્ધતૈશ્ચૂચુકૈશ્ચ ભવન્તિ સુભગા નરાઃ ॥ ૧,૬૫.૩૦॥

નિર્ધના વિષમૈર્દીર્ઘૈઃ પીતોપચિતકૈર્નૃપાઃ ।
સમોન્નતં ચ હૃદયમકમ્પં માંસલં પૃથુ ॥ ૧,૬૫.૩૧॥

નૃપાણામધમાનાં ચ ખરરોમશિરાલકમ્ ।
અર્થવાન્સમવક્ષાઃ સ્યાત્પીનૈર્વક્ષોભિરૂર્જિતઃ ॥ ૧,૬૫.૩૨॥

વક્ષોભિર્વિષમૈર્નિઃ સ્વઃ શસ્ત્રેણનિધનાસ્તથા ।

વિષમૈર્જત્રુભિર્નિઃ સ્વા અસ્થિનદ્ધૈશ્ચ માનવાઃ ॥ ૧,૬૫.૩૩॥

ઉન્નતૈર્ભોગિનો નિમ્નૈર્નિઃ સ્વાઃ પીનૈર્ધનાન્વિતાઃ ।
નિઃ સ્વશ્ચિપિટકણ્ઠઃ સ્યાચ્છિરાશુષ્કગલઃ સુખી ॥ ૧,૬૫.૩૪॥

શૂરઃ સ્યાન્મહિષગ્રીવઃ શાસ્ત્રાત્તો મૃગકણ્ઠકઃ ।
કમ્બુગ્રીવશ્ચ નૃપતિર્લમ્બકણ્ઠોઽતિભક્ષકઃ ॥ ૧,૬૫.૩૫॥

અરોમશા ભુગ્નપૃષ્ઠં શુભં ચાશુભમન્યથા ।
કક્ષાશ્વત્થદલા શ્રેષ્ઠા સુગન્ધિર્મૃગરોમિકા ॥ ૧,૬૫.૩૬॥

અન્યથા ત્વર્થહીનાનાં દારિદ્ર્યસ્ય ચ કારણમ્ ।
સમાસૌ ચૈવ ભુગ્નાલ્પૌ શ્લિષ્ટૌ ચ વિપુલૌ શુભૌ ॥ ૧,૬૫.૩૭॥

આજાનુલમ્બિતૌ બાહૂ વૃત્તૌ પીનૌ નૃપેશ્વરે ।
નિઃ સ્વાનાં રોમશૌ હ્રસ્વૌ શ્રેષ્ઠૌ કરિકર પ્રભૌ ॥ ૧,૬૫.૩૮॥

હસ્તાઙ્ગુલય એવ સ્યુવાયુદ્ધારયુતાઃ શુભાઃ ।
મેધાવિનાં ચ સૂક્ષ્માઃ સ્યુર્ભૃત્યાનાં ચિપિટાઃ સ્મૃતાઃ ॥ ૧,૬૫.૩૯॥

સ્થૂલાઙ્ગુલીભિર્નિઃ સ્વાઃ સ્યુર્નતાઃ સ્યુઃ સુકૃશૈસ્તદા ।
કપિતુલ્યકરાઃ નિઃ સ્વા વ્યાઘ્રતુલ્યકરૈર્બલમ્ ॥ ૧,૬૫.૪૦॥

પિતૃવિત્તવિનાશશ્ચ નિમ્નાત્કરતલાન્નરાઃ ।
મણિબન્ધૈર્નિગૂઢૈશ્ચ સુશ્લિષ્ટૈઃ શુભગન્ધિભિઃ ॥ ૧,૬૫.૪૧॥

નૃપા હીનાઃ કરચ્છૈદૈઃ સશબ્દૈર્ધનવર્જિતાઃ ।
સંવૃતૈશ્ચૈવ નિમ્નૈશ્ચ ધનિનઃ પરિકીર્તિતાઃ ॥ ૧,૬૫.૪૨॥

પ્રોત્તાનક રદાતારો વિષમૈર્વિષમા નરાઃ ।
કરૈઃ કરતલૈશ્ચૈવ લાક્ષાભૈરીશ્વરાસ્તલૈઃ ॥ ૧,૬૫.૪૩॥

પરદારરતાઃ પીતૈરૂક્ષૈર્નિઃ સ્વા નરા મતાઃ ।
તુષતુલ્યનખાઃ ક્લીબાઃ કુટિલૈઃ સ્ફુટિતૈર્નરાઃ ॥ ૧,૬૫.૪૪॥

નિઃ સ્વાશ્ચ કુનખૈસ્તદ્વદ્વિવર્ણૈઃ પરતર્કકાઃ ।
તામ્રૈર્ભૂપા ધનાઢ્યાશ્ચ અઙ્ગુષ્ઠૈઃ સયવૈસ્તથા ॥ ૧,૬૫.૪૫॥

અઙ્ગુષ્ઠમૂલજૈઃ પુત્રી સ્યાદ્દીર્ઘાઙ્ગુલિપર્વકઃ ।
દીર્ઘાયુઃ સુભગશ્ચૈવ નિર્ધનો વિરલાઙ્ગુલિઃ ॥ ૧,૬૫.૪૬॥

ઘનાઙ્ગુલિશ્ચ સધનસ્તિસ્રો રેખાશ્ચયસ્ય વૈ ।
નૃપતેઃ કરતલગા મણિબન્ધાત્સમુત્થિતાઃ ॥ ૧,૬૫.૪૭॥

યુગમીનાઙ્કિતનરો ભવેત્સત્રપ્રદો નરઃ ।
વજ્રાકારાશ્ચ ધનિનાં મત્સ્યપુચ્છનિભા બુધે ॥ ૧,૬૫.૪૮॥

શઙ્ખાતપત્રશિવિકાગજપદ્મોપમા નૃપે ।
કુમ્ભાઙ્કુશપતાકાભા મૃણાલાભા નિધીશ્વરે ॥ ૧,૬૫.૪૯॥

દામાભાશ્ચ ગવાઢ્યાનાં સ્વસ્તિકાભા નૃપેશ્વરે ।
ચક્રાસિતોમરધનુઃ કુન્તાભા નૃપતેઃ કરે ॥ ૧,૬૫.૫૦॥

અલૂખલાભા યજ્ઞાઢ્યા વેદીભા ચાગ્નિહોત્રિણિ ।
વાપીદેવકુલ્યાભાસ્ત્રિકોણાભાશ્ચધાર્મિકે ॥ ૧,૬૫.૫૧॥

અઙ્ગુષ્ઠમૂલગા રેખાઃ પુત્રાઃ સૂક્ષ્માશ્ચ દારિકાઃ ।
પ્રદેશિનીગતા રેખા કનિષ્ઠામૂલગામિની ॥ ૧,૬૫.૫૨॥

શતાયુષં ચ કુરુતે છિન્નયા તરુતો ભયમ્ ।
નિઃ સ્વાશ્ચ બહુરેખાઃ સ્યુનિર્દ્રવ્યાશ્ચિબુકૈઃ કૃશૈઃ ॥ ૧,૬૫.૫૩॥

માંસલૈશ્ચ ધનોપેતા આરક્તૈરધરૈર્નૃપાઃ ।
બિમ્બોપમૈશ્ચ સ્ફુટિતૈરોષ્ઠૈરૂક્ષૈશ્ચકણ્ડિતૈઃ ॥ ૧,૬૫.૫૪॥

વિષમૈર્ધનહીનાશ્ચ દન્તાઃ સ્નિગ્ધા ઘનાઃ શુભાઃ ।
તીક્ષ્ણા દન્તાઃ સમાઃ શ્રેષ્ઠા જિહ્વા રક્તા સમા શુભા ॥ ૧,૬૫.૫૫॥

શ્લક્ષ્ણા દીર્ઘા ચ વિજ્ઞેયા તાલૂ શ્વેતે ધનક્ષયે ।
કૃષ્ણે ચ પરુષો વક્રં સમં સૌમ્યં ચ સંવૃતમ્ ॥ ૧,૬૫.૫૬॥

ભૂપાનામમલં શ્લક્ષ્ણં વિપરીતં ચ દુઃખિનામ્ ।
મહા દુઃખં દુર્ભગાણાં સ્ત્રીમુખં પુત્રમાપ્નુયાત્ ॥ ૧,૬૫.૫૭॥

આઢ્યાનાં વર્તુલં વક્રં નિર્દ્રવ્યાણાં ચ દીર્ઘકમ્ ।
ભીરુવક્રઃ પાપકર્મા ધૂર્તાનાં ચતુરશ્રકમ્ ॥ ૧,૬૫.૫૮॥

નિમ્નં વક્રમપુત્રાણાં કૃપણાનાં ચ હ્રસ્વકમ્ ।
સમ્પૂર્ણં ભોગિનાં કાન્તં શ્મશ્રુ સ્નિગ્ધં શુભં મૃદુ ॥ ૧,૬૫.૫૯॥

સંહતં ચાસ્ફુટિતાગ્રં રક્તશ્મશ્રુશ્ચ ચૌરકઃ ।
રક્તાલ્પપરુષશ્મશ્રુકર્ણાઃ સ્યુઃ પાપમૃત્યવઃ ॥ ૧,૬૫.૬૦॥

નિર્માંસૈશ્ચિપિટૈર્ભોગાઃ કૃપણા હ્રસ્વકર્ણકાઃ ।
શઙ્કુકર્ણાશ્ચ રાજાનો રોમકર્ણા ગતાયુષઃ ॥ ૧,૬૫.૬૧ ॥

બૃહત્કર્ણાશ્ચ ધનિનોરાજાનઃ પરિકીર્તિતાઃ ।
કર્ણૈઃ સ્નિગ્ધાવનદ્ધૈશ્ચ વ્યાલમ્બૈર્માંસલૈર્નૃપાઃ ॥ ૧,૬૫.૬૨ ॥

ભોગી વૈ નિમ્નગણ્ડઃ સ્યાન્મત્રી સમ્પૂર્ણગણ્ડકઃ ।
શુકનાસઃ સુખી સ્યાચ્ચ શુષ્કનાસોઽતિજીવનઃ ॥ ૧,૬૫.૬૩ ॥

છિન્નાગ્રકૂપનાસઃ સ્યાદગમ્યાગમને રતઃ ।
દીર્ઘનાસે ચ સૌભાગ્યં ચૌરશ્ચાકુઞ્ચિતેન્દ્રિયઃ ॥ ૧,૬૫.૬૪ ॥

મૃત્યુશ્ચિપિટનાસે સ્યાદ્ધીનો ભાગ્યવતાં ભવેત્ ।
સ્વલ્પચ્છિદ્રૌ સુપુટૌ ચ અવક્રૌ ચ નૃપેશ્વરે ॥ ૧,૬૫.૬૫ ॥

ક્રૂરે દક્ષિણવક્રા સ્યાદ્ધલિનાં ચ ક્ષુતં સકૃત્ ।
સ્યાદ્વિનિષ્પિણ્ડિતં હ્રાદિ સાનુનાદં ચ જીવકૃત્ ॥ ૧,૬૫.૬૬ ॥

વક્રાન્તૈઃ પદ્મપત્રાભૈર્લોચનૈઃ સુખભાગિનઃ ।
માર્જારલોચનૈઃ પાપ્મા દુરાત્મા મધુપિઙ્ગલૈઃ ॥ ૧,૬૫.૬૭ ॥

ક્રૂરાઃ કેકરનેત્રાશ્ચ હરિતાક્ષાઃ સકલ્મષાઃ ।
જિહ્યૈશ્ચ લોચનૈઃ શૂરાઃ સેનાન્યો ગજલોચનાઃ ॥ ૧,૬૫.૬૮ ॥

ગમ્ભીરાક્ષા ઈશ્વરાઃ સ્યુર્મન્ત્રિણઃ સ્થૂલચક્ષુષઃ ।
નીલોત્પ લાક્ષા વિદ્વાંસઃ સૌભાગ્યં શ્યામચક્ષુષામ્ ॥ ૧,૬૫.૬૯ ॥

સ્યાત્કૃષ્ણતારકાક્ષાણામક્ષ્ણામુત્પાટનં કિલ ।
મણ્ડલાક્ષાશ્ચ પાપાઃ સ્યુર્નિઃ સ્વાઃ સ્યુર્દેનલોચનાઃ ॥ ૧,૬૫.૭૦ ॥

દૃક્સ્નિગ્ધા વિપુલા ભોગે અલ્પાયુરધિકોન્નતા ।
વિશાલોન્નતા સુખિની દરિદ્રા વિષમભ્રુવઃ ॥ ૧,૬૫.૭૧ ॥

ધનદીર્ઘાસુસક્તભ્રૂર્બાલેન્દૂન્નતસુભ્રુવઃ ।
આઢ્યો નિઃ સ્વશ્ચ ખણ્ડભ્રૂર્મધ્યે ચ વિનતભ્રુવઃ ॥ ૧,૬૫.૭૨ ॥

સ્ત્રીષુ ગમ્યાસુ સક્તાઃ સ્યુઃ સુતાર્થે પરિવર્જિતાઃ ।
અન્નતૈર્વિપુલૈઃ શઙ્ખૈર્લલાટૈર્વિષમૈસ્તથા ॥ ૧,૬૫.૭૩ ॥

નિર્ધના ધનવન્તશ્ચ અર્ધેન્દુસદૃશૈર્નરાઃ ।

આચાર્યાઃ શુક્તિવિશાલૈઃ શિરાલૈઃ પાપકારિણઃ ॥ ૧,૬૫.૭૪॥

અન્નતાભૈઃ શિરાભિશ્ચ સ્વસ્તિકાભિર્ધનેશ્વરાઃ ।
નિમ્નૈર્લલાટૈર્બન્ધાર્હાઃ ક્રૂરકર્મરતાસ્તથા ॥ ૧,૬૫.૭૫॥

સંવૃતૈશ્ચ લલાટૈશ્ચ કૃપણા ઉન્નતૈર્નૃપાઃ ।
અનશ્રુ સ્નિગ્ધરુદિતમદીનં શુભદં નૃણામ્ ॥ ૧,૬૫.૭૬॥

પ્રચુરાશ્રુદીનં રૂક્ષં ચ રુદિતં ચ સુખાવહમ્ ।
અકમ્પં હસિતં શ્રેષ્ઠં મીલિતાક્ષમઘાવહમ્ ॥ ૧,૬૫.૭૭॥

અસકૃદ્ધસિતં દુષ્ટં સોન્માદસ્ય હ્યનેકધા ।
લલાટોપસૃતાસ્તિસ્રો રેખાઃ સ્યુઃ શતવર્ષિણામ્ ॥ ૧,૬૫.૭૮॥

નૃપત્વં સ્યાચ્ચતસૃભિરાયુઃ પઞ્ચનવત્યથ ।
અરેખેણાયુર્નવતિર્વિચ્છિન્નાભિશ્ચ પુંશ્ચલાઃ ॥ ૧,૬૫.૭૯॥

કેશાન્તોપગતાભિશ્ચ અશીત્યાયુર્નરો ભવેત્ ।
પઞ્ચભિઃ સપ્તભિઃ ષડ્ભિઃ પઞ્ચાશદ્બહુભિસ્તથા ॥ ૧,૬૫.૮૦॥

ચત્વારિંશચ્ચ વક્રાભિસ્ત્રિંશદ્ભ્રૂલગ્નગામિભિઃ ।
વિંશતિર્વામવક્રા ભિરાયુઃ ક્ષુદ્રાભિરલ્પકમ્ ॥ ૧,૬૫.૮૧॥

છત્રાકારૈઃ શિરોભિસ્તુ નૃપા નિમ્નશિરા ધની ।
ચિપિટૈશ્ચ પિતુર્મૃત્યુર્ગવાદ્યાઃ પરિમણ્ડલૈઃ ॥ ૧,૬૫.૮૨॥

ઘટમૂર્ધા પાપરુચિર્ધનાઢ્યૈઃ પરિવર્જિતઃ ।
કૃષ્ણૈરાકુઞ્ચિતૈઃ કેશૈઃ સ્નિગ્ધૈરેકૈકસમ્ભવૈઃ ॥ ૧,૬૫.૮૩॥

અભિન્નાગ્રૈશ્ચ મૃદુભિર્ન ચાતિબહુભિર્નૃપાઃ ।
બહુમૂલૈશ્ચ વિષમૈઃ સ્થૂલાગ્રૈઃ કપિલૈસ્તથા ॥ ૧,૬૫.૮૪॥

નિઃ સ્વાશ્ચૈવાતિકુચિલૈર્ઘનૈરસિત (ધિક) મૂર્ધજૈઃ ।
યદ્યદ્ગાત્રં મહારૂક્ષં શિરાલં માંસવર્જિતમ્ ॥ ૧,૬૫.૮૫॥

તત્તત્સ્યા દશુભં સર્વં તતોઽન્યથા ।
વિપુલસ્ત્રિષુ ગમ્ભીરો દીર્ઘઃ સૂક્ષ્મશ્ચ પઞ્ચસુ ॥ ૧,૬૫.૮૬॥

ષડુન્નતશ્ચતુર્હ્રસ્વો રક્તઃ સપ્તસ્વસૌ નૃપઃ ।
નાભિઃ સ્વરશ્ચ સસત્ત્વં ચ ત્રયં ગમ્ભીરમીરિતમ્ ॥ ૧,૬૫.૮૭॥

પુંસઃ સ્યાદતિવિસ્તીર્ણં લલાટં વદનં હ્યુરઃ ।
ચક્ષુઃ કક્ષા નાસિકા ચ ષટ્સ્યુર્નૃપકૃકાટિકાઃ ॥ ૧,૬૫.૮૮॥

ઉન્નતાનિ ચ હ્રસ્વનિ જઙ્ઘા ગ્રીવા ચ લિઙ્ગકમ્ ।
પૃષ્ઠં ચત્વારિ રક્તાનિ કરતાલ્વધરા નખાઃ ॥ ૧,૬૫.૮૯॥

નેત્રાન્તપાદજિહ્વૌષ્ઠાઃ પઞ્ચ સૂક્ષ્માણિ સન્તિ વૈ ।
દશનાઙ્ગુલિપર્વાણિ નખકેશત્વચઃ શુભાઃ ॥ ૧,૬૫.૯૦॥

દીર્ઘાઃ સ્તનાન્તરં બાહુદન્તલોચનનાસિકાઃ ।
નરાણાં લક્ષણં પ્રોક્તં વદામિ સ્ત્રીષુ લક્ષણમ્ ॥ ૧,૬૫.૯૧॥

રાજ્ઞ્યાઃ સ્નિગ્ધૌ સમૌ પાદૌ તલૌ તામ્રૌ નખૌ તથા ।
શ્લિષ્ટાઙ્ગુલી ચોન્નતાગ્રૌ તાં પાપ્ય નૃપતિર્ભવેત્ ॥ ૧,૬૫.૯૨॥

નિગૂઢગુલ્ફોપચિતૌ પદ્મકાન્તિતલૌ શુભૌ ।
અસ્વેદિનૌ મૃદુતલૌ મત્સ્યાઙ્કુશધ્વજાઞ્ચિતૌ ॥ ૧,૬૫.૯૩॥

વજ્રાબ્જહલચિહ્નૌ ચ દાસ્યાઃ પાદૌ તતોઽન્યથા ।
જઙ્ઘે ચ રોમરહિતે સુવૃત્તે વિશિરે શુભે ॥ ૧,૬૫.૯૪॥

અનુલ્બણં સન્ધિદેશં સમં જાનુદ્વયં શુભમ્ ।
ઊરૂ કરિકરાકારાવરોમૌ ચ સમૌ શુભૌ ॥ ૧,૬૫.૯૫॥

અશ્વત્થપત્રસદૃશં વિપુલં ગુહ્યમુત્તમમ્ ।
શ્રોણીલલાટકં સ્ત્રીણામૂરુ કૂર્મોન્નતં શુભમ્ ॥ ૧,૬૫.૯૬॥

ગૂઢો મણિશ્ચ શુભદો નિતમ્બશ્ચ ગુરુઃ શુભઃ ।
વિસ્તીર્ણમાંસોપચિતા ગમ્ભીરા વિપુલા શુભા ॥ ૧,૬૫.૯૭॥

નાભિઃ પ્રદક્ષિણાવર્તા મધ્યં ત્રિબલિશોભિતમ્ ।
અરોમશૌ સ્તનૌ પીનૌ ઘનાવવિષમૌ શુભૌ ॥ ૧,૬૫.૯૮॥

કઠિનૌ રોમશા શસ્તા મૃદુગ્રીવા ચ કમ્બુભા ।
આરક્તાવધરૌ શ્રેષ્ઠૌ માંસલં વર્તુલં મુખમ્ ॥ ૧,૬૫.૯૯॥

કુન્દપુષ્પસમા દન્તા ભાષિતં કોકિલાસમમ્ ।
દાક્ષિણ્યયુક્તમશઠં હંસશબ્દસુખાવહમ્ ॥ ૧,૬૫.૧૦૦॥

નાસા સમા સમપુટા સ્ત્રીણાં તુ રુચિરા શુભા ।
નીલોત્પલનિભં ચક્ષુર્નાસાલગ્નં ન લમ્બકમ્ ॥ ૧,૬૫.૧૦૧॥

ન પૃથૂ બાલેન્દુનિભે ભ્રુવૌ ચાથ લલાટકમ્ ।
શુભમર્ધેન્દુસંસ્થાનમતુઙ્ગં સ્યાદલોમશમ્ ॥ ૧,૬૫.૧૦૨॥

સુમાંસલં કર્ણયુગ્મં સમં મૃદુ સમાહિતમ્ ।
સ્નિગ્ધા નીલાશ્ચ મૃદવો મૂર્ધજાઃ કુઞ્ચિતાઃ કચાઃ ॥ ૧,૬૫.૧૦૩॥

સ્ત્રીણાં સમં શિરઃ શ્રેષ્ઠં પાદે પાણિતલેઽથ વા ।
વાજિકુઞ્જરશ્રીવૃક્ષયૂપેષુયવતોમરૈઃ ॥ ૧,૬૫.૧૦૪॥

ધ્વજચામરમાલાભિઃ શૈલકુણ્ડલવેદિભિઃ ।
શઙ્ખાતપત્રપદ્મૈશ્ચ મત્સ્યસ્વસ્તિકસદ્રથૈઃ ॥ ૧,૬૫.૧૦૫॥

લક્ષણૈરઙ્કુશાદ્યૈશ્ચ સ્ત્રિયઃ સ્યૂ રાજવલ્લભાઃ ।
નિગૂઢમણિબન્ધૌ ચ પદ્મગર્ભોપમૌ કરૌ ॥ ૧,૬૫.૧૦૬॥

ન નિમ્નં નોન્નતં સ્ત્રીણાં ભવેત્કરતલં શુભમ્ ।
રેખાન્વિતં ત્વવિધવાં કુર્યાત્સંભોગિનીં સ્ત્રિયમ્ ।
રેખા યા મણિબન્ધોત્થા ગતા મધ્યાઙ્ગુલિં કરે ॥ ૧,૬૫.૧૦૭॥

ગતા પાણિતલે યા ચ યોર્ધ્વપાદતલે સ્થિતા ।
સ્ત્રીણાં પુંસાં તથા સા સ્યાદ્રાજ્યાય ચ સુખાય ચ ॥ ૧,૬૫.૧૦૮॥

કનિષ્ઠિકામૂલભવા રેખા કુર્યાચ્છતાયુષમ્ ।
પ્રદેશિનીમધ્યમાભ્યામન્તરાલગતા સતી ॥ ૧,૬૫.૧૦૯॥

ઊના ઊનાયુષં કુર્યાદ્રેખાશ્ચાઙ્ગુષ્ઠમૂલગાઃ ।
બૃહત્યઃ પુત્રાસ્તન્વ્યસ્તુ પ્રમદાઃ પરિકીર્તિતાઃ ॥ ૧,૬૫.૧૧૦॥

સ્વલ્પાયુષો બહુ (લઘુ) ચ્છિન્ના દીર્ઘાછિન્ના મહાયુષમ્ ।
શુભં તુ લક્ષણં સ્ત્રીણાં પ્રોક્તં ત્વશુભમન્યથા ॥ ૧,૬૫.૧૧૧॥

કનિષ્ઠિકાનામિકા વા યસ્યા ન સ્પૃશતે મહીમ્ ।
અઙ્ગુષ્ઠં વા ગતાતીત્ય તર્જની કુલટા ચ સા ॥ ૧,૬૫.૧૧૨॥

ઊર્ધ્વં દ્વાભ્યાં પિણ્ડિકાભ્યાં જઙ્ઘે ચાતિશિરાલકે ।
રોમશેચાતિમાંસે ચ કુમ્ભાકારં તથોદરમ્ ॥ ૧,૬૫.૧૧૩॥

વામાવર્તં નિમ્નમલ્પં દુઃખિતાનાં ચ ગુહ્યકમ્ ।
ગ્રીવયા હ્રસ્વયા નિઃ સ્વા દીર્ઘયા ચ કુલક્ષયઃ ॥ ૧,૬૫.૧૧૪॥

પૃથુલયા પ્રચણ્ડાશ્ચ સ્ત્રિયઃ સ્યુર્નાત્ર સંશયઃ ।
કેકરે પિઙ્ગલે નેત્રે શ્યામે લોલેક્ષણા સતી ॥ ૧,૬૫.૧૧૫॥

સ્મિતે કૂપે ગણ્ડયોશ્ચ સા ધ્રુવં વ્યભિચારિણી ।
પ્રલમ્બિની લલાટે તુ દેવરં હન્તિ ચાઙ્ગના ॥ ૧,૬૫.૧૧૬॥

ઉદરે શ્વશુરં હન્તિ પતિં હન્તિ સ્ફિચોર્દ્વયોઃ ।
યા તુ રોમોત્તરૌષ્ઠી સ્યાન્ન શુભા ભર્તુરેવ હિ ॥ ૧,૬૫.૧૧૭॥

સ્તનૌ સરોમાવશુભૌ કર્ણૌ ચ વિષમૌ તથા ।
કરાલા વિષમા દન્તાઃ ક્લેશાય ચ ભવન્તિ તે ॥ ૧,૬૫.૧૧૮॥

ચૌર્યાય કૃષ્ણમાંસાશ્ચ દીર્ઘા ભુર્તુશ્ચ મૃત્યવે ।
ક્રવ્યાદરૂપૈર્હસ્તૈશ્ચ વૃકકાકાદિસન્નિભૈઃ ॥ ૧,૬૫.૧૧૯॥

શિરાલૈર્વિષમૈઃ શુષ્કૈર્વિત્તહીના ભવન્તિ હિ ।
સમુન્નતોત્તરેષ્ઠી યા કલહે રૂક્ષભાષિણી ॥ ૧,૬૫.૧૨૦॥

સ્ત્રીષુ દોષા વિરૂપાસુ પત્રાકારો ગુણાસ્તતઃ ।
નરસ્ત્રીલક્ષણં પ્રોક્તં વક્ષ્યે તજ્જ્ઞાનદાયકમ્ ॥ ૧,૬૫.૧૨૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે સામુદ્રિકે સ્ત્રીનરલક્ષણં નામ પઞ્ચષષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૬

હરિરુવાચ ।
નિર્લક્ષણા શુભા સ્યાચ્ચ ચક્રાઙ્કિતશિલાર્ચનાત્ ।
આદૌ સુદર્શનો મૂર્તિર્લક્ષ્મીનારાયણઃ પરઃ ॥ ૧,૬૬.૧॥

ત્રિચક્રોઽસાવચ્યુતઃ સ્યાચ્ચતુશ્ચક્રશ્ચતુર્ભુજઃ ।
વાસુદેવશ્ચ પ્રદ્યુમ્નસ્તતઃ સઙ્કર્ષણઃ સ્મૃતઃ ॥ ૧,૬૬.૨॥

પુરુષોત્તમશ્ચાષ્ટમઃ સ્યાન્નવ્યૂહો દશાત્મકઃ ।
એકાદશોઽનિરુદ્ધઃ સ્યાદ્દ્વાદશો દ્વાદશાત્મકઃ ॥ ૧,૬૬.૩॥

અત ઊર્ધ્વમનન્તઃ સ્યાચ્છક્રે રેકાદિકૈઃ ક્રમાત્ ।
સુદર્શના લક્ષિતાશ્ચ પૂજિતાઃ સર્વકામદાઃ ॥ ૧,૬૬.૪॥

શાલગ્રામશિલા યત્ર દેવો દ્વારવતીભવઃ ।

ઉભયોઃ સંગમો યત્ર તત્ર મુક્તિર્ન સંશયઃ ॥ ૧,૬૬.૫॥

શાલગ્રામો દ્વારકા ચ નૈમિષં પુષ્કરં ગયા ।
વારાણસી પ્રયાગશ્ચ કુરુક્ષેત્રં ચ સૂકરમ્ ॥ ૧,૬૬.૬॥

ગઙ્ગા ચ નર્મદા ચૈવ ચન્દ્રભાગા સરસ્વતી ।
પુરુષોત્તમો મહાકાલસ્તીર્થાન્યેતાનિ શઙ્કર ॥ ૧,૬૬.૭॥

સર્વપાપહરાણ્યેવ ભુક્તમુક્તિપ્રદાનિ વૈ ।
પ્રભવો વિભવઃ શુક્લઃ પ્રમોદોઽથ પ્રજાપતિઃ ॥ ૧,૬૬.૮॥

અઙ્ગિરાઃ શ્રીમુખો ભાવઃ યુવા ધાતા તથૈવ ચ ।
ઈશ્વરો બહુધાન્યશ્ચ પ્રમાથી વિક્રમો વિષુઃ ॥ ૧,૬૬.૯॥

ચિત્રભાનુઃ સ્વબાનુશ્ચ તારણઃ પાર્થિવો વ્યયઃ ।
સર્વજિત્સર્વધારી ચ વિરોધી વિકૃતિઃ ખરઃ ॥ ૧,૬૬.૧૦॥

નન્દનો વિજયશ્ચૈવ જયો મન્મથદુર્મુખૌ ।
હેમલમ્બો વિલંબશ્ચ વિકારઃ શર્વરી પ્લવઃ ॥ ૧,૬૬.૧૧॥

શુભકૃચ્છોભનઃ ક્રોધી વિશ્વાવમુપરાભવૌ ।
પ્લવઙ્ગઃ કીલકઃ સૌમ્યઃ સાધારણવિરોધકૃત્ ॥ ૧,૬૬.૧૨॥

પરિધાવી પ્રમાદી ચ આનન્દો રાક્ષસો નલઃ ।
પિઙ્ગલઃ કાલસિદ્ધાર્થૌ રૌદ્રિર્વૈ દુર્મતિસ્તથા ॥ ૧,૬૬.૧૩॥

દુન્દુભી રુધિરોદ્ગારી રક્તાક્ષઃ ક્રોધનોઽક્ષયઃ ।
અશોભનાઃ શોભનાશ્ચ નામ્નૈવૈતે હિ વત્સરાઃ ॥ ૧,૬૬.૧૪॥

કાલં વક્ષ્યામિ સંસિદ્ધ્યૈ રુદ્ર પઞ્ચસ્વરોદયાત્ ।
રાજા સા(મા) જા ઉદાસા ચ પીડા મૃત્યુસ્તથૈવ ચ ॥ ૧,૬૬.૧૫॥

આ ઈ ઊ ઐ ઔ સ્વરાંશ્ચ લિખેત્પઞ્ચાગ્નિકોષ્ઠકે ।
ઊર્ધ્વતિર્યગ્ગતૈ રેખૈઃ ષડ્ભિક્રિમમાગતૈઃ ॥ ૧,૬૬.૧૬॥

તિથી એકા ગ્નિકોષ્ઠેષુ ત્રયો રાજાથ સા (મા) જયાઃ ।
ઉદાસામૃત્યુપીડાશ્ચ કુજઃ સોમસુતઃ ક્રમાત્ ॥ ૧,૬૬.૧૭॥

ગુરુશુક્રૌ ચ મન્દશ્ચ રવિચન્દ્રૌ યથોદિતમ્ ।
રેવત્યાદિમૃગાન્તાશ્ચ ઋક્ષાણિ પ્રથમા કલા ॥ ૧,૬૬.૧૮॥

પઞ્ચપઞ્ચાન્યત્ર ભાનિ ચૈત્રાદ્ય ઉદયસ્તથા ।
દ્વાદશાહૈર્દ્વયોર્માસનામ્નોરાદ્યક્ષરં તથા ॥ ૧,૬૬.૧૯॥

કલાલિઙ્ગા ચ યા તિષ્ઠેત્પઞ્ચમસ્તસ્ય વૈ મૃતિઃ ।
કલા તિથિસ્તથા વારો નક્ષત્રં માસમેવ ચ ॥ ૧,૬૬.૨૦॥

નામોદયસ્ય પૂર્વં ચ તથા ભવતિ નાન્યથા ।
ૐ ક્ષૈં (ક્ષૌઃ) શિવાય નમઃ ॥ ૧,૬૬.૨૧॥

ક્ષામાદ્યઙ્ગશિવામીક્ષા વિષગ્રહમતિર્હર ।
ત્રૈલોક્યમોહનં બીજં નૃસિંહસ્ય તુ પદ્મ(ન્ન)ગમ્ ॥ ૧,૬૬.૨૨॥

મૃત્યુઞ્જયો ગણો લક્ષ્મી રોચનાદ્યૈસ્તુ લેખિતઃ ।
ભૂર્જે તુ ધારિતાઃ કણ્ઠે બાહૌ ચેતિ જયાદિદાઃ ॥ ૧,૬૬.૨૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્યોતિઃ શાસ્ત્રે શાલગ્રામષષ્ટ્યૂબ્દસ્વરોદયાનાં નિરૂપણં નામ ષટ્ષષ્ટિતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૭
(ઇતિ જ્યોતિઃ શાસ્ત્રં સમાપ્તમ્) ।
સૂત ઉવાચ ।
હરેઃ શ્રુત્વા હરો ગૌરીં દેહસ્થં જ્ઞાનમબ્રવીત્ ॥ ૧,૬૭.૧॥

કુજો વહ્ની રવિઃ પૃથ્વી સૌરિરાપઃ પ્રકીર્તિતઃ ।
વાયુસંસ્થાસ્થિતો રાહુર્દક્ષરન્ધ્રાવભાસકઃ ॥ ૧,૬૭.૨॥

ગુરુઃ શુક્રસ્તથા સૌમ્યશ્ચન્દ્રશ્ચૈવ ચતુર્થકઃ ।
વામનાડીં તુ મધ્યસ્થાં કારયેદાત્મનસ્તથા ॥ ૧,૬૭.૩॥

યદાચર ઇલાયુક્તસ્તદા કર્મસમાચરેત્ ।
સ્થાનસેવાં તથા ધ્યાનં વાણિજ્યં રાજદર્શનમ્ ॥ ૧,૬૭.૪॥

અન્યાનિ શુભકર્માણિ કારયેત પ્રયત્નતઃ ।
દક્ષનાડીપ્રવાહે તુ શનિર્ભૌમશ્ચ સૈહિકઃ ॥ ૧,૬૭.૫॥

ઇનશ્ચૈવ તથાખ્યે પાપાનામુદયો ભવેત્ ।
શુભાશુભવિવેકો હિ જ્ઞાયતે તુ સ્વરોદયાત્ ॥ ૧,૬૭.૬॥

દેહમધ્યે સ્થિતા નાડ્યો બહુરૂપાઃ સુવિસ્તરાઃ ।

નાભેરધસ્તાધઃ કન્દસ્ત્વઙ્કુરાસ્તત્ર નિર્ગતાઃ ॥ ૧,૬૭.૭॥

દ્વિસપ્તતિસહસ્રાણિ નાભિમધ્યે વ્યવસ્થિતે ।
ચક્રવચ્ચ સ્થિતાસ્તાસ્તુ સર્વાઃ પ્રાણહરાઃ સ્મૃતાઃ ॥ ૧,૬૭.૮॥

તાસાં મધ્યે ત્રયઃ શ્રેષ્ઠા વામદક્ષૈણમધ્યમાઃ ।
વામા સોમાત્મિકા પ્રોક્તા દક્ષિણા રવિસન્નિભા ॥ ૧,૬૭.૯॥

મધ્યમા ચ ભવેદગ્નિઃ ફલન્તી કાલપૂરિણી ।
વામા હ્યમૃતરૂપા ચ જગદાપ્યાયને સ્થિતા ॥ ૧,૬૭.૧૦॥

દક્ષિણા રૌદ્રભાગેન જગચ્છોષયતે સદા ।
દ્વયોર્વાહે તુ મૃત્યુઃ સ્યાત્સર્વકાર્યવિનાશિની ॥ ૧,૬૭.૧૧॥

નિર્ગમે તુ ભવેદ્વામા પ્રવેશે દક્ષૈણા સ્મૃતા ।
ઇડાચારે તથા સૌમ્યં ચન્દ્રસૂર્યગતસ્તથા ॥ ૧,૬૭.૧૨॥

કારયેત્ક્રૂર કર્માણિ પ્રાણે પિઙ્ગલસંસ્થિતે ।
યાત્રાયાં સર્વકાર્યેષુ વિષાપહારણે ઇડા ॥ ૧,૬૭.૧૩॥

ભોજને મૈથુને યુદ્ધે પિઙ્ગલા સિદ્ધિદાયિકા ।
ઉચ્ચાટમારણાદ્યેષુ કર્મસ્વેતેષુ પિઙ્ગલા ॥ ૧,૬૭.૧૪॥

મૈથુને ચૈવ સંગ્રામે ભોજને સિદ્ધિદાયિકા ।
શોભનેષુ ચ કાર્યેષુ યાત્રાયાં વિષકર્મણિ ॥ ૧,૬૭.૧૫॥

શાન્તિમુક્ત્યર્થસિદ્ધ્યૈ ચ ઇડા યોજ્યા નરાધિપૈઃ ।
દ્વાભ્યાં ચૈવ પ્રવાહે ચ ક્રૂરસૌમ્યવિવર્જને ॥ ૧,૬૭.૧૬॥

વિષવત્તં તુ જાનીયાત્સંસ્મરેત્તુ વિચક્ષણઃ ।
સૌમ્યાદિશુભકાર્યેષુ લાભાદિજયજીવિતે ॥ ૧,૬૭.૧૭॥

ગમનાગમને ચૈવ વામા સર્વત્ર પૂજિતા ।
યુદ્ધાદિભોજને ઘાતે સ્ત્રીણાં ચૈવ તુ સંગમે ॥ ૧,૬૭.૧૮॥

પ્રશસ્તા દક્ષિણા નાડી પ્રવેશે ક્ષુદ્રકર્મણિ ।
શુભાશુભાનિ કાર્યાણિ લાભાલાભૌ જયાજયૌ ॥ ૧,૬૭.૧૯॥

જીવાજીવાય યત્પૃચ્છેન્ન સિધ્યતિ ચ મધ્યમા ।
વામાચારેઽથવા દક્ષે પ્રત્યયે યત્ર નાયકઃ ॥ ૧,૬૭.૨૦॥

તનુસ્થઃ પૃચ્છતે યસ્તુ તત્ર સિદ્ધિર્ન સંશયઃ ।
વૈચ્છન્દો વામદેવસ્તુ યદા વહતિ ચાત્મનિ ॥ ૧,૬૭.૨૧॥

તત્ર ભાગે સ્થિતઃ પૃચ્છેત્સિદ્ધિર્ભવતિ નિષ્ફલા ।
વામે વા દક્ષિણે વાપિ યત્ર સંક્રમતે શિવા ॥ ૧,૬૭.૨૨॥

ઘોરે ઘોરાણિ કાર્યાણિ સૌમ્યે વૈ મધ્યમાનિ ચ ।
પ્રસ્થિતે ભાગતો હંસે દ્વાભ્યાં વૈ સર્વવાહિની ॥ ૧,૬૭.૨૩॥

તદા મૃત્યું વિજાનીયાદ્યોગી યોગવિશારદઃ ।
યત્રયત્ર સ્થિતઃ પૃચ્છેદ્વામદક્ષિણસમુખઃ ॥ ૧,૬૭.૨૪॥

તત્રતત્ર સમં દિશ્યાદ્વાતસ્યોદયનં સદા ।
અગ્રતો વામિકા શ્રેષ્ઠા પૃષ્ઠતો દક્ષિણા શુભા ॥ ૧,૬૭.૨૫॥

વામેન વામિકા પ્રોક્તા દક્ષિણે દક્ષિણા શુભા ।
વામે વામા શુભે ચૈવ દક્ષિણે દક્ષિણા શુભા ॥ ૧,૬૭.૨૬॥

જીવો જીવતિ જીવેન યચ્છૂન્યં તસ્ત્વરો ભવેત્ ।
યત્કિઞ્ચિત્કાર્યમુદ્દિષ્ટં જયાદિશુભલક્ષણમ્ ॥ ૧,૬૭.૨૭॥

તત્સર્વં પૂર્ણનાડ્યાં તુ જાયતે નિર્વિકલ્પતઃ ।
અન્યનાડ્યાદિપર્યન્તં પક્ષત્રયમુદાહૃતમ્ ॥ ૧,૬૭.૨૮॥

યાવત્ષષ્ઠી તુ પૃચ્છાયાં પૂર્ણાયાં પ્રથમો જયેત્ ।
રિક્તાયાં તુ દ્વિતીયસ્તુ કથયેત્તદશઙ્કિતઃ ॥ ૧,૬૭.૨૯॥

વામાચારસમો વાયુર્જાયતે કર્મસિદ્ધિદઃ ।
પ્રવૃત્તે દક્ષિણે માર્ગે વિષમે વિષમાક્ષરમ્ ॥ ૧,૬૭.૩૦॥

અન્યત્ર વામવાહે તુ નામ વૈ વિષમાક્ષરમ્ ।
તદાસૌ જયમાપ્નોતિ યોધઃ સંગ્રામમધ્યતઃ ॥ ૧,૬૭.૩૧॥

દક્ષવાતપ્રવાહે તુ યદિ નામ સમાક્ષરમ્ ।
જા(જ) યતે નાત્ર સન્દેહો નાડીમધ્યે તુ લક્ષયેત્ ॥ ૧,૬૭.૩૨॥

પિઙ્ગલાન્તર્ગતે પ્રાણે શમનીયાહવં જયેત્ ।
યાવન્નાડ્યુદયં ચારસ્તાં દિશં યાવદાપયેત્ ॥ ૧,૬૭.૩૩॥

ન દાતું જાયતે સોઽપિ નાત્ર કાર્યા વિચારણા ।
અથ સંગ્રામમધ્યે તુ યત્ર નાડી સદા વહેત્ ॥ ૧,૬૭.૩૪॥

સા દિશા જયમાપ્નોતિ શૂન્યે ભઙ્ગં વિનિર્દિશેત્ ।
જાતચારે જયં વિદ્યાન્મૃતકે મૃતમાદિશેત્ ॥ ૧,૬૭.૩૫ ॥

જયં પરાજયં ચૈવ યો જાનાતિ સ પણ્ડિતઃ ।
વામે વા દક્ષિણે વાપિ યત્ર સઞ્ચરતે શિવમ્ ॥ ૧,૬૭.૩૬ ॥

કૃત્વા તત્પદમાપ્નોતિ યાત્રા સન્તતશોભના ।
શશિસૂર્યપ્રવાહે તુ સતિ યુદ્ધં સમાચરેત્ ॥ ૧,૬૭.૩૭ ॥

યસ્તુ પૃચ્છતિ તત્રસ્થઃ સ સાધુર્જયતિધ્રુવમ્ ।
યાં દિશં વહતે વાયુસ્તાં દિશં યાવદાજયઃ ॥ ૧,૬૭.૩૮ ॥

જાયતે નાત્ર સન્દેહ હન્દ્રો યદ્યગ્રતઃ સ્થિતઃ ।
મેષ્યાદ્યા દશ યા નાડ્યો દક્ષિણા વામ સંસ્થિતાઃ ॥ ૧,૬૭.૩૯ ॥

ચરેસ્થિરે તદ્વિમાર્ગે તાદૃશેતાદૃશે ક્રમાત્ ।
નિર્ગમે નિર્ગમં યાતિ સંગ્રહે સંગ્રહં વિદુઃ ॥ ૧,૬૭.૪૦ ॥

પૃચ્છકસ્ય વચઃ શ્રુત્વા ઘણ્ટાકારેણ લક્ષયેત્ ।
વામે વા દક્ષિણે વાપિ પઞ્ચતત્ત્વસ્થિતઃ શિવે ॥ ૧,૬૭.૪૧ ॥

ઊર્ધ્વેઽગ્નિરધ આપશ્ચ તિર્યક્સંસ્થઃ પ્રભઞ્જનઃ ।
મધ્યે તુ પૃથિવી જ્ઞેયા નભઃ સર્વત્ર સર્વદા ॥ ૧,૬૭.૪૨ ॥

ઊર્ધ્વે મૃત્યુરધઃ શાન્તિસ્તિર્યક્ચોચ્ચાટયેત્સુધીઃ ।
મધ્યે સ્તમ્ભં વિજાનીયાન્મોક્ષઃ સર્વત્ર સર્વગે ॥ ૧,૬૭.૪૩ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સ્વરોદયે શુભાશુભનિરૂપણં નામ સપ્તષષ્ટિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬૮
સૂત ઉવાચ ।
પરિક્ષાં વચ્મિરત્નાનાં બલો નામાસુરોઽભવત્ ।
ઇન્દ્રાદ્યા નિર્જિતાસ્તેન વિજેતું તૈર્ન શક્યતે ॥ ૧,૬૮.૧ ॥

વરવ્યાજેન પશુતાં યાચિતઃ સ સુરૈર્મખે ।
બલો દદૌ સ (સ્વ) પશુતામતિસત્ત્વ સુરૈર્હતઃ ॥ ૧,૬૮.૨ ॥

પશુવત્સ વિશસ્તસ્તૈઃ સ્વવાક્યાશનિયન્ત્રિતઃ ।
બલો લોકોપરાય દેવાનાં હિતકામ્યયા ॥ ૧,૬૮.૩॥

તસ્ય સત્ત્વવિશુધ્ધસ્ય વિશુધ્ધેન ચ કર્મણા ।
કાયસ્યાવયવાઃ સર્વે રત્નબીજત્વમાયયુઃ ॥ ૧,૬૮.૪॥

દેવાનામથ યક્ષાણાં સિધ્ધાનાં પવનાશિનામ્ ।
રત્નબીજંસ્વ(જમ)યં ગ્રાહઃ સુમહાનભવત્તદા ॥ ૧,૬૮.૫॥

તેષાં તુ પતતાં વેગાદ્વિમાનેન વિહાયસા ।
યદ્યત્પપાત રત્નાનાં બીજં ક્વચન કિઞ્ચન ॥ ૧,૬૮.૬॥

મહોદધૌ સરિતિ વા પવર્ત કાનનેઽપિ વા ।
તત્તદાકરતાં યાતં સ્થાનમાધેયગૌરવાત્ ॥ ૧,૬૮.૭॥

તેષુ રક્ષોવિષવ્યાલવ્યાધિઘ્નાન્યઘહાનિ ચ ।
પ્રાદુર્ભવન્તિ રત્નાનિ તથૈવ વિગુણાનિ ચ ॥ ૧,૬૮.૮॥

વજ્રં મુક્તામણયઃ સપદ્મરાગાઃ સમરકતાઃ પ્રોક્તાઃ ।
અપિ ચેન્દ્રનીલમણિવરવૈદૂર્યાઃ પુષ્પરાગાશ્ચ ॥ ૧,૬૮.૯॥

કર્કેતનં સપુલકં રુધિરાખ્યસમન્વિતં તથા સ્ફટિકમ્ ।
વિદ્રુમમણિશ્ચ યત્નાદુદ્દિષ્ટં સંગ્રહે તજ્જ્ઞૈઃ ॥ ૧,૬૮.૧૦॥

આકારવર્ણૌ પ્રથમં ગુણદોષૌ તત્ફલં પરીક્ષા ચ ।
મૂલ્યં ચ રત્નકુશલૈર્વિજ્ઞેયં સર્વશાસ્ત્રાણામ્ ॥ ૧,૬૮.૧૧॥

કુલગ્રેષૂપજાયન્તે યાનિ ચોપહતેઽહનિ ।
દૌષૈસ્તાન્યપિયુજ્યન્તે હીયન્તે ગુણસમ્પદા ॥ ૧,૬૮.૧૨॥

પરીક્ષાપરિશુધ્ધાનાં રત્નાનાં પૃથિવીભુજા ।
ધારણં સંગ્રહો વાપિ કાર્યઃ શ્રિયમભીપ્સતા ॥ ૧,૬૮.૧૩॥

શાસ્ત્રજ્ઞાઃ કુશલાશ્ચાપિ રત્નભાજઃ પરીક્ષકાઃ ।
ત એવ મૂલ્યમાત્રાયા વેત્તારઃ પરિકીર્તિતાઃ ॥ ૧,૬૮.૧૪॥

મહા પ્રભાવં વિબુધૈર્યસ્યમાદ્વજ્રમુદાહૃતમ્ ।
વજ્રપૂર્વા પરીક્ષેયં તતોઽસ્માભિઃ પ્રકીર્ત્યતે ॥ ૧,૬૮.૧૫॥

તસ્યાસ્થિલેશો નિપપાત યેષુ ભુવઃ પ્રદેશેષુ કથઞ્ચિદેવ ।
વજ્રાણિ વજ્રાયુધનિર્જિગીષોર્ભવન્તિ નાનાકૃતિમન્તિ તેષુ ॥ ૧,૬૮.૧૬॥

હૈમમાતઙ્ગસૌરાષ્ટ્રાઃ પૌણ્ડ્રકાલિઙ્ગકોસલાઃ ।
વેણ્વાતટાઃ સસૌવીરા વજ્રસ્યાષ્ટ વિહારકાઃ ॥ ૧,૬૮.૧૭॥

આતામ્રા હિમશૈલજાશ્ચ શશિભા વેણ્વાતટીયાઃ સ્મૃતાઃ સૌવીરે
ત્વસિતાબ્જમેઘસદૃશાસ્તાભ્રાશ્ચ સૌરાષ્ટ્રજાઃ ।
કાલિઙ્ગાઃ કન કાવદાતરુચિરાઃ પીતપ્રભાઃ કોસલે શ્યામાઃ પુણ્ડ્રભવા
મતઙ્ગવિષયે નાત્યન્તપીતપ્રભાઃ ॥ ૧,૬૮.૧૮॥

અત્યર્થં લઘુ વર્ણતશ્ચ ગુણવત્પાર્શ્વેષુ
સમ્યક્સમંરેખાબિન્દુકલઙ્કકાકપદકત્રાસાદિભિર્વર્જિતમ્ ।
લોકેઽસ્મિન્પરામાણુમાત્રમપિ યદ્વજ્રં ક્વચિદૃશ્યતે તસ્મિન્દેવસમાશ્રયો
હ્યવિતથસ્તીક્ષ્ણાગ્રધારં યદિ ॥ ૧,૬૮.૧૯॥

વજ્રેષુ વર્ણયુક્ત્યા દેવાનામપિ વિગ્રહઃ પ્રોક્તઃ ।
વર્ણેભ્યશ્ચ વિભાગઃ કાર્યો વર્ણાશ્રયાદેવ ॥ ૧,૬૮.૨૦॥

હરિતસિતપીતપિઙ્ગશ્યામાસ્તામ્રાઃ સ્વભાવતો રુચિરાઃ ।
હરિવરુણશક્રહુતવહપિતૃપતિમરુતાં સ્વકા વર્ણાઃ ॥ ૧,૬૮.૨૧॥

વિપ્રસ્ય શઙ્ખકુમુદસ્ફટિકાવદાતઃ સ્યાત્ક્ષત્રિયસ્ય શશબભ્રુવિલોચનાભઃ ।
વૈશ્યસ્ય કાન્તકદલીદલસન્નિકાશઃ શૂદ્રસ્ય ધૌતકરવાલસમાનદીપ્તિઃ ॥ ૧,૬૮.૨૨॥

દ્વૌ વજ્રવર્ણૌ પૃથિવીપતીનાં સદ્ભિઃ પ્રદિષ્ટૌ ન તુ સાર્વજન્યૌ ।
યઃ સ્યાજ્જવાવિદ્રુમભઙ્ગશોણો યો વા હરિદ્રારસન્નિકાશઃ ॥ ૧,૬૮.૨૩॥

ઈશત્વાત્સર્વવર્ણાનાં ગુણવત્સાર્બવર્ણિકમ્ ।
કામતો ધારયેદ્રાજા ન ત્વન્યોઽન્યત્કથઞ્ચન ॥ ૧,૬૮.૨૪॥

અધરોત્તરવૃત્તયા હિ યાદૃક્સ્યાદ્વર્ણસઙ્કરઃ ।
તતઃ કષ્ટતરો વજ્રવર્ણાનાં સઙ્કરો મતઃ ॥ ૧,૬૮.૨૫॥

ન ચ માર્ગવિભાગમાત્રવૃત્ત્યા વિદુષા વજ્રપરિગ્રહો વિધેયઃ ।
ગુણવદ્ગુણસમ્પદાં વિભૂતિર્વિપરીતો વ્યસનોદયસ્ય હેતુઃ ॥ ૧,૬૮.૨૬॥

એકમપિ યસ્ય શ઼ૃઙ્ગં વિદલિતમવલોક્યતે વિશીર્ણં વા ।
ગુણવદપિ તન્ન ધાર્યં વજ્રં શ્રેયોઽર્થિભિર્ભવને ॥ ૧,૬૮.૨૭॥

સ્ફુટિતાગ્રિવિ શીર્ણશ઼ૃઙ્ગદેશં મલવર્ણૈઃ પૃષતૈરુપેતમધ્યમ્ ।

ન હિ વજ્રભૃતોઽપિ વજ્રમાશુ શ્રિયમપ્યાશ્રયલાલસાં ન કુર્યાત્ ॥ ૧,૬૮.૨૮॥

યસ્યૈકદેશઃ ક્ષતજાવભાસો યદ્વા ભવેલ્લોહિતવર્ણચિત્રમ્ ।
ન તન્ન કુર્યાદ્ધ્રિયમાણમાશુ સ્વચ્છન્દમૃત્યોરપિ જીવિતાન્તમ્ ॥ ૧,૬૮.૨૯॥

કોટ્યઃ પાર્શ્વનિ ધારાશ્ચ ષડષ્ટૌ દ્વાદશેતિ ચ ।
ઉત્તુઙ્ગસમતીક્ષ્ણાગ્રાઃ વજ્રસ્યાકરજા ગુણાઃ ॥ ૧,૬૮.૩૦॥

ષટ્કોટિ શુદ્ધમમલં સ્ફુટતીક્ષ્ણધારં વર્ણાન્વિતં લઘુ સુપાર્શ્વમપેતદોષમ્ ।
ઇન્દ્રાયુધાંશુવિસૃતિચ્છુરિતાન્તરિક્ષમેવંવિધં ભુવિ ભવેત્સુલભં
ન વજ્રમ્ ॥ ૧,૬૮.૩૧॥

તીક્ષ્ણાગ્રં વિમલમપેતસર્વદોષં ધત્તે યઃ પ્રયતતનુઃ સદૈવ વજ્રમ્ ।
વૃદ્ધિસ્તં પ્રતિદિનમેતિ યાવદાયુઃ સ્ત્રીસમ્પત્સુતધનધાન્યગોદશૂનામ્ ॥ ૧,૬૮.૩૨॥

વ્યાલવહ્નિવિષવ્યાઘ્રતસ્કરામ્બુભયાનિ ચ ।
દૂરાત્તસ્ય નિવર્તન્તે કર્માણ્યાથર્વણાનિ ચ ॥ ૧,૬૮.૩૩॥

યદિ વજ્રમપેતસર્વદોષં બિભૃયાત્તણ્ડુલવિંશતિં ગુરુત્વે ।
મણિશાસ્ત્રવિદો વદન્તિ તસ્ય દ્વિગુણં રૂપકલક્ષમગ્રમૂલ્યમ્ ॥ ૧,૬૮.૩૪॥

ત્રિભાગહીનાર્ધતદર્ધશેષં ત્રયોદશં ત્રિંશદતોઽર્દ્ધભાગાઃ ।
અશીતિભાગોઽથ શતાંશભાગઃ સહસ્રભાગોઽલ્પસમાનયોગઃ ॥ ૧,૬૮.૩૫॥

યત્તણ્ડુલૈર્દ્વાદશભિઃ કૃતસ્ય વજ્રસ્ય મૂલ્યં પ્રથમં પ્રદિષ્ટમ્ ।
દ્વાભ્યાં ક્રમાદ્ધાનિમુપાગતસ્ય ત્વેકાવમાનસ્ય વિનિશ્ચયોઽયમ્ ॥ ૧,૬૮.૩૬॥

ન ચાપિ તણ્ડુલૈરેવ વજ્રાણાં ધરણક્રમઃ ।
અષ્ટાભિઃ સર્ષપૈર્ગૌરૈસ્તંણ્ડુલં પરિકલ્પયેત્ ॥ ૧,૬૮.૩૭॥

યત્તુ સર્વગુણૈર્યુક્તં વજ્રં તરતિ વારિણિ ।
રત્નવર્ગે સમસ્તેઽપિ તસ્ય ધારણમિષ્યતે ॥ ૧,૬૮.૩૮॥

અલ્પેનાપિ હિ દોષેણ લક્ષ્યાલક્ષ્યેણ દ્રષિતમ્ ।
સ્વ (સ) મૂલ્યાદ્દશમં ભાગં વજ્રં લભતિ માનવઃ ॥ ૧,૬૮.૩૯॥

પ્રકટાનેકદોષસ્ય સ્વલ્પસ્ય મહતોઽપિ વા ।
સ્વ (સુ) મૂલ્યાચ્છતશો ભાગો વજ્રસ્ય ન વિધીયતે ॥ ૧,૬૮.૪૦॥

સ્પષ્ટદોષમલઙ્કારે વજ્રં યદ્યપિ દૃશ્યતે ।
રત્નાનાં પરિકર્માર્થં મૂલ્યં તસ્ય ભવેલ્લઘુ ॥ ૧,૬૮.૪૧॥

પ્રથમં ગુણસમ્પદાભ્યુપેતં પ્રતિબદ્ધં સમુપૈતિ યચ્ચ દોષમ્ ।
અલમાભરણેન તસ્ય રાજ્ઞો ગુણહીનોઽપિ મણિર્ન ભૂષણાય ॥ ૧,૬૮.૪૨॥

નાર્યા વજ્રમધાર્યં ગુણવદપિ સુતપ્રસૂતિમિચ્છન્ત્યા ।
અન્યત્ર દીર્ઘાચિપિટત્ર્યશ્રાદ્યગુણૈર્વિયુક્તાચ્ચ ॥ ૧,૬૮.૪૩॥

અયસા પુષ્પરાગેણ તથા ગોમેદકેન ચ ।
વૈદૂર્યસ્ફટિકાભ્યાં ચ કાચૈશ્ચાપિ પૃથગ્વિધૈઃ ॥ ૧,૬૮.૪૪॥

પ્રતિરૂપાણિ કુર્વન્તિ વજ્રસ્ય કુશલા જનાઃ ।
પરીક્ષા તેષુ કર્તવ્યા વિદ્વદ્ભિઃ સુપરીક્ષકૈઃ ॥ ૧,૬૮.૪૫॥

ક્ષારોલ્લેખનશાણાભિસ્તેષાં કાર્યં પરીક્ષણમ્ ।
પૃથિવ્યાં યાનિ રત્નાનિ યે ચાન્યે લોહધાતવઃ ॥ ૧,૬૮.૪૬॥

સર્વાણિ વિલિખેદ્વજ્રં તચ્ચ તૈર્ન વિલિખ્યતે ।
ગુરુતા સર્વરત્નાનાં ગૌરવાધારકારણમ્ ॥ ૧,૬૮.૪૭॥

વજ્રે તાં વૈપરીત્યેન સૂરયઃ પરિચક્ષતે ।
જાતિરજાતિં વિલિખતિ જાતિં વિલિખન્તિ વજ્રકુરુવિન્દાઃ ॥ ૧,૬૮.૪૮॥

વજ્રૈર્વજ્રં વિલિખતિ નાન્યેન વિલિખ્યતે વજ્રમ્ ।
વજ્રાણિ મુક્તામણયો યે ચ કેચન જાતયઃ ॥ ૧,૬૮.૪૯॥

ન તેષાં પ્રતિબદ્ધાનાં ભા ભવત્યૂર્ધ્વગામિની ।
તિર્યક્ક્ષતત્વાત્કેષાઞ્ચિત્કથઞ્ચિદ્યદિ જાયતે ।
તિર્યગ્વિલિખ્યમાનાનાં સા (સ) પાર્શ્વેષુ વિહન્યતે ॥ ૧,૬૮.૫૦॥

યદ્યપિ વિશીર્ણકોટિઃ સબિન્દુરેખાન્વિતો વિવર્ણો વા ।
તદપિ ધનધાન્યપુત્રાન્કરોતિ સેન્દ્રાયુધો વજ્રઃ ॥ ૧,૬૮.૫૧॥

સૌદા મિનીવિસ્ફુરિતાભિરામં રાજા યથોક્તં કલિશં દધાનઃ ।
પરાક્રમાક્રાન્તપરપ્રતાપઃ સમસ્તસામન્તભુવં ભુનક્તિ ॥ ૧,૬૮.૫૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રત્નતદ્વિશેષવજ્રપરીક્ષણાદિવર્ણનં નામાષ્ટષષ્ટિતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૬૯

સૂત ઉવાચ ।
દ્વિપેન્દ્રજીમૂતવરાહશઙ્ખમત્સ્યાહિશુક્ત્યુદ્ભવવેણુજાનિ ।
મુક્તાફલાનિ પ્રથિતાનિ લોકે તેષાં ચ શુક્ત્યુદ્ભવમેવ ભૂરિ ॥ ૧,૬૯.૧॥

તત્રૈવ ચૈકસ્ય હિ મૂલમાત્ર નિવિશ્યતે રત્નપદસ્ય જાતુ ।
વેધ્યં તુ શુક્તયુદ્ભવમેવ તેષાં શેષાણ્યવેધ્યાનિ વદન્તિ તજ્જ્ઞાઃ ॥ ૧,૬૯.૨॥

ત્વક્સારનાગેન્દ્રતિમિપ્રસૂતં યચ્છઙ્ખજં યચ્ચ વરા હજાતમ્ ।
પ્રાયો વિમુક્તાનિ ભવન્તિ ભાસા શસ્તાનિ માઙ્ગલ્યતયા તથાપિ ॥ ૧,૬૯.૩॥

યા મૌક્તિકાનામિહ જાતયેઽષ્ટૌ પ્રકીર્તિતા રત્નવિનિશ્ચયજ્ઞૈઃ ।
કમ્બૂદ્ભવં તેષ્વધમં પ્રદિષ્ટમુત્પદ્યતે યચ્ચ ગજેન્દ્રકુમ્ભાત્ ॥ ૧,૬૯.૪॥

સ્વયોનિમધ્યચ્છવિતુલ્યવર્ણં શાઙ્ખં બૃહલ્લોલફલપ્રમાણમ્ ।
ઉત્પદ્યતે વારણકુમ્ભમધ્યાદાપીતવર્ણં પ્રભયા વિહીનમ્ ॥ ૧,૬૯.૫॥

યે કમ્બવઃ શાર્ઙ્ગમુખાવમર્શપીતસ્ય શઙ્ખપ્રવરસ્ય ગોત્રે ।
મતઙ્ગજાશ્ચાપિ વિશુદ્ધવંશ્યાસ્તે મૌક્તિકાનાં પ્રભવાઃ પ્રદિષ્ટાઃ ॥ ૧,૬૯.૬॥

ઉત્પદ્યતે મૌક્તિકમેષુ વૃત્તમાપીતવર્ણં પ્રભયા વિહીનમ્ ।
પાઠીનપૃષ્ઠસ્ય સમાનવર્ણં મીનાત્સુવૃત્તં લઘુ ચાતિસૂક્ષ્મમ્ ॥ ૧,૬૯.૭॥

ઉત્પદ્યતે વારિચરાનનેષુ મત્સ્યાશ્ચે તે મધ્યચરાઃ પયોધેઃ ।
વરાહદંષ્ટ્રાપ્રભવં પ્રદિષ્ટં તસ્યૈવ દંષ્ટ્રાઙ્કુરતુલ્યવર્ણમ્ ॥ ૧,૬૯.૮॥

ક્વચિત્કથઞ્ચિત્સ ભુવઃ પ્રદેશે પ્રજાયતે સૂકરરાડ્વિશિષ્ટઃ ।
વર્ષોપલાનાં સમવર્ણશોભં ત્વક્સારપર્વપ્રભવં પ્રદિષ્ટમ્ ॥ ૧,૬૯.૯॥

તે વેણવો દિવ્યજનોપભોગ્યે સ્થાને પ્રરોહન્તિ ન સાર્વજન્યે ।
ભૌજં ગમં મીનવિશુદ્ધવૃત્તં સંસ્થાનતોઽત્યુજ્જ્વલવર્ણશોભમ્ ॥ ૧,૬૯.૧૦॥

નિતાન્તધૌતપ્રવિકલ્પમાનનિસ્ત્રિંશધારાસમવર્ણકાન્તિ ।
પ્રાપ્યાતિરત્નાનિ મહાપ્રભાણિ રાજ્યં શ્રિયં વા મહતીં દુરાપામ્ ॥ ૧,૬૯.૧૧॥

તેજોઽન્વિતાઃ પુણ્યકૃતો ભવન્તિ મુક્તાફલસ્યાહિશિરોભવસ્ય ।
જિજ્ઞાસયા રત્નધનં વિધિજ્ઞૈઃ શુભેમુહૂર્તે પ્રયતૈઃ પ્રયત્નાત્ ॥ ૧,૬૯.૧૨॥

રક્ષાવિધાનં સુમહદ્વિધાય હર્મ્યોપરિષ્ઠં ક્રિયતે યદા તત્ ।
તદા મહાદુન્દુભિમન્દ્રઘોષૈર્વિદ્યુલ્લતાવિસ્ફુરિતાન્તરાલૈઃ ॥ ૧,૬૯.૧૩॥

પયોધરાક્રાન્તિવિલમ્બિનમ્રૈર્ઘનૈર્નવૈરાવ્રિયતેઽન્તરિક્ષમ્ ।

ન તં ભુજઙ્ગા ન તુ યાતુધાના ન વ્યાધયો નાપ્યુપસર્ગદોષાઃ ॥ ૧,૬૯.૧૪॥

હિંસન્તિ યસ્યાહિશિરઃ સમુત્થં મુક્તાફલં તિષ્ઠતિ કોશમધ્યે ।
નાભ્યેતિ મેઘપ્રભવં ધરિત્રીં વિપ્રદ્રુતં તદ્વિબુધા હરન્તિ ॥ ૧,૬૯.૧૫॥

અર્ચિઃ પ્રભાનાવૃતદિગ્વિભાગમાદિત્યવહુઃ ખવિભાવ્યબિમ્બમ્ ।
તેજસ્તિરસ્કૃત્ય હુતાશનેન્દુનક્ષત્રતારાપ્રભવં સમગ્રમ્ ॥ ૧,૬૯.૧૬॥

દિવા યથા દીર્મિઙ્કરં તથૈવ તમોઽવગાઢાસ્વપિ તન્નિશાસુ ।
વિચિત્રરત્નદ્યુતિચારુતોયા ચતુઃ સમુદ્રાભરણોપપન્ના ॥ ૧,૬૯.૧૭॥

મૂલ્યં ન વા સ્યાદિતિ નિશ્ચયો મે કૃત્સ્ના મહી તસ્ય મુવર્ણપૂર્ણા ।
હીનોઽપિયસ્તલ્લભતે કદાચિદ્વિપાકયોગાન્મહતઃ શુભસ્ય ॥ ૧,૬૯.૧૮॥

સાપત્યહીનાં સ મહીં સમગ્રાં ભુનક્તિ તત્તિષ્ઠતિ યાવદેવ ।
ન કેવલં તચ્છુભકૃન્નૃપસ્ય ભાગ્યૈઃ પ્રજાનામપિ તસ્ય જન્મ ॥ ૧,૬૯.૧૯॥

તદ્યોજનાનાં પરિતઃ સહસ્રં સર્વાનનર્થાન્વિમુખી કરોતિ ।
નક્ષત્રમાલેવ દિવો વિશીર્ણા દન્તાવલિસ્તસ્ય મહામુરસ્ય ॥ ૧,૬૯.૨૦॥

વિચિત્રવર્ણેષુ વિશુદ્ધવર્ણા પયઃ સુ પત્યુઃ પયસાં પપાત ।
સમ્પૂર્ણચન્દ્રાંશુકલાપકાન્તેર્માણિપ્રવેકસ્ય મહાગુણસ્ય ॥ ૧,૬૯.૨૧॥

તચ્છુક્તિમત્સુ સ્થિતિમાપ બીજમાસન્પુરાપ્યન્યભવાનિ યાનિ ।
યસ્મિન્પ્રદેશેઽમ્બુનિધૌ પપાત સુચારુમુક્તામણિરત્નબીજમ્ ।
તસ્મિન્પયસ્તોયધરાવકીર્ણં શુક્તૌ સ્થિતં મૌક્તિકતામવાપ ॥ ૧,૬૯.૨૨॥

સૈંહલિકપારલૌકિકસૌરાષ્ટ્રિકતામ્રપર્ણપારશવાઃ ।
કૌવેરપાણ્ડ્યહાટકહેમકમિત્યાકરાસ્ત્વષ્ટૌ ॥ ૧,૬૯.૨૩॥

શુક્ત્યુદ્ભવં નાતિનિકૃષ્ટવર્ણં પ્રમાણસંસ્થાનગુણપ્રભાભિઃ ।
ઉત્પદ્યતે વર્ધનપારસીકપાતાલલોકાન્તરસિંહલેષુ ॥ ૧,૬૯.૨૪॥

ચિન્ત્યા ન તસ્યાકરજા વિશેષા રૂપે પ્રમાણે ચ યતેત વિદ્વાન્ ।
ન ચ વ્યવસ્થાસ્તિ ગુણાગુણેષુ સર્વત્ર સર્વાકૃતયો ભવન્તિ ॥ ૧,૬૯.૨૫॥

એતસ્ય શુક્તિપ્રભસ્ય મુક્તાફલસ્ય ચાન્યેન સમુન્મિતસ્ય ।
મૂલ્યં સહસ્રાણિ તુ રૂપકાણાં ત્રિભિઃ શતૈરપ્યાધિકાનિ પઞ્ચ ॥ ૧,૬૯.૨૬॥

યન્માષકાર્ધેન તતો વિહીનં તત્પઞ્ચભાગદ્વયહીનમૂલ્યમ્ ।
યન્માષકાંસ્ત્રીન્બિભૃયાત્સહસ્રે દ્વે તસ્ય મૂલ્યં પરમં પ્રદિષ્ટમ્ ॥ ૧,૬૯.૨૭॥

અર્ધાધિકૌ દ્વૌ વહતોઽસ્ય મૂલ્યં ત્રિભિઃ શતૈરપ્યધિકં સહસ્રમ્ ।
દ્વિમાષ કોન્માનિતગૌરવસ્ય શતાનિ ચાષ્ટૌ કથિતાનિ મૂલ્યમ્ ॥ ૧,૬૯.૨૮॥

અર્ધાધિકં માષકમુન્મિતસ્ય સમં ચ વિંશત્રિતયં શતાનામ્ ।
ગુઞ્જાશ્ચ ષડ્ધારયતઃ શતે દ્વે મૂલ્યં પરં તસ્ય વદન્તિ તજ્જ્ઞાઃ ।
અધ્યર્ધમુન્માન(પ) કૃતં શતં સ્યાન્મૂલ્યં ગુણૈસ્તસ્ય સમન્વિતસ્ય ॥ ૧,૬૯.૨૯॥

યદિ ષોડશભિર્ભવેદનૂનન્ધરણં તત્પ્રવદન્તિ દાર્વિકાખ્યમ્ ।
અધિકં દશભિઃ શતં ચ મૂલ્યં સમવાપ્નોત્યપિ બાલિશસ્ય હસ્તાત્ ॥ ૧,૬૯.૩૦॥

દ્વિગુણૈર્દશભિર્ભવેદનૂનં ધરણં તદ્ભવકં વદન્તિ તજ્જ્ઞાઃ ।
નવસપ્તતિમાપ્નુયાત્સ્વમૂલ્યં યદિ ન સ્યાદ્ગુણસમ્પદા વિહીનમ્ ॥ ૧,૬૯.૩૧॥

ત્રિંશતા ધરણં પૂર્ણં શિક્યં તસ્યેતિ કીર્ત્યતે ।
ચત્વારિંશદ્ભવેત્તસ્યાઃ પરં મૂલ્યં વિનિશ્ચયઃ ॥ ૧,૬૯.૩૨॥

ચત્વારિંશદ્ર ભવેત્તસ્યાસ્ત્રિંશન્મૂલ્યં લભેત્સા ।
પઞ્ચાશત્તુ ભવેત્સોમસ્તસ્ય મૂલ્યં તુ વિંશતિઃ ॥ ૧,૬૯.૩૩॥

ષષ્ટિર્નિકરશીર્ષં સ્યાત્તસ્યા મૂલ્યં ચતુર્દશ ।
અશીતિર્નવતિશ્ચૈવ કૂપ્યેતિ પરિકીર્તિતા ।
એકાદશ સ્યાન્નવ ચ તયોર્મૂલ્યમનુક્રમાત્ ॥ ૧,૬૯.૩૪॥

આદાય તત્સકલમેવ તતોઽન્નભાણ્ડં જમ્બીરજાતરસયોજનયા વિપક્વમ્ ।
ઘૃષ્ટં તતો મૃદુતનૂકૃતપિણ્ડમૂલૈઃ કુર્યાદ્યથેષ્ટમનુ
મૌક્તિકમાશુ વિદ્ધમ્ ॥ ૧,૬૯.૩૫॥

મૃલ્લિપ્તમત્સ્યપુટમધ્યગતં તુ કૃત્વા પશ્ચાત્પચેત્તનુ તતશ્ચ બિડાલપુટ્યા ।
દુગ્ધે તતઃ પયસિ તં વિપચેત્સુધાયાં પક્વં તતોઽપિ પયસા શુચિચિક્કણેન ॥ ૧,૬૯.૩૬॥

શુદ્ધં તતો વિમલવસ્ત્રનિઘર્ષણેન સ્યાન્મૌક્તિકં વિપુલસદ્ગુણકાન્તિયુક્તમ્ ।
વ્યાડિર્જગાદ જગતાં હિ મહાપ્રભાવઃ સિદ્ધો વિદગ્ધહિતતત્પરયા દયાલુઃ ॥ ૧,૬૯.૩૭॥

શ્વેતકાચસમં તારં હેમાંશશતયોજિતમ્ ।
રસમધ્યે પ્રધાર્યેત મૌક્તિકં દેહભૂષણમ્ ॥ ૧,૬૯.૩૮॥

એવં હિ સિંહલે દેશે કુર્વન્તિ કુશલા જનાઃ ।
યસ્મિન્કૃત્રૈમસન્દેહઃ ક્વચિદ્ભવતિ મૌક્તિકે ॥ ૧,૬૯.૩૯॥

ઉષ્ણે સલવણે સ્નેહે નિશાં તદ્વાસયેજ્જલે ।
વ્રીહિભિર્મર્દનીયં વા શુષ્કવસ્ત્રોપવેષ્ટિતમ્ ॥ ૧,૬૯.૪૦॥

યત્તુ નાયાતિ વૈવર્ણ્યં વિજ્ઞેયં તદકૃત્રિમમ્ ।
સિતં પ્રમાણવત્સ્નિગ્ધં ગુરુ સ્વચ્છં સુનિર્મલમ્ ॥ ૧,૬૯.૪૧॥

તેજોઽધિકં સુવૃત્તં ચ મૌક્તિકં ગુણવત્સ્મૃતમ્ ॥ ૧,૬૯.૪૨॥

પ્રમાણવદ્ગૌરવરશ્મિયુક્તં સિતં સુવૃત્તં સમસૂક્ષ્મવેધમ્ ।
અક્રેતુરપ્યાવહતિ પ્રમોદં યન્મૌક્તિકં તદ્ગુણવત્પ્રદિષ્ટમ્ ॥ ૧,૬૯.૪૩॥

એવં સમસ્તેન ગુણોદયેન યન્મૌક્તિકં યોગમુપાગતં સ્યાત્ ।
ન તસ્ય ભર્તારમનર્થજાત એકોઽપિ કશ્ચિત્સમુપૈતિ દોષઃ ॥ ૧,૬૯.૪૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મુક્તાફલપ્રમાણાદિવર્ણનં નામ મુક્તાફલપરીક્ષા નામૈકોનસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૦

સૂત ઉવાચ ।
દિવાકરસ્તસ્ય મહામહિમ્નો મહાસુરસ્યોત્તમરત્નબીજમ્ ।
અસૃગ્ગૃહીત્વા ચરિતું પ્રતસ્થે નિસ્ત્રિંશનીલેન નભઃ સ્થલેન ॥ ૧,૭૦.૧॥

જેત્રા સુરાણાં સમરેષ્વજસ્ત્રં વીર્યાવલેપોદ્ધતમાનસેન ।
લઙ્કાધિપેનાર્ધપથે સમેત્ય સ્વર્ભાનુનેવ પ્રસભં નિરુદ્ધઃ ॥ ૧,૭૦.૨॥

તત્સિંહલીચારુનિતમ્બબિમ્બવિક્ષોભિતાગાધમહાહ્રદાયામ્ ।
પૂગદ્રુમાબદ્ધતટદ્વયાયાં મુમોચ સૂર્યઃ સરિદુત્તમાયામ્ ॥ ૧,૭૦.૩॥

તતઃ પ્રભૃતિ સા ગઙ્ગા તુલ્યપુણ્યફલોદયા ।
નામ્ના રાવણગઙ્ગેતિ પ્રથિમાનમુપાગતા ॥ ૧,૭૦.૪॥

તતઃ પ્રભૃત્યેવ ચ શર્વરીષુ કૂલાનિ રત્નૈર્નિચિતાનિ તસ્યાઃ ।
સુવર્ણનારાચશતૈરિવાન્તર્બહિઃ પ્રદીપ્તૈર્નિશિતાનિ ભાન્તિ ॥ ૧,૭૦.૫॥

તસ્યાસ્તટેપૂજ્જ્વચારુરાગા ભવન્તિ તોયેષુ ચ પદ્મરાગાઃ ।
સૌગન્ધિકોત્થાઃ કુરુવિન્દજાશ્ચ મહાગુણાઃ સ્ફાટિકસમ્પ્રસૂતાઃ ॥ ૧,૭૦.૬॥

બન્ધૂ કગુઞ્જાસકલેન્દ્રગોપજવાસમાસૃક્સમવર્ણશોભાઃ ।
ભ્રાજિષ્ણવો દાડિમબીજવર્ણાસ્તથાપરે કિંશુકપુષ્પભાસઃ ॥ ૧,૭૦.૭॥

ખિન્દુરપદ્મોત્પલકુઙ્કુમાનાં લાક્ષારસસ્યાપિ સમાનવર્ણાઃ ।
સાંદ્રેઽપિ રાગે પ્રભયા સ્વયૈવ ભાન્તિ સ્વલક્ષ્યાઃ સ્ફુટમધ્યશોભાઃ ॥ ૧,૭૦.૮॥

ભાનોશ્ચ ભાસામનુવેધયોગામાસાદ્ય રશમિ પ્રકરેણ દૂરમ્ ।
પાર્શ્વાનિ સર્વાણ્યનુરઞ્જયન્તિ ગુણાપપન્નાઃ સ્ફટિકપ્રસૂતાઃ ॥ ૧,૭૦.૯॥

કુસુંભનીલવ્યતિમિશ્રરાગપ્રત્યુગ્રરક્તાબુજતુલ્યભાસઃ ।
તથાપરેઽરુષ્કરકણ્ટકારિપુષ્પત્વિષો હિઙ્ગુલવત્ત્વિષોઽન્યે ॥ ૧,૭૦.૧૦॥

ચકોરપુંસ્કોકિલસારસાનાં નેત્રાવભાસશ્ચ ભવન્તિ કેચિત્ ।
અન્યે પુનઃ સન્તિ ચ પુષ્પિતાનાં તુલ્યત્વિષા કોકનદોત્તમાનામ્ ॥ ૧,૭૦.૧૧॥

પ્રભાવકાઠિન્યગુરુત્વયોગૈઃ પ્રાયઃ સમાનાઃ સ્ફટિકોદ્ભવાનામ્ ।
આનીલરક્તોત્પલચારુભાસઃ સૌગન્ધિકોત્થા મણયો ભવન્તિ ॥ ૧,૭૦.૧૨॥

કામં તુ રાગઃ કુરુવિન્દજેષુ સ નૈવ યાદૃક્સ્ફટિકોદ્ભવેષુ ।
નિરર્ચિષોઽન્તર્બહુલા ભવન્તિ પ્રભાવવન્તોઽપિ નતૈઃ સમસ્તૈઃ ॥ ૧,૭૦.૧૩॥

યે તુ રાવણગઙ્ગાયાં જાયન્તે કુરુવિન્દકાઃ ।
પદ્મરાગઘનં રાગં બિભ્રાણાઃ સ્ફટિકાર્ચિષઃ ॥ ૧,૭૦.૧૪॥

વર્ણાનુયાયિનસ્તેષા માન્ધ્રદેશે તથા પરે ।
ન જાયન્તે હિ યે કેચિન્મૂલ્યલેશમવાપ્નુયુઃ ॥ ૧,૭૦.૧૫॥

તથૈવ સ્ફાટિકોત્થાનાં દેશે તુમ્બુરુસંજ્ઞકે ।
સધર્માણઃ પ્રજાયન્તે સ્વલ્પમૂલ્યા હિ તે સ્મૃતાઃ ॥ ૧,૭૦.૧૬॥

વર્ણાધિક્યં ગુરુત્વં ચ સ્નિગ્ધતા સમતાચ્છતા ।
અર્ચિષ્મત્તા મહત્તા ચ મણીનાં ગુણસંગ્રહઃ ॥ ૧,૭૦.૧૭॥

યે કર્કરચ્છિદ્રમલોપદિગ્ધાઃ પ્રભાવિમુક્તાઃ પરુષા વિવર્ણાઃ ।
ન તે પ્રશસ્તા મણયો ભવન્તિ સમાનતો જાતિગુણૈઃ સમસ્તૈઃ ॥ ૧,૭૦.૧૮॥

દોષોપસૃષ્ટં મણિમપ્રબોધાદ્બિભર્તિ યઃ કશ્ચન કશ્ચિદેવ ।
તં શોકચિન્તામયમૃત્યુવિત્તનાશાદયો દોષગણા ભજન્તે ॥ ૧,૭૦.૧૯॥

કામં ચારુતરાઃ પઞ્ચ જાતીના પ્રતિરૂપકાઃ ।
વિજા તયઃ પ્રયત્નેન વિદ્વાંસ્તનુપલક્ષયેત્ ॥ ૧,૭૦.૨૦॥

કલશપુરોદ્ભવસિંહલતુમ્બુરુદેશોત્થમુક્તપાણીયાઃ ।
શ્રીપૂર્ણકાશ્ચ સદૃશા વિજાતયઃ પદ્મરાગાણામ્ ॥ ૧,૭૦.૨૧॥

તુષોપસર્ગાત્કલશાભિધાનમાતામ્રભાવાદપિ તુમ્બુરૂત્થમ્ ।
કાષ્ણર્યાત્તથા સિંહલદેશજાતં મુક્તાભિધાનં નભસઃ સ્વભાવાત્ ॥ ૧,૭૦.૨૨॥

શ્રીપૂર્ણકં દીપ્તિવિનાકૃતત્વાદ્વિજાતિલિઙ્ગાશ્રય એવ ભેદઃ ।
યસ્તામ્રિકાં પુષ્યતિ પદ્મરાગો યોગાત્તુષાણામિવ પૂર્ણમધ્યઃ ॥ ૧,૭૦.૨૩॥

સ્નેહપ્રદિગ્ધઃ પ્રતિભાતિ યશ્ચ યો વા પ્રઘૃષ્ટઃ પ્રજહાતિ દીપ્તિમ્ ।
આક્રાન્તમૂર્ધા ચ તથાઙ્ગુલિભ્યાં યઃ કાલિકાં પાર્શ્વગતાં બિભર્તિ ॥ ૧,૭૦.૨૪॥

સમ્પ્રાપ્ય ચોત્ક્ષિપ્ય યથાનુવૃત્તિં વિભર્તિયઃ સર્વગુણાનતીવ ।
તુલ્યપ્રમાણસ્ય ચ તુલ્યજાતેર્યો વા ગુરુત્વેન ભવેત્તુ તુલ્યઃ ।
પ્રાપ્યાપિ રત્નાકરજા સ્વજાતિં લક્ષેદ્ગુરુત્વેન ગુણેન વિદ્વાન્ ॥ ૧,૭૦.૨૫॥

અપ્રણશ્યતિ સન્દેહે શાણે તુ પરિલેખયેત્ ।
સુ(સ્વ) જાતકસમુત્થેન લિખિત્વાપિ પરસ્પરમ્ ॥ ૧,૭૦.૨૬॥

વજ્રં વા કુરુવિન્દં વા વિમુચ્યાનેન કેનચિત્ ।
નાશક્યં લેખનં કર્તું પદ્મરાગેન્દ્રનીલયોઃ ॥ ૧,૭૦.૨૭॥

જાત્યસ્ય સર્વેઽપિ મણેર્ન જાતુ વિજાતયઃ સન્તિ સમાનવર્ણાઃ ।
તથાપિ નાનાકરણાર્થમેવ ભેદપ્રકારઃ પરમઃ પ્રદિષ્ટઃ ॥ ૧,૭૦.૨૮॥

ગુણોપપન્નેન સહાવબદ્ધોમેણિર્ન ધાર્યો વિગુણો હિ જાત્યા ।
ન કૌસ્તુભેનાપિ સહાવબદ્ધં વિદ્વાન્વિજાતિં બિભૃયાત્કદાચિત્ ॥ ૧,૭૦.૨૯॥

ચાણ્ડાલ એકોઽપિ યથા દ્વિજાતીન્સમેત્ય ભૂરીનપિ હન્ત્યયત્નાત્ ।
અથો મણીન્ભૂરિગુણોપપન્નાઞ્છક્નોતિ વિપ્લાવયિતું વિજાત્યઃ ॥ ૧,૭૦.૩૦॥

સપત્નમધ્યેઽપિ કૃતાધિવાસં પ્રમાદવૃત્તાવપિ વર્તમાનમ્ ।
ન પદ્મરાગસ્ય મહાગુણસ્ય ભર્તારમાપત્સ્પૃશતીહ કાચિત્ ॥ ૧,૭૦.૩૧॥

દોષોપસર્ગપ્રભવાશ્ચ યે તે નોપદ્રવાસ્તં સમભિદ્રવન્તિ ।
ગુણૈઃ સમુત્તેજિતચારુરાગં યઃ પદ્મરાગં પ્રયતો બિભર્તિ ॥ ૧,૭૦.૩૨॥

વજ્રસ્ય યત્તણ્ડુલસંખ્યયોક્તં મૂલ્યં સમુત્પાદિતગૌરવસ્ય ।
તત્પદ્મરાગસ્ય મહાગુણસ્ય તન્માષકલ્પાકલિતસ્ય મૂલ્યમ્ ॥ ૧,૭૦.૩૩॥

વર્ણદાસ્યપપન્નં હિ મણિરત્નં પ્રશસ્યતે ।
તાભ્યામીષદપિ ભ્રષ્ટં મણિમૂલ્યાત્પ્રહીયતે ॥ ૧,૭૦.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પદ્મરાગપરીક્ષણં નામ સપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૧
સૂત ઉવાચ ।
દાનવાધિપતેઃ પિત્તમાદાય ભુજગાધિપઃ ।
દ્વિધા કુર્વન્નિવ વ્યોમ સત્વરં વાસુકિર્યયૌ ॥ ૧,૭૧.૧॥

સ તદા સ્વશિરોરત્નપ્રભાદીપ્તે નભોઽમ્બુધૌ ।
રાજતઃ સમહાનેકઃ ખણ્ડસેતુરિવાબભૌ ॥ ૧,૭૧.૨॥

તતઃ પક્ષનિપાતેન સંહરન્નિવ રોદસી ।
ગરુત્માન્પન્નગેન્દ્રસ્ય પ્રહર્તુમુપચક્રમે ॥ ૧,૭૧.૩॥

સહસૈવ મુમોચ તત્ફણીન્દ્રઃ સુરસાભ્યક્તતુરુષ્ક (રષ્ક) પાદપાયામ્ ।
કલિકાઘનગન્ધવાસિતા યાં વરમાણિક્યગિરેરુપત્યકાયામ્ ॥ ૧,૭૧.૪॥

તસ્ય પ્રપાતસમનન્તરકાલમેવ તદ્ભદ્ધરાલયમતીત્ય રમાસમીપે ।
સ્થાનં ક્ષિતેરુપપયોનિધિતીરલેખંયાં વરમાણિક્યગિરેરુપત્યકાયામ્ ॥ ૧,૭૧.૫॥

તત્રૈવ કિઞ્ચિત્પતતસ્તુ પિત્તાદુપેત્ય જગ્રાહ તતો ગરુત્માન્ ।
મૂર્છાપરીતઃ સહસૈવ ઘોણારન્ધ્રદ્વયેન પ્રમુમોચ સર્વમ્ ॥ ૧,૭૧.૬॥

તત્રાકઠોરશુકકણ્ઠશિરીષપુષ્પખદ્યોતપૃષ્ઠચરશાદ્વલશૈવલાનામ્ ।
કલ્હારશષ્પકભુજઙ્ગભુજાઞ્ચ પત્રપ્રાપ્તત્વિષો મરકતાઃ શુભદા ભવન્તિ ॥ ૧,૭૧.૭॥

તદ્યત્ર ભોગીન્દ્રભુજાભિયુક્તં પપાત પિત્તં દિતિજાધિપસ્ય ।
તસ્યાકરસ્યાતિતરાં સ દેશો દુઃખોપલભ્યશ્ચ ગુણૈશ્ચ યુક્તઃ ॥ ૧,૭૧.૮॥

તસ્મિન્મરકતસ્થાને યત્કિઞ્ચિદુપજાયતે ।
તત્સર્વં વિષરોગાણાં પ્રશમાય પ્રકીર્ત્યતે ॥ ૧,૭૧.૯॥

સર્વમન્ત્રૌ ષધિગણૈર્યન્ન શક્યં ચિકિત્સિતુમ્ ।
મહાહિદંષ્ટ્રાપ્રભવં વિષં તત્તેન શામ્યતિ ॥ ૧,૭૧.૧૦॥

અન્યદપ્યાકરે તત્ર યદ્દોષૈરુપવર્જિતમ્ ।
જાયતે તત્પવિત્રાણામુત્તમં પરિકીર્તિતમ્ ॥ ૧,૭૧.૧૧॥

અત્યન્તહરિતવર્ણં કોમલમર્ચિર્વિભેદજટિલં ચ ।

કાઞ્ચનચૂર્ણસ્યાન્તઃ પૂર્ણમિવ લક્ષ્યતે યચ્ચ ॥ ૧,૭૧.૧૨॥

યુક્તં સંસ્થાનગુણૈઃ સમરાગં ગૌરવેણ ન વિહીનમ્ ।
સવિતુઃ કરસંસ્પર્શાચ્છુરયતિ સર્વાશ્રમં દીપ્ત્યા ॥ ૧,૭૧.૧૩॥

હિત્વા ચ હરિતભાવં યસ્યાન્તર્વિનિહિતા ભવેદ્દીપ્તિઃ ।
અચિરપ્રભાપ્રભાહતનવશાદ્વલસન્નિભા ભાતિ ॥ ૧,૭૧.૧૪॥

યચ્ચ મનસઃ પ્રસાદં વિદધાતિ નિરીક્ષ્યમતિમાત્રમ્ ।
તન્મરકતં મહાગણમિતિ રત્નવિદાં મનોવૃત્તિઃ ॥ ૧,૭૧.૧૫॥

વર્ણસ્યાતિ વિભુત્વાદ્યસ્યાન્તઃ સ્વચ્છકિરણપરિધાનમ્ ।
સાન્દ્રસ્નિગ્ધવિશુદ્ધં કોમલબર્હિપ્રભાદિસમકાન્તિ ॥ ૧,૭૧.૧૬॥

વર્ણોજ્જ્વલયા કાન્ત્યા સાન્દ્રાકારો વિભાસયા ભાતિ ।
તદપિ ગુણવત્સંજ્ઞામાપ્નોતિ હિ યાદૃશી પૂર્વમ્ ॥ ૧,૭૧.૧૭॥

શબલકઠોરમલિનં રૂક્ષં પાષાણકર્કરોપેતમ્ ।
દિગ્ધં શિલાજતુના મરકતમેવંવિધં વિગુણમ્ ॥ ૧,૭૧.૧૮॥

યત્સન્ધિશોષિતં રત્નમન્યન્મરકતાદ્ભવેત્ ।
શ્રેયસ્કામૈર્ન તદ્ધાર્યં ક્રેતવ્યં વા કતઞ્ચન ॥ ૧,૭૧.૧૯॥

ભલ્લાતકી પુત્રિકા ચ તદ્વર્ણસમયોગતઃ ।
મણેર્મરકતસ્યૈતે લક્ષણીયા વિજાતયઃ ॥ ૧,૭૧.૨૦॥

ક્ષૌમેણ વાસસા મૃષ્ટા દીપ્તિં ત્યજતિ પુત્રિકા ।
લાઘવેનૈવ કાચસ્ય શક્યા કર્તું વિભાવના ॥ ૧,૭૧.૨૧॥

કસ્યચિદનેકરૂપૈર્મરકતમનુગચ્છતોઽપિ ગુણવર્ણૈઃ ।
ભલ્લાતકસ્યસ્વનાત્તુ વૈષમ્યમુપૈતિ વર્ણસ્ય ॥ ૧,૭૧.૨૨॥

વજ્રાણિ મુક્તાઃ સન્ત્યન્યે યે ચ કેચિદ્વિજાતયઃ ।
તેષાં નાપ્રતિબદ્ધાનાં ભા ભવત્યૂર્ધ્વગામિની ॥ ૧,૭૧.૨૩॥

ઋજુત્વાચ્ચૈવ કેષાઞ્ચિત્કથઞ્ચિદુપજાયતે ।
તિર્યગાલોચ્યમાનાનાં સદ્યશ્ચૈવ પ્રણશ્યતિ ॥ ૧,૭૧.૨૪॥

સ્નાનાચમનજપ્યેષુ રક્ષામન્ત્રક્રિયાવિધૌ ।
દદદ્ભિર્ગોહિરણ્યાનિ કુર્વદ્ભિઃ સાધનાનિ ચ ॥ ૧,૭૧.૨૫॥

દૈવપિત્ર્યાતિથેયેષુ ગુરુસમ્પૂજનેષુ ચ ।
બાધ્યમાનેષુ વિવિધૈર્દંષજાતૈર્વિષોદ્ભવૈઃ ॥ ૧,૭૧.૨૬॥

દોષૈર્હેનં ગુણૈર્યુક્તં કાઞ્ચનપ્રતિયોજિતમ્ ।
સંગ્રામે વિચરદ્ભિશ્ચ ધાર્યં મરકતં બુધૈઃ ॥ ૧,૭૧.૨૭॥

તુલયા પદ્મરાગસ્ય યન્મૂલ્યમુપજાયતે ।
લભતેઽભ્યધિકં તસ્માદ્ગુણૈર્મરકતં યુતમ્ ॥ ૧,૭૧.૨૮॥

તથા ચ પદ્મરાગાણાં દોષૈર્મૂલ્યં પ્રહીયતે ।
તતોઽસ્યાપ્યધિકા હાનિર્દોષૈર્મરકતે ભવેત્ ॥ ૧,૭૧.૨૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પુર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મરકતપરીક્ષણં નામૈકસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૨
સૂત ઉવાચ ।
તત્રૈવ સિંહલવધૂકરપલ્લવાગ્રવ્યાલૂનબાલલવલીકુસુમપ્રવાલે ।
દેશે પપાત દિતિજસ્ય નિતાન્તકાન્તં પ્રોત્ફુલ્લનીરજસમદ્યુતિ નેત્રયુગ્મમ્ ॥ ૧,૭૨.૧॥

તત્પ્રત્યયાદુભયશોભનવીચિભાસા વિસ્તારિણી જલનિધેરુપકચ્છભૂમિઃ ।
પ્રોદ્ભિન્નકેતકવનપ્રતિબદ્ધલેખાસાન્દ્રેન્દ્રનીલમણિરત્નવતી વિભાતિ ॥ ૧,૭૨.૨॥

તત્રાસિતાબ્જહલભૃદ્વસનાસિભૃઙ્ગશાર્ઙ્ગાયુધાઙ્ગહરકણ્ઠકષાયપુષ્પૈઃ ।
શુષ્કેતરૈશ્ચ કુસુમૈર્ગિરિકર્ણિકાયાસ્તસ્માદ્ભવન્તિ મણયઃ સદૃશાવભાસઃ ॥ ૧,૭૨.૩॥

અન્યે પ્રસન્નપયસઃ પયસાં નિધાતુરમ્બુત્વિષઃ શિખિગણપ્રતિમાસ્તથાન્યે ।
નીલીરસપ્રભવબુદ્બુદભાશ્ચ કેચિત્કેચિત્તથા સમદકોકિલકણ્ઠભાસઃ ॥ ૧,૭૨.૪॥

એકપ્રકારા વિસ્પષ્ટવર્ણશોભાવભાસિનઃ ।
જાયન્તે મણયસ્તસ્મિન્નિન્દ્રનીલા મહાગુણાઃ ॥ ૧,૭૨.૫॥

મૃત્પાષાણશિલારન્ધ્રકર્કરાત્રાસસંયુતાઃ ।
અભ્રિકાપટલચ્છાયાવર્ણદોષૈશ્ચ દૂષિતાઃ ॥ ૧,૭૨.૬॥

તત એવ હિ જાયન્તે મણયસ્તત્ર ભૂરયઃ ।
સાસ્ત્રસમ્બોધિતધિયસ્તાન્પ્રશંસન્તિ સૂરયઃ ॥ ૧,૭૨.૭॥

ધાર્યમાણસ્ય યે દૃષ્ટા પદ્મરાગમણેર્ગુણાઃ ।

ધારણાદિન્દ્રનીલસ્ય તાનેવાપ્નોતિ માનવઃ ॥ ૧,૭૨.૮॥

યથા ચ પદ્મરાગાણાં જાતકત્રિતયં ભવેત્ ।
ઇન્દ્ર નીલેષ્વપિ તથા દ્રષ્ટવ્યમવિશેષતઃ ॥ ૧,૭૨.૯॥

પરીક્ષાપ્રત્યયૈર્યૈશ્ચ પદ્મરાગઃ પરીક્ષ્યતે ।
ત એવ પ્રત્યયા દૃષ્ટા ઇન્દ્રનીલમણેરપિ ॥ ૧,૭૨.૧૦॥

યાવન્તં ચ ક્રમેદગ્નિં પદ્મરાગોપયોગતઃ ।
ઇન્દ્રનીલમણિસ્તસ્માત્ક્રમેત સુમહત્તરમ્ ॥ ૧,૭૨.૧૧॥

તથાપિ ન પરીક્ષાર્થં ગુણાનામભિ (તિ) વૃદ્ધયે ।
મણિરગ્નૌ સમાધેયઃ કથઞ્ચિદપિ કશ્ચન ॥ ૧,૭૨.૧૨॥

અગ્નિમાત્રાપરિજ્ઞાને દાહદોષૈશ્ચ દૂપિતઃ ।
સોઽનર્થાય ભવેદ્ભર્તુઃ કર્તુઃ કારયિતુસ્તથા ॥ ૧,૭૨.૧૩॥

કાચોત્પલકરવીરસ્ફટિકાદ્યા ઇહ બુધૈઃ સવૈદૂર્યાઃ ।
કથિતા વિજાતય ઇમે સદૃશા મણિનેન્દ્રનીલેન ॥ ૧,૭૨.૧૪॥

ગુરુભાવકઠિનભાવાવેતેષાં નિત્યમેવ વિજ્ઞેયૌ ।
કાચાદ્યથાવદુત્તરવિવર્ધમાનૌ વિશેષેણ ॥ ૧,૭૨.૧૫॥

ઇન્દ્રનીલો યથા કશ્ચિદ્બિભર્ત્યાતામ્રવર્ણતામ્ ।
રક્ષણયૌ તથા તામ્રૌ કરવીરોત્પલાવુભૌ ॥ ૧,૭૨.૧૬॥

યસ્ય મધ્યગતા ભાતિ નીલસ્યેન્દ્રાયુધપ્રભા ।
તમિન્દ્રનીલમિત્યાહુર્મહાર્હં ભુવિ દુર્લભમ્ ॥ ૧,૭૨.૧૭॥

યસ્ય વર્ણસ્ય ભૂયસ્ત્વાત્ક્ષીરે શતગુણે સ્થિતઃ ।
નીલતાં તન્નયેત્સર્વં મહાનીલઃ સ ઉચ્યતે ॥ ૧,૭૨.૧૮॥

યત્પદ્મરાગસ્ય મહાગુણસ્ય મૂલ્યં ભવેન્માષસમુન્મિતસ્ય ।
તદિન્દ્રનીલસ્ય મહાગુણસ્ય સુવર્ણ સંખ્યાતુ લિતસ્ય મૂલ્યમ્ ॥ ૧,૭૨.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઇન્દ્રનીલપરીક્ષણં નામ દ્વિસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૩

સૂત ઉવાચ ।

વૈદૂર્યપુષ્પરાગાણાં કર્કેતે ભીષ્મકે વદે ।
પરીક્ષાં બ્રહ્મણા પ્રોક્તાં વ્યાસેન કથિતાં દ્વિજા ॥ ૧,૭૩.૧॥

કલ્પાન્તકાલક્ષુબિતામ્બુરાશેર્નિર્હ્રાદકલ્પાદ્દિતિજસ્ય નાદાત્ ।
વૈદૂર્યમુત્પન્નમનેકવર્ણં શોભાભિરામદ્યુતિવર્ણબીજમ્ ॥ ૧,૭૩.૨॥

અવિદૂરે વિદૂરસ્ય ગિરેરુત્તુઙ્ગરોધસઃ ।
કામભૂતિકસીમાનમનુ તસ્યાકરોભવત્ ॥ ૧,૭૩.૩॥

તસ્ય નાદસમુત્થત્વાદાકરઃ સુમહાગુણઃ ।
અભૂદુત્તરીતો લોકે લોકત્રયવિભૂષણઃ ॥ ૧,૭૩.૪॥

તસ્યૈવ દાનવપતેર્નિનદાનુરૂપાઃ પ્રવૃટ્પયોદવરદર્શિત ચારુરૂપાઃ ।
વૈદૂર્યરત્નમણયો વિવિધાવભાસસ્તસ્માત્સ્ફુલિઙ્ગનિવહા ઇવ સંબભૂવુઃ ॥ ૧,૭૩.૫॥

પદ્મરાગમુપાદાય મણિવર્ણા હિ યે ક્ષિતૌ ।
સર્વાંસ્તાન્વર્ણશોભાભિર્વૈદૂર્યમનુગચ્છતિ ॥ ૧,૭૩.૬॥

તેષાં પ્રધાનં શિખિકણ્ઠનીલં યદ્વા ભવેદ્વેણુદલપ્રકાશમ્ ।
ચાષાગ્રપક્ષપ્રતિમશ્રિયો યે ન તે પ્રશસ્તા મણિશાસ્ત્રવિદ્ભિઃ ॥ ૧,૭૩.૭॥

ગુણવાન્વૈદૂર્યમણિર્યોજયતિ સ્વામિનં પરંભા (ભો) ગ્યૈઃ ।
દોષૈર્યુક્તો દોષૈસ્તસ્માદ્યત્નાત્પરીક્ષેત ॥ ૧,૭૩.૮॥

ગિરિકાચશિશુપાલૌ કાચ સ્ફટિકાશ્ચ ધૂમનિર્ભિન્નાઃ ।
વૈદૂર્યમણેરેતે વિજાતયઃ સન્નિભાઃ સન્તિ ॥ ૧,૭૩.૯॥

લિખ્યાભાવાત્કાચં લઘુભાવાચ્છૈસુપાલકં વિદ્યાત્ ।
ગિરિકાચસદીપ્તિત્વાત્સ્ફટિકં વર્ણોજ્જ્વલત્વેન ॥ ૧,૭૩.૧૦॥

યદિન્દ્રનીલસ્ય મહાગુણસ્ય સુવર્ણસંખ્યાકલિતસ્ય મૂલ્યમ્ ।
તદેવ વૈદૂર્યમણેઃ પ્રદિષ્ટં પલદ્વયોન્માપિ તગૌરવસ્ય ॥ ૧,૭૩.૧૧॥

જાત્યસ્ય સર્વેઽપિ મણેસ્તુ યાદૃગ્વિજાતયઃ સન્તિ સમાનવર્ણાઃ ।
તથાપિ નાનાકરણાનુમેયભેદપ્રકારઃ પરમઃ પ્રદિષ્ટઃ ॥ ૧,૭૩.૧૨॥

સુખોપલક્ષ્યશ્ચ સદા વિચાર્યો હ્યયં પ્રભેદો વિદુષા નરેણ ।
સ્નેહપ્રભેદો લઘુતા મૃદુત્વં વિજાતિલિઙ્ગં ખલુ સાર્વજન્યમ્ ॥ ૧,૭૩.૧૩॥

કુશલાકુશલૈઃ પ્રપૂર્યમાણાઃ પ્રતિબદ્ધાઃ પ્રતિસત્ક્રિયાપ્રયોગૈઃ ।
ગુણદોષસમુદ્ભવં લભન્તે મણયોઽર્થોન્તરમૂલ્યમેવ ભિન્નાઃ ॥ ૧,૭૩.૧૪॥

ક્રમશઃ સમતીતવર્તમાનાઃ પ્રતિબદ્ધા મણિબન્ધકેન યત્નાત્ ।
યદિ નામ ભવન્તિ દોષહીના મણયઃ ષડ્ગુણમાપ્નુવન્તિ મૂલ્યમ્ ॥ ૧,૭૩.૧૫॥

આકરાન્સમતીતાનામુદધેસ્તીરસન્નિધૌ ।
મૂલ્યમેતન્મણીનાં તુ ન સર્વત્ર મહીતલે ॥ ૧,૭૩.૧૬॥

સુવર્ણો મનુના યસ્તુ પ્રોક્તઃ ષોડશમાષકઃ ।
તસ્ય સપ્તતિમો ભાગઃ સંજ્ઞારૂપં કરિષ્યતિ ॥ ૧,૭૩.૧૭॥

શાણશ્ચતુર્માષમાનો માષકઃ પઞ્ચકૃષ્ણલઃ ।
પલસ્ય દશમો ભાગો ધરણઃ પરિકીર્તિતઃ ॥ ૧,૭૩.૧૮॥

ઇત્થં મણિવિધિઃ પ્રોક્તો રત્નાનાં મૂલ્યનિશ્ચયે ॥ ૧,૭૩.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વૈદૂર્યપરીક્ષણં નામ ત્રિસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૪
સૂત ઉવાચ ।
પતિતાયા હિમાદ્રૌ તુ ત્વચસ્તસ્ય સુરદ્વિષઃ ।
પ્રાદુર્ભવન્તિ તાભ્યસ્તુ પુષ્પ (ષ્ય) રાગા મહાગુણાઃ ॥ ૧,૭૪.૧॥

આપીતપાણ્ડુરુચિરઃ પાષાણઃ પદ્મરાગસંજ્ઞસ્તુ ।
કૌકણ્ટકનામા સ્યાત્સ એવ યદિ લોહિતાપીતઃ ॥ ૧,૭૪.૨॥

આલોહિતસ્તુ પીતઃ સ્વચ્છઃ કાષાયકઃ સ એકોક્તઃ ।
આનીલશુક્લવર્ણઃ સ્નિગ્ધઃ સોમાલ(ન) કઃ સગુણઃ ॥ ૧,૭૪.૩॥

અત્યન્તલોહિતો યઃ સ એવ ખલુ પદ્મરાગસંજ્ઞઃ સ્યાત્ ।
અપિ ચેન્દ્રનીલસંજ્ઞઃ સ એવ કથિતઃ સુનીલઃ સન્ ॥ ૧,૭૪.૪॥

મૂલ્યં વૈદૂર્યમણેરિવ ગાદિતં હ્યસ્ય રત્નસારવિદા ।
ધારણફલં ચ તદ્વત્કિં તુ સ્ત્રીણાં સુતપ્રદો ભવતિ ॥ ૧,૭૪.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પુષ્પરાગપરીક્ષણં નામ ચતુઃ સપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૫

સૂત ઉવાચ ।

વાયુર્નખાન્દૈત્યપતેર્ગૃહીત્વા ચિક્ષેપ સત્પદ્મવનેષુ હૃષ્ટઃ ।

તતઃ પ્રસૂતં પવનોપપન્નં કર્કેતનં પૂજયતમં પૃથિવ્યામ્ ॥ ૧,૭૫.૧॥

વર્ણેન તદ્રુધિરસોમમધુપ્રકાશમાતામ્રપીતદહનોજ્જ્વલિતં વિભાતિ ।

નીલં પુનઃ ખલુ સિતં પરુષં વિભિન્નં વ્યાધ્યાદિદોષકરણેન ચ તદ્વિભાતિ ॥ ૧,૭૫.૨॥

સ્નિગ્ધા વિશુદ્ધાઃ સમરાગિણશ્ચ આપીતવર્ણા ગુરવો વિચિત્રાઃ ।

ત્રાસવ્રણવ્યાલવિવર્જિતાશ્ચ કર્કેતનાસ્તે પરમં પવિત્રાઃ ॥ ૧,૭૫.૩॥

પત્રેણ કાઞ્ચનમયેન તુ વેષ્ટયિત્વા તપ્તં યદા હુતવહે ભવતિ પ્રકાશમ્ ।

રોગપ્રણાશનકરં કલિનાશનં તદાયુષ્કરં કુલકરં ચ સુખપ્રદં ચ ॥ ૧,૭૫.૪॥

એવંવિધં બહુગુણં મણિમાવહન્તિ કર્કેતનં શુભલઙ્કૃતયે નરા યે ।

તે પૂજિતા બહુધના બહુબાન્ધવાશ્ચ નિત્યોજ્જ્વલાઃ પ્રમુદિતા અપિતે ભવન્તિ ॥ ૧,૭૫.૫॥

એકેઽપનહ્ય વિકૃતાકુલનીલભાસઃ પ્રમ્લાનરાગલુલિતાઃ કલુષા વિરૂપાઃ ।

તેજોઽતિદીપ્તિ કુલપુષ્ટિવિહીનવર્ણાઃ કર્કેતનસ્ય સદૃશં વપુરુદ્વહન્તિ ॥ ૧,૭૫.૬॥

કર્કેતનં યદિ પરીક્ષિતવર્ણરૂપં પ્રત્યગ્રભાસ્વરદિવાકરસુપ્રકાશમ્ ।

તસ્યોત્તમસ્ય મણિ શાસ્ત્રવિદાં મહિમ્ના તુલ્યં તુ મૂલ્યમુદિતં તુલિતસ્ય કાર્યમ્ ॥ ૧,૭૫.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે

કર્કેતનપરીક્ષણં નામ પઞ્ચસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૬

સૂત ઉવાચ ।

હિમવત્યુત્તરદેશે વીર્યં પતિતં સુરદ્વિષસ્તસ્ય ।

સમ્પ્રાપ્તમુત્તમાનામાકરતાં ભીષ્મરત્નાનામ્ ॥ ૧,૭૬.૧॥

શુક્લાઃ શઙ્ખાબ્જનિભાઃ સ્યોનાકસન્નિભા પ્રભાવન્તઃ ।

પ્રભવન્તિ તતસ્તરુણા વજ્રનિભા ભીષ્મપાષાણાઃ ॥ ૧,૭૬.૨॥

હેમાદિપ્રતિબદ્ધાઃ શુદ્ધમપિ શ્રદ્ધયા વિધત્તે યઃ ।

ભીષ્મમણિં ગ્રીવાદિષુ સુસમ્પદં સ સર્વદા લભતે ॥ ૧,૭૬.૩॥

નિરીક્ષ્ય પલાયન્તે યં તમરણ્યનિવાસિનઃ સમીપઽપિ ।

દ્વીપિવૃકશરભકુઞ્જરસિંહવ્યાઘ્રાદયો હિંસ્રાઃ ॥ ૧,૭૬.૪॥

તસોયત્કલતષ્ટતરોર્ભવતિ ભયં ન ચાસ્તીશમુપહસન્તિ ।
ભીષ્મમણિર્ગુણયુક્તો સમ્યક્પ્રાપ્તાઙ્ગુલીકલત્રત્વઃ ॥ ૧,૭૬.૫॥

પિતૃતર્પણે પિતૃણાં તૃપ્તિર્બહુવાર્ષિકી ભવતિ ।
શામ્યન્ત્યદ્ભુતાન્યપિ સર્પાણ્ડજાખુવૃશ્ચિકવિષાણિ ।
સલિલાગ્નિવૈરિતસ્કરભયાનિ ભીમાનિ નશ્યન્તિ ॥ ૧,૭૬.૬॥

શૈવલબલાહકાભં પુરુષં પીતપ્રભં પ્રભાહીનમ્ ।
મલિનદ્યુતિ ચ વિવર્ણં દૂરાત્પરિવર્જયેત્પ્રાજ્ઞઃ ॥ ૧,૭૬.૭॥

મૂલ્યં પ્રકલ્પ્યમેષાં વિબુધવરૈર્દેશકાલવિજ્ઞાનાત્ ।
દૂરે ભૂતાનાં બહુ કિઞ્ચિન્નિકટપ્રસૂતાનામ્ ॥ ૧,૭૬.૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વૈદૂર્યપરીક્ષણં નામ ષટ્સપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૭
સૂત ઉવાચ ।
પુણ્યેષુ પર્વતવરેષુ ચ નિમ્નગાસુ સ્થાનાન્તરેષુ ચ તથોત્તરદેશગત્વાત્ ।
સંસ્થાપિતાઃ સ્વનખબાહુગતેઃ પ્રકાશં સમ્પૂજ્ય દાનવપતિં પ્રથિતે પ્રદેશે ॥ ૧,૭૭.૧॥

દાશાર્ણવાગદર (વ) મેકલકાલગાદૌ ગુઞ્જાઞ્જનક્ષૌદ્રમૃણાલવર્ણાઃ ।
ગન્ધર્વવહ્નિકદલીસદૃશાવભાસા એતે પ્રશસ્તાઃ પુલકાઃ પ્રસૂતાઃ ॥ ૧,૭૭.૨॥

શઙ્ખાબ્જભૃઙ્ગાર્કવિચિત્રભઙ્ગા સૂત્રૈરુર્(વ્ય) પેતાઃ પરમાઃ પવિત્રાઃ ।
મઙ્ગલ્યયુક્તા બહુભક્તિચિત્રા વૃદ્ધિપ્રદાસ્તે પુલકા ભવન્તિ ॥ ૧,૭૭.૩॥

કાકા (ક।)શ્વરાસભસૃગાલવૃકોગ્રરૂપૈર્ગૃધ્રૈઃ સમાંસરુધિરાર્દ્રમુખૈરુપેતાઃ ।
મૃત્યુપ્રદાશ્ચ વિદુષા પરિવર્જનીયા મૂલ્યં પલસ્ય કથિતં ચ શતાનિ પઞ્ચ ॥ ૧,૭૭.૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પુલકપરીક્ષણં નામ સપ્તસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૮
સૂત ઉવાચ ।

હુતભુગ્રૂપમાદાય દાનવસ્ય યથેપ્સિતમ્ ।
નર્મદાયાં નિચિક્ષેપ કિઞ્ચિદ્દીનાદિભૂમિષુ ॥ ૧,૭૮.૧॥

તત્રેન્દ્રગોપકલિતં શુકવક્રવર્ણં સંસ્થાનતઃ પ્રકટપીલુસમાનમાત્રમ્ ।
નાનાપ્રકારવિહિતં રુધિરાક્ષ(ખ્ય) રત્નમુદ્ધૃત્ય તસ્ય ખલુ સર્વસમાનમેવ ॥ ૧,૭૮.૨॥

મધ્યેન્દુપાણ્ડુરમતીવ વિશુદ્ધવર્ણં તચ્ચેન્દ્રનીલસદૃશં પટલં તુલે સ્યાત્ ।
સૈશ્વર્યભૃત્યજનનં કથિતં તદૈવ પક્વઞ્ચ તત્કિલ ભવેત્સુરવજ્રવર્ણમ્ ॥ ૧,૭૮.૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રુધિરાક્ષરત્નપરીક્ષણં નામાષ્ટસપ્તતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭૯
સૂત ઉવાચ ।
કાવેરવિન્ધ્યયવનચીનનેપાલભૂમિષુ ।
લાઙ્ગલી વ્યકિરન્મેદો દાનવસ્ય પ્રયત્નતઃ ॥ ૧,૭૯.૧॥

આકાશશુદ્ધં તૈલાખ્યમુત્પન્નં સ્ફટિકં તતઃ ।
મૃણાલશઙ્ખધવલં કિઞ્ચિદ્વર્ણાન્તરન્વિતમ્ ॥ ૧,૭૯.૨॥

ન ત્તુલ્યં હિ રત્નાનામથવા પાપનાશનમ્ ।
સંસ્કૃતં શિલ્પિના સદ્યો મૂલ્યં કિઞ્ચિલ્લભેત્તતઃ (દા) ॥ ૧,૭૯.૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સ્ફટિકપરીક્ષણં નામૈકોનાશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૦
સૂત ઉવાચ ।
આદાય શેષસ્તસ્યાન્ત્રં બલસ્ય કેલાદિષુ ।
ચિક્ષેપ તત્ર જાયન્તે વિદ્રુમાઃ સુભહાગુણાઃ ॥ ૧,૮૦.૧॥

તત્ર પ્રધાનં શશલોહિતાભં ગુઞ્જાજપાપુષ્પનિભં પ્રદિષ્ટમ્ ।
સુનીલકં દેવકરોમકઞ્ચ સ્થાનાનિ તેષુ પ્રભવં સુરાગમ્ ॥ ૧,૮૦.૨॥

અન્યત્ર જાતં ચ ન તત્પ્રધાનં મૂલ્યં ભવેચ્છિલ્પિવિશેષયોગાત્ ।
પ્રસન્નં કોમલં સ્નિગ્ધં સુરાગં વિદ્રુમં હિ તત્ ॥ ૧,૮૦.૩॥

ધનધાન્યકરં લોકે વિષાર્તિભયનાશનમ્ ।
પરીક્ષા પુલકસ્યોક્તા રુધિરાક્ષસ્ય વૈ મણેઃ ।
સ્ફટિકસ્ય વિદ્રુમસ્ય રત્નજ્ઞાનાય શૌનક ! ॥ ૧,૮૦.૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિદ્રુમપરીક્ષણં નામાશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૧
(ઇતિ રત્નમુક્તાદિ પરીક્ષા સમાપ્તા ) ।
(અથ તીર્થક્ષેત્રમાહાત્મ્યમારભ્યતે ) ।
સૂત ઉવાચ ।
સર્વતીર્થાનિ વક્ષ્યામિ ગઙ્ગા તીર્થોત્તમોત્તમા ।
સર્વત્ર સુલભા ગઙ્ગાત્રિષુ સ્થાનેષુ દુર્લભા ॥ ૧,૮૧.૧॥

ગઙ્ગાદ્વારે પ્રયાગે ચ ગઙ્ગાસાગરસઙ્ગમે ।
પ્રયાગં પરમં તીર્થં મૃતાનાં ભુક્તિમુક્તિદમ્ ॥ ૧,૮૧.૨॥

સેવનાત્કૃતપિણ્ડાનાં પાપજિત્કામદં નૃણામ્ ।
વારાણસી પરં તીર્થં વિશ્વેશો યત્ર કેશવઃ ॥ ૧,૮૧.૩॥

કુરુક્ષેત્રં પરં તીર્થં દાનાદ્યૈર્ભુક્તિમુક્તિદમ્ ।
પ્રભાસં પરં તીર્થં સોમનાથો હિ તત્ર ચ ॥ ૧,૮૧.૪॥

દ્વારકા ચ પુરી રમ્યા ભુક્તિમુક્તિપ્રદાયિકા ।
પ્રાચી સરસ્વતી પુણ્યા સપ્તસારસ્વતં પરમ્ ॥ ૧,૮૧.૫॥

કેદારં સર્વપાપઘ્નં સ (શ) મ્ભલગ્રામ ઉત્તમઃ ।
નરનરાયણં તીર્થં મુક્ત્યૈ વદરિકાશ્રમઃ ॥ ૧,૮૧.૬॥

શ્વેતદ્વીપં પુરી માયા નૈમિષં પુષ્કરં પરમ્ ।
અયોધ્યા ચાર્ઘ્યતીર્થં તુ ચિત્રકૂટં ચ ગોમતી ॥ ૧,૮૧.૭॥

વૈનાયકં મહીતીર્થં રામગિર્યાશ્રમં પરમ્ ।
કાઞ્ચીપુરી તુઙ્ગભદ્રા શ્રીશૈલં સેતુબન્ધનમ્ ॥ ૧,૮૧.૮॥

રામેશ્વરં પરં તીર્થં કાર્તિકેયં તથોત્તમમ્ ।
ભૃગુતુઙ્ગં કામતીર્થં તીર્થં ચામરકણ્ટકમ્ ॥ ૧,૮૧.૯॥

ઉજ્જયિન્યાં મહાકાલઃ કુબ્જકે શ્રીધરો હરિઃ ।
કુબ્જામ્રકં મહાતીર્થં કાલસર્પિશ્ચ કામદમ્ ॥ ૧,૮૧.૧૦॥

મહા કેશી ચ કાવેરી ચન્દ્રભાગા વિપાશયા ।
એકામ્રં ચ તથા તીર્થં બ્રહ્મેશં દેવકોટકમ્ ॥ ૧,૮૧.૧૧॥

મથુરા ચ પુરી રમ્યા શોણશ્ચૈવ મહાનદઃ ।
જમ્બૂસરો મહાતીર્થં તાનિ તીર્થાનિ વિદ્ધિ ચ ॥ ૧,૮૧.૧૨॥

સૂર્યઃ શિવો ગણો દેવી હરિર્યત્ર ચ તિષ્ઠતિ ।
એતેષુ ચ યથાન્યેષુ સ્નાનં દાનં જપસ્તપઃ ॥ ૧,૮૧.૧૩॥

પૂજા શ્રાદ્ધં પિણ્ડદાનં સર્વં ભવતિ ચાક્ષયમ્ ।
શાલગ્રામં સર્વદં સ્યાત્તીર્થં પશુપતેઃ પરમ્ ॥ ૧,૮૧.૧૪॥

કોકામુખં ચ વારાહં ભા (ભુ) ણ્ડીરં સ્વામિસંજ્ઞકમ્ ।
લો (મો) હદણ્ડે મહાવિષ્ણુર્મન્દારે મધુસૂદનઃ ॥ ૧,૮૧.૧૫॥

કામરૂપં મહાતીર્થં કામાખ્યા (ક્ષા) યત્ર તિષ્ઠતિ ।
પુણ્ડ્રવર્ધનકં તીર્થં કાર્તિકેયશ્ચ યત્ર ચ ॥ ૧,૮૧.૧૬॥

વિરજસ્તુ મહાતીર્થં તીર્થં શ્રીપુરુષોત્તમમ્ ।
મહેન્દ્રપર્વતસ્તીર્થં કાવેરી ચ નદી પરા ॥ ૧,૮૧.૧૭॥

ગોદાવરી મહાતીર્થં પયોષ્ણી વરદા નદી ।
વિન્ધ્યઃ પાપહરં તીર્થં નર્મદાભેદ ઉત્તમઃ ॥ ૧,૮૧.૧૮॥

ગોકર્ણં પરમં તીર્થં તીર્થં માહિષ્મતી પુરી ।
કાલઞ્જરં મહીતીર્થં શુક્લતીર્થમનુત્તમમ્ ॥ ૧,૮૧.૧૯॥

કૃતે શૌચે મુક્તિદં ચ શાર્ઙ્ગધારી તદન્તિકે ।
વિરજં સર્વદં તીર્થં સ્વર્ણાક્ષં તીર્થમુત્તમમ્ ॥ ૧,૮૧.૨૦॥

નન્દિતીર્થં મુક્તિદં ચ કોટિતીર્થફલપ્રદમ્ ।
નાસિક્યં ચ મહાતીર્થં ગોવર્ધનમતઃ પરમ્ ॥ ૧,૮૧.૨૧॥

કૃષ્ણવેણી ભીમરથી ગણ્ડકી યા ત્વિરાવતી ।
તીર્થં બિન્દુસરઃ પુણ્યં વિષ્ણુપાદોદકં પરમ્ ॥ ૧,૮૧.૨૨॥

બ્રહ્મધ્યાનં પરં તીર્થં તીર્થમિન્દ્રિયનિગ્રહઃ ।
દમસ્તીર્થં તુ પરમં ભવશુદ્ધિઃ પરં તથા ॥ ૧,૮૧.૨૩॥

જ્ઞાનહ્રદે ધ્યાનજલે રાગદ્વેષમલાપહે ।
યઃ સ્નાતિ માનસે તીર્થે સ યાતિ પરમાં ગતિમ્ ॥ ૧,૮૧.૨૪॥

ઇદં તીર્થમિદં નેતિ યે નરા ભેદદર્શિનઃ ।
તેષાં વિધીયતે તીર્થગમનં તત્ફલં ચ યત્ ॥ ૧,૮૧.૨૫॥

સર્વં બ્રહ્મેતિયોઽવેતિ નાતીર્થં તસ્ય કિઞ્ચન ।
એતેષુ સ્નાનદાનાનિ શ્રાદ્ધં પિણ્ડમથાક્ષયમ્ ॥ ૧,૮૧.૨૬॥

સર્વા નદ્યઃ સર્વશૈલાઃ તીર્થં દેવાદિસેવિતમ્ ।
શ્રીરઙ્ગં ચ હરેસ્તીર્થં તાપી શ્રેષ્ઠા મહાનદી ॥ ૧,૮૧.૨૭॥

સપ્તગોદાવરં તીર્થં તીર્થં કોણગિરિઃ પરમ્ ।
મહાલક્ષ્મીર્યત્ર દેવી પ્રણીતા પરમા નદી ॥ ૧,૮૧.૨૮॥

સહ્યાદ્રૌ દેવદેવેશ એકવીરઃ સુરેશ્વરી ।
ગઙ્ગાદ્વારે કુશાવર્તે વિન્ધ્યકે નીલપર્વતે ॥ ૧,૮૧.૨૯॥

સ્નાત્વા કનખલે તીર્થે સ ભવેન્ન પુનર્ભવે ।
સૂ ઉવાચ ।
એતાન્યન્યાનિ તીર્થાનિ સ્નાનાદ્યૈઃ સર્વદાનિ હિ ॥ ૧,૮૧.૩૦॥

શ્રુત્વાબ્રવીદ્ધરેર્બ્રહ્મા વ્યાસં દક્ષાદિસંયુતમ્ ।
એતાન્યુક્ત્વા ચ તીર્થાનિ પુન સ્તીર્થોત્તમોત્તમમ્ ।
ગયાખ્યં પ્રાહ સર્વેષામક્ષયં બ્રહ્મલોકદમ્ ॥ ૧,૮૧.૩૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સર્વતીર્થ માહાત્મ્યં નામૈકાશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૨
શ્રીગણેશાય નમઃ ।
(અથ ગયામાહાત્મ્યં પ્રારભ્યતે) ।
બ્રહ્મોવાચ ।
સારાત્સારતરં વ્યાસ ગયાભાહાત્મ્ય મુત્તમમ્ ।
પ્રવક્ષ્યામિ સમાસેન બુક્તિમુક્તિપ્રદં શ‍ૃણુ ॥ ૧,૮૨.૧॥

ગયાસુરોઽભવત્પૂર્વં વીર્યવાન્પરમઃ સ ચ ।

તપસ્તપ્યન્મહાઘોરં સર્વભૂતોપતાપનમ્ ॥ ૧,૮૨.૨॥

તત્તપસ્તાપિતા દેવાસ્તદ્વધાર્થં હરિં ગતાઃ ।
શરણં હરિરૂચે તાન્ભવિતવ્યં શિવાત્મભિઃ ॥ ૧,૮૨.૩॥

પાત્યતેઽસ્ય મહાદેહો તથેત્યૂચુઃ સુરા હરિમ્ ।
કદાચિચ્છિવપૂજાર્થં ક્ષીરાબ્ધેઃ કમલાનિ ચ ॥ ૧,૮૨.૪॥

આનીય કીકટે દેશે શયનં ચાકરોદ્બલી ।
વિષ્ણુમાયાવિમૂઢોઽસૌ ગદયા વિષ્ણુના હતઃ ॥ ૧,૮૨.૫॥

અતો ગદાધરો વિષ્ણુર્ગયાયાં મુક્તિદઃ સ્થિતઃ ।
તસ્ય દેહો લિઙ્ગરૂપી સ્થિતઃ શુદ્ધે પિતામહઃ ॥ ૧,૮૨.૬॥

જનાર્દનશ્ચ કાલેશસ્તથાન્યઃ પ્રપિતામહઃ ।
વિષ્ણુરાહાથ મર્યાદાં પુણ્યક્ષેત્રં ભવિષ્યતિ ॥ ૧,૮૨.૭॥

યજ્ઞં શ્રાદ્ધં પિણ્ડદાનં સ્નાનાદિ કુરુતે નરઃ ।
સ સ્વર્ગં બ્રહ્મલોકં ચ ગચ્છેન્ન નરકં નરઃ ॥ ૧,૮૨.૮॥

ગયાતીર્થં પરં જ્ઞાત્વા યાગં ચક્રે પિતામહઃ ।
બ્રાહ્મણાન્પૂજયામાસ ઋત્વિગર્થમુપાગતાન્ ॥ ૧,૮૨.૯॥

મહાનદીં રસવહાં સૃષ્ટ્વા વાપ્યાદિકં તથા ।
ભક્ષ્યભોજ્યફલાદીંશ્ચ કામધેનું તથાસૃજત્ ॥ ૧,૮૨.૧૦॥

પઞ્ચક્રોશં ગયોક્ષેત્રં બ્રાહ્મણેભ્યો દદૌ પ્રભુઃ ।
ધરમયાગેષુ લોભાત્તુ પ્રતિગૃહ્ય ધનાદિકમ્ ॥ ૧,૮૨.૧૧॥

સ્થિતા વિપ્રાસ્તદા શપ્તા ગયાયાં બ્રાહ્મણાસ્તતઃ ।
મા ભૂત્ત્રૈપુરુષી વિદ્યા મા ભૂત્ત્રૈપુરુષં ધનમ્ ॥ ૧,૮૨.૧૨॥

યુષ્માકં સ્યાદ્વારિવહા નદી પાષાણપર્વતઃ ।
શપ્તૈસ્તુ પ્રાર્થિતો બ્રહ્માનુગ્રહં કૃતવાન્પ્રભુઃ ॥ ૧,૮૨.૧૩॥

લોકાઃ પુણ્યા ગયાયાં હિ શ્રાદ્ધિનો બ્રહ્મલોકગાઃ ।
યુષ્માન્યે પૂજયિષ્યન્તિ તૈરહં પૂજિતઃ સદા ॥ ૧,૮૨.૧૪॥

બ્રહ્મજ્ઞાનં ગયાશ્રાદ્ધં ગોગૃહે મરણં તથા ।
વાસઃ પુંસાં કુરુક્ષેત્રે મુક્તિરેષા ચતુર્વિધા ॥ ૧,૮૨.૧૫॥

સમુદ્રાઃ સરિતઃ સર્વા વાપીકૂપહ્રદાસ્તથા ।
સ્નાતુકામા ગયાતીર્થં વ્યાસ યાસ યાન્તિ ન સંશયઃ ॥ ૧,૮૨.૧૬॥

બ્રહ્મહત્યા સુરાપાનં સ્તેયં ગુર્વઙ્ગનાગમઃ ।
પાપં તત્સંગજં સર્વં ગયાશ્રાદ્ધાદ્વિનશ્યતિ ॥ ૧,૮૨.૧૭॥

અસંસ્કૃતા મૃતા ય ચ પશુચોરહતાશ્ચ યે ।
સર્પદષ્ટા ગયાશ્રાદ્ધાન્મુક્તાઃ સ્વર્ગં વ્રજન્તિ તે ॥ ૧,૮૨.૧૮॥

ગયાયાં પિણ્ડદાનેન યત્ફલં લભતે નરઃ ।
ન તચ્છક્યં મયા વક્તું વર્ષકોટિશતૈરપિ ॥ ૧,૮૨.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગયામાહાત્મ્યં નામ દ્વ્યશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૩
બ્રહ્મોવાચ ।
કીકટેષુ ગયા પુણ્યા પુણ્યં રાજગૃહં વનમ્ ।
વિષયશ્ચારણઃ પુણ્યો નદીનાં ચ પુનઃ પુના ॥ ૧,૮૩.૧॥

મુણ્ડપૃષ્ઠં તુ પૂર્વસ્મિન્પશ્ચિમે દક્ષિણોત્તરે ।
સાર્ધક્રોશદ્વયં માનં ગયાયાં પરિકીર્તિતમ્ ॥ ૧,૮૩.૨॥

પઞ્ચક્રોશં ગયાક્ષેત્રં ક્રોશમેકં ગયાશિરઃ ।
તત્ર પિણ્ડપ્રદાનેન તૃપ્તિર્ભવતિ શાશ્વતી ॥ ૧,૮૩.૩॥

નગાજ્જનાર્દનાચ્ચૈવ કૂપાચ્ચોત્તરમાનસાત્ ।
એતદ્ગયાશિરઃ પ્રોક્તં ફલ્ગુતીર્થં તદુચ્યતે ॥ ૧,૮૩.૪॥

તત્ર પિણ્ડપ્રદાનેન પિતૃણા પરમા ગતિઃ ।
ગયાગમનમાત્રેણ પિતૃણામનૃણો ભવેત્ ॥ ૧,૮૩.૫॥

ગયાયાં પિતૃરૂપેણ દેવદેવો જનાર્દનઃ ।
તં દૃષ્ટ્વા પુણ્ડરીકાક્ષં મુચ્યતે વૈ ઋણત્રયાત્ ॥ ૧,૮૩.૬॥

રથમાર્ગં ગયતીર્થે દૃષ્ટ્વા રુદ્રપદાદિકે ।
કાલેશ્વરં ચ કેદારં પિતૃણામનૃણો ભવેત્ ॥ ૧,૮૩.૭॥

દૃષ્ટ્વા પિતામહં દેવં સર્વપાપૈઃ પ્રમુચ્યતે ।

લોકં ત્વનામયં યાતિ દૃષ્ટ્વા ચ પ્રપિતામહમ્ ॥ ૧,૮૩.૮॥

તથા ગદાધરં દેવં માધવં પુરુષોત્તમમ્ ।
તં પ્રણમ્ય પ્રયત્નેન ન ભૂયો જાયતે નરઃ ॥ ૧,૮૩.૯॥

મૌનાદિત્યં મહાત્માનં કનકાર્કં વિશેષતઃ ।
દૃષ્ટ્વા મૌનેન વિપ્રર્ષે પિતૄણામનૃણો ભવેત્ ॥ ૧,૮૩.૧૦॥

બ્રહ્માણં પૂજયિત્વા ચ બ્રહ્મલોકમવાપ્નુયાત્ ।
ગાયત્રીં પ્રતરુત્થાય યસ્તુ પશ્યતિ માનવઃ ॥ ૧,૮૩.૧૧॥

સન્ધ્યાં કૃત્વા પ્રયત્નેન સર્વવેદફલં લભેત્ ।
સાવિત્રીં ચૈવ મધ્યાહ્ને દૃષ્ટ્વા યજ્ઞફલં લભેત્ ॥ ૧,૮૩.૧૨॥

સરસ્વતીં ચ સાયાહ્ને દૃષ્ટ્વા દાનફલં લભેત્ ।
નગસ્થમીશ્વરં દૃષ્ટ્વા પિતૄણામનૃણો ભવેત્ ॥ ૧,૮૩.૧૩॥

ધર્મારણ્યં ધર્મમીશં દૃષ્ટ્વા સ્યાદૃણનાશનમ્ ।
દેવં ગૃધ્રેશ્વરં દૃષ્ટ્વા કો ન મુચ્યેત બન્ધનાત્ ॥ ૧,૮૩.૧૪॥

ધેનું દૃષ્ટ્વા ધેનુવને બ્રહ્મલોકં નયેત્પિતૄન્ ।
પ્રભાસેશં પ્રભાસે ચ દૃષ્ટ્વા યાતિ પરાં ગતિમ્ ॥ ૧,૮૩.૧૫॥

કોટીશ્વરં ચાશ્વમેધં દૃષ્ટ્વા સ્યાદૃણનાશનમ્ ।
સ્વર્ગદ્વારેશ્વરં દૃષ્ટ્વા મુચ્યતે ભવબન્ધનાત્ ॥ ૧,૮૩.૧૬॥

રામેશ્વરં ગદાલોલં દૃષ્ટ્વા સ્વર્ગમવાપ્નુયાત્ ।
બ્રહ્મેશ્વરં તથા દૃષ્ટ્વા મુચ્યતે બ્રહ્મહત્યયા ॥ ૧,૮૩.૧૭॥

મુણ્ડપૃષ્ઠે મહાચણ્ડીં દૃષ્ટ્વા કામાનવાપ્નુયાત્ ।
ફલ્ગ્વીશં ફલ્ગુચણ્ડીં ચ ગૌરીં દૃષ્ટ્વા ચ મઙ્ગલામ્ ॥ ૧,૮૩.૧૮॥

ગોમકં ગોપતિં દેવં પિતૄણામનૃણો ભવેત્ ।
અઙ્ગારેશં ચ સિદ્ધેશં ગયાદિત્યં ગજં તથા ॥ ૧,૮૩.૧૯॥

માર્કણ્ડેયેશ્વરં દૃષ્ટ્વા પિતૄણામનૃણો ભવેત્ ।
ફલ્ગુતીર્થે નરઃ સ્નાત્વા દૃષ્ટ્વા દેવં ગદાધરમ્ ॥ ૧,૮૩.૨૦॥

એતેન કિં ન પર્યાપ્તં નૃણાં સુકૃતકારિણામ્ ।
બ્રહ્મલોકં પ્રયાન્તીહ પુરુષા એકવિંશતિઃ ॥ ૧,૮૩.૨૧॥

પૃથિવ્યાં યાનિ તીર્થાની યે સમુદ્રાઃ સરાંસિ ચ ।
ફલ્ગુતીર્થં ગમિષ્યન્તિ વારમેકં દિનેદિને ॥ ૧,૮૩.૨૨॥

પૃથિવ્યાં ચ ગયા પુણ્યા ગયાયાં ચ ગયાશિરઃ ।
શ્રેષ્ઠં તથા ફલ્ગુતીર્થં તન્મુખં ચ સુરસ્ય હિ ॥ ૧,૮૩.૨૩॥

ઉદીચિ કનકાનદ્યો નાભિતીર્થં તુ મધ્યતઃ ।
પુણ્યં બ્રહ્મસદસ્તીર્થં સ્નાનાત્સ્યાદ્બ્રહ્મલોકદમ્ ॥ ૧,૮૩.૨૪॥

કૂપે પિણ્ડાદિકં કૃત્વા પિતૃણામનૃણો ભવેમ્ ।
તથાક્ષયવટે શ્રાદ્ધી બ્રહ્મલોકં નયેત્પિતૄન્ ॥ ૧,૮૩.૨૫॥

હંસતીર્થે નરઃ સ્નાત્વા સર્વપાપૈઃ પ્રમુચ્યતે ।
કોટિતીથ ગયાલોલે વૈતરણ્યાં ચ ગોમકે ॥ ૧,૮૩.૨૬॥

બ્રહ્મલોકં નયેચ્છ્રાદ્ધી પુરુષાનેકવિંશતિમ્ ।
બ્રહ્મતીર્થે રામતીર્થે આગ્નેયે સોમતીર્થકે ॥ ૧,૮૩.૨૭॥

શ્રાદ્ધી રામહ્રદે બ્રહ્મલોકં પિતૃકુલં નયેત્ ।
ઉત્તરે માનસે શ્રાદ્ધી ન ભૂયો જાયતે નરઃ ॥ ૧,૮૩.૨૮॥

દક્ષિણે માનસે શ્રાદ્ધી બ્રહ્મલોકં પિતૄન્નયેત્ ।
સ્વગદ્વારે નરઃ શ્રાદ્ધી બ્રહ્મલોકં નયેત્પિતૄન્ ।
ભીષ્મતર્પણકૃત્તસ્ય કૂટે તારયતે પિતૄન્ ।
ગૃધ્રેશ્વરે તથા શ્રાદ્ધી પિતૃણામનૃણો ભવેત્ ॥ ૧,૮૩.૨૯॥

શ્રાદ્ધી ચ ધેનુકારણ્યે બ્રિહ્મલોકં પિતૄન્નયેત્ ।
તિલધેનુપ્રદઃ સ્નાત્વા દૃષ્ટ્વા ધેનું ન સંશયઃ ॥ ૧,૮૩.૩૦॥

ઐન્દ્રે વા નરતીર્થે ચ વાસવે વૈષ્ણવે તથા ।
મહાનદ્યાં કૃતશ્રાદ્ધો બ્રહ્મલોકં નયેત્પિતૄન્ ॥ ૧,૮૩.૩૧॥

ગાયત્રે ચૈવ સાવિત્રે તીર્થે સારસ્વતે તથા ।
સ્નાનસ ન્ધ્યાતર્પણકૃચ્છ્રાદ્ધી ચૈકોત્તરં શતમ્ ॥ ૧,૮૩.૩૨॥

પિતૃણાં તુ કુલં બ્રહ્મલોકં નયતિ માનવઃ ।
બ્રહ્મયોનિં વિનિર્ગચ્છેત્પ્રયતઃ પિતૃમાનસઃ ॥ ૧,૮૩.૩૩॥

તર્પયિત્વા પિતૄન્દેવાન્ન વિશેદ્યોનિસઙ્કટે ।
તર્પણે કાકજઙ્ઘાર્યાં પિતૃણાં તૃપ્તિરક્ષયા ॥ ૧,૮૩.૩૪॥

ધર્મારણ્યે મતઙ્ગસ્ય વાપ્યાં શ્રાદ્ધાદ્દિવં વ્રજેત્ ।
ધર્મયૂપે ચ કૂપે ત પિતૃણામનૃણો ભવેત્ ॥ ૧,૮૩.૩૫॥

પ્રમાણં દેવતાઃ સન્તુ લોકપાલાશ્ચ સાક્ષિણઃ ।
મયાગત્ય મતઙ્ગેઽસ્મિન્પિતૃણાં નિષ્કૃતિઃ કૃતા ॥ ૧,૮૩.૩૬॥

રામતીર્થે નરાઃ સ્નાત્વા શ્રાદ્ધં કૃત્વા પ્રભાસકે ।
શિલાયાં પ્રેતભાવાત્સ્યુર્મુક્તાઃ પિતૃગણાઃ કિલ ॥ ૧,૮૩.૩૭॥

શ્રાદ્ધકૃચ્છ સ્વપુષ્ટાયાં ત્રિઃ સપ્તકુલમુદ્ધરેત્ ।
શ્રાદ્ધકૃન્મુણ્ડપૃષ્ઠાદૌ બ્રહ્મલોકં નયેત્પિતૃન્ ॥ ૧,૮૩.૩૮॥

ગયાયાં ન હિ તત્સ્થાનં યત્ર તીર્થં ન વિદ્યતે ।
પઞ્ચક્રોશે ગયાક્ષેત્રે યત્ર તત્ર તુ પિણ્ડદઃ ॥ ૧,૮૩.૩૯॥

અક્ષયં ફલમાપ્નોતિ બ્રહ્મલોકં નયેત્પિતૃન્ ।
જનાર્દનસ્ય હસ્તે તુ પિણ્ડં દદ્યાત્સ્વકં નરઃ ॥ ૧,૮૩.૪૦॥

એષ પિણ્ડે મયા દત્તસ્તવ હસ્તે જનાર્દન ! ।
પરલોકં ગતે મોક્ષમક્ષય્યમુપતિષ્ઠતામ્ ॥ ૧,૮૩.૪૧॥

બ્રહ્મલોકમવાપ્નોતિ પિતૃભિઃ સહ નિશ્ચિતમ્ ।
ગયાયાં ધર્મપૃષ્ઠે ચ સરસિ બ્રહ્મણસ્તથા ॥ ૧,૮૩.૪૨॥

ગયાશીર્ષેઽક્ષયવટે પિતૃણાં દત્તમક્ષયમ્ ।
ધર્મારણ્યં ધર્મપૃષ્ઠં ધેનુકારણ્યમેવ ચ ॥ ૧,૮૩.૪૩॥

દૃષ્ટ્વૈતાનિ પિતૄંશ્ચાર્યવંશ્યાન્વિંશતિમુદ્ધરેત્ ।
બ્રહ્મારણ્યં મહાનદ્યાઃ પશ્ચિમો ભાગ ઉચ્યતે ॥ ૧,૮૩.૪૪॥

પૂર્વો બ્રહ્મસદો ભાગો નાગાદ્રિર્ભરતાશ્રમઃ ।
ભરતસ્યાશ્રમે શ્રાદ્ધી મતઙ્ગસ્ય પદે ભવેત્ ॥ ૧,૮૩.૪૫॥

ગયાશીર્ષાદ્દક્ષિણતો મહાનદ્યાશ્ચ પશ્ચિમે ।
તત્સ્મૃતં ચમ્પકવનં તત્ર પાણ્ડુશિલાસ્તિ હિ ॥ ૧,૮૩.૪૬॥

શ્રાદ્ધી તત્ર તૃતીયાયાં નિશ્ચિરાયાશ્ચ મણ્ડલે ।
મહાહ્રદે ચ કૌશિક્યામક્ષયં ફલમાપ્નુયાત્ ॥ ૧,૮૩.૪૭॥

વૈતરણ્યા શ્ચોત્તરતસ્તૃતીયાખ્યો જલાશયઃ ।
પદાનિ તત્ર ક્રૌઞ્ચસ્ય શ્રાદ્ધી સ્વર્ગં નયેત્પિતૄન્ ॥ ૧,૮૩.૪૮॥

ક્રૌઞ્ચપાદાદુત્તરતો નિશ્ચિરાખ્યો જલાશયઃ ।
સકૃદ્યત્રાભિગમનં સકૃત્પિંણ્ડપ્રપાતનમ્ ॥ ૧,૮૩.૪૯॥

દુર્લભં કિં પુનર્નિત્યમસ્મિન્નેવ વ્યવસ્થિતિઃ ।
મહાનદ્યામુપસ્પૃશ્ય તર્પયેત્પિતૃદેવતાઃ ॥ ૧,૮૩.૫૦॥

અક્ષયાન્પ્રાપ્નુયાલ્લોકાન્કુલં ચાપિ સમુદ્ધરેત્ ।
સાવિત્રે પઠ્યતે સન્ધ્યા કૃતા સ્યાદ્દ્વાદશાબ્દિકી ॥ ૧,૮૩.૫૧॥

શુક્લકૃષ્ણાવુભૌ પક્ષૌ ગયાયાં યો વસેન્નરઃ પુનાત્યાસપ્તમં
ચૈવ કુલં નાસ્ત્યત્ર સંશયઃ ॥ ૧,૮૩.૫૨॥

ગયાયાં મુણ્ડપૃષ્ઠં ચ અરવિન્દં ચ પર્વતમ્ ।
તૃતીયં ક્રૌઞ્ચપાદં ચ દૃષ્ટ્વા પાપૈઃ પ્રમુચ્યતે ॥ ૧,૮૩.૫૩॥

મકરે વર્તમાને ચ ગ્રહણે ચન્દ્રસૂર્યયોઃ ।
દુર્લભં ત્રિષુ લોકેષુ ગયાયાં પિણ્ડપાતનમ્ ॥ ૧,૮૩.૫૪॥

મહાહ્રદે ચ કૌશિક્યાં મૂલક્ષેત્રે વિશેષતઃ ।
ગુહાયાં ગૃધ્રકૂટસ્ય શ્રાદ્ધં દત્તં (સપ્ત) મહાફલમ્ ॥ ૧,૮૩.૫૫॥

યત્ર માહેશ્વરી ધારા શ્રાદ્ધી તત્રાનૃણો ભવેત્ ।
પુણ્યાં વિશાલામાસાદ્ય નદીં ત્રૈલોક્ય વિશ્રુતામ્ ॥ ૧,૮૩.૫૬॥

અગ્નિષ્ટોમમવાપ્નોતિ શ્રાદ્ધી પ્રાયાદ્દિવં નરઃ ।
શ્રાદ્ધી માસપદે સ્નાત્વા વાજપેયફલં લભેત્ ॥ ૧,૮૩.૫૭॥

રવિપાદે પિણ્ડદાનાત્પતિતોદ્ધારણં ભવેત્ ।
ગયાસ્થો યો દદાત્યન્નં પિતરસ્તેન પુત્રિણઃ ॥ ૧,૮૩.૫૮॥

કાઙ્ક્ષન્તે પિતરઃ પુત્રાન્નરકાદ્ભયભીરવઃ ।
ગયાં યાસ્યતિ યઃ કશ્ચિત્સોઽસ્માન્સન્તરયિષ્યતિ ॥ ૧,૮૩.૫૯॥

ગયાપ્રાપ્તં સુતં દૃષ્ટ્વા પિતૄણામુત્સવો ભવેત્ ।
પદ્ભ્યામપિ જલં સ્પૃષ્ટ્વા અસ્મભ્યં કિલ દાસ્યતિ ॥ ૧,૮૩.૬૦॥

આત્મજો વા તથાન્યો વા ગયાકૂપે યદા તદા ।
યન્નામ્ના પાતયેત્પિણ્ડં તં નયેદ્બ્રહ્મ શાશ્વતમ્ ॥ ૧,૮૩.૬૧॥

પુણ્ડરીકં વિષ્ણુલોકં પ્રાપ્નુયાત્કોટિતીર્થગઃ ।

યા સા વૈતરણી નામ ત્રિષુ લોકેષુ વિશ્રુતા ॥ ૧,૮૩.૬૨॥

સાવતીર્ણા ગયાક્ષેત્રે પિતૄણાં તારણાય હિ ।
શ્રાદ્ધદઃ પિણ્ડદસ્તત્ર ગોપ્રદાનં કરોતિયઃ ॥ ૧,૮૩.૬૩॥

એકવિંશતિવંશ્યાન્સ તારયેન્નાત્ર સંશયઃ ।
યદિ પુત્રો ગયાં ગચ્છેત્કદાચિત્કાલપર્યયે ॥ ૧,૮૩.૬૪॥

તાનેવ ભોજયેદ્વિપ્રાન્બ્રહ્મણા યે પ્રકલ્પિતાઃ ।
તેષાં બ્રહ્મસદઃ સ્થાનં સોમપાનં તથૈવ ચ ॥ ૧,૮૩.૬૫॥

બ્રહ્મપ્રકલ્પિતં સ્થાનં વિપ્રા બ્રહ્મપ્રકલ્પપિતાઃ ।
પૂજિતૈઃ પૂજિતાઃ સર્વે પિતૃભિઃ સહ દેવતાઃ ॥ ૧,૮૩.૬૬॥

તર્પયેત્તુ ગયાવિપ્રાન્હવ્યકવ્યૈર્વિધાનતઃ ।
સ્થાનં દેહપરિત્યાગે ગયાયાં તુ વિધીયતે ॥ ૧,૮૩.૬૭॥

યઃ કરોતિ વૃષોત્સર્ગં ગયાક્ષેત્રે હ્યનુત્તમે ।
અગ્નિષ્ટોમશતં પુણ્યં લભતે નાત્ર સંશયઃ ॥ ૧,૮૩.૬૮॥

આત્મનોઽપિ મહાબુદ્ધિર્ગયાયાં તુ તિલૈર્વિના ।
પિણ્ડનિર્વાપણં કુર્યાદન્યેષામપિ માનવઃ ॥ ૧,૮૩.૬૯॥

યાવન્તો જ્ઞાતયઃ પિત્ર્યા બાન્ધવાઃ સુહૃદસ્તથા ।
તેભ્યો વ્યાસગયાભૂમૌ પિણ્ડો દેયો વિધાનતઃ ॥ ૧,૮૩.૭૦॥

રામતીર્થે નરઃ સ્નાત્વા ગોશતસ્યાપ્નુયાત્ફલમ્ ।
મતઙ્ગવાપ્યાં સ્નાત્વા ચ ગોસહસ્રફલં લભેત્ ॥ ૧,૮૩.૭૧॥

નિશ્ચિરાસંગમે સ્નાત્વા બ્રહ્મલોકં નયેત્પિતૄન્ ।
વસિષ્ઠસ્યાશ્રમે સ્નાત્વા વાજપેયં ચ વિન્દતિ ॥ ૧,૮૩.૭૨॥

મહાકૌશ્યાં સમાવાસાદશ્વમેધફલં લભેત્ ।
પિતામહસ્ય સરસઃ પ્રસૃતા લોકપાવની ॥ ૧,૮૩.૭૩॥

સમીપે ત્વગ્નિધારેતિ વિશ્રુતા કપિલા હિ સા ।
અગ્નિષ્ટોમફલં શ્રાદ્ધી સ્નાત્વાત્ર કૃતકૃત્યતા ॥ ૧,૮૩.૭૪॥

શ્રાદ્ધી કુમારધારાયામશ્વમેધફલં લભેત્ ।
કુમારમભિગમ્યાથ નત્વા મુક્તિમવાપ્નુયાત્ ॥ ૧,૮૩.૭૫॥

સોમકુણ્ડે નરઃ સ્નાત્વા સોમલોકં ચ ગચ્છતિ ।
સંવર્તસ્ય નરો વાપ્યાં સુભગઃ સ્યાત્તુ પિણ્ડદઃ ॥ ૧,૮૩.૭૬॥

ધૌતપાપો નરો યાતિ પ્રેતકુણ્ડે ચ પિણ્ડદઃ ।
દેવનદ્યાં લેલિહાને મથને જાનુગર્તકે ॥ ૧,૮૩.૭૭॥

એવમાદિષુ તીર્થેષુ પિણ્ડદસ્તારયેત્પિતૄન્ ।
નત્વા દેવાન્વસિષ્ઠેશપ્રભૃતીનૃણસંક્ષયમ્ ॥ ૧,૮૩.૭૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગયામાહાત્મ્યં નામ ત્ર્યશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૪

બ્રહ્મોવાચ ।
ઉદ્યતસ્તુ ગયાં ગન્તું શ્રાદ્ધં કૃત્વા વિધાનતઃ ।
વિધાય કાર્પટીવિષં ગ્રામસ્યાપિ પ્રદક્ષિણમ્ ॥ ૧,૮૪.૧॥

તતો ગ્રામાન્તરં ગત્વા શ્રાદ્ધશેષસ્ય ભોજનમ્ ।
કૃત્વા પ્રદક્ષિણં ગચ્છેત્પ્રતિગ્રહવિવર્જિતઃ ॥ ૧,૮૪.૨॥

ગૃહાચ્ચલિતમાત્રસ્ય ગયાયાં ગમનં પ્રતિ ।
સ્વર્ગારોહણસોપાનં પિતૃણાં તુ પદેપદે ॥ ૧,૮૪.૩॥

મુણ્ડનં ચોપવાસશ્ચ સર્વતીર્થેષ્વયં વિધિઃ ।
વર્જયિત્વા કુરુક્ષેત્રં વિશાલાં વિરજાં ગયામ્ ॥ ૧,૮૪.૪॥

દિવા ચ સર્વદા રાત્રૌ ગયાયાં શ્રાદ્ધકૃદ્ભવેત્ ।
વારાણસ્યાં કૃતં શ્રાદ્ધં તીર્થે શોણનદે તથા ॥ ૧,૮૪.૫॥

પુનઃ પુનામહાનદ્યાં શ્રાદ્ધી સ્વર્ગં પિતૄન્નયેત્ ।
ઉત્તરં માનસં ગત્વા સિદ્ધિં પ્રાપ્નોત્યનુત્તમામ્ ॥ ૧,૮૪.૬॥

તસ્મિન્નિવર્તયેચ્છ્રાદ્ધં સ્નાનં ચૈવ નિવર્તયેત્ ।
કામાન્સ લભતે દિવ્યાન્મોક્ષોપાયં ચ સર્વશઃ ॥ ૧,૮૪.૭॥

દક્ષિણં માનસં ગત્વા મૌની પિણ્ડાદિ કારયેત્ ।
ઋણત્રયાપાકરણં લભેદ્દક્ષિણમાનસે ॥ ૧,૮૪.૮॥

સિદ્ધાનાં પ્રીતિજનનૈઃ પાપાનાં ચ ભયઙ્કરૈઃ ।

લેલિહાનૈર્મહાઘોરૈરક્ષતૈઃ પન્નગોત્તમૈઃ ॥ ૧,૮૪.૯॥

નામ્ના કનખલં તીર્થં ત્રિષુ લોકેષુ વિશ્રુતમ્ ।
ઉદીચ્યાં મુણ્ડપૃષ્ઠસ્ય દેવર્ષિગણસેવિતમ્ ॥ ૧,૮૪.૧૦॥

તત્ર સ્નાત્વા દિવં યાતિ શ્રાદ્ધં દત્તમથાક્ષયમ્ ।
સૂર્યં નત્વા ત્વિદં કુર્યાત્કૃતપિણ્ડાદિસત્ક્રિયઃ ॥ ૧,૮૪.૧૧॥

કવ્યવાહસ્તથા સોમો યમશ્ચૈવાર્યમા તથા ।
અગ્નિષ્વાત્તા બર્હિષદઃ સોમપાઃ પિતૃદેવતાઃ ॥ ૧,૮૪.૧૨॥

આગચ્છન્તુ મહાભાગા યુષમાભી રક્ષિતાસ્ત્વિહ ।
મદીયાઃ પિતરો યે ચ કુલે જાતાઃ સનાભયઃ ॥ ૧,૮૪.૧૩॥

તેષાં પિણ્ડપ્રદાનાર્થમાગતોઽસ્મિ ગયામિમામ્ ।
કૃતપિણ્ડઃ ફલ્ગુતીર્થે પશ્યૈદ્દેવં પિતામહમ્ ॥ ૧,૮૪.૧૪॥

ગદાધરં તતઃ પશ્યેત્પિતૃણામનૃણામનૃણો ભવેત્ ।
ફલ્ગુતીર્થે નરઃ સ્નાત્વા દૃષ્ટ્વા દેવં ગદાધરમ્ ॥ ૧,૮૪.૧૫॥

આત્માનં તારયેત્સદ્યો દશ પૂર્વાન્દશાપરાન્ ।
પ્રથમેહ્નિવિધિઃ પ્રોક્તો દ્વિતીયદિવસે વ્રજેત્ ॥ ૧,૮૪.૧૬॥

ધર્મારણ્યં મતઙ્ગસ્ય વાપ્યાં પિણ્ડાદિકૃદ્ભવેત્ ।
ધર્મારણ્યં સમાસાદ્ય વાજપેયફલં લભેત્ ॥ ૧,૮૪.૧૭॥

રાજસૂયાશ્વમેધાભ્યાં ફલં સ્યાદ્બ્રહ્મતીર્થકે ।
શ્રાદ્ધં પિણ્ડોદકં કાર્યં મધ્યે વૈ કૂપયૂપયોઃ ॥ ૧,૮૪.૧૮॥

કૂપોદકેન તત્કાર્યં પિતૃણાં દત્તમક્ષયમ્ ।
તૃતીયેઽબહ્નિ બ્રહ્મસદો ગત્વા સ્નાત્વાથ તર્પણમ્ ॥ ૧,૮૪.૧૯॥

કૃત્વા શ્રાદ્ધાદિકં પિણ્ડં મધ્યે વૈ યૂપકૂપયોઃ ।
ગોપ્રચારસમીપસ્થા આબ્રહ્મ બ્રહ્મકલ્પિતાઃ ॥ ૧,૮૪.૨૦॥

તેષા સેવનમાત્રેણ પિતરો મોક્ષગામિનઃ ।
યૂપં પ્રદક્ષિણીકૃત્ય વાજપેયફલં લભેત્ ॥ ૧,૮૪.૨૧॥

ફલ્ગુતીર્થે ચતુર્થેઽહિનિ સ્નાત્વા દેવાદિતર્પણમ્ ।
કૃત્વા શ્રાદ્ધઙ્ગયાશીર્ષે કુર્યાદ્રુદ્રપદાદિષુ ॥ ૧,૮૪.૨૨॥

પિણાડાન્દેહિમુખે વ્યાસે પઞ્ચાગ્નૌ ચ પદત્રયે ।
સૂર્યેન્દુકાર્તિકેયેષુ કૃતં શ્રાદ્ધં તથાક્ષયમ્ ॥ ૧,૮૪.૨૩॥

શ્રાદ્ધં તુ નવદેવત્યં કુર્યાદ્દ્વાદશદૈવતમ્ ।
અન્વષ્ટકાસુ વૃદ્ધૌ ચ ગયાયાં મૃતવાસરે ॥ ૧,૮૪.૨૪॥

અત્ર માતુઃ પૃથક્શ્રાદ્ધમન્યત્ર પતિના સહ ।
સ્નાત્વા દશાશ્વમેધે તુ દૃષ્ટ્વા દેવં પિતામહમ્ ॥ ૧,૮૪.૨૫॥

રુદ્રપાદં નરઃ સ્પૃષ્ટ્વા ન ચેહાવર્તતે પુનઃ ।
ત્રિર્વિત્તપૂર્ણાં પૃથિવીં દત્ત્વા યત્ફલમાપ્નુયાત્ ॥ ૧,૮૪.૨૬॥

સ તત્ફલમવાપ્નોતિ કૃત્વા શ્રાદ્ધં ગયાશિરે ।
શમીપત્રપ્રમાણેન પિણ્ડં દદ્યાદ્ગયાશિરે ॥ ૧,૮૪.૨૭॥

પિતરો યાન્તિ દેવત્વં નાત્ર કાર્યા વિચારણા ।
મુણ્ડપૃષ્ટે પદં ન્યસ્તં મહાદેવેન ધીમતા ॥ ૧,૮૪.૨૮॥

અલ્પેન તપસા તત્ર મહાપુણ્યમવાપ્નુયાત્ ।
ગયાશીર્ષે તુ યઃ પિણ્ડાન્નામ્ના યેષાં તુ નિર્વપેત્ ॥ ૧,૮૪.૨૯॥

નરકસ્થા દિવં યાન્તિ સ્વર્ગસ્થા મોક્ષમાપ્નુયુઃ ।
પઞ્ચમેઽહ્નિ ગન્દાલોલે સ્નાત્વા વટતલે તતઃ ॥ ૧,૮૪.૩૦॥

પિણ્ડાન્દદ્યાત્પિતૃણાં ચ સકલં તારયેત્કુલમ્ ।
વટમૂલં સમાસાદ્ય શાકેનોષ્ણોદકેન વા ॥ ૧,૮૪.૩૧॥

એકસ્મિન્ભોજિતે વિપ્ર કોટિર્ભવતિ ભોજિતાઃ ।
કૃતે શ્રાદ્ધેઽક્ષયવટે દૃષ્ટ્વા ચ પ્રપિતામહમ્ ॥ ૧,૮૪.૩૨॥

અક્ષયાલ્લંભતે લોકાન્કુલાનામુદ્ધરેચ્છતમ્ ।
એષ્ટવ્યા બહવઃ પુત્રા યદ્યેકોઽપિ ગયાં વ્રજેત્ ॥ ૧,૮૪.૩૩॥

યજેત વાશ્વમેધેન નીલં વા વૃષમુત્સૃજેત્ ।
પ્રેતઃ કશ્ચિત્સમુદ્દિશ્ય વણિજં કઞ્ચિદબ્રવીત્ ॥ ૧,૮૪.૩૪॥

મમ નામ્ના ગયાશીર્ષે પિણ્ડનિર્વપણં કુરુ ।
પ્રેતભાવાદ્વિમુક્તઃ સ્યાંસ્વર્ગદો દાતુરેવ ચ ॥ ૧,૮૪.૩૫॥

શ્રુત્વા વણિગ્ગયાશીર્ષ પ્રેતરાજાય પિણ્ડકમ્ ।
પ્રદદાવનુજૈઃ સાર્ધં સ્વપિતૃભ્યસ્તતો દદૌ ॥ ૧,૮૪.૩૬॥

સર્વે મુક્તા વિશાલોઽપિ સપુત્રોઽભુચ્ચ પિણ્ડદઃ ।
વિશાલાયાં વિશાલોઽભૂદ્રાજપુત્રોબ્રવીદ્દ્વિજાન્ ॥ ૧,૮૪.૩૭॥

કથં પુત્રાદયઃ સ્યુર્મે વિપ્રાશ્ચોતુર્વિશાલકમ્ ।
ગયાયાં પિણ્ડદાનેન તવ સર્વં ભવિષ્યતિ ॥ ૧,૮૪.૩૮॥

વિશાલોઽથ ગયાશીર્ષે પિણ્ડદોઽભૂચ્ચ પુત્રવાન્ ।
દૃષ્ટ્વાકાશે સિતં રક્તં કૃષ્ણં પુરુષમબ્રવીત્ ॥ ૧,૮૪.૩૯॥

કે યૂયં તેષુ ચૈવૈકઃ સિતઃ પ્રોચે વિશાલકમ્ ।
અહં સિતસ્તે જનક ઇન્દ્રલોકં ગતઃ શભમ્ ॥ ૧,૮૪.૪૦॥

મમ પુત્ર પિતા રક્તો બ્રહ્મહા પાપકૃત્પરમ્ ।
અયં પિતામહઃ કૃષ્ણ ઋષયોઽનેન ઘાતિતાઃ ॥ ૧,૮૪.૪૧॥

અવીચિં નરકં પ્રાપ્તૌ મુક્તૌ જાતૌ ચ પિણ્ડદ ।
મુક્તીકૃતાસ્તતઃ સર્વે વ્રજામઃ સ્વર્ગમુત્તમમ્ ॥ ૧,૮૪.૪૨॥

કૃતકૃત્યો વિશાલોઽપિ રાજ્યં કૃત્વા દિવં યયૌ ।
યેઽસ્મત્કુલે તુ પિતરો લુપ્તપિણ્ડોદકક્રિયાઃ ॥ ૧,૮૪.૪૩॥

યે ચાપ્યકૃતચૂડાસ્તુ યે ચ ગર્ભાદ્વિનિઃસૃતાઃ ।
યેષાં દાહો ન ક્રિયાચ યેઽગ્નિદગ્ધાસ્તથાપરે ॥ ૧,૮૪.૪૪॥

ભૂમૌ દત્તેન તૃપ્યન્તુ તૃપ્તા યાન્તુ પરાં ગતિમ્ ।
પિતા પિતામહશ્ચૈવ તથૈવ પ્રપિતામહઃ ॥ ૧,૮૪.૪૫॥

માતા પિતામહી ચૈવ તથૈવ પ્રપિતામહી ।
તથા માતામહશ્ચૈવ પ્રમાતામહ એવ ચ ॥ ૧,૮૪.૪૬॥

વૃદ્ધપ્રમાતામહશ્ચ તથા માતામહી પરમ્ ।
પ્રમાતામહી તથા વૃદ્ધપ્રમાતામહીતિ વૈ ॥ ૧,૮૪.૪૭॥

અન્યેષાં ચૈવ પિણ્ડોઽયમક્ષય્યમુપતિષ્ઠતામ્ ॥ ૧,૮૪.૪૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગયામાહાત્મ્યં નામ ચતુરશીતિતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૮૫

બ્રહ્મોવાચ ।
સ્નાત્વા પ્રેતશિલાદૌ તુ વરુણાસ્થામૃતેન ચ ।
પિણ્ડં દદ્યાદિમૈર્મન્ત્રૈરાવાહ્ય ચ પિતૄન્પરાન્ ॥ ૧,૮૫.૧॥

અસ્મત્કુલે મૃતા યે ચ ગતિર્યેષાં ન વિદ્યતે ।
આવાહયિષ્યેતાન્સર્વાન્દર્ભપૃષ્ઠે તિલોદકૈઃ ॥ ૧,૮૫.૨॥

પિતવંશે મૃતા યે ચ માતૃવંશે ચ યે મૃતાઃ ।
તષામુદ્ધરણાર્થાયે ઇમં પિણ્ડે દદામ્યહમ્ ॥ ૧,૮૫.૩॥

માતામહકુલે યે ચ ગતિર્યેષાં ન વિદ્યતે ।
તેષામુદ્ધરણાર્થાય ઇમં પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૪॥

અજાતદન્તા યે કેચિદ્યે ચ ગર્ભે પ્રપીડિતાઃ ।
તેષામુદ્ધરણાર્થાય ઇમ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૫॥

બન્ધુવર્ગાશ્ચ યે કેચિન્નામગોત્રવિવર્જિતાઃ ।
સ્વગોત્રે પરગોત્રે વા ગતિર્યેષાં ન વિદ્યતે ।
તેષામુદ્ધરણાર્થાય ઇમ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૬॥

ઉદ્બન્ધનમૃતા યે ચ વિષશસ્ત્રહતાશ્ચ યે ।
આત્મોપઘાતિનો યે ચ તેભ્યઃ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૭॥

અગ્નિદાહે મૃતા યે ચ સિંહવ્યાઘ્રહતાશ્ચયે ।
દંષ્ટ્રિભિઃ શ◌ૃઙ્ગિભિર્વાપિ તેષાં પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૮॥

અગ્નિદગ્ધાશ્ચ યે કેચિન્નાગ્નિદગ્ધાસ્તથાપરે ।
વિદ્યુચ્ચૌરહતા યે ચ તેભ્યઃ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૯॥

રૌરવે ચાન્ધતામિસ્ત્રે કાલસૂત્રે ચ યે ગતાઃ ।
તેષામુદ્ધરણાર્થાય ઇમં પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૧૦॥

અસિપત્રવને ઘોરે કંભીપાકે ચ યે ગતાઃ ।
તેષામુદ્ધરણાર્થાય ઇં પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૧૧॥

અન્યેષાં યાતના સ્થાનાં પ્રેતલોકનિવાસિનામ્ ।
તેષામુદ્ધરણાર્થાય ઇમ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૧૨॥

પુશુયોનિં ગતા યે ચ પક્ષિકીટસરીસૃપાઃ ।
અથવા વૃક્ષયોનિ સ્થાસ્તેભ્યઃ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૧૩॥

અસંખ્યયાતનાસંસ્થા યે નીતા યમશાસનૈઃ ।
તેષામુદ્ધરણાર્થાય ઇમં પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૧૪॥

જાત્યન્તરસહસ્રેષુ ભ્રમન્તિ સ્વેન કર્મણા ।
માનુષ્યં દુર્લભં યેષાં તેભ્યઃ પિણ્ડં દદામ્યહમ્ ॥ ૧,૮૫.૧૫॥

યે બાન્ધવાબાન્ધવા વા યેઽન્યજન્મનિ બાન્ધવાઃ ।
તે સર્વેતૃપ્તિમાયાન્તુ પિણ્ડદાનેન સર્વદા ॥ ૧,૮૫.૧૬॥

યે કેચિત્પ્રેતરૂપેણ વર્તન્તે પિતરો મમ ।
તે સર્વે તૃપ્તિમાયાન્તુ પિણ્ડદાનેન સર્વદા ॥ ૧,૮૫.૧૭॥

યે મે પિતૃકુલે જાતાઃ કુલે માતુસ્તથૈવ ચ ।
ગુરુશ્વશુરબન્ધૂનાં યે ચાન્યે બાન્ધવા મૃતાઃ ॥ ૧,૮૫.૧૮॥

યે મે કુલે લુપ્તપિણ્ડાઃ પુત્રદારવિવર્જિતાઃ ।
ક્રિયાલો પહતા યે ચ જાત્યન્ધાઃ પઙ્ગવસ્તથા ॥ ૧,૮૫.૧૯॥

વિરૂપા આમગર્ભાશ્ચ જ્ઞાતાજ્ઞાતાઃ કુલે મમ ।
તેષાં પિણ્ડં મયા દત્તમક્ષય્યમુપતિષ્ઠતામ્ ॥ ૧,૮૫.૨૦॥

સાક્ષિણઃ સન્તુ મે દેવા બ્રહ્મેશાનાદયસ્તથા ।
મય ગયાં સમાસાદ્ય પિતૃણાં નિષ્કતિઃ કૃતા ॥ ૧,૮૫.૨૧॥

આગતોઽહં ગયાં દેવ ! પિતૃકાર્યે ગદાધર ।
તન્મે સાક્ષી ભવત્વદ્ય અનૃણોઽહમૃણત્રયાત્ ॥ ૧,૮૫.૨૨॥

મહાનદી બ્રહ્મસરોઽક્ષયો વટઃ પ્રભાસમુદ્યન્તમહો? ગયાશિરઃ ।
સરસ્વતીધર્મકધેનુપૃષ્ઠા એતે કુરુક્ષેત્રગતા ગયાયામ્ ॥ ૧,૮૫.૨૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પુર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગયામાહાત્મ્યં નામ પઞ્ચાશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૬
બ્રહ્મોવાચ ।
યેયં પ્રેતશિલા ખ્યાતા ગયાયાં સા ત્રિધા સ્થિતા ।
પ્રભાસે પ્રેતકુણ્ડે ચ ગયાસુરશિરસ્યપિ ॥ ૧,૮૬.૧॥

ધર્મેણ ધારિતા ભૂત્યૈ સર્વદેવમયી શિલા ।

પ્રેતત્વં યે ગતા નૃણાં મિત્રાદ્યા બાન્ધવાદયઃ ॥ ૧,૮૬.૨॥

તેષામુદ્ધરણાર્થાય યતઃ પ્રેતશિલા શુભા ।
અતોઽત્ર મુનયો ભૂપા રાજપત્ન્યાદયઃ સદા ॥ ૧,૮૬.૩॥

તસ્યાં શિલાયાં શ્રાદ્ધાદિકર્તારો બ્રહ્મલોકગાઃ ।
ગયાસુરસ્ય યન્મુણ્ડં તસ્ય પૃષ્ઠે શિલા યતઃ ॥ ૧,૮૬.૪॥

મુણાડપૃષ્ઠો ગિરિસ્તસ્માત્સર્વદેવમયો હ્યયમ્ ।
મુણ્ડપૃષ્ઠસ્ય પાદેષુ યતો બ્રહ્મસરોમુખાઃ ॥ ૧,૮૬.૫॥

અરવિન્દવનં તેષુ તેન ચૈવોપલક્ષિતઃ ।
અરવિન્દો ગિરિર્નામ ક્રૌઞ્ચપાદાઙ્કિતો યતઃ ॥ ૧,૮૬.૬॥

તસ્મા દ્ગિરિઃ ક્રૈઞ્ચપાદઃ પિતૃણાં બ્રહ્મલોકદઃ ।
ગદાધરાદયો દેવા આદ્યા આદૌ વ્યવસ્થિતાઃ ॥ ૧,૮૬.૭॥

શિલારૂપેણ ચાવ્યક્તાસ્તસ્માદ્દેવમયી શિલા ।
ગયા શિરશ્છાદયિત્વા ગુરુત્વાદાસ્થિતા શિલા ॥ ૧,૮૬.૮॥

કાલાન્તરેણ વ્યક્તશ્ચસ્થિત આદિગદાધરઃ ।
મહારુદ્રાદિદેવૈસ્તુ આનાદિનિધનો હરિઃ ॥ ૧,૮૬.૯॥

ધર્મ સંરક્ષણાર્થાય અધર્માદિવિનષ્ટયે ।
દૈત્યરાક્ષસનાશાર્થં મત્સ્યઃ પૂર્વં યથાભવત્ ॥ ૧,૮૬.૧૦॥

કૂર્મો વરાહો નૃહરિર્વામનો રામ ઊર્જિતઃ ।
યથા દાશરથી રામઃ કૃષ્ણોબુદ્ધોઽથ કલ્ક્યપિ ॥ ૧,૮૬.૧૧॥

તથા વ્યક્તોઽવ્યક્તરૂપી આસીદાદિર્ગદાધરઃ ।
આદિરાદૌ પૂજિતોઽત્ર દેવૈર્બ્રહ્માદિભિર્યતઃ ॥ ૧,૮૬.૧૨॥

પાદ્યાદ્યૈર્ગન્ધપુષ્પાદ્યૈરત આદિગદાધરઃ ।
ગદાધરં સુરૈઃ સાર્ધમાદ્યં ગત્વા દદાતિ યઃ ॥ ૧,૮૬.૧૩॥

અર્ઘ્યં પાત્રં ચ પાદ્યં ચ ગન્ધપુષ્પં ચ ધૂપકમ્ ।
દીપં નૈવૈદ્યમુત્કૃષ્ટં માલ્યાનિ વિવિધાનિ ચ ॥ ૧,૮૬.૧૪॥

વસ્ત્રાણિ મુકુટં ઘણ્ટા ચામરં પ્રેક્ષણીયકમ્ ।
અલઙ્કારાદિકં પિણ્ડમન્નદાનાદિકં તથા ॥ ૧,૮૬.૧૫॥

તેષાં તાવદ્ધનં ધાન્યમાયુરારો ગ્યસમ્પદઃ ।
પુત્રાદિસન્તતિશ્રેયોવિદ્યાર્થં કામ ઈપ્સિતઃ ॥ ૧,૮૬.૧૬॥

ભાર્યા સ્વર્ગાદિવાસશ્ચ સ્વર્ગાદાગત્ય રાજ્યકમ્ ।
કુલીનઃ સત્ત્વસમ્પન્નો રણે મર્દિતશાત્રવનઃ ॥ ૧,૮૬.૧૭॥

વધબન્ધવિનિર્મુક્તશ્ચાન્તે મોક્ષમવાપ્નુયાત્ ।
શ્રાદ્ધપિણ્ડાદિકર્તારઃ પિતૃભિર્બ્રહ્મલોકગાઃ ॥ ૧,૮૬.૧૮॥

જગન્નાથં યેઽપ્યર્ચયન્તિ સુભદ્રાં બલભદ્રકમ્ ।
જ્ઞાનં પ્રાપ્ય શ્રિયં પુત્રાન્વ્રજન્તિ પુરુષોત્તમમ્ ॥ ૧,૮૬.૧૯॥

પુરુષોત્તમરાજસ્ય સૂર્યસ્ય ચ ગણસ્ય ચ ।
પુરતસ્તત્ર પિણ્ડાદિ પિતૃણાં બ્રિહ્મલોકદઃ ॥ ૧,૮૬.૨૦॥

નત્વા કપર્દિવિઘ્નેશં સર્વવિઘ્નૈઃ પ્રમુચ્યતે ।
કાર્તિકેયં પૂજયિત્વા બ્રહ્મલોકમવાપ્નુયાત્ ॥ ૧,૮૬.૨૧॥

દ્વાદશાદિત્યમભ્યર્ચ્ય સર્વરોગૈઃ પ્રમુચ્યતે ।
વૈશ્વાનરં સમભ્યર્ચ્ય ઉત્તમાં દીપ્તિમાપ્નુયાત્ ॥ ૧,૮૬.૨૨॥

રેવન્તં પૂજયિત્વાથ અશ્વાનાપ્નોત્યનુત્તમાન્ ।
અભ્યર્ચ્યેન્દ્રં મહૈશ્વર્યં ગૌરીં સૌભાગ્યમાપ્નુયાત્ ॥ ૧,૮૬.૨૩॥

વિદ્યાં સરસ્વતીં પ્રાર્ચ્ય લક્ષ્મીં સમ્પૂજ્ય ચ શ્રિયમ્ ।
ગરુડં ચ સમભ્યર્ચ્ય વિઘ્નવૃન્દાત્પ્રમુચ્યતે ॥ ૧,૮૬.૨૪॥

ક્ષેત્રપાલં સમભ્યર્ચ્ય ગ્રહવૃન્દૈઃ પ્રમુચ્યતે ।
મુણ્ડપૃષ્ઠં સમભ્યર્ચ્ય સર્વકામમવાપ્નુયાત્ ॥ ૧,૮૬.૨૫॥

નાગાષ્ટકં સમભ્યર્ચ્ય નાગદષ્ટો વિમુચ્યતે ।
બ્રહ્માણં પૂજયિત્વા ચ બ્રહ્મલોકમવાપ્નુયાત્ ॥ ૧,૮૬.૨૬॥

બલભદ્રં સમભ્યર્ચ્ય બલારોગ્યમવાપ્નુયાત્ ।
સુભદ્રાં પૂજયિત્વા તુ સૌભાગ્યં પરમાપ્નુયાત્ ॥ ૧,૮૬.૨૭॥

સર્વાન્કામાનવાપ્નોતિ સમ્પૂજ્ય પુરુષોત્તમમ્ ।
નારાયણં તુ સમ્પૂજ્ય નરાણામધિપો ભવેત્ ॥ ૧,૮૬.૨૮॥

સ્પૃષ્ટ્વા નત્વા નારસિંહં સંગ્રામે વિજયી ભવેત્ ।
વરાહં પૂજયિત્વા તુ ભૂમિરાજ્યમવાપ્નુયાત્ ॥ ૧,૮૬.૨૯॥

માલાવિદ્યાધરૌ સ્પૃષ્ટ્વા વિદ્યાધરપદં લભેત્ ।
સર્વાન્કામાનવાપ્નોતિ સમ્પૂજ્યાદિગદાધરમ્ ॥ ૧,૮૬.૩૦॥

સોમનાથં સમભ્યર્ચ્ય શિવલોકમવાપ્નુયાત્ ।
રુદ્રેશ્વરં નમસ્કૃત્ય રુદ્રલોકે મહીયતે ॥ ૧,૮૬.૩૧॥

રામેશ્વરં નરો નત્વા રામવત્સુપ્રિયો ભવેત્ ।
બ્રહ્મેશ્વરં નરઃ સ્તુત્વા બ્રહ્મલોકાય કલ્પ્યતે ॥ ૧,૮૬.૩૨॥

કાલેશ્વરં સમભ્યર્ચ્ય નરઃ કાલઞ્જયો ભવેત્ ।
કેદારં પૂજયિત્વા તુ શિવલોકે મહીયતે ॥ ૧,૮૬.૩૩॥

સિદ્ધેશ્વરં ચ સમ્પૂજ્ય સિદ્ધો બ્રહ્મપુરં વ્રજેત્ ।
આદ્યૈ રુદ્રાદિભિઃ સાર્ધં દૃષ્ટ્વા હ્યાદિગદાધરમ્ ॥ ૧,૮૬.૩૪॥

કુલાનાં શતમુદ્ધૃત્ય નયેદ્બ્રહ્મપુરં નરઃ ।
ધર્માર્થી પ્રાપ્નુયાદ્ધર્મમર્થાર્થી ચાર્થમાપ્નુયાત્ ॥ ૧,૮૬.૩૫॥

કામાન્સમ્પ્રાપ્નુયાત્કામી મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ।
રાજ્યાર્થી રાજ્યમાપ્નોતિ શાન્ત્યર્થી શાન્તિમાપ્નુયાત્ ॥ ૧,૮૬.૩૬॥

સર્વાર્થી સર્વમાપ્નોતિ સમ્પૂજ્યાદિગદાધરમ્ ।
પુત્રાન્પુત્રાર્થિની સ્ત્રી ચ સૌભાગ્યં ચ તદર્થિની ॥ ૧,૮૬.૩૭॥

વંશાર્થિની ચ વંશાન્વૈ પ્રાપ્યાર્ચ્યાદિગદાધરમ્ ।
શ્રાદ્ધેન પિણ્ડદાનેન અન્નદાનેન વારિદઃ ॥ ૧,૮૬.૩૮॥

બ્રહ્મલોકમવાપ્નોતિ સમ્પૂજ્યાદિગદાધરમ્ ।
પૃથિવ્યાં સર્વતીર્થેભ્યો યથા શ્રેષ્ઠા ગયા પુરી ॥ ૧,૮૬.૩૯॥

તથા શિલાદિરૂપશ્ચ શ્રેષ્ઠશ્ચૈવ ગદાધરઃ ।
તસ્મિન્દૃષ્ટે શિલા દૃષ્ટા યતઃ સર્વં ગદાધરઃ ॥ ૧,૮૬.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગયામાહાત્મ્યં નામ ષડશીતિતમોઽધ્યાયઃ
(ઇતિ ગયામાહાત્મ્યં સમાપ્તમ્) ।

હરિરુવાચ ।

ચતુર્દશ મનૂન્વક્ષ્યે તત્સુતાશ્ચ સુકાદિકાન્ ।
મનુઃ સ્વાયમ્ભુવઃ પૂર્વમગ્નિધ્રાદ્યાશ્ચ તત્સુતાઃ ॥ ૧,૮૭.૧॥

મરીચિરત્ર્યઙ્ગિરસૌ પુલસ્ત્યઃ પુલહઃ ક્રતુઃ ।
વસિષ્ઠશ્ચ મહાતેજા ઋષયઃ સપ્તકીર્તિતાઃ ॥ ૧,૮૭.૨॥

જયાખ્યાશાચમિતાખ્યાશ્ચ શુક્રા યામાસ્તથૈવ ચ ।
ગણા દ્વાદશકાશ્ચૈતિ ચત્વારઃ સોમપાયિનઃ ॥ ૧,૮૭.૩॥

વિશ્વભુગ્વામદેવેન્દ્રો બાષ્કલિસ્તદરિર્હ્યભૂત્ ।
સ હતો વિષ્ણુના દૈત્યશ્ચક્રેણ સુમહાત્મના ॥ ૧,૮૭.૪॥

મનુઃ સ્વારોચિષશ્ચાથ તત્પુત્રો મણ્ડલેશ્વરઃ ।
ચિત્રકો વિનતશ્ચૈવ કર્ણાન્તો વિદ્યુતો રવિઃ ॥ ૧,૮૭.૫॥

બૃહદ્ગુણો નભશ્ચૈવ મહાબલપરાક્રમઃ ।
ઊર્જ સ્તમ્ભસ્તથા પ્રાણ ઋષભો નિશ્ચલ (૨) સ્તથા ॥ ૧,૮૭.૬॥

દત્તો (મ્ભો) લિશ્ચાવરીવાંશ્ચ ઋષ્યઃ સપ્તકીર્તિતાઃ ।
તુષિતા દ્વાદશ પ્રોક્તાસ્તથા પારાવતાશ્ચ યે ॥ ૧,૮૭.૭॥

ઇન્દ્રો વિપશ્ચિદ્દેવાનાં તદ્રિપુઃ પુરુકૃત્સરઃ ।
જઘાન હસ્તિરૂપેણ ભગવાન્મધુસૂદનઃ ॥ ૧,૮૭.૮॥

ઔત્તમસ્ય મનોઃ પુત્રા આજશ્ચ પરશુસ્તથા ।
વિનીતશ્ચ સુકેતુશ્ચ સુમિત્રઃ સુબલઃ શુચિઃ ॥ ૧,૮૭.૯॥

દેવો દેવાવૃધો રુદ્ર ! મહોત્સાહોજિતસ્તથા ।
રથૌજા ઊર્ધ્વબાહુશ્ચ શરણશ્ચાનઘો મુનિઃ ॥ ૧,૮૭.૧૦॥

સુતપાઃ શઙ્કુરિત્યેતે ઋષયઃ સપ્ત કીર્તિતાઃ ।
વશવર્તિસ્વધામાનઃ શિવાઃ સત્યાઃ પ્રતર્દનાઃ ॥ ૧,૮૭.૧૧॥

પઞ્ચ દેવગણાઃ પ્રોક્તા સર્વે દ્વાદશકાસ્તુ તે ।
ઇન્દ્રઃ સ્વશાન્તિસ્તચ્છુક્રઃ પ્રલમ્બો નામ દાનવઃ ॥ ૧,૮૭.૧૨॥

મત્સ્યરૂપી હરિર્વિષ્ણુસ્તં જઘાન ચ દાનવમ્ ।
તામસસ્ય મનોઃ પુત્રા જાનુજઙ્ઘોઽથ નિર્ભયઃ ॥ ૧,૮૭.૧૩॥

નવખ્યાતિર્નયશ્ચૈવ પ્રિયભૃત્યો વિવિક્ષિપઃ ।

દૃઢેષુધિઃ પ્રસ્તલાક્ષઃ કૃબન્ધુઃ કૃતસ્તથા ॥ ૧,૮૭.૧૪॥

જ્યોતિર્ધામા પૃથુઃ (ધૃષ્ટ) કાવ્યશ્ચૈત્રશ્ચેતાગ્નિહેમકાઃ (કૌ) ।
મુનયઃ કીર્તિતાઃ સપ્ત સુરાગાઃ સુધિયસ્તથા ॥ ૧,૮૭.૧૫॥

હરયો દેવતામાં ચ ચત્વારઃ પઞ્ચ (સપ્ત) વિંશકાઃ ।
ગણા ઇન્દ્રઃ શિવિસ્તસ્ય શત્રુર્ભીમરથાઃ સ્મૃતાઃ ॥ ૧,૮૭.૧૬॥

હરિણા કૂર્મરૂપેણ હતો ભીમરથોऽસુરઃ ।
રૈવતસ્ય મનોઃ પુત્રો મહા પ્રાણશ્ચ સાધકઃ ॥ ૧,૮૭.૧૭॥

વન (લ) બન્ધુર્નિરમિત્રઃ પ્રત્યઙ્ગઃ પરહા શુચિઃ ।
દૃઢવ્રતઃ કેતુશ‍ૃગં ઋષયસ્તસ્ય વર્ણ્યતે ॥ ૧,૮૭.૧૮॥

વેદશ્રીર્વેદબાહુશ્ચ ઊર્ધ્વબાહુસ્તથૈવ ચ ।
હિરણ્યરોમા પર્જન્યઃ સત્યનેત્રઃ (નામા) સ્વધામ ચ ॥ ૧,૮૭.૧૯॥

અભૂતરજસશ્ચૈવ તથા દેવાશ્ચમેધસઃ ।
વૈકુણ્ઠ (ણ્ઠાઃ શ્ચામૃત (તા) શ્ચૈવ ચત્વારો દેવતાગણાઃ ॥ ૧,૮૭.૨૦॥

ગણે ચતુર્દશ સુરા વિભુરિન્દ્રઃ પ્રતાપવાન્ ।
શાન્તઃ શત્રુર્હતો દૈત્યો હંસરૂપેણ વિષ્ણુના ॥ ૧,૮૭.૨૧॥

ચાક્ષુષસ્ય મનોઃ પુત્રા ઉરુઃ પુરુર્મહાબલઃ ।
શતદ્યુમ્નસ્તપસ્વી ચ સત્યબાહુઃ(ક્યો) કૃતિસ્તથા ॥ ૧,૮૭.૨૨॥

અગ્નિષ્ણુરતિરાત્રશ્ચ સુદ્યુમ્નશ્ચ તથા નરઃ ।
હવિષ્માનુત્તમઃ શ્રીમાન્સ્વ (સુ) ધામા વિરજસ્તથા ॥ ૧,૮૭.૨૩॥

અભિમાનઃ સહિષ્ણુશ્ચ મધુશ્રીરૃષયઃ સ્મૃતાઃ ।
આર્યાઃ પ્રભૂતા ભાવ્યાશ્ચ લેખાશ્ચ પૃથુકાસ્તથા ॥ ૧,૮૭.૨૪॥

અષ્ટકસ્ય ગણાઃ પઞ્ચ તથા પ્રોક્તા દિવૌકસામ્ ।
ઇન્દ્રો મનોજવઃ શત્રુર્મહાકાલો મહાભજઃ ॥ ૧,૮૭.૨૫॥

અશ્વરૂપેણ સ હતો હરિણા લોકધારિણા ।
મનોર્વૈવસ્વતસ્યૈતે પુત્રા વિષ્ણુપરાયણાઃ ॥ ૧,૮૭.૨૬॥

ઇક્ષ્વાકુરથ નાભાગો ધૃષ્ટઃ શર્યાતિરેવ ચ ।
નરિષ્યન્તસ્તથા પાંસુર્નભો નેદિષ્ઠ એવ ચ ॥ ૧,૮૭.૨૭॥

કરૂષશ્ચ પૃષધ્રશ્ચ સુદ્યુમ્નશ્ચ મનોઃ સુતાઃ ।
અત્રિર્વસિષ્ઠો ભગવાઞ્જમદગ્નિશ્ચ કશ્યપઃ ॥ ૧,૮૭.૨૮॥

ગૌતમશ્ચ ભરદ્વાજો વિશામિત્રોઽથ સપ્તમઃ ।
તથા હ્યેકોનપઞ્ચાશન્મરુતઃ પરિકીર્તિતાઃ ॥ ૧,૮૭.૨૯॥

આદિત્યા વસવઃ સાધ્યાગણા દ્વાદશકાસ્ત્રયઃ ।
એકાદશા તથા રુદ્રા વસવોઽષ્ટૌ પ્રકીર્તિતાઃ ॥ ૧,૮૭.૩૦॥

દ્વાવશ્વિનૌ વિનિર્દિષ્ટૌ વિશ્વેદેવાસ્તથા દશા ।
દશૌવાઙ્ગિરસો દેવા નવ દેવગણાસ્તથા ॥ ૧,૮૭.૩૧॥

તેજસ્વી નામ વૈ શક્રો હિરણ્યાક્ષો રિપુઃ સ્મૃતઃ ।
હતો વરાહરૂપેણ હરિણ્યાખ્યોઽથ વિષ્ણુના ॥ ૧,૮૭.૩૨॥

વક્ષ્યે મનોર્ભવિષ્યસ્ય સાવર્ણ્યાખ્યસ્ય વૈ સુતાન્ ।
વિજયશ્ચાર્વવીરશ્ચ નિર્મોહઃ સત્યવાક્કૃતી ॥ ૧,૮૭.૩૩॥

વરિષ્ઠશ્ચ ગરિષ્ઠશ્ચ વાચઃ સંગતિરેવ ચ ।
અશ્વત્થામા કૃપો વ્યાસો ગાલવો દીપ્તિમાનથ ॥ ૧,૮૭.૩૪॥

ઋષ્યશ ૃઙ્ગસ્તથા રામ ઋષયઃ સપ્ત કીર્તિતાઃ ।
સુતપા અમૃતાભાશ્ચ મુખ્યાશ્ચાપિ તથા સુરાઃ ॥ ૧,૮૭.૩૫॥

તેષાં ગણસ્તુ દેવાના મેકૈકો વિંશકઃ સ્મૃતઃ ।
વિરોચનસુતસ્તેષાં બલિરિન્દ્રો ભવિષ્યતિ ॥ ૧,૮૭.૩૬॥

દત્ત્વેમાં યાચમાનાય વિષ્ણવે યઃ પદત્રયમ્ ।
ઋદ્ધિમિન્દ્રપદં હિત્વા તતઃ સિદ્ધિમવાપ્સ્યતિ ॥ ૧,૮૭.૩૭॥

વારુણેર્દક્ષસાવર્ણેર્નવમસ્ય સુતાઞ્છૃણુ ।
ધૃતિકેતુર્દીપ્તિકેતુઃ પઞ્ચહસ્તો નિરામયઃ ।
પૃતુશ્રવા બૃહદ્દ્યુમ્ન ઋચીકો બૃહતો ગુણઃ ॥ ૧,૮૭.૩૮॥

મેધાતિથિર્દ્યુતિશ્ચૈવ સવસો વસુરેવ ચ ।
જ્યોતિષ્માન્હવ્યકવ્યૌ ચ ઋષયો વિભુરીશ્વરઃ ॥ ૧,૮૭.૩૯॥

પરો મરીચિર્ગર્ભશ્ચ સ્વ (સુ) ધર્માણશ્ચ તે ત્રયઃ ।
દેશશત્રુ) કાલકાક્ષસ્તદ્ધન્તા પદ્મનાભકઃ ॥ ૧,૮૭.૪૦॥

ભવિષ્યન્તિ તદા દેવા એકૈકો દ્વાદશો ગણઃ ।

તેષામિન્દ્રો મહાવીર્યો ભવિષ્યત્યદ્ભુતો હર ॥ ૧,૮૭.૪૦*૧॥

ધમપુત્રસ્ય પુત્રાંસ્તુ દશ મસ્ય મનોઃ શ‍ૃણુ ।
સુક્ષેત્રશ્ચોત્તમૌજાશ્ચ ભૂરિશ્રેણ્યશ્ચ વીર્યવાન્ ॥ ૧,૮૭.૪૧॥

શતાનીકો નિરમિત્રો વૃષસેનો જયદ્રથઃ ।
ભૂરિદ્યુમ્નઃ સુવર્ચાશ્ચ શાન્તિરિન્દ્રઃ પ્રતાપવાન્ ॥ ૧,૮૭.૪૨॥

અયો (પો) મૂર્તિર્હવિષ્માંશ્ચ સુકૃતિશ્ચાવ્યયસ્તથા ।
નાભાગોઽપ્રતિમૌજાશ્ચ સૌરભ ઋષયસ્તથા ॥ ૧,૮૭.૪૩॥

પ્રાણાખ્યાઃ શતસંખ્યાસ્તુ દેવતાનાં ગણસ્તદા ।
તેષામિન્દ્રશ્ચ ભવિતા શાન્તિર્નામ મહાબલઃ ।
બલિઃ શત્રુસ્તં હરિશ્ચ ગદયા ઘાતયિષ્યતિ ॥ ૧,૮૭.૪૪॥

રુદ્ર પુત્રસ્ય તે પુત્રાન્વક્ષ્યામ્યેકાદશસ્ય તુ ।
સર્વત્રગઃ સુશર્મા ચ દેવાનીકઃ પુરુર્ગુરુઃ ॥ ૧,૮૭.૪૫॥

ક્ષેત્રવર્ણો દૃઢેષુશ્ચ આર્દ્રકઃ પુત્રકસ્તથા ।
હવિષ્માંશ્ચ હવિષ્યશ્ચ વરુણો વિશ્વવિસ્તરૌ ॥ ૧,૮૭.૪૬॥

વિષ્ણુશ્ચૈવાગ્નિતેજાશ્ચ ઋષયઃ સપ્ત કીર્તિતાઃ ।
વિહઙ્ગમાઃ કામગમ્નિર્માણરુચયસ્તથા ॥ ૧,૮૭.૪૭॥

એકૈકસ્ત્રિંશકસ્તેષાં ગણશ્ચૈન્દ્રશ્ચ વૈ વૃષઃ ।
ધસગ્રીવો રિપુસ્તસ્ય શ્રીરૂપી ઘાતયિષ્યતિ ॥ ૧,૮૭.૪૮॥

મનોસ્તુ દક્ષપુત્રસ્ય દ્વાદશસ્યાત્મજાઞ્છૃણુ ।
દેવવાનુ પદેવશ્ચ દેવશ્રેષ્ઠો વિદૂરથઃ ॥ ૧,૮૭.૪૯॥

મિત્રવાન્મિત્રદેવશ્ચ મિત્રબિન્દુશ્ચ વીર્યવાન્ ।
મિત્રવાહઃ પ્રવાહશ્ચ દક્ષપુત્રમનોઃ સુતાઃ ॥ ૧,૮૭.૫૦॥

તપસ્વી સુતપાશ્ચૈવ તપોમૂર્તિસ્તપોરતિઃ ।
તપોધૃતિર્દ્યુતિશ્ચાન્યઃ સપ્તમશ્ચ તપોધનાઃ ॥ ૧,૮૭.૫૧॥

સ્વધર્માણઃ સુતપસો હરિતો હોહિતાસ્તથા ।
સુરારયો ગણાશ્ચૈતે પ્રત્યેકં દશકો ગણઃ ॥ ૧,૮૭.૫૨॥

ઋતધામા ચ ભદ્રે (તત્રે) ન્દ્રસ્તારકો નામ તદ્રિપુઃ ।
હરિર્નપુંસકં ભૂત્વા ઘાતયિષ્યતિ શઙ્કર ॥ ૧,૮૭.૫૩॥

ત્રયોદશસ્ય રૌચ્યસ્ય મનોઃ પુત્રાન્નિબોધ મે ।
ચિત્રસેનો વિચિત્રશ્ચ તપોધર્મરતો ધૃતિઃ ॥ ૧,૮૭.૫૪॥

સુનેત્રઃ ક્ષેત્રવૃત્તિશ્ચ સુનયો ધર્મપો દૃઢઃ ।
ધૃતિમાનવ્યયશ્ચૈવ નિશારૂપો નિરુત્સુકઃ ॥ ૧,૮૭.૫૫॥

નિર્મોહસ્તત્ત્વદર્શો ચ ઋષયઃ સપ્ત કીર્તિતાઃ ।
સ્વ (સુ) રોમાણઃ સ્વ (સુ) ધર્માણઃ સ્વ (સુ) કર્માણસ્તથામરાઃ ॥ ૧,૮૭.૫૬॥

ત્રયસ્ત્રિંશદ્વિભેદાસ્તે દેવાનાં તત્ર વૈ ગણાઃ ।
ઇન્દ્રો દિવસ્પતિઃ શત્રુસ્ત્વિષ્ટિભો નામ દાનવઃ ॥ ૧,૮૭.૫૭॥

માયૂરેણ ચ રૂપેણ ઘાતયિષ્યતિ માધવઃ ।
ચતુર્દશસ્ય ભૌત્યસ્ય શ૱ૃણુ પુત્રાન્મનોર્મમ ॥ ૧,૮૭.૫૮॥

ઉરુર્ગભીરો ધૃષ્ટશ્ચ તરસ્વીગ્રા (ગ્ર) હ એવ ચ ।
અભિમાનિ પ્રવીરશ્ચ જિષ્ણુઃ સંક્રન્દનસ્તથા ।
તેજસ્વી દુર્લભશ્ચૈવ ભૌત્યસ્યૈતે મનોઃ સુતાઃ ॥ ૧,૮૭.૫૯॥

અગ્નીધ્રશ્ચાગ્નિબાહુશ્ચ માગધશ્ચ તથા શુચિઃ ।
અજિતો મુક્તશુક્રૌ ચ ઋષયઃ સપ્ત કીર્તિતાઃ ॥ ૧,૮૭.૬૦॥

ચાક્ષુષાઃ કર્મનિષ્ઠાશ્ચ પવિત્રા ભ્રાજિનસ્તથા ।
વચોવૃદ્ધા દેવગણાઃ પઞ્ચ પ્રોક્તાસ્તુ સપ્તકાઃ ॥ ૧,૮૭.૬૧॥

શુચિરિન્દ્રો મહાદૈત્યો રિપુહન્તા હરિઃ સ્વયમ્ ।
એકો દેવશ્ચતુર્ધા તુ વ્યાસરૂપેણ વિષ્ણુના ॥ ૧,૮૭.૬૨॥

કૃતસ્તતઃ પુરાણાનિ વિદ્યાશ્ચાષ્ટાદશૈવ તુ ।
અઙ્ગાનિ ચતુરો વેદા મીમાંસા ન્યાયવિસ્તરઃ ॥ ૧,૮૭.૬૩॥

પુરાણં ધર્મશાસ્ત્રં ચ આયુર્વેદાર્થશાસ્ત્રકમ્ ।
ધનુર્વેદશ્ચ ગાન્ધર્વો વિદ્યા હ્યષ્ટાદશૈવ તાઃ ॥ ૧,૮૭.૬૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મનુતદ્વંશનિરૂપણં નામ સ્પતાશીતિતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૮૮

સૂત ઉવાચ ।
હરિર્મન્વન્તરાણ્યાહ બ્રહ્માદિભ્યો હરાય ચ ।
માર્કણ્ડેયઃ પિતૃસ્તો ત્રં ક્રૌઞ્ચુકિં પ્રાહ તચ્છૃણુ ॥ ૧,૮૮.૧॥

માર્કણ્ડેય ઉવાચ ।
રુચિઃ પ્રજાપતિઃ પૂર્વં નિર્મમો નિરહઙ્કૃતિઃ ।
અત્રસ્તોઽમિતમાયી ચ ચચાર પૃથિવીમિમામ્ ॥ ૧,૮૮.૨॥

અનગ્નિમનિકેતં તમેકાહારમનાશ્રમમ્ ।
નિમુક્તસંગં તં દૃષ્ટ્વા પ્રોચુઃ સ્વપિતરો મુનિમ્ ॥ ૧,૮૮.૩॥

પિતર ઊચુઃ ।
વત્સ કસ્માત્ત્વયા પુણ્યો ન કૃતો દાર સંગ્રહઃ ।
સ્વર્ગાપવર્ગહે (સે)તુત્વાદ્બન્ધસ્તેનાનિશં (નિમિષં) વિના ॥ ૧,૮૮.૪॥

ગૃહી સમસ્તદેવાનાં પિતૃણાં ચ તથાર્હણમ્ ।
ઋષીણામર્થિનાં ચૈવ કુર્વલ્લો કાનવાપ્નુયાત્ ॥ ૧,૮૮.૫॥

સ્વાહોચ્ચારણતો દેવાન્સ્વધોચ્ચારણતઃ પિતન્ ।
વિભજત્યન્નદાનેન ભૃત્યાદ્યાનતિથીનપિ ॥ ૧,૮૮.૬॥

સ ત્ત્વં દૈવાદૃણાદ્બન્ધમિમમસ્મદૃણાદપિ ।
અવાપ્તોઽસિ મનુષ્યર્ષે ભૂતેભ્યશ્ચ દિનેદિને ॥ ૧,૮૮.૭॥

અનત્પાદ્ય સુતાન્દેવાનસન્તાર્પ્ય પિતૃસ્તથા ।
અકૃત્વા ચ કથં માણ્ડ્યં સ્વર્ગતિં પ્રાપ્તુમિચ્છસિ ॥ ૧,૮૮.૮॥

ક્લેશબોધૈકકં પુત્ર અન્યાયેન ભવેત્તવ ।
મૃતસ્ય નરકં ત્યક્ત્વા ક્લેશ એવાન્યજન્મનિ ॥ ૧,૮૮.૯॥

રુચિરુવાચ ।
પરિગ્રહોઽતિદુઃખાય પાપાયા ધોગતેસ્તથા ।
ભવત્યતો મયા પૂર્વંન કૃતો દારસંગ્રહઃ ॥ ૧,૮૮.૧૦॥

આત્મનઃ સંશયોપાયઃ ક્રિયતે ક્ષણમન્ત્રણાત્ ।
સ્વમુક્તિહેતુર્ન ભવત્યસાવપિ પરિગ્રહાત્ ॥ ૧,૮૮.૧૧॥

પ્રક્ષાલ્યતેઽનુદિવસં ય આત્મા નિષ્પરિગ્રહઃ ।
મમ ત્વપઙ્કુદિગ્ધોઽપિ વિદ્યામ્ભોભિર્વરં હિ તત્ ॥ ૧,૮૮.૧૨॥

અનેકભવસંભૂતકર્મપઙ્કાઙ્કિતો બુધૈઃ ।
આત્મા તત્ત્વજ્ઞાનતોયૈઃ પ્રક્ષાલ્યો નિયતેન્દ્રિયૈઃ ॥ ૧,૮૮.૧૩ ॥

પિતર ઊચુઃ ।
યુક્તં પ્રક્ષાલનં કર્તુમાત્મનોઽપિ યતેન્દ્રિયૈઃ ।
કિં તુ નોપાયમાર્ગોઽયં યતસ્ત્વં પુત્ર વર્તસે ॥ ૧,૮૮.૧૪ ॥

પઞ્ચયજ્ઞૈસ્તપોદાનૈરશુભં નુદતસ્તવ ।
ફલાભિસન્ધિરહિતૈઃ પૂર્વકમ શુભાશુભૈઃ ॥ ૧,૮૮.૧૫ ॥

એવં ન બન્ધો ભવતિ કુર્વતઃ કારણાત્મકમ્ ।
ન ચ બન્ધાય તત્કર્મ ભવત્યનતિસન્નિભમ્ ॥ ૧,૮૮.૧૬ ॥

પૂર્વકર્મ કૃતં બોગૈઃ ક્ષીયતે હ્યનિશન્તથા ।
સુખદુઃખાત્મકૈર્વત્સ પુણ્યા પુણ્યાત્મકં નૃણામ્ ॥ ૧,૮૮.૧૭ ॥

એવં પ્રક્ષાલ્યતે પ્રાજ્ઞૈરાત્મા બન્ધાચ્ચ રક્ષ્યતે ।
રક્ષ્યશ્ચ સ્વવિવેકૈર્ન પાપપઙ્કેન દહ્યતે ॥ ૧,૮૮.૧૮ ॥

રુચિરુવાચ ।
અવિદ્યા પચ્યતે વેદે કર્મમાર્ગાત્પિતામહાઃ ।
તત્કથં કર્મણો માર્ગે ભવન્તો યોજયન્તિ મામ્ ॥ ૧,૮૮.૧૯ ॥

પિતર ઉચુઃ ।
અવિદ્યા સર્વમેવૈતત્કર્મણૈતન્મૃષા વચઃ ।
કિં તુ વિદ્યાપરિપ્રાપ્તૌ હેતુઃ કર્મ ન સંશયઃ ॥ ૧,૮૮.૨૦ ॥

વિહિતાકરણાનર્થો ન સદ્ભિઃ ક્રિયતે તુ યઃ ।
સંયમો મુક્તયે યોઽન્યઃ પ્રત્યુતાધોગતિપ્રદઃ ॥ ૧,૮૮.૨૧ ॥

પ્રક્ષાલયામીતિ ભવાન્યદેતન્મન્યતે વરમ્ ।
વિહિતાકરણોદ્ભૂતૈઃ પાપૈસ્ત્વમપિ દહ્યસે ॥ ૧,૮૮.૨૨ ॥

અવિદ્યાપ્યુપકારાય વિષવજ્જાયતે નૃણામ્ ।
અનુષ્ઠાના ભ્યુપાયેન બન્ધયોગ્યાપિ નો હિ સા ॥ ૧,૮૮.૨૩ ॥

તસ્માદ્વત્સ કુરુષ્વ ત્વં વિધિવદ્દારસંગ્રહમ્ ।
આજન્મ વિફલન્તેઽસ્તુ અસમ્પ્રાપ્યાન્યલૌકિકમ્ ॥ ૧,૮૮.૨૪ ॥

રુચિરુવાચ ।

વૃદ્ધોઽહં સામ્પ્રતં કો મે પિતરઃ સમ્પ્રિદાસ્યતિ ।
ભાર્યાન્તથા દરિદ્રસ્ય દુષ્કરો દારસંગ્રહઃ ॥ ૧,૮૮.૨૫॥

પિતર ઊચુઃ ।
અસ્માકં પતનં વત્સ ભવતશ્ચાપ્યધોગતિઃ ।
નૂનં ભાવિ ભવિત્રી ચ નાભિનન્દસિ નો વચઃ ॥ ૧,૮૮.૨૬॥

ઇત્યુક્ત્વા પિતરસ્તસ્ય પશ્યતો મુનિસત્તમ ।
બભૂવુઃ સહસાદૃશ્યા દીપા વાતહતા ઇવ ॥ ૧,૮૮.૨૭॥

મુનિઃ ક્રૈઞ્ચુકયે પ્રાહ માર્કણ્ડેયો મહાતપાઃ ।
રુચિવૃત્તાન્તમખિલં પિતૃસંવાદલક્ષણમ્ ॥ ૧,૮૮.૨૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
કર્મજ્ઞાનમા નામાષ્ટાશીતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮૯
સૂત ઉવાચ ।
પૃષ્ટઃ ક્રૈઞ્ચુકિનોવાચ માર્કણ્ડેયઃ પુનશ્ચ તમ્ ।
સ તેન પિતૃવાક્યને ભૃશમુદ્વિગ્નમાનસઃ ॥ ૧,૮૯.૧॥

કન્યાભિલાષી વિપ્રર્ષિઃ પરિબભ્રામ મેદિનીમ્ ।
કન્યામલભમાનોઽસૌ પિતૃવાક્યેન દીપિતઃ ।
ચિન્તામવાપ મહીતમતીવોદ્વિગ્નમાનસઃ ॥ ૧,૮૯.૨॥

કિં કરોમિ ક્વ ગચ્છામિ કથં મે દારસંગ્રહઃ ।
ક્ષિપ્રં ભવેન્મત્પિતૃણાં મમાભ્યુદયકારકઃ ॥ ૧,૮૯.૩॥

ઇતિ ચિન્તયતસ્તસ્યમતિર્જાતા મહાત્મનઃ ।
તપસારાધયામ્યેનં બ્રહ્માણં કમલોદ્ભવમ્ ॥ ૧,૮૯.૪॥

તતો વર્ષશતં દિવ્યં તપસ્તેપે મહામનાઃ ।
તત્ર સ્થિતશ્ચિરં કાલં વનેષુ નિયમસ્થિતઃ ।
આરાધનાય સ તદા પરં નિયમમાસ્થિતઃ ॥ ૧,૮૯.૫॥

તતઃ પ્રદર્શયામાસ બ્રહ્મા લોકપિતામહઃ ।
ઉવાચાથ પ્રસન્નોઽસ્મીત્યુચ્યતામભિવાઞ્છિતમ્ ॥ ૧,૮૯.૬॥

તતોઽસૌ પ્રણિપત્યાહ બ્રહ્માણં જગતો ગતિમ્ ।
પિતૄણાં વચનાત્તેન યત્કર્તુમભિવાઞ્છિતમ્ ॥ ૧,૮૯.૭॥

બ્રહ્મોવાચ ।
પ્રજાપતિસ્ત્વં ભવિતા સ્રષ્ટવ્યા ભવતા પ્રજાઃ ।
સૃષ્ટ્વા પ્રજાઃ સુતાન્વિપ્ર સમુત્પાદ્ય ક્રિયાસ્તથા ॥ ૧,૮૯.૮॥

કૃત્વા કૃતાધિકારસ્ત્વં તતઃ સિદ્ધિમવાપ્યસિ ।
સત્વં યથોક્તં પિતૃભિઃ કુરુ દારપરિગ્રહમ્ ॥ ૧,૮૯.૯॥

કામં ચેમમભિધ્યાય ક્રિયતાં પિતૃપૂજનમ્ ।
ત એવ તુષ્ટાઃ પિતરઃ પ્રદાસ્યન્તિ તવેપ્સિતમ્ ।
પત્નીં સુતાંશ્ચ સન્તુષ્ટાઃ કિં ન દદ્યુઃ પિતામહાઃ ॥ ૧,૮૯.૧૦॥

માર્કણ્ડેય ઉવાચ ।
ઇત્યૃષિર્વચનં શ્રુત્વા બ્રહ્મણોઽવ્યક્તજન્મનઃ ।
નદ્યા વિવિક્તે પુલિને ચકાર પિતૃતર્પણમ્ ॥ ૧,૮૯.૧૧॥

તુષ્ટાવ ચ પિતૄન્વિપ્રઃ સ્તવૈરેભિરથાદૃતઃ ।
એકાગ્રપ્રયતો ભૂત્વા ભક્તિનમ્રાત્મકન્ધરઃ ॥ ૧,૮૯.૧૨॥

રુચિરુવાચ ।
નમસ્યેઽહં પિતૄન્ભક્ત્યા યે વસન્ત્યધિદેવતમ્ ।
દેવૈરપિ હિ તર્પ્યન્તે યે શ્રાદ્ધેષુ સ્વધોત્તરૈઃ ॥ ૧,૮૯.૧૩॥

નમસ્યેઽહં પિતૄન્સ્વર્ગે યે તર્પ્યન્તે મહર્ષિભિઃ ।
શ્રાદ્ધૈર્મનોમયૈર્ભક્ત્યા ભુક્તિમુક્તિમભીપ્સુભિઃ ॥ ૧,૮૯.૧૪॥

નમસ્યેઽહં પિતૄન્સ્વર્ગે સિદ્ધાઃ સન્તર્પયન્તિ યાન્ ।
શ્રાદ્ધેષુ દિવ્યૈઃ સકલૈરુપહારૈરનુત્તમૈઃ ॥ ૧,૮૯.૧૫॥

નમસ્યેઽહં પિતૄન્ભક્ત્યા યેઽર્ચ્યન્તે ગુહ્યકૈર્દિવિ ।
તન્મયત્વેન વાઞ્છદ્ભિઃ ઋદ્ધિમાત્યન્તિકીં પરામ્ ॥ ૧,૮૯.૧૬॥

નમસ્યેઽહં પિતૄન્મર્ત્યૈરર્ચ્યન્તે ભુવિ યે સદા ।
શ્રાદ્ધેષુ શ્રદ્ધયાભીષ્ટલોકપુષ્ટિપ્રદાયિનઃ ॥ ૧,૮૯.૧૭॥

નમસ્યેઽહં પિતૄન્વિપ્રૈરર્ચ્યન્તે ભુવિ યે સદા ।
વાઞ્છિતાભીષ્ટલાભાય પ્રાજાપત્યપ્રદાયિનઃ ॥ ૧,૮૯.૧૮॥

નમસ્યેઽહં પિતૄન્યે વૈ તર્પ્યન્તેઽરણ્યવાસિભિઃ ।
વન્યૈઃ શ્રાદ્ધૈર્યતાહારૈસ્તપોનિર્ધૂતકલ્મષૈઃ ॥ ૧,૮૯.૧૯॥

નમસ્યેઽહં પિતૄન્વિપ્રૈર્નૈષ્ઠિકૈર્ધર્મચારિભિઃ ।
યે સંયતાત્મભિર્નિત્યં સન્તર્પ્યન્તે સમાધિભિઃ ॥ ૧,૮૯.૨૦॥

નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધૈ રાજન્યાસ્તર્પયન્તિ યાન્ ।
કવ્યૈરશેષૈવિધિવલ્લોકદ્વયફલપ્રદાન્ ॥ ૧,૮૯.૨૧॥

નમસ્યેઽહં પિતૄન્વૈશ્યૈરર્ચ્યન્તે ભુવિ યે સદા ।
સ્વકર્માભિરતૈર્નિત્યં પુષ્પધૂપાન્નવારિભિઃ ॥ ૧,૮૯.૨૨॥

નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધે શૂદ્રૈરપિ ચ ભક્તિતઃ ।
સન્તર્પ્યતે જગત્કૃત્સ્નં નામ્ના ખ્યાતાઃ સુકાલિનઃ ॥ ૧,૮૯.૨૩॥

નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધે પાતાલે યે મહાસુરૈઃ ।
સન્તર્પ્યન્તે સુધાહારાસ્ત્યક્તદમ્ભમદૈઃ સદા ॥ ૧,૮૯.૨૪॥

નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધૈરર્ચ્યન્તે યે રસાતલે ।
ભોગૈરશેષૈર્વિધિવન્નાગૈઃ કામાનભીપ્સુભિઃ ॥ ૧,૮૯.૨૫॥

નમસ્યેઽહં પિતૄઞ્છ્રાદ્ધૈઃ સર્પૈઃ સન્તર્પિતાન્સદા ।
તત્રૈવ વિધિવન્મન્ત્રભોગસમ્પત્સમન્વિતૈઃ ॥ ૧,૮૯.૨૬॥

પિતૄન્નમસ્યે નિવસન્તિ સાક્ષાદ્યે દેવલોકેઽથ મહીતલે વા ।
તથાન્તરિક્ષે ચ સુરારિપૂજ્યાસ્તે વૈ પ્રતીચ્છન્તુ મયોપનીતમ્ ॥ ૧,૮૯.૨૭॥

પિતૄન્નમસ્યે પરમાર્થભૂતા યે વૈ વિમાને નિવસન્ત્યમૂર્તાઃ ।
યજન્તિ યાનસ્તમલૈર્મનોભિર્યોગીશ્વરાઃ ક્લેશવિમુક્તિહેતૂન્ ॥ ૧,૮૯.૨૮॥

પિતૄન્નમસ્યે દિવિ યે ચ મૂર્તાઃ સ્વધાભુજઃ કામ્યફલાભિસન્ધૌ ।
પ્રદાનશક્તાઃ સકલેપ્સિતાનાં વિમુક્તિદા યેઽનભિસંહિતેષુ ॥ ૧,૮૯.૨૯॥

તૃપ્યન્તુ તેઽસ્મિન્પિતરઃ સમસ્તા ઇચ્છાવતાં યે પ્રદિશન્તિ કામાન્ ।
સુરત્વમિન્દ્રત્વમિતોઽધિકં વા ગજાશ્વરત્નાનિ મહાગૃહાણિ ॥ ૧,૮૯.૩૦॥

સોમસ્ય યે રશ્મિષુ યેઽર્કબિમ્બે શુક્લે વિમાને ચ સદા વસન્તિ ।
તૃપ્યન્તુ તેઽસ્મિન્પિતરોઽન્નતોયૈર્ગન્ધાદિના પુષ્ટિમિતો વ્રજન્તુ ॥ ૧,૮૯.૩૧॥

યેષાં હુતેઽગ્નૌ હવિષા ચ તૃપ્તિર્યે ભુઞ્જતે વિપ્રશરીરસંસ્થાઃ ।
યે પિણ્ડદાનેન મુદં પ્રયાન્તિ તૃપ્યન્તુ તેઽસ્મિન્પિતરોઽન્નતોયૈઃ ॥ ૧,૮૯.૩૨॥

યે ખડ્ગમાંસેન સુરૈરભીષ્ટૈઃ કૃષ્ણૈસ્તિલૈર્દિવ્ય મનોહરૈશ્ચ ।
કાલેન શાકેન મહર્ષિવર્યૈઃ સમ્પ્રીણિતાસ્તે મુદમત્ર યાન્તુ ॥ ૧,૮૯.૩૩॥

કવ્યાન્યશેષાણિ ચ યાન્યભીષ્ટાન્યતીવ તેષાં મમ પૂજિતાનામ્ ।
તેષાઞ્ચ સાન્નિધ્યમિહાસ્તુ પુષ્પગન્ધામ્બુભોજ્યેષુ મયા કૃતેષુ ॥ ૧,૮૯.૩૪॥

દિનેદિને યે પ્રતિગૃહ્ણતેઽર્ચાં માસાન્તપૂજ્યા ભુવિ યેઽષ્ટકાસુ ।
યે વત્સરાન્તેઽભ્યુદયે ચ પૂજ્યાઃ પ્રયાન્તુ તે મે પિતરોઽત્ર તુષ્ટિમ્ ॥ ૧,૮૯.૩૫॥

પૂજ્યા દ્વિજાનાં કુમુદેન્દુભાસો યે ક્ષત્રિયાણાં જ્વલનાર્કવર્ણાઃ ।
તથા વિશાં યે કનકાવદાતા નીલીપ્રભાઃ શૂદ્રજનસ્ય યે ચ ॥ ૧,૮૯.૩૬॥

તેઽસ્મિન્સમસ્તા મમ પુષ્પગન્ધધૂપામ્બુભોજ્યાદિનિવેદનેન ।
તથાગ્નિહોમેન ચ યાન્તિ તૃપ્તિં સદા પિતૃભ્યઃ પ્રણતોઽસ્મિ તેભ્યઃ ॥ ૧,૮૯.૩૭॥

યે દેવપૂર્વાણ્યભિતૃપ્તિહેતોર શ્નન્તિ કવ્યાનિ શુભાહૃતાનિ ।
તૃપ્તાશ્ચ યે ભૂતિસૃજો ભવન્તિ તૃપ્યન્તુ તેઽસ્મિન્પ્રણતોઽસ્મિ તેભ્યઃ ॥ ૧,૮૯.૩૮॥

રક્ષાંસિ ભૂતાન્યસુરાંસ્તથોગ્રાન્નિર્ણાશયન્તુ ત્વશિવં પ્રજાનામ્ ।
આદ્યાઃ સુરાણામમરેશપૂજ્યાસ્તૃપ્યન્તુ તેઽસ્મિન્પ્રણતોઽસ્મિ તેભ્યઃ ॥ ૧,૮૯.૩૯॥

અગ્નિષ્વાત્તા બર્હિષદ આજ્યપાઃ સોમપાસ્તથા ।
વ્રજન્તુ તૃપ્તિં શ્રાદ્ધેઽસ્મિન્પિતરસ્તર્પિતા મયા ॥ ૧,૮૯.૪૦॥

અગ્નિષ્વાત્તાઃ પિતૃગણાઃ પ્રાચીં રક્ષન્તુ મે દિશમ્ ।
તથા બર્હિષદઃ પાન્તુ યામ્યાં મે પિતરઃ સદા ।
પ્રતીચીમાજ્યપાસ્તદ્વદુદીચીમપિ સોમપાઃ ॥ ૧,૮૯.૪૧॥

રક્ષોભૂતપિશાચેભ્યસ્તથૈવાસુરદોષતઃ ।
સર્વતઃ પિતરો રક્ષાં કુર્વન્તુ મમ નિત્યશઃ ॥ ૧,૮૯.૪૨॥

વિશ્વો વિશ્વભુગારાધ્યો ધર્મો ધન્યઃ શુભાનનઃ ।
ભૂતિદો ભૂતિકૃદ્ભૂતિઃ પિતૃણાં યે ગણા નવ ॥ ૧,૮૯.૪૩॥

કલ્યાણઃ કલ્યદઃ કર્તા કલ્યઃ કલ્યતરાશ્રયઃ ।
કલ્યતાહેતુરન્ઘઃ ષડિમે તે ગણાઃ સ્મૃતાઃ ॥ ૧,૮૯.૪૪॥

વરો વરેણ્યો વરદસ્તુષ્ટિદઃ પુષ્ટિદસ્તથા ।
વિશ્વપાતા તથા ધાતા સપ્તૈતે ચ ગણાઃ સ્મૃતાઃ ॥ ૧,૮૯.૪૫॥

મહાન્મહાત્મા મહિતો મહિમાવાન્મહાબલઃ ।
ગણાઃ પઞ્ચ તથૈવૈતે પિતૃણાં પાપનાશનાઃ ॥ ૧,૮૯.૪૬॥

સુખદો ધનદશ્ચાન્યો ધર્મદોઽન્યશ્ચ ભૂતિદઃ ।
પિતૃણાં કથ્યતે ચૈવ તથા ગણચતુષ્ટયમ્ ॥ ૧,૮૯.૪૭॥

એકત્રિંશત્પિતૃગણા યૈર્વ્યાપ્તમખિલં જગત્ ।
ત એવાત્ર પિતૃગણાસ્તુષ્યન્તુ ચ મદાહિતાત્ ॥ ૧,૮૯.૪૮॥

માર્કણ્ડેય ઉવાચ ।
એવં તુ સ્તુવતસ્તસ્ય તેજસોરાશિરુચ્છ્રિતઃ ।
પ્રાદુર્બભૂવ સહસા ગગનવ્યાપ્તિકારકઃ ॥ ૧,૮૯.૪૯॥

તદ્દૃષ્ટ્વા સુમહત્તેજઃ સમાચ્છાદ્ય સ્થિતં જગત્ ।
જાનુભ્યામવનીં ગત્વા રુચિઃ સ્તોત્રમિદઞ્જગૌ ॥ ૧,૮૯.૫૦॥

રુચિરુવાચ ।
અર્ચિતાનામમૂર્તાનાં પિતૃણાં દીપ્તતેજસામ્ ।
નમસ્યામિ સદા તેષાં ધ્યાનિનાં દિવ્યચક્ષુષામ્ ॥ ૧,૮૯.૫૧॥

ઇન્દ્રાદીનાં ચ નેતારો દક્ષમારીચયોસ્તથા ।
સપ્તર્ષીણાં તથાન્યેષાં તાન્નમસ્યામિ કામદાન્ ॥ ૧,૮૯.૫૨॥

મન્વાદીનાં ચ નેતારઃ સૂર્યાચન્દ્રમસોસ્તથા ।
તાન્નમસ્યામ્યહં સર્વાન્પિતૄનપ્યુદધાવપિ ॥ ૧,૮૯.૫૩॥

નક્ષત્રાણાં ગ્રહાણાં ચ વાય્વગ્ન્યોર્નભસસ્તથા ।
દ્યાવાપૃથિવ્યોશ્ચ તથા નમસ્યામિ કૃતાઞ્જલિઃ ॥ ૧,૮૯.૫૪॥

પ્રજાપતેઃ કશ્યપાય સોમાય વરુણાય ચ ।
યોગેશ્વરેભ્યશ્ચ સદા નમસ્યામિ કૃતાઞ્જલિઃ ॥ ૧,૮૯.૫૫॥

નમો ગણેભ્યઃ સપ્તભ્યસ્તથા લોકેષુ સપ્તસુ ।
સ્વાયમ્ભુવે નમસ્યામિ બ્રહ્મણે યોગચક્ષુષે ॥ ૧,૮૯.૫૬॥

સોમાધારાન્પિતૃગણાન્યોગમૂર્તિધરાંસ્તથા ।
નમસ્યામિ તથા સોમં પિતરં જગતામહમ્ ॥ ૧,૮૯.૫૭॥

અગ્નિરૂપાંસ્તથૈવાન્યાન્નમસ્યામિ પિતૄનહમ્ ।
અગ્નિસોમમયં વિશ્વં યત એતદશેષતઃ ॥ ૧,૮૯.૫૮॥

યે ચ તેજસિ યે ચૈતે સોમસૂર્યાગ્નિમૂર્તયઃ ।
જગત્સ્વરૂપિણશ્ચૈવ તથા બ્રહ્મસ્વરૂપિણઃ ॥ ૧,૮૯.૫૯॥

તેભ્યોઽખિલેભ્યો યોગિભ્યઃ પિતૃભ્યો યતમાનસઃ ।
નમોનમો નમસ્તેઽસ્તુ પ્રસીદન્તુ સ્વધાભુજઃ ॥ ૧,૮૯.૬૦॥

માર્કણ્ડેય ઉવાચ ।
એવં સ્તુતાસ્તતસ્તેન તજસો મુનિસત્તમાઃ ।
નિશ્ચક્રમુસ્તે પિતરો ભાસયન્તો દિશાદશ ॥ ૧,૮૯.૬૧॥

નિવેદનઞ્ચ યત્તેન પુષ્પગન્ધાનુલેપનમ્ ।
તદ્ભૂષિતાનથ સ તાન્દદૃશે પુરતઃ સ્થિતાન્ ॥ ૧,૮૯.૬૨॥

પ્રણિપત્ય રુચિર્ભક્ત્યા પુનરેવ કૃતાઞ્જલિઃ ।
નમસ્તુભ્યં નમસ્તુભ્યમિત્યાહ પૃથગાદૃતઃ ॥ ૧,૮૯.૬૩॥

તતઃ પ્રસન્નાઃ પિતરસ્તમૂચુર્મુનિસત્તમમ્ ।
વરં વૃણીષ્વેતિ સ તાનુવાચાનતકન્ધરઃ ॥ ૧,૮૯.૬૪॥

રુચિરુવાચ ।
પ્રજાનાં સર્ગકર્તૃત્વમાદિષ્ટં બ્રહ્મણા મમ ।
સોઽહં પત્નીમભીપ્સામિ ધન્યાં દિવ્યાં પ્રજાવતીમ્ ॥ ૧,૮૯.૬૫॥

પિતર ઊચુઃ ।
અત્રૈવ સદ્યઃ પત્ની તે ભવત્વતિમનોરમા ।
તસ્યાઞ્ચ પુત્રો ભવિતા ભવતો મુનિસત્તમ ! ॥ ૧,૮૯.૬૬॥

મન્વન્તરાધિપો ધીમાંસ્ત્વન્નામ્નૈવોપલક્ષિતઃ ।
રુચે ! રૌચ્ય ઇતિ ખ્યાતિં પ્રયાસ્યતિ જગત્ત્રયે ॥ ૧,૮૯.૬૭॥

તસ્યાપિ બહવઃ પુત્રા મહાબલપરાક્રમાઃ ।
ભવિષ્યન્તિ મહાત્માનઃ પૃથિવીપરિપાલકાઃ ॥ ૧,૮૯.૬૮॥

ત્વં ચ પ્રિજાપતિર્ભૂત્વા પ્રજાઃ સૃષ્ટ્વા ચતુર્વિધાઃ ।
ક્ષીણાધિકારો ધર્મજ્ઞસ્તતઃ સિદ્ધિમવાપ્સ્યસિ ॥ ૧,૮૯.૬૯॥

સ્તોત્રેણાનેન ચ નરો યોઽસ્માંસ્તોષ્યતિ ભક્તિતઃ ।
તસ્ય તુષ્ટા વયં ભોગાનાત્મજં ધ્યાનમુત્તમમ્ ॥ ૧,૮૯.૭૦॥

આયુરારોગ્યમર્થં ચ પુત્રપૌત્રાદિકં તથા ।

વાઞ્છદ્ભિઃ સતતં સ્તવ્યાઃ સ્તોત્રેણાનેન વૈ યતઃ ॥ ૧,૮૯.૭૧॥

શ્રાદ્ધેષુ ય ઇમં ભક્ત્યા ત્વસ્મત્પ્રીતિકરં સ્તવમ્ ।
પઠિષ્યતિ દ્વિજાગ્ર્યાણાં ભુઞ્જતાં પુરતઃ સ્થિતઃ ॥ ૧,૮૯.૭૨॥

સ્તોત્રશ્રવણસમ્પ્રીત્યા સન્નિધાને પરે કૃતે ।
અસ્માભિરક્ષયં શ્રાદ્ધં તદ્ભવિષ્યત્યસંશયમ્ ॥ ૧,૮૯.૭૩॥

યદ્યપ્યશ્રોત્રિયં શ્રાદ્ધં યદ્યપ્યુપહતં ભવેત્ ।
અન્યાયોપાત્તવિત્તેન યદિ વા કૃતમન્યથા ॥ ૧,૮૯.૭૪॥

અશ્રાદ્ધાર્હૈરુપતૈરુપહારૈસ્તથા કૃતૈઃ ।
અકાલેઽપ્યથ વા દેશે વિધિહીનમથાપિ વા ॥ ૧,૮૯.૭૫॥

અશ્રદ્ધયા વા પુરુષૈર્દમ્ભમાશ્રિત્ય યત્કૃતમ્ ।
અસ્માકં તૃપ્તયે શ્રાદ્ધન્તથાપ્યેતદુદીરણાત્ ॥ ૧,૮૯.૭૬॥

યત્રૈતત્પઠ્યતે શ્રાદ્ધે સ્તોત્રમસ્તત્સુખાવહમ્ ।
અસ્માકં જાયતે તૃપ્તિસ્તત્ર દ્વાદશાવર્ષિકી ॥ ૧,૮૯.૭૭॥

હેમન્તે દ્વાદશાબ્દાનિ તૃપ્તિમેતત્પ્રયચ્છતિ ।
શિશિરે દ્વિગુણાબ્દાનિ તૃપ્તિં સ્તોત્રમિદં શુભમ્ ॥ ૧,૮૯.૭૮॥

વસન્તે ષોડશ સમાસ્તૃપ્તયે શ્રાદ્ધકર્મણિ ।
ગ્રીષ્મે ચ ષોડશૈવૈતત્પઠિતં તૃપ્તિકારકમ્ ॥ ૧,૮૯.૭૯॥

વિકલેઽપિ કૃતે શ્રાદ્ધે સ્તોત્રેણાનેન સાધિતે ।
વર્ષાસુ તૃપ્તિરસ્માકમક્ષય્યા જાયતે રુચે ॥ ૧,૮૯.૮૦॥

શરત્કાલેઽપિ પઠિતં શ્રાદ્ધકાલે પ્રયચ્છતિ ।
અસ્માકમેતત્પુરુષૈસ્તૃપ્તિં પઞ્ચદશાબ્દિકીમ્ ॥ ૧,૮૯.૮૧॥

યસ્મિન્ગેહે ચ લિખિતમેતત્તિષ્ઠતિ નિત્યદા ।
સન્નિધાનં કૃતે શ્રાદ્ધે તત્રાસ્માકં ભવિષ્યતિ ॥ ૧,૮૯.૮૨॥

તસ્માદેતત્ત્વયા શ્રાદ્ધે વિપ્રાણાં ભુઞ્જતાં પુરઃ ।
શ્રાવણીયં મહાભાગ અસ્માકં પુષ્ટિકારકમ્ ॥ ૧,૮૯.૮૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રુચિકૃતપિતૃસ્તોત્રં નામૈકોનનવતિતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૯૦
માર્કણ્ડેય ઉવાચ ।
તતસ્તસ્માન્નદીમધ્યાત્સમુત્તસ્થૌ મનોરમા ।
પ્રમ્લૌચા નામ તન્વઙ્ગી તત્સમીપે વરાપ્સરાઃ ॥ ૧,૯૦.૧॥

સા ચોવાચ મહાત્માનં રુચિં સુમધુરાક્ષરકમ્ ।
પ્રસાદયામાસ ભૂયઃ પ્રમ્લોચા ચ વરાપ્સરાઃ ॥ ૧,૯૦.૨॥

અતીવરૂપિણી કન્યા મત્પ્રસાદ્વરાઙ્ગના ।
જાતા વરુણપુત્રેણ પુષ્કરેણ મહાત્મના ॥ ૧,૯૦.૩॥

તાં ગૃહાણ મયા દત્તાં ભાર્યાર્થે વરવર્ણિનીમ્ ।
મનુર્મહામતિસ્તસ્યાં સમુત્પત્સ્યતિ તે સુતઃ ॥ ૧,૯૦.૪॥

માર્કણ્ડેય ઉવાચ ।
તથેતિ તેન સાપ્યુક્તા તસ્માત્તોયાદ્વપુષ્મતીમ્ ।
ઉદ્ધાર તતઃ કન્યાં માનિનીં નામ નામતઃ ॥ ૧,૯૦.૫॥

નદ્યાશ્ચ પુલિને તસ્મિન્સ મુનિર્મુનિસત્તમાઃ ।
જગ્રાહ પાણિં વિધિવત્સમાનીય મહામુનિઃ ॥ ૧,૯૦.૬॥

તસ્યાં તસ્ય સુતો જજ્ઞે મહાવીર્યો મહાદ્યુતિઃ ।

શ્રીગરુડમહાપુરાણમ્- ૯૧
સૂત ઉવાચ ।
સ્વાયમ્ભુવાદ્યા મુનયો હરિં ધ્યાયન્તિ કર્મણા ।
વ્રતાચારાર્ચનાધ્યાનસ્તુતિજપ્યપરાયણાઃ ॥ ૧,૯૧.૧॥

દેહેન્દ્રિયમનોબુદ્ધિપ્રાણાહઙ્કારવર્જિતમ્ ।
આકશેન વિહીનં વૈ તેજસા પરિવર્જિતમ્ ॥ ૧,૯૧.૨॥

ઉદકેન વિહીનં વૈ તદ્ધર્મપરિવર્જિતમ્ ।
પૃથિવીરહિતં ચૈવ સર્વભતવિવર્જિતમ્ ॥ ૧,૯૧.૩॥

ભૂતાધ્યક્ષં તથા બદ્ધનિયન્તારં પ્રભું વિભુમ્ ।
ચૈતન્યરૂપતારૂપં સર્વાધ્યક્ષં નિરઞ્જનમ્ ॥ ૧,૯૧.૪॥

મુક્તસઙ્ગં મહેશાનં સર્વદેવપ્રપૂજિતમ્ ।
તેજોરૂપમસત્ત્વં ચ તપસા પરિવર્જિતમ્ ॥ ૧,૯૧.૫॥

રહિતં રજસા નિત્યં વ્યતિરિક્તં ગુણૈસ્ત્રિભિઃ ।
સર્વરૂપવિહીનં વૈ કર્તૃત્વાદિવિવર્જિતમ્ ॥ ૧,૯૧.૬॥

વાસનારહિતં શુદ્ધં સર્વદોષવિવર્જિતમ્ ।
પિપાસાવર્જિતં તત્તચ્છો કમોહવિવર્જિતમ્ ॥ ૧,૯૧.૭॥

જરામરણહીનં વૈ કૂટસ્થં મોહવર્જિતમ્ ।
ઉત્પત્તિરહિતં ચૈવ પ્રલયેન વિવર્જિતમ્ ॥ ૧,૯૧.૮॥

સત્યં સર્વાચારહીનં નિષ્કલં પરમેશ્વરમ્ ।
જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિવર્જિતં નામવર્જિતમ્ ॥ ૧,૯૧.૯॥

અધ્યક્ષં જાગ્રદાદીનાં શાન્તરૂપં સુરેશ્વરમ્ ।
જાગ્રદાદિસ્થિતં નિત્યં કાર્યકારણવર્જિતમ્ ॥ ૧,૯૧.૧૦॥

સર્વદૃષ્ટં તથા મૂર્તં સૂક્ષ્મં સૂક્ષ્મતરં પરમ્ ।
જ્ઞાનદૃક્શ્રોત્રવિજ્ઞાનં પરમાનન્દરૂપકમ્ ॥ ૧,૯૧.૧૧॥

વિશ્વેન રહિતં તદ્વત્તૈજસેન વિવર્જિતમ્ ।
પ્રાજ્ઞેન રહિતઞ્ચૈવ તુરીયં પરમાક્ષરમ્ ॥ ૧,૯૧.૧૨॥

સર્વગોમૃ સર્વહન્તૃ સર્વભૂતાત્મરૂપિ ચ ।
બુદ્ધિધર્મવિહીનં વૈ નિરાધારં શિવં હરિમ્ ॥ ૧,૯૧.૧૩॥

વિક્રિયારહિતં ચૈવ વેદાન્તૈર્વેદ્યમેવ ચ ।
વેદરૂપં પરં ભૂતમિન્દ્રિયેભ્યઃ પરં શુભમ્ ॥ ૧,૯૧.૧૪॥

શબ્દેન વર્જિતઞ્ચૈવ રસેન ચ વિવર્જિતમ્ ।
સ્પર્શેન રહિતં દેવં રૂપમાત્રવિવર્જિતમ્ ॥ ૧,૯૧.૧૫॥

રૂપેણ રહિતં ઞ્ચૈવ ગન્ધેન પરિવર્જિતમ્ ।
અનાદિ બ્રહ્મ રન્ધ્રાન્તમહં બ્રહ્માસ્મિ કેવલમ્ ॥ ૧,૯૧.૧૬॥

એવં જ્ઞાત્વા મહાદેવધ્યાનં કુર્યાજ્જિતેન્દ્રિયઃ ।
ધ્યાનં યઃ કુરુતે હ્યેવં સ ભવેદ્બ્રહ્મ માનવઃ ॥ ૧,૯૧.૧૭॥

ઇતિ ધ્યાનં સમાખ્યાતમશ્વિરસ્ય મયા તવ ।
અધુના કથયામ્યન્યત્કિન્તદ્બ્રૂહિ વૃષધ્વજ ॥ ૧,૯૧.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પ્રથમાંશાખ્યે આચારકાણ્ડે
હરિધ્યાનં નામૈકનવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૨
રુદ્રૌવાચ ।
વિષ્ણોર્ધ્યાનં પુનર્બ્રૂહિ શઙ્ખચક્રગદાધર ।
યેન વિજ્ઞાતમાત્રેણ કૃતકૃત્યો ભવેન્નરઃ ॥ ૧,૯૨.૧॥

હરિરુવાચ ।
પ્રવક્ષ્યામિ હરેર્ધ્યાનં માયાતન્ત્રવિમર્દકમ્ ।
મૂર્તામૂર્તાદિભેદેન તદ્ધ્યાનં દ્વિવિધં હર ॥ ૧,૯૨.૨॥

અમૂર્તં રુદ્ર કથિતં હન્ત મૂત્ત બ્રવીમ્યહમ્ ।
સૂર્યકોટિપ્રતીકાશો જિષ્ણુર્ભાજિષ્ણુરેકતઃ ॥ ૧,૯૨.૩॥

કુન્દગોક્ષીરધવલો હરિર્ધ્યેયો મુમુક્ષુભિઃ ।
વિશાલેન સુસૌમ્યેન શઙ્ખેન ચ સમન્વિતઃ ॥ ૧,૯૨.૪॥

સહસ્રાદિત્યતુલ્યેન જ્વાલામાલોગ્રરૂપિણા ।
ચક્રેણ ચાન્વિતઃ શાન્તો ગદાહસ્તઃ શુભાનનઃ ॥ ૧,૯૨.૫॥

કિરીટેન મહાર્હેણ રત્નપ્રજ્વલિતેન ચ ।
સાયુધઃ સર્વગો દેવઃ સરોરુહધરસ્તથા ॥ ૧,૯૨.૬॥

વનમાલાધરઃ શુભ્રઃ સમાંસો હેમભૂષણઃ ।
સુવસ્ત્રઃ શુદ્ધદેહશ્ચ સુકર્ણઃ પદ્મસંસ્થિતઃ ॥ ૧,૯૨.૭॥

હિરણ્મયશરીરશ્ચ ચારુહારી શુભાઙ્ગદઃ ।
કેયૂરેણ સમાયુક્તો વનમાલાસમન્વિતઃ ॥ ૧,૯૨.૮॥

શ્રીવત્સકૌસ્તુભયુતો લક્ષ્મીવન્દ્યેક્ષણાન્વિતઃ ।
અમિમાદિગુણૈર્યુક્તઃ સૃષ્ટિસંહારકારકઃ ॥ ૧,૯૨.૯॥

મુનિધ્યેયોઽસુરધ્યેયો દેવધ્યેયોઽતિસુન્દરઃ ।
બ્રહ્માદિસ્તમ્બપર્યન્તભૂતજાતહૃદિસ્થિતઃ ॥ ૧,૯૨.૧૦॥

સનાતનોઽવ્યયો મેધ્યઃ સર્વાનુગ્રહકૃત્પ્રભુઃ ।

નારાયણો મહાદેવઃ સ્ફુરન્મકરકુણ્ડલઃ ॥ ૧,૯૨.૧૧॥

સન્તાપનાશનોઽભ્યર્ચ્યો મઙ્ગલ્યો દુષ્ટનાશનઃ ।
સર્વાત્મા સર્વરૂપશ્ચ સર્વગો ગ્રહનાશનઃ ॥ ૧,૯૨.૧૨॥

ચાર્વઙ્ગુલીયસંયુક્તઃ સુદીપ્તનખ એવ ચ ।
શરણ્યઃ લસુખકારી ચ સૌમ્યરૂપો મહેશ્વરઃ ॥ ૧,૯૨.૧૩॥

સર્વાલઙ્કારસંયુક્તશ્ચારુચન્દનચર્ચિતઃ ।
સર્વદેવસમાયુક્તઃ સર્વદેવપ્રિયઙ્કરઃ ॥ ૧,૯૨.૧૪॥

સર્વલોકહિતૈષી ચ સર્વેશઃ સર્વભાવનઃ ।
આદિત્યમણ્ડલે સંસ્થો અગ્નિસ્થો વારિસંસ્થિતઃ ॥ ૧,૯૨.૧૫॥

વાસુદેવો જગદ્ધાતા ધ્યેયો વિષ્ણુર્મુમુક્ષુભિઃ ।
વાસુદેવોઽહમસ્મીતિ આત્મા ધ્યેયો હરિહરિઃ ॥ ૧,૯૨.૧૬॥

ધ્યાયન્ત્યેવં ચ યે વિષ્ણું તે યાન્તિ પરમાં ગતિમ્ ।
યાજ્ઞવલ્ક્યઃ પુરા હ્યેવં ધ્યાત્વા વિષ્ણું સુરેશ્વરમ્ ॥ ૧,૯૨.૧૭॥

ધર્મોપદેશકર્તૃત્વં સમ્પ્રાપ્યાગાત્પરં પદમ્ ।
તસ્માત્ત્વમપિ દેવેશ ! વિષ્ણું ચિન્તય શઙ્કર ! ॥ ૧,૯૨.૧૮॥

વિષ્ણુધ્યાનં પઠેદ્યસ્તુ પ્રાપ્નોતિ પરમાં ગતિમ્ ॥ ૧,૯૨.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુધ્યાનં નામ દ્વિનવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૩

મહેશ્વર ઉવાચ ।
યાજ્ઞવલ્ક્યેન યત્પૂર્વં ધર્મં પ્રોક્તં કથં હરે ! ।
તન્મે કાથય કેશિઘ્ન ! યથા તત્ત્વેન માધવ ! ॥ ૧,૯૩.૧॥

હરિરુવાચ ।
યાજ્ઞવલ્ક્યં નમસ્કૃત્ય મિથિલાયાં સમાસ્થિતમ્ ।
અપૃચ્છન્નૃષયો ગત્વા વર્ણધર્માદ્યશેષતઃ ।
તેભ્યઃ સ કથયામાસ વિષ્ણું ધ્યાત્વા જિતેન્દ્રિયઃ ॥ ૧,૯૩.૨॥

યાજ્ઞવલ્ક્ય ઉવાચ ।

યસ્મિન્દેશે મૃગઃ કૃષ્ણસ્તસ્મિન્ધર્માન્નિબોધત ।
પુરાણન્યાયમીમાંસાધર્મશાસ્ત્રાઙ્ગમિશ્રિતાઃ ॥ ૧,૯૩.૩॥

વેદાઃ સ્થાનાનિ વિદ્યાનાં ધર્મસ્ય ચ ચતુર્દશ ।
વક્તારો ધર્મશાસ્ત્રાણાં મનુર્વિષ્ણુર્યમોઽઙ્ગિરાઃ ॥ ૧,૯૩.૪॥

વસિષ્ઠદક્ષસંવર્તશાતાતપપરાશરાઃ ।
આપસ્તમ્બોશનોવ્યાસાઃ કાત્યાયનબૃહસ્પતી ॥ ૧,૯૩.૫॥

ગૌતમઃ શઙ્ખલિખિતો હારીતોઽત્રિરહં તથા ।
એતે વિષ્ણું સમારાધ્ય જાતા ધર્મોપદેશકાઃ ॥ ૧,૯૩.૬॥

દેશકાલ ઉપાયેન દ્રવ્યં શ્રદ્ધાસમન્વિતમ્ ।
પાત્રે પ્રદીયતે યત્તત્સકલં ધર્મલક્ષણમ્ ॥ ૧,૯૩.૭॥

ઇજ્યાચારો દમોઽહિંસા દાનં સ્વાધ્યાયકર્મ ચ ।
અયં ચ પરમો ધર્મો યદ્યોગેનાત્મદર્શનમ્ ॥ ૧,૯૩.૮॥

ચત્વારો વેદધર્મજ્ઞાઃ પર્ષત્ત્રૈવિદ્યમેવ વા ।
સા બ્રૂતે યત્સ્વધર્મઃ સ્યાદેકો વાધ્યાત્મવિત્તમઃ ॥ ૧,૯૩.૯॥

બ્રહ્મક્ષાત્રિયવિટ્શૂદ્રા વર્ણાસ્ત્વાદ્યાસ્ત્રયો દ્વિજાઃ ।
નિષેકાદ્યાઃ શ્મશાનાન્તાસ્તેષાં વૈ મન્ત્રતઃ ક્રિયાઃ ॥ ૧,૯૩.૧૦॥

ગર્ભાધાનમૃતૌ પુંસઃ સવનં સ્પન્દનાત્પુરા ।
ષષ્ઠેઽષ્ટમે વા સીમન્તઃ પ્રસવે જાતકર્મ ચ ॥ ૧,૯૩.૧૧॥

અહન્યેકાદશે નામ ચતુર્થે માસિ નિષ્ક્રમઃ ।
ષષ્ઠેઽન્નપ્રાશનં માસિ ચૂડાં કુર્યાદ્યથાકુલમ્ ॥ ૧,૯૩.૧૨॥

એવમેનઃ શમં યાતિ બીજગર્ભસમુદ્ભવમ્ ।
તૂષ્ણ ઈમેતાઃ ક્રિયાઃ સ્ત્રીણાં વિવાહશ્ચ સમન્ત્રકઃ ॥ ૧,૯૩.૧૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તવર્ણધર્મનિરૂપણં નામ ત્રિનવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૪
યાજ્ઞવલ્ક્ય ઉવાચ ।
ગર્ભાષ્ટમેઽષ્ટમે વાબ્દે બ્રાહ્મણસ્યોપનાયનમ્ ।

રજ્ઞામેકાદશે સૈકે વિશામેકે યથાકુલમ્ ॥ ૧,૯૪.૧॥

ઉપનીય કુરુઃ શિષ્યં મહાવ્યાહૃતિપૂર્વકમ્ ।
વેદમધ્યાપયેદેનં શૌચાચારાંશ્ચ શિક્ષયેત્ ॥ ૧,૯૪.૨॥

દિવા સન્ધ્યાસુ કર્ણસ્થબ્રહ્મસૂત્ર ઉદઙ્મુખઃ ।
કુર્યાન્મૂત્રપુરીષે તુ રાત્રૌ ચેદ્દક્ષિણામુખઃ ॥ ૧,૯૪.૩॥

ગૃહીતશિશ્નશ્ચોત્થાય મૃદ્ભિરભ્યુદ્ધૃતૈર્જલૈઃ ।
ગન્ધલેપક્ષયકરં શૌચં કુર્યાન્મહાવ્રતઃ ॥ ૧,૯૪.૪॥

અન્તર્જાનુઃ શુચૌ દેશ ઉપવિષ્ટ ઉદઙ્મુખઃ ।
પ્રાગ્વા બ્રાહ્મેણ તીર્થેન દ્વિજો નિત્યમુપસ્પૃશેત્ ॥ ૧,૯૪.૫॥

કનિષ્ઠાદેશિન્યઙ્ગુષ્ઠમૂલાન્યગ્રં કરસ્ય ચ ।
પ્રજાપતિપિતૃબ્રહ્મદેવતીર્થાન્યનુક્રમાત્ ॥ ૧,૯૪.૬॥

ત્રિઃ પ્રાશ્યાપો દ્વિરુન્મૃજ્ય ખાન્યાદ્ભિઃ સમુપસ્પૃશેત્ ।
અદ્ભિસ્તુ પ્રકૃતિસ્થાભિર્હેનાભિઃ ફેનબુહુદૈઃ ॥ ૧,૯૪.૭॥

હૃત્કણ્ઠતાલુગાભિસ્તુ યથાસંખ્યં દ્વિજાતયઃ ।
શુધ્યેરંસ્ત્રી ચ શૂદ્રશ્ચ સકૃત્સ્પૃષ્ટાભિરન્તતઃ ॥ ૧,૯૪.૮॥

સ્નાનમબ્દૈવતૈર્મન્ત્રૈર્માર્જનં પ્રાણસંયમઃ ।
સૂર્યસ્ય ચાપ્યુપસ્થાનં ગાયત્ર્યાઃ પ્રત્યયં જપઃ ॥ ૧,૯૪.૯॥

ગાયત્રીં શિરસા સાર્ધં જપેદ્વ્યાહૃતિપૂર્વિકામ્ ।
પ્રતિપ્રણવસંયુક્તાં ત્રિરયં પ્રાણસંયમઃ ॥ ૧,૯૪.૧૦॥

પ્રાણાનાયમ્ય સમ્પ્રોક્ષ્ય ત્ર્યૃચેનાબ્દૈવતેન તુ ।
જપન્નાસીત સાવિત્રીં પ્રત્યગાતારકોદયાત્ ॥ ૧,૯૪.૧૧॥

સન્ધ્યાં પ્રાક્પ્રાતરેવં હિ તિષ્ઠેદાસૂર્યદર્શનાત્ ।
અગ્નિકાર્યં તતઃ કુર્યાત્સન્ધ્યયોરુભયોરપિ ॥ ૧,૯૪.૧૨॥

તતોઽભિવાદયેદ્વૃદ્ધાનસાવહમિતિ બ્રુવન્ ।
ગુરું ચૈવાપ્યુપાસીત સ્વાધ્યાયાર્થં સમાહિતઃ ॥ ૧,૯૪.૧૩॥

સાહૂતશ્ચાપ્યધીયીત સર્વં ચાસ્મૈ નિવેદયેત્ ।
હિતં તસ્યાચરેન્નિત્યં મનોવાક્કાયકર્મભિઃ ॥ ૧,૯૪.૧૪॥

દણ્ડાજિનોપવીતાનિ મેખલાં ચૈવ ધારયેત્ ।
બ્રાહ્મણેષુ ચરેદ્ભૈક્ષમનિન્દ્યેષ્વાત્મવૃત્તયે ॥ ૧,૯૪.૧૫॥

આદિમધ્યાવસાનેષુ ભવેચ્છન્દોપલક્ષિતા ।
બ્રાહ્મણક્ષત્રિયવિશાં ભૈક્ષચર્યા યથાક્રમમ્ ॥ ૧,૯૪.૧૬॥

કૃતાગ્નિકાર્યો ભુઞ્જીત વિનીતો ગુર્વનુજ્ઞાયા ।
આપોશાનક્રિયાપૂર્વં સત્કૃત્યાન્નમકુત્સયન્ ॥ ૧,૯૪.૧૭॥

બ્રહ્મચાર્યાસ્થિતો નૈકમન્નમદ્યાદનાપદિ ।
બ્રાહ્મણઃ કામમશ્રીયાચ્છ્રાદ્ધે વ્રતમપડિયન્ ॥ ૧,૯૪.૧૮॥

મધુ માંસં તથા સ્વિન્નમિત્યાદિ પરિવર્જયેત્ ।
સ ગુરુર્યઃ ક્રિયાઃ કૃત્વા વેદમસ્મૈ પ્રયચ્છતિ ॥ ૧,૯૪.૧૯॥

ઉપનીય દદાત્યેનામાચાર્યઃ સ પ્રકીર્તિતઃ ।
એકદેશમુપાધ્યાય ઋત્વિગ્યજ્ઞકૃદુચ્યતે ॥ ૧,૯૪.૨૦॥

એતે માન્યા યથાપૂર્વમેભ્યો માતા ગરીયસી ।
પ્રતિવેદં બ્રહ્મચર્યં દ્વાદશાબ્દાનિ પઞ્ચ વા ॥ ૧,૯૪.૨૧॥

ગ્રહણાન્તિકમિત્યેકે કેશાન્તશ્ચૈવ ષોડશે ।
આષોડશાડદ્વાવિંશાચ્ચાચતુર્વિંશાચ્ચ વત્સરાત્ ॥ ૧,૯૪.૨૨॥

બ્રહ્મક્ષત્રવિશાં કાલ ઔપનાયનિકઃ પરઃ ।
અત ઊર્ધ્વં પતન્ત્યેતે સર્વધર્મવિવર્જિતાઃ ॥ ૧,૯૪.૨૩॥

સાવિત્રીપતિતા વ્રાત્યા વ્રાત્યસ્તોમાદૃતે ક્રતોઃ ।
માતુર્યદગ્રે જાયન્તે દ્વિતીયં મૌઞ્જબન્ધનમ્ ॥ ૧,૯૪.૨૪॥

બ્રાહ્મણક્ષત્રિય વિશસ્તસ્માદેતે દ્વિજાતયઃ ।
યજ્ઞાનાં તપસાં ચૈવ શુભાનાં ચૈવ કર્મણામ્ ॥ ૧,૯૪.૨૫॥

વેદ એવ દ્વિજાતીનાં નિઃ શ્રેયસકરઃ પરઃ ।
મધુના પયસા ચૈવ સ દેવાંસ્તર્પયેદ્દ્વિજઃ ॥ ૧,૯૪.૨૬॥

પિતૄન્મધુઘૃતાભ્યાં ચ ઋચોઽધીતે હિ સોઽન્વહમ્ ।
યજુઃ સામ પઠેત્તદ્વદથર્વાઙ્ગિરસં દ્વિજઃ ॥ ૧,૯૪.૨૭॥

સન્તર્પયેત્પિતૄન્દેવાન્સોઽન્વહં હિ ઘૃતામૃતૈઃ ।
વાકોવાક્યં પુરાણં ચ નારાશંસીશ્ચ ગાથિકાઃ ॥ ૧,૯૪.૨૮॥

ઇતિહાસાંસ્તથા વિદ્યા યોઽધીતે શક્તિતોઽન્વહમ્ ।
સન્તર્પયેત્પિતૃન્દેવાન્માંસક્ષીરોદનાદિભિઃ ॥ ૧,૯૪.૨૯॥

તે તૃપ્તાસ્તર્પયન્ત્યેનં સર્વકામફલૈઃ શુભૈઃ ।
યંયં ક્રતુમધીતેસૌ તસ્યસ્યાપ્નુયાત્ફલમ્ ॥ ૧,૯૪.૩૦॥

ભૂમિદાનસ્ય તપસઃ સ્વાધ્યાયફલભાગ્દ્વિજઃ ।
નૈષ્ઠિકો બ્રહ્મચારી તુ વસેદાચાર્યસન્નિધૌ ॥ ૧,૯૪.૩૧॥

તદભાવેઽસ્ય તનયે પત્ન્યાં વૈશ્વાનરેઽપિ વા ।
અનેન વિધિના દેહે સાધયેદ્વિજિતેન્દ્રિયઃ ।
બ્રહ્મલોકમવાપ્નોતિ ન ચેહ જાયતે પુનઃ ॥ ૧,૯૪.૩૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તવર્ણધર્મનિરુપણં નામ ચતુર્નવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૫
યાજ્ઞવલ્ક્ય ઉવાચ ।
શ ृણ્વન્તુ મુનયો ધર્માન્ગૃહસ્થસ્ય યતવ્રતાઃ ।
ગુરવે ચ ધનં દત્ત્વા સ્નાત્વા ચ તદનુજ્ઞયા ॥ ૧,૯૫.૧॥

સમાપિતબ્રહ્મચર્યો લક્ષણ્યાં સ્ત્રિયમુદ્વહેત્ ।
અનન્યપૂર્વિકાં કાન્તામસપિણ્ડાં યવીયસીમ્ ॥ ૧,૯૫.૨॥

અરોગિણીં ભ્રાતૃમતીમસમાનાર્ષગોત્રજામ્ ।
પઞ્ચમાત્સપ્તમાદૂર્ધ્વં માતૃતઃ પિતૃતસ્તથા ॥ ૧,૯૫.૩॥

દશપૂરુષવિખ્યાતાચ્છ્રોત્રિયાણાં મહાકુલાત્ ।
સવર્ણઃ શ્રોત્રિયો વિદ્વાન્વરો દોષાન્વિતો ન ચ ॥ ૧,૯૫.૪॥

યદુચ્યતે દ્વિજાતીનાં શૂદ્રાદ્દારોપસંગ્રહઃ ।
ન તન્મમ મતં યસ્માત્તત્રાયં જાયતે સ્વયમ્ ॥ ૧,૯૫.૫॥

તિસ્રો વર્ણાનુપૂર્વ્યેણ દ્વે તથૈકા યથાક્રમમ્ ।
બ્રાહ્મણક્ષત્રિયવિશાં ભાર્યાઃ સ્વા શૂદ્રજન્મનઃ ॥ ૧,૯૫.૬॥

બ્રાહ્મો વિવાહ આહૂય દીયતે શક્ત્યલઙ્કૃતા ।

તજ્જઃ પુનાત્યુભયતઃ પુરુષોનેકવિંશતિમ્ ॥ ૧,૯૫.૭॥

યજ્ઞસ્થાયર્ત્વિજે દૈવમાદાયાર્ષસ્તુ ગોયુગમ્ ।
ચતુર્દશ પ્રથમજઃ પુનાત્યુત્તરજશ્ચ ષટ્ ॥ ૧,૯૫.૮॥

ઇત્યુક્ત્વા ચરતાં ધર્મં સહ યા દીયતેઽર્થિને ।
સ કાયઃ પાવયેત્તજ્જઃ ષડ્વંશ્યાનાત્મના સહ ॥ ૧,૯૫.૯॥

આસુરો દ્રવિણાદાનાદ્ગાન્ધર્વઃ સમયાન્મિથઃ ।
રાક્ષસો યુદ્ધહરણાત્પૈશાચઃ કન્યકાચ્છલાત્ ॥ ૧,૯૫.૧૦॥

ચત્વારો બ્રાહ્મણસ્યાદ્યાસ્તથા ગાન્ધર્વરાક્ષસૌ ।
રાજ્ઞસ્તથાસુરો વૈશ્યે શૂદ્રે ચાન્ત્યસ્તુ ગર્હિતઃ ॥ ૧,૯૫.૧૧॥

પાણિર્ગ્રાહ્યઃ સવર્ણાસુ ગૃહ્ણીત ક્ષત્રિયા શરમ્ ।
વૈશ્યા પ્રતોદમાદદ્યાદ્વેદને ચાગ્રજન્મનઃ ॥ ૧,૯૫.૧૨॥

પિતા પિતામહો ભ્રાતા સકુલ્યો જનની તથા ।
કન્યાપ્રદઃ પૂર્વનાશે પ્રકૃતીસ્થઃ પરઃ પરઃ ॥ ૧,૯૫.૧૩॥

અપ્રયચ્છન્સમાપ્નોતિ ભ્રૂણહત્યામૃતાવૃતૌ ।
એષામભાવે દાતૃણાં કન્યા કુર્યાત્સ્વયંવરમ્ ॥ ૧,૯૫.૧૪॥

સકૃત્પ્રદીયતે કન્યા હરંસ્તાં ચોરદણ્ડભાક્ ।
અદુષ્ટાં હિ ત્યજન્દણ્ડ્યઃ સુદુષ્ટાં તુ પરિત્યજેત્ ॥ ૧,૯૫.૧૫॥

અપુત્રા ગુબપુજ્ઞાતો દેવરઃ પુત્રકાન્યગા ।
સપિણ્ડો વા સમોત્રો વા ઘૃતાભ્યક્ત ઋતાવિયાત્ ॥ ૧,૯૫.૧૬॥

આગર્ભસમ્ભવં ગચ્છેત્પતિતસ્ત્વન્યથા ભવેત્ ।
અનેન વિધિના જાત ક્ષેત્રપસ્ય ભવેત્સુતઃ ॥ ૧,૯૫.૧૭॥

હૃતાધિકારાં મલિનાં પિણ્ડમાત્રોપસેવિનીમ્ ।
પરિભૂતામધઃ શય્યાં વાસયેદ્વ્યભિચારિણીમ્ ॥ ૧,૯૫.૧૮॥

સોમઃ શૌચં દદૌ તાસાં ગન્ધર્વશ્ચ સુભાં ગિરમ્ ।
પાવકઃ સર્વમેધ્યત્વં મેધ્યા વૈ યોષિતો યતઃ ॥ ૧,૯૫.૧૯॥

વ્યભિચારાદૃતૌશુદ્ધિર્ગર્ભેત્યાગં કરોતિ ચ ।
ગર્ભભર્તૃવધે તાસાં તથા મહતિ પાતકે ॥ ૧,૯૫.૨૦॥

સુરાપિ વ્યાધિતા દ્વેષ્ટ્રી વન્ધ્યાર્થઘ્ન્યપ્રિયંવદા ।
અધિવિન્ના ચ ભર્તવ્યા મહદેનોન્યથા ભવેત્ ॥ ૧,૯૫.૨૧॥

યત્રાવિરોધો દમ્પત્યોસ્ત્રિવર્ગસ્તત્ર વર્ધતે ।
મૃતે જીવતિ યા પત્યૌ યા નાન્યમુપગચ્છતિ ॥ ૧,૯૫.૨૨॥

સેહ કીર્તિમવાપ્નોતિ મોદતે ચોમયા સહ ।
શુદ્ધાં ત્યજંસ્તૃતીયાંશં દદ્યાદામરણં સ્ત્રિયાઃ ॥ ૧,૯૫.૨૩॥

સ્ત્રીભિર્ભર્તુર્વચઃ કાર્યમેષ ધર્મઃ પરઃ સ્ત્રિયાઃ ।
ષોડશર્તુનિશાઃ સ્ત્રીણાં તાસુ યુગ્માસુ સંવિશેત્ ॥ ૧,૯૫.૨૪॥

બ્રહ્મચારી ચ પર્વાણ્યાદ્યાશ્તતસ્ત્રસ્તુ વર્જયેત્ ।
એવં ગચ્છં સ્ત્રિયં ક્ષામાં મઘાં મૂલાં ચ વર્જયેત્ ॥ ૧,૯૫.૨૫॥

લક્ષણ્યં જનયેદેવ પુત્રં રોગવિવર્જિતમ્ ।
યથા કામી ભવેદ્વાપિ સ્ત્રીણાં (સ્મ) વલમનુસ્મરન્ ॥ ૧,૯૫.૨૬॥

સ્વદારનિરતશ્ચૈવ સ્ત્રિયો રક્ષ્યા યતસ્તતઃ ।
ભર્તૃભ્રાતૃપિતૃજ્ઞાતિશ્વશ્રૂશ્વશુરદેવરૈઃ ॥ ૧,૯૫.૨૭॥

બન્ધુભિશ્ચ સ્ત્રિયઃ પૂજ્યા ભૂષણાચ્છાદનાશનૈઃ ।
સંયતો પસ્કરા દક્ષા હૃષ્ટા વ્યયપરાઙ્મુખી ॥ ૧,૯૫.૨૮॥

શ્વશ્રૂશ્વશુરયોઃ કુર્યાત્પાદયોર્વન્દનં સદા ।
ક્રીડાશરીરસંસ્કારસમાજોત્સવદશનમ્ ॥ ૧,૯૫.૨૯॥

હાસ્યં પરગૃહે યાનં ત્યજેત્પ્રેષિતભર્તૃકા ।
રક્ષેત્કન્યાં પિતા બાલ્યે યૌવને પતિરેવ તામ્ ॥ ૧,૯૫.૩૦॥

વાર્ધક્યે રક્ષતે પુત્રો હ્યન્યથા જ્ઞાતયસ્તથા ।
પતિં વિના ન તિષ્ઠેત્તુ દિવા વા યદિ વા નિશિ ॥ ૧,૯૫.૩૧॥

જ્યેષ્ઠાં ધર્મવિધૌ કુર્યાન્ન કનિષ્ઠાં કદાચન ।
દાહયેદગ્નિહોત્રેણ સ્ત્રિયં વૃત્તવતીં પતિઃ ॥ ૧,૯૫.૩૨॥

આહરેદ્વિધિવદ્દારાનગ્નિં ચૈવાવિલમ્બિતઃ ।
હિતા ભર્તુર્દિવં ગચ્છેદિહ કીર્તીરવાપ્ય ચ ॥ ૧,૯૫.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તગૃહસ્થધર્મનિર્ણયો નામ પઞ્ચનવતિતમોઽધ્યાયઃ

શ્રાગરુડમહાપુરાણમ્- ૯૬

યાજ્ઞવલ્ક્ય ઉવાચ ।

વક્ષ્યે સઙ્કરજાત્યાદિગૃહસ્થાદિ વિધિં પરમ્ ।
વિપ્રાન્મૂર્ધાવષિક્તો હિ ક્ષાત્રિયાયાં વિશઃ સ્ત્રિયામ્ ॥ ૧,૯૬.૧॥

જાતોઽમ્બષ્ઠસ્તુ શૂદ્રાયાં નિષાદઃ પર્વતોઽપિ વા ।
માહિષ્યઃ ક્ષત્રિયાજ્જાતો વૈશ્યાયાં મ્લેચ્છસંજ્ઞિતઃ ॥ ૧,૯૬.૨॥

શૂદ્રાયાં કરણો વૈશ્યાદ્વિન્નાસ્વેષ વિધિઃ સ્મૃતઃ ।
બ્રાહ્મણ્યાં ક્ષત્રિયાત્સૂતો વૈશ્યાદ્વૈદેહકસ્તથા ॥ ૧,૯૬.૩॥

શૂદ્રાજ્જાતસ્તુ ચાણ્ડાલઃ સર્વવર્ણવિગર્હિતઃ ।
ક્ષત્રિયા માગધં વૈશ્યાચ્છૂદ્રા ક્ષતારમેવ ચ ॥ ૧,૯૬.૪॥

શૂદ્રાદયોગવં વૈશ્યા જનયામાસ વૈ સુતમ્ ।
માહિષ્યેણ કરણ્યાં તુ રથકારઃ પ્રજાયતે ॥ ૧,૯૬.૫॥

અસત્સન્તસ્તુ વૈ જ્ઞેયાઃ પ્રતિલોમાનુલોમજાઃ ।
જાત્યુત્કર્ષાદ્વિજો જ્ઞેયઃ સપ્તમે પઞ્ચમેઽપિ વા ॥ ૧,૯૬.૬॥

વ્યત્યયે કર્મણાં સામ્યં પૂર્વવચ્ચોત્તરાવરમ્ ।
કર્મ સ્માર્તં વિવાહાગ્નૌ કુર્વીત પ્રત્યહં ગૃહી ॥ ૧,૯૬.૭॥

દાયકાલાદૃતે વાપિ શ્રૌતં વૈતાનિકાગ્નિષુ ।
શરીરચિન્તાં નિર્વર્ત્ય કૃતશૌચવિધિર્દ્વિજઃ ॥ ૧,૯૬.૮॥

પ્રાતઃ સન્ધ્યામુપાસીત દન્તધાવનપૂર્વકમ્ ।
હુત્વાગ્નૌ સર્યદેવત્યાઞ્જપેન્મન્ત્રાન્સમાહિતઃ ॥ ૧,૯૬.૯॥

વેદાર્થાનધિગચ્છેચ્ચ શાસ્ત્રાણિ વિવિધાનિ ચ ।
યોગક્ષોમાદિસિદ્ધ્યર્થમુપેયાદીશ્વરં ગૃહી ॥ ૧,૯૬.૧૦॥

સ્નાત્વા દેવાન્પિતૄંશ્ચૈવ તર્પયેદર્ચયેત્તથા ।
વેદાનથ પુરાણાનિ સેતિહાસાનિ શક્તિતઃ ॥ ૧,૯૬.૧૧॥

જપયજ્ઞાનુસિદ્ધ્યર્થં વિદ્યાં ચાધ્યાત્મિકીં જપેત્ ।
બલિકર્મસ્વધાહોમસ્વાધ્યાયાતિથિસત્ક્રિયાઃ ॥ ૧,૯૬.૧૨॥

ભૂતપિત્રમરબ્રહ્મમનુષ્યાણાં મહામખાઃ ।
દેવેભ્યસ્તુ હુતં ચાગ્નૌ ક્ષિપેદ્ભૂતબલિં હરેત્ ॥ ૧,૯૬.૧૩॥

અન્નં ભૂમૌશ્વચાણ્ડાલવાયસેભ્યશ્ચ નિઃ ક્ષિપેત્ ।
અન્નં પિતૃમનુષ્યેભ્યો દેયમપ્યન્વહં જલમ્ ॥ ૧,૯૬.૧૪॥

સ્વાધ્યાયમન્વહં કુર્યાન્ન પચેચ્ચાન્નમાત્મને ।
બાલસ્વવાસિનીવૃદ્ધગર્ભિણ્યાતુરકન્યકાઃ ॥ ૧,૯૬.૧૫॥

સંભોજ્યાતિથિભૃત્યાંશ્ચ દમ્પત્યોઃ શેષભોજનમ્ ।
પ્રાણાગ્નિહોત્રવિધિનાશ્નીયાદન્નમકુત્સયન્ ॥ ૧,૯૬.૧૬॥

મિતં વિપાકં ચ હિતં ભક્ષ્યં બાલાદિપૂર્વકમ્ ।
આપોશાનેનોપરિષ્ટાદધસ્તાચ્ચૈવ ભુજ્યતે ॥ ૧,૯૬.૧૭॥

અનગ્નમમૃતં ચૈવ કાર્યમન્નં દ્વિજન્મના ।
અતિથિભ્યસ્તુ વર્ણેભ્યો દેયં શક્ત્યાનુપૂર્વશઃ ॥ ૧,૯૬.૧૮॥

અપ્રણોદ્યોઽતિથિઃ સાયમપિ નાત્ર વિચારણા ।
સત્કૃત્ય ભિક્ષવે ભિક્ષા દાતવ્યા સુવ્રતાય ચ ॥ ૧,૯૬.૧૯॥

આગતાન્ભોજયેત્સર્વાન્મહોક્ષં શ્રોત્રિયાય ચ ।
પ્રતિસંવત્સરં ત્વર્ચ્યાઃ સ્નાતકાચાર્યપાર્થિવાઃ ॥ ૧,૯૬.૨૦॥

પ્રિયો વિવાહ્યશ્ચ તથા યજ્ઞં પ્રત્યૃત્વિજઃ પુનઃ ।
અધ્વનીનોઽતિથિઃ પ્રોક્તઃ શ્રોત્રિયો વેદપારગઃ ॥ ૧,૯૬.૨૧॥

માન્યાવેતૌ ગૃહસ્થસ્ય બ્રહ્મલોકમભીપ્સતઃ ।
પરપાકરુચિર્ન સ્યાદનિન્દ્યામન્ત્રણાદૃતે ॥ ૧,૯૬.૨૨॥

વાક્પાણિપાદચાપલ્યં વર્જયચ્ચાતિભોજનમ્ ।
શ્રોત્રિયં વાતિથિં તૃપ્તમાસીમાન્તાદનુવ્રજેત્ ॥ ૧,૯૬.૨૩॥

અહઃ શેષં સહાસીત શિષ્ટૈરિષ્ટૈશ્ચ બન્ધુભિઃ ।
ઉપાસ્ય પશ્ચિમાં સન્ધ્યાં હુત્વાગ્નૌ ભોજનં તતઃ ॥ ૧,૯૬.૨૪॥

કુર્યાદ્ભત્યૈઃ સમાયુક્તૈશ્ચિન્તયેદાત્મનો હિતમ્ ।
બ્રાહ્મે મુહૂર્તે ચોત્થાય માન્યો વિપ્રો ધનાદિભિઃ ॥ ૧,૯૬.૨૫॥

વૃદ્ધાર્તાનાં સમાદેયઃ પન્થા વૈ ભારવાહિનામ્ ।
ઇજ્યાધ્યયનદાનાનિ વૈશ્યસ્ય ક્ષત્રિયસ્ય ચ ॥ ૧,૯૬.૨૬॥

પ્રતિગ્રહોઽધિકો વિપ્રે યાજનાધ્યાપને તથા ।
પ્રધાનં ક્ષત્રિયે કર્મ પ્રજાનાં પરિપાલનમ્ ॥ ૧,૯૬.૨૭॥

કુસીદકૃષિવાણિજ્યં પાશુપાલ્યં વિશઃ સ્મૃતમ્ ।
શૂદ્રસ્ય દ્વિજશુશ્રૂષા દ્વિજો યજ્ઞાન્ન હાપયેત્ ॥ ૧,૯૬.૨૮॥

અહિંસા સત્યમસ્તેયં શૌચમિન્દ્રિયસંયમઃ ।
દમઃ ક્ષમાર્જવં દાનં સર્વેષાં ધર્મસાધનમ્ ॥ ૧,૯૬.૨૯॥

આચરેત્સદૃશીં વૃત્તિમજિહ્મામશઠાન્તથા ।
ત્રૈવાર્ષિકા ધિકાન્નો યઃ સ સોમં પાતુમર્હતિ ॥ ૧,૯૬.૩૦॥

સ્યાદન્નં વાર્ષિકં યસ્ય કુર્યાત્પ્રકસૌમિકીં ક્રિયામ્ ।
પ્રતિસંવત્સરં સોમઃ પશુઃ પ્રત્યયનં તથા ॥ ૧,૯૬.૩૧॥

કર્તવ્યાઽગ્રહણેષ્ટિશ્ચ ચાતુર્માસ્યાનિ યત્નતઃ ।
એષામસમ્ભવે કુર્યાદિષ્ટિં વૈશ્વાનરીં દ્વિજઃ ॥ ૧,૯૬.૩૨॥

હીનકલ્પં ન કુર્વીત સતિ દ્રવ્યે ફલપ્રદમ્ ।
ચણ્ડાલો જાયતે યજ્ઞકરણાચ્છૂદ્રભિક્ષિતાત ॥ ૧,૯૬.૩૩॥

યજ્ઞાર્થલબ્ધં નાદદ્યાદ્ભાસઃ કાકોઽપિ વા ભવેત્ ।
કુસૂતકુમ્ભીધાન્યો વા ત્ર્યાહિકઃ શ્વસ્તનોઽપિ વા ॥ ૧,૯૬.૩૪॥

જીવેદ્વાપિ શિલોઞ્છેન શ્રેયાનેષાં પરઃ પરઃ ।
ન સ્વાધ્યાયવિરોધ્યર્થમીહેત ન યતસ્તતઃ ॥ ૧,૯૬.૩૫॥

રાજાન્તેવાસિયાજ્યેભ્યઃ સીદન્નિચ્છેદ્ધનં ક્ષુધા ।
દમ્ભહૈતુકપાષણ્ડિબકવૃત્તીંશ્ચ વર્જયેત્ ॥ ૧,૯૬.૩૬॥

શુક્લામ્બરધરો નીચકેશશ્મશ્રુનખઃ શુચિઃ ।
ન ભાર્યાદર્શનેઽશ્રીયાન્નૈકવાસા ન સંસ્થિતઃ ॥ ૧,૯૬.૩૭॥

અપ્રિયં ન વદેજ્જાતુ બ્રહ્મસૂત્રી વિનીતવાન્ ।
દેવપ્રદક્ષિણાકુર્યાદ્યષ્ટિમાન્સકમણ્ડલુઃ ॥ ૧,૯૬.૩૮॥

ન તુ મેહેન્નદીચ્છાયાભસ્મગોષ્ટામ્બુવર્ત્મસુ ।
ન પ્રત્યગ્ન્યર્કગોસોમસન્ધ્યામ્બુસ્ત્રીદ્વિજન્મનામ્ ॥ ૧,૯૬.૩૯॥

નેક્ષેતાગ્ન્યર્કનગ્નાં સ્ત્રીં ન ચ સંસૃષ્ટમૈથુનામ્ ।

ન ચ મૂત્રં પુરીષં વા સ્વપેત્પ્રત્યકૂશિરા ન ચ ॥ ૧,૯૬.૪૦॥

ષ્ઠીવનાસૃક્ષકૃન્મૂત્રવિષાણ્યપ્સુ ન સંક્ષિપેત્ ।
પાદૌ પ્રતાપયેન્નાગ્નૌ ન ચૈનમભિલઙ્ઘયેત્ ॥ ૧,૯૬.૪૧॥

પિબેન્નાઞ્જલિના તોયં ન શયાનં પ્રબોધયેત્ ।
નાક્ષૈઃ ક્રીજેચ્ચ કિતવૈર્વ્યાધિતૈશ્ચ ન સંવિશેત્ ॥ ૧,૯૬.૪૨॥

વિરુદ્ધં વર્જયેત્કમ પ્રેતધૂમં નદીતરમ્ ।
કેશભસ્મતુષાઙ્ગારકપાલેષુ ચ સંસ્થિતિમ્ ॥ ૧,૯૬.૪૩॥

નાચક્ષીત ધયન્તીં ગાં નાદ્વારેણાવિશેત્કચિત્ ।
ન રાજ્ઞઃ પ્રતિગૃહ્ણાયાલ્લુબ્ધસ્યોચ્છાસ્ત્રવર્તિનઃ ॥ ૧,૯૬.૪૪॥

અધ્યાયાનામુપાકર્મ શ્રાવણ્યાં શ્રવણેન વા ।
હસ્તેનૌષધિભાવે વા પઞ્ચમ્યાં શ્રાવણસ્ય ચ ॥ ૧,૯૬.૪૫॥

પૌષમાસસ્ય રોહિણ્યામષ્ટકાયામથાપિ વા ।
જલાન્તે છન્દસાં કુર્યાદુત્સર્ગં વિધિવદ્બહિઃ ॥ ૧,૯૬.૪૬॥

અનધ્યાયસ્ત્ર્યહં પ્રેતે શિષ્યર્ત્વિગ્ગુરુબન્ધુષુ ।
ઉપાકર્મણિ ચોત્સર્ગે સ્વશાખશ્રોત્રિયે મૃતે ॥ ૧,૯૬.૪૭॥

સન્ધ્યાગર્જિતનિર્ઘાતભૂકમ્પોલ્કાનિપાતને ।
સમાપ્ય વેદં દ્યુનિશમારણ્યકમધીત્ય ચ ॥ ૧,૯૬.૪૮॥

પઞ્ચદશ્યાં ચતુર્દશ્યામષ્ટમ્યાં રાહુસૂતકે ।
ઋતુસન્ધિષુ ભુક્ત્વા વા શ્રાદ્ધિકં પ્રતિગૃહ્ય ચ ॥ ૧,૯૬.૪૯॥

પશુમણ્ડૂકનકુલશ્વાહિમાર્જારસૂકરૈઃ ।
કૃતેઽન્તરે ત્વહોરાત્રં શક્રપાતે તથોચ્છ્રયે ॥ ૧,૯૬.૫૦॥

શ્વક્રોષ્ટુગર્દભોલૂકસામબાણાર્તનિઃ સ્વને ।
અમેધ્યશવશૂદ્રાન્ત્યશ્મશાનપતિતાન્તિકે ॥ ૧,૯૬.૫૧॥

દેશેઽશુચાવાત્મનિ ચ વિદ્યુત્સ્તનિતસમ્પ્લવે ।
ભુક્ત્વાર્દ્રપાણિરમ્ભોઽન્તરર્ધરાત્રેઽતિમારુતે ॥ ૧,૯૬.૫૨॥

દિગ્દાહે પાંસુવર્ષેષુ સન્ધ્યાની હારભીતિષુ ।
ધાવતઃ પૂતિગન્ધે ચ શિષ્ટે ચ ગૃહમાગતે ॥ ૧,૯૬.૫૩॥

ખરોષ્ટ્રયાનહસ્ત્યશ્વનૌવૃક્ષગિરિરોહણે ।
સપ્તત્રિંશદનધ્યાયાનેતાંસ્તાત્કાલિકાન્વિદુઃ ॥ ૧,૯૬.૫૪॥

વેદદિષ્ટં તથાચાર્યં રાજચ્છાયાં પરસ્ત્રિયમ્ ।
નાક્રામેદ્રક્તવિણ્મૂત્રષ્ઠીવનોદ્વર્તનાનિ ચ ॥ ૧,૯૬.૫૫॥

વિપ્રાહિક્ષત્રિયાત્માનો નાવજ્ઞેયાઃ કદાચન ।
દૂરાદુચ્છિષ્ટવિણ્મૂત્રપાદામ્ભાંસિ સમુત્સૃજેત્ ॥ ૧,૯૬.૫૬॥

શ્રુતિસ્મૃત્યુક્તમાચારં કુર્યાન્મર્મણિ ન સ્પૃશેત્ ।
ન નિન્દાતાડને કુર્યાત્સુતં શિષ્યં ચ તાડયેત્ ॥ ૧,૯૬.૫૭॥

આચરેત્સર્વદા ધર્મં તદ્વિરુદ્ધં તુ નાચરેત્ ।
માતાપિત્રતિથીભ્યાઢ્યૈર્વિવાદં નાચરેદ્ગૃહી ॥ ૧,૯૬.૫૮॥

પઞ્ચ પિણ્ડાનનુદ્ધૃત્ય ન સ્નાયાત્પરવારિષુ ।
સ્નાયાન્નદીપ્રસ્ત્રવણદેવખાતહ્રદેષુ ચ ॥ ૧,૯૬.૫૯॥

વર્જયેત્પરશય્યાદિ ન ચાશ્રીયાદનાપદિ ।
કદર્યબદ્ધચો (વૈ) રાણાં તથા ચાનમ્રિકસ્ય ચ ॥ ૧,૯૬.૬૦॥

વૈણાભિશસ્તવાર્ધુષ્યગણિકાગણદીક્ષિણામ્ ।
ચિકિત્સકાતુરક્રુદ્ધક્લીબરઙ્ગોપજીવિનામ્ ॥ ૧,૯૬.૬૧॥

ક્રૂરોગ્રપતિતવ્રાત્યદામ્ભિકોચ્છિષ્ટભોજિનામ્ ।
શાસ્ત્રવિક્રયિણશ્ચૈવ સ્ત્રીજિતગ્રામયાજિનામ્ ॥ ૧,૯૬.૬૨॥

નૃશંસરાજરજકકૃતઘ્નવધજીવિનામ્ ।
પિશુનાનૃતિનોશ્ચૈવ સોમવિક્રયિણસ્તથા ॥ ૧,૯૬.૬૩॥

બન્દિનાં સ્વર્ણકારાણામન્નમેષાં કદાચન ।
ન ભોક્તવ્યં વૃથા માંસં કેશકીટસમન્વિતમ્ ॥ ૧,૯૬.૬૪॥

ભક્તં પર્યુષિતોચ્છિષ્ટં શ્વસ્પૃષ્ટં પતિતો (તે) ક્ષિતમ્ ।
ઉદક્યાસ્પૃષ્ટસંઘુષ્ટમપર્યાપ્તં ચ વર્જયેત્ ॥ ૧,૯૬.૬૫॥

ઘોઘ્રાતં શકુનોચ્છિષ્ટં પાદસ્પૃષ્ટ ચ કામતઃ ।
શૂદ્રેષુ દાસગોપાલકુલમિત્રાર્ધસીરિણઃ ॥ ૧,૯૬.૬૬॥

ભોજ્યાન્નો નાપિતશ્ચૈવ યશ્ચાત્માનં નિવેદયેત્ ।
અન્નં પર્યુષિતં ભોજ્યં સ્નેહાક્તં ચિરસંભૃ (સ્થિ) તમ્ ॥ ૧,૯૬.૬૭॥

અસ્નેહા અપિ ઘોધૂમયવગોરસવિક્રિયાઃ ।
ઔષ્ટ્રમૈકશફં સ્ત્રીણાં પયશ્ચ પરિવર્જયેત્ ॥ ૧,૯૬.૬૮॥

ક્રવ્યાદપક્ષિદાત્યૂહશુકમાંસાનિ વર્જયેત્ ।
સારસૈકશફાન્હંસાન્બલાકબકટિટ્ટિભાન્ ॥ ૧,૯૬.૬૯॥

વૃથા કૃસરસંયાવ પાયસાપૂપશષ્કુલીઃ ।
કુરરં જાલપાદં ચ ખઞ્જરીટમૃગદ્વિજાન્ ॥ ૧,૯૬.૭૦॥

ચાષાન્મત્સ્યાત્રક્તપાદઞ્ચગ્દ્ધ્વા વૈ કામતો નરઃ ।
બલ્લૂરં કામતો જગ્દ્ધ્વા સોપ વાસસ્ત્ર્યહં ભવેત્ ॥ ૧,૯૬.૭૧॥

પલાણ્ડુલશુનાદીનિ જગ્દ્ધ્વા ચાન્દ્રાયણં ચરેત્ ।
શ્રાદ્ધે દેવાન્પિતૃન્પ્રાર્ચ્ય ખાદન્માંસં ન દોષભાક્ ॥ ૧,૯૬.૭૨॥

વસેત્સ નરકે ઘોર દિનાનિ પશુરોમતઃ ।
સમિતાનિ દુરાચારો યો હન્ત્યવિધિના પશૂન્ ।
માંસં સન્ત્યજ્ય સમ્પ્રાર્થ્ય કામાન્યાતિ તતો હરિમ્ ॥ ૧,૯૬.૭૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તશ્રાદ્ધનિરૂપણં નામ ષણ્ણવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૭
યાજ્ઞવલ્ક્ય ઉવાચ ।
દ્રવ્યશુદ્ધિંપ્રવક્ષ્યામિ તન્નિબોધત સત્તમાઃ ।
સૌવર્ણરાજતાબ્જાનાં શઙ્ખરજ્જ્વાદિચર્મણામ્ ॥ ૧,૯૭.૧॥

પાત્રાણાં ચાસનાનાં ચ વારિણા શુદ્ધિરિષ્યતે ।
ઉષ્ણવાભઃ સ્રુક્સ્રુવયોર્ધાન્યાદેઃ પ્રોક્ષણેન ચ ॥ ૧,૯૭.૨॥

તક્ષણાદ્દારુશ ૃઙ્ગાદેર્યજ્ઞપાત્રસ્ય માર્જનાત્ ।
સોષ્ણૈરુદકગોમૂત્રૈઃ શુધ્યત્યાવિકકૌશિકમ્ ॥ ૧,૯૭.૩॥

ભૈક્ષ્યં યોષિન્મુખં પશ્યન્પુનઃ પાકાન્મહીમયમ્ ।
ગાઘ્રાતેઽન્ને તથા કેશમક્ષિકાકીટદૂષિતે ॥ ૧,૯૭.૪॥

ભસ્મક્ષેપાદ્વિશુદ્ધિઃ સ્યાદ્ભૂશુદ્ધિર્માજનાદિના ।

ત્રપુસીસકતામ્રાણાં ક્ષારામ્લોદકવારિભિઃ ॥ ૧,૯૭.૫॥

ભસ્માદ્ભિર્લોહકાંસ્યાનામજ્ઞાતં ચ સદા શુચિ ।
અમેધ્યાક્તસ્ય મૃત્તોયૈર્ગન્ધલેપાપકર્ષણાત્ ॥ ૧,૯૭.૬॥

શુચિ ગોતૃપ્તિદં તોયં પ્રકૃતિસ્થં મહીગતમ્ ।
તથા માંસં શ્વચાણ્ડાલક્રવ્યાદાદિનિપાતિતમ્ ॥ ૧,૯૭.૭॥

રશ્મિરગ્ની રજશ્છાયા ગૌરશ્વો વસુધાનિલાઃ ।
અશ્વાજવિપ્રુષો મેધ્યા સ્તથાચમનબિન્દવઃ ॥ ૧,૯૭.૮॥

સ્નાત્વા પીત્વા ક્ષુતે સુપ્તે ભુક્ત્વા રથ્યાપ્રસર્પણે ।
આચાન્તઃ પુનરાચામેદ્વાસોઽન્યત્પરિધાય ચ ॥ ૧,૯૭.૯॥

ક્ષુતે નિષ્ઠીવિતે સ્વાપે પરિધાનેઽશ્રુપાતને ।
પઞ્ચસ્વેતેષુ નાચામેદ્દક્ષિણં શ્રવણં સ્પૃશેત્ ।
તિષ્ઠન્ત્યગ્ન્યાદયો દેવા વિપ્રકર્ણે તુ દક્ષિણે ॥ ૧,૯૭.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તદ્રવ્યશુદ્ધિનિરૂપણં નામ સપ્તનવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૮
યાજ્ઞવલ્ક્ય ઉવાચ ।
અથ દાનિવિધિં વક્ષ્યે તન્મે શૃણુત સુવ્રતાઃ ।
અન્યેભ્યો બ્રાહ્મણાઃ શ્રેષ્ઠાસ્તેભ્યશ્ચૈવ ક્રિયાપરાઃ ॥ ૧,૯૮.૧॥

બ્રહ્મવેત્તા ચ તેભ્યોઽપિ પાત્રં વિદ્યાત્તપોઽન્વિતાઃ (તમ્) ।
ગોભૂધાન્યહિરણ્યાદિ પાત્રે દાતવ્યમર્ચિતમ્ ॥ ૧,૯૮.૨॥

વિદ્યાતપોભ્યાં હીનેન ન તુ ગ્રાહ્યઃ પ્રતિગ્રહઃ ।
ગૃહ્ણન્પ્રદાતારમધો નયત્યાત્માનમેવ ચ ॥ ૧,૯૮.૩॥

દાતવ્યં પ્રત્યહં પાત્રે નિમિત્તેષુ વિશેષતઃ ।
યાચિતેનાપિ દાતવ્યં શ્રદ્ધાપૂતં તુ શક્તિતઃ ॥ ૧,૯૮.૪॥

હેમશૃઙ્ગી શફૈઃ રૌપ્યૈઃ શુશીલા વસ્ત્રસંયુતા ।
સકાંસ્યાપાત્રા દાતવ્ય ક્ષીરિણી ગૌઃ સદક્ષિણા ॥ ૧,૯૮.૫॥

દશસૌવર્ણિકં શૃઙ્ગં શફં સપ્તપલૈઃ કૃતમ્ ।

પઞ્ચાશત્પલિકં પાત્રં કાંસ્યં વત્સસ્ય કીર્ત્યતે ॥ ૧,૯૮.૬॥

સ્વર્ણપિપ્પલપાત્રેણ વત્સો વા વત્સિકાપિ વા ।
અસ્યા અપિ ચ દાતવ્યમપત્યં રોગવર્જિતમ્ ॥ ૧,૯૮.૭॥

દાતા સ્વર્ગમવાપ્નોતિ વત્સરાન્રોમસમિતાન્ ।
કપિલા ચેતારયેત્ભૂયશ્ચાસપ્તમં કુલમ્ ॥ ૧,૯૮.૮॥

યાવદ્વત્સસ્ય દ્વૌ પાદૌ મુખં યોન્યાં પ્રદૃશ્યતે ।
તાવદ્ગૌઃ પૃથિવી જ્ઞેયા યાવદ્ગર્ભં ન મુઞ્ચતિ ॥ ૧,૯૮.૯॥

યથા કથઞ્ચિદ્દત્ત્વા ગાન્ધેનું વાધેનુમેવ વા ।
અરોગામપરિક્લિષ્ટાં દાતા સ્વર્ગે મહીયતે ॥ ૧,૯૮.૧૦॥

શ્રાન્તસંવાહનં રોગિપરિચર્યા સુરાર્ચનમ્ ।
પાદશૌચં દ્વિજોચ્છિષ્ટમાર્જનં ગાપ્રદાનવત્ ॥ ૧,૯૮.૧૧॥

દ્વિજાય યદભીષ્ટં તુ દત્ત્વા સ્વર્ગમવાપ્નુયાત્ ।
ભૂદીપાંશ્ચાન્નવસ્ત્રાણિ સર્પિર્દત્ત્વા વ્રજેચ્છ્રિયમ્ ॥ ૧,૯૮.૧૨॥

ગૃહધાન્યચ્છત્રમાલ્યવૃક્ષયા નઘૃતં જલમ્ ।
શય્યાનુલેપનં દત્ત્વા સ્વર્ગલોકે મહીયતે ॥ ૧,૯૮.૧૩॥

બ્રહ્મદાતા બ્રહ્મલોકં પ્રાપ્નોતિ સુરદુર્લભમ્ ।
વેદાર્થયજ્ઞશાસ્ત્રાણિ ધર્મશાસ્ત્રાણિ ચૈવ હિ ॥ ૧,૯૮.૧૪॥

મૂલ્યેનાપિ લિખિત્વાપિ બ્રહ્મલોકમવાપ્નુયાત્ ।
એતન્મૂલં જગદ્યસ્માદસૃજત્પૂર્વમીશ્વરઃ ॥ ૧,૯૮.૧૫॥

તસ્માત્સર્વપ્રયત્નેન કાર્યો વેદાર્થસંગ્રહઃ ।
ઇતિહાસપુરાણં વા લિખિત્વા યઃ પ્રયચ્છતિ ॥ ૧,૯૮.૧૬॥

બ્રહ્મદાનસમં પુણ્યં પ્રાપ્નોતિ દ્વિગુણોન્નતિમ્ ।
લોકાયતં કુતર્કશ્ચ પ્રાકૃતમ્લેચ્છભાષિતમ્ ॥ ૧,૯૮.૧૭॥

ન શ્રોતવ્યં દ્વિજેનૈતદધો નયતિ તં દ્વિજમ્ ।
સમર્થો યો ન ગૃહ્ણીયાદ્દાતૃલોકાનવાપ્નુયાત્ ॥ ૧,૯૮.૧૮॥

કુશાઃ શાકં પયો ગન્ધાઃ પ્રત્યાખ્યેયા ન વારિ ચ ।
અયચિતાહૃતં ગ્રાહ્યમપિ દુષ્કૃતકર્મણઃ ॥ ૧,૯૮.૧૯॥

અન્યત્ર કુલટાષણ્ઢપતિતેભ્યો દ્વિષસ્તથા ।
દેવાતિથ્યર્ચનકૃતે પિતૃતૃપ્ત્યર્થમેવ ચ ।
સર્વતઃ પ્રતિગૃહ્ણીયાદાત્મતૃપ્ત્યર્થમેવ ચ ॥ ૧,૯૮.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તદાનધર્મનિરૂપણં નામાષ્ટનવતિતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯૯
યાજ્ઞવલ્ક્ય ઉવાચ ।
અથ શ્રાદ્ધવિધિં વક્ષ્યે સર્વપાપપ્રણાશનમ્ ।
અમાવસ્યાષ્ટકાવૃદ્ધિકૃષ્ણપક્ષાયનદ્વયમ્ ॥ ૧,૯૯.૧॥

દ્રવ્યં બ્રાહ્મણસમ્પત્તિર્વિષુવત્સૂર્યસંક્રમઃ ।
વ્યતીપાતો ગજચ્છાયા ગ્રહણં ચન્દ્રસૂર્યયોઃ ॥ ૧,૯૯.૨॥

શ્રાદ્ધં પ્રતિરુચિશ્ચૈવ શ્રાદ્ધકાલાઃ પ્રકીર્તિતાઃ ।
અગ્નિયઃ સર્વદેવેષુ શ્રોત્રિયો વેદવિદ્યુવા ॥ ૧,૯૯.૩॥

વેદાર્થવિજ્જ્યેષ્ઠસામા ત્રિમધુસ્ત્રિસુપર્ણિકઃ ।
સ્વસ્રીય ઋત્વિગજામાતાયજ્યશ્વશુરમાતુલાઃ ॥ ૧,૯૯.૪॥

ત્રિણાચિકેતદૌહિત્રશિષ્યસમ્બન્ધિબાન્ધવાઃ ।
કર્મનિષ્ઠાસ્તપોનિષ્ઠાઃ પઞ્ચાગ્નિબ્રહ્મચારિણઃ ॥ ૧,૯૯.૫॥

પિતૃમાતૃપરાશ્ચૈવ બ્રાહ્મણાઃ શ્રાદ્ધદેવતાઃ ।
રોગી હીનાતિરિક્તાઙ્ગઃ કાણઃ પૌનર્ભવસ્તથા ॥ ૧,૯૯.૬॥

અવકીર્ણ્યાદ યો યે ચ યે ચાચારવિવર્જિતાઃ ।
અવૈષ્ણવાશ્ચ તે સર્વે ન શ્રાદ્ધાર્હાઃ કદાચન ॥ ૧,૯૯.૭॥

નિમન્ત્રયેચ્ચ પૂર્વેદ્યુર્દ્વિજૈર્ભાવ્યં ચ સંયતૈઃ ।
આજાન્તાંશ્ચૈવ પૂર્વાહ્નેહ્યાસનેષૂપવેશયેત્ ॥ ૧,૯૯.૮॥

યુગ્માન્દેવે તથા પિત્ર્યે સ્વપ્રદેશેષુ શક્તિતઃ ।
દ્વૌ દૈવ પ્રાગુદક્પિત્ર્યે ત્રીણ્યેકં ચોભયોઃ પૃથક્ ॥ ૧,૯૯.૯॥

માતામહાનામપ્યેવં તન્ત્રં વા વૈશ્વદેવિકમ્ ।
હસ્તપ્રક્ષાલનં દત્ત્વા વિષ્ટરાર્થે કુશાનપિ ॥ ૧,૯૯.૧૦॥

આવાહ્ય તદનુજ્ઞાતો વિશ્વદેવાસૈત્યૃચા ।
યવૈરન્નં વિકીર્યાથ ભાજને સપવિત્રકે ॥ ૧,૯૯.૧૧॥

શન્નોદેવ્યા પયઃ ક્ષિપ્ત્વા યવોઽસીતિ યવાંસ્તથા ।
યાદિવ્યા ઇતિ મન્ત્રેણ હસ્તેષ્વેવ વિનિઃ ક્ષિપેત્ ॥ ૧,૯૯.૧૨॥

ગન્ધોદકે તથા દીપમાલ્યદામપ્રદીપકમ્ ।
અપસવ્યં તતઃ કૃત્વા પિતૄણામપ્રદક્ષિણમ્ ॥ ૧,૯૯.૧૩॥

દ્વિગુણાંસ્તુ કુશાન્દત્ત્વા ઉશન્તસ્ત્વેત્યૃચા પિતૄન્ ।
આવાહ્ય તદનુ જ્ઞાતો જપેદાયન્તુનસ્તતઃ ॥ ૧,૯૯.૧૪॥

યવાર્થસ્તુ તિલૈઃ કાર્યઃ કુર્યાદર્ઘ્યાદિ પૂર્વવત્ ।
દત્ત્વાર્ઘ્યં સંસ્રવાંસ્તેષાં પાત્રે કૃત્વા વિધાનતઃ ॥ ૧,૯૯.૧૫॥

પિતૃભ્યઃ સ્થાનમસીતિ ન્યુબ્જં પાત્રં કરોત્યધઃ ।
અગ્નૌ કરિષ્ય આદાય પૃચ્છત્યન્નં ઘૃપ્લુતમ્ ॥ ૧,૯૯.૧૬॥

કુરુષ્વેતિ તથોક્તોસૌ હુત્વાગ્નૌ પિતૃયજ્ઞવત્ ।
હુતશેષં પ્રદદ્યાચ્ચ ભાજનેષુ સમાહિતઃ ॥ ૧,૯૯.૧૭॥

યથાલાભોપપન્નેષુ રૌપ્યેષુ ચ વિશેષતઃ ।
દત્ત્વાન્નં પૃથિવીપાત્રમિતિ પાત્રાભિમન્ત્રણમ્ ॥ ૧,૯૯.૧૮॥

કૃત્વે દંવિષ્ણુરિત્યેવં દ્વિજાઙ્ગુષ્ઠં નિવેશયેત્ ।
સવ્યાહૃતિં ચ ગાયત્રીં મધુવાતેત્યૃચસ્તથા ॥ ૧,૯૯.૧૯॥

જપ્ત્વા યથાસુખં વાચ્યં ભુઞ્જીરંસ્તેઽપિ વાગ્યતાઃ ।
અન્નમિષ્ટં હવિષ્યં ચ દદ્યાદક્રોધનોત્વરઃ ॥ ૧,૯૯.૨૦॥

આતૃપ્તેસ્તુ પવિત્રાણિ જપ્ત્વા પૂર્વજપં તથા ।
અન્નમાદાય તૃપ્તાઃ સ્થઃ શેષં ચૈવાનુમન્ત્ર્ય ચ ॥ ૧,૯૯.૨૧॥

તદન્નં વિકિરેદ્ભૂમૌ દદ્યાચ્ચાપઃ સકૃત્સકૃત્ ।
સર્વમન્નમુપાદાય સતિલં દક્ષિણામુખઃ ॥ ૧,૯૯.૨૨॥

ઉચ્છિષ્ટસન્નિધૌ પિણ્ડાન્પ્રદદ્યાત્પિતૃયજ્ઞવત્ ।
માતામહાનામપ્યેવં દદ્યાદાચમનં તતઃ ॥ ૧,૯૯.૨૩॥

સ્વસ્તિ વાચ્યં તતો દદ્યાદક્ષય્યોદકમેવ ચ ।
દત્ત્વા ચ દક્ષિણાં શક્ત્યા સ્વધાકારમુદાહરેત્ ॥ ૧,૯૯.૨૪॥

વાચ્યતામિન્યનુજ્ઞાતઃ પિતૃભ્યશ્ચ સ્વધોચ્યતામ્ ।
વિપ્રૈરસ્તુ સ્વધેત્યુક્તો ભૂમૌ સિઞ્ચેત્તતો જલમ્ ॥ ૧,૯૯.૨૫॥

પ્રીયન્તામિતિ ચાહૈવં વિશ્વેદેવ્યં જલં દદત્ ।
દાતારો નોઽભિવર્ધન્તાં વેદાઃ સન્તતિરેવ ચ ॥ ૧,૯૯.૨૬॥

શ્રદ્ધા ચ નો મા વ્યગમદ્બહુ દેયં ચ નોઽસ્ત્વિતિ ।
ઇત્યુક્ત્વોક્ત્વા પ્રિયા વાચઃ પ્રણિપત્ય વિસર્જયેત્ ॥ ૧,૯૯.૨૭॥

વાજેવાજે ઇતિ પ્રીત્યા પિતૃપૂર્વં વિસર્જનમ્ ।
યસ્મિંસ્તે સંસ્રવાઃ પૂર્વમર્ઘ્યપાત્રે નિપાતિતાઃ ॥ ૧,૯૯.૨૮॥

પિતૃપાત્રં તદુત્તાનં કૃત્વા વિપ્રાન્વિસર્જયેત્ ।
પ્રદક્ષિણમનુવ્રજ્ય ભુઞ્જીત પિતૃસેવિતમ્ ॥ ૧,૯૯.૨૯॥

બ્રહ્મચારી ભવેત્તાં તુ રજનીં ભાર્યયા મહ ।
એવં પ્રદક્ષિણં કૃત્વા વૃદ્ધૌ નાન્દીમુખાનપિ ॥ ૧,૯૯.૩૦॥

યજેત્તદધિકર્કન્ધૂમિશ્રાઃ પિણ્ડા યૈવઃ શ્રિતાઃ ।
એકોદ્દિષ્ટં દૈવહીનં એકાન્નૈકપવિત્રકમ્ ॥ ૧,૯૯.૩૧॥

આવાહનાગ્નૌકરણરહિતં ત્વપસવ્યવત્ ।
ઉપતિષ્ઠતામિત્યક્ષય્યસ્થાને વિપ્રાન્વિસર્જયેત્ ॥ ૧,૯૯.૩૨॥

અભિરણ્યતાં પ્રબૂયાદ્બ્રૂયુસ્તેભિરતાઃ સ્મ હ ।
ગન્ધો દકતિલૈર્મિશ્રં કુર્યાત્પાત્રચતુષ્ટયમ્ ॥ ૧,૯૯.૩૩॥

અર્ઘ્યાર્થં પિતૃપાત્રેષુ પ્રેતપાત્રં પ્રસેચયેત્ ।
યેસમાના ઇતિ દ્વાભ્યાં શેષં પૂર્વવદાચરેત્ ॥ ૧,૯૯.૩૪॥

એતત્સપિણ્ડીકરણમેકોદ્દિષ્ટં સ્ત્રિયા અપિ ।
અર્વાક્સપિણ્ડીકરણં યસ્ય સંવત્સરાદ્ભવેત્ ॥ ૧,૯૯.૩૫॥

તસ્યાપ્યન્નં સોદકુમ્ભં દદ્યાત્સંવત્સરં દ્વિજઃ ।
પિણ્ડાંશ્ચ ગોજ વિપ્રેભ્યો દદ્યાદ્ગ્નૌ જલેઽપિ વા ॥ ૧,૯૯.૩૬॥

હવિષ્યાન્નેન વૈ માસં પાયસેન તુ વત્સરમ્ ।
માત્સ્યહારિણકૌરભ્રશાકુનચ્છાગપાર્ષતૈઃ ॥ ૧,૯૯.૩૭॥

ઐણરૌરવવા રાહશાશમાંસૈર્યથાક્રમમ્ ।

માસવૃદ્ધ્યાપિ તુષ્યન્તિ દત્તૈરિહ પિતામહાઃ ॥ ૧,૯૯.૩૮॥

દદ્યાદ્વર્ષાત્રયોદશ્યાં મઘાસુ ચ ન સંશયઃ ।
પ્રતિપત્પ્રભૃતિષ્વેવં કન્યા દીર્ઘ્શ્રાદ્ધદો લભેત્ ॥ ૧,૯૯.૩૯॥

શસ્ત્રેણ નિહતાનાં તુ ચતુર્દશ્યાં પ્રદીયતે ।
સ્વર્ગં હ્યપત્યમોજશ્ચ શૌર્યં ક્ષેત્રં બલં તથા ॥ ૧,૯૯.૪૦॥

પુત્રશ્રૈષ્ટ્યં સ સૌભાગ્યં સમૃદ્ધિં મુખ્યતાં શુભમ્ ।
પ્રવૃત્તચક્રતાં ચૈવ વાણિજ્યપ્રભૃતીંસ્તથા ॥ ૧,૯૯.૪૧॥

અરોગિત્વં યશો વીતશોકતાં પરમાં ગતિમ્ ।
ધનં વિદ્યાં ચ વાક્સિદ્ધિં કુપ્યં ગોજાવિકં તથા ॥ ૧,૯૯.૪૨॥

અશ્વાનાયુશ્ચ વિધિવદ્યઃ શ્રાદ્ધં સમ્પ્રયચ્છતિ ।
કૃત્તિકાદિભરણ્યન્તં સ કામાન્પ્રાપ્નુયાદિમાન્ ॥ ૧,૯૯.૪૩॥

વસ્ત્રાદ્યાઃ પ્રીણયન્ત્યેવ નરં શ્રાદ્ધકૃતં દ્વિજાઃ ।
આયુઃ પ્રજા ધનં વિદ્યાં સ્વર્ગમોક્ષસુખાનિ ચ ॥ ૧,૯૯.૪૪॥

પ્રયચ્છતિ યથા રાજ્યં પ્રીત્યા નિત્યં પિતામહઃ ॥ ૧,૯૯.૪૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તશ્રાદ્ધવિધિનિરૂપણં નામ નવનવતિતમોऽધ્યાયઃ

---

શ્રાગરુડમહાપુરાણમ્- ૧૦૦
યાજ્ઞવલ્ક્ય ઉવાચ ।
વિનાયકોપસૃષ્ટસ્ય લક્ષણાનિ નિબોધત ।
સ્વપ્નેऽવગાહતેऽત્યર્થં જલં મુણ્ડાંશ્ચ પશ્યતિ ॥ ૧,૧૦૦.૧॥

વિમના વિફલારમ્ભઃ સંસદિત્યનિમિત્તતઃ ।
રાજા રાજ્યં કુમારી ચ પતિં પુત્રં ચ ગુર્વિણી ॥ ૧,૧૦૦.૨॥

નાપ્નુયાત્સ્નાપનં તસ્ય પુણ્યેऽહ્નિવિધિપૂર્વકમ્ ।
ગૌરસર્ષપકલ્કેન સાજ્યેનોત્સારિતસ્ય તુ ॥ ૧,૧૦૦.૩॥

સર્વૌષધૈઃ સર્વગન્ધૈર્વિલિપ્તશિરસસ્તથા ।
ભદ્રાસનોપવિષ્ટસ્ય સ્વસ્તિ વાચ્યં દ્વિજાઞ્છુભાન્ ॥ ૧,૧૦૦.૪॥

મૃત્તિકાં રોચનાં ગન્ધાન્ગુગ્ગુલું ચાપ્સુ નિઃ ક્ષિપેત્ ।

યા આહૃતા એકવર્ણૈશ્ચતુર્ભિઃ કલશૈર્હ્રદાત્ ॥ ૧,૧૦૦.૫॥

ચર્મણ્યાનુડુહે રક્તે સ્થાપ્યં ભદ્રાસને તથા ।
સહસ્રાક્ષં શતધારમૃષિભિઃ પાવનં સ્મૃતમ્ ॥ ૧,૧૦૦.૬॥

તેન ત્વામભિષિઞ્ચામિ પાવમાન્યઃ પુનન્તુ તે ।
ભગં તુ વરુણો રાજા ભગં સૂર્યો બૃહસ્પતિઃ ॥ ૧,૧૦૦.૭॥

ભગમિન્દ્રશ્ચ વાયુશ્ચ ભગં સપ્તર્ષયો દદુઃ ।
યત્તે કેશેષુ દૌર્ભાગ્યં સીમન્તે યચ્ચ મૂર્ધનિ ॥ ૧,૧૦૦.૮॥

લલાટે કર્ણયોરક્ષ્ણોરાપસ્તદ્ઘ્નન્તુ તે સદા ।
સ્નાતસ્ય સાર્ષપં તૈલં સ્નુવેણૌદુમ્બરેણ તુ ॥ ૧,૧૦૦.૯॥

જુહુયાન્મૂર્ધનિ કુશાન્સવ્યેન પરિગૃહ્ય ચ ।
મિતશ્ચસમિતશ્ચૈવ તથા શાલકટઙ્કટૌ ॥ ૧,૧૦૦.૧૦॥

કુષ્માણ્ડો રાજપુત્રશ્ચ અન્તે સ્વાહાસમન્વિતૈઃ ।
દદ્યાચ્ચતુષ્પથે ભૂમૌ કુશાનાસ્તીર્ય સર્વશઃ ॥ ૧,૧૦૦.૧૧॥

કૃતાકૃતાંસ્તણ્ડુલાંશ્ચ પલલૌદનમેવ ચ ।
પુષ્પં ચિત્રં સુગન્ધં ચ સુરાં ચ ત્રિવિધામપિ ॥ ૧,૧૦૦.૧૨॥

મૂલકં પૂરિકાપૂપં તથૈવૌણ્ડેરકસ્રજઃ ।
દધિ પાયસમન્નં ચ ગુડપિષ્ટં સમોદકમ્ ॥ ૧,૧૦૦.૧૩॥

એતાન્સર્વાનુપાહૃત્ય ભૂમૌ કૃત્વા તતઃ શિરઃ ।
અમ્બિકામુપતિષ્ઠેચ્ચ દદ્યાદર્ઘ્યં કૃતાઞ્જલિઃ ॥ ૧,૧૦૦.૧૪॥

દૂર્વાસર્ષપપુષ્પૈશ્ચ પુત્રજન્મભિરન્તતઃ ।
કૃતસ્વસ્ત્યયનં ચૈવ પ્રાર્થયેદમ્બિકાં સતીમ્ ॥ ૧,૧૦૦.૧૫॥

રૂપં દેહિ યશોદેહિ ભગં ભગવતિ ! દેહિ મે ।
પુત્રાન્દેહિ શ્રિયં દેહિ સર્વાન્કામાંશ્ચ દેહિ મે ॥ ૧,૧૦૦.૧૬॥

બ્રાહ્મણાન્ભોજયેત્પશ્ચાચ્છુક્લવસ્ત્રાનુલેપનૈઃ ।
વસ્ત્રયુગ્મઙ્ગુરોર્દદ્યાસમ્પૂજ્ય ચ ગ્રહાંસ્તથા ।
શ્રેયઃ કર્મફલં વિન્દ્યાત્સૂર્યાર્ચનરતસ્તથા ॥ ૧,૧૦૦.૧૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્લોક્તગણપતિકલ્પનિરૂપણં નામ શતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૦૧

યાજ્ઞવલ્ક્ય ઉવાચ ।

શ્રીકામઃ શાન્તિકામો વા ગ્રહદૃષ્ટ્યભિચારવાન્ ।
ગ્રહયજ્ઞં સમં કુર્યાદ્ગ્રહાશ્ચૈતે બુધૈઃ સ્મૃતાઃ ॥ ૧,૧૦૧.૧॥

સૂર્યઃ સોમો મઙ્ગલશ્ચ બુધશ્ચૈવ બૃહસ્પતિઃ ।
શુક્રઃ શનૈશ્ચરો રાહુઃ કેતુર્ગ્રહગણાઃ સ્મૃતાઃ ॥ ૧,૧૦૧.૨॥

તામ્રકાત્સ્ફાટિકાદ્રક્તચન્દનાત્સ્વર્ણકાદુભૌ ।
રજતાદયસઃ સીસાત્કાંસ્યાદ્વર્ણાન્નિબોધત ॥ ૧,૧૦૧.૩॥

રક્તઃ શુક્લસ્તથા રક્તઃ પીતઃ પીતઃ સિતોસિતઃ ।
કૃષ્ણઃ કૃષ્ણઃ ક્રમાદ્વર્ણા દ્રવ્યાણિ મુનયસ્તતઃ ॥ ૧,૧૦૧.૪॥

સ્થાપયેદ્ગ્રહવર્ણાનિ હોમાર્થં પ્રલિખેત્પટે ।
સ્નાપયેદ્ધોમયેચ્ચૈવ ગ્રહદ્રવ્યૈર્વિધાનતઃ ।
સુવર્ણાનિ પ્રદેયાનિ વાસાંસિ સુસુમાનિ ચ ॥ ૧,૧૦૧.૫॥

ગન્ધાશ્ચ બલયશ્ચૈવ ધૂપો દેયશ્ચગુગ્ગુલુઃ ।
કર્તવ્યાસ્તત્ર મન્ત્રૈશ્ચ ચરવઃ પ્રતિદૈવતમ્ ॥ ૧,૧૦૧.૬॥

આકૃષ્ણેન ઇમન્દેવા અગ્નિર્મૂર્ધાદિવઃ કકુત્ ।
ઉદ્બુધ્યસ્વેતિ જુહુયાદેભિરેવ યથાક્રમમ્ ॥ ૧,૧૦૧.૭॥

બૃહસ્પતેપરિદીયેતિ સર્વે અન્નાત્પરિસુતમ્ ।
શન્નોદેવી કયાનશ્ચ કેતુઙ્કણ્વન્નિતિ ક્રમાત્ ॥ ૧,૧૦૧.૮॥

અર્કઃ પલાશઃ ખદિરસ્ત્વપામાર્ગોઽથ પિપ્પલઃ ।
ઔદુમ્બરઃ શમી દૂર્વા કુશાશ્ચ સમિધઃ ક્રમાત્ ॥ ૧,૧૦૧.૯॥

હોતવ્યા મધુસર્પિર્ભ્યાં દધ્ના ચૈવ સમન્વિતઃ ।
ગુડૌદનં પાયસં ચ હવિષ્યં ક્ષીરષાષ્ટિકમ્ ॥ ૧,૧૦૧.૧૦॥

દધ્યોદનં હવિઃ પૂપાન્માંસં ચિત્રાન્નમેવ ચ ।
દદ્યાદ્ગ્રહક્રમાદેતાન્ગ્રહેભ્યો ભાજનં તતઃ ॥ ૧,૧૦૧.૧૧॥

ધેનુઃ શઙ્ખસ્તથાનડ્વાન્હેમ વાસો હયસ્તથા ।

કૃષ્ણા ગૌરાયસં છાગ એતા વૈ દક્ષિણાઃ ક્રમાત્ ।
ગ્રહાઃ પૂજ્યાઃ સદા યસ્માદ્રજ્યાદિ પ્રાપ્યતે ફલમ્ ॥ ૧,૧૦૧.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તગ્રહશાન્તિનિરુપણં નામૈકોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૨
યાજ્ઞવલ્ક્ય ઉવાચ ।
વાનપ્રસ્થાશ્રમં વક્ષ્યે તચ્છૃણ્વન્તુ મહર્ષયઃ ।
પુત્રેષુ ભાર્યાં નિઃ ક્ષિપ્ય વનં ગચ્છેત્સહૈવ વા ॥ ૧,૧૦૨.૧॥

વાનપ્રસ્થો બ્રહ્મચારી સાગ્નિઃ સોપાસનઃ ક્ષમી ।
અફાલકૃષ્ટેનાગ્નીંશ્ચ પિતૃદેવાતિથીંસ્તથા ॥ ૧,૧૦૨.૨॥

ભૃત્યાંસ્તુ તર્પયેચ્છ્મશ્રુજટાલોમભૃદાત્મવાન્ ।
દાન્તસ્ત્રિષવણસ્નાયી નિવૃત્તશ્ચ પ્રતિગ્રહાત્ ॥ ૧,૧૦૨.૩॥

સ્વાધ્યાયવાન્ધ્યાનશીલઃ સર્વભૂતહિત રતઃ (તિઃ) ।
અહ્નો માસસ્ય મધ્યે વા કુર્યાદ્વાર્થપરિગ્રહમ્ ॥ ૧,૧૦૨.૪॥

કૃતં ત્યજેદાશ્વયુજે યુઞ્જેત્કાલં વ્રતાદિના ।
પક્ષે માસે થવાશ્નીયાદ્દન્તોલૂખલિકો ભવેત્ ॥ ૧,૧૦૨.૫॥

ચાન્દ્રાયણી સ્વપેદ્ભૂમૌ કર્મ કુર્યાત્ફલાદિના ।
ગ્રીષ્મે પઞ્ચાગ્નિમધ્યસ્થો વર્ષાસુ સ્થણ્ડિલેશયઃ ॥ ૧,૧૦૨.૬॥

આર્દ્રવાસાસ્તુ હેમન્તે યોગાભ્યાસાદ્દિનં નયેત્ ।
યઃ કણ્ટકૈર્વિતુદતિ ચન્દનૈર્યશ્ચ લિમ્પતિ ।
અક્રુધ્દઃ પરિતુષ્ટશ્ચ સમસ્તસ્ય ચ તસ્ય ચ ॥ ૧,૧૦૨.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તવાનપ્રસ્થધર્મનિરૂપણં નામ દ્વ્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૩
યાજ્ઞવલ્ક્ય ઉવાચ ।
ભિક્ષોર્ધર્મં પ્રવક્ષ્યામિતં નિબોધત સત્તમાઃ ।
વનાદ્ગૃહાદ્વા કૃત્વેષ્ટિં સર્વવેદસદક્ષિણામ્ ॥ ૧,૧૦૩.૧॥

પ્રાજાપત્યન્તદન્તેઽપિ અગ્નિમારોપ્ય ચાત્મનિ ।
સર્વભૂતહિતઃ શાન્તસ્ત્રિદણ્ડી સકમણ્ડલુઃ ॥ ૧,૧૦૩.૨॥

સર્વારામં પરિવ્રજ્ય ભિક્ષાર્થી ગ્રામમાશ્રયેત્ ।
અપ્રમત્તશ્ચરેદ્ભૈક્ષ્યં સાયાહ્ને નાભિલક્ષિતઃ ॥ ૧,૧૦૩.૩॥

રોહિતે ભિક્ષુકૈર્ગ્રામે યાત્રામાત્ર મલોલુપઃ ।
ભવેત્પરમહંસો વા એકદણ્ડી યમાદિતઃ ॥ ૧,૧૦૩.૪॥

સિદ્ધયોગસ્ત્યજન્દેહમમૃતત્વમિહાપ્નુયાત્ ।
દાતાતિથિપ્રિયો જ્ઞાની ગૃહી શ્રાદ્ધેઽપિમુચ્યતે ॥ ૧,૧૦૩.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તવાનપ્રસ્થસન્ન્યાસધર્મનિરૂપણં નામ ત્ર્યુત્તરશતતમોઽધ્યાયઃ

શ્રાગરુડમહાપુરાણમ્- ૧૦૪
યાજ્ઞવલ્ક્ય ઉવાચ ।
નરકાત્પતાકોદ્ભૂતાત્ક્ષયાત્પાપસ્ય કમણઃ ।
બ્રહ્મહા શ્વા ખરોષ્ટ્રઃ સ્યાદ્ભેકો યકઃ સુરાપ્યપિ ॥ ૧,૧૦૪.૧॥

સ્વર્ણચોરઃ કૃમિઃ કીટઃ તૃણાદિર્ગુરુતલ્પગઃ ।
ક્ષયરોગી શ્યાવદન્તઃ કુનખી શિપિવિષ્ટકઃ ॥ ૧,૧૦૪.૨॥

બ્રહ્મહત્યાક્રમાત્સ્યુશ્ચ તત્સર્વં વા શિશેર્ભવેત્ ।
અન્નહર્તા મયાવી સ્યાન્મૂકો વાગપહારકઃ ॥ ૧,૧૦૪.૩॥

ધાન્યહાર્યતિરિક્તાઙ્ગઃ પિશુનઃ પૂતિનાસિકઃ ।
તૈલાહારી તૈલપાયી પૂતિવક્ત્રસ્તુ સૂચકઃ ॥ ૧,૧૦૪.૪॥

બ્રહ્મસ્વં કન્યકાં ક્રીત્વા વને રક્ષો ભવેદ્ધ્રુષઃ ।
રત્નહૃદ્ધીનજાતઃ સ્યાત્પત્રશાકહરઃ શિખી ॥ ૧,૧૦૪.૫॥

ગુચ્છં ચુચુન્દરી હૃત્વા ધાન્યહૃન્મૂષકો ભવેત્ ।
ફલં કપિઃ પશૂન્હૃત્વા ત્વજા કાકઃ પયસ્તથા ॥ ૧,૧૦૪.૬॥

માંસં ગૃધ્રઃ પટં શ્વિત્રી ચીરી લવણહારકઃ ।
યથાકર્મ ફલં પ્રાપ્ય તિર્યક્ત્વં કાલપર્યયાત્ ॥ ૧,૧૦૪.૭॥

જાયન્તે લક્ષણભ્રષ્ટા દરિદ્રાઃ પુરુષાધમાઃ ।
તતો નિષ્કલુષીભૂતા કુલે મહતિ યોગિનઃ ॥ ૧,૧૦૪.૮॥

જાયન્તે લક્ષણોપેતા ધનધાન્યસમન્વિતાઃ ॥ ૧,૧૦૪.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તકર્મવિપાકનિરૂપણં નામ ચતુરુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૫
વિહિતસ્યાનનુષ્ઠાનાન્નિન્દિતસ્ય ચ સેવનાત્ ।
અનિગ્રહાચ્ચેન્દ્રિયાણાં નરઃ પતનમૃચ્છતિ ॥ ૧,૧૦૫.૧॥

તસ્માદ્યત્નેન કર્તવ્યં પ્રાયશ્ચિત્તં વિશુદ્ધયે ।
એવમસ્યાન્તરાત્મા ચ લોકશ્ચૈવ પ્રસદિતિ ॥ ૧,૧૦૫.૨॥

લોકઃ પ્રસીદેદાત્મૈવં પ્રાયશ્ચિત્તૈરઘક્ષયઃ ।
પ્રાયશ્ચિત્તમકુર્વાણાઃ પશ્ચાત્તાપવિવર્જિતાઃ ॥ ૧,૧૦૫.૩॥

નરકાન્યાન્તિ પાપા વૈ મહારૌરવરૌરવાન્ ।
તામિસ્ત્રં લોહશઙ્કું ચ પૂતિગન્ધસમાકુલમ્ ॥ ૧,૧૦૫.૪॥

હંસાભં લોહિતોદં ચ સઞ્જીવનનદીપથમ્ ।
મહાનિલયકાકોલમન્ધતામિસ્ત્રવાપનમ્ ॥ ૧,૧૦૫.૫॥

અવીચિં કુમ્ભીપાકં ચ યાન્તિ પાપા હ્યપુણ્યતઃ ।
બ્રહ્મહા મદ્યપઃ સ્તેયી સંયોગી ગુરુતલ્પગઃ ॥ ૧,૧૦૫.૬॥

ગુરુનિન્દા વેદનિન્દા બ્રહ્મહત્યાસમે હ્યુભે ।
નિષિદ્ધભક્ષણં જિહ્મક્રિયાચરણમેવ ચ ॥ ૧,૧૦૫.૭॥

રજસ્વલામુખાસ્વાદઃ સુરાપાનસમાનિ તુ ।
અશ્વરત્નાદિહરણં સુવર્ણસ્તેયસમિતમ્ ॥ ૧,૧૦૫.૮॥

સખિભાર્યાકુમારીષુ સ્વયોનિષ્વન્ત્યજાસુ ચ ।
સગોત્રાસુ તથા સ્ત્રીષુ ગુરુતલ્પસમં સ્મૃતમ્ ॥ ૧,૧૦૫.૯॥

પિતુઃ સ્વસારં માતુશ્ચ માતુલાનીં સ્નુષામ પિ ।
માતુઃ સપત્નીં ભગિનીમાચાર્યતનયાં તથા ॥ ૧,૧૦૫.૧૦॥

આચાર્યપત્નીં સ્વસુતાં ગચ્છંસ્તુ ગુરુતલ્પગઃ ।

છિત્ત્વા લિઙ્ગં વધસ્તસ્ય સકામાયાઃ સ્ત્રિયાસ્તથા ॥ ૧,૧૦૫.૧૧॥

ગોવધો વ્રાત્યતાસ્તેયમૃણાનાં ચ પરિક્રિયા ।
અનાહિતાગ્નિતાપણ્યવિક્રયઃ પરિવેદનમ્ ॥ ૧,૧૦૫.૧૨॥

ભૃત્યાચાધ્યયનાદાનં ભૃતકાધ્યા પનન્તથા ।
પારદાર્યં પારિવિત્ત્યં વાર્ધુષ્યં લવણક્રિયા ॥ ૧,૧૦૫.૧૩॥

સચ્છૂદ્રવિટ્ક્ષત્રબન્ધોર્નિન્દિતાર્થોપજીવિતા ।
નાસ્તિક્યં વ્રતલોપશ્ચ શૂલ્યં ગોશ્ચેવ વિક્રયઃ ॥ ૧,૧૦૫.૧૪॥

પિતૃમાતૃસુહૃત્ત્યાગસ્તડાગારામવિક્રયઃ ।
કન્યાયાદૂષણ ચૈવ પરિવિન્દકયાજનમ્ ॥ ૧,૧૦૫.૧૫॥

કન્યાપ્રદાનં તસ્યૈવ કૌટિલ્યં વ્રતલોપનમ્ ।
આત્મનોઽર્થે ક્રિયારમ્ભો મદ્યપસ્ત્રીનિષેવણમ્ ॥ ૧,૧૦૫.૧૬॥

સ્વાધ્યાયાગ્નિસુતત્યાગો બાન્ધવત્યાગ એવ ચ ।
અસચ્છાસ્ત્રાભિગમનં ભાર્યાત્મપરિવિ ક્રયઃ ॥ ૧,૧૦૫.૧૭॥

ઉપપાપાનિ ચોક્તાનિ પ્રાયશ્ચિત્તં નિબોધત ।
શિરઃ કપાલધ્વજવાન્ભિક્ષાશી કર્મ વેદયન્ ॥ ૧,૧૦૫.૧૮॥

બ્રહ્મહા દ્વાદશ સમા મિતભુક્શુદ્ધિમાપ્નુયાત્ ।
લોમભ્યઃ સ્વાહેતિ ચ વા લોમપ્રભૃતિ વૈ તનુમ્ ॥ ૧,૧૦૫.૧૯॥

મજ્જાન્તાં જુહુયાદ્વાપિ સ્વસ્વમન્ત્રૈર્યથાક્રમમ્ ।
શુદ્ધિઃ સ્યાદ્બ્રાહ્મણત્રાણાત્કૃત્વૈવં શુદ્ધિરેવ ચ ॥ ૧,૧૦૫.૨૦॥

નિરાતઙ્કં દ્વિજં ગાં ચ બ્રાહ્મણાર્થે હતોઽપિ વા ।
અરણ્યે નિયતો જપ્ત્વા ત્રિઃ કૃત્વો વેદસંહિતામ્ ॥ ૧,૧૦૫.૨૧॥

સરસ્વતીં વા સંસેવ્યં ધનં પાત્રે સમર્પયેત્ ।
યાગસ્થક્ષત્રવિડ્ઘાત્ચરેદ્બ્રહ્મહણો વ્રતમ્ ॥ ૧,૧૦૫.૨૨॥

ગર્ભહા વા યથાવર્ણં તથાત્રેયીનિષૂ (સૂ) દનમ્ ।
ચરેદ્બ્રતમહત્વાપિ ઘાતનાર્થમુપાગતઃ ॥ ૧,૧૦૫.૨૩॥

દ્વિગુણં સવનસ્થે તુ બ્રાહ્મણે વ્રતમાચરેત્ ।
સુરામ્બુઘૃતગોમૂત્રં પીત્વા શુદ્ધિઃ સુરાપિણઃ ॥ ૧,૧૦૫.૨૪॥

અગ્નિવર્ણં ઘૃતં વાપિ ચીરવાસ જટી ભવેત્ ।
વ્રતં બ્રહ્મહણઃ કુર્યાત્પુનઃ સંસ્કારમર્હતિ ॥ ૧,૧૦૫.૨૫॥

રેતેવિણ્મૂત્રપાનાચ્ચ સુરાપા બ્રાહ્મણી તથા ।
પતિલોકપરિભ્રષ્ટા ગૃધ્રી સ્યાત્સૂકરી શુની ॥ ૧,૧૦૫.૨૬॥

સ્વર્ણહારી દ્વિજો રાજ્ઞે દત્ત્વા તુ મુસલં તથા ।
કર્મણઃ ખ્યાપનં કૃત્વા હતસ્તેન ભવેચ્છુચિઃ ॥ ૧,૧૦૫.૨૭॥

આત્મતુલ્યં સુવર્ણં વા દત્ત્વા શુદ્ધિમિયાદ્દ્વિજઃ ।
શયને સાર્ધમાયસ્યા યોષિતા નિભૃતં સ્વપેત્ ॥ ૧,૧૦૫.૨૮॥

ઉચ્છેદ્ય લિઙ્ગં વૃષણં નૈરૃત્યામુત્સૃજોદ્દિશિ ।
પ્રાજાપત્યં ચરેત્કૃચ્છ્રં સમા વા ગુરુતલ્પગઃ ॥ ૧,૧૦૫.૨૯॥

ચાન્દ્રાયણં વા ત્રીન્માસનભ્યસેદ્વેદસંહિતામ્ ।
પઞ્ચગવ્યં પિબેદ્ગોઘ્નો માસમાસીત સંયતઃ ॥ ૧,૧૦૫.૩૦॥

ગોષ્ઠેશયો ગોઽનુગામી ગોપ્રદાનેન શુધ્યતિ ।
ઉપપાતકશુદ્ધિઃ સ્યાચ્ચાન્દ્રાયણવ્રતેન ચ ॥ ૧,૧૦૫.૩૧॥

પયસા વાપિ માસેન પરાકેણાપિ વા પુનઃ ।
ઋષભૈકં સહસ્રં ગા દદ્યાત્ક્ષત્રવધે પુમાન્ ॥ ૧,૧૦૫.૩૨॥

બ્રહ્મહત્યાવ્રતં વાપિ વત્સરત્રિતયં ચરેત્ ।
વૈશ્યહાબ્દં ચ (બ્દાંશ્ચ) રેદેતદ્દદ્યાદ્વૈકશતં ગવામ્ ॥ ૧,૧૦૫.૩૩॥

ષણ્માસાચ્છૂદ્રહા ચૈતદ્દદ્યાદ્વા ધેનવો દશ ।
અપ્રદુષ્ટાં સ્ત્રિયં હત્વા શૂદ્રહત્યાવ્રતં ચરેત્ ॥ ૧,૧૦૫.૩૪॥

માર્જારગોધાનકુલપશુમણ્ડૂકઘાતનાત્ ।
પિબેત્ક્ષીરં ત્ર્યહં પાપી કૃચ્છ્રં વાપ્યધિકં ચરેત્ ॥ ૧,૧૦૫.૩૫॥

ગજે નીલાન્વૃષાન્પઞ્ચ શુકે વત્સં દ્વિહાયનમ્ ।
ખરાજમેષેષુ વૃષો દેયઃ ક્રૌઞ્ચે ત્રિહાયણઃ ॥ ૧,૧૦૫.૩૬॥

વૃક્ષગુલ્મલતાવીરુચ્છેદને જપ્યમૃક્ષતમ્ ।
અવકીર્ણો ભવેદ્દત્ત્વા બ્રહ્મચારી ચ યોષિતમ્ ॥ ૧,૧૦૫.૩૭॥

ગર્દભં પશુમાલભ્ય નૈરૃતં ચ વિશુધ્યતિ ।
મધુમાંસાશને કાર્યં કૃચ્છ્રં શેષવ્રતાનિ ચ ॥ ૧,૧૦૫.૩૮॥

કૃચ્છ્રત્રયં ગુરુઃ કુર્યાન્મ્રિયેત્પ્રહિતો યદિ ।
પ્રતિકૂલં ગુરોઃ કૃત્વા પ્રસાદ્યૈવ વિશુધ્યતિ ॥ ૧,૧૦૫.૩૯॥

રિપૂન્ધાન્યપ્રદાનાદ્યૈઃ સ્નેહાદ્યૈર્વાપ્યુપક્રમેત્ ।
ક્રિયમાણોપકારે ચ મૃતે વિપ્રે ન પાતકમ્ ॥ ૧,૧૦૫.૪૦॥

મહાપાપોપપાપાભ્યાં યોભિશસ્તો મૃષા પરમ્ ।
અબ્ભક્ષો માસમાસીત સ જાપી નિયતન્દ્રિયઃ ॥ ૧,૧૦૫.૪૧॥

અનિયુક્તો ભ્રાતૃભાર્યાં ગચ્છંશ્ચાન્દ્રાયણં ચરેત્ ।
ત્રિરાત્રાન્તે ઘૃતં પ્રાશ્ય ગત્વોદક્યાં શુચિર્ભવેત્ ॥ ૧,૧૦૫.૪૨॥

ગોષ્ઠે વસન્બ્રહ્મચારી માસમેકં પયોવ્રતી ।
ગાયત્રીજપ્યનિરતો મુચ્યતેઽસત્પ્રતિગ્રહાત્ ॥ ૧,૧૦૫.૪૩॥

ત્રિઃ કૃચ્છ્રમાચરેદ્વ્રાત્યયાજકોઽપિ ચરન્નપિ ।
વેદપ્લાવી યવાશ્યબ્દં ત્યક્ત્વા ચ શરણાગતાન્ ॥ ૧,૧૦૫.૪૪॥

પ્રાણાયામત્રયં કુર્યાત્ખરયાનોષ્ટ્રયાનગઃ ।
નગ્નઃ સ્નાત્વા ચ સુપ્ત્વા ચ ગત્વા ચૈવ દિવા સ્ત્રિયમ્ ॥ ૧,૧૦૫.૪૫॥

ગુરુન્ત્વં કૃત્ય હુઙ્કૃત્ય વિપ્રં નિર્જિત્ય વાદ તઃ ।
પ્રસાદ્ય તં ચ મુનયસ્તતો હ્યુપવસેદ્દિનમ્ ॥ ૧,૧૦૫.૪૬॥

વિપ્રે દણ્ડોદ્યમે કૃચ્છ્રમતિકૃચ્છ્રં નિપાતને ।
દેશં કાલં વયઃ શક્તિં પાપં ચાવેક્ષ્ય યત્નતઃ ॥ ૧,૧૦૫.૪૭॥

પ્રાયશ્ચિતં પ્રકલ્પ્યં સ્યાદ્યત્ર યોક્તા તુ નિષ્કૃતિઃ ।
ગર્ભત્યાગો ભર્તૃનિન્દા સ્ત્રીણાં પતનકારણમ્ ॥ ૧,૧૦૫.૪૮॥

એષ ગ્રહાન્તિકે દોષઃ તસ્માત્તાં દૂતરસ્ત્યજેત્ ।
વિખ્યાતદોષઃ કુર્વીત ગુરોરનુમતં વ્રતમ્ ॥ ૧,૧૦૫.૪૯॥

અસંવિખ્યાતદોષસ્તુ રહસ્યં વ્રતમાચરેત્ ।
ત્રિરાત્રોપોષણો જપ્ત્વા બ્રહ્મહા ત્વઘમર્ષણમ્ ॥ ૧,૧૦૫.૫૦॥

અન્તર્જલે વિશુદ્ધે ચ દત્ત્વા ગાં ચ પયસ્વિનીમ્ ।
લોમભ્યઃ સ્વાહેતિ ઋચા દિવસં મારુતાશનઃ ॥ ૧,૧૦૫.૫૧॥

જલે જપ્ત્વા તુ જુહુયાચ્ચાત્વારિંશદ્ઘૃતાહુતીઃ ।

ત્રિરાત્રોપોષણો હુત્વા કૂષ્માણ્ડીભિર્ઘૃતં શુચિઃ ॥ ૧,૧૦૫.૫૨॥

સુરાપઃ સ્વર્ણહારી ચ રુદ્રજાપી જલે સ્થિતઃ ।
સહસ્રશીર્ષાજપ્યેન મુચ્યતે ગુરુતલ્પગઃ ॥ ૧,૧૦૫.૫૩॥

પ્રાણાયામશતં કુર્યાત્સર્વપાપાપનુત્તયે ।
ઓઙ્કારાભિયુતં સોમસલિલપ્રશનાચ્છુચિઃ ॥ ૧,૧૦૫.૫૪॥

કૃત્વોપવાસં રેતોવિણ્મૂત્રાણાં પ્રાશનેદ્વિજઃ ।
અજ્ઞાનકૃતપાપસ્ય નાશઃ સન્ધ્યાત્રયે કૃતે ॥ ૧,૧૦૫.૫૫॥

રુદ્રૈકાદશજપ્યાદ્ધિ પાપનાશો ભવેદ્દ્વિજૈઃ ।
વેદાભ્યાસરતં શાન્તં પઞ્ચયજ્ઞક્રિયાપરમ્ ॥ ૧,૧૦૫.૫૬॥

ન સ્પૃશન્તિ હા પાપાનિ ચાશુ સ્મૃત્વા હ્યપોહિતઃ ।
જપ્ત્વા સહસ્રગાયત્રીં શુચિર્બ્રહ્મહણાદૃતે ॥ ૧,૧૦૫.૫૭॥

બ્રહ્મચર્યં દયા ક્ષાન્તિર્ધ્યાનં સત્યમકલ્કતા ।
અહિંસા સ્તેયમાધુર્યે દમશ્ચૈતે યમાઃ સ્મૃતાઃ ॥ ૧,૧૦૫.૫૮॥

સ્નાનમૌનોપવાસોજ્યાસ્વાધ્યાયોપસ્થનિગ્રહઃ ।
તપોઽક્રોધો ગુરોર્ભક્તિઃ શૌચં ચ નિયમાઃ સ્મૃતાઃ ॥ ૧,૧૦૫.૫૯॥

પઞ્ચગવ્યં તુ ગોક્ષીરં દધિમૂત્રશકૃદ્ઘૃતમ્ ।
જગ્ધ્વા પરેહ્ન્યુપવસેત્કૃચ્છ્રં સાન્તપનં ચરેત્ ॥ ૧,૧૦૫.૬૦॥

પૃથક્સાન્તપનૈર્દ્રવ્યૈઃ ષડહઃ સોપવાસકઃ ।
સપ્તાહેન તુ કૃચ્છ્રોઽયં મહાસાન્તપનઃ સ્મૃતઃ ॥ ૧,૧૦૫.૬૧॥

પર્ણોદુમ્બરરાજીવબીલ્વપત્રકુશોદકૈઃ ।
પ્રત્યેકં પ્રત્યહાભ્યસ્તૈઃ પર્ણ કૃચ્છ્ર ઉદાહૃતઃ ॥ ૧,૧૦૫.૬૨॥

તપ્તક્ષીરઘૃતામ્બૂનામેકૈકં પ્રત્યહં પિબેત્ ।
એકરાત્રોપવાસશ્ચ તપ્તકૃચ્છ્રશ્ચ પાવનઃ ॥ ૧,૧૦૫.૬૩॥

એકભક્તેન નક્તેન તથૈવાયાચિતેન ચ ।
ઉપવાસેન ચકન પાદકૃચ્છ્ર ઉદાહૃતઃ ॥ ૧,૧૦૫.૬૪॥

યથા કથઞ્ચિત્ત્રિગુણઃ પ્રજાપત્યોઽયમુચ્યતે ।
અયમેવાતિકૃચ્છ્રઃ સ્યાત્પાણિપૂર્ણામ્બુભોજનાત્ ॥ ૧,૧૦૫.૬૫॥

કૃચ્છ્રાતિકૃચ્છ્રં પયસા દિવસાનેકવિંશતિમ્ ।
દ્વાદશાહોપવાસૈશ્ચ પરાકઃ સમુદાહૃતઃ ॥ ૧,૧૦૫.૬૬॥

પિણ્યાકાચામતક્રામ્બુસક્તૂનાં પ્રતિવાસરમ્ ।
એકૈકમુપવાસશ્ચ કૃચ્છ્રઃ સૌમ્યોઽયમુચ્યતે ॥ ૧,૧૦૫.૬૭॥

એષાં ત્રિરાત્રમભ્યાસાદેકૈકં સ્યાદ્યથાક્રમાત્ ।
તુલાપુરુષ ઇત્યેષ જ્ઞેયઃ પઞ્ચદશાહિકઃ ॥ ૧,૧૦૫.૬૮॥

તિથિપિણ્ડાંશ્ચરેદ્વૃદ્ધ્યા શુક્લે શિખ્યણ્ડસમિતાન્ ।
એકૈકં હ્રાસયેત્કૃષ્ણે પિણ્ડં ચાન્દ્રાયણં ચરેત્ ॥ ૧,૧૦૫.૬૯॥

યથાકથઞ્ચિત્પિણ્ડાનાં ચત્વારિંશચ્છતદ્વયમ્ ।
માસેનૈવોપભુઞ્જીત ચાન્દ્રાયણમથાપરમ્ ॥ ૧,૧૦૫.૭૦॥

કૃત્વા ત્રિષવણં સ્નાનં પિણ્ડં ચાન્દ્રાયણં ચરેત્ ।
પવિત્રાણિ જપેત્પિણ્ડાન્ગાયત્ર્યા ચાભિમન્ત્રયેત્ ॥ ૧,૧૦૫.૭૧॥

અનાદિષ્ટેષુ પાપેષુ શુદ્ધિશ્ચાન્દ્રાયણેન તુ ।
ધર્માર્થો યશ્ચરેદેતચ્ચન્દ્રસ્યૈતિ સલોકતામ્ ॥ ૧,૧૦૫.૭૨॥

કૃચ્છ્રકૃદ્ધર્મકામસ્તુ મહતીં શ્રિયમશ્નુતે ॥ ૧,૧૦૫.૭૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તપ્રાયશ્ચિત્તવિવેકો નામ પઞ્ચોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૬
યાજ્ઞવલ્ક્ય ઉવાચ ।
પ્રેતા (ત) શૌચં પ્રવક્ષ્યામિ તચ્છૃણુધ્વં યતવ્રતાઃ ।
ઊનદ્વિવર્ષં નિખનેન્ન કુર્યાદુ દકં તતઃ ॥ ૧,૧૦૬.૧॥

આ શ્મશાનાદનુવ્રજ્ય ઇતરૈર્જ્ઞાતિભિર્યુતઃ ।
યમસૂક્તં તથા જપ્યં જપદ્ભિર્લૌકિકાગ્નિના ॥ ૧,૧૦૬.૨॥

સ દગ્ધવ્ય ઉપેતશ્ચેદાહિતાગ્ન્યાવૃતાર્થવત્ ।
સપ્તમાદ્દશમાદ્વાપિ જ્ઞાતયોઽભ્યુપયાન્ત્યપઃ ॥ ૧,૧૦૬.૩॥

અપનઃ શોશુચદઘમનેન પિતૃદિઙ્મુખાઃ ।
એવં માતામહાચાર્યપત્નીનાં ચોદકક્રિયાઃ ॥ ૧,૧૦૬.૪॥

કામોદકાઃ પુત્રસખિસ્વસ્ત્રીયશ્વશુરર્ત્વિજઃ ।
નામગોત્રેણ હ્યુદકં સકૃત્સિઞ્ચન્તિ વાગ્યતાઃ ॥ ૧,૧૦૬.૫॥

પાષણ્ડપતિતાનાં તુ ન કુર્યુરુદકક્રિયાઃ ।
નબ્રહ્મચારિણો વ્રાત્યા યોષિતઃ કામગાસ્તથા ॥ ૧,૧૦૬.૬॥

સુરાપ્યસ્ત્વાત્મઘાતિન્યો નાશૌચોદકભાજનાઃ ।
તતો ન રોદિતવ્યં હિ ત્વનિત્યા જીવસં સ્થિતિઃ ॥ ૧,૧૦૬.૭॥

ક્રિયા કાર્યા યથાશક્તિ તતો ગચ્છેદ્ગૃહાન્પ્રતિ ।
વિદશ્ય નિમ્બપત્રાણિ નિયતા દ્વારિ વેશ્મનઃ ॥ ૧,૧૦૬.૮॥

આચમ્યાથાગ્નિમુદકં ગોમયં ગૌરસર્ષપાન્ ।
પ્રવિશેયુઃ સમાલભ્ય કૃત્વાશ્મનિ પદં શનૈઃ ॥ ૧,૧૦૬.૯॥

પ્રવેશનાદિકં કર્મ પ્રેતસંસ્પર્શનાદપિ ।
ઈક્ષતાં તત્ક્ષણાચ્છુદ્ધિઃ પરેષાં સ્નાનસંયમાત્ ॥ ૧,૧૦૬.૧૦॥

ક્રીતલબ્ધાશના ભૂમૌ સ્વપેયુસ્તે પૃથક્પૃથક્ ।
પિણ્ડયજ્ઞકૃતા દેયં પ્રેતાયાન્નં દિનત્રયમ્ ॥ ૧,૧૦૬.૧૧॥

જલમેકાહમાકાશે સ્થાપ્યં ક્ષીરં તુ મૃન્મયે ।
વૈતાનોપાસનાઃ કાર્યાઃ ક્રિયાશ્ચ શ્રુતિચોદિતાઃ ॥ ૧,૧૦૬.૧૨॥

આદન્તજન્મનઃ સદ્યઃ આચૂડં નૈશિકી સ્મૃતા ।
ત્રિરાત્રમા વ્રતાદેશાદ્દશરાત્રમતઃ પરમ્ ॥ ૧,૧૦૬.૧૩॥

ત્રિરાત્રં દશરાત્રં વા શાવમાશૌચમુચ્યતે ।
ઊનદ્વિવર્ષ ઉભયોઃ સૂતકં માતુરેવ હિ ॥ ૧,૧૦૬.૧૪॥

અન્તરા જન્મમરણે શેષાહોભિર્વિશુધ્યતિ ।
દશ દ્વાદશ વર્ણાનાં તથા પઞ્ચદશૈવ ચ ॥ ૧,૧૦૬.૧૫॥

ત્રિંશદ્દિનાનિ ચ તથા ભવતિ પ્રેતસૂતકમ્ ।
અહસ્ત્વદત્તકન્યાસુ બાલેષુ ચ વિશોધનમ્ ॥ ૧,૧૦૬.૧૬॥

ગુર્વન્તેવાસ્યનૂચાનમાતુલશ્રોત્રિયેષુ ચ ।
અનૌરસેષુ પુત્રેષુ ભાર્યાસ્વન્યગતાસુ ચ ॥ ૧,૧૦૬.૧૭॥

નિવાસરાજનિ તથા તદહઃ શુદ્ધિકાર(ણ)મ્ ।
હતાનાં નૃપગોવિપ્રૈરન્વક્ષં ચાત્મઘાતિનામ્ ॥ ૧,૧૦૬.૧૮॥

વિષાદ્યૈશ્ચ હતાનાં ચ નાશૌચં પૃથિવીપતેઃ ।
સત્રિવ્રતિબ્રહ્મચારિદાતૃબ્રહ્મવિદાં તથા ॥ ૧,૧૦૬.૧૯॥

દાને વિવાહે યજ્ઞે ચ સંગ્રામે દેશવિપ્લવે ।
આપદ્યપિ ચ કષ્ટાયાં સદ્યઃ શૌચં વિધીયતે ॥ ૧,૧૦૬.૨૦॥

કાલોઽગ્નિઃ કર્મમૃદ્વાયુર્મનો જ્ઞાનં તપો જપઃ (લમ્) ।
પશ્ચાત્તાષો નિરાહારઃ સર્વેષાં શુદ્ધિહેતવઃ ॥ ૧,૧૦૬.૨૧॥

અકાર્યકારિણાં દાનં વેગો નદ્યાસ્તુ શુદ્ધિકૃત્ ।
ક્ષાત્રેણ કર્મણા જીવેદ્વિશાં વાપ્યાપદિ દ્વિજઃ ॥ ૧,૧૦૬.૨૨॥

ફલસોમક્ષૌમવીરુદ્ધિ ક્ષીરં ઘૃતં જલમ્ ।
તિલોદનરસક્ષારમધુ લાક્ષા શૃતં હવિઃ ॥ ૧,૧૦૬.૨૩॥

વસ્ત્રોપલાસવં પુષ્પં શાકમૃચ્ચર્મપાદુકમ્ ।

એણત્વચં ચ કૌશેયં લવણં માસમેવ ચ ॥ ૧,૧૦૬.૨૪॥

પિણ્યાકમૂલગન્ધાંશ્ચ વૈશ્યવૃત્તો ન વિક્રયેત્ ।
ધર્માર્થં વિક્રયં નેયાસ્તિલા ધાન્યેન તત્સમાઃ ॥ ૧,૧૦૬.૨૫॥

લવણાદિ ન વિક્રીયાત્તથા ચાપદ્ગતો દ્વિજઃ ।
હીનાદ્વિપ્રો વિગૃહ્ણંશ્ચ લિપ્યતે નાર્કવદ્વિજઃ ॥ ૧,૧૦૬.૨૬॥

કુર્યાત્કૃષ્યાદિકં તદ્વદવિક્રેયા હયાસ્તથા ।
બુભુક્ષિતસ્ત્ર્યં સ્થિત્વા દૃષ્ટ્વા વૃત્તિવિવર્જિતમ્ ।
રાજા ધર્મ્યાં પ્રકુર્વીત વૃત્તિં વિપ્રાદિકસ્ય ચ ॥ ૧,૧૦૬.૨૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યાજ્ઞવલ્ક્યોક્તાશૌચાપદ્વૃત્ત્યોર્નિરૂપણં નામ ષડુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૭
સૂત ઉવાચ ।
પરાશરોઽબ્રવીદ્વ્યાસં ધર્મં વર્ણાશ્રમાદિકમ્ ।
કલ્પેકલ્પે ક્ષયોત્પત્ત્યા ક્ષીયન્તે નુ પ્રજાદયઃ ॥ ૧,૧૦૭.૧॥

શ્રુતિઃ સ્મૃતિઃ સદાચરો યઃ કશ્ચિદ્વે દકર્તૃકઃ ।

વેદાઃ સ્મૃતા બ્રાહ્મણાદૌ ધર્મા મન્વાદિભિઃ સદા ॥ ૧,૧૦૭.૨॥

દાનં કલિયુગે ધર્મઃ કર્તારં ચ કલૌ ત્યજેત્ ।
પાપકૃત્યં તુ તત્રૈવ શાપં ફલતિ વર્ષતઃ ॥ ૧,૧૦૭.૩॥

આચારાત્પ્રાપ્નુયાત્સર્વં ષટ્કર્માણિ દિનેદિને ।
સન્ધ્યા સ્નાનં જપો હોમો દેવાતિથ્યાદિપૂજનમ્ ॥ ૧,૧૦૭.૪॥

અપૂર્વઃ સુવ્રતી વિપ્રો હ્યપૂર્વા યતયસ્તદા ।
ક્ષત્રિયઃ પરસૈન્યાનિ જિત્વા પૃથ્વીં પ્રપાલયેત્ ॥ ૧,૧૦૭.૫॥

વણિક્કૃષ્યાદિ વૈશ્યે સ્યાદ્દ્વિજભક્તિશ્ચ શૂદ્રકે ।
અભક્ષ્યભક્ષણાચ્ચૌર્યાદગમ્યા ગમનાત્પતેત્ ॥ ૧,૧૦૭.૬॥

કૃષિં કુર્વન્દ્વિજઃ શ્રાન્તં બલીવર્દં ન વાહયેત્ ।
દિનાર્ધં સ્નાનયોગાદિકારી વિપ્રાંશ્ચ ભોજયેત્ ॥ ૧,૧૦૭.૭॥

નિર્વપેત્પઞ્ચ યજ્ઞાનિ ક્રૂરે નિન્દાં ચ કારયેત્ ।
તિલાજ્યં ન વિક્રીણિત સૂનાયજ્ઞમઘાન્વિતઃ ॥ ૧,૧૦૭.૮॥

રાજ્ઞો દત્ત્વા તુ ષડ્ભાગં દેવતાનાં ચ વિંશતિમ્ ।
ત્રયસ્ત્રિંશચ્ચ વિપ્રાણાં કૃષિકર્તા ન લિપ્યતે ॥ ૧,૧૦૭.૯॥

કર્ષકાઃ ક્ષત્રવિટ્છૂદ્રાઃ ખલેઽદત્ત્વા તુ ચૌરકઃ ।
દિનત્રયેણ શુધ્યેત બ્રાહ્મણઃ પ્રેતસૂતકે ॥ ૧,૧૦૭.૧૦॥

ક્ષત્રો દશાહાદ્વૈશ્યાસ્તુ દ્વાદશાહાન્માસિ શૂદ્રકઃ ।
યાતિ વિપ્રો દશાહાત્તુ ક્ષત્રો દ્વાદશકાદ્દિનાત્ ॥ ૧,૧૦૭.૧૧॥

પઞ્ચદશાહાદ્વૈશ્યસ્તુ શૂદ્રો માસેન શુધ્યતિ ।
એકપિણ્ડાસ્તુ દાયાદાઃ પૃથગ્દ્વારનિકેતનાઃ ॥ ૧,૧૦૭.૧૨॥

જન્મના ચ વિપત્તૌ ચ ભવેત્તેષાં ચ સૂતકમ્ ।
ચતુર્થે દશરાત્રં સ્યાત્ષણ્ણિશાઃ પુંસિ પઞ્ચમે ॥ ૧,૧૦૭.૧૩॥

ષષ્ઠે ચતુર હાચ્છુદ્ધિઃ સપ્તમે ચ દિનત્રયમ્ ।
દેશાન્તરે મૃતે બાલે સદ્યઃ શુદ્ધિર્યતો મૃતે ॥ ૧,૧૦૭.૧૪॥

અજાતદન્તા યે બાલા યે ચ ગર્ભાદ્વિનિઃ સૃતાઃ ।
ન તેષામગ્નિસંસ્કારો ન પિણ્ડં નોદકક્રિયા ॥ ૧,૧૦૭.૧૫॥

યદિ ગર્ભો વિપદ્યત સ્રવતે વાપિ યોષિતઃ ।
યાવન્માસં સ્થિતો ગર્ભસ્તાવદ્દિનાનિ સૂતકમ્ ॥ ૧,૧૦૭.૧૬॥

આનામકરણાત્સદ્ય આચૂડાન્તાદહર્નિશમ્ ।
આવ્રતાત્તુ ત્રિરાત્રેણ તદૂર્ધ્વન્દશભિર્દિનૈઃ ॥ ૧,૧૦૭.૧૭॥

આચતુર્થાદ્ભવેત્સ્રવઃ પાતઃ પઞ્ચમષષ્ઠયોઃ ।
બ્રહ્મચર્યા દગ્નિહોત્રાન્નાશુદ્ધિઃ સઙ્ગવર્જનાત્ ॥ ૧,૧૦૭.૧૮॥

શિલ્પિનઃ કારવો વૈદ્યા દાસીદાસાશ્ચ ભૃત્યકાઃ ।
અગ્નિમાઞ્છ્રોત્રિયો રાજા સદ્યઃ શૌચાઃ પ્રકીર્તિતાઃ ॥ ૧,૧૦૭.૧૯॥

દશાહાચ્છુધ્યતે માતા સ્નાનાત્સૂતે પિતા શુચિઃ ।
સઙ્ગાત્સૂતૌ સૂતકં સ્યાદુપસ્પૃશ્ય પિતા શુચિઃ ॥ ૧,૧૦૭.૨૦॥

વિવાહોત્સવયજ્ઞેષુ અન્તરા મૃતસૂતકે ।
પૂર્વસંકલ્પિતાદન્યવર્જનં ચ વિધીયતે ॥ ૧,૧૦૭.૨૧॥

મૃતેન શુધ્યતે સૂતિઃ મૃતવજ્જાતકં જનૌ ।
ગોગ્રહાદૌ વિપન્નાનામેકરાત્રં તુ સૂતકમ્ ॥ ૧,૧૦૭.૨૨॥

અનાથપ્રેતવહનાત્પ્રાણાયામેન શુધ્યતિ ।
પ્રેતશૂદ્રસ્ય વહનાન્ત્રિરાત્રમશુચિર્ભવેત્ ॥ ૧,૧૦૭.૨૩॥

આત્મઘાતિવિષોદ્બન્ધકૃમિદષ્ટે ન સંસ્કૃતિઃ ।
ગોહતં કૃમિદષ્ટં ચ સ્પૃષ્ટ્વા કૃચ્છ્રેણ શુધ્યતિ ॥ ૧,૧૦૭.૨૪॥

અદુષ્ટાપતિતં ભાર્યા યૌવને યા પરિત્યજેત્ ।
સપ્તજન્મ ભવેત્સ્ત્રીત્વં વૈધવ્યં ચ પુનઃ પુનઃ ॥ ૧,૧૦૭.૨૫॥

બાલહત્યા ત્વગમનાદૃતૌ ચ સ્ત્રી તુ સૂકરિ ।
અગમ્યા વ્રતકારિણ્યો ભ્રષ્ટપાનોદકક્રિયાઃ ॥ ૧,૧૦૭.૨૬॥

ઔરસઃ ક્ષેત્રજઃ પુત્રઃ પિતૃજૌ પિણ્ડદૌ પિતુઃ ।
પરિવિત્તેસ્તુ કૃચ્છ્રં સ્યાત્કન્યાયાઃ કૃચ્છ્રમેવ ચ ॥ ૧,૧૦૭.૨૭॥

અતિકૃચ્છ્રં ચરેદ્દાતા હોતા ચાન્દ્રાયણઞ્ચરેત્ ।
કુબ્જવામનષણ્ડેષુ ગદ્ગદેષુ જડેષુ ચ ॥ ૧,૧૦૭.૨૮॥

જાત્યન્ધબધિરે મૂકે ન દોષઃ પરિવેદને ।
નષ્ટે મૃતે પ્રવ્રજિતે ક્લીબે વા પતિતે પતૌ ॥ ૧,૧૦૭.૨૯॥

પઞ્ચસ્વાપત્સુ નારીણાં પતિરન્યો વિધીયતે ।
ભર્ત્રા સહમૃતા નારી રોમાબ્દાનિ વસેદ્દિવિ ॥ ૧,૧૦૭.૩૦॥

શ્વાદિદષ્ટસ્તુ ગાયત્ર્યા જપાચ્છુદ્ધો ભવેન્નરઃ ।
દાહ્યો લોકાગ્નિના વિપ્રશ્ચાણ્ડાલાદ્યૈર્હતોઽગ્નિમાન્ ॥ ૧,૧૦૭.૩૧॥

ક્ષીરૈઃ પ્રક્ષાલ્ય તસ્યાસ્થિ સ્વાગ્નિના મન્ત્રતો દહેત્ ।
પ્રવાસે તુ મૃતે ભૂયઃ કૃત્વા કુશમયં દહેત્ ॥ ૧,૧૦૭.૩૨॥

કૃષ્ણાજિને સમાસ્તીર્ય ષટ્શતાનિ પલાશજાન્ ।
શમીં શિશ્ને વિનિઃ ક્ષિપ્ય અરણિં વૃષણે ક્ષિપેત્ ॥ ૧,૧૦૭.૩૩॥

કણ્ઠં દક્ષિણહસ્તે તુ વામહસ્તે તથોપભૃત્ ।
પાર્શ્વે તૂલૂખલં દદ્યાત્પૃષ્ઠે તુ મુસલં દદેત્ ॥ ૧,૧૦૭.૩૪॥

ઉરે નિઃ ક્ષિપ્ય દૃષદં તણ્ડુલાજ્યતિલાન્મુખે ।
શ્રોત્ર ચ પ્રોક્ષણીં દાદ્યદાજ્યસ્થાલીં ચ ચક્ષુષોઃ ॥ ૧,૧૦૭.૩૫॥

કર્ણે નેત્રે મુખે ઘ્રાણે હિરણ્યશકલાન્ક્ષિપેત્ ।
અગ્નિહોત્રોપકરણાદ્બ્રહ્મલોકગતિર્ભવેત્ ॥ ૧,૧૦૭.૩૬॥

અસૌ સ્વર્ગાય લોકાય સ્વાહેત્યાજ્યાહુતિઃ સકૃત્ ।
હંસસારસક્રૌઞ્ચાનાં ચક્રવાકં ચ કુક્કુટમ્ ॥ ૧,૧૦૭.૩૭॥

મયરમેષઘાતી ચ અહોરાત્રેણ શુધ્યતિ ।
પક્ષિણઃ સકલાન્હત્વા અહોરાત્રેણ શુધ્યતિ ॥ ૧,૧૦૭.૩૮॥

સર્વાંશ્ચતુષ્પદાન્હત્વા અહોરાત્રો ષિતો જપેત્ ।
શૂદ્રં હત્વા ચરેત્કૃચ્છ્રમતિકૃચ્છ્રં તુ વૈશ્યહા ।
ક્ષત્રં ચાન્દ્રાયણં વિપ્રં દ્વાવિંશાત્રિંશમાહરે (વહે) ત્ ॥ ૧,૧૦૭.૩૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પરાશરોક્તધર્મનિરૂપણં નામ સપ્તોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૮
સૂત ઉવાચ ।
નીતિસારં પ્રવક્ષ્યામિ અર્થશાસ્ત્રાદિસંશ્રિતમ્ ।

રાજાદિભ્યો હિતં પુણ્યમાયુઃ સ્વર્ગાદિદાયકમ્ ॥ ૧,૧૦૮.૧॥

સદ્ભિઃ સઙ્ગં પ્રકુર્વીત સિદ્ધિકામઃ સદા નરઃ ।
નાસદ્ભિરિહલોકાય પરલોકાય વા હિતમ્ ॥ ૧,૧૦૮.૨॥

વર્જયેત્ક્ષુદ્રસંવાદમદુષ્ટસ્ય તુ દર્શનમ્ ।
વિરોધં સહ મિત્રેણ સમ્પ્રીતિં શત્રુસેવિના ॥ ૧,૧૦૮.૩॥

મૂર્ખશિષ્યોપદેશેન દુષ્ટસ્ત્રીભરણેન ચ ।
દુષ્ટાનાં સમ્પ્રયોગેણ પણ્ડિતોઽપ્યવસીદતિ ॥ ૧,૧૦૮.૪॥

બ્રાહ્મણં બાલિશં ક્ષત્રમયોદ્ધારં વિશં જડમ્ ।
શૂદ્રમક્ષરસંયુક્તં દૂરતઃ પરિવર્જયેત્ ॥ ૧,૧૦૮.૫॥

કાલેન રિપુણાસન્ધિઃ કાલે મિત્રેણ વિગ્રહઃ ।
કાર્યકારણમાશ્રિત્ય કાલં ક્ષિપતિ પણ્ડિતઃ ॥ ૧,૧૦૮.૬॥

કાલઃ પચતિ ભૂતાનિ કાલઃ સંહરતે પ્રજાઃ ।
કાલઃ સુપ્તેષુ જાગર્તિ કાલો હિ દુરતિક્રમઃ ॥ ૧,૧૦૮.૭॥

કાલેષુ હરતે વીર્યં કાલે ગર્ભે ચ વર્તતે ।
કાલો જનયતે સૃષ્ટિં પુનઃ કાલોઽપિ સંહરેત્ ॥ ૧,૧૦૮.૮॥

કાલઃ સૂક્ષ્મગતિર્નિત્યં દ્વિવિધશ્ચેહ ભાવ્યતે ।
સ્થૂલસંગ્રહચારેણ સૂક્ષ્મચારાન્તરેણ ચ ॥ ૧,૧૦૮.૯॥

નીતિસારં સુરેન્દ્રાય ઇમમૂચ બૃહસ્પતિઃ ।
સર્વજ્ઞો યેન ચેન્દ્રોઽભૂદ્દૈત્યાન્હત્વાપ્નુયાદ્દિવમ્ ॥ ૧,૧૦૮.૧૦॥

રાજર્ષિબ્રાહ્મણૈઃ કાર્યં દેવવિપ્રાદિપૂજનમ્ ।
અશ્વમેધેન યષ્ટવ્યં મહાપાતકનાશનમ્ ॥ ૧,૧૦૮.૧૧॥

ઉત્તમૈઃ સહ સાઙ્ગત્યં પણ્ડિતૈઃ સહ સત્કથામ્ ।
અલુબ્ધૈઃ સહ મિત્રત્વં કુર્વાણો નાવસીદતિ ॥ ૧,૧૦૮.૧૨॥

પરીવાદં પરાર્થં ચ પરિહાસં પરસ્ત્રિયમ્ ।
પરવેશ્મનિ વાસં ચ ન કુર્વીત કદાચન ॥ ૧,૧૦૮.૧૩॥

પરોઽપિ હિતવાબન્ધુર્બન્ધુરપ્યહિતઃ પરઃ ।
અહિતો દેહજો વ્યાધિર્હિતમારણ્યમૌષધમ્ ॥ ૧,૧૦૮.૧૪॥

સ બન્ધુર્યો હિતે યુક્તઃ સ પિતા યસ્તુ પોષકઃ ।
તન્મિત્રં યત્ર વિશ્વાસઃ સ દેશો યત્ર જીવ્યતે ॥ ૧,૧૦૮.૧૫॥

સ ભૃત્યો યો વિધેયસ્તુ તદ્બીજં યત્પ્રરોહતિ ।
સા ભાર્યા યા પ્રિયં બ્રૂતે સ પુત્રો યસ્તુ જીવતિ ॥ ૧,૧૦૮.૧૬॥

સ જીવતિ ગુણા યસ્ય ધર્મો યસ્ય સ જીવતિ ।
ગુણધર્મવિહીનો યો નિષ્ફલ તસ્ય જીવનમ્ ॥ ૧,૧૦૮.૧૭॥

સા ભાર્યા યા ગૃહે દક્ષા સા ભાર્યાયા પ્રિયંવદા ।
સા ભાર્યા યા પતિપ્રાણા સા ભાર્યા યા પતિવ્રતા ॥ ૧,૧૦૮.૧૮॥

નિત્ય સ્નાતા સુગન્ધા ચ નિત્યં ચ પ્રિયવાદિની ।
અલ્પભુક્તાલ્પભાષી ચ સતતં મઙ્ગલૈર્યુતા ॥ ૧,૧૦૮.૧૯॥

સતતં ધર્મબહુલા સતતં ચ પતિપ્રિયા ।
સતતં પ્રિયવક્ત્રી ચ સતતં ત્વૃતુકામિની ॥ ૧,૧૦૮.૨૦॥

એતદાદિક્રિયાયુક્તા સર્વસૌ ભાગ્યવર્ધિની ।
યસ્યેદૃશી ભવેદ્ભાય્યા સ દેવેન્દ્રોન માનુષઃ ॥ ૧,૧૦૮.૨૧॥

યસ્ય ભાર્યા વિરૂપાક્ષી કશ્મલા કલહપ્રિયા ।
ઉત્તરોત્તરવાદા સ્યા સા જરા ન જરા જરા ॥ ૧,૧૦૮.૨૨॥

યસ્ય ભાર્યા શ્રિતાન્યચ્ચ પરવેશ્માભિકાઙ્ક્ષિણી ।
કુક્રિયા ત્યક્તલજ્જા ચ સા જરા ન જરા જરા ॥ ૧,૧૦૮.૨૩॥

યસ્ય ભાર્યા ગુણજ્ઞા ચ ભર્તારમનુગામિની ।
અલ્પાલ્પેન તુ સન્તુષ્ટા સા પ્રિયા ન પ્રિયા પ્રિયા ॥ ૧,૧૦૮.૨૪॥

દુષ્ટા ભાર્યા શઠં મિત્રં ભૃત્યશ્ચોત્તરદાયકઃ ।
સસર્પે ચ ગૃહે વાસોમૃત્યુરેવ ન સંશયઃ ॥ ૧,૧૦૮.૨૫॥

ત્યજ દુર્જનસંસર્ગં ભજ સાધુસમાગમમ્ ।
કુરુ પુણ્યમહોરાત્ર સ્મર નિત્યમનિત્યતામ્ ॥ ૧,૧૦૮.૨૬॥

વ્યાલીકણ્ઠપ્રદેશાહ્યપિ ચ ફણભૃદ્ભાષણા યા ચ રૌદ્રી યા
કૃષ્ણા વ્યાકુલાગી રુધિરનયનસંવ્યાકુલા વ્યાઘ્રકલ્પા ।
ક્રોધે ચૈવોગ્રવક્ત્રા સ્ફુરદનલશિખા કાકજિહ્વા કરાલા સેવ્યા ન
સ્ત્રી વિદગ્ધા પરપુરગમના ભ્રાન્તચિત્તા વિરાક્ત ॥ ૧,૧૦૮.૨૭॥

સક્તિઃ સુતોકે સુકૃતં કૃતઘ્ને શતિં ચ વહ્નૌ (સીતાપહૌ હ્યતપયૈવ)?હૈમે ।
ઉત્પદ્યતે દૈવવશાત્કદાચિદ્વેશ્યાસુ રાગો ન ભવેત્કદાચિત્ ॥ ૧,૧૦૮.૨૮॥

ભુજઙ્ગમે વેશ્મનિ દૃષ્ટિદૃષ્ટે વ્યાધૌ ચિકિત્સાવિનિવર્તિતે ચ ।
દેહે ચ બાલ્યાદિવયોઽન્વિતે ચ કાલા વૃતોઽસૌ લભતે ધૃતિં કઃ ॥ ૧,૧૦૮.૨૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહસ્પતિપ્રોક્તનીતિસારનિરૂપણં નામાષ્ટોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦૯
સૂત ઉવાચ ।
આપદર્થે ધનં રક્ષેદ્દારાન્રક્ષેદ્ધનૈરપિ ।
આત્માનં સતતં રક્ષેદ્દારૈરપિ ધનૈરપિ ॥ ૧,૧૦૯.૧॥

ત્યજેદકં કુલસ્યાર્થે ગ્રામસ્યાર્થે કુલં ત્યજેત્ ।
ગ્રામં જનપદસ્યાર્થે આત્માર્થે પૃથિવીં ત્યજેત્ ॥ ૧,૧૦૯.૨॥

વરં હિ નરકે વાસો ન તુ દુશ્ચરિતે ગૃહે ।
નરકાત્ક્ષીયતે પાપ કુગૃહાન્ન નિવર્તતે ॥ ૧,૧૦૯.૩॥

ચલત્યેકેન પાદેન તિષ્ઠત્યેકેન બુદ્ધિમાન્ ।
ન પરીક્ષ્ય પરં સ્થાનં પૂર્વમાયતનં ત્યજેત્ ॥ ૧,૧૦૯.૪॥

ત્યજેદ્દેશમસદ્વૃત્તં વાસં સોપદ્રવં ત્યજેત્ ।
ત્યજેત્કૃપણરાજાનં મિત્રં માયામયં ત્યજેત્ ॥ ૧,૧૦૯.૫॥

અર્થેન કિં કૃપણહસ્તગતેન કેન જ્ઞાનેન કિં બહુશઠાગ્રહસંકુલેન ।
રૂપેણ કિં ગુણપરાક્રમવર્જિતેન મિત્રેણ કિં વ્યસનકાલપરાઙ્મુખેન ॥ ૧,૧૦૯.૬॥

અદૃષ્ટપૂર્વા બહવઃ સહાયાઃ સર્વે પદસ્થસ્ય ભવન્તિ મિત્રાઃ ।
અર્થૈર્વિહીનસ્ય પદચ્યુતસ્ય ભવત્યકાલે સ્વજનોઽપિ શત્રુઃ ॥ ૧,૧૦૯.૭॥

આપત્સુ મિત્રં જાની યાદ્રણે શૂરં રહઃ શુચિમ્ ।
માર્યાં ચ વિભવે ક્ષીણે દુર્ભિક્ષે ચ પ્રિયાતિથિમ્ ॥ ૧,૧૦૯.૮॥

વૃક્ષં ક્ષીણફલં ત્યજન્તિ વિહગાઃ શુષ્કં સરઃ સારસાનિર્દ્રવ્યં
પુરુષં ત્યજન્તિ ગણિકા ભ્રષ્ટં નૃપં મન્ત્રિણઃ ।
પુષ્પં પર્યુષિતં ત્યજન્તિ મધુપાઃ દગ્ધં વનાન્તં મૃગાઃ સર્વઃ

કાર્યવશાજ્જનો હિ રમતે કસ્યાસ્તિ કો વલ્લભઃ ॥ ૧,૧૦૯.૯॥

લુબ્ધમર્થપ્રદાનેન શ્લાઘ્યમઞ્જલિકર્મણા ।
મૂર્ખં છન્દાનુવૃત્ત્યા ચ યાથાતથ્યેન પણ્ડિતમ્ ॥ ૧,૧૦૯.૧૦॥

સદ્ભાવેન હિ તુષ્યન્તિ દેવાઃ સત્પુરુષા દ્વિજાઃ ।
ઇતરૈઃ ખાદ્યપાનેન માનદાનેન પણ્ડિતાઃ ॥ ૧,૧૦૯.૧૧॥

ઉત્તમં પ્રણિપાતેન શઠં ભેદેન યોજયેત્ ।
નીચં સ્વલ્પપ્રદાનેન સમં તુલ્યપરાક્રમૈઃ ॥ ૧,૧૦૯.૧૨॥

યસ્યયસ્ય હિ યો ભાવસ્તસ્યતસ્ય હિતં વદન્ ।
અનુપ્રવિશ્ય મેધાવી ક્ષિપ્રમાત્મવશં નયેત્ ॥ ૧,૧૦૯.૧૩॥

નદીનાં ચ નખીનાં ચ શ‍ૃઙ્ગિણાં શસ્ત્રપાણિનામ્ ।
વિશ્વાસો નૈવ ગન્તવ્યઃ સ્ત્રિષુ રાજકુલેષુ ચ ॥ ૧,૧૦૯.૧૪॥

અર્થનાશં મનસ્તાપં ગૃહે દુશ્ચરિતાનિ ચ ।
વઞ્ચનં ચાપ માનં ચ મતિમાન્ન પ્રિકાશયેત્ ॥ ૧,૧૦૯.૧૫॥

હીનદુર્જનસંસર્ગ અત્યન્તવિરહાદરઃ ।
સ્નેહોઽન્યગેહવાસશ્ચ નારીસચ્છીલનાશનમ્ ॥ ૧,૧૦૯.૧૬॥

કસ્ય દોષઃ કુલે નાસ્તિ વ્યાધિના કો પીડિતઃ ।
કેન ન વ્યસનં પ્રાપ્તં શ્રિયઃ કસ્ય નિરન્તરાઃ ॥ ૧,૧૦૯.૧૭॥

કોઽર્થં પ્રાપ્ય ન ગર્વિતો ભુવિ નરઃ કસ્યાપદોનાગતાઃ સ્ત્રીભિઃ કસ્ય
ન ખણ્ડિતં ભુવિ મનઃ કો નામ રાજ્ઞાં પ્રિયઃ ।
કઃ કાલસ્ય ન ગોચરાન્તરગતઃ કોઽર્થો ગતો ગૌરવં કો વા
દુર્જનવાગુરાનિપતિતઃ ક્ષેમેણ યાતઃ પુમાન્ ॥ ૧,૧૦૯.૧૮॥

સુહૃત્સ્વજનબન્ધુર્ન બુદ્ધિર્યસ્ય ન ચાત્મનિ ।
યસ્મિન્કર્મણિ સિદ્ધેઽપિ ન દૃશ્યેત ફલોદયઃ ।
વિપત્તૌ ચ મહદ્દુઃખં તદ્બુધઃ કથમાચરેત્ ॥ ૧,૧૦૯.૧૯॥

યસ્મિન્દેશે ન સમાનં ન પ્રીતિર્ન ચ બાન્ધવાઃ ।
ન ચ વિદ્યાગમઃ કશ્ચિત્તં દેશં પરિવર્જયેત્ ॥ ૧,૧૦૯.૨૦॥

ધનસ્ય યસ્ય રાજતો ભયં ન ચાસ્તિ ચૌરતઃ ।
મૃતં ચ યન્ન મુચ્યતે સમર્જયસ્વ તદ્ધનમ્ ॥ ૧,૧૦૯.૨૧॥

યદર્જિતં પ્રાણહરૈઃ પરિશ્રમૈર્મૃતસ્ય તં વૈ વિભજન્તિરિક્થિનઃ ।
કૃતં ચ યદ્દુષ્કૃતમર્થલિપ્સયા તદેવ દોષોપહતસ્ય યૌતુકમ્ ॥ ૧,૧૦૯.૨૨॥

સઞ્ચિતં નિહિતં દ્રવ્યં પરામૃશ્યં મુહુર્મુહુઃ ।
આખોરિવ કદર્યસ્ય ધનં દુઃખાય કેવલમ્ ॥ ૧,૧૦૯.૨૩॥

નગ્ના વ્યસનિનો રૂક્ષાઃ કપાલાઙ્કિતપાણયઃ ।
દર્શયન્તીહ લોકસ્ય અદાતુઃ ફલમીદૃશમ્ ॥ ૧,૧૦૯.૨૪॥

શિક્ષયન્તિ ચ યાચન્તે દેહીતિ કૃપણા જનાઃ ।
અવસ્થેયમદાનસ્ય મા ભૂદેવં ભવાનપિ ॥ ૧,૧૦૯.૨૫॥

સઞ્ચિતં ક્રતુશતૈર્ન યુજ્યતે યાચિતં ગુણવતે ન દીયતે ।
તત્કદર્યપરિરક્ષિતં ધનં ચોરપાર્થિવગૃહે પ્રયુજ્યતે ॥ ૧,૧૦૯.૨૬॥

ન દેવેભ્યો ન વિપ્રોભ્યો બન્ધુભ્યો નૈવ ચાત્મને ।
કદર્યસ્ય ધનં યાતિ ત્વગ્નિતસ્કરરાજસુ ॥ ૧,૧૦૯.૨૭॥

અતિક્લેશેન યેઽપ્યર્થા ધર્મસ્યાતિક્રમેણ ચ ।
અરેર્વા પ્રણિપાતેન મા ભૂતસ્તે કદાચન ॥ ૧,૧૦૯.૨૮॥

વિદ્યાઘાતો હ્યનભ્યાસઃ સ્ત્રીણાં ઘાતઃ કુચૈલતા ।
વ્યાધીનાં ભોજનં જીર્ણં શત્રોર્ઘાતઃ પ્રપઞ્ચતા ॥ ૧,૧૦૯.૨૯॥

તસ્કરસ્ય વધો દણ્ડઃ કુમિત્રસ્યાલ્પભાષણમ્ ।
પૃથક્શય્યા તુ નારીણાં બ્રાહ્મણસ્યાનિમન્ત્રણમ્ ॥ ૧,૧૦૯.૩૦॥

દુર્જનાઃ શિલ્પિનો દાસા દુષ્ટાશ્ચ પટહાઃ સ્ત્રિયઃ ।
તાડિતા માર્દવં યાન્તિ ન તે સત્કારભાજનમ્ ॥ ૧,૧૦૯.૩૧॥

જાનીયાત્પ્રેષણે ભૃત્યાન્બાન્ધવાન્વ્યસનાગમે ।
મિત્રમાપદિ કાલે ચ ભાર્યાઞ્ચ વિભવક્ષયે ॥ ૧,૧૦૯.૩૨॥

સ્ત્રીણાં દ્વિગુણ આહારઃ પ્રજ્ઞા ચૈવ ચતુર્ગુણા ।
ષડ્ગુણો વ્યવસાયશ્ચ કામશ્ચાષ્ટગુણઃ સ્મૃતઃ ॥ ૧,૧૦૯.૩૩॥

ન સ્વપ્નેન જયેન્નિદ્રાં ન કામેન સ્ત્રિયં જયેત્ ।
ન ચેન્ધનૈર્જયેદ્વહ્નિં ન મદ્યેન તૃષાં જયેત્ ॥ ૧,૧૦૯.૩૪॥

સમાંસૈર્ભોજનૈઃ સ્નિગ્ધૈર્મદ્યૈર્ગન્ધવિલેપનૈઃ ।
વસ્ત્રૈર્મનોરમૈર્માલ્યૈઃ કામઃ સ્ત્રીષુ વિજૃમ્ભતે ॥ ૧,૧૦૯.૩૫॥

બ્રહ્મચર્યેઽપિ વક્તવ્યં પ્રાપ્તં મન્મથચેષ્ટિતમ્ ।
હૃદ્યં હિ પુરુષં દૃષ્ટ્વા યોનિઃ પ્રક્લિદ્યતે સ્ત્રિયાઃ ॥ ૧,૧૦૯.૩૬॥

સુવેષં પુરુષં દૃષ્ટ્વા ભ્રાતરં યદિ વા સુતમ્ ।
યોનિઃ ક્લિદ્યતિ નારીણાં સત્યંસત્યં હિ શૌનક ! ॥ ૧,૧૦૯.૩૭॥

નદ્યશ્ચ નાર્યશ્ચ સમસ્વભાવાઃ સ્વતન્ત્રભાવે ગમનાદિકેચ ।
તોયૈશ્ચ દોષૈશ્ચ નિપાતયન્તિ નદ્યો હિ કૂલાનિ કુલા નિ નાર્યઃ ॥ ૧,૧૦૯.૩૮॥

નદી પાતયતે કૂલં નારી પાતયતે કુલમ્ ।
નારીણાઞ્ચ નદીનાં ચ સ્વચ્છન્દા લલિતા ગતિઃ ॥ ૧,૧૦૯.૩૯॥

નાગ્નિસ્તૃપ્યતિ કાષ્ઠાનાં નાપગાનાં મહોદધિઃ ।
નાન્તકઃ સર્વભૂતાનાં ન પુંસાં વામલોચનાઃ ॥ ૧,૧૦૯.૪૦॥

ન તૃપ્તિરસ્તિ શિષ્ટાનામિષ્ટાનાં પ્રિયવાદિનામ્ ।
સુખાનાઞ્ચ સુતાનાઞ્ચ જીવિતસ્ય વરસ્ય ચ ॥ ૧,૧૦૯.૪૧॥

રાજા ન તપ્તો ધનસંચયેન ન સાગરસ્તૃપ્તિમગાજ્જલેન ।
ન પણ્ડિતસ્તૃપ્યતિ ભાષિતેન તૃપ્તં ન ચક્ષુર્નૃપદર્શનેન ॥ ૧,૧૦૯.૪૨॥

સ્વકર્મ ધર્માર્જિતજીવિતાનાં શાસ્ત્રેષુ દારેષુ સદા રતાનામ્ ।
જિતેન્દ્રિયાણામતિથિપ્રિયાણાં ગૃહેઽપિ મોક્ષઃ પુરુષોત્તમાનામ્ ॥ ૧,૧૦૯.૪૩॥

મનોઽનુકૂલાઃ પ્રમદારૂપવત્યઃ સ્વલઙ્કૃતાઃ ।
વસઃ પ્રાસાદપૃષ્ઠેષુ સ્વર્ગઃ સ્યાચ્છુભકર્મણઃ ॥ ૧,૧૦૯.૪૪॥

ન દાનેન ન માનેન નાર્જવેન ન સવયા ।
ન શસ્ત્રેણ ન શાસ્ત્રેણ સર્વથા વિષમા સ્ત્રિયઃ ॥ ૧,૧૦૯.૪૫॥

શનૈર્વિદ્યા શનૈર્થાઃ શનૈઃ પર્વતમારુહેત્ ।
શનૈઃ કામં ચ ધર્મં ચ પઞ્ચૈતાનિ શનૈઃ શનૈઃ ॥ ૧,૧૦૯.૪૬॥

શાશ્વતં દેવપૂજાદિ વિપ્રદાનં ચ શાશ્વતમ્ ।
શાશ્વતં સગુણા વિદ્યા સુહૃન્મિત્રં ચ શાશ્વતમ્ ॥ ૧,૧૦૯.૪૭॥

યે બાલભાવાન્ન પઠન્તિ વિદ્યાં યે યૌવનસ્થા હ્યધનાત્મદારાઃ ।
તે શોચનીયા ઇહ જીવલોકે મનુષ્યરૂપેણ મૃગાશ્ચરન્તિ ॥ ૧,૧૦૯.૪૮॥

પઠને ભોજને ચિત્તં ન કુર્યાચ્છાસ્ત્રસેવકઃ ।

સુદૂરમપિ વિદ્યાર્થી વ્રજેદ્ગરુડવેગવાન્ ॥ ૧,૧૦૯.૪૯॥

યે બાલભાવે ન પઠન્તિ વિદ્યાં કામાતુરા યૌવનનષ્ટવિત્તાઃ ।
તે વૃદ્ધબાવે પરિભૂયમાનાઃ સંદહ્યમાનાઃ શિશિરે યથાબ્જમ્ ॥ ૧,૧૦૯.૫૦॥

તર્કેઽપ્રતિષ્ઠા શ્રુતયો વિભિન્નાઃ નાસાવૃષિર્યસ્ય મતં ન ભિન્નમ્ ।
ધર્મસ્ય તત્ત્વં નિહિતં ગુહાયાં મહાજનો યેન ગતઃ સ પન્થાઃ ॥ ૧,૧૦૯.૫૧॥

આકારૈરિઙ્ગિતૈર્ગત્યા ચેષ્ટયા ભાષિતેન ચ ।
નેત્રવક્ત્રવિકારાભ્યાં લક્ષ્યતેઽન્તર્ગતં મનઃ ॥ ૧,૧૦૯.૫૨॥

અનુક્તમપ્યૂહતિ પણ્ડિતો જનઃ પરેઙ્ગિતજ્ઞાનફલા હિ બુદ્ધયઃ ।
ઉદીરિતોર્થઃ પશુનાપિ ગૃહ્યતે હયાશ્ચ નાગાશ્ચ વહન્તિ દર્શિતમ્ ॥ ૧,૧૦૯.૫૩॥

અર્થાદ્ભ્રષ્ટસ્તીર્થયાત્રાં તુ ગચ્છેત્સત્યાદ્ભ્રષ્ટો રૌરવં વૈ વ્રજેચ્ચ ।
યોગાદ્ભ્રષ્ટઃ સત્યધૃતિઞ્ચ ગચ્છેદ્રાજ્યાદ્ભ્રષ્ટો મૃગયાયાં વ્રજેચ્ચ ॥ ૧,૧૦૯.૫૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહદ્ નીતિસારે નવોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૦
સૂત ઉવાચ ।
યોધ્રુવાણિ પરિત્યજ્ય હ્યધ્રુવાણિ નિષેવતે ।
ધ્રુવાણિ તસ્ય નશ્યન્તિ હ્યધ્રુવં નષ્ટમેવ ચ ॥ ૧,૧૧૦.૧॥

વાગ્યન્ત્રહીનસ્ય નરસ્ય વિદ્યા શસ્ત્રં યથા કાપુરુષસ્ય હસ્તે ।
ન તુષ્ટિમુત્પાદયતે શરીરે હ્યન્ધસ્ય દારા ઇવ દર્શનીયાઃ ॥ ૧,૧૧૦.૨॥

ભોજ્યે ભોજનશક્તિશ્ચ રતિશક્તિર્વરસ્ત્રિયઃ ।
વિભવે દાનશક્તિશ્ચ નાલ્પસ્ય તપસઃ ફલમ્ ॥ ૧,૧૧૦.૩॥

અગ્નિહોત્રફલા વેદાઃ શીલવૃત્તિફલં શુભમ્ ।
રતિપુત્રફલા દારા દત્તભુક્તફલં ધનમ્ ॥ ૧,૧૧૦.૪॥

વરયેત્કુલજાં પ્રાજ્ઞો વિરૂપામપિ કન્યકામ્ ।
સુરૂપાં સુનિતમ્બાઞ્ચ નાકુલીનાં કદાચન ॥ ૧,૧૧૦.૫॥

અર્થેનાપિ હિ કિં તેન યસ્યાનર્થે તુ સંગતિઃ ।
કો હિ નામ શિખાજાતં પન્નગસ્ય મણિં હરેત્ ॥ ૧,૧૧૦.૬॥

હવિર્દુષ્ટકુલદ્ગ્રાહ્યં બાલાદપિ સુભાષિતમ્ ।
અમેધ્યાત્કાઞ્ચનં ગ્રાહ્યં સ્ત્રીરત્નં દુષ્કુલાદપિ ॥ ૧,૧૧૦.૭॥

વિષાદપ્યમૃતં ગ્રાહ્યમમેધ્યાદપિ કાઞ્ચનમ્ ।
નીચાદપ્યુત્તમાં વિદ્યાં સ્ત્રીરત્નં દુષ્કુલાદપિ ॥ ૧,૧૧૦.૮॥

ન રાજ્ઞા સહ મિત્રત્વં ન સર્પો નિર્વિષઃ ક્વચિત્ ।
ન કુલં નિર્મલં તત્ર સ્ત્રીજનો યત્ર જાયતે ॥ ૧,૧૧૦.૯॥

કુલે નિયોજયેદ્ભક્તં પુત્રં વિદ્યાસુ યોજયેત્ ।
વ્યસને યોજયેચ્છત્રુમિષ્ટં ધર્મે નિયોજયેત્ ॥ ૧,૧૧૦.૧૦॥

સ્થાનેષ્વેવ પ્રયોક્તાવ્યા ભૃત્યાશ્ચાભરણાનિ ચ ।
ન હિ ચૂડામણિઃ પાદે શોભતે વૈ કદાચન ॥ ૧,૧૧૦.૧૧॥

ચૂડામણિઃ સમુદ્રોઽગ્નિર્ઘણ્ટા ચાખણ્ડમમ્બરમ્ ।
અથવા પૃથિવીપાલો મૂર્ધ્નિ પાદે પ્રમાદતઃ ॥ ૧,૧૧૦.૧૨॥

કુસુમસ્તબકસ્યેવ દ્વે ગતી તુ મનસ્વિનઃ ।
મૂર્ધ્નિ વા સર્વલોકાનાં શીર્ષતઃ પતિતો વને ॥ ૧,૧૧૦.૧૩॥

કનકભૂષણસંગ્રહણોચિતો યદિ મણિસ્ત્રપુણિ પ્રતિબધ્યતે ।
ન ચ વિરૌતિ ન ચાપિ સ શોભતે ભવતિ યોજયિતુર્વચનીયતા ॥ ૧,૧૧૦.૧૪॥

વાજિવારણલૌહાનાં કાષ્ઠપાષાણવાસસામ્ ।
નારીપુરુષતોયાનામન્તરં મહદન્તરમ્ ॥ ૧,૧૧૦.૧૫॥

કદર્થિતસ્યાપિ હિ ધૈર્યવૃત્તેર્ન શક્યતે સર્વગુણપ્રમાથઃ ।
અધઃ ખલેનાપિ કૃતસ્ય વહ્નેર્નાધઃ શિખા યાતિ કદાચિદેવ ॥ ૧,૧૧૦.૧૬॥

ન સદશ્વઃ કશાઘાતં સિંહો ન ગજગર્જિતમ્ ।
વીરો વા પરનિર્દિષ્ટં ન સહેદ્ભીમનિઃ સ્વનમ્ ॥ ૧,૧૧૦.૧૭॥

યદિ વિભવવિહીનઃ પ્રચ્યુતો વાશુ દૈવાન્ન તુ ખલજનસેવાં કાઙ્ક્ષયેન્નૈવ નીચામ્ ।
ન તૃણમદનકાર્યે સુક્ષુધાર્તોઽત્તિ સિંહઃ પિબતિ રુધિરમુષ્ણં
પ્રાયશઃ કુઞ્ચરાણામ્ ॥ ૧,૧૧૦.૧૮॥

સકૃદ્દુષ્ટઞ્ચ યો મિત્રં પુનઃ સન્ધાતુમિચ્છતિ ।
સ મૃત્યુમેવ ગૃહ્ણીયાદ્ગર્ભમશ્વતરી યથા ॥ ૧,૧૧૦.૧૯॥

શત્રોરપત્યાનિ પ્રિયંવદાનિ નોપેક્ષિતવ્યાનિ બુધૈર્મનુષ્યૈઃ ।

તાન્યેવ કાલેષુ વિપત્કરાણિ વિષસ્ય પાત્રાણ્યપિ દારુણાનિ ॥ ૧,૧૧૦.૨૦॥

ઉપકારગૃહીતેન શત્રુણા શત્રુમુદ્ધરેત્ ।
પાદલગ્નં કરસ્થેન કણ્ટકેનૈવ કણ્ટકમ્ ॥ ૧,૧૧૦.૨૧॥

અપકારપરાન્નિત્યં ચિન્ત યેન્ન કદાચન ।
સ્વયમેવ પતિષ્યન્તિ કૂલજાતા ઇવ દ્રુમાઃ ॥ ૧,૧૧૦.૨૨॥

અનર્થા હ્યર્થરૂપાશ્ચ અર્થાશ્ચાનર્થરૂપિણઃ ।
ભવન્તિ તે વિનાશાય દૈવાયત્તસ્ય વૈ સદા ॥ ૧,૧૧૦.૨૩॥

કાર્યકાલોચિતાપાપા મતિઃ સઞ્જાયતે હિ વૈ ।
સાનુકૂલે તુ દૈવે શં પુંસઃ સર્વત્ર જાયતે ॥ ૧,૧૧૦.૨૪॥

ધનપ્રયોગકાર્યેષુઃ તથા વિદ્યા ગમેષુ ચ ।
આહારે વ્યવહારે ચ ત્યક્તલજ્જઃ સદા ભવેત્ ॥ ૧,૧૧૦.૨૫॥

ધનિનઃ શ્રોત્રિયો રાજા નદી વૈદ્યસ્તુ પઞ્ચમઃ ।
પઞ્ચ યત્ર ન વિદ્યન્તે ન કુર્યાત્તત્ર સંસ્થિતિમ્ ॥ ૧,૧૧૦.૨૬॥

લોકયાત્રા ભયં લજ્જા દાક્ષિણ્યં દાનશીલતા ।
પઞ્ચ યત્ર ન વિદ્યન્તે ન તત્ર દિવસં વસેત્ ॥ ૧,૧૧૦.૨૭॥

કાલવિચ્છોત્રિયો રાજા નદી સાધુશ્ચ પઞ્ચમઃ ।
એતે યત્ર ન વિદ્યન્તે તત્ર વાસં ન કારયેત્ ॥ ૧,૧૧૦.૨૮॥

નૈકત્ર પરિનિષ્ઠાસ્તિ જ્ઞાનસ્ય કિલ શૌનક ।
સર્વઃ સર્વં ન જાનાતિ સર્વજ્ઞો નાસ્તિ કુત્રચિત્ ॥ ૧,૧૧૦.૨૯॥

ન સર્વવિત્કશ્ચિદિહાસ્તિ લોકે નાત્યન્તમૂર્ખો ભુવિ ચાપિ કશ્ચિત્ ।
જ્ઞાનેન નીચોત્તમમધ્યમેન યોઽયં વિજાનાતિ સ તેન વિદ્વાન્ ॥ ૧,૧૧૦.૩૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહદ્ નીતિસારે દશોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૧
સૂત ઉવાચ ।
પાર્થિવસ્ય તુ વક્ષ્યામિ ભૃત્યાનાઞ્ચૈવ લક્ષણમ્ ।
સર્વાણિ હિ મહીપાલઃ સમ્યઙ્નિત્યં પરીક્ષયેત્ ॥ ૧,૧૧૧.૧॥

રાજ્યં પાલયતે નિત્યં સત્યધર્મપરાયણઃ ।
નિર્જિત્ય પરસૈન્યાનિ ક્ષિતં ધર્મેણ પાલયેત્ ॥ ૧,૧૧૧.૨॥

પુષ્પાત્પુષ્પં વિચિન્વીત મૂલચ્છેદં ન કારયેત્ ।
માલાકાર ઇવારણ્યે ન યથાઙ્ગારકારકઃ ॥ ૧,૧૧૧.૩॥

દોગ્ધારઃ ક્ષીરભુઞ્જાના વિકૃતં તન્ન ભુઞ્જતે ।
પરરાષ્ટ્રં મહીપાલૈર્ભોક્તવ્યં ન ચ દૂષયેત્ ॥ ૧,૧૧૧.૪॥

નોધશ્છિન્દ્યાત્તુ યો ધેન્વાઃ ક્ષારાર્થો લભતે પયઃ ।
એવં રાષ્ટ્રં પ્રયોગેણ પીડ્યમાનં ન વર્ધતે ॥ ૧,૧૧૧.૫॥

તસ્માત્સર્વપ્રયત્નેન પૃથિવીમનુપાલયેન્ ।
પાલકસ્ય ભવેદ્ભૂમિઃ કીર્તિરાયુર્યશો બલમ્ ॥ ૧,૧૧૧.૬॥

આભ્યર્ચ્ય વિષ્ણું ધર્માત્મા ગોબ્રાહ્મણહિતે રતઃ ।
પ્રજાઃ પાલયિતું શક્તઃ પાર્થિવો વિજિતેન્દ્રિયઃ ॥ ૧,૧૧૧.૭॥

ઐશ્વર્યમધ્રુવં પ્રાપ્ય રાજા ધર્મે મતિઞ્ચરેત્ ।
ક્ષણેન વિભવો નશ્યેન્નાત્માયત્તં ધનાદિકમ્ ॥ ૧,૧૧૧.૮॥

સત્યં મનોરમાઃ કામાઃ સત્યં રમ્યા વિભૂતયઃ ।
કિન્તુ વૈ વનિતાપાઙ્ગભઙ્ગિલોલં હિ જીવિતમ્ ॥ ૧,૧૧૧.૯॥

વ્યાઘ્રીવ તિષ્ઠતિ જરા પરિતર્જયન્તી રોગાશ્ચ શત્રવ ઇવ પ્રભવન્તિ ગાત્રે ।
આયુઃ પરિસ્રવતિ ભિન્નઘટાદિવામ્ભો લોકો ન ચાત્મહિતમાચરતીહ કશ્ચિત્ ॥ ૧,૧૧૧.૧૦॥

નિઃ શઙ્કં કિં મનુષ્યાઃ કુરુત પરહિતં યુક્તમગ્રે હિતં યન્મોદધ્વં
કામિનીભિર્મદનશરહતા મન્દમન્દાતિદૃષ્ટ્યા ।
મા પાપં સંકુરુધ્વં દ્વિજહરિપરમાઃ સંભજધ્વં સદૈવ આયુર્નિઃ
શેષમેતિ સ્ખલતિ જલઘટીભૂતમૃત્યુચ્છલેન ॥ ૧,૧૧૧.૧૧॥

માતૃવત્પરદારેષુ પરદ્રવ્યેષુ લોષ્ટવત્ ।
આત્મવત્સર્વભૂતેષુ યઃ પશ્યતિ સ પણ્ડિતઃ ॥ ૧,૧૧૧.૧૨॥

એતદર્થં હિ વિપ્રેન્દ્રા રાજ્યમિચ્છન્તિ ભૂભૃતઃ ।
યદેષાં સર્વકાર્યેષુ વચો ન પ્રતિહન્યતે ॥ ૧,૧૧૧.૧૩॥

એતદર્થં હિ કુર્વન્તિ રાજાનો ધનસઞ્ચયમ્ ।
રક્ષયિત્વા તુ ચાત્માનં યદ્ધનં તદ્વિજાતયે ॥ ૧,૧૧૧.૧૪॥

ઓઙ્કારશબ્દો વિપ્રાણાં યેન રાષ્ટ્રં પ્રવર્ધતે ।
સ રાજા વર્ધતે યોગાદ્વ્યાધિભિશ્ચ ન બધ્યતે ॥ ૧,૧૧૧.૧૫॥

અસમર્થાશ્ચ કુર્વન્તિ મુનયો દ્રવ્યસઞ્ચયમ્ ।
કિં પુનસ્તુ મહીપાલઃ પુત્રવત્પાલયન્પ્રજાઃ ॥ ૧,૧૧૧.૧૬॥

યસ્યાર્થાસ્તસ્ય મિત્રાણિ યસ્યાર્થાસ્તસ્ય બાન્ધવાઃ ।
યસ્યાર્થાઃ સ મુમાંલ્લાકે યસ્યાર્થાઃ સ ચ પણ્ડિતઃ ॥ ૧,૧૧૧.૧૭॥

ત્યજન્તિ મિત્રાણિ ધનૈર્વિહીનં પુત્રાશ્ચ દારાશ્ચ સુહૃજ્જનાશ્ચ ।
તે ચાર્થવન્તં પુનરાશ્રયન્તિ હ્યર્થો હિ લોકે પુરુષસ્ય બન્ધુઃ ॥ ૧,૧૧૧.૧૮॥

અન્ધા હિ રાજા ભવતિ યસ્તુ સાસ્ત્રવિવર્જિતઃ ।
અન્ધઃ પશ્યતિ ચારેણ શાસ્ત્રહીનો ન પશ્યતિ ॥ ૧,૧૧૧.૧૯॥

યસ્ય પુત્રાશ્ચ ભૃત્યાશ્ચ મન્ત્રિણશ્ચ પુરોહિતાઃ ।
ઇન્દ્રિયાણિ પ્રસુપ્તાનિ તસ્ય રાજ્યં ચિરં ન હિ ॥ ૧,૧૧૧.૨૦॥

યેનાર્જિતાસ્ત્રયોઽપ્યોઽપ્યેતે પુત્રા ભૃત્યાશ્ચ બાન્ધવાઃ ।
જિતા તેન સમં ભૂપૈશ્ચતુરબ્ધિર્વસુન્ધરા ॥ ૧,૧૧૧.૨૧॥

લઙ્ઘયેચ્છાસ્ત્રયુક્તાનિ હેતુયુક્તાનિ યાનિ ચ ।
સહિ નશ્યતિ વૈ રાજા ઇહ લોકે પરત્ર ચ ॥ ૧,૧૧૧.૨૨॥

મનસ્તાપં ન કુર્વીત આપદં પ્રાપ્ય પાર્થિવઃ ।
સમબુદ્ધિઃ પ્રસન્નાત્મા પ્રસન્નાત્મા સુખદુઃખે સમો ભવેત્ ॥ ૧,૧૧૧.૨૩॥

ધીરાઃ કષ્ટમનુપ્રાપ્ય ન ભવન્તિ વિષાદિનઃ ।
પ્રવિશ્ય વદનં રાહોઃ કિં નોદતિ પુનઃ શશી ॥ ૧,૧૧૧.૨૪॥

ધિગ્ધિક્ષરીરસુખલાલિતમાનવેષુ મા ખેદયેદ્ધનકૃશં હિ શરીરમેવ ।
સદ્વારકા હ્યધનપાણ્ડુસુતાઃ શ્રુતા હિ દુઃખં વિહાય પુનરેવ સુખં પ્રપન્નાઃ ॥ ૧,૧૧૧.૨૫॥

ગન્ધર્વવિદ્યામાલોક્ય વાદ્યં ચ ગણિકાગણાન્ ।
ધનુર્વેદાર્થશાસ્ત્રાણિ લોકે રક્ષેચ્ચ ભૂપતિઃ ॥ ૧,૧૧૧.૨૬॥

કારણેન વિના ભૃત્યે યસ્તુ કુપ્યતિ પાર્થિવઃ ।
સ ગૃહ્ણાતિ વિષોન્માદં કૃષ્ણસર્પવિસર્જિતમ્ ॥ ૧,૧૧૧.૨૭॥

ચાપલાદ્વારયેદૃષ્ટિં મિથ્યાવાક્યઞ્ચ વારયેત્ ।
માનવે શ્રોત્રિયે ચૈવ ભૃત્યવર્ગે સદૈવ હિ ॥ ૧,૧૧૧.૨૮॥

લીલાં કરોતિ યો રાજા ભૃત્યસ્વજનગર્વિતઃ ।
શાસને સર્વદા ક્ષિપ્રં રિપુભિઃ પરિભૂયતે ॥ ૧,૧૧૧.૨૯॥

હુઙ્કારે ભ્રૂકુટીં નૈવ સદા કુર્વીત પાર્થિવઃ ।
વિના દોષેણ યો ભૃત્યાન્રાજાધમણ શાસ્તિ ચ ।
લીલાસુખાનિ ભોગ્યાનિ ત્યજેદિહ મહીપતિઃ ॥ ૧,૧૧૧.૩૦॥

સુખપ્રવૃત્તૈઃ સાધ્યન્તૈ શત્રવો વિગ્રહે સ્થિતૈઃ ॥ ૧,૧૧૧.૩૧॥

ઉદ્યોગઃ સાહસંધૈર્યં બુદ્ધિઃ શક્તિઃ પરાક્રમઃ ।
ષડ્વિધો યસ્ય ઉત્સાહસ્તસ્ય દેવોઽપિ શઙ્કતે ॥ ૧,૧૧૧.૩૨॥

ઉદ્યોગેન કૃતે કાર્યે સિદ્ધિર્યસ્ય ન વિદ્યતે ।
દૈવં તસ્ય પ્રમાણં હિ કર્તવ્યં પૌરુષં સદા ॥ ૧,૧૧૧.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહદ્ નીતિસારે એકાદશોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૨
સૂત ઉવાચ ।
ભૃત્યા બહુવિધા જ્ઞેયા ઉત્તમાધમમધ્યમાઃ ।
નિયોક્તવ્યા યથાર્હેષુ ત્રિવિધેષ્વેવ કર્મસુ ॥ ૧,૧૧૨.૧॥

ભૃત્યે પરિક્ષણં વક્ષ્યે યસ્યયસ્ય હિ યો ગુણઃ ।
તમિમં સમ્પ્રવક્ષ્યામિ યે યથાકથિતં કિલ ॥ ૧,૧૧૨.૨॥

યથા ચતુર્ભિઃ કનકં પરીક્ષ્યતે નિઘર્ષણચ્છેદનતાપતાડનૈઃ ।
તથા ચતુર્ભિર્ભૃતકં પરીક્ષયેદ્વ્રતેન શીલેન કલેન કર્મણા ॥ ૧,૧૧૨.૩॥

કુલશીલગુણોપેતઃ સત્યધર્મપરાયણઃ ।
રૂપવાન્સુપ્રસન્નશ્ચ કોશાધ્યક્ષો વિધીયતે ॥ ૧,૧૧૨.૪॥

મૂલ્યરૂપપરીક્ષાકૃદ્ભવે દ્રત્નપરીક્ષકઃ ।
બલાબલપરિજ્ઞાતા સેનાધ્યક્ષો વિધીયતે ॥ ૧,૧૧૨.૫॥

ઇઙ્ગિતાકારતત્ત્વજ્ઞો બલવાન્પ્રિયદર્શનઃ ।
અપ્રમાદી પ્રમાથી ચ પ્રતીહારઃ સ ઉચ્યતે ॥ ૧,૧૧૨.૬॥

મેધાવી વાક્પટુઃ પ્રાજ્ઞઃ સત્યવાદી જિતેન્દ્રિયઃ ।
સર્વશાસ્ત્રસમાલોકી હ્યેષ સાધુઃ સ લેખકઃ ॥ ૧,૧૧૨.૭॥

બુદ્ધિમાન્મતિમાંશ્ચૈવ પરચિત્તોપલક્ષકઃ ।
ક્રૂરો યથોક્તવાદી ચ એષ દૂતો વિધીયતે ॥ ૧,૧૧૨.૮॥

સમસ્તસ્મૃતિશાસ્ત્રજ્ઞઃ પણ્ડિતોઽથ જિતેન્દ્રિયઃ ।
શૌર્યવીર્યગુણોપેતો ધર્માધ્યક્ષો વિધીયતે ॥ ૧,૧૧૨.૯॥

પિતૃપૈતામહો દક્ષઃ શાસ્ત્રજ્ઞઃ સત્યવાચકઃ ।
શુચિશ્ચ કઠિનશ્ચૈવ સૂપકારઃ સ ઉચ્યતે ॥ ૧,૧૧૨.૧૦॥

આયુર્વેદકૃતાભ્યાસઃ સર્વેષાં પ્રિયદર્શનઃ ।
આયુઃ શીલગુણોપેતો વૈદ્ય એવ વિધીયતે ॥ ૧,૧૧૨.૧૧॥

વેદવેદાઙ્ગતત્ત્વજ્ઞો જપહમપરાયણઃ ।
આશીર્વાદપરો નિત્યમેષ રાજપુરોહિત ॥ ૧,૧૧૨.૧૨॥

લેખકઃ પાઠકશ્ચૈવ ગણકઃ પ્રતિરોધકઃ ।
આલસ્યયુક્તશ્ચેદ્રાજા કર્મ સંવર્જયેત્સદા ॥ ૧,૧૧૨.૧૩॥

દ્વિજિહ્વમુદ્વેગકરં ક્રૂરમેકાન્તદારુણમ્ ।
ખલસ્યાહેશ્ચ વદનમપકારાય કેવલમ્ ॥ ૧,૧૧૨.૧૪॥

દુર્જનઃ પરિહર્તવ્યો વિદ્યયાલઙ્કૃતોઽપિસન્ ।
મણિના ભૂષિતઃ સર્પઃ કિમસૌ ન ભયઙ્કરઃ ॥ ૧,૧૧૨.૧૫॥

અકારણવિષ્કૃતકોપધારિણઃ ખલાદ્ભયં કસ્ય ન નામ જાયતે ।
વિષં મહાહેર્વિષમસ્ય દુર્વચઃ સદુઃસહં સન્નિપતેત્સદા મુખે ॥ ૧,૧૧૨.૧૬॥

તુલ્યાર્થં તુલ્યસામર્થ્યં મર્મજ્ઞં વ્યવસાયિનમ્ ।
અર્ધરાજ્યહરં ભૃત્યં યો હન્યાત્સ ન હન્યતે ॥ ૧,૧૧૨.૧૭॥

શૂરત્વયુક્તા મૃદુમન્દવાક્યા જિતેન્દ્રિયાઃ સત્યપરાક્રમાશ્ચ ।
પ્રાગેવ પશ્ચાદ્વિપરી તરુપા યે તે તુ ભૃત્યા ન હિતા ભવન્તિ ॥ ૧,૧૧૨.૧૮॥

નિરાલસ્યાઃ સુસન્તુષ્ટાઃ પ્રતિબોધકાઃ ।
સુખદુઃખસમા ધીરા ભૃત્યા લોકેષુ દુર્લભાઃ ॥ ૧,૧૧૨.૧૯॥

ક્ષાન્તિસ્તયવિહીનશ્ચ ક્રૂરબુદ્ધિશ્ચ નિન્દકઃ ।
દામ્ભિકઃ કપટી ચૈવ શઠશ્ચ સ્પૃહયાન્વિતઃ ।

અશક્તો ભયભીતશ્ચ રાજ્ઞા ત્યક્તવ્ય એવ સઃ ॥ ૧,૧૧૨.૨૦॥

સુસન્ધાનાનિ ચાસ્ત્રાણિ શસ્ત્રાણિ વિવિધાનિ ચ ।
દુર્ગે પ્રવેશિતવ્યાનિ તતઃ શત્રું નિપાતયેત્ ॥ ૧,૧૧૨.૨૧॥

ષણ્માસમથ વર્ષં વા સન્ધિં કુર્યાન્નરાધિપઃ ।
પશ્યન્સઞ્ચિતમાત્માનં પુનઃ શત્રું નિપાતયેત્ ॥ ૧,૧૧૨.૨૨॥

મૂર્ખાન્નિયોજયેદ્યસ્તુ ત્રયોઽપ્યેતે મહીપતેઃ ।
અયશશ્ચાર્થનાશશ્ચ નરકે ચૈવ પાતનમ્ ॥ ૧,૧૧૨.૨૩॥

યત્કિઞ્ચિત્કુરુતે કર્મ શુભં વા યાદિ વાશુભમ્ ।
તેન સ્મ વર્ધતે રાજા સૂક્ષ્મતો ભૃત્યકાર્યતઃ ॥ ૧,૧૧૨.૨૪॥

તસ્માદ્ભૂમીશ્વરઃ પ્રાજ્ઞં ધર્મકામાર્થસાધને ।
નિયોજ યેદ્દ્વિસતતં ગોબ્રાહ્મણહિતાય વૈ ॥ ૧,૧૧૨.૨૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહસ્પત્યુક્ત નીતિસારે દ્વાદશોત્તરકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૩
સૂત ઉવાચ ।
ગુણવન્તં નિયુઞ્જીત ગુણહીનં વિવર્જયેત્ ।
પણ્ડિતસ્ય ગુણાઃ સર્વે મૂર્વે દોષાશ્ચ કેવલાઃ ॥ ૧,૧૧૩.૧॥

સદ્ભિરાસીત સતતં સદ્ભિઃ કુર્વીત સઙ્ગતિમ્ ।
સદ્ભિર્વિવાદં મૈત્રીઞ્ચ નાસદ્ભિઃ કિઞ્ચિદાચરેત્ ॥ ૧,૧૧૩.૨॥

પણ્ડિતૈશ્ચ વિર્નાતૈશ્ચ ધર્મજ્ઞૈઃ સત્યવાદિભિઃ ।
બન્ધસ્થોઽપિ તિષ્ઠેચ્ચ ન તુ રાજ્યે ખલૈઃ સહ ॥ ૧,૧૧૩.૩॥

સાવશેષાણિ કાર્યાણિ કુવન્નર્થે યુજ્યતે ।
તસ્માત્સર્વાણિ કાર્યાણિ સાવશેષાણિ કારયેત્ ॥ ૧,૧૧૩.૪॥

મધુહેવ દુહેત્સારં કુસુમઞ્ચ ન ઘાતયેત્ ।
વત્સાપેક્ષી દુહેત્ક્ષીરં ભૂમિં ગાઞ્ચૈવ પાર્થિપઃ ॥ ૧,૧૧૩.૫॥

યથાક્રમેણ પુષ્પેભ્યશ્ચિનુતે મધુ ષટ્પદઃ ।
તથા વિત્તમુ પાદાય રાજા કુર્વીત સઞ્ચયમ્ ॥ ૧,૧૧૩.૬॥

વલ્મીકં મધુજાલઞ્ચ શુક્લક્ષે તુ ચન્દ્રમાઃ ।
રાજદ્રવ્યઞ્ચ ભૈક્ષ્યઞ્ચ સ્તોકંસ્તોકં પ્રવર્ધતે ॥ ૧,૧૧૩.૭॥

અર્જિતસ્ય ક્ષયં દૃષ્ટા સમ્પ્રદત્તસ્ય સઞ્ચયમ્ ।
અવન્ધ્યં દિવસં કુર્યાદ્દાનધ્યયનકર્મસુ ॥ ૧,૧૧૩.૮॥

વનેઽપિ દોષાઃ પ્રભવન્તિ રાગિણાં ગૃહેઽપિ પઞ્ચેન્દ્રિયનિગ્રહસ્તપઃ ।
અકુત્સિતે કર્મણિ યઃ પ્રવર્તતે નિવૃત્તરાગસ્ય ગૃહં તપોવનમ્ ॥ ૧,૧૧૩.૯॥

સત્યેન રક્ષ્યતે ધર્મો વિદ્યા યોગેન રક્ષ્યતે ।
મૃજયા રક્ષ્યતે પાત્રં કુલં શલિન રક્ષ્યતે ॥ ૧,૧૧૩.૧૦॥

વરં વિન્ધ્યાટવ્યાં નિવસનમભુક્તસ્ય મરણં વરં સર્પાકીર્ણે શયનમથ કૂપે નિપતનમ્ ।
વરં ભ્રાન્તાવર્તે સભયજલમધ્યે પ્રવિશનં ન તુ સ્વીયે પક્ષે
હિ ધનમણુ દેહીતિ કથનમ્ ॥ ૧,૧૧૩.૧૧॥

ભાગ્યક્ષયેષુ ક્ષીયન્તે નોપભોગેન સમ્પદઃ ।
પૂર્વાર્જિતે હિ સુકૃતે ન નશ્યન્તિ કદાચન ॥ ૧,૧૧૩.૧૨॥

વિપ્રાણાં ભૂષણં વિદ્યા પૃથિવ્યા ભૂષણં નૃપઃ ।
નભસો ભૂષણં ચન્દ્રઃ શીલં સર્વસ્ય ભૂષણમ્ ॥ ૧,૧૧૩.૧૩॥

એતે તે ચન્દ્રતુલ્યાઃ ક્ષિતિપતિતનયા ભીમસેનાર્જુનાદ્યાઃ શુરાઃ
સત્યપ્રતિજ્ઞા દિનકરવપુષઃ કેશવેનોપગૂઢાઃ ।
તે વૈ દુષ્ટગ્રહસ્થાઃ કૃપણવશગતા ભૈક્ષ્યચર્યાં પ્રયાતાઃ કો
વા કસ્મિન્સમર્થો ભવતિ વિધિવશાદ્ભ્રામયેત્કર્મરેખા ॥ ૧,૧૧૩.૧૪॥

બ્રહ્મા યેન કુલાલવન્નિયમિતો બ્રહ્માણ્ડભાણ્ડોદરે વિષ્ણુર્યેન
દશાવતારગહને ક્ષિપ્તો મહાસઙ્કટે ।
રુદ્રોયેન કપાલપાણિપુટકે ભિક્ષાટનં કારિતઃ સૂર્યો ભ્રામ્યતિ
નિત્યમેવ ગગને તસ્મૈ નમઃ કર્ણણે ॥ ૧,૧૧૩.૧૫॥

દાતા બલિર્યાચકકો મુરારિર્દાનં મહી વિપ્રમુખસ્ય મધ્યે ।
દત્ત્વા ફલં બન્ધનમેવ લબ્ધં નમોઽસ્તુ તે દૈવ યથેષ્ટકારિણે ॥ ૧,૧૧૩.૧૬॥

માતા યદિ ભવેલ્લક્ષ્મીઃ પિતા સાક્ષાજ્જનાર્દનઃ ।
કુબુદ્ધૌ પ્રતિપત્તિશ્ચૈત્તસ્મિન્દણ્ડઃ પતેત્સદા ॥ ૧,૧૧૩.૧૭॥

યેનયેન યથા યદ્વત્પુરા કર્મ સુનિશ્ચિતમ્ ।

તત્તદેવાન્તરા ભુઙ્ક્તે સ્વયમાહિતમાત્મના ॥ ૧,૧૧૩.૧૮॥

આત્મના વિહિતં દુઃખમાત્મના વિહિતં સખમ્ ।
ગર્ભશય્યામુપાદાય ભુઙ્ક્તે વૈ પૌર્વદૈહિકમ્ ॥ ૧,૧૧૩.૧૯॥

ન ચાન્તરિક્ષે ન સમુદ્રમધ્યે ન પર્વતાનાં વિવરપ્રવેશે ।
ન માતૃમૂર્ધ્નિ પ્રધૃતસ્તથાઙ્કે ત્યક્તું ક્ષમઃ કર્મ કૃતં નરો હિ ॥ ૧,૧૧૩.૨૦॥

દુગસ્ત્રિકૂટઃ પરિખા સમુદ્રો રક્ષાંસિ યોધાઃ પરમા ચ વૃત્તિઃ ।
શાસ્ત્રઞ્ચ વૈ તૂશનસા પ્રદિષ્ટં સ રાવણઃ કાલવશાદ્વિનષ્ટઃ ॥ ૧,૧૧૩.૨૧॥

યસ્મિન્વયસિ યત્કાલે યદ્દિવા યચ્ચ વા નિશિ ।
યન્મુહૂર્તે ક્ષણે વાપિ તત્તથા ન તદન્યથા ॥ ૧,૧૧૩.૨૨॥

ગચ્છન્તિ ચાન્તરિક્ષે વા પ્રવિશન્તિ મહીતલે ।
ધારયન્તિ દિશઃ સર્વા નાદત્તમુપલભ્યતે ॥ ૧,૧૧૩.૨૩॥

પુરાધીતા ચ યા વિદ્યા પુરા દત્તઞ્ચ યદ્ધનમ્ ।
પુરા કૃતાનિ કર્માણિ હ્યગ્રે ધાવન્તિ ધાવતઃ ॥ ૧,૧૧૩.૨૪॥

કર્માણ્યત્ર પ્રધાનાનિ સમ્યગૃક્ષે શુભગ્રહે ।
વસિષ્ઠકૃતલગ્નાપિ જાનકી દુઃખભાજનમ્ ॥ ૧,૧૧૩.૨૫॥

સ્થૂલજઙ્ઘો યદા રામઃ શબ્દગામી ચ લક્ષ્મણઃ ।
ઘનકેશી યદા સીતા ત્રયસ્તે દુઃખભાજનમ્ ॥ ૧,૧૧૩.૨૬॥

ન પિતુઃ કર્મણા પુત્રઃ પિતા વા પુત્રકર્મણા ।
સ્વયં કૃતેન ગચ્છન્તિ સ્વયં બદ્ધાઃ સ્વકર્મણા ॥ ૧,૧૧૩.૨૭॥

કર્મજન્યશરીરેષુ રોગાઃ શરીરમાનસાઃ ।
શરા ઇવ પતન્તીહ વિમુક્તા દૃઢધન્વિભિઃ ॥ ૧,૧૧૩.૨૮॥

અન્યથા શાસ્ત્રગાર્ભિણ્યા ધિયા ધીરોઽર્થમીહતે ।
સ્વામિવત્પ્રાક્કૃતં કર્મ વિદધાતિ તદન્યથા ॥ ૧,૧૧૩.૨૯॥

બાલો યુવા ચ વૃદ્ધશ્ચ યઃ કરોતિ શુભાશુભમ્ ।
તસ્યાન્તસ્યામવસ્થાયાં ભુઙ્ક્તે જન્મનિજન્મનિ ॥ ૧,૧૧૩.૩૦॥

અનીક્ષમાણોઽપિ નરો વિદેશસ્થોઽપિ માનવઃ ।
સ્વકર્મપાતવાતેન નીયતે યત્ર તત્ફલમ્ ॥ ૧,૧૧૩.૩૧॥

પ્રાપ્તવ્યમર્થં લભતે મનુષ્યો દેવોઽપિ તં વારયિતું ન શક્તઃ ।
અતો ન શોચામિ ન વિસ્મયો મે લલાટલેખા ન પુનઃ પ્રયાતિ
(યદસ્મદીયં ન તુ તત્પરેષામ્ ॥ ૧,૧૧૩.૩૨ ॥

સર્પઃ કૂપે ગજઃ સ્કન્ધે બિલ આખુશ્ચ ધાવતિ ।
નરઃ શીઘ્રતરાદેવ કર્મણઃ કઃ પલાયતે ॥ ૧,૧૧૩.૩૩ ॥

નાલ્પા ભવતિ સદ્વિદ્યા દીયમાનાપિ વર્ધતે ।
કૂપસ્થમિવ પાનીયં ભવત્યેવ બહૂદકમ્ ॥ ૧,૧૧૩.૩૪ ॥

યેઽર્થા ધર્મેણ તે સત્યા યેઽધર્મેણ ગતાઃ શ્રિયઃ ।
ધર્માર્થો ચ મહાંલ્લોકે તત્સ્મૃત્વા હ્યર્થકારણાત્ ॥ ૧,૧૧૩.૩૫ ॥

અન્નાર્થો યાનિ દુઃખાનિ કરોતિ કૃપણો જનઃ ।
તાન્યેવ યદિ ધર્માર્થો ન ભૂયઃ ક્લેશભાજનમ્ ॥ ૧,૧૧૩.૩૬ ॥

સર્વેષામેવ શૌચાનામન્નશૌચં વિશિષ્યતે ।
યોઽન્નાર્થૈઃ શુચિઃ શૌચાન્ન મૃદા વારિણા શુચિઃ ॥ ૧,૧૧૩.૩૭ ॥

સત્યં શૌચં મનઃ શૌચં શૌચમિન્દ્રિયનિગ્રહઃ ।
સર્વભૂતે દયા શૌચં જલશૌચઞ્ચ પઞ્ચમમ્ ॥ ૧,૧૧૩.૩૮ ॥

યસ્ય સત્યઞ્ચ શૌચઞ્ચ તસ્ય સ્વર્ગો ન દુર્લભઃ ।
સત્યં હિ વચનં યસ્ય સોઽશ્વમેધાદ્વિશિષ્યતે ॥ ૧,૧૧૩.૩૯ ॥

મૃત્તિકાનાં સહસ્રેણ ચોદકાનાં શતેન હિ ।
ન શુધ્યતિ દુરાચારો ભાવોપહતચેતનઃ ॥ ૧,૧૧૩.૪૦ ॥

યસ્ય હસ્તૌ ચ પાદૌ ચ મનશ્ચૈવ સુસંયતમ્ ।
વિદ્યા તપશ્ચ કીર્તિશ્ચ સ તીર્થફલમશ્નુતે ॥ ૧,૧૧૩.૪૧ ॥

ન પ્રહૃષ્યતિ સમાનૈર્નાવમાનૈઃ પ્રકુપ્યતિ ।
ન ક્રુદ્ધઃ પરુષં બ્રૂયાદેતત્સાધોસ્તુ લક્ષણમ્ ॥ ૧,૧૧૩.૪૨ ॥

દરિદ્રસ્ય મનુષ્યસ્ય પ્રાજ્ઞસ્ય મધુરસ્ય ચ ।
કાલે શ્રુત્વા હિતં વાક્યં ન કશ્ચિત્પરિતુષ્યતિ ॥ ૧,૧૧૩.૪૩ ॥

ન મન્ત્રબલવીર્યેણ પ્રજ્ઞાયા પૌરુષેણ ચ ।
અલભ્યં લભ્યતે મર્ત્યૈસ્તત્ર કા પરિવેદના ॥ ૧,૧૧૩.૪૪ ॥

અયાચિતો મયા લબ્ધો પુનર્મત્પ્રેષણાદ્ગતઃ ।

યત્રાગતસ્તત્ર ગતસ્તત્ર કા પરિવેદના ॥ ૧,૧૧૩.૪૫॥

એકવૃક્ષે સદા રાત્રૌ નાનાપક્ષિસમાગમઃ ।
પ્રભાતેઽન્યદિશો યાન્તિ કા તત્ર પરિવેદના ॥ ૧,૧૧૩.૪૬॥

એકસાર્થપ્રયાતાના સર્વેષાન્તત્ર ગામિનામ્ ।
યસ્ત્વેકસ્ત્વરિતો યાતિ કા તત્ર પરિવેદના ॥ ૧,૧૧૩.૪૭॥

અવ્યક્તાદીનિ ભૂતાનિ વ્યક્તમધ્યાનિ શૌનક ।
અવ્યક્તનિધનાન્યેનવ કા તત્ર પરિવેદના ॥ ૧,૧૧૩.૪૮॥

નાપ્રાપ્તકાલો મ્રિયતે વિદ્ધઃ શરશતૈરપિ ।
કુશાગ્રેણ તુ સંસ્પૃષ્ટં પ્રાપ્તકાલો ન જીવતિ ॥ ૧,૧૧૩.૪૯॥

લબ્ધવ્યાન્યેવ લભતે ગન્તવ્યાન્યેવ ગચ્છતિ ।
પ્રાપ્તવ્યાન્યેવ પ્રાપ્નાતિ દુઃખાનિ ચ સુખાનિ ચ ॥ ૧,૧૧૩.૫૦॥

તત્તત્પ્રાપ્નોતિ પુરુષઃ કિ પ્રલાપૈઃ કરિષ્યતિ ।
આચોદ્યમાનાનિ યથા પુષ્પાણિ ચ ફલાનિ ચ ।
સ્વકાલં નાતિવર્તન્તે તથા કર્મ પુરાકૃતમ્ ॥ ૧,૧૧૩.૫૧॥

શીલં કુલં નૈવ ન ચૈવ વિદ્યા જ્ઞાનં ગુણા નૈવ ન બીજશુદ્ધિઃ ।
ભાગ્યાનિ પૂર્વં તપસાર્જિતાનિ કાલે ફલન્ત્યસ્ય યથૈવ વૃક્ષાઃ ॥ ૧,૧૧૩.૫૨॥

તત્ર મૃત્યુર્યત્ર હન્તા તત્ર શ્રીર્યત્ર સમ્પદઃ ।
તત્ર તત્ર સ્વયં યાતિ પ્રેર્યમાણઃ સ્વકર્મભિઃ ॥ ૧,૧૧૩.૫૩॥

ભૂતપૂર્વં કૃતં કર્મ કર્તારમનુતિષ્ઠતિ ।
યથા ધેનુસહસ્રેષુ વત્સો વિન્દન્તિ માતરમ્ ॥ ૧,૧૧૩.૫૪॥

એવં પૂર્વકૃતં કર્મ કર્તારમનુતિષ્ઠાતિ ।
સુકૃતં ભુઙ્ક્ષ્વ ચાત્મીયં મૂઢ કિં પરિતપ્યસે ॥ ૧,૧૧૩.૫૫॥

યથા પૂર્વકૃતં કર્મ શુભં વા યદિ વાશુભમ્ ।
તથા જન્માન્તરે તદ્વૈ કર્તા રમનુગચ્છતિ ॥ ૧,૧૧૩.૫૬॥

નીચઃ સર્ષપમાત્રાણિ પરચ્છિદ્રાણિ પશ્યતિ ।
આત્મનો બલિવમાત્રાણિ પશ્યન્નપિ ન પશ્યતિ ॥ ૧,૧૧૩.૫૭॥

રાગદ્વેષાદિયુક્તાનાં ન સુખં કુત્રચિદ્વિજ ।
વિચાર્ય ખલુ પશ્યામિ તત્સુખં યત્ર નિર્વૃતિઃ ॥ ૧,૧૧૩.૫૮॥

યત્ર સ્નેહો ભયં તત્ર સ્નેહો દુઃખસ્ય ભાજનમ્ ।
સ્નેહમૂલાનિ દુઃખાનિ તસ્મિંસ્ત્યક્તે મહત્સુખમ્ ॥ ૧,૧૧૩.૫૯॥

શરીરમેવાયતનં દુઃખસ્ય ચ સુખસ્ય ચ ।
જીવિતઞ્ચ શરીરઞ્ચ જાત્યૈવ સહ જાયતે ॥ ૧,૧૧૩.૬૦॥

સર્વં પરવશં દુઃખં સર્વ માત્મવશં સુખમ્ ।
એતદ્વિદ્યાત્સમાસેન લક્ષણં સુખદુઃખયોઃ ॥ ૧,૧૧૩.૬૧॥

સુખસ્યાનન્તરં દુઃખં દુઃખસ્યાનન્તરં સુખમ્ ।
શુખં દુઃખં મનુષ્યાણાં ચક્રવત્પરિવર્તતે ॥ ૧,૧૧૩.૬૨॥

યદ્ગતં તદતિક્રાન્તં યદિ સ્યાત્તચ્ચ દૂરતઃ ।
વર્તમાનેન વર્તેત ન સ શોકેન બાધ્યતે ॥ ૧,૧૧૩.૬૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહદ્ નીતિસારે ત્રયોશોત્તરશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૪
સૂત ઉવાચ ।
ન કશ્ચિત્કસ્યચિન્મિત્રં ન કશ્ચિત્કસ્યચિદ્રિપુઃ ।
કારણાદેવ જાયન્તે મિત્રાણિ રિપવસ્તથા ॥ ૧,૧૧૪.૧॥

શોકત્રાણં ભયત્રાણં પ્રીતિવિશ્વાસભાજનમ્ ।
કેન રત્નામદં સૃષ્ટં મિત્રમિત્યક્ષરદ્વયમ્ ॥ ૧,૧૧૪.૨॥

સકૃદુચ્ચરિતં યેન હરિરિત્યક્ષરદ્વયમ્ ।
બદ્ધઃ પરિકરસ્તેન મોક્ષાય ગમનં પ્રતિ ॥ ૧,૧૧૪.૩॥

ન માતરિ ન દારેષુ ન સોદર્યે ન ચાત્મજે ।
વિશ્વાસસ્તાદૃશઃ પુંસાં યાદૃઙ્મિત્રે સ્વભાવજે ॥ ૧,૧૧૪.૪॥

યદિચ્છેચ્છાશ્વતીં પ્રીતિં ત્રીન્દોષાન્પરિવર્જયેત્ ।
દ્યુતમર્થપ્રયોગઞ્ચ પરોક્ષે દારદર્શનમ્ ॥ ૧,૧૧૪.૫॥

માત્રા સ્વસ્રા દુહિત્રા વા ન વિવિક્તાસનો વસેત્ ।
બલવાનિન્દ્રિયગ્રામો વિદ્વાંસમપિ કર્ષતિ ॥ ૧,૧૧૪.૬॥

વિપરીતરતિઃ કામઃ સ્વાયતેષુ ન વિદ્યતે ।
યથોપાયો વધો દણ્ડસ્તથૈવ હ્યનુ વર્તતે ॥ ૧,૧૧૪.૭॥

અપિ કલ્પાનિલસ્યૈવ તુરગસ્ય મહોદધેઃ ।
શક્યતે પ્રસરો બોદ્ધું ન હ્યરક્તસ્યે ચતસઃ ॥ ૧,૧૧૪.૮॥

ક્ષણો નાસ્તિ રહો નાસ્તિ ન સ્તિ પ્રાર્થયિતા જનઃ ।
તેન શૌનક નારીણાં સતીત્વમુપજાયતે ॥ ૧,૧૧૪.૯॥

એક વૈ સેવતે નિત્યમન્યશ્ચેતપિ રોચતે ।
પુરુષાણામલાભેન નારી ચૈવ પતિવ્રતા ॥ ૧,૧૧૪.૧૦॥

જનની યાનિ કુરુતે રહસ્યં મદનાતુરા ।
સુતૈસ્તાનિ ન ચિન્ત્યાનિ શીલવિપ્રતિપત્તિભિઃ ॥ ૧,૧૧૪.૧૧॥

પરાધીના નિદ્રા પરહૃદયકૃત્યાનુસરણં સદા હેલા હાસ્યં નિયતમપિ શોકેન રહિતમ્ ।
પણે ન્યસ્તઃ કાયો વિટજનખુરૈર્દારિતગલો બહૂત્કણ્ઠવૃત્તિર્જગતિ
ગણિક્રાયા બહુમતઃ ॥ ૧,૧૧૪.૧૨॥

અગ્નિરાપઃ સ્ત્રિયો મૂર્ખાઃ સર્પા રાજકુલાનિ ચ ।
નિત્યં પરોપસેવ્યાનિ સદ્યઃ પ્રાણહરાણિ ષટ્ ॥ ૧,૧૧૪.૧૩॥

કિં ચિત્રં યદિ વેદ (શબ્દ) શાસ્ત્રકુશલો વિપ્રો ભવેત્પણ્ડિતઃ કિં
ચિત્રં યદિ દણ્ડનીતિકુશલો રાજા ભવેદ્ધાર્મિકઃ ।
કિં ચિત્રં યદિ રૂપયૌવનવતી સાધ્વી ભવેત્કામિની તચ્ચિત્રં યદિ
નિર્ધનોऽપિ પુરુષઃ પાપં ન કુર્યાત્ક્વચિત્ ॥ ૧,૧૧૪.૧૪॥

નાત્મચ્છિદ્રં પરે દદ્યાદ્વિદ્યાચ્છિદ્રં પરસ્ય ચ ।
ગૂહેત્કૂર્મ ઇવાઙ્ગાનિ પરભાવઞ્ચ લક્ષયેત્ ॥ ૧,૧૧૪.૧૫॥

પાતાલતલવા સિન્ય ઉચ્ચપ્રાકારસંસ્થિતાઃ ।
યદિ નો ચિકુરોદ્ભેદાલ્લભ્યન્તે કૈઃ સ્ત્રિયો ન હિ ॥ ૧,૧૧૪.૧૬॥

સમધર્મા હિ મર્મજ્ઞસ્તીક્ષ્ણઃ સ્વજનકણ્ટકઃ ।
ન તથા બાધતે શત્રુઃ કૃતવૈરો બહિઃ સ્થિતઃ ॥ ૧,૧૧૪.૧૭॥

સ પણ્ડિતો યો હ્યનુઞ્જયેદ્વૈ મિષ્ટેન બાલં વિનિયેન શિષ્ટમ્ ।
અર્થેન નારીં તપસા હિ દેવાન્સર્વાંશ્ચ લોકાંશ્ચ સુસંગ્રહેણ ॥ ૧,૧૧૪.૧૮॥

છલેન મિત્રં કલુષેણ ધર્મં પરોપતાપેન સમૃદ્ધિભાવનમ્ ।

સુખેન વિદ્યાં પુરુષેણ નારીં વાઞ્છન્તિ વૈ યે ન ચ પણ્ડિતાસ્તે ॥ ૧,૧૧૪.૧૯॥

ફલાર્થી ફલિનં વૃક્ષં યશ્છિન્દ્યાદ્દુર્મતિર્નરઃ ।
નિષ્ફલં તસ્ય વૈ કાર્યાં મહાદોષમવાપ્નુયાત્ ॥ ૧,૧૧૪.૨૦॥

સધનો હિ તપસ્વી ચ દૂરતો વૈ કૃતશ્રમઃ ।
મદ્યપ સ્ત્રી સતીત્યેવં વિપ્ર ન શ્રદ્દધામ્યહમ્ ॥ ૧,૧૧૪.૨૧॥

ન વિશ્વસેદવિશ્વસ્તે મિત્રસ્યાપિ ન વિશ્વસેત્ ।
કદાચિત્કુપિતં મિત્રં સર્વં ગુહ્યં પ્રકાશયેત્ ॥ ૧,૧૧૪.૨૨॥

સર્વભૂતેષુ વિશ્વાસઃ સર્વભૂતેષુ સાત્ત્વિકઃ ।
સ્વભાવમાત્મના ગૂહેદેતત્સાધોર્હિ લક્ષણમ્ ॥ ૧,૧૧૪.૨૩॥

યસ્મિન્કસ્મિન્કૃતે કાર્યે કર્તારમનુવર્તતે ।
સર્વથા વર્તમાનોઽપિ ધૈર્યબુદ્ધિન્તુ કારયેત્ ॥ ૧,૧૧૪.૨૪॥

વૃદ્ધાઃ સ્ત્રિયો નવં મદ્યં શુષ્કં માંસં ત્રિમૂલકમ્ ।
રાત્રૌ દધિ દિવા સ્વપ્નં વિદ્વાન્ષટ્પરિવર્જયેત્ ॥ ૧,૧૧૪.૨૫॥

વિષં ગોષ્ઠી દરિદ્રસ્ય વૃદ્ધસ્ય તરુણી વિષમ્ ।
વિષં કુશિક્ષિતા વિદ્યા અજીર્ણે ભોજનં વિષમ્ ॥ ૧,૧૧૪.૨૬॥

પ્રિયં ગાનમકુણ્ઠસ્ય નીચસ્યોચ્ચાસનં પ્રિયમ્ ।
પ્રિયં દાનં દરિદ્રસ્ય ભૂનશ્ચતરુણી પ્રિયા ॥ ૧,૧૧૪.૨૭॥

અત્યમ્બુપાનં કઠિનાશનઞ્ચ ધાતુક્ષયોવેગવિધારણઞ્ચ ।
દિવાશયો જાગરણઞ્ચ રાત્રૌ ષડ્ભિર્નરાણાં નિવસન્તિ રોગાઃ ॥ ૧,૧૧૪.૨૮॥

બાલાતપશ્ચાપ્યતિમૈથુનઞ્ચ શ્મશાનધૂમઃ કરતાપનઞ્ચ ।
રજસ્વલાવક્ત્રનિરીક્ષણઞ્ચ સુદીર્ઘમાયુર્નનુ કર્ષયેચ્ચ ॥ ૧,૧૧૪.૨૯॥

શુષ્કં માંસં સ્ત્રિયો વૃદ્ધા બાલાર્કસ્તરુણં દધિ ।
પ્રભાતે મૈથુનં નિદ્રા સદ્યઃ પ્રાણહરાણિ ષટ્ ॥ ૧,૧૧૪.૩૦॥

સદ્યઃ પક્વઘૃતં દ્રાક્ષા બાલા સ્ત્રી ક્ષીરભોજનમ્ ।
ઉષ્ણોદકં તરુચ્છાયા સદ્યઃ પ્રાણહરાણિ ષટ્ ॥ ૧,૧૧૪.૩૧॥

કૂપાદકં વટચ્છાયા નારીણાઞ્ચ પયોધરઃ ।
શીતકાલે ભવેદુષ્ણમુષ્ણકાલે ચ શીતલમ્ ॥ ૧,૧૧૪.૩૨॥

ત્રયો બલકરાઃ સદ્યો બાલાભ્યઙ્ગસુભોજનમ્ ।
ત્રયો બલહરાઃ સદ્યો હ્યધ્વા વૈ મૈથુનં જ્વરઃ ॥ ૧,૧૧૪.૩૩ ॥

શુષ્કં માંસં પયો નિત્યં ભાર્યામિત્રૈઃ સહૈવ તુ ।
ન ભોક્તવ્યં નૃપૈઃ સાર્ધં વિયોગં કુરુતે ક્ષણાત્ ॥ ૧,૧૧૪.૩૪ ॥

કુચેલિન દન્તમલોપધારિણં બહ્વાશિનં નિષ્ઠુરવાક્યભાષિણમ્ ।
સૂર્યોદયે હ્યસ્તમયેઽપિ શાયિનં વિમુઞ્ચતિ શ્રીરપિ ચક્રપાણિનમ્ ॥ ૧,૧૧૪.૩૫ ॥

નિત્યં છેદસ્તૃણાનં ધરણિવિલખનં પાદયોશ્ચાપમાર્ષ્ટિઃ
દન્તાનામપ્યશૌચં મલિનવસનતા રૂક્ષતા મૂર્ધજાનામ્ ।
દ્વે સધ્યે ચાપિ નિદ્રા વિવસનશયનં ગ્રાસહાસાતિરેકઃ સ્વાઙ્ગે પીઠે
ચ વાદ્યં નિધનમુપનયેત્કેશવસ્યાપિ લક્ષ્મીમ્ ॥ ૧,૧૧૪.૩૬ ॥

શિરઃ સુધૌતં ચરણૌ સુમાર્જિતૌ વરાઙ્ગનાસેવનમલ્પભોજનમ્ ।
અનગ્નશાયિત્વમપર્વમૈથુનં ચિરપ્રનષ્ટાં શ્રિયમાનયન્તિ ષટ્ ॥ ૧,૧૧૪.૩૭ ॥

યસ્ય કસ્ય તુ પુષ્પસ્ય પાણાડરસ્ય વિશેષતઃ ।
શિરસા ધાર્યમાણસ્ય હ્યલક્ષ્મીઃ પ્રતિહન્યતે ॥ ૧,૧૧૪.૩૮ ॥

દીપસ્ય પશ્ચિમા છાયા છાયા શય્યાસનસ્ય ચ ।
રજકસ્ય તુ યત્તીર્થલક્ષ્મીસ્તત્ર તિષ્ઠતિ ॥ ૧,૧૧૪.૩૯ ॥

બાલાતપઃ પ્રેતધૂમઃ સ્ત્રી વૃદ્ધા તરુણં દધિ ।
આયુષ્કામો ન સેવેત તથા સમાર્જનીરજઃ ॥ ૧,૧૧૪.૪૦ ॥

ગજાશ્વરથધાન્યાનાં ગવાઞ્ચૈવ રજઃ શુભમ્ ।
અશુભં ચ વિજાનીયાત્ખરોષ્ટ્રજાવિકેષુ ચ ॥ ૧,૧૧૪.૪૧ ॥

ગવાં રજો ધાન્યરજઃ પુત્રસ્યાઙ્ગભવં રજઃ ।
એતદ્રજો મહાશસ્તં મહાપાતકનાશનમ્ ॥ ૧,૧૧૪.૪૨ ॥

અજારજઃ ખરરજો યત્તુ સમાર્જનીરજઃ ।
એતદ્રજો મહાપાપં મહાકિલ્બિષકારકમ્ ॥ ૧,૧૧૪.૪૩ ॥

શૂર્પવાતો નખાગ્રામ્બુ સ્નાનવસ્ત્રમૃજોદકમ્ ।
કેશામ્બુ માર્જનીરેણુર્હન્તિ પુણ્યં પુરા કૃતમ્ ॥ ૧,૧૧૪.૪૪ ॥

વિપ્રયોર્વિપ્રવહ્ન્યોશ્ચ દમ્પત્યોઃ સ્વામિનોસ્તથા ।
અન્તરેણ ન ગન્તવ્યં હયસ્ય વૃષભસ્ય ચ ॥ ૧,૧૧૪.૪૫ ॥

સ્ત્રીષુ રાજાગ્નિસર્પેષુ સ્વાધ્યાયે શત્રુસેવને ।
ભોગાસ્વાદેષુ વિશ્વાસં કઃ પ્રાજ્ઞઃ કર્તુમર્હતિ ॥ ૧,૧૧૪.૪૬॥

ન વિશ્વસેદવિશ્વસ્તં વિશ્વસ્તં વિશ્વસ્તં નાતિવિશ્વસેત્ ।
વિશ્વાસાદ્ભયમુત્પન્નં મૂલાદપિ નિકૃન્તતિ ॥ ૧,૧૧૪.૪૭॥

વૈરિણા સહ સન્ધાય વિશ્વસ્તો યદિ તિષ્ઠતિ ।
સ વૃક્ષાગ્રે પ્રસુપ્તો હિ પતિતઃ પ્રતિબુધ્યતે ॥ ૧,૧૧૪.૪૮॥

નાત્યન્તં મૃદુના ભાવ્યં નાત્યન્તં ક્રૂરકર્મણા ।
મૃદુનૈવ મૃદું હન્તિ દારુણેનૈવ દારુણમ્ ॥ ૧,૧૧૪.૪૯॥

નાત્યન્તં સરલૈર્ભાવ્યં નાત્યન્તં મૃદુના તથા ।
સરલાસ્તત્ર છિદ્યન્તે કુબ્જાસ્તિષ્ઠન્તિ પાદપાઃ ॥ ૧,૧૧૪.૫૦॥

નમન્તિ ફલિનો વૃક્ષા નમન્તિ ગુણિનો જનાઃ ।
શુષ્કવૃક્ષાશ્ચ મૂર્ખાશ્ચ ભિદ્યન્તે ન નમન્તિ ચ ॥ ૧,૧૧૪.૫૧॥

અપ્રાર્થિતાનિ દુઃખાનિ યથૈવાયાન્તિ યાન્તિ ચ ।
માર્જાર ઇવ લુમ્પેત તથા પ્રાર્થયિતાર નરઃ ॥ ૧,૧૧૪.૫૨॥

પૂર્વં પશ્ચાચ્ચરન્ત્યાર્યે સદૈવ બહુસમ્પદઃ ।
વિપરીતમનાર્યે ચ યથેચ્છસિ તથા ચર ॥ ૧,૧૧૪.૫૩॥

ષટ્કર્ણો ભિદ્યતે મન્ત્રશ્ચતુઃ કર્ણશ્ચધાર્યતે ।
દ્વિકર્ણસ્ય તુ મન્ત્રસ્ય બ્રહ્માપ્યન્ત ન બુધ્યતે ॥ ૧,૧૧૪.૫૪॥

તયા ગવા કિં ક્રિયતે યા ન દોગ્ધ્રી ન ગર્ભિણી ।
કોઽર્થ પુત્રેણ જાતેન યો ન વિદ્વાન્ન ધાર્મિકઃ ॥ ૧,૧૧૪.૫૫॥

એકેનાપિ સુપુત્રેણ વિદ્યાયુક્તેન ધીમતા ।
કુલં પુરુષસિંહેન ચન્દ્રેણ ગગનં યથા ॥ ૧,૧૧૪.૫૬॥

એકેનાપિ સુવૃક્ષેણ પુષ્પિતેન સુગન્ધિના ।
વનં સુવાસિતં સર્વં સુપુત્રેણ કુલં યથા ॥ ૧,૧૧૪.૫૭॥

એકો હિ ગુણવાન્પુત્રો નિર્ગુણેન શતેન કિમ્ ।
ચન્દ્રો હન્તિ તમાંસ્યેકો ન ચ જ્યોતિઃ સહસ્રકમ્ ॥ ૧,૧૧૪.૫૮॥

લાલયેત્પઞ્ચ વર્ષાણિ દશ વર્ષાણિ તાડયેત્ ।
પ્રાપ્તે તુ ષોડશે વર્ષે પુત્રં મિત્રવદાચરેત્ ॥ ૧,૧૧૪.૫૯॥

જાયમાનો હરેદ્દારાન્વર્ધમાનો હરેદ્ધનમ્ ।
મ્રિયમાણો હરેત્પ્રાણાન્નાસ્તિ પુત્રસમો રિપુઃ ॥ ૧,૧૧૪.૬૦॥

કેચિન્મૃગમુખા વ્યાઘ્રાઃ કેચિદ્વ્યાઘ્રમુખા મૃગાઃ ।
તત્સ્વરૂપપહિજ્ઞાને હ્યવિશ્વાસઃ પદેપદે ॥ ૧,૧૧૪.૬૧॥

એકઃ ક્ષમાવતાં દોષો દ્વિતીયો નોપપદ્યતે ।
યદેનં ક્ષમયા યુક્તમશક્તં મન્યતે જનઃ ॥ ૧,૧૧૪.૬૨॥

એતદેવાનુમન્યેત ભોગા હિ ક્ષણભઙ્ગિનઃ ।
સ્નિગ્ધેષુ ચ વિદગ્ધસ્ય મતયો વૈ હ્યનાકુલાઃ ॥ ૧,૧૧૪.૬૩॥

જ્યેષ્ઠઃ પિતૃસમો ભ્રાતા મૃતે પિતરિ શૌનક ।
સર્વેષાં સ પિતા હિ સ્યાત્સર્વેષામનુપાલકઃ ॥ ૧,૧૧૪.૬૪॥

કનિષ્ઠેષુ ચ સર્વેષુ સમત્વેનાનુવર્તતે ।
સમાપભોગજીવેષુ યથૈવં તનયેષુ ચ ॥ ૧,૧૧૪.૬૫॥

બહૂનામલ્પસારાણાં સમવાયો હિ દારુણઃ ।
તૃણૈરાવેષ્ટિતા રજ્જુસ્તયા નાગોઽપિ બધ્યતે ॥ ૧,૧૧૪.૬૬॥

અપહૃત્ય પરસ્વં હિ યસ્તુ દાનં પ્રયચ્છતિ ।
સ દાતા નરકં યાતિ યસ્યાર્થાસ્તસ્ય તત્ફલમ્ ॥ ૧,૧૧૪.૬૭॥

દેવદ્રવ્યવિનાશેન બ્રહ્મસ્વહરણેન ચ ।
કુલાન્યકુલતાં યાન્તિ બ્રાહ્મણાતિક્રમેણ ચ ॥ ૧,૧૧૪.૬૮॥

બ્રહ્મઘ્ને ચ સુરાપે ચ ચોરે ભગ્નવ્રતે તથા ।
નિષ્કૃતિર્વિહિતા સદ્ભિઃ કૃતઘ્ને નાસ્તિ નિષ્કૃતિઃ ॥ ૧,૧૧૪.૬૯॥

નાશ્નન્તિ પિતરો દેવાઃ ક્ષુદ્રસ્ય વૃષલીપતેઃ ।
ભાર્યાજિતસ્ય નાશ્નન્તિ યસ્યાશ્ચોપપતિર્ગૃહે ॥ ૧,૧૧૪.૭૦॥

અકૃજજ્ઞમનાર્યઞ્ચ દીર્ઘરોષમનાર્જવમ્ ।
ચતુરો વિદ્ધિ ચાણ્ડાલાઞ્જાત્યા જાયેત પઞ્ચમઃ ॥ ૧,૧૧૪.૭૧॥

નોપેક્ષિતવ્યો દુર્બદ્ધિ શત્રુરલ્પોઽપ્યવજ્ઞયા ।
વહ્નિરલ્પોઽપ્યસંહાર્યઃ કુરુતે ભસ્મસાજ્જગત્ ॥ ૧,૧૧૪.૭૨॥

નવે વયસિ યઃ શાન્તઃ સ શાન્ત ઇતિ મે મતિઃ ।

ધાતુષુ ક્ષીયમાણેષુ શમઃ કસ્ય ન જાયતે ॥ ૧,૧૧૪.૭૩॥

પન્થાન ઇવ વિપ્રેન્દ્ર સર્વસાધારણાઃ શ્રિયઃ ।
મદીયા ઇતિ મત્વા વૈ ન હિ હર્ષયુતો ભવેત્ ॥ ૧,૧૧૪.૭૪॥

ચિત્તાયત્તં ધાતુવશ્યં શરીરં ચિત્તે નષ્ટે ધાતવો યાન્તિ નાશમ્ ।
તસ્માચ્ચિત્તં સર્વદા રક્ષણીયં સ્વસ્થે ચિત્તે ધાતવઃ સમ્ભવન્તિ ॥ ૧,૧૧૪.૭૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બૃહદ્ નીતિસારે ચતુર્દશોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૫
સૂત ઉવાચ ।
કુમાર્યાં ચ કુમિત્રં ચ કુરાજાનં કુપુત્રકમ્ ।
કુકન્યાં ચ કુદેશં ચ દૂરતઃ પરિવર્જયેત્ ॥ ૧,૧૧૫.૧॥

ધર્મઃ પ્રવ્રજિતસ્તપઃ પ્રચલિતં સત્યં ચ દૂરં ગતં પૃથ્વી
વન્ધ્યફલા જનાઃ કપટિનો લૌલ્યે સ્થિતા બ્રાહ્મણાઃ ।
મર્ત્યાઃ સ્ત્રીવશગાઃ સ્ત્રિયશ્ચ ચપલા નીચા જના ઉન્નતાઃ હા કષ્ટં
ખલુજીવિતં કલિયુગે ધન્યા જના યે મૃતાઃ ॥ ૧,૧૧૫.૨॥

ધન્યાસ્તે યે ન પશ્યન્તિ દેશભઙ્ગં કુલક્ષયમ્ ।
પરચિત્તગતાન્દારાન્પુત્રં કુવ્યસને સ્થિતમ્ ॥ ૧,૧૧૫.૩॥

કુપુત્રે નિર્વૃતિર્નાસ્તિ કુભાર્યાયાં કુતો રતિઃ ।
સુમિત્ર નાસ્તિ વિશ્વાસઃ કુરાજ્યે નાસ્તિ જીવિતમ્ ॥ ૧,૧૧૫.૪॥

પરાન્નં ચ પરસ્વં ચ પરશય્યાઃ પરસ્ત્રિયઃ ।
પરવેશ્મનિ વાસશ્ચ શક્રાદપિ હરેચ્છ્રિયમ્ ॥ ૧,૧૧૫.૫॥

આલાપાદ્ગાત્રસંસ્પર્શાત્સંસર્ગાત્સહ ભોજનાત્ ।
આસનાચ્છયનાદ્યાનાત્પાપં સંક્રમતે નૃણામ્ ॥ ૧,૧૧૫.૬॥

સ્ત્રિયો નશ્યન્તિ રૂપેણ તપઃ ક્રોધન નશ્યતિ ।
ગાવો દ્રરપ્રચારેણ શૂદ્રાન્નેન દ્વિજોત્તમઃ ॥ ૧,૧૧૫.૭॥

આસનાદેકશય્યાયાં બોજનાત્પઙ્ક્તિસઙ્કુરાત્ ।
તતઃ સંક્રમતે પાપં ઘટાદ્ઘટ ઇવોદકમ્ ॥ ૧,૧૧૫.૮॥

લાલને બહવો દોષાસ્તાડને બહવો ગુણાઃ ।
તસ્માચ્છિષ્યં ચ પુત્રં ચ તાડયેન્ન તુ લાલયેત્ ॥ ૧,૧૧૫.૯ ॥

અધ્વા જરા દેહવતાં પર્વતાનાં જલં જરા ।
અસંભોગશ્ચ નારીણાં વસ્ત્રાણામાતપો જરા ॥ ૧,૧૧૫.૧૦ ॥

અધમાઃ કલિમિચ્છન્તિ સન્ધિમિચ્છતિ મધ્યમાઃ ।
ઉત્તમા માનમિચ્છન્તિ માનો હિ મહતાં ધનમ્ ॥ ૧,૧૧૫.૧૧ ॥

માનો હિ મૂલમર્થસ્ય માને સતિ ધનેન કિમ્ ।
પ્રભ્રષ્ટમાનદર્પસ્ય કિં ધનેન કિમાયુષા ॥ ૧,૧૧૫.૧૨ ॥

અધમા ધનમિચ્છન્તિ ધનમાનૌ હિ મધ્યમાઃ ।
ઉત્તમા માનમિચ્છન્તિ માનો હિ મહતાં ધનમ્ ॥ ૧,૧૧૫.૧૩ ॥

વનેઽપિ સિંહા ન નમન્તિ કં ચ બુભુ ક્ષિતા માંસનિરીક્ષણં ચ ।
ધનૈર્વિહીનાઃ સુકુલેષુ જાતા ન નીચકર્માણિ સમારભન્તે ॥ ૧,૧૧૫.૧૪ ॥

નાભિષેકો ન સંસ્કારઃ સિંહસ્ય ક્રિયતે વને ।
નિત્યમૂર્જિતસત્ત્વસ્ય સ્વયમેવ મૃગેન્દ્રતા ॥ ૧,૧૧૫.૧૫ ॥

વણિક્પ્રમાદી ભૃકશ્ચ માની ભિક્ષુર્વિલાસી હ્યધનશ્ચ કામી ।
વરાઙ્ગના ચાપ્રિયવાદિની ચ ન તે ચ કર્માણિ સમારભન્તે ॥ ૧,૧૧૫.૧૬ ॥

દાતા દરિદ્રઃ કૃપણોઽર્થયુક્તઃ પુત્ત્રોઽવિધેયઃ કુજનસ્ય સેવા ।
પરોપકારેષુ નરસ્ય મૃત્યુઃ પ્રજાયતે દુશ્ચરિતાનિ પઞ્ચ ॥ ૧,૧૧૫.૧૭ ॥

કાન્તાવિયોગઃ સ્વજનાપમાનં ઋણસ્ય શેષઃ કુજનસ્ય સેવા ।
દારિદ્યાભાવાદ્વિમુખાશ્ચ મિત્રા વિનાગ્નિના પઞ્ચ દહન્તિ તીવ્રાઃ ॥ ૧,૧૧૫.૧૮ ॥

ચિન્તાસહસ્રેષુ ચ તેષુ મધ્યે ચિન્તાશ્ચતસ્રોઽપ્યસિધારતુલ્યાઃ ।
નીચાપમાનં ક્ષુધિતં કલત્રં ભાર્યા વિરક્તા સહજોપરોધઃ ॥ ૧,૧૧૫.૧૯ ॥

વશ્યશ્ચ પુત્રોઽર્થ કરી ચ વિદ્યા અરોગિતા સજ્જનસઙ્ગતિશ્ચ ।
ઇષ્ટા ચ ભાર્યા વશવર્તિની ચ દુઃખસ્ય મૂલોદ્ધરણાનિ પઞ્ચ ॥ ૧,૧૧૫.૨૦ ॥

કુરઙ્ગમાતઙ્ગપતઙ્ગંભૃગ મીના હતાઃ પઞ્ચભિરેવ પઞ્ચ ।
એકઃ પ્રમાથી સ કથં ન ઘાત્યો યઃ સેવતે પઞ્ચભિરેવ પઞ્ચ ॥ ૧,૧૧૫.૨૧ ॥

અધીરઃ કર્કશઃ સ્તબ્ધઃ કુચેલઃ સ્વયમાગતઃ ।
પઞ્ચ વિપ્રા ન પૂજ્યન્તે બૃહસ્પતિસમા અપિ ॥ ૧,૧૧૫.૨૨ ॥

આયુઃ કર્મ ચ વિત્તં ચ વિદ્યા નિધનમેવ ચ ।
પઞ્ચૈતાનિ વિવિચ્યન્તે જાયમાનસ્ય દેહિનઃ ॥ ૧,૧૧૫.૨૩॥

પર્વતારોહણે તોયે ગોકુલે દુષ્ટનિગ્રહે ।
પતિતસ્ય સમુત્થાને શસ્તાઃ પઞ્ચ (હ્યેતે) ગુણાઃ સ્મૃતાઃ ॥ ૧,૧૧૫.૨૪॥

અભ્રચ્છાયા ખલે પ્રીતિઃ પરનારીષુ સંગતિઃ ।
પઞ્ચૈતે હ્યસ્થિરા ભાવા યૌવનાનિ ધનાનિ ચ ॥ ૧,૧૧૫.૨૫॥

અસ્થિરં જીવિતં લોકે અસ્થિરં ધનયૌવનમ્ ।
અસ્થિરં પુત્રદારાદ્યં ધર્મઃ કીર્તિર્યશઃ સ્થિરમ્ ॥ ૧,૧૧૫.૨૬॥

શત જીવિતમત્યલ્પં રાત્રિસ્તસ્યાર્ધહારિણી ।
વ્યાધિશોકજરાયાસૈરર્ધં તદપિ નિષ્ફલમ્ ॥ ૧,૧૧૫.૨૭॥

આયુર્વર્ષશતં નૃણાં પરિમિતં રાત્રૌ તદર્ધં ગતં
તસ્યાર્ધસ્થિતકિઞ્ચિદર્ધમધિકં બાલ્યસ્ય કાલે ગતમ્ ।
કિઞ્ચિદ્બન્ધુવિયોગદુઃખમરણૈર્ભૂપાલસેવાગતં શેષં
વારિતરઙ્ગગર્ભચપલં માનેન કિં માનિનામ્ ॥ ૧,૧૧૫.૨૮॥

અહોરાત્રમયો લોકે જરારૂપેણ સંચરેત્ ।
મૃત્યુર્ગ્રસતિ ભૂતાનિ પવનં પન્નગો યથા ॥ ૧,૧૧૫.૨૯॥

ગચ્છતસ્તિષ્ઠતો વાપિ જાગ્રતઃ સ્વપતો ન ચેત્ ।
સર્વસત્ત્વહિતાર્થાય પશોરિવ વિચેષ્ટિતમ્ ॥ ૧,૧૧૫.૩૦॥

અહિતહિતવિચારશૂન્યબુદ્ધેઃ શ્રુતિસમયે બહુભિર્વિતર્કિતસ્ય ।
ઉદરભરણમાત્રતુષ્ટબુદ્ધેઃ પુરુષપશોશ્ચ પશોશ્ચ કો વિશેષઃ ॥ ૧,૧૧૫.૩૧॥

શૌર્યે તપસિ દાને ચ યસ્ય ન પ્રથિતં યશઃ ।
વિદ્યાયામર્થલાભે વા માતુરુચ્ચાર એવ સઃ ॥ ૧,૧૧૫.૩૨॥

યજ્જીવ્યતે ક્ષણમપિ પ્રથિતં મનુષ્યૈર્વિજ્ઞાનવિક્રમયશોભિરભગ્નમાનૈઃ ।
તન્નામ જીવિતમિતિ પ્રવદન્તિ તજ્જ્ઞાઃ કાકોઽપિ જીવતિ ચિરં ચ
બલિં ચ ભુઙ્ક્તે ॥ ૧,૧૧૫.૩૩॥

કિં જીવિતેન ધનમાનવિવર્જિતેન મિત્રેણ કિં ભવતિ ભીતિસશઙ્કિતેન ।
સિંહવ્રતં ચરત ગચ્છત મા વિષાદં કાકોઽપિ જીવતિ ચિરં

ચ બલિં ચ ભુઙ્ક્તે ॥ ૧,૧૧૫.૩૪॥

યો વાત્મનીહ ન ગુરૌ ન ચ ભૃત્યવર્ગે દીને દયાં ન કુરુતે ન ચ મિત્રકાર્યે ।
કિં તસ્ય જીવિતફલેનમનુષ્યલોકે કાકોઽપિ જીવતિ ચિરં ચ
બલિં ચ ભુઙ્ક્તે ॥ ૧,૧૧૫.૩૫॥

યસ્ય ત્રિવર્ગશૂન્યાનિ દિનાન્યાયાન્તિ યાન્તિ ચ ।
સ લૌહકારભસ્ત્રેવ શ્વસન્નપિ ન જીવતિ ॥ ૧,૧૧૫.૩૬॥

સ્વાધીનવૃત્તેઃ સાફલ્યં ન પરાધીનવર્તિતા ।
યે પરાધીનકર્માણો જીવન્તોઽપિ ચ તે મૃતાઃ ॥ ૧,૧૧૫.૩૭॥

સુ(સ્વ) પૂરા વૈ કાપુરુષાઃ સુ(સ્વ) પૂરો મૂષિકાઞ્જલિઃ ।
અસન્તુષ્ટઃ કાપુરુષઃ સ્વલ્પકેનાપિ તુષ્યતિ ॥ ૧,૧૧૫.૩૮॥

અભ્રચ્છાયા તૃણાદગ્નિર્નીચસેવા પથો જલમ્ ।
વેશ્યારાગઃ ખલે પ્રીતિઃ ષડેતે બુદ્બુદોપમાઃ ॥ ૧,૧૧૫.૩૯॥

વાચા વિહિતસાર્થેન લોકો ન ચ સુખાયતે ।
જીવિતં માનમૂલં હિ માને મ્લાને કુતઃ સુખમ્? ॥ ૧,૧૧૫.૪૦॥

અબલસ્ય બલં રાજા બાલસ્ય રુદિતં બલમ્ ।
બલં મૂર્ખસ્ય મૌનં હિ તસ્કરસ્યાનૃતં બલમ્ ॥ ૧,૧૧૫.૪૧॥

યથાયથા હિ પુરુષઃ શાસ્ત્રં સમધિગચ્છતિ ।
તથાતથાસ્ય મેધા સ્યાદ્વિજ્ઞાનં ચાસ્ય રોચતે ॥ ૧,૧૧૫.૪૨॥

યથાયથા હિ પુરુષઃ કલ્યાણે કુરુતે મતિમ્ ।
તથાતથા હિ સર્વત્ર શ્લિષ્યતે લોકસુપ્રિયઃ ॥ ૧,૧૧૫.૪૩॥

લોભપ્રમાદવિશ્વાસૈઃ પુરુષો નશ્યતિ ત્રિભિઃ ।
તસ્માલ્લોભો ન કર્તવ્યઃ પ્રમાદો નોન વિશ્વસેત્ ॥ ૧,૧૧૫.૪૪॥

તાવદ્ભયસ્ય ભેતવ્યં યાવદ્ભયમનાગતમ્ ।
ઉત્પન્ને તુ ભયે તીવ્રે સ્થાતવ્યં વૈ હ્યભીતવત્ ॥ ૧,૧૧૫.૪૫॥

ઋણશેષં ચાગ્નિશેષં વ્યાધિશેષં તથૈવ ચ ।
પુનઃ પુનઃ પ્રવર્ધન્તે તસ્માચ્છેષં ન કારયેત્ ॥ ૧,૧૧૫.૪૬॥

કૃતે પ્રતિકૃતં કુર્યાદ્ધિંસિતે પ્રતિહિંસિતમ્ ।
ન તત્ર દોષં પશ્યામિ દુષ્ટે દોષં સમાચરેત્ ॥ ૧,૧૧૫.૪૭॥

પરોક્ષે કાર્યહન્તારં પ્રત્યક્ષે પ્રિયવાદિનમ્ ।
વર્જયેત્તાદૃશં મિત્રં માયામયમરિં તથા ॥ ૧,૧૧૫.૪૮॥

દુર્જનસ્ય હિ સંગેન સુજનોઽપિ વિનશ્યતિ ।
પ્રસન્નમપિ પાનીયં કર્દમૈઃ કલુષીકૃતમ્ ॥ ૧,૧૧૫.૪૯॥

સ ભુઙ્ક્તે સદ્દ્વિજો ભુઙ્ક્તે સમશેષનિરૂપણમ્ ।
તસ્માત્સર્વપ્રયત્નેન દ્વિજઃ પૂજ્યઃ પ્રયત્નતઃ ॥ ૧,૧૧૫.૫૦॥

તદ્ભુજ્યતે યદ્વિજભુક્તશેષં સ બુદ્ધિમાન્યો ન કરોતિ પાપમ્ ।
તત્સૌહૃદં યક્રિયતે પરોક્ષે દમ્ભૈર્વિના યઃ ક્રિયતે સ ધર્મઃ ॥ ૧,૧૧૫.૫૧॥

ન સા સભા યત્ર ન સન્તિ વૃધ્દ્ધાઃ વૃધ્દ્ધા ન તે યે ન વદન્તિ ધર્મમ્ ।
ધર્મઃ સ નો યત્ર ન સત્યમસ્તિ નૈતત્સત્યં યચ્છલેનાનુવિદ્ધમ્ ॥ ૧,૧૧૫.૫૨॥

બ્રાહ્મણોઽપિ મનુષ્યાણામાદિત્યશ્ચૈવ તેજસામ્ ।
શિરોઽપિ સર્વગાત્રાણાં વ્રતાનાં સત્યમુત્તમમ્ ॥ ૧,૧૧૫.૫૩॥

તન્મઙ્ગલં યત્ર મનઃ પ્રસન્નં તજ્જીવનં યન્ન પરસ્ય સેવા ।
તદર્જિતં યત્સ્વજનેન ભુક્તં તદ્ગર્જિતં યત્સમરે રિપૂણામ્ ॥ ૧,૧૧૫.૫૪॥

સા સ્ત્રીયા ન મદં કુર્યાત્સ સુખી તૃષ્ણયોજ્ઝિતઃ ।
તન્મિત્રં યત્ર વિશ્વાસઃ પુરુષઃ સ જિતેન્દ્રિયઃ ॥ ૧,૧૧૫.૫૫॥

તત્ર મુક્તાદરસ્નેહો વિલુપ્તં યત્ર સૌહૃદમ્ ।
તદેવ કેવલં શ્લાઘ્યં યસ્યાત્મા ક્રિયતે સ્તુતૌ ॥ ૧,૧૧૫.૫૬॥

નદીનામગ્નિહોત્રાણાં ભારતસ્ય કલસ્ય ચ ।
મૂલાન્વેષો ન કર્તવ્યો મૂલાદ્દોષો ન હીયતે ॥ ૧,૧૧૫.૫૭॥

લવણજલાન્તા નદ્યઃ સ્ત્રીભેદાન્તં ચ મૈથુનમ્ ।
પૈશુન્યં જનવાર્તાન્તં વિત્તં દુઃખત્રયાન્તકમ્ ॥ ૧,૧૧૫.૫૮॥

રાજ્યશ્રીર્બ્રહ્મશાપાન્તા પાપાન્તં બ્રહ્મવર્ચસમ્ ।
આચાન્તં ઘોષવાસાન્તં કુલસ્યાન્તં સ્ત્રિયા પ્રભો (ભુઃ) ॥ ૧,૧૧૫.૫૯॥

સર્વે ક્ષયાન્તા નિલયાઃ પતનાન્તાઃ સમુચ્છ્રયાઃ ।
સંયોગા વિપ્રયોગાન્તા મરણાન્તં હિ જીવિતમ્ ॥ ૧,૧૧૫.૬૦॥

યદીચ્છેત્પુનરાગન્તું નાતિદૂરમનુવ્રજેત્ ।

ઉદકાન્તાન્નિવર્તેત સ્નિગ્ધવર્ણાચ્ચ પાદપાત્ ॥ ૧,૧૧૫.૬૧॥

અનાયકે ન વસ્તવ્યં ન ચૈવ બહુનાયકે ।
સ્ત્રીનાયકે ન વસ્તવ્યં વસ્તવ્યં બાલનાયકે ॥ ૧,૧૧૫.૬૨॥

પિતા રક્ષતિ કૌમારે ભત્તા રક્ષતિ યૌવને ।
પુત્રસ્તુ સ્થવિરે કાલે ન સ્ત્રી સ્વાતન્ત્ર્યમર્હતિ ॥ ૧,૧૧૫.૬૩॥

ત્યજેદ્વન્ધ્યામષ્ટમેઽબ્દે નવમે તુ મૃતપ્રિજામ્ ।
એકાદશે સ્ત્રીજનનીં સદ્યશ્ચાપ્રિયાવાદિનીમ્ ॥ ૧,૧૧૫.૬૪॥

અનર્થિત્વાન્મનુષ્યાણાં ભિયા પરિજનસ્ય ચ ।
અર્થાદપેતમર્યાદાસ્ત્રયસ્તિષ્ઠન્તિ ભર્તૃષુ ॥ ૧,૧૧૫.૬૫॥

અશ્વં શ્રાન્તં ગજં મત્તં ગાવઃ પ્રથમસૂતિકાઃ ।
અનૂદકે ચ મણ્ડૂકાન્પ્રાજ્ઞો દૂરેણ વર્જયેત્ ॥ ૧,૧૧૫.૬૬॥

અર્થાતુરાણાં ન સુહૃન્ન બન્ધુઃ કામાતુરાણાં ન ભયં ન લજ્જા ।
ચિન્તાતુરાણાં ન સુખં ન નિદ્રા ક્ષુધાતુરાણાં ન બલં ન તેજઃ ॥ ૧,૧૧૫.૬૭॥

કુતો નિદ્રા દરિદ્રસ્ય પરપ્રેષ્યવરસ્ય ચ ।
પરનારીપ્રસક્તસ્ય પરદ્રવ્યહરસ્ય ચ ॥ ૧,૧૧૫.૬૮॥

સુખં સ્વપિત્યનૃણવાન્વ્યાધિમુક્તશ્ચ યો નરઃ ।
સાવકાશસ્તુ વૈ ભુઙ્ક્તે યસ્તુ દારૈર્ન સઙ્ગતઃ ॥ ૧,૧૧૫.૬૯॥

અમ્ભસઃ પરિમાણે ઉન્નતં કમલં ભવેત્ ।
સ્વસ્વામિના બલવતા ભૃત્યો ભવતિ ગર્વિતઃ ॥ ૧,૧૧૫.૭૦॥

સ્થાનસ્થિતસ્ય પદ્મસ્ય મિત્રે વરુણભાસ્કરૌ ।
સ્થાનચ્યુતસ્ય તસ્યૈવ ક્લેદશોષણકારકૌ ॥ ૧,૧૧૫.૭૧॥

યે પદસ્થસ્ય મિત્રાણિ તે તસ્ય રિપુતાં ગતાઃ ।
ભાનોઃ પદ્મે જલે પ્રીતિઃ સ્થલોદ્ધરણશોષણઃ ॥ ૧,૧૧૫.૭૨॥

સ્થાનસ્થિતાનિ પૂજ્યન્તે પૂજ્યન્તે ચ પદે સ્થિતાઃ ।
સ્થાનભ્રષ્ટા ન પૂજ્યન્તે કેશા દન્તા નખા નરાઃ ॥ ૧,૧૧૫.૭૩॥

આચારઃ કુલમાખ્યતિ દેશમાખ્યાતિ ભાષિતમ્ ।
સમ્ભ્રમઃ સ્નેહમાખ્યાતિ વપુરાખ્યાતિ ભોજનમ્ ॥ ૧,૧૧૫.૭૪॥

વૃથા વૃષ્ટિઃ સમુદ્રસ્ય વૃથા તૃપ્તસ્ય ભોજનમ્ ।
વૃથા દાનં સમૃદ્ધસ્ય નીચસ્ય સુકૃતં વથા ॥ ૧,૧૧૫.૭૫॥

દૂરસ્થોઽપિ સમીપસ્થો યો યસ્ય હૃદયે સ્થિતઃ ।
હૃદયાદપિ નિષ્ક્રાન્તઃ સમીપસ્થોઽપિ દૂરતઃ ॥ ૧,૧૧૫.૭૬॥

મુખભઙ્ગઃ સ્વરો દીનો ગાત્રસ્વેદો મહદ્ભયમ્ ।
મરણે યાનિ ચિહ્નાનિ તાનિ ચિહ્નાનિ યાચકે ॥ ૧,૧૧૫.૭૭॥

કુબ્જસ્ય કીટઘાતસ્ય વાતાન્નિષ્કાસિતસ્ય ચ ।
શિખરે વસતસ્તસ્ય વરં જન્મ ન યાચિતમ્ ॥ ૧,૧૧૫.૭૮॥

જગત્પતિર્હિ યાચિત્વા વિષ્ણુર્વામનતાં યતઃ ।
કાન્યોઽધિકતરસ્તસ્ય યોઽર્થો યાતિ ન લાઘવમ્ ॥ ૧,૧૧૫.૭૯॥

માતા શત્રુઃ પિતા વૈરી બાલા યેન ન પાઠિતાઃ ।
સભામધ્યે ન શોભન્તે હંસમધ્યે બકાયથા ॥ ૧,૧૧૫.૮૦॥

વિદ્યા નામ કુરૂપરૂપમધિકં વિદ્યાતિગુમં ધનં વિદ્યા સાધુકરી
જનપ્રિયકરી વિદ્યા ગુરૂણાં ગુરુઃ ।
વિદ્યા બન્ધુજનાર્તિનાશનકરી વિદ્યા પરં દૈવતં વિદ્યા રાજસુ
પૂજિતા હિ મનુજો વિદ્યવિહીનઃ પશુઃ ॥ ૧,૧૧૫.૮૧॥

ગૃહે ચાભ્યન્તરે દ્રવ્યં લગ્નં ચૈવ તુ દૃશ્યતે ।
અશેષં હરણીયં ચ વિદ્યા ન હ્રિયતે પરૈઃ ॥ ૧,૧૧૫.૮૨॥

શૌનકીયં નીતિસારં વિષ્ણુઃ સર્વત્રતાનિ ચ ।
કથયામાસ વૈપૂર્વં તત્ર શુશ્રાવ શઙ્કરઃ ।
શઙ્કરાદશૃણોદ્વ્યાસો વ્યાસાદસ્માભિરેવ ચ ॥ ૧,૧૧૫.૮૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શૌનકોક્તનીતિસારાદિવર્ણનં નામ પઞ્ચદશોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૬

બ્રહ્મોવાચ ।
વ્રતાનિ વ્યાસ વક્ષ્યામિ હરિર્યૈઃ સર્વદો ભવેત્ ।
સર્વમાસર્ક્ષતિથિષુ વારેષુ હરિરર્ચિતઃ ॥ ૧,૧૧૬.૧॥

એકભક્તેન નક્તેન ઉપવાસફલાદિના ।
દદાતિ ધનધાન્યાદિ પુત્રરાજ્યજયાદિકમ્ ॥ ૧,૧૧૬.૨॥

વૈશ્વાનરઃ પ્રતિપદિ કુબેરઃ પૂજિતોઽર્થદઃ ।
પોષ્ય બ્રહ્મો પ્રતિપદ્યર્ચિતઃ શ્રીસ્તથાશ્વિની ॥ ૧,૧૧૬.૩॥

દ્વિતીયાયાં યમો લક્ષ્મીનારાયણ ઇહાર્થદઃ ।
તૃતીયાયાં ત્રિદેવાશ્ચ ગૌરીવિઘ્નેશશઙ્કરાઃ ॥ ૧,૧૧૬.૪॥

ચતુર્થ્યાં ચ ચતુર્વ્યૂહઃ પઞ્ચમ્યામર્ચિતો હરિઃ ।
કાર્તિકેયો રવિઃ ષષ્ઠ્યાં સપ્તમ્યાં ભાસ્કરોઽર્થદઃ ॥ ૧,૧૧૬.૫॥

દુર્ગાષ્ટમ્યાં નવમ્યાં ચ માતરોઽથ દિશોઽર્થદાઃ ।
દશમ્યાં ચ યમશ્ચન્દ્ર એકાદશ્યામૃષીન્યજેત્ ॥ ૧,૧૧૬.૬॥

દ્વાદશ્યાં ચ હરિઃ કામસ્ત્રયોદશ્યાં મહેશ્વરઃ ।
ચતુર્દશ્યાં પઞ્ચદશ્યાં બ્રહ્મા ચ પિતરોઽર્થદાઃ ॥ ૧,૧૧૬.૭॥

અમાવાસ્યાં પૂજનીયા વારા વૈ ભાસ્કરાદયઃ ।
નક્ષત્રાણિ ચ યોગાશ્ચ પૂજિતાઃ સર્વદાયકાઃ ॥ ૧,૧૧૬.૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
તિથ્યાદિવ્રતવર્ણનં નામ ષોડશોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૭
બ્રહ્મોવાચ ।
માર્ગશીર્ષે સિતે પક્ષે વ્યાસાંનઙ્ગત્રયોદશી ।
મલ્લિકાજં દન્તકાષ્ઠં ધુતૂરૈઃ પૂજયેચ્છિવમ્ ॥ ૧,૧૧૭.૧॥

અનઙ્ગાયેતિ નૈવેદ્યં મધપ્રાશ્યાથ પૌષકે ।
યોગેશ્વરં પૂજયેચ્ચ બિલ્વપત્રૈઃ કદમ્બજમ્ ।
દન્તકાષ્ઠં ચન્દનાદિ નૈવેદ્યં કૃસરાદિકમ્ ॥ ૧,૧૧૭.૨॥

માઘે નટેશ્વરાયાર્ચ્ય કુન્દૈર્મૌક્તિકમાલયા ।
પ્લક્ષેણ દન્તકાષ્ઠં ચ નૈવેદ્યં પૂરિકા મુને ॥ ૧,૧૧૭.૩॥

વીરેશ્વરં ફાલ્ગુને તુ પૂજયેત્તુ મરૂબકૈઃ ।
શર્કરાશાકમણ્ડાશ્ચ ચૂતજં દન્તધાવનમ્ ॥ ૧,૧૧૭.૪॥

ચૈત્રે યજેત્સુ રૂપાય કર્પૂરં પ્રાશયેન્નિશિ ।
દન્તધાવનાટજં નૈવેદ્યં શષ્કુલીં દદેત્ ॥ ૧,૧૧૭.૫॥

પૂજા દમનકઃ શમ્ભોર્વૈશાખેઽશોકપુષ્પકૈઃ ।
મહારૂપાય નૈવેદ્યં ગુડભક્તં પુટ્ટબરમ્ ॥ ૧,૧૧૭.૬॥

દન્તકાષ્ઠં પ્રાશયેચ્ચ દદેજ્જતીફલં તથા ।
પ્રદ્યુમ્નં પૂજયેજ્જ્યેષ્ઠે ચમ્પકૈર્બિલ્વજં દશેત્ ॥ ૧,૧૧૭.૭॥

લવગારા તથા ષઢિ ઉમામદતિ શાસનઃ? ।
અગુરું દન્તકાષ્ઠં ચ તમપામાર્ગકૈર્યજેત્ ॥ ૧,૧૧૭.૮॥

શ્રાવણે કરવીરં ચ શમ્ભવે શૂલપાણયે ।
ગન્ધાશનો ઘૃતાદ્યૈશ્ચ કરવીરજશોધનમ્ ॥ ૧,૧૧૭.૯॥

સદ્યોજાતં ભાદ્રપદે બકુલૈઃ પૂપકૈર્યજેત્ ।
ગન્ધર્વાશો મદનકમાશ્વિને ચ સુરાધિપમ્ ॥ ૧,૧૧૭.૧૦॥

ચમ્પકૈઃ સ્વર્ણવા (ધાર્) યાદો જિન્મોદકસમ્પ્રદઃ ।
ખાદિરં દન્તકાષ્ઠં ચ કાર્તિકે રુદ્રમર્ચયેત્ ॥ ૧,૧૧૭.૧૧॥

બદર્યા દન્તકાષ્ઠં ચ મદનો દશમાશનઃ ।
ક્ષીરશાકપ્રદઃ પદ્મૈરબ્દન્તે શિવમર્ચયેત્ ॥ ૧,૧૧૭.૧૨॥

રતિમુક્તમનઙ્ગં ચ સ્વર્ણમણ્ડલસંસ્થિતમ્ ।
ગન્ધાદ્યૈર્દશસાહસ્રં તિલવ્રીહ્યાદિ હોમયેત્ ॥ ૧,૧૧૭.૧૩॥

જાગરં ગીતવદિત્રં પ્રભિતઽભ્યાર્ચ્ય વેદયેત્ ।
દ્વિજાય શય્યાં પાત્રં ચ છત્રં વસ્ત્રમુપાનહૌ ॥ ૧,૧૧૭.૧૪॥

ગાં દ્વિજં ભોજયેદ્ભક્ત્યા કૃતકૃત્યો ભવેન્નરઃ ।
એતદુદ્યાપનં સર્વં વ્રતેષુ ધ્યેપમીદૃશમ્ ।
ફલઞ્ચ શ્રીસુતારોગ્યસૌભાગ્યસ્વર્ગતં ભવેત્ ॥ ૧,૧૧૭.૧૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઽનઙ્ગત્રયોદશીવ્રતં નામ સપ્તદશોત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૮
બ્રહ્મોવાચ ।

વ્રતં કૈવલ્યશમનમખણ્ડદ્વાદશીં વદે ।
માર્ગશીર્ષે સિતે પક્ષે ગવ્યાશી સમુપોષિતઃ ॥ ૧,૧૧૮.૧॥

દ્વાદશ્યાં પૂજયે દ્વિષ્ણું દદ્યાન્માસચતુષ્ટયમ્ ।
પઞ્ચવ્રીહિયુતં પાત્રં વિપ્રાયેદમુદાહરેત્ ॥ ૧,૧૧૮.૨॥

સપ્તજન્મનિ હે વિષ્ણો યન્મયા હિ વ્રતં કૃતમ્ ।
ભગવંસ્ત્વત્પ્રસાદેન તદખણ્ડમિહાસ્તુ મે ॥ ૧,૧૧૮.૩॥

યથાખણ્ડં જગત્સર્વં ત્વમેવ પુરુષોત્તમ ।
તથાખિલાન્યખણ્ડાનિ વ્રિતાનિ મમ સન્તિ વૈ ॥ ૧,૧૧૮.૪॥

સક્તુપાત્રાણિ ચૈત્રાદૌ શ્રાવણાદૌ ધૃતાન્વિતાન્ ।
વ્રતકૃદ્વ્રતપૂર્ણસ્તુ સ્ત્રીપુત્રસ્વર્ગભાગ્ભવેત્ ॥ ૧,૧૧૮.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઽખણ્ડદ્વાદશીવ્રતકથનંનામાષ્ટાદશોત્તર શતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧૯

બ્રહ્મોવાચ ।
અગસ્ત્યાર્ઘ્યવ્રતં વક્ષ્યે ભુક્તિમુક્તિપ્રદાયકમ્ ।
અપ્રાપ્તે ભાસ્કરે કન્યાં સતિ ભાગે ત્રિભિર્દિનૈઃ ॥ ૧,૧૧૯.૧॥

અર્ઘ્યં દદ્યાદગસ્ત્યાય મૂર્તિં સમ્પૂજ્ય વૈ મુને ! ।
કાશપુષ્પમયીં કુમ્ભે પ્રદોષે કૃતજાગરઃ ॥ ૧,૧૧૯.૨॥

દધ્યક્ષતાદ્યૈઃ સમ્પૂજ્ય ઉપોષ્ય ફલપુષ્પકૈઃ ।
પઞ્ચવર્ણસમાયુક્તં હેમરૌપ્યસમન્વિતમ્ ॥ ૧,૧૧૯.૩॥

સપ્તધાન્યયુતં પાત્રં દધિચન્દનચર્ચિતમ્ ।
અગસ્ત્યઃ ખનમાનેતિ મન્ત્રેણાર્ઘ્યં પ્રિદાપયેત્ ॥ ૧,૧૧૯.૪॥

ખાસપુષ્પપ્રતીકાશ અગ્નિમારુતસમ્ભવ ! ।
મિત્રાવારુણયોઃ પુત્રો કુમ્ભયોને નમોઽસ્તુ તે ॥ ૧,૧૧૯.૫॥

શૂદ્રસ્ત્ર્યાદિરનેનૈવ ત્યજેદ્ધાન્યં ફલં રસમ્ ।
દદ્યાદ્દ્વિજાતયે કુમ્ભં સહિરણ્યં સદક્ષિણમ્ ।
ભોજયેચ્ચ દ્વિજાન્સપ્ત વર્ષં કૃત્વા તુ સર્વભાક્ ॥ ૧,૧૧૯.૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઽગસ્ત્યાર્ઘ્યવ્રતં નામકોનવિંશત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૦

બ્રહ્મોવાચ ।

રમ્ભાતૃતીયાં વક્ષ્ય ચ સૌભગ્યશ્રીસુતાદિદામ્ ।
માર્ગશીર્ષેસિતે પક્ષે તૃતીયાયામુપોષિતઃ ॥ ૧,૧૨૦.૧॥

ગૌરીં યજેદ્બિલ્વપત્રૈઃ કુશોદકકરસ્તતઃ ।
કદમ્બાદૌ ગિરિસુતાં પૌષે મરુબકૈર્યજેત્ ॥ ૧,૧૨૦.૨॥

કર્પૂરાદઃ કૃસરદો મલ્લિકાદન્તકાષ્ઠકૃત્ ।
માઘેસુભદ્રાં કલ્હારૈર્ઘૃતાશો મણ્ડકપ્રદઃ ॥ ૧,૧૨૦.૩॥

ગીતીમયં તન્તકાષ્ઠં ફાલ્ગુને ગોમતીં યજેત્ ।
કુન્દૈઃ કૃત્વા દન્તકાષ્ઠં જીવાશઃ શષ્કુલીપ્રદઃ ॥ ૧,૧૨૦.૪॥

વિશાલાક્ષીં દમનકૈશ્ચૈત્રે ચ કૃસરપ્રદઃ ।
દધિપ્રાશો દન્તકાષ્ઠં તગરં શ્રીમુખીં યજેત્ ॥ ૧,૧૨૦.૫॥

વૈશાખે કર્ણિકારૈશ્ચ અશોકાશો વટપ્રદઃ ।
જ્યેષ્ઠે નારાયણીમર્ચેચ્છતપત્રૈશ્ચ ખણ્ડદઃ ।
લવઙ્ગાશો ભવેદેવ આષાઢે માધવીં યજેત્ ॥ ૧,૧૨૦.૬॥

તિલાશો બિલ્વપત્રૈશ્ચ ક્ષીરાન્નવટકપ્રદઃ ।
ઔદુમ્બરં દન્તકાષ્ઠં તગર્યાઃ શ્રાવણે શ્રિયમ્ ॥ ૧,૧૨૦.૭॥

દન્તકાષ્ઠં મલ્લિકાયા ક્ષીરદો હ્યુત્તમાં યજેત્ ।
પદ્મૈર્યજેદ્ભાદ્રપદે શૃઙ્ગદાશો ગૃડાદિદઃ ॥ ૧,૧૨૦.૮॥

રાજપુત્રીં ચાશ્વયુજે જપાપુષ્પૈશ્ચ જીરકમ્ ।
પ્રાશયેન્નિશિ નૈવેદ્યૈઃ કૃસરૈઃ કાર્તિકે યજેત્ ॥ ૧,૧૨૦.૯॥

જાતીપુષ્પૈઃ પદ્મજાં ચ પઞ્ચગવ્યાશનો યજેત્ ।
ધૃતોદનં ચ વર્ષાન્તે સપત્નીકાન્દ્વિજાન્યજેત્ ॥ ૧,૧૨૦.૧૦॥

ઉમામહેશ્વરં પૂજ્ય પ્રદદ્યાચ્ચ ગુડાદિકમ્ ।
વસ્ત્રચ્છત્રસુવર્ણાદ્યૈઃ રાત્રૌ ચ કૃતજાગરઃ ।

ગીતવાદ્યૈર્દદત્પ્રતર્ગવાદ્યં સર્વમાન્પુયાત્ ॥ ૧,૧૨૦.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રમ્ભાતૃતીયાવ્રતં નામ વિંશત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૧
બ્રહ્મોવાચ ।
ચાતુર્માસ્યવ્રતાન્યૂચે એકાદશ્યાં સમાચરેત્ ।
આષાઢ્યાં પૌર્ણમાસ્યાં વા સર્વેણહરિમર્ચ્ય્ચ ॥ ૧,૧૨૧.૧॥

ઇદં વ્રતં મયા દેવ ગૃહીતં પુરતસ્તવ ।
નિર્વિઘ્નં સિદ્ધિમાપ્નોતુ પ્રસન્ને ત્વયિ કેશવ ॥ ૧,૧૨૧.૨॥

ગૃહીતેઽસ્મિન્વ્રતે દેવ યદ્યપૂર્ણે મ્રિયામ્યહમ્ ।
તન્મે ભવતુ સમ્પૂર્ણં ત્વત્પ્રસાદાજ્જનાર્દન ॥ ૧,૧૨૧.૩॥

એવમભ્યર્ચ્ય ગૃહ્ણીયાદ્વ્રતાર્ચનજપાદિકમ્ ।
સર્વાઘં ચ ક્ષયં યાતિ ચિકીર્ષેદ્યો હરેર્વ્રતમ્ ॥ ૧,૧૨૧.૪॥

સ્નાત્વાયોભ્યચ્ચ્ય ગૃહ્ણીયાદ્વ્રતાર્ચનજપાદિકમ્ ।
સ્નાત્વા યચ્ચતુરો માસાનેકભક્તેન પૂજયેત્ ।
વિષ્ણું સ યાતિ વિષ્ણોર્વ લોકં મલવિવર્જિતમ્ ॥ ૧,૧૨૧.૫॥

મદ્યમાંસસુરાત્યગી વેદવિદ્ધરિપૂજનાત્ ।
તૈલવર્જિ વિષ્ણુલોકં વિષ્ણુભાક્કૃચ્છ્રપાદકૃત્ ॥ ૧,૧૨૧.૬॥

એકરાત્રોપવાસાચ્ચ દેવો વૈમાનિકો ભવેત્ ।
શ્વેતદ્વીપં ત્રિરાત્રાત્તુ વ્રજેત્ષષ્ઠાન્નકૃન્નરઃ ॥ ૧,૧૨૧.૭॥

ચાન્દ્રાયણાદ્ધરેર્ધામ લભેન્મુક્તિમયાચિતામ્ ।
પ્રાજાપત્યં વિષ્ણુલોકં પરાકવ્રતકૃદ્ધરિમ્ ॥ ૧,૧૨૧.૮॥

સક્તુયાવકભિક્ષાશી પયોદધિઘૃતાશનઃ ।
ગોમૂત્રયાવકાહારઃ પઞ્ચગવ્યકૃતાશનઃ ।
શાકમલફલાદ્યાશી રસવર્જો ચ વિષ્ણુભાક્ ॥ ૧,૧૨૧.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ચાતુર્માસ્યવ્રતનિરૂપણં નામકાવશત્યુત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૨૨

બ્રહ્મોવાચ ।

વ્રતં માસોપવાસાખ્યં સર્વોત્કૃષ્ટં વદામિતે ।
વાનપ્રસ્થો યતિર્નારી કુર્યાન્માસોપવાસકમ્ ॥ ૧,૧૨૨.૧॥

આશ્વિનસ્ય સિતે પક્ષે એકાદશ્યામુપોષિતઃ ।
વ્રતમેતત્તુ ગૃહ્ણીયાદ્યાવત્ત્રિંશદ્દિનાનિ તુ ॥ ૧,૧૨૨.૨॥

અદ્યપ્રભૃત્યહં વિષ્ણો યાવદુત્થાનકં તવ ।
અર્ચયેત્વામનશ્નંસ્તુ દિનાનિ ત્રિંશદેવ તુ ॥ ૧,૧૨૨.૩॥

કાર્તિકાશ્વિનયોર્વિષ્ણો દ્વાદશ્યોઃ શુક્લયોરહમ્ ।
મ્રિયેયદ્યન્તરાલે તુ વ્રતભઙ્ગો ન મે ભવેત્ ॥ ૧,૧૨૨.૪॥

હરિં યજોત્ત્રિષવણસ્નાયી ગન્ધાદિભિર્વ્રતી ।
ગાત્રાભ્યઙ્ગં ગન્ધલેપં દેવતાયતને ત્યજેત્ ॥ ૧,૧૨૨.૫॥

દ્વાદશ્યામથ સમ્પૂજ્ય પ્રદદ્યાદ્દ્વિજભોજનમ્ ।
તતશ્ચ પારણં કુર્યાદ્ધરેર્માસોપવાસકૃત્ ॥ ૧,૧૨૨.૬॥

દુગ્ધાદિપ્રાશનં કુર્યાદ્વ્રતસ્થો મૂર્છિતોઽન્તરા ।
દુગ્ધાદ્યૈર્ન વ્રતં નશ્યેદ્ભુક્તિમુક્તિમવાપ્નુયાત્ ॥ ૧,૧૨૨.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
માસોપવાસવ્રતં નામ દ્વાવિંશત્યુત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૨૩

બ્રહ્મોવાચ ।

વ્રતાનિ કાર્તિકે વક્ષ્યે સ્નાત્વા વિષ્ણું પ્રપૂજયેત્ ।
એકભક્તેન નક્તેન માસં વાયાચિતેન વા ॥ ૧,૧૨૩.૧॥

દુગ્ધશાકફલાદ્યૈર્વા ઉપવાસેન વા પુનઃ ।
સર્વપાપવિનિર્મુક્તઃ પ્રાપ્તકામો હરિં વ્રજેત્ ॥ ૧,૧૨૩.૨॥

સદા હરેર્વ્રતં શ્રેષ્ઠં તતઃ સ્યાદ્દક્ષિણાયને ।
ચાતુર્માસ્યે તતસ્તસ્માત્કાર્તિકે ભીષ્મપઞ્ચકમ્ ॥ ૧,૧૨૩.૩॥

તતઃ શ્રેષ્ઠવ્રતં શુક્લસ્યૈકાદશ્યાં સમાચરેત્ ।
સ્નાત્વા ત્રિકાલં પિત્રાદીન્યવાદ્યૈરર્ચયેદ્ધરિમ્ ॥ ૧,૧૨૩.૪॥

યજેન્મૌની ઘૃતાદ્યૈશ્ચ પઞ્ચગવ્યેન વારિભિઃ ।
સ્નાપયિત્વાથ કર્પૂરમુખૈશ્ચૈવાનુલેપયેત્ ॥ ૧,૧૨૩.૫॥

ઘૃતાક્તગુગ્ગુલૈર્ધૂપં દ્વિજઃ પઞ્ચદિનં દહેત્ ।
નૈવદ્યં પરમાન્નં તુ જપેદષ્ટોત્તરં શતમ્ ॥ ૧,૧૨૩.૬॥

ૐ નમો વાસુદેવાય ઘૃતવ્રીહિતિલાદિકમ્ ।
અષ્ટાક્ષરેણ મન્ત્રેણ સ્વાહાન્તેન તુ હોમયેત્ ॥ ૧,૧૨૩.૭॥

પ્રથમેઽહ્નિ હરેઃ પાદૌ યજેત્પદ્મૈર્દ્વિતયિક ।
બિલ્વપત્રૈર્જાનુદેશં નાભિ ગન્ધેન ચાપરે ॥ ૧,૧૨૩.૮॥

સ્કન્ધા બિલ્વજવાભિશ્ચ પઞ્ચમેઽહ્નિ શિરોઽર્ચયત્ ।
માલત્યા ભૂમિશાયી સ્યાદ્ગોમયં પ્રાશયેત્ક્રમાત્ ॥ ૧,૧૨૩.૯॥

ગોમૂત્રં ચ દધિ ક્ષીરં પઞ્ચમે પઞ્ચગવ્યકમ્ ।
નક્તં કુર્યાત્પઞ્ચદશ્યાં વ્રતી સ્યાદ્ભુક્તિમુક્તિભાક્ ॥ ૧,૧૨૩.૧૦॥

એકાદશીવ્રતં નિત્યં તત્કુર્યાત્પક્ષયોર્દ્વયોઃ ।
અઘૌઘનરકં હન્યાત્સર્વદં વિષ્ણુલોકદમ્ ॥ ૧,૧૨૩.૧૧॥

એકાદશી દ્વાદશી ચ નિશાન્તે ચ ત્રયોદશી ।
નિત્યમેકાદશી યત્ર તત્ર સન્નિહિતો હરિઃ ॥ ૧,૧૨૩.૧૨॥

દશમ્યેકાદશી યત્ર તત્રસ્થાશ્ચાસુરાદયઃ ।
દ્વાદશ્યાં પારણ કુર્યાત્સૂતકે મૃતકે ચરેત્ ॥ ૧,૧૨૩.૧૩॥

ચતુર્દશીં પ્રતિપદં પૂર્વમિશ્રામુપાવસેત્ ।
પૌર્ણમાસ્યા મમાવાસ્યાં પ્રતિપન્મિશ્રિતાં મુને ॥ ૧,૧૨૩.૧૪॥

દ્વિતીયાં તૃતીયામિશ્રાં તૃતીયાઞ્ચાપ્યુપાવસેત્ ।
ચતુર્થ્યા સઙ્ગતાં નિત્યં ચતુર્થીઞ્ચનયા યુતામ્ ।
પઞ્ચમીંષષ્ઠ્યસંયુક્તાં ષષ્ઠ્યા યુક્તાઞ્ચ સપ્તમીમ્ ॥ ૧,૧૨૩.૧૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભીષ્મપઞ્ચકાદિવ્રતં નામ ત્રયોવિંશત્યુત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૨૪

બ્રહ્મોવાચ ।

શિવરાત્રિવ્રતં વક્ષ્યે કથાં વૈ સર્વકામદામ્ ।
યથા ચ ગૌરી ભૂતેશં પૃચ્છતિ સ્મ પરં વ્રતમ્ ॥ ૧,૧૨૪.૧॥

ઈશ્વરૌવાચ ।

માઘફાલ્ગુનયોર્મધ્યે કૃષ્ણા યા તુ ચતુર્દશી ।
તસ્યાં જાગરણાદ્રુદ્રઃ પૂજિતો ભુક્તિમુક્તિદઃ ॥ ૧,૧૨૪.૨॥

કામયુક્તો હરઃ પૂજ્યો દ્વાદશ્યામિ કેશવઃ ।
ઉપોષિતૈઃ પૂજિતઃ સન્નરકાત્તરયત્તથા ॥ ૧,૧૨૪.૩॥

નિષાદશ્ચર્બુદે રાજા પાપી સુન્દરસેનકઃ ।
સ કુક્કુરૈઃ સમાયુક્તો મૃગાન્હન્તું વનં ગતઃ ॥ ૧,૧૨૪.૪॥

મૃગાદિ કમસમ્પ્રાપ્ય ક્ષુત્પિપાસાર્દિતો ગિરૌ ।
રાત્રૌ તડાગતીરેષુ નિકુઞ્જે જાગ્રદાસ્થિતઃ ॥ ૧,૧૨૪.૫॥

તત્રાસ્તિ લિઙ્ગં સ્વં રક્ષઞ્છરીરં ચાક્ષિપત્તતઃ ।
પર્ણાનિ ચાપતન્મૂર્ધ્નિ લિઙ્ગસ્યૈવ ન જાનતઃ ॥ ૧,૧૨૪.૬॥

તેન ધૂલિનિરોધાય ક્ષિપ્તં નીરં ચ લિઙ્ગકે ।
શરઃ પ્રમાદેનૈકસ્તુ પ્રચ્યુતઃ કરપલ્લવાત્ ॥ ૧,૧૨૪.૭॥

જાનુભ્યામવનીં ગત્વા લિઙ્ગં સ્પ્ટષ્ટ્વા ગૃહીતવાન્ ।
એવં સ્નાનં સ્પર્શનં ચ પૂજનં જાગરોઽભવત્ ॥ ૧,૧૨૪.૮॥

પ્રાતર્ગૃહાગતો ભાર્યાદત્તાન્નં ભુક્તવાન્સ ચ ।
કાલે મૃતો યમભટૈઃ પાશૈર્બદ્ધ્વા તુ નીયતે ॥ ૧,૧૨૪.૯॥

તદા મમ ગણૈર્યુદ્ધે જિત્વા મુક્તીકૃતઃ સ ચ ।
કુક્કુરેણ સહૈવાભૂદ્ગણો મત્પાર્શ્વગોઽમલઃ ॥ ૧,૧૨૪.૧૦॥

એવમજ્ઞાનતઃ પુણ્યઞ્જ્ઞાનાત્પુણ્યમથાક્ષયમ્ ।
ત્રયોદશ્યાં શિવં પૂજ્ય કુર્યાત્ત નિયમં વ્રતી ॥ ૧,૧૨૪.૧૧॥

પ્રાતર્દેવ ! ચતુર્દશ્યાં જાગરિષ્યામ્યહં નિશિ ।
પૂજાં દાનં તપો હોમં કરિષ્યામ્યાત્મશક્તિતઃ ॥ ૧,૧૨૪.૧૨॥

ચતુર્દશ્યાં નિરાહારો ભૂત્વા શમ્ભો પરેઽહનિ ।
ભોક્ષ્યેઽહં ભુક્તિમુક્ત્યર્થં શરણં મે ભવેશ્વર ॥ ૧,૧૨૪.૧૩॥

પઞ્ચગવ્યામૃતૈઃ સ્નાપ્ય તત્કાલે ગુરું શ્રિતઃ ।
ૐ નમો નમઃ શિવાય ગન્ધાદ્યૈઃ પૂજયેદ્ધરમ્ ॥ ૧,૧૨૪.૧૪॥

તિલતણ્ડુલવ્રીહીંશ્ચ જુહુયાત્સઘૃતં ચરુમ્ ।
હુત્વા પૂર્ણાહુતિં દત્ત્વા શ‌ૃણુયાદ્ગીતસત્કથામ્ ॥ ૧,૧૨૪.૧૫॥

અર્ધરાત્રે ત્રિયામે ચ ચતુર્થે ચ પુનયર્જત્ ।
મૂલમન્ત્રં તથા જપ્ત્વા પ્રભાતે તુ ક્ષમાપયેત્ ॥ ૧,૧૨૪.૧૬॥

અવિઘ્નેન વ્રતં દેવ ! ત્વત્પ્રસદાન્મયાર્ચિતમ્ ।
ક્ષમસ્વ જગતાં નાથ ! ત્રૈલોક્યાધિપતે હર ! ॥ ૧,૧૨૪.૧૭॥

યન્મયાદ્ય કૃતં પુણ્યં યદ્રુદ્રસ્ય નિવેદિતમ્ ।
ત્વત્પ્રસાદાન્મયા દેવ ! વ્રતમદ્ય સમાપિતમ્ ॥ ૧,૧૨૪.૧૮॥

પ્રસન્નો ભવ મે શ્રીમન્ગૃહં પ્રતિ ચ ગમ્યતામ્ ।
ત્વદાલોકનમાત્રેણ પવિત્રોઽસ્મિ ન સંશયઃ ॥ ૧,૧૨૪.૧૯॥

ભોજયેદ્ધ્યાનનિષ્ઠાંશ્ચ વસ્ત્રચ્છત્રાદિકં દદેત્ ।
દેવાદિદેવ ભૂતેશ લોકાનુગ્રહકારક ॥ ૧,૧૨૪.૨૦॥

યન્મયા શ્રદ્ધયા દત્તં પ્રીયતાં તેન મે પ્રભુઃ ।
ઇતિ ક્ષમાપ્ય ચ વ્રતી કુર્યાદ્દ્વાદશવાર્ષિકમ્ ॥ ૧,૧૨૪.૨૧॥

કીર્તિશ્રીપુત્રરાજ્યાદિ પ્રાપ્ય શૈવં પુરં વ્રજેત્ ।
દ્વાદશેષ્વપિ માસેષુ પ્રકુર્યાદિહ જાગરમ્ ॥ ૧,૧૨૪.૨૨॥

વ્રતી દ્વાદશ સંભોજ્ય દીપદઃ સ્વર્ગમાપ્નુયાત્ ॥ ૧,૧૨૪.૨૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શિવરાત્રિવ્રતં નામ ચતુર્વિંશત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૫

પિતામહ ઉવાચ ।

માન્ધાતા ચક્રવર્ત્યાસીદુપોષ્યૈકાદશીં નૃપઃ ।
એકાદશ્યાં ન ભુઞ્જીત પક્ષયોરુભયારપિ ॥ ૧,૧૨૫.૧॥

દશમ્યેકાદશીમિશ્રા ગાન્ધાર્યા સમુપોષિતા ।
તસ્યાઃ પુત્રશતં નષ્ટં તસ્માત્તાં પરિવર્જયેત્ ॥ ૧,૧૨૫.૨॥

દ્વાદશ્યેકાદશી યત્ર તત્ર સન્નિહિતો હરિઃ ।
દશમ્યેકાદશી યત્ર તત્ર સન્નિહિતોઽસુરઃ ।
બહુવાક્યવિરોધેન સન્દેહો જાયતે યદા ॥ ૧,૧૨૫.૩॥

દ્વાદશી તુ તદા ગ્રાહ્યા ત્રયોદશ્યાન્તુ પારણમ્ ।
એકાદશી કલાપિસ્યાદુપોષ્યા દ્વાદશી તથા ॥ ૧,૧૨૫.૪॥

એકાદશી દ્વાદશી ચ વિશેષેણ ત્રયોદશી ।
ત્રિમિશ્રા સા તિથિર્ગ્રાહ્યા સર્વપાપહરા શુભા ॥ ૧,૧૨૫.૫॥

એકાદશીમુપોષ્યૈવદ્વાદશીમ થવા દ્વિજ ! ।
ત્રિમિશ્રાં ચૈવ કુર્વીત ન દશમ્યા યુતાં ક્વચિત્ ॥ ૧,૧૨૫.૬॥

રાત્રૌ જાગરણં કુર્વન્પુરાણશ્રવણં નૃપઃ ।
ગદાધરં પૂજયંશ્ચ ઉપોષ્યૈકા દશીદ્વયમ્ ।
રુક્માઙ્ગદો યયૌ મોક્ષમન્યે ચૈકાદશીવ્રતમ્ ॥ ૧,૧૨૫.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકાદશીમાહાત્મ્યં નામ પઞ્ચવિંશત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૬
બ્રહ્મોવાચ ।
યેનાર્ચનેન વૈ લોકો જગામ પરમાં ગતિમ્ ।
તમર્ચનં પ્રવક્ષ્યામિ ભુક્તિમુક્તિકરં પરમ્ ॥ ૧,૧૨૬.૧॥

સામાન્યમણ્ડલં ન્યસ્ય ધાતારં દ્વારદેશતઃ ।
વિધાતારં તથા ગઙ્ગાં યમુનાં ચ મહાનદીમ્ ॥ ૧,૧૨૬.૨॥

દ્વારશ્રિયં ચ દણ્ડં ચ પ્રચણ્ડં વાસ્તુપૂરુષમ્ ।
મધ્યે ચાધારશક્તિં ચ કૂર્મં ચાનન્તમર્ચયેત્ ॥ ૧,૧૨૬.૩॥

ભૂમિં ધર્મં તથા જ્ઞાનં વૈરગ્યૈશ્વર્યમેવ ચ ।
અધર્માદીંશ્ચ ચતુરઃ કન્દં નાલં ચ પઙ્કજમ્ ॥ ૧,૧૨૬.૪॥

કર્ણિકાં કેસરં સત્ત્વં રાજસં તામસં ગુણમ્ ।

સૂર્યાદિમણ્ડલાન્યેવ વિમલાદ્યાશ્ચ શક્તયઃ ॥ ૧,૧૨૬.૫॥

દુર્ગાં ગણં સરસ્વતીં ક્ષેત્રપાલં ચ કોણકે ।
આસનં મૂર્તિમભ્યર્ચ્ય વાસુદેવં બલં સ્મરન્ ॥ ૧,૧૨૬.૬॥

અનિરુદ્ધં મહાત્માનં નારાયણમથાર્ચયેત્ ।
હૃદયાદીનિ ચાઙ્ગાનિ શઙ્ખાદીન્યાયુધાનિ ચ ॥ ૧,૧૨૬.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૭
બ્રહ્મોવાચ ।
માઘમાસે શુક્લપક્ષે સૂર્યર્ક્ષેણ યુતા પુરા ।
એકાદશી તથા ચૈકા ભીમેન સમુપોષિતા ॥ ૧,૧૨૭.૧॥

આશ્ચર્ય તુ વ્રતં કૃત્વા પિતૃણામનૃણોઽભવત્ ।
ભીમદ્વાદશી વિખ્યાતા પ્રાણિનાં પુણ્યવર્ધિની ॥ ૧,૧૨૭.૨॥

નક્ષત્રેણ વિનાપ્યેષા બ્રહ્મહત્યાદિ નાશયેત્ ।
વિનિહન્તિ મહાપાપં કુનૃપો વિષયં યથા ॥ ૧,૧૨૭.૩॥

કુપુત્રસ્તુ કુલં યદ્વત્કુભાર્યા ચ પતિં યથા ।
અધર્મં ચ યથા ધર્મઃ કુમન્ત્રી ચ યથા નૃપમ્ ॥ ૧,૧૨૭.૪॥

અજ્ઞાનેન યથા જ્ઞાનં શૌચમાશૌચકં યથા ।
અશ્રદ્ધયા યથા શ્રદ્ધા સત્યઞ્ચૈવાનૃતૈર્યથા ॥ ૧,૧૨૭.૫॥

હિમં યથોષ્ણમાહન્યાદનર્થં ચાર્થસંચયઃ ।
યથા પ્રકર્તિનાદ્દાનં તપો વૈ વિસ્મયાદ્યથા ॥ ૧,૧૨૭.૬॥

અશિક્ષયા યથા પુત્રો ગાવો દૂરગતૈર્યથા ।
ક્રોધેન ચ યથા શાન્તિર્યથા વિત્તમવદ્ધનાત્ ॥ ૧,૧૨૭.૭॥

જ્ઞાનેનૈયથા વિદ્યા નિષ્કામેન યથા ફલમ્ ।
તથૈવ પાપનાશાય પ્રોક્તેયં દ્વાદશી શુભા ॥ ૧,૧૨૭.૮॥

બ્રહ્મહત્યા સુરા પાન સ્તેયં ગુર્વઙ્ગનાગમઃ ।
યુગપત્તુપ્રજાતાનિહન્તિ ત્રિપુષ્કરમ્ ॥ ૧,૧૨૭.૯॥

ન ચાપિ નૈમિષં ક્ષેત્રં કુરુક્ષેત્રં પ્રભાસકમ્ ।

કાલિન્દી યમુના ગઙ્ગા ન ચૈવ ન સરસ્વતી ॥ ૧,૧૨૭.૧૦॥

ચૈવ સર્વતીર્થાનિ એકાદશ્યાઃ સમાનિ હિ ।
ન દાનં ન જપો હોમો ન ચાન્યત્સુકૃતં ક્વચિત્ ॥ ૧,૧૨૭.૧૧॥

એકતઃ પૃથિવીદાનમેકતો હરિવાસરઃ ।
તતોઽપ્યેકા મહાપુણ્યા ઇયમેકાદશી વરા ॥ ૧,૧૨૭.૧૨॥

અસ્મિન્વરાહપુરુષં કૃત્વા દેવં તુ હાટકમ્ ।
ઘટોપરિ નવે પાત્રે કૃત્વા વૈ તામ્રભાજને ॥ ૧,૧૨૭.૧૩॥

સર્વબીજભૃતે વિપ્રાઃ સિતવસ્ત્રાવગણ્ઠિતે ।
સહિરણ્યપ્રદીપાદ્યૈઃ કૃત્વા પૂજાં પ્રયત્નતઃ ॥ ૧,૧૨૭.૧૪॥

વરાહાય નમઃ પાદૌ ક્રોડાકૃતયે નમઃ કટિમ્ ।
નાભિં ગંભીરઘોષયા ઉરઃ શ્રીવત્સધારિણે ॥ ૧,૧૨૭.૧૫॥

બાહું સહસ્રશિરસે ગ્રીવાં સર્વેશ્વરાય ચ ।
મુખં સર્વાત્મને પૂજ્યં લલાટં પ્રભવાય ચ ॥ ૧,૧૨૭.૧૬॥

કેશાઃ શતમયૂખાય પૂજ્યા દેવસ્ય ચક્રિણઃ ।
વિધિના પૂજયિત્વા તુ કૃત્વા જાગરણં નિશિ ॥ ૧,૧૨૭.૧૭॥

શ્રુત્વા પુરાણં દેવસ્ય માહાત્મ્યપ્રતિપાદકમ્ ।
પ્રાતર્વિપ્રાય દત્ત્વા ચ યાચકાય શુભાય તત્ ॥ ૧,૧૨૭.૧૮॥

કનકક્રોડસહિતં સન્નિવેદ્ય પરિચ્છદમ્ ।
પશ્ચાત્તુ પારણં કુર્યાન્નાતિતૃપ્તઃ સકૃદ્વ્રતઃ ॥ ૧,૧૨૭.૧૯॥

એવં કૃત્વા નરો વિદ્વાન્ન ભૂય સ્તનપો ભવેત્ ।
ઉપોષ્યૈકાદશીં પુણ્યાં મુચ્યતે વૈ ઋણત્રયાત્ ।
મનોઽભિલષિતાવાપ્તિઃ કૃત્વા સર્વવ્રતાદિકમ્ ॥ ૧,૧૨૭.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકાદશીમાહાત્મ્યં નામ સપ્તવિંશત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૮
બ્રહ્મોવાચ ।
વ્રતાનિ વ્યાસ વક્ષ્યામિ યૈસ્તુષ્ટઃ સર્વદો હરિઃ ।

શાસ્ત્રોદિતો હિ નિયમો વ્રતં તચ્ચ તપો મતમ્ ॥ ૧,૧૨૮.૧॥

નિયમાસ્તુ વિશેષાઃ સ્યુઃ વ્રતસ્યાસ્ય દમાદયઃ ।
નિત્યં ત્રિષવણં સ્નાયાદધઃ શયી જિતેન્દ્રિયઃ ॥ ૧,૧૨૮.૨॥

સ્ત્રીશૂદ્રપતિતાનાં તુ વર્જયેદભિભાષણમ્ ।
પવિત્રાણિ ચ પઞ્ચૈવ જુહુયાચ્ચૈવ શક્તિતઃ ॥ ૧,૧૨૮.૩॥

કૃચ્છ્રાણ્યેતાનિ સર્વાણિ ચરેત્સુકૃતવાન્નરઃ ।
કેશાનાં રક્ષણાર્થં તુ દ્વિગુણં વ્રતમાચરેત્ ॥ ૧,૧૨૮.૪॥

કાંસ્યં માષં મસૂરં ચચણકં કોરદૂષકમ્ ।
શાકં મધુ પરાન્નં ચ વર્જયેદુપવાસવાન્ ॥ ૧,૧૨૮.૫॥

પુષ્પાલઙ્કારવસ્ત્રાણિ ધૂપગન્ધાનુલેપનમ્ ।
ઉપવાસેન દુષ્યેત્તુ દન્તધાવનમઞ્જનમ્ ॥ ૧,૧૨૮.૬॥

દન્તકાષ્ઠં પઞ્ચગવ્યં કૃત્વા પ્રાતર્વ્રતં ચરેત્ ।
અસકૃજ્જલપાનાચ્ચ તામ્બૂલસ્ય ચ ભક્ષણાત્ ॥ ૧,૧૨૮.૭॥

ઉપવાસઃ પ્રદુષ્યેત દિવાસ્વપ્ના ક્ષમૈથુનાત્ ।
ક્ષમા સત્યં દયા દાનં શૌચમિન્દ્રિયનિગ્રહઃ ॥ ૧,૧૨૮.૮॥

દેવપૂજાગ્નિહવને સન્તોષોસ્તેયમેવ ચ ।
સર્વવ્રતેષ્વયં ધર્મઃ સામાન્યો દશધાસ્મૃતઃ ॥ ૧,૧૨૮.૯॥

નક્ષત્રદર્શનાન્નક્તમનક્તં નિશિ ભોજનમ્ ।
ગોમૂત્રં ચ પલ દદ્યાદર્ધાઙ્ગુષ્ઠં તુ ગોમયમ્ ॥ ૧,૧૨૮.૧૦॥

ક્ષીરં સપ્તપલં દદ્યાદ્દધ્નશ્ચૈવ પલત્રયમ્ ।
ઘૃતમેકફલં દદ્યાત્પલમેકં કુશોદકમ્ ॥ ૧,૧૨૮.૧૧॥

ગાયત્ર્યા ચૈવ ગન્ધેતિ આપ્યાયસ્વ દૃ દધિગ્રહઃ ।
તેજોઽસીતિ ચ દેવસ્ય બ્રહ્મકૂર્ચવ્રતં ચરેત્ ॥ ૧,૧૨૮.૧૨॥

અગ્ન્યાધાનં પ્રતિષ્ઠાં તુ યજ્ઞદાનવ્રતાનિ ચ ।
વેદવ્રતવૃષોત્સર્ગચૂડાકરણમેખલાઃ ॥ ૧,૧૨૮.૧૩॥

માઙ્ગલ્યમભિષેકં ચ મલમાસે વિવર્જયત્ ।
દર્શાદ્દર્શસ્ય ચાન્દ્રઃ સ્યાત્ત્રિંશાહોભિસ્તુ સાવનઃ ॥ ૧,૧૨૮.૧૪॥

રવિસંક્રમણાત્સૌરો નાક્ષત્રઃ સપ્તવિંશતિઃ ।
સૌરો માસો વિવાહાય યજ્ઞાદૌ સાવનસ્થિતિઃ ॥ ૧,૧૨૮.૧૫॥

યુગ્માગ્નિયુગભૂતાનિ ષણ્મુન્યોર્વસુરન્ધ્રયોઃ ।
રુદ્રેણ દ્વાદશી યુક્તા ચતુર્દશ્યાથ પૂર્ણિમા ॥ ૧,૧૨૮.૧૬॥

પ્રતિપદ્યપ્યમાવાસ્યા તિથ્યોર્મસ્યં મહાફલમ્ ।
એતદ્વ્યસ્તં મહાઘોરં હન્તિ પુણ્યં પુરા કૃતમ્ ॥ ૧,૧૨૮.૧૭॥

પ્રારબ્ધતપસા સ્ત્રીણાં રજો હન્યાદ્વ્રતં ન હિ ।
અન્યૈર્દાનાદિકં કુર્યાત્કાયિકં સ્વયમેવ ચ ॥ ૧,૧૨૮.૧૮॥

ક્રોધાત્પ્રમાદાલ્લોભાદ્વા વ્રતભઙ્ગો ભવેદ્યદિ ।
દિનત્રયં ન ભુઞ્જીત શિરસો મુણ્ડનં ભવેત્ ॥ ૧,૧૨૮.૧૯॥

અસામર્થ્યે શરીરસ્ય પુત્રાદીન્કારયેદ્વ્રતમ્ ।
વ્રતસ્થં મૂર્છિતં વિપ્રં જલાદીન્યનુપાયયેત્ ॥ ૧,૧૨૮.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વ્રતપરિભાષા નામાષ્ટાવિંશત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨૯

બ્રહ્મોવાચ ।
વક્ષ્યે પ્રતિપદાદીનિ વ્રતાનિ વ્યાસ શ‌ૃણ્વથ ।
વાશ્વાનરપદં યાતિ શિખિવ્રતમિદં સ્મૃતમ્ ॥ ૧,૧૨૯.૧॥

પ્રતિપદ્યેકભક્તાશી સમાપ્તે કપિલાપ્રદઃ ।
ચૈત્રાદૌ કારયેચ્ચૈવ બ્રહ્મપૂજાં યથાવિધિ ।
ગન્ધપુષ્પાર્ચનૈર્દાનૈર્માલ્યાદ્યૈશ્ચ મનોરમૈઃ ॥ ૧,૧૨૯.૨॥

સહોમૈઃ પૂજયેદ્દેવં સર્વાન્કામાનવાપ્નુયાત્ ।
કાર્તિકે ત સિતેઽષ્ટમ્યાં પુષ્પહારી ચ વત્સરમ્ ॥ ૧,૧૨૯.૩॥

પુષ્પાદિદાતા રૂપેણ રૂપભાગી ભવેન્નરઃ ।
કૃષ્ણપક્ષે તૃતીયાયાં શ્રાવણે શ્રીધરં શ્રિયા ॥ ૧,૧૨૯.૪॥

યજેદશૂન્યશય્યાયાં ફલં દદ્યાદ્વિજાતયે ।
શય્યાં દત્ત્વા પ્રાર્થયેચ્ચ શ્રીધરાય નમઃ શ્રિયૈ ॥ ૧,૧૨૯.૫॥

ઉમાંશિવં હુતાશં ચ તૃતીયાયાં ચ પૂજયેત્ ।
હવિષ્યમન્ન નૈવેદ્ય દેય દમનકં તથા ॥ ૧,૧૨૯.૬॥

ચૈત્રાદૌ ફલમાપ્નોતિ ઉમયા મે પ્રભાષિતમ્ ।
ફાલ્ગુનાદિતૃતીયાયાં લવણં યસ્તુ વર્જયેત્ ॥ ૧,૧૨૯.૭॥

સમાપ્તે શયનં દદ્યાદ્ગૃહં ચોપસ્કરાન્વિતમ્ ।
સમ્પૂજ્ય વિપ્રમિથનં ભવાની પ્રીયતામિતિ ॥ ૧,૧૨૯.૮॥

ગૌરીલોકે વસેન્નિત્યં સૌભાગ્યકરમુત્તમમ્ ।
ગૌરી કાલી ઉમા ભદ્રા દુર્ગા કાન્તિઃ સરસ્વતી ॥ ૧,૧૨૯.૯॥

મઙ્ગલા વૈષ્ણવી લક્ષ્મીઃ શિવા નારાયણી ક્રમાત્ ।
માર્ગેતૃતીયામારભ્ય અવિયોગાદિમાપ્નુયાત્ ॥ ૧,૧૨૯.૧૦॥

ચતુર્થ્યાં સિતમાઘાદૌ નિરાહારો વ્રતાન્વિતઃ ।
દત્ત્વા તિલાંસ્તુ વિપ્રાય સ્વયં ભુઙ્ક્તે તિલોદકમ્ ॥ ૧,૧૨૯.૧૧॥

વર્ષદ્વયે સમાપ્તિશ્ચ નિર્વિઘ્નાદિં સમાપ્નુયાત્ ।
ગઃ સ્વાહા મૂલમન્ત્રોઽયં પ્રણવેન સમન્વિતઃ ॥ ૧,૧૨૯.૧૨॥

ગ્લૈં ગ્લાંહૃદયે ગાં ગીં હૂં હ્રીં હ્રીં શિરઃ શિખા ।
ગૂં વર્મ ગોં ચ ગૈં નેત્રં ગોં ચ આવાહનાદિષુ ॥ ૧,૧૨૯.૧૩॥

આગચ્છોલ્કાય ગનન્ધોલ્કઃ પુષ્પોલ્કો ધૂપકોલ્કકઃ ।
દીપોલ્કાય મહોલ્કાય બલિશ્ચાથ વિસ (માર્) જનમ્ ॥ ૧,૧૨૯.૧૪॥

સિદેધોલ્કાય ચ ગાયત્રી (ત્ર) ન્યાસોંગુષ્ઠાદિરીરિતઃ ।
ૐ મહાકર્ણાય વિદ્મહે-વક્રતુણ્ડાય ધીમહિ-તન્નો દન્તિઃ પ્રચોદયાત્ ॥ ૧,૧૨૯.૧૫॥

પૂજયોત્તિલહોમૈશ્ચ એતે પૂજ્યા ગણાસ્તથા ।
ગણાય ગણપતયે સ્વાહા કૂષ્માણ્ડકાય ચ ॥ ૧,૧૨૯.૧૬॥

અમોઘોલ્કાયૈકદન્તાય ત્રિપુરાન્તકરૂપિણે ।
ૐ શ્યામ (વ) દન્તવિકરાલાસ્યાહવેપાય વૈ નમઃ ॥ ૧,૧૨૯.૧૭॥

પદ્મદંષ્ટાય સ્વાહાન્તે મુદ્રા વૈ નર્તનં ગણે ।
હસ્તતાલશ્ચ હસનં સૌભાગ્યાદિફલં ભવેત્ ॥ ૧,૧૨૯.૧૮॥

માર્ગશીર્ષે તથા શુક્લચતુર્થ્યાં પૂજયેદ્ગણ ।
અબ્દં પ્રાપ્નોતિ વિદ્યાશ્રીકીર્ત્યાયુઃ પુત્રસન્તતિમ્ ॥ ૧,૧૨૯.૧૯॥

સોમવારે ચતુર્થ્યાં ચ સમુપોષ્યાર્ચયેદ્ગણમ્ ।
જપઞ્જુહ્વત્સ્મરન્વિઘ્ના સ્વર્ગં નિર્વાણતાં વ્રજેત્ ॥ ૧,૧૨૯.૨૦ ॥

યજેચ્છુક્લચતુર્થ્યાં યઃ ખણ્ડલડ્ડુકમોદ (મણ્ડ) કૈઃ ।
વિઘ્નાચનેન સર્વાન્સ કામાન્સૌભાગ્યમાપ્નુયાત્ ॥ ૧,૧૨૯.૨૧ ॥

પુત્રાદિકં દમનકૈર્દમનાખ્યા ચતુર્થ્યપિ ।
આં ગણપતયે નમઃ ચતુર્થ્યન્તં યજેદ્ગણમ્ ॥ ૧,૧૨૯.૨૨ ॥

માસે તુ યસ્મિન્કસ્મિંશ્ચિજ્જુહુયાદ્વા જપેત્સ્મરેત્ ।
સર્વાન્કામાનવાપ્નોતિ સર્વવિઘ્નવિનાશનમ્ ॥ ૧,૧૨૯.૨૩ ॥

વિનાયકં મૂર્તિકાદ્યં યજેદેભિશ્ચ નામભિઃ ।
સોઽપિ સદ્ગતિમાપ્નોતિ સ્વર્ગમોક્ષસુખાનિ ચ ॥ ૧,૧૨૯.૨૪ ॥

ગણપૂજ્યો વક્રતુણ્ડ એકદંષ્ટ્રી ત્રિયમ્બકઃ ।
નીલગ્રીવો લમ્બોદરો વિકટો વિઘ્નરાજકઃ ॥ ૧,૧૨૯.૨૫ ॥

ધૂમ્રવર્ણો ભાલચન્દ્રો દશમસ્ત વિનાયકઃ ।
ગણપતિર્હસ્તિમુખો દ્વાદશારે યજેદ્ગણમ્ ॥ ૧,૧૨૯.૨૬ ॥

પૃથક્સમસ્તં મધાવી સર્વાન્કામાન વાપ્નુયાત્ ।
શ્રાવણે ચાશ્વિને ભાદ્રે પઞ્ચમ્યાં કાત્તિક શુભે ॥ ૧,૧૨૯.૨૭ ॥

વાસુકિસ્તક્ષકશ્ચૈવ કાલીયો મણિભદ્રકઃ ।
ઐરાવતો ધૃતરાષ્ટઃ કર્કોટકધનઞ્જયૌ ॥ ૧,૧૨૯.૨૮ ॥

ધૃતાદ્યૈઃ સ્નાપિતા હ્યેતે આયુરારોગ્યસમ્પદઃ ।
અનન્તં વાસુકિં શઙ્ખં પદ્મં કમ્બલમેવ ચ ॥ ૧,૧૨૯.૨૯ ॥

તથા કર્કાટકં નાગં ધૃતરાષ્ટ્રં ચ શઙ્ખકમ્ ।
કાલીયં તક્ષકં ચૈવ પિઙ્ગલં માસિમાસિ ચ ॥ ૧,૧૨૯.૩૦ ॥

યજેદ્ભાદ્રસિતે નાગાનષ્ટૌ મુક્તિં દિવં વ્રજેત્ ।
દ્વારસ્યોભયતો લેખ્યાઃ શ્રાવણે તુ સિતે યજેત્ ॥ ૧,૧૨૯.૩૧ ॥

પઞ્ચમ્યાં પૂજયેન્નાગાનનન્તાન્દ્યાન્મહોરગાન્ ।
ક્ષીરં સર્પિશ્ચ નૈવેદ્યં દેયં સર્વવિષાપહમ્ ।
નાગા અભયહસ્તાશ્ચ દષ્ટોદ્ધારાતુ પઞ્ચમી ॥ ૧,૧૨૯.૩૨ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દષ્ટોદ્ધારપઞ્ચમિવ્રતં નામૈકોનત્રિંશોત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૩૦
બ્રહ્મોવાચ ।
એવં ભાદ્રપદે માસિ કાર્તિકેયં પ્રપૂયેત્ ।
સ્નાનદાનાદિકં સર્વમસ્યામક્ષય્યમુચ્યતે ॥ ૧,૧૩૦.૧॥

સપ્તમ્યાં પ્રાશયેચ્ચપિ ભોજ્યં વિપ્રાન્રવિં યજેત્ ।
ૐ ખખોલ્કાયમૃતત્વં (તન્તં) પ્રિયસઙ્ગમો ભવ સદ સ્વાહા ॥ ૧,૧૩૦.૨॥

અષ્ટમ્યાં પારણં કુર્યાન્મરીચં પ્રાશ્ય સ્વર્ગભાક્
સપ્તમ્યાં નિયતઃ સ્નાત્વા પૂજયિત્વા દિવાકરમ્ ॥ ૧,૧૩૦.૩॥

દદ્યાત્ફલાનિ વિપ્રેભ્યો માર્તણ્ડઃ પ્રીયતામિતિ ।
ખર્જૂરં નારિકેલં વા પ્રાશયેન્માતુલુઙ્ગકમ્ ॥ ૧,૧૩૦.૪॥

સર્વે ભવન્તુ સફલા મમ કામાઃ સમન્તતઃ ।
(ઇતિ ફલસપ્તમી)
સમ્પૂજ્ય દેવં સપ્તમ્યાં પાયસેનાથ ભોજયેત્ ॥ ૧,૧૩૦.૫॥

વિપ્રાંશ્ચ દક્ષિણાં દત્ત્વા સ્વયં ચાથ પયઃ પિબેત્ ।
ભક્ષ્યં ચોષ્યં તથા લેહ્યં ઓદનં ચેતિ કીર્તિતમ્ ॥ ૧,૧૩૦.૬॥

ધનપુત્રાદિકામસ્તુ ત્યજેદેતદનોદનઃ
વાય્વાશી વિજયેત્ક્ષુચ્ચ કુર્યાદ્વિજયસપ્તમીમ્ ।
અદ્યાદર્કં ચ કામેચ્છુરુપવાસે તરેન્મદમ્ ॥ ૧,૧૩૦.૭॥

ગોધૂમમાષયવષષ્ટિકકાંસ્યપાત્રં પાષાણપિષ્ટમધુમૈથુનમદ્યમાંસમ્ ।
અભ્યઞ્જનાઞ્જનતિલાંશ્ચ વિવર્જયેદ્યઃ તસ્યેપ્સિતં ભવતિ સપ્તસુ સપ્તમીષુ ॥ ૧,૧૩૦.૮॥

(ઇતિ વિજયસપ્તમીવ્રતમ્) ।

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સપ્તમીવ્રતનિરૂપણં નામ ત્રિંશોત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૩૧

બ્રહ્મોવાચ ।
બ્રહ્મન્ભાદ્રપદે માસિ શુક્લાષ્ટમ્યામુપોષિતઃ ।
દૂર્વાં સૌરીં ગણેશં ચ ફલપુષ્પૈઃ શિવં યજેત્ ॥ ૧,૧૩૧.૧ ॥

ફલવ્રીહ્યાદિભિઃ સર્વૈઃ શમ્ભવેનમઃ શિવાય ચ ।
ત્વં દૂર્વેઽમૃજન્માસિ હ્યષ્ટમી સર્વકામભાક્ ॥ ૧,૧૩૧.૨ ॥

અનગ્નિપક્વમશ્રીયાન્મુચ્યતે બ્રહ્મહત્યયા ।
(ઇતિ દૂર્વાષ્ટમીવ્રતમ્) ।
કૃષ્ણાષ્ટમ્યાં ચ રોહિણ્યામર્ધરાત્રેઽર્ચનં હરેઃ ॥ ૧,૧૩૧.૩ ॥

કાર્યા વિદ્ધાપિ સપ્તમ્યા હન્તિ પાપં ત્રિજન્મનઃ ।
ઉપોષિતોઽર્ચયેન્મન્ત્રૈસ્તિથિ ભાન્તે ચ પારણમ્ ॥ ૧,૧૩૧.૪ ॥

યોગાય યોગપતયે યોગેશ્વરાય યોગસમ્ભવાય ગોવિન્દાય નમોનમઃ ।
(સ્નાનમન્ત્રઃ( યજ્ઞાય યજ્ઞેશ્વરાય યજ્ઞપતયે ગોવિન્દાય નમોનમઃ ॥ ૧,૧૩૧.૫ ॥

(અર્ચનદ્)–વિશ્વાય વિશ્વેશ્વરાય વિશ્વપતયે ગોવિન્દાય નમોનમઃ ।
(શયનદ્)–સર્વાય સર્વેશ્વરાય સર્વેતાય સર્વસમ્ભવાય ગોવિન્દાય નમોનમઃ ॥ ૧,૧૩૧.૬ ॥

સ્થણ્ડિલે પૂજયેદ્દેવં સચન્દ્રાં રોહિણીં તથા ।
શઙ્ખે તોયં સમાદાય સપુષ્પફલચન્દનમ્ ॥ ૧,૧૩૧.૭ ॥

જાનુભ્યામવનીં ગત્વા ચન્દ્રાયાર્ઘ્યં નિવેદયેત્ ।
ક્ષિરોદાર્ણવસંભૂત ! અત્રિનેત્રસમુદ્ભવ ! ॥ ૧,૧૩૧.૮ ॥

ગૃહાણાર્ઘ્યં શશાઙ્કેશ (મં) રોહિણ્યા સહિતો મમ ।
શ્રિયૈ ચ વસુદે વાય નન્દાય ચ બલાય ચ ॥ ૧,૧૩૧.૯ ॥

યશોદાયૈ તતો દદ્યાદર્ઘ્યં ફલસમન્વિતમ્ ।
અનન્તં (ઘં) વામનં શૌરિં વૈકુણ્ઠં પુરુષોત્તમમ્ ॥ ૧,૧૩૧.૧૦ ॥

વાસુદેવં હૃષીકેશં માધવં મધુસૂદનમ્ ।
વરાહં પુણ્ડરીકાક્ષં નૃસિંહં દૈત્યસૂદનમ્ ॥ ૧,૧૩૧.૧૧ ॥

દામોદરં પદ્મનાભં કેશવં ગારુડધ્વજમ્ ।
ગોવિન્દમચ્યુતં દેવમનન્તમ પરાજિતમ્ ॥ ૧,૧૩૧.૧૨ ॥

અધોક્ષજં જગદ્બીજં સર્ગસ્થિત્યન્તકારણમ્ ।
અનાદિનિધનં વિષ્ણું ત્રિલોકેશં ત્રિવિક્રમમ્ ॥ ૧,૧૩૧.૧૩ ॥

નારાયણં ચતુર્બાહું શઙ્ખચક્રગદાધરમ્ ।
પીતમ્બરધરં દિવ્યં વનમાલાવિભૂષિતમ્ ॥ ૧,૧૩૧.૧૪॥

શ્રીવત્સાઙ્કં જગદ્ધામ શ્રીપતિં શ્રીધરં હરિમ્ ।
યં દેવં દેવકી દેવી વસુદેવાદજીજનત્ ॥ ૧,૧૩૧.૧૫॥

ભૌમસ્ય બ્રહ્મણો ગુપ્ત્યૈ તસ્મૈ બ્રહ્માત્મને નમઃ ।
નામાન્યેતાનિ સંકીર્ત્ય ગત્યર્થં પ્રાર્થયેત્પુનઃ ॥ ૧,૧૩૧.૧૬॥

ત્રાહિ માં દેવદેવેશ ! હરે ! સંસારસાગરાત્ ।
ત્રાહિ માં સર્વપાપઘ્ન ! દુઃખશોકાર્ણવાત્પ્રભો ! ॥ ૧,૧૩૧.૧૭॥

દેવકીનન્દન ! શ્રીશ ! હરે ! સંસારસાગરાત્ ।
દુર્વૃત્તાંસ્ત્રાયસે વિષ્ણો ! યે સ્મરન્તિ સકૃત્સકૃત્ ॥ ૧,૧૩૧.૧૮॥

સોઽહં દેવાતિદુર્વૃત્તસ્ત્રાહિ માં શોકસાગરાત્ ।
પુષ્કરાક્ષ ! નિમગ્નોઽહં મહ્તયજ્ઞાનસાગરે ॥ ૧,૧૩૧.૧૯॥

ત્રાહિ માં દેવદેવેશ ! ત્વામૃતેઽન્યો ન રક્ષિતા ।
સ્વજન્મ વાસુદેવાપ ગોબ્રાહ્મણહિતાય ચ ॥ ૧,૧૩૧.૨૦॥

જગદ્ધિતાય કૃષ્ણાય ગોવિન્દાય નમોનમઃ ।
શાન્તિરસ્તુ શિવં ચાસ્તુ ધનવિખ્યાતિરાજ્યભાક્ ॥ ૧,૧૩૧.૨૧॥

(ઇતિ કૃષ્ણાષ્ટમીવ્રતમ્) ।

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
કૃષ્ણાષ્ટમીવ્રતનિરૂપણં ના મૈકત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૨
બ્રહ્મોવાચ ।
નક્તાશી ત્વષ્ટમીં યાવદ્વર્ષાન્તે ચૈવ ધેનુદઃ ।
પૌરન્દરપદં યાતિ સદ્ગતિવ્રતમુચ્યતે ! ॥ ૧,૧૩૨.૧॥

શુક્લાષ્ટભ્યાં પૌષમાસે મહારુદ્રેતિ સાધુ વૈ ।
મત્પ્રીતયે કૃતં દેવિ શથસાહસ્રિકં ફલમ્ ॥ ૧,૧૩૨.૨॥

અષ્ટમી બુધવારેણ પક્ષયોરુભયોર્યદા ।
ભવિષ્યતિ તદા તસ્યાં વ્રતમેતત્કથા પરા ॥ ૧,૧૩૨.૩॥

તસ્યાં નિયમકર્તારો ન સ્યુઃ ખણ્ડિતસમ્પદઃ ।
તણ્ડુલસ્યાષ્ટમુષ્ટીનાં વર્જયિત્વાઙ્ગુલિદ્વયમ્ ॥ ૧,૧૩૨.૪॥

ભક્તં સદ્ભક્તિશ્રદ્ધાભ્યાં મુક્તિકામી હિ માનવઃ ।
આમ્ર પત્રપુટે કૃત્વા યો ભુઙ્ક્તે કુશવોષ્ટિતે ॥ ૧,૧૩૨.૫॥

કલમ્બિકામ્લિકોપેતં કામ્યં તસ્ય ફલં ભવે (લભે) ત્ ।
બુધં પઞ્ચોપચારેણ પૂજયિત્વા જલાશયે ॥ ૧,૧૩૨.૬॥

શક્તિતો દક્ષિણં દદ્યાત્કર્કરીં તણ્ડુલાન્વિતામ્ ।
બું બુધાયેતિ બીજં સ્યાત્સ્વાહાન્તઃ કમલાદિકઃ ॥ ૧,૧૩૨.૭॥

બાણચાપધરંશ્યામં દલે ચાઙ્ગનિ મધ્યતઃ ।
બુધાષ્ટમીકથા પુણ્યા શ્રોતવ્યા કૃતિભિર્ધ્રુવમ્ ॥ ૧,૧૩૨.૮॥

પુરે પાટલિપુત્રાખ્યે વીરો નામ દ્વિજોત્તમઃ ।
રમ્ભા ભાર્યા તસ્ય ચાસીત્કૌશિકઃ પુત્ર ઉત્તમઃ ॥ ૧,૧૩૨.૯॥

દુહિતા વિજયાનામ્ની વ (ધ) નપાલો વૃષોઽભવત્ ।
ગૃહીત્વા કૌશિકસ્તં ચ ગ્રીષ્મે ગઙ્ગાં ગતોઽરમત્ ॥ ૧,૧૩૨.૧૦॥

ગોપાલકૈર્વૃષશ્ચૌરૈઃ ક્રીડાસ્થોપહૃતો બલાત્ ।
ગઙ્ગાતઃ સ ચ ઉત્થાય વનં બભ્રામ દુઃખિતઃ ॥ ૧,૧૩૨.૧૧॥

જલાર્થં વિજયા ચાગાદ્ભ્રા(ન્મા) ત્રા સાર્ધં ચ સાપ્યગાત્ ।
પિપાસિતો મૃણાલાર્થો આગતોઽથ સરોવરમ્ ॥ ૧,૧૩૨.૧૨॥

દિવ્યસ્ત્રીણાં ચ પૂજાદીન્દૃષ્ટ્વા ચાપ્યથ વિસ્મિતઃ ।
સ તા ગત્વા યયાચેઽન્નં સાનુજોઽહં બુભુક્ષિતઃ ॥ ૧,૧૩૨.૧૩॥

સ્ત્રિયોઽબ્રુવન્વ્રતં કર્તું દાસ્યામશ્ચ કુરુ વ્રતમ્ ।
પત્ન્યર્થં ધનપાના (લાર્) થં પૂજયામાસતુર્બુધમ્ ॥ ૧,૧૩૨.૧૪॥

પુટદ્વયં ગૃહીત્વાન્નં બુભુજાતે પ્રદત્તકમ્ ।
સ્ત્રિયો ગતાસ્તૌ ધનદૌ ધનપાનમપશ્યતામ્ ॥ ૧,૧૩૨.૧૫॥

ચૌરૈર્દત્તં ગૃહીત્વાથ પ્રદોષે પ્રાપ્તવાન્ગૃહમ્ ।
વીરં ચ દુઃખિતં નત્વા રાત્રૌ સુપ્તો યથાસુખમ્ ॥ ૧,૧૩૨.૧૬॥

કન્યાં ચ યુવતીં દૃષ્ટ્વા કસ્મૈ દેયા સુતા મયા ।
યમાયેત્યબ્રવીદ્દુઃખાત્સાચારાદ્વ્રતસત્ફલાત્ ॥ ૧,૧૩૨.૧૭॥

સ્વર્ગં ગતૌ ચ પિતરૌ વ્રતં રાજ્યાય કૌ શિકઃ ।
ચક્રેઽયોધ્યામહારાજ્યં દત્ત્વા ચ ભગિનીં યમે ॥ ૧,૧૩૨.૧૮॥

યમોઽપિ વિજયામાહ ગૃહસ્થા ભવ મે પુરે ।
નોદ્ઘાટયાન્યત્રગતે યમે સા ન તથાકરોત્ ।
અપશ્યન્માતરં સ્વાં સા પાશયાતનયા સ્થિતામ્ ॥ ૧,૧૩૨.૧૯॥

અથોદ્વિગ્ના કોશિકોક્તં જ્ઞાત્વા મુક્તિપ્રદં વ્રતમ્ ।
ચક્રે ચ સા તતો મુક્તા માતા તસ્માચ્ચરેદ્વ્રતમ્ ॥ ૧,૧૩૨.૨૦॥

વ્તપુણ્યપ્રભાવેણ સ્વર્ગં ગત્વાવસત્સુખમ્ ॥ ૧,૧૩૨.૨૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બુધાષ્ટમીવ્રતનિરૂપણં નામ દ્વાત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૩
બ્રહ્મોવાચ ।
અશોકકલિકા હ્યષ્ટૌ યે પિબન્તિ પુનર્વસૌ ।
ચૈત્રે માસિ સિતાષ્ટમ્યાં ન તે શોકમવાપ્નુયુઃ ॥ ૧,૧૩૩.૧॥

ત્વામશોક ! હરાભીષ્ટ ! મધુમાસસમુદ્ભવ ।
પિબામિ શોકસન્તપ્તો મામશોકં સદા કુરુ ॥ ૧,૧૩૩.૨॥

(ઇત્યશોકાષ્ટમીવ્રતમ્) ।
બ્રહ્મોવાચ ।
શુક્લાષ્ટમ્યામાશ્વયુજે ઉત્તરાષાઢયા યુતા ।
સા મહાનવમીત્યુક્તા સ્નાનદાનાદિ ચાક્ષયમ્ ॥ ૧,૧૩૩.૩॥

નવમી કેવલા ચાપિ દુર્ગાં ચૈવ તુ પૂજયેત્ ।
મહાવ્રતં મહાપુણ્યં શઙ્કરાદ્યૈરનુષ્ઠિતમ્ ॥ ૧,૧૩૩.૪॥

અયાચિતાદિ ષષ્ઠ્યાદૌ રાજા શત્રુજયાયા ચ ।
જપહોમસમાયુક્તઃ કન્યાં વા ભોજયેત્સદા ॥ ૧,૧૩૩.૫॥

દુર્ગેદુર્ગે રક્ષિણિ સ્વાહા મન્ત્રોઽયં પૂજનાદિષુ ।
દીર્ઘાકારાદિમાત્રાભિર્નવ દેવ્યો નમોઽન્તિકાઃ ॥ ૧,૧૩૩.૬॥

ષડ્ભિઃ પદૈર્નમઃ સ્વાહા વષડાદિહૃદાદિકમ્ ।
અઙ્ગુષ્ઠાદિકનિષ્ઠાન્તં ન્યસ્ય વૈ પૃજયેચ્છિવામ્ ॥ ૧,૧૩૩.૭ ॥

અષ્ટમ્યાં નવ ગેહાનિ દારુજાન્યેકમેવ વા ।
તસ્મિન્દેવી પ્રકર્તવ્યા હૈમી વારાજતાપિ વા ॥ ૧,૧૩૩.૮ ॥

શૂલે ખડ્ગે પુસ્તકે વા પટે વા મણ્ડલે (પે) યજેત્ ।
કપાલં ખેટકં ઘણ્ટાં દર્પણં તર્જનીં ધનઃ ॥ ૧,૧૩૩.૯ ॥

ધ્વજં ડમરુકં પાશં વામહસ્તેષુ બિભ્રતી ।
શક્તિં ચ મુદ્ગરં શૂલં વજં ખડ્ગં તથાઙ્કુશમ્ ॥ ૧,૧૩૩.૧૦ ॥

શરં ચક્રં શલાકાં ચ દુર્ગામાયુધસંયુતામ્ ।
શેષાઃ ષોડશહસ્તાં સ્યુરઞ્જનં ડમરું વિના ॥ ૧,૧૩૩.૧૧ ॥

રુદ્રચણ્ડા પ્રચણ્ડા ચ ચણ્ડોગ્રા ચણ્ડનાયિકા ।
ચણ્ડા ચણ્ડવતી ચૈવ ચણ્ડરૂપાતિચણ્ડિકા ॥ ૧,૧૩૩.૧૨ ॥

નવમી ચોગ્રચણ્ડા ચ મધ્યમાગ્નિપ્રભાકૃતિઃ ।
રોચના ત્વરુણા કૃષ્ણા નીલં ધૂમ્રા ચ શુક્લકા ॥ ૧,૧૩૩.૧૩ ॥

પાતા ચ પાણ્ડુરા પ્રોક્તા આલીઢં હરિતં તથા ।
મ (મા) હિષોડસ્ય સ ખડ્ગાગ્રપ્રકચગ્રહમુષ્ટિકઃ ॥ ૧,૧૩૩.૧૪ ॥

જપ્ત્વા દશાક્ષરીં વિદ્યાં નાસૌ કેનાપિ બધ્યતે ।
પઞ્ચ (ઞ્ચા) દશાઙ્ગુલં ખડ્ગં ત્રિશૂલં ચ તતો યજેત્ ।
લિઙ્ગસ્થાં પૂજયેદ્વાપિ પાદુકેડથ જલેડપિ વા ॥ ૧,૧૩૩.૧૫ ॥

વિચિત્રાં રક્ષયેત્પૂજામષ્ટમ્યામુપવાસયેત્ ।
પઞ્ચાબ્દં મહિષં બસ્તં રાત્રિશેષે ચ ઘાતયેત્ ॥ ૧,૧૩૩.૧૬ ॥

વિધિવત્કાલિકાલીતિ તદુત્થરુધિરાદિકમ્ ।
નૈરૃત્યાં પૂતનાં ચૈવ વાયવ્યાં પાપરાક્ષસીમ્ ॥ ૧,૧૩૩.૧૭ ॥

દદ્યાચ્ચરક્યૈ ચૈશાન્યામાગ્નેય્યાં ચ વિદારિકામ્ ॥ ૧,૧૩૩.૧૮ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મહાનવમીવ્રતં નામ ત્રયસ્ત્રિંશદુત્તરશતતમોડધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૩૪

બ્રહ્મોવાચ ।
મહાકૌશિકમન્ત્રશ્ચ કથ્યતેઽત્ર મહાફલઃ ॥ ૧,૧૩૪.૧॥

(મહાકૌશિકમન્ત્રઃ)-ૐ મહાકૌશિકાય નમઃ ।
ૐ હૂં હૂં પ્રસ્ફુર લલ લલ કુલ્વ કુલ્વ ચુલ્વ ચુલ્વ ખલ્લ ખલ્લ
મુલ્વ મુલ્વ ગુલ્વ ગુલ્વ તુલ્વ પુલ્લ પુલ્લ ધલ્વ ધુલ્વ ધુમ ધુમ
ધમધમ મારય મારય ધકધક વજ્ઞાપયજ્ઞાપય
વિદારયવિદારય કમ્પકમ્પ કમ્પયકમ્પય પૂરયપૂરય આવેશયાવેશય
ૐ હ્રીં ૐ હ્રીં હં વં વં હું તટતટ મદમદ હ્રીં
ૐ હૂં નૈરૃતાયા નમઃ નિરૃતયે દાતવ્યમ્ ।
મહાકૌશિકમન્ત્રેણ મન્ત્રિતં બલિમર્પયેત્ ॥ ૧,૧૩૪.૨॥

તસ્યાગ્રતો નૃપઃ સ્નાયાચ્છત્રં કૃત્વા ચ પૈષ્ટિકમ્ ।
ખડ્ગેન ઘાતયિત્વા તુ દદ્યાત્સ્કન્દવિશાખયોઃ ॥ ૧,૧૩૪.૩॥

માતૃણાં ચૈવ દેવીનાં પૂજા કાર્યા તથા નિશિ ।
બ્રહ્માણી ચૈવ માહેશી કૌમારી વૈષ્ણવી તથા ॥ ૧,૧૩૪.૪॥

વારાહી ચૈવ માહેન્દ્રી ચામુણ્ડા ચણ્ડિકા તથા ।
જયન્તી મઙ્ગલા કાલી ભદ્રકાલી કપાલિની ॥ ૧,૧૩૪.૫॥

દુર્ગા ક્ષમા શિવા ધાત્રી સ્વાહા સ્વધા નમોઽસ્તુ તે ।
ક્ષીરાદ્યૈઃ સ્નાપયેદ્દેવીં કન્યકાઃ પ્રમદાસ્તથા ॥ ૧,૧૩૪.૬॥

દ્વિજાતી (દી) નથ પાષણ્ડાનન્નદાનેન પૂજયેત્ ।
ધ્વજપત્રપતાકાદ્યૈ રથયાત્રાસુ વસ્ત્રકૈઃ ।
મહાનવમ્યાં પૂજેયં જયરાજ્યાદિદાયિકા ॥ ૧,૧૩૪.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મહાનવમ્યાં મહાકૌશિકમન્ત્રકૃત્યાદિવિવરણં નામ ચતુસ્ત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૫
બ્રહ્મોવાચ ।
નવમ્યામાશ્વિને શુક્લે એકભક્તેન પૂજયેત્ ।
દેવીં વિપ્રંલ્લક્ષમેકઞ્જપેદ્વીરં વ્રતી નરઃ ॥ ૧,૧૩૫.૧॥

(તિ વીરનવમીવ્રતમ્) ।

બ્રહ્મોવાચ ।
ચૈત્રે શુક્લનવમ્યાં ચ દેવીં દમનકૈર્યજેત્ ।
આયુરારોગ્યસૌભાગ્યં શત્રુભિશ્ચાપરાજિતઃ ॥ ૧,૧૩૫.૨॥

(ઇતિ દમનકનવમીવ્રતમ્) ।
બ્રહ્મોવાચ ।
દશમ્યામેકભક્તાશી સમાન્તે દશધેનુદઃ ।
દિશશ્ચ કાઞ્ચનીર્દત્ત્વા બ્રહ્માણ્ડાધિપતિર્ભવેત્ ॥ ૧,૧૩૫.૩॥

(ઇતિ દિગ્દશમીવ્રતમ્) બ્રહ્મોવાચ ।
એકાદશ્યામૃષિપૂજા કાર્યા સર્વોપકારિકા ।
ધનવાન્પુત્રવાંશ્ચાન્તે ઋષિલોકે મહીયતે ॥ ૧,૧૩૫.૪॥

મરીચિરત્ર્યં ગિરસૌ પુલસત્યઃ પુલહઃ ક્રતુઃ ।
પ્રચેતાશ્ચ વસિષ્ઠશ્ચ ભૃગુર્નારદ એવ ચ ॥ ૧,૧૩૫.૫॥

ચૈત્રાદૌ કારયેત્પૂજાં માલ્યૈશ્ચ દમનોદ્ભવૈઃ ।
અશોકાખ્યાષ્ટમીપ્રોક્તા વીરાખ્યા નવમીતથા ॥ ૧,૧૩૫.૬॥

દમનાખ્યા દિગ્દશમી નવમ્યેકાદશી તથા ॥ ૧,૧૩૫.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઋષ્યેકાદશીવ્રતં નામ પઞ્ચત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૬
બ્રહ્મોવાચ ।
શ્રવણદ્વાદશોં વક્ષ્યે ભુક્તિમુક્તિપ્રદાયિનીમ્ ।
એકાદશી દ્વાદશી ચ શ્રવણેન ચ સંયુતા ॥ ૧,૧૩૬.૧॥

વિજયા સા તિથિઃ પ્રોક્તા હરિપૂજાદિ ચાક્ષયમ્ ।
એક ભક્તેન નક્તેન તથૈવાયાચિતેન ચ ॥ ૧,૧૩૬.૨॥

ઉપવાસેન ભૈક્ષ્યેણ નૈવાદ્વાદશિકો ભવેત્ ।
કાસ્યં માંસં તથા ક્ષૌદ્રં લોભં વિતથભાષણમ્ ॥ ૧,૧૩૬.૩॥

વ્યાયામં ચ વ્યવાયં ચ દિવાસ્વપ્નમથાઞ્જનમ્ ।
શિલાપિષ્ટં મસૂરં ચ દ્વાદશ્યાં વર્જયેન્નરઃ ॥ ૧,૧૩૬.૪॥

માસી ભાદ્રપદે શુક્લા દ્વાદશી શ્રવણાન્વિતા ।
મહતી દ્વાદશી જ્ઞેયા ઉપવાસે મહાફલા ॥ ૧,૧૩૬.૫॥

સંગમ સરિતાં સ્નાનં બુધયુક્તા મહાફલા ।
કુંભે સરત્ને સજલે યજેત્સ્વર્ણં તુ વામનમ્ ॥ ૧,૧૩૬.૬॥

સિતવસ્ત્રયુગચ્છન્નં છત્રોપાનદ્યુગાન્વિતમ્ ।
ૐ નમો વાસુદેવાય શિરઃ સમ્પૂજયેત્તતઃ ॥ ૧,૧૩૬.૭॥

શ્રીધરાય મુખં તદ્વત્કણ્ઠં કૃષ્ણાય વૈ નમઃ ।
નમઃ શ્રીપતયે વક્ષો ભુજૌ સર્વાસ્ત્રધારિણે ॥ ૧,૧૩૬.૮॥

વ્યાપકાય નમઃ કુક્ષૌ કેશવાયોદરં બુધઃ ।
ત્રૈલોક્યપતયે મેઢ્રં જઙ્ઘે સર્વભૃતે નમઃ ॥ ૧,૧૩૬.૯॥

સર્વાત્મને નમઃ પાદૌ નૈવેદ્યં ઘૃતપાયસમ્ ।
કુમ્ભાંશ્ચ મોદકાન્દદ્યાજ્જાગરં કારયેન્નિશિ ॥ ૧,૧૩૬.૧૦॥

સ્નાત્વાચાન્તોઽર્ચયિત્વા તુ કૃતપુષ્પાઞ્જલિર્વદેત્ ।
નમોનમસ્તે ગોવિન્દ બુધ શ્રવણસંજ્ઞક ! ॥ ૧,૧૩૬.૧૧॥

અઘૌઘસંક્ષયં કૃત્વા સર્વસૌખ્યપ્રદો ભવ ।
પ્રીયતાં દેવદેવેશો વિપ્રેભ્યઃ કલશાન્દદેત્ ।
નદ્યસ્તીરેઽયઃ વા કુર્યાત્સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧,૧૩૬.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પુર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રવણદ્વાદશીવ્રતનિરૂપણં નામ ષટ્ત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૭
બ્રહ્મોવાચ ।
કામદેવત્રયોદશ્યાં પૂજ્યો દમનકાદિભિઃ ।
રતિપ્રીતિસમાયુક્તો હ્યસોકો મણિભૂષિતઃ ॥ ૧,૧૩૭.૧॥

(ઇતિ મદનકત્રયોદશીવ્રતમ્) ।
ચતુર્દશ્યાં તથાષ્ટમ્યાં પક્ષ્યોઃ શુક્લકૃષ્ણયોઃ ।
યોઽબ્દમેકં ન ભુઞ્જીત મુક્તિભાક્ષિવપૂજનાત્ ॥ ૧,૧૩૭.૨॥

(ઇતિ શિવચતુર્દશ્યષ્ટમીવ્રતમ્) ।

ત્રિરાત્રોપોષિતો દદ્યાત્કાર્તિક્યાં ભવનં શુભમ્ ।
સૂર્યલોકમવાપ્નોતિ ધામવ્રતમિદં શુભમ્ ॥ ૧,૧૩૭.૩॥

અમાવસ્યાં પિતૃણાં ચ દત્તં જલાદિતદક્ષયમ્ ।
નક્તાભ્યાશી વારનામ્ના યજન્વારાણિ સર્વભાક્ ॥ ૧,૧૩૭.૪॥

(ઇતિ વારવ્રતાનિ) ।
દ્વાદશર્ક્ષાણિ વિપ્રર્ષે ! પ્રતિમાસં તુ યાનિ વૈ ।
તન્નામ્નાન્તેઽતચ્યુતં તેષુ સમ્યક્સમ્પૂજયેન્નરઃ ॥ ૧,૧૩૭.૫॥

કેશવં માર્ગશીર્ષે તુ ઇત્યાદૌ કૃતિકાદિકે (કા) ।
ઘૃતહોમશ્ચતુર્માસં કૃસરઞ્ચ નિવેદયેત્ ॥ ૧,૧૩૭.૬॥

આષાઢાદૌ પાયસં તુ વિપ્રાંસ્તેનૈવ ભોજયેત્ ।
પઞ્ચાવ્યજલસ્નાનનૈવેદ્યૈર્નક્તમાચરેત્ ॥ ૧,૧૩૭.૭॥

અર્વાગ્વિસર્જનાદ્દ્રવ્યં નૈવેદ્યં સર્વમુચ્યતે ।
વિસર્જિતે જગન્નાથે નિર્માલ્યં ભવતિ ક્ષણાત્ ॥ ૧,૧૩૭.૮॥

પાઞ્ચરાત્રવિદો મુખ્યા નૈવેદ્યં ભુઞ્જતે સ્વયમ્ ।
એવં સંવત્સરસ્યાન્તે વિશેષેણ પ્રપૂજયેત્ ॥ ૧,૧૩૭.૯॥

નમોનમસ્તેઽચ્યુત ! સંક્ષયોઽસ્તુ પાપસ્ય વૃદ્ધિં સમુપૈતુ પુણ્યમ્ ।
ઐશ્વર્યવિત્તાદિ સદાક્ષયં મે તથાસ્તુ મે સન્તતિરક્ષયૈવ ॥ ૧,૧૩૭.૧૦॥

યથાચ્યુત !ત્વં પરતઃ પરસ્માત્સ બ્રહ્મભૂતઃ પરતઃ પરસ્માત્ ।
તથાચ્યુતં મે કુરુ વાઞ્છિતં સદા મયા કૃતં પાપહરાપ્રમેય ॥ ૧,૧૩૭.૧૧॥

અચ્યુતાનન્ત ! ગોવિન્દ ! પ્રસીદ યદભીપ્સિતમ્ ।
તદક્ષયમમેયાત્મન્કુરુષ્વ પુરુષોત્તમ ॥ ૧,૧૩૭.૧૨॥

કુર્યાદ્વૈ સપ્ત વર્ષાણિ આયુઃ શ્રીસદ્ગતીર્નરઃ ।
ઉપોષ્યૈકાદશીબ્દમષ્ટમીં ચ ચતુર્દશીમ્ ॥ ૧,૧૩૭.૧૩॥

સપ્તમીં પૂજયેદ્વિષ્ણું દુર્ગાં શમ્ભું રવિં ક્રમાત્ ।
તેષાં લોકં સમાપ્નોતિ સર્વકામાંશ્ચ નિર્મલઃ ॥ ૧,૧૩૭.૧૪॥

એકભક્તેન નક્તેન તથૈવાયાચિતેન ચ ।
ઉપવાસેન શાકાદ્યૈઃ પૂજયન્તસર્વદેવતાઃ ॥ ૧,૧૩૭.૧૫॥

સર્વઃ સર્વાસુ તિથિષુ ભુક્તિં મુક્તિમવાપ્નુયાત્ ।

ધનદોઽગ્નિઃ પ્રતિપદિ નાસત્યો દસ્ત્ર અર્ચિતઃ ॥ ૧,૧૩૭.૧૬॥

શ્રીર્યમશ્ચ દ્વિતીયાયાં પઞ્ચમ્યા પાર્વતી શ્રિયા ।
નાગાઃ ષષ્ઠ્યાં કાર્તિકેયઃ સપ્તમ્યાં ભાસ્કરોઽર્થદઃ ॥ ૧,૧૩૭.૧૭॥

દુર્ગાષ્ટમ્યાં માતરશ્ચ નવમ્યામથ તક્ષકઃ ।
ઇન્દ્રો દશમ્યાં ધનદ એકાદશ્યાં મુનીશ્વરાઃ ॥ ૧,૧૩૭.૧૮॥

દ્વાદશ્યાં ચ હરિઃ કામસ્ત્રયોદશ્યાં મહેશ્વરઃ ।
ચતુર્દશ્યાં પઞ્ચદશ્યાં બ્રહ્મા ચ પિતરોઽપરે ॥ ૧,૧૩૭.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
તિથિવારનક્ષત્રાદિવ્રતનિરૂપણં નામ સપ્તત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૮
(ઇતિ વ્રતાનિ સમાપ્તાનિ) ।
હરિરુવાચ ।
રાજ્ઞાં વંશાન્પ્રવક્ષ્યામિ વંશાનુચરિતાનિ ચ ।
વિષ્ણુનાભ્યબ્જતો બ્રહ્મા દક્ષોઽઙ્ગુષ્ઠાચ્ચ તસ્ય વૈ ॥ ૧,૧૩૮.૧॥

તતોઽપિતર્વિવસ્વાંશ્ચ તતઃ સૂનુર્વિવસ્વતઃ મનુરિક્ષ્વાકુશર્યાતી
નૃગો ધૃષ્ટઃ પ્રષધ્રકઃ ॥ ૧,૧૩૮.૨॥

નરિષ્યન્તશ્ચ નાભાગો દિષ્ટઃ શશક એવ ચ ।
મનોરાસીદિલા કન્યા સુદ્યુમ્નોઽસ્ય સુતોઽભવત્ ॥ ૧,૧૩૮.૩॥

ઇલાયાં તુ બુધાજ્જાતો રાજા રુદ્ર પુરૂરવાઃ ।
સુતાસ્ત્રયશ્ચ સુદ્યુમ્નાદુત્કલો વિનતો ગયઃ ॥ ૧,૧૩૮.૪॥

અભૃચ્છૂદ્રો ગોવધાત્તુ પૃષધ્રસ્તુ મનોઃ સુતઃ ।
કરૂષાત્ક્ષત્રિયા જાતા કારૂષા ઇતિ વિશ્રુતાઃ ॥ ૧,૧૩૮.૫॥

દિષ્ટપુત્રસ્તુ નાભાગો વૈશ્યાતામગમત્સ ચ ।
તસ્માદ્ભલન્દનઃ પુત્રો વત્સપ્રીતિર્ભલન્દનાત્ ॥ ૧,૧૩૮.૬॥

તતઃ પાંશુઃ ખનિત્રોઽભૂદ્ભૂપસ્તસ્માત્તતઃ ક્ષુપઃ ।
ક્ષુપાદ્વિંશોઽભવત્પુત્રો વિંશાજ્જાતો વિવિંશકઃ ॥ ૧,૧૩૮.૭॥

વિવિંશાચ્ચ ખનીનેત્રો વિભૂતિસ્તત્સુતઃ સ્મૃતઃ ।

કરન્ધમો વિભૂતેસ્તુ તતો જાતોઽપ્યવિક્ષિતઃ ॥ ૧,૧૩૮.૮॥

મરુત્તોઽવિક્ષિતસ્યાપિ નરિષ્યન્તસ્તતઃ સ્મૃતઃ ।
નરિષ્યન્તાત્તમો જાતસ્તતોભૂદ્રાજવર્ધનઃ ॥ ૧,૧૩૮.૯॥

રાજવર્ધાત્સુધૃતિશ્ચ નરોઽભૂત્સુધૃતેઃ સુતઃ ।
નરાચ્ચ કેવલઃ પુત્રઃ કેવલાદ્ધુન્ધુમાનપિ ॥ ૧,૧૩૮.૧૦॥

ધુન્ધુમતો વેગવાંશ્ચ બુધો વેગવતઃ સુતઃ ।
તૃણબિન્દુર્બુધાજ્જાતઃ કાન્યા ચૈલવિલા તથા ॥ ૧,૧૩૮.૧૧॥

વિશાલં જનયામાસ તૃણબિન્દોસ્ત્વલમ્બુસા ।
વિશાલાદ્ધેમચન્દ્રોઽભૂદ્ધેમ ચન્દ્રાચ્ચ ચન્દ્રકઃ ॥ ૧,૧૩૮.૧૨॥

ધૂમ્રાશ્વશ્ચૈવ ચન્દ્રાત્તુ ધૂમ્રાશ્વાત્સૃઞ્જયસ્તથા ।
સઞ્જયાત્સહદેવોઽભૂત્કૃશાશ્વસ્તત્સુતોઽભવત્ ॥ ૧,૧૩૮.૧૩॥

કૃશાશ્વાત્સોમદત્તસ્તુતતોઽભૂજ્જનમેજયઃ ।
તત્પુત્રશ્ચ સુમન્તિશ્ચ એતે વૈશાલકા નૃપાઃ ॥ ૧,૧૩૮.૧૪॥

શર્યાતેસ્તુ સુકન્યાભૂત્સા ભાર્યા ચ્યવનસ્ય તુ ।
અનન્તો નામ શાર્યતે રનન્તાદ્રેવતોઽભવત્ ॥ ૧,૧૩૮.૧૫॥

રૈવતો રેવતસ્યાપિ રૈવતાદ્રેવતી સુતા ।
ધૃષ્ટસ્ય ધાર્ષ્ટર્(ત) કં ક્ષેત્રં વૈષ્ણવં (શ્યકં) તદ્બભૂવ હ ॥ ૧,૧૩૮.૧૬॥

નાભાગપુત્રો નેષ્ઠો હ્યમ્બરીષોઽપિ તત્સુતઃ ।
અમ્બરીષાદ્વિરૂપોઽભૂત્પૃષદશ્વો વિરૂપતઃ ॥ ૧,૧૩૮.૧૭॥

રથીનરશ્ચ તત્પુત્રો વાસુદેવપરાયણઃ ।
ઇક્ષ્વાકોસ્તુ ત્રયઃ પુત્રાઃ વિકુક્ષિનિમિદણ્ડકાઃ ॥ ૧,૧૩૮.૧૮॥

ઇક્ષ્વાકુજો વિકુક્ષિસ્તુ શશાદઃ શશભક્ષણાત્ ।
પુરઞ્જયઃ શશાદાચ્ચ કકુત્સ્થાખ્યોઽભવત્સુતઃ ॥ ૧,૧૩૮.૧૯॥

અનેનાસ્તુ કકુત્સથાચ્ચ પૃથુઃ પુત્રસ્ત્વનેનસઃ ।
વિશ્વરાતઃ પૃથોઃ પુત્ર આર્દ્રેઽભૂદ્વિશ્વરાતતઃ ॥ ૧,૧૩૮.૨૦॥

યુવનાશ્વોઽભવચ્ચાર્દ્રાચ્છાવસ્તો યુવનાશ્વતઃ ।
બૃહદશ્વસ્તુશાવસ્તાત્તત્પુત્રઃ કુવલાશ્વકઃ ॥ ૧,૧૩૮.૨૧॥

ધુન્ધુમારો હિ વિખ્યાતો દૃઢશ્વશ્ચતતોઽભવત્ ।
ચન્દ્રાશ્વઃ કપિલાશ્વશ્ચ હર્યશ્વશ્ચ દૃઢશ્વતઃ ॥ ૧,૧૩૮.૨૨॥

હર્યશ્વાચ્ચ નિકુમ્ભોઽભૂદ્ધિતાશ્વશ્ચ નિકુમ્ભતઃ ।
પૂજાશ્વશ્ચ હિતાશ્વાચ્ચ તત્સતો યુવનાશ્વકઃ ॥ ૧,૧૩૮.૨૩॥

યુવનાશ્વાચ્ચ માન્ધાતા બિન્દુમત્યાસ્તતોઽભવત્ ।
મુચુકુન્દોઽમ્બરીષશ્ચ પુરુકુત્સસ્ત્રયઃ સુતાઃ ॥ ૧,૧૩૮.૨૪॥

પઞ્ચાશત્કન્યકાશ્ચૈવ ભાર્યાસ્તાઃ સૌભરેર્મુનેઃ ।
યુવનાશ્વોઽમ્બરીષાચ્ચ હરિતો યુવનાશ્વતઃ ॥ ૧,૧૩૮.૨૫॥

પુરુકુત્સાન્નર્મદાયાં ત્રસદસ્યુરભૂત્સુતઃ ।
અનરણ્યસ્તતો જાતો હર્યશ્વોઽપ્યનરણ્યતઃ ॥ ૧,૧૩૮.૨૬॥

તત્પુત્રોઽભૂદ્વસુમનાસ્ત્રિધન્વા તસ્ય ચાત્મજઃ ।
ત્રય્યારુણસ્તસ્ય પુત્રસ્તસ્ત સત્યરતઃ સુતઃ ॥ ૧,૧૩૮.૨૭॥

યસ્ત્રિશઙ્કુઃ સમાખ્યાતો હરિશ્ચન્દ્રોઽભવત્તતઃ ।
હરિશ્ચન્દ્રાદ્રોહિતાશ્વો હરિતો રોહિતાશ્વતઃ ॥ ૧,૧૩૮.૨૮॥

હરિતસ્ય સુતશ્ચઞ્ચુશ્ચઞ્ચોશ્ચ વિજયઃ સુતઃ ।
વિજયાદ્રુરુકો જજ્ઞે રુરુકાત્તુ વૃકઃ સુતઃ ॥ ૧,૧૩૮.૨૯॥

વૃકાદ્બાહુર્નૃપોઽભૂચ્ચ બાહોસ્તુ સગરઃ સ્મૃતઃ ।
ષષ્ટિઃ પુત્ર સહસ્રાણિ સુમત્યાં સગરાદ્ધર ॥ ૧,૧૩૮.૩૦॥

કેશિન્યામેક એવાસાવસમઞ્જસસંજ્ઞકઃ ॥ ૧,૧૩૮.૩૧॥

તસ્યાંશુમાન્સુતો વિદ્વાન્દિલીપસ્તત્સુતોઽભવત્ ।
ભગીરથો દિલીપાચ્ચ યો ગઙ્ગામાનયદ્ભુવમ્ ॥ ૧,૧૩૮.૩૨॥

શ્રુતો ભગીરથસુતો નાભગશ્ચ શ્રુતાત્કિલ ।
નાભાગાદમ્બરીષોઽભૂત્સિન્દુદ્વીપોઽમ્બરીષતઃ ॥ ૧,૧૩૮.૩૩॥

સિન્દુદ્વીપસ્યાયુતાયુરૃતુપર્ણસ્તદાત્મજઃ ।
ઋતુષર્ણાત્સર્વકામઃ સુદાસોઽભૂત્તદાત્મજઃ ॥ ૧,૧૩૮.૩૪॥

સુદાસસ્ય ચ સૌદાસો નામ્ના મિત્રસહઃ સ્મૃતઃ ।
કલ્માષ પાદસંજ્ઞશ્ચ દમયન્ત્યાં તદાત્મજઃ ॥ ૧,૧૩૮.૩૫॥

અશ્વકાખ્યોऽભવત્પુત્રો હ્યશ્વકાન્મૂલ(ન્મૃચ્છ) કોऽભવત્ ।
તતો દશરથો રાજા તસ્ય ચૈલવિલઃ સુતઃ ॥ ૧,૧૩૮.૩૬॥

તસ્ય વિશ્વસહઃ પુત્રઃ ખટ્વાઙ્ગશ્ચ તદાત્મજઃ ।
ખટ્વાઙ્ગદ્દીર્ઘબાહુશ્ચ દીર્ઘબાહોર્હ્યજઃ સુતઃ ॥ ૧,૧૩૮.૩૭॥

તસ્ય પુત્રો દશરથશ્ચત્વારસ્તત્સુતાઃ સ્મૃતાઃ ।
રામલક્ષ્મણશત્રુઘ્નભરતાશ્ચ મહાબલાઃ ॥ ૧,૧૩૮.૩૮॥

રામાત્કુશલવૌ જાતૌ ભરતાત્તાર્ક્ષ્યપુષ્કરૌ ।
ચિત્રાઙ્ગદશ્ચન્દ્રકેતુર્લક્ષ્મણાત્સંબભૂવતુઃ ॥ ૧,૧૩૮.૩૯॥

સુબાહુશૂરસેનૌ ચ શત્રુઘ્નાત્સંબભૂવતુઃ ।
કુશસ્ય ચાતિથિઃ પુત્રો નિષધો હ્યતિથેઃ સુતઃ ॥ ૧,૧૩૮.૪૦॥

નિષધસ્ય નલઃ પુત્રો નલસ્ય ચ નભાઃ સ્મૃતઃ ।
નભસઃ પુણ્ડરીકસ્તુક્ષેમધન્વા તદાત્મજઃ ॥ ૧,૧૩૮.૪૧॥

દેવાનીકસ્તસ્ય પુત્રો દેવાનીકાદહીનકઃ ।
અહીનકાદ્રુરુર્યજ્ઞે પારિયાત્રો રુરોઃ સુતઃ ॥ ૧,૧૩૮.૪૨॥

પારિયાત્રાદ્દલો યજ્ઞે દલ પુત્રશ્છલઃ સ્મૃતઃ ।
છલાદુક્થસ્તતો હ્યુક્થાદ્વજનાભસ્તતો ગણઃ ॥ ૧,૧૩૮.૪૩॥

ઉષિતાશ્વો ગણાજ્જજ્ઞે તતો વિશ્વસહોऽભવત્ ।
હિરણ્યનાભસ્તત્પુત્રસ્તત્પુત્રઃ પુષ્પકઃ સ્મૃતઃ ॥ ૧,૧૩૮.૪૪॥

ધ્રુવસન્ધિરભૂત્પુષ્પાદ્ધ્રુવસન્ધેઃ સુદર્શનઃ ।
સુદર્શનાદગ્નિવર્ણઃ પદ્મવણોऽગ્નિવર્ણતઃ ॥ ૧,૧૩૮.૪૫॥

શીઘ્રસ્તુ પદ્મવર્ણાત્તુ શીઘ્રાત્પુત્રો મરુસ્ત્વભૂત્ ।
મરોઃ પ્રસુશ્રુતઃ પુત્રસ્તસ્ય ચોદાવસુઃ સુતઃ ॥ ૧,૧૩૮.૪૬॥

ઉદાવસોર્નન્દિવર્ધનઃ સુકેતુર્નન્દિવર્ધનાત્ ।
સુકેતોર્દેવરાતોऽભૂદ્બૃહદુક્થસ્તતઃ સુતઃ ॥ ૧,૧૩૮.૪૭॥

બૃહદુક્થાન્મહાવીર્યઃ સુધૃતિસ્તસ્ય ચાત્મજઃ ।
સુધૃતેર્ધૃષ્ટકેતુશ્ચ હર્યશ્વો ધૃષ્ટકેતુતઃ ॥ ૧,૧૩૮.૪૮॥

હર્યશ્વાત્તુ મરુર્જાતો મરોઃ પ્રતીન્ધકોऽભવત્ ।
પ્રતીન્ધકાત્કૃતિરથો દેવમીઢસ્તદાત્મજઃ ॥ ૧,૧૩૮.૪૯॥

વિબુધો દેવમીઢાત્તુ વિબુધાત્તુ મહાધૃતિઃ ।
મહાધૃતેઃ કીર્તિરાતો મહારોમા તદાત્મજઃ ॥ ૧,૧૩૮.૫૦॥

મહારોમ્ણઃ સ્વર્ણરોમા હ્રસ્વરોમા તદાત્મજઃ ।
સીરધ્વજો હ્રસ્વરોમ્ણઃ તસ્ય સીતાભવત્સુતા ॥ ૧,૧૩૮.૫૧॥

ભ્રાતા કુશધ્વજસ્તસ્ય સીરધ્વજાત્તુ ભાનુમાન્ ।
શતદ્યુમ્નો ભાનુમતઃ શતદ્યુમ્નાચ્છુચિઃ સ્મૃતઃ ॥ ૧,૧૩૮.૫૨॥

ઊર્જનામા શુચેઃ પુત્રઃ સનદ્વાજસ્તદાત્મજઃ ।
સનદ્વાજાત્કુલિર્જાતોઽનઞ્જનસ્તુ કુલેઃ સુતઃ ॥ ૧,૧૩૮.૫૩॥

અનઞ્જનાચ્ચ કુલજિત્તસ્યાપિ ચાધિનેમિકઃ ।
શ્રુતાયુસ્તસ્ય પુત્રોઽભૂત્સુપાર્શ્વશ્ચ તદાત્મજઃ ॥ ૧,૧૩૮.૫૪॥

સુપાર્શ્વાત્સૃંજયો જાતઃ ક્ષેમારિઃ સૃજયાત્સમૃતઃ ।
ક્ષેમારિ તસ્ત્વનેનાશ્ચ તસ્ય રામરથઃ સ્મૃતઃ ॥ ૧,૧૩૮.૫૫॥

સત્યરથો રામરથાત્તસ્માદુપગુરુઃ સ્મૃતઃ ।
ઉપગુરોરુપગુપ્તઃ સ્વાગતશ્ચોપગુપ્તતઃ ॥ ૧,૧૩૮.૫૬॥

સ્વનરઃ સ્વાગતાજ્જજ્ઞે સુવર્ચાસ્તસ્ય ચાત્મજઃ ।
સુવર્ચસઃ સુપાર્શ્વસ્તુ સુશ્રુતશ્ચ સુપાર્શ્વતઃ ॥ ૧,૧૩૮.૫૭॥

જયસ્તુ સુશ્રુતાજ્જજ્ઞે જયાત્તુ વિજયોઽભવત્ ।
વિજયસ્ય ઋતઃ પુત્રઃ ઋતસ્ય સુનયઃ સુતઃ ॥ ૧,૧૩૮.૫૮॥

સુનયાદ્વીતહવ્યસ્તુ વીતહવ્યાદ્ધતિઃ સ્મૃતઃ ।
બહુલાશ્વો ધૃતેઃ પુત્રો બહુલાશ્વાત્કૃતિઃ સ્મૃતઃ ॥ ૧,૧૩૮.૫૯॥

જનકસ્ય દ્વયે વંશે ઉક્તો યોગસમાશ્રયઃ ॥ ૧,૧૩૮.૬૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સૂર્યવંશવર્ણનં નામાષ્ટત્રિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩૯

હરિરુવાચ ।
સૂર્યસ્ય કથિતો વંશઃ સોમવંશં શૃણુષ્વ મે ।

નારાયણસુતો બ્રહ્મા બ્રહ્મણોઽત્રેઃ સમુદ્ભવઃ ॥ ૧,૧૩૯.૧॥

અત્રેઃ સોમસ્તસ્ય ભાર્યા તારા સુરગુરોઃ પ્રિયા ।
સોમાત્તરા બુધં જજ્ઞે બુધપુત્રઃ પુરૂરવાઃ ॥ ૧,૧૩૯.૨॥

બુધપુત્રાદથોર્વશ્યાં ષટ્પુત્રાસ્તુ શ્રુતાત્મકઃ ।
વિશ્વાવસુઃ શતાયુશ્ચ આયુર્ધોમાનમાવસુઃ ॥ ૧,૧૩૯.૩॥

અમાવસોર્ભીમનામા ભીમપુત્રશ્ચ કાઞ્ચનઃ ।
કાઞ્ચનસ્ય સુહોત્રોઽભૂજ્જહ્નુશ્ચાભૂત્સુહોત્રતઃ ॥ ૧,૧૩૯.૪॥

જહ્નોઃ સુમન્તુરભવત્સુમન્તોરપજાપકઃ ।
બલાકાશ્વસ્તસ્ય પુત્રો બલાકાશ્વાત્કુશઃ સ્મૃતઃ ॥ ૧,૧૩૯.૫॥

કુશાશ્વઃ કુશનાભશ્ચામૂર્તરયો વસુઃ કુશાત્ ।
ગાધિઃ કુશાશ્વાત્સંજજ્ઞે વિશ્વામિત્રસ્તદાત્મજઃ ॥ ૧,૧૩૯.૬॥

કન્યા સત્યવતી દત્તા ઋચીકાય દ્વિજાય સા ।
ઋચીકાજ્જમદગ્નિશ્ચ રામસ્તસ્યાભવત્સુતઃ ॥ ૧,૧૩૯.૭॥

વિશ્વામિત્રાદ્દેવરાતમદુચ્છન્દાદયઃ સુતાઃ ।
આયુષો નહુષસ્તસ્માદનેના રજિરમ્ભકૌ ॥ ૧,૧૩૯.૮॥

ક્ષત્રવૃદ્ધઃ ક્ષત્રવૃદ્ધાત્સુહોત્રશ્ચાભવન્નૃપઃ ।
કાશ્યકાશૌગૃત્સમદઃ સુહોત્રાદભવંસ્ત્રયઃ ॥ ૧,૧૩૯.૯॥

ગૃત્સમદાચ્છૌન કોઽભૂત્કાશ્યાદ્દીર્ઘતમાસ્તથા ।
વૈદ્યો ધન્વન્તરિસ્તસ્માત્કેતુમાંશ્ચ તદાત્મજઃ ॥ ૧,૧૩૯.૧૦॥

ભીમરથઃ કેતુમતો દિવોદાસસ્તદાત્મજઃ ।
દિવોદાસાત્પ્રતર્દનઃ શત્રુજિત્સોઽત્ર વિશ્રુતઃ ॥ ૧,૧૩૯.૧૧॥

ઋતધ્વજસ્તસ્ય પુત્રો હ્યલર્કશ્ચ ઋતધ્વજાત્ ।
અલર્કાત્સન્નતિર્જજ્ઞે સુનીતઃ સન્નતેઃ સુતઃ ॥ ૧,૧૩૯.૧૨॥

સત્યકેતુઃ સુનીતસ્ય સત્યકેતોર્વિભુઃ સુતઃ ।
વિભોસ્તુ સુવિભુઃ પુત્રઃ સુવિભોઃ સુકુમારકઃ ॥ ૧,૧૩૯.૧૩॥

સુકુમારાદ્ધૃષ્ટકેતુર્વોતિહોત્રસ્તદાત્મજઃ ।
વીતિહોત્રસ્ય ભર્ગોઽભૂદ્ભર્ગભૂમિસ્તદાત્મજઃ ॥ ૧,૧૩૯.૧૪॥

વૈષ્ણવાઃ સ્યુર્મહાત્માન ઇત્યેતે કાશયો નૃપાઃ ।
પઞ્ચપુત્રશતાન્યાસન્નજેઃ શક્રેણ સંહૃતાઃ ॥ ૧,૧૩૯.૧૫॥

પ્રતિક્ષત્રઃ ક્ષત્રવૃદ્ધાત્સંજયશ્ચ ત દાત્મજઃ ।
વિજયઃ સંજયસ્યાપિ વિજયસ્ય કૃતઃ સુતઃ ॥ ૧,૧૩૯.૧૬॥

કૃતાદ્વૃષધનશ્ચાભૂત્સહદેવસ્તદાત્મજઃ ।
સહદેવાદદીનોઽભૂજ્જયત્સેનોઽપ્યદીનતઃ ॥ ૧,૧૩૯.૧૭॥

જયત્સેનાત્સંકૃતિશ્ચ ક્ષત્રધર્મા ચ સંકૃતેઃ ।
યતિર્યયાતિઃ સંયાતિરયાતિર્વિકૃતિઃ ક્રમાત્ ॥ ૧,૧૩૯.૧૮॥

નહુષસ્ય સુતાઃ ખ્યાતા યયાતેર્નૃપતેસ્તથા ।
યદું ચ તુર્વસું ચૈવ દેવયાની વ્યજાયત ॥ ૧,૧૩૯.૧૯॥

દ્રુહ્યું ચાનું ચ પૂરુઞ્ચ શર્મિષ્ઠા વાર્ષપાર્વણી ।
સહસ્રજીત્ક્રોષ્ટુમના રઘુશ્ચૈવ યદોઃ સુતાઃ ॥ ૧,૧૩૯.૨૦॥

સહસ્રજિતઃ શતજિત્તસ્માદ્વૈ હયહૈહયૌ ।
અનરણ્યો હયાત્પુત્રો ધર્મો હૈહયતોઽભવત્ ॥ ૧,૧૩૯.૨૧॥

ધર્મસ્ય ધર્મનેત્રોઽબૂત્કુન્તિર્વૈ ધર્મનેત્રતઃ ।
કુન્તેર્બભૂત સાહઞ્જિર્મહિષ્માંશ્ચ તદાત્મજઃ ॥ ૧,૧૩૯.૨૨॥

ભદ્રશ્રેણ્યસ્તસ્ય પુત્રો ભદ્રશ્રેણયસ્ય દુર્દમઃ ।
ધનકો દુર્દમાચ્ચૈવ કૃતવીર્યશ્ચ જાનકિઃ ॥ ૧,૧૩૯.૨૩॥

કૃતાગ્નિઃ કૃતકર્મા ચ કૃતૌજાઃ સુમહાબલઃ ।
કૃતવીર્યાદર્જુનોઽભૂદર્જુનાચ્છૂરસેનકઃ ॥ ૧,૧૩૯.૨૪॥

જયધ્વજો મધુઃ શૂરો વૃષણઃ પઞ્ચ સવ્રતાઃ ।
જયધ્વજાત્તાલજઙ્ઘો ભરતસ્તાલજઙ્ગતઃ ॥ ૧,૧૩૯.૨૫॥

વૃષણસ્ય મધુઃ પુત્રો મધોર્વૃષ્ણ્યાદિવંશકઃ ।
ક્રોષ્ટોર્વિજજ્ઞિવાન્પુત્ર આહિસ્તસ્ય મહાત્મનઃ ॥ ૧,૧૩૯.૨૬॥

આહેરુશઙ્કુઃ સંજજ્ઞેતસ્ય ચિત્રરથઃ સતઃ ।
શશબિન્દુશ્ચિત્રરથાત્પત્ન્યો લક્ષઞ્ચ તસ્ય હ ॥ ૧,૧૩૯.૨૭॥

દશલક્ષઞ્ચ પુત્રાણાં પૃથુકીર્ત્યાદયો વરાઃ ।
પૃથુકીર્તિઃ પૃથુજયઃ પૃથુદાનઃ પૃથુશ્રવાઃ ॥ ૧,૧૩૯.૨૮॥

પૃથુશ્રવસોઽભૂત્તમ ઉશનાસ્તમસોઽભવત્ ।
તત્પુત્રઃ શિતગુર્નામ શ્રીરુક્મકવચસ્તતઃ ॥ ૧,૧૩૯.૨૯॥

રુક્મશ્ચ પૃથુરુક્મશ્ચ જ્યામઘઃ પાલિતો હરિઃ ।
શ્રીરુક્મકવચસ્યૈતે વિદર્ભો જ્યામઘાત્તથા ॥ ૧,૧૩૯.૩૦॥

ભાર્યાયાઞ્ચૈવ શૈબ્યાયાં વિદર્ભાત્ક્રથકૌશિકૌ ।
રોમપાદો રોમપાદાદ્બભ્રુર્બભ્રોર્ધૃતિસ્તથા ॥ ૧,૧૩૯.૩૧॥

કૌશિકસ્ય ઋચિઃ પુત્રઃ તતશ્ચૈદ્યો નૃપઃ કિલ ।
કુન્તિઃ કિલાસ્ય પુત્રોઽભૂત્કુન્તેર્વૃષ્ણિઃ સુતઃ સ્મૃતઃ ॥ ૧,૧૩૯.૩૨॥

વૃષ્ણેશ્ચ નિવૃતિઃ પુત્રો દશાર્હે નિવૃતેસ્તથા ।
દશાર્હસ્ય સુતો વ્યોમા જીમૂતશ્ચ તદાત્મજઃ ॥ ૧,૧૩૯.૩૩॥

જીમૂતાદ્વિકૃતિર્જજ્ઞે તતો ભીમરથોઽભવત્ ।
તતો મધુરથો જજ્ઞે શકુનિસ્તસ્ય ચાત્મજઃ ॥ ૧,૧૩૯.૩૪॥

કરમ્ભિઃ શકુનેઃ પુત્રસ્તસ્ય વૈ દેવવાન્સ્મૃતઃ ।
દેવક્ષત્રો દેવનતો દેવક્ષત્રાન્મધુઃ સ્મૃતઃ ॥ ૧,૧૩૯.૩૫॥

કુરુવંશો મધોઃ પુત્રો હ્યનુશ્ચ કુરુવંશતઃ ।
પુરુહોત્રો હ્યનોઃ પુત્રો હ્યંશુશ્ચ પુરુહોત્રતઃ ॥ ૧,૧૩૯.૩૬॥

સત્ત્વશ્રુતઃ સુતશ્ચાંશોસ્તતો વૈ સાત્ત્વતો નૃપઃ ।
ભજિનો ભજમાનશ્ચ સાત્વતાદન્ધકઃ સુતઃ ॥ ૧,૧૩૯.૩૭॥

મહાભોજો વૃષ્ણિ દિવ્યાવન્યો દેવાવૃધોઽભવત્ ।
નિમિવૃષ્ણી ભજમાનાદયુતાજિત્તથૈવ ચ ॥ ૧,૧૩૯.૩૮॥

શતજિચ્ચ સહસ્રાજિદ્બભ્રુર્દેવો બૃહસ્પતિઃ ।
મહાભોજાત્તુ ભોજોઽભૂત્તદ્વૃષ્ણેશ્ચ સુમિત્રકઃ ॥ ૧,૧૩૯.૩૯॥

સ્વધાજિત્સંજ્ઞકસ્તસ્માદનમિત્રાશિની તથા ।
અનમિત્રસ્ય નિઘ્નોઽભૂન્નિઘ્નાચ્છત્રાજિતોઽભવત્ ॥ ૧,૧૩૯.૪૦॥

પ્રસેનશ્ચાપરઃ ખ્યાતો હ્યનમિત્રાચ્છિબિસ્તથા ।
શિબેસ્તુ સત્યકઃ પુત્રઃ સત્યકાત્સાત્યકિસ્તથા ॥ ૧,૧૩૯.૪૧॥

સાત્યકેઃ સઞ્જયઃ પુત્રઃ કુલિશ્ચૈવ તદાત્મજઃ ।

કુલેર્યુગન્ધરઃ પુત્રસ્તે શૈબેયાઃ પ્રકીર્તિતાઃ ॥ ૧,૧૩૯.૪૨॥

અનમિત્રાન્વયે વૃષ્ણિઃ શ્વફલ્કશ્ચિત્રકઃ સુતઃ ।
શ્વફલ્કાચ્ચૈવગાન્દિન્યામક્રૂરો વૈષ્ણવોઽભવત્ ॥ ૧,૧૩૯.૪૩॥

ઉપમદ્ગુરથાક્રૂરાદ્દેવદ્યોતસ્તતઃ સુતઃ ।
દેવવાનુપદેવશ્ચ હ્યક્રૂરસ્ય સુતૌ સ્મૃતૌ ॥ ૧,૧૩૯.૪૪॥

પૃથુર્વિપૃથુશ્ચિત્રસ્ય ત્વન્ધકસ્ય શુચિઃ સ્મૃતઃ ।
કુકુરો ભજમાનસ્ય તથા કમ્બલબર્હિષઃ ॥ ૧,૧૩૯.૪૫॥

ધૃષ્ટસ્તુ કુકુરાજ્જજ્ઞે તસ્માત્કાપોતરોમકઃ ।
તદાત્મજો વિલોમા ચ વિલોમ્નસ્તુમ્બુરુઃ સુતઃ ॥ ૧,૧૩૯.૪૬॥

તસ્માચ્ચદુન્દુભિર્જજ્ઞે પુનર્વસુરતઃ સ્મૃતઃ ।
તસ્યાહુકશ્ચાહુકી ચ કન્યા ચૈવાહુકસ્ય તુ ॥ ૧,૧૩૯.૪૭॥

દેવકશ્ચોગ્રસેનશ્ચ દેવકાદ્દેવકી ત્વભૂત્ ।
વૃકદેવોપદેવાચ સહદેવા સુરક્ષિતા ॥ ૧,૧૩૯.૪૮॥

શ્રીદેવી શાન્તિદેવી ચ વસુદેવ ઉવાહ તાઃ ।
દેવવાનુપદેવશ્ચ સહદેવાસુતૌ સ્મૃતૌ ॥ ૧,૧૩૯.૪૯॥

ઉગ્રસેનસ્ય કંસોઽભૂત્સુનામા ચ વટાદયઃ ।
વિદૂરથો ભજમાનાચ્છૂરશ્ચાભૂદ્વિદૂરથાત્ ॥ ૧,૧૩૯.૫૦॥

વિદૂરથસુતસ્યાથ સૂરસ્યાપિ શમી સુતઃ ।
પ્રતિક્ષત્રશ્ચ શમિનઃ સ્વયમ્ભોજસ્તદાત્મજઃ ॥ ૧,૧૩૯.૫૧॥

હૃદિકશ્ચ સ્વયમ્ભોજાત્કૃતવર્મા તદાત્મજઃ ।
દેવઃ શતધનુશ્ચૈવ શૂરાદ્વૈ દેવમીઢુષઃ ॥ ૧,૧૩૯.૫૨॥

દશ પુત્રા મારિષાયાં વસુદેવાદયોઽભવન્ ।
પૃથા ચ શ્રુતદેવી ચ શ્રુતકીર્તિઃ શ્રુતશ્રવાઃ ॥ ૧,૧૩૯.૫૩॥

રાજાધિદેવો શૂરાચ્ચ પૃથાં કુન્તેઃ સુતામદાત્ ।
સા દત્તા કુન્તિના પાણ્ડોસ્તસ્યાં ધર્માનિલેન્દ્રકૈઃ ॥ ૧,૧૩૯.૫૪॥

યુધિષ્ઠિરો ભીમપાર્થો નકુલઃ સહદેવકઃ ।
માદ્રયાં નાસત્યદસ્રાભ્યાં કુન્ત્યાં કર્ણઃ પુરાભવત્ ॥ ૧,૧૩૯.૫૫॥

શ્રુતદેવ્યાં દન્તવક્ત્રો જજ્ઞે વૈ યુદ્ધદુર્મદઃ ।
સન્તર્દનાદયઃ પઞ્ચ શ્રુતકીર્ત્યાઞ્ચ કૈકયાત્ ॥ ૧,૧૩૯.૫૬॥

રાજાધિદેવ્યાં જજ્ઞાતે વિન્દશ્ચૈવાનુવિન્દકઃ ।
શ્રુતશ્રવા દમઘોષાત્પ્રજજ્ઞે શિશુપાલકમ્ ॥ ૧,૧૩૯.૫૭॥

પૌરવી રોહીણા ભાર્યા મદિરાનકદુન્દુભેઃ ।
દેવકીપ્રમુખા ભદ્રા રોહિણ્યાં બલભદ્રકઃ ॥ ૧,૧૩૯.૫૮॥

સારણાદ્યાઃ શઠશ્ચૈવ રેવત્યાં બલભદ્રતઃ ।
નિશઠશ્ચોલ્મુકો જાતો દેવક્યાં ષટ્ચ જજ્ઞિરે ॥ ૧,૧૩૯.૫૯॥

કીર્તિમાંશ્ચ સુષેણશ્ચ હ્યુદાર્યો ભદ્રસેનકઃ ।
ઋજુદાસો ભદ્રદેવઃ કંસ એવાવધીચ્ચ તાન્ ॥ ૧,૧૩૯.૬૦॥

સંકર્ષણઃ સપ્તમોઽભૂદષ્ટમઃ કૃષ્ણ એવ ચ ।
ષોડશસ્ત્રીસહસ્રાણિ ભાર્યાણાઞ્ચાભવન્હરેઃ ॥ ૧,૧૩૯.૬૧॥

રુક્મિણી સત્યભામા ચ લક્ષ્મણા ચારુહાસિની ।
શ્રેષ્ઠા જામ્બવતી ચાષ્ટૌ જજ્ઞિરે તાઃ સુતાન્બહૂન્ ॥ ૧,૧૩૯.૬૨॥

પ્રદ્યુમ્નશ્ચારુદેષ્ણશ્ચ પ્રધાનાઃ સામ્બ એવ ચ ।
પ્રદ્યુમ્નાદનિરુદ્ધોઽભૂત્કકુદ્મિન્યાં મહાબલઃ ॥ ૧,૧૩૯.૬૩॥

અનિરુદ્ધાત્સુભદ્રાયાં વજ્રો નામ નૃપોઽભવત્ ।
પ્રતિબાહુર્વજ્રસુતશ્ચારુસ્તસ્ય સુતોઽભવત્ ॥ ૧,૧૩૯.૬૪॥

વહ્નિસ્તુ તુર્વસોર્વંશે વહ્નેર્ભર્ગોઽભવત્સુતઃ ।
ભર્ગાદ્ભાનુરભૂત્પુત્રો ભાનોઃ પુત્રઃ કરન્ધમઃ ॥ ૧,૧૩૯.૬૫॥

કરન્ધમસ્ય મરુતો દ્રુહ્યોર્વંશં નિબોધ મે ।
દ્રુહ્યોસ્તુ તનયઃ સેતુરારદ્ધશ્ચ તદાત્મજઃ ॥ ૧,૧૩૯.૬૬॥

આરદ્ધસ્યૈવ ગાન્ધ રો ધર્મો ગાન્ધારતોઽભવત્ ।
ધૃતસ્તુ ધર્મપુત્રોઽભૂદ્દુર્ગમશ્ચ ધૃસ્ય તુ ॥ ૧,૧૩૯.૬૭॥

પ્રચેતા દુર્ગમસ્યૈવ અનોર્વંશં શ ૃણુષ્વ મે ।
અનોઃ સભાનરઃ પુત્રસ્તસ્મા કાલઞ્જયોઽભવત્ ॥ ૧,૧૩૯.૬૮॥

કાલઞ્જયાત્સૃઞ્જયોઽભૂત્સૃઞ્જયાત્તુ પુરુઞ્જયઃ ।
જનમેજયસ્તુ તત્પુત્રો મહાશાલસ્તદાત્મજઃ ॥ ૧,૧૩૯.૬૯॥

મહામના મહાશાલદુશીનર ઇહ સ્મૃતઃ ।
અશીનરાચ્છિબિર્જજ્ઞે વૃષદર્ભઃ શિવેઃ સુતઃ ॥ ૧,૧૩૯.૭૦॥

મહામનોજાત્તિતિક્ષોઃ પુત્રોઽભૂચ્ચ રુષદ્રથઃ ।
હેમો રુષદ્રથાજ્જજ્ઞે સુતપા હેમતોઽભવત્ ॥ ૧,૧૩૯.૭૧॥

બલિઃ સુતપસો જજ્ઞે હ્યઙ્ગવઙ્ગકલિઙ્ગકાઃ ।
અન્ધઃ પૈણ્ડ્રશ્ચ બાલેયા હ્યનપાનસ્તથાઙ્ગતઃ ॥ ૧,૧૩૯.૭૨॥

અનપાનાદ્દિવિરથસ્તતો ધર્મરથોઽભવત્ ।
રોમપાદો ધર્મરથાચ્ચતુરઙ્ગસ્તદાત્મજઃ ॥ ૧,૧૩૯.૭૩॥

પૃથુલાક્ષસ્તસ્ય પુત્રશ્ચમ્પોઽભૂત્પૃથુલાક્ષતઃ ।
ચમ્પપુત્રશ્ચ હર્યઙ્ગસ્તસ્ય ભદ્રરથઃ સુતઃ ॥ ૧,૧૩૯.૭૪॥

બૃહત્કર્મા સુતસ્તસ્ય બૃહદ્ભાનુસ્તતોઽભવત્ ।
બુહન્મના બૃહાદ્ભાનોસ્તસ્ય પુત્રો જયદ્રથઃ ॥ ૧,૧૩૯.૭૫॥

જયજથસ્ય વિજયો વિજયસ્ય ધૃતિઃ સુતઃ ।
ધૃતેર્ધૃવ્રતઃ પુત્રઃ સત્યધર્મા ધૃતવ્રતાત્ ॥ ૧,૧૩૯.૭૬॥

તસ્ય પુત્રસ્ત્વધિરથઃ કર્ણસ્તસ્ય સુતોઽભવત્ ॥ ૧,૧૩૯.૭૭॥

વૃર્ષસેનસ્તુ કર્ણસ્ય પુરુવંશ્યાઞ્છણુષ્વ મે ॥ ૧,૧૩૯.૭૮॥

ઇતિ શ્રીગારુડે મહાપારાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ચન્દ્રવંશવર્ણનં નામૈકોનચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૦

હરિરુવાચ ।
જનમેજયઃ પુરોશ્ચાભૂન્નમસ્યુર્જનમેજયાત્ ।
તસ્ય પુત્રશ્ચાભયદઃ સુધુશ્ચાભયદાદભૂત્ ॥ ૧,૧૪૦.૧॥

સુધોર્બહુગતિઃ પુત્રઃ સંજાતિસ્તસ્ય ચાત્મજઃ ।
વત્સજાતિશ્ચ સઞ્જાતેઃ રૌદ્રાશ્વશ્ચ તદાત્મજઃ ॥ ૧,૧૪૦.૨॥

ઋતેયુઃ સ્થણ્ડિલેયુશ્ચ કક્ષેયુશ્ચ કૃતેયુકઃ ।
જલેયુઃ સન્તતેયુશ્ચ રોદ્રાશ્વસ્ય સુતા વરાઃ ॥ ૧,૧૪૦.૩॥

રતિનાર ઋતેયોશ્ચ તસ્ય પ્રતિરથઃ સુતઃ ।
તસ્ય મેધાતિથિઃ પુત્રસ્તત્પુત્રશ્ચૈનિલઃ સ્મૃતઃ ॥ ૧,૧૪૦.૪॥

ઐનિલસ્ય તુ દુષ્યન્તો ભરતસ્તસ્ય ચાત્મજઃ ।
શકુન્તલાયાં સંજજ્ઞે વિતથો ભરતાદભૂત્ ॥ ૧,૧૪૦.૫॥

વિતથસ્ય સુતો મન્યુર્મન્યોશ્ચૈવ નરઃ સ્મૃતઃ ।
નરસ્ય સંકૃતિઃ પુત્રો ગર્ગો વૈ સંકૃતેઃ સુતઃ ॥ ૧,૧૪૦.૬॥

ગર્ગાદમન્યુઃ પુત્રો વૈ શિનિઃ પુત્રો વ્યજાયત ।
મન્યુપુત્રાન્મહાવીર્યાત્સુતોઽભવદુરુક્ષયઃ ॥ ૧,૧૪૦.૭॥

ઉરુક્ષયાત્ત્રય્યારુણિર્વ્યૂહક્ષત્રાચ્ચ મન્યુજાત્ ।
સુહોત્રસ્તસ્ય હસ્તી ચ અજમીઢદ્વિમીઢકૌ ॥ ૧,૧૪૦.૮॥

હસ્તિનઃ પુરુમીઢશ્ચ કણ્વોઽભૂદજમીઢતઃ ।
કણ્વાન્મેધાતિથિર્જજ્ઞે યતઃ કાણ્વાયના દ્વિજાઃ ॥ ૧,૧૪૦.૯॥

અજમીઢાદ્બૃહદિષુસ્તત્પુત્રશ્ચ બૃહદ્ધનુઃ ।
બૃહત્કર્મા તસ્ય પુત્રસ્તસ્ય પુત્રો જયદ્રથઃ ॥ ૧,૧૪૦.૧૦॥

જયદ્રથાદ્વિશ્વજિચ્ચ સેનજિચ્ચ તદાત્મજઃ ।
રુચિરાશ્વઃ સેનજિતઃ પૃથુસેનસ્તદાત્મજઃ ॥ ૧,૧૪૦.૧૧॥

પારસ્તુ પૃથુસેનસ્ય પારાદ્દ્વીપોઽભવન્નૃપઃ ।
નૃપસ્ય સૃમરઃ પુત્રઃ સુકૃતિશ્ચ પૃથોઃ સુતઃ ॥ ૧,૧૪૦.૧૨॥

વિભ્રાજઃ સુકૃતેઃ પુત્રો વિભ્રાજાદશ્વહોઽભવત્ ।
કૃત્યાં તસ્માદ્બ્રહ્મદત્તો વિષ્વક્સેનસ્તદાત્મજઃ ॥ ૧,૧૪૦.૧૩॥

યવીનરો દ્વિમીઢસ્ય ધૃતિમાંશ્ચ યવીનરાત્ ।
ધતિમતઃ સત્યધૃતિર્દૃઢનેમિસ્તદાત્મજઃ ॥ ૧,૧૪૦.૧૪॥

દૃઢનેમેઃ સુપાર્શ્વોઽભૂત્સુપાર્શ્વાત્સન્નતિસ્તથા ।
કૃસ્તુ સન્નતેઃ પુત્રઃ કૃતાદુગ્રાયુધોઽભવત્ ॥ ૧,૧૪૦.૧૫॥

ઉગ્રાયુધાચ્ચ ક્ષેમ્યૌઽભૂત્સુધીરસ્તુ તદાત્મજઃ ।
પુરઞ્જયઃ સુધીરાચ્ચ તસ્ય પુત્રો વિદૂરથઃ ॥ ૧,૧૪૦.૧૬॥

અજમીઢાન્નલિન્યાઞ્ચ નીલો નામ નૃપોઽભવત્ ।
નીલાચ્છાન્તિરભૂત્પુત્રઃ સુશાન્તિસ્તસ્ય ચાત્મજઃ ॥ ૧,૧૪૦.૧૭॥

સુશાન્તેશ્ચ પુરુર્જાતો હ્યર્કસ્તસ્ય સુતોઽભવત્ ।
અર્કસ્ય ચૈવ હર્યશ્વો હર્યશ્વાન્મુકુલોઽભવત્ ॥ ૧,૧૪૦.૧૮॥

યવીનરો બૃહદ્ભાનુઃ કમ્પિલ્લઃ સૃઞ્જયસ્તથા ।
પાઞ્ચાલાન્મુકુલાજ્જજ્ઞે શરદ્વાન્વૈષ્ણવો મહાન્ ॥ ૧,૧૪૦.૧૯॥

દિવોદાસો દ્વિતીયોઽસ્ય હ્યહલ્યાયાં શરદ્વતઃ ।
શતાનન્દોઽભવત્પુત્રસ્તસ્ય સત્યધૃતિઃ સતઃ ॥ ૧,૧૪૦.૨૦॥

કૃપઃ કૃપી સત્યધૃતેરુર્વશ્યાં વીર્યહાનિતઃ ।
દ્રોણપત્ની કૃપી જજ્ઞે અશ્વત્થામાનમુત્તમમ્ ॥ ૧,૧૪૦.૨૧॥

દિવોદાસાન્મિત્રયુશ્ચ મિત્રયોશ્ચ્યવનોઽભવત્ ।
સુદાસશ્ચ્યવનાજ્જજ્ઞે સૌદાસસ્તસ્ય જાત્મજઃ ॥ ૧,૧૪૦.૨૨॥

સહદેવસ્તસ્ય પુત્રઃ સહદેવાત્તુ સોમકઃ ।
જન્તુસ્તુ સોમકાજ્જજ્ઞે પૃષતશ્ચાપરો મહાન્ ॥ ૧,૧૪૦.૨૩॥

પૃષતાદ્દ્રુપદો જજ્ઞે ધૃષ્ટદ્યુમ્નસ્તતોઽભવત્ ।
ધૃષ્ટદ્યુમ્નાદ્ધૃષ્ટકેતુરૃક્ષોઽભૂતજમીઢતઃ ॥ ૧,૧૪૦.૨૪॥

ઋક્ષાત્સંવરણો જજ્ઞે કુરુઃ સંવરણાદભૂત્ ।
સુધનુશ્ચ પીક્ષિચ્ચ જહ્નુશ્ચૈવ કુરોઃ સુતાઃ ॥ ૧,૧૪૦.૨૫॥

સુધનુષઃ સુહોત્રોઽભૂચ્ચ્યવનોઽભૂત્સુહોત્રતઃ ।
ચ્યવનાત્કૃતકો જજ્ઞે તથોપરિચરો વસુઃ ॥ ૧,૧૪૦.૨૬॥

બૃહદ્રથશ્ચ પ્રત્યગ્રઃ સત્યાદ્યાશ્ચ વસોઃ સુતાઃ ।
બૃહદ્રથાત્કુશાગ્રશ્ચ કુશાગ્રાદૃષભોઽભવત્ ॥ ૧,૧૪૦.૨૭॥

ઋષભાત્પુષ્પવાંસ્તસ્માજ્જજ્ઞે સત્યહિતો નૃપઃ ।
સત્યહિતાત્સુધન્વાભૂજ્જહ્નુશ્ચવ સુધન્વનઃ ॥ ૧,૧૪૦.૨૮॥

બૃહદ્રથાજ્જરાસન્ધઃ સહદેવસ્તદાત્મજઃ ।
સહદેવાચ્ચ ચ સોમાપિઃ સોમાપેઃ શ્રુતવાન્સુતઃ ॥ ૧,૧૪૦.૨૯॥

ભીમસેનોગ્રસેનૌ ચ શ્રુતસેનોઽપરાજિતઃ ।
જનમેજયસ્તથાન્યોઽભૂજ્જહ્નોસ્તુ સુરથોઽભવત્ ॥ ૧,૧૪૦.૩૦॥

વિદૂરથસ્તુ સુરથાત્સાર્વભૌમો વિદૂરથાત્ ।

જયસેનઃ સાર્વભૌમાદાવધીતસ્તદાત્મજઃ ॥ ૧,૧૪૦.૩૧॥

અયુતાયુસ્તસ્ય પુત્રસ્તસ્ય ચાક્રોધનઃ સુતઃ ।
અક્રોધનસ્યાતિથિશ્ચ ઋક્ષોઽભૂદતિથેઃ સુતઃ ॥ ૧,૧૪૦.૩૨॥

ઋક્ષાચ્ચ ભીમસેનોઽભૂદ્દિલીપો ભીમસેનતઃ ।
પ્રતીપોઽભૂદ્દિલીપાચ્ચ દેવાપિસ્તુ પ્રતીપતઃ ॥ ૧,૧૪૦.૩૩॥

શન્તનુશ્ચૈવ બાહ્લીકસ્ત્રયસ્તે ભ્રાતરો નૃપાઃ ।
બાહ્લીકાત્સોમદત્તોઽભૂદ્ભૂરિર્ભૂરિશ્રવાસ્તતઃ ॥ ૧,૧૪૦.૩૪॥

શલશ્ચ શન્તનોર્ભીષ્મો ગઙ્ગાયાં ધાર્મિકો મહાન્ ।
ચિત્રાઙ્ગદવિચિત્રૌ તુ સત્યવત્યાન્તુ શન્તનોઃ ॥ ૧,૧૪૦.૩૫॥

ભાર્યે વિચિત્રવીર્યસ્ય ત્વમ્બિકામ્બાલિકે તયોઃ ।
ધૃરાષ્ટ્રં ચ પાણ્ડુગ્ચ તદ્દાસ્યાં વિદુરન્તથા ॥ ૧,૧૪૦.૩૬॥

વ્યાસ ઉત્પાદયામાસ ગાન્ધાગી ધૃતરાષ્ટ્રતઃ ।
શતપુત્રં દુર્યોધનાદ્યં પાણ્ડોઃ પઞ્ચ પ્રજજ્ઞિરે ॥ ૧,૧૪૦.૩૭॥

પ્રતિબિન્ધ્યઃ શ્રુતસોમઃ શ્રુતકીર્તિસ્તથાર્જુનાત્ ।
શતાનીકઃ શ્રુતકર્મા દ્રૌપદ્યાં પઞ્ચ વૈ ક્રમાત્ ॥ ૧,૧૪૦.૩૮॥

યૌધેયી ચ હિડિમ્બા ચ કૌશી ચૈવ સુભદ્રિકા ।
વિજયા વૈ રેણુમતી પઞ્ચભ્યસ્તુ સુતાઃ ક્રમાત્ ॥ ૧,૧૪૦.૩૯॥

દેવકો ઘચોત્કચશ્ચ હ્યભિમન્યુશ્ચ સર્વગઃ ।
સુહોત્રો નિરમિત્રશ્ચ પરીક્ષિદભિમન્યુજઃ ॥ ૧,૧૪૦.૪૦॥

જનમેજયોઽસ્ય તતો ભવિષ્યાંશ્ચ નૃપાઞ્છૃણુ ॥ ૧,૧૪૦.૪૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ચન્દ્રવંશવર્ણનં નામ ચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૧

હરિરુવાચ ।

શતાનીકો હ્યશ્વમેધદત્તશ્ચાપ્યધિસોમકઃ ।
કૃષ્ણોઽનિરુદ્ધશ્ચાપ્યુષણસ્તતશ્ચિત્રરથો નૃપઃ ॥ ૧,૧૪૧.૧॥

શુચિદ્રથો વૃષ્ણિમાંશ્ચ સુપેણશ્ચ સુનીથકઃ ।

નૃચક્ષુશ્ચ મુખાબાણઃ મેધાવી ચ નૃપઞ્જયઃ ॥ ૧,૧૪૧.૨॥

પારિપ્લવશ્ચ મુનયો મેધાવી ચ નૃપઞ્જયઃ ।
બૃહદ્રથો હરિસ્તિગ્મો શતાનીકઃ સુદાનકઃ ॥ ૧,૧૪૧.૩॥

ઉદાનોઽહ્નિનરશ્ચૈવ દણ્ડપાણિર્નિમિત્તકઃ ।
ક્ષેમકશ્ચ તતઃ શૂદ્રઃ પિતા પૂર્વસ્તતઃ સુતઃ ॥ ૧,૧૪૧.૪॥

બૃહદ્બલાસ્તુ કથયન્તે નૃપોશ્ચૈક્ષ્વાકુવંશજાઃ ।
બૃહદ્બલાદુરુક્ષયો વત્સવ્યૂહસ્તતઃ પરઃ ॥ ૧,૧૪૧.૫॥

વત્સવ્યૂહાત્તતઃ સૂર્યઃ સહદેવસ્તદાત્મજઃ ।
બૃહદશ્વો ભાનુરથઃ પ્રતીચ્યશ્ચ પ્રતીતકઃ ।
મનુદેવઃ સુનક્ષત્રઃ કિન્નરશ્ચાન્તરિક્ષકઃ ॥ ૧,૧૪૧.૬॥

સુપર્ણઃ કૃતજિચ્ચૈવ બૃહદ્ભ્રાજશ્ચ ધાર્મિકઃ ।
કૃતઞ્જયો ધનઞ્જયઃ સંજયઃ શાક્ય એવ ચ ॥ ૧,૧૪૧.૭॥

શુદ્ધોદનો બાહુલશ્ચ સેનજિત્ક્ષુદ્રકસ્તથા ।
સુમિત્રઃ કુડવશ્ચાતઃ સુમિત્રાન્માગધાઞ્છણુ ॥ ૧,૧૪૧.૮॥

જરાસન્ધઃ સહદેવઃ સોમાપિશ્ચ શ્રુતશ્રવાઃ ।
અયુતાયુર્નિરમિત્રઃ સુક્ષત્રો બહુકર્મકઃ ॥ ૧,૧૪૧.૯॥

શ્રુતઞ્જયઃ સેનજિચ્ચ ભૂરિશ્ચૈવ શુચિસ્તથા ।
ક્ષેમ્યશ્ચ સુવ્રતો ધર્મઃ શ્મશ્રુલો દૃઢસેનકઃ ॥ ૧,૧૪૧.૧૦॥

સુમતિઃ સુબલો નીતો સત્યજિદ્વિશ્વજિત્તથા ।
ઇષુઞ્જયશ્ચ ઇત્યેતે નૃપા બાર્હદ્રથાઃ સ્મૃતાઃ ॥ ૧,૧૪૧.૧૧॥

અધર્મિષ્ઠાશ્ચ શૂદ્રાશ્ચ ભવિષ્યન્તિ નૃપાસ્તતઃ ।
સ્વર્ગાદિકૃદ્ધિ ભગવાન્સાક્ષાન્નારાયણોઽવ્યયઃ ॥ ૧,૧૪૧.૧૨॥

નૈમિત્તિકઃ પ્રાકૃતિકસ્તથૈવાત્યન્તિકો લયઃ ।
યાતિ ભૂઃ પ્રલયં ચાપ્સુ હ્યાપસ્તેજસિ પાવકઃ ॥ ૧,૧૪૧.૧૩॥

વાયૌ વાયુશ્ચ વિયતિ ત્વાકાશૌ યાત્યહઙ્કૃતૌ ।
અહં બુદ્ધૌ મતિર્જીવે જીવોઽવ્યક્તે તદાત્મનિ ॥ ૧,૧૪૧.૧૪॥

આત્મા પરેશ્વરો વિષ્ણુરેકો નારાયણો નરઃ ।
અવિનાશ્યપરં સર્વં જગત્સ્વર્ગાદિ નાશિ હિ ॥ ૧,૧૪૧.૧૫॥

નૃપાદયો ગતા નાશમતઃ પાપં વિવર્જયેત્ ।
ધર્મં કુર્યાત્સ્થિરં યેન પાપં હિત્વા હરિં વ્રજેત્ ॥ ૧,૧૪૧.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભવિષ્ય રાજવંશ દ્ નામૈકચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૨

બ્રહ્મોવાચ ।
વિંશાદીન્પાલયામાસ હ્યવતીર્ણો હરિઃ પ્રભુઃ ।
દૈત્યધર્મસ્ય નાશાર્થં વેદધર્માદિગુપ્તયે ॥ ૧,૧૪૨.૧॥

મત્સ્યાદિકસ્વરૂપેણ ત્વવતારં કરોત્યજઃ ।
મત્સ્યો ભૂત્વા હયગ્રીવં દૈત્યં હત્વાજિકણ્ટકમ્ ॥ ૧,૧૪૨.૨॥

વેદાનાનીય મન્વાદીન્પાલયામાસ કેશવઃ ।
મન્દરં ધારયામાસ કૂર્મો ભૂત્વા હિતાય ચ ॥ ૧,૧૪૨.૩॥

ક્ષીરોદમથને વૈ દ્યો દેવો ધન્વન્તરિર્હ્યભૂત્ ।
બિભ્રત્કમણ્ડલું પૂર્ણમમૃતેન સમુત્થિતઃ ॥ ૧,૧૪૨.૪॥

આયુર્વેદમથાષ્ટાઙ્ગં સુશ્રુતાય સ ઉક્તવાન્ ।
અમૃતં પાયયામાસ સ્ત્રીરૂપી ચ સુરાન્હરિઃ ॥ ૧,૧૪૨.૫॥

અવતીર્ણો વરાહોઽથ હિરણ્યાક્ષં જઘાન હ ।
પૃથિવીં ધારયામાસ પાલયામાસ દેવતાઃ ॥ ૧,૧૪૨.૬॥

નરસિંહોઽવર્તોર્ણોઽથ હિરણ્યકશિપુંરિપુમ્ ।
દૈત્યાન્નિહતવાન્વેદધર્માદીનભ્યપાલયત્ ॥ ૧,૧૪૨.૭॥

તતઃ પરશુરામોઽભૂજ્જમદગ્નેર્જગત્પ્રભુઃ ।
ત્રિઃ સપ્તકૃત્વઃ પૃથિવીં ચક્રે નિઃ ક્ષત્રિયાં હરિઃ ॥ ૧,૧૪૨.૮॥

કાર્તવીર્યં જઘાનાજૌ કશ્યપાય મહીં દદૌ ।
યાગં કૃત્વા મહાબાહુર્મહેન્દ્રે પર્વતે સ્થિતઃ ॥ ૧,૧૪૨.૯॥

તતો રામો ભવિષ્ણુશ્ચ ચતુર્ધા દુષ્ટમર્દનઃ ।
પુત્રો દશરથાજ્જજ્ઞે રામશ્ચ ભરતોઽનુજઃ ॥ ૧,૧૪૨.૧૦॥

લક્ષ્મણશ્ચાથ શત્રુઘ્નો રામભાર્યા ચ જાનકી ।
રામશ્ચ પિતૃસત્યાર્થં માતૃભ્યો હિતમાચરન્ ॥ ૧,૧૪૨.૧૧॥

શૃઙ્ગવેરં ચિત્રકૂટં દણ્ડકારણ્યમાગતઃ ।
નાસાં શૂર્પણખાયાશ્ચ ચ્છિત્ત્વાથ ખરદૂષણમ્ ॥ ૧,૧૪૨.૧૨॥

હત્વા સ રાક્ષસં સીતાપહારિરજનીચરમ્ ।
રાવણં ચાનુજં તસ્ય લઙ્કાપુર્યાં વિભીષણમ્ ॥ ૧,૧૪૨.૧૩॥

રક્ષોરાજ્યે ચ સંસ્થાપ્ય સુગ્રીવનુમન્મુખૈઃ ।
આરુહ્ય પુષ્પકં સાર્ધં સીતયા પતિભક્તયા ॥ ૧,૧૪૨.૧૪॥

લક્ષ્મણેનાનુકૂલેન હ્યયોધ્યાં સ્વપુરીં ગતઃ ।
રાજ્યં ચકાર દેવાદીન્પાલયામાસ સ પ્રજાઃ ॥ ૧,૧૪૨.૧૫॥

ધર્મસંરક્ષણં ચક્રે હ્યશ્વમેધાદિકાન્ક્રતૂન્ ।
સા મહીપતિના રેમે રામેણૈવ યથાસુખમ્ ॥ ૧,૧૪૨.૧૬॥

રાવણસ્ય ગૃહે સીતા સ્થિતા ભેજે ન રાવણમ્ ।
કર્મણા મનસા વાચા સા ગતા રાઘવં સદા ॥ ૧,૧૪૨.૧૭॥

પતિવ્રતા તુ સા સીતા હ્યનસૂયા યથૈવ તુ ।
પતિવ્રતાયા માહાત્મ્યં શૃણુ ત્વં કથયામ્યહમ્ ॥ ૧,૧૪૨.૧૮॥

કૌશિકો બ્રાહ્મણઃ કુષ્ઠી પ્રતિષ્ઠાનેઽભવત્પુરા ।
તં તથા વ્યાધિતં ભાર્યા પતિં દેવમિવાર્ચયત્ ॥ ૧,૧૪૨.૧૯॥

નિર્ભર્ત્સિતાપિ ભર્તારં તમમન્યત દૈવતમ્ ।
ભર્ત્રોક્તા સાનયદ્વેશ્યાં શુલ્કમાદાય ચાધિકમ્ ॥ ૧,૧૪૨.૨૦॥

પથિ સૂલે તદા પ્રોતમચૌરં ચૌરશઙ્કયા ।
માણ્ડવ્યમતિદુઃખાર્તમન્ધકારેઽથ સ દ્વિજઃ ॥ ૧,૧૪૨.૨૧॥

પત્નીસ્કન્ધસમારૂઢશ્ચાલયામાસ કૌશિકઃ ।
પાદાવમર્શણાત્ક્રુદ્ધો માણ્ડવ્યસ્તમુવાચ હ ॥ ૧,૧૪૨.૨૨॥

સૂર્યોદયે મૃતિસ્તસ્ય યેનાહં ચાલિતઃ પદા ।
તચ્છ્રુત્વા પ્રાહ તદ્ભાર્યા સૂર્યો નોદયમેષ્યતિ ॥ ૧,૧૪૨.૨૩॥

તતઃ સૂર્યોદયાભાવાદ ભવત્સતતં નિશા ।
બહૂન્યબ્દપ્રમાણાનિ તતો દેવા ભયં યયુઃ ॥ ૧,૧૪૨.૨૪॥

બ્રહ્માણં શરણં જગ્મુસ્તામૂચે પદ્મસમ્ભવઃ ।
પ્રશામ્યતે તેજસૈવ તપસ્તેજસ્ત્વનેન વૈ ॥ ૧,૧૪૨.૨૫॥

પતિવ્રતાયા માહાત્મ્યાન્નોદ્ગચ્છતિ દિવાકરઃ ।
તસ્ય ચાનુદયાદ્ધાનિર્મર્ત્યાનાં ભવતાં તથા ॥ ૧,૧૪૨.૨૬॥

તસ્માત્પતિવ્રતામત્રેરનસૂયાં તપસ્વિનીમ્ ।
પ્રસાદયત વૈ પત્નીં ભાનોરુદયકામ્યયા ॥ ૧,૧૪૨.૨૭॥

તૈઃ સા પ્રસાદિતા ગત્વા હ્યનસૂયા પતિવ્રતા ।
કૃત્વાદિત્યોદયં સા ચ તં ભર્તારમજીવયત્ ।
પતિવ્રતાનસૂયાયાઃ સીતાભૂદધિકા કિલ ॥ ૧,૧૪૨.૨૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દશાવતારદૃ નામ દ્વિચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૩
બ્રહ્મોવાચ ।
રામાયણમતો વક્ષ્યે શ્રુતં પાપવિનાશનમ્ ।
વિષ્ણુનાભ્યબ્જતો બ્રહ્મા મરીચિસ્તત્સુતોઽભવત્ ॥ ૧,૧૪૩.૧॥

મરીચેઃ કશ્યપસ્તસ્માદ્રવિસ્તસ્માન્મનુઃ સ્મૃતઃ ।
મનોરિક્ષ્વાકુરસ્યાભૂદ્વંશે રાજા રઘુઃ સ્મૃતઃ ॥ ૧,૧૪૩.૨॥

રઘોરજસ્તતો જાતો રાજા દશરથો બલી ।
તસ્ય પુત્રાસ્તુ ચત્વારો મહાબલપરાક્રમાઃ ॥ ૧,૧૪૩.૩॥

કૌસલ્યાયામ ભૂદ્રામો ભરતઃ કૈકયીસુતઃ ।
સુતૌ લક્ષ્મણશત્રુઘ્નૌ સુમિત્રાયાં બભૂવતુઃ ॥ ૧,૧૪૩.૪॥

રામો ભક્તઃ પિતુર્માતુર્વિશ્વામિત્રાદવાપ્તવાન્ ।
અસ્ત્રગ્રામં તતો યક્ષીં તાટકાં પ્રજઘાન હ ॥ ૧,૧૪૩.૫॥

વિશાવમિત્રસ્ય યજ્ઞે વૈ સુબાહું ન્યવધીદ્બલી ।
જનકસ્ય ક્રતું ગત્વા ઉપયેમેઽથ જાનકીમ્ ॥ ૧,૧૪૩.૬॥

ઊર્મિલાં લક્ષ્મણો વીરો ભરતો માણ્ડવીં સુતામ્ ।

શત્રુઘ્નો વૈ કીર્તિમતીં કુશધ્વજસુતે ઉભે ॥ ૧,૧૪૩.૭॥

પિત્રાદિભિરયોધ્યાયાં ગત્વા રામાદયઃ સ્થિતાઃ ।
યુધાજિતં માતુલઞ્ચ શત્રુઘ્નભરતૌ ગતૌ ॥ ૧,૧૪૩.૮॥

ગતયોર્નૃપવર્યોઽસૌ રાજ્યં દાતું સમુદ્યતઃ ।
સ રામાય તત્પુત્રાય કૈકેય્યા પ્રાર્થિતસ્તદા ॥ ૧,૧૪૩.૯॥

ચતુર્દશસમાવાસો વનેરામસ્ય વાઞ્છિતઃ ।
રામઃ પિતૃહિતાર્થઞ્ચ લક્ષ્મણેન ચ સીતયા ॥ ૧,૧૪૩.૧૦॥

રાજ્યઞ્ચ તૃણવત્ત્યક્ત્વા શ‍ૃઙ્ગવેરપુરં ગતઃ ।
રથં ત્યક્ત્વા પ્રયાગઞ્ચ ચિત્રકૂટગિરિં ગતઃ ॥ ૧,૧૪૩.૧૧॥

રામસ્ય તુ વિયોગેન રાજા સ્વર્ગં સમાશ્રિતઃ ।
સંસ્કૃત્ય ભરતશ્ચાગાદ્રામમાહ બલાન્વિતઃ ॥ ૧,૧૪૩.૧૨॥

અયોધ્યાન્તુ સમાગત્ય રાજ્યં કુરુ મહામતે ।
સ નૈચ્છત્પાદુકે દત્ત્વા રાજ્યાય ભરતાય તુ ॥ ૧,૧૪૩.૧૩॥

વિસર્જિતોઽથ ભરતો રામરાજ્યમપાલયત્ ।
નન્દિગ્રામે સ્થિતો ભક્તો હ્યયોધ્યાં નાવિશદ્વ્રતી ॥ ૧,૧૪૩.૧૪॥

રામોઽપિ ચિત્રકૂટાચ્ચ હ્યત્રેરાશ્રમમાયયૌ ।
નત્વા સુતીક્ષ્ણં ચાગસ્ત્યં દણ્ડકારણ્યમાગતઃ ॥ ૧,૧૪૩.૧૫॥

તત્ર શૂર્પણખા નામ રાક્ષસી ચાત્તુમાગતા ।
નિકૃત્ય કર્ણૌ નાસે ચ રામેણાથાપવારિતા ॥ ૧,૧૪૩.૧૬॥

તત્પ્રેરિતઃ ખરશ્ચાગાદ્દૂષણસ્ત્રિશિરાસ્તથા ।
ચતુર્દશસહસ્રેણ રક્ષસાન્તુ બલેન ચ ॥ ૧,૧૪૩.૧૭॥

રામોઽપિ પ્રેષયામાસ બાણૈર્યમપુરઞ્ચ તાન્ ।
રાક્ષસ્યા પ્રેરિતોઽભ્યાગાદ્રાવણો હરણાય હિ ॥ ૧,૧૪૩.૧૮॥

મૃગરૂપં સ મારીચં કૃત્વાગ્રેઽથ ત્રિદણ્ડધૃક્ ।
સીતયા પ્રેરિતો રામો મારીચં નિજઘાન હ ॥ ૧,૧૪૩.૧૯॥

મ્રિયમાણઃ સ ચ પ્રાહ હા સીતે ! લક્ષ્મણોતિ ચ ।
સીતોક્તો લક્ષ્મણોઽથાગાદ્રામશ્ચાનુદદર્શ તમ્ ॥ ૧,૧૪૩.૨૦॥

ઉવાચ રાક્ષસી માયા નૂનં સીતા હૃતેતિ સઃ ।
રાવણોઽન્તરમાસાદ્ય હ્યઙ્કેનાદાય જાનકીમ્ ॥ ૧,૧૪૩.૨૧॥

જટાયુષં વિનિર્ભિદ્ય યયૌ લઙ્કાં તતો બલી ।
અશોકવૃક્ષચ્છાયાયાં રક્ષિતાં તામધારયત્ ॥ ૧,૧૪૩.૨૨॥

આગત્ય રામઃ સૂન્યાઞ્ચ પર્ણશાલાં દદર્શ હ ।
શોકં કૃત્વાથ જાનક્યા માર્ગણં કૃતવાન્પ્રભુઃ ॥ ૧,૧૪૩.૨૩॥

જટાયુષઞ્ચ સંસ્કૃત્ય તદુક્તો દક્ષિણાં દિશમ્ ।
ગત્વા સખ્યં તતશ્ચક્રે સુગ્રીવેણ ચ રાઘવઃ ॥ ૧,૧૪૩.૨૪॥

સપ્ત તાલાન્વિનિર્ભિદ્ય શરેણાનતપર્વણા ।
વાલિનઞ્ચ વિનિર્ભિદ્ય કિષ્કિન્ધાયાં હરીશ્વરમ્ ॥ ૧,૧૪૩.૨૫॥

સુગ્રીવં કૃતવાન્રામ ઋશ્યમૂકે સ્વયં સ્થિતઃ ।
સુગ્રીવઃ પ્રેષયામાસ વાનરાન્પર્વતોપમાન્ ॥ ૧,૧૪૩.૨૬॥

સીતાયા માર્ગણં કર્તું પૂર્વાદ્યાશાસુ સોત્સવાન્ ।
પ્રતીચીમુત્તરાં પ્રાચીં દિશં ગત્વા સમાગતાઃ ॥ ૧,૧૪૩.૨૭॥

દક્ષિણાન્તુ દિશં યે ચ માર્ગયન્તોઽથ જાનકીમ્ ।
વનાનિ પર્વતાન્દ્વીપાન્નદીનાં પુલિનાનિ ચ ॥ ૧,૧૪૩.૨૮॥

જાનકીન્તે હ્યપશ્યન્તો મરણે કૃતનિશ્ચયાઃ ।
સમ્પાતિવચનાજ્જ્ઞાત્વા હનૂમાન્કપિકુઞ્જરઃ ॥ ૧,૧૪૩.૨૯॥

શતયોજનવિસ્તીર્ણં પુપ્લુવે મકરાલયમ્ ।
અપશ્યજ્જાનકીં તત્ર હ્યશોકવનિકાસ્થિતામ્ ॥ ૧,૧૪૩.૩૦॥

ભર્ત્સિતાં રાક્ષસીભિશ્ચ રાવણેન ચ રક્ષસા ।
ભવ ભાર્યેતિ વદતા ચિન્તયન્તીઞ્ચ રાઘવમ્ ॥ ૧,૧૪૩.૩૧॥

અઙ્ગુલીયં કપિર્દત્ત્વા સીતાં કૌશલ્યમબ્રવીત્ ।
રામસ્ય તસ્ય દૂતોઽહં શોકં મા કુરુ મૈથિલિ ॥ ૧,૧૪૩.૩૨॥

સ્વાભિજ્ઞાનઞ્ચ મે દેહિ યેન રામઃ સ્મરિષ્યતિ ।
તચ્છ્રુત્વા પ્રદદૌ સીતા વેણીરત્નં હનૂમતે ॥ ૧,૧૪૩.૩૩॥

યથા રામો નયેચ્છીઘ્રં તથા વાચ્યં ત્વયા કપે ।
તથેત્યુક્ત્વા તુ હનુમાન્વનં દિવ્યં બભઞ્જ હ ॥ ૧,૧૪૩.૩૪॥

હત્વાક્ષં રાક્ષસાંશ્ચાન્યાન્બન્ધનં સ્વયમાગતઃ ।
સર્વૈરિન્દ્રજિતો બાણૈર્દૃષ્ટ્વા રાવણમબ્રવીત્ ॥ ૧,૧૪૩.૩૫॥

રામદૂતોઽસ્મિ હનુમાન્દેહિ રામાય મૈથિલીમ્ ।
એતચ્છ્રુત્વા પ્રકુપિતો દીપયામાસ પુચ્છકમ્ ॥ ૧,૧૪૩.૩૬॥

કપિર્જ્વલિતલાઙ્ગૂલો લઙ્કાં દેહેઽ મહાબલઃ ।
દગ્ધ્વા લઙ્કાં સમાયાતો રામપાર્શ્વં સ વાનરઃ ॥ ૧,૧૪૩.૩૭॥

જગ્ધ્વા ફલં મધુવને દૃષ્ટા સીતત્યવેદયત્ ।
વેણીરત્નઞ્ચ રામાય રામો લઙ્કાપુરીં યયૌ ॥ ૧,૧૪૩.૩૮॥

સસુગ્રીવઃ સ હનુમાન્સાંગદશ્ચ સલક્ષ્મણઃ ।
વિભીષણોઽપિ સમ્પ્રાપ્તઃ શરણં રાઘવં પ્રતિ ॥ ૧,૧૪૩.૩૯॥

લઙ્કૈશ્વર્યેષ્વભ્યષિઞ્ચદ્રામસ્તં રાવણાનુજમ્ ।
રામો નલેન સેતુઞ્ચ કૃત્વાબ્ધૌ ચોત્તતાર તમ્ ॥ ૧,૧૪૩.૪૦॥

સુવેલાવસ્થિતશ્ચૈવ પુરીં લઙ્કાં દદર્શહ ।
અથ તે વાનરા વીરા નીલાઙ્ગદનલાદયઃ ॥ ૧,૧૪૩.૪૧॥

ધૂમ્રધૂમ્રાક્ષવીરેન્દ્રા જામ્બવત્પ્રમુખાસ્તદા ।
મૈન્દદ્વિવિદમુખ્યાસ્તે પુરીં લઙ્કાં બભઞ્જિરે ॥ ૧,૧૪૩.૪૨॥

રાક્ષસાંશ્ચ મહાકાયાન્કાલાઞ્જનચયોપમાન્ ।
રામઃ સલક્ષ્મણો હત્વા સકપિઃ સર્વરાક્ષસાન્ ॥ ૧,૧૪૩.૪૩॥

વિદ્યુજ્જિહ્વઞ્ચ ધૂમ્રાક્ષં દેવાન્તકનરાન્ત કૌ ।
મહોદરમહાપાર્શ્વાવતિકાયં મહાબલમ્ ॥ ૧,૧૪૩.૪૪॥

કુમ્ભં નિકુમ્ભં મત્તઞ્ચ મકરાક્ષં હ્યકમ્પનમ્ ।
પ્રહસ્તં વીરમુન્મત્તં કુમ્ભકર્ણં મહાબલમ્ ॥ ૧,૧૪૩.૪૫॥

રાવણિં લક્ષ્મણોઽચ્છિન્ત હ્યસ્ત્રાદ્યૈ રાઘવો બલી ।
નિકૃત્ય બાહુચક્રાણિ રાવણન્તુ ન્યપાતયન્ ॥ ૧,૧૪૩.૪૬॥

સીતાં શુદ્ધાં ગૃહીત્વાથ વિમાને પુષ્પકે સ્થિતઃ ।
સવાનરઃ સમાયાતો હ્યયોધ્યાં પ્રવરાં પુરીમ્ ॥ ૧,૧૪૩.૪૭॥

તત્ર રાજ્યં ચકારાથ પુત્રવત્પાલયન્પ્રજાઃ ।

દશાશ્વમેધાનાહૃત્ય ગયાશિરસિ પાતનમ્ ॥ ૧,૧૪૩.૪૮॥

પિણ્ડાનાં વિધિવત્કૃત્વા દત્ત્વા દાનાનિ રાઘવઃ ।
પુત્રૌ કુશલવૌ દૃષ્ટ્વા તૌ ચ રાજ્યેઽભ્યષેચયત્ ॥ ૧,૧૪૩.૪૯॥

એકાદશસહસ્રાણિ રામો રાજ્યમકારયત્ ।
શત્રુઘ્નો લવણં જઘ્ને શૈલૂષં ભતસ્તતઃ ॥ ૧,૧૪૩.૫૦॥

અગસ્ત્યાદીન્મુનીન્નત્વા શ્રુત્વોત્પત્તિઞ્ચ રક્ષસામ્ ।
સ્વર્ગં ગતો જનૈઃ સાર્ધમયોધ્યાસ્થૈઃ કૃતાર્થકઃ ॥ ૧,૧૪૩.૫૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રામાયણવર્ણનં નામ ત્રિચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૪

બ્રહ્મોવાચ ।
હરિવંશં પ્રવક્ષ્યામિ કૃષ્ણમાહાત્મ્યમુત્તમમ્ ।
વસુદેવાત્તુ દેવક્યાં વાસુદેવો બલોઽભવત્ ॥ ૧,૧૪૪.૧॥

ધર્માદિરક્ષણાર્થાય હ્યધર્માદિવિનષ્ટયે ।
કૃષ્ણઃ પીત્વા સ્તનૌ ગાઢં પૂતનામનયત્ક્ષયમ્ ॥ ૧,૧૪૪.૨॥

શકટઃ પરિવૃત્તોઽથ ભગ્નૌ ચ યમલાર્જુનૌ ।
દમિતઃ કાલિયો નાગો ધેનુકો વિનિપાતિતઃ ॥ ૧,૧૪૪.૩॥

ધૃતો ગોવર્ધનઃ શૈલ ઇન્દ્રેણ પરિપૂજિતઃ ।
ભારાવતરણં ચક્રે પ્રતિજ્ઞાં કૃતવાન્હરિઃ ॥ ૧,૧૪૪.૪॥

રક્ષણાયાર્જુનાદેશ્ચ હ્યરિષ્ટાદિર્નિપાતિતઃ ।
કેશી વિનિહતો દૈત્યો ગોપાદ્યાઃ પરિતોષિતાઃ ॥ ૧,૧૪૪.૫॥

ચાણૂરો મુષ્ટિકો મલ્લઃ કંસો મઞ્ચાન્નિપાતિતઃ ।
રુક્મિણીસત્યભામાદ્યાઃ હ્યષ્ટૌ પત્ન્યો હરેઃ પરાઃ ॥ ૧,૧૪૪.૬॥

ષોઢશ સ્ત્રીસહસ્રાણિ હ્યન્યાન્યાસ મહાત્મનઃ ।
તાસાં પુત્રાશ્ચ પૌત્રાદ્યાઃ શતશોઽથ સહસ્રશઃ ॥ ૧,૧૪૪.૭॥

રુક્મિણ્યાઞ્ચૈવ પ્રદ્યુમ્નો ન્યવધીચ્છંબરઞ્ચ યઃ ।
તસ્ય પુત્રોઽનિરુદ્ધોઽભૂદુષાબાણસુતાપતિઃ ॥ ૧,૧૪૪.૮॥

હરિશકરયોર્યત્ર મહાયુદ્ધં બભૂવ હ ।
બાણબાહુસહસ્રઞ્ચ ચ્છિન્નં બાહુદ્વયં હ્યભૂત્ ॥ ૧,૧૪૪.૯॥

નરકો નિહતો યેન પારિજાતં જહાર યઃ ।
બલશ્ચ શિસુપાલશ્ચ હતશ્ચ દ્વિવિદઃ કપિઃ ॥ ૧,૧૪૪.૧૦॥

અનિરુદ્ધાદભૂદ્વજ્રઃ સ ચ રાજા ગતે હરૌ ।
સન્દીપનિં ગુરુઞ્ચક્રે સપુત્રઞ્ચ ચકાર સઃ ।
મથુરાયાં ચોગ્રસેનં પાલનં ચ દિવૌકસામ્ ॥ ૧,૧૪૪.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
હરિવંશવર્ણનં નામ ચતુશ્ચાત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૫
બ્રહ્મોવાચ ।
ભારતં સમ્પ્રવક્ષ્યામિ ભારાવતરણં ભુવઃ ।
ચક્રે કૃષ્ણો યુધ્યમાનઃ પાણ્ડવાદિનિમિત્તતઃ ॥ ૧,૧૪૫.૧॥

વિષ્ણુનાભ્યબ્જતો બ્રહ્મા બ્રહ્મપુત્રોઽત્રિરત્રિતઃ ।
સોમસ્તતો બુધસ્તસ્માદિલાયાં ચ પુરૂરવાઃ ॥ ૧,૧૪૫.૨॥

તસ્યાયુસ્તત્ર વંશેઽભૂદ્યયાતિર્ભરતઃ કુરુઃ ।
શન્તનુસ્તસ્ય વંશેઽભૂદ્ગઙ્ગાયાં શન્તનોઃ સુતઃ ॥ ૧,૧૪૫.૩॥

ભીષ્મઃ સર્વગુણૈર્યુક્તો બ્રહ્મવૈવર્તપારગઃ ॥ ૧,૧૪૫.૪॥

શન્તનોઃ સત્યવત્યાં ચ દ્વૌ પુત્રૌ સંબભૂવતુઃ ।
ચિત્રાઙ્ગદન્તુ ગન્ધર્વઃ પુત્રં ચિત્રાઙ્ગદોઽવધીત્ ॥ ૧,૧૪૫.૫॥

અન્યો વિચિત્રવીર્યોઽભૂત્કાશીરાજસુતાપતિઃ ।
વિચિત્રવીર્યે સ્વર્યાતે વ્યાસાત્તત્ક્ષેત્રતોઽભવત્ ॥ ૧,૧૪૫.૬॥

ધૃતરાષ્ટોઽમ્બિકાપુત્રઃ પાણ્ડુરામ્બાલિકાસુતઃ ।
ભુજિષ્યાયાન્તુ વિદુરો ગાન્ધાર્યાં ધૃતરાષ્ટ્રતઃ ॥ ૧,૧૪૫.૭॥

દુર્યોધનપ્રધાનાસ્તુ શતસંખ્યા મહાબલાઃ ।
પાણ્ડોઃ કુન્ત્યાઞ્ચ માદ્યાં ચ પઞ્ચ પુત્રાઃ પ્રજજ્ઞિરે ॥ ૧,૧૪૫.૮॥

યુધિષ્ઠિરો ભીમસેનો હ્યર્જુનો નકુલસ્તથા ।

સહદેવશ્ચ પઞ્ચૈતે મહાબલપરાક્રમાઃ ॥ ૧,૧૪૫.૯॥

કુરુપાણ્ડવયોર્વૈરં દૈવયો ગાદ્બભૂવ હ ।
દુર્યોધનેનાધીરેણ પાણ્ડવાઃ સમુપદ્રુતાઃ ॥ ૧,૧૪૫.૧૦॥

દગ્ધા જતુગૃહે વીરાસ્તે મુક્તાઃ સ્વધિયામલાઃ ॥ ૧,૧૪૫.૧૧॥

તતસ્તદેકચક્રાયાં બ્રાહ્મણસ્ય નિવેશને ।
વિવિશુસ્તે મહાત્માનો નિહત્ય બકરાક્ષસમ્ ॥ ૧,૧૪૫.૧૨॥

તતઃ પાઞ્ચાલવિષયેદ્રૌપદ્યાસ્તે સ્વયંવરમ્ ।
વિજ્ઞાય વીર્યશુલ્કાન્તાં પાણ્ડવા ઉપયેમિરે ॥ ૧,૧૪૫.૧૩॥

દ્રોણભીષ્માનુમત્યા તુ ધૃતરાષ્ટ્રઃ સમાનયત્ ।
અર્દ્ધરાજ્યં તતઃ પ્રાપ્તા ઇન્દ્રપ્રસ્થે પુરોત્તમે ॥ ૧,૧૪૫.૧૪॥

રાજસૂયન્તતશ્ચક્રુઃ સભાં કૃત્વા યતવ્રતાઃ ।
અર્જુનો દ્વારવત્યાન્તુ સુભદ્રાં પ્રાપ્તવાન્પ્રિયામ્ ।
વાસુદેવસ્ય ભગિનીમનુમત્યા મુરદ્વિષઃ ॥ ૧,૧૪૫.૧૫॥

નન્દિઘોષં રથં દિવ્યમગ્નેર્ધનુરનુત્તમમ્ ।
ગાણ્ડીવં નામ તદ્દિવ્યં ત્રિષુ લોકેષુ વિશ્રુતમ્ ।
અક્ષયાન્સાયકાંશ્ચૈવ તથાભેદ્યઞ્ચ દંશનમ્ ॥ ૧,૧૪૫.૧૬॥

સ તેન ધનુષા વીરઃ પાણ્ડવો જાતવેદસમ્ ।
કૃષ્ણદ્વિતીયો બીભત્સુરતર્પયત વીર્યવાન્ ॥ ૧,૧૪૫.૧૭॥

નૃપાન્દિગ્વિજયે જિત્વા રત્નાન્યાદાય વૈ દદૌ ।
યુધિષ્ઠિરાય મહતે ભ્રાત્રે નીતિવિદે મુદા ॥ ૧,૧૪૫.૧૮॥

યુધિષ્ઠિરોઽપિ ધર્માત્મા ભ્રાતૃભિઃ પરિવારિતઃ ।
જિતો દુર્યોધનેનૈવ માયાદ્યૂતેન પાપિના ।
કર્ણદુઃશાસનમતે સ્થિતેન શકુનેર્મતે ॥ ૧,૧૪૫.૧૯॥

અથ દ્વાદશ વર્ષાણિ વને તેપુર્મહત્તપઃ ।
સધૌમ્યા દ્રૌપદીષષ્ઠા મુનિવૃન્દાભિસંવૃતાઃ ॥ ૧,૧૪૫.૨૦॥

યયુર્વિરાટનગરં ગુપ્તરૂપેણ સંશ્રિતાઃ ।
વર્ષમેકં મહાપ્રાજ્ઞા ગોગ્રહાત્તમપાલયન્ ॥ ૧,૧૪૫.૨૧॥

તતે યાતાઃ સ્વકં રાષ્ટ્રં પ્રાર્થયામાસુરાદૃતાઃ ।

પઞ્ચગ્રામાનર્ધરાજ્યાદ્વીરા દુર્યોધનં નૃપમ્ ॥ ૧,૧૪૫.૨૨॥

નાપ્તવન્તઃ કુરુક્ષેત્રે યુદ્ધઞ્ચક્રુર્બલાન્વિતાઃ ।
અક્ષૌહિણીભિર્દિવ્યાભિઃ સપ્તભિઃ પરિવારિતાઃ ॥ ૧,૧૪૫.૨૩॥

એકાદશભિરુદ્યુક્તા યુક્તા દુર્યોધનાદયઃ ।
આસીદ્યુદ્ધં સંકુલં ચ દેવાસુરરણોપમમ્ ॥ ૧,૧૪૫.૨૪॥

ભીષ્મઃ સેનાપતિરભૂદાદૌ દૌર્યોધને બલે ।
પાણ્ડવાનાં શિખણ્ડી ચ તયોર્યુદ્ધં બભૂવ હ ।
શસ્ત્રાશસ્ત્રિ મહાઘોરં ધસરાત્રં શરાશરિ ॥ ૧,૧૪૫.૨૫॥

શિખણ્ડ્યર્જુનબાણૈશ્ચ ભીષ્મઃ શરશતૈશ્ચિતઃ ।
ઉત્તરાયણમાવીક્ષ્ય ધ્યાત્વા દેવં ગદાધરમ્ ॥ ૧,૧૪૫.૨૬॥

ઉક્ત્વા ધર્માન્બહુવિધાંસ્તર્પયિત્વા પિતૄન્બહૂન્ ।
આનન્દે તુ પદે લીનો વિમલે મુક્તકિલ્બિષે ॥ ૧,૧૪૫.૨૭॥

તતો દ્રોણો યયૌ યોદ્ધું ધૃષ્ટદ્યુમ્નેન બીર્યવાન્ ।
દિનાનિ પઞ્ચ તદ્યુદ્ધમાસીત્પરમદારુણમ્ ॥ ૧,૧૪૫.૨૮॥

યત્ર તે પૃથિવીપાલા હતાઃ પાર્થેન સંગરે ।
શોકસાગરમાસાદ્ય દ્રોણોઽપિ સ્વર્ગમાપ્તવાન્ ॥ ૧,૧૪૫.૨૯॥

તતઃ કર્ણા યયૌ યોદ્ધુમર્જુનેન મિહાત્મના ।
દિનદ્વયં મહાયુદ્ધં કૃત્વા પાર્થાસ્ત્રસાગરે ।
નિમગ્નઃ સૂર્યલોકન્તુ તતઃ પ્રાપ સ વીર્યવાન્ ॥ ૧,૧૪૫.૩૦॥

તતઃ શલ્યો યયૌ યોદ્ધું ધર્મરાજેન ધીમતા ।
દિનાર્ધેન હતઃ શલ્યો બાણૈર્જ્વલનસન્નિભૈઃ ॥ ૧,૧૪૫.૩૧॥

દુર્યોધનોઽથ વેગેન ગદામાદાય વીર્યવાન્ ।
અભ્યધાવત વૈ ભીભં કાલાન્તકયમોપમઃ ॥ ૧,૧૪૫.૩૨॥

અથ ભીમેન વીરેણ ગદયા વિનિપાતિતઃ ।
અશ્વત્થામા ગતો દ્રૌણિઃ સુપ્તસૈન્યં તતો નિશિ ॥ ૧,૧૪૫.૩૩॥

જઘાન બાહુવીર્યેણ પિતુર્વધમનુસ્મરન્ ।
ધૃષ્ટદ્યુમ્નં જઘાનાથ દ્રૌપદેયાંશ્ચ વીર્યવાન્ ॥ ૧,૧૪૫.૩૪॥

દ્રૌપદ્યાં રુદ્યમાનાયામશ્વત્થામ્નઃ શિરોમણિમ્ ।

ઐષિકાસ્ત્રેણ તં જિત્વા જગ્રાહાર્જુન ઉત્તમમ્ ॥ ૧,૧૪૫.૩૫॥

યુધિષ્ઠિરઃ સમાશ્વાસ્ય સ્ત્રીજનં શોકસંકુલમ્ ।
સ્નાત્વા સન્તર્પ્ય દેવાંશ્ચ પિતૄનથ પિતામહાન્ ॥ ૧,૧૪૫.૩૬॥

આશ્વાસિતોઽથ ભીષ્મેણ રાજ્યઞ્ચૈવાકરોન્મહત્ ।
વિષ્ણુમીજેઽશ્વમેધેન વિધિવદ્દક્ષિણાવતા ॥ ૧,૧૪૫.૩૭॥

રાજ્યે પરીક્ષિતં સ્થાપ્ય યાદવાનાં વિનાશનમ્ ।
શ્રુત્વા તુ મૌસલે રાજા જપ્વા નામસહસ્રકમ્ ॥ ૧,૧૪૫.૩૮॥

વિષ્ણોઃ સ્વર્ગં જગામાથ ભીમાદ્યૈર્ભ્રાતૃભિર્યુતઃ ।
વાસુદેવઃ પુનર્બુદ્ધ-સમોહાય સુરદ્વિષામ્ ॥ ૧,૧૪૫.૩૯॥

કલ્કિર્વિષ્ણુશ્ચ ભવિતા શંભલગ્રામકે પુનઃ ।
અશ્વારૂઢોઽખિલાંલ્લોકાંસ્તદા ભસ્મીકરિષ્યતિ ॥ ૧,૧૪૫.૪૦॥

દેવાદીનાં રક્ષણાય હ્યધર્મહારણાય ચ ।
દુષ્ટાનાઞ્ચ વધાર્થાય હ્યવતારં કરોતિ ચ ॥ ૧,૧૪૫.૪૧॥

યથા ધન્વન્તરિર્વંશે જાતઃ ક્ષીરોદમન્થને ।
દેવાદીનાં જીવનાય હ્યાયુર્વેદમુવાચ હ ॥ ૧,૧૪૫.૪૨॥

વિશ્વામિત્રસુતાયૈવ શુશ્રુતાય મહાત્મને ।
ભારતાંશ્ચાવતારાંશ્ચ શ્રુત્વા સ્વર્ગં વ્રજેન્નરઃ ॥ ૧,૧૪૫.૪૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભારતાદિવર્ણનં નામ પઞ્ચચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૬
ધન્વન્તરિરુવાચ ।
સર્વરોગનિદાનઞ્ચ વક્ષ્યે સુશ્રુત તત્ત્વતઃ ।
આત્રેયાદ્યૈર્મુનિવરૈર્યથા પૂર્વમુદીરિતમ્ ॥ ૧,૧૪૬.૧॥

રોગઃ પાપ્મા જ્વરો વ્યાધિર્વિકારો દુષ્ટ આમયઃ ।
યક્ષ્માતઙ્ગદા બાધાઃ શબ્દાઃ પર્યાયવાચિનઃ ॥ ૧,૧૪૬.૨॥

નિદાનં પૂર્વરૂપાણિ રૂપાણ્યુપશયસ્તથા ।
સમ્પ્રાપ્તિશ્ચૈતિ વિજ્ઞાનં રોગાણાં પઞ્ચધા સ્મૃતમ્ ॥ ૧,૧૪૬.૩॥

નિમિત્તહેત્વાયતનપ્રત્યયોત્થાનકારણૈઃ ।
નિદાનમાહુઃ પર્યાયૈઃ પ્રાગ્રૂપં યેન લક્ષ્યતે ॥ ૧,૧૪૬.૪॥

ઉત્પિત્સુરામયો દોષવિશેષેણાનધિષ્ઠિતઃ ।
લિઙ્ગમવ્યક્તમલ્પત્વાદ્વ્યાધીનાં તદ્યથાયથમ્ ॥ ૧,૧૪૬.૫॥

તદેવ વ્યક્તતાં યાતં રૂપમિત્યભિધીયતે ।
સંસ્થાનાં વ્યઞ્જનં લિઙ્ગં લક્ષણં ચિહ્નમાકૃતિઃ ॥ ૧,૧૪૬.૬॥

હેતુવ્યાધિવિપર્યસ્તવિપર્યસ્તાર્થકારિણામ્ ।
ઔષધાન્નવિહારાણામુપયોગં સુખાવહમ્ ॥ ૧,૧૪૬.૭॥

વિદ્યાદુપશયં વ્યાધેઃ સ હિ સાત્મ્યમિતિ સ્મૃતઃ ।
વિપરીતોઽનુપશયો વ્યાધ્યસાત્મ્યેતિસંજ્ઞિતઃ ॥ ૧,૧૪૬.૮॥

યથા દુષ્ટેન દોષેણ યથા ચાનુવિસર્પતા ।
નિર્વૃત્તિરામયસ્યાસૌ સમ્પ્રાપ્તિરભિધીયતે ॥ ૧,૧૪૬.૯॥

સંખ્યાવિકલ્પપ્રાધાન્યબલકાલવિશેષતઃ ।
સા ભિદ્યતે યથાત્રૈવ વક્ષ્યન્તેઽષ્ટૌ જ્વરા ઇતિ ॥ ૧,૧૪૬.૧૦॥

દોષાણાં સમવેતાનાં વિકલ્પોશાંશકલ્પના ।
સ્વાતન્ત્ર્યપારતન્ત્ર્યાભ્યાં વ્યાધેઃ પ્રાધાન્યમાદિશેત્ ॥ ૧,૧૪૬.૧૧॥

હેત્વાદિકાત્સ્નર્યાવયવૈર્બલાબલવિશેષણમ્ ।
નક્તન્દિનાર્ધભુક્તાંશૈર્વ્યાધિકાલો યથામલમ્ ॥ ૧,૧૪૬.૧૨॥

ઇતિ પ્રોક્તો નિદાનાર્થઃ સ વ્યાસેનોપદેક્ષ્યતે ।
સર્વેષામેવ રોગાણાં નિદાનં કુપિતા મલાઃ ॥ ૧,૧૪૬.૧૩॥

તત્પ્રકોપસ્ય તુ પ્રોક્તં વિવિધાહિતસેવનમ્ ।
અહિતસ્ત્રિવિધો યોગસ્ત્રયાણાં પ્રાગુદાહૃતઃ ॥ ૧,૧૪૬.૧૪॥

તિક્તોષણકષાયામ્લરૂક્ષાપ્રમિતયોજનૈઃ ।
ધાવનોદીરણનિશાજાગરાત્યુચ્ચભાષણૈઃ ॥ ૧,૧૪૬.૧૫॥

ક્રિયાભિયોગભીશોકચિન્તાવ્યાયામમૈથુનૈઃ ।
ગ્રીષ્માહોરાત્રભુક્ત્યન્તે પ્રકુપ્યતિ સમીરણઃ ॥ ૧,૧૪૬.૧૬॥

પિત્તં કટ્વાલતીક્ષ્ણોષ્ણકટુક્રોધવિદાહિભિઃ ।
શરન્મધ્યાહ્નરાત્ર્યર્ધવિદાહસમયેષુ ચ ॥ ૧,૧૪૬.૧૭॥

સ્વાદ્વમ્લલવણસ્નિગ્ધગુર્વભિષ્યન્દિશીતલૈઃ ।
આસ્યાસ્વપ્નસુખાજીર્ણદિવાસ્વપ્નાદિબૃંહણૈઃ ॥ ૧,૧૪૬.૧૮॥

પ્રિચ્છર્દનાદ્યયોગેન ભુક્તાન્નસ્યાપ્યજીર્ણકે ।
પૂર્વાહ્ણે પૂર્વરાત્રે ચ શ્લેષ્મા વક્ષ્યામિ સદ્ગુરાન્ ॥ ૧,૧૪૬.૧૯॥

મિશ્રીભાવાત્સમસ્તાનાં સન્નિપાતસ્તથા પુનઃ ।
સંકીર્ણાજીર્ણવિષમવિરુદ્ધાદ્યશનાદિભિઃ ॥ ૧,૧૪૬.૨૦॥

વ્યાપન્નમદ્યપાનીયશુષ્કશાકામમૂલકૈઃ ।
પિણ્યાકમૃત્યવસરપૂતિશુષ્કકૃશમિષૈઃ ॥ ૧,૧૪૬.૨૧॥

દોષત્રયકરૈસ્તૈસ્તૈસ્તથાન્નપરિવર્તતઃ ।
ધાતોર્દુષ્ટાત્પુરો વાતાદ્વિગ્રહાવેશવિપ્લવાત્ ॥ ૧,૧૪૬.૨૨॥

દુષ્ટામાન્નૈરતિશ્લૈષ્મગ્રહૈર્જન્મર્ક્ષપીડનાત્ ।
મિથ્યાયોગાચ્ચ વિવિધાત્પાપાનાચ્ચ નિષેવણાત્ ।
સ્ત્રીણાં પ્રસવવૈષમ્યાત્તથા મિથ્યોપચારતઃ ॥ ૧,૧૪૬.૨૩॥

પ્રતિરોગમિતિ ક્રુદ્ધા રોગવિધ્યનુગામિનઃ ।
રસાયનં પ્રપદ્યાશુ દોષા દેહે વિકુર્વતે ॥ ૧,૧૪૬.૨૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સર્વરોગનિદાનં નામ ષટ્ચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૭
ધન્વન્તરિરુવાચ ।
વક્ષ્યે જ્વરનિદાનં હિ સર્વજ્વરવિબુદ્ધયે ।
જ્વરો રોગપતિઃ પાપ્મા મૃત્યુરાજોઽશનોઽન્તકઃ ।
ક્રુદ્ધદક્ષાધ્વરધ્વંસિરુદ્રોર્ધ્વનયનોદ્ભવઃ ॥ ૧,૧૪૭.૧॥

તત્સન્તાપો મોહમયઃ સન્તાપાત્માપચારજઃ ।
વિવિધૈર્નામભિઃ ક્રૂરો નાનાયોનિષુ વર્તતે ॥ ૧,૧૪૭.૨॥

પાકલો ગજેષ્વભિતાપો વાજિષ્વલર્કઃ કુક્કુરેષુ ।
ઇન્દ્રમદો જલદેષ્વપ્સુ નીલિકા જ્યોતિરોષધીષુ ભૂમ્યામૂષરો નામ ॥ ૧,૧૪૭.૩॥

હૃલ્લાસશ્છર્દનં કાસઃ સ્તંભઃ શૈત્ય ત્વગાદિષુ ।
અઙ્ગેષુ ચ સમુદ્ભૂતાઃ પિડકાશ્ચ કફોદ્ભવે ॥ ૧,૧૪૭.૪॥

કાલે યથાસ્વં સર્વેષાં પ્રવૃત્તિર્વૃદ્ધિરેવ વા ।
નિદાનોક્તોનુપશયો વિપરીતોપશાયિતા ॥ ૧,૧૪૭.૫॥

અરુચિશ્ચાવિપાકશ્ચ સ્તંભમાલસ્યમેવ ચ ।
હૃદ્દાહશ્ચ વિપાકશ્ચ તન્દ્રા ચાલસ્યમેવ ચ ।
વસ્તિર્વિમર્દાવનયા દોષાણામપ્રવર્તનમ્ ॥ ૧,૧૪૭.૬॥

લાલાપ્રસેકો હૃલ્લાસઃ ક્ષુન્નાશો રસદં મુખમ્ ।
સ્વચ્છમુષ્ણગુરુત્વઞ્ચ ગાત્રાણાં બહુમૂત્રતા ।
ન વિજીર્ણં ન ચ મ્લાનિર્જ્વરસ્યામસ્ય લક્ષણમ્ ॥ ૧,૧૪૭.૭॥

ક્ષુત્ક્ષામતા લઘુત્વં ચ ગાત્રાણાં જ્વરમાર્દવમ્ ।
દોષપ્રવૃત્તિરષ્ટાહાન્નિરામજ્વરલક્ષણમ્ ॥ ૧,૧૪૭.૮॥

યથા સ્વલિઙ્ગં સંસર્ગે જ્વરસંસર્ગજોઽપિ વા ।
શિરોર્તિમૂર્છાવમિદેહદાહકણ્ઠાસ્યશોષારુચિપર્વભેદાઃ ।
ઉન્નિદ્રતા સંભ્રમરોમહર્ષા જૃંભાતિવાક્ત્વં પવનાત્સપિત્તાત્ ॥ ૧,૧૪૭.૯॥

તાપહાન્યરુચિપર્વશિરોરુક્ષ્ઠીવનશ્વસનકાસવિવર્ણાઃ ।
શીતજાડ્યતિમિરભ્રમિતન્દ્રાશ્લેષ્મવાતજનિતજ્વરલિઙ્ગમ્ ॥ ૧,૧૪૭.૧૦॥

શીતસ્તમ્ભસ્વેદદાહાવ્યવસ્થાસ્તૃષ્ણા કાસઃ શ્લેષ્મપિત્તપ્રવૃત્તિઃ ।
મોહસ્તન્દ્રાલિપ્તતિક્તાસ્યતા ચ જ્ઞેયં રૂપં શ્લેષ્મપિત્તજ્વરસ્ય ॥ ૧,૧૪૭.૧૧॥

સર્વજો લક્ષણૈઃ સર્વૈર્દાહોઽત્ર ચ મુહુર્મુહુઃ ।
તદુચ્છીતં મહા નિદ્રા દિવા જાગરણં નિશિ ॥ ૧,૧૪૭.૧૨॥

સદા વા નૈવ વા નિદ્રા મહાસ્વેદો હિ નૈવ વા ।
ગીતનર્તનહાસ્યાદિઃ પ્રકૃતેહાપ્રવર્તનમ્ ॥ ૧,૧૪૭.૧૩॥

સાશ્રુણી કલુષે રક્તે ભુગ્ને લુલિતપક્ષ્મણી ।
અક્ષિણી પિણ્ડિકાપાર્શ્વશિરઃ પર્વાસ્થિરુગ્ભ્રમઃ ॥ ૧,૧૪૭.૧૪॥

સસ્વનૌ સરુજૌ કર્ણૌ મહાશીતૌ હિ નૈવ વા ।
પરિદગ્ધા ખરા જિહ્વા ગુરુસ્ત્રસ્તાઙ્ગસન્ધિતા ॥ ૧,૧૪૭.૧૫॥

ષ્ઠીવનં રક્તપિત્તસ્ય લોઠનં શિરસોઽતિતૃટ્ ।

કોષ્ઠાનાં શ્યાવરક્તાનાં મણ્ડલાનાં ચ દર્શનમ્ ॥ ૧,૧૪૭.૧૬॥

હૃદ્વ્યથા મલંસસર્ગઃ પ્રવૃત્તિર્વાલ્પશોઽતિ વા ।
સ્નિગ્ધાસ્યતા બલભ્રંશઃ સ્વરસાદઃ પ્રલાપિતઃ ॥ ૧,૧૪૭.૧૭॥

દોષપાકશ્ચિરં તન્દ્રા પ્રતતં કણ્ઠકૂજનમ્ ।
સન્નિપાતમભિન્યાસં તં બ્રૂયાચ્ચ હતૌજસમ્ ॥ ૧,૧૪૭.૧૮॥

વાયુના કણ્ઠરુદ્ધેન પિત્તમન્તઃ સુપીડિતમ્ ।
વ્યવાયિત્વાચ્ચ સૌખ્યાચ્ચ બહિર્મર્ગં પ્રપદ્યતે ।
તેન હારિદ્રનેત્રત્વં સન્નિપાતોદ્ભવેજ્વરે ॥ ૧,૧૪૭.૧૯॥

દોષે વિવૃદ્ધે નષ્ટેઽગ્નૌ સર્વસમ્પૂર્ણલક્ષણઃ ।
સાન્નિપાતજ્વરોઽસાધ્યઃ કૃચ્છ્રસાધ્યસ્તતોઽન્યથા ॥ ૧,૧૪૭.૨૦॥

અન્યત્ર સન્નિપાતોત્થં યત્ર પિત્તં પૃથક્સ્થિતમ્ ।
ત્વચિ કોષ્ઠે ચ વા દાહં વિદધાતિ પુરોઽનુ વા ॥ ૧,૧૪૭.૨૧॥

તદ્વદ્વાતકફે શીતં દાહાદિર્દુસ્તરસ્તયોઃ ।
શીતાદૌ તત્ર પિત્તેન કફે સ્યાન્દિતશોષિતે ॥ ૧,૧૪૭.૨૨॥

પિત્તે શાન્તેઽથ વૈ મૂર્છા મદસ્તૃષ્ણા ચ જાયતે ।
દાહાદૌ પુનરન્તેષુ તન્દ્રાલસ્યે વમિઃ ક્રમાત્ ॥ ૧,૧૪૭.૨૩॥

આગન્તુરભિગાતાભિષઙ્ગશાપાભિચારતઃ ।
ચતુર્ધા તુ કૃતઃ સ્વેદો દાહાદ્યૈરભિઘાતજઃ ॥ ૧,૧૪૭.૨૪॥

શ્રમાચ્ચ તસ્મિન્પવનઃ પ્રાયો રક્તં પ્રદૂષયન્ ।
સવ્યથાશોકવૈવર્ણ્યં સરુજં કુરુતે જ્વરમ્ ॥ ૧,૧૪૭.૨૫॥

ગ્રહાવેશૌષધિવિષક્રોધભીશોકકામજઃ ॥ ૧,૧૪૭.૨૬॥

અભિષઙ્ગગ્રહોઽપ્યસ્મિન્નકસ્માદ્ધાસરોદને ।
ઓષધીગન્ધજે મૂર્છા શિરોરુગ્વમથુઃ ક્ષયઃ ॥ ૧,૧૪૭.૨૭॥

વિષાન્મૂર્છાતિસારશ્ચ શ્યાવતા દાહકૃદ્ભ્રમઃ ।
ક્રોધાત્કમ્પઃ શિરોરુક્ચ પ્રલાપો ભયશોકજે ॥ ૧,૧૪૭.૨૮॥

કામાદ્ભ્રમોઽરુચિર્દાહો હ્રીનિદ્રાધીધૃતિક્ષયાઃ ।
ગ્રહાદૌ સન્નિપાતસ્ય રૂપાદૌ મરુતસ્તયોઃ ॥ ૧,૧૪૭.૨૯॥

કોપાત્કોપેऽપિ પિત્તસ્ય યૌ તુ શાપાભિચારજૌ ।
સન્નિપાતજ્વરૌ ઘોરૌ તાવસહ્યતમૌ મતૌ ॥ ૧,૧૪૭.૩૦॥

તન્ત્રા ભિચારિકૈર્મન્ત્રૈર્દૂયમાનઞ્ચ તપ્યતે ।
પૂર્વઞ્ચૈતસ્તતો દેહસ્તતો વિસ્ફોટદિગ્ભ્રમૈઃ ॥ ૧,૧૪૭.૩૧॥

સદાહમૂર્છાગ્રસ્તસ્ય પ્રત્યહં વર્ધતે જ્વરઃ ।
ઇતિ જ્વરોऽષ્ટધા દૃષ્ટઃ સમાસાદ્વિબિધસ્તુ સઃ ॥ ૧,૧૪૭.૩૨॥

શારીરો માનસઃ સૌમ્યસ્તીક્ષ્ણોન્તર્બહિરાશ્રયઃ ।
પ્રાકૃતો વૈકૃતઃ સાધ્યોऽસાધ્યઃ સામો નિરામકઃ ॥ ૧,૧૪૭.૩૩॥

પૂર્વં શરિરે શરીરે તાપો મનસિ માનસે ।
પવનૈર્યોગવાહિત્વાચ્છીતં શ્લેષ્મયુતે ભવેત્ ॥ ૧,૧૪૭.૩૪॥

દાહઃ પિત્તયુતે મિશ્રં મિશ્રેऽન્તઃ સંશ્રયે પુનઃ ।
જ્વરેऽધિકં વિકારાઃ સ્યુરન્તઃ ક્ષોભો મલગ્રહઃ ॥ ૧,૧૪૭.૩૫॥

બહિરેવ બહિર્વેગે તાપોऽપિ ચ સ સાધિતઃ ।
વર્ષાશરદ્વસન્તેષુ વાતાદ્યૈઃ પ્રકૃતઃ ક્રમાત્ ॥ ૧,૧૪૭.૩૬॥

વૈકૃતોऽન્યઃ સ દુઃસાધ્યઃ પ્રાયશ્ચ પ્રાકૃતોऽનિલાત્ ।
વર્ષાસુ મારુતો દુષ્ટઃ પિત્તશ્લેષ્માન્વિતં જ્વરમ્ ॥ ૧,૧૪૭.૩૭॥

કુર્યાચ્ચ પિત્તં શરદિ તસ્ય ચાનુચરઃ કફઃ ।
તત્પ્રકૃત્યા વિસર્ગાચ્ચ તત્ર નાનશનાદ્ભયમ્ ॥ ૧,૧૪૭.૩૮॥

કફો વસન્તે તમપિ વાતપિત્તં ભવેદનુ ।
બલવત્સ્વલ્પદોષેષુ જ્વરઃ સાધ્યોऽનુપદ્રવઃ ॥ ૧,૧૪૭.૩૯॥

સર્વથા વિકૃતિજ્ઞાને પ્રાગસાધ્ય ઉદાહૃતઃ ।
જ્વરોપદ્રવતીક્ષ્ણત્વં મન્દાગ્નિર્બહુમૂત્રતા ॥ ૧,૧૪૭.૪૦॥

ન પ્રવૃત્તિર્ન વિજીર્ણા ન ક્ષુત્સામજ્વરાકૃતિઃ ।
જ્વરવેગોऽધિકસ્તૃષ્ણા પ્રલાપઃ શ્વસનં ભ્રમઃ ॥ ૧,૧૪૭.૪૧॥

મલપ્રવૃત્તિરુત્ક્લેશઃ પચ્યમાનસ્ય લક્ષણમ્ ।
જીર્ણતામવિપર્યાસાત્સપ્તરાત્રં ચ લઙ્ઘનમ્ ॥ ૧,૧૪૭.૪૨॥

જ્વરઃ પઞ્ચવિધઃ પ્રોક્તો મલકાલબલાબલાત્ ।
પ્રાયશઃ સન્નિપાતેન ભૂયસામુપદિશ્યતે ॥ ૧,૧૪૭.૪૩॥

સન્તતઃ સતતોઽન્યેદ્યુસ્તૃતીયકચતુર્થકૌ ।
ધાતુમૂત્રશકૃદ્વાહિસ્નોત સાં વ્યાપિનો મલાઃ ॥ ૧,૧૪૭.૪૪॥

તાપયન્તસ્તનું સર્વાં તુલ્યદૃષ્ટ્યાદિવર્ધિતાઃ ।
બલિનો ગુરવસ્તસ્યાવિશેષેણ રસાશ્રિતાઃ ॥ ૧,૧૪૭.૪૫॥

સતતં નિષ્પ્રતિદ્વન્દ્વાજ્વરં કુર્યુઃ સુદુઃસહમ્ ।
મલં જ્વરોષ્ણધાતૂન્વા સ શીઘ્રં ક્ષપયેત્તતઃ ॥ ૧,૧૪૭.૪૬॥

સર્વાકારં રસાદીનાં શુદ્ધ્યાસુદ્ધ્યાપિ વા ક્રમાત્ ।
વાતપિત્તકફૈઃ સપ્તદ શદ્વાદશવાસરાત્ ॥ ૧,૧૪૭.૪૭॥

પ્રાયોઽનુયાતિ મર્યાદાં મોક્ષાય ચ વધાય ચ ।
ઇત્યગ્નિવેશસ્ય મતં હારીતસ્ય પુનઃ સ્મૃતિઃ ॥ ૧,૧૪૭.૪૮॥

દ્વિગુણા સપ્તમી યા ચ નવમ્યેકાદશી તથા ।
એષા ત્રિદોષમર્યાદા મોક્ષાય ચ વધાય ચ ॥ ૧,૧૪૭.૪૯॥

શુદ્ધ્યાશુદ્ધ્યા જ્વરઃ કાલં દીર્ઘમપ્યત્ર વર્તતે ।
કૃશાનાં વ્યાધિયુક્તાનાં મિથ્યાહારાદિસેવિનામ્ ॥ ૧,૧૪૭.૫૦॥

અલ્પોઽપિ દોષો દુષ્ટ્યાદેર્લબ્ધ્વાન્ચતમતો બલમ્ ।
સ પ્રત્યનીકો વિષમં યસ્માદ્વૃદ્ધિક્ષયાન્વિતઃ ॥ ૧,૧૪૭.૫૧॥

સવિક્ષેપો જ્વરં કુર્યાદ્વિષમક્ષયવૃદ્ધિભાક્ ।
દોષઃ પ્રવર્તતે તેષાં સ્વે કાલે જ્વરયન્બલી ॥ ૧,૧૪૭.૫૨॥

નિવર્તતે પુનશ્ચૈવ પ્રત્યનીકબલાબલઃ ।
ક્ષીણદોષો જ્વરઃ સૂક્ષ્મો રસાદિષ્વેવ લીયતે ॥ ૧,૧૪૭.૫૩॥

લીનત્વાત્કાર્શ્યવૈવર્ણ્યજાડ્યાદીનાં દધાતિ સઃ ।
આસન્નવિકૃતાસ્યત્વાત્સ્રોતસાં રસવાહિનામ્ ॥ ૧,૧૪૭.૫૪॥

આશુ સર્વસ્ય વપુષો વ્યાપ્તિદોષો ન જાયતે ।
સન્તઃ સતતસ્તેન વિપરીતો વિપર્યયાત્ ॥ ૧,૧૪૭.૫૫॥

વિષમો વિષમારમ્ભઃ ક્ષપાકાલેન સઙ્ગવાન્ ।
દોષો રક્તાશ્રયઃ પ્રાયઃ કરોતિ સન્તતં જ્વરમ્ ॥ ૧,૧૪૭.૫૬॥

અહોરાત્રસ્ય સન્ધૌ સ્યાત્સકૃદન્યેદ્યુરાશ્રિતઃ ।

તસ્મિન્માંસવહા નાડી મેદોનાડી તૃતીયકે ॥ ૧,૧૪૭.૫૭॥

ગ્રાહી પિત્તાનિલાન્મૂર્ધ્નસ્ત્રિકસ્ય કફપિત્તતઃ ।
સપૃષ્ઠસ્યાનિલકફાત્સ ચૈકાહાન્તરઃ સ્મૃતઃ ॥ ૧,૧૪૭.૫૮॥

ચતુર્થકો મલૈર્મેદોમજ્જાસ્થ્યન્યતરે સ્થિતઃ ।
મજ્જાસ્થ એવ હ્યપરઃ પ્રભાવમનુદર્શયેત્ ॥ ૧,૧૪૭.૫૯॥

દ્વિધા કફોણિજઙ્ઘાભ્યાં સ પૂર્વં શિરસાનિલાત્ ।
અસ્થિમજ્જોરુપગતશ્ચતુર્થકવિપર્યયઃ ॥ ૧,૧૪૭.૬૦॥

ત્રિધા ત્ર્યહં જ્વરયતિ દિનમેકન્તુ મુઞ્ચતિ ।
બલા બલેન દોષણામન્યચેષ્ટાદિજન્મનામ્ ॥ ૧,૧૪૭.૬૧॥

પક્વાનામવિપર્યાસાત્સપ્તરાત્રઞ્ચ લઙ્ઘયેત્ ।
જ્વરઃ સ્યાન્મનસસ્તદ્વત્કર્મણશ્ચ તદાતદા ॥ ૧,૧૪૭.૬૨॥

ગમ્ભીરધાતુચારિત્વાત્સન્નિપાતેન સમ્ભવાત્ ।
તુલ્યોચ્છ્રયાચ્ચ દોષાણાં દુશ્ચિકિત્સ્યશ્ચતુર્થકઃ ॥ ૧,૧૪૭.૬૩॥

સૂક્ષ્મામાત્સૂક્ષ્મજ્વરેષ્વેષુ દૂરદૂરતરેષુ ચ ।
દોષો રક્તાદિમાર્ગેષુ શનૈરલ્પશ્ચિરેણ યત્ ॥ ૧,૧૪૭.૬૪॥

યાતિ દેહઞ્ચ નાશેષં સન્તાપાદીન્કરોત્યતઃ ।
ક્રમો યત્નેન વિચ્છિન્નઃ સતાપો લક્ષ્યતે જ્વરઃ ॥ ૧,૧૪૭.૬૫॥

વિષમો વિષમારમ્ભઃ ક્ષપાકાલાનુસારવાન્ ।
યથોત્તરં મન્દગતિર્મન્દશક્તિર્યથાયથમ્ ॥ ૧,૧૪૭.૬૬॥

કાલેનાપ્નોતિ સદૃશાન્સ રસાદીંસ્તથાતથા ।
દોષો જ્વરયતિ ક્રુદ્ધશ્ચિરાચ્ચિરતરેણ ચ ॥ ૧,૧૪૭.૬૭॥

ભૂમૌ સ્થિતં જલૈઃ સિક્તં કાલં નૈવ પ્રતીક્ષતે ।
અઙ્કુરાય યથા બીજં દોષબીજં ભવેત્તથા ॥ ૧,૧૪૭.૬૮॥

વેગં કૃત્વાવિષં યદ્વદાશયે નયતે બલમ્ ।
કુપ્યત્યાપ્તબલં ભૂયઃ કાલદોષવિષન્તથા ॥ ૧,૧૪૭.૬૯॥

એવં જ્વરાઃ પ્રવર્તન્તે વિષમાઃ સતતાદયઃ ।
ઉત્ક્લેશો ગૌરવં દૈન્યં ભઙ્ગોઽઙ્ગાનાં વિજૃમ્ભણમ્ ॥ ૧,૧૪૭.૭૦॥

અરોચકો વમિઃ શ્વાસઃ સર્વસ્મિન્રસગે જ્વરે ।
રક્તનિષ્ઠીવનં તૃષ્ણા રૂક્ષોષ્ણં પીડકોદ્ગમઃ ॥ ૧,૧૪૭.૭૧॥

દાહરાગભ્રમમદપ્રલાપો રક્તસંશ્રિતે ।
તૃડ્ગ્લાનિઃ સ્પૃષ્ટવર્ચસ્કમન્તર્દાહો ભ્રમસ્તમઃ ॥ ૧,૧૪૭.૭૨॥

દૌર્ગન્ધ્યં ગાત્રવિક્ષેપો માંસસ્થે મેદસિ સ્થિતે ।
સ્વેદોઽતિતૃષ્ણા વમનં દૌર્ગન્ધ્યં વા સહિષ્ણુતા ॥ ૧,૧૪૭.૭૩॥

પ્રલાપો ગ્લાનિરરુચિરસ્થિગે ત્વસ્થિભેદનમ્ ।
દોષપ્રવૃત્તિરુદ્બોધઃ શ્વાસાંગક્ષેપકૂજનમ્ ॥ ૧,૧૪૭.૭૪॥

અન્તર્દાહો બહિઃ શૈત્યં શ્વાસો હિક્કા હિ મજ્જમે ।
તમસો દર્શનં મર્મચ્છેદનં સ્તબ્ધમેઢ્રતા ॥ ૧,૧૪૭.૭૫॥

શુક્રપ્રવૃત્તૌ મૃત્યુસ્તુ જાયતે શુક્રસંશ્રયે ।
ઉત્તરોત્તરદુઃસાધ્યાઃ પઞ્ચાન્યે તુ વિપર્યયે ॥ ૧,૧૪૭.૭૬॥

પ્રલિમ્પન્નિવ ગાત્રાણિ શ્લેષ્મણા ગૌરવેણ ચ ।
મન્દજ્વરપ્રલાપસ્તુ સશીતઃ સ્યાત્પ્રલેપકઃ ॥ ૧,૧૪૭.૭૭॥

નિત્યં મન્દજ્વરો રૂક્ષઃ શીતકૃચ્છ્રેણ ગચ્છતિ ।
સ્તબ્ધાઙ્ગઃ શ્લેષ્મભૂયિષ્ઠો ભવેદઙ્ગબલાશકઃ ॥ ૧,૧૪૭.૭૮॥

હરિદ્રાભેદવર્ણાભસ્તદ્વલ્લેપં પ્રમેહતિ ।
સ વૈ હારિદ્રકો નામ જ્વરભેદોઽન્તકઃ સ્મૃતઃ ॥ ૧,૧૪૭.૭૯॥

કફવાતૌ સમૌ યત્ર હીનપિત્તસ્ય દેહિનઃ ।
તીક્ષ્ણોઽથ વા દિવા મન્દો જાયતે રાત્રિજો જ્વરઃ ॥ ૧,૧૪૭.૮૦॥

દિવાકરાર્પિતબલે વ્યાયામાચ્ચ વિશોષિતે ।
શરીરે નિયતં વાતાજ્જ્વરઃ સ્યાત્પૌર્વરાત્રિકઃ ॥ ૧,૧૪૭.૮૧॥

આમાશયે યદાત્મસ્થે શ્લેષ્મપિત્તે હ્યધઃ સ્થિતે ।
તદર્ધં શીતલં દેહે હ્યર્ધં ચોષ્ણં પ્રજાયતે ॥ ૧,૧૪૭.૮૨॥

કાયે પિત્તં યદા ન્યસ્તં શ્લેષ્મા ચાન્તે વ્યવસ્થિતઃ ।
ઉષ્ણત્વં તેન દેહસ્ય શીતત્વં કરપાદયોઃ ॥ ૧,૧૪૭.૮૩॥

રસરક્તાશ્રયઃ સાધ્યો માંસ મેદોગતશ્ચ યઃ ।
અસ્થિમજ્જાગતઃ કૃચ્છ્રસ્તૈસ્તૈઃ સ્વાઙ્ગૈર્હતપ્રભઃ ॥ ૧,૧૪૭.૮૪॥

વિસંજ્ઞો જ્વેગાર્તઃ સક્રોધ ઇવ વીક્ષતે ।
સદોષમુષ્ણઞ્ચ સદા શકૃન્મુઞ્ચતિ વેગવત્ ॥ ૧,૧૪૭.૮૫॥

દેહો લઘુર્વ્યપગતક્લમમોહતાપઃ પાકો મુખે કરણસૌષ્ઠવમવ્યથત્વમ્ ।
સ્વેદઃ ક્ષુવઃ પ્રકૃતિયોગિમનોઽન્નલિપ્સા કણ્ડૂશ્ચ મૂર્ધ્નિ વિગતજ્વરલક્ષણાનિ ॥ ૧,૧૪૭.૮૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્વરનિદાનાદિકં નામ સપ્તચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૮
ધન્વન્તરિરુવાચ ।
અથાતો રક્તપિત્તસ્ય નિદાનં પ્રવદામ્યહમ્ ।
ભૃશોષ્ણતિક્તકટ્વમ્લલવણાદિવિદાહિભિઃ ॥ ૧,૧૪૮.૧॥

કોદ્રવોદ્દાલકૈશ્ચાન્યૈસ્તદુક્તૈરતિ સેવિતૈઃ ।
કુપિતં પૈત્તિકૈઃ પિત્તં દ્રવં રક્તઞ્ચ મૂર્છતિ ॥ ૧,૧૪૮.૨॥

તૈર્મિથસ્તુલ્યરૂપત્વમાગમ્ય વ્યાપ્નુવંસ્તનુમ્ ।
પિત્તરક્તસ્ય વિકૃતેઃ સંસર્ગાદ્દૂષણાદપિ ॥ ૧,૧૪૮.૩॥

ગન્ધવર્ણાનુવૃત્તેષુ રક્તેન વ્યપદિશ્યતે ।
પ્રભવત્યસૃજઃ સ્થાનાત્પ્લીહતો યકૃતશ્ચ સઃ ॥ ૧,૧૪૮.૪॥

શિરોગુરુત્વમરુચિઃ શીતેચ્છા ધૂમકોઽમ્લકઃ ।
છર્દિતશ્છર્દિબૈ ભત્સ્યં કાસઃ શ્વાસો ભ્રમઃ ક્લમઃ ॥ ૧,૧૪૮.૫॥

લોહિતો ન હિતો મત્સ્યગન્ધાસ્યાત્વઞ્ચ વિજ્વરે ।
રક્તહારિદ્રહરિતવર્ણતા નયનાદિષુ ॥ ૧,૧૪૮.૬॥

નીલલોહિત પીતાનાં વર્ણાનામવિવેચનમ્ ।
સ્વપ્ને ઇન્માદધર્મિત્વં ભવત્યસ્મિન્ભવિષ્યતિ ॥ ૧,૧૪૮.૭॥

ઉર્ધ્વં નાસાક્ષિકર્ણાસ્યૈર્મેઢ્રયોનિગુદૈરધઃ ।
કુપિતં રોમકૂપૈશ્ચ સમસ્તૈસ્તત્પ્રવર્તતે ॥ ૧,૧૪૮.૮॥

ઊર્ધ્વં સાધ્યં કફાધસ્માત્તદ્વિરેચનસાધિતમ્ ।
બહ્વૌષધાનિ પિત્તસ્ય વિરેકો હિ વરૌષધમ્ ॥ ૧,૧૪૮.૯॥

અનુબન્ધી કફો યત્ર તત્ર તસ્યાપિ શુદ્ધિકૃત્ ।
કષાયાઃ સ્વાદવો યસ્ય વિશુદ્ધૌ શ્લેષ્મલા હિતાઃ ॥ ૧,૧૪૮.૧૦॥

કટુતિક્તકષાયા વા યે નિસર્ગાત્કફાવહાઃ ।
અધો યાપ્યઞ્ચ નાયુષ્માંસ્તત્પ્રચ્છર્દનસાધકમ્ ॥ ૧,૧૪૮.૧૧॥

અલ્પૌષધઞ્ચ પિત્તસ્ય વમનં નાવમૌષધમ્ ।
અનુબન્ધિ બલં યસ્ય શાન્તપિત્તનરસ્ય ચ ॥ ૧,૧૪૮.૧૨॥

કષાયશ્ચ હિતસ્તસ્ય મધુરા એવ કેવલમ્ ।
કફમારુતસંસ્પૃષ્ટમસાધ્યમુપનામનમ્ ॥ ૧,૧૪૮.૧૩॥

અસહ્યં પ્રતિલોમત્વાદસાધ્યાદૌષધસ્ય ચ ।
ન હિ સંશોધનં કિઞ્ચિદસ્ય ચ પ્રતિલોમિનઃ ॥ ૧,૧૪૮.૧૪॥

શોધનં પ્રતિલોમઞ્ચ રક્તપિત્તેઽભિસર્જિતમ્ ।
એવમેવોપશમનં સંશોધનમિહેષ્યતે ॥ ૧,૧૪૮.૧૫॥

સંસૃષ્ટેષુ હિ દોષેષુ સર્વથા છર્દનં હિતમ્ ।
તત્ર દોષોઽત્ર ગમનં શિવાસ્ત્ર ઇવ લક્ષ્યતે ॥ ૧,૧૪૮.૧૬॥

ઉપદ્રવાશ્ચ વિકૃતિં ફલતસ્તેષુ સાધિતમ્ ॥ ૧,૧૪૮.૧૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રક્તપિત્તનિદાનં નામાષ્ટચત્વારિંશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪૯
ધન્વન્તરિરુવાચ ।
આશુકારી યતઃ કાસઃ સ એવાતઃ પ્રવક્ષ્યતે ।
પઞ્ચ કાસાઃ સ્મૃતા વાતપિત્તશ્લેષ્મક્ષતક્ષયૈઃ ॥ ૧,૧૪૯.૧॥

ક્ષયાયોપેક્ષિતાઃ સર્વે બલિનશ્ચોત્તરોત્તરમ્ ।
તેષાં ભવિષ્યતાં રૂપં કણ્ઠે કણ્ડૂરરોચકઃ ॥ ૧,૧૪૯.૨॥

શુષ્કકર્ણાસ્યકણ્ઠત્વં તત્રાધોવિહિતોઽનિલઃ ।
ઊર્ધ્વં પ્રવૃત્તઃ પ્રાપ્યો રસ્તસ્મિન્કણ્ઠે ચ સંસૃજન્ ॥ ૧,૧૪૯.૩॥

શિરાસ્રોતાંસિ સમ્પૂર્ય તતોઽઙ્ગાન્યુત્ક્ષિપન્તિ ચ ।
ક્ષિપન્નિવાક્ષિણી ક્લિષ્ટસ્વરઃ પાર્શ્વે ચ પીડયન્ ॥ ૧,૧૪૯.૪॥

પ્રવર્તતે સવક્રેણ ભિન્નકાંસ્યોપમધ્વનિઃ ।
હૃત્પાર્શ્વોરુશિરઃ શૂલમોહક્ષોભસ્વરક્ષયાન્ ॥ ૧,૧૪૯.૫॥

કરોતિ શુષ્કકાસઞ્ચ મહાવેગરુજાસ્વનમ્ ।
સોંગહર્ષો કફં શુષ્કં કૃછ્રાન્મુક્ત્વાલ્પતાં વ્રજેત્ ॥ ૧,૧૪૯.૬॥

પિત્તાત્પીતાક્ષિકત્વં ચ તિક્તાસ્યત્વં જ્વરો ભ્રમઃ ।
પિત્તાસૃગ્વમનં તૃષ્ણા વૈસ્વર્યં ધૂમકો મદઃ ॥ ૧,૧૪૯.૭॥

પ્રતતં કાસવેગે ચ જ્યોતિષામિવ દર્શનમ્ ।
કફાદુરોઽલ્પરુઙ્મૂર્ધિ હૃદયં સ્તિમિતે ગુરુ ॥ ૧,૧૪૯.૮॥

કણ્ઠે પ્રલેપમદજં પીનસચ્છર્દરોચકાઃ ।
રોમહર્ષો ધનસ્નિગ્ધશ્લેષ્મણાઞ્ચ પ્રવર્તનમ્ ॥ ૧,૧૪૯.૯॥

યુદ્ધાદ્યૈઃ સાહસૈસ્તૈસ્તૈઃ સેવિતૈરયથાબલમ્ ।
ઉપસ્યન્તઃ ક્ષતો વાયુઃ પિત્તેનાનુગતો બલી ॥ ૧,૧૪૯.૧૦॥

કુપિતઃ કુરુતે કાસં કફં તેન સશોણિતમ્ ।
પીતં શ્યાવઞ્ચ શુષ્કઞ્ચ ગ્રથિતં કુપિતં બહુ ॥ ૧,૧૪૯.૧૧॥

ષ્ઠીવેત્કણ્ઠેન રુજતા વિભિન્નેનૈવ ચોરસા ।
સૂચીભિરિવ તીક્ષ્ણાભિસ્તુદ્યમાનેન શૂલિના ॥ ૧,૧૪૯.૧૨॥

દુઃખસ્પર્શેન શૂલેન ભેદપીડાહિતાપિના ।
પર્વભેદજ્વરશ્વાસતૃષ્ણાવૈસ્વર્યકમ્પવાન્ ॥ ૧,૧૪૯.૧૩॥

પારાવત ઇવોત્કૂજન્પાર્શ્વશૂલી તતોઽસ્ય ચ ।
કફાદ્યૈર્વમનં પક્તિબલવર્ણઞ્ચ હીયતે ॥ ૧,૧૪૯.૧૪॥

ક્ષીણસ્ય સાસૃઙ્મૂત્રત્વં શ્વાસપૃષ્ટકટિગ્રહઃ ।
ષાયુપ્રધાનાઃ કુપિતા ધાવતો રાજયક્ષ્મણઃ ॥ ૧,૧૪૯.૧૫॥

કર્વન્તિ યક્ષ્માયતને કાસં ષ્ઠીવત્કફં તતઃ ।
પૂતિપૂયોપમં વીતં મિશ્રં હરિતલોહિતમ્ ॥ ૧,૧૪૯.૧૬॥

સુપ્યતે તુદ્યત ઇવ હૃદયં પચતીવ ચ ।
અકસ્માદુષ્ણશીતેચ્છા બહ્વાશિત્વં બલક્ષયઃ ॥ ૧,૧૪૯.૧૭॥

સ્નિગ્ધપ્રસન્નવક્રત્વં શ્રીમદ્દર્શનનેત્રતા ।
તતોઽસ્ય ક્ષયરૂપાણિ સર્વાણ્યાવિર્ભવન્તિ ચ ॥ ૧,૧૪૯.૧૮॥

ઇત્યેષ ક્ષયજઃ કાસ ક્ષીણાનાં દેહનાશનઃ ।
યાપ્યૌ વા બલિનાં તદ્વત્ક્ષતજોઽપિ નવૌ તુ તૌ ॥ ૧,૧૪૯.૧૯ ॥

સિધ્યેતામપિ સામર્થ્યાત્સાધ્યાદૌ ચ પૃથક્ક્રમઃ ।
મિશ્રા યાપ્યાશ્ચ યે સર્વે જરસઃ સ્થવિરસ્ય ચ ॥ ૧,૧૪૯.૨૦ ॥

કાસશ્વાસક્ષયચ્છર્દિસ્વરસાદાદયો ગદાઃ ।
ભવન્ત્યુપેક્ષયા યસ્માત્તસ્માત્તાસ્ત્વરયા જયેત્ ॥ ૧,૧૪૯.૨૧ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
કાસનિદાના નામૈકોનપઞ્ચાશદુત્તરશતતમોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૦

ધન્વન્તરિરુવાચ ।

અથાતઃ શ્વાસરોગસ્ય નિદાનં પ્રવદામ્યહમ્ ।
કાસવૃદ્ધ્યા ભવેચ્છ્વાસઃ પૂર્વૈર્વા દોષકોપનૈઃ ॥ ૧,૧૫૦.૧ ॥

આમાતિસારવમથુવિષપાણ્ડુજ્વરૈરપિ ।
રજોધૂમાનિલૈર્મર્મઘાતાદપિ હિમામ્બુના ॥ ૧,૧૫૦.૨ ॥

ક્ષુદ્રકસ્તમકશ્છિન્નો મહાનૂર્ધ્વશ્ચ પઞ્ચમઃ ।
કફોપરુદ્ધગમનપવનો વિષ્વગાસ્થિતઃ ॥ ૧,૧૫૦.૩ ॥

પ્રાણોદકાન્નવાહીનિ દુષ્ટસ્રોતાંસિ દૂષયન્ ।
ઉરઃ સ્થઃ કુરુતે શ્વાસમામાશયસમુદ્ભવમ્ ॥ ૧,૧૫૦.૪ ॥

પ્રાગ્રૂપં તસ્ય હૃત્પાર્શ્વશૂલં પ્રાણવિલોમતા ।
આનાહઃ શઙ્ખભેદશ્ચ તત્રાયાસોઽતિભોજનૈઃ ॥ ૧,૧૫૦.૫ ॥

પ્રેરિતઃ પ્રેરયન્ક્ષુદ્રં સ્વયં સ સમલં મરુત્ ।
પ્રતિલોમં શિરા ગચ્છેદુદીર્ય પવનઃ કફમ્ ॥ ૧,૧૫૦.૬ ॥

પરિગૃહ્યશિરોગ્રીવમુરઃ પાર્શ્વે ચ પીડયન્ ।
કાસં ઘુર્ઘુરકં મોહમરુચિમ્પીનસં ભૃશમ્ ॥ ૧,૧૫૦.૭ ॥

કરોતિ તીવ્રવેગઞ્ચ શ્વાસં પ્રાણોપતાપિનમ્ ।
પ્રતામ્યેત્તસ્ય વેગેનષ્ઠીવનાન્તે ક્ષણં સુખી ॥ ૧,૧૫૦.૮ ॥

કૃચ્છ્રાચ્છયાનઃ શ્વસિતિ નિષણ્ણઃ સ્વાસ્થ્યમર્હતિ ।
ઉચ્છ્રિતાક્ષો લલાટેન સ્વિદ્યતા ભૃશમાર્તિમાન્ ॥ ૧,૧૫૦.૯॥

વિશુષ્કાસ્યો મુહુઃ શ્વાસઃ કાઙ્ક્ષત્યુષ્ણં સવેપથુઃ ।
મેઘામ્બુશીતપ્રાગ્વાતૈઃ શ્લેષ્મલૈશ્ચ વિવર્ધતે ॥ ૧,૧૫૦.૧૦॥

સ યાપ્યસ્તમકઃ સાધ્યો નરસ્ય બલિનો ભવેત્ ।
જ્વરમૂર્છાવતઃ સીતૈર્ન શામ્યેત્પ્રથમસ્તુ સઃ ॥ ૧,૧૫૦.૧૧॥

કાસશ્વસિતવચ્છીર્ણમર્મચ્છેદરુજાર્દિતઃ ।
સસ્વેદમૂર્છઃ સાનાહો બસ્તિદાહવિબોધવાન્ ॥ ૧,૧૫૦.૧૨॥

અધોદૃષ્ટિઃ શુતાક્ષસ્તુ સ્નિહ્યદ્રક્તૈકલોચનઃ ।
શુષ્કાસ્યઃ પ્રલપન્દીનો નષ્ટચ્છાયો વિચેતનઃ ॥ ૧,૧૫૦.૧૩॥

મહાતામહતા દીનો નાદેન શ્વસિતિ ક્રથન્ ।
ઉદ્ધૂયમાનઃ સંરબ્ધો મત્તર્ષભ ઇવાનિશમ્ ॥ ૧,૧૫૦.૧૪॥

પ્રનષ્ટજ્ઞાનવિજ્ઞાનો વિભ્રાન્તનયનાનનઃ ।
નેત્રે સમાક્ષિપન્બદ્ધમૂત્રવર્ચા વિશીર્ણવાક્ ॥ ૧,૧૫૦.૧૫॥

શુષ્કકણ્ઠો મુહુશ્ચૈવ કર્ણશઙ્ખાશિરોઽતિરુક્ ।
યો દીર્ઘમુચ્છ્વસિત્યૂર્ધ્વં ન ચ પ્રત્યાહરત્યધઃ ॥ ૧,૧૫૦.૧૬॥

શ્લેષ્માવૃતમુખશ્રોત્રઃ ક્રુદ્ધગન્ધવહાર્દિતઃ ।
ઊર્ધ્વં સમીક્ષતે ભ્રાન્તમક્ષિણી પરિતઃ ક્ષિપન્ ॥ ૧,૧૫૦.૧૭॥

મર્મસુ ચ્છિદ્યમાનેષુ પરિદેવી નિરુદ્ધવાક્ ।
એતે સિધ્યેયુરવ્યક્તાઃ વ્યક્તાઃ પ્રાણહરા ધ્રુવમ્ ॥ ૧,૧૫૦.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્વાસનિદાના નામ પઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૧
ધન્વન્તરિરુવાચ ।
હિક્કારોગનિદાનઞ્ચ વક્ષ્યે સુશ્રુત ! તચ્છૃણુ ।
શ્વાસૈકહેતુઃ પ્રાગ્રૂપં સંખ્યા પ્રકૃતિસંશ્રયા ॥ ૧,૧૫૧.૧॥

હિક્કા ભક્ષ્યોદ્ભવા ક્ષુદ્રા યમલા મહતીતિ ચ ।

ગમ્ભીરા ચ મરુત્તત્ર ત્વરયાયુક્તિસેવિતૈઃ ॥ ૧,૧૫૧.૨॥

રૂક્ષતીક્ષ્ણખરાશાન્તૈરન્નપાનૈઃ પ્રપીડિતઃ ।
કરોતિ હિક્કાં શ્વસનઃ મન્દશબ્દાં ક્ષુધાનુગામ્ ॥ ૧,૧૫૧.૩॥

સમં સન્ધ્યાન્નપાનેન યા પ્રયાતિ ચ સાન્નજા ।
આયાસાત્પવનઃ ક્રુદ્ધઃ ક્ષુદ્રાં હિક્કાં પ્રવર્તયેત્ ॥ ૧,૧૫૧.૪॥

જત્રુમૂલાત્પરિસૃતા મન્દવેગવન્તી હિ સા ।
વૃદ્ધિમાયાસતો યાતિ ભુક્તમાત્રે ચ માર્દબમ્ ॥ ૧,૧૫૧.૫॥

ચિરેણ યમલૈર્વેગૈર્યા હિક્કા સમ્પ્રવર્તતે ।
પરિણામાન્મુખે વૃદ્ધિં પરિણામે ચ ગચ્છતિ ॥ ૧,૧૫૧.૬॥

કમ્પયન્તી શિરો ગ્રીવાં યમલાં તાં વિનિર્દિશેત્ ।
પ્રલાપચ્છર્દ્યતીસારનેત્રવિપ્લુતજૃમ્ભિતા ॥ ૧,૧૫૧.૭॥

યમલા વેગિની હિક્કા પરિણામવતી ચ સા ।
ધ્વસ્તભ્રૂશઙ્ખયુગ્મસ્ય શ્રુતિવિપ્લુતચક્ષુષઃ ॥ ૧,૧૫૧.૮॥

સ્તમ્ભયન્તી તનું વાચં સ્મૃતિં સંજ્ઞાં ચ મુઞ્ચતી ।
તુદન્તી માર્ગમાણસ્ય કુર્વતી મર્મઘટ્ટનમ્ ॥ ૧,૧૫૧.૯॥

પૃષ્ઠતો નમનં સાર્ષ્યં મહાહિક્કા પ્રવર્તતે ।
મહાશૂલા મહાશબ્દા મહાવેગા મહાબલા ॥ ૧,૧૫૧.૧૦॥

પક્વાશયાચ્ચ નાભેર્વા પૂર્વવત્સા પ્રવર્તતે ॥ ૧,૧૫૧.૧૧॥

તદ્રૂપા સા મહત્કુર્યાઞ્જૃમ્ભણાં ગપ્રસારણમ્ ।
ગમ્ભીરેણ નિદાનેન ગમ્ભીરા તુ સુસાધયેત્ ॥ ૧,૧૫૧.૧૨॥

આદ્યે દ્વે વર્જયેદન્ત્યે સર્વલિઙ્ગાં ચ વેગિનીમ્ ।
સર્વસ્ય સંચિતામસ્ય સ્થવિરસ્ય વ્યવાયિનઃ ॥ ૧,૧૫૧.૧૩॥

વ્યાધિભિઃ ક્ષીણદેહસ્ય ભક્તચ્છેદકૃશસ્ય ચ ।
સર્વેઽપિ રોગા નાશાય ન ત્વેવં શાઘ્રકારિણઃ ॥ ૧,૧૫૧.૧૪॥

હિક્કાશ્વાસૌ યથા તૌ હિ મૃત્યુકાલે કૃતાલયૌ ॥ ૧,૧૫૧.૧૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
હિક્કાનિદાના નામૈકપઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૫૨

ધન્વન્તરિરુવાચ ।

અથાતો યક્ષ્મરોગસ્ય નિદાનં પ્રવદામ્યહમ્ ।
અનેકરોગાનુગતો બહુરોગપુરોગમઃ ॥ ૧,૧૫૨.૧॥

રાજયક્ષ્મા ક્ષયઃ શોષો રોગરાડિતિ કથ્યતે ।
નક્ષત્રાણાં દ્વિજાનાઞ્ચ રાજ્ઞોઽભૂદ્યદયં પુરા ॥ ૧,૧૫૨.૨॥

યચ્ચ રાજા ચ યક્ષ્મા ચ રાજયક્ષ્મા તતો મતઃ ।
દેહૌષધક્ષયકૃતેઃ ક્ષયસ્તત્સમ્ભવાચ્ચ સઃ ॥ ૧,૧૫૨.૩॥

રસાદિશોષણાચ્છોષો રોગરાડિતિ રાજવત્ ।
સાહસં વેગસંરોધઃ શુક્રૌજઃ સ્નેહસંક્ષયઃ ॥ ૧,૧૫૨.૪॥

અન્નપાનવિધિત્યાગશ્ચત્વારસ્તસ્યહેતવઃ ।
તૈરુદીર્ણોઽનિલઃ પિત્તં વ્યર્થં ચોદીર્ય સર્વતઃ ॥ ૧,૧૫૨.૫॥

શરિરસન્ધિમાવિશ્ય તાઃ શિરાઃ પ્રતિપીડયન્ ।
મુખાનિ સ્રોતસાં રુદ્ધ્વા તથૈવાતિવિસૃજ્ય વા ॥ ૧,૧૫૨.૬॥

મધ્યમૂર્ધ્વમધસ્તિર્યગવ્યથાં સઞ્જનયેદ્ધૃદઃ ।
રૂપં ભવિષ્યતસ્તસ્ય પ્રતિશ્યાયો ભૃશં જ્વરઃ ॥ ૧,૧૫૨.૭॥

પ્રસેકો મુખમાધુર્યં માર્દવં વહ્નિદે હયોઃ ।
લૌલ્યભાવોઽન્નપાનાદૌ શુચાવશુચિવીક્ષણમ્ ॥ ૧,૧૫૨.૮॥

મક્ષિકાતૃણકેશાદિપાતઃ પ્રાયોઽન્નપાનયોઃ ।
હૃલ્લાસશ્છર્દિરરુચિરસ્નાતેઽપિ બલક્ષયઃ ॥ ૧,૧૫૨.૯॥

પાણ્યોરુવક્ષઃ પાદાસ્યકુક્ષ્યક્ષ્ણોરતિશુક્લતા ।
બાહ્વોઃ પ્રતોદો જિહ્વાયાઃ કાયે બૈભત્સ્યદર્શનમ્ ॥ ૧,૧૫૨.૧૦॥

સ્ત્રીમદ્યમાંસપ્રિયતા ઘૃણિતા મૂર્ધગુણ્ઠનમ્ ।
નખકેશાસ્થિવૃદ્ધિશ્ચ સ્વપ્ને ચાભિભવો ભવેત્ ॥ ૧,૧૫૨.૧૧॥

પતનં કૃકલાસાહિકપિશ્વાપદપક્ષિભિઃ ।
કેશાસ્થિતુષભસ્માદિતરૌ સમધિરોહણમ્ ॥ ૧,૧૫૨.૧૨॥

શૂન્યાનાં ગ્રામદેશાનાં દર્શનં શુષ્યતોઽમ્ભસઃ ।

જ્યોતિર્દિવિ દવાગ્નીનાં જ્વલતાં ચ મહીરુહામ્ ॥ ૧,૧૫૨.૧૩ ॥

પીનસશ્વાસકાસં ચ સ્વરમૂર્ધરુજોઽરુચિઃ ।
ઊર્ધ્વનિઃ શ્વાસસંશોષાવધશ્છર્દિશ્ચ કોષ્ઠગે ॥ ૧,૧૫૨.૧૪ ॥

સ્થિતે પાર્શ્વે ચ રુગ્બોધે સન્ધિસ્થે ભવતિ જ્વરઃ ।
રૂપાણ્યૈકાદશૈતાનિ જાયન્તે રાજયક્ષ્મણઃ ॥ ૧,૧૫૨.૧૫ ॥

તેષામુપદ્રવાન્વિદ્યાત્કણ્ઠધ્વંસકરી રુજાઃ ।
જૃમ્ભાઙ્ગમર્દનિષ્ઠીવવહ્નિમાન્દ્યાસ્યપૂતિતા ॥ ૧,૧૫૨.૧૬ ॥

તત્ર વાતાચ્છિરઃ પાર્શ્વશૂલનં સાંગમર્દનમ્ ।
કણ્ઠરોધઃ સ્વરભ્રંશઃ પિત્તાત્પાદાંસપાણિષુ ॥ ૧,૧૫૨.૧૭ ॥

દાહોઽતિસારોઽસૃક્છર્દિર્મુખગન્ધો જ્વરો મદઃ ।
કફાદરોચકચ્છર્દિકાસા અર્ધ્વાં ગગૌરવમ્ ॥ ૧,૧૫૨.૧૮ ॥

પ્રસેકઃ પીનસઃ શ્વાસઃ સ્વરભેદોઽલ્પવહ્નિતા ।
દોષૈર્મન્દાનલત્વેન શોથલેપકફોલ્બણૈઃ ॥ ૧,૧૫૨.૧૯ ॥

સ્રોતોમુખેષુ રુદ્ધેષુ ધાતુષુ સ્વલ્પકેષુ ચ ।
વિદાહો મનસઃ સ્થાને ભવન્ત્યન્યે હ્યુપદ્રવાઃ ॥ ૧,૧૫૨.૨૦ ॥

પચ્યતે કોષ્ઠ એવાન્નમમ્લયુક્તૈ રસૈર્યુતમ્ ।
પ્રાયોઽસ્ય ક્ષયભાગાનાં નૈવાન્નં ચાઙ્ગપુષ્ટયે ॥ ૧,૧૫૨.૨૧ ॥

રસો હ્યસ્ય ન રક્તાય માંસાય કુરુતે તુ તત્ ।
ઉપષ્ટબ્ધઃ સમન્તાચ્ચ કેવલં વર્તતે ક્ષયી ॥ ૧,૧૫૨.૨૨ ॥

લિઙ્ગેષ્વલ્પેષ્વતિક્ષીણં વ્યાધૌ ષટ્કરણક્ષયમ્ ।
વર્જયેત્સાધયેદેવ સર્વેષ્વપિ તતોઽન્યથા ॥ ૧,૧૫૨.૨૩ ॥

દોષૈર્વ્યસ્તૈઃ સમસ્તૈશ્ચ ક્ષયાત્સર્વસ્ય મેદસઃ ।
સ્વરભેદો ભવેત્તસ્ય ક્ષામો રૂક્ષશ્ચલઃ સ્વરઃ ॥ ૧,૧૫૨.૨૪ ॥

શુકવર્ણાભકણ્ઠત્વં સ્નિગ્ધોષ્ણોપશમોઽનિલાત્ ।
પિત્તાત્તાલુગલે દાહઃ શોષો ભવતિ સન્તતમ્ ॥ ૧,૧૫૨.૨૫ ॥

લિમ્પન્નિવ કફૈઃ કણ્ઠં મુખં ઘુરઘુરાયતે ।
સ્વયં વિરુદ્ધૈઃ સર્વૈસ્તુ સર્વાલિઙ્ગૈઃ ક્ષયો ભવેત્ ॥ ૧,૧૫૨.૨૬ ॥

ધૂમાયતીવ ચાત્યર્થમુદેતિ શ્લેષ્મલક્ષણમ્ ।
કૃચ્છ્રસાધ્યાઃ ક્ષયાશ્ચાત્ર સર્વૈરલ્પઞ્ચ વર્જયેત્ ॥ ૧,૧૫૨.૨૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યક્ષ્મનિદાના નામ દ્વિપઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૩
ધન્વન્તરિરુદાચ ।
અરોચકનિદાન્તે વક્ષ્યેઽહં સુશ્રુતાધુના ।
અરોચકો ભવેદ્દોષૈર્જિહ્વાહૃદયસંશ્રયૈઃ ॥ ૧,૧૫૩.૧॥

સન્નિપાતેન મનસઃ સન્તાપેન ચ પઞ્ચમઃ ।
કષાયતિક્તમધુરં વાતાદિષુ મુખં ક્રમાત્ ॥ ૧,૧૫૩.૨॥

સર્વં વીતરસં શોકક્રોધાદિષુ યથા મનઃ ।
છર્દિદોષૈઃ પૃથક્સર્વૈર્દુષ્ટૈરન્યૈશ્ચ પઞ્ચમઃ ॥ ૧,૧૫૩.૩॥

ઉદાનોઽધિકૃતાન્દોષાન્સર્વં સન્ધ્યર્હમસ્યતિ ।
આશુ ક્લેશોઽસ્ય લાવણ્યપ્રસેકારુચયઃ ક્રમાત્ ॥ ૧,૧૫૩.૪॥

નાભિપૃષ્ઠં રુજત્યાશુ પાર્શ્વે ચાહારમુત્ક્ષિપેત્ ।
તતો વિચ્છિન્નલ્પાલ્પકષાયં ફેનિલં વમેત્ ॥ ૧,૧૫૩.૫॥

શબ્દોદ્ગારયુતઃ કૃચ્છ્રમનુકૃચ્છ્રેણ વેગવત્ ।
કાસાસ્યશોષકં વાતાત્સ્વરપીડાસમન્વિતમ્ ॥ ૧,૧૫૩.૬॥

પિત્તાત્ક્ષારોદકનિભં ધૂમ્રં હરિતપીતકમ્ ।
સાસૃગમ્લં કટુતિક્તં તૃણ્મૂર્છાદાહપાકવત્ ॥ ૧,૧૫૩.૭॥

કફાત્સ્નિગ્ધં ઘનં પીતં શ્લેષ્મતસ્તુ સમાક્ષિકમ્ ।
મધુરં લવણં ભૂરિ પ્રસક્તં લોમહર્ષણમ્ ॥ ૧,૧૫૩.૮॥

મખશ્વયથુમાધુર્યતન્દ્રાહૃલ્લાસકાસવાન્ ।
સર્વૈર્લિઙ્ગૈઃ સમાપન્નસ્ત્યાજ્યો ભવતિ સર્વથા ॥ ૧,૧૫૩.૯॥

સર્વં યસ્ય ચ વિદ્વિષ્ટં દર્શનશ્રવણાદિભિઃ ।
વાતાદિનૈવ સંક્રુદ્ધકૃમિદુષ્ટાન્નજે ગદે ।
શૂલવેપતુહૃલ્લાસો વિશેષાત્કૃમિજે ભવેત્ ॥ ૧,૧૫૩.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ऽરોચકનિદાના નામ ત્રિપઞ્ચાશદુત્તરશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૪

ધન્વન્તરિરુવાચ ।

હૃદ્રોગાદિનિદાનં તે વક્ષ્યેऽહં સુશ્રુતાધુના ।
કૃમિહૃદ્રોગલિઙ્ગૈશ્ચ સ્મૃતાઃ પઞ્ચ તુ હૃદ્ગતાઃ ॥ ૧,૧૫૪.૧ ॥

વાતેન શૂન્યાતાત્યર્થં ભુજ્યતે રોરુદીતિ ચ ।
ભિદ્યતે શુષ્યતે સ્તબ્ધં હૃદયં શૂન્યતા ભ્રમઃ ॥ ૧,૧૫૪.૨ ॥

અકસ્માદ્દીનતા શોકો ભયં શબ્દેऽસૈષ્ણુતા ।
વેપથુર્વેપનાન્મોહઃ શ્વાસરોધોऽલ્પનિદ્રતા ॥ ૧,૧૫૪.૩ ॥

પિત્તાત્તૃષ્ણા શ્રમો દાહો સ્વેદોऽમ્લકફજઃ ક્રમઃ ।
છર્દનં હ્યમ્લપિત્તસ્ય ધૂમકલ્પિતકો જ્વરઃ ॥ ૧,૧૫૪.૪ ॥

શ્લેષ્મણા હૃદયં સ્તબ્ધં ભારિકં સાશ્મગર્ભવત્ ।
કાસાસ્થિસાદનિષ્ઠીવનિદ્રાલસ્યારુચિજ્વરાઃ ॥ ૧,૧૫૪.૫ ॥

હૃદ્રોગે હિ ત્રિભિર્દોષૈઃ કૃમિભિઃ શ્યાવનેત્રતા ।
તમઃ પ્રવેશો હૃલ્લાસઃ શોથઃ કણ્ડૂઃ કફસ્રુતિઃ ॥ ૧,૧૫૪.૬ ॥

હૃદયં સતતં ચાત્ર ક્રકચેનેવ દીર્યતે ।
ચિકિત્સદામયં (રં) ઘોરં તચ્છીઘ્રં શીઘ્રમારિણમ્ ॥ ૧,૧૫૪.૭ ॥

વાતાત્પિત્તાત્કફાત્તૃષ્ણા સન્નિપાતાદ્બલક્ષયઃ ।
ષષ્ઠી સ્યાદુપસર્ગાચ્ચ વાતપિત્તે ચ કારણમ્ ॥ ૧,૧૫૪.૮ ॥

સર્વેષુ તત્પ્રકોપો હિ સમ્યગ્ધાતુપ્રશોષણાત્ ।
સર્વદેહભ્રામોત્કમ્પતાપહૃદ્દાહમોહકૃત્ ॥ ૧,૧૫૪.૯ ॥

જિહ્વામૂલગલક્લોમતાલુતોયવહાઃ શિરાઃ ।
સંશોષ્ય તૃષ્ણા જાયન્તે તાસાં સામાન્યલક્ષણમ્ ॥ ૧,૧૫૪.૧૦ ॥

મુખશોષો જલાતૃપ્તિરન્નદ્વેષઃ સ્વરક્ષયઃ ।
કણ્ઠોષ્ઠતાલુકાર્કશ્યાજ્જિહ્વાનિષ્ક્રમણે ક્લમઃ ॥ ૧,૧૫૪.૧૧ ॥

પ્રલાપશ્ચિત્તવિભ્રંશો હ્યુદ્ગરાદ્યસ્તથામયઃ ।

મારુતાત્ક્ષામતાદૈન્યં શઙ્ખભે (તો) દઃ શિરૌભ્રમઃ ॥ ૧,૧૫૪.૧૨॥

ગન્ધાજ્ઞાનાસ્યવૈરસ્યશ્રુતિનિદ્રાબલક્ષયાઃ ।
શીતામ્લફેનવૃદ્ધિશ્ચ પિત્તાન્મૂર્છાસ્યતિક્તતા ॥ ૧,૧૫૪.૧૩॥

રક્તેક્ષણત્વં સતતં શોષો દાહોઽતિધૂમકઃ ।
કફો રસાદ્ધિકુપિતસ્તોયવાહિષુ મારુતઃ ॥ ૧,૧૫૪.૧૪॥

સ્રોતસ્તુ સકફં તેન પઙ્કવચ્છોષ્યતે તતઃ ।
શૂકૈરિવાચિતઃ કણ્ઠો નિદ્રા મધુરવક્રતા ॥ ૧,૧૫૪.૧૫॥

આધ્માનં શિરસો જાડ્યં સ્તૈમિત્યચ્છર્દ્યરોચકમ્ ।
આલસ્યમવિપાકઞ્ચ યઃ સ સ્યાત્સર્વલક્ષણઃ ॥ ૧,૧૫૪.૧૬॥

આમોદ્ભવાચ્ચ રક્તસ્ય સંરોધાદ્વાતપિત્તતા ।
ઉષ્ણાક્રાન્તસ્ય સહસા શીતામ્ભો ભજતસ્તૃષા ॥ ૧,૧૫૪.૧૭॥

ઉષ્ણાદૂર્ધ્વં ગતઃ કોષ્ઠં કુર્યાદ્વૈ પિત્તજૈવસા ।
યા ચ પાનાતિપાનોત્થા તીક્ષ્ણાગ્રે સ્નેહપાકજા ॥ ૧,૧૫૪.૧૮॥

સ્નિગ્ધકટ્વમ્લલવણભોજનેન કફોદ્ભવા ।
તૃષ્ણારસક્ષયોક્તેન લક્ષણેન ક્ષયાત્મિકા ॥ ૧,૧૫૪.૧૯॥

શોષમોહજ્વરાદ્યન્યદીર્ઘરોગોપસર્ગતઃ ।
યા તૃષ્ણા જાયતે તીવ્રા સોપસર્ગાત્મિકા સ્મૃતા ॥ ૧,૧૫૪.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
આમ્લપિત્તનિદાના નામ ચતુઃ પઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૫
ધન્વન્તરિરુવાચ ।
વક્ષ્યે મદાત્યયાદેશ્ચ નિદાનં મુનિભાષિતમ્ ।
તીક્ષ્ણામ્લરૂક્ષસૂક્ષ્મામ્લવ્યવાયાસુકરં લઘુ ॥ ૧,૧૫૫.૧॥

વિકાશિ વિશદં મદ્યં મેદસોઽસ્માદ્વિપર્યયઃ ।
તીક્ષ્ણોદયાશ્ચ દિવ્યુક્તાશ્ચિત્તોપપ્લવિનો ગુણાઃ ॥ ૧,૧૫૫.૨॥

જીવિતાન્તાઃ પ્રજાયન્તે વિષેણોત્કર્ષવર્તિના ।
તીક્ષ્ણાદિભિર્ગુણૈર્મદ્યં માન્દ્યદીનોજસો ગુણાન્ ॥ ૧,૧૫૫.૩॥

દશભિર્ગુણૈઃ સંક્ષોભ્યં ચેતો નયતિ ચાક્રિયમ્ ।
આદ્યે મદે દ્વિતીયેઽપિ પ્રમ (મો) દાયતને સ્થિતઃ ॥ ૧,૧૫૫.૪॥

દુર્વિકલ્પહતો મૂઢઃ સુખમિત્યભિમુચ્યતે ।
મધ્યમોત્તમયોઃ સન્ધિં પ્રાપ્ય રાજાસનો મદઃ ॥ ૧,૧૫૫.૫॥

નિરઙ્કુશ ઇવ વ્યાલો ન કિઞ્ચિન્નાચરેત્તતઃ ।
ઇયં ભૂમિરવાચ્યાનાં દૌઃ શીલસ્યેદમાસ્પદમ્ ॥ ૧,૧૫૫.૬॥

એકોઽયં બહુમાર્ગાયાઃ દુર્ગર્(મ) તેર્દર્શકઃ પરમ્ ।
નિશ્ચેષ્ટઃ સન્નવાક્ષેતે તૃતીયેઽત્ર મદે સ્થિતઃ ॥ ૧,૧૫૫.૭॥

મરણાદપિ પાપાત્મા ગતઃ પાપતરાં દશામ્ ।
ધર્માધર્મં સુખં દુઃખં માનાનર્થં હિતાહિતમ્ ॥ ૧,૧૫૫.૮॥

ન વેદ શીકમોહાર્ત શોષ (ક) મોહાદિસંયુતઃ ।
સોન્માદભ્રમમૂર્છાયાં સાપસ્મારઃ પતત્યધઃ ॥ ૧,૧૫૫.૯॥

નાતિ માદ્યન્તિ બલિનઃ કૃતાહારા મહાશનાઃ ।
વાતાત્પિત્તાત્કફાત્સર્વૈર્ભવેદ્રોગો મદાત્યયઃ ॥ ૧,૧૫૫.૧૦॥

સામાન્યલક્ષણં તેષાં પ્રમોહો હૃદયવ્યથા ।
વિભેદં પ્રસભં તૃષ્ણા સૌમ્યો ગ્લાનિર્જ્વરોઽરુચિઃ ॥ ૧,૧૫૫.૧૧॥

પુરોવિબન્ધસ્તિમિરં કાસઃ શ્વાસઃ પ્રજાગરઃ ।
સ્વેદોઽતિમાત્રં વિષ્ટમ્ભઃ શ્વયથુશ્ચિત્તવિભ્રમઃ ॥ ૧,૧૫૫.૧૨॥

સ્વપ્નેનેવાભિભવતિ ન ચોક્તશ્ચ સ ભાષતેઃ ।
પિત્તાદ્દાહજ્વરઃ સ્વેદો મોહો નિત્યં ચ વિભ્રમઃ ॥ ૧,૧૫૫.૧૩॥

શ્લેષ્મણશ્છર્દિર્હૃલ્લાસો નિદ્રા ચોદરગૌરવમ્ ।
સર્વજે સર્વલિઙ્ગત્વં જ્ઞાત્વા મદ્યં પિબેત્તુ યઃ ॥ ૧,૧૫૫.૧૪॥

સહસા રુચિરં ચાન્યતરધ્વંસકશોષિણૌ ।
ભવેતાં?મારુતાત્કષ્ટાદ્ભવેત્ત સ્ય વિશેષતઃ ॥ ૧,૧૫૫.૧૫॥

ધ્વંસકશ્લેષ્મનિષ્ઠિવાઃ કણ્ઠશોષોઽતિનિદ્રતા ।
શબ્દાસહત્વં તચ્ચિત્તવિક્ષેપોઽઙ્ગે હિ વાતરુક્ ॥ ૧,૧૫૫.૧૬॥

હૃત્કણ્ઠરોગઃ સમોહઃ શ્વાસતૃષ્ણાવમિજ્વરાઃ ।
નિવર્તેદ્યસ્તુ મદ્યેભ્યો જિતાત્મા બુદ્ધિપૂર્વકૃત્ ॥ ૧,૧૫૫.૧૭॥

વિકારૈઃ ક્લિશ્યતે જાતુ ન સ શરીરમાનસઃ ।
રજોમોહહિતાહારપાસ્ય સ્યુસ્ત્રયો ગદાઃ ॥ ૧,૧૫૫.૧૮॥

વસાસૃક્ક્લેદનાવાહિસ્રોતોરોધઃ સુદ્ભવાઃ ।
મદમૂર્છાપસંન્યાસા યથોત્તરબલોદ્ભવાઃ ॥ ૧,૧૫૫.૧૯॥

મદોઽત્ર દોષૈઃ સર્વૈસ્તુ રક્તમદ્યવિષૈરપિ ।
શક્ત્યાનન્ત્યાદ્ભુતાભાસશ્ચલશ્છલિતવેષ્ટિતઃ ॥ ૧,૧૫૫.૨૦॥

રૂક્ષશ્યામારુણતનુર્મદ્યે વાતોદ્ભવે ભવેત્ ।
પિત્તેન ક્રોધનો રક્તપીતાભઃ કલહપ્રિયઃ ॥ ૧,૧૫૫.૨૧॥

સ્વપ્રેઽસમ્બદ્ધવાક્યાદિઃ કફાદ્ધ્યાનપરો હિ સઃ ।
સર્વોત્થસન્નિપાતેન રક્તસ્તમ્ભાઙ્ગદૂષણમ્ ॥ ૧,૧૫૫.૨૨॥

પિત્તલિઙ્ગત્વમાદ્યેન વિકૃતેહા સ્વરાજ્ઞતા ।
વિસત્કમ્પોતિનિદ્રા ચ સર્વેભ્યોઽભ્યધિકં શ્રમઃ ॥ ૧,૧૫૫.૨૩॥

લક્ષયેલ્લક્ષણોત્કર્ષાદ્વાતાદીઞ્છોણિતાદિષુ ।
અરુણં નીલકૃષ્ણં વા સમ્પ્રવિશ્યન્વિશેત્તમઃ ॥ ૧,૧૫૫.૨૪॥

શીઘ્રં ચ પ્રતિબુધ્યેત હૃત્પીડા વેપથુર્ભ્રમઃ ।
કાસઃ શ્યાવારુણા ચ્છાયા મૂર્છાયાં મારુતાત્મકઃ ॥ ૧,૧૫૫.૨૫॥

પિત્તેન રક્તં પીતં વા નભઃ પશ્યન્વિશેત્તમઃ ।
વિબુધ્યેત ચ સસ્વેદો દાહતૃષ્ણોપપીડિતઃ ॥ ૧,૧૫૫.૨૬॥

ભિન્નવત્પીતનીલાભો રક્તનીલાકુલેક્ષણઃ ।
કફેન મેઘસંકાશં પશ્યત્યાકાશમાવિશેત્ ॥ ૧,૧૫૫.૨૭॥

તમશ્ચિરાચ્ચ બુધ્યે હૃદુરઃ સુપ્રસેકવાન્ ।
ગુરુભિસ્તિમિતૈ (રૈ) રઙ્ગે રાજધર્માવબન્ધાન્(વત્) ॥ ૧,૧૫૫.૨૮॥

સર્વાકૃતિસ્ત્રિભિર્દોષૈરપસ્માર ઇવાપરઃ ।
પાતયત્યાશુ નિશ્ચેષ્ટં વિના બીભત્સચેષ્ટિતૈઃ ॥ ૧,૧૫૫.૨૯॥

દોષૈસ્તુ મદમૂર્છાયાં કૃતવેગેષુ દેહિનામ્ ।
સ્વયમેવોપશામ્યન્તિ સંન્યાસેનૌષધૈર્નિવા ॥ ૧,૧૫૫.૩૦॥

વાગ્દેહમનસાં ચેષ્ટામાક્ષિપ્યાતિબલાબલાઃ ।

સસન્યાસં નિપતિતાઃ પ્રાણાઘાતનસંશ્રયાઃ ॥ ૧,૧૫૫.૩૧॥

ભવન્તિ તેન પુરુષાઃ કાષ્ઠભૂતા મૃતોપમાઃ ।
મ્રિયેત શીઘ્રં શીઘ્રં ચેચ્ચિકિત્સા ન પ્રયુજ્યતે ॥ ૧,૧૫૫.૩૨॥

અગાધે ગ્રાહબહુલે સલિલૌઘ ઇવાર્ણવે ।
સંન્યાસે વિનિમજ્જન્તં નરમાશુ નિવર્તયેત્ ॥ ૧,૧૫૫.૩૩॥

મદમાનરોષતોષ પ્રવૃત્તિભિરિતસ્તતઃ ।
યુક્તાયુક્તં ચ સમં યુક્તિં યુઙ્ક્તે ન મદ્યેન ॥ ૧,૧૫૫.૩૪॥

બલકાસદેશપાત્રં પ્રકૃતિસહતામથવા વયાંસિ? ।
પ્રવિભજ્જ્યાત્તનુરૂપં પિબતિ તતઃ પિબત્યમૃત ॥ ૧,૧૫૫.૩૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મદાત્યયાદિનિદાનં નામ પઞ્ચપઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૬

ધન્વન્તરિરુવાચ ।
અથાર્શસાં નિદાનં ચ વ્યાખ્યાસ્યમિ ચ સુશ્રુત ! ।
સર્વદા પ્રાણિનાં માંસે કીલકાઃ પ્રભવન્તિ યે ॥ ૧,૧૫૬.૧॥

અર્શાંસિ તસ્માદુચ્યન્તે ગુદમાર્ગનિરોધનાત્ ।
દોષસ્ત્વઙ્માંસમેદાંસિ સન્દૂષ્ય વિવિધાકૃતીન્ ॥ ૧,૧૫૬.૨॥

માંસાંકુરાનપાનાદૌ કુર્વન્ત્યર્શાંસિ તાઞ્જગુઃ ।
સહજન્માન્તરોત્થેન ભેદો દ્વેધા સમાસતઃ ॥ ૧,૧૫૬.૩॥

શુષ્કાગ્રાવાવિભેદાશ્ચ ગુદસ્થાનાનુસંશ્રયાઃ ।
અર્ધપઞ્ચાઙ્ગુલિસ્તસ્મિંસ્તિસ્રોઽધ્યર્ધાઙ્ગુલિસ્થિતાઃ ॥ ૧,૧૫૬.૪॥

બાલ્યપ્રવાહિણી તાસામન્ત્રમધ્યે વિસર્જિની ।
બાહ્યાસંવરણે તસ્યા ગુદાદૌ બહિરઙ્ગુલે ॥ ૧,૧૫૬.૫॥

સાર્ધાઙ્ગુલપ્રમાણેન રોમાણ્યત્ર તતઃ પરમ્ ।
તત્ર હેતુઃ સહોત્થાનાં બાલ્યે બીજોપતપ્તતા ॥ ૧,૧૫૬.૬॥

અર્શસાં બીજસૃષ્ટિસ્તુ માતાપિત્રપચારતઃ ।
દેવતાનાં પ્રકોપે હિ સાન્નિપાતસ્ય ચાન્યતઃ ॥ ૧,૧૫૬.૭॥

અસાધ્યા એવમાખ્યાતાઃ સર્વે રોગાઃ કુલોદ્ભવાઃ ।
સહજાનિ વિશેષેણ રૂક્ષદુર્દર્શનાનિ તુ ॥ ૧,૧૫૬.૮॥

અન્તર્મુખાનિ પાણ્ડૂનિ દારુણોપદ્રવાણિ ચ ।
યોજ્યાનિ ચ પૃથોગ્દોષસંસર્ગનિચયાત્સ્વતઃ ॥ ૧,૧૫૬.૯॥

શુષ્કાણિ વાતશ્લેષ્મભ્યામાર્દ્રાણિ ત્વસ્ય પિત્તતઃ ।
દોષપ્રકોપહેતુસ્તુ પ્રાગુક્તેવસ્ત્રસાદિનિ ॥ ૧,૧૫૬.૧૦॥

અગ્નૌ મલેઽતિનિચિતે પુનશ્ચાયં (તિ) વ્યવાયતઃ ।
પાનસંક્ષોભવિષમકઠિનક્ષુદ્રકાશનાત્ ॥ ૧,૧૫૬.૧૧॥

બસ્તિનેત્રગલૌષ્ઠોત્થતલભેદાદિઘટ્ટનાત્ ।
ભૃશશીતામ્બુસંસ્પર્શપ્રતતાતિપ્રવાહણાત્ ॥ ૧,૧૫૬.૧૨॥

ગતમૂત્રશકૃદ્વેગધારણાત્તદુદીરણાત્ ।
જુગુપ્સાતીસારમેવ ગ્રહણી સોઽપ્યુપદ્રવઃ ॥ ૧,૧૫૬.૧૩॥

કર્ષણાદ્વિષમાદેશ્ચચેષ્ટાભ્યો યોષિતાં પુનઃ ।
આમગર્ભપ્રપતનાદ્ગર્ભવૃદ્ધિપ્રપીડનાત્ ॥ ૧,૧૫૬.૧૪॥

ઇદૃશૈશ્ચાપરૈર્વાયુરપાનઃ કુપિતો મલે ।
પાયોર્વલીષુ સદ્રવૃત્તિભાસ્વન્નિઃ પૂર્ણમૂર્તિષુ ॥ ૧,૧૫૬.૧૫॥

જાયન્તેઽર્શાંસિતુ તત્પૂર્વં લક્ષણં વહ્નિમન્દતા ।
વિષ્ટમ્ભઃ સાસ્થિસદનં પિણ્ડિ (ષ્ટ) કોદ્વેષ્ટનં ભ્રમઃ ॥ ૧,૧૫૬.૧૬॥

સાન્દ્રોત્થોનેત્રયોઃ શોથઃ શકૃદ્ભવેદોઽથ વા ગ્રહઃ ।
મારુતઃ પુરતો મૂઢઃ પ્રાયો નાભેરધશ્ચરન્ ॥ ૧,૧૫૬.૧૭॥

સરક્તઃ પરિકૃન્તંશ્ચ કૃચ્છ્રાદાકુઞ્ચતિ શ્વસન્ ।
અન્ત્રકૂજનમાટોપઃ ક્ષારિતોદ્ગારભૂરિતા ॥ ૧,૧૫૬.૧૮॥

પ્રભૂતમૂત્રમલ્પા વિડશ્રદ્ધા ધૂમ્રકોષ્ઠકઃ ।
શિરઃ પૃષ્ઠોરસાં શૂલમાલસ્યં ભિન્નવર્ચસમ્ ॥ ૧,૧૫૬.૧૯॥

ઇન્દ્રિયાર્થેષુ લૌલ્યં ચ ક્રોધો દુઃખોપચારતઃ ।
આશઙ્કા ગ્રહણી શોથઃ પાણ્ડુગુલ્મોદરેષુ ચ ॥ ૧,૧૫૬.૨૦॥

એતાન્યેવ વિવર્ધન્તે જાતેષ્વહતનામસુ ।
નિવર્તમાનો માનો હિ તૈરધોમાર્ગરોધતઃ ॥ ૧,૧૫૬.૨૧॥

ક્ષોભયેદનિલાનન્યાન્સર્વેન્દ્રિયશરીગાન્ ।
તથા મૂત્રશકૃત્પિત્તકફાન્વાયુશ્ચ શોષયન્ ॥ ૧,૧૫૬.૨૨॥

મુષ્ણાત્યગ્નિં તતઃ સર્વે ભવન્તિ પ્રાયશોઽર્શસઃ ।
કૃશો ભૃશં હતોત્સાહો દીનઃ ક્ષામોઽથ નિષ્પ્રભઃ ॥ ૧,૧૫૬.૨૩॥

અસારી વિગતચ્છાયો જન્તુદગ્ધ ઇવદ્રુમ ।
કૃચ્છ્રૈરુગ્રદ્રવૈર્ગ્રસ્તો યક્ષ્મોક્તૈર્મર્મપીડનૈઃ ॥ ૧,૧૫૬.૨૪॥

તથા કાશપિપાસાસ્યવૈરસ્યશ્વાસપીનસૈઃ ।
ક્લમાઙ્ગભઙ્ગવમથુક્ષવથુશ્વયથુજ્વરૈઃ ॥ ૧,૧૫૬.૨૫॥

ક્લૈબ્યબાધિર્યસ્તૈમિત્યશર્કરાપરિપીડિતઃ ।
ક્ષામો ભિન્નસ્વરો ધ્યાયન્મુહુઃ ષ્ઠીવન્નરોચકી ॥ ૧,૧૫૬.૨૬॥

સર્વપર્વાસ્થિહૃન્નાભીપાયુવઙ્ક્ષણશૂલવાન્ ।
ગુદેનસ્ત્રવતા પિત્તં બલાકોદરસન્નિભમ્ ॥ ૧,૧૫૬.૨૭॥

વિશુષ્કં ચૈવ મુક્તાગ્રં પક્વામં ચાન્તરાન્તરમ્ ।
પાણ્ડુપિત્તં હરિદ્રાક્તં પિચ્છિલં ચોપવેશ્યતે ॥ ૧,૧૫૬.૨૮॥

ગુદાઙ્કુરા બહ્વનિલાઃ શુષ્કાશ્ચિમચિમાન્વિતાઃ ।
પીનાઙ્ગારારુણાઃ સ્તબ્ધા વિષમાઃ પરુષાકરાઃ ॥ ૧,૧૫૬.૨૯॥

મિથો વિસદૃશ વક્રાસ્તીક્ષ્ણા વિસ્ફુટિ(રિ) તાનનાઃ ।
શિમ્બીખર્જૂરકર્કન્ધૂકાર્પાસફલસન્નિભાઃ ॥ ૧,૧૫૬.૩૦॥

કેચિત્કદમ્બપુષ્પાભાઃ કેચિત્સિદ્ધાર્થકોપમાઃ ।
શિરઃ પાર્શ્વાંસજઙ્ઘોરુવઙ્ક્ષણાદ્યધિકવ્યથાઃ ॥ ૧,૧૫૬.૩૧॥

ક્ષવથૂદ્ગારવિષ્ટમ્ભહૃદ્ગ્રહારોચકપ્રદાઃ ।
કાસશ્વાસાગ્નિવૈષમ્યકર્ણનાદભ્રમાવહાઃ ॥ ૧,૧૫૬.૩૨॥

તૈરાર્તો ગ્રથિતં સ્તોકં સશબ્દં સપ્રવાહિકમ્ ।
રુક્ફેનપિચ્છાનુગતં વિબદ્ધમુપવેશ્યતે ॥ ૧,૧૫૬.૩૩॥

કૃષ્ણત્વગ્બદ્ધવિણ્મૂત્રનેત્રવક્ત્રશ્ચ જાયતે ।
ગુલ્મપ્લીહોદરાષ્ઠીલાસંભવસ્તસ્ય ચૈવ હિ ॥ ૧,૧૫૬.૩૪॥

પિત્તોત્તરા નીલમુખા રક્તપીતાસિતપ્રભાઃ ।

તન્વગ્રસ્રાવિણો વિશ્રાસ્તનવો મૃદવઃ શ્લથાઃ ॥ ૧,૧૫૬.૩૫॥

શુકજિહ્વા યકૃત્ખણ્ડજલૌકાવક્ત્રસન્નિભાઃ ।
દાહશો (ષ) કજ્વરસ્વેદતૃણ્મૂર્છારુચિમોહદાઃ ॥ ૧,૧૫૬.૩૬॥

સોષ્માણો દ્રવનીલોષ્ણપીતરક્તામવર્ચસઃ ।
યવમધ્યા હરિત્પીતહારિદ્રત્વઙ્નખાદયઃ ॥ ૧,૧૫૬.૩૭॥

શ્લેષ્મોલ્બણા મહામૂલા ઘના મન્દરુજઃ સિતાઃ ।
ઉત્સન્નોપચિતસ્નિગ્ધસ્તબ્ધવૃત્તગુરુસ્થિરાઃ ॥ ૧,૧૫૬.૩૮॥

પિચ્છિલાઃ સ્તિમિતાઃ શ્લક્ષ્ણાઃ કણ્ડ્વાઢ્યાઃ સ્પર્શનપ્રિયાઃ ।
કરીરપનસાસ્થ્યાભાસ્તથા ગોસ્તનસન્નિભાઃ ॥ ૧,૧૫૬.૩૯॥

વઙ્ક્ષણાનાહિનઃ પુયુબસ્તિનાભિવિકર્તનાઃ ।
સકાશશ્વાસહૃલ્લાસપ્રસેકારુચિપીનસાઃ ॥ ૧,૧૫૬.૪૦॥

મહકૃચ્છ્રશિરોજાડ્યશિશિરક્ષારકારિણઃ ।
ક્લૈબ્યાગ્નિમાર્દવચ્છર્દ્યતીસારાદિવિકારદાઃ ॥ ૧,૧૫૬.૪૧॥

વસાભસકફપ્રાજ્યપુરીષાસૃક્પ્રવાહિકાઃ ।
ન સ્રવન્તિ ન ભિદ્યન્તે પાણ્ડુસ્નિગ્ધત્વગાદયઃ ॥ ૧,૧૫૬.૪૨॥

સંસૃષ્ટલિઙ્ગત્સંસર્ગનિચયાત્સર્વલક્ષણાઃ ।
રક્તોલ્બણા ગુદે કીલાઃ પીતાકૃતિસમન્વિતાઃ ॥ ૧,૧૫૬.૪૩॥

વટપ્રસેહસદૃશાઃ ગુઞ્જાવિદ્રુમસન્નિભાઃ ।
તેઽત્યર્થં દુષ્ટમુષ્ણં ચ ગાઢવિષ્ટંભપીડિતાઃ ॥ ૧,૧૫૬.૪૪॥

સ્રવન્તિ સહસા રક્તં તસ્ય ચાતિપ્રવૃત્તિતઃ ।
કેકાભઃ પીડ્યતે દુઃખૈઃ શોણિતક્ષયસમ્ભવૈઃ ॥ ૧,૧૫૬.૪૫॥

હીનવર્ણબલોત્સાહો હતૌજાઃ કલુષેન્દ્રિયઃ ।
મુદ્ગકોદ્રવજંબીરકરીરચણકાદિભિઃ ॥ ૧,૧૫૬.૪૬॥

રૂક્ષૈઃ સંગ્રાહિભિર્વાયુર્વિટ્સ્થાને કુપિતો બલી ।
અધોવહાનિ સ્રોતાંસિ સંરુધ્યાધઃ પ્રશોષયન્ ॥ ૧,૧૫૬.૪૭॥

પુરીષં વાતવિષ્ણૂત્રસંગં કુર્વીત દારુણમ્? ।
તેન તીવ્રા રુજા કોષ્ઠપૃષ્ઠહૃત્પાર્શ્વગા ભવેત્ ॥ ૧,૧૫૬.૪૮॥

આધ્માનમુદરે વિષ્ઠા હૃલ્લાસપરિકર્તને ।
બસ્તૌ ચ સુતરાં શૂલો ગણ્ડશ્વયથુસંભવઃ ॥ ૧,૧૫૬.૪૯ ॥

પવનસ્યોર્ધ્વગામિત્વાત્તતશ્છર્દ્યરુચિજ્વરાઃ ।
હૃદ્રોગગ્રહણીદોષમૂત્રસંગપ્રવાહિકાઃ ॥ ૧,૧૫૬.૫૦ ॥

બાધિર્યાતિશિરઃ શ્વાસશિરોરુક્કાશપીનસાઃ? ।
મનોવિકારસ્તૃટ્શ્વાસપિત્તગુલ્મોદરાદયઃ ॥ ૧,૧૫૬.૫૧ ॥

એતે ચ વાતજા રોગા જાયન્તે ભૃશદારુણાઃ ।
દુર્નામામૃત્યૂદાવર્તપરમોઽયમુપદ્રવઃ ॥ ૧,૧૫૬.૫૨ ॥

વાતાભિભૂતકોષ્ઠાનાં તૈર્વિનાપિ વિજાયતે ।
સહજાનિ તુ દોષાણિ યાનિ ચાભ્યન્તરે વલૌ ॥ ૧,૧૫૬.૫૩ ॥

સ્થિતાનિ તાન્યસાધ્યાનિ યાપ્યન્તેઽગ્નિબલાદિભિઃ ।
દ્વન્દ્વજાનિ દ્વિતીયાયાં વલા યાન્યાશ્રિતાનિ ચ ॥ ૧,૧૫૬.૫૪ ॥

કૃચ્છ્રસાધ્યાનિ તાન્યાહુઃ પરિસંવત્સરાણિ ચ ।
બાહ્યાયાં તુ વલૌ જાતાન્યેકદોષોલ્બણાનિ ચ ॥ ૧,૧૫૬.૫૫ ॥

અર્શાંસિ સુખસાધ્યાનિ ન ચિરોત્પત્તિકાનિ ચ ।
મેઢ્રાદિષ્વપિ વક્ષ્યન્તે યથાસ્વં નાભિજાનિ તુ ॥ ૧,૧૫૬.૫૬ ॥

ગણ્ડૂપદસ્ય રૂપાણિ પિચ્છિલાનિ મૃદૂનિ ચ ।
વ્યાનો ગૃહીત્વા શ્લેષ્માણં કરોત્યર્શસ્ત્વચો બહિઃ ॥ ૧,૧૫૬.૫૭ ॥

કીલોપમં સ્થિરખરં ચર્મકીલં ચ તદ્વિદુઃ ।
વાતેન તોદઃ પારુષ્યં પિત્તાદસિતવક્ત્રતા ॥ ૧,૧૫૬.૫૮ ॥

શ્લેષ્મણઃ સ્નિગ્ધતા તસ્ય ગ્રથિતત્વં સવર્ણતા ।
અર્શસાં પ્રશમે યત્નમાશુ કુર્વીત બુદ્ધિમાન્ ।
તાન્યાશુ હિ ગદન્ધા (કાર્) ય્ય કુર્યુર્બદ્ધગુદોદરમ્ ॥ ૧,૧૫૬.૫૯ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
રશોનિદાના નામ ષટ્પઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૭
ધન્વન્તરિરુવાચ ।

અતીસારગ્રહણ્યોશ્ચ નિદાનં વચ્મિ સુશ્રુત ।
દોષૈર્વ્યસ્તૈઃ સમસ્તૈશ્ચ ભયાચ્છોકાચ્ચ ષડ્વિધઃ ॥ ૧,૧૫૭.૧॥

અતીસારઃ સ સુતરાં જાયતેઽત્યમ્બુપાનતઃ ।
વિશુષ્કાન્નવસાસ્નેહતિલપિષ્ટવિરૂઢકૈઃ ॥ ૧,૧૫૭.૨॥

મદ્યરૂક્ષાતિમાત્રાદિરસાતિસ્નેહવિભ્રમાત્ ।
કૃમિદોષવિરોધાચ્ચ તદ્વિધૈઃ કુપિતાનિલઃ ॥ ૧,૧૫૭.૩॥

વિસ્રંસયત્યધોવાતં હત્વા તેનૈવ ચાનલમ્ ।
વ્યાપાર્યાન્નશકૃત્કોષ્ઠપુરીષદ્રવતાદયઃ ॥ ૧,૧૫૭.૪॥

પ્રકલ્પતેઽતીસારસ્ય લક્ષણં તસ્ય ભાવિનઃ ।
ભેદો હૃદ્ગુદકોષ્ઠેષુ ગાત્રસ્વેદો મલગ્રહઃ ॥ ૧,૧૫૭.૫॥

આધ્માનમવિપાકશ્ચ તત્ર વાતેન વિજ્વરમ્ ।
અલ્પાલ્પં શબ્દશૂન્યાઢ્યં વિરુ (બ)દ્ધમુપવેશ્યતે ॥ ૧,૧૫૭.૬॥

રૂક્ષં સફેનમચ્છં ચ ગૃહીતં વ મુહુર્મુહુઃ ।
તથાદગ્ધગદાભાસં પિચ્છિલં પરિકર્તયન્ ॥ ૧,૧૫૭.૭॥

સશુષ્કભ્રષ્ટપાયુશ્ચ હૃષ્ટરોમા વિનિશ્વસન્ ।
પિત્તેન પીતમશિતં હારિદ્રં શાદ્વલપ્રભમ્ ॥ ૧,૧૫૭.૮॥

સરક્તમતિદુર્ગન્ધં તૃણ્મૂર્છાસ્વેદદાહવાન્ ।
સશૂલપાયુસન્તાપપાકવાઞ્છ્લેષ્મણા ઘનમ્ ॥ ૧,૧૫૭.૯॥

પિચ્છિલં તત્રાનુસારમલ્પાલ્પં સપ્રવાહિકમ્ ।
સરોમહર્પઃ સેક્લેશો ગુરુબસ્તિગુદોદરઃ ॥ ૧,૧૫૭.૧૦॥

કૃતેઽપ્યકૃતસઙ્ગશ્ચ સર્વાત્મા સર્વલક્ષણઃ ।
ભયેન ક્ષુભિતે ચિત્તે શાયિતે દ્રાવયેત્સ (ચ્છ) કૃત્ ॥ ૧,૧૫૭.૧૧॥

વાયુસ્તતો નિવાર્યેત ક્ષિપ્રમુષ્ણં દ્રવં પ્લવમ્ ।
વાતપિત્તે સમં લિઙ્ગમાહુસ્તદ્વચ્ચ શોકતઃ ॥ ૧,૧૫૭.૧૨॥

અતીસારઃ સમાસેન દ્વેધા સામો નિરામકઃ ।
સાસૃગ્જાતં રસદ્રોગો ગૌરવાદપ્સુ મુઞ્ચતિ? ।
શકૃદ્દુર્ગન્ધમાટોપવિષ્ટમ્ભાર્તિપ્રસેકિનઃ ॥ ૧,૧૫૭.૧૩॥

વિપરીતો નિરામસ્તુ કફાત્કોઽપિ ન મજ્જતિ ।

અતીસારેષુ યો નાતિ યત્નવાન્ગ્રહણીગદઃ ॥ ૧,૧૫૭.૧૪॥

તસ્ય સ્યાદગ્નિનિર્વાણકાર્યૈરત્યર્થસઞ્ચિતૈઃ ।
સામં શકૃન્નિરામં વા જીર્ણં યેનાતિસાર્યતે ॥ ૧,૧૫૭.૧૫॥

સોઽતિસારોઽતિસરણા દાશુકારીઃ સ્વભાવતઃ ।
સામંશીર્ણમજીર્ણેન જીર્ણે પક્વં તુ નૈવ ચ ॥ ૧,૧૫૭.૧૬॥

ચિરકૃદ્ગ્રહણીદોષઃ સઞ્ચયાંશ્ચોપવેશયેત્ ।
અકસ્માદ્વારસુર્વેધમકસ્માત્સન્ધિનીમુહુઃ? ।
સ ચતુર્ધા પૃથગ્દોષૈઃ સન્નિપાતાચ્ચ જાયતે ॥ ૧,૧૫૭.૧૭॥

પ્રાગ્રૂપાઙ્ગસ્ય સદનં ચિરાત્પવન અલ્પકઃ ।
પ્રસેકો વક્ત્રવૈરસ્યમરુચિસ્તૃટ્શ્રમોભ્રમઃ ॥ ૧,૧૫૭.૧૮॥

આબ (ન) દ્ધોદરતા છર્દિઃ કર્ણકિઽપ્યનુકૂજકમ્ ।
સામાન્યલક્ષણં કાર્શ્યં વમક સ્તમકો જ્વરઃ ॥ ૧,૧૫૭.૧૯॥

મૂર્છા શિરોરુવિષ્ટમ્ભઃ શ્વયથુઃ કરપાદયોઃ ।
તન્દ્રાનિલાત્તાલુશોષસ્તિમિરં કર્ણયોઃ સ્વનઃ ॥ ૧,૧૫૭.૨૦॥

પાર્શ્વોરુવઙ્ક્ષણગ્રીવારુજા તીક્ષ્ણવિષૂચિકા ।
રુગણેષુ વૃદ્ધિઃ સર્વષુ ક્ષુત્તૃષ્ણાપરિહર્ત્રિકા ॥ ૧,૧૫૭.૨૧॥

જીર્ણેજીર્યતિ ચાધ્માનં ભુક્તે સ્વાસ્થ્યં સમશ્નુતે ।
વાતાદ્ધૃદ્રોગગુલ્માર્શઃપ્લીહપાણ્ડુરશઙ્કિતાઃ ॥ ૧,૧૫૭.૨૨॥

ચિરાદ્દુઃખં દ્રવં શુષ્કં તુન્દારં શબ્દફેનવત્ ।
પુનઃ પુનઃ સૃજેદ્વર્ચં પાયુરુચ્છ્વાસકાસવાન્ ॥ ૧,૧૫૭.૨૩॥

પીતેન પીતનીલાભં પીતાભં સૃજતિ દ્રવમ્ ।
પૂત્યમ્લોદ્ગારહૃત્કણ્ઠદાહારુચિતૃડર્દિતઃ ॥ ૧,૧૫૭.૨૪॥

શ્લેષ્મણા પચ્યતે દુઃખે મનશ્છર્દિરરોચકઃ ।
આસ્યોપદાહનિષ્ઠીવકાસહૃલ્લાસપીનસાઃ ॥ ૧,૧૫૭.૨૫॥

હૃદયં મન્યતે સ્ત્યાનમુદરં સ્તિમિતં ગુરુ ।
ઉદ્ગારો દુષ્ટમધુરઃ સદનં સપ્રહર્ષણમ્ ॥ ૧,૧૫૭.૨૬॥

સમ્ભિન્નશ્લેષ્મસંશ્લિષ્ટગુરુચામ્લૈઃ (વર્ચઃ) પ્રવર્તચમ્ ।
અકૃશસ્યાપિ દૌર્બલ્યં સર્વજે સર્વદર્શનમ્ ॥ ૧,૧૫૭.૨૭॥

વિભાગેઽઙ્ગસ્ય યે પ્રોક્તા પિપાસાદ્યાસ્ત્રયો મલાઃ ।
તેઽપ્યસ્ય ગ્રહણીદોષાઃ સમન્તેષ્વસ્તિ કારણમ્ ॥ ૧,૧૫૭.૨૮॥

વાતવ્યાધ્યશ્મરીકુષ્ઠમેહોદરભગન્દરમ્ ।
અર્શાંસિ ગ્રહણીત્યષ્ટૌ મહારોગાઃ સુદુસ્તરાઃ ॥ ૧,૧૫૭.૨૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
તિસારનિદાન નામ સપ્તપ્ચાશદુત્તરશતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫૮
ધન્વન્તરિરુવાચ ।
અથાતો મૂત્રઘાતસ્ય નિદાનં શ ృણુ સુશ્રુત ।
બસ્તિબસ્તિશિરોમેઢ્રકટીવૃષણપાયુ ચ ॥ ૧,૧૫૮.૧॥

એકસંવહનાઃ પ્રોક્તા ગુદાસ્થિવિવરાશ્રયાઃ ।
અધોમુખોઽપિ બસ્તિર્હિ મૂત્રવાહિશિરામુખૈઃ ॥ ૧,૧૫૮.૨॥

પાર્શ્વેભ્યઃ પૂર્યતે શ્લક્ષ્ણૈ (સૂક્ષ્મૈઃ) સ્યન્દમાનૈરનારતમ્ ।
તૈસ્તૈરેવ પ્રવિશ્યૈવન્દોષાન્કુવન્તિ વિંશતિમ્ ॥ ૧,૧૫૮.૩॥

મૂત્રાઘાતઃ પ્રમેહશ્ચ કૃચ્છ્રાન્મર્મ સમાશ્રયેત્ ।
બસ્તિવઙ્ક્ષણમેઢ્રાર્તિયુક્તોલ્પાલ્પં મુહુર્મુહુઃ ॥ ૧,૧૫૮.૪॥

મૂત્રાણ્યાવાતજે કૃચ્છ્રપીત્તે પીતં સદાહરુક્ ।
રક્તં વા કફજો બસ્તિમેઢ્રગૌરવશોથવાન્ ॥ ૧,૧૫૮.૫॥

સપિચ્છં સનિરુદ્ધં ચ સર્વૈઃ સર્વાત્મકં મલૈઃ ।
યદા વાયુર્મુખં બસ્તેર્વ્યાવર્ત્ય પારિશોષયન્ ॥ ૧,૧૫૮.૬॥

મૂત્રં સપિત્તં સકફં સશુક્રં વા તદા ક્રમાત્ ।
સંજાયતેઽશ્મરી ઘોરા પિત્તં ગોરિવ રોચના ॥ ૧,૧૫૮.૭॥

શ્લેષ્માશ્રયા ચ સર્વા સ્યાદથાસ્યાઃ પૂર્વલક્ષણમ્ ।
બસ્ત્યાધ્માનં તદાસન્નદેશોહિ પરિતોઽતિરુક્ ॥ ૧,૧૫૮.૮॥

બસ્તૌ ચ મૂત્રસઙ્ગિત્વં મૂત્રકૃચ્છ્રં જ્વરોઽરુચિઃ ।
સામાન્યલિઙ્ગં રુઙ્નાભિસીવનીબસ્તિમૂર્ધસુ ॥ ૧,૧૫૮.૯॥

વિસ્તીર્ણવા સં મૂત્રં સ્યાત્તથા માર્ગનિરોધને ।
બદ્ધં બદ્ધ્વા સુખં મેહેદચ્છં ગોમેદકોપમમ્ ॥ ૧,૧૫૮.૧૦॥

તત્સંક્ષોભાદ્ભવેત્સાસૃઙ્માંસમધ્વનિ રુગ્ભવેત્ ।
તત્ર બાતાભિસૃત્યાર્તોદન્તાન્ખાદતિ વેપતે ॥ ૧,૧૫૮.૧૧॥

ગૃહ્ણાતિ મેહનં નાભિં પીડયત્યતિલક્ષણમ્ ।
સાનિલં મુઞ્ચતિ શકૃન્મુહુર્મેહતિ બિન્દુશઃ ॥ ૧,૧૫૮.૧૨॥

શ્યામરૂક્ષાશ્મરી ચાસ્ય સ્યાચ્ચિતા કણ્ટકૈરિવ ।
પિત્તેન દહ્યતે બસ્તિઃ પચ્યમાન ઇવોષ્ણવાન્ ॥ ૧,૧૫૮.૧૩॥

ભલ્લાતકાસ્થિસંસ્થાના રક્તા પીતા સિતાશ્મરા ।
બસ્તિર્નિસ્તુદ્યત ઇવ શ્લેષ્મણા શીતલો ગુરુઃ ॥ ૧,૧૫૮.૧૪॥

અશ્મરી મહતી શ્લક્ષ્ણા મધુવર્ણાથ વા સિતા ।
એતા ભવન્તિ બાલનાં તેષામેવ ચ ભૂયસામ્ ॥ ૧,૧૫૮.૧૫॥

આશયોપચયાલ્પત્વાદ્ગ્રહણાહરણે સુખી ।
સુક્રાશ્મરી તુ મહતી જાયતે શુક્રધારણાત્ ॥ ૧,૧૫૮.૧૬॥

સ્થાનચ્યુતમભુક્તં વા અણ્ડયોરન્તરેઽનિલઃ ।
શોષયત્યુપસંગૃહ્ય શુક્રં તચ્છુક્રમશ્મરી ॥ ૧,૧૫૮.૧૭॥

બસ્તિરુક્કૃચ્છ્રમૂત્રત્વં શુક્લા શ્વયથુકારિણી ।
તસ્યામુત્પન્નમાત્રાયાં શુષ્કમેત્ય વિલીયતે ॥ ૧,૧૫૮.૧૮॥

પીડિતે જ્વરકાસેઽસ્મિન્નશ્મર્યેવ ચ શર્કરા ।
અસૌ વા વાયુના ભિન્ના સા ત્વસ્મિન્નમુલોમગે ॥ ૧,૧૫૮.૧૯॥

નિરેતિ સહ મૂત્રેણ પ્રતિલોમે વિપચ્યતે ।
મૂત્રસંધારણં કુર્યાત્ક્રુદ્ધો બસ્તેર્મુખે મરુત્ ॥ ૧,૧૫૮.૨૦॥

મૂત્રસઙ્ગં રુજં કણ્ડૂં કદાચિચ્ચ સુવામતઃ ।
પ્રચ્છાદ્ય બસ્તિમુદ્ધૃત્ય ગર્માન્તં સ્થૂલવિપ્લુતામ્ ॥ ૧,૧૫૮.૨૧॥

કરોતિ તત્ર રુગ્દાહં સ્પન્દનોદ્વેષ્ટનાનિ ચ ।
બિન્દુશશ્ચ પ્રવર્તેત મૂત્રં બસ્તૌ તુ પીડિતે ॥ ૧,૧૫૮.૨૨॥

ધારાવરોધશ્ચાપ્યેષ વાતબસ્તિરિતિ સ્મૃતઃ ।
દુસ્તરો દુસ્તરતરો દ્વિતીયઃ પ્રબલોઽનિલઃ ॥ ૧,૧૫૮.૨૩॥

શકૃપ્માર્ગસ્ય બસ્તેશ્ચ વાયુરન્તરમાશ્રિતઃ ।
અષ્ઠીલાભં ઘનં ગ્રન્થિં કરોત્યચ (બ) લમુન્નતમ્ ॥ ૧,૧૫૮.૨૪॥

વાતાષ્ઠીલેતિ સાત્માનં વિષ્ણૂત્રાનિલ (તિ) સર્ગકૃત્ ।
વિગુણઃ કુણ્ડલીભૂતો બસ્તૌ તીવ્રવ્યથોનિલઃ ॥ ૧,૧૫૮.૨૫॥

આબધ્ય મૂત્રં ભ્રમતિ સંસ્તમ્ભોદ્વેષ્ટગૌરવમ્ ।
મૂત્રમલ્પાલ્પમથવા વિમુઞ્ચતિ સકૃત્સકૃત્ ॥ ૧,૧૫૮.૨૬॥

વાતકુણ્ડલિકેત્યેવ મૂત્રં તુ વિધૃતેઽચિરમ્ ।
ન નિરેતિ નિરુદ્ધં વા મૂત્રાતીતં તદલ્પરુક્ ॥ ૧,૧૫૮.૨૭॥

વિધારણાત્પ્રતિહતં વાતાદાવર્તિતં યદા ।
નાભેરધસ્તાદુદરં મૂત્રમાપૂરયેત્તદા ॥ ૧,૧૫૮.૨૮॥

કુર્યાત્તીવ્રરુગાધ્માનમશક્તિં મલસંગ્રહમ્ ।
તન્મૂત્રં જાઠરચ્છિદ્રવૈગુણ્યેનાનિલેન વા ॥ ૧,૧૫૮.૨૯॥

આક્ષિપ્તમલ્પમૂત્રસ્ય વસ્તૌ નાભૌ ચ વા મલે ।
સ્થિત્વા પ્લવેચ્છનૈઃ પશ્ચાત્સરુજં વાથવારુજમ્ ॥ ૧,૧૫૮.૩૦॥

મૂત્રોત્સર્ગં સવિચ્છિન્નં તચ્છ્રેયો ગુરુશેફસોઃ ।
અન્તર્વસ્તિ મુખે તૃષ્ણા સ્થિરાલ્પં સહસા ભવેત્ ॥ ૧,૧૫૮.૩૧॥

અશ્મરીતુલ્યરુગ્ગ્રન્થિર્મૂત્રગ્રન્થિઃ સ ઉચ્યતે ।
મૂત્રિતસ્ય સ્ત્રિયં યાતો વાયુના શુક્રમુદ્ધૃતમ્ ॥ ૧,૧૫૮.૩૨॥

સ્થાનાચ્ચ્યુતં મૂત્રયતઃ પ્રાક્પશ્ચાદ્વા પ્રવર્તતે ।
ભસ્મોદકપ્રતીકાશં મૂત્રશુક્રં તદુચ્યતે ॥ ૧,૧૫૮.૩૩॥

રૂક્ષદુર્બલયોર્વાતેનોદાવર્તં શકૃદ્યદા ।
મૂત્રસ્રોતોઽનુપર્યેતિ સંસૃષ્ટં શકૃતા તદા ॥ ૧,૧૫૮.૩૪॥

મૂત્રબિન્દું તુલ્યગન્ધં સ્યાદ્વિઘાતં તમાદિશેત્ ।
પિત્તવ્યાયામતીક્ષ્ણામ્લભોજનાધ્માનકાદિભિઃ ॥ ૧,૧૫૮.૩૫॥

પ્રવૃદ્ધવાયુના મૂત્રે વસ્તિસ્થે ચૈવ દાહકૃત્ ।
મૂત્રં વર્તયતે પૂર્વં સરક્તં રક્તમેવ વા ॥ ૧,૧૫૮.૩૬॥

ઉષ્ણં પુનઃ પુનઃ કૃચ્છ્રાદુષ્ણવાતં વદન્તિ તમ્ ।

રૂક્ષસ્ય ક્લાન્તદેહસ્ય બસ્તિસ્થૌ પિત્તમારુતૌ ॥ ૧,૧૫૮.૩૭॥

મૂત્રક્ષયં સરુગ્દાહં જનયેતાં તદાહ્વયમ્ ।
પિત્તં કફો દ્વાદપિ વા સંહન્યેતેનિલેનચેત્ ॥ ૧,૧૫૮.૩૮॥

કૃચ્છ્રાન્મૂત્રં તદા પીતં રક્તં શ્વેતં ઘનં સૃજેત્ ।
સદાહં રોચનાશઙ્ખચૂર્ણવર્ણં ભવેચ્ચ તત્ ॥ ૧,૧૫૮.૩૯॥

શુષ્કં સમસ્તવર્ણં વા મૂત્રસાદં વદન્તિતમ્ ।
ઇતિ વિસ્તારતઃ પ્રોક્તા રોગા મૂત્રપ્રવર્તિતાઃ ॥ ૧,૧૫૮.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મૂત્રાઘાતમૂત્રાકૃચ્છનિદાન નામાષ્ટપઞ્ચાશદુત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૫૯
ધન્વન્વરિરુવાચ ।
પ્રમેહાણાં નિદાનન્તે વક્ષ્યેઽહં શ‌ૃણુ સુશ્રુત ! ।
પ્રમેહા વિંશતિસ્તત્ર શ્લેષ્મણો દશ પિત્તતઃ ॥ ૧,૧૫૯.૧॥

ષટ્ચત્વારોઽનિલાત્તેચ મેદોમત્રકફાવહાઃ ।
હારિદ્રમેહી કટુકં હરિદ્રાસન્નિભં શકૃત્ ॥ ૧,૧૫૯.૨॥

વિસ્રં માઞ્જિષ્ઠમેહેચ મઞ્જિષ્ઠા સલિલોપમમ્ ।
વિસ્રમુષ્ણં સલવણં રક્તાભ રક્તમેહતઃ ॥ ૧,૧૫૯.૩॥

વસામેહી વસામિશ્રં વસાભં મૂત્રયેન્મુહુઃ ।
મજ્જાભં મજ્જમિશ્રં વા મજ્જમેહી મુહુર્મુહુઃ ॥ ૧,૧૫૯.૪॥

હસ્તી મત્ત ઇવાજસ્રં મૂત્રં વેગવિવર્જિતમ્ ।
સલસીકં વિવદ્ધં ચ હસ્તિમેહી પ્રમેહતિ ॥ ૧,૧૫૯.૫॥

મધુમેહી મધુસમં જાયતે સ કિલ દ્વિધા ।
ક્રુદ્ધે ધાતુક્ષયાદ્વાયૌ દોષાવૃતપથે યદા ॥ ૧,૧૫૯.૬॥

આવૃતો દોષલિઙ્ગાનિ સોઽનિમિત્તં પ્રદર્શયેત્ ।
ક્ષણાત્ક્ષીણઃ ક્ષણાત્પૂર્ણો ભજતે કૃચ્છ્રસાધ્યતામ્ ॥ ૧,૧૫૯.૭॥

કાલેનોપેક્ષિતઃ સર્વોહ્યાયાતિ મધુમેહતામ્ ।
મધુરં યચ્ચ મેહેષુ પ્રાયો મધ્વિવ મેહતિ ॥ ૧,૧૫૯.૮॥

સર્વે તે મધુમેહાખ્યા માધુર્યાચ્ચ તનોર્યતઃ ।
અવિપાકોઽરુચિશ્છર્દિર્નિદ્રા કાસઃ સપીનસઃ ॥ ૧,૧૫૯.૯॥

ઉપદ્રવાઃ પ્રજાયન્તે મેહાનાં કફજન્મનામ્ ।
બસ્તિમેહનયોસ્તોદોમુષ્કાવદરણં જ્વરઃ ॥ ૧,૧૫૯.૧૦॥

દાહસ્તૃષ્ણામ્લિકા મૂર્છા વિડ્ભેદઃ પિત્તજન્મનામ્ ।
વાતજાનામુદાવર્તઃ કમ્પહૃદ્ગ્રહલોલતાઃ ॥ ૧,૧૫૯.૧૧॥

શૂલમુન્નિદ્રાતા શોષઃ શ્વાસઃ કાસગ્ચ જાયતે ।
શરાવિકા કચ્છપિકા જ્વાલિની વિનતાલજી ॥ ૧,૧૫૯.૧૨॥

મસૂરિકા સર્ષપિકા પુત્રિણી સવિદારિકા ।
વિદ્રધિશ્ચેતિ પિડિકાઃ પ્રમેહોપેક્ષયા દશ ॥ ૧,૧૫૯.૧૩॥

અન્નસ્ય કફસંશ્લેષાત્પ્રાયસ્તત્ર પ્રવર્તનમ્ ।
સ્વાદ્વમ્લલવણસ્નિગ્ધગુરુપિચ્છિલશીતમ્ ॥ ૧,૧૫૯.૧૪॥

નવં ધાન્યં સુરાસૂપમાંસેક્ષુગુડગોરસમ્ ।
એકસ્થાનાસનવતિ શયનં વિનિવર્તનમ્ ॥ ૧,૧૫૯.૧૫॥

બસ્તિમાશ્રિત્ય કુરુતે પ્રમેહાદૂષિતઃ કફઃ ।
દૂષયિત્વા વપુઃ ક્લેદં સ્વેદમેદોવસામિષમ્ ॥ ૧,૧૫૯.૧૬॥

પિત્તં રક્તમતિક્ષીણે કફાદૌ મૂત્રસંશ્રયમ્ ।
ધાતું બસ્તિમુપાનીય તત્ક્ષયેચ્ચૈવ મારુતઃ ॥ ૧,૧૫૯.૧૭॥

સાધ્યાસાધ્યપ્રતીત્યાદ્યાઃ મેહાસ્તેનૈવ તદ્ભવાઃ ।
સમે સમકૃતા દોષે પરમત્વાત્તથાપિ ચ ॥ ૧,૧૫૯.૧૮॥

સામાન્ય લક્ષણન્તેષાં પ્રભૂતાવિલમૂત્રતા ।
દોષદૂષ્યા વિશેષેઽપિ તત્સંયોગવિશેષતઃ ॥ ૧,૧૫૯.૧૯॥

મૂત્રવર્ણાદિભેદેન ભેદો મેહેષુ કલ્પ્યતે ।
અચ્છં બહુસિતં શીતં નિર્ગન્ધમુદકોપમમ્ ॥ ૧,૧૫૯.૨૦॥

મેહત્યુદકમેહેન કિઞ્ચિદાવિલપિચ્છિલમ્ ।
ઇક્ષો રસમિવાત્યર્થં મધુરં ચેક્ષુમેહતઃ ॥ ૧,૧૫૯.૨૧॥

સાન્દ્રી ભવેત્પર્યુષિતં સાન્દ્રમેહેન મેહતિ ।
સુરામેહી સુરાતુલ્યમુપર્યચ્છમધોઘનમ્ ॥ ૧,૧૫૯.૨૨॥

સહૃષ્ટરોમા પિષ્ટેન પિષ્ટબદ્ધહુલં સિતમ્ ।
શુક્રાભં શુક્રમિશ્રં વા શુક્રમેહી પ્રમેહતિ ॥ ૧,૧૫૯.૨૩॥

મૂત્રયેત્સિકતામેહી સિકતારૂપિણો મલાન્ ।
શીતમેહી સુબહુશો મધુરં ભૃશશીતલમ્ ॥ ૧,૧૫૯.૨૪॥

શનૈઃ શનૈઃ શનૈર્મેહી મન્દં મન્દંપ્રમેહતિ ।
લાલાતન્તુયુતં મૂત્રં લાલામેહેન પિચ્છિલમ્ ॥ ૧,૧૫૯.૨૫॥

ગન્ધવર્ણરસસ્પર્શૈઃ ક્ષારેણ ક્ષારતોયવત્ ।
નીલમેહન નીલાભં કાલમેહી મસીનિભમ્ ॥ ૧,૧૫૯.૨૬॥

સન્ધિમર્મસુ જાયન્તે માંસલેષુ ચ ધામસુ ।
અન્તોન્નતા મધ્યનિમ્ના અક્લેદસુરુજાન્વિતા ॥ ૧,૧૫૯.૨૭॥

શરાવમાનસંસ્થાના પિડિકા સ્યાચ્છરાવિકા ।
સદાહા કૂર્મસંસ્થાના જ્ઞેયા કચ્છપિકા બુધૈઃ ॥ ૧,૧૫૯.૨૮॥

મહતી પિડિકા નીલા વિનતા નામ સા સ્મૃતા ।
દહતિ ત્વચમુત્થાને જ્વાલિની કષ્ટદાયિની ॥ ૧,૧૫૯.૨૯॥

રક્તા સિતા સ્ફોટચિતા દારુણા ત્વલજી ભવેત્ ।
મસૂરાકૃતિ સંસ્થાના વિજ્ઞેયા તુ મસૂરિકા ॥ ૧,૧૫૯.૩૦॥

સર્ષપોપમસંસ્થાના જિહ્વાપાકમહારુજા ।
પુત્રિણી મહતી ચાલ્પા સુસૂક્ષ્મા પિડિકા સ્મૃતા ॥ ૧,૧૫૯.૩૧॥

વિદારીકન્દવદ્વૃત્તા કઠિના ચ વિદારિકા ।
વિદ્રધેર્લક્ષણૈર્યુક્તા જ્ઞેયા વિદ્રધિકા તુ સા ॥ ૧,૧૫૯.૩૨॥

પુત્રિણી ચ વિદારી ચ દુઃસહા બહુમેદસઃ ।
સદ્યઃ પિત્તોલ્બણાસ્ત્વન્યાઃ સમ્ભવન્ત્યલ્પમેદસઃ ॥ ૧,૧૫૯.૩૩॥

પિડિકાસ્તા ભવેયુઃ સ્યાદ્દોષોદ્રેકો યથાયથમ્ ।
પ્રમેહેણ વિનાપ્યેતા જાયન્તે દુષ્ટમેદસઃ ॥ ૧,૧૫૯.૩૪॥

તાવચ્ચ નોપલક્ષ્યન્તે યાવદ્વર્ણઞ્ચ વર્જિતમ્ ।
હારિદ્રં રક્તવર્ણં વા મેહપ્રાગ્રૂપવર્જિતમ્ ॥ ૧,૧૫૯.૩૫॥

યો મૂત્રયેત તન્મહેં રક્તપિત્તન્તુ તદ્વિદુઃ ।

સ્વેદોઽઙ્ગગાન્ધઃ શિથિલત્વમઙ્ગે શ્ય્યાશનસ્વપ્નસુખાભિષઙ્ગઃ ।
હૃન્નેત્રજિહ્વાશ્રવણોપદાહા ઘનોગ્રતા કેશનખાભિવૃદ્ધિઃ ॥ ૧,૧૫૯.૩૬॥

શીતપ્રિયત્વં ગલતાલુશોષો માધુર્ય માસ્યે કરપાદદાહઃ ।
ભવિષ્યતો મેહગણસ્ય રૂપં મૂત્રેઽપિ ધાવન્તિ પિપીલિકાશ્ચ ॥ ૧,૧૫૯.૩૭॥

તૃષ્ણા પ્રમેહે મધુરં પ્રપિચ્છં મધ્વામયે સ્યાદ્વિવિધોવિકારઃ ।
સમ્પૂરણાદ્વા કફસમ્ભવઃ સ્યાત્ક્ષીણેષુ દોષેષ્વનિલાત્મકો વા ॥ ૧,૧૫૯.૩૮॥

સમ્પૂર્ણરૂપાઃ કફપિત્તમેહાઃ ક્રમેણ યે વૈ રતિસમ્ભવાશ્ચ ।
સક્રામતે પિત્તકૃતાસ્તુ યાપ્યાઃ સાધ્યોઽસ્તિ મેહો યદિ નાસ્તિ દિષ્ટમ્ ॥ ૧,૧૫૯.૩૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પ્રમેહનિદાન નામૈકોનષષ્ટ્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૦

ધન્વન્તરિરુવાચ ।
નિદાનં વિદ્રધેર્વક્ષ્યે ગુલ્મસ્ય શૃણુ શુશ્રુત ! ।
ભુક્તૈઃ પર્યુષિતાત્યુષ્ણશુષ્કરૂક્ષવિદાહિભિઃ ॥ ૧,૧૬૦.૧॥

જિહ્મશય્યાવિચેષ્ટાભિસ્તૈસ્તૈશ્ચાસૃક્પ્રદૂષણૈઃ ।
દુષ્ટસત્વઙ્માંસમેદોઽસ્થિમદામૃષ્ટોદરાશ્રયઃ ॥ ૧,૧૬૦.૨॥

યઃ શોથો બહિરન્તશ્ચ મહાશૂલો મહારુજઃ ।
વૃત્તઃ સ્યાદાયતો યો વા સ્મૃતો રોગઃ સ વિદ્રધિઃ ॥ ૧,૧૬૦.૩॥

દોષૈઃ પૃથક્સમુદિતૈઃ શોણિતેન સ્રૃતેન ચ ।
વહતે તત્ર તત્રાઙ્ગે દારુણે ગ્રથિતોઽસ્રૃતઃ ॥ ૧,૧૬૦.૪॥

અન્તરા દારુણશ્ચૈવ ગમ્ભીરો ગુલ્મવર્ધનઃ ।
વલ્મીકવત્સમુત્સ્રાવી હ્યગ્નિમાન્ધગ્ચ જાયતે ॥ ૧,૧૬૦.૫॥

નાભિબસ્તિયકૃત્પ્લીહક્લોમહૃત્કુક્ષિવઙ્ક્ષણિ ।
હૃદયે વેપમાને તુ તત્રતત્રાતિતીવ્રરુક્ ॥ ૧,૧૬૦.૬॥

શ્યામારુણશિરોત્થાનપાકો વિષમસંસ્થિતિઃ ।
સંજ્ઞાચ્છેદભ્રમાનાહસ્યન્દસર્પણશબ્દવાન્ ॥ ૧,૧૬૦.૭॥

રક્તતામ્રાસિતઃ પિત્તાત્તૃણ્મોહજ્વરદાહવાન્ ।

ક્ષિપ્રોત્થાનપ્રપાકશ્ચ પાણ્ડુઃ કણ્ડૂયુતઃ કફાત્ ॥ ૧,૧૬૦.૮॥

સંક્લેશશીતકસ્તમ્ભજૃમ્ભારોચકગૌરવાઃ ।
ચિરોત્થાનોઽવિપાકશ્ચ સંકીર્ણઃ સન્નિપાતજઃ ॥ ૧,૧૬૦.૯॥

સામર્થ્યાચ્ચાત્ર વિડ્ભેદો બાહ્યાભ્યન્તરલક્ષણમ્ ।
કૃષ્ણસ્ફોટાવૃતશ્યામસ્તીવ્રદાહરુજાજ્વરઃ ॥ ૧,૧૬૦.૧૦॥

પિત્તલિઙ્ગોઽસૃજા બાહ્યે સ્ત્રીણામેવ તથાન્તરમ્ ।
શસ્ત્રાદ્યૈરભિઘાતોત્થરક્તૈશ્ચ રોગકારણમ્ ॥ ૧,૧૬૦.૧૧॥

ક્ષતોત્થો વાયુના ક્ષિપ્તઃ સ રક્તઃ પિત્તમીરયન્ ।
પિત્તાસૃગ્લક્ષણં કુર્યાદ્વિદ્રધિં ભૂર્યુપદ્રવમ્ ॥ ૧,૧૬૦.૧૨॥

તેનોપદ્રવભેદશ્ચ સ્મૃતોઽધિષ્ઠાનભેદતઃ ।
નાભૌ હિ ધ્માતં ચેદ્બસ્તૌ મૂત્રકૃચ્છ્રઞ્ચજાયતે ॥ ૧,૧૬૦.૧૩॥

શ્વાસપ્રશ્વાસરોધશ્ચ પ્લીહાયામતિતૃટ્પરમ્ ।
ગલરોધશ્ચ ક્લોમ્નિ સ્યાત્સર્વાઙ્ગપ્રરુજા હૃદિ ॥ ૧,૧૬૦.૧૪॥

પ્રમોહસ્તમકઃ કાસૌ હૃદયોદ્ઘટ્ટનન્તથા ।
કુક્ષિપાર્શ્વાન્તરે ચૈવ કુક્ષૌ દોષોપજન્મ ચ ॥ ૧,૧૬૦.૧૫॥

તથા ચેદૂરુસન્ધૌ ચ વઙ્ક્ષણે કટિપૃષ્ઠયોઃ ।
પાર્શ્વયોશ્ચ વ્યથા પાયૌ પવનસ્ય નિરોધનમ્ ॥ ૧,૧૬૦.૧૬॥

આમપક્વવિદગ્ધત્વં તેષાં શોથવદાદિશેત્ ।
નાભેરૂર્ધ્વમુખાત્પક્વાત્પ્રદ્રવન્ત્યપરે ગુદાત્ ॥ ૧,૧૬૦.૧૭॥

ગુદાસ્તનાભિજે વિદ્યાદ્દોષક્લેદોચ્ચવિદ્રધૌ ।
કુરુતે સ્વાધિષ્ઠાનસ્ય વિવર્તં સન્નિપાતજઃ ॥ ૧,૧૬૦.૧૮॥

પક્વો હિ નાભિવસ્તિસ્થો ભિન્નોઽન્તર્બહિરેવ વા ।
પાકશ્ચાન્તઃ પ્રવૃદ્ધસ્ય ક્ષીણસ્યોપદ્રવાર્દિતઃ ॥ ૧,૧૬૦.૧૯॥

વિદ્રધિશ્ચ ભવેત્તત્ર પાપાનાં પાપયોષિતામ્ ।
મૃતે તુ ગર્ભગે ચૈવ સમ્ભવેચ્છ્વયથર્ઘનઃ ॥ ૧,૧૬૦.૨૦॥

સ્તને સમત્થે દુઃખં વા બાહ્યવિદ્રધિલક્ષણમ્ ।
નારીણાં સૂક્ષ્મરક્તત્વાત્કન્યાયાન્તુ ન જાયતે ॥ ૧,૧૬૦.૨૧॥

ક્રુદ્ધો રુદ્ધગતિર્વાયુઃ શેફમૂલકરો?હિ સઃ ।
મુષ્કવઙ્ક્ષણતઃ પ્રાપ્ય ફલકોષાતિવાહિનીમ્ ॥ ૧,૧૬૦.૨૨॥

આપીડ્ય ધમનીવૃદ્ધિં કરોતિ ફલકોષયોઃ ।
દોષો મેદઃસુ તત્રાસ્તે સવૃદ્ધિઃ સપ્તધા ગદઃ ॥ ૧,૧૬૦.૨૩॥

મૂત્રાન્તયોરપ્યનિલાદ્બાહ્યે વાભ્યન્તરે તથા ।
વાતપૂર્ણઃ ખરસ્પર્શો રૂક્ષો વાતાચ્ચ દાહકૃત્ ॥ ૧,૧૬૦.૨૪॥

પક્વોદુમ્બરસઙ્કાશઃ પિત્તાદ્દાહોષ્મપાકવાન્ ।
કફાત્તીવ્રો ગુરુઃ સ્નિગ્ધઃ કણ્ડૂમાન્કઠિનોઽલ્પરુક્ ॥ ૧,૧૬૦.૨૫॥

કૃષ્ણઃ સ્ફોટાવૃતઃ પિણ્ડોં વૃદ્ધિલિઙ્ગશ્ચ રક્તતઃ ।
કફવન્મેદસાં વૃદ્ધિર્મૃદુતાલફલોપમઃ ॥ ૧,૧૬૦.૨૬॥

મૂત્રધારણશીલસ્ય મૂત્રજસ્તત્ર ગચ્છતઃ ।
અલોભઃ પૂર્ણધૃતિમાન્ક્ષોભં યાતિ સરન્મૃદુ ॥ ૧,૧૬૦.૨૭॥

મૂત્રકૃચ્છ્રમધસ્તાચ્ચ વલયઃ ફલકોષયોઃ ।
વાતકોપિભિસહારૈઃ શીતતોયાવગાહનૈઃ ॥ ૧,૧૬૦.૨૮॥

વિણ્મૂત્રધારણાચ્ચૈવ વિષમાઙ્ગવિચેષ્ટનૈઃ ।
ક્ષોભિતૈઃ ક્ષોભિતૌજાશ્ચ ક્ષીણાન્તર્દેહિનો યદા ॥ ૧,૧૬૦.૨૯॥

પવનો વિગુણીભૂય શોણિતં તદધોનયેત્ ।
કુર્યાત્તત્ક્ષણસન્ધિસ્થો ગ્રન્થ્યાભઃ શ્વયથુસ્તદા ॥ ૧,૧૬૦.૩૦॥

ઉપેક્ષ્યમાણસ્ય ચ ગુલ્મવૃદ્ધિમાધ્માનરુગ્વૈ વિવિધાશ્ચ રોગાઃ ।
સુપીડિતોઽન્તઃ સ્વનવાન્પ્રયાતિ પ્રધ્માપયન્નેતિ પુનશ્ચ મૂર્ધ્નિ ॥ ૧,૧૬૦.૩૧॥

રક્તવૃદ્ધિરસાધ્યેઽયં વાતવૃદ્ધિસમાકૃતિઃ ।
રૂક્ષકૃષ્ણારુણશિરા ઊર્ણાવૃતગવાક્ષવત્ ॥ ૧,૧૬૦.૩૨॥

વાતોઽષ્ટધા પૃથદ્દોષૈઃ સંસ્પૃષ્ટૈર્નિચયં ગતઃ ।
આર્તવસ્ય ચ દોષેણ નારીણાં જાયતેઽષ્ટમઃ ॥ ૧,૧૬૦.૩૩॥

જ્વરમૂર્છાતિસારૈશ્ચ વમનાદ્યૈશ્ચ કર્મભિઃ ।
કર્શિતો બલવાન્યાતિ શીતાર્તશ્ચ બુભુક્ષિતઃ ॥ ૧,૧૬૦.૩૪॥

યઃ પિબત્યન્નપાનાનિ લઙ્ઘનપ્લાવનાદિકમ્ ।
સેવતે હીનસંજ્ઞાભિરર્દિતઃ સમુદીરયન્ ॥ ૧,૧૬૦.૩૫॥

સ્નેહસ્વેદાવનભ્યસ્ય શોષણં વા નિષેવયેત્ ।
શુદ્ધો વા સુદ્ધિહાનિર્વા ભજેત સ્પન્દનાનિ વા ॥ ૧,૧૬૦.૩૬॥

વાતોલ્બણાસ્તસ્ય મલાઃ પૃથક્ચૈવ હિ તેઽથવા ।
સર્વો રક્તયુતો વાતાદ્દેહસ્નોતોઽનુસારિણઃ ॥ ૧,૧૬૦.૩૭॥

ઊર્ધ્વાધોમાર્ગમાવૃત્ય વાયુઃ શૂલં કરોતિ વૈ ।
સ્પર્શોપલભ્યં ગુલ્મોત્થમુષ્ણં ગ્રન્થિસ્વરૂપિણમ્ ॥ ૧,૧૬૦.૩૮॥

કર્ષણાત્કફવિડ્ઘાતૈર્માર્ગસ્યાવરણેન વા ।
વાયુઃ કૃતાશ્રયઃ કોષ્ઠે રૌક્ષ્યાત્કાઠિન્યમાગતઃ ॥ ૧,૧૬૦.૩૯॥

સ્વતન્ત્રઃ સ્વાશ્રયે દુષ્ટઃ પરતન્ત્રઃ પરાશ્રયે ।
તતઃ પિણ્ડકવચ્છ્લેષ્મા મલસંસૃષ્ટ એવ ચ ॥ ૧,૧૬૦.૪૦॥

ગુલમ ઇત્યુચ્યતે બસ્તિનાભિહૃત્પાર્શ્વસંશ્રયઃ ।
વાતજન્યે શિરઃ શૂલજ્વર પ્લીહાન્ત્રકૂજનમ્ ॥ ૧,૧૬૦.૪૧॥

વેધઃ સૂચ્યેવ વિડ્ભ્રંશઃ કૃચ્છ્રે મૂત્રં પ્રવર્તતે ।
ગાત્રે મુખે પદે શોથઃ હ્યગ્નિમાન્દ્યં તથૈવ ચ ॥ ૧,૧૬૦.૪૨॥

રૂક્ષકૃષ્ણત્વગાદિત્વં ચલત્વાદનિલસ્યચ ।
અનિરૂપિતસંસ્થાનો વિવિધાગ્જનયેદ્વ્યથામ્ ॥ ૧,૧૬૦.૪૩॥

પિપીલિકાવ્યાપ્ત ઇવ ગુલ્મઃ સ્ફુરતિ નુદ્યતે ।
પિત્તાદ્દાહામ્લકૌ મૂર્છા વિડ્ભેદઃ સ્વેદતૃડ્જ્વરાઃ ॥ ૧,૧૬૦.૪૪॥

હારિદ્રયં સર્વગાત્રેષુ ગુલ્માચ્છોથસ્ય દર્શનમ્ ।
હીયતે દીપ્યતે શ્લેષ્મા સ્વસ્થાનં દહતીવચ ॥ ૧,૧૬૦.૪૫॥

કફાત્સ્તૈમિત્યમરુચિઃ સદનં શિરસિ જ્વરઃ ।
પીનસાલસ્યહૃલ્લાસૌ શુક્લકૃષ્ણત્વગાદિતા ॥ ૧,૧૬૦.૪૬॥

ગુલ્મો ગભીરઃ કઠિનો ગુરુર્ગર્ભસ્થબાલવત્ ।
સ્વસ્થાનસ્થા અધાવન્તસ્તત એવાત્ર મારકાઃ ॥ ૧,૧૬૦.૪૭॥

પ્રાયસ્તુ યત્તદ્દ્વન્દ્વોત્થા ગુલ્માઃ સંસૃષ્ટમૈથુનાઃ ।
સર્વજસ્તીવ્રરુગ્દાહઃ શીઘ્રપાકી ઘનોન્નતઃ ॥ ૧,૧૬૦.૪૮॥

સોઽસાધ્યો રક્તગુલ્મસ્તુ સ્ત્રિયા એવ પ્રજાયતે ।

ઋતૌ યા ચૈવ શૂલાર્તા યતિ વા યોનિરોગિણી ॥ ૧,૧૬૦.૪૯॥

સેવતે વાનિલાંશ્ચ સ્ત્રી ક્રુદ્ધસ્તસ્યાઃ સમીરણઃ ।
નિરુધ્યાત્યાર્તવં યોન્યાં પ્રતિમાસં વ્યવસ્થિતમ્ ॥ ૧,૧૬૦.૫૦॥

સુક્ષૌ કરોતિ તદ્ગર્ભે લિઙ્ગમાવિષ્કરોતિ ચ ।
હૃલ્લાસદૌહૃદસ્તન્યદર્શનં કામચારિતા ॥ ૧,૧૬૦.૫૧॥

ક્રમેણ વાયોઃ સંસર્ગાત્પિત્તં યોનિષુ સઞ્ચયમ્ ।
રક્તસ્ય કુરુતે તસ્યા વાતપિત્તોક્તગુલ્મજાન્ ॥ ૧,૧૬૦.૫૨॥

ગર્ભાશયે ચ સુતરાં શૂલાંશ્ચૈવાસૃગાશ્રયે ।
યોનિસ્ત્રાવશ્ચ દૌર્ગન્ધ્યં ભૂયઃ સ્યન્દનવેદને ॥ ૧,૧૬૦.૫૩॥

કદાપિ ગર્ભવદ્ગુલ્મઃ સર્વે તે રતિસમ્ભવાઃ ।
પાકશ્ચિરેણ ભજતે નૈધતે વિદ્રધિઃ પુનઃ ॥ ૧,૧૬૦.૫૪॥

પચ્યતે શીઘ્રમત્યર્થં દુષ્ટરક્તાશ્રયસ્તુ સઃ ।
અતઃ શીઘ્રં વિદાહિત્વાદ્વિદ્રધિઃ સોઽભીધીયતે ॥ ૧,૧૬૦.૫૫॥

ગુલ્માન્તારશ્રયે બસ્તિદાહશ્ચ પ્લીહવેદના ।
અગ્નિવર્ણબલભ્રંશો વેગાનાં વા પ્રવર્તનમ્ ॥ ૧,૧૬૦.૫૬॥

અતો વિપર્યયે બાહ્યકોષ્ઠાઙ્ગેષુ ચ નાતિરુક્ ।
વૈવર્ણ્યમથ વા કાસો બહિરુન્નતતાધિકમ્ ॥ ૧,૧૬૦.૫૭॥

સાટોપમત્યુગ્રરુજમાધ્માનમુદરે ભૃશમ્ ।
ઊર્ધ્વાધો વાતરોધેન તમાનાહં પ્રચક્ષતે ॥ ૧,૧૬૦.૫૮॥

ધનશ્ચાષ્ઠ્યુપમો ગ્રન્થિલોઽષ્ઠીલાતુ સમુન્નતા ।
સમસ્તાલિઙ્ગસંયુક્તઃ પ્રત્યષ્ઠીલા તદાકૃતિઃ ॥ ૧,૧૬૦.૫૯॥

પક્વશયોદ્ભવોઽપ્યેવં વાયુસ્તીવ્રરુજાશ્રયાત્ ।
ઉદ્ગારબાહુલ્યપુરીષબન્ધતૃપ્ત્યક્ષમત્વાન્ત્રવિકૂજનાનિ ॥ ૧,૧૬૦.૬૦॥

આચોપમાધ્માનમપક્તિશક્તિઃ આસન્નગુલ્મસ્ય ભવેચ્ચ ચિહ્નમ્ ॥ ૧,૧૬૦.૬૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિદ્રધિગુલ્મનિદાન નામ ષષ્ટ્યુત્તરશતતમોધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૬૧

ધન્વન્તરિરુવાચ ।

ઉદરાણાં નિદાનઞ્ચ વક્ષ્યે સુશ્રુત તચ્છૃણુ ।

રોગાઃ સર્વેઽપિ મન્દાગ્નૌ સુતરામુદરાણિ તુ ॥ ૧,૧૬૧.૧॥

અનીર્ણામયાશ્ચાપ્યન્યે જાયન્તે મલસંચયાત્ ।

ઊર્ધ્વાધો વાયવો રુદ્ધ્વા વ્યાકુલાવિપ્રવાહિણી? ॥ ૧,૧૬૧.૨॥

પ્રાણાનપાનાન્સંદૂષ્ય કુર્યુસ્તાન્માંસસન્ધિગાન્ ।

આધ્માપ્ય કુક્ષિમુદરમષ્ટધા તે ચ ભેદતઃ ॥ ૧,૧૬૧.૩॥

પૃથગ્દોષૈઃ સમસ્તૈશ્ચ પ્લીહવઙ્ક્ષતોદકૈઃ ।

તેનાર્તાઃ શુષ્કતાલ્વોષ્ઠાઃ સર્વપાદકરોદરાઃ ॥ ૧,૧૬૧.૪॥

નષ્ટચેષ્ટબલાહારાઃ કૃતપ્રધ્માત્કુક્ષયઃ ।

પુરુષાઃ સ્યુઃ પ્રેતરૂપા ભાવિનસ્તસ્ય લક્ષણમ્ ॥ ૧,૧૬૧.૫॥

ક્ષુન્નાશોઽરુચિવત્સર્વં સવિદાહઞ્ચ પચ્યતે ।

જીર્ણાન્નં યો ન જાનાતિ સોઽપથ્યં સેવતેનરઃ ॥ ૧,૧૬૧.૬॥

ક્ષીયતે બલમઙ્ગસ્ય શ્વસિત્યલ્પોઽવિચેષ્ટિતઃ ।

વિષયાવૃત્તિબુદ્ધિશ્ચ શોકશોષાદયોઽપિચ ॥ ૧,૧૬૧.૭॥

રુગ્બસ્તિસન્ધૌ સતતં લઘ્વલ્પભોજનૈરપિ ।

જરાજીર્ણો બલભ્રંશો ભવેજ્જઠરરોગિણઃ ॥ ૧,૧૬૧.૮॥

સ્વતન્ત્રતન્દ્રાલસતા મલસર્ગોઽલ્પવહ્નિતા ।

દાહઃ શ્વયથુરાધ્માનમન્ત્રે સલિલસમ્ભવે ॥ ૧,૧૬૧.૯॥

સર્વત્ર તોયે મરણં શોચનં તત્ર નિષ્ફલમ્ ।

ગવાક્ષવચ્છિરાજાલૈરુદરં ગુડ્ગુડાયતે ॥ ૧,૧૬૧.૧૦॥

નાભિમન્ત્રશ્ચ વિષ્ટભ્ય વેગં કૃત્વા પ્રણશ્યતિ ।

મારુતે હૃત્કટીનાભિપાયુવઙ્ક્ષણવેદનાઃ ॥ ૧,૧૬૧.૧૧॥

સશબ્દો નિઃ સરેદ્વાયુર્વહતે મૂત્રમલ્પકમ્ ।

નાતિમાત્રં ભવેલ્લૌલ્યં નરસ્ય વિરસં મુખમ્ ॥ ૧,૧૬૧.૧૨॥

તત્રવાતોદરે શોથઃ પાણિપાન્મુખકુક્ષિષુ ।

કુક્ષિપાર્શ્વોદરકટીપૃષ્ઠરુક્પર્વભેદનમ્ ॥ ૧,૧૬૧.૧૩॥

શુષ્કકાસાઙ્ગમર્દાધોગુરુતામલસંગ્રહઃ ।
શ્યામારુણત્વગાદિત્વં મુખે ચ રસવદ્ધિતા ॥ ૧,૧૬૧.૧૪॥

સતોદભેદમુદરં નીલકૃષ્ણશિરાતતમ્ ।
આધ્માતમુદરે શબ્દમદ્ભુતં વા કરોતિ સઃ ॥ ૧,૧૬૧.૧૫॥

વાયુશ્ચાત્ર સરુક્ચ્છબ્દં વિધત્તે સર્વથા ગતિમ્ ।
પિત્તોદરે જ્વરો મૂર્છા દાહિત્વં કટુકાસ્યતા ॥ ૧,૧૬૧.૧૬॥

ભ્રમોતિસારઃ પીતત્વં ત્વગાદાવુદરં હરિત્ ।
પીતતામ્રશિરાદિત્વં સસ્વેદં સોષ્મ દહ્યતે ॥ ૧,૧૬૧.૧૭॥

ધૂમાયતે મૃદુસ્પર્શં ક્ષૈપ્રપાકં પ્રદૂયતે ।
શ્લેષ્મોદરેષુ સદનં સ્વેદશ્વયથુગૌરવમ્ ॥ ૧,૧૬૧.૧૮॥

નિદ્રા ક્લેશોઽરુચિઃ શ્વાસઃ કાશઃ શુક્લત્વગાદિતા ।
ઉદરં તિમિરં સ્નિગ્ધં શુક્લકૃષ્ણશિરાવૃતમ્ ॥ ૧,૧૬૧.૧૯॥

નીરાતિવૃદ્ધૌ કઠિનં શીતસ્પર્શં ગુરુ સ્થિરમ્ ।
ત્રિદોષકોપને તૈસ્તૈસ્ત્રિદોષજીનૈતર્મલૈઃ ॥ ૧,૧૬૧.૨૦॥

સર્વદૂષણદુષ્ટાશ્ચ સરક્તાઃ સઞ્ચિતા મલાઃ ।
કોષ્ઠં પ્રાપ્ય વિકુર્વાણાઃ શોષમૂર્છાભ્રમાન્વિતમ્ ॥ ૧,૧૬૧.૨૧॥

કુર્યુસ્ત્રિલિઙ્ગમુદરં શીઘ્રપાકં સુદારુણમ્ ।
વર્ધતે તચ્ચ સુતરાં શીતવાતપ્રદર્શને ॥ ૧,૧૬૧.૨૨॥

અત્યશનાચ્ચ સંક્ષોભાદ્યાનપાનાદિચેષ્ટિતૈઃ ।
અવિહિતૈશ્ચ પાનાદ્યૈર્વમનવ્યાધિકર્ષણૈઃ ॥ ૧,૧૬૧.૨૩॥

વામપાર્શ્વાસ્થિતઃ પ્લીહા ત્યુતસ્થાનો વિવર્ધતે ।
શોણિતાદ્વા રસાદિભ્યો વિવૃદ્ધો જનયેદ્વ્યથામ્ ॥ ૧,૧૬૧.૨૪॥

સોઽષ્ઠીલા ચાતિકઠિનઃ પ્રોન્નતઃ કૂર્મપૃષ્ઠવત્? ।
ક્રમેણ વર્ધમાનશ્ચ કુક્ષૌ વ્યાતતિમાહરેત્ ॥ ૧,૧૬૧.૨૫॥

શ્વાસકાસપિપાસાસ્યવૈરસ્યાધ્માનકજ્વરૈઃ ।
પાણ્ડુત્વમૂર્છાછર્દિત્વગ્દાહમોહૈશ્ચ સંયુતઃ ॥ ૧,૧૬૧.૨૬॥

અરુણાભં વિચિત્રાભં નીલહારિદ્રરાજિતમ્ ।
ઉદાવર્તેન ચાનાહમોહતૃડ્દહનજ્વરૈઃ ॥ ૧,૧૬૧.૨૭॥

ગૌરવારુચિકાઠિન્યૈર્વિઘાતભ્રમસંક્રમાત્ ।
પ્લીહવદ્દક્ષિણાત્પાર્શ્વાત્કુર્યાદ્યકૃદપિ ચ્યુતમ્ ॥ ૧,૧૬૧.૨૮॥

પક્વે ભૂતે યકૃતિ ચ સદા બદ્ધમલો ગુદે ।
દુર્નામભિરુદાવર્તૈરન્યૈર્વા પીડિતો ભવેત્ ॥ ૧,૧૬૧.૨૯॥

વર્ચઃ પિત્તકફાન્બદ્ધાન્કરોતિ કુપિતોઽનિલઃ ।
અપાનો જઠરે તેન સંરુદ્ધો જ્વરરુક્કરઃ ॥ ૧,૧૬૧.૩૦॥

કાશશ્વાસોરુસદનં શિરોરુઙ્નાભિપાર્શ્વરુક્ ।
મલાસંગોઽરુચિશ્છર્દિરુદરે મલમારુતઃ ॥ ૧,૧૬૧.૩૧॥

સ્થિરનીલારુણશિરાજાલૈરુદરમાવૃતમ્ ।
નાભેરુપરિ ચ પ્રાયો ગોપુચ્છાકૃતિ જાયતે ॥ ૧,૧૬૧.૩૨॥

અસ્થ્યાદિશલ્યૈ રન્યૈશ્ચ વિદ્ધે ચૈવોદરે તથા ।
પચ્યતે યકૃતાદિશ્ચ તચ્છિદ્રૈશ્ચ સરન્બહિઃ ॥ ૧,૧૬૧.૩૩॥

આમ એવ ગુદાહેતિ તતોઽલ્પાલ્પઃ શકૃદ્રસઃ ।
સ સ્યાદ્વિકૃતગન્ધોઽપિ પિચ્છિલઃ પીતલોહિતઃ ॥ ૧,૧૬૧.૩૪॥

શેષશ્ચાપૂર્ય જઠરં ઘોરમારભતે તતઃ ।
વર્ધતે તદધો નાભેરાશુ ચૈતિ જલાત્મતામ્ ॥ ૧,૧૬૧.૩૫॥

ઉદ્રિક્તે દોષરૂપે ચ વ્યાપ્તે ચ શ્વાસતૃટ્ભ્રમૈઃ ।
છિદ્રોદરમિદં પ્રાહુઃ પરિસ્રાવીતિ ચાપરે ॥ ૧,૧૬૧.૩૬॥

પ્રવૃત્તસ્નેહપાનાદેઃ સહસાપથ્યસેવિનઃ ।
અત્યમ્બુપાનાન્મન્દાગ્નેઃ ક્ષીણસ્યાતિકૃશસ્ય ચ ॥ ૧,૧૬૧.૩૭॥

રુદ્ધઃ સ્વમાર્ગાદનિલઃ કફશ્ચ જલમૂર્છિતઃ ।
વર્ધતે તુ તદેવામ્બુ તન્માત્રાદ્બિન્દુરાશિતઃ ॥ ૧,૧૬૧.૩૮॥

તત્કોપાદુદરં તૃષ્ણાગુદસ્નુતિરુજાન્વિતમ્ ।
કાશશ્વાસારુચિયુતં નાનાવર્ણાશિરાતતમ્ ॥ ૧,૧૬૧.૩૯॥

તોયપૂર્ણાન્મૃદુસ્પર્શાત્સદૃશક્ષોભવેપથુ ।
બકોદરં સ્થિરંસ્નિગ્ધં નાડીમાવૃત્ય જાયતે ॥ ૧,૧૬૧.૪૦॥

ઉપેક્ષાયાઞ્ચ સર્વેષાં સ્વસ્થાનાં પરિચાલિતાઃ ।
પાકા દ્રવા દ્રવીકુર્યુઃ સન્ધિસ્રોતોમુખાન્યપિ ॥ ૧,૧૬૧.૪૧॥

સ્વેદે ચૈવ તુ સંરુદ્ધે મૂર્છિતાશ્ચાન્તરસ્થિતાઃ ।
તદેવોદરમાપૂર્ય કુર્યાદુદરામયમ્ ॥ ૧,૧૬૧.૪૨॥

ગુરૂદરં સ્થિતં વૃત્તમાહતઞ્ચ ન શબ્દકૃત્ ।
હીનબલં તથા ઘોરં નાડ્યાં સ્પૃષ્ટઞ્ચ સપતિ ॥ ૧,૧૬૧.૪૩॥

શિરાન્તર્ધાનમુદરે સર્વલક્ષણમુચ્યતે ।
વાતપિત્તકફપ્લીહસન્નિપાતોદકોદરમ્ ॥ ૧,૧૬૧.૪૪॥

પક્ષાચ્ચ જાતસલિલં વિષ્ટમ્ભોપદ્રવાન્વિતમ્ ।
જન્મનૈવોદરં સર્વં પ્રાયઃ કૃચ્છ્રતમં મતમ્ ॥ ૧,૧૬૧.૪૫॥

ઇતિ શ્રીગારુડે મહાપુરાણમે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકષષ્ટ્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૨
ધન્વન્તરિરુવાચ ।
પાણ્ડુશોથનિદાનઞ્ચ શૃણુ સુશ્રુત વચ્મિ તે ।
પિત્તપ્રધાનાઃ કુપિતા યથોક્તૈઃ કોપનૈર્મલાઃ ॥ ૧,૧૬૨.૧॥

નત્રાનિલેન બલિના ક્ષિપ્તાક્ષિપ્તં યદિ સ્થિતમ્ ।
ધમનીર્દશમીઃ પ્રાપ્ય વ્યાપ્નુવન્સકલાં તનુમ્ ॥ ૧,૧૬૨.૨॥

ત્વગસૃક્છ્લેષ્મમાંસાનિ પ્રદૂષ્યન્નસમાશ્રિતમ્ ।
ત્વઙ્માંસયોસ્તુ કુરુતે ત્વચિ વર્ણાન્પૃથગ્વિધાન્ ॥ ૧,૧૬૨.૩॥

સ્વયં હરિદ્રા હારિદ્રં પાણ્ડુત્વં તેષુ ચાધિકમ્ ।
યાતોઽયં પ્રહતેદુગ્રઃ સ રોગસ્તેન ગૌરવમ્ ॥ ૧,૧૬૨.૪॥

ધાતૂનાં સ્પર્શશૈથિલ્યમામજશ્ચ ગુણક્ષયઃ ।
તતોઽલ્પરક્તમેદોઽસ્થિનિઃ સારઃ સ્યાચ્છ્લથેન્દ્રિયઃ ॥ ૧,૧૬૨.૫॥

શીર્યમાણૈરિવાઙ્ગૈસ્તુ દ્રવતા હૃદયેન ચ ।
શૂલોક્ષિકૂટવદને સ્તૈમિત્યં તત્ર લાલયા ॥ ૧,૧૬૨.૬॥

હીનતૃટ્શિશિરદ્વેષી શીર્ણલોભો હતાનલઃ ।
મન્દશક્તિર્જર્વરી શ્વાસી કર્ણશૂલી તથા ભ્રમી ॥ ૧,૧૬૨.૭॥

સ પઞ્ચધા પૃથગ્દોષૈઃ સમસ્તૈર્મૃત્તિકાદનાત્ ।
પ્રાગ્રૂપમસ્ય હૃદયસ્પન્દનં રૂક્ષતા ત્વચિ ॥ ૧,૧૬૨.૮॥

અરુચિઃ પીતમૂત્રત્વં સ્વેદાભાવોઽલ્પમૃત્રતા ।
મેદઃ સમાનિલાત્તત્ર ગાઢરુક્ક્લેદગાત્રતા ॥ ૧,૧૬૨.૯॥

કૃષ્ણેક્ષણં કૃષ્ણશિરાનખવિણ્મૂત્રનેત્રતા ।
શોથો નાસાસ્યવૈરસ્યં વિટ્શોષઃ પાર્શ્વમૂર્છના ॥ ૧,૧૬૨.૧૦॥

પિત્તે હરિતપિત્તાભઃ શિરાદિષુ જ્વરસ્તમઃ ।
તૃટ્શોષમૂર્છાદૌર્ગન્ધ્યં શીતેચ્છા કટુવક્રતા ॥ ૧,૧૬૨.૧૧॥

વિડ્ભેદશ્ચામ્લકો દાહઃ કફાચ્ચ હૃદયાર્દ્રતા ।
તન્દ્રા લવણવક્ત્વં રોમહર્ષઃ સ્વરક્ષયઃ ॥ ૧,૧૬૨.૧૨॥

કાશશ્છર્દિશ્ચ નિચયાન્નષ્ટલિઙ્ગોઽતિદુઃસહઃ ।
ઉત્કૃષ્ટેનિલપિત્તાભ્યા કટુર્વા મધુરઃ કફઃ ॥ ૧,૧૬૨.૧૩॥

દૂષયિત્વા વસાદીંશ્ચ રૌક્ષ્યાદ્રક્તવિમોક્ષણમ્ ।
સ્રોતસાં સંક્ષયં કુર્યાદનુરુધ્ય ચ પૂર્વવત્ ॥ ૧,૧૬૨.૧૪॥

પાણ્ડુરોગેક્ષયેજાતે નાભિપાદાસ્યમેહનમ્ ।
પુરીષં કૃમિવન્મુઞ્ચેદ્ભિન્નં સાસ્રં કફાન્વિતમ્ ॥ ૧,૧૬૨.૧૫॥

યઃ પિત્તરોગી સેવેત પિત્તલં તસ્ય કામલમ્ ।
કોષ્ઠશા ખોદ્ગતં પિત્તં દગ્ધ્વાસૃઙ્માંસમાહરેત્ ॥ ૧,૧૬૨.૧૬॥

હારિદ્રમૂત્રનેત્રત્વં મુખં રક્તં શકૃત્તથા ।
દાહી વિપાકતૃષ્ણાવાન્ભેકાભો દુર્બલેન્દ્રિયઃ ॥ ૧,૧૬૨.૧૭॥

ભવેત્પિત્તાનુગઃ શોથઃ પાણ્ડુરોગાવૃતસ્ય ચ ।
ઉપેક્ષયા ચ શોથાદ્યાઃ સકૃચ્છ્રાઃ કુમ્ભકામલાઃ ॥ ૧,૧૬૨.૧૮॥

હરિતશ્યામપિત્તત્વે પાણ્ડુરોગો યદા ભવેત્ ।
વાતપિત્તે ભ્રમસ્તૃષ્ણા સ્ત્રીષુ હર્ષો મૃદુજ્વરઃ ॥ ૧,૧૬૨.૧૯॥

તન્દ્રા વા ચાનલભ્રંશસ્તં વદન્તિ હલીમકમ્ ।
આલસ્યઞ્ચાતિભવતિ તેષાં પૂર્વમુપદ્રવઃ ॥ ૧,૧૬૨.૨૦॥

શોથઃ પ્રધાનઃ કથિતઃ સ એવાતો નિગદ્યતે ।
પિત્તરક્તકફાન્વાયુર્દુષ્ટો દુષ્ટાન્બહિઃ શિરાઃ ॥ ૧,૧૬૨.૨૧॥

નીત્વા રુદ્ધગતિસ્તૈર્હિ કુર્યાત્ત્વઙ્માંસસંશ્રયમ્ ।
ઉત્સેધં સંહતં શોથં તમાહુર્નિચયાદતઃ ॥ ૧,૧૬૨.૨૨॥

સર્વહેતુવિશષૈસ્તુ રૂપભેદાન્નવાત્મકમ્ ।
દોષૈઃ પૃથગ્વિધૈઃ સર્વૈરભિઘાતાદ્વિષાદપિ ॥ ૧,૧૬૨.૨૩॥

તદેવ નીયમાનન્તુ સર્વાઙ્ગે કામજમ્ભવેત્ ।
પૃથૂન્નતાગ્રગ્રથિતૈર્વિશેષૈશ્ચ ત્રિધા વિદુઃ ॥ ૧,૧૬૨.૨૪॥

સામાન્યહેતુઃ શોથાનાં દોષજાતો વિશેષતઃ ।
વ્યાધિઃ કર્મોપવાસાદિક્ષીણસ્ય ભવતિ દ્રુતમ્ ॥ ૧,૧૬૨.૨૫॥

અતિમાત્રં યદાસેવેદ્ગુરુમત્યન્તશીતલમ્ ।
લવણક્ષારતીક્ષ્ણામ્લશાકામ્બુસ્વપ્નજાગરમ્ ॥ ૧,૧૬૨.૨૬॥

રોધો વેગસ્ય વલ્લૂરમજીર્ણશ્રમમૈથુનમ્ ।
પચ્યતે માર્ગગમનં યાનેન ક્ષોભિણાપિ વા ॥ ૧,૧૬૨.૨૭॥

શ્વાસકાસાતિસારાર્શોજઠરપ્રદરજ્વરાઃ ।
વિષ્ટમ્ભાલસ્યકચ્છર્દિહિક્કાપાણ્ડુવિસર્પકમ્ ॥ ૧,૧૬૨.૨૮॥

ઊર્ધ્વશોથમધો બસ્તૌ મધ્યે કુર્વન્તિ મધ્યગાઃ ।
સર્વાઙ્ગગઃ સર્વગતઃ પ્રત્યપ્રત્યગેતિ તદાશ્રયઃ ॥ ૧,૧૬૨.૨૯॥

તત્પૂર્વરૂપં ક્ષવથુઃ શિરાયામઙ્ગગૌરવમ્ ।
વાતાચ્છોથશ્ચલો રૂક્ષઃ ખરરોમારુણોઽસિતઃ ॥ ૧,૧૬૨.૩૦॥

શઙ્ખબસ્ત્યન્ત્રશોફર્તિમેદોભેદાઃ પ્રસુપ્તિતા ।
વાતોત્તાનઃ ક્લમઃ શીઘ્રમુન્નમેત્પીડિતાં તનુમ્ ॥ ૧,૧૬૨.૩૧॥

સિગ્ધસ્તુ મર્દનૈઃ શામ્યેદ્રાત્રાવલ્પો દિવા મહાન્ ।
ત્વક્સર્ષપવિલિપ્તે ચ તસ્મિંશ્ચિમિચિમાયતે ॥ ૧,૧૬૨.૩૨॥

પીતરક્તાસિંતાભાસઃ પિત્તજાતશ્ચ શોષકૃત્ ।
શીઘ્રં નાસૌ વા પ્રશમેન્મધ્યે પ્રાગ્દહતે તનુમ્ ॥ ૧,૧૬૨.૩૩॥

સતૃટ્દાહજ્વરસ્વેદો ભ્રમક્લોદમદભ્રમાઃ ।

સાભિલાષી શકૃદ્ભેદો ગન્ધઃ સ્પર્શસહો મૃદુઃ ॥ ૧,૧૬૨.૩૪॥

કણ્ડૂમાન્પાણ્ડુરોમા ત્વક્કઠિનઃ શીતલો ગુરુઃ ।
સ્નિગ્ધઃશ્લક્ષ્ણઃ સ્થિરઃ શૂલો નિદ્રાચ્છર્દ્યગ્નિમાન્ધકૃત્ ॥ ૧,૧૬૨.૩૫॥

આઘાતેન ચ શસ્ત્રાદિચ્છેદભેદક્ષતાદિભિઃ ।
હિમાનિલૈર્દધ્યનિલૈર્ભલ્લાતકપિકચ્છજૈઃ ॥ ૧,૧૬૨.૩૬॥

રસૈઃ શુષ્કૈશ્ચ સંસ્પર્શાચ્છ્વયથુઃ સ્યાદ્વિસર્પવાન્ ।
ભૃશોષ્મા લોહિતાભાસઃ પ્રાયશઃ પિત્તલક્ષણઃ ॥ ૧,૧૬૨.૩૭॥

વિષજઃ સવિષપ્રાણિપરિસર્પણમૂત્રણાત્ ।
દંષ્ટ્રાદન્તનખાઘાતાદવિષપ્રાણિનામપિ ॥ ૧,૧૬૨.૩૮॥

વિણ્મૂત્રશુક્રોપહતમલવદ્વસ્તુસંકુરાત્ ।
વિષવૃક્ષાનિલસ્પર્શાદ્ગરયોગાવચૂર્ણનાત્ ॥ ૧,૧૬૨.૩૯॥

મૃદુશ્ચલોઽવલમ્બી ચ શીઘ્રો દાહરુજાકરઃ ।
નવોઽનુપદ્રવઃ શોથઃ સાધ્યોઽસાધ્યઃ પુરેરિતઃ ॥ ૧,૧૬૨.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પાણ્ડુસોથનિદાનં નામ દ્વિષષ્ટ્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૩
ધન્વન્તીરરુવાચ ।
વિસર્પાદિનિદાનન્તે વક્ષ્યે સુશ્રુત તચ્છૃણુ ।
સ્યાદ્વિસર્પો વિઘાતાત્તુ દોષૈર્દુષ્ટૈશ્ચ શોથવત્ ॥ ૧,૧૬૩.૧॥

અધિષ્ઠાનઞ્ચ તં પ્રાહુર્બાહ્યં તત્ર ભયાચ્છ્રમાત્ ।
યથાત્તરઞ્ચ દુઃસાધ્યસ્તત્ર દોષો યથાયથમ્ ॥ ૧,૧૬૩.૨॥

પ્રકોપનૈઃ પ્રકુપિતા વિશેષેણ વિદાહિભિઃ ।
દેહે શીઘ્રં વિશન્તીહ તેઽન્તરે હિ સ્થિતા બહિઃ ॥ ૧,૧૬૩.૩॥

તૃષ્ણાભિયોગાદ્વેગાનાં વિષમાચ્ચ પ્રવર્તનાત્ ।
આશુ ચાગ્નિબલભ્રંશાદતો બાહ્યં વિસર્પયેત્ ॥ ૧,૧૬૩.૪॥

તત્ર વાતાત્સ વીસર્પો વાતજ્વરસમવ્યથઃ ।
શોથસ્ફુરણનિસ્તોદભેદાયાસાર્તિહર્ષવાન્ ॥ ૧,૧૬૩.૫॥

પિત્તાદ્દ્રુતગતિઃ પિત્તજ્વરલિઙ્ગોઽતિલોહિતઃ ।
કફાત્કણ્ડૂયુતઃ સ્નિગ્ધઃ કફજ્વરસમાનરુક્ ॥ ૧,૧૬૩.૬॥

સન્નિપાતસમુત્થાશ્ચ સર્વલિઙ્ગસમન્વિતાઃ ।
સ્વદોષલિઙ્ગૈશ્ચીયન્તે સર્વૈઃ સ્ફોટૈરુપેક્ષિતાઃ ।
તેઽપિ સ્વેદાન્વિમુઞ્ચતિ બિભ્રતો વ્રણલક્ષણમ્ ॥ ૧,૧૬૩.૭॥

વાતપિત્તાજ્જ્વરચ્છર્દિમૂર્છાતીસારતૃડ્ભ્રમૈઃ ।
ગન્થિભેદાગ્નિસદનતમકારોચકૈર્યુતઃ ॥ ૧,૧૬૩.૮॥

કરોતિ સર્વમઙ્ગઞ્ચ દીપ્તાઙ્ગારાવકીર્ણવત્ ।
યંયં દેશં વિસર્પશ્ચ વિસર્પતિ ભવેત્સસઃ ॥ ૧,૧૬૩.૯॥

શાન્તાઙ્ગારાસિતો નીલો રક્તો વાસુ ચ ચીયતે ।
અગ્નિદગ્ધ ઇવ સ્ફોટૈઃ શીઘ્રગત્વાદ્દ્રુતં સ ચ ॥ ૧,૧૬૩.૧૦॥

મર્માનુસારી વીસર્પઃ સ્યાદ્વાતોઽતિબલસ્તતઃ ।
વ્યથતેઽઙ્ગં હરેત્સંજ્ઞાં નિદ્રાઞ્ચ શ્વાસમીરયેત્ ॥ ૧,૧૬૩.૧૧॥

હિક્કાઞ્ચ સ ગતોઽવસ્થામીદૃશીં લભતે નરઃ ।
ક્વચિન્મર્મારતિગ્રસ્તો ભૂમિશય્યાસનાદિષુ ॥ ૧,૧૬૩.૧૨॥

ચેષ્ટમાનસ્તતઃ ક્લિષ્ટો મનોદેહપ્રમોહવાન્ ।
દુષ્પ્રબોધોઽશ્નુતે નિદ્રાં સોઽગ્નિવીસર્પ ઉચ્યતે ॥ ૧,૧૬૩.૧૩॥

કફેન રુદ્ધઃ પવનો ભિત્ત્વાતં બહુધા કફમ્ ।
રક્તં વા વૃદ્ધરક્તસ્ય ત્વક્છિરાસ્નાયુમાંસગમ્ ॥ ૧,૧૬૩.૧૪॥

દૂષયિત્વા તુ દીર્ઘાનુવૃત્તસ્થૂલખરાત્મિકામ્ ।
ગ્રન્થીનાં કુરુતે માલાં સરક્તાન્તીવ્રરુગ્જ્વરામ્ ॥ ૧,૧૬૩.૧૫॥

શ્વાસકાસાતિસારાસ્યશોષહિક્કાવમિભ્રમૈઃ ।
મોહવૈવર્ણ્યમૂર્છાઙ્ગભઙ્ગગ્નિસદનૈર્યુતામ્ ।
ઇત્યયં ગ્રન્થિવીસર્પઃ કફમારુતકોપજઃ ॥ ૧,૧૬૩.૧૬॥

કફપિત્તાજ્જ્વરઃ સ્તમ્ભો નિદ્રા તન્દ્રા શિરોરુજા ।
અઙ્ગાવસાદવિક્ષેપૌ પ્રલાપારોચકભ્રમાઃ ॥ ૧,૧૬૩.૧૭॥

મૂર્છાગ્નિહાનિર્ભેદોઽસ્થ્નાં પિપાસેન્દ્રિયગૌરવમ્ ।
આમોપવેશનં લેપઃ સ્રોતસાં સ ચ સર્પતિ ॥ ૧,૧૬૩.૧૮॥

પ્રાયેણામાશયં ગૃહ્ણન્નેકદેશં ન ચાતિરુક્ ।
પીડકૈરવકીર્ણોઽતિપીતલોહિતપાણ્ડુરૈઃ ॥ ૧,૧૬૩.૧૯॥

સ્નિગ્ધોઽસિતો મેચકાભો મલિનઃ શોથવાન્ગુરુઃ ।
ગમ્ભીરપાકઃ પ્રાયોષ્મસ્પૃષ્ટઃ ક્લિન્નોંઽવદીર્યતે ॥ ૧,૧૬૩.૨૦॥

પક્વવચ્છીર્ણમાંસશ્ચ સ્પષ્ટસ્નાયુશિરાગણઃ ।
સર્વગો લક્ષણૈઃ સર્વૈઃ સર્વગત્વક્સમર્પણઃ ।
શવગન્ધી ચ વીસર્પઃ કર્દમાખ્યમુશન્તિ તમ્ ॥ ૧,૧૬૩.૨૧॥

બાહ્યહેતોઃ ક્ષતાત્ક્રુદ્ધ્વઃ સરક્તં પિત્તમીરયન્ ।
વીસર્પં મારુતઃ કુર્યાત્કુલત્થસદૃશૈશ્ચિતમ્ ॥ ૧,૧૬૩.૨૨॥

સ્ફોટૈઃ શોથજ્વરરુજાદાહાઢ્યં શ્યાવશોણિતમ્ ।
પથગ્દોષૈસ્ત્રયઃ સાધ્યા દ્વન્દ્વજાશ્ચાનુપદ્રવાઃ ॥ ૧,૧૬૩.૨૩॥

અસાધ્યાઃ કૃતસર્વોત્થાઃ સર્વે ચાક્રાન્તમર્મણઃ ।
શીર્ણસ્નાયુશિરામાંસાઃ ક્લિન્નાશ્ચશવગન્ધયઃ ॥ ૧,૧૬૩.૨૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વીસર્પનિદાનં નામ ત્રિપષ્ટ્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૪
ધન્વન્તરિરુવાચ ।
મિથ્યાહારવિહારેણ વિશેષેણ વિરોધિના ।
સાધુનિન્દાવધાદ્યુદ્ધહરણાદ્યૈશ્ચ સેવિતૈઃ ॥ ૧,૧૬૪.૧॥

પાપ્મભિઃ કર્મભિઃ સદ્યઃ પ્રાક્તનૈઃ પ્રેરિતામલાઃ ।
શિરાઃ પ્રપદ્ય તૈર્યુક્તાસ્ત્વગ્વસારક્તમામિષમ્ ॥ ૧,૧૬૪.૨॥

દૂષયન્તિ ચ સંશોષ્ય નિશ્ચરન્તસ્તતો બહિઃ ।
ત્વચઃ કુર્વાન્તિ વૈવર્ણ્યં શિષ્ટાઃ કુષ્ઠમુશન્તિતમ્ ॥ ૧,૧૬૪.૩॥

કાલેનોપેક્ષિતં યત્સ્યાત્સર્વં કોષ્ઠાનિ તદ્વપુઃ ।
પ્રપદ્ય ધાતૂન્બાહ્યાન્તઃ સર્વાન્સંક્લેદ્ય ચાવહેત્ ॥ ૧,૧૬૪.૪॥

સસ્વેદક્લેદસઙ્કોચાન્કૃમીન્સૂક્ષ્માંશ્ચદારુણાન્ ।
લોમત્વક્સ્નાયુધમનીરાક્રામતિ યથાક્રમમ્ ॥ ૧,૧૬૪.૫॥

ભસ્માચ્છાદિતવત્કુર્યાદ્વાહ્યં કુષ્ઠમુદાહૃતમ્ ।
કુષ્ઠાનિ સપ્તધા દોષૈઃ પૃથગ્દ્વન્દ્વૈઃ સમાગતૈઃ ॥ ૧,૧૬૪.૬॥

સર્વેષ્વપિ ત્રિદોષેષુ વ્યપદેશોઽધિકસ્તતઃ ।
વાતેન કુષ્ઠં કાપાલં પિત્તેનૌદુમ્બરં કફાત્ ॥ ૧,૧૬૪.૭॥

મણ્ડલાખ્યં વિચર્ચી ચ ઋષ્યાખ્યં વાતપિત્તજમ્ ।
ચર્મૈકકુષ્ઠં કિટિમં સિધ્માલસવિપાદિકાઃ ॥ ૧,૧૬૪.૮॥

વાતશ્લેષ્મોદ્ભવાઃ શ્લેષ્મપિત્તાદ્દ્રૂશતારુષી ।
પુણ્ડરીકં સવિસ્ફોટં પામા ચર્મદલં તથા ॥ ૧,૧૬૪.૯॥

સર્વેભ્યઃ કાકણં પૂર્વત્રિકં દદ્રુ સકાકણમ્ ।
પુણ્ડરીકર્યજિહ્વે ચ મહાકુષ્ઠાનિ સપ્ત તુ ॥ ૧,૧૬૪.૧૦॥

અતિશ્લક્ષ્ણખરસ્પર્શસ્વેદાસ્વેદવિવર્ણતાઃ ।
દાહઃ કણ્ડૂસ્ત્વચિ સ્વાપસ્તોદઃ કોચોન્નતિસ્તમઃ ॥ ૧,૧૬૪.૧૧॥

વ્રણાનામધિકં શૂલં શીઘ્રોત્પત્તિશ્ચિરસ્થિતિઃ ।
રૂઢાનામપિ રૂક્ષત્વં નિમિત્તેઽલ્પેઽતિકોપનમ્ ॥ ૧,૧૬૪.૧૨॥

રોમહર્ષોઽસૃજઃ કાષ્ણ્યં કુષ્ઠલક્ષણમગ્રજમ્ ।
કૃષ્ણારુણકપાલાભં યદ્રૂક્ષં પરુષં તનુ ॥ ૧,૧૬૪.૧૩॥

વિસ્તૃતાકૃતિપર્યસ્તન્દૂષિતૈર્લોમભિશ્ચિતમ્ ।
કાપાલં તોદબહુલં તત્કુષ્ઠં વિષમં સ્મૃતમ્ ॥ ૧,૧૬૪.૧૪॥

ઉદુમ્બરફલાભાસં કુષ્ઠમૌદુમ્બરં વદેત્ ।
વર્તુલં બહુલકેત્યુક્તં દાહરુજાધિકમ્ ॥ ૧,૧૬૪.૧૫॥

અસંચ્છન્નમદરણં કૃમિવત્સ્યાદુદુમ્બરમ્ ।
સ્થિરં સત્યાનં ગુરુ સ્નિગ્ધં શ્વેતરક્તં મલાન્વિતમ્ ॥ ૧,૧૬૪.૧૬॥

અન્યોન્યસક્તપુચ્છૂનબહુકણ્ડૂસ્નુતિકૃમિ ।
શ્લક્ષ્ણપીતાભાસંયુક્તં મણ્ડલં પરિકીર્તિતમ્ ॥ ૧,૧૬૪.૧૭॥

સકણ્ડૂપિટિકા શ્યાવા સક્લેદા ચ વિચર્ચિકા ।
પરુષન્તત્રરક્તાન્તમન્તઃ શ્યામં સમુન્નતમ્ ॥ ૧,૧૬૪.૧૮॥

ઋષ્યજિહ્વાકૃતિપ્રોક્તં ઋષ્યજિહ્વં બહુક્રિમિ ।
હસ્તિચર્મખરસ્પર્શં ચર્માખ્યં કુષ્ઠમુચ્યતે ॥ ૧,૧૬૪.૧૯॥

અસ્વેદઞ્ચમત્સ્યશલ્કસન્નિભં કિટિમં પુનઃ ।
રૂક્ષાગ્નિવર્ણં દુઃસ્પર્શં કણ્ડૂમત્પરુષાસિતમ્ ॥ ૧,૧૬૪.૨૦॥

અન્તા રૂક્ષં બહિઃ સ્નિગ્ધમન્તર્ઘૃષ્ટં રજઃ કિરેત્ ।
શ્લક્ષ્ણસ્પર્શં તનુ સ્નિગ્ધં સ્વચ્છમસ્વેદપુષ્પવત્ ॥ ૧,૧૬૪.૨૧॥

પ્રાયેણ ચોર્ધ્વકાર્શ્યઞ્ચ કુણ્ડૈઃ કણ્ડૂપરૈશ્ચિતમ્ ।
રક્તૈરલંશુકા પાણિપાદે કુર્યાદ્વિપાદિકા ॥ ૧,૧૬૪.૨૨॥

તીવ્રાર્તિં ગાઢકણ્ડૂઞ્ચ સરાગપિડિકાચિતમ્ ।
દીર્ઘપ્રતાનદૂર્વાવદતસીકુસુમચ્છવિ ॥ ૧,૧૬૪.૨૩॥

ઉચ્છૂનમણ્ડલો દદ્રુઃ કણ્ડૂમાનિતિ કથ્યતે ।
સ્થૂલમૂલં સદાહાર્તિ રક્તસ્રાવં બહુવ્રણમ્ ॥ ૧,૧૬૪.૨૪॥

સાદહકક્લેદરુજં પ્રાયશઃ સર્વજન્મ ચ ।
રક્તાક્તમણ્ડલં પાણ્ડુ કણ્ડૂદાહરુજાન્વિતમ્ ॥ ૧,૧૬૪.૨૫॥

સોત્સેધમાચિતં રક્તૈઃ કઞ્જપર્ણમિવામ્બુભિઃ ।
પુણ્ડરીકં ભવેત્તદ્ધિ ચિતં સ્ફોટૈઃ સિતારુણૈઃ ॥ ૧,૧૬૪.૨૬॥

વિસ્ફોટપિટિકા પામા કણ્ડૂક્લેદરુજાન્વિતાઃ ।
સૂક્ષ્મા શ્યામારુણા રૂક્ષા પ્રાયઃ સ્ફિક્પાણિકૂર્પરે ॥ ૧,૧૬૪.૨૭॥

સસ્ફોટસંસ્પર્શસહં કણ્ડૂરક્તાતિદાહવત્ ।
રક્તદલં ચર્મદલં કાકણં તીવ્રદાહરુક્ ॥ ૧,૧૬૪.૨૮॥

પૂર્વરક્તઞ્ચ કૃષ્ણઞ્ચ કાકણં ત્રિફલોપમમ્ ।
કૃષ્ણલિઙ્ગૈર્યુતૈઃ સર્વૈઃ સ્વસ્વકારણતો ભવેત્ ॥ ૧,૧૬૪.૨૯॥

દોષભેદાય વિહિતૈરાદિશેલ્લિઙ્ગકર્મભિઃ ।
કુષ્ઠસ્વદોષાનુગતં સર્વદોષગતં ત્યજેત્ ॥ ૧,૧૬૪.૩૦॥

કુષ્ઠોક્તં યચ્ચ યચ્ચાસ્થિમજ્જાશુક્રસમાશ્રયમ્ ।
કૃચ્છ્રં મેદોમતઞ્ચૈવ યાપ્યં સ્નાપ્વાસ્થિમાંસગમ્ ॥ ૧,૧૬૪.૩૧॥

અકૃચ્છ્રં કફવાતોત્થં ત્વગ્ગતં ત્વમલઞ્ચ યત્ ।
તત્ર ત્વચિ સ્થિતે કષ્ઠે કાયે વૈવર્ણ્યરૂક્ષાતા ॥ ૧,૧૬૪.૩૨॥

સ્વેદતાપશ્ચયથવઃ શોણિતે પિશિતે પુનઃ ।

પાણિપાદાશ્રિતાઃ સ્ફોટાઃ ક્લેશાત્સન્ધિષુ ચાધિકમ્ ॥ ૧,૧૬૪.૩૩॥

દોષસ્યાભીક્ષ્ણયોગેન દલનં સ્યાચ્ચ મેદસિ ।
નાતિસંજ્ઞાસ્તિ મજ્જાસ્થિનેત્રવેગસ્વરક્ષયઃ ॥ ૧,૧૬૪.૩૪॥

ક્ષતે ચ ક્રિમિભિઃ શુક્રે સ્વદારાપત્યબાધનમ્ ।
યથાપૂર્વાણિ સર્વાણિ સ્વલિઙ્ગાનિ મૃગાદિષુ ॥ ૧,૧૬૪.૩૫॥

કષ્ટૈકસમ્ભવં શ્વિત્રં કિલાસં દારુણં ભવેત્ ।
નિર્દિષ્ટમપરિસ્ત્રાવિ ત્રિધાતૂદ્ભવસંશ્રયમ્ ॥ ૧,૧૬૪.૩૬॥

વાતાદ્રૂક્ષારુણં પિત્તાત્તામ્રં કમલપત્રવત્ ।
સદાહં રોમવિધ્વંસિ કફાચ્છ્વેતં ઘન ગુરુ ॥ ૧,૧૬૪.૩૭॥

સકણ્ડૂરં ક્રમાદ્રક્તમાંસમેદઃ સુ ચાદિશેત્ ।
વર્ણૈનૈવેદૃગુભયં કૃચ્છ્રં તચ્ચોત્તરોત્તરમ્ ॥ ૧,૧૬૪.૩૮॥

અશુક્લરોમબહુલમસંશ્લિષ્ટં મિથો નવમ્ ।
અનગ્નિદગ્ધજં સાધ્યં શ્વિત્રં વર્જ્યમતોઽન્યથા ॥ ૧,૧૬૪.૩૯॥

ગુહ્યપાણિતલૌષ્ઠેષુ જાતમપ્યચિરન્તરમ્ ।
વર્જનીયં વિશેષેણ કિલાસં સિદ્ધિમિચ્છિતા ॥ ૧,૧૬૪.૪૦॥

સ્પર્શૈકાહારસંગાદિસેવનાત્પ્રાયશો ગદાઃ ।
એકશય્યાસનાચ્ચૈવ વસ્ત્રમાલ્યાનુલેપનાત્ ॥ ૧,૧૬૪.૪૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
કુષ્ઠરોગનિદાન નામ ચતુઃ ષષ્ટ્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૫
ધન્વન્તરિરુવાચ ।
ક્રિમયશ્ચ દ્વિધા પ્રોક્તા બાહ્યભ્યન્તરભેદતઃ ।
બહિર્મલકફાસૃગ્વિટ્જન્મભેદાચ્ચતુર્વિધાઃ ॥ ૧,૧૬૫.૧॥

નામતો વિંશતિવિધા બાહ્યાસ્તત્ર મલોદ્ભવાઃ ।
તિલપ્રમાણસંસ્થાનવર્ણાઃ કેશામ્બરાશ્રયાઃ ॥ ૧,૧૬૫.૨॥

બહુપાદાશ્ચ સૂક્ષ્માશ્ચ યૂકા લિક્ષાશ્ચ નામતઃ ।
દ્વિધા તે કોષ્ઠપિડિકાઃ કણ્ડૂગણ્ડાન્પ્રકુર્વતે ॥ ૧,૧૬૫.૩॥

કુષ્ઠૈકહેતવોઽન્તર્જાઃ શ્લેષ્મજા બાહ્યસમ્ભવાઃ ।
મધુરાન્નગુડક્ષીરદધિમત્સ્યનવૌદનૈઃ ॥ ૧,૧૬૫.૪॥

કફાદામાશયે જાતા વૃદ્ધાઃ સર્પન્તિ સર્વતઃ ।
પૃથુબ્રધ્નનિભાઃ કેચિત્કેચિદ્ગણ્ડૂપદોપમાઃ ॥ ૧,૧૬૫.૫॥

રૂઢધાન્યાઙ્કુરાકારાસ્તનુદીર્ઘાસ્તથાણવઃ ।
શ્વેતાસ્તામ્રાવભાસાશ્ચ નામતઃ સપ્તધા તુ તે ॥ ૧,૧૬૫.૬॥

અન્ત્રાદા ઉદરાવેષ્ટા હૃદયાદા મહાગુદાઃ ।
ચ્યુરવો દર્ભકુસુમાઃ સુગન્ધાસ્તે ચ કુર્વતે ॥ ૧,૧૬૫.૭॥

હૃલ્લાસમાસ્યશ્રવણમવિપાકમરોચકમ્ ।
મૂર્છાચ્છર્દિજ્વરાનાહકાર્શ્યક્ષવથુપીનસાન્ ॥ ૧,૧૬૫.૮॥

રક્તવાહિશિરાસ્થાનરક્તજા જન્તવોઽણવઃ ।
અપાદા વૃત્તતામ્રાશ્ચ સૌક્ષ્મ્યાત્કેચિદદર્શનાઃ ॥ ૧,૧૬૫.૯॥

કેશાદા રોમવિધ્વંસા રોમદ્વીપા ઉદુમ્બરાઃ ।
ષટ્તે કુષ્ઠૈકકર્માણઃ સહસૌરસમાતરઃ ॥ ૧,૧૬૫.૧૦॥

પક્વાશયે પુરીષોત્થા જાયન્તેઽથોવિસર્પિણઃ ।
વૃદ્ધાસ્તે સ્યુર્ભવેયુશ્ચ તે યદામાશયોન્મુખાઃ ॥ ૧,૧૬૫.૧૧॥

તદાસ્યોદ્ગારનિઃ શ્વામવિડ્ગન્ધાનુવિધાયિનઃ ।
પૃથુવૃત્તતનુસ્થૂલાઃ શ્યાવપીતસિતાસિતાઃ ॥ ૧,૧૬૫.૧૨॥

તે પઞ્ચનામ્ના ક્રિમયઃ કકેરુકમકેરુકાઃ ।
સૌસુરાદાઃ સશૂલાખ્યા લેલિહા જનયન્તિ હિ ॥ ૧,૧૬૫.૧૩॥

વડ્ભેદશૂલવિષ્ટમ્ભકાર્શ્યપારુષ્યપાણ્ડુતાઃ ।
રોમહર્ષાગ્નિસદનં ગુદકણ્ડૂર્વિમાર્ગગાઃ ॥ ૧,૧૬૫.૧૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ક્રિમિનિદાનં નામ પઞ્ચષષ્ઠ્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૬
ધન્વન્તરિરુવાચ ।
વાતવ્યાધિનિદાનં તે વક્ષ્યે સુશ્રુત તચ્છૃણુ ।

સર્વથાનર્થકથને વિઘ્ન એવ ચ કારણમ્ ॥ ૧,૧૬૬.૧॥

અદૃષ્ટદુષ્ટપવનશરીરમવિશેષતઃ ।
સ વિશ્વકર્મા વિશ્વાત્મા વિશ્વરૂપઃ પ્રજાપતિઃ ॥ ૧,૧૬૬.૨॥

સ્રષ્ટા ધાતા વિભુર્વિષ્ણુઃ સંહર્તા મૃત્યુરન્તકઃ ।
તદ્વદુક્તં ચ યત્નેન યતિતવ્યમતઃ સદા ॥ ૧,૧૬૬.૩॥

તસ્યોક્તે દોષવિજ્ઞાને કર્મ પ્રાકૃતવૈકૃતમ્ ।
સમાસવ્યાસતો દોષભેદાનામવધાર્ય ચ ॥ ૧,૧૬૬.૪॥

પ્રત્યેકં પઞ્ચધા વીરો વ્યાપારશ્ચેહ વૈકૃતઃ ।
તસ્યોચ્યતે વિભાગેન સનિદાનં સલક્ષણમ્ ॥ ૧,૧૬૬.૫॥

ધાતુક્ષયકરૈર્વાયુઃ ક્રુદ્ધો નાતિનિષેવ્યતે ।
ચતુઃ સ્નોતોઽવકાશેષુ ભૂયસ્તાન્યેવ પૂરયેત્ ॥ ૧,૧૬૬.૬॥

તેભ્યસ્તુ દોષપૂર્ણેભ્યઃ પ્રચ્છાદ્ય વિવરં તતઃ ।
તવ વાયુઃ સકૃત્ક્રુદ્ધઃ શૂલાનાહાન્ત્રકૂજનમ્ ॥ ૧,૧૬૬.૭॥

મલરોધં સ્વરભ્રંશં દૃષ્ટિપૃષ્ઠકટિગ્રહમ્ ।
કરોત્યેવ પુનઃ કાયે કૃચ્છ્રાનન્યાનુપદ્રવાન્ ॥ ૧,૧૬૬.૮॥

આમાશયોત્થવમથુશ્વાસકાસવિષૂચિકાઃ ।
કણ્ડૂપરોધધર્માદિવ્યાધીનૂર્ધ્વઞ્ચ નાભિતઃ ॥ ૧,૧૬૬.૯॥

શ્રોત્રાદીન્દ્રિયબાધાં ચ ત્વચિ સ્ફોટનરૂક્ષતામ્ ।
ચક્રેતીવ્રરુજાશ્વાસગરામયવિવર્ણતાઃ ॥ ૧,૧૬૬.૧૦॥

અન્ત્રસ્યાન્તઞ્ચ વિષ્ટમ્ભમરુચિં કૃશતાં ભ્રમમ્ ।
માંસમેદોગતગ્રન્થિં ચર્માદાવુપકર્કશમ્ ॥ ૧,૧૬૬.૧૧॥

ગુર્વઙ્ગન્તુદ્યતેઽત્યર્થં દણ્ડમુષ્ટિહતં યથા ।
અસ્થિસ્થઃ સક્થિસન્ધ્યસ્થિશૂલં તીવ્રઞ્ચ લક્ષયેત્ ॥ ૧,૧૬૬.૧૨॥

મજ્જસ્થોઽસ્થિષુ ચાસ્થૈર્યમસ્વપ્નં યત્તદા રુજામ્ ।
શુક્રસ્ય શીઘ્રમુત્સઙ્ગસર્ગાન્વિકૃતિમેવ વા ॥ ૧,૧૬૬.૧૩॥

તત્તદ્ગર્ભસ્થશુક્રસ્થઃ શિરસ્યાધ્માનરિક્તાતા ।
તત્ર સ્થાનસ્થિતઃ કુર્યાત્ક્રુદ્ધઃ શ્વયથુકૃચ્છ્રતામ્ ॥ ૧,૧૬૬.૧૪॥

જલપૂર્ણદૃતિસ્પર્શં શોષં સન્ધિગતોઽનિલઃ ।
સર્વાઙ્ગસંશ્રયસ્તોદભેદસ્ફુરણભઞ્જનમ્ ॥ ૧,૧૬૬.૧૫॥

સ્તમ્ભનાક્ષેપણં સ્વપ્નઃ સન્ધિભઞ્જનકમ્પનમ્ ।
યદા તુ ધમનીઃ સર્વાઃ ક્રુદ્ધોઽભ્યેતિ મુહુર્મુહુઃ ।
તદાઙ્ગમાક્ષિપત્યેષ વ્યાધિરાક્ષેપણઃ સ્મૃતઃ ॥ ૧,૧૬૬.૧૬॥

અધઃ પ્રતિહતો વાયુર્વ્રજેદૂર્ધ્વં યદા પુનઃ ।
તદાવષ્ટભ્ય હૃદયં શિરઃ શઙ્ખૌ ચ પીડયેત્ ॥ ૧,૧૬૬.૧૭॥

સક્ષિપેત્પરિતો ગાત્રં હનું વા ચાસ્ય નામયત્ ।
કૃચ્છ્રાદુચ્છ્વસિતં ચાપિ નિમીલન્નયનદ્વયમ્ ॥ ૧,૧૬૬.૧૮॥

કપોત ઇવ કૂજેચ્ચ નિઃ સંગઃ સોપતન્ત્રકઃ ।
સ એવ વામનાસાયાં યુક્તસ્તુ મરુતા હૃદિ ॥ ૧,૧૬૬.૧૯॥

પ્રાપ્નોતિ ચ મુહુઃ સ્વાસ્થ્યં મુહુરસ્વાસ્થ્યવાન્ભવેત્ ।
અભિઘાતસમુત્થશ્ચ દુશ્ચિકિત્સ્યતમો મતઃ ॥ ૧,૧૬૬.૨૦॥

સ્વેદસ્તમ્ભં તદા તસ્ય વાયુશ્છિન્નતનુર્યદા ।
વ્યાપ્નોતિ સકલં દેહં યત્ર ચાયામ્યતે પુનઃ ॥ ૧,૧૬૬.૨૧॥

અન્તર્ધાન્તુગતશ્ચૈવ વેગસ્તમ્ભં ચ નેત્રયોઃ ।
કરોતિ જૃમ્ભાં સદનં દશનાનાં હતોદ્યમમ્ ॥ ૧,૧૬૬.૨૨॥

પાર્શ્વયોર્વેદનાં બાહ્યાં હનુપૃષ્ઠસિરોગ્રહમ્ ।
દેહસ્ય બહિરાયામં પૃષ્ઠતો હૃદયે શિરઃ ॥ ૧,૧૬૬.૨૩॥

ઉરશ્ચોત્ક્ષિપ્યતે તત્ર સ્કન્ધો વા નામ્યતે તદા ।
દન્તેષ્વાસ્યે ચ વૈવર્ણ્યં હ્યસ્વેદસ્તત્ર ગાત્રતઃ ॥ ૧,૧૬૬.૨૪॥

બાહ્યાયામં હનુસ્તમ્ભં બ્રવતે વાતરોગિણમ્ ।
વિણ્મૂત્રમસૃજં પ્રાપ્ય સસમીરસમીરણાઃ? ॥ ૧,૧૬૬.૨૫॥

આયચ્છન્તિ તનોર્દેષાઃ સર્વમાપાદમસ્તકમ્ ।
તિષ્ઠતઃ પાણ્ડુમાત્રસ્ય વ્રણાયામઃ સુવર્ધિતઃ ॥ ૧,૧૬૬.૨૬॥

ગાત્રવેગે ભવેત્સ્વાસ્થ્યં સર્વેષ્વાક્ષેપણેન તત્ ।
જિહ્વાવિલેખનાદુષ્ણભક્ષણાદતિમાનતઃ ॥ ૧,૧૬૬.૨૭॥

કુપિતો હનુમૂલસ્થઃ સ્તમ્ભયિત્વાનિલો હનુમ્ ।

કરોતિ વિવૃતાસ્યત્વમથવા સંવૃતાસ્યતામ્ ॥ ૧,૧૬૬.૨૮॥

હનસ્તમ્ભઃ સ તેન સ્યાત્કૃચ્છ્રાચ્ચર્વણભાષણમ્ ।
વાગ્વાદિની શિરાસ્તમ્ભો જિહ્વાં સ્તમ્ભયતેઽનિલઃ ॥ ૧,૧૬૬.૨૯॥

જિહ્વાસ્તમ્ભઃ સ તેનાન્નપાનવાક્યેષ્વનીશતા ।
શિરસા ભારહરણાદતિહાસ્યપ્રભાષણાત્ ॥ ૧,૧૬૬.૩૦॥

વિષમાદુપધાનાચ્ચ કઠિનાનાં ચ ચર્વણાત્ ।
વાયુર્વિવર્ધતે તૈશ્ચ વાતૂલૈરૂર્ધ્વમાસ્થિતઃ ॥ ૧,૧૬૬.૩૧॥

વક્રીકરોતિ વક્ત્રં ચ હ્યુચ્ચૈર્હસિતમીક્ષિતમ્ ।
તતોઽસ્ય કુરુતે મૃદ્ધીં વાક્ષક્તિં સ્તબ્ધનેત્રતામ્ ॥ ૧,૧૬૬.૩૨॥

દન્તચાલં સ્વરભ્રંશઃ શ્રુતિહાનીક્ષિતગ્રહૌ ।
ગન્ધાજ્ઞાનં સ્મૃતિધ્વંસસ્ત્રાસઃ શ્વાસશ્ચ જાયતે ॥ ૧,૧૬૬.૩૩॥

નિષ્ઠીવઃ પાર્શ્વતોદશ્ચ હ્યેકસ્યાક્ષ્ણો નિમીલનમ્ ।
જત્રોરૂર્ધ્વં રુજસ્તીવ્રાઃ શરીરાર્ધધરોઽપિ વા ॥ ૧,૧૬૬.૩૪॥

તમાહુરર્દિતં કેચિદેકાઙ્ગમથ ચાપરે ।
રક્તમાશ્રિત્ય ચ શિરાઃ કુર્યાન્મૂર્ધધરાઃ શિરાઃ? ॥ ૧,૧૬૬.૩૫॥

રૂક્ષઃ સવેદનઃ કૃષ્ણઃ સોઽસાધ્યઃ સ્યાચ્છિરોગ્રહઃ ।
તનું ગૃહીત્વા વાયુશ્ચ સ્નાયુસ્તથૈવ ચ ॥ ૧,૧૬૬.૩૬॥

પક્ષમન્યતરં હન્તિ પક્ષાઘાતઃ સ ઉચ્યતે ।
કૃત્સ્નસ્ય કાયસ્યાર્ધં સ્યાદકર્મણ્યમચેતનમ્ ॥ ૧,૧૬૬.૩૭॥

એકાઙ્ગરોગતાં કેચિદન્યે કક્ષરુજાં વિદુઃ ।
સર્વાઙ્ગરોધઃ સ્તમ્ભશ્ચ સર્વકાયાશ્રિતેઽનિલે ॥ ૧,૧૬૬.૩૮॥

શુદ્ધવાતકૃતઃ પક્ષઃ કૃચ્છ્રસાધ્યતમો મતઃ ।
કૃચ્છ્રશ્ચાન્યેન સંસૃષ્ટો વિવૃદ્ધઃ ક્ષયહેતુકઃ ॥ ૧,૧૬૬.૩૯॥

આમબદ્ધાયનઃ કુર્યાત્સંસ્તભ્યાઙ્ગં કફાન્વિતઃ ।
અસાધ્ય એવ સર્વો હિ ભવેદ્દણ્ડાપતાનકઃ ॥ ૧,૧૬૬.૪૦॥

અંસમૂલોત્થિતો વાયુઃ શિરાઃ સંકુચ્ય તત્રગઃ ।
બહિઃ પ્રસ્યન્દિતહરં જનયત્યેવ બાહુકમ્ ॥ ૧,૧૬૬.૪૧॥

તલં પ્રત્યઙ્ગુલીનાં યઃ કણ્ડરા બાહુપૃષ્ઠતઃ ।
બાહ્વોઃ કર્મક્ષયકરી વિપૂચી વેતિ સોચ્યતે ॥ ૧,૧૬૬.૪૨॥

વાયુઃ કટ્યાશ્રિતઃ સક્થ્નઃ કણ્ડરામાક્ષિપેદ્યદા ।
તદા ખઞ્જો ભવેજ્જન્તુઃ પઙ્ગુઃ સક્થ્નોર્દ્વયોર્વધાત્ ॥ ૧,૧૬૬.૪૩॥

કમ્પતે ગમનારમ્ભે ખઞ્જન્નિવ ચ ગચ્છતિ ।
કલાયખઞ્જં તં વિદ્યાન્મુક્તસન્ધિપ્રબન્ધનમ્ ॥ ૧,૧૬૬.૪૪॥

શીતોષ્ણદ્રવસંસુષ્કગુરુસ્નિગ્ધૈશ્ચ સેવિતૈઃ ।
જીર્ણાજીર્ણે તથાયાસક્ષોભસ્નિગ્ધપ્રજાગરૈઃ ॥ ૧,૧૬૬.૪૫॥

શ્લેષ્મભેદઃ સમયે પરમત્યર્થસંચિતમ્ ।
અભિભૂયેતરં દોષં શરીરં પ્રતિપદ્યતે ॥ ૧,૧૬૬.૪૬॥

સક્થ્યસ્થીનિ પ્રપૂર્યાન્તઃ શ્લેષ્મણા સ્તમ્ભિતેન તત્ ।
તદાસ્થિ સ્નાતિ તેનોરોસ્તથા શીતાનિલેન તુ ॥ ૧,૧૬૬.૪૭॥

શ્યામાઙ્ગમઙ્ગસ્તૈમિત્યતન્દ્રામૂર્છારુચિજ્વરૈઃ ।
તમૂરુસ્તમ્ભમિત્યાહ બાહ્યવાતમથાપરે ॥ ૧,૧૬૬.૪૮॥

વાતશોણિતસંશોથો જાનુમધ્યે મહારુજઃ ।
જ્ઞેયઃ ક્રોષ્ટુકશીર્ષસ્તુ સ્થૂલક્રોષ્ટુકશીર્ષવત્ ॥ ૧,૧૬૬.૪૯॥

રુક્પાદવિષમન્યસ્તે શ્રમાદ્વા જાયતે યદા ।
વાતેન ગુલ્ફમાક્ષિત્ય તમાહુર્વાતકણ્ટકમ્ ॥ ૧,૧૬૬.૫૦॥

પાર્ષ્ણિપ્રત્યઙ્ગુલીનાભૌ કણ્ઠે વા મારુતાર્દિતે ।
સતિક્ષેપં નિગૃહ્ણાતિ ગૃધ્રસીં તાં પ્રચક્ષતે ॥ ૧,૧૬૬.૫૧॥

હૃષ્યેતે ચરણૌ યસ્ય ભવેતાં ચાપિ સુપ્તકૌ ।
પાદહર્ષઃ સ વિજ્ઞેયઃ કફમારુતકોપજઃ ॥ ૧,૧૬૬.૫૨॥

પાદયોઃ કુરુતે દાહં પિત્તાસૃક્સહિતોઽનિલઃ ।
વિશેષતશ્ચઙ્ક્રમતઃ પાદદાહં તમાદિશેત્ ॥ ૧,૧૬૬.૫૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વાતવ્યાધિનિદાનં નામ ષટૂષષ્ટ્યધિકશતતમોઽધ્યાયઃ

ધન્વન્તરીરુવાચ ।
વાતરક્તનિદાનં તે વક્ષ્યે સુશ્રુત તચ્છૃણુ ।
વિરુદ્ધાધ્યશનક્રોધદિવાસ્વપ્નપ્રજાગરૈઃ ॥ ૧,૧૬૭.૧॥

પ્રાયશઃ સુકુમારાણાં મિથ્યાહારવિહારિણામ્ ।
સ્થૂલાનાં સુખિનાં ચાપિ કુપ્યતે વાતશોણિતમ્ ॥ ૧,૧૬૭.૨॥

અગ્નિઘાતાદશુદ્ધેશ્ચ નૃણામસૃજિ દૂષિતે ।
વાતલૈઃ શીતલૈર્વાયુર્વૃદ્ધઃ ક્રુદ્ધો વિમાર્ગગઃ ॥ ૧,૧૬૭.૩॥

તાદૃશૈવાસૃજા રુદ્ધઃ પ્રાક્તદૈવ પ્રદૂષયેત્ ।
તથા વાતો ગુદે પીડાં બલાસં વાતશોણિતમ્ ॥ ૧,૧૬૭.૪॥

સંસ્તભ્ય જનયેત્પૂર્વં પશ્ચાત્સર્વત્ર ધાવતિ ।
વિશેષાદ્ભ્રમનાદ્યૈશ્ચ પ્રલમ્બસ્તસ્ય લક્ષણમ્ ॥ ૧,૧૬૭.૫॥

ભવિષ્યતઃ કુષ્ઠસમં તથા સામ્બુદસંજ્ઞકમ્ ।
જાનુજઙ્ઘોરુકટ્યંસહસ્તપાદાઙ્ગસન્ધિષુ ॥ ૧,૧૬૭.૬॥

કણ્ડૂસ્ફુરણનિસ્તોદભેદગૌરવસુપ્તતાઃ ।
ભૂત્વા ભૂત્વા પ્રશામ્યન્તિ મુહુરાવિર્ભવન્તિ ચ ॥ ૧,૧૬૭.૭॥

પાદયોર્મૂલમાસ્થાય કદાચિદ્ધસ્તયોરપિ ।
આખોરિવ વિલં ક્રુદ્ધઃ કૃત્સ્નં દેહં બિધાવતિ ॥ ૧,૧૬૭.૮॥

ત્વઙ્માંસાશ્રયમત્તાનં તત્પૂર્વં જાયતે તતઃ ।
કાલાન્તરેણ ગમ્ભીરં સર્વધાતૂનભિદ્રવેત્ ॥ ૧,૧૬૭.૯॥

કટ્યાદિસંયતસ્થાને ત્વક્તામ્રશ્યાવલોહિતાઃ ।
શ્વયથુર્ગ્રથિતઃ પાકઃ સ વાયુશ્ચાસ્થિમજ્જસુ ॥ ૧,૧૬૭.૧૦॥

છિન્દન્નિવ ચરત્યન્તશ્ચકીકુર્વંશ્ચ વેગવાન્ ।
કરોતિ ખઞ્જં પઙ્ગું વા શરીરં સર્વતશ્ચરન્ ॥ ૧,૧૬૭.૧૧॥

વાતાધિકેઽધિકં તત્ર શૂલસ્ફુરણભઞ્જનમ્ ।
શોથસ્ય રૌક્ષ્યં કૃષ્ણત્વં શ્યાવતાવૃદ્ધિહાનયઃ ॥ ૧,૧૬૭.૧૨॥

ધમન્યઙ્ગુલિસન્ધીનાં સંકોચોઙ્ગગ્રહો તિરુક્ ।
શીતદ્વેષાનુપશયૌ સ્તમ્ભવેપથુસુપ્તયઃ ॥ ૧,૧૬૭.૧૩॥

રક્તે શોથોઽતિરુક્તોદસ્તામ્રશ્ચિમિચિમાયતે ।

સ્નિગ્ધરૂક્ષૈઃ સમં નૈતિ કણ્ડુક્લેદસમન્વિતઃ ॥ ૧,૧૬૭.૧૪॥

પિત્તે વિદાહઃ સમોહઃ સ્વાદો મૂર્છા મદસ્તૃષા ।
સ્પર્શાસહત્વં રુગ્રાવઃ શોષઃ પાકો ભૃશોષ્મતા ॥ ૧,૧૬૭.૧૫॥

કફે સ્તૈમિત્યગુરુતા સુપ્તિસ્નિગ્ધત્વશીતતા ।
કણ્ડૂર્મન્દા ચ રુગ્દ્વન્દ્વં સર્વલિઙ્ગઞ્ચ સંકરાત્ ॥ ૧,૧૬૭.૧૬॥

એકદોષઞ્ચ સંસાધ્યં યાપ્યઞ્ચૈવ દ્વિદોષજમ્ ।
ત્રિદોષજન્ત્યજેદાશુ રક્તપિત્તં સુદારુણમ્ ॥ ૧,૧૬૭.૧૭॥

રક્તમઙ્ગે નિહન્ત્યાશુ શાખાસન્ધિષુ મારુતઃ ।
નિવેશ્યાન્યોન્યમાવાર્ય વેદનાભિર્હરત્યસૂન્ ॥ ૧,૧૬૭.૧૮॥

વાયૌ પઞ્ચાત્મકે પ્રાણે રૌક્ષ્યાચ્ચાપલ્યલઙ્ઘનૈઃ ।
અત્યાહારાભિઘાતાચ્ચ વેગોદીરણચારણૈઃ ॥ ૧,૧૬૭.૧૯॥

કુપિતશ્ચક્ષુરાદીનામુપઘાતં પ્રકલ્પયેત્ ।
પીનસો દાહતૃટ્કાસશ્વાસાદિશ્ચૈવ જાયતે ॥ ૧,૧૬૭.૨૦॥

કણ્ઠરોધોમલભ્રંશચ્છર્દ્યરોચકપીનસાન્ ।
કુર્યાચ્ચ ગલગણ્ડદીંસ્તઞ્જત્રુમૂર્ધ્વસંશ્રયઃ ॥ ૧,૧૬૭.૨૧॥

વ્યાનોઽતિગમનસ્નાનક્રીડાવિષયચોષ્ટિતૈઃ ।
વિરુદ્ધરૂક્ષભીહર્ષવિષાદાદ્યૈશ્ચ દૂષિતઃ ॥ ૧,૧૬૭.૨૨॥

પુંસ્ત્વોત્સાહબલભ્રંશશોકચિત્તપ્લવજ્વરાન્ ।
સર્વાકારાદિનિસ્તોદરોમહર્ષં સુષુમતામ્ ॥ ૧,૧૬૭.૨૩॥

કુષ્ઠં વિસર્પમન્યચ્ચ કુર્યાત્સર્વાઙ્ગસાદનમ્ ।
સમાનો વિષમાજીર્ણશીતસઙ્કીર્ણભોજનૈઃ ॥ ૧,૧૬૭.૨૪॥

કરોત્યકાલશયનજાગરાદ્યૈશ્ચ દૂષિતઃ ।
શૂલગુલ્મગ્રહણ્યાદીન્યકૃત્કામાશ્રયાન્ગદાન્ ॥ ૧,૧૬૭.૨૫॥

અપાનો રૂક્ષગુર્વન્નવેગાઘાતાતિવાહનૈઃ ।
યાનપાનસમુત્થાનચઙ્ક્રમૈશ્ચાતિસેવિતૈઃ ॥ ૧,૧૬૭.૨૬॥

કુપિતઃ કુરુતે રોગાન્કૃત્સ્નાન્પક્વાશયાશ્રયાન્ ।
મૂત્રસુક્રપ્રદોષાર્શોગુદભ્રંશાદિકાન્બહૂન્ ॥ ૧,૧૬૭.૨૭॥

સર્વાઙ્ગમાતતં સામં તન્દ્રાસ્તૈમિત્યગૌરવૈઃ ।
સ્નિગ્ધત્વાદ્બોધ કાલસ્ય શૈત્યશોથાગ્નિહાનયઃ ॥ ૧,૧૬૭.૨૮॥

કણ્ડૂરૂક્ષાતિનાશેન તદ્વિધોપશમેન ચ ।
મુક્તિં વિદ્યાન્નિરામં તં તન્દ્રાદીનાં વિપર્યયાત્ ॥ ૧,૧૬૭.૨૯॥

વાયોરાવરણં વાતો બહુભેદં પ્રચક્ષતે ।
પિત્તલિઙ્ગાવૃતે દાહસ્તૃષ્ણા શૂલં ભ્રમસ્તમઃ ॥ ૧,૧૬૭.૩૦॥

કટુકોષ્ણામ્લલવણૈર્વિદાહશીતકામતા ।
શૈત્યગૌરવશૂલાગ્નિકટ્વાજ્યપયસોઽધિકમ્ ॥ ૧,૧૬૭.૩૧॥

લઙ્ઘનાયાસરૂક્ષોષ્ણકામતા ચ કફાવૃતે ।
કફાવૃતેઽઙ્ગમર્દઃ સ્યાદ્ધૃલ્લાસો ગુરુતારુચિઃ ॥ ૧,૧૬૭.૩૨॥

રક્તવૃતે સદાહાર્તિસ્તવઙ્માંસાશ્રયજા ભૃશમ્ ।
ભવેત્સરાગઃ શ્વયથુર્જાયન્તે મણ્ડલાનિ ચ ॥ ૧,૧૬૭.૩૩॥

શોથો માંસેન કઠિનો હૃલ્લાસપિટિકાસ્તથા ।
હર્ષઃ પિપીલિકાનાં ચ સંચાર ઇવ જાયતે ।
ચલલગ્નો મૃદુઃ શીતઃ શોથો ગાત્રેષુ રોચકઃ ॥ ૧,૧૬૭.૩૪॥

આઢ્યવાત ઇવ જ્ઞેયઃ સ કૃચ્છ્રો મેદસાવતઃ ।
સ્પર્શ આચ્છાદિતેત્યુષ્ણશીતલશ્ચ ત્વનાવૃતે ।
મજ્જાવૃતે તુ વિષમં જૃમ્ભણં પરિવેષ્ટનમ્ ॥ ૧,૧૬૭.૩૫॥

શૂલઞ્ચ પઞ્યિમાનશ્ચ પાણિભ્યાં લભતે સુખમ્ ।
શુક્રાવૃતે તુ શોથે વૈ ચાતિવેગો ન વિદ્યતે ॥ ૧,૧૬૭.૩૬॥

ભુક્તે કુક્ષૌ રુજા જીર્ણે નિકૃત્તિર્ભવતિ ધ્રુવમ્ ।
મૂત્રાપ્રવૃત્તિરાધ્માનં બસ્તેર્મૂત્રાવૃતે ભવેત્ ॥ ૧,૧૬૭.૩૭॥

છિદ્રાવૃતે વિબન્ધોઽથ સ્વસ્થાનં પરિકૃન્ત તિ ।
પતત્યાશુ જ્વરાક્રાન્તો મૂર્છાં ચ લભતે નરઃ ॥ ૧,૧૬૭.૩૮॥

સકૃત્પીડિતમન્યેન દુષ્ટં શુક્રં ચિરાત્સૃજેત્ ।
સર્વધાત્વાવૃતે વાયૌ શ્રોણિવઙ્ક્ષણપૃષ્ઠરુક્ ॥ ૧,૧૬૭.૩૯॥

વિલોમે મારુતે ચૈવ હૃદયં પરિપીડ્યતે ।
ભ્રમો મૂર્છા રુજા દાહઃ પિત્તેન પ્રાણ આવૃતે ॥ ૧,૧૬૭.૪૦॥

રુજા તન્દ્રા સ્વરભ્રંશો દાહો વ્યાને તુ સર્વશઃ ।
ક્રમોં ગચેષ્ટાભઙ્ગશ્ચ સન્તાપઃ સહવેદનઃ ॥ ૧,૧૬૭.૪૧॥

સમાન ઊષ્મોપહતિઃ સસ્વેદોપરતિઃ સુતૃટ્ ।
દાહશ્ચ સ્યાદપાને તુ મલે હારિદ્રવર્ણતા ॥ ૧,૧૬૭.૪૨॥

રજોવૃદ્ધિસ્તાપનઞ્ચ તથા ચાનાહમેહનમ્ ।
શ્લેષ્મણા પ્રાવૃતે પ્રાણે નાદઃ સ્નોતોઽવરોધનમ્ ॥ ૧,૧૬૭.૪૩॥

ષ્ઠીવનઞ્ચૈવ સસ્વેદશ્વાસનિઃ શ્વાસસંગ્રહઃ ।
ઉદાને ગુરુગાત્રત્વમરુચિર્વાક્સ્વરગ્રહઃ ॥ ૧,૧૬૭.૪૪॥

બલવર્ણપ્રણાશશ્ચા પાને પર્વાસ્થિસંગ્રહઃ ।
ગુરુતાઙ્ગેષુ સર્વેષુ સ્થૂલત્વઞ્ચાગતં ભૃશમ્ ॥ ૧,૧૬૭.૪૫॥

સમાનેઽતિક્રિયાજ્ઞત્વમસ્વેદો મન્દવહ્નિતા ।
અપાને સકલં મૂત્રં શકૃતઃ સ્યાત્પ્રવર્તનમ્? ॥ ૧,૧૬૭.૪૬॥

ઇતિ દ્વાવિંશતિવિધં વાતરક્તામયં વિદુઃ ।
પ્રાણાદયસ્તથાન્યોઽન્યં સમાક્રાન્તા યથાક્રમમ્ ॥ ૧,૧૬૭.૪૭॥

સર્વેઽપિ વિંશતિવિધં વિદ્યાદાવરણઞ્ચ યત્ ।
હૃલ્લાસોચ્છ્વાસસંરોધઃ પ્રતિશ્યાયઃ શિરોગ્રહઃ ॥ ૧,૧૬૭.૪૮॥

હૃદ્રોગો મુખશોષશ્ચ પ્રાણેનાપાન આવૃતે ।
ઉદાનેનાવૃતે પ્રાણે ભવેદ્વૈ બલસંક્ષયઃ ॥ ૧,૧૬૭.૪૯॥

વિચારણેન વિભજેત્સર્વમાવરણં ભિષક્ ।
સ્થાનાન્યપેક્ષ્ય વાતાનાં વૃર્ધિહાનિં ચ કર્મણામ્ ॥ ૧,૧૬૭.૫૦॥

પ્રાણાદીનાઞ્ચ પઞ્ચાનાં પિત્તમાવરણં મિથઃ ।
પિત્તાદીનામાવસતિર્મિશ્રાણાં મિશ્રિતૈશ્ચ તૈઃ ॥ ૧,૧૬૭.૫૧॥

મિશ્રૈઃ પિત્તાદિભિસ્તદ્વન્મિશ્રાણ્યપિત્વનેકધા ।
તાંલ્લક્ષયેદવહિતો યથાસ્વં લક્ષણોદયાત્ ॥ ૧,૧૬૭.૫૨॥

શનૈઃ શનૈશ્ચોપશયાન્દૃઢાનપિ મુહુર્મુહુઃ ।
વિશેષાજ્જીવિતં પ્રાણ ઉદાનો બલમુચ્યતે ।
સ્યાત્તયોઃ પીડનાદ્ધનિરાયુષઞ્ચ બલસ્ય ચ ॥ ૧,૧૬૭.૫૩॥

આવૃતા વાયવોઽજ્ઞાતા જ્ઞાતા વા સ્થાનવિચ્યુતાઃ ।

પ્રયત્નેનાપિ દુઃસાધ્યા ભવેયુર્વાનુપદ્રવાઃ ॥ ૧,૧૬૭.૫૪॥

વિદ્રધિપ્લીહહૃદ્રોગગુલ્માગ્નિસદનાદયઃ ।
ભવન્ત્યુપદ્રવાસ્તેષામાવૃતાનામુપેક્ષયા ॥ ૧,૧૬૭.૫૫॥

નિદાનં સુશ્રુત ! મયા આત્રેયોક્તં સમીરિતમ્ ।
સર્વરોગવિવેકાય નરાદ્યાયુઃ પ્રવૃદ્ધયે ॥ ૧,૧૬૭.૫૬॥

એવં વિજ્ઞાય રોગાદીંશ્ચિકિત્સામથ વૈ ચરેત્ ।
ત્રિફલા સર્વરોગઘ્ની મધ્વાજ્યગુડસંયુતા ॥ ૧,૧૬૭.૫૭॥

સવ્યોષા ત્રિફલા વાપિ સર્વરોગપ્રમર્દિની ।
શતાવરીગુડૂચ્યગ્નિવિડઙ્ગેન યુતાથવા ॥ ૧,૧૬૭.૫૮॥

શતાવરી ગુડૂચ્યગ્નિઃ શુણ્ઠીમૂષલિકા બલા ।
પુનર્નવા ચ બૃહતી નિર્ગુણ્ડી નિમ્બપત્રકમ્ ॥ ૧,૧૬૭.૫૯॥

ભૃઙ્ગરાજશ્ચામલકં વાસકસ્તદ્રસેન વા ।
ભાવિતા ત્રિફલા સપ્તવારમેખમથાપિવા ॥ ૧,૧૬૭.૬૦॥

પૂર્વોક્તશ્ચ યથાલાભયુક્તૈશ્ચૂર્ણઞ્ચ મોદકઃ ।
વટિકા ઘૃતતૈલં વા કષાયો શોષરોગનુત્ ।
પલં પલાર્ધકં વાપિ કર્ષં કર્ષાર્ધમેવ વા ॥ ૧,૧૬૭.૬૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વાતરક્તનિ સપ્તષષ્ટ્યાધિકશતતમોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬૮
નિદાનં સમાપ્તમ્ ।
ધન્વન્તરિરુવાચ ।
સર્વરોગહરં સિદ્ધં યોગસારં વદામ્યહમ્ ।
શ્ ृણુ સુશ્રુતં સંક્ષેપાત્પ્રાણિનાં જીવહેતવે ॥ ૧,૧૬૮.૧॥

કષાયકટુતિક્તામ્લરૂક્ષાહારાદિભોજનાત્ ।
ચિન્તાવ્યવયવ્યાયામભયશોકપ્રજાગરાત્ ॥ ૧,૧૬૮.૨॥

ઉચ્ચૈર્ભાષાતિભારાચ્ચ કર્મયોગાતિકર્ષણાત્ ।
વાયુઃ કુપ્યતિ પર્જન્યે જીર્ણાન્ને દિનસંક્ષયે ॥ ૧,૧૬૮.૩॥

ઉષ્ણામ્લ લવણક્ષારકટુકાજીર્ણભોજનાત્ ।
તીક્ષ્ણાતપાગ્નિસન્તાપમદ્યક્રોધનિષેવણાત્ ॥ ૧,૧૬૮.૪॥

વિદાહકાલે ભુક્તસ્ય મધ્યાહ્ને જલદાત્યયે ।
ગ્રીષ્મકાલેऽર્દ્ધરાત્રેऽપિ પિત્તં કુપ્યતિ દેહિનઃ ॥ ૧,૧૬૮.૫॥

સ્વાદ્વમ્લલવણસ્નિગ્ધગુરુશીતાતિભોજનાત્ ।
નવાન્નપિચ્છિલાનૂપમાંસાદેઃ સેવનાદપિ ॥ ૧,૧૬૮.૬॥

અવ્યાયામ દિવાસ્વપ્નશય્યાસનસુખાદિભિઃ ।
કફપ્રદોષો ભુક્તે ચ વસન્તે ચ પ્રકુપ્યતિ ॥ ૧,૧૬૮.૭॥

દેહપારુષ્યસંકોચતોદવિષ્ટમ્ભકાદયઃ ।
તથા ચ સુપ્તા રોમહર્ષસ્તમ્ભનશોષણમ્ ॥ ૧,૧૬૮.૮॥

શ્યામત્વમઙ્ગવિશ્લેષબલમાયાસવર્ધનમ્ ।
વાયોર્લિઙ્ગાનિ તૈર્યુક્તં રોગં વાતાત્મકં વદેત્ ॥ ૧,૧૬૮.૯॥

દાહોષ્મપાદસંક્લેદકોપરાગપરિશ્રમાઃ ।
કટ્વમ્લશવવૈગન્ધ્યસ્વેદમૂર્છાતિતૃટ્ભ્રમાઃ ॥ ૧,૧૬૮.૧૦॥

હારિદ્રં હરિતત્વઞ્ચ પિત્તલિઙ્ગાન્વિતૈર્નરઃ ।
દેહે સ્નિગ્ધત્વમાધુર્યચિરકારિત્વબન્ધનમ્ ॥ ૧,૧૬૮.૧૧॥

સ્તૈમિત્યતૃપ્તિસઙ્ઘાતશોથશતિલગૌરવમ્ ।
કણ્ડૂનિદ્રાભિયોગશ્ચ લક્ષણં કફસમ્ભવમ્ ॥ ૧,૧૬૮.૧૨॥

હેતુલક્ષણસંસર્ગાદ્વિદ્યાદ્વ્યાધિં દ્વિદોષજમ્ ।
સર્વહેતુસમુત્પન્નં ત્રિલિઙ્ગં સાન્નિપાતિકમ્ ॥ ૧,૧૬૮.૧૩॥

દોષધાતુમલાધારો દેહિનાં દેહ ઉચ્યતે ।
તેષાં સમત્વમારોગ્યં ક્ષયવૃદ્ધ્યોર્વિપર્યયઃ ॥ ૧,૧૬૮.૧૪॥

વસાસૃઙ્માંસમેદોऽસ્થિમજ્જાશુક્રાણિ ધાતવઃ ।
વાતપિત્તકફા દોષા વિણ્મૂત્રાદ્યા મલાઃ સ્મૃતાઃ ॥ ૧,૧૬૮.૧૫॥

વાયુઃ શીતો લઘુઃ સૂક્ષ્મઃ સ્વરનાશીસ્થિરો બલી ।
પિત્તમમ્લકટૂષ્ણઞ્ચાપઙ્ક્તી રોગકારણમ્ ॥ ૧,૧૬૮.૧૬॥

મધુરો લવણઃ સ્નિગ્ધો ગુરુઃ શ્લેષમાતિપિચ્છિલઃ ।
ગુદશ્રોણ્યાશ્રયો વાયુઃ પિત્તં પક્વાશયસ્થિતમ્ ॥ ૧,૧૬૮.૧૭॥

કફસ્યામાશયસ્થાનં કણ્ઠો વા મૂર્ધસન્ધયઃ ।
કટુતિક્તકષાયાશ્ચ કોપયન્તિ સમીરણમ્ ॥ ૧,૧૬૮.૧૮॥

કટ્વમ્લલવણાઃ પિત્તં સ્વાદૂષ્ણલવણાઃ કફમ્ ।
એત એવ વિપર્યસ્તાઃ શમાયૈષાં પ્રયોજિતાઃ ।
ભવન્તિ રોગિણાં શાન્ત્યૈ સ્વસ્થાને સુખહેતવઃ ॥ ૧,૧૬૮.૧૯॥

ચક્ષુષ્યો મધુરો જ્ઞેયો રસધાતુવિવહ્દ્ધનઃ ।
અમ્લોત્તરો મનોહૃદ્યં તથા દીપનપાચનમ્ ॥ ૧,૧૬૮.૨૦॥

દીપનોજ્વરતૃષ્ણાઘ્નસ્તિક્તઃ શોધનશોષણઃ ।
પિત્તલો લેખન સ્તમ્ભી કષાયો ગ્રાહિશોષણઃ ॥ ૧,૧૬૮.૨૧॥

રસવીર્યવિપાકાનામાશ્રયં દ્રવ્યમુત્તમમ્ ।
રસપાકાન્તરસ્થાયિ સર્વદ્રવ્યાશ્રયં દ્રુતમ્ ॥ ૧,૧૬૮.૨૨॥

શીતોષ્ણં લવણં વીર્યમથ વા શક્તિરિષ્યતે ।
રસાનાં દ્વિવિધઃ પાકો કટુરેવ ચ ॥ ૧,૧૬૮.૨૩॥

ભિષગ્ભેષજરોગાર્તપરિચારકસમ્પદઃ ।
ચિકિત્સાઙ્ગાનિચત્વારિ વિપરીતાન્યસિદ્ધયે ॥ ૧,૧૬૮.૨૪॥

દેશકાલવયોવહ્નિસામ્યપ્રકૃતિભેષજમ્ ।
દેહસત્ત્વબલવ્યાધીન્બુદ્ધ્વા કર્મ સમાચરેત્ ॥ ૧,૧૬૮.૨૫॥

બહૂદકનગોઽનૂપઃ કફમારુતકોપવાન્ ।
જાઙ્ગલોઽપરશાખી ચ રક્તપિત્તગદોત્તરઃ ॥ ૧,૧૬૮.૨૫*૧॥

સંસૃષ્ટલક્ષણોપેતો દેશઃ સાધારણઃ સ્મૃતઃ ।
બાલ આ ષોડશાન્મધ્યઃ સપ્તતેર્વૃદ્ધ ઉચ્યતે ॥ ૧,૧૬૮.૨૬॥

કફપિત્તાનિલાઃ પ્રાયો યથાક્રમમુદીરિતાઃ ।
ક્ષારાગ્નિશસ્ત્રરહિતા ક્ષીણે પ્રવયસિ ક્રિયાઃ ॥ ૧,૧૬૮.૨૭॥

કૃશસ્ય વૃંહણં કાર્યંસ્થૂલદેહસ્ય કર્ષણમ્ ।
રક્ષણં મધ્યકાયસ્ય દેહભેદાસ્ત્રયો મતાઃ ॥ ૧,૧૬૮.૨૮॥

સ્થૈર્યવ્યાયામસન્તોષૈર્બોદ્ધવ્યં યત્નતો બલમ્ ।
અવિકારી મહોત્સાહો મહાસાહસિકો નરઃ ॥ ૧,૧૬૮.૨૯॥

પાનાહારાદયો યસ્ય વિરુદ્ધાઃ પ્રકૃતેરપિ ।
શ્વસુખાયોપકલ્પ્યન્તે તત્સામ્યમિતિ કથ્યતે ॥ ૧,૧૬૮.૩૦॥

ગર્ભિણ્યાઃ શ્લૈષ્મિકૈર્ભક્ષ્યૈઃ શ્લૈષ્મિકો જાયતે નરઃ ।
વાતલૈઃ પિત્તલૈસ્તદ્વત્સમધાતુર્હિતાશનાત્ ॥ ૧,૧૬૮.૩૧॥

કૃશો રૂક્ષોઽલ્પકેશશ્ચ ચલચિત્તો નરઃ સ્થિતઃ ।
બહુવાક્યરતઃ સ્વપ્નેવાતપ્રકૃતિકો નરઃ ॥ ૧,૧૬૮.૩૨॥

અકાલપલિતો ગૌરઃ પ્રસ્વેદી કોપનો બુધઃ ।
સ્વપ્નેઽપિ દીપ્તિમત્પ્રેક્ષી પિત્તપ્રકૃતિરુચ્યતે ॥ ૧,૧૬૮.૩૩॥

સ્થિરચિત્તઃ સ્વરઃ સૂક્ષ્મઃ પ્રસન્નઃ સ્નિગ્ધમૂર્ધજઃ ।
સ્વપ્ને જલશિલાલોકી શ્લેષ્મ પ્રકૃતિકો નરઃ ॥ ૧,૧૬૮.૩૪॥

સમિશ્રલક્ષણૈર્જ્ઞેયો દ્વિત્રિદોષાન્વયો નરઃ ।
દોષસ્યેતરસદ્ભાવેઽપ્યધિકા પ્રકૃતિઃ સ્મૃતાઃ ॥ ૧,૧૬૮.૩૫॥

મન્દસ્તીક્ષ્ણોઽથ વિષમઃ સમશ્ચૈતિ ચતુર્વિધાઃ ।
કફપિત્તાનિલાધિક્યાત્તત્સામ્યાજ્જાઠરોઽનલઃ ॥ ૧,૧૬૮.૩૬॥

સમસ્ય પાલનં કાર્યં વિષમે વાતનિગ્રહઃ ।
તીક્ષ્ણે પિત્તપ્રતીકારો મન્દે શ્લેષ્મવિશોધનમ્ ॥ ૧,૧૬૮.૩૭॥

પ્રભવઃ સર્વરોગાણામજીર્ણં ચાગ્નિનાશનમ્ ।
આમામ્લરસવિષ્ટમ્ભ લક્ષણન્તચ્ચતુર્વિધમ્ ॥ ૧,૧૬૮.૩૮॥

આમાદ્વિષૂચિકા ચૈવ હૃદાલસ્યાદયસ્તથા ।
વચાલવણતોયેન છર્દનં તત્ર કારયેત્ ॥ ૧,૧૬૮.૩૯॥

શુક્રાભાવો ભ્રમો મૂર્છા તર્ષોઽમ્લાત્સમ્પ્રવર્તતે ।
અપક્વં તત્ર શીતામ્બુપાનં વાતનિષેવણમ્ ॥ ૧,૧૬૮.૪૦॥

ગાત્રભઙ્ગં શિરોજાડ્યં ભક્તદોષાદયો ગદાન્ ।
તસ્મિન્સ્વાપો દિવા કાર્યોલઙ્ઘનં ચ વિવર્જનમ્ ॥ ૧,૧૬૮.૪૧॥

શૂલગુલ્મૌ ચ વિણ્મૂત્રસ્થાનવિષ્ટમ્ભસૂચકૌ ।
વિધેયં સ્વેદનં તત્ર પાનીયં લવણોદકમ્ ॥ ૧,૧૬૮.૪૨॥

આમમમ્લં ચ વિષ્ટબ્ધં કફપિત્તાનિલૈઃ ક્રમાત્ ।
આલિપ્ય જઠરં પ્રાજ્ઞો હિઙ્ગુત્ર્યૂષણસૈન્ધવૈઃ ॥ ૧,૧૬૮.૪૩॥

દિવાસ્વપ્નં પ્રકુર્વીત સર્વાજીર્ણવિનાશનમ્ ।
અહિતાન્નૈ રોગરાશિરહિતાન્નં તતસ્ત્યજેત્ ॥ ૧,૧૬૮.૪૪॥

ઉષ્ણામ્બુ વાનુપાનં ચ માક્ષિકૈઃ પાચનં ભવેત્ ।
કરીરદધિમત્સ્યૈશ્ચ પ્રાયઃ ક્ષીરં વિરુધ્યતે ॥ ૧,૧૬૮.૪૫॥

બિલ્વઃ શોણા ચ ગમ્ભારી પાટલા ગણિકારિકા ।
દીપનં કફવાતઘ્નં પઞ્ચમૂલમિદં મહત્ ॥ ૧,૧૬૮.૪૬॥

શાલપર્ણી પૃશ્નિપર્ણી બૃહતીદ્વયગોક્ષુરમ્ ।
વાતપિત્તહરં વૃષ્યં કનીયઃ પઞ્ચમૂલકમ્ ॥ ૧,૧૬૮.૪૭॥

ઉભયં દશસૂલં સ્યાત્સન્નિપાતજ્વરાપહમ્ ।
કાસે શ્વાસે ચ તન્દ્રાયાં પાર્શ્વશૂલે ચ શસ્યતે ॥ ૧,૧૬૮.૪૮॥

એતૈસ્તૈલાનિ સર્પીષિ પ્રલેપાદલકાં જયેત્ ।
ક્વાથાચ્ચતુર્ગુણં વારિ પાદસ્થં સ્યાચ્ચતુર્ગુણમ્ ॥ ૧,૧૬૮.૪૯॥

સ્નેહઞ્ચ તત્સમં ક્ષીરં કલ્કશ્ચ સ્નેહપાદકઃ ।
સંવર્તિતૌષધૈઃ પાકો બસ્તૌ પાને ભવેત્સમઃ ।
ખરોઽભ્યઙ્ગે મૃદુર્નસ્યે પાકોઽપિ સમ્પ્રકલ્પયેત્ ॥ ૧,૧૬૮.૫૦॥

સ્થૂલદેહન્દ્રિયાશ્ચિન્ત્યા પ્રકૃતિર્યા ત્વધિષ્ઠિતા ।
આરોગ્યમિતિ તં વિદ્યાદાયુષ્મન્તમુપાચરેત્ ॥ ૧,૧૬૮.૫૧॥

યો ગૃહ્ણાતીન્દ્રિયૈરર્થાન્વિપરીતાન્સ મૃત્યુભાક્ ।
ભિષઙ્મિત્રગુરુદ્વેષી પ્રિયારાતિશ્ચ યો ભવેત્ ॥ ૧,૧૬૮.૫૨॥

ગુલ્ફજાનુલલાટં ચ હનુર્ગણ્ડસ્તથૈવ ચ ।
ભ્રષ્ટં સ્થાનચ્યુતં યસ્ય સ જહાત્યચિરાદસૂન્ ॥ ૧,૧૬૮.૫૩॥

વામાક્ષિમજ્જનં જિહ્વા શ્યામા નાસા વિકારિણી ।
કૃષ્ણૌ સ્થાનચ્યુતૌ ચોષ્ઠૌ કૃષ્ણાસ્યં યસ્યતં ત્યજેત્ ॥ ૧,૧૬૮.૫૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વૈદ્યકશાસ્ત્રપરિભાષા નામાષ્ટષષ્ટ્યધિકશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૬૯

ધન્વન્તરિરુવાચ ।
હિતાહિતવિકેકાય અનુપાનવિધિં બ્રુવે ।
રક્તશાલિ ત્રિદોષઘ્નં તૃષ્ણામેદોનિવારકમ્ ॥ ૧,૧૬૯.૧॥

મહાશાલિ પરં વૃષ્યં કલમઃ શ્લેષ્મપિત્તહા ।
શીત્તો ગુરુસ્ત્રિદોષઘ્નઃ પ્રાયશો ગૌરષષ્ટિકઃ ॥ ૧,૧૬૯.૨॥

શ્યામાકઃ શોષણો રૂક્ષો વાતલઃ શ્લેષ્મપિત્તહા ।
તદ્વત્પ્રિયઙ્ગુનીવારકોરદૂષાઃ પ્રકીર્તિતાઃ ॥ ૧,૧૬૯.૩॥

બહુવારઃ સકૃચ્છીતઃ શ્લેષ્મપિત્તહરો યવઃ ।
વૃષ્યઃ શીતો ગુરુઃ સ્વાદુર્ગોધૂમો વાતનાશનઃ ॥ ૧,૧૬૯.૪॥

કફપિત્તાસ્ત્રજિન્મુદ્ગઃ કષાયો મધુરોલઘુઃ ।
માષો બહુબલો વૃષ્યઃ પિત્તશ્લેષ્મહરો ગુરુઃ ॥ ૧,૧૬૯.૫॥

અવૃષ્યઃ શ્લેષ્મપિત્તઘ્નો રાજમાષોઽનિલાર્તિનુત્ ।
કુલત્થઃ શ્વાસહિક્કાહૃત્કફગુલ્માનિલાપહઃ ॥ ૧,૧૬૯.૬॥

રક્તપિત્તજ્વરોન્માથો શીતો ગ્રાહી મકુષ્ઠકઃ ।
પુંસ્ત્વાસૃક્કફપિત્તઘ્નશ્ચણકો વાતલઃ સ્મૃતઃ ॥ ૧,૧૬૯.૭॥

મસૂરો મધુરઃ શીવ સંગ્રહી કફપિત્તહા ।
તદ્વત્સર્વગુણાઢ્યશ્ચ કલાયશ્ચાતિવાતલઃ ॥ ૧,૧૬૯.૮॥

આગ્કી કફપિત્તઘ્નો શુક્લા ચ તથા સ્મૃતા ।
અતસી પિત્તલા જ્ઞેયા સિદ્ધાર્થઃ કફવાતજિત્ ॥ ૧,૧૬૯.૯॥

સક્ષારમધુરસ્નિગ્ધો બલોષ્ણપિત્તકૃત્તિલઃ ।
બલઘ્ના રૂક્ષલાઃ શીતા વિવિધાઃ સસ્યજાતયઃ ॥ ૧,૧૬૯.૧૦॥

ચિત્રકેઙ્ગુદિનાલીકાઃ પિપ્પલીમધુશિગ્રવઃ ।
ચવ્યાચરણનિર્ગુણ્ડીતર્કારીકાશમર્દકાઃ ॥ ૧,૧૬૯.૧૧॥

સબિલ્વાઃ કફપિત્તઘ્નાઃ ક્રિમિઘ્ના લઘુદીપકાઃ ।
વર્ષાભૂમાર્કરૌ વાતકફઘ્નૌ દોષનાશનૌ ॥ ૧,૧૬૯.૧૨॥

તિક્તરસઃ સ્યાદેરણ્ડઃ કાકમાચી ત્રિદોષહૃત્ ।
ચાઙ્ગેરી કફવાતઘ્ની સર્ષપઃ સર્વદોષદમ્ ॥ ૧,૧૬૯.૧૩॥

તદ્વદ્દેવ ચ કૌસ્મસુમ્ભં રાજિકા વાતપિત્તલા ।

નાડીચઃ કફપિત્તઘ્નઃ ચુચુર્મધુરશીતલઃ ॥ ૧,૧૬૯.૧૪॥

દોષઘ્નં પદ્મપત્રઞ્ચ ત્રિપુટં વાતકૃત્પરમ્ ।
સક્ષારઃ સર્વદોષઘ્નો વાસ્તુકો રોચનઃ પરઃ ॥ ૧,૧૬૯.૧૫॥

તણ્ડુકીયોવિપહરઃ પાલઙ્ક્યાશ્ચ તથાપરે ।
મૂલકં દોષકૃચ્છામં સ્વિન્નં વાતકફાપદમ્ ॥ ૧,૧૬૯.૧૬॥

સર્વદોષહરં હ્યદ્યં કણ્ઠ્યં તત્પક્વમિષ્યતે ।
કર્કોટકં સવાર્તાકં પટોલં કારવેલ્લકમ્ ॥ ૧,૧૬૯.૧૭॥

કુષ્ઠમેહજ્વરશ્વાસકાસપિત્તકફાપહમ્ ।
સર્વદોષહરં હૃદ્યં કૂષ્માણ્ડં બસ્તિશોધનમ્ ॥ ૧,૧૬૯.૧૮॥

કલિઙ્ગાલાબુની પિત્તનાશિની વાતકારિણી ।
ત્રપુષોર્વારુકે વાતશ્લેષ્મલે પિત્તવારણે ॥ ૧,૧૬૯.૧૯॥

વૃક્ષામ્લં કફવાતઘ્નં જમ્બીરં કફવાતનુત્ ।
વાતઘ્નં દાડિમં ગ્રાહિ નાગરઙ્ગફલં ગુરુ ॥ ૧,૧૬૯.૨૦॥

કેશરં માતુલુઙ્ગં ચ દીપનં કફવાતનુત્ ।
વાતપિત્તહરો માષસ્ત્વક્સ્નિગ્ધોષ્ણાનિલાપહઃ ॥ ૧,૧૬૯.૨૧॥

સરમામલકં વૃષ્યં મધુરં હૃદ્યમમ્લકૃત્ ।
ભુક્તપ્રરોચકા પુણ્યા હરીતક્યમૃતોપમા ॥ ૧,૧૬૯.૨૨॥

સ્ત્રંસની કફવાતઘ્ની હ્યક્ષસ્તદ્વત્ત્રિદોષજિત્ ।
વાતશ્લેષ્મહરં ત્વમ્લં સ્ત્રંસનં તિન્તિડીફલમ્ ॥ ૧,૧૬૯.૨૩॥

દોષલં લકુચં સ્વાદુ બકુલં કફવાતજિત્ ।
ગુલ્મવાતકફશ્વાસકાસઘ્નં બીજપૂરકમ્ ॥ ૧,૧૬૯.૨૪॥

કપિત્થં ગ્રાહિ દોષઘ્નં પક્વં ગુરુ વિષાપહમ્ ।
કફપિત્તકરં બાલમાપૂર્ણં પિત્તવર્ધનમ્ ॥ ૧,૧૬૯.૨૫॥

પક્વામ્રં વાતકૃન્માંસશુક્રવર્ણબલપ્રદમ્ ।
વાતઘ્નં કફપિત્તઘ્નં ગ્રાહિ વિષ્ટમ્ભિ જામ્બવમ્ ॥ ૧,૧૬૯.૨૬॥

તિન્દુકં કફવાતઘ્નં બદરં વાતપિત્તહૃત્ ।
વિષ્ટમ્ભિ વાતલં બિલ્વં પ્રિયાલં પવનાપહમ્ ॥ ૧,૧૬૯.૨૭॥

રાજાદનફલં મોચં પનસં નારિકેલજમ્ ।
શુક્રમાંસકરાણ્યાહુઃ સ્વાદુસ્નિગ્ધગુરૂણિ ચ ॥ ૧,૧૬૯.૨૮॥

દ્રાક્ષામધૂકખર્જૂરં કુઙ્કુમં વાતરક્તજિત્ ।
માગધી મધુરા પક્વા શ્વાસપિત્તહરા પરા ॥ ૧,૧૬૯.૨૯॥

આર્દ્રકં રોચકં વૃષ્યં દીપનં કફવાતહૃત્ ।
શુણ્ઠીમરિચપિપ્પલ્યઃ કફવાતજિતો મતાઃ ॥ ૧,૧૬૯.૩૦॥

અવૃષ્યં મરિચં વિદ્યાદિતિ વૈદ્યકસમતમ્ ।
ગુલ્મશૂલવિબન્ધઘ્નં હિઙ્ગુવાતકફાપહમ્ ॥ ૧,૧૬૯.૩૧॥

યવાનીધન્યકાજાજ્યઃ વાતશ્લેષ્મનુદઃ પરમ્ ।
ચક્ષુષ્યં સૈન્ધવં વૃષ્યં ત્રિદોષશમનં સ્મૃતમ્ ॥ ૧,૧૬૯.૩૨॥

સૌવર્ચલં વિબન્ધઘ્નમુષ્ણં હૃચ્છૂલનાશનમ્ ।
ઉષ્ણં શૂલહરં તીક્ષ્ણં વિડઙ્ગં વાતનાશનમ્ ॥ ૧,૧૬૯.૩૩॥

રોમકં વાતલં સ્વાદુ રોચનં ક્લેદનં ગુરુ ।
હૃત્પાણ્ડુગલરોગઘ્નં યવક્ષારોઽગ્નિદીપનઃ ॥ ૧,૧૬૯.૩૪॥

દહનો દીપનસ્તીક્ષ્ણઃ સર્જિક્ષારો વિદારણઃ ।
દોષઘ્નં નાભસં વારિલઘુ હૃદ્યં વિષાપહમ્ ॥ ૧,૧૬૯.૩૫॥

નાદેયં વાતલં રૂક્ષં સારસં મદુર લઘુ ।
વાતશ્લેષ્મહરં વાર્પ્યં તાડાગં વાતલં સ્મૃતમ્ ॥ ૧,૧૬૯.૩૬॥

રૌચ્યમગ્નિકરં રૂક્ષં કફઘ્નંલઘુ નૈર્ઝરમ્ ।
દીપનં પિત્તલં કૌપમૌદ્ભિદં પિત્તનાશનમ્ ॥ ૧,૧૬૯.૩૭॥

દિવાર્કકિરણૈર્જુષ્ટં રાત્રૌ ચૈવેન્દુરશ્મિભિઃ ।
સર્વદોષવિનિર્મુક્તં તત્તુલ્યં ગગનામ્બુના ॥ ૧,૧૬૯.૩૮॥

ઉષ્ણં વારિ જ્વરશ્વાસમેદોઽનિલકફાપહમ્ ।
શ‍ૃતં શીતત્રિદોષઘ્નમુષિતં તચ્ચ દોષલમ્ ॥ ૧,૧૬૯.૩૯॥

ગોક્ષીરં વાતપિત્તઘ્નં સ્નિગ્ધં ગુરુરસાયનમ્ ।
ગવ્યાદ્ગુરુતરં સ્નિગ્ધં માહિષ્ વહ્નિનાશનમ્ ॥ ૧,૧૬૯.૪૦॥

છાગં રક્તાતિસારઘ્નં કાસશ્વાસકફાપહમ્ ।
ચક્ષુષ્યં જીવનં સ્ત્રીણાં રક્તપિત્તે ચનાવનમ્ ॥ ૧,૧૬૯.૪૧॥

પરં વાતહરં વૃષ્યં પિત્તશ્લેષ્મકરં દધિ ।
દોષઘ્નં મન્થજાતન્તુ મસ્તુ સ્રોતોવિશોધનમ્ ॥ ૧,૧૬૯.૪૨॥

ગ્રહણ્યર્શોઽર્દિતાર્તિઘ્નં નવનીતં નવોદ્ધૃતમ્ ।
વિકારાશ્ચ કિલાટાદ્યા ગુરવઃ કુષ્ઠહેતવઃ ॥ ૧,૧૬૯.૪૩॥

પરં ગ્રહણીશોથાર્શઃ પાણ્ડ્વતીસારગુલ્મનુત્ ।
ત્રિદોષશમનં તક્રં કથિતં પૂર્વસૂરિભિઃ ॥ ૧,૧૬૯.૪૪॥

વૃષ્યઞ્ચ મધુરં સર્પિર્વાતપિત્તકફાપહમ્ ।
ગવ્યં મેધ્યઞ્ચ ચાક્ષુષ્યં સંસ્કારાચ્ચ ત્રિદોષજિત્ ॥ ૧,૧૬૯.૪૫॥

અપસ્મારગદોન્માદમૂર્છાઘ્નં સંસ્કૃતઙ્ઘૃતમ્ ।
અજાદીનાઞ્ચ સર્પીંષિ વિદ્યાદ્ગોક્ષીરસદ્ગુણૈઃ ।
કફવાતહરં મૂત્રં સર્વક્રિમિવિષાપહમ્ ॥ ૧,૧૬૯.૪૬॥

પાણ્ડુત્વોદરકુષ્ઠાર્શઃ શોથગુલ્મપ્રમેહનુત્ ।
વાતશ્લેષ્મહરં બલ્યં તૈલં કશ્યં તિલોદ્ભવમ્ ॥ ૧,૧૬૯.૪૭॥

સાર્ષપં કૃમિપાણ્ડુઘ્નં કફમેદોઽનિલાપહમ્ ।
ક્ષૌમં તૈલમચક્ષુષ્યં પિત્તહૃદ્વાતનાશનમ્ ॥ ૧,૧૬૯.૪૮॥

અક્ષજં કફપિત્તઘ્નં કેશ્યં ત્વક્શ્રોત્રતર્પણમ્ ।
ત્રિદોષઘ્નં મધુ પ્રોક્તં વાતલઞ્ચ પ્રકીર્તિતમ્ ॥ ૧,૧૬૯.૪૯॥

હિક્કાશ્વાસકૃમિચ્છર્દિમેહતૃષ્ણાવિષામહમ્ ।
ઇક્ષવોરક્તપિત્તઘ્નો બલ્યા વૃષ્યાઃ કફપ્રદાઃ ॥ ૧,૧૬૯.૫૦॥

ફાણિતં પિત્તલં તદ્વિં સુરા મત્સ્યણ્ડિકા લઘુઃ ।
ખણ્ડં વૃષ્યં તથા સ્નિગ્ધં સ્વાદ્વસૃક્પિત્તવાતજિત્ ॥ ૧,૧૬૯.૫૧॥

વાતપિત્તહરો રૂક્ષો વાતઘ્નઃ કફકૃદ્ગુડઃ ।
સ પિત્તઘ્નઃ પરઃ પથ્યઃ પુરાણોઽસૃક્પ્રસાદનઃ ॥ ૧,૧૬૯.૫૨॥

રક્તિપિત્તહરા વૃષ્યા સસ્નેહા ગડશર્કરા ।
સર્વપિત્તકરં મદ્યમમ્લત્વાત્કફવાતજિત્ ॥ ૧,૧૬૯.૫૩॥

રક્તપિત્તકરાસ્તીક્ષ્ણાસ્તથા સૌવીરજાતયઃ ।
પાચનો દીપનઃ પથ્યો મણ્ડઃ સ્યાદ્ભૃષ્ટતણ્ડુલઃ ॥ ૧,૧૬૯.૫૪॥

વાતાનુલોમની લધ્વી પેયા વસ્તિવિશોધની ।
સતક્રદાડિમવ્યોષા સગુડા મધુપિપ્પલી ॥ ૧,૧૬૯.૫૫॥

ઇન્તીયં સુકૃતા પેયા કાસશ્વા સપ્રવાહિકાઃ ।
પાયસઃ કફકૃદ્બલ્યઃ કૃશરા વાતનાશિની ॥ ૧,૧૬૯.૫૬॥

સુધૌતઃ પ્રસ્રુતઃ સ્નિગ્ધઃ સુખોષ્ણો લઘુરોચનઃ ।
કન્દમૂલફલેહૈઃ સાધિતો બૃંહણોગુરુઃ ॥ ૧,૧૬૯.૫૭॥

ઈષદુષ્ણસેવનાચ્ચ લઘુઃ સૂપઃ સુસાધિતઃ ।
સ્વિન્ન નિષ્પીડિતં શાકં હિતં સ્નેહાદિસંસ્કૃતમ્ ॥ ૧,૧૬૯.૫૮॥

દાડિમામલકૈર્યૂષો વહ્નિકૃદ્વાતપિત્તહા ।
શ્વાસકાસપ્રતિશ્યાયકફઘ્નો મલકૈઃ કૃતઃ ॥ ૧,૧૬૯.૫૯॥

યવકોલકુલત્થાનાં યૂષઃ કણ્ઠ્યોઽનિલાપહઃ ।
મુદ્ગામલકજો ગ્રાહી શ્લેષ્મપિત્તવિનાશનઃ ॥ ૧,૧૬૯.૬૦॥

સગુડં દધિ વાતઘ્નં સક્તવો રૂક્ષવાતુલાઃ ।
ઘૃતપૂર્ણોઽગ્નિકારી સ્યાદ્વૃષ્યા ગુર્વી ચ શષ્કુલી ॥ ૧,૧૬૯.૬૧॥

બૃંહણાઃ સામિષા ભક્ષ્યપિષ્ટ કા ગુખઃ સ્મૃતાઃ ।
તૈલસિદ્ધાશ્ચ દૃષ્ટિઘ્નાસ્તોયસ્વિન્નાશ્ચ દુર્જરાઃ ॥ ૧,૧૬૯.૬૨॥

અત્યુષ્ણા મણ્ડકાઃ પથ્યાઃ શીતલા ગુખો મતાઃ ।
અનુપાનઞ્ચ પાનીયં શ્રમતૃષ્ણાદિનાશનમ્ ॥ ૧,૧૬૯.૬૩॥

અન્નપાનાદિના રક્ષા કૃત્સ્યાદ્રોગવર્જિતઃ ।
અનુષ્ણઃ શિખિકણ્ઠાભો વિષઞ્ચૈવ વિવર્ણકૃત્ ॥ ૧,૧૬૯.૬૪॥

ગન્ધસ્પર્શરસાસ્તીવ્રાભોક્તુશ્ચ સ્યાન્મનોવ્યથા ।
આઘ્રાણે ચાક્ષિરોગઃ સ્યાદસાધ્યશ્ચ ભિષગ્વરૈઃ ।
વેપથુર્જૃમ્ભણાદ્યં સ્યાદ્વિષસ્યૈતત્તુ લક્ષણમ્ ॥ ૧,૧૬૯.૬૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
અનુપાનાદિવિધિકથનં નામૈકોનસપ્તત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૦
ધન્વન્તરિરુવાચ ।

જ્વરોઽષ્ટધા પૃથગ્દ્વન્દ્વસંઘાતાગન્તુજઃ સ્મૃતઃ ।
મુસ્તપર્પટકોશીરચન્દનોદીચ્યનાગરૈઃ ।
શ◌ૃતશીતં જલં દદ્યાત્પિપાસાજ્વરશાન્તયે ॥ ૧,૧૭૦.૧॥

નાગરં દેવકાષ્ઠઞ્ચ ધાન્યાકં બૃહતીદ્વયમ્ ।
દદ્યાત્પાચનકં પૂર્વં જ્વરિતાય જ્વરાપહમ્ ॥ ૧,૧૭૦.૨॥

આરગ્વધાભયામુસ્તાતિક્તાગ્રન્થિકનિર્મિતઃ ।
કષાયઃ પાચનઃ સામે સશૂલે ચ જ્વરેહિતઃ ॥ ૧,૧૭૦.૩॥

મધૂકસારસિન્ધૂત્થવચોષણકણાઃ સમાઃ ।
શ્લક્ષ્ણં પિષ્ટ્વામ્ભસા નસ્યં કુર્યાત્સંજ્ઞાપ્રબોધનમ્ ॥ ૧,૧૭૦.૪॥

ત્રિવૃદ્વિશાલાત્રિફલાકટુકારગ્વધૈઃ કૃતઃ ।
સક્ષારો ભેદનઃ ક્વાથઃ પેયઃ સર્વજ્વરાપહઃ ॥ ૧,૧૭૦.૫॥

મહૌષધામૃતામુસ્તચન્દનોશીરધાન્યકૈઃ ।
ક્વાથસ્તૃતીયકં હન્તિ શર્કરામધુયોજિતઃ ॥ ૧,૧૭૦.૬॥

અપામગજટાકટ્યાં લોહિતૈઃ સપ્તતન્તુભિઃ ।
બદ્ધ્વા વારે રવેર્નૂનં જ્વરં હન્તિ તૃતીયકમ્ ॥ ૧,૧૭૦.૭॥

ગઙ્ગાયા ઉત્તરે કૂલે અપુત્રસ્તાપસો મૃતઃ ।
તસ્મૈ તિલોદકં દદ્યાન્મુચ્યત્યૈકાહિકો જ્વરઃ ॥ ૧,૧૭૦.૮॥

ગુડૂચ્યાઃ ક્વાથકલ્કાભ્યાં વિફલાવાસકસ્ય ચ ।
મૃદ્વીકાયા બલાયાશ્ચ સિદ્ધાઃ સ્નેહા જ્વરચ્છિદઃ ॥ ૧,૧૭૦.૯॥

ધાત્રીશિવાકણાવહ્નિક્વાથઃ સર્વજ્વરાન્તકઃ ।
જ્વરાતિસારહરણમૌષધં પ્રવદામ્યથ ॥ ૧,૧૭૦.૧૦॥

પૃશ્નિપર્ણીબલાવિલ્વનાગરોત્પલધાન્યકૈઃ ।
પાઠેન્દ્રયવભૂનિમ્બમુસ્તપર્પટકૈઃ શ◌ૃતાઃ ।
જયન્ત્યામમતીસારં સજ્વરં સમહૌષધાઃ ॥ ૧,૧૭૦.૧૧॥

નાગરાતિવિષામુસ્તભૂનિમ્બામૃતવત્સકૈઃ ।
સર્વજ્વરહરઃ ક્વથઃ સર્વાતીસારનાશનઃ ॥ ૧,૧૭૦.૧૨॥

મુસ્તપર્પટકદિવ્યશ◌ૃઙ્ગવેરશ◌ૃતં પયઃ ।
શાલપર્ણી પૃશ્નિપર્ણી બૃહતી કણ્ટકારિકા ॥ ૧,૧૭૦.૧૩॥

બલાશ્વદંષ્ટ્રાબિલ્વાદિ પાઠાનાગરધાન્યકમ્ ।
એતદાહારસંયોગે હિતં સર્વાતિસારિણામ્ ॥ ૧,૧૭૦.૧૪॥

બિલ્વચૂતાસ્થિક્વાથશ્ચ ખણ્ડં મધ્વતિસારનુત્ ।
અતિસારે હિતા તદ્વત્કુટજત્વક્કણાયુતા ॥ ૧,૧૭૦.૧૫॥

વત્સકાતિવિષાવિશ્વકણાકન્દકષાયકઃ ।
પ્રયુક્તશ્ચામશૂલાઢ્યે હ્યતીસારે સશોણિત ॥ ૧,૧૭૦.૧૬॥

ચિકિત્સાથ ગ્રહણ્યાસ્તુગ્રહણી ચાગ્નિનાશિની ।
ચિત્રકાક્વાથક્લકાભ્યાં ગ્રહણીઘ્નં ક્ષૃતં હવિઃ ।
ગુલ્મશોથોદરપ્લીહશૂલાર્શોઘ્નં પ્રદીપનમ્ ॥ ૧,૧૭૦.૧૭॥

સૌવર્ચલં સૈન્ધવઞ્ચ વિડઙ્ગૌદ્ભિદમેવ ચ ।
સામુદ્રેણ સમં પઞ્ચલવણાન્યત્ર યોજયેત્ ॥ ૧,૧૭૦.૧૮॥

ભેષજં શસ્ત્રક્ષારાગ્ન્યસ્ત્રિધા વૈ ચાર્શસાં હરમ્ ।
વિદ્ધિ તચ્ચાર્શસોઘ્નન્તુ યદ્ધિ તક્રં નવોદ્ધૃતમ્ ॥ ૧,૧૭૦.૧૯॥

ગુડૂટીં પિપ્પલીયુક્તામભયાં ઘૃતભર્જિતામ્ ।
ત્રિવૃદર્શોવિનાશાર્થં ભક્ષયેદમ્લલોણિકામ્ ॥ ૧,૧૭૦.૨૦॥

તિલેક્ષુરસસંયોગશ્ચાર્શઃ કુષ્ઠ વિનાશનઃ ।
પઞ્ચકોલં સમરિચં સત્ર્યૂષણમથાગ્નિકૃત્ ॥ ૧,૧૭૦.૨૧॥

હરીતકી ભક્ષ્યમાણા નાગેરણ ગુડેન વા ।
સૈન્ધવોપહિતા વાપિ સાતત્યેનાગ્નિદીપની ॥ ૧,૧૭૦.૨૨॥

ફલત્રિકામૃતાસાતિક્તાભૂનિમ્બનિમ્બજઃ ।
ક્વાથઃ ક્ષૌદ્રયુતો હન્યાત્પાણ્ડુરોગં સકામલમ્ ॥ ૧,૧૭૦.૨૩॥

ત્રિવૃચ્ચ ત્રિફલા શ્યામા પિપ્પલી શર્કગ મધુ ।
મોદકઃ સન્નિપાતાન્તો રક્તપિત્તજ્વરાપહઃ ॥ ૧,૧૭૦.૨૪॥

વાસાયાં વિદ્યમાનાયામાશાયાં જીવિતસ્ય ચ ।
રક્તપિત્તી ક્ષયી કાસી કિમર્થમવસીદતિ ॥ ૧,૧૭૦.૨૫॥

આટરૂપકમૃદ્વીકાપથ્યાક્વાથઃ સશર્કરઃ ।
ક્ષૌદ્રાઢ્યઃ કાસનિઃ શ્વાસરક્તપિત્તનિબર્હણઃ ॥ ૧,૧૭૦.૨૬॥

વાસારસઃ ખણ્ડમધુયુતઃ પીતોઽથરક્તજિત્ ।

સલ્લકીબદરીજમ્બુપ્રિયાલામ્રાર્જુનં ધવઃ ।
પીતં ક્ષીરઞ્ચ મધ્વાઢ્યં પૃથક્છોણિતવારણમ્ ॥ ૧,૧૭૦.૨૭॥

સમૂલફલપત્રાયા નિર્ગુણ્ડ્યાઃ સ્વરસૈર્ઘૃતમ્ ।
સિદ્ધં પીત્વા ક્ષયક્ષીણી નિર્વ્યાદિર્ભાતિ દેવવત્ ॥ ૧,૧૭૦.૨૮॥

હરીતકી કણા શુણ્ઠી મરિચં ગુડસંયુતમ્ ।
કાસઘ્નો મોદકઃ પ્રોક્તસ્તૃષ્ણારોચકનાશનઃ ॥ ૧,૧૭૦.૨૯॥

કણ્ટકારિગુડૂચીભ્યાં પૃથક્ત્રિંશત્પલે રસે ।
પ્રસ્થં સિદ્ધં ઘૃતં સ્યાચ્ચ કાસનુદ્વહ્નિદાપનમ્ ॥ ૧,૧૭૦.૩૦॥

કૃષ્ણા ધાત્રી શિતા શુણ્ઠી હક્કાઘ્ની મધુસંયુતા ।
હિક્કાશ્વાસી પિવેદ્ભાર્ઙ્ગા સવિશ્વામુષ્ણવારિણા ॥ ૧,૧૭૦.૩૧॥

તૈલાક્તં સ્વરભેદે વા ખાદિરં ધારયેન્મુખે ।
પથ્યાં પિપ્પલિકાયુક્તાં સંયુક્તાં નાગરેણ વા ॥ ૧,૧૭૦.૩૨॥

વિડઙ્ગત્રિલાચૂર્ણં છર્દિહૃન્મધુના સહ ।
આમ્રજમ્બૂકષાયં વા પિબોન્માક્ષિકસંયુતમ્ ॥ ૧,૧૭૦.૩૩॥

છર્દિં સર્વાં પ્રણુદતિ તૃષ્ણાઞ્ચૈવાપકર્ષતિ ।
ત્રિફલા ભ્રમમૂર્છાહૃત્પીતા સા મધુનાપિ વા ॥ ૧,૧૭૦.૩૪॥

પઞ્ચગવ્યં હિતં પાનાદપસ્મારગ્રહાદિનુત્ ।
કૂષ્માણ્ડકરસો વાજ્યં સયષ્ટિકં તદર્થકૃત્ ॥ ૧,૧૭૦.૩૫॥

બ્રાહ્મીરસવચાકુષ્ઠશઙ્ખપુષ્પીભિરેવ ચ ।
પુરાણં સેવ્યમુન્માદગ્રહાપસ્મારહ્નુતમ્ ॥ ૧,૧૭૦.૩૬॥

અશ્વગન્ધાકષાયે ચ કલ્કે ક્ષીરે ચતુર્ગુણે ।
ઘૃતપક્વન્તુ વાતઘ્નં વૃષ્યં માં સાય પુત્રકૃત્ ॥ ૧,૧૭૦.૩૭॥

નીલીમુણ્ડીરિકાચૂર્ણં મધુસર્પિઃ સમન્વિતમ્ ।
છિન્નાક્વાથં પિબન્હન્તિ વાતરક્તં સુદુસ્તરમ્ ॥ ૧,૧૭૦.૩૮॥

સગુડાઃ પઞ્ચ પથ્યાશ્ચ કુષ્ટાર્શોવાતસાદનાઃ ।
ગડચીસ્વરસં કલ્કં ચૂર્ણં વા ક્વાથમેવ વા ॥ ૧,૧૭૦.૩૯॥

વાતરક્તાન્તકં કાલાગુડૂચીક્વાથકલ્કતઃ ।
કુષ્ઠવ્રણાદિશમનં શ◌ૃતમાજ્યં સદુગ્ધકમ્ ॥ ૧,૧૭૦.૪૦॥

ત્રિફલાગુગ્ગુલુર્વાતરક્તમૂર્છાપહારકઃ ।
ઊરુસ્તમ્ભવિનાશાય ગોમૂત્રેણ ચ ગુગ્ગુલુઃ ॥ ૧,૧૭૦.૪૧ ॥

શુણ્ઠીગોક્ષુરકક્વાથઃ સામવાતાર્તિશૂલનુત્ ।
દશમૂલામૃતૈરણ્ડરાસ્નાનાગરદારુભિઃ ॥ ૧,૧૭૦.૪૨ ॥

ક્વાથો હન્તિ માહશોથં મરીચગુડસંયુતઃ ।
કાસઘ્નો મોદકઃ પ્રોક્તસ્તૃષ્ણારોચકનાશનઃ ॥ ૧,૧૭૦.૪૩ ॥

કણ્ટકારિગુડૂચીભ્યાં પૃથક્ત્રિંશત્પલે રસે ।
પ્રસ્થસિદ્ધં ઘૃતઞ્ચૈવ કાસનુદ્ધૃદિ દીપનઃ ॥ ૧,૧૭૦.૪૪ ॥

કૃષ્ણાધાત્રીસિતાશુણ્ઠીમરીચસૈન્ધવાન્વિતઃ ।
ક્વાથ એરણ્ડતૈલેન સામં હન્ત્યનિલં ગુરુમ્ ॥ ૧,૧૭૦.૪૫ ॥

બલા પુનર્નવૈરણ્ડબૃહતીદ્વયગોક્ષુરૈઃ ।
સહિઙ્ગુલવર્ણ પીતં વાતશૂલવિમર્દનમ્ ॥ ૧,૧૭૦.૪૬ ॥

ત્રિફલાનિમ્બયષ્ટીકકટુકારગ્વધૈઃ શ◌ૃતમ્ ।
પાયયેન્મધુના મિશ્રં દાહશૂલોપશાન્તયે ॥ ૧,૧૭૦.૪૭ ॥

ત્રિફલાપઃ સયષ્ટીકાઃ પરિણામાર્તિનાશનાઃ ।
ગોમૂત્રશુદ્ધમણ્ડૂરં ત્રિફલાચૂર્ણસંયુતમ્ ।
વિલિહન્મધુસર્પિર્ભ્યાં શૂલં હન્તિ ત્રિદોષજમ્ ॥ ૧,૧૭૦.૪૮ ॥

ત્રિવૃત્કૃષ્ણાહરીતક્યો દ્વિચતુષ્પઞ્ચભાગિકાઃ ।
ગુટિકા ગુડતુલ્યાસ્તા વિડ્વિબન્ધગદાપહાઃ ॥ ૧,૧૭૦.૪૯ ॥

હરીતકીયવક્ષારપિપ્પલીત્રિવૃતસ્તથા ।
ઘૃતૈશ્ચૂર્ણમિદં પેયમુદાવર્તાવિનાશનમ્ ॥ ૧,૧૭૦.૫૦ ॥

ત્રિવૃદ્ધરીતકીશ્યામાઃ સ્નુહીક્ષીરેણ ભાવિતાઃ ।
વટિકા મૂત્રપીતાસ્તાઃ શ્રેષ્ટાશ્ચાનાહભેદિકાઃ ॥ ૧,૧૭૦.૫૧ ॥

ત્ર્યૂષણત્રિફલાધન્યવિડઙ્ગચવ્યચિત્રકૈઃ ।
કલ્કીકૃતૈર્ઘૃતં સિદ્ધં સંસ્કારં વાતગુલ્મનુત્ ॥ ૧,૧૭૦.૫૨ ॥

મૂલં નાગરમાનીતં સક્ષીરં હૃદયાર્તિનુત્ ।
સૌવચલં તદર્ધન્તુ શિવાનાઞ્ચ ઘૃતં પિબેત્ ॥ ૧,૧૭૦.૫૩ ॥

કણાપાષાણભેદૈર્વા શિલાજતુકચૂર્ણકમ્ ।
તણ્ડુલીભિર્ગુડેનાપિ મૂત્રકૃચ્છ્રીતિ જીવતિ ॥ ૧,૧૭૦.૫૪॥

અમૃતાનાગરીધાત્રીવાજિગન્ધાત્રિકણ્ટકામ્ ।
પ્રપિબેદ્વાતરેગાર્તઃ સશૂલો મૂત્રકૃચ્છ્રવાન્ ॥ ૧,૧૭૦.૫૫॥

સિતાતુલ્યો યવક્ષારઃ સર્વકૃચ્છ્રનિવારણઃ ।
નિદિગ્ધિકારસો વાપિ સક્ષૌદ્રઃ કૃચ્છ્રનાશનઃ ॥ ૧,૧૭૦.૫૬॥

લવણં ત્રિફલાકલ્કૈર્મૂત્રાઘાતહરં સ્મૃતમ્ ।
મૂત્રે વિરુદ્ધે કર્પૂરચૂર્ણં લિઙ્ગે પ્રવેશયેત્ ॥ ૧,૧૭૦.૫૭॥

ક્વાથશ્ચ શિગ્રુમૂલોત્થઃ કટૂષ્ણોશ્માનિપાતનઃ ।
સર્વમેહહરોધાત્ર્યા રસઃક્ષૌદ્રનિશાયુતઃ ।
ત્રિફલાદારુદાર્વ્યષ્ટક્વાથઃ ક્ષૌદ્રેણ મેહહા ॥ ૧,૧૭૦.૫૮॥

અસ્વપ્નં ચ વ્યવાયં ચ વ્યાયામાશ્ચિન્તનાનિ ચ ।
સ્થૌલ્યમિચ્છન્પપરિત્યક્તં ક્રમેણાભિપ્રવર્ધયેત્ ॥ ૧,૧૭૦.૫૯॥

યવશ્યામાકભોજી સ્યાસ્થૌલ્યકૃન્મધુવારિણા ।
ઉષ્ણમન્નં સમણ્ડં વા પિબન્કૃશતનુર્ભવેત્ ॥ ૧,૧૭૦.૬૦॥

સચવ્યજીરકં વ્યોષા હિઙ્ગુસૌવર્ચલામલાઃ ।
મધુના રક્તવઃ પીતા મેધોઘ્ના સર્વદીપનાઃ ॥ ૧,૧૭૦.૬૧॥

ચતુર્ગુણે જલે મૂત્રે દ્વિગુણે ચિત્રકાણિ ચ ।
કલ્કૈઃ સિદ્ધ ઘૃત પ્રસ્થં સક્ષીરં જઠરી પિબેત્ ॥ ૧,૧૭૦.૬૨॥

ક્રમવૃદ્ધ્યા દશાહાનિ દશ પૈપ્પાલિકં દિનમ્ ।
વર્ધયેત્પયસા સાર્ધં તથૈવાપાનયેત્પુનઃ ॥ ૧,૧૭૦.૬૩॥

ક્ષીરષષ્ટિકભોજીસ્યાદેવં કૃષ્ણસહસ્રકમ્ ।
બૃંહણં મુદ્ગમાયુષ્યં પ્લીહોદરવિનાશનમ્ ॥ ૧,૧૭૦.૬૪॥

પુનર્નવાક્વાથકલ્કૈઃ સિદ્ધં શોથહરં ઘૃતમ્ ।
ગાવા મત્રેણ સંસેવ્યં પિપ્પલી વા પયોઽન્વિતાઃ ।
ગુડન વાભયાં તુલ્યાં વિશ્વં વા શોથરોગિણા ॥ ૧,૧૭૦.૬૫॥

તૈલમેરણ્ડજં પીત્વા બલાસિદ્ધં પયોઽન્વિતમ્ ।
આધ્માનશૂલોપચિતામન્ત્રવૃદ્ધિઞ્જયેન્નરઃ ॥ ૧,૧૭૦.૬૬॥

ભ્રષ્ટોરુચકતૈલેન કલ્કઃ પથ્યાસમુદ્ભવઃ ।
કૃષ્ણસૈન્ધવસંયુક્તો વહ્નિરોગહરઃ પરઃ ॥ ૧,૧૭૦.૬૭ ॥

નિર્ગુણ્ડીમૂલનસ્યેન ગણ્ડમાલા વિનશ્યતિ ।
સ્નુહીગણ્ડીરિકાસ્વેદો નાશયેદર્બુદાનિ ચ ॥ ૧,૧૭૦.૬૮ ॥

હસ્તિકર્ણપલાશસ્ય ગલગણ્ડં તુ લેપતઃ ।
ધત્તૂરૈરણ્ડનિર્ગુણ્ડીવર્ષાભૂશિગ્રુસર્ષપૈઃ ॥ ૧,૧૭૦.૬૯ ॥

પ્રલેપઃશ્લીપદં હન્તિ ચિરોત્થમતિદારુણમ્ ।
શોભાઞ્જનકસિન્ધૃત્થહિઙ્ગું વિદ્રધિનાશનમ્ ॥ ૧,૧૭૦.૭૦ ॥

શરપુઙ્ખા મધુયુતા યાત્સર્વવ્રણગેપણી ।
નિમ્બપત્રસ્ય વાલેપઃ શ્વયથુવ્રણગેપણઃ ॥ ૧,૧૭૦.૭૧ ॥

ત્રિફલા ખદિરો દાર્વો ન્યગ્રોધો વ્રણશોધનઃ ।
સદ્યઃ ક્ષતં વ્રણં વૈદ્યઃ સશૂલં પરિષેચયેત્ ॥ ૧,૧૭૦.૭૨ ॥

યષ્ટીમધુકયુક્તેન કિઞ્ચિદુષ્ણેન સર્પિષા ।
બુદ્ધ્વાગન્તુવ્રણાન્વૈદ્યો ઘૃતક્ષૌદ્રસમન્વિતામ્ ॥ ૧,૧૭૦.૭૩ ॥

શીતાં ક્રિયાં પ્રયુઞ્જીત પિત્તરક્તોષ્મનાશિનીમ્ ।
ક્વાથો વંશત્વગેરણ્ડશ્વદંષ્ટ્રવનિદાકૃતઃ ॥ ૧,૧૭૦.૭૪ ॥

સહિઙ્ગુસૈન્ધવઃ પીતઃ કોષ્ઠસ્થં સ્ત્રાવયેદસૃક્ ।
યવકોલકુલત્થાનાં નિઃસ્નેહેન રસેન વા ॥ ૧,૧૭૦.૭૫ ॥

ભુઞ્જીતાન્નં યવાગ્વા વા પિવેત્સૈન્ધવસંયુતમ્ ।
કરઞ્જારિષ્ટનિર્ગુણ્ડીરસો હન્યાદ્વ્રણક્રિમીન્ ॥ ૧,૧૭૦.૭૬ ॥

ત્રિફલાચૂર્ણસંયુક્તો ગુગ્ગુલુર્વટકીકૃતઃ ।
નિર્યન્ત્રણો વિબન્ધઘ્નો વ્રધનગેપણઃ ॥ ૧,૧૭૦.૭૭ ॥

દૂર્વાસ્વરસસિદ્ધં વા તલં કમ્પિલ્લકેન વા ।
દાર્વોત્વચશ્ચ કલ્કેન પ્રધાનં વ્રણરોપણમ્ ॥ ૧,૧૭૦.૭૮ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્વરાદિચિકિત્સાનિરૂપણં નામ સપ્તત્યુત્તરશતતમોઽધ્યાયઃ

ધન્વન્તરિરુવાચ ।
નાડીવ્રણાદિરોગાણાં ચિકિત્સાં શ઼ૃણુ સુશ્રુત ।
નાડીં શસ્ત્રેણ સમ્પાટ્ય નાજીનાં વ્રણવત્ક્રિયા ॥ ૧,૧૭૧.૧॥

ગુગ્ગુલુત્રિફલાવ્યોપૈઃ સમાંશૈરાજ્યયોજિતૈઃ ।
નાડીદુષ્ટવ્રણં શૂલં ભગન્દરમથો જયેત્ ॥ ૧,૧૭૧.૨॥

નિર્ગુણ્ડીરસતસ્તૈલં નાડીદુષ્ટવ્રણાપહમ્ ।
હિતં પામામયાનાં તુ પાનાભ્યઞ્જનનાવનૈઃ ॥ ૧,૧૭૧.૩॥

ગગ્ગુત્રિફલાકૃષ્ણાત્રિપઞ્ચૈકાંશયોજિતા ।
ઘુટિ (ગુડિ) કાશોથગુલ્માર્શોભગન્દરવતાં હિતા ॥ ૧,૧૭૧.૪॥

ધ્વજમધ્યે શિરાવેધે વિશુદ્ધિરુપદંશકે ।
પાકો રક્ષ્યઃ પ્રયત્નેન શિશ્રક્ષયકરો હિ સઃ ॥ ૧,૧૭૧.૫॥

પટોલનિમ્બત્રિફલાગુડૂચીક્વાથમાપિબેત્ ।
સગુગ્ગુલું સખદિરમુપદંશો વિનશ્યતિ ॥ ૧,૧૭૧.૬॥

દહેત્કટાહે ત્રિફલાં સામસી (ષી) મધસંયુતામ્ ।
ઉપદંશે પ્રલેપોઽય સદ્યો રોપયતે વ્રણમ્ ॥ ૧,૧૭૧.૭॥

ત્રિફલાનિમ્બભૂનિમ્બકરઞ્જખદિરાદિભિઃ ।
કલ્કૈઃ ક્વાથૈર્ઘૃતં પક્વમુપદંશહરં પરમ્ ॥ ૧,૧૭૧.૮॥

આદૌ ભગ્નં વિદિત્વા તુ સેચયેચ્છીતલાંબુના ।
પક્વેનાલેપનં કાર્યં બન્ધનં ચ કુશાન્વિતમ્ ॥ ૧,૧૭૧.૯॥

માષં માંસં તથા સર્પિઃ ક્ષીરં યૂષઃ સતીજલઃ ।
બૃંહણં ચાન્નપાનં સ્યાત્પ્રદેયં ભગ્નરોગિણે ॥ ૧,૧૭૧.૧૦॥

રસોનમધુનાસાજ્યસિતાકલ્કં સમશ્નુતા ।
છિન્નભિન્નચ્યુતાસ્થીનાં સન્ધાનમચિરાદ્ભવેત્ ॥ ૧,૧૭૧.૧૧॥

અશ્વત્થત્રિફલાવ્યોષાઃ સવરભિઃ સમીકૃતૈઃ ।
તુલ્યો ગુગ્ગુલુના યોજ્યો ભગ્નસન્ધિપ્રસાધ (કૃત્) કઃ ॥ ૧,૧૭૧.૧૨॥

સર્વકુષ્ઠેષુ વમનં રેચનં રક્તમોક્ષણ ।
વચાવાસાપટોલાનાં નિમ્બસ્ય કલિનીત્વચઃ ॥ ૧,૧૭૧.૧૩॥

કષાયો મધુના પીતો વાતહૃન્મદનાન્વિતઃ ।

વિરેચનં પ્રયોક્તવ્યં ત્રિવૃત્કર્ણફલત્રિકૈઃ ॥ ૧,૧૭૧.૧૪॥

મનઃ શિલામરીચૈસ્તુ તૈલં કુષ્ઠવિનાશનમ્ ।
સર્વકુષ્ઠે વિલેપોऽયં શિવાપઞ્ચગુડૌદનમ્ ॥ ૧,૧૭૧.૧૫॥

કરઞ્જૈલગજૈઃ કુષ્ઠં ગોમૂત્રેણ પ્રલેપતઃ ।
કરવીરોદ્ધર્તનં ચ તૈલાક્તસ્ય ચ કુષ્ઠહૃત્ ॥ ૧,૧૭૧.૧૬॥

હરિદ્રા મલયં રાસ્ના ગુડૂચ્યેऽગજસ્તથા ।
આરગ્વધઃ કરઞ્જશ્ચ લેપઃ કુષ્ઠહરઃ પરઃ ॥ ૧,૧૭૧.૧૭॥

મનઃ શિલાવિડઙ્ગાનિ વાગજી સર્ષપાસ્તથા ।
કરઞ્જૈર્મૂત્રપિષ્ટોऽયં લેપઃ કુષ્ટહરોऽર્કવત્ ॥ ૧,૧૭૧.૧૮॥

વિડઙ્ગૈऽવચા કુષ્ઠનિશાસિન્ધૂત્થસર્ષપૈઃ ।
મૂત્રામ્લપિષ્ટો લેપોऽયં દદ્રૂકુષ્ટવિનાશનઃ ॥ ૧,૧૭૧.૧૯॥

પ્રપુન્નાટસુબીજાનિ ધાત્રી સર્જરસઃ સ્નુહી ।
સૌવીરપિષ્ટં દદ્રૂણામેતદુદ્ધર્તનં પરમ્ ॥ ૧,૧૭૧.૨૦॥

આરગ્વધસ્ય પત્રાણિ આરનાલેન પેષયેત્ ।
દદ્રૂકિટ્ટિમ (ભ) કુષ્ઠાનિ હન્તિ સિધ્માનમેવ ચ ॥ ૧,૧૭૧.૨૧॥

ઉષ્ણો પીતા વાગુજી ચ કુષ્ઠજિત્ક્ષીરભોજનઃ ।
તિલાજ્યત્રિફલાક્ષૌદ્રવ્યોષભલ્લાતશર્કરાઃ ।
વૃષ્યાઃ સપ્ત સમા મેધ્યાઃ કષ્ઠહાઃ કામચારિણઃ ॥ ૧,૧૭૧.૨૨॥

વિડઙ્ગત્રિફલાકૃષ્ણાચૂર્ણં લીઢં સમાક્ષિકમ્ ।
હન્તિ કુષ્ઠક્રિમિમેહનાડીવ્રણભગન્દરાન્ ॥ ૧,૧૭૧.૨૩॥

યઃ ખાદેદભયારિષ્ટમરિષ્ટામલકાનિશાઃ ।
સ જયેત્સર્વકુષ્ઠાનિમાસાદૂર્ધ્વં ન સંશયઃ ॥ ૧,૧૭૧.૨૪॥

દહ્યમાનાયુતઃ કુમ્ભે મૂલગે ખદિરાઙ્કુરઃ ।
સાક્ષધાત્રીરસઃ ક્ષૌદ્રો હન્યાત્કુષ્ઠં રસાયનમ્ ॥ ૧,૧૭૧.૨૫॥

ધાત્રી ખદિરયોઃ ક્કાથં પીત્વા વાગજિસંયુતમ્ ।
શઙ્ખેન્દુધવલં શ્વિત્રં હન્તિ તૂર્ણં ન સંશયઃ ॥ ૧,૧૭૧.૨૬॥

પીત્વા ભલ્લાતકં તૈલં માસાદ્વ્યાધિં જયેન્નરઃ ।
સેવિતં ખાદિરં વારિ પાનાદ્યૈઃ કુષ્ઠજિદ્ભવેત્ ॥ ૧,૧૭૧.૨૭॥

ભાવિતં મલપૂક્વાથૈઃ સોમરાજીફલં બહુ ।
કર્ષં ભક્ષેદલવણો હ્યક્ષફલ્ગુશૃતં પિબેત્ ॥ ૧,૧૭૧.૨૮॥

હન્તિ શ્વિત્રમસાધ્યં ચ લેપે યોજ્યાપરાજિતા ।
વાસા શુદ્ધા ચ ત્રિફલા પટોલં ચ કરઞ્જકમ્ ॥ ૧,૧૭૧.૨૯॥

નિમ્બાશનં કૃષ્ણવેત્રં ક્વાથકલ્કેન યદ્ધૃતમ્ ।
વજકં તદ્ભવેત્કુષ્ઠં શતવર્ષાણિ જીવતિ ॥ ૧,૧૭૧.૩૦॥

સ્વરસેન ચ દૂર્વાયાઃ પચેત્તૈલં ચતુર્ગુણમ્ ।
કચ્છૂર્વિચર્ચિકા પામા અભ્યઙ્ગાદેવ નશ્યતિ ॥ ૧,૧૭૧.૩૧॥

દ્રુમત્વગર્કકુષ્ઠાનિ લવણાનિ ચ મૂત્રકમ્ ।
ગમ્ભારિકાચિત્રકૈસ્તૈસ્તૈલં કુષ્ઠવ્રણાદિનુત્ ॥ ૧,૧૭૧.૩૨॥

(અથામ્લપિત્તચિકિત્સા) ધાત્રીનિમ્બફલં તદ્વદ્ગોમૂત્રેણ ચ ચિત્રકમ્ ।
વાસામૃતાપર્પટિકાનિમ્બભૂનિમ્બમાર્કરૈઃ (વૈઃ) ।
ત્રિફલાકુલત્થૈઃ ક્વાથઃ સક્ષૌદ્રશ્ચામ્લપિત્તહા ॥ ૧,૧૭૧.૩૩॥

ફલત્રિકં પટોલં ચ તિક્તક્વાથઃ સિતાયુતઃ ।
પીતો યષ્ટીમધુયુતો જ્વરચ્છર્દ્યમ્લપિત્તજિત્ ॥ ૧,૧૭૧.૩૪॥

વાસાઘૃતં તિક્તઘૃતં પિપ્પલીઘૃતમેવ ચ ।
અમ્લપિત્તે પ્રયોક્તવ્યં ગુડકૂષ્માણ્ડકં તથા ॥ ૧,૧૭૧.૩૫॥

પિપ્પલી મધુસંયુક્તા અમ્લપિત્તવિનાશિની ।
શ્લેષ્માગ્નિમાન્દ્યનુત્પથ્યાપિપ્પલીગુડમોદકઃ ॥ ૧,૧૭૧.૩૬॥

પિષ્ટ્વાજાજ્ઞી સધન્યાકાં ઘૃપ્રસ્થં વિપાચયેત્ ।
કફપિત્તારુચિહરં મન્દાનલવમિં હરેત્ ॥ ૧,૧૭૧.૩૭॥

(ઇત્યમ્લપિત્તચિકિત્સા) પિપ્પલ્યમૃતભૂનિમ્બવાસકારિષ્ટપર્પટૈઃ ।
ખદિરારિષ્ટકૈઃ ક્વાથો વિસ્ફોટાર્તિજ્વરાપહઃ ॥ ૧,૧૭૧.૩૮॥

ત્રિફલારસસંયુક્તં સર્પિસ્ત્રિવૃતયાસહ ।
પ્રયોક્તવ્યં વિરેકાર્થં વીસર્પજ્વરશાન્તયે ॥ ૧,૧૭૧.૩૯॥

ખાદિરાત્રિફલારિષ્ટપટોલામૃતવાસકૈઃ ।
ક્વાથોઽષ્ટકાખ્યો જયતિ રોમાન્તિકમસૂરિકામ્ ॥ ૧,૧૭૧.૪૦॥

કુષ્ઠવીસર્પવિસ્ફોટકણ્ડ્વાદીનાં વિઘાતકઃ ।
લશુનાનાં તુ ચૂર્ણસ્ય ઘર્ષો મશકનાશનઃ ॥ ૧,૧૭૧.૪૧॥

ચર્મકીલં જરુમણિં મશકાંસ્તિલકાલકાન્ ।
ઉત્કૃત્ય શસ્ત્રેણ દહેત્ક્ષાગગ્નિભ્યામશેષતઃ ॥ ૧,૧૭૧.૪૨॥

પટોલનીલીલેપઃ સ્યાજ્જાલ (જ્વાલા) ગર્દભરોગનુત્ ।
ગુઞ્જાફલૈઃ શ‌ૃતં તલં ભૃઙ્ગરાજરસેન તુ ।
કણ્ઠ (ણ્ડુ) દારુણકૃત્કુષ્ઠવાતવ્યાધિવિનાશનમ્ ॥ ૧,૧૭૧.૪૩॥

અર્કાસ્થિમજ્જાત્રિફલાનાલીછા ભૃઙ્ગરાજકમ્ ।
જીર્ણે પક્વે લૌહચૂર્ણં કાઞ્જિકં કૃષ્ણકેશકૃત્ ॥ ૧,૧૭૧.૪૪॥

ક્ષીરાત્સશર્કરસાદ્વિપ્રસ્થો મધુકાત્પલે ।
તૈલમ્ય કુડવં પક્વં તન્નસ્યં પલિતાપહમ્ ॥ ૧,૧૭૧.૪૫॥

મુખરોગે તુ ત્રિફલાગણ્ડૂષપરિધારણમ્ ।
ગૃહધૂમ યવક્ષારપાઠાવ્યોપરસાઞ્જનમ્ ॥ ૧,૧૭૧.૪૬॥

તેજોદં ત્રિફલાલોધ્રં ચિત્રકં ચેતિ ચૂર્ણિતમ્ ।
સક્ષૌદ્રં ધારયેદ્વક્ત્રે ગ્રીવાદન્તાસ્યરોગનુત્ ॥ ૧,૧૭૧.૪૭॥

પટોલ નિમ્બજમ્વ્વાગ્રમાલતીનવપલ્લવાઃ ।
પઞ્ચપલ્લવકઃ શ્રેષ્ઠઃ કષયો મુખધાવને ॥ ૧,૧૭૧.૪૮॥

લશુનાર્દ્રકશિગ્રૂણાં પારુલ્યા મૂલકસ્ય ચ ।
રુદન્ત્યાશ્ચ રસઃ શ્રેષ્ઠઃ કદુષ્ણઃ કર્ણપૂરણે ॥ ૧,૧૭૧.૪૯॥

તીવ્રશૂલોત્તરે કર્ણે સશબ્દે ક્લેદવાહિનિ ।
બસ્તમૂત્રં ક્ષિપેત્કોષ્ણં સૈન્ધવેનાવચૂર્ણિતમ્ ॥ ૧,૧૭૧.૫૦॥

જાતીપત્રરસે તૈલં પક્વં પૂતિકકર્ણજિત્ ।
શુણ્ઠીતૈલં સાર્ષપં ચ ક્રોષ્ણં સ્યાત્કર્ણશૂલનુત્ ॥ ૧,૧૭૧.૫૧॥

પઞ્ચમૂલિશ‌ૃતં ક્ષીરં સ્યાચ્ચિત્રકહરીતકી ।
સર્પિર્ગુડઃ ષડઙ્ગશ્ચયૂષઃ પીનસશાન્તયે ॥ ૧,૧૭૧.૫૨॥

અક્ષિકુક્ષિભવા રોગાઃ પ્રતિશ્યાયવ્રણજ્વરાઃ ।
પઞ્ચૈતે પઞ્ચરાત્રેણ પ્રશમં યાન્તિ લઙ્ઘનાત્ ॥ ૧,૧૭૧.૫૩॥

ધાત્રીરસાનાઞ્ચ દૃશઃ કોપં હરતિ પૂરણાત્ ।

સક્ષૌદ્રઃ સૈન્ધવો વાપિ શિગ્રુદાર્વિરસાઞ્જનમ્ ॥ ૧,૧૭૧.૫૪॥

હરિદ્રાદારુસિન્ધૂત્થપથ્યાજનવગૌરિકૈઃ ।
પિષ્ટૈર્દત્તો બહિર્લપો નેત્રવ્યાધિનિવારકઃ ॥ ૧,૧૭૧.૫૫॥

મૃતભ્રષ્ટાભયાલેપાત્ત્રિફલા ક્ષીરસંયુતા ।
શુણ્ઠીનિમ્બદલૈઃ પિષ્ટૈઃ સુખોષ્ણૈઃ સ્વલ્પસૈન્ધવૈઃ ।
ધાર્યશ્ચક્ષુષિ સંક્ષેપાચ્છોથકણ્ડૂરુજાપહઃ ॥ ૧,૧૭૧.૫૬॥

અભયાક્ષામૃતં ચૈકદ્વિચતુર્ભાગિકં યુતમ્ ।
મધ્વાજ્યલીઢં ક્વાથો વા સર્વનેત્રરુગર્દનમ્ ॥ ૧,૧૭૧.૫૭॥

ચન્દનત્રિફલાપૂગપલાશતરુમૂલકૈઃ ।
જલપિષ્ટૈરિયં વિર્તિરશેષતિમિરાપહા ॥ ૧,૧૭૧.૫૮॥

દધ્નાતિઘૃષ્ટં મરિચં રાત્ર્યાન્ધ્યાપહમઞ્જનમ્ ।
ત્રિફલાક્વાથકલ્કાભ્યાં સપયસ્કં શૃતં ઘૃતમ્ ॥ ૧,૧૭૧.૫૯॥

તિમિરાણ્યચિરાદ્ધન્યાત્પીતમેતન્નિશામુખે ।
પિપ્પલીત્રિફલા દ્રાક્ષાલોહચૂર્ણં સસૈન્ધવમ્ ॥ ૧,૧૭૧.૬૦॥

ભૃઙ્ગરાજરસૈર્ઘૃષ્ટં ઘુટિકાઞ્જનમિષ્યતે ।
આન્ધ્યં સતિમિરં કાચં હન્ત્યન્યાન્નેત્રરોગકાન્ ॥ ૧,૧૭૧.૬૧॥

ત્રિકટુ ત્રિફલા નક્ત સૈન્ધવં ચ મનઃ શિલા ।
રુચકં શઙ્ખનાભિશ્ચ જાતીપુષ્પાણિ નિમ્બકમ્ ॥ ૧,૧૭૧.૬૨॥

રસાઞ્જનં ભૃઙ્ગરાજં ઘૃતં મધુ પયસ્તથા ।
એતત્પિષ્ટ્વા ચ વટિકા સર્વનેત્રરુગર્દિની ॥ ૧,૧૭૧.૬૩॥

દગ્ધમેરણ્ડકં મૂલં લેપાત્કાકિકપેષિતમ્ ।
શિરોઽર્તિં નાશયત્યાશુ પુષ્પં વા મુચુકુન્દક (જ) મ્ ॥ ૧,૧૭૧.૬૪॥

શતમૂલ્યૈરણ્ડમૂલચક્રાવ્યાઘ્રીપલૈઃ શૃતમ્ ।
તૈલં નસ્યમરુશ્લેષ્મતિમિરોર્ધ્વર્(દ્ધ) ગદાપહમ્ ॥ ૧,૧૭૧.૬૫॥

નાચનં (લનણં) સગુડં વિશ્વં પિપ્પલી વા સસૈન્ધવા ।
ભુજસ્તમ્ભાદિરોગેષુ સર્વેષૂર્ધ્વગદેષુ ચ ॥ ૧,૧૭૧.૬૬॥

સૂર્યાવર્તે વિધાતવ્યં નસ્યકર્માદિભેષજમ્ ।
દશમૂલીકષાયં તુ સર્પિઃ સૈન્ધવસંયુતમ્ ।

નસ્યમઙ્ગવિભેદઘ્નં સૂર્યાવર્તશિરોઽર્તિનુત્ ॥ ૧,૧૭૧.૬૭॥

દધ્ના સૌવર્ચલાજાજીમધૂકં નીલમુત્પલમ્ ।
પિબેત્ક્ષૌદ્રયુતં નારી વાતાસૃગ્દરપીડિતા ॥ ૧,૧૭૧.૬૮॥

વાસકસ્વરસં પૈત્તે ગુડૂચ્યા રસમેવ વા ।
જલેનામલકીબીજં કલ્કં વાસસિતામધુ ॥ ૧,૧૭૧.૬૯॥

આમલક્યા મધુરસં મૂલં કાર્પાસમેવ વા ।
પાણ્ડુપ્રદરશાન્ત્યર્થં પિબેત્તણ્ડુલવારિણા ॥ ૧,૧૭૧.૭૦॥

તણ્ડુલીયકમૂલં તુ સક્ષૌદ્રં સરસાઞ્જનમ્ ।
તણ્ડુલોદકસમ્પીતં સર્વાંશ્ચાસૃક્દરાઞ્જયેત્ ।
કુશમૂલં તણ્ડુલાદ્ભિઃ પીતં ચાસૃક્દરં જયેત્ ॥ ૧,૧૭૧.૭૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નાડીવ્રણાદિચિકિત્સાવર્ણનં નામૈકસપ્તત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૨

ધન્વન્તરિરુવાચ ।
સ્ત્રીરોગાદિચિકિત્સાં ચ વક્ષ્યે સુશ્રુત તચ્છૃણુ ।
યોનિવ્યાપત્સુ ભૂયિષ્ટં શસ્યતે કર્મ વાતજિત્ ॥ ૧,૧૭૨.૧॥

વચોપકુઞ્ચિકાજાતીકૃષ્ણાવાસકસૈન્ધવમ્ ।
અજમોદાયવક્ષારં ચિત્રકં શર્કરાન્વિતમ્ ॥ ૧,૧૭૨.૨॥

પિષ્ટ્વાલોડ્ય જલાદ્યૈશ્ચ ખાદયેદ્ઘૃતભર્જિતમ્ ।
યોનિપાર્શ્વાર્તિહૃદ્રોગગુલ્માર્શો વિનિવર્તયેત્ ॥ ૧,૧૭૨.૩॥

બદરીપત્રસંલેપાદ્યોનિર્ભિન્ના પ્રશામ્યતિ ।
લોધ્રતુમ્બીફલાલેપાદ્યોનેર્દાર્ઢ્યં કરોતિ ચ ॥ ૧,૧૭૨.૪॥

પઞ્ચપલ્લવપિષ્ટાહ્વમાલતીકુસુમૈર્ઘૃતમ્ ।
રવિપક્વમસૃગ્ધારં યોનિગન્ધવિનાશનમ્ ॥ ૧,૧૭૨.૫॥

સકાઞ્જિકં જપાપુષ્પપુષ્પં જ્યોતિષ્મતીદલમ્ ।
દૂર્વાપિષ્ટં ચ સમ્પ્રાશ્ય ચિત્રકં શર્કરાન્વિતમ્ ॥ ૧,૧૭૨.૬॥

ધાત્ર્યઞ્જનાભયાચૂર્ણં તોયપીતં રજો હરેત્ ।

સદુગ્ધા લક્ષ્મણા પીતા નસ્યાદ્વા પુત્રદા ઋતૌ ॥ ૧,૧૭૨.૭॥

દુગ્ધસ્યાર્ધાઢકં ચાજ્યમશ્વગન્ધા ચ પુત્રદા ।
વન્ધ્યા પુત્રં લભેત્પીત્વા ઘૃતેન વ્યોપકેસરમ્ ॥ ૧,૧૭૨.૮॥

કુશકાશોરુચૃકાનાં મૃલૈર્ગોક્ષુરકસ્ય ચ ।
શ‌ૃતં દુગ્ધં સિતાયુક્તં ગર્ભિણ્યાઃ શૂલનુત્પરમ્ ॥ ૧,૧૭૨.૯॥

પાઠાલાઙ્ગલિસિંહાસ્યમયૂરકૂટજૈઃ પૃથક્ ।
નાભિબસ્તિ ભગાલેપાત્સુખં નારી પ્રસૂયતે ॥ ૧,૧૭૨.૧૦॥

સૂતાયા હૃચ્છિરોબસ્તિશૂલમર્કન્દ (ક્વલ્લ) સંજ્ઞિતમ્ ।
યવક્ષારં પિબેત્તત્ર મસ્તુ કોષ્ણોદકેન વા ॥ ૧,૧૭૨.૧૧॥

દશમૂલીકૃતઃ ક્તાથઃ સાજ્યઃ મૂતિરુજાપહઃ ।
શાતિલણ્ડુલચૂર્ણં તુ સદુગ્ધં દુગ્ધકૃદ્ભવેત્ ॥ ૧,૧૭૨.૧૨॥

વિદારી કન્દસ્વરસં મૂલં કાર્પાસજં તથા ।
ધાત્રી સ્તન્યવિશુદ્ધ્યર્થં મુદ્ગયૂપરસાશિની ॥ ૧,૧૭૨.૧૩॥

કુષ્ઠા વચાભયા બ્રાહ્મી મધુરા ક્ષૌદ્રસર્પિષા ।
વર્ણાયુઃ કાન્તિજનનં લેહ્યં વાલમ્ય દાપયેત્ ॥ ૧,૧૭૨.૧૪॥

સ્તન્યાભાવે પયશ્છાગં ગવ્યં વા તદ્ગુણં પિવેત્ ।
સ્વેદનં નાગ્નિશોફાર્તે મૃદા સ્યાદગ્નિતપ્તયા ॥ ૧,૧૭૨.૧૫॥

લેહો મુસ્તવિપાયાશ્ચ વમિકાસજ્વરે પિબેત્ ।
સુસ્તશુણ્ઠીવિષાવિલ્વકૂટજૈરતિસારનુત ॥ ૧,૧૭૨.૧૬॥

મધુ વ્યોષં માતુલુઙ્ગં હિક્કાચ્છર્દિનિવારણમ્ ।
કુષ્ઠેન્દ્રયવસિદ્ધાર્થા નિશા દૂર્વા ચ કુષ્ઠજિત્ ॥ ૧,૧૭૨.૧૭॥

મહામુણ્જિતિકોજીચ્યકાથૈઃ સ્નાનં ગ્રહાપહમ્ ।
સપ્તચ્છદામયનિશાચન્દનૈશ્ચાનુલેપનમ્ ॥ ૧,૧૭૨.૧૮॥

શઙ્ખાબ્જબીજરુદ્રાક્ષવચાલૌહાદિધારણમ્ ।
ૐ કં ટં યં ગં વૈનતેયાય નમઃ ।
ૐ હોં હાં હઃ મન્ત્રેણ શાન્તિર્વાલાનાં માર્જનાદ્વલિદાનતઃ ।
ૐ હ્રીં બાલગ્રહાદ્વલિં ગૃહ્ણીત વાલં મુચ્ચત સ્વાહા ॥ ૧,૧૭૨.૧૯॥

તણ્ડુલાદ્ભિઃ શિરીપસ્ય પલં પીતં વિષાપહમ્ ।

તણ્ડુલાદ્ભિશ્ચ વર્ષાભ્વાઃ શુક્લાયાઃ સર્પદંશનુત્ ॥ ૧,૧૭૨.૨૦॥

દધ્યાજ્યં તણ્ડુલીયં ચ ગૃહધૃમો નિશા તથા ।
પિષ્ટં પાનં તથા ક્ષૌદ્રં સિન્ધૃત્થસ્ય વિપાન્તકમ્ ॥ ૧,૧૭૨.૨૧॥

અઙ્કોટમૂલનિષ્ક્વાથઃ સાજ્યઃ પીતો વિષાન્તકઃ ।
યજ્જરાવ્યાધિવિધ્વંસિ ભેષજં તદ્રસાયનમ્ ॥ ૧,૧૭૨.૨૨॥

સિન્દૂત્યશર્કરાશુણ્ઠીકણામધુગુડૈઃ ક્રમાત્ ।
વર્ષાદિષ્વભયા સેવ્યા રસાયનગુણૈષિણા ॥ ૧,૧૭૨.૨૩॥

જ્વરસ્યાન્તેઽભયાં ચૈકાં પ્રભુઙ્ક્તે દ્વે વિભીતકે ।
ભુક્ત્વા મધ્વાજ્યધાત્રીણાં ચતુષ્કં શતવર્ષકૃત્ ॥ ૧,૧૭૨.૨૪॥

પીતાશ્વગન્ધા પયસા ઘૃતેનાશેષરોગનુત્ ।
મણ્ડૂકપર્ણ્યાઃ સ્વરસો વિદાર્યાશ્ચામૃતોપમઃ ॥ ૧,૧૭૨.૨૫॥

તિલધાત્રીભૃઙ્ગરાજૌ જગ્ધ્વા વર્ષશતી ભવેત્ ।
ત્રિકટુ ત્રિફલા વહ્નિર્ગુડૂચી ચ શતાવરી ॥ ૧,૧૭૨.૨૬॥

વિડઙ્ગલોહચૂર્ણં તુ મધુના સહ રોગનુત્ ।
ત્રિફલા ચ કણા શુણ્ઠી ગુડૂચી ચ શતાવરી ॥ ૧,૧૭૨.૨૭॥

વિડઙ્ગભૃઙ્ગરાજાદિ ભાવિતં સર્વરોગનુત્ ।
ચૂર્ણં વિદાર્યા મધ્વાજ્યં લીઢ્વા દશ સ્ત્રિયો વ્રજેત્ ॥ ૧,૧૭૨.૨૮॥

ઘૃતં શતાવરીકલ્કૈઃ ક્ષીરૈર્દશગુણૈઃ પચેત્ ।
શર્કરાપિપ્પલીક્ષૌદ્રયુક્તં વા જારકં વિદુઃ ॥ ૧,૧૭૨.૨૯॥

પ્રતિમર્ષોઽવપીડશ્ચ નસ્યં પ્રવપનં તથા ।
શિરોવિરેચનં ચેતિ પઞ્ચકર્મ ચ કથ્યતે ॥ ૧,૧૭૨.૩૦॥

માસૈર્દ્વિસંખ્યૈર્માઘાદ્યૈઃ ક્રમાત્ષડૃતવઃ સ્મૃતાઃ ।
અગ્નિસેવામધુક્ષીરવિકૃતીઃ પરિપેવયેત્ ॥ ૧,૧૭૨.૩૧॥

સ્ત્રીયુક્તઃ શિશિરે તદ્વદ્વસન્તે ન દિવા સ્વપેત્ ।
ત્યજેદ્વર્ષાસુ સ્વપ્નાદીઞ્છરદિન્દોશ્ચ રશ્મયઃ ॥ ૧,૧૭૨.૩૨॥

પથ્યાનિ શાલયો મુદ્રા વર્ષામ્ભઃ ક્વથિતં પયઃ ।
નિમ્વાતસીકુસુમ્ભાનાં શિગ્રુસર્ષપયોસ્તથા ॥ ૧,૧૭૨.૩૩॥

જ્યોતિષ્મતીમૂલકાનાં તૈલાનિ ચ હરન્તિ હિ ।
કૃમિકુષ્ઠપ્રમેહાંશ્ચ વાતશ્લેષ્મશિરોરુજઃ ॥ ૧,૧૭૨.૩૪॥

દાડિમામલકીકોલકરમર્દ્પિયાલકમ્ ।
જમ્બીરં નાગગ્ગં ચ આમ્રાતકકપિન્થકમ્ ॥ ૧,૧૭૨.૩૫॥

પિત્તલાન્યનિલઘ્નાનિ કફોત્ક્લેશકરાણિચ ।
જલં જીમૂતકેક્ષ્વાકુકુટજાકૃતબન્ધનમ્ ॥ ૧,૧૭૨.૩૬॥

ધામાર્ગવશ્ચ સંયોજ્યાઃ સર્વથા વમનેષ્વમી ।
પૂર્વાહ્નિ વમનાયેતે મદનેન્દ્રયવી વચા ॥ ૧,૧૭૨.૩૭॥

મૃદુકોષ્ટશ્ચ પિત્તેન ખરો વાતકફાશ્રયાત્ ।
મધ્યમઃ સમદોષે સ્યાત્ત્રિવૃત્તિતે વિરેચનમ્ ॥ ૧,૧૭૨.૩૮॥

શર્કરામધુસંયુક્તં સૈન્ધવં નગરં ત્રિવૃત્ ।
હરીતકીવિહઙ્ગાનિ ગોમૂત્રેણ વિરેચનમ્ ॥ ૧,૧૭૨.૩૯॥

એરણ્ડતૈલં ત્રિફલાક્વાથશ્ચ દ્વિગુણસ્તથા ।
વાતોલ્બણેષુ દોષેષુ ભોજયિત્વાથ વામયેત્ ॥ ૧,૧૭૨.૪૦॥

વંશાદિનેત્રં કુર્વીત પડષ્ટદ્વાદશાઙ્ગુલમ્ ।
કર્કન્ધુફલવચ્છિદ્રં વસ્તિરુત્તાનશાયિને ॥ ૧,૧૭૨.૪૧॥

નિરૂહદાનેઽપિ વિધિરયમેવમુદીરિતઃ ।
અર્ધત્રિપટ્પલે માત્રા લઘુમધ્યોત્તમઃ ક્રમાત્ ॥ ૧,૧૭૨.૪૨॥

પથ્યાક્ષવાત્ર્યોકદ્વિચતુર્ભાગ રુગર્દનાઃ ।
શતવર્યસૃતાભૃઙ્ગસિન્ધુવારાદિભાવિતાઃ ॥ ૧,૧૭૨.૪૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સ્ત્રીરોગચિકિત્સાદિકયનં નામ દ્વિસપ્તત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૩
ધન્વન્તરિરુવાચ ।
દ્રવ્યાણિ મધુરાદીનિ વક્ષ્યે રાગહરાણ્યહમ્ ।
શાલિષષ્ટિકગોધૂમક્ષીરં ઘૃતં રસા મધ ॥ ૧,૧૭૩.૧॥

મજ્જાશૃઙ્ગાટકયવકશેર્વિવારુગીક્ષુરમ્ ।

ગમ્ભગી પૌષ્કરં બીજં દ્રાક્ષા ખર્જૂરકં બલા ॥ ૧,૧૭૩.૨॥

નારિકલેક્ષ્વાત્મગુપ્તા વિદારી ચ પ્રિયાલકમ્ ।
મધુકં તાલકષ્માણ્ડં મુખ્યોઽયં મધુરો ગણઃ ॥ ૧,૧૭૩.૩॥

મૂર્છાદાહપ્રશમનઃ પડિન્દ્રિયપ્રસાદનઃ ।
કૃમિકૃત્કફકૃચ્ચૈવ એકોઽત્યર્થં નિપેવિતઃ ॥ ૧,૧૭૩.૪॥

શ્વાસકાસામ્યમાધુર્યસ્વરઘાતાર્વુદાનિ ચ ।
ગલગણ્ડશ્ચીપદાનિ ગુડલેપાદિ કારયેત્ ॥ ૧,૧૭૩.૫॥

દાડિમામલકામ્રં ચ કપિત્થકરમર્દકૌ ।
માતુલુઙ્ગામ્રાતકં ચ બદરં તિન્તડીફલમ્ ॥ ૧,૧૭૩.૬॥

દધિ તક્રં કાઞ્જિકં ચ લકુચં ચામ્લવે તસમ્ ।
અમ્લો લોણઃ શુણ્ઠીયુક્તો જારણઃ પાચનો રસઃ ॥ ૧,૧૭૩.૭॥

ક્લેદનો વાતકૃદ્દૃપ્યો વિદાહી ચાનુલોમનઃ ।
અમ્લોઽત્યર્થં સેવ્યમાનઃ કુર્યાદ્ધૈ દન્તહર્ષકમ્ ॥ ૧,૧૭૩.૮॥

શરીરસ્ય ચ શૈતિલ્યં સ્વરકણ્ઠાસ્યહૃદ્દહેત્ ।
છિન્નભિન્નવ્રણાદીનિ પાચયિત્વાગ્નિભાવિતઃ ॥ ૧,૧૭૩.૯॥

લવણાનિ યવક્ષારસર્જિકાદિશ્ચ લાવણઃ ।
શોધનઃ પાચનઃ ક્લેદી વિશ્લેષસર્પણાદિકૃત્ ॥ ૧,૧૭૩.૧૦॥

માર્ગરોધી માર્દવકૃત્સ એકઃ પરિષેવિતઃ ।
ગાત્રકણ્ડૂકોષ્ઠશોથવૈવર્ણ્યં જનયેદ્રસઃ ।
રક્તવાતં પિત્તરક્તં પુંસ્ત્વેન્દ્રિયરુજાદિકમ્ ॥ ૧,૧૭૩.૧૧॥

વ્યોષશિગ્રૂમૂલકં દેવદારુ ચ કુષ્ઠકમ્ ।
લશુનં વલ્ગુજી ફલં મુસ્તાગુગ્ગુલુલાઙ્ગલી ॥ ૧,૧૭૩.૧૨॥

કટુકો દીપનઃ શોધી કુષ્ઠકણ્ડૂકફાન્તકૃત્ ।
સ્થૌલ્યાલસ્યક્રિમિહરઃ શુક્રમેદોવિરોધનઃ ।
એકોઽત્યર્થં સેવ્યમાનઃ ભ્રમદાહાદિકૃદ્ભવેત્ ॥ ૧,૧૭૩.૧૩॥

કૃતમાલઃ કીરાણિ હરિદ્રેન્દ્રયવાસ્તથા ।
સ્વાદુકણ્ટકવેત્રાણિ બૃહતીદ્વયશઙ્ખિની ॥ ૧,૧૭૩.૧૪॥

ગુડૂચી ચદ્રવન્તી ચ ત્રિવૃન્મણ્ડૂકપર્ણ્યપિ ।

કારવેલ્લકવાર્તાકુકરવીરકવાસકાઃ ॥ ૧,૧૭૩.૧૫॥

રોહિણી શઙ્ખચૂર્ણં ચ કર્કોટો વૈ જયન્તિકા ।
જાતીવારુણકં નિમ્બો જ્યોતિષ્મતી પુનર્નવા ॥ ૧,૧૭૩.૧૬॥

તિક્તો રસશ્છેદનઃ સ્યાદ્રોચની દીપનસ્તથા ।
શોધનો જ્વરતૃષ્ણાઘ્નો મૂર્છાકણ્ઠાર્તિકાદિજિત્ ॥ ૧,૧૭૩.૧૭॥

વિણ્મૂત્રક્લેદસંશોષો હ્યત્યર્થં સ ચ સેવિતઃ ।
હનુસ્તમ્ભાક્ષેપકાર્તિશિરઃ શૂલભ્રાણાદિકૃત્ ॥ ૧,૧૭૩.૧૮॥

ત્રિફલાસલ્લકીજમ્બુ આમ્રાતકવચાદિકમ્ ।
તિન્દુકં વકુલં શાલં પાલઙ્કીમુદ્ગચિલ્લકમ્ ॥ ૧,૧૭૩.૧૯॥

કષાયો ગ્રાહકો રોપી સ્તમ્ભનક્લેદશોષણઃ ।
એકોઽત્યર્થં સેવ્યમાનો હૃદયે ચાથ પીડકઃ ।
મુખશોષજ્વરાધ્માનમન્યાસ્તમ્ભાદિકારકઃ ॥ ૧,૧૭૩.૨૦॥

હરિદ્રાકુષ્ઠલવણં મેષશ‍ૃઙ્ગિબલાદ્વયમ્ ।
કચ્છુરા સલ્લકી પાઠા પુનર્નવા શતાવરી ॥ ૧,૧૭૩.૨૧॥

અગ્નિ મન્થો બ્રહ્મદણ્ડી શ્વદંષ્ટ્રૈરણ્ડકે તથા ।
યવકોલકુલત્થાદિકર્ષાંશી દશમૂલકમ્ ।
પૃથક્સમસ્તો વાતાતોર્બહુપિત્તહરસ્તથા ॥ ૧,૧૭૩.૨૨॥

શતાવરી વિદારી ચ બાલકોશીરચન્દનમ્ ।
દૂર્વા વટઃ પિપ્પલી ચ બદરી સલ્લકી તથા ॥ ૧,૧૭૩.૨૩॥

કદલી ચોત્પલં પદ્મમુદુમ્બરપટોલકન્ ।
અથ શ્લેષ્મહરો વર્ગો હરિદ્રાગુડકુષ્ઠકમ્ ॥ ૧,૧૭૩.૨૪॥

શતપુષ્પી ચ જાતી ચ વ્યોષારગ્વધલાઙ્ગલી ।
સર્પિસ્તૈલવસામજ્જાઃ સ્નેહેષુ પ્રવરં સ્મૃતમ્ ॥ ૧,૧૭૩.૨૫॥

તથા ધીસ્મૃતિમેધાગ્નિકાઙ્ક્ષિણાં શસ્યતે ઘૃતમ્ ।
કેવલં પૈત્તિકે સર્પિર્વાતિકે લવણાન્વિતમ્ ॥ ૧,૧૭૩.૨૬॥

દેયં બહુકફે વાપિ વ્યોષક્ષારસમાયુતમ્ ।
ગ્રન્થિનાડીકૃમિસ્લેષ્મમેદોમારુતરોગિષુ ॥ ૧,૧૭૩.૨૭॥

તૈલં લાઘવદાર્ઢ્યાય ક્રૂરકોષ્ઠેષુ દેહિષુ ।

વાતાતપામ્બુભારસ્ત્રીવ્યાયામક્ષીણધાતુષુ ॥ ૧,૧૭૩.૨૮॥

રૂક્ષક્લેશક્ષયાત્યાગ્નિવાતા વૃતપથેષુ ।
અથ દગ્ધ્વા શિરાજાલં યોનિકર્મ શિરોરુજિ (જમ્) ॥ ૧,૧૭૩.૨૯॥

ઉત્તમસ્ય પલં માત્રા ત્રિભિશ્ચાક્ષૈશ્ચ મધ્યમે ।
જઘન્યસ્ય પલાર્ધેન સ્નેહક્વાથૌષધેષુ ચ ॥ ૧,૧૭૩.૩૦॥

જલમુષ્ણં ઘૃતે દેયં પૃથક્તૈલે તુ શસ્યતે ।
સેનેહે પિત્તે તુ તૃષ્ણાયાં પિબેદુષ્ણોદકં નરઃ ॥ ૧,૧૭૩.૩૧॥

વાતાનુલોમં દીપ્તાગ્રર્વર્ચઃ સ્નિગ્ધસ્ય તન્મતમ્ ।
રૂક્ષમ્ય સ્નેદૃનં કાર્યમભિસ્નિગ્ધસ્ય રૂક્ષણમ્ ॥ ૧,૧૭૩.૩૨॥

શ્યામાકકોરદોષાન્નતક્રપિણ્યાકસકુભિઃ ।
વાતશ્લેષ્માણિ વાતે વા કફે વા સ્વેદ ઇષ્યતે ।
ન સ્વેદયેદતિમ્થૂલરૂક્ષદુર્વલમૂર્છિતાન્ ॥ ૧,૧૭૩.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યોગસમદિવર્ણનં નામ ત્રિસપ્તન્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૪
ધન્વતરિરુવાચ ।
ઘૃતતૈલાદિ વક્ષ્યામિ શૃણુ સુશ્રુત રોગનુત્ ।
શઙ્ખપુષ્પી વચા સોમા બ્રાહ્મી બ્રહ્મસુવર્ચલા ॥ ૧,૧૭૪.૧॥

અભયા ચ ગુડૂચી ચ અટરૂપકવાગુજી ।
એતૈરક્ષસમૈર્ભાગૈર્ઘૃતપ્રસ્થં વિપાચયેત્ ॥ ૧,૧૭૪.૨॥

કણ્ટકાર્યા રસપ્રસ્થક્ષીરપ્રસ્થમમન્વિતમ્ ।
એતદ્બ્રાહ્મીઘૃતં નામ શ્રુતિમેધાકરં પરમ્ ॥ ૧,૧૭૪.૩॥

ત્રિફલાચિત્રકબલાનિર્ગુણ્ડી નિમ્બવાસકાઃ ।
પુનર્નવા ગુડૂચી ચ બૃહતી ચ શતાવરી ॥ ૧,૧૭૪.૪॥

એતૈર્ઘૃતં યથાલાભં સર્વરોગવિમર્દનમ્ ।
બલાશતકષાયે તુ તૈલસ્યાર્ધાઢકં પચેત્ ।
કલ્કૈર્મધૂકમઞ્જિષ્ઠાચન્દનોત્પલપદ્મકૈઃ ॥ ૧,૧૭૪.૫॥

સૂક્ષ્મૈલાપિપ્પલીકુષ્ઠત્વગેલાગુરુકેસરૈઃ ।
ગન્ધાશ્વજીવનીયૈશ્ચ ક્ષીરાઢકસમાશ્રિતમ્ ॥ ૧,૧૭૪.૬॥

એતન્મૃદ્વગ્નિના પક્વં સ્થાપયેદ્રાજતે શુભે ।
સર્વવાતવિકારાંસ્તુ સર્વધાત્વન્તરાશ્રયાન્ ॥ ૧,૧૭૪.૭॥

તૈલમેતત્પ્રશમયેદ્વલ્યાખ્યં રાજવલ્લભમ્ ।
શતાવરીરસપ્રસ્થં ક્ષીરપ્રસ્થં તથૈવ ચ ॥ ૧,૧૭૪.૮॥

શતપુષ્પં દેવદારુ માંસી શૈલેયકં બલા ।
ચન્દનં તગરં કુષ્ટં મનઃ શિલા જ્યોતિષ્મતી ॥ ૧,૧૭૪.૯॥

એતૈઃ કર્ષસમૈઃ કલ્કૈઃ ઘૃતપ્રસ્થં વિપાચયેત્ ।
કુબ્જવામનપઙ્ગૂનાં બધિરવ્યઙ્ગકુષ્ઠિનામ્ ॥ ૧,૧૭૪.૧૦॥

વાયુના ભગ્નગાત્રાણાં યે ચ સીદન્તિ મૈથુને ।
જરાજર્જરગાત્રાણાં ચાધ્માનમુખ શોષિણામ્ ॥ ૧,૧૭૪.૧૧॥

ત્વગ્ગતાશ્ચાપિ યે વાતા શિરાસ્નાયુગતાશ્ચ યે ।
સર્વાંસ્તાન્નાશયત્યાશુ તૈલં રોગકુલાન્તકમ્ ॥ ૧,૧૭૪.૧૨॥

નારાયણમિદં તૈલં વિષ્ણુનોક્તં રુગર્દનમ્ ।
પૃથક્તૈલં ઘૃતં કુર્યાત્સમસ્તૈરૌષધૈઃ પૃથક્ ॥ ૧,૧૭૪.૧૩॥

શતાવર્યા ગુડૂચ્યા વા ચિત્રકૈ ગોચનાન્વિતૈઃ ।
નિર્ગુણ્ડ્યા વા પ્રસારઃ સ્યાત્કણ્ટકાર્યા રસાદિભિઃ ॥ ૧,૧૭૪.૧૪॥

વર્ષાભૂવાલયા વાપિ વાસકન ફલત્રિકૈઃ ।
બ્રાહયા ચૈગણ્ડકેનાપિ ભૃઙ્ગરાજેન કુષ્ટિના ॥ ૧,૧૭૪.૧૫॥

મુસલ્યા દશમૂલેન ખદિરેણ વટાદિભિઃ ।
વટિકા મોદકો વાપિ ચૂર્ણ સ્યાત્સર્વરોગનુત્ ॥ ૧,૧૭૪.૧૬॥

ઘૃતેન મધુના વાપિ અદ્ભિઃ ખણ્ડગુડાદિભિઃ ।
લવણૈઃ કટુકૈર્યુક્તં યથાલાભં ચ ગેગનુત્ ॥ ૧,૧૭૪.૧૭॥

ચિત્રકાર્કત્રિવૃદ્વાપિ યવાનીહયમારકમ્ ।
સુધાં ચ બાલાં ગણિકાં સપ્તપર્ણસુવર્ચિકામ્ ॥ ૧,૧૭૪.૧૮॥

જ્યોતિષ્મતીઞ્ચ સંભૃત્ય તૈલં ધીરો વિપાચયેત્ ।
એતન્નિષ્યન્દનં તૈલં ભૃશં દદ્યાદ્ભગન્દરે ॥ ૧,૧૭૪.૧૯॥

શોધનં ગેપણં ચૈવ સર્વવર્ણકરં પરમ્ ।
ચિત્રકાદ્યં મહાતૈલં સર્વરોગપ્રભઞ્જનમ્ ॥ ૧,૧૭૪.૨૦॥

અજમોદં સસિન્દૂરં હરિતાલં નિશાદ્વયમ્ ।
ક્ષારદ્વયં ફેનયુતમાર્દ્રક સર (શવઃ લોદ્ભવમ્ ॥ ૧,૧૭૪.૨૧॥

ઇન્દ્રવારુણ્યપામાર્ગકદલૈઃ સ્યન્દનૈઃ સમમ્ ।
એભિઃ સર્ષપજં તૈલમજામૂત્રૈશ્ચયોજિતમ્ ॥ ૧,૧૭૪.૨૨॥

મૃદ્વગ્નિના પચેદેત્ગવ્યક્ષીરેણ સંયુતમ્ ।
અજમોદાદિકં તૈલં ગણ્ડમાલાં વ્યપોહતિ ॥ ૧,૧૭૪.૨૩॥

વિદગ્ધસ્તુ પચેત્પક્વં ચૈવ વિશોધયેત્ ।
રોપણં મૃદુભાવં ચ તૈલેનાનેન કારયેત્ ॥ ૧,૧૭૪.૨૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બ્રાહ્મીઘૃતાદિવર્ણનં નામ ચતુઃ સપ્તત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૫
રુદ્ર ઉવાચ ।
એવં ધન્વન્તરિર્વિષ્ણુઃ સુશ્રુતાદીનુવાચ હ ।
હરિઃ પુનર્હરાયાહ નાનાયોગાન્નુગર્દનાન્ ॥ ૧,૧૭૫.૧॥

હરિરુવાચ ।
સર્વજ્વરેષુ પ્રથમં કાર્યં શઙ્કર લઙ્ઘનમ્ ।
ક્વથિતોદકપાનં ચ તથા નિર્વાતસેવનમ્ ॥ ૧,૧૭૫.૨॥

અગ્નિસ્વેદાજ્જ્વરાસ્ત્વેવં નાશમાયાન્તિહીશ્વર ।
વાતજ્વરહરઃ ક્વાથો ગુડૂચ્યા મુસ્તકેન ચ ॥ ૧,૧૭૫.૩॥

દુરાલભૈશ્ચૈવ ઘૃતં પિત્તજ્વરહરઃ શ ृણુ ।
શુણ્ઠીપર્પટમુસ્તૈશ્ચ બાલકોશીરચન્દનૈઃ ॥ ૧,૧૭૫.૪॥

સાજ્યઃ ક્વાથઃ શ્લેષ્મજં તુ સશુણ્ઠિઃ સદુરાલભઃ ।
સવાલકઃ સર્વજ્જ્વરં સશુણ્ઠિઃ સહપર્પટઃ ॥ ૧,૧૭૫.૫॥

કિરાતતિક્તૈર્નારીગુડૂચીશુણ્ઠિમુસ્તકૈઃ ।

પિત્તજ્વરહરઃ સ્યાચ્ચ શ ृણ્વન્યં યોગમુત્તમમ્ ॥ ૧,૧૭૫.૬॥

વાલકોશીરપાઠાભિઃ કણ્ટકારિકમુસ્તકૈઃ ।
જ્વરનુચ્ચ કૃતઃ ક્વાથસ્તથા વૈ સુરદારુણા ॥ ૧,૧૭૫.૭॥

ધન્યાકનિમ્બમુસ્તાનાં સમધુઃ સ તુ શઙ્કર ।
પટોલપત્રયુક્તસ્તુ ગુડૂચીત્રિફલાયુતઃ ॥ ૧,૧૭૫.૮॥

પીતોઽખિલજ્વરહરઃ ક્ષુધાકૃદ્વાતનુત્ત્વિદમ્ ।
હરીતકીપિપ્લીનામામલીચિત્રકોદ્ભવમ્ ॥ ૧,૧૭૫.૯॥

ચૂર્ણં જ્વરં ચ ક્વથિતં ધાન્ય (ધન્યા) કોશીરપર્પટૈઃ ।
આમલક્યા ગુડૂચ્યા ચ મધુયુક્તં સચન્દનમ્ ॥ ૧,૧૭૫.૧૦॥

સમસ્તજ્વરનુચ્ચ સ્યાત્સન્નિપાતહરં શ ृણુ ।
હરિદ્રાનિમ્બત્રિફલામુસ્તકૈર્દેવદારુણા ॥ ૧,૧૭૫.૧૧॥

કષાયં કટુરોહિણ્યા સપટોલં સપત્રકમ્ ।
ત્રિદોષજ્વરનુચ્ચસ્યાત્પીતં તુ ક્વથિતં જલમ્ ॥ ૧,૧૭૫.૧૨॥

કણ્ટકાર્યા નાગરસ્ય ગુડૂચ્યા પુષ્કરેણ ચ ।
જગ્ધ્વા નાગબલાચૂર્ણં શ્વસકાસાદિનુદ્ભવેત્ ॥ ૧,૧૭૫.૧૩॥

કફવાતજ્વરે દેયં જલમુષ્ણં પિપાસિને ।
વિશ્વપર્પટકોશીરમુસ્તચન્દનસાધિતમ્ ॥ ૧,૧૭૫.૧૪॥

દદ્યાત્સુશીતલં વારિ તૃટ્છર્દિજ્વરદાહનુત્ ।
બિલ્વાદિપ પઞ્ચમૂલસ્ય ક્વાથઃ સ્યાદ્વાતિકે જ્વરે ॥ ૧,૧૭૫.૧૫॥

પાચનં પિપ્પલીમૂલં ગુડૂચીવિશ્વભેષજમ્ ।
વાતજ્વરે ત્વયં ક્વાથો દત્તઃ શાન્તિકરઃ પરઃ ॥ ૧,૧૭૫.૧૬॥

પિત્તજ્વરઘ્નઃ સમધુઃ ક્વાથઃ પર્પટનિમ્બયોઃ ।
વિધાને ક્રિયમાણેઽપિ યસ્ય સંજ્ઞા ન જાયતે ॥ ૧,૧૭૫.૧૭॥

પાદયોસ્તુ લલાટે વા દહેલ્લૌહશલાકયા ।
તિક્તા પાઠા પર્પટાશ્ચ વિશાલા ત્રિફલા ત્રિવૃત્ ।
સક્ષીરો ભેદનઃ ક્વાથઃ સર્વજ્વરવિશોધનઃ ॥ ૧,૧૭૫.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
જ્વરહરનાનાયોગાદિવર્ણનં નામ પઞ્ચસપ્તત્યુત્તરશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૭૬

શ્રીભગવાનુવાચ ।

સપ્તરાત્રાત્પ્રજાયન્તે ખલ્વાટસ્ય કચાઃ શુભાઃ ।
દગ્ધહસ્તિદન્તલેપાત્સાજાક્ષીરરસાઞ્જનાત્ ॥ ૧,૧૭૬.૧॥

ભૃઙ્ગરાજરસેનૈવ ચતુર્ભાગેન સાધિતમ્ ।
કેશવૃદ્ધિકરં તૈલં ગુઞ્જાચૂર્ણાન્વિતેન ચ ॥ ૧,૧૭૬.૨॥

એલામાંસીકુષ્ઠમુરાયુક્તમભ્યઙ્ગતઃ શિવમ્ ।
ગુઞ્જાફલં સમાદેયં લેપનં ચન્દ્રલુપ્તનુત્ ॥ ૧,૧૭૬.૩॥

આમ્રાસ્થિચૂર્ણલેપાદ્વૈ કેશાઃ સૂક્ષ્મા ભવન્તિ ચ ।
કરઞ્જામલકૈલાલલાક્ષાલેપોઽરુણાપહઃ ॥ ૧,૧૭૬.૪॥

આમ્રાસ્થિમજ્જામલકલેપાત્કેશા ભવન્તિ વૈ ।
બદ્ધમૂલા ઘના દીર્ઘાઃ સ્નગ્ધાઃ સ્યુર્નોત્પતન્તિ ચ ॥ ૧,૧૭૬.૫॥

વિડઙ્ગગન્ધપાષાણસાધિતં તૈલમુત્તમમ્ ।
સચતુર્ગુણગોમૂત્રં મનસઃ શિલમેવ વા ॥ ૧,૧૭૬.૬॥

શિરોઽભ્યઙ્ગાચ્છિરાજન્મયૂકાલિખ્યાઃ ક્ષયં નયેત્ ।
નવદગ્ધં શઙ્ખચૂર્ણં ઘૃષ્ટસીસકલેપિતમ્ ॥ ૧,૧૭૬.૭॥

કચાઃ શ્વક્ષ્ણા મહાકૃષ્ણા ભવન્તિ વૃષભધ્વજ ।
ભૃઙ્ગરાજં લોહચૂર્ણં ત્રિફલા બીજપૂરકમ્ ॥ ૧,૧૭૬.૮॥

નીલી ચ કરવીરં ચ ગુડમેતૈઃ સમં શ‌ૃતમ્ ।
પલિતાનીહ કૃષ્ણાનિ કુર્યાલ્લેપાન્મહૌષધમ્ ॥ ૧,૧૭૬.૯॥

આમ્રાસ્થિમજ્જા ત્રિફલા ની (તા) લી ચ ભૃઙ્ગ રાજકમ્ ।
જીર્ણં પક્વં લોહચૂર્ણં કાઞ્જિકં કૃષ્ણકેશકૃત્ ॥ ૧,૧૭૬.૧૦॥

ચક્રમર્દકબીજાનિ કુષ્ઠમેરણ્ડમૂલકમ્ ।
અત્યમ્લકાઞ્જિકં પિષ્ટ્વા લેપાન્મસ્તકરોગનુત્ ॥ ૧,૧૭૬.૧૧॥

સૈન્ધવં ચ વચા હિઙ્ગુ કુષ્ઠં નાગેશ્વરં તથા ।
શતપુષ્પા દેવદારુ એભિસ્તૈલં તુ સાધિતમ્ ॥ ૧,૧૭૬.૧૨॥

ગોપુરીપરસેનૈવ ચતુર્ભાગેન સંયુતમ્ ।
તત્ક્ષણભરણાદુગ્રકર્ણશૂલં ક્ષયં નયેત્ ॥ ૧,૧૭૬.૧૩॥

મેષમૂત્રસૈન્ધવાભ્યાં કર્ણયોર્ભરણાચ્છિવ ।
કર્ણયોઃ પૂતિનાશઃ સ્યાત્કૃમિસ્ત્રાવાદિકસ્ય ચ ॥ ૧,૧૭૬.૧૪॥

માલતીપુષ્પદલયો રસેન ભરણાત્તથા ।
ગોજલેનૈવ પૂરેણ પૂયસ્ત્રાવો વિનશ્યતિ ॥ ૧,૧૭૬.૧૫॥

કષ્ઠમાષમરીચાનિ તગરં મધુ પિપ્પલી ।
અપામાર્ગોઽશ્વગન્ધા ચ બૃહતી સિતસર્ષપાઃ ॥ ૧,૧૭૬.૧૬॥

યવાસ્તિલાઃ સૈન્ધવં ચ પાદિકોદ્વર્તનં શુભમ્ ।
લિઙ્ગબાહુસ્તનાનાં ચ કર્ણયોર્વૃદ્ધિકૃદ્ભવેત્ ।
કટુતૈલં ભલ્લાતકં બૃહતી ફલદાડિમમ્ ॥ ૧,૧૭૬.૧૭॥

વલ્કલૈઃ સાધિતૈર્લિપ્તં લિઙ્ગં તેન વિવર્ધતે ॥ ૧,૧૭૬.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
કેશોત્પત્ત્યાદિવર્ણનં નામ ષટ્સપ્તત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૭
હરિરુવાચ ।
સોભાઞ્જનપત્રરસં મધુયુક્તં હિ ચક્ષુષોઃ ।
ભ (ચ) રણાદ્રોગહરણં ભવેન્નાસ્ત્યત્ર સંશયઃ ॥ ૧,૧૭૭.૧॥

અશીતિતિલપુષ્પાણિ જાત્યાશ્ચ કુસુમાપિ ચ ।
ઉષાનિમ્બામલાશુણ્ઠીપિપ્પલીતણ્ડુલીયકમ્ ॥ ૧,૧૭૭.૨॥

છાયાસુષ્કાં વટીં કુર્યાત્પિષ્ટ્વા તણ્ડુલવારિણા ।
મધુના સહસા ચાક્ષ્ણોરઞ્જનાત્તિમિરાદિનુત્ ॥ ૧,૧૭૭.૩॥

બિભીતકાસ્થિમજ્જા તુ શઙ્ખનાભિર્મનઃ શિલા ।
નિમ્બપત્રમરીચા નિ અજામૂત્રેણ પેષયેત્ ॥ ૧,૧૭૭.૪॥

પુષ્પં રાત્ર્યન્ધતાં હન્તિ તિમિરં પટલં તથા ।
ચતુર્ભાગાનિ શઙ્ખસ્ય તદર્ધેન મનઃ શિલા ॥ ૧,૧૭૭.૫॥

સૈન્ધવં ચ તદર્ધેનત્વેતત્પિષ્ટ્વાદકેન તુ ।

છાયાશુષ્કાં તુ વટિકાં કૃત્વા નયનમઞ્જયેત્ ॥ ૧,૧૭૭.૬॥

તિમિરં પટલં હન્તિ પિચિટં ચ મહૌષધમ્ ।
ત્રિકટુ ત્રિફલાં ચૈવ કરં જસ્ય ફલાનિ ચ ॥ ૧,૧૭૭.૭॥

સૈન્ધવં રજનીદ્વે વ ભૃઙ્ગરાજરસેન હિ ।
પિષ્ટ્વા તદઞ્જનાદેવ તિમિરાદિવિનાશનમ્ ॥ ૧,૧૭૭.૮॥

આટરૂષકમૂલં તુ કાઞ્જિકાપિષ્ટમેવ તુ ।
તેનાક્ષિબૂમિલેપાચ્ચ ચક્ષુઃ શૂલં વિનશ્યતિ ॥ ૧,૧૭૭.૯॥

સતક્રં બદરીમૂલં પીતં વાક્ષિવ્યથાં હરેત્ ।
સૈન્ધંવં કટુતૈલં ચ અપામાર્ગસ્ય મૂલકમ્ ॥ ૧,૧૭૭.૧૦॥

ક્ષીરકાઞ્જિકસંઘૃષ્ટં તામ્રપાત્રે તુ તેન ચ ।
અઞ્જનાત્પિઞ્જટસ્યૈવ નાશો ભવતિ શઙ્કર ॥ ૧,૧૭૭.૧૧॥

ૐ દ્દ્રુ સર ક્રોં હ્રીં ઠઃ ઠઃ દ્દ્રુ સર હ્રીં હ્રીં ૐ ઉં ઊ સર ક્રીં ક્રીં ઠઃ ઠઃ ।
આદ્યા હિ વશામાયાન્તિ મન્ત્રેણાનેન ચાઞ્જનાત્ ॥ ૧,૧૭૭.૧૨॥

બિલ્વકનીલિકામૂલં પિષ્ટમભ્યઞ્જનેન ચ ।
અનેનાઞ્જિતમાત્રેણ નશ્યન્તિ તિમિરાણિ હિ ॥ ૧,૧૭૭.૧૩॥

કટુકં (પિપ્પલી) તગરં ચૈવ હરિદ્રામલકં વચા ।
ખદિરપિષ્ટવાત્તશ્ચ અઞ્જનાન્નેત્રરોગનુત્ ॥ ૧,૧૭૭.૧૪॥

નીરપૂર્ણમુખો ધૌતિ બૃહન્માનેન ચોડક્ષિણી ।
પ્રભાતે નેત્રરોગૈશ્ચ નિત્યં સર્વૈઃ પ્રમુચ્યતે ॥ ૧,૧૭૭.૧૫॥

શુક્લૈરણ્ડસ્ય મૂલેન પત્રેણાપિ પ્રસાધિતમ્ ।
છગદગ્ધસેકમૌષ્ણ્યાચ્ચક્ષુષોર્વાતશલનત્ ॥ ૧,૧૭૭.૧૬॥

ચન્દનં સૈન્ધવં વૃદ્ધપાલાશશ્ચ હરીતકી ।
પટલં કુસુમં નીલી ચ (વ) ક્રિકાં હરતેઽઞ્જનમ્ ॥ ૧,૧૭૭.૧૭॥

ગુઞ્જામૂલં છાગમૂત્રે ઘૃષ્ટં તિમિરનુચ્ચ તત્રૌપ્યતામ્રસુવર્ણાનાં
હસ્તઘૃષ્ટશલાકયા ॥ ૧,૧૭૭.૧૮॥

ઘૃષ્ટમુદ્ધર્તનં રુદ્ર કામલાવ્યાધિનાશનમ્ ।
ઘોષાફલમપાઘ્રાતં પીતકામલનાશનમ્ ॥ ૧,૧૭૭.૧૯॥

દૂર્વાદાડિમપુષ્પં તુ અલક્તકહરીતકી ।
નાસાર્શવાતરક્તનુન્નસ્યાદ્વૈ સ્વરસેન હિ ॥ ૧,૧૭૭.૨૦॥

આપિષ્ટ્વા જાઙ્ગલી મૂ (તૂ) લં તદ્રસેન વૃષધ્વજ ।
નસ્યાદારાદ્વિનશ્યેત નાશાર્શો નીલલોહિત ॥ ૧,૧૭૭.૨૧॥

ગવ્યં ઘૃતં સર્જરસં રુદ્ર ધન્યાકસૈન્ધવમ્ ।
ધુત્તૂરકં ગૈરિકં ચ એતૈઃ સાધિતસિક્થકમ્ ॥ ૧,૧૭૭.૨૨॥

સતૈલં વ્રણનુત્સ્યાચ્ચ સ્ફુટિતોદ્ઘટિતાધરે ।
જાતીપત્રં ચ ચર્વિત્વા વિધૃતં મુખરોગનુત્ ॥ ૧,૧૭૭.૨૩॥

ભક્ષાત્કેસરબીજસ્ય દન્તાઃ સ્યુશ્ચલિતાઃસ્થિરાઃ ।
મુષ્ટકં કુષ્ઠમેલા ચ યષ્ટિકં મધુવાલકમ્ ॥ ૧,૧૭૭.૨૪॥

ધન્યાકમેતદદનાન્મુખદુર્ગન્ધનુદ્ધર ।
કષાયં કટુકં વાપિ તિક્તશાકસ્ય ભક્ષણાત્ ॥ ૧,૧૭૭.૨૫॥

તલયુક્તસ્ય નિત્યં સ્યાન્મુખદુર્ગન્ધતાક્ષયઃ ।
દન્તવ્રણાનિ સર્વાણિ ક્ષયં ગચ્છન્ત્યનેન તુ ॥ ૧,૧૭૭.૨૬॥

કાઞ્જિકસ્ય સતૈલસ્ય ગણ્ડૂષકવલાસ્થિતિઃ ।
તામ્બૂલચૂર્ણદગ્ધસ્ય મુખસ્ય વ્યાધિનુચ્છિવ ! ॥ ૧,૧૭૭.૨૭॥

પરિત્યક્તશ્લેષ્મણશ્ચ શુણ્ઠીચર્વણતો યથા ।
માતુલુઙ્ગદલાન્યેલા યષ્ટી મધુ ચ પિપ્પલી ॥ ૧,૧૭૭.૨૮॥

જાતીપત્રમથૈષાં ચ ચૂર્ણં લીઢ્વા તથા કૃતમ્ ।
શેફાલિકજટાયાશ્ચ ચર્વણં ગલશુણ્ઠિનુત્ ॥ ૧,૧૭૭.૨૯॥

નાસાશિરારક્તકર્ષાન્નશ્યેચ્છંશકર જિહ્વિકા ।
રસઃ શિરીષબીજાનાં હરિદ્રાયાશ્ચતુર્ગુણઃ ॥ ૧,૧૭૭.૩૦॥

તેન પક્વેન ભૂતેશ નસ્યં મસ્તકરોગનુત્ ।
ગલરોગા વિનશ્યન્તિ નસ્યમાત્રેણ તત્ક્ષણાત્ ॥ ૧,૧૭૭.૩૧॥

દન્તકીટવિનાશઃ મ્યાદ્ગુઞ્જામૂલસ્ય ચર્વણાત્ ।
કાકજઙ્ઘાસ્નુહીનીલીકવાયો મધુમોજિતઃ ॥ ૧,૧૭૭.૩૨॥

દન્તાક્રાન્તાન્દન્તજાંશ્ચ કૃમીન્નાશયતે શિવ ।
ઘતં કર્કટપાદેન દુગ્ધોન્મિશ્રેણ સાધિતમ્ ॥ ૧,૧૭૭.૩૩॥

તેન ચામ્યઙ્ગિતાદન્તાઃ કુર્યુઃ કટકટાન્ન હિ ।
લિપ્ત્વા કર્કટપાદેન કેવલેનાથવાશિવ ॥ ૧,૧૭૭.૩૪॥

ત્રિસપ્તાહં વાઃ પિષ્ટાનિ જ્યોતિષ્મત્યાઃ ફલાનિ હિ ।
શુક્લાભયામજ્જલેપાદ્દન્તસ્યાઙ્કુકલઙ્કનુત્ ॥ ૧,૧૭૭.૩૫॥

લોધ્રકુઙ્કુમમઞ્જિષ્ઠાલોહકા લેયકાનિ ચ ।
યવતણ્ડુલમેતૈશ્ચ યષ્ટી મધુસમન્વિતૈઃ ॥ ૧,૧૭૭.૩૬॥

વારિપિષ્ટૈર્વક્ત્રલેપઃ સ્ત્રીણાં શોભનવક્ત્રકૃત્ ।
દ્વિભાગં છાગદુગ્ધેન તૈલપ્રસ્થં તુ સાધિતમ્ ॥ ૧,૧૭૭.૩૭॥

રક્તવન્દનમઞ્જિષ્ઠાલક્ષાણાં કર્ષકેણ વા ।
યષ્ટીમધુકુઙ્કુમાભ્યાં સપ્તાહાન્મુખકાન્તિકૃત્ ॥ ૧,૧૭૭.૩૮॥

શુણ્ઠીપિપ્પલિચૂર્ણં તુ ગુડૂચી કણ્ટકારિકા ।
એભિશ્ચ ક્વથિતં વારિ પીતં ચાગ્નિં કરોતિ વૈ ॥ ૧,૧૭૭.૩૯॥

વાતશૂલક્ષયં ચૈવ કગેતિ પ્રથમેશ્વર ।
કરઞ્જપર્પટોશીરં બહતી કટુરોહિણી ॥ ૧,૧૭૭.૪૦॥

ગોક્ષુરં ક્વથિતં ત્વભિર્વારિ પીતં શ્રમાપહન્ ।
દાહં પિત્તં જ્વરં શોષં મૂર્છાં ચૈવ ક્ષયં નયેત્ ॥ ૧,૧૭૭.૪૧॥

મધ્વાજ્યપિપ્પલીચૂર્ણં ક્વથિતં ક્ષીરસંયુતમ્ ।
પીતં હૃદ્રોગકાસસ્ય વિષમજ્વરનુદ્ભવેત્ ॥ ૧,૧૭૭.૪૨॥

ક્વાથૌપધીનાં સર્વાસાં કર્ષાર્ધં ગ્રાહ્યમેવ ચ ।
વયોઽનુરૂયતો જ્ઞેયો વિશેષો વૃષભધ્વજ ॥ ૧,૧૭૭.૪૩॥

દુગ્ધં પીતં તુ સંયુક્તં ગોપુરીષરસેન ચ ।
વિષમજ્વરનુત્સ્યાચ્ચ કાકજન્ધારસસ્તથા ॥ ૧,૧૭૭.૪૪॥

મશુણ્ઠિ ક્વથિતં ક્ષીગ્મજાયા જ્વરનુદ્ભવેત્ ।
યષ્ટીમધુકમુસ્તં ચ સૈન્ધવં બૃહતીફલમ્ ॥ ૧,૧૭૭.૪૫॥

એતૈર્નસ્વપ્રિદાનાચ્ચ નિદ્રા સ્યાત્પુરુપસ્ય ચ ।
મરીચપ્રધ્વશ્ચલાલાનસ્યાન્નિદ્રા ભવેચ્છિવ ॥ ૧,૧૭૭.૪૬॥

મૂલં તુ કાકજઙ્ઘાયા નિદ્રાકૃત્સ્યાચ્છિરસ્થિતમ્ ।

સિદ્ધં તૈલં કાઞ્જિકેન તથા સર્જરસેન ચ ॥ ૧,૧૭૭.૪૭॥

શીતોદકસમાયુક્તં લેપાત્સન્તાપનાશનમ્ ।
શોણિતજ્વરદાહેભ્યો જાતસન્તાપનુત્તથા ॥ ૧,૧૭૭.૪૮॥

શ◌ृકશૈવાલમન્થશ્ચ શુણ્ઠીપાષાણભેદકમ્ ।
શૌવાઞ્જનં ગોક્ષુરં વા વરુણચ્છન્નમેવ ચ ॥ ૧,૧૭૭.૪૯॥

સૌભાઞ્જનસ્ય મૂલં ચ એતૈઃ ક્વથિતવારિ ચ ।
દત્ત્વા હિઙ્ગુયવક્ષારં પીતં વાતવિનાશનમ્ ॥ ૧,૧૭૭.૫૦॥

પિપ્પલી પિપ્પલીમૂલં તથા ભલ્લાતકં શિવ ।
વાર્યેતૈઃ ક્વથિતં પીતં વરશૂલાપહારકૃત્ ॥ ૧,૧૭૭.૫૧॥

અશ્વગન્ધામૂલકાભ્યાં સિદ્ધા વલ્મીકમૃત્તિકા ।
એતયા મર્દનાદ્રુદ્ર ઊરુસ્તમ્ભઃ પ્રશામ્યતિ ॥ ૧,૧૭૭.૫૨॥

બૃહતીકસ્ય વૈ મૂલં સમ્પિષ્ટમુદકેન ચ ।
પીતં સંઘાતવાતસ્ય વિપાટનકૃદેવ ચ ॥ ૧,૧૭૭.૫૩॥

પીતં તક્રેણ મૂલં ચ આર્દ્રસ્ય તગરસ્ય ચ ।
હરેત્ઝિઞ્જિનીવાતં?વૈ વૃક્ષમિન્દ્રાશનિર્યથા ॥ ૧,૧૭૭.૫૪॥

અસ્થિસંહારમેકેન ભક્તેન સહ વાદિતમ્ ।
પતિં માંસરસેનાપિ વાતનુચ્ચાસ્થિભઙ્ગનુત્ ॥ ૧,૧૭૭.૫૫॥

ઘૃતલિપ્તં સશુષ્કં ચ છાગીક્ષીરેણ સંયુતમ્ ।
તલ્લોપાત્પાદયાર્નશ્યેત્સક્ષેપ્યે ચાત્ર સંશયઃ ॥ ૧,૧૭૭.૫૬॥

મધ્વાજ્યસૈન્ધવં સિક્થં ગુડકૈરિકગુગ્ગુલૈઃ ।
સસર્જરસસ્ફુટિતઃ ક્લોમશુદ્ધિશ્ચ લેપનાત્ ॥ ૧,૧૭૭.૫૭॥

કટુતૈલેન લિપ્તો વૈ વિધૂમાગ્નૌ પ્રતાપિતઃ ।
મૃત્તિકારખાદિતઃ પાદઃ સમઃ સ્યાદ્વૃષભધ્વજ ॥ ૧,૧૭૭.૫૮॥

સર્જરસાઃ સિક્થકં ચ જીરકં ચ હરીતકી ।
ઉત્સાધિતઘૃતાભ્યઙ્ગો હ્યગ્નિદગ્ધવ્યથાપનુત્ ॥ ૧,૧૭૭.૫૯॥

તિલતૈલં ચાગ્નિદગ્ધં યવભસ્મસમન્વિતમ્ ।
અગ્નિદગ્ધવ્રણં નશ્યેદ્બહુશઃ કૃતલેપતઃ ॥ ૧,૧૭૭.૬૦॥

નવનીતં માહિષં ચ દગ્ધપિષ્ટતિલાનિ ચ ।
સભલ્લાકં વ્રણં નશ્યેદ્વૃચ્છૂલં નસ્યલેપનાત્ ॥ ૧,૧૭૭.૬૧॥

કર્પૂરગવ્યસર્પિર્ભ્યાં પ્રહારઃ પૂરિતો હર ।
શસ્ત્રોદ્ભવઃ સબદ્ધશ્ચ શુક્લવર્ણેન શઙ્કર ! ।
પાકં ચ વેદનાં ચૈવ સંસ્પૃશેદ્વૃષભધ્વજ ॥ ૧,૧૭૭.૬૨॥

આમ્ર (તસ્ય) મૂલરસેનૈવ શસ્ત્રઘાતઃ પ્રપૂરિતઃ ।
ઢૌકતે શસ્ત્રઘાતાભ્યાં નિર્વ્રણો ધૃપૂરિતઃ ॥ ૧,૧૭૭.૬૩॥

શરપુઙ્ખા લજ્જાલુકા પાઠા ચૈષાં તુ મૂલકમ્ ।
જલપિષ્ટં તસ્ય લેપાચ્છસ્ત્રઘાતઃ પ્રશામ્યતિ ॥ ૧,૧૭૭.૬૪॥

મૂલં ચ કાકજઙ્ઘાયાસ્ત્રિરાત્રેણૈવ શોષિતઃ ।
પાકપૂતિં વેદનાં ચ હન્તિ વૈ રોહિતો વ્રણે ॥ ૧,૧૭૭.૬૫॥

સજલં તિલતૈલં ચ અપામાર્ગસ્ય મૂલકમ્ ।
તત્સેકદાનાન્નશ્યેચ્ચ પ્રહારોદ્ભવવેદના ॥ ૧,૧૭૭.૬૬॥

અભયાં સૈન્ધવં શુણ્ઠીમેતત્પિષ્ટ્વોદકેન તુ ।
ભક્ષયિત્વા હ્યજીર્ણસ્ય નાશો ભવતિ શઙ્કર ! ॥ ૧,૧૭૭.૬૭॥

કટિબદ્ધં નિમ્બમૂલમક્ષિસૂલહરં ભવેત્ ।
શણમૂલં સતામ્બૂલં દગ્ધમિન્દ્રિયકસ્ય (લ્પ) હૃત્ ॥ ૧,૧૭૭.૬૮॥

અન્નસ્વિન્નહરિદ્રા ચ શ્વેતસર્ષપમૂલકમ્ ।
બીજાનિ માતુલુઙ્ગસ્ય એષામુદ્વર્તનં સમમ્ ।
સપ્તરાત્રપ્રયોગેણ શુભદેહકરં ભવેત્ ॥ ૧,૧૭૭.૬૯॥

શ્વેતાપરાજિતાપત્રં નિમ્બપત્રરસેન તુ ।
નસ્યદાનાડ્ડાકિનીનાં માતૃણાં બ્રહ્મરક્ષસામ્ ।
મોક્ષઃ સ્યાન્મધુસારેણ નસ્યાચ્ચ વૃષભધ્વજ ॥ ૧,૧૭૭.૭૦॥

મૂલં શ્વેતજયન્ત્યાશ્ચ પુષ્યર્ક્ષે તુ સમાહૃતમ્ ।
શ્વેતાપરાજિતાર્કસ્ય ચિત્રકસ્ય ચ મૂલકમ્ ।
કૃત્વા તુ વટિકાં નારી તિલકેન વશી ભવેત્ ॥ ૧,૧૭૭.૭૧॥

પિપ્પલીલોહચૂર્ણં તુ શુણ્ઠીશ્ચામલકાનિ ચ ।
સમાનિ રુદ્ર જાનીયાત્સૈન્ધવં મધુશર્કરા ॥ ૧,૧૭૭.૭૨॥

ઉદુમ્બરપ્રમાણેન સપ્તાહં ભક્ષણાત્સમમ્ ।
પુમાંશ્ચ બલવાન્સ સ્યાજ્જીવેદ્વર્ષશતદ્વયમ્ ।
ૐ ઠ ઠ ઠ ઇતિ સર્વવશ્યપ્રયોગેષુ પ્રયુક્તઃ સર્વકામકૃત્ ॥ ૧,૧૭૭.૭૩॥

સંગૃહ્ય વિદ્વાન્કાકસ્ય નિલયં પ્રદહેચ્ચ તત્ ।
ચિતાગ્નૌ ભસ્મ તચ્છત્રોર્દત્તં શિરસિ શઙ્કર ॥ ૧,૧૭૭.૭૪॥

તમુચ્ચાટયતે રુદ્ર શ ૃણુ તદ્યોગમુત્તમમ્ ।
નિઃ ક્ષિપ્તં ચ પુરીષં વૈ વનમૂષિકચર્મણિ ॥ ૧,૧૭૭.૭૫॥

કટિતન્તુનિબદ્ધં વૈ કુર્યાન્મલનિરોધનમ્ ।
કૃષ્ણકાકસ્ય રક્તેન યસ્ય નામ પ્રલિપ્ય ચ ॥ ૧,૧૭૭.૭૬॥

ચ્યુતદલે મધ્યમધ્યે તતો નિઃ ક્ષિપ્યતે હર ! ।
સ ખાદ્યતે કાકવૃન્દૈર્નારી પુરુષ એવ ચ ॥ ૧,૧૭૭.૭૭॥

શર્કરામધ્વજાક્ષીરં તિલગોક્ષુરકં સમમ્ ।
સ શત્રું નાશયેદ્રુદ્ર ! ઉચ્ચાટિતમિદં હર ! ॥ ૧,૧૭૭.૭૮॥

ઉલૂકકૃષ્ણકાકસ્ય બિલ્વસ્યાથ સમિચ્છતમ્ ।
રુધિરેણ સમાયુક્તં યયોર્નામ્ના તુ હૂયતે ।
તયોર્મધ્યે મહાવૈરં ભવેન્નાસ્ત્યત્ર સંશયઃ ॥ ૧,૧૭૭.૭૯॥

ભાવિતં ઋક્ષદુગ્ધેન મત્સ્યસ્ય રોહિતસ્ય ચ ।
માંસં તત્સાધિતં તૈલં તદભ્યઙ્ગાચ્ચ રોગનુત્ ।
ચન્દનોદકનસ્યાત્તુ રોમોત્થાનં ભવેત્પુનઃ ॥ ૧,૧૭૭.૮૦॥

હસ્તે લાઙ્ગલિકાકન્દં ગૃહીતં તેન લેપિતમ્ ।
શરીરં યેન સ પુમાન્વૃદ્ધેર્દર્પં વ્યપોહતિ ॥ ૧,૧૭૭.૮૧॥

મયૂરરુધિરેણૈવ જીવં સંહરતે શિવ ।
જ્વલતાં તુ ભુજઙ્ગાનાં બિલસ્થાનામપીશ્વર ॥ ૧,૧૭૭.૮૨॥

દેહશ્ચિતાગ્નૌ દગ્ધશ્ચ સર્પસ્યાજગરસ્ય હિ ।
તદ્ભસ્મ સમુખે ક્ષિપ્તં શત્રાણાં ભઙ્ગકૃદ્ભવેત્ ॥ ૧,૧૭૭.૮૩॥

મન્ત્રેણાનેન તત્ક્ષિપ્તં મહાભઙ્ગકરં રિપોઃ ।
ૐ ઠ ઠ ઠ ચાહીહિચાહીહિ સ્વાહા ।
ૐ ઉદરં પાહિહિ પાહિહિસ્વાહા ॥ ૧,૧૭૭.૮૪॥

સુદર્શનાયા મલં તુ પુષ્યર્ક્ષે તુ સમાહૃતમ્ ।
નિઃ ક્ષિપ્તં ગૃહમધ્યે તુ ભુજઙ્ગા વર્જયન્તિ તત્ ॥ ૧,૧૭૭.૮૫॥

અર્કમૂલેન રવિણા અર્કાગ્નિજ્વલિતા શિવ ।
યુક્તા સિદ્ધાર્થતૈલેન વર્તિર્માર્ગાહિનાશિની ॥ ૧,૧૭૭.૮૬॥

માર્જારપલલં વિષ્ઠા હરિતાલં ચ ભાવિતમ્ ।
છાગ મૂત્રેણ તલ્લિપ્તો મૂષિકો મૂષિકાન્હરેત્ ॥ ૧,૧૭૭.૮૭॥

મુક્તો હિ મન્દિરે રુદ્ર નાત્ર કાર્યા વિચારણા ।
વિફલાર્જુનપુષ્પાણિ ભલ્લાતકશિરીષકમ્ ॥ ૧,૧૭૭.૮૮॥

લાક્ષા સર્જરસશ્ચૈવ વિડઙ્ગશ્ચૈવ ગુગ્ગુલુઃ ।
એતૈર્ધૂપો મક્ષિકાણાં મશકાણાં વિનાશનઃ ॥ ૧,૧૭૭.૮૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નેત્રાઞ્જનાદિનિરૂપણં નામ સપ્તસપ્તત્યુત્તરશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭૮
હરિરુવાચ ।
બ્રહ્મદણ્ડીવચાકુષ્ઠં પ્રિયઙ્ગુર્નાગકેશરમ્ ।
દદ્યાત્તામ્બૂલસંયુક્તં સ્ત્રીણાં મન્ત્રેણ તદ્વશમ્ ।
ૐ નારાયણ્યૈ સ્વાહા ॥ ૧,૧૭૮.૧॥

તામ્બૂલં યસ્ય દીયેત સ વશી સ્યાત્સુમન્ત્રતઃ ।
ૐ હરિઃ હરિઃ સ્વાહા ॥ ૧,૧૭૮.૨॥

ગોદન્તં હરિતાલઞ્ચ સંયુક્તં કાકજિહ્વયા ।
ચૂર્ણીકૃત્ય યસ્ય શિરે દીયતે સ વશી ભવેત્ ।
શ્વેતસર્ષપનિર્માલ્યં યદ્ગૃહે તદ્વિનાશકૃત્ ॥ ૧,૧૭૮.૩॥

વૈભી તકં શાખોટકં મૂલં પત્રેણ સંયુતમ્ ।
સ્થાપ્યતે યદ્ગૃહદ્વારે તત્ર વૈ કલહો ભવેત્ ॥ ૧,૧૭૮.૪॥

ખઞ્જરીટસ્ય માંસં તુ મધુના સહ પેષયેત્ ।
ઋતુકાલેયોનિલેપાત્પુરુષો દાસતામિયાત્ ॥ ૧,૧૭૮.૫॥

અગુરું ગુગ્ગુલું ચૈવ નીલોત્પલસમન્વિતમ્ ।

ગુડેન ધૂપયિત્વા તુ રાજદ્વારે પ્રિયો ભવેત્ ॥ ૧,૧૭૮.૬॥

શ્વેતાપ રાજિતામૂલં પિષ્ટં રોચનયા યુતમ્ ।
યં પશ્યેત્તિલકેનૈવ વશી કર્યાન્નૃપાલયે ॥ ૧,૧૭૮.૭॥

કાકજઙ્ઘા વચા કુષ્ઠં નિમ્બપત્રં સુકુઙ્કુમમ્ ।
આત્મરક્તસમાયુક્તં વશી ભવતિ માનવઃ ॥ ૧,૧૭૮.૮॥

આરણ્યસ્ય બિડાલસ્ય ગૃહિત્વા રુધિરં શુભમ્ ।
કરઞ્જતૈલે તદ્ભાવ્યં રુદ્રાગ્નૌ કજ્જલં તતઃ ।
પાતયેત્પદ્મપત્રેણ હાદૃશ્યઃ સ્યાત્તદઞ્જનાત્ ॥ ૧,૧૭૮.૯॥

ૐ નમઃ ખડ્ગવજ્રપાણયે મહાયક્ષસેનાપતયે સ્વાહા ।
ૐ રુદ્રં હ્રાં હ્રીં વરશક્તા ત્વરિતાવિદ્યા ।
ૐ માતરઃ સ્તમ્ભયસ્વાહા ।
સહસ્રં પરિજપ્યાત્તુ વિદ્યેયં ચૌરવારિણી ।
મહાસુગન્ધિકામૂલં શુક્રં સ્તમ્ભેત્કટૌ સ્થિતમ્ ॥ ૧,૧૭૮.૧૦॥

ૐ નમઃ સર્વસત્ત્વેભ્યો નમઃ સિદ્ધિં કુરુ કુરુ સ્વાહા ।
સપ્તાભિમન્ત્રિતં કૃત્વા કરવીરસ્ય પુષ્પકમ્ ।
સ્ત્રીણામગ્રે ભ્રામયચ્ચ ક્ષણાદ્વૈ સા વશે ભવેત્ ॥ ૧,૧૭૮.૧૧॥

બ્રહ્મદણ્ડીં વચાં પત્રં મધુના સહ પેષયેત્ ।
અઙ્ગલેપાચ્ચ વનિતા નાન્યં ભર્તારમિચ્છતિ ॥ ૧,૧૭૮.૧૨॥

બ્રહ્મદણ્ડીશિખા વક્ત્રે ક્ષિપ્તા શુક્રસ્ય સ્તમ્ભનમ્ ।
મૂલં જયન્ત્યા વક્ત્રસ્થં વ્યવહારે જયપ્રદમ્ ॥ ૧,૧૭૮.૧૩॥

ભૃઙ્ગરાજસ્ય મૂલં તુ પિષ્ટં શુક્રેણ સંયુતમ્ ।
અક્ષિણી ચાઞ્જયિત્વા તુ વશી કર્યાન્નરં કિલ ॥ ૧,૧૭૮.૧૪॥

અપરાજિતાશિખાન્તુ નીલોત્પલસમન્વિતામ્ ।
તામ્બૂલેન પ્ર (દાના) દદ્યાચ્ચ વશીકરણમુત્તમમ્ ॥ ૧,૧૭૮.૧૫॥

અઙ્ગુષ્ઠે ચ પદે ગુલ્ફે જાનૌ ચ જઘને તથા ।
નાભૌ વક્ષસિ કુક્ષૌ ચ કક્ષે કણ્ઠે કપોલકે ॥ ૧,૧૭૮.૧૬॥

ઓષ્ઠે નેત્રે લલાટે ચ મૂર્ધ્નિ ચન્દ્રકલાઃ સ્થિતાઃ ।
સ્ત્રીણાં પક્ષે સિતે કૃષ્ણે ઊર્ધ્વાધઃ સંસ્થિતા નૃણામ્ ॥ ૧,૧૭૮.૧૭॥

વામાઙ્ગે દક્ષિણાઙ્ગે ચ ક્રમાદ્રુદ્ર દ્રવાદિકૃત્ ।
ચતુઃ ષષ્ટિ કલાઃ પ્રોક્તાઃ કામશાસ્ત્રે વશીકરાઃ ।
આલિઙ્ગનાદ્યા નારીણાં કમારીણાં વશીકરાઃ ॥ ૧,૧૭૮.૧૮॥

રોચનાગન્ધપુષ્પાણિ નિમ્બપુષ્પં પ્રિયઙ્ગવઃ ।
કુઙ્કુમં ચન્દનઞ્ચૈવ તિલકેન જગદ્વશેત્ ॥ ૧,૧૭૮.૧૯॥

ૐ હ્રીં ગૌરિ દેવિ સૌભાગ્યં પુત્રવશાદિ દેહિ મે ।
ૐ હ્રીં લક્ષ્મિ ! દેવિ સૌભાગ્યં સર્વં ત્રૈલોક્યમોહનમ્ ॥ ૧,૧૭૮.૨૦॥

સગન્ધસ્ય હરિદ્રાયાઃ કુઙ્કુમાનાં ચ લેપતઃ ।
વશયેદ્રુદ્ર ધૂપશ્ચ તથાપુષ્પસુગન્ધયોઃ ॥ ૧,૧૭૮.૨૧॥

દુરાલભા વચા કુષ્ઠં કુઙ્કુમઞ્ચ શતાવરી ।
તિલતૈલેન સંયુક્તં યોનિલેપાદ્વશી નરઃ ॥ ૧,૧૭૮.૨૨॥

નિમ્બકાષ્ઠસ્ય ધૂમેન ધૂપયિત્વા ભગં વધૂઃ ।
સુભગાસ્યાત્સાતિ રુદ્ર પતિર્દાસો ભવિષ્યતિ ॥ ૧,૧૭૮.૨૩॥

માહિષં નવનીતઞ્ચ કષ્ટઞ્ચ મધુયષ્ટિકા ।
સૌભાગ્યં ભગલેપાત્સ્યાત્પતિર્દાસો ભવેત્તથા ॥ ૧,૧૭૮.૨૪॥

મધુયષ્ટિશ્ચ ગોક્ષીરં તથા ચ કણ્ટકારિકા ।
એતાનિ સમભાગાનિ પિબેદુષ્ણેન વારિણા ।
ચતુર્ભાગાવશેષેણ ગર્ભસમ્ભવમુત્તમમ્ ॥ ૧,૧૭૮.૨૫॥

માતુલુઙ્ગસ્ય બીજાનિ ક્ષીરેણ સહ ભાવયેત્ ।
તત્પીત્વા લભતે ગર્ભં નાત્ર કાર્યા વિચારણા ॥ ૧,૧૭૮.૨૬॥

માતુલુઙ્ગસ્ય બીજાનિ મૂલાન્યેરણ્ડકસ્ય ચ ।
ઘૃતેન સહ સંયોજ્ય પાયયેત્પુત્રકાક્ષિણી ॥ ૧,૧૭૮.૨૭॥

પશ્ચગન્ધા મૃત દુગ્ધ ક્વથિતં મુત્રકારકમ્ ।
પલાશસ્ય તુ બીજાનિ ક્ષૌદ્રેણ સહ પેષયેત્ ।
રજસ્વલા તુ પીત્વા સ્યાત્મુષ્પગર્ભવિવર્જિતા ॥ ૧,૧૭૮.૨૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
હ્યષ્ટસપ્તત્યધિકશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૭૯

હરિરુવાચ ।

હરિતાલં યવક્ષારં પત્રાઙ્ગં રક્તચન્દનમ્ ।
જાતિહિઙ્ગુલકં લાક્ષાં પક્ત્વા દન્તાન્પ્રલેપયેત્ ॥ ૧,૧૭૯.૧॥

હરીતકીકષાયેણ મૃષ્ટ્વા દન્તાન્પ્રલેપયેત્ ।
દન્તાઃ સ્યુર્લોહિતાઃ પુંસઃ શ્વેતા રુદ્ર ન સંશયઃ ॥ ૧,૧૭૯.૨॥

મૂલકં સ્વિદ્ય મન્દાગ્નૌ રસં તસ્ય પ્રપૂરયેત્ ।
કર્ણયોઃ પૂરણાત્તેન કર્ણસ્રાવો વિનશ્યતિ ॥ ૧,૧૭૯.૩॥

અર્કપત્રં ગૃહીત્વા તુ મન્દાગ્નૌ તાપયેચ્છનૈઃ ।
નિષ્પીડ્ય પૂરયેત્કર્ણૌ કર્ણશૂલં વિનશ્યતિ ॥ ૧,૧૭૯.૪॥

પ્રિયઙ્ગુમધુકા ચૈવ ધાતક્યુત્પલપાઙ્ક્તિભિઃ ।
મઞ્જિષ્ઠા લોધ્રલાક્ષાભિઃ કપિત્થસ્વરસેન ચ ।
પચેત્તૈલં તથા સ્ત્રીણાં નશ્યેત્ક્લેદઃ પ્રપૂરણાત્ ॥ ૧,૧૭૯.૫॥

શુષ્કમૂલકશુણ્ઠીનાં ક્ષારો હિઙ્ગુમહૌષધમ્ ।
સતપુષ્પાવચા કુષ્ઠં દારુ શિગ્ર રસાઞ્જનમ્ ॥ ૧,૧૭૯.૬॥

સૌવર્ચલં યવક્ષારં તથા સર્જકસૈન્ધવમ્ ।
તથા ગ્રન્થિર્વિડં મુસ્તં મધુયુક્તં ચતુર્ગુણમ્ ॥ ૧,૧૭૯.૭॥

માતુલું ગરસસ્તદ્વત્કદલ્યાશ્ચ રસો હિ તૈઃ ।
પક્વતૈલં હરેદાશુ સ્રાવાદીંશ્ચ ન સંશયઃ ॥ ૧,૧૭૯.૮॥

કર્ણયોઃ કૃમિનાશઃ સ્યાત્કટુતૈલસ્ય પૂરણાત્ ।
હરિદ્રા નિમ્બપત્રાણિ પિપ્પલ્યો મરિચાનિ ચ ॥ ૧,૧૭૯.૯॥

વિડઙ્ગભદ્રં મુસ્તઞ્ચ સપ્તમં વિશ્વભેષજમ્ ।
ગોમૂત્રેણ ચ પિષ્ટ્વૈવ કૃત્વા ચ વટિકાં હર ! ।
અજીર્ણહૃદ્ભવેચ્ચૈકં દ્વયં વિષૂચિકાપહમ્ ॥ ૧,૧૭૯.૧૦॥

પટોલં મધુના હન્તિ ગોમૂત્રેણ તથાબુદમ્ ।
એષા ચ શઙ્કરી વર્તિઃ સર્વનેત્રામયા પહા ॥ ૧,૧૭૯.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકોનાશીત્યધિકશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૮૦

હરિરુવાચ ।

વચા માંસી ચ બિલ્વઞ્ચ તગરં પદ્મકેસરમ્ ।
નાગપુષ્પં પ્રિયઙ્ગુઞ્ચ સમભાગાનિ ચૂર્ણયેત્ ।
અનેન ધૂપિતો મર્ત્યઃ કામવદ્વિચરેન્મહીમ્ ॥ ૧,૧૮૦.૧॥

કર્પૂરં દેવદારુઞ્ચ મધુના સહ યોજયેત્ ।
લિઙ્ગલેપાચ્ચ તેનૈવ વશીકુર્યાત્સ્ત્રિયં કિલ ॥ ૧,૧૮૦.૨॥

મૈથુનં પુરુષો ગચ્છેદ્ગૃહ્ણીયાત્સ્વકમિન્દ્રિયમ્ ।
વામહસ્તેન વામઞ્ચ હસ્તં લિંપેત્તુ યત્સ્ત્રિયાઃ ।
આલિપ્તા સ્ત્રી વશં યાતિ નાન્યં પુરુષમિચ્છતિ ॥ ૧,૧૮૦.૩॥

ૐ રક્તચામુણ્ડે અમુકં મે વશમાનય આનય ૐ હ્રીં હ્રૈં હ્રઃ ફટ્ ।
ઇમં જપ્ત્વાયુતં મન્ત્રં તિલકેન ચ શઙ્કર ! ।
ગોરોચનાસંયુતેન સ્વરક્તેન વશી ભવેત્ ॥ ૧,૧૮૦.૪॥

સૈન્ધવં કૃષ્ણલવણં સૌવીરં મત્સ્યપિત્તકમ્ ।
મધુ સર્પિઃ સિતાયુક્તં સ્ત્રીણાં તદ્ભગલેપનાત્ ॥ ૧,૧૮૦.૫॥

યઃ પુમાન્મૈથુનં ગચ્છેન્નાન્યાં નારીં ગમિષ્યતિ ।
શઙ્ખપુષ્પી વચા માંસી સોમ રાજી ચ ફલ્ગુકમ્ ॥ ૧,૧૮૦.૬॥

માહિષં નવનીતઞ્ચ ત્વકીકૃત્ય ભિષગ્વરઃ ।
સમૂલાનિ સ પત્રાણિ ક્ષીરેણાજ્યેન પેષયેત્ ॥ ૧,૧૮૦.૭॥

ગુટિકાં શોધિતાં કૃત્વા નારીયોન્યા પ્રવેશયેત્ ।
દશવારં પ્રસૂતાપિ પુનઃ કન્યા ભવિષ્યતિ ॥ ૧,૧૮૦.૮॥

સર્ષપાશ્ચ વચા ચૈવ મદનસ્ય ફલાનિ ચ ।
માર્જારવિષ્ઠા ધત્તુર સ્ત્રીકેશેન સમન્વિતઃ ॥ ૧,૧૮૦.૯॥

ચાતુર્થિકહરો ધૂપો ડાકિનીજ્વરનાશકઃ ।
અર્જુનસ્ય ચ પુષ્પાણિ ભલ્લાતકવિડઙ્ગકે ॥ ૧,૧૮૦.૧૦॥

બલા ચૈવ સર્જરસં સૌવીરસર્ષપાસ્તથા ।
સર્પયૂકામક્ષિકાણાં ધૂમો મશકનાશનઃ ॥ ૧,૧૮૦.૧૧॥

ભૂતલાયાશ્ચ ચૂર્ણેન સ્તમ્ભઃ સ્યાદ્યોનિપૂરણાત્ ।
તેન લેપનતો યોનૌ ભગસ્તમ્ભસ્તુ જાયતે ॥ ૧,૧૮૦.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
અશીત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૧
હરિરુવાચ ।
તામ્બૂલઞ્ચ ઘૃતં ક્ષૌદ્રં લવણં તામ્રભાજને ।
તથા પયઃ સમાયુક્તં ચક્ષુઃ શૂલહરં પરમ્ ॥ ૧,૧૮૧.૧॥

હરીતકી વચા કુષ્ઠં વ્યોષં હિઙ્ગુ મનઃ શિલા ।
કાસે શ્વાસે ચ હિક્કાયાં લિહ્યાત્ક્ષૌદ્રં ઘૃપ્લુતમ્ ॥ ૧,૧૮૧.૨॥

પિપ્પલીત્રિફલાચૂર્ણં મધુના લેહયેન્નરઃ ।
નશ્યતે પીનસઃ કાસઃ શ્વાસશ્ચ બલવત્તરઃ ॥ ૧,૧૮૧.૩॥

સમૂલચિત્રકં ભસ્મપિપ્પલીચૂર્ણકં લિહેત્ ।
શ્વાસં કાસઞ્ચ હિક્કાઞ્ચ મધુમિશ્રં વૃષધ્વજ ! ॥ ૧,૧૮૧.૪॥

નીલોત્પલં શર્કરા ચ મધુકં પદ્મકં સમમ્ ।
તણ્ડુલોદકસમિશ્રં પ્રશમેદ્રક્તવિક્રિયાઃ ॥ ૧,૧૮૧.૫॥

શુણ્ઠી ચ શર્કરા ચૈવ તથા ક્ષૌદ્રેણ સંયુતા ।
કોકિલસ્વર એવ સ્યાદ્ગુટિકા ભુક્તિમાત્રતઃ ॥ ૧,૧૮૧.૬॥

હરિતાલં શઙ્ખચૂર્ણં કદલીદલભસ્મના ।
એતદ્દ્રવ્યેણ ચોદ્ધર્ત્યં લોમશાતનમુત્તમમ્ ॥ ૧,૧૮૧.૭॥

લવણં હરિતાલઞ્ચ તુમ્બિન્યાશ્ચ ફલાનિ ચ ।
લાક્ષારસસમાયુક્તં લોમશાતનમુત્તમ્ ॥ ૧,૧૮૧.૮॥

સુધા ચ હરિતાલઞ્ચ શઙ્ખભસ્મ મનઃ શિલા ।
સૈન્ધવેન સહૈકત્ર છાગમૂત્રેણ પેષયેત્ ॥ ૧,૧૮૧.૯॥

તત્ક્ષણોદ્વર્તનાદેવ લોમશાતનમુત્તમમ્ ।
શઙ્ખમામલકં પત્રં ધાતક્યાઃ કુસુમાનિ ચ ॥ ૧,૧૮૧.૧૦॥

પિષ્ટ્વા તત્પયસા સાર્ધં સપ્તાહં ધારયેન્મુખે ।

સ્નિગ્ધાઃ શ્વેતાશ્ચ દન્તાશ્ચ ભવન્તિ વિમલપ્રભાઃ ॥ ૧,૧૮૧.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકાશીત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૨
હરિરુવાચ ।
શરદ્ગ્રીષ્મવસન્તેષુ પ્રાયશો દધિ ગર્હિતમ્ ।
હેમન્તે શિશિરે ચૈવ વર્ષાસુ દધિ શસ્યતે ॥ ૧,૧૮૨.૧॥

ભુક્તે તુ શર્કરા પીતા નવનીતેન બુદ્ધિકૃત્ ।
ગુડસ્ય તુ પુરાણસ્ય પલમેકન્તુ ભક્ષયેત્ ।
સ્ત્રીસહસ્રઞ્ચ સંગચ્છેત્પુમાન્બલયુતો હર ! ॥ ૧,૧૮૨.૨॥

કુષ્ઠં સંચૂર્ણિતં કૃત્વા ઘૃતમાક્ષિકસંયુતમ્ ।
ભક્ષયેત્સ્વપ્નવેલાયાં બલીપલિતનાશનમ્ ॥ ૧,૧૮૨.૩॥

અતસીમાષગોધૂમચૂર્ણં કૃત્વા તુ પિપ્પલી ।
ઘૃતેન લેપયેદ્વત્રમોભિઃ સાર્ધં વિચક્ષણઃ ।
કન્દર્પસદૃશો મર્ત્યો નિત્યં ભવતિ શઙ્કર ! ॥ ૧,૧૮૨.૪॥

યવાસ્તિલાશ્વગન્ધા ચ મુશલી સરલા ગુડમ્ ।
એભિશ્ચ રચિતાં જગ્ધ્વા તરુણો બલવાન્ભવેત્ ॥ ૧,૧૮૨.૫॥

હિઙ્ગુ સૌવર્ચલં શુણ્ઠીં પીત્વા તુ ક્વથિતોદકૈઃ ।
પરિણામાખ્યશૂલઞ્ચ અજીર્ણઞ્ચૈવ નશ્યતિ ॥ ૧,૧૮૨.૬॥

ધાતકીં સોમરાજીઞ્ચ ક્ષીરેણ સહ પેષયેત્ ।
દુર્બલશ્ચ ભવેત્સ્થૂલો નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૨.૭॥

શર્કરામધુસંયુક્તં નવનીતં બલી લિહેત્ ।
ક્ષીરાશી ચ ક્ષયી પુષ્ટિં મેધાઞ્ચૈવાતુલાં વ્રજેત્ ॥ ૧,૧૮૨.૮॥

કુલીરચૂર્ણં સક્ષીરં પીતઞ્ચ ક્ષયરેગનુત્ ।
ભલ્લાતકં વિડઙ્ગઞ્ચ યવક્ષારઞ્ચ સૈન્ધવમ્ ॥ ૧,૧૮૨.૯॥

મનઃ શિલા શઙ્ખચૂર્ણં તૈલપક્વં તથૈવ ચ ।
લોમાનિ શાતયત્યેવ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૨.૧૦॥

માલૂરસ્ય રસં ગૃહ્ય જલૌકાં તત્ર પેષયેત્ ।
હસ્તૌ સંલેપયેત્તેન ત્વગ્નિસ્તમ્ભનમુત્તમમ્ ॥ ૧,૧૮૨.૧૧॥

શાલ્મલીરસમાદાય ખરમૂત્રે નિધાય તમ્ ।
અગ્નયાદૌ વિક્ષિપેત્તેન હ્યગ્નિસ્તમ્ભનમુત્તમમ્ ॥ ૧,૧૮૨.૧૨॥

વાયસ્યા ઉદરં ગૃહ્ય મણ્ડૂકવસયા સહ ।
ગુટિકાં કારયેત્તેન તતોઽગ્નૌ સંક્ષૈપેત્સુધીઃ ।
એવમેતત્પ્રયોગેણ હ્યગ્નિસ્તમ્ભનમુત્તમમ્ ॥ ૧,૧૮૨.૧૩॥

મુણ્ડીત્વક્ચ્ય વચા મુસ્તં મરિચં તગરં તથા ।
ચર્વિત્વા ચ ત્વિમં સદ્યો જિહ્વયા જ્વલનં લિહેત્ ॥ ૧,૧૮૨.૧૪॥

ગોરોચનાં ભૃઙ્ગરાજં ચૂર્ણીકૃત્યઘૃતં સમમ્ ।
દિવ્યામ્ભસઃ સ્તમ્ભનં સ્યાન્મન્ત્રેણાનેન વૈ તથા ।
ૐ અગ્નિસ્તમ્ભનં કુરુ કુરુ ॥ ૧,૧૮૨.૧૫॥

ૐ નમો ભગવતે જલં સ્તમ્ભય સં સં સં કેક કેકઃ ચરચર ।
જલસ્તમ્ભનમન્ત્રોઽયં જલં સ્તમ્ભયતે શિવ ! ॥ ૧,૧૮૨.૧૬॥

ગૃધ્રાસ્થિઞ્ચ ગવાસ્થિઞ્ચ તથા નિર્માલ્યમેવ ચ ।
અરેર્યો નિખનેદ્દ્વારે પઞ્ચત્વમુ પયાતિ સઃ ॥ ૧,૧૮૨.૧૭॥

પઞ્ચરક્તાનિ પુષ્પાણિ પૃથગ્જાત્યા સમાલભેત્ ।
કુઙ્કુમેન સમાયુક્તમાત્મરક્તસમન્વિતમ્ ॥ ૧,૧૮૨.૧૮॥

પુષ્પેણ તુ સમં પિષ્ટ્વા રોચનાયાઃ પલૈકતઃ ।
સ્ત્રિયા પુંસા કૃતો રુદ્ર ! તિલકોઽયં વશીકરઃ ॥ ૧,૧૮૨.૧૯॥

બ્રહ્મદણ્ડી તુ પુષ્યેણ ભક્ષ્યે પાને વશીકરઃ ।
યષ્ટિ મધુ પલૈકેન પક્વમુષ્ણોદકં પિબેત્ ॥ ૧,૧૮૨.૨૦॥

વિષ્ટમ્ભિકાઞ્ચ હૃચ્છૂલં હરત્યેવ મહેશ્વર ! ।
ૐ હૂં જઃ ।
મન્ત્રોઽયં હરતે રુદ્ર ! સર્વવૃશ્ચિકજં વિષમ્ ॥ ૧,૧૮૨.૨૧॥

પિપ્પલી નવનીતઞ્ચ શ◌ૃઙ્ગવેરં ચ સૈન્ધવમ્ ।
મરિચં દધિ કુષ્ઠઞ્ચ નસ્યે પાને વિષં હરેત્ ॥ ૧,૧૮૨.૨૨॥

ત્રિફલાર્દ્રકકુષ્ઠં ચ ચન્દનં ઘૃતસંયુતમ્ ।

એતત્પાનાચ્ચ લેપાચ્ચ વિષનાશો ભવેચ્છિવ ! ॥ ૧,૧૮૨.૨૩॥

પારાવતસ્ય ચાક્ષીણિ હરિતાલં મનઃ શિલા ।
એતદ્યોગાદ્વિષં હન્તિ વૈનતેય ઇવોરગાન્ ॥ ૧,૧૮૨.૨૪॥

સૈન્ધવં ત્ર્યૂષણં ચૈવ દધિમધ્વાજ્યસંયુતમ્ ।
વૃશ્ચિકસ્ય વિષં હન્તિ લેપોऽયં વૃષભધ્વજ ! ॥ ૧,૧૮૨.૨૫॥

બ્રહ્મદણ્ડીતિલાન્ક્વાથ્ય ચૂર્ણં ત્રિકટુકં પિબેત્ ।
નાશયેદ્રુદ્ર ! ગુલ્માનિ નિરુદ્ધં રક્તમેવ ચ ॥ ૧,૧૮૨.૨૬॥

પીત્વા ક્ષીરં ક્ષૌદ્રયુતં નાશયેદસૃજઃ સ્રુતિમ્ ।
આટરૂપકમૂલેન ભગં નાભિં ચ લેપયેત્ ।
સુખં પ્રસૂયતે નારી નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૨.૨૭॥

શર્કરાં મધુસંયુક્તાં પીત્વા તણ્ડુલવારિણા ।
રક્તાતિસારશમનં ભવતીતિ વૃષધ્વજ ! ॥ ૧,૧૮૨.૨૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દ્વ્યાશીત્યધિકશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૩
હરિરુવાચ ।
મરિચં શ ृ ङ्गवेरं ચ કુટજત્વચમેવ ચ ।
પાનાચ્ચ ગ્રહણી નશ્યેચ્છશાઙ્કાઙ્કિતશેખર ! ॥ ૧,૧૮૩.૧॥

પિપ્પલી પિપ્પલીમૂલં મરિચં તગરં વચા ।
દેવદારુરસં પાઠાં ક્ષીરેણ સહ પેષયેત્ ॥ ૧,૧૮૩.૨॥

અનેનૈવ પ્રયોગેણ હ્યતિસારો વિનશ્યતિ ।
મરીચતિલપુષ્પાભ્યા મઞ્જનં કામલાપહમ્ ॥ ૧,૧૮૩.૩॥

હરીતકી સમગુડા મધુના સહ યોજિતા ।
વિરેચનકરી રુદ્ર ! ભવતીતિ ન સંશયઃ ॥ ૧,૧૮૩.૪॥

ત્રિફલા ચિત્રકં ચિત્રં તથા કટુકરોહિણી ।
ઉરુસ્તમ્ભહરં હ્યેતદુત્તમન્તુ વિરેચનમ્ ॥ ૧,૧૮૩.૫॥

હરીતકી શ ृ ङ्गवेरं દેવદારુ ચ ચન્દનમ્ ।

ક્વાથયેચ્છાગદુગ્ધેન અપામાર્ગસ્ય મૂલકમ્ ।
ઊરુસ્તમ્ભં જયન્ત્યા વા સપ્તરાત્રેણ નાશયેત્ ॥ ૧,૧૮૩.૬॥

અનન્તાશૃઙ્ગવેરસ્ય સૂક્ષ્મચૂર્ણાનિ કારયેત્ ।
ગુગ્ગુલં ગુડતુલ્યં ચ ગુટિકામુપયુજ્યચ ।
વાયુઃ સ્નાયુગતં ચૈવ અગ્નિમાન્દ્યં ચ નાશયેત્ ॥ ૧,૧૮૩.૭॥

સઙ્ખપુષ્પીન્તુ પુષ્પેણ સમુદ્ધૃત્ય સપત્રિકામ્ ।
સમૂલાં છાગદુગ્ધેન અપસ્મારહરં પિબેત્ ॥ ૧,૧૮૩.૮॥

અશ્વગન્ધાભયે ચૈવ ઉદકેન સમં પિબેત્ ।
રક્તપિત્તં વિનશ્યેત્તુ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૩.૯॥

હરીતકીકુષ્ઠચૂર્ણં કૃત્વા આસ્યં ચ પૂરયેત્ ।
શીતં પીત્વાથ પાનીયં સર્વચ્છર્દિનિવારણમ્ ॥ ૧,૧૮૩.૧૦॥

ગડૂચીપદ્મકારિષ્ટધાન્યાકં રક્તચંન્દનમ્ ।
પિત્તશ્લેષ્મજ્વરચ્છર્દિદાહતૃષ્ણાઘ્નમગ્નિકૃત્ ।
ૐ હું નમ ઇતિ ॥ ૧,૧૮૩.૧૧॥

શ્રોત્રે બદ્ધ્વા શઙ્ખપુષ્પીં જ્વરં મન્ત્રેણ વૈ હરેત્ ।
ૐ જમ્ભિની સ્તમ્ભિની મોહય સર્વવ્યાધીન્મે વજ્રેણ ઠઃ ઠઃ
સર્વવ્યાધીન્મે વજ્રેણ ફટિતિ ॥ ૧,૧૮૩.૧૨॥

પુષ્પમષ્ટશતં જપ્ત્વા હસ્તે દત્ત્વા નખં સ્પૃશેત્ ।
ચાતુર્થિકો જ્વરો રુદ્ર અન્યે ચૈવ જ્વરાસ્તથા ॥ ૧,૧૮૩.૧૩॥

જમ્બૂફલં હરિદ્રા ચ સર્પસ્યૈવ તુ કઞ્ચુકમ્ ।
સર્વજ્વરાણાં ધૂપોઽયં હરશ્ચાતુર્થિકસ્ય ચ ॥ ૧,૧૮૩.૧૪॥

કરવીરં ભૃઙ્ગપત્રં લવણં કુષ્ઠકર્કટે ।
ચતુર્ગુણેન મૂત્રેણ પચેત્તૈલં હરેચ્ચ તત્ ।
પામાં વિચર્ચિકાં કુષ્ઠમભ્યઙ્ગાદ્ધિ વ્રણાનિ વૈ ॥ ૧,૧૮૩.૧૫॥

પિપ્પલીમધુપાનાચ્ચ તથા મધુરભોજનાત્ ।
પ્લીહા વિનશ્યતે રુદ્ર તથા સૂરણસેવનાત્ ॥ ૧,૧૮૩.૧૬॥

પિપ્પલીઞ્ચ હરિદ્રાઞ્ચ ગોમૂત્રેણ સમન્વિતામ્ ।
પ્રક્ષિપેચ્ચ ગુદદ્વારે અર્શાંસિ વિનિવારયેત્ ॥ ૧,૧૮૩.૧૭॥

અજાદુગ્ધમાર્દ્રકઞ્ચ પીતં પ્લીહાદિનાશનમ્ ।
સૈન્ધવઞ્ચ વિડઙ્ગાનિ સોમરાજી તુ સર્ષપાઃ ॥ ૧,૧૮૩.૧૮॥

રજની દ્વે વિષઞ્ચૈવ ગોમૂત્રેણૈવ પેષયેત્ ।
કુષ્ઠનાશશ્ચ તલ્લેપાન્નિમ્બપત્રાદિના તથા ॥ ૧,૧૮૩.૧૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ત્ર્યશીત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૪

હરિરુવાચ ।
રજનીકદલીક્ષારલેપઃ સિધ્મવિનાશનઃ ।
કુષ્ઠસ્ય ભાગમેકન્તુ પથ્યાભાગદ્વયં તથા ।
ઉષ્ણોદકેન સમ્પીય કટિશૂલવિનાશનમ્ ॥ ૧,૧૮૪.૧॥

અભયા નવનીતઞ્ચ શર્કરાપિપ્પલીયુતમ્ ।
પાનાદર્શોહરં સ્યાચ્ચ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૪.૨॥

આટરૂષકપત્રેણ ઘૃતં મૃદ્વગ્નિના પચેત્ ।
ચૂર્ણં કૃત્વા તુ લેપોઽયં અર્શરોગહરઃ પરઃ ॥ ૧,૧૮૪.૩॥

ગુગ્ગુલુત્રિફલાયુક્તં પીત્વા નશ્યેદ્ભગન્દરમ્ ।
અજાજીશ઼ૃઙ્ગવેરઞ્ચ દથા મણ્ડં વિપાચયેત્ ॥ ૧,૧૮૪.૪॥

લવણેન તુ સંયુક્તં મૂત્રકૃચ્છ્રવિનાશનમ્ ।
યવક્ષારં શર્કરા ચ મૂત્રકૃચ્છ્રવિનાશકૃત્ ॥ ૧,૧૮૪.૫॥

ચિતાગ્નિઃ ખઞ્જરીટસ્ય વિષ્ઠા ફેનો હયસ્ય ચ ।
સૌભાઞ્જનં વાસનેત્રં નર એતૈસ્તુ ધૂપિતઃ ।
અદૃશ્યસ્ત્રિદશૈઃ સર્વૈઃ કિં પુનર્માનવૈઃ શિવ ॥ ૧,૧૮૪.૬॥

તિલતૈલં યવાન્દગ્ધ્વા મષીં કૃત્વા તુ લેપયેત્ ।
તેનૈવ સહ તૈલેન અગ્નિદગ્ધઃ સુખી ભવેત્ ॥ ૧,૧૮૪.૭॥

લજ્જાલોઃ શરપુઙ્ખાયા લેપઃ સાજ્યોઽગ્નિનાશનઃ ।
ૐ નમો ભગવતે ઠ ઠ છિન્ધિ છિન્ધિ જ્વલનં પ્રજ્વલિતં
નાશય નાશય હું ફટ્ ॥ ૧,૧૮૪.૮॥

કરે બદ્ધં તુ નિર્ગુણ્ડ્યા મૂલં જ્વરહરં દ્રુતમ્ ।
મૂલઞ્ચ શ્વેતગુઞ્જાયાઃ કૃત્વા તત્સપ્તખણ્ડકમ્ ॥ ૧,૧૮૪.૯॥

હસ્તે બધ્વા નાશયેચ્ચ અર્શાંસ્યેવ ન સંશયઃ ।
વિષ્ણુક્રાન્તાજમૂત્રેણ ચૌરવ્યાઘ્રાદિરક્ષણમ્ ॥ ૧,૧૮૪.૧૦॥

બ્રહ્મદણ્ડ્યાસ્તુ મૂલાનિ સર્વકર્માણિ કારયેત્ ।
ત્રિફલાયાસ્તુ ચૂર્ણં હિ સાજ્યં કુષ્ઠવિનાશનમ્ ॥ ૧,૧૮૪.૧૧॥

આજ્યં પુનર્નવાબિલ્વૈઃ પિપ્પલીભિ સાધિતમ્ ।
હરેદ્ધક્કાં શ્વાસકાસૌ પીતં સ્ત્રીણાઞ્ચ ગર્ભકૃત્ ॥ ૧,૧૮૪.૧૨॥

ભક્ષયેદ્વા નરીબીજં પયસાજ્યેન પાચિતમ્ ।
ઘૃતશર્કરયા યુક્તં શુક્રઃ સ્યાદક્ષયસ્તતઃ ॥ ૧,૧૮૪.૧૩॥

વિડઙ્ગં મધુકં પાઠાં માંસીં સર્જરસં તથા ।
રહિદ્રાં ત્રિફલાઞ્ચૈવ મપામાર્ગં મનઃ શિલામ્ ॥ ૧,૧૮૪.૧૪॥

ઉદુમ્બરં ધાતકીઞ્ચ તિલતૈલેન પષેયેત્ ।
યોનિં લિઙ્ગં ચ મ્રક્ષેત સ્ત્રીપુસોઃ સ્યાત્પ્રિયં મિથઃ ॥ ૧,૧૮૪.૧૫॥

નમસ્તે ઈશવરદાય આકર્ષિણિ વિકર્ષિણિ મુગ્ધે સ્વાહા ઇતિ ।
યોનિલઙ્ગસ્ય તૈલેન શઙ્કર મ્લક્ષણાત્તતઃ ॥ ૧,૧૮૪.૧૬॥

પુનર્નવામૃતા દૂર્વા કનકઞ્ચૈન્દ્રવારુણી ।
બીજે નૈષાં જાતિકાયા રસેન રસમર્દનમ્ ॥ ૧,૧૮૪.૧૭॥

મૂષાય મધ્યગં કૃત્વા રસં મારણમીરિતમ્ ।
મધ્વાજ્યસહિતં દુગ્ધં વલીપલિતનાશનમ્ ॥ ૧,૧૮૪.૧૮॥

મધ્વાજ્યં ગુડતામ્રઞ્ચ કારવેલ્લરસસ્તથા ।
દહનાચ્ચ ભવેદ્રૌપ્યં સુવર્ણકરણં શ◌ૃણુ ॥ ૧,૧૮૪.૧૯॥

પીતં ધરત્તૂપુષ્પઞ્ચ સીસકઞ્ચ પલં મતમ્ ।
લાઙ્ગલિકાયાઃ શાખા ચ સ્વર્ણઞ્ચ દહનાદ્ભવેત્ ॥ ૧,૧૮૪.૨૦॥

ધત્તૂરબીજતૈલેન દીપપ્રજ્વલનાદ્ધર ।
સમાધાવુપવિષ્ટન્તુ ગગનસ્થો ન પશ્યતિ ॥ ૧,૧૮૪.૨૧॥

વૃષસ્ય મૃન્મયસ્યૈવ યુક્તો ભેકો નિગૃહ્યતે ।
શઙ્કુરાવયવૈર્યુક્તો ધૂપં ઘ્રાત્વા ચ ગર્જતિ ।

વિસ્મયં કુરુતે ચૈવ વૃષવન્નાત્ર સંશયઃ ॥ ૧,૧૮૪.૨૨॥

રાત્રૌ ચ સાર્ષપં તૈલં કીટં ખદ્યો તનામકમ્ ।
તાભ્યાં દીપઃ પ્રજ્વલિતો વાગ્મિજ્વાલકલાપવત્ ॥ ૧,૧૮૪.૨૩॥

ચૂર્ણં છુચ્છુન્દરીધં દગ્ધ્વા રુદ્ર પ્રલેપયેત્ ।
તપ્યતે તક્ષણાદ્ગ્ધો યદિ સમ્યક્પ્રલેપયેત્ ।
ચન્દનેન ભવેન્મોક્ષઃ પાનાલ્લેપાત્સુખી ભવેત્ ॥ ૧,૧૮૪.૨૪॥

કુઞ્જરસ્ય મદાક્તસ્ય સ્વયં નેત્રે શિવવાઞ્જયેત્ ।
યુદ્ધે વિજયતે સોઽપિ મહાશૂરશ્ચ જાયતે ॥ ૧,૧૮૪.૨૫॥

દન્તં ડુણ્ડુભસર્પસ્ય મુખે સંગૃહ્ય વૈ ક્ષિપેત્ ।
તિષ્ઠતે ચ જલાન્તસ્તુ નિર્વિકલ્પં સ્થલે યથા ॥ ૧,૧૮૪.૨૬॥

કુમ્ભીરનેત્રદંષ્ટ્રાશ્ચ અસ્થીનિ રુધિરં તથા ।
વસાતૈલસમાયુક્તમેકત્ર તન્નિયોજયેત્ ।
આત્માનં મ્લક્ષયેત્તેન જલે તિષ્ઠેદ્દિનત્રયમ્ ॥ ૧,૧૮૪.૨૭॥

કુમ્ભીરકસ્ય નેત્રાણિ હૃદયં કચ્છપસ્ય ચ ।
મૂષિકસ્ય વસાસ્થીનિ શિશુમારવસા તથા ।
એતાન્યેકત્ર સંલેપાજ્જલે તિષ્ઠેદ્યથા ગૃહે ॥ ૧,૧૮૪.૨૮॥

લોહચૂર્ણં તક્રપીતં પાણ્ડુરોગહરં ભવેત્ ।
તણ્ડુલીય કગોક્ષૂરમૂલં પીતં પયોન્વિતમ્ ॥ ૧,૧૮૪.૨૯॥

કમલાદિહરંપિતં મુખરોગહરં તથા ।
જાતીમૂલં તક્રપીતં કોલમૂલં ત્વજીર્ણનુત્ ॥ ૧,૧૮૪.૩૦॥

સતક્રં કુશમલં વા મર્કટી મૂલમેવ વા ।
કાઞ્જિકેન ચ વાકુચ્યા મૂલં વૈ દન્તરોગનુત્ ॥ ૧,૧૮૪.૩૧॥

તથેન્દ્રવારુણીમૂલં વારિપીતં વિષાદિહૃત્ ।
સુરભિકામૂલપા નાદ્વા તન્નાશો ભવેચ્છિવ ॥ ૧,૧૮૪.૩૨॥

શિરોરોગહરં લેપાદ્ગુઞ્જાચૂર્ણં સકાઞ્જિકમ્ ।
બલા ચાતિબલા યષ્ટી શર્કરા મધુસંયુતા ॥ ૧,૧૮૪.૩૩॥

વન્ધ્યાગર્ભકરી પીતા નાત્ર કાર્યા વિચારણા ।
શ્વેતાપરાજિતામૂલં પિપ્પલીશુણ્ઠિકાયુતમ્ ॥ ૧,૧૮૪.૩૪॥

પરિપિષ્ટં શિરોલેપાચ્છિરઃ શૂલવિનાશનમ્ ।
નિર્ગુણ્ડિકાશિખાં પીત્વા ગણ્ડમાલાં વિનાશયેત્ ॥ ૧,૧૮૪.૩૫॥

કેતકીપત્રજં ક્ષારં ગુડેન સહ ભક્ષયેત્ ।
તક્રેણ શરપુઙ્ખાં વા પીત્વા પ્લીહાં વિનાશયેત્ ॥ ૧,૧૮૪.૩૬॥

માતુલઙ્ગસ્ય નિર્યાસં ગુડાજ્યેન સમન્વિતમ્ ।
વાતપિત્તજશૂલાનિ હન્તિ વૈ પાનયોગતઃ ।
શુણ્ઠી સૌવર્ચલં હિઙ્ગુ પીતં હૃદયરોગનુત્ ॥ ૧,૧૮૪.૩૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વૈદ્યશાસ્ત્રે ચતુરશીત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૫
હરિરુવાચ ।
આં ગણપતયે ઇતિ અયં ગણપતેર્મન્ત્રો ધનવિદ્યાપ્રદાયકઃ ॥ ૧,૧૮૫.૧॥

ઇમમષ્ટસહસ્રઞ્ચ જપ્ત્વા બદ્ધ્વા શિખાં તતઃ ।
વ્યવહારે જયઃ સ્યાચ્ચ શતં જાપાન્નૃણાં પ્રિયઃ ॥ ૧,૧૮૫.૨॥

તિલાનાં તુ ઘૃતાક્તાનાં કૃષ્ણાનાં રુદ્ર હોમયેત્ ।
અષ્ટોત્તરસહસ્રન્તુ રાજા વશ્યસ્ત્રિભિર્દિનૈઃ ॥ ૧,૧૮૫.૩॥

અષ્ટમ્યાઞ્ચ ચતુર્દશ્યામુપોષ્યાભ્યર્ચ્ય વિઘ્નરાટ્ ।
તિલાક્ષતાનાં જુહુયાદષ્ટોત્તરસહસ્રકમ્ ।
અપાજિતઃ સ્યાદ્યુદ્ધે ચ સર્વે તઞ્ચ સિષેવિરે ॥ ૧,૧૮૫.૪॥

જપ્ત્વા ચાષ્ટસહસ્રન્તુ તતશ્ચાષ્ટશતેન હિ ।
શિખાં બદ્ધ્વા રાજકુલે વ્યવહારે જયો ભવેત્ ॥ ૧,૧૮૫.૫॥

હ્રીઙ્કારં સવિસર્ગઞ્ચ પ્રાતઃ કાલે નરસ્તુ યઃ ।
સ્ત્રીણાં લલાટે વિન્યસ્ય વશતાં નયતિ ધ્રુવમ્ ॥ ૧,૧૮૫.૬॥

સુસમાહિતચિત્તેન વિન્યસ્ય પ્રમદાલયે ।
સોત્કામાં કામિનીં કુર્યાન્નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૫.૭॥

જુહુયાદયુતં યસ્તુ શુચિઃ પ્રયતમાનસઃ ।
દૃષ્ટિમાત્રે સદા તસ્ય વશ્યમાયાન્તિ યોષિતઃ ॥ ૧,૧૮૫.૮॥

મનઃ શિલાપત્રકઞ્ચ સગોરોચનકુङ्कुમમ્ ।
કૃત એભિશ્ચ તિલકે વશ્યમાયાન્તિ યોષિતઃ ॥ ૧,૧૮૫.૯॥

ભૃઙ્ગરાટ્સહદેવા ચ વચા શ્વેતાપરાજિતા ।
તેનૈવ તિલકં કૃત્વા ત્રૈલોક્યં વશતાં નયેત્ ॥ ૧,૧૮૫.૧૦॥

ગોરોચના મીનપિત્તમાભ્યાઞ્ચ કૃતવર્તિકઃ ।
યઃ પુમાંસ્તિલકં કુર્યાદ્વામહસ્તકનિષ્ઠયા ।
સ કરોતિ વશે સર્વં ત્રૈલોક્યં નાત્ર સંશયઃ ॥ ૧,૧૮૫.૧૧॥

ગોરોચના મહાદેવ ! ધાતુશોણિતભાવિતા ।
એતૈર્વૈતિલકં કૃત્વા સા નરં યં નિરીક્ષતે ।
તત્ક્ષણાત્તં વશે કુર્યા ન્નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૫.૧૨॥

નાગેશ્વરઞ્ચ શૈલેયં ત્વક્પત્રઞ્ચ હરીતકી ।
ચન્દનં કુષ્ઠસૂક્ષ્મૈલારક્તશાલિસમન્વિતા ॥ ૧,૧૮૫.૧૩॥

એતૈર્ધૂપો વશકરઃ સ્મરબાણૈઃ સ્મારાર્દનઃ ।
રતિકાલે મહાદેવ પાર્વતીપ્રિય શઙ્કર ॥ ૧,૧૮૫.૧૪॥

નિજશુક્રં ગૃહી ત્વા તુ વામહસ્તેન યઃ પુમાન્ ।
કામિનીચરણં વામં લિંપેત્સ સ્યાત્સ્ત્રિયાઃ પ્રિયઃ ॥ ૧,૧૮૫.૧૫॥

સૈન્ધવઞ્ચ મહાદેવ પારાવતમલં મધુ ।
એભિર્લિપ્તે તુ લિઙ્ગે વૈ કામિનીવશકૃદ્ભવેત્ ॥ ૧,૧૮૫.૧૬॥

પુષ્પાણિ પઞ્ચરક્તાનિ ગૃહીત્વા યાનિ કાનિ ચ ।
તત્તુલ્યઞ્ચ પ્રિયઙ્ગુઞ્ચ પેષયેદેકયોગતઃ ।
અનેન લિપ્તલિઙ્ગસ્ય કામિનીવશતામિયાત્ ॥ ૧,૧૮૫.૧૭॥

હયગન્ધા ચ મઞ્જિષ્ઠા માલતીકુસુમાનિ ચ ।
શ્વેતસર્ષપ એતૈશ્ચ લિપ્તલિઙ્ગઃ સ્ત્રિયાઃ પ્રિયઃ ॥ ૧,૧૮૫.૧૮॥

મૂલન્તુ કાકજઙ્ઘાયા દુગ્ધપીતન્તુ શોષનુત્ ।
અશ્વગન્ધાનાગબલાગુડમાષનિષેવિણઃ ।
રૂપં ભવેદ્યથા તદ્વન્નવયૌવનચારિણામ્ ॥ ૧,૧૮૫.૧૯॥

લૌહચૂર્ણસમાયુક્તં ત્રિફલાચૂર્ણમેવ વા ।
મધુના સેવિતં રુદ્ર પરિણામાખ્યશૂલનુત્ ॥ ૧,૧૮૫.૨૦॥

ક્વથિતોદકપાનન્તુ શમ્બૂકક્ષારકં તથા ।
મૃગશૃઙ્ગં હ્યગ્નિદગ્ધં ગવ્યાજ્યેન સમન્વિતમ્ ।
પીત હૃત્પૃષ્ઠશૂલાનાં ભવેન્નાશકરં શિવ ॥ ૧,૧૮૫.૨૧॥

હિઙ્ગુ સૌવર્ચલં શુણ્ઠી વૃષધ્વજ મહૌષધમ્? ।
એભિસ્તુ ક્વથિતં વારિ પીતં વૈ સર્વશૂલનુત્ ॥ ૧,૧૮૫.૨૨॥

અપામાર્ગસ્ય વૈ મૂલં સામુદ્રલવણાન્વિતમ્ ।
આસ્વાદિ તમજીર્ણસ્ય શૂલસ્ય સ્યાદ્વિમર્દનમ્ ॥ ૧,૧૮૫.૨૩॥

વટરોહાઙ્કુરો રુદ્ર તણ્ડુલોદકઘર્ષિતઃ ।
પીતઃ સતક્રોऽતીસારં ક્ષયં નયતિ શઙ્કર ॥ ૧,૧૮૫.૨૪॥

અઙ્કોટમૂલં કર્ષાર્ધં પિષ્ટં તણ્ડુલવારિણા ।
સર્વાતીસારગ્રહણીં પીતં હરતિ ભૂતપ ॥ ૧,૧૮૫.૨૫॥

મરીચશુણ્ઠિકુટજત્વક્ચૂર્ણઞ્ચ ગુડાન્વિતમ્ ।
ક્રમાત્તદ્વિગુણં પીતં ગ્રહણીવ્યાધિનાશનમ્ ॥ ૧,૧૮૫.૨૬॥

શ્વેતાપરાજિતામૂલં હરિદ્રાસિક્થતણ્ડુલાઃ ।
અપામાર્ગત્રિકટુકમેષાઞ્ચ વટિકા શિવ ।
વિષૂચિકામહાવ્યાધિં હરત્યેવ ન સંશયઃ ॥ ૧,૧૮૫.૨૭॥

ત્રિફલાગુરુ ભૂતેશ શિલાજતુ હરીતકી ।
એકૈકમેષાં ચૂર્ણન્તુ મધુના ચ વિમિશ્રિતમ્ ।
પીતં સર્વઞ્ચ મેહન્તુ ક્ષયં નયતિ શઙ્કર ॥ ૧,૧૮૫.૨૮॥

અર્કક્ષીરપ્રસ્થમેકં તિલતૈલં તથૈવ ચ ।
મનઃ શિલામરીચાનાં સિન્દૂરસ્ય પલં પલમ્ ॥ ૧,૧૮૫.૨૯॥

ચૂર્ણં કૃત્વા તામ્રપાત્રે ત્વાતપૈઃ શોષયેત્તતઃ ।
પીતં સ્નુહીગતં દુગ્ધં સૈન્ધવં શૂલનુદ્ભવેત્ ॥ ૧,૧૮૫.૩૦॥

ત્રિકટુત્રિફલાનક્તં તિલતૈલં તથૈવ ચ ।
મનઃ શિલા નિમ્બપત્રં જાતીપુષ્પમજાપયઃ ॥ ૧,૧૮૫.૩૧॥

તન્મૂત્રં સઙ્ખનાભિશ્ચ ચન્દનં ઘર્ષયેત્તતઃ ।
એભિશ્ચ વર્તિકાં કૃત્વા ત્વક્ષિણી ચાઞ્જયેત્તતઃ ॥ ૧,૧૮૫.૩૨॥

નશ્યતે પટલં કાચં પુષ્પઞ્ચ તિમિરાદિકમ્ ।

વિભીતકસ્ય વૈ ચૂર્ણં સમધુ શ્વાસનાશનમ્ ॥ ૧,૧૮૫.૩૩॥

પિપ્પલીત્રિફલાચૂર્ણં મધુસૈન્ધવસંયુતમ્ ।
સર્વરોગજ્વરશ્વાસશોષપીનસહૃદ્ભવેત્ ॥ ૧,૧૮૫.૩૪॥

દેવદારોશ્ચ વૈ ચૂર્ણં અજામત્રેણ ભાવયેત્ ।
એકવિંશતિવારંવૈત્વક્ષિણી તેન ચાઞ્જયેત્ ।
રાત્ર્યન્ધતા પટલતા નશ્યેન્નિર્લોમતા તથા ॥ ૧,૧૮૫.૩૫॥

પિપ્પલીકેતકં રુદ્ર હરિદ્રામલકં વચા ।
સર્વાક્ષિરોગા નશ્યેયુઃ સક્ષીરાદઞ્જનાત્તતઃ ॥ ૧,૧૮૫.૩૬॥

કાકજઙ્ઘાશિગ્રુમૂલે મુખેન વિધૃતે શિવ ।
ચર્વિત્વા દન્તકીટાનાં વિનાશો હિ ભવેદ્ધર ॥ ૧,૧૮૫.૩૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
મન્ત્રતન્ત્રવૈદ્યપ્રયોદૃપઞ્ચાશીત્યધિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૬
હરિરુવાચ ।
પીતઃ સારો ગુડૂચ્યાશ્ચ મધુના ચ પ્રમેહનુત્ ।
પીતં ગોહાલિકામૂલં તિલદધ્યાજ્યસંયુતમ્ ॥ ૧,૧૮૬.૧॥

નિરુદ્ધમૂત્રં ક્વથિતં નિવર્તયતિ શઙ્કર ।
તથા હિક્કાં હરેત્પીતં સૌવર્ચલયુતઞ્ચ વૈ ॥ ૧,૧૮૬.૨॥

ગોરક્ષકર્કટીમૂલં પિષ્ટં શીતોદકેન ચ ।
પીતં દિનત્રયેણૈવ નાશયેદ્રુદ્ર શર્કરામ્ ॥ ૧,૧૮૬.૩॥

પિષ્ટ્વા વૈ માલતીમૂલં ગ્રીષ્મકાલે સમાહિતમ્ ।
સાધિતં છાગદુગ્ધેન પતિં શર્કસ્યાન્વિતમ્ ।
હરેન્મૂત્રનિરોધઞ્ચ હરેદ્વૈ પાણ્ડુશર્કરામ્ ॥ ૧,૧૮૬.૪॥

દ્વિજયષ્ટ્યાશ્ચ વૈ મૂલં પિષ્ટં તણ્ડુલવારિણા ।
ગણ્ડમાલાં હરેલ્લેપાદસાધ્યં ગલગણ્ડકમ્ ॥ ૧,૧૮૬.૫॥

રસાઞ્જનં હરીતક્યાશ્ચૂર્ણં તેનૈવ ગુણ્ઠનાત્ ।
નાશયેત્પુરુષો વ્યાધીન્નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૬.૬॥

કરવીરમૂલલેપાદ્વૈ લેપાત્પૂગફલસ્ય ચ ।
પુંવ્યાધિર્નશ્યતે રુદ્ર યોગમન્યં વદામ્યહમ્ ॥ ૧,૧૮૬.૭॥

દન્તીમૂલં હરિદ્રા ચ ચિત્રકં તસ્ય લેપનાત્ ।
ભગન્દરવિનાશઃ સ્યાદન્યં યોગં વદામ્યહમ્ ।
જલૌકાજગ્ધરક્તઞ્ચ ભગન્દરમુમાપતે ॥ ૧,૧૮૬.૮॥

ત્રિફલાજલધૃષ્ટઞ્ચ માર્જારાસ્થિ વિલેપિતમ્ ।
તતો ન પ્રસ્ત્રવેદ્રક્તં નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૬.૯॥

હરિદ્રાનેકવારઞ્ચ સ્નુહીક્ષીરેણ ભાવિતા ।
વટિકાઽર્શોવિનાશાય તલ્લેપાદ્વૃષભધ્વજ ।
ઘોષાફલં સૈન્ધવઞ્ચ પિષ્ટ્વા ચાર્શોહરં પરમ્ ॥ ૧,૧૮૬.૧૦॥

ગવ્યાજ્યં સાધિતં પીતં પલાશક્ષારવારિણા ।
ત્રિગુણેન ત્રિકટુકં અર્શાંસિ ક્ષપયેચ્છિવ ॥ ૧,૧૮૬.૧૧॥

બિલ્વસ્ય ચ ફલં દગ્ધં રક્તાર્શઃ પ્રવિનાશનમ્ ।
જગ્ધવા કૃષ્ણતિલાનેવ નવનીતયુતાનપિ ॥ ૧,૧૮૬.૧૨॥

શુણ્ઠીચૂર્ણં યવક્ષારયુક્તં તુલ્યગુડાન્વિતમ્ ।
અગ્નિવૃદ્ધિં કરોત્યેવ પ્રત્યૂષે વૃષભધ્વજ ॥ ૧,૧૮૬.૧૩॥

શુણ્ઠ્યા ચ ક્વથિતં વારિ પીતં ચાગ્નિં કરોતિ વૈ ।
હરીતકીં સૈન્ધવઞ્ચ ચિત્રકં રુદ્ર પિપ્પલી ॥ ૧,૧૮૬.૧૪॥

ચૂર્ણમુષ્ણોદકેનૈષાં પીતં ચાતિક્ષુધાકરમ્ ।
સાજ્યં સૂકરમાંસં વૈ પીતં ચાતિક્ષુધાકરમ્ ॥ ૧,૧૮૬.૧૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખાણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ષડશીત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૭

હરિરુવાચ ।
હસ્તિકર્ણપલાશસ્ય પત્રાણિ? ચૂર્ણયેદ્ધર ।
સર્વરોગવિનિર્મુક્તં ચૂર્ણં પલશતં શિવ ॥ ૧,૧૮૭.૧॥

સક્ષીરં ભક્ષીતં કુર્યાત્સપ્તાહેન વૃષધ્વજ ।

નરં શ્રુતિધરં રુદ્ર મૃગેન્દ્રગતિવિક્રમમ્ ॥ ૧,૧૮૭.૨॥

પદ્મરાગપ્રતીકાશંયુક્તં દશશતાયુષા ।
ષોડશાબ્દાકૃતિં રુદ્ર સતતં દુગ્ધભોજનાત્ ॥ ૧,૧૮૭.૩॥

મધુસર્પિઃસમાયુક્તં દુગ્ધમાયુષ્કરં ભવેત્ ।
તજ્જગ્ધં મધુના સાર્ધં દશવર્ષ સહસ્રિણમ્ ॥ ૧,૧૮૭.૪॥

કુર્યાન્નરં શ્રુતિધરં પ્રમદાજનવલ્લભમ્ ।
દધ્ના નિત્યં ભક્ષિતન્તુ વજ્રદેહકરં ભવેત્ ॥ ૧,૧૮૭.૫॥

કેશરાજિસમાયુક્તં નરં વર્ષસહસ્રિણમ્ ।
તચ્ચ કાઞ્જિકસંયુક્તં નરં કુર્યાચ્ચ ભક્ષિતમ્ ॥ ૧,૧૮૭.૬॥

શતવર્ષં દિવ્યદેહં વલીપલિતવર્જિતમ્ ।
જગ્ધં ત્રિફલયા ક્ષૌદ્રં ચક્ષુષ્મન્તં કરોતિ વૈ ॥ ૧,૧૮૭.૭॥

અન્ધઃ પશ્યેત્તુ ચૂર્ણસ્ય સાજ્યસ્યૈવ તુ ભક્ષણાત્ ।
મહિષીક્ષીરસંયુક્તસ્તલ્લેપઃ કૃષ્ણકેશકૃત્ ॥ ૧,૧૮૭.૮॥

ખલ્વાટસ્ય ચ વૈ કેશા ભવન્તિ વૃષભધ્વજ ।
તૈલયુક્તેન ચૂર્ણેન વલીપલિતનાશનમ્ ॥ ૧,૧૮૭.૯॥

તદુદ્વર્તનમાત્રેણ સર્વરાગઃ પ્રમુચ્યતે ।
સચ્છાગક્ષીરચૂર્ણેન દૃષ્ટિઃ સ્યાન્માસતોઽઞ્જનાત્ ॥ ૧,૧૮૭.૧૦॥

પલાશસ્ય ચ બીજાનિ શ્રાવણે વિતુષાણિ ચ ।
ગૃહીત્વા નવનીતેન તેષાં ચૂર્ણં ચ ભક્ષયેત્ ॥ ૧,૧૮૭.૧૧॥

કર્ષાર્ધમેકં સેવેત નત્વા નિત્યં હરિં પ્રભુમ્ ।
પુરાણષષ્ટિધાન્યસ્ય પથ્યમમ્બુ પિબન્હર ।
જીવેદ્વર્ષસહસ્રાણિ વલીપલિતવર્જિતઃ ॥ ૧,૧૮૭.૧૨॥

ભૃઙ્ગરાજસ્ય વૈ મૂલં પુષ્યર્ક્ષે તુ સમાહૃતમ્ ।
વિધાય તસ્ય ચૂર્ણં વૈ સસૌવીરઞ્ચ ભક્ષયેતમ્ ॥ ૧,૧૮૭.૧૩॥

માસમાત્રપ્રયોગેણ વલીપલિતવર્જિતઃ ।
શતાનિ પઞ્ચ જીવેચ્ચ નરો નાગબલો ભવેત્ ।
ભવેચ્છ્રુતિધરો રુદ્ર પુષ્યર્ક્ષે ચૈવ ભક્ષણાત્ ॥ ૧,૧૮૭.૧૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે

આયુષ્કરયોગોદ્સમાશીત્યધિકશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૮૮

હરિરુવાચ ।

નિર્વ્રણઃ સ્યાત્પૂયંહીનો પ્રહારો ધૃપૂરિતઃ ।
અપામાર્ગસ્ય વૈ મૂલં હસ્તાભ્યાગ્ચ વિમર્દિતમ્ ।
તદ્રસેન પ્રહારસ્ય રક્તસ્ત્રાવો ન પૂરણાત્ ॥ ૧,૧૮૮.૧॥

રુદ્ર લાઙ્ગલિકામૂલં ચેક્ષુદર્ભસ્તથૈવ ચ ।
તેન વ્રણમુખં લિપ્તં શલ્યં નિઃ સ રતિ વ્રણાત્ ।
ચિરકાલપ્રવિષ્ટોઽપિ તેન માર્ગેણ શઙ્કર ॥ ૧,૧૮૮.૨॥

બાલમૂલં મેષશૃઙ્ગીમૂલં વા વારિઘર્ષિતમ્ ।
તેન લિપ્તં ચિરં જાતં વ્રણં નાઙ્યાઃ પ્રશામ્યતિ ॥ ૧,૧૮૮.૩॥

જગ્ધં માહિષપદ્મા ચ યુક્તં કોદ્રવભક્તકમ્ ।
હિઙ્ગુમૂલસ્ય વૈ ચૂર્ણં દત્તં નાડીવ્રણાપહમ્ ॥ ૧,૧૮૮.૪॥

બ્રહ્મયષ્ટિફલં પિષ્ટં વારિણા તેનલેપિતમ્ ।
તેન ધૃષ્ટં રક્તદોષઃ પ્રણશ્યતિ ન સંશયઃ ॥ ૧,૧૮૮.૫॥

યવભસ્મ વિડઙ્ગગ્ચ ગન્ધપાષાણમેવ ચ ।
શુણ્ઠિરેષાગ્ચૈવ ચૂર્ણં ભ્વિતં રુધિરેણવૈ ॥ ૧,૧૮૮.૬॥

કૃકલાસસ્ય તલ્લિપ્તં વિદ્રધિં નાશયેચ્છિવ ।
સૌભાગ્જનસ્ય બીજાનિ ત્વતસીમસિના સહ ॥ ૧,૧૮૮.૭॥

સૌરસર્ષપયુક્તાનિ સર્વાણ્યેતાનિ શઙ્કર ।
પિષ્ટાન્યનમ્લતક્રેણ ગ્રન્થિકં નાશયેદ્ધિ વૈ ॥ ૧,૧૮૮.૮॥

શ્વેતાપરાજિતામૂલં પિષ્ટં તણ્ડુલવારિણા ।
તેન નસ્યપ્રદાનાત્સ્યાદ્ભૂતવૃન્દસ્ય વિદ્રવઃ ॥ ૧,૧૮૮.૯॥

અગસ્ત્યપુષ્પનસ્યં વૈ સમરીચં તુ શૂલહૃત્ ।
ભુજઙ્ગચર્મ વૈ હિઙ્ગુ નિમ્બપત્રં તથા યવાઃ ।
ગૌરસર્ષમ એભિઃ સ્યાલ્લેપો ભૂતહરઃ શિવ ॥ ૧,૧૮૮.૧૦॥

ગોરોચના મરીચાનિ પિપ્પલી સૈન્ધવં મધુ ।

અઞ્જનં કૃતમેભિઃ સ્યાદ્ગ્રહભૂતહરં શિવ ॥ ૧,૧૮૮.૧૧॥

ગુગ્ગુલૂલૂકપુચ્છાભ્યાં ધૂપો ગ્રહહરો ભવેત્ ।
ચાતુર્થિકજ્વરૈર્મુક્તો કૃષ્ણવસ્ત્રાવગુણ્ઠિતઃ ॥ ૧,૧૮૮.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વ્રણાચિ દૃમાષ્ટાશીત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮૯
હરિરુવાચ ।
શ્વેતાપરાજિતાપુષ્પરસેનાક્ષ્ણોશ્ચ પૂરણે ।
પટલં નાશમાયાતિ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૯.૧॥

મૂલં ગોક્ષુરકસ્યૈવ ચર્વિત્વા નીલલોહિત ।
દન્તકીટવ્યથા નશ્યેત્સુરાસુરવિમર્દન્ ॥ ૧,૧૮૯.૨॥

નારી પુષ્પાદિને પીત્વા ગોક્ષીરેણોપવાસતઃ ।
શ્વેતાર્કસ્ય તુ વૈ મૂલં તસ્યાસ્તદ્ગુલ્મશૂલનુત્ ॥ ૧,૧૮૯.૩॥

શ્વેતાર્કપુષ્પં વિધિના ગૃહીતં પૂર્વમન્ત્રિતમ્ ।
ઋતુશુદ્ધા ચ લલના કટૌ બદ્ધ્વા પ્રસૂયતે ॥ ૧,૧૮૯.૪॥

હસ્તબદ્ધં પલાશસ્ય અપામાર્ગસ્ય વા હર ।
મૂલં સર્વજ્વરહરં ભૂતપ્રેતાદિનુદ્ભવેત્ ॥ ૧,૧૮૯.૫॥

પીતં વૃશ્ચિકમૂલઞ્ચ પ્રાતઃ પર્યુષિતામ્બુના ।
સાર્ધં વિનાશયેદ્દાહજ્વરઞ્ચ પરમેશ્વર ॥ ૧,૧૮૯.૬॥

શિખાયાઞ્ચૈવ તદ્બદ્ધં ભવેદૈકાહિકાહિનુત્ ।
પીતં પર્યુષિતાદ્ભિશ્ચ ભવેત્સર્વવિષાપહૃત્ ॥ ૧,૧૮૯.૭॥

યસ્ય લજ્જાલુકામૂલં દીયતે ચ સ્વરેતસા ।
સાર્ધં સ વૈરં સંયાતિ પુમાન્સ્ત્રી વા ન સંશયઃ ॥ ૧,૧૮૯.૮॥

પિષ્ટ્વા ગવ્યઘૃતેનૈવ પાઠામૂલં પિબેત્તુ યઃ ।
સર્વં વિષં વિનશ્યેચ્ચ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૮૯.૯॥

મૂલં પર્યુષિતોદેન શિરીષસ્ય યથા તથા ।
રક્તચિત્રકમૂલસ્ય રસસ્ય ભરણાદ્ધર ।

કર્ણયોઃ કામલાવ્યાધિનાશઃ સ્યાન્નાત્ર સંશયઃ ॥ ૧,૧૮૯.૧૦॥

શ્વેતકોકિલાક્ષમૂલં છાગીક્ષીરેણ સંયુતમ્ ।
ત્રિસપ્તાહેન વૈ પીતં ક્ષયરોગં ક્ષયં નયેત્ ॥ ૧,૧૮૯.૧૧॥

નારિકેલસ્ય વૈ પુષ્પં છાગક્ષીરેણ સંયુતમ્ ।
પિબેચ્ચ ત્રિવિધસ્તસ્ય રક્તવાતો વિનશ્યતિ ॥ ૧,૧૮૯.૧૨॥

કુર્યાત્સુદર્શનામૂલં માલ્યેન સુસમાહૃતમ્ ।
કણ્ઠબદ્ધ ચ્યાહિકાદિગ્રહભૂતવિનાશનમ્ ॥ ૧,૧૮૯.૧૩॥

પુષ્પં ધવલગુઞ્જાયા ગૃહીતં મૂલમેવ ચ ।
મુખે તુ નિહિતં રુદ્ર હરેન્નાનાવિષં બહુ ॥ ૧,૧૮૯.૧૪॥

હસ્તે બદ્ધં કાણ્ડયુક્તં કણ્ઠે બદ્ધં ગ્રહાદિહૃત્ ।
કૃષ્ણાયાન્તુ ચતુર્દશ્યાં કટિબદ્ધં સમાહૃતમ્ ।
સિંહાદિશ્વાપદાદ્ભીતિં હરેચ્ચ નીલલોહિત ॥ ૧,૧૮૯.૧૫॥

વિષ્ણુક્રાન્તામૂલમીશ કર્ણબદ્ધન્તુ ધારયેત્ ।
પટ્ટસૂત્રેણ ભૂતેશ મકરાદિભયં ન વૈ ॥ ૧,૧૮૯.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકોનનવત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૦
હરિરુવાચ ।
અપરાજિતાયા મૂલઞ્ચ ગોમૂત્રેણ સમન્વિતમ્ ।
પીતઞ્ચાશુ હરત્યેવ ગણ્ડમાલાં ન સંશયઃ ॥ ૧,૧૯૦.૧॥

અથેન્દ્રવારુણીમૂલં વિધિના પીતમીશ્વર ।
જિઙ્ગિણ્યૈરણ્ડકં રુદ્ર શૂકશિમ્બ્યા સમન્વિતમ્ ।
શીતોદકઞ્ચ તચ્ચસ્તં બાહુગ્રીવાવ્યથાં હરેત્ ॥ ૧,૧૯૦.૨॥

માહિષં નવનીતઞ્ચ અશ્વગન્ધા ચ પિપ્પલી ।
વચા કુષ્ઠદ્વયં લેપો લિઙ્ગસ્રોતસ્તનાર્તિહૃત્ ॥ ૧,૧૯૦.૩॥

કુષ્ઠનાગબલાચૂર્ણં નવનીતસમન્વિતમ્ ।
તલ્લેપો યુવતીનાઞ્ચ કુર્યાદ્વૃત્તોજકૌ શુભૌ ॥ ૧,૧૯૦.૪॥

ઇન્દ્રવારુણિકામૂલં યસ્ય નામ્ના સુદૂરતઃ ।
નિઃ ક્ષિપ્યતે સમુત્પાટ્ય તસ્ય પ્લીહા વિનશ્યતિ ॥ ૧,૧૯૦.૫॥

પુનર્નવાયાઃ શુક્લાયા મૂલં તણ્ડુલવારિણા ।
પીતં વિદ્રધિનુત્સ્યાચ્ચ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૯૦.૬॥

કદલીદલક્ષારન્તુ પાનીયેન પ્રસાધિતમ્ ।
તસ્યાદનાદ્વિનશ્યન્તિ ઉદરવ્યાધયોઽખિલાઃ ॥ ૧,૧૯૦.૭॥

કદલ્યા મૂલમાદાય ગુડાજ્યેન સમન્વિતમ્ ।
અગ્નિના સાધિતં જગ્ધમુદરસ્થક્રિમીન્હરેત્ ॥ ૧,૧૯૦.૮॥

નિત્યં નિમ્બદલાનાઞ્ચ ચૂર્ણમામલકસ્ય ચ ।
પ્રત્યૂષે ભક્ષયેચ્ચૈવ તસ્ય કુષ્ઠં વિનશ્યતિ ॥ ૧,૧૯૦.૯॥

હરીતકીવિડઙ્ગઞ્ચ હરિદ્રા સિતસર્ષપાઃ ।
સોમરાજસ્ય મૂલાનિ કરઞ્જસ્ય ચ રૌન્ધવમ્ ।
ગોમૂત્રપિષ્ટાન્યેતાનિ કુષ્ઠરોગહરાણિ વૈ ॥ ૧,૧૯૦.૧૦॥

એકશ્ચ ત્રિફલાભાગસ્તથા ભાગદ્વયં શિવા ।
સોમરાજસ્ય બીજાનાં જગ્ધં પથ્યેન દદ્રુનુત્ ॥ ૧,૧૯૦.૧૧॥

અમ્લતક્રં સગોમૂત્રં ક્વથિતં લવણાન્વિતમ્ ।
કાંસ્યઘૃષ્ટં ખરં લેપાત્કુષ્ઠદદ્રુવિનાશનમ્ ॥ ૧,૧૯૦.૧૨॥

હરિદ્રા હરિતાલશ્ચ દૂર્વાગોમૂત્રસૈન્ધવમ્ ।
અયં લેપો હન્તિ દદ્રું પામાનં ચ ગરં તથા ॥ ૧,૧૯૦.૧૩॥

સોમ રાજસ્ય બીજાનિ નવનીતયુતાનિ ચ ।
મધુનાસ્વાદિતાનિ સ્યુઃ શુક્લકુષ્ઠહરાણિ વૈ ।
તક્રાન્નપાનતો રુદ્ર નાત્ર કાર્યા વિચારણા ॥ ૧,૧૯૦.૧૪॥

શ્વેતાપરા જિતામૂલં વર્તિતં ચાસ્ય વારિણા ।
તલ્લેપો રુદ્ર માસેન શુક્લકુષ્ઠવિનાશનઃ ॥ ૧,૧૯૦.૧૫॥

માહિષં નવનીતઞ્ચ સિન્દૂરં સમરીચકમ્ ।
પામા વિલેપનાન્નશ્યેદ્દુર્નામા વૃષભધ્વજ ॥ ૧,૧૯૦.૧૬॥

વિશુષ્કગામ્ભારીમૂલં પક્વં ક્ષીરેણ સંયુતમ્ ।
ભક્ષિતં શુક્લપિત્તસ્ય વિનાશકરમીશ્વર ॥ ૧,૧૯૦.૧૭॥

મૂલકસ્ય તુ બીજાનિ હ્યપા માર્ગરસેન વૈ ।
પિષ્ટાનિ તેન લેપેન સિધ્મકં રુદ્ર નશ્યતિ ॥ ૧,૧૯૦.૧૮॥

કદલીક્ષારસંયુક્તહરિદ્રા સિધ્મકાપહા ।
રમ્ભાપામાર્ગયોઃ ક્ષાર એરણ્ડેન વિમિશ્રિતઃ ।
તદભ્યઙ્ગાન્મહાદેવ ! સદ્યઃ સિધ્મ વિનશ્યતિ ॥ ૧,૧૯૦.૧૯॥

કૂષ્માણ્ડનાલક્ષારશ્ચ સગોમૂત્રશ્ચ તત્ત્વતઃ ।
જલપિષ્ટા હરિદ્રા ચ સિદ્ધા મન્દાનલેનહિ ॥ ૧,૧૯૦.૨૦॥

માહિષેણ પુરીષેણ વેષ્ટિતા વૃષભધ્વજ ।
અસ્યા ઉદ્વર્તનં કુર્યાદઙ્ગસૌષ્ઠવમીશ્વર ॥ ૧,૧૯૦.૨૧॥

તિલસર્ષપસંયુક્તં હરિદ્રાદ્વયકુષ્ઠકમ્ ।
તેનોદ્વર્તિતદેહઃ સ્યાદ્દુર્ગન્ધઃ સુરભિઃ પુમાન્ ॥ ૧,૧૯૦.૨૨॥

મનોહરશ્ચાનુદિનં દૂર્વાણાં કાકજઙ્ઘાયા ।
અર્જુનસ્ય તુ પુષ્પાણિ જમ્બૂપત્રયુતાનિ ચ ।
સલોધ્રાણિ ચ તલ્લેપો દેહદુર્ગન્ધતાં હરેત્ ॥ ૧,૧૯૦.૨૩॥

યુક્તં લોધ્રભવૈર્નીરૈશ્ચૂર્ણન્તુ કનકસ્ય ચ ।
તેનોદ્વર્તિતદેહસ્ય ન સ્યાદ્ગ્રીષ્મપ્રબાધિકા ॥ ૧,૧૯૦.૨૪॥

દુગ્ધેનોષસિ સેકશ્ચ ઘર્મદોષશ્ચ નશ્યતિ ।
કાકજઙ્ઘોદ્વર્તનન્તુ હ્યઙ્ગરાગકરં ભવેત્ ॥ ૧,૧૯૦.૨૫॥

મધુયષ્ટી શર્કરા ચ વાસકસ્ય રસો મધુ ।
એતત્પીતં રક્તપિત્તકામલાપાણ્ડુરોગનુત્ ॥ ૧,૧૯૦.૨૬॥

રક્તપિત્તં હરેત્પીતો વાસકસ્ય રસો મધુ ।
પ્રાતઃ કાલે તોયપાનાત્પીનસં દારુણં હરેત્ ॥ ૧,૧૯૦.૨૭॥

બિભીતકસ્ય વૈ ચૂર્ણં પિપ્પલ્યાઃ સૈન્ધવસ્ય ચ ।
પીતં સકાઞ્જિકં હન્તિ સ્વરભેદં મહેશ્વર ॥ ૧,૧૯૦.૨૮॥

ચૂર્ણમામલકં સેવ્યં પીતં ગવ્યપયોઽન્વિતમ્ ।
મનઃ શિલા બલામૂલં કોલપણ ચ ગુગ્ગુલુઃ ॥ ૧,૧૯૦.૨૯॥

જાતિપત્રં કોલપત્રં તથા ચૈવ મનઃ શિલા ।
એભિશ્ચૈવ કૃતા વર્તિર્બદર્યગ્નૌ મહેશ્વર ।

ધૂમપાનં કાસહરં નાત્ર કાર્યા વિચારણા ॥ ૧,૧૯૦.૩૦॥

ત્રિફલાપિપ્પલીચૂર્ણં ભક્ષિતં મધુનાયુતમ્ ।
ભોજનાદૌ હિ સમધુ પિપાસાજ્વ(ત્વ)રિતં હરેત્ ॥ ૧,૧૯૦.૩૧॥

બિલ્વમૂલઞ્ચ સમધુગુડૂચીક્વથિતં જલમ્ ।
પીતં હરેચ્ચ ત્રિવધં છર્દિં નૈવાત્રસંશયઃ ।
પીતા દૂર્વા છર્દિનુત્સ્યાત્પિષ્ટાતણ્ડુલવારિણા ॥ ૧,૧૯૦.૩૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નવત્યધિકશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૧
હરિરુવાચ ।
પુનર્નવાયા મૂલઞ્ચ શ્વેતં પુષ્યે સમાહૃતમ્ ।
વારિ પીતં તસ્ય પાર્શ્વે ભવનેષુ ન પન્નગાઃ ॥ ૧,૧૯૧.૧॥

તાર્ક્ષ્યમૂર્તિં વહેદ્યો વૈ ભલ્લૂકદન્તનિર્મિતામ્ ।
સ પન્નગૈર્ન દૃશ્યેત યાવજ્જીવં વૃષધ્વજ ॥ ૧,૧૯૧.૨॥

પિબેચ્છલ્મલિમૂલં યઃ પુષ્યર્ક્ષે રુદ્ર વારિણા ।
તસ્મિન્નપાસ્તદશના નાગાઃ સ્યુર્નાત્ર સંશયઃ ॥ ૧,૧૯૧.૩॥

પુષ્યે લજ્જાલુકામૂલે હસ્તબદ્ધે તુ પન્નગાન્ ।
ગૃહ્ણીયાલ્લેપતો વાપિ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૯૧.૪॥

પુષ્યેશ્વેતાર્કમૂલન્તુ પીતં શીતેન વારિણા ।
નશ્યેતુ દંશકવિષં કરવીરાદિજં વિષમ્ ॥ ૧,૧૯૧.૫॥

મહાકાલસ્ય વૈ મૂલં પિષ્ટં તત્કાઞ્જિકેન વૈ ।
વોડ્રાણાં ડુણ્ડુભાનાં ચ તલ્લોપો હરતે વિષમ્ ॥ ૧,૧૯૧.૬॥

તણ્ડુલીયકમૂલં ચ પિષ્ટં તણ્ડુલવારિણા ।
ધૃતેન સહ પીતન્તુ હરેત્સર્વાવિષાણિ ચ ॥ ૧,૧૯૧.૭॥

નીલીલજ્જાલુકામૂલં પિષ્ટં તણ્ડુલવારિણા ।
પીતં તદ્દંશકવિષં નશ્યેદેકેન વોભયોઃ ॥ ૧,૧૯૧.૮॥

કૂષ્માણ્ડકસ્ય સ્વરસઃ સગુડઃ સહશર્કરઃ ।

પીતઃ સદુગ્ધો હન્યાચ્ચ દંશકસ્યવિષં ચ વૈ ॥ ૧,૧૯૧.૯॥

તથા કોદ્રવમૂલસ્ય મોહસ્ય હર એવ ચ ।
યષ્ટીમધુસમાયુક્તા તથા પીતા ચ શર્કરા ॥ ૧,૧૯૧.૧૦॥

સદુગ્ધા ચ ત્રિરાત્રેણ મૂષકાનાં વિષં હરેત્ ।
ચુલુકત્રયપાનાચ્ચ વારિણઃ શીતલસ્ય વૈ ॥ ૧,૧૯૧.૧૧॥

તામ્બૂલદગ્ધમુખસ્ય લાલાસ્રાવો વિનશ્યતિ ।
ઘૃતં સશર્કરં ષીત્વા મદ્યપાનમદો ન વૈ ॥ ૧,૧૯૧.૧૨॥

કૃષ્ણાઙ્કોલસ્ય મૂલેન પીતં સુક્વથિતં જલમ્ ।
તતો નશ્યદ્ગરવિષં ત્રિરાત્રેણ મહેશ્વર ॥ ૧,૧૯૧.૧૩॥

ઉષ્ણં ગવ્યઘૃતં ચૈવ સૈન્ધવેન સમન્વિતમ્ ।
નાશયેત્તન્મહાદેવ વેદનાં વૃશ્ચિકોદ્ભવામ્ ॥ ૧,૧૯૧.૧૪॥

કુસુભં કઙ્કુમઞ્ચૈવ હરિતાલં મનઃ શિલા ।
કરઞ્જં પિષિતં ચૈવ હ્યર્કમૂલં ચ શઙ્કર ॥ ૧,૧૯૧.૧૫॥

વિષંનૃણાં વિનશ્યેત્તુ એતેષાં ભક્ષણાચ્છિવ ।
દીપતૈલપ્રદાનાચ્ચ દંશૈરાકીટજૈઃ શિવ ।
ખર્જૂરકવિષં નશ્યેત્તદા વૈ નાત્ર સંશયઃ ॥ ૧,૧૯૧.૧૬॥

દંશસ્થાનં વૃશ્ચિકસ્ય શુણ્ઠી તગરસંયુતા ।
નશ્યેન્મધુમક્ષિકાયા એતેષાં લેપતો વિષમ્ ॥ ૧,૧૯૧.૧૭॥

શતપુષ્પા સૈન્ધવઞ્ચ સાજ્યં વા તેન લેપયેત્ ।
શિરીષસ્ય તુ બીજંવૈ સિદ્ધ ક્ષીરેણ ઘર્ષિતમ્ ॥ ૧,૧૯૧.૧૮॥

તલ્લેપેન મહાદેવ નશ્યેત્કુક્કુરજં વિષમ્ ।
જ્વલિતાગ્નિર્વારિસેકો તથા દર્દુરજં વિષમ્ ॥ ૧,૧૯૧.૧૯॥

ધત્તૂરકરસોન્મિશ્રં ક્ષીરાદ્યગુડપાનતઃ ।
શૂનાં વિષં વિનશ્યેત્તુ શશાઙ્કાઙ્કિતશેખર ॥ ૧,૧૯૧.૨૦॥

વટનિમ્બશમીનાઞ્ચ વલ્કલૈઃ ક્વથિતં જલમ્ ।
તત્સેકાન્મુખદન્તાનાં નશ્યેદ્વૈ વિષવેદના ॥ ૧,૧૯૧.૨૧॥

લેપનાદ્દેવદારોશ્ચ ગૈરિકસ્ય ચ લેપનાત્ ।
નાગેશ્વરો દરિદ્રે દ્વે તથા મઞ્જિષ્ઠકા હર ।

એભિર્લેપાદ્વિનશ્યેત્તુ લૂતાવિષમુમાપતે ॥ ૧,૧૯૧.૨૨॥

કરઞ્જસ્ય તુ બીજાનિ વરુણચ્છદમેવ ચ ।
તિલાશ્ચ સર્ષપા હન્યુર્વિષં વૈ નાત્ર સંશયઃ ॥ ૧,૧૯૧.૨૩॥

ઘૃતં કુમારીપત્રં વૈ દત્તં સલવણં હર ।
તુરઙ્ગમશરીરાણાં કણ્ડૂર્નશ્યેદ્દશાહતઃ ॥ ૧,૧૯૧.૨૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
એકનવત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૨
હરિરુવાચ ।
ચિત્રકસ્યાષ્ટભાગાશ્ચ શૂરણસ્ય ચ ષોડશ ।
શુણ્ઠ્યા ભાગાશ્ચ ચત્વારો મરિચાનાં દ્વયં તથા ॥ ૧,૧૯૨.૧॥

ત્રિતયં પિપ્પલીમૂલં વિડઙ્ગાનાં ચતુષ્ટયમ્ ।
અષ્ટૌ મુશલિકાભાગાસ્ત્રિફલાયાશ્ચતુષ્ટયમ્ ।
દ્વિગુણેન ગુડેનૈષાં મોદકાનિહ કારયેત્ ॥ ૧,૧૯૨.૨॥

તદ્ભક્ષણમજીર્ણં હિ પાણ્ડુરોગઞ્જ કામલમ્ ।
અતીસારાંશ્ચ મન્દાગ્નિં પ્લીહાઞ્ચૈવ નિવારયેત્ ॥ ૧,૧૯૨.૩॥

બિલ્વાગ્નિમન્થઃ શ્યોનાકપાટલાપારિભદ્રકમ્ ।
પ્રસારણ્યશ્વગન્ધા ચ બૃહતી કણ્ટકારિકા ॥ ૧,૧૯૨.૪॥

બલા ચાતિબલા રાસ્ના શ્વદંષ્ટ્રા ચ પુનર્નવા ।
એરણ્ડઃ શારિવા પર્ણી ગુડૂચી કપિકચ્છુકા ॥ ૧,૧૯૨.૫॥

એષાં દશપલાન્ભાગાન્ક્વાથયેત્સલિલેઽમલે ।
તેન પાદાવશેષેણ તૈલપાત્રે વિપાચયેત્ ॥ ૧,૧૯૨.૬॥

આજં વા યદિ ગવ્યં ક્ષીરં દત્ત્વા ચતુર્ગુણમ્ ।
શતાવરીં સૈન્ધવઞ્ચ તૈલતુલ્યં પ્રદાપયેત્ ॥ ૧,૧૯૨.૭॥

દ્રવ્યાણિયાનિ પેષ્યાણિ તાનિ વક્ષ્યામિ તચ્છૃણુ ।
શતપુષ્પા દેવદારુર્બલા પર્ણી વચાગુરુ ॥ ૧,૧૯૨.૮॥

કુષ્ઠં માંસી સૈન્ધવઞ્ચ પલમેકં પુનર્નવા ।

પાને નસ્યે તથાભ્યઙ્ગે તૈલમેતત્પ્રદાપયેત્ ॥ ૧,૧૯૨.૯॥

હૃચ્છૂલં પાર્શ્વશૂલઞ્ચ ગણ્ડમાલાઞ્ચ નાશયેત્ ।
અપસ્મારં વાતરક્તં વપુષ્માંશ્ચ પુમાન્ભવેત્ ॥ ૧,૧૯૨.૧૦॥

ગર્ભમશ્વતરી વિન્ધ્યાત્કિં પુનર્માનુષી હર ।
અશ્વાનાં વાતભગ્નાનાં કુઞ્જરાણાં નૃણાં તથા ।
તૈલમેતત્પ્રયોક્તવ્યં સર્વવાતવિકારિણામ્ ॥ ૧,૧૯૨.૧૧॥

હિઙ્ગુતુમ્બુરુશુણ્ઠીભિઃ સિદ્ધં તૈલન્તુ સાર્ષપમ્ ।
એતદ્ધિ પુરણં શ્રેષ્ઠં કર્ણશૂલાપહં પરમ્ ॥ ૧,૧૯૨.૧૨॥

શુષ્કમૂલકશુણ્ઠીનાં ક્ષારો હિઙ્ગુલનાગરમ્ ।
તક્રં ચતુર્ગુણં દદ્યાત્તૈલમેતદ્વિપાચયેત્ ॥ ૧,૧૯૨.૧૩॥

બાધિર્યં કર્ણશૂલઞ્ચ પૂયસ્ત્રાવઞ્ચ કર્ણયોઃ ।
ક્રિમયશ્ચ વિનશ્યન્તિ તૈલસ્યાસ્ય પ્રપૂરણાત્ ॥ ૧,૧૯૨.૧૪॥

શુષ્કમૂલકશુણ્ઠીનાં ક્ષારો હિઙ્ગુલનાગરમ્ ।
શતપુષ્પા વચા કુષ્ઠં દારુશિગ્રુરસાઞ્જનમ્ ॥ ૧,૧૯૨.૧૫॥

સૌવર્ચલં યવક્ષારં સામુદ્રં સૈન્ધવં તથા ।
ગ્રન્થિકં વિડમુસ્તં ચ મધુ શુક્તં ચતુર્ગુણમ્ ॥ ૧,૧૯૨.૧૬॥

માતુલુઙ્ગરસશ્ચૈવ કદલીરસ એવ ચ ।
તૈલમેભિર્વિપક્તવ્યં કર્ણશૂલાપહં પરમ્ ॥ ૧,૧૯૨.૧૭॥

બાધિર્યં કર્ણનાદશ્ચ પૂયસ્ત્રાવશ્ચ દારુણમ્ ।
પૂરણાદસ્ય તૈલસ્ય ક્રિમયઃ કર્ણયોર્હર ॥ ૧,૧૯૨.૧૮॥

સદ્યો વિનાશમાયાન્તિ શશાઙ્કકૃતશેખર ।
ક્ષારતૈલમિદં શ્રેષ્ઠં મુખદન્તમલાપહમ્ ॥ ૧,૧૯૨.૧૯॥

ચન્દનં કુઙ્કુમં માંસી કર્પૂરં જાતિપત્રિકા ।
જાતીકઙ્કોલપૂગાનાં લવઙ્ગસ્ય ફલાનિ ચ ॥ ૧,૧૯૨.૨૦॥

અગુરૂણિ ચ કસ્તૂરી કુષ્ઠં તગરપાદિકા ।
ગોરોચના પ્રિયઙ્ગુશ્ચ બલા ચૈવ તથા નખી ॥ ૧,૧૯૨.૨૧॥

સરલં સપ્તપર્ણં ચ લાક્ષા ચામલકી તથા ।
તથા તુ પદ્મકં ચૈવ હ્યેતૈસ્તૈલં પ્રસાધયેત્ ॥ ૧,૧૯૨.૨૨॥

પ્રસ્વેદમલદુર્ગન્ધકણ્ડૂ કુષ્ઠહરં પરમ્ ।
ગચ્છતિ સ્ત્રીશતં રુદ્ર બન્ધ્યાપિ લભતે સુતમ્ ॥ ૧,૧૯૨.૨૩ ॥

યવાની ચિત્રકં ધાન્યં ત્ર્યૂષણં જીરકં તથા ।
સૌવર્ચલં વિડઙ્ગઞ્ચ પિપ્પલીમૂલરાજિકમ્ ॥ ૧,૧૯૨.૨૪ ॥

એભિઃ પચેદ્રઘૃતપ્રસ્થં જલપ્રસ્થાષ્ટસંયુતમ્ ।
તથાઽર્શોગુલ્મશ્વયથું હન્તિ વહ્નિં કરોતિ વૈ ॥ ૧,૧૯૨.૨૫ ॥

મરિચં ત્રિવૃતં કુષ્ઠં હરિતાલં મનઃ શિલા ।
દેવદારુ હરિદ્રે દ્વે કુષ્ઠં માંસી ચ ચન્દનમ્ ॥ ૧,૧૯૨.૨૬ ॥

વિશાલા કરવીરઞ્ચ અર્કક્ષીરં શકૃદ્રસઃ ।
એષાઞ્ચ કાર્ષિકો ભાગો વિષસ્યાર્ધપલં ભવેત્ત્ ॥ ૧,૧૯૨.૨૭ ॥

પ્રસ્થં સટુકતૈલસ્ય ગોમૂત્રેઽષ્ટગુણે પચેત્ ।
મૃત્પાત્રે લોહપાત્રે વા શનૈર્મૃદ્વગ્નિના પચેત્ ॥ ૧,૧૯૨.૨૮ ॥

પામા વિચર્ચિકા ચૈવ દદ્રુર્વિસ્ફોચકાનિચ ।
અભ્યઙ્ગેન પ્રણશ્યન્તિ કોમલત્વઞ્ચ જાયતે ॥ ૧,૧૯૨.૨૯ ॥

પ્રભૂતાન્યપિ શ્વિત્રાણિ તૈલેનાનેન મર્દયેત્ ।
ચિરોત્થિતમપિ શ્વિત્રં વિનષ્ટં તત્ક્ષણાદ્ભવેત્ ॥ ૧,૧૯૨.૩૦ ॥

પટોલપત્રં કટુકા મઞ્જિષ્ઠા શારિવા નિશા ।
જાતીશમીનિમ્બપત્રં મધુકં ક્વથિતં ઘૃતમ્ ॥ ૧,૧૯૨.૩૧ ॥

એભિર્લેપાત્સયુરરુજો વ્રણા વિસ્રાવિણઃ શિવ ।
શઙ્ખપુષ્પી વચા સોમો બ્રાહ્મી બ્રહ્મસુવર્ચલાઃ ॥ ૧,૧૯૨.૩૨ ॥

અભયા ચ ગુડૂચી ચ આટરૂષકવાકુચી ।
એતૈરક્ષસમૈર્ભાગૈર્ઘૃતપ્રસ્થં વિપાચયેત્ ॥ ૧,૧૯૨.૩૩ ॥

કણ્ટકાર્યા રસપ્રસ્થં ક્ષીરપ્રસ્થસમન્વિતમ્ ।
એતદ્બ્રાહ્મીઘૃતં નામ સ્મૃતિમેધાકરં પરમ્ ॥ ૧,૧૯૨.૩૪ ॥

અગ્નિમન્થો વચા વાસા પિપ્પલી મધુ સૈન્ધવમ્ ।
સપ્તરાત્રપ્રયોગેણ કિન્નરૈરિવ ગીયતે ॥ ૧,૧૯૨.૩૫ ॥

અપામાર્ગઃ ગુડૂચી ચ વચા કુષ્ઠં શતાવરી ।

શઙ્ખપુષ્પાભયા સાજ્યં વિડઙ્ગં ભક્ષિતં સમમ્ ।
ત્રિભિર્દિનૈર્નરં કુર્યાદ્ગ્રન્થાષ્ટશતધારિણમ્ ॥ ૧,૧૯૨.૩૬॥

અદ્ભિર્વા પયસાજ્યેન માસમેકન્તુ સેવિતા ।
વચા કર્યાન્નરં પ્રાજ્ઞં શ્રુતિધારણસંયુતમ્ ॥ ૧,૧૯૨.૩૭॥

ચન્દ્રસૂર્યગ્રહે પીતં પલમેકં પયોઽન્વિતમ્ ।
વચાયાસ્તત્ક્ષણં કુર્યાન્મહાપ્રજ્ઞાયુતં નરમ્ ॥ ૧,૧૯૨.૩૮॥

ભૂનિમ્બનિમ્બત્રિફલાપર્પટૈશ્ચ શ્ૃતં જલમ્ ।
પટોલીમુસ્તકાભ્યાઞ્ચ વાસકેન ચ નાશયેત્ ॥ ૧,૧૯૨.૩૯॥

વિસ્ફોટકાનિ રક્તઞ્ચ નાત્ર કાર્યા વિચારણા ।
કતકસ્ય ફલં શઙ્ખં સૈન્ધવં ત્ર્યૂષણં વચા ॥ ૧,૧૯૨.૪૦॥

ફેની રસાઞ્જનં ક્ષૌદ્રં વિડઙ્ગાનિ મનઃ શિલા ।
એષાં વર્તિર્હન્તિ કાચં તિમિરં પટલં તથા ॥ ૧,૧૯૨.૪૧॥

પ્રસ્થદ્વયં માષકસ્ય ક્વાથશ્ચ દ્રોણમમ્ભસામ્ ।
ચતુર્ભાગાવશેષેણ તૈલપ્રસ્થં વિપાચયેત્ ॥ ૧,૧૯૨.૪૨॥

કાઞ્જિકસ્યાઢકં દત્ત્વા પિષ્ટાન્યેતાનિ દાપયેત્ ।
પુનર્નવા ગોક્ષુરકં સૈન્ધવં ત્ર્યૂષણં વચા ॥ ૧,૧૯૨.૪૩॥

લવણં સુરદારુશ્ચ મઞ્જિષ્ઠા કણ્ટકારિકા ।
નસ્યાત્પાનાદ્ધરત્યેવ કર્ણશૂલં સુદારુણમ્ ॥ ૧,૧૯૨.૪૪॥

બાધિર્યં સર્વરોગાંશ્ચ હ્યભ્યઙ્ગાચ્ચ મહેશ્વર ।
પલદ્વયં સૈન્ધવઞ્ચ શુણ્ઠી ચિત્રકપઞ્ચકમ્ ॥ ૧,૧૯૨.૪૫॥

સૌવીરપઞ્ચપ્રસ્થં ચ તૈલપ્રસ્થં પચેત્તતઃ ।
અસૃગ્દરસ્વરપ્લીહાસર્વવાતવિકારનુત્ ॥ ૧,૧૯૨.૪૬॥

ઉદુમ્બરં વટં પ્લક્ષં જમ્બૂદ્વયમથાર્જુનમ્ ।
પિપ્પલી ચ કદમ્બઞ્ચ પલાશં લોધ્રતિન્દુકમ્ ॥ ૧,૧૯૨.૪૭॥

મધૂકમામ્રસર્જઞ્ચ બદરં પદ્મકેશરમ્ ।
શિરીષબીજકૂતકમેતત્ક્વાથેન સાધિતમ્ ।
તૈલં હન્તિ વ્રણાંલ્લેપાચ્ચિરકાલભવાનપિ ॥ ૧,૧૯૨.૪૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે

દ્વિનવત્યધિક શતતમોऽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૯૩
હરિરુવાચ ।
પલાણ્ડુજીરકે કુષ્ઠમશ્વગન્ધાજમોદકમ્ ।
વચા ત્રિકટુકઞ્ચૈવ લવણં ચૂર્ણમુત્તમમ્ ॥ ૧,૧૯૩.૧॥

બ્રાહ્મીરસૈર્ભાવિતઞ્ચ સર્પિર્મધુસમન્વિતમ્ ।
સપ્તાહં ભક્ષિતં કુર્યાન્નિર્મલાઞ્ચ મતિં પરામ્ ॥ ૧,૧૯૩.૨॥

સિદ્ધાર્થકં વચા હિઙ્ગુ કરઞ્જં દેવદારુ ચ ।
મઞ્જિષ્ઠા ત્રિફલા વિશ્વં શિરીષો રજનીદ્વયમ્ ॥ ૧,૧૯૩.૩॥

પ્રિયઙ્ગુનિમ્બત્રિક્ટુ ગોમૂત્રેણૈવ ઘર્ષિતમ્ ।
નસયમાલેપનઞ્ચૈવ તથા ચોદ્વર્તનં હિતમ્ ॥ ૧,૧૯૩.૪॥

અપસ્મારવિષોન્માદશોષાલક્ષ્મીજ્વરાપહમ્ ।
ભૂતેભ્યશ્ચભયં હન્તિ રાજદ્વારેષુ યોજનાત્ ॥ ૧,૧૯૩.૫॥

નિમ્બં કુષ્ઠં હરિદ્રે દ્વે શિગ્રુ સર્ષપજં તથા ।
દેવદારુ પટોલઞ્ચ ધાન્યં તક્રેણ ઘર્ષિતમ્ ॥ ૧,૧૯૩.૬॥

દેહં તૈલાક્ત ગાત્રં વૈ નયેદુદ્વર્તનેન ચ ।
પામાઃ કુષ્ઠાનિ નશ્યેયુઃ કણ્ડૂં હન્તિ ચ નિશ્ચિતમ્ ॥ ૧,૧૯૩.૭॥

સામુદ્રં સૈન્ધવં ક્ષારો રાજિકા લવણં વિડમ્ ।
કટુલોહરજશ્ચૈવં ત્રિવૃત્સૂરણકં સમમ્ ।
દધિગોમૂત્રપયસા મન્દપાવકપાચિતમ્ ॥ ૧,૧૯૩.૮॥

બલાગ્નિવર્ધકં ચૂર્ણં પિબેદુષ્ણેન વારિણા ।
જીર્ણેऽજીર્ણે તુ ભુઞ્જતિ માંસ્યાદિઘૃતમુત્તમમ્ ॥ ૧,૧૯૩.૯॥

નાભિશૂલં મૂત્રશૂલં ગુલ્મપ્લીહભવઞ્ચ યત્ ।
સર્વશૂલહરં ચૂર્ણં જઠરાનલદીપનમ્ ।
પરિણામસમુત્થસ્ય શૂલસ્ય ચ હિતં પરમ્ ॥ ૧,૧૯૩.૧૦॥

અભયામલકં દ્રાક્ષા પિપ્પલી કણ્ટકારિકા ।
શ ૃઙ્ગી પુનર્નવા શુણ્ઠી જઘ્ધા કાસં નિહન્તિ વૈ ॥ ૧,૧૯૩.૧૧॥

અભયામલકં દ્રાક્ષા પાઠા ચૈવ વિભીતકમ્ ।
શર્કરાયા સમં ચૈવ જગ્ધં જ્વરહરં ભવેત્ ॥ ૧,૧૯૩.૧૨॥

ત્રિફલા બદરં દ્રાક્ષા પિપ્પલી ચ વિરેકકૃત્ ।
હરીતકી સોષ્ણાનીરલવણઞ્ચ વિરેકકૃત્ ॥ ૧,૧૯૩.૧૩॥

કૂર્મમત્સ્યાશ્વમહિષગોશ‍ૃગાલાશ્ચ વાનરાઃ ।
વિડાલબર્હિકાકાશ્ચ વરાહોલૂકકુક્કુટાઃ ॥ ૧,૧૯૩.૧૪॥

હંસ એષાઞ્ચ વિણ્મૂત્રં માંસં વા રોમ શોણિતમ્ ।
ધૂપં દદ્યાજ્જ્વરાર્તેભ્ય ઉન્મત્તેભ્યશ્ચ શાન્તયે ॥ ૧,૧૯૩.૧૫॥

એતાન્યૌષધજાતાનિ કથિતાનિ ઉમાપતે ।
નિઘ્નન્તિ તાશ્ચ રોગાંશ્ચ વૃક્ષમિન્દ્રાશનિર્યથા ॥ ૧,૧૯૩.૧૬॥

ઔષધંભગવાન્વિષ્ણુઃ સંસ્મૃતો રોગનુદ્ભવેત્ ।
ધ્યાતોઽર્ચિતઃ સ્તુતો વાપિ નાત્ર કાર્યા વિચારણા ॥ ૧,૧૯૩.૧૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ત્રિનવત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૪
હરિરુવાચ ।
સર્વવ્યાધિહરં વક્ષ્યે વૈષ્ણવં કવચં શુભમ્ ।
યેન રક્ષા કૃતા શમ્ભોર્દૈત્યાન્ક્ષપયતઃ પુરા ॥ ૧,૧૯૪.૧॥ શમ્ભોર્નાત્ર કાર્યા વિચારણા

પ્રણમ્ય દેવમીશાનમજં નિત્યમનામયમ્ ।
દેવં સર્વેશ્વરં વિષ્ણું સર્વવ્યાપિનમવ્યયમ્ ॥ ૧,૧૯૪.૨॥

બધ્નામ્યહં પ્રતિસરં નમસ્કૃત્ય જનાર્દનમ્ । પ્રતીકારં
અમોઘાપ્રતિમં સર્વં સર્વદુઃખનિવારણમ્ ॥ ૧,૧૯૪.૩॥

વિષ્ણુર્મામગ્રતઃ પાતુ કૃષ્ણો રક્ષતુ પૃષ્ઠતઃ ।
હરિર્મે રક્ષતુ શિરો હૃદયઞ્ચ જનાર્દનઃ ॥ ૧,૧૯૪.૪॥

મનો મમ હૃષીકેશો જિહ્વાં રક્ષતુ કેશવઃ ।
પ્રાતુ નેત્રે વાસુદેવઃ શ્રોત્રે સઙ્કર્ષણો વિભુઃ ॥ ૧,૧૯૪.૫॥

પ્રદ્યુમ્નઃ પાતુ મે ઘ્રાણમનિરુદ્ધસ્તુ ચર્મ ચ ।

વનમાલી ગલસ્યાન્તં શ્રીવત્સો રક્ષતામધઃ ॥ ૧,૧૯૪.૬॥

પાર્શ્વં રક્ષતુ મે ચક્રં વામં દૈત્યનિવારણમ્ ।
દક્ષિણન્તુ ગદાદેવી સર્વાસુરનિવારિણી ॥ ૧,૧૯૪.૭॥

ઉદરં મુસલં પાતુ પૃષ્ઠં મે પાતુ લાઙ્ગલમ્ ।
ઊર્ધ્વં રક્ષતુ મે શાર્ઙ્ગં જઙ્ઘે રક્ષતુ નન્દકઃ ॥ ૧,૧૯૪.૮॥

પાર્ષ્ણી રક્ષતુ શઙ્ખશ્ચ પદ્મં મે ચરણાવુભૌ ।
સર્વકાર્યાર્થસિદ્ધ્યર્થં પાતુ માં ગરુડઃ સદા ॥ ૧,૧૯૪.૯॥

વરાહો રક્ષતુ જલે વિષમેષુ ચ વામનઃ ।
અટવ્યાં નારસિંહશ્ચ સર્વતઃ પાતુ કેશવઃ ॥ ૧,૧૯૪.૧૦॥

હિરણ્યગર્ભો ભગવાન્હિરણ્યં મે પ્રયચ્છતુ ।
સાઙ્ખ્યાચાર્યસ્તુ કપિલો ધાતુસામ્યં કરોતુ મે ॥ ૧,૧૯૪.૧૧॥

શ્વેતદ્વીપનિવાસી ચ શ્વેતદ્વીપં નયત્વજઃ ।
સર્વાન્સૂદયતાં શત્રૂન્મધુકૈટભમર્દનઃ ॥ ૧,૧૯૪.૧૨॥ સૂદનઃ

સદાકર્ષતુ વિષ્ણુશ્ચ કિલ્બિષં મમ વિગ્રહાત્ ।
હંસો મત્સ્યસ્તથા કૂર્મઃ પાતુ માં સર્વતો દિશમ્ ॥ ૧,૧૯૪.૧૩॥

ત્રિવિક્રમસ્તુ મે દેવઃ સર્વપાપાનિ કૃન્તતુ । સર્વપાપાન્નિગૃહ્ણતુ
તથા નારાયણો દેવો બુદ્ધિં પાલયતાં મમ ॥ ૧,૧૯૪.૧૪॥

શેષો મે નિર્મલં જ્ઞાનં કરોત્વજ્ઞાનનાશનમ્ ।
વડવામુખો નાશયતાં કલ્મષં યત્કૃતં મયા ॥ ૧,૧૯૪.૧૫॥

પદ્ભ્યાં દદાતુ પરમં સુખં મૂર્ધ્નિ મમ પ્રભુઃ ।
દત્તાત્રેયઃ પ્રકુરુતાં સપુત્રપશુબાન્ધવમ્ ॥ ૧,૧૯૪.૧૬॥ દત્તાત્રેયઃ કલયતુ
સર્વાનરીન્નાશયતુ રામઃ પરશુના મમ ।
રક્ષોઘ્નસ્તુ દશરથિઃ પાતુ નિત્યં મહાભુજઃ ॥ ૧,૧૯૪.૧૭॥

શત્રૂન્હલેન મે હન્યાદ્રમો યાદવનન્દનઃ ।
પ્રલમ્બકેશિચાણૂરપૂતનાકંસનાશનઃ ।
કૃષ્ણસ્ય યો બાલભાવઃ સ મે કામાન્પ્રયચ્છતુ ॥ ૧,૧૯૪.૧૮॥

અન્ધકારતમોઘોરં પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
પશ્યામિ ભયસન્ત્રસ્તઃ પાશહસ્તમિવાન્તકમ્ ॥ ૧,૧૯૪.૧૯॥

તતોઽહં પુણ્ડરીકાક્ષમચ્યુતં શરણં ગતઃ ।
ધન્યોઽહં નિર્ભયો નિત્યં યસ્ય મે ભગવાન્હરિઃ ॥ ૧,૧૯૪.૨૦॥

ધ્યાત્વા નારાયણં દેવં સર્વોપદ્રવનાશનમ્ ।
વૈષ્ણવં કવચં બદ્ધ્વા વિચરામિ મહીતલે ॥ ૧,૧૯૪.૨૧॥

અપ્રધૃષ્યોઽસ્મિ ભૂતાનાં સર્વદેવમયો હ્યહમ્ ।
સ્મરણાદ્દેવદેવસ્ય વિષ્ણોરમિતતેજસઃ ॥ ૧,૧૯૪.૨૨॥

સિદ્ધિર્ભવતુ મે નિત્યં યથા મન્ત્રમુદાહૃતમ્ ।
યો માં પશ્યતિ ચક્ષુર્ભ્યાં યઞ્ચઃ પશ્યામિ ચક્ષુષા ।
સર્વેષાં પાપદુષ્ટાનાં વિષ્ણુર્બધ્નાતુ ચક્ષુષી ॥ ૧,૧૯૪.૨૩॥

વાસુદેવસ્ય યચ્ચક્રં તસ્ય ચક્રસ્ય યે ત્વરાઃ ।
તે હિ છિન્દન્તુ પાપાન્મે મમ હિંસન્તુ હિંસકાન્ ॥ ૧,૧૯૪.૨૪॥ પાપાનિ

રાક્ષસેષુ પિશાચેષુ કાન્તારેષ્વટવીષુ ચ ।
વિવાદે રાજમાર્ગેષુ દ્યૂતેષુ કલહેષુ ચ ॥ ૧,૧૯૪.૨૫॥

નદીસન્તારણે ઘોરે સમ્પ્રાપ્તે પ્રાણસંશયે ।
અગ્નિચૌરનિપાતેષુ સર્વગ્રહનિવારણે ॥ ૧,૧૯૪.૨૬॥

વિદ્યુત્સર્પવિષોદ્વેગે રોગે વૈ વિઘ્નસઙ્કટે ।
જપ્યમેતજ્જપેન્નિત્યં શરીરે ભયમાગતે ॥ ૧,૧૯૪.૨૭॥

અયં ભગવતો મન્ત્રો મન્ત્રાણાં પરમો મહાન્ ।
વિખ્યાતં કવચં ગુહ્યં સર્પપાપપ્રણાશનમ્ ।
સ્વમાયાકૃતિનિર્માણં કલ્પાન્તગહનં મહત્ ॥ ૧,૧૯૪.૨૮॥

ૐ અનાદ્યન્ત જગદ્બીજ પદ્મનાભ નમોઽસ્તુ તે ।
ૐ કાલાય સ્વાહા । ૐ કાલપુરુષાય સ્વાહા । ૐ કૃષ્ણાય સ્વાહા ।
ૐ કૃષ્ણરૂપાય સ્વાહા । ૐ ચણ્ડાય સ્વાહા । ૐ ચણ્ડરૂપાય સ્વાહા ।
ૐ પ્રચણ્ડાય સ્વાહા । ૐ પ્રચણ્ડરૂપાય સ્વાહા । ૐ સર્વાય સ્વાહા ।
ૐ સર્વરૂપાય સ્વાહા । ૐ નમો ભુવનેશાય ત્રિલોકધાત્રે ઇહ વિટિ
સિવિટિ સિવિટિ સ્વાહા । ૐ નમઃ અયોખેતયે યે યે સંજ્ઞાપય var સંજ્ઞાયાપાત્ર
દૈત્યદાનવયક્ષરાક્ષસભૂતપિશાચકૂષ્માણ્ડાન્તાપસ્મારકચ્છર્દનદુર્ધરાણા-
મેકાહિકદ્વ્યાહિકત્ર્યાહિકચાતુર્થિક મૌહૂર્તિકદિનજ્વરરાત્રિજ્વરસન્ધ્યાજ્વરસર્વજ્વરાદીનાં
લૂતાકીટકણ્ટકપૂતનાભુજઙ્ગસ્થાવરજઙ્ગમવિષાદીનામિદં શરીરં

મમ પથ્યં ત્વં કુરુ સ્ફુટ સ્ફુટ સ્ફુટ પ્રકોટ લફટ
વિકટદંષ્ટ્રઃ પૂર્વતો રક્ષતુ ।
ૐ હૈ હૈ હૈ હૈ દિનકર્સહસ્રકાલસમાહતો જય પશ્ચિમતો રક્ષ ।
ૐ નિવિ નિવિ પ્રદીપ્તજ્વલનજ્વાલાકાર મહાકપિલ ઉત્તરતો રક્ષ ।
ૐ વિલિ વિલિ મિલિ મિલિ ગરુડિ ગરુડિ ગૌરીગાન્ધારીવિષમોહવિષમવિષમાં
મહોહયતુ સ્વાહા દક્ષિણતો રક્ષ ।
માં પશ્ય સર્વભૂતભયોપદ્રવેભ્યો રક્ષ રક્ષ જય જય
વિજય તેન હીયતે રિપુત્રાસાહઙ્કૃતવાદ્યતોભય રુદય વોભયોઽભયં
દિશતુ ચ્યુતઃ તદુદરમખિલં વિશન્તુ
યુગપરિવર્તસહસ્રસઙ્ખ્યેયોઽસ્તમલમિવ પ્રવિશન્તિ રશ્મયઃ ।
વાસુદેવસઙ્કર્ષણપ્રદ્યુમ્નશ્ચાનિરુદ્ધકઃ ।
સર્વજ્વરાન્મમ ઘ્નન્તુ વિષ્ણુર્નારાયણો હરિઃ ॥ ૧,૧૯૪.૨૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વૈષ્ણવકવચકથનં નામ ચતુર્નવત્યુત્તરશતતમોઽધ્યાયઃ ॥

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૫
હરિરુવાચ ।
સલ્વકામપ્રદાં વિદ્યાં સપ્તરાત્રેણ તાં શ‍ૃણુ ।
નમસ્તુભ્યં ભગવતે વાસુદેવાય ધીમહિ ॥ ૧,૧૯૫.૧॥

પ્રદ્યુમ્નાયાનિરુદ્ધાય નમઃ સઙ્ગર્ષણાય ચ ।
નમો વિજ્ઞાનમાત્રાય પરમાનન્દમૂર્તયે ॥ ૧,૧૯૫.૨॥

આત્મારામાય શાન્તાય નિવૃત્તદ્વૈતદૃષ્ટયે ।
ત્વદ્રૂપાણિ ચ સર્વાણિ તસ્માત્તુભ્યં નમો નમઃ ॥ ૧,૧૯૫.૩॥

હૃષીકેશાય મહતે નમસ્તેઽનન્તમૂર્તયે ।
યસ્મિન્નિદં યતશ્ચૈતત્તિષ્ઠત્યગ્રેઽપિ જાયતે ॥ ૧,૧૯૫.૪॥

મૃન્મયીં વહસિ ક્ષોણીં તસ્મૈ તે બ્રહ્મણે નમઃ ।
યન્ન સ્પૃશન્તિ ન વિદુઃ મનોબુદ્ધીન્દ્રિયાસવઃ ।
અન્તર્બહિસ્ત્વં ચરસિ વ્યોમતુલ્યં નમામ્યહમ્ ॥ ૧,૧૯૫.૫॥

ૐ નમો ભગવતે મહાપુરાષાય મહાભૂતપતયે સકલસત્ત્વભાવિવ્રીડનિ-
કરકમલરેણૂત્પલનિભધર્માખ્યવિદ્યયા? ચરણારવિન્દયુગલ પરમેષ્ઠિન્નમસ્તે ।

અવાપ વિદ્યાધરતાં ચિત્રકેતોશ્ચ વિદ્યયા ॥ ૧,૧૯૫.૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પઞ્ચનવત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૬
હરિરુવાચ ।
અવાપ જપ્ત્વા ચેન્દ્રત્વં વિષ્ણુધર્માખ્યવિદ્યયા ।
સર્વાઞ્છત્રૂન્વિનિર્જિત્ય તાઞ્ચ વક્ષ્યે મહેશ્વર ॥ ૧,૧૯૬.૧॥

પાદયોર્જાનુનોરૂર્વોરુદરે હૃદ્યથોરસિ ।
મુખે શિરસ્યાનુપૂર્વમોઙ્કા રાદીનિ વિન્યસેત્ ॥ ૧,૧૯૬.૨॥

નમો નારાયણાયેતિ વિપર્યાસમથાપિ ચ ।
કરન્યાસં તતઃ કુર્યાદ્દ્વાદક્ષરવિદ્યયા ॥ ૧,૧૯૬.૩॥

પ્રણવાદિયકારાન્તમઙ્ગુલ્યં ગુષ્ઠપર્વસુ ।
ન્યસેદ્ધૃદય ઓઙ્કારં મનું મૂર્ધ્નિ સમસ્તકમ્ ॥ ૧,૧૯૬.૪॥

ઓઙ્કારન્તુ ભ્રુવોર્મધ્યે શિકાનેત્રાદિમૂર્ધતઃ ।
ૐ વિષ્ણવે ઇતિ ઇમં મન્ત્રન્યાસમુદીરયેત્ ॥ ૧,૧૯૬.૫॥

આત્માનં પરમં ધ્યાયેચ્છેષં યચ્છક્તિભિર્યુતમ્ ।
મમ રક્ષાં હરિઃ કુર્યાન્મત્સ્યમૂર્તિર્જલેઽવતુ ॥ ૧,૧૯૬.૬॥

ત્રિવિક્રમસ્તથાકાશે સ્થલે રક્ષતુ વામનઃ ।
અટવ્યાં નરસિંહસ્તુ રામો રક્ષતુ પર્વતે ॥ ૧,૧૯૬.૭॥

ભૂમૌ રક્ષતુ વારાહૌ વ્યોમ્નિ નારાયણોઽવતુ ।
કર્મબન્ધાચ્ચ કપિલો દત્તો રોગાચ્ચ રક્ષતુ ॥ ૧,૧૯૬.૮॥

હયગ્રીવો દેવતાભ્યઃ કુમારો મકરધ્વજાત્ ।
નારદોઽન્યાર્ચનાદ્દેવઃ કૂર્મો વૈ નૈરૃતે સદા ॥ ૧,૧૯૬.૯॥

ધન્વન્તીરશ્ચાપથ્યાચ્ચ નાગઃ ક્રોધવશાત્કિલ ।
યજ્ઞો રોગાત્સમસ્તાચ્ચ વ્યાસોઽજ્ઞાનાચ્ચ રક્ષતુ ॥ ૧,૧૯૬.૧૦॥

બુદ્ધઃ પાષણ્ડસંઘાતાત્કલ્કી રક્ષતુ કલ્મષાત્ ।
પાયાન્મધ્યન્દિને વિષ્ણુઃ પ્રાતર્નારાયણોઽવતુ ॥ ૧,૧૯૬.૧૧॥

મધુહા ચાપરાહ્ને ચ સાયં રક્ષતુ માધવઃ ।
હૃષીકેશઃ પ્રદોષેઽવ્યાત્પ્રત્યૂષેઽવ્યાજ્જનાર્દનઃ ॥ ૧,૧૯૬.૧૨॥

શ્રીધરોઽવ્યાદર્ધરાત્રે પદ્મનાભો નિશીથકે ।
ચક્રકૌમોદકીબાણા ઘ્નન્તુ શત્રૂંશ્ચ રાક્ષસાન્ ॥ ૧,૧૯૬.૧૩॥

શઙ્ખઃ પદ્મં ચ શત્રુભ્યઃ શાર્ઙ્ગં વૈ ગરુડસ્તથા ।
બુધ્દીન્દ્રિયમનઃ પ્રાણાન્પાન્તુ પાર્શ્વવિભૂષણઃ ॥ ૧,૧૯૬.૧૪॥

શેષઃ સર્પસ્વરૂપશ્ચ સદા સર્વત્ર પાતુ મામ્ ।
વિદિક્ષુ દિક્ષુ ચ સદા નારસિંહશ્ચ રક્ષતુ ॥ ૧,૧૯૬.૧૫॥

એતદ્ધારયમાણશ્ચ યં યં પશ્યતિ ચક્ષુષા ।
સ વશી સ્યાદ્વિપાપ્મા ચ રોગમુક્તો દિવં વ્રજેત્ ॥ ૧,૧૯૬.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ષણ્ણવત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૭
ધન્વન્તરિરુવાચ ।
ગારુડં સમ્પ્રવક્ષ્યામિ ગરુડેન હ્યુદીરિતમ્ ।
કશ્યપાય સુમિત્રેણ વિષહૃદ્યેન ગારુડઃ ॥ ૧,૧૯૭.૧॥

પૃથિવ્યાપસ્તથા તેજો વાયુરાકાશમેવચ ।
ક્ષિત્યાદિષ્વેવ વર્ગાશ્ચ હ્યેતે વૈ મણ્ડલાધિપાઃ ॥ ૧,૧૯૭.૨॥

પઞ્ચતત્ત્વે સ્થિતા દેવાઃ પ્રાપ્યન્તે વિષ્ણુસેવકૈઃ ।
દીર્ઘસ્વરવિભિન્નાશ્ચ નપુંસકવિવર્જિતાઃ ॥ ૧,૧૯૭.૩॥

સષડઙ્ગઃ શિવઃ પ્રોક્તો હૃચ્છિરશ્ચ શિખા ક્રમાત્ ।
કવચં નેત્રમસ્ત્રં સ્યાન્ન્યાસઃ સ્વસ્થલસંસ્થિતિઃ ॥ ૧,૧૯૭.૪॥

સર્વસિદ્ધિપ્રદસ્યાન્તે કાલવહ્નિર ધોઽનિલઃ ।
ષષ્ઠસ્વરસમાયુક્તમર્ધેન્દુસંયુતં પરમ્ ॥ ૧,૧૯૭.૫॥

પરાપરવિભિન્નાશ્ચ શિવસ્યોર્ધ્વાધ ઈરિતાઃ ।
રેફેણાઙ્ગેષુ સર્વત્ર ન્યાસં કુર્યાદ્યથાવિધિ ॥ ૧,૧૯૭.૬॥

હૃદિ પાણિતલે દેહે કર્ણે નેત્રે કરોતિ ચ ।

જપાત્તુ સર્વસિદ્ધિઃ સ્યાચ્ચતુર્વક્ત્રસમાયુતામ્ ॥ ૧,૧૯૭.૭॥

ચતુરશ્રાં સુવિસ્તારં પીતવર્ણાન્તુ ચિન્તયેત્ ।
પૃથિવીં ચેન્દ્રદેવત્યાં મધ્યે વરુણમણ્ડલમ્ ॥ ૧,૧૯૭.૮॥

મધ્યે પદ્મં તથાયુક્તમર્ધચન્દ્રં સુશીતલમ્ ।
ઇન્દ્રનીલદ્યુતિં સૌમ્યમથવાગ્નેયમણ્ડલમ્ ॥ ૧,૧૯૭.૯॥

ત્રિકોણં સ્વસ્થિકૈર્યુક્તં જ્વાલામા લાનલં સ્મરેત્ ।
ભિન્નાઞ્જનનિભાકારં સ્વવૃત્તં બિન્દુભૂષિતમ્ ॥ ૧,૧૯૭.૧૦॥

ક્ષીરોર્મિસદૃશાકારં શુદ્ધસ્ફટિકવર્ચસમ્ ।
પ્લાવયન્તં જગત્સર્વં વ્યોમામૃતમનુંસ્મરેત્ ॥ ૧,૧૯૭.૧૧॥

વાસુકિઃ શઙ્ખપાલશ્ચ સ્થિતૌ પાર્થિવમણ્ડલે ।
કર્કોટઃ પદ્મનાભશ્ચ વારુણે તૌ વ્યવસ્થિતૌ ॥ ૧,૧૯૭.૧૨॥

આગ્નેયે ચાપિ કુલિકસ્તક્ષશ્ચૈવ મહાબ્જકૌ ।
વાયુમણ્ડલસંસ્થૌ ચ પઞ્ચ ભૂતાનિ વિન્યસેત્ ॥ ૧,૧૯૭.૧૩॥

અઙ્ગુષ્ઠાદિકનિષ્ઠાન્તમનુલોમવિલોમતઃ ।
પર્વસન્ધિષુ ચ ન્યસ્યા જયા ચ વિજયા તથા ॥ ૧,૧૯૭.૧૪॥

આસ્યાદિસ્વપુરસ્થાને ન્યસ્યાચ્છિવપડઙ્ગકમ્ ।
કનિષ્ઠાદૌ હૃદાદૌ ચ શિખાયાં કરયોર્ન્યસેત્ ॥ ૧,૧૯૭.૧૫॥

વ્યાપકન્તુ તત્ત્વપૂર્વં ક્રમાદઙ્ગુલિપર્વસુ ।
ભૂતાનાઞ્ચ પુનર્ન્યાસઃ શિવાઙ્ગાનિ તથૈવ ચ ॥ ૧,૧૯૭.૧૬॥

પ્રણવાદિનમશ્ચાન્તે નામ્નૈવ ચ સમન્વિતઃ ।
સર્વમન્ત્રેષુ કથિતો વિધિઃ સ્થાપનપૂજને ॥ ૧,૧૯૭.૧૭॥

આદ્યાક્ષરં તન્નામ્નશ્ચ મન્ત્રોઽયં પરિકીર્તિતઃ ।
અષ્ટાનાં નાગજાતીનાં મન્ત્રઃ સાન્નિધ્યકારકઃ ॥ ૧,૧૯૭.૧૮॥

ૐ સ્વાહા ક્રમશશ્ચૈવ પઞ્ચભૂતપુરોગતમ્ ।
એષ સાક્ષાદ્ભવેત્તાર્ક્ષ્યઃ સર્વકર્મપ્રસાધકઃ ॥ ૧,૧૯૭.૧૯॥

કરન્યાસં સ્વરૈઃ કૃત્વા શરીરે તુ પુનર્ન્યસેત્ ।
જ્વલન્તં ચિન્તયેત્પ્રાણમાત્મસંશુદ્ધિકારકમ્ ॥ ૧,૧૯૭.૨૦॥

બીજન્તુ ચિન્તયેત્પશ્ચાદ્વર્ષાન્તમમૃતાત્મકમ્ ।
એવઞ્ચાપ્યાયનં કૃત્વા મૂર્ધ્નિ સઞ્ચિન્ત્ય ચાત્મનઃ ॥ ૧,૧૯૭.૨૧॥

પૃથિવીં પાદયોર્દદ્યાત્તપ્તકાઞ્ચનસપ્રભામ્ ।
અશેષભુવનાકીર્ણાં લોકપાલસમન્વિતામ્ ॥ ૧,૧૯૭.૨૨॥

એતાં ભગવતીં પૃથ્વીં સ્વદેહે વિન્યસેદ્બુધઃ ।
શ્યામવર્ણમયં ધ્યાયેત્પૃથિવીદ્વિગુણં ભવેત્ ॥ ૧,૧૯૭.૨૩॥

જ્વાલામાલાકુલં દીપ્તમાબ્રહ્મભુવનાન્તકમ્ ।
નાભિગ્રીવાન્તરે ન્યસ્ય ત્રિકોણં મણ્ડલં રવેઃ ॥ ૧,૧૯૭.૨૪॥

ભિન્નાઞ્જનનિભાકારં નિખિલં વ્યાપ્ય સંસ્થિતમ્ ।
આત્મમૂર્તિસ્થિતં ધ્યાયેદ્વાયવ્યં તીક્ષ્ણમણ્ડલમ્ ॥ ૧,૧૯૭.૨૫॥

સિખોપરિ સ્થિતં દિવ્યં શુદ્ધસ્ફટિકવર્ચસમ્ ।
અપ્રમાણમહાવ્યોમવ્યાપકં ચામૃતોપમમ્ ॥ ૧,૧૯૭.૨૬॥

ભૂતન્યાસં પુરા કૃત્વા નાગાનાઞ્ચ યથાક્રમમ્ ।
લકારાન્તા બિન્દુયુતા મન્ત્રા ભૂતક્રમેણ તુ ॥ ૧,૧૯૭.૨૭॥

શિવબીજં તતો દદ્યાત્તતો ધ્યાયેચ્ચ મણ્ડલમ્ ।
યોયસ્ય ક્રમાખ્યાતો મણ્ડલસ્ય વિચક્ષણઃ ।
તસ્ય તચ્ચિન્તયેદ્વર્ણં કર્મકાલે વિધાનવિત્ ॥ ૧,૧૯૭.૨૮॥

પાદપક્ષૈસ્તથા ચઞ્ચત્કૃષ્ણનાગૈર્વિભૂષિતમ્ ।
તાર્ક્ષ્યં ધ્યાયેત્તતો નિત્યં વિષે સ્થાવરજઙ્ગમે ॥ ૧,૧૯૭.૨૯॥

ગ્રહભૂતપિશાચે ચ ડાકિનીયક્ષરાક્ષસે ।
નાગૈર્વિવેષ્ટિતં કૃત્વા સ્વદેહે વિન્યસેચ્છિવમ્ ॥ ૧,૧૯૭.૩૦॥

દ્વિધા ન્યાસઃ સમાખ્યાતો નાગાનાં ચૈવ ભૂતયોઃ ।
એવં ધ્યાત્વા કર્મ કુર્યાદાત્મતત્ત્વાદિકં ક્રમાત્ ॥ ૧,૧૯૭.૩૧॥

ત્રિતત્ત્વં પ્રથમ્દત્ત્વા સિવતત્ત્વં તતઃ પરમ્ ।
યથા દેહે તથા દેવે અઙ્ગુલીનાં ચ પર્વસુ ॥ ૧,૧૯૭.૩૨॥

દેહે ન્યાસં પુરા કૃત્વા હ્યનુલોમવિલોમતઃ ।
કન્દં નાલં તથા પદ્મં ધર્મં જ્ઞાનાદિમેવ ચ ॥ ૧,૧૯૭.૩૩॥

દ્વિતીયસ્વરસમ્ભિન્નં વર્ગાન્તેન તુ પૂજયેત્ ।

શૌમિતિ કર્ણિકામધ્યે મૂર્ધ્નિ રેફેણ સંયુતમ્ ॥ ૧,૧૯૭.૩૪॥

અકચટતપયશા વર્ગાઃ પૂર્વાદિકે ન્યસેત્ ।
પત્રાન્તકેસરાન્તે તુ દ્વૌ દ્વૌ પૂર્વાદિકૌ તથા ॥ ૧,૧૯૭.૩૫॥

કેશરે તુ સ્વરાન્યસ્યાદીશાન્તાન્ષોડશાર્ચયેત્ ।
વામાદ્યાઃ શક્તયઃ પ્રોક્તાસ્ત્રિતત્ત્વન્તુ તતો ન્યસેત્ ॥ ૧,૧૯૭.૩૬॥

આવાહયેત્તતો મર્ધ્નિ શિવમઙ્ગં તતઃ પરમ્ ।
કર્ણિકાયાં ન્યસેદ્દેવં સાંગં તત્ર પુરઃ સરમ્ ॥ ૧,૧૯૭.૩૭॥

પૃતિવી પશ્ચિમે પત્રે આપશ્ચોત્તરસંસ્થિતાઃ ।
તેજસ્તુ દક્ષિણે પત્રે વાયું પૂર્વેણ પૂજયેત્ ॥ ૧,૧૯૭.૩૮॥

સ્વબીજં મૂર્તિરૂપન્તુ પ્રાગુક્તં પારકલ્પયેત્ ।
યં વાયુમૂલં નૈરૃત્યે રેફસ્ત્વનલસંસ્થિતઃ ॥ ૧,૧૯૭.૩૯॥

વં ચ ત્વીશે સદા પૂજ્ય ૐ હૃદિસ્થઞ્ચ પૂજયેત્ ।
તન્માત્રાન્ભૂતમાત્રાંસ્તાન્બહિરેવ પ્રપૂજયેત્ ॥ ૧,૧૯૭.૪૦॥

શિવાઙ્ગાનિ તતઃ પશ્ચાદ્ધ્યાત્વા સમ્પૂજયેત્તતઃ ।
આગ્નેય્યાં હૃદયં પૂજ્ય શિર ઈશાનગોચરે ॥ ૧,૧૯૭.૪૧॥

નૈરૃત્યે તુ શિખાં દદ્યાદ્વાયવ્યાં કવચં ન્યસેત્ ।
અસ્ત્રન્તુ બાહ્યતો દદ્યાન્નેત્રમુત્તરસંસ્થિતમ્ ॥ ૧,૧૯૭.૪૨॥

પત્રાગ્રે કર્ણિકગ્રે તુ બીજાનિ પરિપૂજયેત્ ।
અનન્તાદિકુલીરાન્તા અષ્ટૌ નાગાઃ ક્રમાત્સ્થિતાઃ ॥ ૧,૧૯૭.૪૩॥

પૂર્વાદિકક્રમેણૈવ ત્વીશપર્યન્તમેવ ચ ।
પૂજયેચ્ચ સદા મન્ત્રી વિધાનેન પૃથક્પૃથક્ ॥ ૧,૧૯૭.૪૪॥

હૃદિ પદ્મે વિધાનેન શિલાદૌ દત્તમણ્ડલે ।
એતત્કાર્યં સમુદ્દિષ્ટં નિત્યનૈમિત્તિકેઽપિ ચ ॥ ૧,૧૯૭.૪૫॥

આત્માનં ચિન્તયેન્નિત્યં કામરૂપં મનોહરમ્ ।
પ્લાવયન્તં જગત્સર્વં સૃષ્ટિસંહારકારકમ્ ॥ ૧,૧૯૭.૪૬॥

જ્વાલામાલાભિરુદ્દીપ્તં આબ્રહ્મભુવનાન્તકમ્ ।
દશબાહું ચતુર્વક્ત્રં પિઙ્ગાક્ષં શૂલપાણિનમ્ ॥ ૧,૧૯૭.૪૭॥

દંષ્ટ્રાકરાલમત્યુગ્રં ત્રિનેત્રં શશિશેખરમ્ ।
ભૈરવન્તુ સ્મરેત્સિદ્ધ્યૈ ગરુડં સર્વકર્મસુ ॥ ૧,૧૯૭.૪૮॥

નાગાનાં નાશનાર્થાય ગરુડં ભીમભીષણમ્ ।
પાદૌ પાતાલં સંસ્થૌ ચ દિશઃ પક્ષાસ્તુ સંશ્રિતાઃ ॥ ૧,૧૯૭.૪૯॥

સપ્ત સ્વર્ગા ઉરસિ ચ બ્રહ્માણ્ડં કણ્ઠમાશ્રિતમ્ ।
પૂર્વાદીશાનપર્યન્તં શિરસ્તસ્ય વિચિન્તયેત્ ॥ ૧,૧૯૭.૫૦॥

સદાશિવશિખાન્તસ્થં શક્તિત્રિતયમેવ ચ ।
પરાત્પરં શિવં સાક્ષાત્તાર્ક્ષ્યં ભુવનનાયકમ્ ॥ ૧,૧૯૭.૫૧॥

ત્રિનેત્રમુગ્રરૂપઞ્ચ વિષનાગક્ષયઙ્કરમ્ ।
ગ્રસનં ભીમવક્ત્રં ચ ગરુડં મન્ત્રવિગ્રહમ્ ॥ ૧,૧૯૭.૫૨॥

કાલાગ્નિમિવ દીપ્તં ચ ચિન્તયેત્સર્વકર્મસુ ।
એવં ન્યાસવિધિં કૃત્વા યદ્યન્મનસિ ચિન્તયેત્ ॥ ૧,૧૯૭.૫૩॥

તત્તદેવ ભવેત્સાધ્યં નરો વૈ ગરુડાયતે ।
પ્રેતા ભૂતાસ્તથા યક્ષા નાગા ગન્ધર્વરાક્ષસાઃ ।
દર્શનાત્તસ્ય નશ્યન્તિ જ્વરાશ્ચાતુર્થિકાદયઃ ॥ ૧,૧૯૭.૫૪॥

ધન્વન્તરિરુવાચ ।
એવં સ ગરુડં પ્રોચે ગરુડઃ કશ્યપાય ચ ।
મહેશ્વરો યથા ગૌરીં પ્રાહ વિદ્યાં તથા શ‍ૃણુ ॥ ૧,૧૯૭.૫૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સપ્તનવત્યધિકશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯૮
ભૈરવ ઉવાચ ।
નિત્યક્લિન્નામથો વક્ષ્યે ત્રિપુરાં ભુક્તિમુક્તિદામ્ ।
ૐ હ્રીં આગચ્છ દેવિ ઐં હ્રીં હ્રીં રેખાકારણમ્ ।
ૐ હ્રીં ક્લેદિની ભં નમઃ મદનક્ષોભિણા તથા ।
ઐ યં યં ક્રીં વા ગુણરેખયા હ્રીં મદનાન્તરે ચ ।
ઐં હ્રીં હ્રીં ચ નિરઞ્જના વાગતિ મદનાન્તરેખે ખનેત્રાવલીતિ ચ ।
વેગવતિ મહાપ્રેતાસનાય ચ પૂજયેત્ ।

ૐ હ્રીં ક્રૈં નૈં ક્રૈં નિત્યં મદદ્રવે ક્રીં નમઃ ।
ઐં હ્રીં ત્રિપુરાયૈ નમઃ ।
ૐ હ્રીં ક્રીં પશ્ચિમવક્ત્રં ૐ ઐં હ્રીં હ્રીં ચ તથોત્તરમ્ ।
ઐં હ્રીં દક્ષિણમૂર્ધ્વવક્ત્રં તુ પશ્ચિમમ્ ।
ૐ હ્રીં પાશાય ક્રીં અઙ્કુશાય ઐં કપાલાય નમઃ ।
આદ્યં ભયં ઐં હ્રીં ચ તથા શિરઃ તથા શિખાયૈ કવચે ।
ઐં હ્રીં ક્રીં અસ્ત્રાયફટ્ ॥ ૧,૧૯૮.૧॥

પૂર્વે કામરૂપાય અસિતાઙ્ગાય ભૈરવાય નમો બ્રહ્માણ્યૈ ।
દક્ષિણે ચૈ કન્દાય વૈ નમઃ રુરુભૈવાય માહેશ્વર્યા વા આવાહયેત્ ॥ ૧,૧૯૮.૨॥

તથા પશ્ચિમે ચણ્ડાય વૈ નમઃ ।
કૌમાર્યૈ ચોત્તરે ચોલ્કાય ક્રોધાય નમઃ વૈષ્ણવ્યૈ ॥ ૧,૧૯૮.૩॥

અગ્નિકોણે અઘોરાયોન્મત્તભૈરવાયેતિ વારાહ્યૈ ।
રક્ષઃ કોણે સારાય કપાલિને ભૈરવાય માહેન્દ્ર્યૈ ॥ ૧,૧૯૮.૪॥

વાયુકોણે જાલન્ધરાય ભીષણાય ભૈરવાય ચામુણ્ડાયૈ ।
ઈશકોણકે વટુકાય સંહારઞ્ચણ્ડિકાઞ્ચ પ્રપૂજયેત્ ॥ ૧,૧૯૮.૫॥

રતિપ્રીતિકામદેવાન્પઞ્ચબાણાન્યજેદથ ।
ધ્યાનાર્ચનાજ્જપ્યહોમાદ્દેવી સિધ્ધા ચ સર્વદા ॥ ૧,૧૯૮.૬॥

નિત્યા ચ ત્રિપુરા વ્યાધિં હન્યાજ્જ્વાલામુખીક્રમાત્ ।
જ્વાલામુખીક્રમં વક્ષ્યે સા પૂજ્યા મધ્યતઃ શુભા ॥ ૧,૧૯૮.૭॥

નિત્યારુણા મદનાતુરા મહામોહા પ્રકૃત્યપિ ।
મહેન્દ્રાણી ચ કલનાકર્ષિણી ભારતી તથા ॥ ૧,૧૯૮.૮॥

બ્રહ્માણી ચૈવ માહેશી કૌમારી વૈષ્ણવી તથા ।
વારાહી ચૈવ માહેન્દ્રી ચામુણ્ડા ચાપરાજિતા ॥ ૧,૧૯૮.૯॥

વિજયા ચાજિતા ચૈવમોહિની ત્વરિતા તથા ।
સ્તમ્ભિની જૃમ્ભિણી પૂજ્યા કાલિકા પદ્મબાહ્યતઃ ।
જ્વાલામુખીક્રમં ચાર્ચેદ્વિષાદિહરણં ભવેત્ ॥ ૧,૧૯૮.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
અષ્ટનવત્યધિકશતતમોધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૯૯

ભૈરવ ઉવાચ ।

અથ ચૂડામણિં વક્ષ્યે શુભાશુભવિશુદ્ધયે ।
સૂર્યં દેવીં ગણં સોમ સ્મૃત્વા તુ વિલિખેન્નરઃ ॥ ૧,૧૯૯.૧॥

ત્રિરેખા ગોમૂર્ત્રિકાભા અથવા પ્રશ્નવાક્યતઃ ।
દિશસ્થાનપ્રસૂતો વા ધ્વજાદીન્ગણયેત્ક્રમાત્ ॥ ૧,૧૯૯.૨॥

ધ્વજો ધૂમોઽથ સિંહશ્ચ શ્વા વૃષઃ ખરદન્તિનૌ ।
ધ્વાઙ્ક્ષશ્ચ અષ્ટમો જ્ઞેયો નામ મન્ત્રૈશ્ચ તાન્ન્યસેત્ ॥ ૧,૧૯૯.૩॥

ધ્વજસ્થાને ધ્વજં દૃષ્ટ્વા રાજ્યચિન્તાધનાદિકમ્ ।
ધ્વજસ્થાને સ્થિતો ધૂમ્રો ધાતુચિન્તા ચ લાભકૃત્ ॥ ૧,૧૯૯.૪॥

ધ્વજસ્થાને સ્થિતે સિંહે ધનલાભાદિકં ભવેત્ ।
સ્થિતે શુનિધ્વજસ્થાને દાસીચિન્તાસુખાદિકમ્ ॥ ૧,૧૯૯.૫॥

ધ્વજસ્થાને વૃષં દૃષ્ટ્વા સ્થાનચિન્તા ચ લાભકમ્ ।
ધ્વજસ્થાને ખરં દૃષ્ટ્વા દુઃખક્લેશાદિકં ભવેત્ ॥ ૧,૧૯૯.૬॥

ધ્વજસ્થાને ગજં દૃષ્ટ્વા સ્થાનચિન્તાજયાદિકમ્ ।
ધ્વજસ્થાને તથા ધ્વાઙ્ક્ષે ક્લેશચિન્તા ધનક્ષયઃ ॥ ૧,૧૯૯.૭॥

ધૂમ્રસ્થાને ધ્વજં દૃષ્ટ્વા પૂર્વં દુઃખં તતો ધનમ્ ।
ધૂમ્રે ધૂમ્રં તથા દૃષ્ટ્વા કલિદુઃખાદિકં ભવેત્ ॥ ૧,૧૯૯.૮॥

ધૂમ્રસ્થાને સ્થિતે સિંહે મનશ્ચિન્તાધનાદિકમ્ ।
ધૂમ્રસ્થાને શુનિ સ્થિતે જયલાભાદિકં ભવેત્ ॥ ૧,૧૯૯.૯॥

ધૂમ્રસ્થાને વૃષં દૃષ્ટ્વા નારીગોઽશ્વધનાદિકમ્ ।
ધૂમ્રસ્થાને ખરં દૃષ્ટ્વા વ્યાધિશ્ચાપિ ધનક્ષયઃ ॥ ૧,૧૯૯.૧૦॥

ધૂમ્રસ્થાને ગજે દૃષ્ટે રાજ્યલાભજયાદિકમ્ ।
ધૂમ્રસ્થાને સ્થિતે ધ્વાઙ્ક્ષે ધનરાજ્યવિનાશનમ્ ॥ ૧,૧૯૯.૧૧॥

સિંહસ્થાને ધ્વજં દૃષ્ટ્વા રાજ્યલાભાદિ નિર્દિશેત્ ।
સિંહસ્થાને સ્થિતે ધૂમ્રે કન્યાપ્રાપ્તિર્ધનાદિકમ્ ॥ ૧,૧૯૯.૧૨॥

સિંહસ્થાને સ્થિતે સિંહે જયો મિત્રસમાગમઃ ।

કૌલેયકે સિંહગતે સ્ત્રીચિન્તા ગ્રામલાભકમ્ ॥ ૧,૧૯૯.૧૩॥

સિંહ સ્થાને વૃષં દૃષ્ટ્વા ગૃહક્ષેત્રાર્થલાભકમ્ ।
સિંહસ્થાને ગજં દૃષ્ટ્વા ગ્રામસ્વામિત્વમેવ ચ ॥ ૧,૧૯૯.૧૪॥

સિંહસ્થાને ગજં દૃષ્ટ્વા આરોગ્યાયુઃ સુખાદિકમ્ ।
સિંહસ્થાનેસ્થિતે ધ્વાઙ્ક્ષે કન્યાધાન્યગુણાદિકમ્ ॥ ૧,૧૯૯.૧૫॥

શુનઃ સ્થાને ધ્વજં દૃષ્ટ્વા સ્થાનચિન્તાસુખાદિકમ્ ।
શુનઃ સ્થાને સ્થિતે ધૂમ્રે કલહં કાર્યનાશનમ્ ॥ ૧,૧૯૯.૧૬॥

શુનઃ સ્થાન સ્થિતે સિંહે કાર્યાસિદ્ધિર્ભવિષ્યતિ ।
સ્થિતે શુનિ શુનઃ સ્થાને ધનનાશો ભવિષ્યતિ ॥ ૧,૧૯૯.૧૭॥

શુનઃ સ્થાને વૃષં દૃષ્ટ્વા રોગી રોગાદ્વિ મુચ્યતે ।
શુનઃ સ્થાને ખરં દૃષ્ટ્વા કલહસ્ય ભયં ભવેત્ ॥ ૧,૧૯૯.૧૮॥

શુનઃ સ્થાને ગજં દૃષ્ટ્વા પુત્રભાર્યાસમાગમઃ ।
શ્વસ્થાને ચ સ્થિતે ધ્વાઙ્ક્ષે પીડાસ્યાત્કુલનાશનમ્ ॥ ૧,૧૯૯.૧૯॥

વૃષસ્થાને ધ્વજં દૃષ્ટ્વા રાજપૂજાસુખાદિકમ્ ।
વૃષસ્થાને સ્થિતે ધૂમ્રે રાજપૂજાસુખાદિકમ્ ॥ ૧,૧૯૯.૨૦॥

વૃષસ્થાને સ્થિતે સિંહે સૌભાગ્યઞ્ચ ધનાદિકમ્ ।
સ્થિતે શુનિ વૃષસ્થાને બલશ્રીકામ ઈરિતઃ ॥ ૧,૧૯૯.૨૧॥

વૃષસ્થાને વૃષં દૃષ્ટ્વા કીર્તિતુષ્ટિસુખાદિકમ્ ।
વૃષસ્થાને ખરં દૃષ્ટ્વા મહાલાભાદિકં ભવેત્ ॥ ૧,૧૯૯.૨૨॥

વૃષસ્થાને ગજં દૃષ્ટ્વા સ્ત્રીગજાદિસમાગમઃ ।
વૃષસ્થાને સ્થિતે ધ્વાઙ્ક્ષે સ્થાનમાનસમાગમઃ ॥ ૧,૧૯૯.૨૩॥

ખરસ્થાને ધ્વજં દૃષ્ટ્વા રોગશોકાદિકં ભવેત્ ।
ખરસ્થાને સ્થિતે ધૂમ્રે તસ્કરાદિભયં ભવેત્ ॥ ૧,૧૯૯.૨૪॥

ખરસ્થાને સ્થિતે સિંહે પૂજાશ્રીવિજયાદિકમ્ ।
સ્થિતે શુનિખરસ્થાને સન્તાપધનનાશનમ્ ॥ ૧,૧૯૯.૨૫॥

ખરસ્થાને વૃષં દૃષ્ટ્વા સુખં પ્રિયસમાગમઃ ।
ખરસ્થાને ખરં દૃષ્ટ્વા દુઃખીપીડાદિ નિર્દિશેત્ ॥ ૧,૧૯૯.૨૬॥

ખરસ્થાને ગજં દૃષ્ટ્વા સુખપુત્રાદિકં ભવેત્ ।
ખરસ્થાને સ્થિતે ધ્વાઙ્ક્ષે કલહો વ્યાધિરેવ ચ ॥ ૧,૧૯૯.૨૭॥

ગજસ્થાને ધ્વજં દૃષ્ટ્વા સ્ત્રીજયશ્રીસુખાદિકમ્ ।
ગજસ્થાનેસ્થિતે ધૂમ્રે ધનધાન્યસમાગમઃ ॥ ૧,૧૯૯.૨૮॥

ગજસ્થાને સ્થિતે સિંહે જયસિદ્ધિસમાગમઃ ।
સ્થિતે શુનિ ગજસ્થાને આરોગ્યં સુખસમ્પદઃ ॥ ૧,૧૯૯.૨૯॥

ગજસ્થાને વૃષં દૃષ્ટ્વા રાજમાનધનાદિકમ્ ।
ગજસ્થાને ખરં દૃષ્ટ્વા પૂર્વં દુઃખં તતઃ સુખમ્ ॥ ૧,૧૯૯.૩૦॥

ગજસ્થાને ગજં દૃષ્ટ્વા ક્ષેત્રધાન્યસુખાદિકમ્ ।
ગજસ્થાનેસ્થિતે ધ્વાઙ્ક્ષે ધનધાન્યસમાગમઃ ॥ ૧,૧૯૯.૩૧॥

ધ્વાઙ્ક્ષસ્થાને ધ્વજં દૃષ્ટ્વા કાર્યનાશો ભવિષ્યતિ ।
ધ્વાઙ્ક્ષસ્થાને સ્થિતે ધૂમ્રે કલિદુઃખં ગમિષ્યતિ ॥ ૧,૧૯૯.૩૨॥

ધ્વાઙ્ક્ષસ્થાને સ્થિતે સિંહે વિગ્રહો દુઃખમેવ ચ ।
ધ્વાઙ્ક્ષસ્થાને સ્થિતે શ્વાને ગૃહભઙ્ગભયાદિકમ્ ॥ ૧,૧૯૯.૩૩॥

ધ્વાઙ્ક્ષસ્થાને વૃષં દૃષ્ટ્વા સ્થાનભ્રંશભયાદિકમ્ ।
ધ્વાઙ્ક્ષસ્થાને ખરં દૃષ્ટ્વા ધનનાશપરાજયૌ ॥ ૧,૧૯૯.૩૪॥

ધ્વાઙ્ક્ષસ્થાને ગજં દૃષ્ટ્વા ધનકીર્ત્યાદિકં ભવેત્ ।
ધ્વાઙ્ક્ષસ્થાને સ્થિતે ધ્વાઙ્ક્ષે વિદેશગમનાદિકમ્ ॥ ૧,૧૯૯.૩૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નવનવત્યધિકશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૦
ભૈરવ ઉવાચ ।
વક્ષ્યે વાયુજયં દેવિ જયા જયવિદેશકમ્ ।
વાય્વગ્નિજલશક્રાખ્યં મઙ્ગલાનાઞ્ચતુષ્ટયમ્ ॥ ૧,૨૦૦.૧॥

વામદક્ષિણસંસ્થશ્ચ વાયુશ્ચ બહુલો ભવેત્ ।
ઊર્ધ્વવાહી ભવેદગ્નિરધસ્તુ વરુણો ભવેત્ ॥ ૧,૨૦૦.૨॥

મહેન્દ્રો મધ્યસંસ્થસ્તુ શુક્લપક્ષે તુ વામગઃ ।

કૃષ્ણપક્ષે દક્ષિણગ ઉદયસ્ય ત્ર્યહન્ત્ર્યહમ્ ॥ ૧,૨૦૦.૩॥

વહેત્પ્રતિપદાદ્યે ચ વિપરીતે ભવેન્નતિઃ ।
ઉદયઃ સૂર્યમાર્ગેણ ચન્દ્રેણાસ્તમયો યદિ ॥ ૧,૨૦૦.૪॥

વર્ધન્તે ગુણસંઘાતા અન્યથા વિઘ્નમૌચિતમ્ ।
સંક્રાન્ત્યઃ ષોડશપ્રોક્તા દિવા રાત્રૌ વરાનને ॥ ૧,૨૦૦.૫॥

યદા ચ સંક્રમેદ્વાયુરર્ધાર્ધપ્રહરે સ્થિતઃ ।
સ્વાસ્થ્યાહાનિસ્તદા જ્ઞેયા વાયુર્ભ્રમતિ દેહિષુ ॥ ૧,૨૦૦.૬॥

દક્ષિણે ચ પુટે વાયુર્હિતો ભોજનમૈથુને ।
ખડ્ગહસ્તો જયેદ્યુદ્ધે રિપૂન્કામસમન્વિતઃ ॥ ૧,૨૦૦.૭॥

વામેવ ગમનં શ્રેષ્ઠં સર્વકાર્યેષુ ભૂષિતમ્ ।
વાયુર્વહતિ તત્રસ્થઃ પ્રશ્નો ભૂતસ્ય શોભનઃ ॥ ૧,૨૦૦.૮॥

માહેન્દ્રે વારુણે વાતે કોઽપિ દોષો ન જાયતે ।
અનાવૃષ્ટિર્દક્ષવાહે વૃષ્ટિઃ સ્યાદ્વામવાહકે ॥ ૧,૨૦૦.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૧
ધન્વન્તરિરુવાચ ।
હયાયુર્વેદમાખ્યાસ્યે હયં સર્વાર્થલક્ષણમ્ ।
કાકતુણ્ડઃ કૃષ્ણજિહ્વો વૃક્ષાસ્યશ્ચોષ્ણતાલુકઃ ॥ ૧,૨૦૧.૧॥

કરાલો હીનદન્તશ્ચ શ‍ૃઙ્ગી વિરલદન્તકઃ ।
એકાણ્ડશ્ચૈવ જાતાણ્ડઃ કઞ્ચુકી દ્વિખુરી સ્તની ॥ ૧,૨૦૧.૨॥

માર્જારપાદો વ્યાઘ્રાભઃ કુષ્ઠવિદ્રધિસન્નિભઃ ।
યમજો વામનશ્ચૈવ માર્જારઃ કપિલોચનઃ ॥ ૧,૨૦૧.૩॥

એતદ્દોષી હયસ્ત્યાજ્ય ઉત્તમોઽશ્વસ્તુરુષ્કજઃ ।
મધ્યમઃ પઞ્ચહસ્તશ્ચ કનીયાંશ્ચ ત્રિહસ્તકઃ ॥ ૧,૨૦૧.૪॥

અસંહતા યે ચ વાહા હ્રસ્વકર્ણાસ્તથૈવ ચ ।
શબલાભાઃ પ્રભાવેષુ ન દીનાશ્ચિરજીવિનઃ ॥ ૧,૨૦૧.૫॥

રેવન્તપૂજનાદ્ધોમાદ્રક્ષ્યાશ્ચ દ્વિજભાજેનાત્ ।
સરલં નિમ્બપત્રાણિ ગુગ્ગુલં સર્ષપાન્ઘૃતમ્? ॥ ૧,૨૦૧.૬॥

તિલઞ્ચૈવ વચાં હિગું બધ્નીયાદ્વાજિનો ગલે ।
આગન્તુજં દોષજન્તુ વ્રણં દ્વિવિધમીરિતમ્ ॥ ૧,૨૦૧.૭॥

ચિરપાકં વાતજન્તુ શ્લેષ્મજં ક્ષિપ્રપાકકમ્? ।
કણ્ઠદાહાત્મકં પિત્તાચ્છોણિતાન્મન્દવેદનમ્ ॥ ૧,૨૦૧.૮॥

આગન્તુજન્તુ શસ્ત્રાદ્યૈર્દુષ્ટવ્રણવિશોધનમ્ ।
એરણ્ડમૂલં દ્વિનિશં ચિત્રકં વિશ્વભેષજમ્ ॥ ૧,૨૦૧.૯॥

રસોનં સૈન્ધવં વાપિ તક્રકાઞ્જિકપોષિતમ્ ।
તિલસક્તુકપિણ્ડિકા દધિયુક્તા સસૈન્ધવા ।
નિમ્બપત્રયુતં પિણ્ડં વ્રણશોધનરોપણમ્ ॥ ૧,૨૦૧.૧૦॥

પટોલં નિમ્બપત્રઞ્ચ વચા ચિત્રકમેવ ચ ।
પિપ્પલીશ◌ૃઙ્ગવેરઞ્ચ ચૂર્ણમેકત્ર કારયેત્ ॥ ૧,૨૦૧.૧૧॥

એતત્પાનાત્ક્રિમિશ્લેષ્મમન્દાનિલવિનાશનમ્ ।
નિમ્બપત્રં પટો લઞ્ચ ત્રિફલા ખદિરં તથા ॥ ૧,૨૦૧.૧૨॥

ક્વાથયિત્વા તતો વાહં સૃતરક્તં વિચક્ષણઃ ।
ત્ર્યહમેવ પ્રિદાતવ્યં હયકુષ્ઠોપશાન્તયે ॥ ૧,૨૦૧.૧૩॥

સવ્રણેષુ ચ કુષ્ઠેષુ તૈલં સર્ષપજં હિતમ્ ।
લશુનાદિકષાયશ્ચ પાનભુક્ત્યુપશાન્તયે ॥ ૧,૨૦૧.૧૪॥

માતુલુઙ્ગરસોપેતં માંસીનાં રસકેન વા ।
સદ્યો દદ્યાત્તત્ર નસ્યમન્યૈર્વાતૈઃ સુસંયુતૈઃ ॥ ૧,૨૦૧.૧૫॥

પલદ્વયં પ્રથમેઽહ્નિ એકૈકપલવૃદ્ધિતઃ ।
યાવદ્દિનાનિ પૂર્ણાનિ પલાન્યષ્ટાદશોત્તમે ॥ ૧,૨૦૧.૧૬॥

અધમેઽષ્ટપલાનિ સ્યુર્મધ્યમે સ્યુશ્ચતુર્દશ ।
શરન્નિદાઘયોર્નૈવદેયં નૈવ તુ દાપયેત્ ॥ ૧,૨૦૧.૧૭॥

તૈલેન વાતિકે રોગે શર્કરાજ્યપયોન્વિતૈઃ ।
કટુતૈલૈઃ કફે વ્યોષૈઃ પિત્તે ચત્રિફલામ્બુભિઃ ॥ ૧,૨૦૧.૧૮॥

શાલિષષ્ટિકદુગ્ધાશી હયો હિન જુગુપ્સિતઃ ।

પક્વજમ્બૂનિભો હેમવર્ણોઽશ્વો ન જુગુપ્સિતઃ ॥ ૧,૨૦૧.૧૯॥

અર્ધપ્રહરણે ધુર્યે ગુગ્ગુલું પ્રાશયેદ્ધયમ્ ।
ભોજયેત્પાયસં દુગ્ધં સત્વરં સુસ્થિરો હયઃ ॥ ૧,૨૦૧.૨૦॥

વિકારે ભોજને દુગ્ધં શાલ્યન્નં વાતલે દદેત્ ।
કર્ષમાંસરસૈઃ પિત્તે મધુમુદ્ગરસાજ્યકૈઃ ॥ ૧,૨૦૧.૨૧॥

કફે મુદ્ગાન્કુલત્થાન્વા કટુતિક્તાન્કફે હયે ।
બાધિર્યે વ્યાધિતે ગ્રાસે ત્રિદોષાદૌ તુ ગુગ્ગુલુઃ ॥ ૧,૨૦૧.૨૨॥

ઘાસૈર્દૂર્વા સર્વરોગે પ્રથમેઽહ્નિ પલં દદેત્ ।
વિવર્ધયેત્તતઃ કર્ષમેકાહ્નિ પલપઞ્ચકમ્ ॥ ૧,૨૦૧.૨૩॥

પાને ચ ભોજને ચૈવ અશીતિપલકં પરમ્ ।
મધ્યે ષષ્ટિશ્ચાધમેષુ ચત્વારિંશચ્ચ ભોગિષુ ॥ ૧,૨૦૧.૨૪॥

વ્રણે કુષ્ટેષુ ખઞ્જેષુ ત્રિફલાક્વાથસંયુતમ્ ।
મન્દાગ્નૌ શોથરોગે ચ ગવાં મૂત્રેણ યોજિતમ્ ॥ ૧,૨૦૧.૨૫॥

વાતપિત્તે વ્રણે વ્યાધૌ ગોક્ષીરં ઘૃતસંયુતમ્ ।
દેયં કૃશાનાં પુષ્ટ્યર્થં માંસૈર્યુક્તં ચ ભોજનમ્ ॥ ૧,૨૦૧.૨૬॥

સુપિષ્ટાયાઃ પ્રદાતવ્યં ગુડૂચ્યાઃ પલપઞ્ચકમ્ ।
પ્રભાતે ઘૃતસંયુક્તં શરદ્ગ્રીષ્મે ચ વાજિનામ્ ॥ ૧,૨૦૧.૨૭॥

રોગઘ્નં પુષ્ટિદં ચાપિ બલતેજોવિવર્ધનમ્ ।
તદેવાશ્વાયદાતવ્યં ક્ષીરયુક્તમથાપિ વા ॥ ૧,૨૦૧.૨૮॥

ગુડૂચીકલ્પયોગેન શતાવર્યશ્વગન્ધયોઃ ।
ચત્વારિ ત્રીણિ મધ્યસ્ય જઘન્યસ્ય પલાનિ હિ ॥ ૧,૨૦૧.૨૯॥

અકસ્માદ્યત્ર વાહાનામેકરૂપં યદા ભવેત્ ।
મ્રિયતે ચ યદા ક્ષિપ્રમુપસર્ગં તમાદિશેત્ ॥ ૧,૨૦૧.૩૦॥

હોમાદ્યૈ રક્ષયા વિપ્રભોજનૈર્બલિકર્મણા ।
શાન્ત્યોપસર્ગશાન્તિઃ સ્યાદ્ધરીતક્યાદિકલ્પતઃ ॥ ૧,૨૦૧.૩૧॥

હરીતકી ગવાં મૂત્રૈસ્તૈલેન લવણાન્વિતા ।
આદૌ પઞ્ચ તતઃ પઞ્ચ વૃદ્ધ્યા પૂર્ણશતાવધિ ।
ઉત્તમા ચ શતં માત્રાસ્ત્વશીતિઃ ષષ્ટિરેવ વા ॥ ૧,૨૦૧.૩૨॥

ગજાયુર્વેદમાખ્યાસ્યે ઉક્તાઃ કલ્પા ગજે હિતાઃ ।
ગજે ચતુર્ગુણા માત્રાસ્તાભિર્ગજરુગર્દનઃ ॥ ૧,૨૦૧.૩૩ ॥

ગજો પસર્ગવ્યાધીનાં શમનં શાન્તિકર્મ ચ ।
પૂજયિત્વા સુરાન્વિપ્રાન્નૈર્ગાં કપિલાં દદેત્ ॥ ૧,૨૦૧.૩૪ ॥

દન્તિદન્તદ્વયે માલાં નિબન્ધીયાદુપોષિતઃ ।
મન્ત્રેણ મન્ત્રિતાન્વૈર્ધૈર્વચાસિદ્ધાર્થકાંસ્તથા ॥ ૧,૨૦૧.૩૫ ॥

સૂર્યાદિશિવદુર્ગાશ્રીવિષ્ણ્વર્ચા રક્ષયેદ્ગજમ્ ।
બલિં દદ્યાચ્ચ ભૂતેભ્યઃ સ્નાપયેચ્ચ ચતુર્ઘટૈઃ ॥ ૧,૨૦૧.૩૬ ॥

ભોજનં મન્ત્રિતં દદ્યાદ્ભસ્મનોદ્ધૂનયેદ્ગજમમ્ ।
ભૂતરક્ષા શુભા મેધ્યા વારણં રક્ષયેત્સદા ॥ ૧,૨૦૧.૩૭ ॥

ત્રિફલાપઞ્ચકોલે ચ દશમૂલં વિડઙ્ગકમ્ ।
શતાવરીગુડૂચી ચ નિમ્બવાસકકિંશુકાઃ ॥ ૧,૨૦૧.૩૮ ॥

ગજરોગવિનાશાય હિતો રૂક્ષઃ કષાયકઃ ।
આયુર્વેદદ્વયોક્તાનામુક્તં સંક્ષેપસારતઃ ॥ ૧,૨૦૧.૩૯ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ગજાશ્વાયુર્વેદનિરૂપણં નામૈકાધિકદ્વિશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૦૨

હરિરુવાચ ।
એકં પુનર્નવામૂલમપામાર્ગસ્ય વા શિવ ।
સરસં યોનિનિઃ ક્ષિપ્તં વરાઙ્ગસ્ય વ્યથાં હરેત્ ।
પ્રસૂતિવેદનાઞ્ચૈવ તરુણીનાં વ્યથાં હરેત્ ॥ ૧,૨૦૨.૧ ॥

ભૂમિ કૂષ્માણ્ડમૂલં વૈ શાલિચૂર્ણમથાપિ વા ।
સપ્તાહં દુગ્ધપીતં સ્યાત્સ્ત્રીણાં બહુપયસ્કરમ્ ॥ ૧,૨૦૨.૨ ॥

રુદ્રેન્દ્રવારુણીમુલં લેપાત્સ્ત્રીસ્તનવેદના ।
નશ્યેત ધૃતપક્વા ચ કાર્યાવશ્યન્તુ પોલિકા ॥ ૧,૨૦૨.૩ ॥

ભક્ષિતા સા મહેશાન યોનિશૂલં વિનાશયેત્ ।

પ્રલેપિતા કારવેલ્લમૂલેનૈવ વિનિર્ગતા ॥ ૧,૨૦૨.૪॥

યોનિઃ પ્રવેશમાયાતિ નાત્ર કાર્યા વિચારણા ।
નીલીપટોલમૂલાનિ સાજ્યાનિ તિલવારિણા ॥ ૧,૨૦૨.૫॥

પિષ્ટાન્યેષાં પ્રલેપો વૈ જ્વાલાગર્દભરાગનત્ ।
પાઠામૂલં રુદ્ર પીતં પિષ્ટં તણ્ડુલવારિણા ॥ ૧,૨૦૨.૬॥

પાપરોગહરં સ્યાચ્ચ કુષ્ઠપાનં તથૈવ ચ ।
વાસ્યોદકઞ્ચ સમધુ પીતમન્તર્ગતસ્ય વૈ ॥ ૧,૨૦૨.૭॥

પાપરોગસ્ય સન્તાપનિવૃક્તિં કુરુતે શિવ ।
ઘૃતતુલ્યા રુદ્ર લાક્ષા પીતા ક્ષીરેણ વૈ સહ ॥ ૧,૨૦૨.૮॥

પ્રદરં હરતે રોગં નાત્ર કાર્યા વિચારણા ।
દ્વિજયષ્ટી ત્રિકટુકં ચૂર્ણં પીતં હરેચ્છિવ ॥ ૧,૨૦૨.૯॥

તિલક્વાથેન સંયુક્તં રક્તગુલ્મં સ્ત્રિયા હર ।
કુસુમસ્ય નિબદ્ધઞ્ચ તરુણીનાં મહેશ્વર ॥ ૧,૨૦૨.૧૦॥

રક્તોત્પલસ્ય વૈ કન્દં-શર્કરાતિલસંયુતમ્ ।
પીતં સશર્કરં સ્ત્રીણાં ધારયેદ્ગર્ભપાતનમ્ ॥ ૧,૨૦૨.૧૧॥

રક્તસ્ત્રાવસ્ય નાશઃ સ્યાચ્છીતોદકનિષેવણાત્ ।
પીતન્તુ કાઞ્જિક રુદ્ર ક્વથિતં શરપુઙ્ખયા ॥ ૧,૨૦૨.૧૨॥

હિઙ્ગુસ્ત્રૈન્ધવસંયુક્તં શીઘ્રં સ્ત્રીણાં પ્રસૂતિકૃત્ ।
માતુલુઙ્ગસ્ય વૈ મૂલં કટિબદ્ધં પ્રસૂતિકૃત્ ॥ ૧,૨૦૨.૧૩॥

અપામાર્ગસ્ય વૈ મૂલે ગર્ભવત્યાસ્તુ નામતઃ ।
ઉત્પાટ્યમાને સકલે પુત્રઃ સ્યાદાન્યથા સુતા ॥ ૧,૨૦૨.૧૪॥

અપામાર્ગસ્ય વૈ મૂલે નારીણાં શિરસિ સ્થિતે ।
ગર્ભશૂલં વિનશ્યેત નાત્ર કાર્યા વિચારણા ॥ ૧,૨૦૨.૧૫॥

કર્પૂર-મદનફલ-મધુકૈઃ પૂરિતઃ શિવ ।
યોનિઃ સુભા સ્યાદ્વૃદ્ધાયા યુવત્યાઃ કિં પુનર્હર ॥ ૧,૨૦૨.૧૬॥

યસ્ય બાલસ્ય તિલકઃ કૃતો ગૌરોચનાખ્યયા ।
શર્કરા-કુષ્ઠપાનઞ્ચ દત્તં સ સ્યાચ્ચ નિર્ભયઃ ।
વિષ-ભૂત-ગ્રહાદિભ્યો વ્યાધિભ્યો બાલકઃ શિવ ॥ ૧,૨૦૨.૧૭॥

શઙ્ખ-નાભિ-વચા-કુષ્ઠ-લોહાનાં ધારણં સદા ।
બાલાનામુપસર્ગેભ્યો રુદ્ર રક્ષાકરં ભવેત્ ॥ ૧,૨૦૨.૧૮॥

પલાશચૂર્ણં સમધુ ગવ્યાજ્યામલકાન્વિતમ્ ।
સવિડઙ્ગં પીતમાત્રં નરં કુર્યાન્મહામતિમ્ ॥ ૧,૨૦૨.૧૯॥

માસૈકેન મહાદેવ જરા-મરણવર્જિતઃ ॥ ૧,૨૦૨.૨૦॥

પલાશબીજં સઘૃતં તિલ-મધ્વન્વિતં સમમ્ ।
સપ્તાહં ભક્ષિતં રુદ્ર જરાં નયતિ સંક્ષયમ્ ॥ ૧,૨૦૨.૨૧॥

રુદ્રામલકચૂર્ણં વૈ મધુ-તૈલ ઘૃતાન્વિતમ્ ।
જગ્ધ્વા માસં યુવા સ્યાચ્ચ નરો વાગીશ્વરી ભવેત્ ॥ ૧,૨૦૨.૨૨॥

શિવામલકચૂર્ણં વૈ મધુના ઉદકેન વા ।
બલાનિ કુર્યાન્નાસાયાઃ પ્રત્યૂષે ભક્ષિતં શિવ ॥ ૧,૨૦૨.૨૩॥

કુષ્ઠચૂર્ણં સાજ્ય-મધુ પ્રાતર્જગ્ધ્વા ભવેન્નરઃ ।
સાક્ષાત્સુરભિદેહો વૈ જીવેદ્વર્ષસહસ્રકમ્ ॥ ૧,૨૦૨.૨૪॥

માષસ્ય વિદલાન્યે વિતુષાણિ મહેશ્વર ।
ઘૃતભાવિતશુષ્કાણિ પયસા સાધિતાનિ વૈ ॥ ૧,૨૦૨.૨૫॥

સમાધ્વાજ્યપયોભિશ્ચ ભક્ષયિત્વા ચ કામયેત્ ।
સ્ત્રીણાં શતં મહાદેવ તત્ક્ષણાન્નાત્ર સંશયઃ ॥ ૧,૨૦૨.૨૬॥

રસશ્ચૈરણ્ડતૈલેન ગન્ધકેન શુભો ભવેત્ ।
ત્રિકાલોદકસંઘુષ્ટો બલકૃદ્ભક્ષણાદ્ભવેત્ ॥ ૧,૨૦૨.૨૭॥

દુગ્ધં વિતુષમાષૈશ્ચ શિમ્બાબીજૈશ્ચ સાધિતમ્ ।
અપામાર્ગસ્ય તૈલેન પીતં સ્ત્રીશતકામકૃત્ ॥ ૧,૨૦૨.૨૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નાનાવિધોષધપ્રયોગાનિરૂપણં નામ દ્વ્યુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૩

હરિરુવાચ ।

યા ગૌર્દ્રષ્ટિં સ્વકં વત્સં તસ્યા દેયં સ્વકં પયઃ ।

લવણેન સમાયુક્તં તસ્યા વત્સઃ પ્રિયો ભવેત્ ॥ ૧,૨૦૩.૧॥

શુનોઽસ્થિ કણ્ઠબદ્ધં હિ મહિષાણાં ગવા તથા ।
કૃમિજાલં પાતયતિ સકલં નાત્ર સંશયઃ ॥ ૧,૨૦૩.૨॥

ગોજઙ્ગનાભિપાતઃ સ્યાદ્ગુઞ્જામૂલસ્ય ભક્ષણાત્ ॥ ૧,૨૦૩.૩॥

વરુણફલસ્યરસં કરેણ મથિતં શિવ ।
ચતુષ્પાદ-દ્વિપદયોઃ કૃમિજાલં નિપાતયેત્ ॥ ૧,૨૦૩.૪॥

વ્રણઞ્ચ શમયેદ્રુદ્ર જયાયાઃ પૂરણાત્તથા ।
ગજમૂત્રસ્ય વૈ પાનં ગો-મહિષ્યુપસર્ગનુત્ ॥ ૧,૨૦૩.૫॥

સમસૂર શાલિબીજં પીતં તક્રેણ ઘર્ષિતમ્ ।
ક્ષીરે ગો-મહીષસ્યૈવ ગોઃ પુંસશ્ચ હિતં ભવેત્ ॥ ૧,૨૦૩.૬॥

પત્રઞ્ચ શરપુઙ્ખાયા દત્તં સલવણં શિવ ।
વારિસ્ફોટં હયાનાઞ્ચ કેસરાણાં વિનાશયેત્ ॥ ૧,૨૦૩.૭॥

ધૃતકુમારીપત્રમેવ દત્તં સલક્ષણં હર ।
તુરગમ-કેસરાણાં કણ્ડૂનંશ્યેન્ન સંશયઃ ॥ ૧,૨૦૩.૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નાનૌષધપ્રયોગનિરૂપણં નામ ત્ર્યુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૪
સૂત ઉવાચ ।
એવં ધન્વન્તરિઃ પ્રાહ સુશ્રુતાયચ વૈદ્યકમ્ ।
અત નામાનિ વક્ષ્યામિ ઓષધીનાં સમાસતઃ ॥ ૧,૨૦૪.૧॥

સ્થિરા વિદારિગન્ધા ચ શાલપણ્યશુમત્યપિ ।
લાઙ્ગલી કલસી ચૈવ ક્રોષ્ટુપુચ્છા ગુહા મતા ॥ ૧,૨૦૪.૨॥

પુનર્નવાથ પર્ષાભૂઃ કઠિલ્યા કારુણા તથા ।
એરણ્ડશ્ચોરુવૂકઃ સ્યાદામર્દો વર્ધમાનકઃ ॥ ૧,૨૦૪.૩॥

ઝષા નાગબલા જ્ઞેયા શ્વદંષ્ટ્રા ગોક્ષુરો મતઃ ।
શતાવરી વરા ભીરુ પીવરીન્દીવરી વરી ॥ ૧,૨૦૪.૪॥

વ્યાઘ્રી તુ બૃહતી કૃષ્ણા હંસપાદી મધુસ્ત્રવા ।

ધામની કણ્ટકારી સ્યાત્ક્ષુદ્રા સિંહી નિદિગ્ધિકા ॥ ૧,૨૦૪.૫॥

વૃશ્ચિકા ત્ર્યમૃતા કાલી વિષઘ્ની સર્પદંષ્ટ્રિકા ।
મર્કટી ચાત્મગુપ્તા સ્યાદાર્ષેયી કપિકચ્છુકા ॥ ૧,૨૦૪.૬॥

મુદ્ગપર્ણી ક્ષુદ્રસહા માષપર્ણી મહાસહા ।
ત્યજા પરા ચ મહા જ્ઞેયા દણ્ડયોન્યઙ્ગસંજ્ઞયા ।
ન્યગ્રોધસ્તુ વટો જ્ઞેયઃ અશ્વત્થઃ કપિલો મતઃ ॥ ૧,૨૦૪.૭॥

પ્લક્ષોઽથ ગર્દભાણ્ડઃ સ્યાત્પર્કટી ચ કપીતનઃ ।
પાર્થસ્તુ કકુભો ધન્વિ વિજ્ઞેયોઽર્જુનનામભિઃ ॥ ૧,૨૦૪.૮॥

નન્દીવૃક્ષઃ પ્રરોહી સ્યાત્પુષ્ટિકારીતિ ચોચ્યતે ।
વઞ્જુલો વેતસો જ્ઞેયો ભલ્લાતશ્ચાપ્યરુષ્કરઃ ॥ ૧,૨૦૪.૯॥

લોધ્રઃ સારવકો ધૃષ્ટસ્તિરીટશ્ચાપિ કીર્તિતઃ ।
બૃહત્ફલા મહાજમ્બૂર્જ્ઞેયા બાલફલા પરા ॥ ૧,૨૦૪.૧૦॥

તૃતીયા જલજમ્બૂઃ સ્યાન્નાદેયી સા ચ કીર્તિતા ।
કણા કૃષ્ણોપકુઞ્ચી ચ શૌણ્ડી માગધિકેતિ ચ ॥ ૧,૨૦૪.૧૧॥

કથિતા પિપ્પલી તજ્જ્ઞૈસ્તન્મૂલં ગ્રન્થિકં સ્મૃતમ્ ।
ઊષણં મરિચં જ્ઞેયં શુણ્ઠી વિશ્વં મહૌષધમ્ ॥ ૧,૨૦૪.૧૨॥

વ્યોષં કટુત્રયં વિદ્યાત્ત્ર્યૂષણં તચ્ચ કીર્ત્યતે ।
લાઙ્ગલી હલિની ચ સ્યાચ્છ્રેયસી ગજ પિપ્પલી ॥ ૧,૨૦૪.૧૩॥

ત્રાયન્તી ત્રાયમાણા સ્યાદુત્સાયા સુવહા સ્મૃતા ।
ચિત્રકઃ સ્યાચ્છિખી વહ્નિરગ્નિસંજ્ઞાભિરુચ્યતે ॥ ૧,૨૦૪.૧૪॥

ષડ્ગ્રન્થોગ્રા વચા જ્ઞેયા શ્વેતા હૈમવતીતિ ચ ।
કુટજો વૃક્ષકઃ શક્રો વત્સકો ગિરિમાલ્લિકા ॥ ૧,૨૦૪.૧૫॥

કલિઙ્ગેન્દ્રયવારિષ્ટં તસ્ય બીજાનિ લક્ષયેત્ ।
મુસ્તક્તો મેઘનામા સ્યાત્કૌન્તી જ્ઞેયા હરેણુકા ॥ ૧,૨૦૪.૧૬॥

એલા ચ બહુલા પ્રોક્તા સૂક્ષ્મૈલા ચ તથા ત્રુટિઃ ।
પદ્મા ભાર્ઙ્ગા તથા કાઞ્જી જ્ઞેયા બ્રાહ્મણયષ્ટિકા ॥ ૧,૨૦૪.૧૭॥

મૂર્વા મધુરસા જ્ઞેયા તેજની તિક્તવલ્લિકા ।
મહાનિમ્બો બૃહન્નિમ્બો દીપ્યકઃ સ્યાદ્યવાનિકા ॥ ૧,૨૦૪.૧૮॥

વિડઙ્ગં ક્રિમશત્રુઃ સ્યાદ્રામઠં હિઙ્ગુરુચ્યતે ।
અજાજી જીરકં જ્ઞેયા કારવી ચોપકુઞ્ચિકા ॥ ૧,૨૦૪.૧૯॥

વિજ્ઞેયા કટુકા તિક્તા તથા કટુકરોહિણી ।
તગરં સ્યાન્નતં વક્રં ચોચં ત્વચવરાઙ્ગકમ્ ॥ ૧,૨૦૪.૨૦॥

ઉદીચ્યં બાલકં પ્રોક્તં હ્રીબેરં ચામ્બુનામભિઃ ।
પત્રકં દલસંજ્ઞાભિશ્ચારકં તસ્કરાહ્વયમ્ ॥ ૧,૨૦૪.૨૧॥

હેમાભં નાગસંજ્ઞાભિર્નાગકેશર ઉચ્યતે ।
અસૃક્કુઙ્કુમમાખ્યાતં તથા કાશ્મીરબાહ્લિકમ્ ॥ ૧,૨૦૪.૨૨॥

અયો લોહં સમુદ્દિષ્ટં યૌગિકૈર્લોહનામભિઃ ।
પુરં કુટનટં વિદ્યાન્મહિષાક્ષઃ પલઙ્કુષા ॥ ૧,૨૦૪.૨૩॥

કાશ્મરી કટ્ફલા જ્ઞેયા શ્રીપર્ણી ચેતિ કીર્તિતા ।
શલ્લકી ગજભક્ષ્યા ચ પત્રી ચ સુરભી સ્રવઃ ॥ ૧,૨૦૪.૨૪॥

ધાત્રીમામલકીં વિદ્યાદક્ષશ્ચૈવ વિભીતકઃ ।
પથ્યાભયા ચ વિજ્ઞેયા પૂતના ચ હરીતકી ॥ ૧,૨૦૪.૨૫॥

ત્રિફલા ફલમેવોક્તા તચ્ચ જ્ઞેયં ફલત્રિકમ્ ।
ઉદકીર્યો દીર્ઘવૃન્તઃ કરઞ્જશ્ચેતિ કીર્તિતઃ ॥ ૧,૨૦૪.૨૬॥

યષ્ટી યષ્ટ્યાહ્વયં પ્રોક્તં મદુકં મધુયષ્ટિકા ।
ધાતકી તામ્રપર્ણી સ્યાત્સમઙ્ગા કુઞ્જરા મતા ॥ ૧,૨૦૪.૨૭॥

સિતં મલયજં શીતં ગોશીર્ષં સિતચન્દનમ્ ।
વિદ્યાદ્રક્તં ચન્દનં ચ દ્વિતીયં રક્તચન્દનમ્ ॥ ૧,૨૦૪.૨૮॥

કાકોલી ચ સ્મૃતા વીરા વયસ્યા ચાર્કપુષ્પિકા ।
શૃઙ્ગી કર્કટશૃઙ્ગી ચ મહાઘોષા ચ કીર્તિતા ॥ ૧,૨૦૪.૨૯॥

તુગાક્ષીરી શુભા વાંશી વિજ્ઞેયા વંશલોચના ।
મૃદ્વિકા ચ સ્મૃતા દ્રાક્ષા તથા ગોસ્તનિકા મતા ॥ ૧,૨૦૪.૩૦॥

સ્યાદુશીરં મૃણાલઞ્ચ સેવ્યં લામજ્જકં તથા ।
સારઞ્ચ ગોપવલ્લી ચ ગોપી ભદ્રા ચ કથ્યતે ॥ ૧,૨૦૪.૩૧॥

દન્તી કટઙ્કુટેરી ચ જ્ઞેયા દારુનિશેતિ ચ ।

હરિદ્રા રજની પ્રોક્તા પીતિકા રાત્રિનામિકા ॥ ૧,૨૦૪.૩૨॥

વૃક્ષાદની છિન્નરુહા નીલવલ્લી રસામૃતા ।
વસુકોટશ્ચ વિજ્ઞેયો વાશિરઃ કામ્પિલ્લો મતઃ ॥ ૧,૨૦૪.૩૩॥

પાષાણભેદકોઽરિષ્ટો હ્યશ્મભિત્કુટ્ટભેદકઃ ।
ઘણ્ટાકઃ શુષ્કકો જ્ઞેયો વચોઽથ સૂચકો મતઃ ॥ ૧,૨૦૪.૩૪॥

સુરસો બીજકશ્ચૈવ પીતશાલોઽભિધીયેત ।
વજ્રવૃક્ષો મહાવૃક્ષઃ સ્નુહી સ્નુક્ચ સુધા ગુડા ॥ ૧,૨૦૪.૩૫॥

તુલસીં સુરસાં વિદ્યાદુપસ્થેતિ ચ કથ્યતે ।
કુઠેરકોઽપ્યર્જુનકઃ પર્ણો સૌગન્ધિપર્ણિકઃ ॥ ૧,૨૦૪.૩૬॥

નીલશ્ચ સિન્ધુવારશ્ચ નિર્ગુણ્ડીતિ સુગન્ધિકા ।
જ્ઞેયા સુગન્ધિપર્ણોતિ વાસન્તી કુલજેતિ ચ ॥ ૧,૨૦૪.૩૭॥

કાલીયકં પીતકાષ્ઠં કતકાખ્યઃ પુનઃ સ્મૃતઃ ।
ગાયત્રીખદિરો જ્ઞેયસ્તદ્ભેદઃ કન્દરો મતઃ ॥ ૧,૨૦૪.૩૮॥

ઇન્દી વરં કુવલયં પદ્મં નીલોત્પલં સ્મૃતમ્ ।
સૌગન્ધિકં શતદલમબ્જં કમલમુચ્યતે ॥ ૧,૨૦૪.૩૯॥

અજવર્ણો ભવેદૂર્જો વાજિકર્ણોઽશ્વકર્ણકઃ ।
શ્લેષ્માન્તકસ્તથા શેલુર્બહુવારશ્ચ કથ્યતે ॥ ૧,૨૦૪.૪૦॥

સુનન્દકઃ કકુદ્ભદ્રં છત્રાકી છત્રસંજ્ઞકા ।
કબરી કુમ્ભકો ધૃષ્ટઃ ક્ષુદ્રિધો ધનકૃત્તથા ॥ ૧,૨૦૪.૪૧॥

કૃષ્ણાર્જકઃ કરાલશ્ચ કાલમાનઃ પ્રકીર્તિતઃ ।
પ્રાચી બલા નદીક્રાન્તા કાકજઙ્ઘાથ વાયસી ॥ ૧,૨૦૪.૪૨॥

જ્ઞેયા મૂષિકપર્ણો તુ ભ્રમન્તી ચાખુપર્ણિકા ।
વિષમુષ્ટિર્દ્રાવણઞ્ચ કેશમુષ્ટિરુદાહૃતા ॥ ૧,૨૦૪.૪૩॥

કિંલિહીં કટુકીં વિદ્યાદન્તકશ્ચામ્લવેતસઃ ।
અશ્વત્થા બહુપત્રા ચ વિજ્ઞેયા ચામલક્યપિ ॥ ૧,૨૦૪.૪૪॥

અરુષકં પત્ર શૂકં ક્ષીરી રાજાદનં મતમ્ ।
મહાપત્રં દાડિમં ચ તમેવ કરકં વદેત્ ॥ ૧,૨૦૪.૪૫॥

મસૂરી વિદલી શષ્પા કાલિન્દીતિ નિરુચ્યતે ।
કણ્ટકાખ્યા મહાશ્યામા વૃક્ષપાદીતિ વક્ષ્યતે ॥ ૧,૨૦૪.૪૬॥

વિધા કુન્તી નિકુમ્ભા ચ ત્રિભઙ્ગી ત્રિપુટી ત્રિવૃત્ ।
સપ્તલા યવતિક્તા ચ ચર્મા ચર્મકસેતિ ચ ॥ ૧,૨૦૪.૪૭॥

શઙ્ખિની સુકુમારી ચ તિક્તાક્ષી ચાક્ષિપીલુકમ્ ।
ગવાક્ષી ચામૃતા શ્વેતા ગિરિકર્ણી ગવાદિની ॥ ૧,૨૦૪.૪૮॥

કામ્પિલ્લકોઽથ રક્તાઙ્ગો ગુણ્ડા રોચનિકેતિ ચ ।
હેમક્ષીરી સ્મૃતા પીતા ગૌરી વૈ કાલદુગ્ધિકા ॥ ૧,૨૦૪.૪૯॥

ગાઙ્ગેરુકી નાગબલા વિશાલા ચેન્દ્રવારુણી ।
તાર્ક્ષ્યં શૈલં નીલવર્ણમઞ્જનઞ્ચ રસાઞ્જનમ્ ॥ ૧,૨૦૪.૫૦॥

નિર્યાસો યશ્ચ શાલ્મલ્યાઃ સ મોચરસસંજ્ઞકઃ ।
પ્રત્યક્પુષ્પી ખરી જ્ઞેયા અપામાર્ગો મયૂરકઃ ॥ ૧,૨૦૪.૫૧॥

સિંહાસ્યવૃષવાસાકમાટરૂષકમાદિશેત્ ।
જીવકો જીવશાકશ્ચ કર્બુરઞ્ચ શટીં વિદુઃ ॥ ૧,૨૦૪.૫૨॥

કટ્ફલં સોમવૃક્ષઃ સ્યાદગ્નિગન્ધા સુગન્ધિકા ।
શતાઙ્ગં શતપુષ્પા ચ મિંસિર્મધુરિકામતા ॥ ૧,૨૦૪.૫૩॥

જ્ઞેયં પુષ્કરમૂલઞ્ચ પુષ્કરં પુષ્કરાહ્વયમ્ ।
યાસોઽથ ધન્વયાસશ્ચ દુષ્પર્શોઽથ દુરાલભા ॥ ૧,૨૦૪.૫૪॥

વાકુચી સોમરાજી ચ સોમવલ્લીતિ કીર્તિતા ।
માર્કવઃ કેશરાજશ્ચ ભૃઙ્ગરાજો નિગદ્યતે ॥ ૧,૨૦૪.૫૫॥

પ્રોક્તસ્ત્વેડગજસ્તજ્જ્ઞૈશ્ચક્રમર્દકસંજ્ઞખઃ ।
સુરઙ્ગીતગરઃ સ્નાયુઃ કલનાશા તુ વાયસી ॥ ૧,૨૦૪.૫૬॥

મહાકાલઃ સ્મૃતો બેલસ્તણ્ડુલીયો ઘનસ્તનઃ ।
ઇક્ષ્વાકુસ્તિક્તતુમ્બી સ્યાત્તિક્તાલબુર્નિગદ્યતે ॥ ૧,૨૦૪.૫૭॥

ધામાર્ગવોઽથ કોષાતક્યથ યામિની ।
વિદ્યાત્કોશતકીભેદં કૃતભેદનસંજ્ઞકા ॥ ૧,૨૦૪.૫૮॥

તથા જીમૂતકાખ્યા ચ ખુડ્ડાકો દેવતાડકઃ ।
ગૃધ્રનખી ગૃધ્રનખી હિઙ્ગુકાકાદની મતા ॥ ૧,૨૦૪.૫૯॥

અશ્વારિશ્ચૈવ બોદ્ધવ્યઃ કરવીરોઽશ્વમારકઃ ।
સિન્ધુઃ સૈન્ધવસિન્ધૂત્થમણિમન્થમુદાહૃતમ્ ॥ ૧,૨૦૪.૬૦॥

ક્ષારો યવાગ્રજશ્ચૈવ યવક્ષારોઽભિધીયતે ।
સર્જિકા સર્જિકાક્ષારો દ્વિતીયઃ પરિકીર્તિતઃ ॥ ૧,૨૦૪.૬૧॥

કાશીશં પુષ્પકાશીશં વિજ્ઞેયં નેત્રભેષજમ્ ।
ધાતુકાશીશકાશી ચ સંજ્ઞેયં તચ્ચ કીર્તિતમ્ ॥ ૧,૨૦૪.૬૨॥

સૌરાષ્ટ્રી મૃત્તિકાક્ષારં કાક્ષી વૈ પઙ્કુપર્પટી ।
વિદ્યાત્સમાક્ષિકં ધાતુ તાપ્યં તાપ્યુત્થસમ્ભવમ્ ॥ ૧,૨૦૪.૬૩॥

શિલા મનઃ શિલા જ્ઞેયા નેપાલી કુલટીતિ ચ ।
આલં મનસ્તાલકં વા હરિતાલં વિનિર્દિશેત્ ॥ ૧,૨૦૪.૬૪॥

ગન્ધકો ગન્ધપાષાણો રસઃ પારદ ઉચ્યતે ।
તામ્રમૌદુમ્બરં શુલ્બં વિદ્યાન્મ્લેચ્છમુખં તથા ॥ ૧,૨૦૪.૬૫॥

અદ્રિસારસ્ત્વયસ્તીક્ષ્ણં લોહકઞ્ચાપિ કથ્યતે ।
માક્ષિકં મધુ ચ ક્ષૌદ્રં તચ્ચ પુષ્પરસં સ્મૃતમ્ ॥ ૧,૨૦૪.૬૬॥

જ્યેષ્ઠન્તુ સોદકં તત્સ્યાત્કાઞ્જિકન્તુ સુવીરકમ્ ।
સીતા સિતોપલા ચૈવ મત્સ્યણ્ડીશર્કરા સ્મૃતા ॥ ૧,૨૦૪.૬૭॥

ત્વગેલાપત્રકૈસ્તુલ્યૈસ્ત્રિસુગન્ધિ ત્રિજાતકમ્ ।
નાગકેશરસંયુક્તં તચ્ચતુર્જાતમિષ્યતે ॥ ૧,૨૦૪.૬૮॥

પિપ્પલી પિપ્પલીમૂલં ચવ્યચિત્રકનાગરૈઃ ।
કથિતં પઞ્ચકોલઞ્ચ કોલકં કોલસંજ્ઞયા ॥ ૧,૨૦૪.૬૯॥

પ્રિયઙ્ગુઃ કઙ્ગુકા જ્ઞેયા કોરદૂષશ્ચ કોદ્રવઃ ।
ત્રિપુટઃ પુટસંજ્ઞશ્ચ કલાપો લઙ્ગકો મતઃ ॥ ૧,૨૦૪.૭૦॥

સતીનો વર્તુલશ્ચૈવ વેણુશ્ચાપિ પ્રકીર્તિતઃ ।
પિચુકં પિતલં ચાક્ષં બિડાલપદકં તથા ॥ ૧,૨૦૪.૭૧॥

વિદ્યાત્કર્ષં તથા ચાપિ સુવર્ણં કવલગ્રહમ્ ।
પલાર્ધં શુક્તિમિચ્છન્તિ તથાષ્ટૌમાષકાસ્ત્વિતિ ॥ ૧,૨૦૪.૭૨॥

પલં બિલ્વઞ્ચ મુષ્ટિઃ સ્યાદ્દ્વે પલે પ્રસૃતિં વદેત્ ।

અઞ્જલિં કુડવઞ્ચૈવ વિદ્યાત્પલચતુષ્ટયમ્ ॥ ૧,૨૦૪.૭૩॥

અષ્ટમાનં પલાન્યષ્ટૌ તચ્ચ માનમિતિ સ્મૃતમ્ ।
ચતુર્ભિઃ કુડવૈઃ પ્રસ્થ પ્રસ્થાશ્ચત્વાર આઢકઃ ॥ ૧,૨૦૪.૭૪॥

કાશપાત્રઞ્ચ સમ્પ્રોક્તો દ્રોણશ્ચચતુરાઢકે ।
તુલા પલશતં પ્રોક્તં ભાગો વિંશત્પલઃ સ્મૃતઃ ॥ ૧,૨૦૪.૭૫॥

માનમેવં વિધં પ્રોક્તં પ્રસ્થદ્રવ્યેષુ પણ્ડિતૈઃ ।
દ્રવદ્રવ્યેષુ ચોદ્દિષ્ટં દ્વિગુણં પરિકીર્તિતમ્ ॥ ૧,૨૦૪.૭૬॥

ભદ્રદારુ દેવકાષ્ઠં દારુ સ્યાદ્દેવદારુકમ્ ।
કુષ્ઠમામયમાખ્યાતં માંસીઞ્ચ નલદંશનમ્ ॥ ૧,૨૦૪.૭૭॥

શઙ્ખઃ શુક્તિનખઃ શઙ્ખો વ્યાઘ્રો વ્યાઘ્રનખઃ સ્મૃતઃ ।
પુરં પલઙ્કુષં વિદ્યાન્મહિષાક્ષઞ્ચ ગુગ્ગુલુઃ ॥ ૧,૨૦૪.૭૮॥

રસો ગન્ધરસો બોલે સર્જઃ સર્જરસો મતઃ ।
પ્રિયઙ્ગુઃ ફલિની શ્યામા ગૌરી કાન્તેતિ ચોચ્યતે ॥ ૧,૨૦૪.૭૯॥

કરઞ્જૌ નક્તમાલઃ સ્યાત્પૂતિકશ્ચિરબિલ્વકઃ ।
શિગ્રુઃ શોભાઞ્જનો નામ જ્ઞાનમાનશ્ચ કીર્તિતઃ ॥ ૧,૨૦૪.૮૦॥

જયા જયન્તી શરણી નિર્ગુણ્ડી સિન્ધુવારકઃ ।
મોરટા પીલુપર્ણી ચ તુણ્ડી સ્યાત્તુણ્ડિકેરિકા ॥ ૧,૨૦૪.૮૧॥

મદનો ગાલવો બોધો ઘોટા ઘોટી ચ કથ્યતે ।
ચતુરઙ્ગુલ સમ્પાકો વ્યાધિઘાતાભિસંજ્ઞકઃ ॥ ૧,૨૦૪.૮૨॥

વિદ્યાદારગ્વધં રાજવૃક્ષં રૈવતસંજ્ઞકમ્ ।
દન્તી કાકેન્દુતિક્તા સ્યાત્કણ્ટકી ચ વિકઙ્કતઃ ॥ ૧,૨૦૪.૮૩॥

નિમ્બોऽરિષ્ટઃ સમાખ્યાતઃ પટોલં કોલકં વિદુઃ ।
વયસ્થા ચ વિશલ્યા ચ ચ્છિન્ના છિન્નરુહા મતા ॥ ૧,૨૦૪.૮૪॥

વશા દન્ત્યમૃતા ચેતિ ગુડૂચીનામસંગ્રહઃ ।
કિરાતતિક્તકશ્ચૈવ ભૂનિમ્બઃ કાણ્ડતિક્તકઃ ॥ ૧,૨૦૪.૮૫॥

સૂત ઉવાચ ।
નામાન્યેતાનિ ચ હરે વન્યાનાં ભેષજાં તથા ।
અતો વ્યાકરણં વક્ષ્યે કુમારોક્તઞ્ચ શૌનક ॥ ૧,૨૦૪.૮૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ચતુરુત્તરદ્વિશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૫

કુમાર ઉવાચ ।

અથ વ્યાકરણં વક્ષ્યે કાત્યાયન સમાસતઃ ।
સિદ્ધશબ્દવિવેકાય બાલવ્યુત્પત્તિહેતવે ॥ ૧,૨૦૫.૧॥

સુપ્તિઙન્તં પદં ખ્યાતં સુપઃ સપ્ત વિભક્તયઃ ।
સ્વૌજસઃ પ્રથમા પ્રોક્તા સા પ્રાતિપદિકાત્મકે ॥ ૧,૨૦૫.૨॥

સમ્બોધને ચ લિઙ્ગાદાવુક્તે કર્મણિ કર્તરિ ।
અર્થવત્પ્રાતિપદિકં ધાતુપ્રત્યયવર્જિતમ્ ॥ ૧,૨૦૫.૩॥

અમૌશસો દ્વિતીયા સ્યાત્તત્કર્મ ક્રિયતે ચ યત્ ।
દ્વિતીયા કર્મણિ પ્રોક્તાન્તરાન્તરેણ સંયુતે ॥ ૧,૨૦૫.૪॥

ટાભ્યાંભિસસ્તૃતીયા સ્યાત્કરણે કર્તરીરિતા ।
યેન ક્રિયતે કરણં તત્કર્તા યઃ કરોતિ સઃ ॥ ૧,૨૦૫.૫॥

ઙેભ્યાંભ્યસશ્ચતુર્થી સ્યાત્સમ્પ્રદાને ચ કારકે ।
યસ્મૈ દિત્સા ધારયતે રોચતે સમ્પ્રદાનકમ્ ॥ ૧,૨૦૫.૬॥

પઞ્ચમી સ્યાન્ઙસિભ્યાંભ્યોહ્યપાદાને ચ કારકે ।
યતોऽપૈતિ સમાદત્તે ઉપાદત્તે ભયં યતઃ ॥ ૧,૨૦૫.૭॥

ઙસોસામશ્ચ ષષ્ઠી સ્યાત્સ્વામિસમ્બન્ધમુખ્યકે ।
ઙયોઃ સુપો વૈ સપ્તમી સ્યાત્સા ચાધિકરણે ભવેત્ ॥ ૧,૨૦૫.૮॥

આધારશ્ચાધિકરણં રક્ષાર્થાનાં પ્રયોગતઃ ।
ઈપ્સિતં ચાનીપ્સિતં યત્તદપાદાનકં સ્મૃતમ્ ॥ ૧,૨૦૫.૯॥

પઞ્ચમી પર્યુપાઙ્યોગે ઇતરર્તેऽન્યદિઙ્મુખે ।
એનયોગે દ્વિતીયા સ્યાત્કર્મપ્રવચનીયકૈઃ ॥ ૧,૨૦૫.૧૦॥

વીપ્સેત્થમ્ભાવચિહ્નેऽભિર્ભાગેનૈવ પરિપ્રતી ।
અનુરેષુ સહાર્થે ચ હીનેऽનૂપશ્ચ કથ્યતે ॥ ૧,૨૦૫.૧૧॥

દ્વિતીયા ચ ચતુર્થો સ્યાચ્ચેષ્ટાયાં ગતિકર્મણિ ।
અપ્રાણે હિ વિભક્તી દ્વે મન્યકર્મણ્યનાદરે ॥ ૧,૨૦૫.૧૨॥

નમઃ સ્વસ્તિસ્વધાસ્વાહાલંવષડ્યોગ ઈરિતા ।
ચતુર્થો ચૈવ તાદર્થ્યે તુમર્થાદ્ભાવવાચિનઃ ॥ ૧,૨૦૫.૧૩॥

તૃતીયા સહયોગે સ્યાત્કુત્સિતેઽગે વિશેષણે ।
કાલે ભાવે સપ્તમી સ્યાદેતૈર્યોગેઽપિષષ્ઠ્યપિ ॥ ૧,૨૦૫.૧૪॥

સ્વામીશ્વરાધિપતિભિઃ સાક્ષિદાયાદપ્રસૂતૈઃ ।
નિર્ધારણે દ્વે વિભક્તો ષષ્ઠી હેતુપ્રયોગકે ॥ ૧,૨૦૫.૧૫॥

સ્મૃત્યર્થકર્મણિ તથા કરોતેઃ પ્રતિયત્નકે ।
હિંસાર્થાનાં પ્રયોગે ચ કૃતિ કર્મણિ કર્તરિ ॥ ૧,૨૦૫.૧૬॥

ન કર્તૃકર્મણોઃ ષષ્ઠી નિષ્ઠયોઃ પ્રાતિપદિકે ।
દ્વિવિધં પ્રાતિપદિકં નામ ધાતુસ્તથૈવ ચ ॥ ૧,૨૦૫.૧૭॥

ભૂવાન્દિભ્યસ્તિઙો લઃ સ્યાલ્લકારા દશ વૈ સ્મૃતાઃ ।
તિપ્તસૂઝિ પ્રથમો મધ્યઃ સિપ્થસ્થોત્તમપૂરુષઃ ॥ ૧,૨૦૫.૧૮॥

મિબ્વસ્મસ્તુ પરસ્મૈ હિ પદાનાં ચાત્મનેપદમ્ ।
તાતાઞ્ઝ પ્રથમો મધ્ય સ્થાસાથાન્ધ્વમથોત્તમઃ ॥ ૧,૨૦૫.૧૯॥

આદેશા ઇડ્બહિમહિ ધાતુતોથ ણિજાદિવત્ ।
નામ્નિ પ્રયુજ્યમાનેઽપિ પ્રથમઃ પુરુષો ભવેત્ ॥ ૧,૨૦૫.૨૦॥

મધ્યમો યુષ્મદિ પ્રોક્ત ઉત્તમઃ પુરુષોઽસ્મદિ ।
ભૂવાદ્યા ધાતવઃ પ્રોક્તાઃ સનાદ્યન્તાસ્તથા તતઃ ॥ ૧,૨૦૫.૨૧॥

લડીરિતો વર્તમાને સ્મેનાતીતે ચ ધાતુતઃ ।
ભૂતેઽનદ્યતને લઙ્વા લોડાદ્યાશિષિ ધાતુતઃ ॥ ૧,૨૦૫.૨૨॥

વિદ્યાદાવેવાનુમતો લોઙ્વાચ્યો મન્ત્રણે ભવેત્ ।
નિમન્ત્રણાધીષ્ટસમ્પ્રશ્ને પ્રાર્થનેષુ તથાશિષિ ॥ ૧,૨૦૫.૨૩॥

લિડતીતે પરોક્ષે સ્યાલ્લિડ્ભૂતે લ્ડ્ભવિષ્યતિ ।
સ્યાદનદ્યતને તદ્વદ્ભવિષ્યતિ તુ ધાતુતઃ ॥ ૧,૨૦૫.૨૪॥

દાતોર્લૃઙ્ક્રિયાતિપત્તૌ લિડર્થે લેટ્પ્રકીર્તિતઃ ।
કૃતસ્ત્રિષ્વપિ વર્તન્તે ભાવે કર્મણિ કર્તરિ ॥ ૧,૨૦૫.૨૫॥

સદૃશાસ્તવ્યતા ણ્યદ્યદનીયાશ્ચ તૃજાદયઃ ॥ ૧,૨૦૫.૨૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વ્યાકરણનિરૂપણં નામ પઞ્ચોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૬
સૂત ઉવાચ ।
સિદ્ધોદાહરણં વક્ષ્યે સંહિતાદિપુરઃ સરમ્ ।
વિપ્રાઃ સ્વસાગતા વીદં સુત્તમં સ્યાત્પિતૃષભઃ ॥ ૧,૨૦૬.૧॥

ऌકારો વિશ્રુતા સેવં લાઙ્ગલીષા મનીપયા ।
ગઙ્ગોદકં તવલ્કાર ઋણાર્ણં પ્રાર્ણમિત્યપિ ॥ ૧,૨૦૬.૨॥

શીતાર્તશ્ચ તવલ્કારઃ સૈન્દ્રી સૌકાર ઇત્યપિ ।
વધ્વાસનઞ્ચ પિત્રર્થો લનુબન્ધો નયે જયેત્ ॥ ૧,૨૦૬.૩॥

નાયકો લવણં ગાવસ્ત એતે ન ત ઈશ્વરાઃ ।
દેવીગૃહમથો અત્ર અ અવેહિ પટૂ ઇમૌ ॥ ૧,૨૦૬.૪॥

અમી અશ્વાઃ ષડસ્યેતિ તન્ન વાક્ષડ્દલાનિ ચ ।
તચ્ચરેત્તલ્લુ નાતીતિ તજ્જલં તચ્છ્મશાનકમ્ ॥ ૧,૨૦૬.૫॥

સુગન્નત્ર પચન્નત્ર ભવાંશ્છાદયતીતિ ચ ।
ભવાજ્ઝનત્કરશ્ચૈવ ભવાંસ્તરતિ સંસ્મૃતમ્ ॥ ૧,૨૦૬.૬॥

ભવાંલ્લિખતિ તાઞ્ચક્રે ભવાઞ્શેતેઽપ્યનીદૃશઃ ।
ભવાણ્ડીનં ત્વન્તરસિ ત્વઙ્કરોષિ સદાર્ચનમ્ ॥ ૧,૨૦૬.૭॥

કશ્ચરેત્કષ્ટકારેણ ક કુર્યાત્ક ફલે સ્થિતઃ ।
કઃશેતે ચૈવ કઃષણ્ડઃ કસ્કો યાતિ ચ ગૌરવમ્ ॥ ૧,૨૦૬.૮॥

ક ઇહાત્ર ક એવાહુર્દેવા આહુશ્ચ ભો વ્રજ ।
સ્વભૂર્વિષ્ણુર્વ્રજતિ ચ ગીષ્પતિશ્ચૈવ ધૂર્પતિઃ ॥ ૧,૨૦૬.૯॥

અસ્માનેષ વ્રજેત્સસ્યાદૃક્સામ સ ચ ગચ્છતિ ।
કુટીચ્છાયા તથા છાયા સન્ધયોઽન્યે તથેદૃશાઃ ॥ ૧,૨૦૬.૧૦॥

સમાસાઃ ષટ્સમાખ્યાતાઃ સ દ્વિજઃ કર્મધારયઃ ।

દ્વિગુસ્ત્રિવેદી ગ્રામશ્ચ અયં તત્પુરુષઃ સ્મૃતઃ ॥ ૧,૨૦૬.૧૧॥

તત્કૃતશ્ચ તદર્થશ્ચ વૃકભીતિશ્ચ યદ્ધનમ્ ।
જ્ઞાનદક્ષેણ તત્ત્વજ્ઞો બહુવ્રીહિરથાવ્યયી ॥ ૧,૨૦૬.૧૨॥

ભાવોઽધિસ્ત્રિ યથોક્તં તુ દ્વન્દ્વો દેવર્ષિમાનવાઃ ।
તદ્ધિતાઃ પાણ્ડવઃ શૈવો બ્રાહયં ચ બ્રહ્મતાદયઃ ॥ ૧,૨૦૬.૧૩॥

દેવાગ્નિસખિપત્યંશુક્રોષ્ટુસ્વાયમ્ભુવઃ પિતા ।
ના પ્રશસ્તાશ્ચરા ગૌર્ગ્લૌરબજન્તાશ્ચ પુંસ્યપિ ॥ ૧,૨૦૬.૧૪॥

હલન્તશ્ચાશ્વયુક્ક્ષ્માભુઙ્મરુત્કવ્યાન્મૃગાવિધઃ ।
આત્મા રાજા યુવા પન્થાઃ પૂષબ્રહ્મહણૌ હલી ॥ ૧,૨૦૬.૧૫॥

વિડ્વે ધા ઉશનાનડ્વાન્મધુલિટ્કાષ્ઠતટ્તથા ।
બનવાર્યસ્થિવસ્તૂનિ જગત્સામાહની તથા ॥ ૧,૨૦૬.૧૬॥

કર્મસર્પિર્વપુસ્તેજ અજ્ઝલન્તા નપુંસકે ।
જાયા જરા નદી લક્ષ્મીઃ શ્રીસ્ત્રીભૂમિર્વધૂરપિ ॥ ૧,૨૦૬.૧૭॥

ભ્રૂઃ પુનર્ભૂસ્તથા ધેનુઃ સ્વસા માતા ચ નૌ સ્ત્રિયઃ ।
વાક્સ્રગ્દિઙ્મુત્ક્ષુધઃ પ્રાયો યુવતિઃ કુકુભસ્તથા ॥ ૧,૨૦૬.૧૮॥

દ્યોદિવૌ પ્રાવૃષશ્ચૈવ સુમાન ઉષ્ણિગસ્ત્રિયામ્ ।
ગુણદ્રવ્યક્રિયાયોગાત્સ્ત્રીલિઙ્ગાંશ્ચ વદામિ તે ॥ ૧,૨૦૬.૧૯॥

શુક્લકીલાલપાશ્ચૈવ શુચિશ્ચ ગ્રામણીઃ સુધીઃ ।
પટુઃ કમલભૂઃ કર્તા સુમતો બહવઃ સુનૌઃ ॥ ૧,૨૦૬.૨૦॥

સત્યા નાગ્ન્યસ્તથા પુંસો હ્યભક્ષયત દીર્ઘપાત્ ।
સર્વવિશ્વોભ યે ચોભૌ એકોન્યાન્યતરાણિ ચ ॥ ૧,૨૦૬.૨૧॥

ઽતરો ઽતમો નેમસ્ત્વઃ સમોઽથ સિમેતરૌ ।
પૂર્વશ્ચૈવાધરશ્ચૈવ દક્ષિણશ્ચોત્તરાવરૌ ॥ ૧,૨૦૬.૨૨॥

પરશ્ચાન્તરમપ્યેતદ્યત્ત્યત્કિમદસસ્ત્વિદમ્ ।
યુષ્મદસ્મત્તત્પ્રથમચરમાલ્પતયાર્ધકાઃ ॥ ૧,૨૦૬.૨૩॥

તથા કતિપયો દ્વૌ ચેત્યેવં સર્વાદયસ્તથા ।
શ ૃણોત્યાદ્યા જુહોતિશ્ચ જહાતિશ્ચ દધાત્યપિ ॥ ૧,૨૦૬.૨૪॥

દીપ્યતિઃ સ્તૂયતિશ્ચૈવ પુત્રીયતિ ધનીયતિ ।
ત્રુટ્યતિ મ્રિયતે ચૈવ ચિચીષતિ નિનીષતિ ॥ ૧,૨૦૬.૨૫॥

સર્વે તિષ્ઠન્તિ સર્વસ્મૈ સર્વસ્માત્સર્વન્તો ગતઃ ।
સર્વેષાં ચૈવ સર્વસ્મિન્નેવં વિશ્વાદયસ્તથા ॥ ૧,૨૦૬.૨૬॥

પૂર્વે પૂર્વાશ્ચ પૂર્વસ્માત્પૂર્વસ્મિન્પૂર્વ ઈરિતઃ ।
સૂત ઉવાચ ।
સુપ્તિઙન્તું સિદ્ધરૂપં નામમાત્રેણ દર્શિતમ્ ।
કાત્યાયનઃ કુમારાત્તુ શ્રુત્વા વિસ્તરમબ્રવીત્ ॥ ૧,૨૦૬.૨૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાન્- આચારદ્
નામ ષડુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૭
સૂત ઉવાચ ।
વાસુદેવં ગુરું નત્વા ગણં શમ્ભું સરસ્વતીમ્ ।
માત્રાવર્ણપ્રભેદેન ચ્છન્દો વક્ષ્યેઽલ્પબુદ્ધયે ॥ ૧,૨૦૭.૧॥

સર્વાદિમધ્યાન્તગલૌ મ્નૌ ભ્યૌ જૌ સ્તૌ ત્રિકા ગણાઃ ।
આર્યા ચતુષ્કલાદ્યન્તસર્વમધ્યે ચતુર્ગણાઃ ॥ ૧,૨૦૭.૨॥

વ્યઞ્જનાન્તો વિસર્ગાન્તૌ દીર્ઘો યુક્તપરો ગુરુઃ ।
સાનુસ્વારશ્ચ પાદાન્તો વા ઇત્યુક્તો દ્વિમાત્રકઃ ॥ ૧,૨૦૭.૩॥

યદા નાપિ ક્રમં યોગે લઘુતાપિ ક્વચિદ્ગુરોઃ ।
શ્લોકચાર્યાદિસંજ્ઞા સ્યાદ્યતિર્વિચ્છેદસંજ્ઞિકા ॥ ૧,૨૦૭.૪॥

જ્ઞેયઃ પાદશ્ચ તુર્યાંશો યુક્સમં વિષમન્ત્વયુક્ ।
સમમર્ધસમં વૃત્તં વિષમઞ્ચ તૃતીયકમ્ ॥ ૧,૨૦૭.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
છન્દઃ શાસ્ત્રેછન્દઃસંજ્ઞાપરિભાષાનિરૂપણં નામ સપ્તોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૮
સૂત ઉવાચ ।
આર્યાલક્ષ્મ ત્વષ્ટ ગણાઃ સદા જો વિષમે ન હિ ।

ષષ્ઠે જો ન્લૌ વાપિ ભવેત્પદં ષષ્ઠે દ્વિતીયલાત્ ॥ ૧,૨૦૮.૧॥

આદિતઃ સપ્તમે હ્રસ્વા દ્વિતીયાર્ધે શરે તતઃ ।
ત્રિગણાઙ્ઘ્રિશ્ચ પથ્યા સ્યાદ્વિપુલા વહ્નિલઙ્ઘનાત્ ॥ ૧,૨૦૮.૨॥

ગ્મધ્યે દ્વિતુર્યૌ જૌ ચપલા મુખપૂર્વાદિચાપલા ।
દ્વિતીયાર્ધે સજઘના આર્યાજાતેશ્ચ લક્ષણમ્ ॥ ૧,૨૦૮.૩॥

આર્યા પ્રથમાર્ધલક્ષ્મ ગીતિઃ સ્યાચ્ચેદ્દલદ્વયે ।
ઉપગીતિર્દ્વિતીયાર્ધાદુદ્ગીતિર્વ્યત્યયાદ્ભવેત્ ॥ ૧,૨૦૮.૪॥

આર્યાગીતિશ્ચાન્તગુરુર્ગીતિજાતેશ્ચ લક્ષણમ્ ।
ષટ્કલા વિષમે ચેત્સ્યુઃ સમેઽષ્ટૌ ન નિરન્તરાઃ ।
સમા પરાશ્રિતા ન સ્યાદ્વૈતાલીયે રલૌ ગુરુઃ ॥ ૧,૨૦૮.૫॥

અન્તેર્યૌ પૂર્વવદિદમૌપચ્છન્દસિકં મતમ્ ॥ ૧,૨૦૮.૬॥

ભાદ્ગૌ સ્યાદાપાતલિકા જ્ઞેયાથો દક્ષિણાન્તિકા ।
પરાશ્રિતો દ્વિતીયો લઃ પાદેષુ નિખિલેષ્વપિ ॥ ૧,૨૦૮.૭॥

ઉદીચ્યવૃત્તિરસમે પ્રાચ્યવૃત્તિસ્તુ યુગ્મકે ।
સપઞ્ચમશ્ચતુર્થાંશે યુગપત્તૌ પ્રવૃત્તકમ્ ॥ ૧,૨૦૮.૮॥

ઉદીચ્યાદ્યઙ્ઘ્રિસંયોગાદ્યુગ્મપાદૈકપાદિકા ।
ચારુહાસિન્યયુગ્માઙ્ઘ્રૌ વૈતાલીયસ્ય સંગ્રહઃ ॥ ૧,૨૦૮.૯॥

વક્ત્રં નાદ્યાન્નસૌ સ્યાતાં ચતુર્થાદ્યગણો ભવેત્ ।
પથ્યાવક્ત્રં જેન સમે વિપરીતાદિરન્યથા ॥ ૧,૨૦૮.૧૦॥

ઉસમે નશ્ચ ચપલા વિપુલા લઘુસપ્તમા ।
નિખિલે વા સૈતવસ્ય મ્રૌ ન્તૌ ચાબ્ધેસ્તત્પૂર્વકૌ ॥ ૧,૨૦૮.૧૧॥

ષોડશલોઽચલધૃતિર્માત્રાસમકમુચ્યતે ॥ ૧,૨૦૮.૧૨॥

નવમલસ્તથા ગોઽન્ત્યઃ જો ન્લૌવાથામ્બુધેર્યથા ।
વિશ્લોકઃ સ્યાત્તચ્ચતુષ્કદ્વિગુણાદ્વાનવાસિકા ॥ ૧,૨૦૮.૧૩॥

બાણાષ્ટનવકેષુ સ્યાલ્લશ્ચિત્રા ષોડશાત્મિકા ।
સમમાત્રાસમાદિષ્ટં પદાકુલકમીરિતમ્ ॥ ૧,૨૦૮.૧૪॥

વૃત્તમાત્રા વિના વર્ણૈર્લા વર્ણા ગુરુભિર્વિના ।

ગુરુવો લૈર્દલે નિત્યં પ્રમાણમિતિ નિશ્ચિતમ્ ॥ ૧,૨૦૮.૧૫॥

અષ્ટાવિંશાતિલા ગન્તા પ્રથમાર્ધે દ્વિતીયકે ।
ત્રિંશદસ્યાં શિખા ગન્તા ખઞ્જાતદ્વ્યત્યયાદ્ભવેત્ ॥ ૧,૨૦૮.૧૬॥

ષોડશાનઙ્ગક્રીડા ગા દ્વાત્રિંશચ્ચરમે ચ લાઃ ।
સપ્તવિંશાતિલા ગન્તા દલયો રુચિરા દ્વયોઃ ॥ ૧,૨૦૮.૧૭॥

માત્રાવૃત્તાનિ ચોક્તાનિ વર્ણવૃત્તાનિ વચ્મિ વૈ ॥ ૧,૨૦૮.૧૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
છન્દઃ શાસ્ત્રે આર્યાવૃત્તાદિછન્દોલક્ષણનિરુપણં નામાષ્ટોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦૯
સૂત ઉવાચ ।
શ્રીરુક્થા ગેન સા જ્ઞેયા ઉત્યુક્થા સ્ત્રી ગુરુદ્વયમ્ ।
મો નારી રો મૃગી મધ્યા મગૌ કન્યા પ્રતિષ્ઠયા ॥ ૧,૨૦૯.૧॥

ભો ગૌ પઙ્ક્તિઃ સુપ્રાતિષ્ઠા તનુમધ્યા તયૌ સ્મૃતા ।
નયાભ્યાં બાલલલિતા ગાયત્રીચ્છન્દ એવ હિ ॥ ૧,૨૦૯.૨॥

મસગૈર્મદલેખા સ્યાદુષ્ણિક્છન્દઃ સ્મૃતં બુધૈઃ ।
ભૌ ગૌ ચિત્રપદા ખ્યાતા વિદ્યુન્માલા મમૌ ગગૌ ॥ ૧,૨૦૯.૩॥

માણવકં ભાત્તલગા મ્નૌ ગૌ હંસરુતં સ્મૃતમ્ ।
સમાનિકા રજગલા જરલા ગઃ પ્રમાણિકા ।
આભ્યામન્યદ્વિતાનં સ્યાદનુષ્ટુપ્છન્દ ઈરિતમ્ ॥ ૧,૨૦૯.૪॥

રનસૈઃ સ્યાદ્ધલમુખી નૌ મઃ શિશુભૃતા ભવેત્ ।
બૃહતીછન્દ ઇત્યુક્તં સ્મૌ જગૌ સ વિરાજિતમ્ ॥ ૧,૨૦૯.૫॥

પણવં સ્યાન્મનયગૈર્મયૂરસારિણી ભવેત્ ।
રજાભ્યાચ્ચ રગાભ્યાચ્ચ રુક્મવતી ભમૌ સગૌ ॥ ૧,૨૦૯.૬॥

મત્તા મભસગૈર્યુક્તા નરજા ગો મનોરમા ।
પઙ્ક્તિચ્છન્દઃ સમાખ્યાતં જસતા ગાવુપસ્થિતમ્ ॥ ૧,૨૦૯.૭॥

તૌ જો ગાવિન્દ્રવજ્રા સ્યાજ્જતજ્ગા ગુપપૂર્વિકા ॥ ૧,૨૦૯.૮॥

ઉપજાતયોઽન્યાદ્યન્તાઃ સુમુખી નજજા લગૌ ।

ભભભા ગૌ દોધકં સ્યાચ્છાલિની મતતા ગગૌ ॥ ૧,૨૦૯.૯॥

અબ્ધિલોકૈશ્ચ વિચ્છેદો વાતોર્મી મમતા ગગૌ ।
શ્રીર્ભતૌ નનગાઃ પ્રોક્તા પઞ્ચભિઃ ષડૂભિરેવ ચ ॥ ૧,૨૦૯.૧૦॥

મગના નો ગો ભ્રમરવિલાસિતમુદાહૃતમ્ ।
રથોદ્ધતાર્નૌ રલગાઃ સ્વાગતા રનભા ગગૌ ॥ ૧,૨૦૯.૧૧॥

વૃત્તા નનૌ સગૌ ગઃ સ્યાન્નૌ રલૌ ગઃ સમદ્રિકા ।
રજરા લ્ગૌ શ્યેનિકા સ્યાજ્જસતા ગૌ શિખણ્ડિતમ્ ।
ત્રિષ્ટુપ્છન્દઃ સમાખ્યાતં પિઙ્ગલેન મહાત્મના ॥ ૧,૨૦૯.૧૨॥

રનૌ ભસૌ ચન્દ્રવર્ત્મ વંશસ્થં સ્યાજ્જતૌ જરૌ ।
તતો જરાવિન્દ્રવંશા વેદસૈસ્તોટકં સ્મૃતમ્ ।
ન્ભૌ ભ્રૌ દ્રુતવિલમ્બિતં પુટશ્ચ સ્યાન્નનૌ મયૌ ॥ ૧,૨૦૯.૧૩॥

વસુવેદૈશ્ચ વિરતિર્મુદિતવદના ત્વિયમ્ ।
નનરરૈઃ સમાખ્યાતા નયના યસ્તથા ભવેત્ ॥ ૧,૨૦૯.૧૪॥

સા તુ કુસુમવિચિત્રા જલોદ્ધતગતી રસૈઃ ।
જસૌ જસૌ ચ પાદેષુ ચતૂરૈઃ સ્ત્રગ્વિણી મતા ॥ ૧,૨૦૯.૧૫॥

ભુજઙ્ગપ્રયાતં વૃત્તં ચતુભિર્યૈઃ પ્રકીર્તિતમ્ ।
પ્રયંવદા નભજૈશ્ચ મણિમાલા તયૌ તયૌ ॥ ૧,૨૦૯.૧૬॥

ગુહવક્ત્રૈશ્ચ સન્નિદ્રા લલિતા સ્યાત્તભૌ જરૌ ।
પ્રમિતાક્ષરા સજસસૈરુજ્જ્વલા તુ નનૌ ભરૌ ॥ ૧,૨૦૯.૧૭॥

મમૌ યયૌ વૈશ્વદેવી પઞ્ચાશ્વૈશ્ચ યતિર્ભવેત્ ।
મભૌ સમૌ જલધરમાલાબ્ધ્યન્ત્યૈર્યતિભવેત્ ॥ ૧,૨૦૯.૧૮॥

નૌ તતૌ ગઃ ક્ષમાવૃત્તં તુરગૈશ્ચ રસૈર્યતિઃ ।
પ્રહર્ષિણી મનૌ જ્રૌ ગા વહ્નિભિર્દશભિર્યતિઃ ॥ ૧,૨૦૯.૧૯॥

જભૌ સજૌ ગો રુચિરા ચતુર્ભિશ્ચ ગ્રહૈર્યતિઃ ।
મત્તમયૂરં મતયાઃ સગૌ દેવગ્રહૈર્યતિઃ ॥ ૧,૨૦૯.૨૦॥

મઞ્જુભાષિણી સજસા જ્ગૌ સુનન્દિની સજસા મગૌ ।
નનૌ તતૌ ચન્દ્રિકા ગઃ સપ્તભિશ્ચ રસૈર્યતિઃ ॥ ૧,૨૦૯.૨૧॥

અસમ્બાધા મતનસા ગગૌ બાણગ્રહૈર્યતિઃ ।

નનરાઃ સો લઘુગુરુઃ સ્વરૈઃ પ્રોક્તાપરાજિતા ॥ ૧,૨૦૯.૨૨॥

નનૌ ભનૌ પ્રહરણકલિકેયં લગૌ તથા ।
વસન્તતિલકા સિંહોન્નતા તભ્જા જગૌ ગુરુઃ ॥ ૧,૨૦૯.૨૩॥

ભજૌ સનૌ ગગાવિન્દુવદનાથ સુકેશરમ્ ।
નરના રલગાઃ પાદે શર્કરી પ્રતિપાદિતા ॥ ૧,૨૦૯.૨૪॥

ચતુર્દશલઘુઃ સ્યાચ્ચ શ્રેષ્ઠા શશિકલા સગા ।
રસગ્રહયતિઃ સ્રક્સ્રા વસુશૈલયતિસ્તથા ॥ ૧,૨૦૯.૨૫॥

સ્યાન્મણિગુણનિકરો માલિની નનમા યયૌ ।
વસુસ્વરયતિઃ સ્યાચ્ચ નજૌ ભજાઃ પ્રભદ્રકમ્ ॥ ૧,૨૦૯.૨૬॥

એલા સયૌ નનૌ યઃસ્યાચ્ચિત્રલેખાસ્વરાષ્ટકૈઃ ।
મરૌ મયૌ યશ્ચ ભવેદુક્તેયમતિ શર્કરી ॥ ૧,૨૦૯.૨૭॥

સ્વરાત્ખં વૃષભગજજૃમ્ભિતં ભ્રનના નગૌ ।
નજભજરા વાણિની ગઃ પિઙ્ગલેનાષ્ટિરીરિતા ॥ ૧,૨૦૯.૨૮॥

રસરુદ્રૈઃ શિખરિણી યમૌ નસભલા ગુરુઃ ।
વસુગ્રયતિઃ પૃથ્વી જસૌ જસયલા ગુરુઃ ॥ ૧,૨૦૯.૨૯॥

દશસ્વરૈર્વંશપત્રપતિતં ભ્રૌન્નભા લગૌ ।
ષડ્વેદાશ્વૈશ્ચ હરિણી નસમા રસલા ગુરુઃ ॥ ૧,૨૦૯.૩૦॥

મન્દાક્રાન્તબ્ધિષડ્ગૈર્મભનાસ્તતગા ગુરુઃ ।
નર્દટકં નજભજા જલૌ ગો યતિરેવ ચ ॥ ૧,૨૦૯.૩૧॥

સપ્તર્ત્વબ્ધિઃ કોકિલકમત્યષ્ટિઃ સ્યાચ્ચ પૂર્વવત્ ।
ભૂતર્ત્વશ્વૈઃ કુસુમિતલતા મ્તૌ ન્યૌ યયૌ ધૃતિઃ ॥ ૧,૨૦૯.૩૨॥

રસર્ત્વશ્વૈર્યમૌ ન્સૌ રૌ મેઘવિસ્ફૂર્જિતા રગૌ ।
શાર્દૂલવિક્રીડિતં મઃ સૂર્યશ્વૈઃ સજ્સતાસ્તગૌ ॥ ૧,૨૦૯.૩૩॥

છન્દો હ્યતિધૃતિઃ પ્રોક્તમત ઊર્ધ્વં કૃતિર્ભવેત્ ।
સપ્તાશ્વર્તુઃ સુવદના ભ્રૌ મનૌ યભલા ગુરુઃ ॥ ૧,૨૦૯.૩૪॥

વૃત્તં રજૌ રજૌ પાદે રજૌ ગો લઃ કૃતિર્ભવેત્ ।
ત્રિસપ્તકૈઃ સ્નગ્ધરા સ્યાત્પ્રકૃતિર્મ્રભનૈસ્ત્રિયૈઃ ॥ ૧,૨૦૯.૩૫॥

દિગર્કૈર્ભદ્રકં ભ્રૌ ન્રૌ નરના ગો યથાકૃતિઃ ।
નજૌ ભશ્વાશ્વલલિતં જભૌ જભલગા ભવેત્ ॥ ૧,૨૦૯.૩૬॥

મત્તાક્રીડઞ્ચાષ્ટબાણદશકૈર્મૌ તનૌ નનૌ ।
નલૌ ગુરુશ્ચ વિકૃતિશ્છિન્ના સંકૃતિરુચ્યતે ॥ ૧,૨૦૯.૩૭॥

પઞ્ચાશ્વાર્કૈર્ભતૌ તન્વી નસભા ભનયા ગણાઃ ।
ક્રૌઞ્ચપદા બાણશરવસુશૈલૈર્ભમૌ સભૌ ॥ ૧,૨૦૯.૩૮॥

નૌ નૌ ગોઽતિકૃતિઃ પ્રોક્તા ચ્છન્દો હ્યુત્કૃતિરુચ્યતે ।
વસ્વીશાશ્વૈર્મમતનૈઃ સ્યાદ્ભુજઙ્ગવિજૃમ્ભિતમ્ ॥ ૧,૨૦૯.૩૯॥

નનરસૈર્લગયુક્તૈશ્ચ અપવાહાખ્યકં યતિઃ ।
ગુહૈઃ ષડ્ભી રસૈર્બાણૈર્મોનાઃ ષટ્સગગા ગણાઃ ॥ ૧,૨૦૯.૪૦॥

ચણ્ડવૃત્તિપ્રપાતોઽસૌ દણ્ડકો નૌ તતોઽગરઃ ।
રફેવૃધ્દાન્તકાદસ્ય વ્યાલજીમૂતકાદયઃ ॥ ૧,૨૦૯.૪૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સમવૃત્તલક્ષણાદિનિરૂપણં નામ નવોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૦
સૂત ઉવાચ ।
સસસલગાશ્ચ વિષમે પાદે યદ્યુપચિત્રકમ્ ।
સમે ભૌ ભગગાઃ સ્યુશ્ચ દ્રુતમધ્યા ભભૌ ભગૌ ॥ ૧,૨૧૦.૧॥

ગઃ પાદે વિષમેઽન્યત્ર નજૌ જ્યૌ ચ ગણૌ સ્મૃતૌ ॥ ૧,૨૧૦.૨॥

વિષમે વેગવતી સા ગઃ સમે ભૌ ભો ગગૌ ગણાઃ ।
પાદેઽસમે તજૌ રો ગઃ સમે મસૌ જગૌ ગરુઃ ।
ભવેદ્ભદ્રવિરાટ્કેતુમતી તુ વિષમે સજૌ ॥ ૧,૨૧૦.૩॥

સગૌ સમે ભ્રૌ નગગા આખ્યાનકી ત્વથાસમે ।
તૌ જો ગગૌ સમે પાદે જતજા ગુરુકદ્વયમ્ ॥ ૧,૨૧૦.૪॥

વિપરીતાખ્યાનકં સ્યાદ્વિષમે જસ્તજૌ ગગૌ ।
તતૌ જગૌ સમે ગઃ સ્યાત્પિઙ્ગલેન હ્યુદાહૃતમ્ ॥ ૧,૨૧૦.૫॥

પાદેઽથ વિષમે ચૈવ પુષ્પિતાગ્રા નનૌ રયૌ ।

સમે નજૌ જરૌ ગશ્ચ વૈતાલીયં વદન્તિ હિ ।
વૃત્તગ્ચાપરવક્ત્રાખ્યમૌપચ્છન્દસિકં પરમ્ ॥ ૧,૨૧૦.૬॥

વાઝ્મતી રજરા યઃ સ્યાદયુગ્મે જરજા રગૌ ॥ ૧,૨૧૦.૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઽર્દ્ધસમવૃત્તલક્ષણાદિનિરૂપણં નામ દશોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૧
સૂત ઉવાચ ।
પ્રથમોઽષ્ટાક્ષરૈઃ પાદો દ્વિતીયો દ્વાદશાક્ષરૈઃ ।
તૃતીયઃ ષોડશાર્ણૈશ્ચ વિંશદ્વર્ણૈશ્ચતુર્થકઃ ॥ ૧,૨૧૧.૧॥

સામાન્યલક્ષણં પદચતુરૂર્ધ્વાભિરધસ્ય હિ ॥ ૧,૨૧૧.૧॥

આપીડઃ સર્વલઃ પ્રોક્તઃ પૂર્વપાદાન્તગદ્વયઃ ॥ ૧,૨૧૧.૨॥

દ્વિતીયેઽષ્ટાક્ષરૈઃ પાદે કલિકા પ્રથમેઽર્કજે ।
લવલી સ્યાત્તૃતીયેઽથ પૂર્વવચ્ચાષ્ટ કાક્ષરે ।
પ્રોક્તા ચામૃતધારેયં ચતુરષ્ટાક્ષરે સતિ ॥ ૧,૨૧૧.૩॥

(ઇતિ પદચતુરૂર્ધ્વપ્રકરણમ્) ।
સજૌ સલૌ ચ પ્રથમે નસજા ગો દ્વિતીયકે ।
તૃતીયે ભનભા ગશ્ચ ચતુર્થે સજસા જગૌ ॥ ૧,૨૧૧.૪॥

પૂર્વવત્સ્યાત્સૌરભકં તૃતીયેઽદ્યૌ રનૌ ભગૌ ।
લલિતગ્ચાદ્ગતાવત્સ્યાતૃતીયેંઽદ્યૌ નનૌ સસૌ ॥ ૧,૨૧૧.૫॥

(ઇત્યુદ્ગતાપ્રકરણમ્) ।
ઉપસ્થિતપ્રચુપિતં પ્રથમેઽદ્યૌ મસૌ જભૌ ।
ગૌ દ્વિતીયે સનજરા ગસ્તૃતીયે નનૌ ચ સઃ ।
નૌ નજૌ યશ્ચતુર્થે સ્યાચ્છેષ પાદાશ્ચ પૂર્વવત્ ॥ ૧,૨૧૧.૬॥

તૃતીર્યેઽદ્યૌ વિશેષશ્ચ વૃત્તં સ્યાન્નૌ સનૌ નસૌ ॥ ૧,૨૧૧.૭॥

આર્ષભં તજરાઃ પાદે તૃતીયેઽન્યચ્ચ પૂર્વવત્ ।
પૂર્વવત્પ્રથમં શેષે તજાઃ શુદ્ધવિરાડ્ભવેત્ ॥ ૧,૨૧૧.૮॥

(ઇત્યુપસ્થિતપ્રચુપિતપ્રકરણમ્) ।

વિષમાક્ષરપાદં વા પઞ્ચષટ્કાદિ યાવકમ્ ।
છન્દોઽત્ર નોક્તા ગાથેતિ દશધર્માદિવદ્ભવેત્ ॥ ૧,૨૧૧.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષમવૃત્તલક્ષણાદિનિરૂપણં નામૈકાદશોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૨
સૂત ઉવાચ ।
પ્રસ્તાર આદ્યગોઽથો લઃ પરતુલ્યોઽથ પૂર્વગઃ ।
નષ્ટમધ્યે સમેંઽકે લઃ સમેઽર્ધે વિષમે ગુરુઃ ॥ ૧,૨૧૨.૧॥

પ્રતિલોમગુણં લાદ્યં દ્વિરુદ્દિષ્ટક એકનુત્ ॥ ૧,૨૧૨.૨॥

સંખ્યા દ્વિરર્ધે રૂપે તુ શૂન્યં શૂન્યે દ્વિરીરિતમ્ ।
તાવદર્ધે તદ્ગુણિતં દ્વિર્દ્વ્યૂનન્તુ તદન્તતઃ ॥ ૧,૨૧૨.૩॥

પરે પૂર્ણં પરે પૂર્ણં મેરુઃ પ્રસ્તારતો ભવેત્ ॥ ૧,૨૧૨.૪॥

લગસંખ્યા વૃત્તસંખ્યા ચાદ્યાઙ્ગુલમથોર્ધ્વતઃ ।
સંખ્યૈવ દ્વિગુણૈકોનાચ્છન્દઃ સારોઽયમીરિતઃ ॥ ૧,૨૧૨.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાન્- આચા-
છન્દોલક્ષણં નામ દ્વાદશોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૩
સૂત ઉવાચ ।
હરેઃ શ્રુત્વાબ્રવીદ્બ્રહ્મા યથા વ્યાસાય શૌનક ।
બ્રાહ્મણાદિસમાચારં સર્વદં તે તથા વદે ॥ ૧,૨૧૩.૧॥

શ્રુતિસ્મૃતી તુ વિજ્ઞાય શ્રૌતં કર્મ સમાચરેત્ ।
શ્રૌતં કર્મ ન ચેદુક્તં તદા સ્માર્તં સમાચરેત્ ॥ ૧,૨૧૩.૨॥

તત્રાપ્યશક્તઃ કરણે સદાચારં ચરેદ્બુધઃ ।
શ્રુતિસ્મૃતી હ વિપ્રાણાં લોચને કર્મદર્શને ॥ ૧,૨૧૩.૩॥

શ્રુત્યુક્તઃ પરમો ધર્મઃ સ્મૃતિશાસ્ત્રગતોઽપરઃ ।
સિષ્ટાચારેણ સમ્પ્રાપ્તસ્ત્રયો ધર્માઃ સનાતનાઃ ॥ ૧,૨૧૩.૪॥

સત્યં દાનં દયાલોભો વિદ્યેજ્યા પૂજનં દમઃ ।
અષ્ટૌ તાનિ પવિત્રાણિ શિષ્ટાચારસ્ય લક્ષણમ્ ॥ ૧,૨૧૩.૫॥

તેજોમયાનિ પૂર્વેષાં શરીરાણીન્દ્રિયાણિ ચ ।
ન લિપ્યતે પાતકેન પદ્મપત્રમિવામ્ભસા ॥ ૧,૨૧૩.૬॥

નિવાસમુખ્યા વર્ણાનાં ધર્માચારાઃ પ્રકીર્તિતાઃ ।
સત્યં યજ્ઞસ્તપો દાનમેતદ્ધર્મસ્ય લક્ષણમ્ ॥ ૧,૨૧૩.૭॥

અદત્તસ્યાનુપાદાનં દાનમધ્યયનં જપઃ ।
વિદ્યા વિત્તં તપઃ શૌચં કુલે જન્મ ત્વરોગિતા ॥ ૧,૨૧૩.૮॥

સંસારોચ્છિત્તિહેતુશ્ચ ધર્માદેવ પ્રવર્તતે ।
ધર્માત્સુખં ચ જ્ઞાનં ચ જ્ઞાનાન્મોક્ષોઽધિગમ્યતે ॥ ૧,૨૧૩.૯॥

ઇજ્યાધ્યયનદાનાનિ યથાશાસ્ત્રં સનાતનઃ ।
બ્રહ્મક્ષત્રિયવૈશ્યાનાં સામાન્યો ધર્મ ઉચ્યતે ॥ ૧,૨૧૩.૧૦॥

યાજનાધ્યયને શુદ્ધે વિશુદ્ધાચ્ચ પ્રતિગ્રહઃ ।
વૃત્તિત્રયમિદં પ્રાહુર્મુનયઃ શ્રેષ્ઠવર્ણિનઃ ॥ ૧,૨૧૩.૧૧॥

શસ્ત્રેણાજીવનં રાજ્ઞો ભૂતાનાઞ્ચાભિરક્ષણમ્ ।
પાશુપાલ્યં કૃષિઃ પણ્યં વૈશ્યસ્યાજીવનં સ્મૃતમ્ ॥ ૧,૨૧૩.૧૨॥

શૂદ્રસ્ય દ્વિજશુશ્રૂષા દ્વિજાનામનુપૂર્વશઃ ।
ગુરૌ વાસોઽગ્નિશુશ્રૂષા સ્વાધ્યાયો બ્રહ્મચારિણઃ ॥ ૧,૨૧૩.૧૩॥

ત્રિઃ સ્નાતા સ્નાપિતા ભૈક્ષ્યં ગુરૌ પ્રાણાન્તિકી સ્થિતિઃ ।
સમેખલો જટી દણ્ડી મુણ્ડી વા ગુરુસંશ્રયઃ ॥ ૧,૨૧૩.૧૪॥

અગ્નિહોત્રોપચરણં જીવનં ચ સ્વકર્મભિઃ ।
ધર્મદારેષુ કલ્પેત પર્વવર્જં રતિક્રિયાઃ ॥ ૧,૨૧૩.૧૫॥

દેવપિત્રતિતિભ્યશ્ચ પૂજાદિષ્વનુકલ્પનમ્ ।
શ્રુતિસ્મૃત્યર્થસંસ્થાનં ધર્મોઽયં ગૃહમેધિનઃ ॥ ૧,૨૧૩.૧૬॥

જટિત્વમગ્નિહોત્રત્વં ભૂશય્યાજિનધારણમ્ ।
વને વાસઃ પયોમૂલનીવારફલવૃત્તિતા ॥ ૧,૨૧૩.૧૭॥

પ્રતિષિદ્ધાન્નિવૃત્તિશ્ચ ત્રિઃ સ્નાનં વ્રતધારિતા ।
દેવતાતિથિપૂજા ચ ધર્મોઽયં વનવાસિનઃ ॥ ૧,૨૧૩.૧૮॥

સર્વારમ્ભપરિત્યાગો ભિક્ષાન્નં વૃક્ષમૂલતા ।
નિષ્પરિગ્રહતાદ્રોહઃ સમતા સર્વજન્તુષુ ॥ ૧,૨૧૩.૧૯॥

પ્રિયાપ્રિયપરિષ્વઙ્ગેસુખદુઃખાધિકારિતા ।
સબાહ્યાભ્યન્તરે શૌચં વાગ્યમો ધ્યાનચારિતા ॥ ૧,૨૧૩.૨૦॥

સર્વેંદ્રિયસમાહારો ધારણાધ્યાનનિત્યતા ।
ભાવસંશુદ્ધિરેત્યેષ પરિવ્રાડ્ધર્મ ઉચ્યતે ॥ ૧,૨૧૩.૨૧॥

અહિંસા સૂનૃતા વાણી સત્યશૌચે ક્ષમા દયા ।
વર્ણિનાં લિઙ્ગિનાં ચૈવ સામાન્યો ધર્મ ઉચ્યતે ॥ ૧,૨૧૩.૨૨॥

યથોક્તકારિણઃ સર્વે પ્રયાન્તિ પરમાં ગતિમ્ ।
આ બોધાત્સ્વપનં યાવત્ગૃહિધર્મં ચ વચ્મિ તે ॥ ૧,૨૧૩.૨૩॥

બ્રાહ્મે મુહૂર્તે બુધ્યેત ધર્માર્થૌ ચાનુચિન્તયેત્ ।
કાયક્લેશાંશ્ચ તન્મૂલાન્વેદતત્ત્વાર્થમેવ ચ ॥ ૧,૨૧૩.૨૪॥

શર્વર્યન્તે સમુત્થાય કૃતશૌચઃ સમાહિતઃ ।
સ્નાત્વા સન્ધ્યામુપાસીત સર્વકાલમતન્દ્રિતઃ ॥ ૧,૨૧૩.૨૫॥

પ્રાતઃ સન્ધ્યામુપા સીત દન્તધાવનપૂર્વિકામ્ ।
ઉભે મૂત્રપુરીષે ચ દિવા કુર્યાદુદઙ્મુખઃ ॥ ૧,૨૧૩.૨૬॥

રાત્રૌ ચ દક્ષિણે કુર્યાદુભે સન્ધ્યે યથા દિવા ।
છાયાયામન્ધકારે વા રાત્રૌ વાહનિ વા દ્વિજઃ ॥ ૧,૨૧૩.૨૭॥

યથા તુ સમુખઃ કુર્યાત્પ્રાણબાધાભયેષુ ચ ।
ગોમયાઙ્ગારવલ્મીકફાલાકૃષ્ટે શુભે ॥ ૧,૨૧૩.૨૮॥

માર્ગોપજીવ્યચ્છાયાસુ ન મૂત્રં ચ પુરીષકમ્ ।
અન્તર્જલાદ્દેવગૃહાદ્વલ્મીકાન્મૂષિકસ્થલાત્ ॥ ૧,૨૧૩.૨૯॥

પરેષાં શૌચશિષ્ટાચ્ચ શ્મશાનાચ્ચ મૃદં ત્યજેત્ ।
એકાં લિઙ્ગે મૃદં દદ્યાદ્વામ હસ્તે મૃદં દ્વિધા ॥ ૧,૨૧૩.૩૦॥

ઉભયોર્દ્વે ચ દાતવ્યે મૂત્રશૌચં પ્રચક્ષતે ।
એકાં લિઙ્ગે ગુદે તિસ્ત્રસ્તથા વામકરે દશ ॥ ૧,૨૧૩.૩૧॥

પઞ્ચ પાદે દશૈકસ્મિન્કરયોઃ સપ્તમૃત્તિકાઃ ।

અર્ધપ્રસૃતિમાત્રા તુ પ્રથમા મૃત્તિકા સ્મૃતા ॥ ૧,૨૧૩.૩૨॥

દ્વિતીયા ચ તૃતીયા ચ તદર્ધા પરિકીર્તિતા ।
ઉપવિષ્ટસ્તુ વિણ્મૂત્રં કર્તું યસ્તુ ન વિન્દતિ ॥ ૧,૨૧૩.૩૩॥

સ કુર્યાદર્ધશૌચં તુ સ્વસ્ય શૌચસ્ય સર્વદા ।
દિવા શૌચસ્ય રાત્ર્યર્ધં યદ્ધા પાદો વિધીયતે ॥ ૧,૨૧૩.૩૪॥

સ્વસ્થસ્ય તુ યથોદ્દિષ્ટમાર્તઃ કુર્યાદ્યથાબલમ્ ।
વસા શુક્રમસૃઙ્મજ્જા લાલા વિણ્મૂત્રકર્ણવિટ્ ॥ ૧,૨૧૩.૩૫॥

શ્લેષ્માશ્રુદૂષિકા સ્વેદો દ્વાદશૈતે નૃણાં મલાઃ ।
મન્યેત યાવતા શુદ્ધિં તાવચ્છૌચં સમાચરેત્ ॥ ૧,૨૧૩.૩૬॥

પ્રમાણં શૌચસંખ્યાયા નાદિષ્ટૈરવશિષ્યતે ।
શૌચં તુ દ્વિવિધં પ્રોક્તં બાહ્યમાભ્યન્તરં તથા ॥ ૧,૨૧૩.૩૭॥

મૃજ્જલાભ્યાં સ્મૃતં બાહ્યં ભાવશુદ્ધિરથાન્તરમ્ ।
ત્રિરાચામેદપઃ પૂર્વં દ્વિઃ પ્રમૃજ્યાત્તતો મુખમ્ ॥ ૧,૨૧૩.૩૮॥

સમૃજ્યાઙ્ગુષ્ઠમૂલેન ત્રિભિરાસ્યમુપસ્પૃશેત્ ।
અઙ્ગુષ્ઠેન પ્રદેશિન્યા ઘ્રાણં પશ્ચાદનન્તરમ્ ॥ ૧,૨૧૩.૩૯॥

અઙ્ગુષ્ઠાનામિકાભ્યાં ચ ચક્ષુઃ શ્રોત્રે પુનઃ પુનઃ ।
કનિષ્ઠાઙ્ગષ્ઠયોર્નાભિં હૃદયં તુ તલેન વૈ ॥ ૧,૨૧૩.૪૦॥

સર્વાભિસ્તુ શિરઃ પશ્ચાદ્બાહૂ ચાગ્રેણ સંસ્પૃશેત્ ।
ઋચો યજૂંષિ સામાનિ ત્રિઃ પઠન્પ્રીણયેત્ક્રમાત્ ॥ ૧,૨૧૩.૪૧॥

અથર્વાઙ્ગિરસૌ પૂર્વં દ્વિઃ પ્રમાર્ષ્ટ્યથ તન્સુખમ્ ।
ઇતિહાસપુરાણાનિ વેદાઙ્ગાનિ વેદાઙ્ગાનિ યથાક્રમમ્ ॥ ૧,૨૧૩.૪૨॥

ખં મુખે નાસિકે વાયું નેત્રે સૂર્યં શ્રુતી (તીર્દિ) દિશઃ ।
પ્રાણગ્રન્થિમથો નાભિં બ્રહ્માણં હૃદયે સ્પૃશેત્ ॥ ૧,૨૧૩.૪૩॥

રુદ્રં મૂર્ધ્ના સમાલભ્ય પ્રીણાત્યથ શિખામૃષીન્ ।
બાહૂ યમેન્દ્રવરુણકુબેરવસુધાનલાન્ ॥ ૧,૨૧૩.૪૪॥

અભ્યુક્ષ્ય ચરણૌ વિષ્ણુમિન્દ્રં વિષ્ણુ કરદ્વયમ્ ।
અગ્નિર્વાયુશ્ચ સૂર્યેન્દુગિરયોઽઙ્ગુલિપર્વસુ ॥ ૧,૨૧૩.૪૫॥

ગઙ્ગાદ્યાઃ સરિતસ્તાસુ યા રેખાઃ કરમધ્યગાઃ ।
ઉષઃ કાલે તુ સમ્પ્રાપ્તે શૌચં કૃત્વા યથાર્થવત્ ॥ ૧,૨૧૩.૪૬॥

તતઃ સ્નાનરૂ઼્ કુર્વીત દન્તધાવનપૂર્વકમ્ ।
મુખે પર્યુષિતે નિત્યં ભવત્યપ્રયતો નરઃ ॥ ૧,૨૧૩.૪૭॥

તસ્માત્સર્વપ્રયત્નેન કુર્યાદ્વૈ દન્તધાવનમ્ ।
કદમ્બબિલ્વખદિરકરવીરવટાર્જુનાઃ ॥ ૧,૨૧૩.૪૮॥

યૂથી ચ બૃહતી જાતી કરઞ્જાર્કાતિમુક્તકાઃ ।
જમ્બૂમધૂકા પામાર્ગશિરીષોદુમ્બરાસનાઃ ॥ ૧,૨૧૩.૪૯॥

ક્ષીરિકણ્ટકિવૃક્ષાદ્યાઃ પ્રશસ્તા દન્તધાવને ।
કટુતિક્તકષાયાશ્ચ ધનારોગ્યસુખપ્રદાઃ ॥ ૧,૨૧૩.૫૦॥

પ્રક્ષાલ્ય ભુક્ત્વા ચ શુચૌ દેશે ત્યક્ત્વા તદાચામેત્ ।
અમાયાં ચ તથા ષષ્ઠ્યાં નવમ્યાં પ્રતિપદ્યપિ ॥ ૧,૨૧૩.૫૧॥

વર્જયેદ્દન્તકાષ્ઠન્તુ તથૈવાર્કસ્ય વાસરે ।
અભાવે દન્ત કાષ્ઠસ્ય નિષિદ્ધાયાં તથા તિથૌ ॥ ૧,૨૧૩.૫૨॥

અષાં દ્વાદશગણ્ડૂષૈઃ કુર્વીત મુખશોધનમ્ ।
પ્રાતઃ સ્નાનં પ્રશંસન્તિ દૃષ્ટાદૃષ્ટકરં હિતમ્ ॥ ૧,૨૧૩.૫૩॥

સર્વમર્હતિ શુદ્ધાત્મા પ્રાતઃ સ્નાયી જપાદિકમ્ ।
અત્યન્તમલિનઃ કાયો નવચ્છિદ્રસમન્વિતઃ ॥ ૧,૨૧૩.૫૪॥

સ્ત્રવત્યેષ દિવા રાત્રૌ પ્રાતઃ સ્નાનં વિશોધનમ્ ।
મનઃ પ્રસાદજનનં રૂપસૌભાગ્યવર્ધનમ્ ॥ ૧,૨૧૩.૫૫॥

શોકદુઃખપ્રશમનં ગઙ્ગાસ્નાનવદાચરેત્ ।
અદ્ય હસ્તે તુ નક્ષત્રે દશમ્યાં જ્યેષ્ઠકે સિતે ॥ ૧,૨૧૩.૫૬॥

દશપાપ હરાયાં ચ અદત્વા દાનકલ્મષમ્ ।
વિરુદ્ધાચરણં હિંસા પરદારોપસેવનમ્ ॥ ૧,૨૧૩.૫૭॥

પારુષ્યાનૃતપૈશુન્યમસમ્બદ્ધાભિભાષણમ્ ।
પરદ્રવ્યાભિધાનં ચ મનસાનિષ્ટચિન્તનમ્ ॥ ૧,૨૧૩.૫૮॥

એતદ્દશાઘઘાતાર્થં ગઙ્ગાસ્નાનં કરોમ્યહમ્ ।
પ્રાતઃ સંક્ષેપતઃ સ્નાનં વાનપ્રસ્થગૃહસ્થયોઃ ॥ ૧,૨૧૩.૫૯॥

યતેસ્ત્રિષવણં સ્નાનં સકૃત્ત બ્રહ્મચારિણઃ ।
આચમ્ય તીર્થમાવાહ્ય સ્નાયાત્સ્મૃત્વાવ્યયં હરિમ્ ॥ ૧,૨૧૩.૬૦॥

તિસ્રઃ કોટ્યસ્તુ વિજ્ઞેયા મન્દેહા નામ રાક્ષસાઃ ।
ઉદયન્તં દુરાત્માનઃ સૂર્યમિચ્છન્તિ ખાદિતુમ્ ॥ ૧,૨૧૩.૬૧॥

સ હન્તિ સૂર્યં સન્ધ્યાયાં નોપાસ્તિં કુરુતે તુ યઃ ।
દહન્તિ મન્ત્રપૂતેન તોયેનાનલરૂપિણા ॥ ૧,૨૧૩.૬૨॥

અહોરાત્રસ્ય યઃ સન્ધિઃ સા સન્ધ્યા ભવતીતિ હ ।
દ્વિનાડિકા ભવેત્સન્ધ્યા યાવદ્ભવતિ દર્શનમ્ ॥ ૧,૨૧૩.૬૩॥

ગન્ધ્યાકર્માવસાને તુ સ્વયં હોમો વિધીયતે ।
સ્વયં હોમફલં યત્તુ તદન્યેન ન જાયતે ॥ ૧,૨૧૩.૬૪॥

ઋત્વિક્પુત્રો ગુરુર્ભ્રાતા ભાગિનેયોઽથ વિટ્પતિઃ ।
એભિરેવ હુતં યત્તુ તદ્ધુતં સ્વયમેવ હિ ॥ ૧,૨૧૩.૬૫॥

બ્રહ્મા વૈ ગાર્હપત્યાગ્નિર્દક્ષણાગ્નિસ્ત્રિલોચનઃ ।
વિષ્ણુરાહવનીયાગ્નિઃ કુમારઃ સત્ય ઉચ્યતે ॥ ૧,૨૧૩.૬૬॥

કૃત્વા હોમં યથાકાલં સૌરાન્મન્ત્રાઞ્જપેત્તતઃ ।
સમાહિતાત્મા સાવિત્રીં પ્રણવં ચ યથોદિતમ્ ॥ ૧,૨૧૩.૬૭॥

પ્રણવે નિત્યયુક્તસ્ય વ્યાહૃતીષુ ચ સપ્તસુ ।
ત્રિપદાયાં ચ સાવિત્ર્યાં ન ભયં વિદ્યતે ક્વચિત્ ॥ ૧,૨૧૩.૬૮॥

ગાયત્રીં યો જપેન્નિત્યં કલ્યમુત્થાય માનવઃ ।
લિપ્યતે ન સ પાપેન પદ્મપત્રમિવામ્ભસા ॥ ૧,૨૧૩.૬૯॥

શ્વેતવર્ણા સમુદ્દિષ્ટા કૌશેયવસના તથા ।
અક્ષસૂત્રધરા દેવી પદ્માસનગતા શુભા ॥ ૧,૨૧૩.૭૦॥

આવાહ્ય યજુપાનેન તેજોઽસીતિ વિધાનતઃ ।
એતદ્યજુઃ પુરા દૈવૈર્દૃષ્ટિદર્શનકાઙ્ક્ષિભિઃ ॥ ૧,૨૧૩.૭૧॥

આદિત્યમણ્ડલાન્તઃ સ્થાં બ્રહ્મલોકસ્થિતામપિ ।
તત્રાવાહ્ય જપિત્વાતો નમસ્કારાદ્વિસર્જયેત્ ॥ ૧,૨૧૩.૭૨॥

પૂર્વાહ્ણ એવ કુર્વીત દેવતાનાં ચ પૂજનમ્ ।

ન વિષ્ણોઃ પરમો દેવસ્તસ્માત્તં પૂજયેત્સદા ॥ ૧,૨૧૩.૭૩॥

બ્રહ્મવિષ્ણુશિવાન્દેવાન્ન પૃથગ્ભાવયેત્સુધીઃ ।
લોકેઽસ્મિન્મઙ્ગલાન્યષ્ટૌ બ્રાહ્મણો ગૌર્હુતાશનઃ ॥ ૧,૨૧૩.૭૪॥

હિરણ્યં સર્પિરાદિત્ય આપો રાજા તથાષ્ટમઃ ।
એતાનિ સતતં પશ્યેદર્ચયેચ્ચ પ્રદક્ષિણમ્ ॥ ૧,૨૧૩.૭૫॥

વેદસ્યાધ્યયનં પૂર્વં વિચારોભ્યસનં જપઃ ।
તદ્દાનં ચૈવ શિષ્યભ્યો વેદાભ્યાસો હિ પઞ્ચધા ॥ ૧,૨૧૩.૭૬॥

વેદાર્થં યજ્ઞશાસ્ત્રાણિ ધર્મશાસ્ત્રાણિ ચૈવ હિ ।
મૂલ્યેન લેખયિત્વા યો દદ્યાદ્યાતિ સ વૈદિકમ્ ॥ ૧,૨૧૩.૭૭॥

ઇતિહા સપુરાણાનિ લિખિત્વાયઃ પ્રયચ્છતિ ।
બ્રહ્મદાનસમં પુણ્યં પ્રાપ્નોતિ દ્વિગુણીકૃતમ્ ॥ ૧,૨૧૩.૭૮॥

મૃતીયે ચ તથા ભાગે પોષ્યવર્ગાર્થસાધનમ્ ।
માતા પિતા ગુરુર્ભ્રાતા પ્રજા દીનાઃ સમાશ્રિતાઃ ॥ ૧,૨૧૩.૭૯॥

અભ્યાગતોઽતિથિશ્ચાગ્નિઃ પોષ્યવર્ગા ઉદાહૃતઃ ।
ભરણં પોષ્યવર્ગસ્ય પ્રશસ્તં સ્વર્ગસાધનમ્ ॥ ૧,૨૧૩.૮૦॥

ભરણં પોષ્ય વર્ગસ્ય તસ્માદ્યત્નેન કારયેત્ ।
સ જીવતિ વરશ્ચૈકો બહુભિર્યોપજીવ્યતિ ॥ ૧,૨૧૩.૮૧॥

જીવન્તો મૃતકાસ્ત્વન્યે પુરુષાઃ સ્વોદરમ્ભરાઃ ।
સ્વકીયોદરપૂર્તિશ્ચ કુક્કુરસ્યાપિ વિદ્યતે ॥ ૧,૨૧૩.૮૨॥

અર્થેભ્યોઽપિ વિવૃદ્ધેભ્યઃ સમ્ભૂતેભ્યસ્તતસ્તતઃ ।
ક્રિયાઃ સર્વાઃ પ્રવર્તન્તે પર્વતેભ્ય ઇવાપગાઃ ॥ ૧,૨૧૩.૮૩॥

સર્વરત્નાકરા ભૂમિર્ધાન્યાનિ પશવઃ સ્ત્રિયઃ ।
અર્થસ્ય કાર્યયોગિત્વાદર્થ ઇત્યભિધીયતે ॥ ૧,૨૧૩.૮૪॥

અદ્રોહેણૈવ ભૂતાનામલ્પદ્રોહેણ વા પુનઃ ।
યા વૃત્તિસ્તાં સમાસ્થાય વિપ્રો જીવેદનાપદિ ॥ ૧,૨૧૩.૮૫॥

ધનં તુ ત્રિવિધં જ્ઞેયં શુક્લં શબલમેવ ચ ।
કૃષ્ણં ચ તસ્ય વિજ્ઞેયો વિભાગઃ સપ્તધા પૃથક્ ॥ ૧,૨૧૩.૮૬॥

ક્રમાયત્તં પ્રીતિદત્તં પ્રાપ્તં ચ સહ ભાર્યયા ।
અવિશેષેણ સર્વેષાં વર્ણાનાં ત્રિવિધં ધનમ્ ॥ ૧,૨૧૩.૮૭॥

વૈશેષિકં ધનં દૃષ્ટં બ્રાહ્મણસ્ય ત્રિલક્ષણમ્ ।
યાજનાધ્યાપને નિત્યં વિશુદ્ધશ્ચ (દ્ધાચ્ચ) પ્રતિગ્રહઃ ॥ ૧,૨૧૩.૮૮॥

ત્રિવિધં ક્ષત્રિયસ્યાપિ પ્રાહુર્વૈશેષિકં ધનમ્ ।
શુદ્ધાર્થં લબ્ધકરજં દણ્ડાપ્તં જયજં તથા ॥ ૧,૨૧૩.૮૯॥

વૈશેષિકં ધનં દૃષ્ટં વૈશ્યસ્યાપિ વિલક્ષણમ્ ।
કૃષિગોરક્ષવાણિજ્યં શૂદ્રસ્યૈભ્યસ્ત્વનુગ્રહાત્ ॥ ૧,૨૧૩.૯૦॥

કુસીદકૃષિવાણિજ્યં પ્રકુર્વીત સ્વયં પરમ્(કૃતમ્) ।
આપત્કાલે સ્વયં કુર્વન્નૈનસા યુજ્યતે દ્વિજઃ ॥ ૧,૨૧૩.૯૧॥

બહવો વર્તનોપાયા ઋષિભિઃ પરિકીર્તિતાઃ ।
સર્વેષામપિ ચૈવૈષાં કુસીદમધિકં વિદુઃ ॥ ૧,૨૧૩.૯૨॥

અનાવૃષ્ટ્યા રાજભયાન્મૂષિકાદ્યૈરુપદ્રવૈઃ ।
કૃષ્યાદિકે ભવેદ્બાધા સા કુસીદે ન વિદ્યતે ॥ ૧,૨૧૩.૯૩॥

શુક્લપક્ષે તથા કૃષ્ણે રજન્યાં દિવસેપિ વા ।
ઉષ્ણે વર્ષતિ શીતે વા વર્ધનં ન નિવર્તતે ॥ ૧,૨૧૩.૯૪॥

દેશં ગતાનાં યા વૃદ્ધિર્નાનાપણ્યોપજીવિનામ્ ।
કુસીદં કુર્વતઃ સમ્યક્સંસ્થિતસ્યૈવ જાયતે ॥ ૧,૨૧૩.૯૫॥

લબ્ધલાભઃ પિતૄન્દેવાન્બ્રાહ્મણાંશ્ચૈવ પૂજયેત્ ।
તે તૃપ્તાસ્તસ્ય તદ્દોષં શમયન્તિ ન સંશયઃ ॥ ૧,૨૧૩.૯૬॥

વણિક્કુસીદં દદ્યાદ્યો વસ્ત્રં ગાઙ્ગાચ્ચનાદિકમ્ ।
કૃષીવલોऽન્નપાનાદિયાનશય્યાસનાનિ ચ ॥ ૧,૨૧૩.૯૭॥

રાજભ્યો વિંશતિં દત્ત્વા પશુસ્વર્ણાદિકં શતમ્ ।
પાદેનાસ્ય ચ યાવજ્યં કુર્યાત્સંચયમાત્મવાન્ ॥ ૧,૨૧૩.૯૮॥

અર્ધેન ચાત્મભરણં નિત્યનૈમિત્તિકાંન્વિતમ્ ।
પાદં ચેત્યર્થયામસ્ય મૂલભૂતં વિવર્ધયેત્ ॥ ૧,૨૧૩.૯૯॥

વિદ્યા શિલ્પં ભૂતિઃ સેવા ગોરક્ષા વિપણિઃ કૃષિઃ ।
વૃત્તિર્ભૈક્ષ્યં કુસીદં ચ દશ જીવનહેતવઃ ॥ ૧,૨૧૩.૧૦૦॥

પ્રતિગ્રહાર્જિતા વિપ્રે ક્ષત્રિયે શસ્ત્રનિર્જિતા ।
વૈશ્યે ન્યાયાર્જિતાઃ સ્વાર્થાઃ શૂદ્રે શુશ્રૂષયાર્જિતાઃ ॥ ૧,૨૧૩.૧૦૧॥

નદી બહૂદકા શાકમૃત્પર્ણાનિ સમિત્કુશાઃ ।
આગ્નેયો બ્રહ્મઘોષશ્ચ વિપ્રાણાં ધનમુત્તમમ્ ॥ ૧,૨૧૩.૧૦૨॥

અયાચિતોપપન્ને તુ નાસ્તિ દોષઃ પ્રતિગ્રહે ।
અમૃતં તદ્વિદુર્દેવાસ્તસ્માત્તન્નૈવ વર્જયેત્ ॥ ૧,૨૧૩.૧૦૩॥

ગુરુદ્રવ્યાંશ્ચૌજ્જિહીર્ષુરર્ચિષ્યન્દે વતાતિથીન્ ।
સર્વતઃ પ્રતિગૃહ્ણીયાન્ન તુષ્યેત્તુ સ્વયં તતઃ ॥ ૧,૨૧૩.૧૦૪॥

સાધુતઃ પ્રતિગૃહ્ણીયાદથ વાસાધુતો દ્વિજઃ ।
ગુણવાનલ્પદોષશ્ચ નિર્ગુણો હિ નિમજ્જતિ ॥ ૧,૨૧૩.૧૦૫॥

એવં ત્વક્ષવૃત્ત્યા વા કૃત્વા ભરણમાત્મનઃ ।
કુર્યાદ્વિશુદ્ધિં પરતઃ પ્રાયશ્ચિત્તં દ્વિજોત્તમઃ ॥ ૧,૨૧૩.૧૦૬॥

ચતુર્થે ચ તથા ભાગે સ્નાનાર્થં મૃદ માહરેત્ ।
તિલપુષ્પકુશાદીનિ સ્નાનં ચાકૃત્રિમે જલે ॥ ૧,૨૧૩.૧૦૭॥

નિત્યં નૈમિત્તિકં કામ્યં ક્રિયાઙ્ગં મલકર્ષણમ્ ।
માર્જનાચમાવગાહાશ્ચાષ્ટસ્નાનં પ્રકીર્તિતમ્ ॥ ૧,૨૧૩.૧૦૮॥

અસ્નાતસ્તુ પુમાન્નાર્હે જપાગ્નિહવનાદિષુ ।
પ્રાતઃ સ્નાનં તદર્થં તુ નિત્યસ્નાનં પ્રકીર્તિતમ્ ॥ ૧,૨૧૩.૧૦૯॥

ચાણ્ડાલશવવિષ્ઠાદ્યાન્સ્પૃષ્ટ્વા સ્નાનં રજસ્વલામ્ ।
સ્નાનાર્હસ્તુ યદા સ્નાતિ સ્નાનં નૈમિત્તિકં હિ તત્ ॥ ૧,૨૧૩.૧૧૦॥

પુષ્યસ્નાનાદિકં સ્નાનં દૈવજ્ઞવિધિચોદિતમ્ ।
તદ્ધિ કામ્યં સમુદ્દિષ્ટં નાકામસ્તત્પ્રયોજયેત્ ॥ ૧,૨૧૩.૧૧૧॥

જપ્તુકામઃ પવિત્રાણિ અર્ચિષ્યન્દેવતાતિથીન્ ।
સ્નાનં સમાચરેદ્યસ્તુ ક્રિયાઙ્ગં તચ્ચ કીર્તિતમ્ ॥ ૧,૨૧૩.૧૧૨॥

મલાપકર્ષણાર્થાય પ્રવૃત્તિસ્તત્ર નાન્યથા ।
સરઃ સુદેવખાતેષુ તીર્થેષુ ચ નદીષુ ચ ॥ ૧,૨૧૩.૧૧૩॥

સ્નાનમેવ ક્રિયા યસ્માત્ક્રિયાસ્નાનમતઃ પરમ્ ।

અદ્ભિર્ગાત્રાણિ શુધ્યન્તિ તીર્થસ્નાનાત્ફલં લભેત્ ॥ ૧,૨૧૩.૧૧૪॥

માર્જનાન્મજ્જનૈર્મન્ત્રૈઃ પાપમાશુ પ્રણશ્યતિ ।
નિત્યં નૈમિત્તિકં ચાપિ ક્રિયાઙ્ગં મલકર્ષણમ્ ॥ ૧,૨૧૩.૧૧૫॥

તીર્થાભાવે તુ કર્તવ્યમુષ્ણોદકપરોદકૈઃ ।
ભૂમિષ્ઠાદુદ્ધૃતં પુણ્યં તતઃ પ્રસ્રવણોદકમ્ ॥ ૧,૨૧૩.૧૧૬॥

તતોઽપિ સારસં પુણ્યં તસ્માન્નાદેયમુચ્યતે ।
તીર્થતોયં તતઃ પુણ્યં ગાગં પુણ્યં તુ સર્વતઃ ॥ ૧,૨૧૩.૧૧૭॥

ગાગં પયઃ પુનાત્યાશુ પાપમામરણાન્તિકમ્ ।
ગયાયાં ચ કુરુક્ષેત્રે યત્તોયં સમુપસ્થિતમ્ ॥ ૧,૨૧૩.૧૧૮॥

તસ્માત્તુ ગાઙ્ગમપરં જાનીયાત્તોયમુત્તમમ્ ।
પુત્રજન્મનિ યોગેષુ તથા સંક્રમણે રવેઃ ॥ ૧,૨૧૩.૧૧૯॥

રાહોશ્ચ દર્શને સ્નાનં પ્રશસ્તં નિશિ નાન્યથા ।
ઉષસ્યુષસિ યત્સ્નાનં સન્ધ્યાયામુદિતે રવૌ ॥ ૧,૨૧૩.૧૨૦॥

પ્રાજાપત્યેન તત્તુલ્યં મહાપાતકનાશનમ્ ।
યત્ફલં દ્વાદશાબ્દાનિ પ્રાજાપત્યે કૃતે ભવેત્ ॥ ૧,૨૧૩.૧૨૧॥

પ્રાતઃ સ્નાયી તદાપ્નોતિ વર્ષેણ શ્રદ્ધયાન્વિતઃ ।
ય ઇચ્છેદ્વિપુલાન્ભોગાંશ્ચન્દ્રસૂર્યગ્રહોપમાન્ ॥ ૧,૨૧૩.૧૨૨॥

પ્રાતઃ સ્નાયી ભવેન્નિત્યં માસૌ દ્વૌ માઘફાલ્ગુનૌ ।
યસ્તુ માઘં સમાસાદ્ય પ્રાતઃ સ્નાયી હવિષ્યભુક્ ॥ ૧,૨૧૩.૧૨૩॥

ઇતિપાપં મહાઘોરં માસાદેવ વ્યપોહતિ ।
માતરં પિતરં વાપિ ભ્રાતરં સુહૃદં ગુરુમ્ ॥ ૧,૨૧૩.૧૨૪॥

યમુદ્દિશ્ય નિમજ્જેત દ્વાદશાંશં લભેત્તુ સઃ ।
તુષ્યત્યામલકૈર્વિષ્ણુરેકાદશ્યા વિશેષતઃ ॥ ૧,૨૧૩.૧૨૫॥

શ્રીકામઃ સર્વદા સ્નાનં કુર્વીતામલકૈર્નરઃ ।
સન્તાપઃ કીર્તિરલ્પાયુર્ધનં નિધનમેવ ચ ॥ ૧,૨૧૩.૧૨૬॥

આરોગ્યં સર્વકામાપ્તિરભ્યઙ્ગાદ્ભાસ્કરાદિષુ ।
ઉપોષિતસ્ય વ્રતિનઃ કૃત્તકેશસ્ય નાપિતૈઃ ॥ ૧,૨૧૩.૧૨૭॥

તાવચ્છ્રીસ્તિષ્ઠતિ પ્રીતા યાવત્તૈલં ન સંસ્પૃશેત્ ।
એવં સ્નાત્વા પિતૄન્દેવાન્મનુષ્યાંસ્તર્પયેન્નરઃ ॥ ૧,૨૧૩.૧૨૮॥

નાભિમાત્રે જલે સ્થિત્વા ચિન્તયેદૂર્જમાનસઃ ।
આગચ્છન્તુ મે પિતર ઇમં ગૃહ્ણન્ત્વપોઞ્જલિમ્ ॥ ૧,૨૧૩.૧૨૯॥

ત્રીંસ્ત્રીનેવાઞ્જલીન્દદ્યાદાકાશે દક્ષિણે તથા ।
વસિત્વા વસનં શુષ્કં સ્થલસ્થા સ્તર્ણબર્હિષિ ॥ ૧,૨૧૩.૧૩૦॥

વિધિજ્ઞાસ્તર્પણં કુર્યુર્ન પાત્રે તુ કદાચન ।
યદપાં ક્રૂરમાંસાત્તુ યદમેધ્યં તુ કિઞ્ચન ॥ ૧,૨૧૩.૧૩૧॥

અશાન્તં મલિનં યચ્ચ તત્સર્વમપગચ્છતુ ।
ગૃહીત્વાનેન મન્ત્રેણ તોયં સવ્યેન પાણિના ॥ ૧,૨૧૩.૧૩૨॥

પ્રક્ષિપોદ્દિશિ નૈરૃત્યાં રક્ષોઽપહતયે તુ તત્ ।
નિષિદ્ધભક્ષણાદ્યત્તુ પાપાદ્યચ્ચ પ્રતિગ્રહાત્ ॥ ૧,૨૧૩.૧૩૩॥

દુષ્કૃતં યચ્ચ મે કિઞ્ચિદ્વાઙ્મનઃ કાયકર્મભિઃ ।
પુનાતુ મે તદિન્દ્રસ્તુ વરુણઃ સબૃહસ્પતિઃ ॥ ૧,૨૧૩.૧૩૪॥

સવિતા ચ ભગશ્ચૈવ મુનયઃ સનકાદયઃ ।
આબ્રહ્મસ્તમ્બપર્યન્તં જગત્તૃપ્યત્વિતિ બ્રુવન્ ॥ ૧,૨૧૩.૧૩૫॥

ક્ષિપેદબઞ્જલીંસ્ત્રીસ્તુ કુર્વન્સંક્ષેપતર્પણમ્ ।
સુરાણામર્ચનં કુર્યાદ્બ્રહ્મા દીનામમત્સરી ॥ ૧,૨૧૩.૧૩૬॥

બ્રાહ્મવૈષ્ણવરૌદ્રૈશ્ચ સાવિત્રૈર્મૈત્રવારુણૈઃ ।
તલ્લિઙ્ગૈરર્ચયેન્મન્ત્રૈઃ સર્વદેવાન્નમસ્ય ચ ॥ ૧,૨૧૩.૧૩૭॥

નમસ્કારેણ પુષ્પાણિ વિન્યસેત્તુ પૃથક્પૃથક્ ।
સર્વદેવમયં વિષ્ણું ભાસ્કરં ચાપ્યથાર્ચયેત્ ॥ ૧,૨૧૩.૧૩૮॥

દદ્યાત્પુરુષસૂક્તેન યઃ પુષ્પાણ્યપ એવ વા ।
અર્ચિતં સ્યાજ્જગાદિદં તેન સર્વં ચરાચરમ્ ॥ ૧,૨૧૩.૧૩૯॥

અન્યૈશ્ચ તાન્ત્રિકૈર્મન્ત્રૈઃ પૂજયેચ્ચ જનાર્દનમ્ ।
આદાવર્ઘ્યં પ્રદાતવ્યં તતઃ પશ્ચાદ્વિલેપનમ્ ॥ ૧,૨૧૩.૧૪૦॥

તતઃ પુષ્પાઞ્જલિં ધૂપમુ પહારફલાનિ ચ ।
સ્નાનમન્તર્જલે ચૈવ માર્જનાચમનં તથા ॥ ૧,૨૧૩.૧૪૧॥

જલાભિમન્ત્રણં યચ્ચ તીર્થસ્ય પરિકલ્પયેત્ ।
અઘમર્ષણસૂક્તેન ત્રિવારં ત્વેવ નિત્યશઃ ॥ ૧,૨૧૩.૧૪૨॥

સ્નાને ચરિતમિત્યેતત્સમુદ્દિષ્ટં મહાત્મભિઃ ।
બ્રહ્મક્ષત્રવિશાં ચૈવ મન્ત્રવત્સ્નાનમિષ્યતે ॥ ૧,૨૧૩.૧૪૩॥

તૂષ્ણીમેવ તુ શૂદ્રસ્ય સનમસ્કારકં સ્મૃતમ્ ।
અધ્યાપનં બ્રહ્મયજ્ઞઃ પિતૃયજ્ઞસ્તુ તર્પણમ્ ॥ ૧,૨૧૩.૧૪૪॥

હોમો દૈવી બલિર્ભૌતો ન યજ્ઞોઽતિથિપૂજનમ્ ।
ગવા ગોષ્ઠે દશગુણં અગ્ન્યગારે શતાધિકમ્ ॥ ૧,૨૧૩.૧૪૫॥

સિદ્ધક્ષેત્રેષુ તીર્થેષુ દેવતાયતનેષુ ચ ।
સહસ્રશતકોટીનામનન્તં વિષ્ણુસન્નિધૌ ॥ ૧,૨૧૩.૧૪૬॥

પઞ્ચમે ચ તથા ભાગે સંવિભાગો યથાર્થતઃ ।
પિતૃદે વમનુષ્યાણાં કોટીનાં ચોપદિશ્યતે ॥ ૧,૨૧૩.૧૪૭॥

બ્રાહ્મણેભ્યઃ પ્રદાયાગ્ર યઃ સુહૃદ્ભિઃ સહાશ્નુતે ।
સ પ્રેત્ય લભતે સ્વર્ગમન્નદાનં સમાચરન્ ॥ ૧,૨૧૩.૧૪૮॥

પૂર્વં મધુરમશ્રીયાલ્લવણામ્લૌ ચ મધ્યતઃ ।
કટુતિક્તકષાયાંશ્ચ પયશ્ચૈવ તથાન્તતઃ ॥ ૧,૨૧૩.૧૪૯॥

શાકં ચ રાત્રૌ ભૂમિષ્ઠમત્યન્તં ચ વિવર્જયેત્ ।
નચૈકરસસેવાયાં પ્રસજ્જેત કદાચન ॥ ૧,૨૧૩.૧૫૦॥

સમૃતં બ્રાહ્મણસ્યાન્નં ક્ષત્રિયાન્નં પયઃ સ્મૃતમ્ ।
વૈશ્યસ્ય ચાન્નમેવાન્નં શૂદ્રાન્નં રુધિરં સ્મૃતમ્ ॥ ૧,૨૧૩.૧૫૧॥

અમાવાસી વસેદત્ર એકહાયનમેવ વા ॥ ૧,૨૧૩.૧૫૨॥

તત્ર શ્રીશ્ચૈવ લક્ષ્મીશ્ચ વસતે નાત્ર સંશયઃ ।
ઉદરે ગાર્હપત્યાગ્નિઃ પૃષ્ઠદેશે તુ દક્ષિણઃ ॥ ૧,૨૧૩.૧૫૩॥

આસ્યે ચાહવનીયોઽગ્નિઃ સત્યઃ પર્વ ચ મૂર્ધનિ ।
યઃ પઞ્ચાગ્નીનિમાન્વેદ આહિતાગ્નિઃ સ ઉચ્યતે ॥ ૧,૨૧૩.૧૫૪॥

શરિરમાપઃ સોમં ચ વિવિધં ચાન્નમુચ્યતે ।
પ્રાણો હ્યગ્નિસ્તથાદિત્યસ્ત્રિભોક્તા એક એવ તુ ॥ ૧,૨૧૩.૧૫૫॥

અન્નં બલાય મે ભૂમેરપામગ્ન્યનિલસ્ય ચ ।
ભવત્યેતત્પરિણતૌ મમાપ્યવ્યાહતં સુખમ્ ॥ ૧,૨૧૩.૧૫૬॥

હસ્તેન પરિમાર્જ્યાથ કુર્યાત્તામ્બૂલભક્ષણમ્ ।
શ્રવણં ચેતિહાસસ્ય તત્કુર્યાત્સુસમાહિતઃ ॥ ૧,૨૧૩.૧૫૭॥

ઇતિહાસપુરાણાદ્યૈઃ ષષ્ઠસપ્તમકેનયેત્ ।
તતઃ સન્ધ્યામુપાસીત સ્નાત્વા વૈ પશ્ચિમાં નરઃ ॥ ૧,૨૧૩.૧૫૮॥

એતદ્વા દિવસે પ્રોક્તમનુષ્ઠાનં મયા દ્વિજ ।
આચારં યઃ પઠેદ્વિદ્વાઞ્છૃણુયાત્સ દિવંવ્રજેત્ ।
આચારાદિર્ધર્મકર્તા કેશવો હિ સ્મૃતો દ્વિજ ॥ ૧,૨૧૩.૧૫૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પઞ્ચોત્તરદ્વિશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૪
બ્રહ્મોવાચ ।
અથ સ્નાનવિધિં વક્ષ્યે સ્નાનમૂલા ક્રિયા યતઃ ।
મૃદ્ગોમયતિલાન્દર્ભાન્પુષ્પાણિ સુરભીણિ ચ ॥ ૧,૨૧૪.૧॥

આહરેત્સ્નાનકાલે ચ સ્નાનાર્થો પ્રયતઃ શુચિઃ ।
ગન્ધોદકાન્તં વિવિક્તે (ધં) સ્થાપયેત્તાન્યથ ક્ષિતૌ ॥ ૧,૨૧૪.૨॥

ત્રિધા કૃત્વા મૃદં તાં તુ ગોમયં ચ વિચક્ષણઃ ।
અદ્ભિર્મૃદ્ભિશ્ચ ચરણૌ પ્રક્ષાલ્યાથ કરૌ તથા ॥ ૧,૨૧૪.૩॥

ઉપવીતી બદ્ધશિખઃ સમ્યગાચમ્ય વાગ્યતઃ ।
ઉરું રાજેત્યૃચા તોયમુપસ્થાય પ્રદક્ષિણમ્ ॥ ૧,૨૧૪.૪॥

આવર્તયેત્તદુદકં યે તે શતમિતિત્ર્યૃચા ॥ ૧,૨૧૪.૫॥

ૐ ઉરું હિ રાજા વરુણશ્ચકાર સૂર્યાય પન્થાનમન્વેત વા ।
પ્રતિધાતા ચ વક્તારસ્તાહૃદયાવિપશ્ચિત્ ।
નમોऽગ્ન્યરુણાયા ભિષ્ટુતોવરુણસ્ય પાશઃ ।
વરુણાય નમઃ ॥ ૧,૨૧૪.૬॥

ॐ યે તે શતં વરુણયે સહસ્રં યજ્ઞિયાઃ પાશા વિતતા મહાન્તઃ ।
તેભિર્નો અદ્ય સવિતોત વિષ્ણુર્વિશ્વે મુઞ્ચન્તુ મરુતઃ સ્વર્કાઃ સ્વાહા ।
સુમિત્રિયાન ઇત્યબઞ્જલિમાકૃત્યોત્તરેણ તોયં પશ્ચાદ્વિરાજ્ય ચૈવ વિનિઃ ક્ષિપેત્ ।
ॐ સુમિત્રિયા ન આપ ઓષધયઃ સન્તુ ।
દુર્મિત્રિયાસ્તસ્મૈ સન્તુ યોઽસ્માન્દ્વેષ્ટિ યઞ્ચ વયં દ્વિષ્મઃ ॥ ૧,૨૧૪.૭॥

પાદૌ કટિં ચૈવ પૂર્વં મૃદ્ભિસ્ત્રિભિસ્ત્રિભિઃ ।
પ્રક્ષાલ્ય હસ્તા વાચમ્ય નમસ્કૃત્ય જલં તતઃ ॥ ૧,૨૧૪.૮॥

ॐ ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિધે પદમ્સમૂઢમસ્ય પાંસુરે ।
મહાવ્યાહૃતિભિઃ પશ્ચાદાચામેત્પ્રયતોઽપિ સન્ ॥ ૧,૨૧૪.૯॥

માર્જયેદ્વૈ મૃદાઙ્ગાનિ ઇદં વિષ્ણુરિતિ ત્વૃચા ।
ભાસ્કરાભિમુખો મજ્જેદાપો અસ્માનિતિત્યૃચા ॥ ૧,૨૧૪.૧૦॥

ॐ આપો અસ્માન્માતરઃ શુન્ધયન્તુ ઘૃતેન નો ઘૃતષ્વઃ પુનન્તુ ।
વિશ્વં હિ રિપ્રં પ્રવહન્તિ દેવીરુદિદાભ્યઃ શુચિરાપૂત એમિ ॥ ૧,૨૧૪.૧૧॥

તતોઽવૃઘૃષ્ય પાત્રાણિ નિમજ્યોન્મજ્ય વૈ શનૈઃ ।
ગોમયેન વિલિપ્યાથ માનસ્તોક ઇત્યૃચા ॥ ૧,૨૧૪.૧૨॥

ॐ માનસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ ।
મા નો વીરાન્રુદ્રભામિનોઽબધીર્હવિષ્મન્તઃ સદમિત્વા હવામહે ॥ ૧,૨૧૪.૧૩॥

તતોઽભિષિઞ્ચેન્મન્ત્રૈસ્તુ વરુણૈસ્તુ યથાક્રમમ્ ।
ઇમમે વરુણે દ્વાભ્યાં ત્વન્નઃ સત્વન્ન ઇત્યપિ ॥ ૧,૨૧૪.૧૪॥

આપો ત્વન્તુમસીતિ ચ મુઞ્ચન્ત્વવભૃતેતિ ચ ।
ॐ ઇમમે વરુણ શ્રુધીહવમદ્યા ચ મૃડયત્વા મવસ્યુરાચકે ॥ ૧,૨૧૪.૧૫॥

ॐ તત્ત્વયામિ બ્રહ્મણા વન્દમાનસ્તદાશાસ્તે યજમાનો હવિર્ભિઃ ।
અહેડમાનો વરુણેહ બોધ્યુરુશં સમાન આયુઃ પ્રમોષીઃ ।
ॐ ત્વન્નો અગ્ને વરુણસ્ય વિદ્વાન્દેવસ્ય હેડો અવયાસિસીષ્ઠાઃ ।
યજિષ્ઠો વહ્નિતમઃ શોશુચાનો વિશ્વા દ્વેષાંસિપ્રમુમુગ્ધ્યસ્મત્સ્વાહા ।
ॐ સ ત્વન્નો અગ્નેવમો ભવતી નેદિષ્ઠો અસ્યા ઉષસોવ્યુષ્ટૌ ।
અવયક્ષ્વનો વરુણં રરાણો વીહિમૃડીકં સુહવો ન એધિ ।
ॐ આપો નૌષધિ હિંસાર્ધમ્નો રાજસ્તતો વરુણો નોમુઞ્ચા યદાહરઘ્યા
ઇતિ વરુણેતિ શપાર્મહે તતો વરુણ નો મુઞ્ચ ।

ॐ ઉદુત્તમં વરુણ પાશમસ્મદવાધમં વિમધ્યમંશ્રથાય ।
અથાવયમાદિત્યવ્રતે તવાનાગસો અદિતયે સ્યામ ।
મુઞ્ચન્તુમામપ્યથાદ્વરુણસ્ય ત્વત્ ।
અહો યમસ્ય પત્નીમાનઃ સર્વસ્માદેવ કિલ્બિષાત્ ।
અવભૃથનિચં પુનર્વિચેરુસિ નિત્યં પ્રન્નઃ ।
અવદેવૈર્દેવકૃતા મનોયાસિ સમવત્યૈ કૃતં પુષ્પાચ્છા દેવધીમલ્પાહી ॥ ૧,૨૧૪.૧૬॥

અભિષિચ્ય તથાત્માનં નિમજ્યાચમ્ય વૈ પુનઃ ।
દર્ભેણ પાયયેન્મન્ત્રૈરલિઙ્ગૈઃ પાવનૈરિમૈઃ ॥ ૧,૨૧૪.૧૭॥

આપોહિષ્ઠેતિ તિસૃભિરિદમાપો હવિષ્મતીઃ ।
દેવીરાપ ઇતિ દ્વાભ્યાં આપોદેવા ઇતિ ત્ર્યૃચા ॥ ૧,૨૧૪.૧૮॥

દ્રુપદાદિવ ઇતિ ચ શન્નો દેવીરપાં રસઃ ।
આપો દેવો પાવમાન્યઃ પુનન્ત્વાદ્યા ઋચો નવ ॥ ૧,૨૧૪.૧૯॥

ચિત્પતિર્મેતિ ચ શનૈઃ પ્લાવ્યાત્મનં સમાહિતઃ ।
હિરણ્યવર્ણા ઇતિ ચ પાવમાન્યસ્તથા પરાઃ ॥ ૧,૨૧૪.૨૦॥

તરત્સામા શુદ્ધવત્યઃ પવિત્રાણિ ચ શક્તિતઃ ।
વારુણ્યા બહવઃ પુણ્યાઃ શક્તિતઃ સમ્પ્રયોજયેત્ ॥ ૧,૨૧૪.૨૧॥

ॐ કારેણ વ્યાહૃતિભિર્ગાયત્ર્યા ચ સમન્વિતઃ ।
આદાવન્તે ચ કુર્વીત અભિષેકં યથાક્રમમ્ ॥ ૧,૨૧૪.૨૨॥

જલમધ્યસ્થિતસ્યૈવ માર્જનં તુ વિધીયતે ।
અન્તર્જલે જપેન્મન્ત્રં ત્રિઃ કૃત્વા ચાઘમર્ષણમ્ ॥ ૧,૨૧૪.૨૩॥

દ્રુપદાદ્યાસ્ત્રિરાવર્તેદયં ગૌરિતિ ચ ત્ર્યૃચમ્ ।
અન્યાંશ્ચૈવ તુ મન્ત્રાન્વા સ્મૃતિદૃષ્ટાન્સમાહિતઃ ॥ ૧,૨૧૪.૨૪॥

સવ્યાહૃતિં સપ્રણવાં ગાયત્રીં વા જપેદ્બુધઃ આવર્તયેદ્વા પ્રણવં
સ્મરેદ્વા વિષ્ણમવ્યયમ્ ॥ ૧,૨૧૪.૨૫॥

વિષ્ણોરાયતનં ત્વાપઃ સ એવાપ્પતિરુચ્યતે ।
તસ્યૈવં તનવસ્ત્વેતાસ્તસ્માત્તં હ્યપ્સુ સંસ્મરેત્ ॥ ૧,૨૧૪.૨૬॥

તદ્વિષ્ણોરિતિ મન્ત્રેણ નિમજ્યાપ્સુ પુનઃ પુનઃ ।
ગાયત્રી વૈષ્ણવી હ્યેષા વિષ્ણોઃ સંસ્મરણાય વૈ ॥ ૧,૨૧૪.૨૭॥

ૐ ઇદમાપપ્રવહતા સ્વં મલં ક્ષાલલોહિતમ્ ।
યથાત્વહોત્રામૃતં યચ્ચ શોકે અભીષણમ્ ॥ ૧,૨૧૪.૨૮॥

આપો મા તસ્માદેનસઃ પાવમાનશ્ચ મુઞ્ચતુ ઇવિષ્મતો વિમા આપોહવિષ્માનાવિરાસતિ ।
હવિષ્માન્દેવ અસુરો હવિષ્માનસ્તુ સૂર્યઃ ।
દેવીરાપો અપા પત્યા યશ્ચ ઊર્મિર્હવિષ્યઃ ઇન્દ્રિયવાન્માદિત્યન્તનઃ તં
દેવેભ્યો દેવતા દાભુશુક્લેભ્યસ્તેષાં ભાગકર્ષિવસિસમુદ્રસ્ય
દક્ષિણ્યાગ્રયાસિમેનાપોગ્રર્ભિરશ્મતમોધોઃ ।
આપો દેવી મધુમતીરગૃહ્ણન્તુ હ્યન્નતી રાજસ્વતિલાઃ ।
યાભિર્મિત્રાવરુણસ્ય સિઞ્ચયાભિરિન્દ્રમનયત્યન્ન વાતી વદ્ગુપદાં શન્નો દેવી
અપામસૃગ્દ્ધયસંસૂર્યે સન્તં સમાહિતં અપાંરસસ્ય યો રસ્ય યો ગૃહ્ણાસ્યુત્તમમ્ ।
આપો દેવીરુપસૂર્ય મધુમતીવયસ્યાય પ્રજાભ્યઃ તાસા માસ્થાનાત્વર્જિહતામોષધયઃ સપિપ્પલાઃ ।
પુનન્તુ મા પિતરઃ સૌમ્યાસઃ પુનન્ત્વનાપિ પિતા સહસાઃ પવિત્રેણ ગતાયુષા ।
પુનન્તુ મા પિતામહાઃ પુનન્તુ પ્રપિતામહાઃ ।
પવિત્રેણ ગતાયુષા વિશ્વમાયુર્વ્યશ્નવૈઃ ।
અગ્ન આયૂંષિ પરસત્માચરોર્જમિષઞ્ચ ત્વચે વાવસ્વત્વચ્છૂનામ્ ।
પુનન્તુ મા દેવજનાઃ પુનન્તુ મનસા ધિયઃ ।
પુનન્તુ વિશ્વા ભૂતાનિ જાતવેદઃ ! પુનીહિ મા ।
પવિત્રેણ પુનીહિ મા શુક્રેણ દેવ દીદ્યત્ ।
અગ્ને ક્રત્વા ક્રતૂંરનુ ।
યત્તે પવિત્રમર્ચિષ્યગ્ને વિતતમન્તરા બ્રહ્મા તેન પુનાતુ મા ।
પવમાનઃ સુવર્જનઃ । પવિત્રેણ વિચર્ષણિઃ । યઃ પોતા સ પુનાતુ મા ।
ઉભાભ્યાં દેવ સવિતઃ । પવિત્રેણ સવેન ચ । ઇદં બ્રહ્મપુનીમહે ।
વૈશ્વદેવીઃ પુનતી દેવ્યા ગૃહ્ણાસ્યામિસાવક્ષ્યસ્તાન્નોવીત પૂજ્યાઃ ।
તયામદન્તઃ સધમાદેષુ વયં સ્યામ પતયો રયીણામ્ ।
ચિત્પ તિર્મા પુનાત્વચ્છિદ્રેણ પવિત્રેણ સૂર્યસ્ય રશ્મિભિઃ ।
તસ્ય તે પવિત્રપૂતસ્ય યત્કામઃ ।
પ્રણિતચ્છકેયં દેવો વાક્પતિર્મા સવિતા ત્વચ્છિદ્રેણ પવિત્રેણ સૂર્યસ્ય રશ્મિભિઃ ।
તસ્ય તે પવિત્રપતે ! પવિત્રપૂતસ્ય ચત્કામઃ ।
પુનસ્તચ્છકેયં દ્યુપતિં અયં ગૌઃ પૃશ્નિરક્રમીસદશશતં માતરં
પુનઃ પિતરઞ્ચ પ્રયસ્મઃ ।
દેવો મા સવિતા પુનાત્વચ્છિદ્રેણ પવિત્રેણ સૂર્યસ્ય રશ્મિભિઃ ।

તસ્ય તે પવિત્રપતે પવિત્રપૂતસ્ય યત્કામઃ પુનાતચ્છકેયમ્? ।
ૐ તદ્વિષ્ણોઃ પરમં પદં સદા પશ્યન્તિ સૂરયઃ ।
દિવીવ ચક્ષુરાતતમ્ ॥ ૧,૨૧૪.૨૯ ॥

સ્નાત્વૈવં વાસસી ધૌતે અચ્છિન્ને પરિધાય ચ ।
પ્રક્ષાલ્ય ચ મૃદાદ્ભિશ્ચ હસ્તૌ પ્રક્ષાલ્ય વૈ તદા ॥ ૧,૨૧૪.૩૦ ॥

આચાન્તે પુનારાચામેન્મન્ત્રેણ સ્નાનભોજને ।
દ્રુપદાં ચ ત્રિરાવર્ત્ય તથા ચૈવાઘમર્ષણમ્ ॥ ૧,૨૧૪.૩૧ ॥

આચમ્યાપ્લાવ્ય ચાત્માનં ત્રિરાચમ્યશનૈરસૂન્ ।
અથોપતિષ્ટેદાદિત્યં મૂર્ધ્નિ પુષ્પાન્વિતાઞ્જલિઃ ॥ ૧,૨૧૪.૩૨ ॥

પ્રક્ષિપ્યોદકમદ્ધૂય ઉદુત્યં ચિત્રમિત્યપિ ।
તચ્ચક્ષુર્દેવ ઇતિ ચ હંસઃ શુચિષદિત્યપિ ॥ ૧,૨૧૪.૩૩ ॥

એતાઞ્જપેદૂર્ધ્વબાહુઃ સૂર્યમીક્ષ્ય સમાહિતઃ ।
ગાયત્રીં ચ તથા શક્ત્યા ઉપસ્થાય દિવાકરમ્ ॥ ૧,૨૧૪.૩૪ ॥

વિભ્રાડિત્યનુવાકેન સૂક્તેન પુરુષસ્ય ચ ।
શિવસઙ્કલ્પેન ચ તથા મણ્ડલબ્રાહ્મણેન ચ ॥ ૧,૨૧૪.૩૫ ॥

દિવાકીર્ત્યા તથા ચાન્યૈઃ સૌરૈર્મન્ત્રૈશ્ચ શક્તિતઃ ।
જપયજ્ઞસ્તુ કર્તવ્યઃ સર્વદેવપ્રણીતકૈઃ ॥ ૧,૨૧૪.૩૬ ॥

અધ્યાત્મવિદ્યાં વિધિવજ્જપેદ્વા જપસિદ્ધયે ।
સવ્યં કૃત્વા ત્રિરાચમ્ય શ્રિયં મેધાં ધૃતિં ક્ષિતિમ્ ॥ ૧,૨૧૪.૩૭ ॥

વાચં વાગીશ્વરીં પુષ્ટિં તુષ્ટિઞ્ચ પરિતર્પયેત્ ।
ઉમામરુન્ધતીં ચૈવ શચીં માતરમેવ ચ ॥ ૧,૨૧૪.૩૮ ॥

જયાં ચ વિજયાં ચૈવ સાવિત્રીં શાન્તિમેવ ચ ।
સ્વાહાં સ્વધાં ધૃતિં ચૈવ તથૈવાદિતિમુત્તમામ્ ॥ ૧,૨૧૪.૩૯ ॥

ઋષિપત્નીશ્ચ કન્યાશ્ચ તર્પયેત્કામ્યદેવતાઃ ।
સર્વમઙ્ગલકામસ્તુ તર્પયેત્સર્વમઙ્ગલામ્ ॥ ૧,૨૧૪.૪૦ ॥

આબ્રહ્મસ્તમ્બપર્યન્તં જગત્તૃપ્યત્વિદં બ્રુવન્ ।
ક્ષિપેદપોઽઞ્જલીંસ્ત્રીંશ્ચ કુર્વન્કાઙ્ક્ષેત તર્પણમ્ ॥ ૧,૨૧૪.૪૧ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે

સ્નાનવિધિવિવરણં નામ ચતુર્દશોત્તરદ્વિશતતમોઽધ્યાયઃ

श्रीगरुडमहापुराणम्- २१५

બ્રહ્મોવાચ ।

તર્પણં સમ્પ્રવક્ષ્યામિ દેવાદિપિતૃતુષ્ટિદમ્ ॥ ૧,૨૧૫.૧॥

ૐ મોદાસ્તૃપ્યન્તામ્ ।

ૐ પ્રમોદાસ્તૃપ્યન્તામ્ ।

ૐ સુમુખાસ્તૃપ્યન્તામ્ ।

ૐ દુર્મુખાસ્તૃપ્યન્તામ્ ।

ૐ વિઘ્નાસ્તૃપ્યન્તામ્ ।

ૐ વિઘ્નકર્તારસ્તૃપ્યન્તામ્ ।

ૐ છન્દાંસિ તૃપ્યન્તામ્ ।

ૐ વેદાસ્તૃપ્યન્તામ્ ।

ૐ ઓષધયસ્તૃપ્યન્તામ્ ।

ૐ સનાતનસ્તૃપ્યતામ્ ।

ૐ ઇતરાચાર્યાસ્તૃપ્યન્તામ્ ।

ૐ સંવત્સરઃસાવયવસ્તૃપ્યતામ્ ।

ૐ દેવાસ્તૃપ્યન્તામ્ ।

ૐ અપ્સરસસ્તૃપ્યન્તામ્ ।

ૐ દેવાન્ધકાસ્તૃપ્યન્તામ્ ।

ૐ સાગરસ્તૃપ્યન્તામ્ ।

ૐ નાગાસ્તૃપ્યન્તામ્ ।

ૐ પર્વતાસ્તૃપ્યન્તામ્ ।

ૐ સરિન્મનુષ્યા યક્ષાસ્તૃપ્યન્તામ્ ।

ૐ રક્ષાંસિ તૃપ્યન્તામ્ ।

ૐ પિશાચાસ્તૃપ્યન્તામ્ ।

ૐ સુપર્ણાસ્તૃપ્યન્તામ્ ।

ૐ ભૂતાનિ તૃપ્યન્તામ્ ।

ૐ ભૂતગ્રામાશ્ચતુર્વિધાસ્તૃપ્યન્તામ્ ।

ૐ દક્ષસ્તૃપ્યતામ્ ।

ૐ પ્રચેતાસ્તૃપ્યતામ્ ।

ॐ મરીચિસ્તૃપ્યતામ્ ।

ॐ આત્રિસ્તૃપ્યતામ્ ।

ॐ અઙ્ગિરાસ્તૃપ્યતામ્ ।

ॐ પુલસ્ત્યસ્તૃપ્યતામ્ ।

ॐ પુલહસ્તૃપ્યતામ્ ।

ॐ ક્રતુસ્તૃપ્યતામ્ ।

ॐ નારદસ્તૃપ્યતામ્!

ॐ ભૃગુસ્તૃપ્યતામ્ ।

ॐ વિશ્વામિત્રસ્તૃપ્યતામ્ ।

ॐ રૈવતસ્તૃપ્યતામ્ ।

ॐ ચાક્ષુષસ્તૃપ્યતામ્ ।

ॐ મહાતેજાસ્તૃપ્યતામ્ ।

ॐ વૈવસ્વતસ્તૃપ્યતામ્ ।

ॐ ધ્રુવસ્તૃપ્યતામ્ ।

ॐ ધવસ્તૃપ્યતામ્ ।

ॐ અનિલસ્તૃપ્યતામ્ ।

ॐ પ્રભાસસ્તૃપ્યતામ્ ॥ ૧,૨૧૫.૨॥

નીવીતી ।

ॐ સનકસ્તૃપ્યતામ્ ।

ॐ સનન્દનસ્તૃપ્યતામ્ ।

ॐ સનાતનસ્તૃપ્યતામ્ ।

ॐ કપિલસ્તૃપ્યતામ્ ।

ॐ આસુરિસ્તૃપ્યતામ્ ।

ॐ વોઢુસ્તૃપ્યતામ્ ।

ॐ પઞ્ચશિખસ્તૃપ્યતામ્ ।

ॐ મનુષ્યાણાં કવ્યવાહસ્તૃપ્યતામ્ ।

ॐ અનલસ્તૃપ્યન્તામ્ ।

ॐ સોમસ્તૃતામ્ ।

ॐ યમસ્તૃપ્યતામ્ ।

ॐ અર્યમાતૃપ્યતામ્ ॥ ૧,૨૧૫.૩॥

પ્રાચીનાવીતી ।

ॐ અગ્નિષ્વાત્તાઃ પિતરસ્તૃપ્યન્તામ્ ।

ॐ સોમપાઃ પિતરસ્તૃપ્યન્તામ્ ।

ॐ બર્હિષદઃ પિતરસ્તૃપ્યન્તામ્ ।

યમાય નમઃ ।

ધર્મરાજાય નમઃ ।

મૃત્યવે નમઃ ।

અન્તકાય નમઃ ।

વૈવસ્વતાય નમઃ ।

કાલાય નમઃ ।

સર્વભૂતક્ષયાય નમઃ ।

ઔદુમ્બરાય નમઃ! દધ્નાય નમઃ ।

નીલાય નમઃ ।

પરમેષ્ઠિને નમઃ ।

વૃકોદરાય નમઃ ।

ચિત્રાય નમઃ ।

ચિત્રગુપ્તાય નમઃ ॥ ૧,૨૧૫.૪॥

બ્રહ્માદિસ્તમ્બપર્યન્તં જગત્તૃપ્યતુ ।

ॐ પિતૃભ્યઃ સ્વધા નમઃ ।

ॐ પિતામહેભ્યઃ સ્વધા નમઃ ।

ॐ પ્રપિતામહેભ્યઃ સ્વધા નમઃ ।

ॐ માતૃભ્યઃ સ્વધા નમઃ ।

ॐ પિતામહીભ્યઃ સ્વધા નમઃ ।

ॐ પ્રપિતામહીભ્યઃ સ્વધા નમઃ ।

ॐ માતામહેભ્યઃ સ્વધા નમઃ ।

ॐ પ્રમાતામહેભ્યઃ સ્વધા નમઃ ।

ॐ વૃદ્ધપ્રમાતામહેભ્યઃ સ્વધા નમઃ તૃપ્યતામિતિ ।

ઉદીરતામવર ઉત્પરાસો ઉન્મધ્યમાઃ પિતરઃ સોમ્યાસઃ ।

અસુંય ઈયુરવૃકા ઋતજ્ઞાસ્તેનોઽવન્તુપિતરોહવેષુ ।

ગોત્રોચ્ચારણેન પ્રથમાઞ્જલિઃ પિતુઃ ।

ॐ અઙ્ગિરસો નઃ પિતરોદૃ- ।

અથર્વાણોભૃગવઃદૃ - ।

તેષાં વયં સુમતૌ યજ્ઞિયાનાં અપિ ભદ્રે સૌમનસે સ્યામ ।
ૐ આયન્તુ નઃ પિતરઃ સૌમ્યાસોગ્નિષ્વાત્તાઃ પથિભિર્દેવયાનૈઃ ।
અસ્મિન્યજ્ઞે સ્વધયા મદન્તોઽધિબ્રુવન્તુ તેઽવન્ત્વસ્માન્ ॥ ૧,૨૧૫.૫॥

ૐ ઊર્જં વહન્તીરમૃતં ઘૃતં પયઃ કીલાલં પરિસ્નુતં સ્વધા સ્થ તર્પયત મે પિતૄન્ ।
ૐ પિતૃભ્યઃ સ્વધા નમઃ ।
ૐ પિતામહેભ્યઃ સ્વધા નમઃ ।
ૐ પ્રપિતામહેભ્યઃ સ્વધાન નમઃ ।
ૐ માતામહેભ્યઃ સ્વધા નમઃ ।
ૐ પ્રમાતામહેભ્યઃ સ્વધા નમઃ ।
ૐ વૃદ્ધપ્રમાતામહેભ્યઃ સ્વધા નમઃ ।
પિતામહસ્યદૃ ।
ૐ અક્ષન્પિતરો અમીમદન્ત પિતરો અમી તૃપ્યન્તઃ પિતરઃ શું(સ્વ) ધધ્વં
પિબેહ પિતરોઽપિ વાનત્રયાંશ્ચ વિશ્રયાંશ્ચ ભવનપવિત્રત્વા
રથપતિ તે જાતવેદાઃ સ્વધાભિર્યજ્ઞં સુકૃતં જુપસ્વ? ।
ૐ ણદુવાતા ઋતાયતે મધુ ક્ષરન્તિ સિન્ધવઃ ।
માધ્વીર્નઃ સન્ત્વોષધીર્મધુનક્તમુતોષસો મધુમત્પાર્થિવં રજઃ ।
મધુ દ્યૌરસ્તુ નઃ પિતા મધુ માન્નો વનસ્પતિર્મધુભામસ્તુ સૂર્યો માધ્વીર્ગાવો ભવન્તુ નઃ ॥ ૧,૨૧૫.૬॥

પ્રપિતામહસ્યાઞ્જલિદાનમ્ ।
ૐ નમો વઃ પિતરો રસાય નમો વઃ પિતરઃ શુષ્માય નમો વઃ પિતરો જીવાય
નમો વઃ પિતરઃ સ્વધાયૈ નમો વઃ પિતરો ઘોરાય નમો વઃ પિતરો મન્યવે ।
નમો વઃ પિતરો ગૃહાન્ન પિતરો દત્તઃ ।
નમો વઃ પિતરો દધ્મે તદ્વઃ પિતરો વાસઃ ।
માતામહાનાં ત્રિરઞ્જલિદૃ ।
તતો માત્રાદીનાન્દૃ ॥ ૧,૨૧૫.૭॥

યે ચાસ્માકં કુલે જાતા અપુત્રા ગોત્રિણો મૃતાઃ ।
તે તૃપ્યન્તુ મયા દત્તં વસ્ત્રનિષ્પીડનોદકમ્ ॥ ૧,૨૧૫.૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
દેવાદિતર્પણનિરૂપણં નામ પઞ્જદશોત્તરદ્વિશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૧૬

બ્રહ્મોવાચ ।
વૈશ્વદેવં પ્રવક્ષ્યામિ હોમલક્ષણમુત્તમમ્ ।
પ્રજ્વાલ્ય ચાગ્નિં પર્યુક્ષ્ય-ૐ ક્રષ્યાદમગ્નિં પ્રહિણોમિ દૂરં યમરાજ્યં
ગચ્છતુ રિપ્રવાહઃ ।
ઇહૈવાયમિતરો જાતવેદા દેવેભ્યો હવ્યં વહતુ પ્રજાનત્ ।
ૐ પાવક વૈશ્વાનર ઇદમાસનં અરણીગર્ભસંસ્કૃતતેજોરૂપ
મહાબ્રહ્મન્મુહૂર્તાસ્ત્રિષુ વૈશ્વાનરં પ્રતિબોધયામિ ।
ૐ વૈશ્વાનરે ન ઉભયં આપ્રયાતુ પરાવતઃ અગ્નિર્ન સ્વદ્યુતીરૂપપૃષ્ઠો
દિવિ પૃષ્ઠોઽશ્વિ પૃથિવ્યાં પૃષ્ઠા વિવેવા ઓષધીચાવિવેશ વૈશ્વાનરઃ
સહસા પૃષ્ઠોઽગ્નિઃ નમો દિવ્ય સ ષષ્ઠાં નક્તમ્ ॥

૧,૨૧૬.૧॥

ૐ પ્રજાપતયે સ્વાહા ।
ૐ સોમાય સ્વાહા ।
ૐ બૃહસ્પતયે સ્વાહા ।
ૐ અગ્નિષોમાભ્યાં સ્વાહા ।
ૐ ઇન્દ્રાગ્નિભ્યાં સ્વાહા ।
ૐ દ્યાવાપૃથિવીભ્યાં સ્વાહા ।
ૐ ઇન્દ્રાય સ્વાહા ।
ૐ વિશ્વેભ્યો દેવેભ્યઃ સ્વાહા ।
ૐ બ્રહ્મણે સ્વાહા ।
ૐ અદ્ભ્યઃ સ્વાહા ।
ૐ ઓષધિવનસ્પતિભ્યઃ સ્વાહા ।
ૐ ગ્રહ્યાય સ્વાહા ।
ૐ દેવદેવતાભ્યઃ સ્વાહા ।
ૐ ઇન્દ્રાય સ્વાહા ।
ૐ ઇન્દ્રપુરુષેભ્યઃ સ્વાહા ।
ૐ યમાય સ્વાહા ।
ૐ યમપુરુષાય સ્વાહા ।
ૐ સર્વેભ્યો ભૂતેભ્યો દિવાચારિભ્યઃ સ્વાહા ।
ૐ વસુધાપિતૃભ્યઃ સ્વાહા ।
ૐ યે ભૂતા પ્રચરન્તિ દીનાચ નિમિહન્તો ભુવનસ્ય મધ્યે ।

તેભ્યો બલિં પુષ્ટિકામો દદામિ મયિ પુષ્ટિં પુષ્ટિપતિર્દદાતુ ।
ૐ આચાણ્ડાલપતિર્દદાતુ આચાણ્ડાલપતિતવાયસેભ્યઃ ॥ ૧,૨૧૬.૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વૈશ્વદેવનિરૂપણં નામ ષોડશોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૭
બ્રહ્મોવાચ ।
અથ સન્ધ્યાવિધં વક્ષ્યે દ્વિજાતીનાં સમાસતઃ ।
અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોઽપિ વા ॥ ૧,૨૧૭.૧॥

યઃ સ્મરેત્પુણ્ડરીકાક્ષં સ બાહ્યાભ્યન્તરઃ શુચિઃ ॥ ૧,૨૧૭.૨॥

ગાયત્રીચ્છન્દો વિશ્વામિત્ર ઋષિસ્ત્રિપાત્ ।
સમુદ્રાઃ કુક્ષિશ્ચન્દ્રાદિત્યૌ લોચનૌ ।
અગ્નિર્મુખમ્ ।
વિષ્ણુર્હૃદયમ્ ।
બ્રહ્મરુદ્રૌ શિરઃ ।
રુદ્રઃ શિખા ।
ઉપનય ને વિનિયોગઃ ।
ૐ ભૂઃ પાદે ।
ભુવઃ જાનુતિ ।
સ્વઃ હૃદયે ।
મહઃ શિરસિ ।
જનઃ શિખાયામ્ ।
તપઃ કણ્ઠે ।
સત્યં લલાટે ।
ૐ હૃદયાય નમઃ ।
ૐ ભૂઃ શિરસે સ્વાહા ।
ૐ ભુવઃ શિખાયૈ વૌષટ્ ।
ૐ સ્વઃ કવચાય હું ।
ૐ ભૂર્ભુવઃ સ્વઃ અસ્ત્રાય ફટ્ ॥ ૧,૨૧૭.૩॥

ૐ ભૂઃ ૐ ભુવઃ ૐ સ્વઃ ૐ મહઃ ૐ જનઃ ૐ તપઃ ૐ સત્યં તત્સ્ત્રિપદા ।

ॐ આપો જ્યોઽતી રસોઽમૃતં બ્રહ્મ ભૂર્ભુવઃ સ્વરોમ્ ।
ॐ સૂર્યશ્ચેત્યાદિ ।
ॐ આપઃ પુનન્ત્વિત્યાદિ ।
ॐ અગ્નિશ્ચેત્યાદિ ॥ ૧,૨૧૭.૪॥

ॐ આયાતુ વરદે દેવિ ! પૂર્વાહ્ને બ્રહ્મદેવતા ।
ગાયત્રી નામ યા સન્ધ્યા રક્તાઙ્ગી રક્તવાસસા ।
વરહંસસમારૂઢા શ્રીમત્પુષ્કરસંસ્થિતા ॥ ૧,૨૧૭.૫॥

કમણ્ડલુધરા શાન્તા અક્ષમાલાવિધારિણી ।
આયાતુ વરદા દેવી મધ્યાહ્ને શ્વેતરૂપિણી ॥ ૧,૨૧૭.૬॥

માહેશ્વરી ચ સાવિત્રી શુક્લવસ્ત્રાદિમણ્ડિતા ।
વૃષસ્કન્ધસમારૂઢા ત્રિશૂલવરધારિણી ॥ ૧,૨૧૭.૭॥

આયાતુ વરદા દેવી અપરાહ્ને સરસ્વતી ।
અતસીકુસુમપ્રખ્યા વૈષ્ણવી ગરુડાસના ॥ ૧,૨૧૭.૮॥

પીતવસ્ત્રા શઙ્ખચક્રગદાપદ્મસમન્વિતા ।
શ્વેતવર્ણા સમુદ્દિષ્ટા રવિમણ્ડલસંસ્થિતા ॥ ૧,૨૧૭.૯॥

શ્વેતપદ્મસનાસીના શ્વેતપુષ્પોપશોભિતા ।
ॐ આપો હિષ્ઠા મયો ભુવસ્તા ન ઉર્જે દધાત નઃ ॥ ૧,૨૧૭.૧૦॥

મહેરણાય ચક્ષુસે ।
ॐ યો વઃ શિવતમો રસઃ ।
તસ્ય ભાજયેતેહ નઃ ।
અશતીરિવ માતરઃ ।
ॐ તસ્મા અરઙ્ગમામ વો યસ્ય ક્ષયાય જિન્વથ ।
આપો જન યથા ચ નઃ ।
ॐ સુમિત્રિયા ન આપ ઓષધયઃ સન્તુ ॐ દુર્મિત્રિયાસ્તસ્મૈ સન્તુ
યોઽસ્માન્દ્વેષ્ટિ યઞ્ચ વયં દ્વિષ્મઃ ।
ॐ દ્રુપદાદિવમુમુચાનઃ સ્વિન્નઃ સ્નાતો મલાદિવ ।
પૂતં પવિત્રેણેવાજ્યમાપઃ શુન્ધન્તુ મૈનસઃ ।
ॐ ઋતં ચ સત્યં ચાભીદ્ધાત્તપસોઽધ્યજાયત ।
તતોરાત્ર્યજાયત ।
તતઃ સમુદ્રોઽર્ણવઃ સમુદ્રાદર્ણવાદધિસંવત્સરો અજાયત ।

અહૌરાત્રાણિ વિદધદ્વિશ્વસ્ય મિષતો વશી ।
સૂર્યાચન્દ્રમસૌ ધાતા યથાપૂર્વમકલ્પયત્ ।
દિવં ચ પૃથિવીં ચાન્તરિક્ષમથો સ્વઃ ॥ ૧,૨૧૭.૧૧॥

ગાયત્ર્યા વિશ્વામિત્ર ઋષિર્ગાયત્રીછન્દઃ ।
સવિતા દેવતા જપે વિનિયોગઃ ।
ૐ ઉદુત્યં જાતવેદસં દેવં વહન્તિ કેતવઃ ।
દૃશે વિશ્વાય સૂર્યમ્ ।
ૐ ચિત્રં દેવાનામુદગાદનીકં ચક્ષુર્મિત્રસ્ય વરુણસ્યાગ્નેઃ ।
આપ્રા દ્યાવાપૃથિવી અન્તરિક્ષં સૂર્ય આત્મા જગતસ્તસ્થુષશ્ચ ।
ૐ તચ્ચક્ષુર્દેવહિતં પુરસ્તાચ્છુક્રમુચ્ચરત્ ।
પશ્યેમ શરદઃ શતં જીવેમ શરદઃ શતમ્ ।
શ‌ૃણુયામ શરદઃ શતમ્ ।
ૐ વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખોવિશ્વતો બાહુરુત વિશ્વતસ્પાત્ ।
સંબાહુભ્યાં ધમતિ સમ્પત્રૈર્દ્યાવાભૂમી જનયન્દેવ એકઃ ।
દેવા ગાતુવિદો નાઙ્ગવિદ્વાનાદ્ભમિતમનસસ્પત ઇમં દેવયજ્ઞં
સ્વાહા વાતેધાઃ જપેત્ ॥ ૧,૨૧૭.૧૨॥

ઉત્તરે શિખરે જાતે ભૂમ્યાં પર્વતવાસિની ।
બ્રહ્મણા સમનુજ્ઞાતા ગચ્છ દેવિ ! યથાસુખમ્ ॥ ૧,૨૧૭.૧૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
સન્ધ્યાવિધિનિરૂપણં નામ સપ્તદશોત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૮
બ્રહ્મોવાચ ।
વ્યાસ ! શ્રાદ્ધમહં વક્ષ્યે ભુક્તિમુક્તિપ્રદં નૃણામ્ ।
પૂર્વં નિમન્ત્રયેદ્વિપ્રાન્વિશેષાદ્બ્રહ્મચારિણઃ ॥ ૧,૨૧૮.૧॥

પ્રદક્ષિણોપવીતેન દેવાન્વામોપવીતિના ।
પિતૄન્નિમન્ત્રયેત્પાદૌ ક્ષાલયેદ્વાક્યમન્ત્રતઃ ॥ ૧,૨૧૮.૨॥

ૐ સ્વાગતં ભવદ્ભિરિતિ પ્રશ્નઃ ।
ૐ સુસ્વાગતામિતિ તૈરુક્તે ૐ વિશ્વેભ્યો દેવેભ્ય એતત્પાદોદકમર્ઘ્યં સ્વાહેતિ
દેવબ્રાહ્મણપાદયોર્દેવતીર્થેનાભુગ્નકુશસહિતજલદાનમ્ ॥ ૧,૨૧૮.૩॥

તતો દક્ષિણા ભિમુખેન વામોપવીતેનામુકગોત્રેભ્યો અસ્મત્પિતૃપિતામહપ્રપિતામહેભ્યો
યથાનામશર્મભ્ય એતત્પાદોદકમર્ઘ્યં સ્વધેતિ પિત્રાદિબ્રાહ્મણપાદયોઃ પિતૃતીર્થેન
આભુગ્નકુશકુસુમસહિતજલદાનમ્ ॥ ૧,૨૧૮.૪॥

એવં માતામહાદિભ્યઃ ।
એતદાચમનીયં સ્વાહા સ્વધેતિ બ્રાહ્મણહસ્તે એષવોઽર્ઘ્ય ઇતિ બ્રાહ્મણહસ્તે પુષ્પદાનમ્ ॥ ૧,૨૧૮.૫॥

ૐ સિદ્ધમિદમાસનમિહ સિદ્ધમિત્યભિધાય ૐ ભૂઃ ૐ ભુવઃ ૐ સ્વઃ ૐ મહઃ
ૐ જનઃ ૐ તપઃ ૐ સત્યમિતિ સપ્તવ્યાહૃતિભિઃ પૂર્વમુખન્દેવબ્રાહ્મણોપવેશનમ્ ।
ઉત્તરદિઙ્મુખંપિતૃબ્રાહ્મયોણોપવેશનમ્ ।
ૐ દેવતાભ્યઃ પિતૃભ્યશ્ચ મહાયોગિભ્ય એવ ચ ।
નમઃ સ્વધાયૈ સ્વાહાયૈ નિત્યમેવ ભવન્તુતે ઇતિ ત્રિર્જપેત્ ॥ ૧,૨૧૮.૬॥

ૐ અદ્યાસ્મિન્દેશે અમુકમાસે અમુકરાશિઙ્ગતે
સવિતર્યમુકતિથાવમુકગોત્રાણામસ્મત્પિતૃપિતામહપ્રપિતામહાનાં યથાનામશર્મણાં
વિશ્વેદેવપૂર્વકન્દૃશ્રાદ્ધં કરિષ્યે । ૐ વિશ્વેભ્યો દેવભ્યઃ સ્વાહા
ૐ વિશ્વેદેવાનાવાહયિષ્યે ।
આવાહયેત્યુક્તે ૐ વિશ્વેદેવાઃ સ આગત શ્ૃણુતામિમં હવમ્ ।
એદં બર્હિર્નિષીદત ૐ વિશ્વેદેવાઃ શ્ૃણુતેમં ઇવં મે યે અન્તરિક્ષે ય ઉપદ્યવિષ્ટ ।
યે અગ્નિજિહ્વા ઉત વા યજત્રા આસદ્યાસ્મિન્બર્હિષિ માદયધ્વમ્ ।
ૐ ઓષધયઃ સંવદન્તે સોમેન સહ રાજ્ઞા ।
યસ્મૈ કૃણોતિ બ્રાહ્મણસ્તં રાજન્પારયામસિ ।
ૐ આગચ્છન્તુ મહાભાગા વિશ્વેદેવા મહાબલાઃ ।
યે અત્ર વિહિતાઃ શ્રાદ્ધે સાવધાના ભવન્તુ તે ।
ૐ અપહતાસુરા રક્ષાંસિ વેદિષદ ઇતિ ત્રિત્રિર્યવવિકિરણમ્ ॥ ૧,૨૧૮.૭॥

ૐ પાત્રમહં કરિષ્યે ।
ૐ કરુષ્વેત્યનુજ્ઞાતઃ કૃત્વા પાત્રે પવિત્રનિષેવણમ્ ॥ ૧,૨૧૮.૮॥

ૐ શન્નો દેવીરભિષ્ટય આપો ભવન્તુ પીતયે ।
શંયોરભિસ્ત્રવન્તુ ન ઇતિ પાત્રે જલદાનમ્ ।
ૐ યવોઽસિ યવયાસ્મદ્વેષો યવયારાતીરિતિ યવદાનમ્ ।
ગન્ધદ્વારાં દુરાધર્ષાં નિત્યપુષ્ટાં કરીષિણીમ્ ।
ઈશ્વરીં સર્વભૂતાનાં તા (ત્વા) મિહોપહ્વયે શ્રિયમિતિ ગન્ધદાનમ્ ।
ૐ યા દિવ્યા આપઃ પયસા સંબભૂવુર્યા અન્તરિક્ષૌત પાર્થવીર્યાઃ ।

હિરણ્યવર્ણા યજ્ઞિયાસ્તાન આપઃ શિવાઃ શં સ્યોના સુહવા ભવન્તુ ।
એષોઽર્ઘો નમ ઇતિ બ્રાહ્મણહસ્તે જલં દત્ત્વાનેનૈવ પાત્રેણ પવિત્રગ્રહણં
કૃત્વા સંસ્રવં પવિત્રં ચ બ્રાહ્મણપાર્શ્વે દદ્યાત્ ।
તતઃ પ્રથમપાત્રે સંસ્રવજલં સંસ્થાપ્ય કુશોપરિ ઊર્ધ્વમુખં સ્થાપનં કુર્યત્ ।
તદુપરિ કુશદાનમ્ ॥ ૧,૨૧૮.૯॥

વિશ્વેભ્યો દેવેભ્યઃ એતાનિ ગન્ધપુષ્પધૂપદીપવાસો યુગયજ્ઞો પવીતાનિ નમઃ ।
ગન્ધાદિદાનમચ્છિદ્રમસ્તુ ।
અસ્ત્વિતિ બ્રાહ્મણપ્રતિવચનમ્ ॥ ૧,૨૧૮.૧૦॥

તતઃ પિતૃપિતામહપ્રપિતામહાનાં માતામહપ્રમાતામહવૃદ્ધપ્રમાતામહાનાં
સપત્નીકાનાં શ્રાદ્ધમહં કરિષ્યે ઇતિ અનુજ્ઞાવચનમ્ ।
કુરુષ્વેતિ બ્રાહ્મણૈરુક્તે ।
ૐ દેવતાભ્યઃ પિતૃભ્યશ્ચ- ઇતિત્રિર્જપેત્ ॥ ૧,૨૧૮.૧૧॥

ૐ અમુકગોત્રેભ્યોઽસ્મત્પિતૃપિતામહેભ્યો યથાનામશર્મભ્યઃ સપત્નીકેભ્યઃ
ઇદમાસનં સ્વધા ઇતિ બ્રાહ્મણવામે આસનદાનમ્ ।
ૐ પિતૃનાવાહયિષ્યે ।
ૐ ।
આવાહયેત્યુક્તે ૐ ઉશન્તસ્ત્વા નિધીમહ્યુશન્તઃ સમિધીમહિ ।
ઉશન્નુ શત આવહ પિતૃન્હવિષે ઉત્તવે ।
ૐ આયન્તુ નઃ પિતરઃ સૌમ્યાસોઽગ્નિષ્વાત્તાઃ પથિભિર્દેવયાનૈઃ ।
અસ્મિન્યજ્ઞે સ્વધયા મદન્તોઽધિબ્રુવન્તુ તેવન્ત્વસ્માનિત્યાવાહનમ્ ।
ૐ અપહતા સુરા રક્ષાંસિ વેદિષદઃ ઇતિ તિલવિકિરણમ્ ।
પૂર્વવક્ત્રમેણ સ્થાપિતપાત્રેષૂદકદાનમ્ ।
ૐ તિલોઽસિ સોમદેવત્યો ગોસવો દેવનિર્મિતઃ ।
પ્રત્નમદ્ભિઃ પૃક્તઃ સ્વધયા પિતૄંલ્લોકાન્પ્રીણીહિ નઃ સ્વાહા ઇતિ તિલદાનમ્ ॥ ૧,૨૧૮.૧૨॥

ગન્ધપુષ્પે હસ્તાભ્યાં દત્ત્વા પિતૃપાત્રમુત્થાપ્ય યા દિવ્યેતિ પઠિત્વા
અમુકગોત્રાસ્મત્પિતઃ ! અમુકદેવશર્મન્! સપત્નીક ! એષ તેઽર્ઘ્યઃ સ્વધા ।
અપવિત્રં પાત્રં ગૃહીત્વા વામપાર્શ્વે દક્ષિણે કુશોપરિ ૐ પિતૃભ્યઃ
સ્થાનમસીત્યધોમુખપાત્રસ્થાપનમ્ ॥ ૧,૨૧૮.૧૩॥

ૐ શુન્ધન્તાં લોકાઃ પિતૃસદનાઃ પિતૃસદનમસિ ।
અધોમુખપાત્રસ્પર્શનમ્ ।

અમુકગોત્રેભ્યોऽસ્મત્પિતૃપિતામહ પ્રપિતામહેભ્યઃ સપત્નીકેભ્ય એતાનિ
ગન્ધપુષ્પધૂપદીપવાસોગુણસોત્તરીયયજ્ઞોપવીતાનિ
વઃ સ્વધા પિતૃતીર્થેન ગન્ધાદિદાનમ્ ।
ગન્ધાદિદાનમક્ષય્યમસ્તુ ।
સંકલ્પસિદ્ધિરસ્તુ ।
બ્રાહ્મણવચનમ્ ।
એવં માતામહાદીનામનુજ્ઞાપનાદિકર્મ ।
ૐ યાદિવ્યેતિભૂમિસમાર્જનમ્ ।
તતો ઘૃતાક્તમન્નં ગૃહીત્વા દક્ષિણોપવીતી પિતૃબ્રાહ્મણમોં અગ્નૌ કરણમહં કરિષ્યે ।
ૐ કુરુષ્વેતિ તેનોક્તે ૐ અગ્નયે કવ્યવાહનાય સ્વાહા ઇતિ આહુતિદ્વયં
દેવબ્રાહ્મણહસ્તે દત્ત્વા અવશિષ્ટાન્નં પિણ્ડાર્થં સ્થાપયિત્વા અપરમર્ધં પિત્રાદિપાત્રે
માતામહાદિપાત્રે ચ નિઃ ક્ષિપેત્ ॥

૧,૨૧૮.૧૪॥

પાત્રમુદ્રાદિ નિધાય કુશં દત્ત્વા અધોમુખાભ્યાં પાણિભ્યાં પાત્રં ગૃહીત્વા
ૐ પૃથિવીતે પાત્રં દ્યૌરપિધાનં બ્રાહ્મણસ્ય મુખે અમૃતે અમૃતં
જુહોમિ સ્વાહા પાત્રાભિમન્ત્રણમ્ ।
ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ ।
સમૂઢમસ્ય પાંસુરે ।
વિષ્ણો હવ્યંરક્ષસ્વ ઇત્યન્નમધ્યે અધોમુખદ્વિજાઙ્ગુષ્ઠનિવેશનમ્ ॥ ૧,૨૧૮.૧૫॥

અપહતેતિ ત્રિર્યવવિકિરણમ્ ।
ૐ નિહન્મિ સર્વં યદમેધ્યવદ્ભવેદ્ધતાશ્ચ સર્વેऽસુરદાનવા મયા ।
રક્ષાંસિ યક્ષાઃ સપિશાચસઙ્ઘા હતા મયા યાતુધાનાશ્ચ સર્વે ઇતિ સિદ્ધાર્થવિકિરણમ્ ॥ ૧,૨૧૮.૧૬॥

તતો ધૂરિલોચનસંજ્ઞકેભ્યોદવેભ્ય એતદન્નં સઘૃતં સપાનીયં
સવ્યઞ્જનં સ્વાહેતિ વારિકુશાદ્યૈરનુસઙ્કલ્પનમ્ ।
ૐ અન્નમિદમક્ષય્યમસ્તુ ૐ સંઙ્કલ્પસિદ્ધિરસ્તુ ॥ ૧,૨૧૮.૧૭॥

તતો વિપરીતોપવીતેન સવ્યઞ્જનં સઘૃતમન્નં પિત્રાદિ બ્રાહ્મણપાત્રે
નિધાય તદુપરિ ભૂમિસંલગ્નકુશં દત્ત્વા ૐ પૃથિવી તે પાત્રં ઇતિ
મન્ત્રેણ ઉત્તાનાભ્યાં પાત્રં ગૃહીત્વા ૐ ઇદં વિષ્ણોરિત્યન્નોપરિ
ઉત્તાનં દ્વિજાઙ્ગુષ્ઠં નિવેશયેત્ ।
ૐ અપહતેતિ તિલવિકિરણમ્ ।

ભૂમિપાતિતવામજાનુઃ અમુકગોત્રેભ્યઃ અસ્મત્પિતૃપિતામહેભ્યઃ સપત્નીકેભ્યઃ
એતદન્નં સઘૃતં સપાનીયં સવ્યઞ્જનં પ્રતિષિદ્ધવર્જિતં સ્વધા ।
અન્નં સઙ્કલ્પ્ય ૐ ઊર્જં વહન્તીરમૃતં ઘૃત પયઃ કીલાલં પરિસ્રુતં
સ્વધાસ્તુ તર્પયત મે પિતરમ્ ।
દક્ષિણામુખવરિધારત્યાગઃ ॥ ૧,૨૧૮.૧૮॥

ૐ શ્રાદ્ધમિદમચ્છિદ્રમસ્તુ ૐ સઙ્કલ્પસિદ્ધિરસ્તુ ।
ૐ ભૂર્ભુવઃ સ્વસ્તત્સવિતુર્વરેણ્યં ભર્ગોદેવસ્ય ધીમહિ ધિયો યો નઃ
પ્રચોદયાતિતિ વિસજયિત્વા ૐ મધુવાતા ઋતાયતે મધુક્ષરન્તુ સિન્ધવઃ
માધ્વીર્નઃ સન્ત્વોષધીર્મધુનક્તમુતોષસો
મધુત્પાર્થિવં રજઃ ।
મધુદ્યૌરસ્તુ નઃ પિતા મધુમાન્નો વનસ્પતિઃ મધુમાનસ્તુ સૂર્યો માધ્વીર્ગાવો ભવન્તુ નઃ ।
મધુ મધુ મધુ ઇતિ જપઃ ॥ ૧,૨૧૮.૧૯॥

યથાસુખં વાગ્યતા જુષધ્વમિતિ બ્રૂયાત્ ।
બુક્તવત્સુ સપ્તવ્યાધાદિકં પિતૃસ્તોત્રં જપેત્ ।
તચ્ચ-સપ્તવ્યાધા દશાર્ણેષુ મૃગાઃ કાલઞ્જરે ગિરૌ ।
ચક્રવાકાઃ શરાદ્વીપે હંસાઃ સરસિ માનસે ॥ ૧,૨૧૮.૨૦॥

તેઽભિજાતાઃ કુરુક્ષેત્રે બ્રાહ્મણા વેદપારગાઃ ।
પ્રસ્થિતા દૂરમધ્વાનં યૂયં કિમવસીદથ ॥ ૧,૨૧૮.૨૧॥

તતસ્તૃપ્યસ્વ દક્ષિણાભિમુખો વામોપવીતી તદુત્સૃષ્ટાગ્રતઃ ।
ૐ અગ્નિદગ્ધાશ્ચ યે જીવા યેઽપ્યદગ્ધાઃ કુલે મમ ।
ભૂમૌ દત્તેન તૃપ્યન્તુ તૃપ્તા યાન્તુ પરાઙ્ગતિમ્ ।
ઇતિ ભૂમૌ કુશોપરિ સઘૃતમન્નં જલપ્લુતં વિકિરેત્ ॥ ૧,૨૧૮.૨૨॥

તતો બ્રાહ્મણક્રમેણ જલગણ્ડૂષં દત્ત્વા પૂર્વવત્સવ્યાહૃતિકાં ગાયત્રીં
મધુવાતેતિત્ર્યૃચં જપ્ત્વા ૐ રુચિતં ભવદ્ભિરિતિ દેવબ્રાહ્મણપ્રશ્નઃ ।
સુરુચિતમિતિ તેનોક્તે ૐ શેષમન્નમિતિ પ્રશ્નઃ ।
ઇષ્ટૈઃ સહ ભોજનમ્ ।
પિત્રાદિબ્રાહ્મણં વામોપવીતેન ૐ તૃપ્તાઃ સ્થ ઇતિ પ્રશ્નઃ ।
ૐ તૃપ્તાઃ સ્મ ઇતિ તેનોક્તે ભૂમ્યભ્યુક્ષણં મણ્ડલચતુષ્કોણં તિ લવિકિરણમ્ ॥ ૧,૨૧૮.૨૩॥

ૐ અમુકગોત્ર ! અસ્મત્પિતઃ ! અમુકદેવદર્શન્! સપત્નીક ! એતત્તે પિણ્ડાસનં સ્વધા ।
ઇત્થં રેખામધ્યે પિતામહાય ખવ્યાહૃતિકાં ગાયત્રીં મધુવાતેતિ

ત્ર્જપન્નન્નં સાજ્યં પિણ્ડં કૃત્વા કુશોપરિ અમુકગોત્ર અસ્મત્પિતઃ !
અમુકદેવશ્રમન્! સપત્નીક એષ પિણ્ડસ્તે સ્વધા ।
ઇત્થં રેખામધ્યે પિતામહાય ।
તતઃ સવ્યાહૃતિકાં ગાયત્રીં મધુવાતેતિ ત્રિર્જપન્પિણ્ડવિકિરણં
પિણ્ડાન્તિકે । ૐ લેપભુજઃ પ્રીયન્તમિતિ સ્તરકુશેષુ હસ્તમાર્જનં
પ્રક્ષાલિતપિણ્ડોદકેન ૐ અમુકગોત્ર ! અસ્મત્પિતઃ ! અમુકશર્મન્સપત્નીક
એતત્તે જલમવનેક્ષ્વ યે ચાત્રત્વામનુજાશ્ચ ત્વામનુ તસ્મૈ તેસ્વધેતિ
પિતૃપિણ્ડસેચનમ્ ।
પિણ્ડપાત્રમધોમુખં કૃત્વા બદ્ધાઞ્જલિઃ ૐ પિતરો માદયધ્વં
યથાભાગમાવૃષાયધ્વમિતિ જપેત્ ।
અપઃ સ્પૃષ્ટ્વા વામેન પરાવૃત્ત્ય ઉદઙ્મુખઃ પ્રાણાંસ્ત્રિઃ સંયમ્ય
ષડ્ભ્ય ઋતુભ્યો નમઃ ઇતિ જપઃ ॥ ૧,૨૧૮.૨૪॥

વામેનૈવ પરાવૃત્ય પુષ્પદાનમ્ ।
અક્ષતઞ્ચારિષ્ટઞ્ચાસ્તુ મે પુણ્યં શાન્તિપુષ્ટિદૃ ।
દક્ષિણામુખઃ અમી મદન્તઃ પિતરો યથાભાગમાવૃષાયિષત ઇતિ જપઃ ।
વાસઃ શિથિલીકૃત્વાઞ્જલિં કૃત્વા ૐ નમો વઃ પિતરો નમો વઃ ઇતિ જપઃ ।
ગૃહાન્નઃ પિતરો દત્ત ઇતિ ગૃહવીક્ષણમ્ ।
તતઃ સદા વઃ પિતરો દ્વેષ્મ ઇતિ વીક્ષ્ય એતદ્વઃ પિતરો વાસ ઇત્યુચ્ચાર્ય
અમુકગોત્ર એતત્તે વાસઃ સ્વધા ઇતિ સૂત્રદાનમ્ ।
વામેન પાણિના ઉદકપાત્રં ગૃહીત્વા ઊર્જં વહન્તીરમૃતં ઘૃતં પયઃ
ઇત્યાદિ પિણ્ડોપરિ ધારાત્યાગઃ ॥ ૧,૨૧૮.૨૫॥

પૂર્વસ્થાપિતપાત્રશેષોદકૈઃ પ્રત્યેકં પિણ્ડસેચનં-પિણ્ડમાવાહ્ય
ગન્ધાદિદાનં-પિણ્ડોપરિ કુશપત્રઞ્ચ દત્ત્વા ૐ અક્ષન્નમીમદન્તહ્ય વ
પ્રિયા અધૂષત અસ્તોષતસ્વભાનવો વિપ્રા નવિષ્ઠયામતી ।
યો જાન્વિન્દ્ર તે હરીતિ ત્રિર્જપઃ ॥ ૧,૨૧૮.૨૬॥

ૐ ઇત્થં માતામહાદિબ્રાહ્મણાનામાચમનમ્ ।
ૐ સુસુપ્રોક્ષિતમસ્ત્વિતિ ભૂમ્યભ્યુક્ષણં કૃત્વા ।
ૐ અપાં મધ્યે સ્થિતા દેવાઃ સર્વમપ્સુ પ્રતિષ્ઠિતમ્ ।
બ્રાહ્મણસ્ય કરે ન્યસ્તાઃ શિવા આપો ભવન્તુ નઃ ।
શિવા આપઃ સન્ત્વિતિ બ્રાહ્મણહસ્તે જલદાનમ્ ।
લક્ષ્મીર્વસતિપુષ્પેષુ લક્ષ્મીર્વસતિ પુષ્કરે ।

લક્ષ્મીર્વસતિ ગોષ્ઠેષુ સૌમનસ્યં સદાસ્તુ તે ।
સૌમનસ્યમસ્ત્વિતિ પુષ્પદાનમ્ ।
અક્ષતં ચાસ્તુ મે પુણ્યં શાન્તિઃ પુષ્ટિર્ધૃતિશ્ચ મે ।
યદ્યચ્છ્રેયસ્કરં લોકે તત્તદસ્તુ સદા મમ ।
ૐ અક્ષતઞ્ચારિષ્ટઞ્ચાસ્તુ ઇતિ યવતણ્ડુલદાનમ્ ॥ ૧,૨૧૮.૨૭॥

અમુકગોત્રાણામસ્મત્પિતૃપિતામહપ્રપિતામહાનાં
સપત્નીકાનામિદમન્નપાનાદિકમક્ષય્યમસ્ત્વિતિ પિત્રાદિબ્રાહ્મણહસ્તે તિલજલદાનમ્ ।
અસ્ત્વિતિ બ્રાહ્મણો વદેત્ ।
એતન્માતામહાદીનામક્ષય્યમાશિષઃ ।
ૐ અઘોરાઃ પિતરઃ સન્તુ ગોત્રં નો વર્ધતાં–દાતારો નોઽભિવર્ધન્તાં વેદાઃ સન્તતિરેવ ચ ।
શ્રદ્ધા ચ નો મા વ્યગમદ્બહુદેયઞ્ચ નોઽસ્ત્વિતિ ।
અન્નઞ્ચ નો બહુ ભવેદતિથીંશ્ચ લભેમહિ ।
યાચિતારશ્ચ નઃ સન્તુ મા ચ યાચિષ્મ કઞ્ચન ।
એતાઃ સત્યાશિષઃ સન્તુ ॥ ૧,૨૧૮.૨૮॥

સૌમનસ્યમસ્તુ ।
અસ્ત્વિત્યુક્તે પ્રદત્તપિણ્ડસ્થાને અર્ઘ્યાર્થપવિત્રમોચનમ્ ।
કુશપવિત્રં ગૃહીત્વાતેન કુશેન પિત્રાદિબ્રાહ્મણં સ્પૃષ્ટ્વા સ્વધાં
વાચયિષ્યે-ૐ વાચ્યતાં-ૐ પિતૃપિતામહેભ્યો
યથાનામશર્મભ્યઃ સપત્નીકેભ્યઃ સ્વધોચ્યતામ્ ।
અસ્તુસ્વધા ઇત્યુક્તે ઊર્જં વહન્તીરમૃતં ધૃતમિતિ પિણ્ડોપરિ વારિધારાં
દદ્યાત્ ॥ ૧,૨૧૮.૨૯॥

તતઃ ૐ વિશ્વેદેવા અસ્મિન્યજ્ઞે પ્રીયન્તા–દેવબ્રાહ્મણહસ્તે યવોદકદાનમ્ ।
ૐ પ્રીયન્તામિતિ તેનોક્તે ૐ દેવતાભ્ય ઇતિ ત્રિર્જપેત્ ॥ ૧,૨૧૮.૩૦॥

અધોમુખઃ પિણ્ડપાત્રાણિ ચાલયિત્વા આચમ્ય દક્ષિણોપવીતી પૂર્વાભિમુખઃ
ૐ અમુકગોત્રાય અમુકદેવશર્મણે બ્રાહ્મણાય સપત્નીકાય
શ્રાદ્ધપ્રતિષ્ઠાર્થદક્ષિણામેતદ્રજતં તુભ્યમહં
સમ્પ્રદદે ઇતિ દક્ષિણાં દદ્યાત્ ।
ઇતિ દેવૂબ્રાહ્મણાય દક્ષિણાદાનમ્ ॥ ૧,૨૧૮.૩૧॥

તતઃ પિતૃબ્રાહ્મણે પિણ્ડાઃ સમ્પન્ના ઇતિ પ્રશ્નઃ ।
સુસમ્પન્ના ઇતિ પિણ્ડે ક્ષીરધારાં દત્ત્વા પિણ્ડચાલનં અતિથિબ્રાહ્મણે

પિણ્ડપાત્રમુત્તાનં કૃત્વા ૐ વાજે વાજે વત વાજિનો નો ધનેષુ
વિપ્રા અમૃતા ઋતજ્ઞાઃ ।
અસ્યમધ્વઃ પિબત માદયધ્વં તૃપ્ત્રા યાત પથિભિર્દેવયાનૈરિતિ પિણ્ડા
દિવિસર્જનં-આમાવાજસ્ય પ્રસવો જગમ્યાદેમે દ્યાવાપૃથિવી વિશ્વરૂપે
આમાગન્તાં પિતરા ચામા સોમોઽમૃતત્વેન ગમ્યાત્ ।
ઇતિ દેવવિસર્જનમ્ ।
ૐ અભિગમ્યતામિતિ પિતૃબ્રાહ્મણવિસર્જનમ્ ।
બ્રાહ્મણૈરનુદ્ગતસ્ય નિવર્તનમ્ ।
ગવાદિષુ પિણ્ડપ્રતિપાદનમિતિ શેષઃ ॥ ૧,૨૧૮.૩૨॥

અયં શ્રાદ્ધવિધિઃ પ્રોક્તઃ પઠિતઃ પાપનાશનઃ ।
અનેન વિધિના શ્રાદ્ધં કૃતં વૈ યત્ર કુત્રચિત્ ॥ ૧,૨૧૮.૩૩॥

અક્ષયા સ્યાત્પિતૃણાઞ્ચ સ્વર્ગપ્રાપ્તિર્ધ્રુવા તથા ।
ઇત્યુક્તં પાર્વણં શ્રાદ્ધં પિતૃણાં બ્રહ્મલોકદમ્ ॥ ૧,૨૧૮.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પાર્વણશ્રાદ્ધકથનં નામાષ્ટ્રદશાધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧૯
બ્રહ્મોવાચ ।
નિત્યશ્રાદ્ધં પ્રવક્ષ્યામિ પૂર્વવત્તદ્વિશેષવત્ ।
ૐ અમુકગોત્રાણામસ્મત્પિતૃપિતામહાનાં અમુકશર્મણાં સપત્નીકાનાં
શ્રાદ્ધં સિદ્ધાન્નેન યુષ્માસ્વહં કરિષ્યે ।
આસનાદિકમત્ર સ્યાદ્વિશ્વેદેવાવિવર્જિતમ્ ॥ ૧,૨૧૯.૧॥

વૃદ્ધિશ્રાદ્ધં પ્રવક્ષ્યામિ પૂર્વવત્તદ્વિશેષકમ્ ।
જાતપુત્રમુખદર્શનાદૌ વૃદ્ધિ શ્રાદ્ધં પૂર્વાભિમુખેષુ દક્ષિણોપવીતિષુ
સયવબદરકુશૈર્દેવતીર્થેન નમસ્કારાન્તેન દક્ષિણોપચારેણ કર્તવ્યમ્ ॥ ૧,૨૧૯.૨॥

દક્ષિણજાનુ ગૃહીત્વા અદ્યાસ્મદીયામુકવૃદ્ધૌ
અમુકગાત્રાણામસ્મત્પ્રપિતામહીપિતામહીમાતૃણામમુકદેવીનામમુકગોત્રાણાં
શ્રાદ્ધે કર્તવ્યે વસુસત્યસંજ્ઞકાનાં વિશ્વેષાં દેવાનાં શ્રાદ્ધં
સિદ્ધાન્નેનયુષ્માસુ મયા કર્તવ્યમિતિ દેવબ્રાહ્મણામન્ત્રણમ્ ।
ૐ કરિષ્યસીતિ તેનોક્ત ઇત્થમેવાપરદેવબ્રાહ્મણામન્ત્રણમ્ ॥ ૧,૨૧૯.૩॥

તતઃ અમુકવૃદ્ધૌ અમુકગોત્રાયા મત્પ્રપિતામહ્યા અમુકદેવ્યા નાન્દીમુખ્યાઃ
શ્રાદ્ધં સિદ્ધાન્નેન યુષ્માસુ મયા કર્તવ્યમિતિ પ્રપિતામહીબ્રાહ્મણામન્ત્રણમ્ ।
કરિષ્યામીતિ તેનોક્તે ઇત્થમેવ પ્રમાતામહ્યાદિબ્રાહ્માણમન્ત્રણમ્ ॥ ૧,૨૧૯.૪॥

દેવપિતૃસર્વદેવબ્રાહ્મણં શ્રાદ્ધકરણાનુજ્ઞાપનમ્ ।
આસને ૐ વિશ્વેદેવાસ આગત શ્ૃણુતામ ઇમંઠ ઇવમ્ ।
તં બર્હિર્નિષીદત ।
ૐ વિશ્વેદેવાઃ શ્ૃણુતેમં ઇવં યે મે અન્તરિક્ષે ય ઉદધવિષ્ટ ।
પે અગ્નિજિહ્વા ઉતવા યદત્રા આસાદ્યાસ્મિન્બર્હિષિ માદયધ્વમ્ ।
ૐ આગચ્છન્તુ ઇતિ વિશ્વેદેવાવાહનં-ગન્ધાદિદાનમ્ ।
અચ્છિદ્રાવધારણવાચનમ્ ॥ ૧,૨૧૯.૫॥

તતઃ પ્રપિતામહીપ્રભૃતીનામનુજ્ઞાપનમાસનદાનં ગન્ધાદિદાનઞ્ચ અચ્છિદ્રાવધારણવાચનમ્ ।
ઇત્થં પિતામહ્યાઃ માતુઃ ।
તતઃ પ્રપિતામહાદીનાં અનુજ્ઞાપનમ્ ।
આસનમાવાહનઙ્ગન્ધાદિદાનં-વૃદ્ધપ્રમાતામહાદીનામનુજ્ઞાપનાદિકરણમ્ ।
ૐ વસુસત્યસંજ્ઞકેભ્યો દેવેભ્ય એતદન્નં સઘૃતં સપાનીયં સવ્યઞ્જનં
સવદરં સદધિ પ્રતિષિદ્ધવર્જિતં નમ ઇતિ અન્નસઙ્કલ્પનમ્ ।
ૐ અમુકગોત્રે ! મત્પિતામહમુકદેવિ નાન્દીમુખિ ! એતદન્નં સબદરં સદધિ નમઃ ।
એવં માતામહપ્રભાતામહેભ્યઃ ॥ ૧,૨૧૯.૬॥

એકોદ્દિષ્ટે પુરોડવશ્યં તદ્વિશેષં વદે શ્ૃણુ ।
પ્રથમં નિમન્ત્રણં પાદપ્રક્ષાલનમાસનમ્ ।
અદ્ય અમુકગોત્રસ્ય મત્પિતુરમુકદેવશર્મણઃ
પ્રતિસાંવત્સરિકમેકોદ્દિષ્ટશ્રાદ્ધં સિદ્ધાન્નેન યુષ્માસ્વહં કરિષ્યે ।
શ્રાદ્ધકરણાનુજ્ઞાપનમાસનં ગન્ધાદિદાનમન્નાનુકલ્પનમ્ ।
જપ્યં નિવીતી ।
ઉત્તરાભિમુખીભૂયાતિથિશ્રાદ્ધં કુર્યાત્ ॥ ૧,૨૧૯.૭॥

તતસ્તૃપ્તિં જ્ઞાત્વા દક્ષિણાભિમુખીવામોપવીતી ઉચ્છિષ્ટસમીપે અગ્નિદગ્ધા ઇતિ અન્નવિકિરણમ્ ।
અમુકગોત્રમત્પિતરમુકદેવશર્મન્નેતત્તે જલમવનેનિક્ષ્વ યે ચાત્ર
ત્વામનુયાશ્ચ ત્વામનુતસ્મૈ તે સ્વધા ઇતિ રેખોપરિ વારિધારાદાનમ્ ।
શેષં પૂર્વવત્ ॥ ૧,૨૧૯.૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે

એકોનવિંશાધિકદ્વિશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૨૦
બ્રહ્મોવાચ ।
સપિણ્ડીકરણં વક્ષ્યે પૂર્ણેઽબ્દે તત્ક્ષયેઽહનિ ।
કૃતં સમ્યગ્યથાકાલે પ્રેતાદેઃ પિતૃલોકદમ્ ॥ ૧,૨૨૦.૧॥

સપિણ્ડીકરણં કુર્યાદપરાહ્ને તુ પૂર્વવત્ ।
પિતામહાદિબ્રાહ્મણનિમન્ત્રણમ્ ।
ૐ પુરૂરવાર્દ્રવસંજ્ઞકેભ્યો દેવેભ્ય એતદાસનં નમઃ ।
વામપાર્શ્વે ચાસનદાનમ્ ।
આવાહનમ્ ।
તતઃ પિતામહપ્રપિતામહવૃદ્ધપ્રપિતામહાનાં સપત્નીકાનાં શ્રાદ્ધમહં
કરિષ્યે ઇત્યનુજ્ઞાગ્રહણં-પાત્રત્રયકરણં-પાત્રોપરિ કુશં દત્ત્વા
પાત્રાન્તરેણ પિધાય અચ્છિદ્રાવધારણાન્તં પરિસમાપ્ય
તથૈવ પિતુરપિ સપત્નીકસ્ય પ્રેતપદાન્તનામ્ના શ્રાદ્ધકરણાનુજ્ઞાપનં
દેવપાત્રાચ્છિદ્રાવધારણમ્ ॥ ૧,૨૨૦.૨॥

તત્પરિસમાપ્ય પિતામહપ્રપિતામહવૃદ્ધપ્રપિતામહક્રમેણ પાત્રાણાં મનાક્ચાલનમ્ ।
ઉદ્ઘાટનં કૃત્વા–ૐ યે સમાનાઃ સમનસઃ પિતરો યમરાજ્યે ।
તેષાં લોકઃ સ્વધા નમો યજ્ઞો દેવેષુ કલ્પતામ્ ।
ૐ યે સમાનાઃ સમનસો જીવા જીવેષુ મામકાઃ ।
તેષાં શ્રીર્મયિ કલ્પતામસ્મિન્લોકે શતં સમાઃ ।
એતન્મન્ત્રદ્વયેન પિતૃપાત્રોદકં પિતામહપ્રપિતામહપાત્રે
વૃદ્ધપ્રપિતામહપાત્રં પરિત્યજ્ય પિતામહપ્રપિતામહયોરુદકં પવિત્રઞ્ચ
પિતૃપાત્રે ક્ષિપેત્ ॥ ૧,૨૨૦.૩॥

તતઃ પિતૃબ્રાહ્મણહસ્તે પાત્રસ્થપવિત્રદાનમ્ ।
પાત્રસ્થપુષ્પેણ શિરસઃ કરપાદાર્ચનં બ્રાહ્મણહસ્તેઽન્ય
જલદાનં–હસ્તાભ્યાં પાત્રમુત્થાપ્ય ૐ યા દિવ્યેતિ પઠિત્વા ૐ અમુકગોત્ર
મત્પિતામહ અમુકદેવશર્મન્સપત્નીક એષ તે અર્ઘ્યઃ સ્વધા ।
પિતૃપાત્રેણૈવ પિતામહબ્રાહ્મણહસ્તે સ્તોકમર્ઘ્યોદકં
સપવિત્રઙ્ગૃહીત્વાસ્તોકમુદકં પિણ્ડસેચનાર્થં પાત્રાન્તરેણ પિધાય

પિતૃબ્રાહ્મણવામપાર્શ્વે દક્ષિણાગ્રકુશોપરિ પિતૃભ્યઃ સ્તાનમસીતિ
અધોમુખપાત્રસ્થપનમ્ ॥ ૧,૨૨૦.૪॥

પિતામહપ્રપિતામહવૃદ્ધપ્રપિતામહેભ્યો ગન્ધાદિદાનમગ્નૌકરણમ્ ।
અવશિષ્ટાન્નં પ્રપિતામહાદિપાત્રે ક્ષિપેત્ ।
પિતામહપાત્રાભિમન્ત્રણપર્યન્તક્રમેણ સમાપ્યાપિ બ્રાહ્મણપાત્રાભિમન્ત્રણમ્ ।
અઙ્ગુષ્ઠનિવેશનં તિલવિકરણં કૃત્વા અમુકગોત્ર એતત્તે અન્નં સઘૃતં
સપાનીયં સવ્યઞ્જનં પ્રતિષિદ્ધવર્જિતં યે ચાત્ર ત્વા મનુયાશ્ચ
ત્વામનુ તસ્મૈ તે સ્વધા ઇતિ ॥ ૧,૨૨૦.૫॥

તતો દેવપ્રભૃતિભ્ય અપોશાનં દદ્યાત્ ।
અતિથિપ્રાપ્તૌ અતિથિશ્રાદ્ધં કુર્યાત્ ।
અસ્મિન્નવસરે વિકિરણમ્ ।
પિતામાહદૌ પ્રશ્નં કૃત્વા પિતૃબ્રાહ્મણમોં સ્વદિતં ભવદ્ભિરિતિ પ્રશ્નઃ ।
ૐ અમુકગોત્ર મત્પિતઃ અમુકશર્મન્સપત્નીક એષ તે પિણ્ડો
યે ચાત્રત્વામનુયાશ્ચ ત્વામનુ તસ્મૈ સ્વધેતિ પિણ્ડપાત્રમચ્છિદ્રમસ્તુ ।
તતઃ સઙ્કલ્પ સિદ્ધિવાચનં સમાપ્ય પિણ્ડં દ્વિધા કૃત્વા યે સમાનાઃ
સુમનસ ઇતિ મન્ત્રદ્વયં પઠિત્વા પિતામહવૃદ્ધપ્રપિતામહપાત્રેષુ ક્ષિપેત્ ।
પિણ્ડેષુ ગન્ધાદિકં દત્ત્વા પિણ્ડચાલનમ્ ।
અતિથિબ્રાહ્મણે સ્વદિતાદિપ્રશ્નઃ ।
બ્રાહ્મણાનામાચમનમ્ ।
ભુક્તિક્રમેણ તામ્બૂલદાનમ્ ।
સુપ્રોક્ષિતમસ્તુ શિવા આપઃ સન્તુ-વૃદ્ધપ્રપિતામહક્રમેણ બ્રાહ્મણહસ્તે જલદાનમ્ ।
ગોત્રસ્યાક્ષય્યમસ્તુ પિતૃબ્રાહ્મણહસ્તે ઉપતિષ્ટતામિતિ સતિજલદાનમ્ ॥ ૧,૨૨૦.૬॥

અઘોરાઃ પિતરઃ સન્તુ અસ્ત્વિત્યુક્તે સ્વધાં વાચયિષ્ય ઇતિ પિતામાહદિબ્રાહ્મણાનુજ્ઞાપનમ્ ॥ ૧,૨૨૦.૭॥

ૐ વાચ્યતાં ઇત્યુક્તે ૐ પિતામહાદિભ્યઃ સ્વધોચ્યતામ્ ।
અસ્તુ સ્વધેત્યુક્તે પિતૃબ્રાહ્મણ પિતૃભ્યઃ સ્વધોચ્યતામિતિ ।
અસ્તુ સ્વધેત્યુક્તે ૐ ઊર્જં વહન્તીરિતિ દક્ષિણાભિમુખવારિધારાત્યાગઃ ।
ૐ વિશ્વેદેવા અસ્મિન્યજ્ઞે પ્રીયન્તામિતિ દેવબ્રાહ્મણહસ્તે ૐ યવોદકદાનમ્ ।
ૐ દેવતાભ્ય ઇતિ ત્રિર્જપઃ ॥ ૧,૨૨૦.૮॥

પિણ્ડપાત્રાણિ ચાલયિત્વા આચમ્ય પિતામહાદિભ્યો દક્ષિણાં દત્ત્વા તતઃ
પિતૃ બ્રાહ્મણાય આશિષો મે પ્રદીયન્તામિત્યાશીઃ પ્રાર્થનમ્ ।

પ્રતિગૃહ્યતામિત્યુક્તે દાતારો નોઽભિવર્ધન્તામિતિ પાત્રમુત્તાનં કૃત્વા વાજે વાજેદ્દ્વિસર્જનમ્ ।
અભિરણ્યતામિતિ પિતૃબ્રાહ્મણવિસર્જનમ્ ॥ ૧,૨૨૦.૯॥

સપિણ્ડીકરણશ્રાદ્ધં વ્યાસપ્રોક્તં મયા તવ ।
શ્રાદ્ધં વિષ્ણુઃ શ્રાદ્ધકર્તા ફલં શ્રાદ્ધાદિકં હરિઃ ॥ ૧,૨૨૦.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રાદ્ધાનુષ્ઠાનં નામવિંશાધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૧

બ્રહ્માોવાચ ।
ધર્મસારમહં વક્ષ્યે સંક્ષેપાચ્છૃણુ શઙ્કર ।
ભુક્તિમુક્તિપ્રદં સૂક્ષ્મં સર્વપાપવિનાશનમ્ ॥ ૧,૨૨૧.૧॥

શ્રુતં ધર્મં બલં ધૈર્યં સુખમુત્સાહમેવ ચ ।
શોકો હરતિ વૈ નૃણાં તસ્માચ્છોકં પરિત્યજેત્ ॥ ૧,૨૨૧.૨॥

કર્મદારાઃ કર્મલોકાઃ કર્મસમ્બન્ધિબાન્ધવાઃ ।
કર્માણિ પ્રેરયન્તીહ પુરુષં સુખદુઃખયોઃ ॥ ૧,૨૨૧.૩॥

દાનમે પરો ધર્મો દાનાત્સર્વમવાપ્યતે ।
દાનાઃત્સ્વર્ગશ્ચ રાજ્યઞ્ચ દદ્યાદ્દનં તતો નરઃ ॥ ૧,૨૨૧.૪॥

એકતો દાનમેવાહુઃ સમગ્રવરદક્ષિણમ્ ।
એકતો ભયભીતસ્ય પ્રાણિનઃ પ્રાણરક્ષણમ્ ॥ ૧,૨૨૧.૫॥

તપસા બ્રહ્મચર્યેણ યજ્ઞૈઃ સ્નાનેન વા પુનઃ ।
ધર્મસ્ય નાશકા યે ચ તે વૈ નિરયગામિનઃ ॥ ૧,૨૨૧.૬॥

યે ચ હોમજપસ્નાનદેવતાર્ચનતત્પરાઃ ।
સત્યક્ષમાદયાયુક્તાસ્તે નરાઃ સ્વર્ગગામિનઃ ॥ ૧,૨૨૧.૭॥

ન દાતા સુખદુઃખાનાં ન ચ હર્તાસ્તિ કશ્ચન ।
ભુઞ્જતે સ્વકૃતાન્યેવ દુઃખાનિ ચ સુખાનિ ચ ॥ ૧,૨૨૧.૮॥

ધર્માર્થં જીવિતં યેષાં દુર્ગાણ્યતિતરન્તિ તે ।
સન્તુષ્ટઃ કો ન શક્નોતિ ફલમૂલૈશ્ચ વર્તિતુમ્ ॥ ૧,૨૨૧.૯॥

સર્વ એવ હિ સૌખ્યેન સઙ્કટાન્યવગાહતે ।

ઇદમેવ હિ લોભસ્ય કાર્યં સ્યા દતિદુષ્કરમ્ ॥ ૧,૨૨૧.૧૦॥

લોભાત્ક્રોધઃ પ્રભવતિ લોભાદ્દ્રોહઃ પ્રવર્તતે ।
લોભાન્મોહશ્ચ માયા ચ માનો મત્સર એવ ચ ॥ ૧,૨૨૧.૧૧॥

રાગદ્વેષાનૃતક્રોધલોભમોહમદોજ્ઝિતઃ ।
યઃ સ શાન્તઃ પરં લોકં યાતિ પાપવિવર્જિતઃ ॥ ૧,૨૨૧.૧૨॥

દેવતા મુનયો નાગા ગન્ધર્વા ગુહ્યકા હર ।
ધાર્મિકં પૂજયન્તીહ ન ધનાઢ્યં ન કામિનમ્ ॥ ૧,૨૨૧.૧૩॥

અનન્તબલવીર્યેણ પ્રજ્ઞાયા પૌરુષેણ વા ।
અલભ્યં લભતે મર્ત્યસ્તત્ર કા પરિવેદના ॥ ૧,૨૨૧.૧૪॥

સર્વસત્ત્વદયાલુત્વં સર્વેન્દ્રિયવિનિગ્રહઃ ।
સર્વત્રાનિત્યબુદ્ધિત્વં શ્રેયઃ પરમિદં સ્મૃતમ્ ॥ ૧,૨૨૧.૧૫॥

પશ્યન્નિવાગ્રતો મૃત્યું યો ધર્મં નાચરેન્નરઃ ।
અજાગલસ્તનસ્યેવ તસ્ય જન્મ નિરર્થકમ્ ॥ ૧,૨૨૧.૧૬॥

ભ્રૂણહા બ્રહ્મહા ગોઘ્નઃ પિતૃહા ગુરુતલ્પગઃ ।
ભૂમિં સર્વગુણોપેતાં દત્ત્વા પાપૈઃ પ્રમુચ્યતે ॥ ૧,૨૨૧.૧૭॥

ન ગોદાનાત્પરં દાનં કિઞ્ચિદસ્તીતિ મે મતિઃ ।
યા ગૌર્ન્યાયાર્જિતા દત્તા કૃત્સ્નં તારયતે કુલમ્ ॥ ૧,૨૨૧.૧૮॥

નાન્નદાનાત્પરં દાનં કિઞ્ચિદસ્તિ વૃષધ્વજ ! ।
અન્નેન ધાર્યતે સર્વં ચરાચરમિદં જગત્ ॥ ૧,૨૨૧.૧૯॥

કન્યાદાનં વૃષોત્સર્ગસ્તીર્થસેવા શ્રુતં તથા ।
હસ્ત્યશ્વરથદાનાનિ મણિરત્નવસુન્ધરાઃ ॥ ૧,૨૨૧.૨૦॥

અન્નદાનસ્ય સર્વાણિ કલાં નાર્હન્તિ ષોડશીમ્ ।
અન્નાત્પ્રાણા બલં તેજશ્ચાન્નાદ્વીર્યં ધૃતિઃ સ્મૃતિઃ ॥ ૧,૨૨૧.૨૧॥

કૂપવાપીતડાગાદીનારામાંશ્ચૈવ કારયેત્ ।
ત્રિસપ્તકુલમુદ્ધૃત્ય વિષ્ણુલોકે મહીયતે ॥ ૧,૨૨૧.૨૨॥

સાધૂનાં દર્શનં પુણ્યં તીર્થાદપિ વિશિષ્યતે ।
કાલેન તીર્થં ફલતિ સદ્યઃ સાધુસમાગમઃ ॥ ૧,૨૨૧.૨૩॥

સત્યં દમસ્તપઃ શૌચં સન્તોષશ્ચ ક્ષમાર્જવમ્ ।
જ્ઞાનં શમો દયા દાનમેષ ધર્મઃ સનાતનઃ ॥ ૧,૨૨૧.૨૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ધર્મસારકથનં નામૈકવિંશાધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૨
બ્રહ્મોવાચ ।
પ્રાયશ્ચિત્તાદિ વક્ષ્યેઽહં નરકૌઘવિમર્દનમ્ ।
મક્ષિકા વિપ્રુષો નારી ભુવિ તોયં હુતાશનઃ ।
માર્જારો નકુલશ્ચૈવ શુચીન્યેતાનિ નિત્યશઃ ॥ ૧,૨૨૨.૧॥

યઃ શૂદ્રોચ્છિષ્ટસંસ્પૃષ્ટં પ્રમાદાદ્ભક્ષયેદ્વિજઃ ।
અહોરાત્રોષિતો ભૂત્વા પઞ્ચગવ્યેન શુધ્યતિ ॥ ૧,૨૨૨.૨॥

વિપ્રો વિપ્રેણ સંસ્પૃષ્ટ ઉચ્છિષ્ટેન કદાચન ।
સ્નાનં જપ્યઞ્ચ કર્તવ્યં દિનસ્યાન્તે ચ ભોજનમ્ ॥ ૧,૨૨૨.૩॥

અન્નં સમક્ષિકાકેશં શુધ્યેદ્વાન્તેન તત્ક્ષણાત્ ।
યશ્ચ પાણિતલે ભુઙ્ક્તે અઙ્ગુલ્યા બાહુના ચ યઃ ॥ ૧,૨૨૨.૪॥

અહોરાત્રેણ શુધ્યેત પિબેદ્યદિ ન વાર્યુત ।
પીતશેષન્તુ યત્તોયં વામહસ્તેન મદ્યવત્ ॥ ૧,૨૨૨.૫॥

ચર્મમધ્યગતં તોયમશુચિ સ્યાન્ન તત્પિબેત્ ।
અન્ત્યજાતિરવિજ્ઞાતો નિવસેદ્યસ્ય વેશ્મનિ ॥ ૧,૨૨૨.૬॥

ચાન્દ્રાયણં પરાકં વા દ્વિજાતીનાં વિશોધનમ્ ।
પ્રાજાપત્યન્તુ શૂદ્રસ્ય પશ્ચાજ્જ્ઞાતે તથાપરે ॥ ૧,૨૨૨.૭॥

યસ્તત્ર ભુઙ્ક્તે પક્વાન્નં કૃચ્છ્રાર્ધં તસ્ય દાપયેત્ ।
તેષામપિ ચ યો ભુઙ્ક્તે કૃચ્છ્રપાદો વિધીયતે ॥ ૧,૨૨૨.૮॥

રજકાનાઞ્ચ શૈલૂષવેણુચર્મોપજીવિનામ્ ।
એતદન્નઞ્ચ યો ભુઙ્ક્તે દ્વિજશ્ચાન્દ્રાયણં ચરેત્ ॥ ૧,૨૨૨.૯॥

ચાણ્ડાલકૂપભાણ્ડેષુ અજ્ઞાનાચ્ચેત્પિબેજ્જલમ્ ।
કુર્યાત્સાન્તપનં વિપ્રસ્તદર્ધઞ્ચ વિશઃ સ્મૃતમ્ ॥ ૧,૨૨૨.૧૦॥

પાદં શૂદ્રસ્ય દાતવ્યમજ્ઞાનાદન્ત્યવેશ્મનિ ।
પ્રાયશ્ચિત્તં ત્રિકૃચ્છ્રં સ્યાત્પરાકમન્ત્યજાગતૌ ॥ ૧,૨૨૨.૧૧॥

અન્ત્યજોચ્છિષ્ટભુક્શુધ્યેદ્દ્વિજશ્ચાન્દ્રાયણેન ચ ।
ચાણ્ડાલન્નં યદા ભુઙ્ક્તે પ્રમાદાદૈન્દવઞ્ચરેત્ ॥ ૧,૨૨૨.૧૨॥

ક્ષત્રજાતિઃ સાન્તપનં ષડ્દ્વિરાત્રં પરે તથા ।
એકવૃક્ષ તુ ચણ્ડાલઃ પ્રમાદાદ્બ્રાહ્મણો યદિ ।
ફલં ભક્ષયતે તત્ર અહોરાત્રેણ શુધ્યતિ ॥ ૧,૨૨૨.૧૩॥

ભુક્ત્વોપવિષ્ટોઽનાચાન્તશ્ચણ્ડાલં યદિ સંસ્પૃશેત્ ।
ગાયત્ર્યષ્ટસહસ્રન્તુ દ્રુપદાં વા શતં જપેત્ ॥ ૧,૨૨૨.૧૪॥

ચાણ્ડાલશ્વપચૈર્વાપિ વિણ્મૂત્રે તુ કૃતે દ્વિજાઃ ।
પ્રાયશ્ચિત્તં ત્રિરાત્રં સ્યાત્પરાકશ્ચાન્ત્યજાગતૌ ॥ ૧,૨૨૨.૧૫॥

અકામતઃ સ્ત્રિયો ગત્વા પરાકસ્તત્ર સાધકઃ ।
અન્ત્યજાતિપ્રસૂતસ્ય પ્રાયશ્ચિત્તં ન વિદ્યતે ॥ ૧,૨૨૨.૧૬॥

મદ્યાદિદુષ્ટભાણ્ડેષુ યાદપઃ પિબતિ દ્વિજઃ ।
કૃચ્છ્રપાદેન શુધ્યેદ્વૈ પુનઃ સંસ્કારકર્મણા ॥ ૧,૨૨૨.૧૭॥

યે પ્રત્યવસિતા વિપ્રા વજ્રાગ્નિપવનાદિષુ ।
અન્નપાનાદિ સંગૃહ્ય ચિકીર્ષન્તિ ગૃહાન્તરમ્ ॥ ૧,૨૨૨.૧૮॥

ચારયેત્ત્રીણિ કૃચ્છાણિ ત્રીણિ ચાન્દ્રાયણાનિ વૈ ।
જાતકર્માદિસંસ્કારં વસિષ્ઠો મુનિરબ્રવીત્ ॥ ૧,૨૨૨.૧૯॥

પ્રાજાપત્યાદિભિર્દ્રષ્ટા સ્ત્રી શુધ્યેત્તુ દ્વિભોજનાત્ ।
ઉચ્છિષ્ટોચ્છિષ્ટસંસ્પૃષ્ટંશુના શૂદ્રેણ વા દ્વિજઃ ॥ ૧,૨૨૨.૨૦॥

ઉપોષ્ય રજનીમેકાં પઞ્ચગવ્યેન શુધ્યતિ ।
વર્ણબાહ્યેન સંસ્પૃષ્ટઃ પઞ્ચરાત્રેણ વૈ તદા ॥ ૧,૨૨૨.૨૧॥

અદુષ્ટાઃ સન્તતા ધારાઃ વાતોદ્ધૂતાશ્ચ રેણવઃ ।
સ્ત્રિયો બાલાશ્ચ વૃદ્ધાશ્ચ ન દુષ્યન્તિ કદાચન ॥ ૧,૨૨૨.૨૨॥

નિત્યમાસ્યં શુચિ સ્ત્રીણાં શકુન્તૈઃ પાતિતં ફલમ્ ।
પ્રસ્ત્રવે ચ શુચિર્વત્સઃ શ્વા મૃગગ્રહણે શુચિઃ ॥ ૧,૨૨૨.૨૩॥

ઉદકે ચોદકસ્થં તુ સ્થલેષુ સ્થલજં શુચિ ।

પાદૌ સ્થાપ્યૌ ચ તત્રૈવ આચાન્તઃ શુચિતામિયાત્ ॥ ૧,૨૨૨.૨૪॥

શુધ્યેત્તદ્ભસ્મના કાંસ્યં સુરયા યન્ન લિપ્યતે ।
મૂત્રેણ સુરયા મિશ્રં તપનૈઃ ખલુ શુધ્યતિ ॥ ૧,૨૨૨.૨૫॥

ગવાઘ્રાતાનિ કાંસ્યાનિ શૂદ્રોચ્છિષ્ટાનિ યાનિ ચ ।
કાકશ્વાપહતાન્યેવ શુધ્યન્તિ દશ ભસ્મના ॥ ૧,૨૨૨.૨૬॥

શૂદ્રભાજનભોક્તા યઃ પઞ્ચગવ્યં ત્ર્યુપોષિતઃ ।
ઉચ્છિષ્ટં સ્પૃશતે વિપ્રઃ શ્વસૂદ્રશ્વાપરાધિકઃ ॥ ૧,૨૨૨.૨૭॥

ઉપોષિતઃ પઞ્ચગવ્યાચ્છુધ્યેત્સ્પૃષ્ટ્વા રજસ્વલામ્ ।
અનુદકેષુ દેશેષુ ચોરવ્યાઘ્રાકુલે પથિ ॥ ૧,૨૨૨.૨૮॥

કૃત્વા મૂત્રપુરીષન્તુ દ્રવ્યહસ્તો ન દુષ્યતિ ।
ભૂમૌનિઃ ક્ષૈપ્ય તદ્દ્રવ્યં શૌચં કૃત્વા સમાહિતઃ ॥ ૧,૨૨૨.૨૯॥

આરનાલં દધિ ક્ષીરં તક્રન્તુ કૃસરઞ્ચ યત્ ।
શૂદ્રાદપિ ચ તદ્ગ્રાહ્યં માંસં મધુ તથાન્ત્યજાત્ ॥ ૧,૨૨૨.૩૦॥

ગૌડીં પૈષ્ટીઞ્ચ માધ્વીકં વિપ્રાદિર્યઃ સુરાં પિબેત્ ।
સુરાં પિબન્દ્વિજઃ શુધ્યેદગ્નિવર્ણાં સુરાં પિબન્ ॥ ૧,૨૨૨.૩૧॥

વિપ્રઃ પઞ્ચશતં જપ્યં ગાયત્ર્યાઃ ક્ષત્રિયસ્ય ચ શતં
વિપ્રશ્ચ ભુક્ત્વાન્નં પાનપાત્રેણ સૂતકે ॥ ૧,૨૨૨.૩૨॥

શુચિર્વિપ્રો દશાહેન ક્ષત્રિયો દ્વાદશાહતઃ ।
વૈશ્યઃ પઞ્ચદશાહન શૂદ્રો માસેન શુધ્યતિ ॥ ૧,૨૨૨.૩૩॥

રાજ્ઞાં યુદ્ધેષુ યજ્ઞાદૌ દેશાન્તરગતેષુ ચ ।
બાલે પ્રેતે માસિકે ચ સદ્યઃ શૌચં વિધીયતે ॥ ૧,૨૨૨.૩૪॥

અવિવાહા તથા કન્યા દ્વિજો મૌઞ્જીવિવર્જિતઃ ।
જતદન્તશ્ચ બાલશ્ચ કુમારી ચ ત્રિવર્ષિકા ॥ ૧,૨૨૨.૩૫॥

તેષાં શુદ્ધિસ્ત્રિરાત્રેણ ગર્ભસ્ત્રાવે ત્રિરાત્રિભિઃ ।
સૂતાયાં માસતુલ્યાશ્ચ ચતુર્થેઽહ્નિ રજસ્વલા ॥ ૧,૨૨૨.૩૬॥

દુર્ભિક્ષે રાષ્ટ્રસમ્પતે સૂતકે મૃતકેપિ વા ।
નિયમાશ્ચ ન દુષ્યન્તિ દાનધર્મપરાસ્તથા ॥ ૧,૨૨૨.૩૭॥

દક્ષિકાલે વિવાહાદૌ દેવદ્વિજનિમન્ત્રિતે ।
પૂર્વસંકલ્પિતે વાપિ નાશૌચં મૃતસૂતકે ॥ ૧,૨૨૨.૩૮॥

પ્રસૂતપત્નીસંસ્પર્શાદશુચિઃ સ્યાત્તથા દ્વિજઃ ।
અગ્નયો યત્ર હૂયન્તે વેદો વા યત્ર પઠ્યતે ॥ ૧,૨૨૨.૩૯॥

સતતં વૈશ્વદેવા દિ ન તેષાં સૂતકં ભવેત્ ।
અશુદ્ધે ચ ગૃહે ભુક્તે ત્રિરાત્રાચ્છુધ્યતિ દ્વિજઃ ॥ ૧,૨૨૨.૪૦॥

બ્રાહ્મણી ક્ષત્રિયા વૈશ્યા શૂદ્રા ચૈવ રજસ્વલા ।
અન્યોન્યસ્પર્શનાત્તત્ર બ્રાહ્મણી તુ ત્રિરાત્રતઃ ॥ ૧,૨૨૨.૪૧॥

દ્વિરાત્રતઃ ક્ષત્રિયા ચ શુદ્ધા વૈશ્યા હ્યુપોષિતા ।
શૂદ્રા સ્નાનેન શુધ્યેત્તુ દ્રોણાર્થં ન વિસર્જયેત્ ॥ ૧,૨૨૨.૪૨॥

કાકશ્વાનોપની તન્તુ અન્નં બાહ્યન્તુ તત્ત્યજેત્ ।
સુવર્ણાદ્ભિઃ સમભ્યુક્ષ્ય હુતાશે ચ પ્રતાપયેત્ ॥ ૧,૨૨૨.૪૩॥

કૂપે ચ પતિતાન્દૃષ્ટ્વા શ્વશ‍ૃગાલૌ ચ મર્કટમ્ ।
તત્કૂપસ્યોદકં પીત્વા શુધ્યેદ્વિપ્રસ્ત્રિભિર્દિનૈઃ ।
ક્ષત્રિયોઽહર્દ્વયેનૈવ વૈશ્યો વૈકાહતઃ પરમ્ ॥ ૧,૨૨૨.૪૪॥

અસ્થિ ચર્મ મલં વાપિ મૂષિકાં યદિ કૂપતઃ ।
ઉદ્ધૃત્ય ચોદકં પઞ્ચ ગવ્યાચ્છુદ્ધ્યેત્તુ શોધિતમ્ ॥ ૧,૨૨૨.૪૫॥

તડાગે પુષ્કરિણ્યાદૌ ભસ્માદિં પાતયેત્તથા ।
ષટ્કુમ્ભાનપ ઉત્દ્ધૃય પઞ્ચગવ્યેન શુધ્યતિ ॥ ૧,૨૨૨.૪૬॥

સ્ત્રીરજઃ પતિતં મધ્યે ત્રિંશત્કુમ્ભાન્સમુદ્ધરેત્ ।
અગમ્યાગમનં કૃત્વા મદ્યગોમાંસભક્ષણમ્ ॥ ૧,૨૨૨.૪૭॥

શુધ્યે ચ્ચાન્દ્રાયણાદ્વિપ્રઃ પ્રાજાપત્યેન ભૂમિપઃ ।
વૈશ્યઃ સાન્તપનાચ્છૂદ્રઃ પઞ્ચાહોભિર્વિશુધ્યતિ ॥ ૧,૨૨૨.૪૮॥

પ્રાયશ્ચિત્તે કૃતે દદ્યાદ્ગવાં બ્રાહ્મણભોજનમ્ ।
ક્રીડાયાં શયનીયાદૌ નીલીવસ્ત્રં ન દુષ્યતિ ॥ ૧,૨૨૨.૪૯॥

નીલીવસ્ત્રં ન સ્પૃશેચ્ચ નીલી ચ નિરયં બ્રજેત્ ।
વ્રહ્મઘ્નશ્ચ સુરાપશ્ચ સ્તેયી ચ ગુરુતલ્પગઃ ॥ ૧,૨૨૨.૫૦॥

ઋક્ષં દૃષ્ટ્વા વિશુધ્યન્તે તત્સંયોગી ચ પઞ્ચમઃ ।

તતો ધેનુશતં દદ્યાદ્બ્રાહ્મણાનાન્તુ ભોજનમ્ ॥ ૧,૨૨૨.૫૧॥

બ્રહ્મહા દ્વાદશાબ્દાનિ કુટીં કૃત્વા વને વસેત્ ।
ન્યસ્યેદાત્માનમગ્નૌ વા સુસમિદ્ધે સુરાપકઃ ॥ ૧,૨૨૨.૫૨॥

સ્તેયી સર્વં વેદવિદે બ્રાહ્મણાયોપપાદયેત્ ।
વૃષમેકં સહસ્રં ગાં દદ્યાચ્ચ ગુરુતલ્પગઃ ॥ ૧,૨૨૨.૫૩॥

કૃતપાપશ્ચરેદ્રોધે દ્વૌ પાદૌ બન્ધયન્પશોઃ ।
સર્વકૃચ્છ્રં નિપાનેસ્યાત્કાન્તારે ગૃહદાહતઃ ॥ ૧,૨૨૨.૫૪॥

કણ્ઠાભરણદોષેણ કૃચ્છ્રપાદં મૃતે ગવિ ।
અસ્થિભઙ્ગં ગવાં કૃત્વા શૃઙ્ગભઙ્ગમથાપિ વા ॥ ૧,૨૨૨.૫૫॥

ત્વગ્ભેદં પુચ્છનાશે વા માસાર્ધં યાવકં પિબેત્ ।
સર્વં હસ્ત્યશ્વશસ્ત્રાદ્યૈર્નિશ્ચયં કૃચ્છ્રમેવ તુ ॥ ૧,૨૨૨.૫૬॥

અજ્ઞાનાત્પ્રાશ્ય વિણ્મૂત્રં સુરાસંસ્પૃષ્ટમેવ ચ ।
પુનઃ સંસ્કારમાયાન્તિ ત્રયો વર્ણા દ્વિજાતયઃ ॥ ૧,૨૨૨.૫૭॥

વપનં મેખ્લા દણ્ડો ભૈક્ષ્યચર્યાવ્રતાનિ ચ ।
નિવર્તન્તે દ્વિજાતીનાં પુનઃ સંસ્કારકર્મણિ ॥ ૧,૨૨૨.૫૮॥

આમમાંસં ઘૃતં ક્ષૌદ્રં સ્નેહશ્ચ કાલસમ્ભવાઃ ।
અન્ત્યભાણ્ડસ્થિતાઃ સર્વે નિષ્ક્રાન્તાઃ શુચયઃ સ્મૃતાઃ ॥ ૧,૨૨૨.૫૯॥

તૈલાદિઘૃતમાધ્વીકં પણ્યદ્રવ્યં દ્રવસ્તથા ।
એકભક્તં ક્રમાન્નક્તં એકૈકાહમયાચિતમ્ ।
ઉપવાસઃ પાદકૃચ્છ્રં કૃચ્છાર્ધદ્વિગુણં હિ યત્ ॥ ૧,૨૨૨.૬૦॥

પ્રાજાપત્યન્તુ તત્સ્યાચ્ચ સર્વપાતકનાશનમ્ ।
કૃચ્છ્રં સપ્તોપવાસૈશ્ચ મહાસાન્તપનં સ્મૃતમ્ ॥ ૧,૨૨૨.૬૧॥

ત્ર્યહમુષ્ણં પિબેચ્છાપઃ ત્ર્યહમુષ્ણં પયઃ પિબેત્ ।
ત્ર્યમુષ્ણં પિબેત્સર્પિસ્તપ્તકૃચ્છ્રમઘાપહમ્ ॥ ૧,૨૨૨.૬૨॥

દ્વાદશાહોપવાસેન પરાકઃ સર્વપાપહા ।
એકૈકં વર્ધયેત્પિણ્ડં શુક્લે કૃષ્ણે ચ હ્રાસયેત્ ॥ ૧,૨૨૨.૬૩॥

પયઃ કાઞ્ચનવર્ણાયાઃ શ્વેતવર્ણં ચ ગોમયમ્ ।
ગોમૂત્રં તામ્રવર્ણાયા નીલવર્ણભવં ઘૃતમ્ ॥ ૧,૨૨૨.૬૪॥

દધિ સ્યાત્કૃષ્ણવર્ણાયા દર્ભોદકસમાયુતમ્ ।
ગોમૂત્રમાષકાણ્યષ્ટૌ ગોમયસ્ય ચતુષ્ટયમ્ ॥ ૧,૨૨૨.૬૫॥

ક્ષીરસ્ય દ્વાદશ પ્રોક્તા દધ્નસ્તુ દશ ઉચ્યતે ।
ઘૃતસ્ય માષકાઃ પઞ્ચ પઞ્ચગવ્યં મલાપહમ્ ॥ ૧,૨૨૨.૬૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
પ્રાયશ્ચિતકથનં નામ દ્વાવિંશત્યધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૩
બ્રહ્મોવાચ મુનિભિશ્ચરિતા ધર્મા ભક્ત્યા વ્યાસ મયોદિતાઃ ।
યૈર્વિષ્ણુસ્તુષ્યતે ચૈવ સૂર્યાદિપરિચારણાત્ ॥ ૧,૨૨૩.૧॥

તર્પણેન ચ હોમેન સન્ધ્યાયા વન્દનેન ચ ।
પ્રાપ્યતે ભગવાન્વિષ્ણુર્ધર્મકામાર્થમોક્ષદઃ ॥ ૧,૨૨૩.૨॥

ધર્મો હિ ભગવાન્વિષ્ણુઃ પૂજી વિષ્ણોસ્તુ તર્પણમ્ ।
હોમઃ સન્ધ્યા તથા ધ્યાનં ધારણા સકલં હરિઃ ॥ ૧,૨૨૩.૩॥

સૂચ ઉવાચ ।
પ્રલયં જગતો વક્ષ્યે તત્સર્વં શૃણુ શૌનક ।
ચતુર્યુગસહસ્રન્તુ કલ્પૈકાબ્જદિનં સ્મૃતમ્ ॥ ૧,૨૨૩.૪॥

કૃતત્રેતાદ્વાપરાદિયુગાવસ્થા નિબોધમે ।
કૃતે ધર્મશ્ચતુષ્પાચ્ચ સત્યં દાનં તપો દયા ॥ ૧,૨૨૩.૫॥

ધર્મપાતા હરિશ્ચેતિ સન્તુષ્ટા જ્ઞાનિનો નરાઃ ।
ચતુર્વર્ષર્સહસ્રાણિ નરા જીવન્તિ વૈ તદા ॥ ૧,૨૨૩.૬॥

કૃતાન્તે ક્ષત્રિયૈર્વિપ્રા વિટ્શૂદ્રાશ્ચ જિતા દ્વિજૈઃ ।
શૂરશ્ચાતિબલો વિષ્ણૂ રક્ષાંસિ ચ જઘાન હ ॥ ૧,૨૨૩.૭॥

ત્રેતાયુગે ત્રિપાદ્ધર્મઃ સત્યદાનદયાત્મકઃ ।
નરા યજ્ઞપરાસ્તસ્મિંસ્તથા ક્ષત્રોદ્ભવં જગત્ ॥ ૧,૨૨૩.૮॥

રક્તો હરિર્નરૈઃ પૂજ્યો નરા દશશતાયુષઃ ।
તત્ર વિષ્ણુર્ભોમરથઃ ક્ષત્રિયા રાક્ષસાનહન્ ॥ ૧,૨૨૩.૯॥

દ્વિપાદવિગ્રો ધર્મઃ પીતાઞ્ચાચ્યુતે ગતે ।
ચતુઃ શતાયુષો લોકા દ્વિજક્ષત્રોદ્ભવાઃ પ્રજાઃ ॥ ૧,૨૨૩.૧૦॥

તત્ર દૃષ્ટ્વાલ્પબુદ્ધીંશ્ચ વિષ્ણુર્વ્યાસસ્વરૂપધૃક્ ।
તદેકન્તુ યજુર્વેદં? ચતુર્ધા વ્યભજત્પુનઃ ॥ ૧,૨૨૩.૧૧॥

શિષ્યાનધ્યાપયામાસ સમસ્તાંસ્તાન્નિબોધ મે ।
ઋગ્વેદમથ પૈલન્ત્સામવેદઞ્ચ જૈમિનિમ્ ॥ ૧,૨૨૩.૧૨॥

અથર્વાણં સુમન્તુન્તુ યજુર્વેદં મહામુનિમ્ ।
વૈશમ્પાયનમઙ્ગન્તુ પુરાણં સૂતમેવ ચ ।
અષ્ટાદશપુરાણાનિ યૈર્વેદ્યો હરિરેવ હિ ॥ ૧,૨૨૩.૧૩॥

સર્ગશ્ચ પ્રતિસર્ગશ્ચ વંશો મન્વન્તરાણિ ચ ।
વંશાનુચરિતઞ્ચૈવ પુરાણં પઞ્ચલક્ષણમ્ ॥ ૧,૨૨૩.૧૪॥

બ્રાહ્મં પાદ્મં વૈષ્ણવઞ્ચ શૈવં ભાગવતન્તથા ।
ભવિષ્યન્નારદીયઞ્ચસ્કાન્દં લિઙ્ગં વરાહકમ્ ॥ ૧,૨૨૩.૧૫॥

માર્કણ્ડેયં તથાગ્નેયં બ્રહ્મવૈવર્તમેવ ચ ।
કૌર્મં માત્સ્યં ગારુડઞ્ચ વાયવીયમનન્તરમ્ ।
અષ્ટાદશસમુદ્દિષ્ટં બ્રહ્માણ્ડમિતિ સંજ્ઞિતમ્ ॥ ૧,૨૨૩.૧૬॥

અન્યાન્યુપપુરાણાનિ મુનિભિઃ કથિતાનિ તુ ।
આદ્યં સનત્કુમારોક્તં નારસિંહમથાપરમ્ ॥ ૧,૨૨૩.૧૭॥

તૃતીયં સ્કાન્દમુદ્દિષ્ટં કુમારેણ તુ ભાષિતમ્ ।
ચતુર્થં શિવધર્માખ્યં સ્યાન્નન્દીશ્વરભાષિતમ્ ॥ ૧,૨૨૩.૧૮॥

દુર્વાસસોક્તમાશ્ચર્યં નારદોક્તમતઃ પરમ્ ।
કાપિલં વામનઞ્ચૈવ તથૈવોશનસેરિતમ્ ॥ ૧,૨૨૩.૧૯॥

બ્રહ્માણ્ડં વારુણઞ્ચાથ કાલિકાહ્વયમેવ ચ ।
માહેશ્વરં તથા સામ્બમેવં સર્વાર્થસઞ્ચયમ્ ।
પરાશરોક્તમપરં મારીચં ભાર્ગવાહ્વયમ્ ॥ ૧,૨૨૩.૨૦॥

પુરાણં ધર્મશાસ્ત્રઞ્ચ વેદાસ્ત્વઙ્ગાનિ યન્મુને ।
ન્યાયઃ શૌનક મીમાંસા આયુર્વેદાર્થશાસ્ત્રકમ્ ।
ગાન્ધર્વશ્ચ ધનુર્વેદો વિદ્યા હ્યષ્ટાદશસ્મૃતાઃ ॥ ૧,૨૨૩.૨૧॥

દ્વાપરાન્તેન ચ હરિર્ગુરુભારમપાહરત્ ।
એકપાદસ્થિતે ધર્મે કૃષ્ણત્વઞ્ચાચ્યુતે ગતે ॥ ૧,૨૨૩.૨૨॥

જનાસ્તદા દુરાચારા ભવિષ્યન્તિ ચ નિર્દયાઃ ।
સત્ત્વં રજસ્તમ ઇતિ દૃશ્યન્તે પુરુષે ગુણાઃ ।
કાલસઞ્ચોદિતાસ્તેઽપિ પરિવર્તન્ત આત્મનિ ॥ ૧,૨૨૩.૨૩॥

પ્રભૂતઞ્ચ યદા સત્ત્વં મનો બુર્ધીન્દ્રિયાણિ ચ ।
તદા કૃતયુગં વિદ્યાજ્ઞાને તપસિ યદ્રતિઃ ॥ ૧,૨૨૩.૨૪॥

યદા કર્મસુ કામ્યેષુ શક્તિર્યશસિ દેહિનામ્ ।
તદા ત્રેતા રજોભૂતિરિતિ જાનીહિશૌનક ॥ ૧,૨૨૩.૨૫॥

યદા લોભસ્ત્વસન્તોષો માનો દમ્ભશ્ચ મત્સરઃ ।
કર્મણાઞ્ચાપિ કામ્યાનાં દ્વાપરં તદ્રજસ્તમઃ ॥ ૧,૨૨૩.૨૬॥

યદા સદાનૃતં નન્દ્રા નિદ્રા હિંસાદિસાધનમ્ ।
શોકમોહૌ ભયં દૈન્યં સ કલિસ્તમસિ સ્મૃતઃ ॥ ૧,૨૨૩.૨૭॥

યસ્મિઞ્જનાઃ કામિનઃ સ્યુઃ શશ્વત્કટુકભાષિણઃ ।
દસ્યૂત્કૃષ્ટા જનપદાવેદાઃ પાષણ્ડદૂષિતાઃ ॥ ૧,૨૨૩.૨૮॥

રાજાનશ્ચ પ્રજાભિક્ષાઃ શિશ્નોદરપરાજિતાઃ ।
અવ્રતા વટચવોઽશૌચા ભિક્ષવશ્ચ કુટુમ્બિનઃ ॥ ૧,૨૨૩.૨૯॥

તપસ્વિનોગ્રામવાસાઃ ન્યાસિનો હ્યર્થલોલુપાઃ ।
હ્રસ્વકાયા મહાહારાશ્ચૌરાસ્તે સાધવઃ સ્મૃતાઃ ॥ ૧,૨૨૩.૩૦॥

ત્યક્ષ્યન્તિ ભૃત્યાશ્ચ પતિં તાપસસ્ત્યક્ષ્યતિ વ્રતમ્ ।
શૂદ્રાઃ પ્રતિગ્રહિષ્યન્તિ વૈશ્યા વ્રતપરાયણઃ ॥ ૧,૨૨૩.૩૧॥

ઉદ્વિગ્નાઃ સન્તિ ચ જનાઃ પિશાચસદૃશાઃ પ્રજાઃ ।
અન્યાયભોજનેનાગ્નિદેવતાતિથિપૂજનમ્ ॥ ૧,૨૨૩.૩૨॥

કરિષ્યેન્તિ કલૌ પ્રાપ્તે ન ચ પિત્ર્યોદકક્રિયામ્ ।
સ્ત્રીપરાશ્ચ જનાઃ સર્વે શૂદ્રપ્રાયાશ્ચ શૌનક ॥ ૧,૨૨૩.૩૩॥

બહુપ્રજાલ્પભાગ્યાશ્ચ ભવિષ્યન્તિ કલૌ સ્ત્રિયઃ ।
શિરઃ કણ્ડૂયનપરા આજ્ઞાં ભેત્સ્યન્તિ ભર્ત્સિતાઃ ॥ ૧,૨૨૩.૩૪॥

વિષ્ણું ન પૂજયિષ્યન્તિ પાષણ્ડોપહતા જનાઃ ।

કલેર્દૈષનિધેર્વિપ્રા અસ્તિ હ્યેકો મહાગુણઃ ॥ ૧,૨૨૩.૩૫॥

કીર્તનાદેવ કૃષ્ણસ્ય મહાબન્ધં પરિત્યજેત્ ।
કૃતે યદ્ધ્યાયતો વિષ્ણું ત્રેતાયાં જપતઃ ફલમ્ ॥ ૧,૨૨૩.૩૬॥

દ્વાપરે પરિચર્યાયાં કલૌ તદ્ધરિકીર્તનાત્ ।
તસ્માદ્ધ્યેયો હરિર્નિત્યં ગેયઃ પૂજ્યશ્ચ શૌનક ॥ ૧,૨૨૩.૩૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
યુગધર્મકથનં નામ ત્રયોવિંશત્યધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૪
સૂત ઉવાચ ।
ચતુર્યુગસહસ્રાન્તે બ્રાહ્મો નૈમિત્તિકો લયઃ ।
અનાવૃષ્ટિશ્ચ કલ્પાન્તે જાયતે શતવાર્ષિકી ॥ ૧,૨૨૪.૧॥

ઉતિષ્ઠન્તિ તદા રૌદ્રા દિવિ સપ્ત દિવાકરાઃ ।
તે તુ પીત્વા જલં સર્વં શોષયન્તિ જગત્ત્રયમ્ ॥ ૧,૨૨૪.૨॥

ભૂર્ભુવઃ સ્વર્મહર્લોકં ચરાચરં જનસ્તથા ।
વિષ્ણુશ્ચ રુદ્રો ભૂત્વાસૌ પાતાલાનિ દહત્યધઃ ॥ ૧,૨૨૪.૩॥

વિષ્ણુર્દહેત્રિલોકઞ્ચિ મુખાન્મેઘાન્સૃજત્યલમ્ ।
વર્ષન્તે વૈ વર્ષશતં નાનાવર્ણા મહાઘનાઃ ॥ ૧,૨૨૪.૪॥

વિષ્ણુરૂપઃશતં વાતિ વર્ષાણાં વાયુરૂર્જિતઃ ।
વિષ્ણુરે કાર્ણવી ભૂતે વર્ષે બ્રહ્મસ્વરૂપધૃક્ ।
શેતેઽનન્તાસને વિષ્ણુર્નષ્ટે સ્થાવરજઙ્ગમે ॥ ૧,૨૨૪.૫॥

સુપ્ત્વા વર્ષસહસ્રં સ જગદ્ભૂયોઽસૃજદ્ધરિઃ ।
અથ પ્રાકૃતિકં વક્ષ્યે પ્રલયં શ‌ૃણુ શૌનક ॥ ૧,૨૨૪.૬॥

પૂર્ણે સંવત્સરશતે સંહૃત્ય સકલં જગત્ ।
બ્રહ્માણં ન્યસ્ય દેહે હિ મુક્તો યોગબલૈર્હરિઃ ॥ ૧,૨૨૪.૭॥

યે ગતા બ્રહ્મણઃ સ્થાનં તેઽપિ યાન્તિ પરં પદમ્ ।
અનાવૃષ્ટ્યર્કસમ્પન્ના આસન્મેઘાસ્તથા દ્વિજ ।
શતં વર્ષાણિ વર્ષદ્ભિર્મેઘૈરણ્ડં પ્રપૂર્યતે ॥ ૧,૨૨૪.૮॥

અન્તર્ગતેન તોયેન ભિન્નમણ્ડં જગત્પતેઃ ।
પૂર્ણે બ્રહ્માયુષિ ગતે ભિદ્યતેઽમ્ભસિ લીયતે ॥ ૧,૨૨૪.૯॥

એવં સા જગદાધારા તોયે ચોર્વી પ્રલીયતે ।
આપસ્તેજસિ લીયન્તે તેજો વાયૌ પ્રલીયતે ॥ ૧,૨૨૪.૧૦॥

વાયુઃ ખે ખઞ્ચ ભૂતાદૌ વિશતે ચ તદા મહાન્ ।
મહાન્પ્રપદ્યતેઽવ્યક્તં પ્રકૃતિઃ પુરુષે પરે ॥ ૧,૨૨૪.૧૧॥

શતવર્ષં હરિઃ શેતે સૃજત્યથ દિનગમે ।
અવ્યક્તાદિક્રમેણૈવ વ્યક્તીભૂતં ચરાચરમ્ ॥ ૧,૨૨૪.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નૈમિત્તિકપ્રલયોનામ ચતુર્વિંશત્યધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૫

સૂત ઉવાચ ।
આધ્યાત્મિકાદિતાપાંસ્ત્રીઞ્જ્ઞાત્વ સંસ્રાચક્રવિત્ ।
ઉત્પન્નજ્ઞાનવૈરાગ્યઃ પ્રાપ્નોત્યાત્યન્તિકં લયમ્ ॥ ૧,૨૨૫.૧॥

સંસારચક્રં વક્ષ્યેઽહમાદાબુત્ક્રાન્તિકાલતઃ ।
યદ્વિના પુરુષાર્થો ન લીનઃ સ્યાત્પરમાત્મનિ ॥ ૧,૨૨૫.૨॥

ઊર્ધ્વવાસી નરસ્ત્યક્ત્વા દેહમન્યત્પ્રપદ્યતે ।
નીયતેદ્વાદશાહેન યમસ્ય યમપૂરુષૈઃ ॥ ૧,૨૨૫.૩॥

તત્ર યદ્બાન્ધવાસ્તોયં પ્રયચ્છન્તિ તિલૈઃ સહ ।
યચ્ચ પિણ્ડં પ્રયચ્છન્તિ યમલોકે તદશ્નુતે ॥ ૧,૨૨૫.૪॥

ગતશ્ચ નરકં પાપાત્સ્વર્ગં યાતિ સ્વપુણ્યતઃ ।
પાપકૃદ્યાતિ નરકં પુણ્યકૃદ્યાતિ વૈ દિવમ્ ॥ ૧,૨૨૫.૫॥

સ્વર્ગાચ્ચ નરકાત્ત્યક્તઃ સ્ત્રીણાં ગર્ભે ભવત્યપિ ।
નાભિભૂતઞ્ચ તસ્યૈવ યાતિ બીજદ્વયં હિ તત્ ॥ ૧,૨૨૫.૬॥

કલલં બુદ્બુદમયં તતઃ શોણિતમેવ ચ ।
પેશ્યાઃ પલસમોઽણ્ડઃ સ્યાદઙ્કુરં તત ઉચ્યતે ॥ ૧,૨૨૫.૭॥

ઉપાઙ્ગાન્યઙ્ગુલીનેત્રનાસાસ્યશ્રવણાનિ ચ ।

આવહં યાતિ ચાઙ્ગેભ્યસ્તત્પરન્તુ નખાદિકમ્ ॥ ૧,૨૨૫.૮॥

ત્વચો રોમાણિ જાયન્તે કેશાશ્ચૈવ તતઃ પરમ્ ।
નરશ્ચાધોમુખઃ સ્થિત્વા દશમે ચ સઃ જાયતે ॥ ૧,૨૨૫.૯॥

તતસ્તુ વૈષ્ણવી માયા વૃણોત્યત્યન્તમોહિની ।
બાલત્વં ત્વથ કૌમારં યૌવનં વૃદ્ધતામપિ ॥ ૧,૨૨૫.૧૦॥

તતશ્ચ મરણં તત્તદ્ધર્મામાપ્નોતિ માનવઃ ।
એવં સંસારચક્રેઽસ્મિન્ભ્રામ્યતે ઘટીયન્ત્રવત્ ॥ ૧,૨૨૫.૧૧॥

નરકાત્પ્રતિમુક્તસ્તુ પાપયોનિષુ જાયતે ।
પતિતાત્પ્રતિગૃહ્યાથ અધોયોનિં વ્રજેદ્બુધઃ ॥ ૧,૨૨૫.૧૨॥

નરકાત્પ્રતિમુક્તસ્તુ કૃમિર્ભવતિ યાચકઃ ।
ઉપાધ્યાયવ્યલીકં તુ કૃત્વા શ્વા ભવતિ દ્વિજ ॥ ૧,૨૨૫.૧૩॥

તજ્જાયાં મનસા વાઞ્છંસ્તદ્દ્રવ્યં વાપ્યસંશયમ્ ।
ગર્દભોજાયતે જન્તુર્મિત્રસ્યૈવાપમાનકૃત્ ॥ ૧,૨૨૫.૧૪॥

પિતરૌ પીડયિત્વા તુ કચ્છપત્વઞ્ચ જાયતે ।
ભર્તુઃ પિણ્ડમુપાશ્નસ્તો વઞ્જયિત્વા તમેવ યઃ ॥ ૧,૨૨૫.૧૫॥

સોઽપિ મોહસમાપન્નો જાયતે વાનરો મૃતઃ ।
ન્યાસાપહર્તા નરકાદ્વિમુક્તો જાયતે કૃમિઃ ॥ ૧,૨૨૫.૧૬॥

અસૂયકશ્ચ નરકાન્મુક્તો ભવતિ રાક્ષસઃ ।
વિશ્વાસહર્તા ચ નરો મીનયોનૌ પ્રજાયતે ॥ ૧,૨૨૫.૧૭॥

યવધાન્યાનિ સંહૃત્ય જાયતે મૂષકો મૃતઃ ।
પરદારાભિમર્શાત્તુ વૃકો ઘોરોઽભિજાયતે ॥ ૧,૨૨૫.૧૮॥

ભ્રાતૃભાર્યાપ્રસંગેન કોકિલો જાયતે નરઃ ।
ગુર્વાદિભાર્યાગમનાચ્છૂકરો જાયતે નરઃ ॥ ૧,૨૨૫.૧૯॥

યજ્ઞદાનવિવાહાનાં વિઘ્નકર્તા ભવેત્કૃમિઃ ।
દેવતાપિતૃવિપ્રાણામદત્ત્વા યોઽન્નમશ્નુતે ॥ ૧,૨૨૫.૨૦॥

પ્રમુક્તો નરકાદ્વાપિ વાયસઃ સન્પ્રજાયતે ।
જ્યેષ્ઠભ્રાત્રપમાનાચ્ચ ક્રૌઞ્ચયોનૌ પ્રજાયતે ॥ ૧,૨૨૫.૨૧॥

શૂદ્રસ્તુ બ્રાહ્મણીં ગત્વા કૃમિયોનૌ પ્રજાયતે ।
તસ્યામપત્યમુત્પાદ્ય કાષ્ઠાન્તઃ કટીકો ભવેત્ ॥ ૧,૨૨૫.૨૨॥

કૃતઘ્નઃ કૃમિકઃ કીટઃ પતઙ્ગો વૃશ્ચિકસ્તથા ।
અશસ્ત્રં પુરુષં હર્તા નરઃ સઞ્જાયતે ખરઃ ॥ ૧,૨૨૫.૨૩॥

કૃમિઃ સ્ત્રીવધકર્તા ચ બાલહન્તા ચ જાયતે ।
ભોજનઞ્ચોરયિત્વા તુ મક્ષિકા જાયતે નરઃ ॥ ૧,૨૨૫.૨૪॥

હૃત્વાજ્યઞ્ચૈવ માર્જારસ્તિલહૃચ્ચૈવ મૂષકઃ ।
ઘૃતં હૃત્વા ચ નકુલઃ કાકો મદ્ભુરમામિષમ્ ॥ ૧,૨૨૫.૨૫॥

મધુ હૃત્વા નરો દંશ-પૂપં હૃત્વા પિપીલિકઃ ।
અપો હૃત્વા તુ પાપાત્મા વાયસઃ સમ્પ્રજાયતે ॥ ૧,૨૨૫.૨૬॥

હૃતે કાષ્ઠે ચ હારીતઃ કપોતો વા પ્રજાયતે ।
હૃત્વા તુ કાઞ્ચનં ભાણ્ડં કૃમિયોનૌ પ્રજાયતે ॥ ૧,૨૨૫.૨૭॥

કાર્પાસિકે હૃતે ક્રૌઞ્ચો વહ્નિહર્તા બકસ્તથા ।
મયૂરો વર્ણકં હૃત્વા શાકપત્રઞ્ચ જાયતે ॥ ૧,૨૨૫.૨૮॥

જીવઞ્જીવકતાં યાતિ રક્તવસ્ત્વપહૃન્નરઃ ।
છુછુન્દરિઃ શુભાન્ગન્ધાઞ્છશં હૃત્વા શશો ભવેત્ ॥ ૧,૨૨૫.૨૯॥

ષણ્ડાઃ કલાપહરણે કાષ્ઠહૃત્તૃણકીટકઃ ।
પુષ્પં હૃત્વા દરિદ્રસ્તુ પઙ્ગુર્યાચકહૃન્નરઃ ॥ ૧,૨૨૫.૩૦॥

શાકહર્તા ચ હારીતસ્તોયહર્તા ચ ચાતકઃ ।
ગૃહહૃન્નરકાન્ગત્વા રૌરવાદીન્સુદારુણાન્ ॥ ૧,૨૨૫.૩૧॥

તૃણગુલ્મલતાવલ્લીત્વગ્ઘારી તરુતાં વ્રજેત્ ।
એષ એવ ક્રમો દૃષ્ટો ગોસુવર્ણાદિહારિણામ્ ॥ ૧,૨૨૫.૩૨॥

વિદ્યાપહારી મૂકઃ સ્યાદ્ધત્વા ચ નરકાન્બહન્ ।
અસમિદ્ધે હુતે ચાગ્નૌ મન્દાગ્નિઃ ખલુ જાયતે ॥ ૧,૨૨૫.૩૩॥

પરનિન્દા કૃતઘ્નત્વં પરસીમાભિઘાતનમ્ ।
નૈષ્ઠુર્યં નિર્ઘૃણત્વઞ્ચ પરદારોપસેવનમ્ ॥ ૧,૨૨૫.૩૪॥

પરસ્વહરણાશૌચં દેવતાનાં ચ કુત્સનમ્ ।
નિકૃત્ય બન્ધનં નૃણાં કાર્પણ્યઞ્ચ નૃણાં વધઃ ।

ઉપલક્ષણાદ્વિજાનીયાન્મુક્તાનાં નરકાદનુ ॥ ૧,૨૨૫.૩૫॥

દયા ભૂતેષુ સંવાદઃ પરલોકં પ્રતિ ક્રિયા ।
સત્યં હિતાર્થમુક્તિશ્ચ વેદપ્રામાણ્યદર્શનમ્ ॥ ૧,૨૨૫.૩૬॥

ગુરુદેવર્ષિસિદ્ધર્ષિસેવનં સાધુસંયમઃ ।
સત્ક્રિયાષ્વસનં મૈત્રી સ્વર્ગસ્ય લક્ષણં વિદુઃ ।
અષ્ટાઙ્ગયોગવિજ્ઞાનાત્પ્રાપ્નોત્યાત્યન્તિકં ફલમ્ ॥ ૧,૨૨૫.૩૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
કર્મવિપાકાદિકથનં નામ પઞ્ચવિંશત્યધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૬
સૂત ઉવાચ વક્ષ્યે સાઙ્ગં મહાયોગં ભુક્તિમુક્તિકરં પરમ્ ।
સર્વપાપપ્રશમનં ભક્ત્યાનુપઠિતં શ‍ૃણુ ॥ ૧,૨૨૬.૧॥

મમેતિ મૂલં દુઃખસ્ય ન મમેતિ નિવર્તનમ્ ।
દત્તાત્રેયો હ્યલર્કાય ઇમમાહ મહામતિઃ ॥ ૧,૨૨૬.૨॥

અહમિત્યઙ્કુરોત્પન્નો મમેતિ સ્કન્ધવાન્મહાન્ ।
ગૃહક્ષેત્રાણિ શાખાશ્ચ યત્ર દારાભિપલ્લવઃ ॥ ૧,૨૨૬.૩॥

ધનધાન્યે મહાપત્રે પાપમૂલોઽતિદુર્ગમઃ ।
વિધિવત્સુખશાન્ત્યર્થં જાતોઽજ્ઞાનમહાતરુઃ ॥ ૧,૨૨૬.૪॥

છિન્નો વિદ્યાકુઠારેણ તે ગતા લયમીશ્વરે ।
પ્રાપ્ય બ્રહ્મરસં પીતં નીરજસ્કમકણ્ટકમ્ ॥ ૧,૨૨૬.૫॥

પ્રાપ્નુવન્તિ પરાઃ પ્રાજ્ઞાઃ સુખનિર્વૃતિમેવ ચ ।
મૂર્તેન્દ્રિયલયં નૂનં ન ત્વં રાજન્ન ચાપ્યહમ્ ॥ ૧,૨૨૬.૬॥

ન તન્માત્રાદિકં વાચા નૈવાન્તઃ કરણં તથા ।
કં વા પશ્યસિ રાજેન્દ્ર પ્રધાનમિદમાવયોઃ ॥ ૧,૨૨૬.૭॥

મૃતઃ પરેઽહ્નિ ક્ષેત્રજ્ઞઃ સંજાતોઽયં ગુણાત્મકઃ ।
એકત્વેઽપિ પૃથગ્ભાવસ્તથા ક્ષેત્રાત્મનો નૃપ ॥ ૧,૨૨૬.૮॥

જ્ઞાનપૂર્વવિયોગોઽસૌ જ્ઞાને નષ્ટે ચ યોગિનઃ ।
સા મુક્તિર્બ્રહ્મણા ચૈક્ય મનૈક્યં પ્રાકૃતૈર્ગુણૈઃ ॥ ૧,૨૨૬.૯॥

તદ્ગૃહં યત્ર વસતિ તદ્ભોજ્યં યેન જીવતિ ।
યન્મુક્તયે તદેવોક્તં જ્ઞાનાજ્ઞાને ન ચાન્યથા ॥ ૧,૨૨૬.૧૦॥

ઉપભોગેન પુણ્યાના મપુણ્યાનાઞ્ચ પાર્થિવ ।
કર્તવ્યાનાઞ્ચ નિત્યાનાં ક્ષયન્ત્વકરણાત્તથા ॥ ૧,૨૨૬.૧૧॥

અહિંસા સત્યમસ્તેયં બ્રહ્મચર્યાપરિગ્રહૌ ।
યમાઃ પઞ્ચાથ નિયમાઃ શૌચં દ્વિવિધમીરિતમ્ ॥ ૧,૨૨૬.૧૨॥

સન્તોષસ્તપસા શાન્તિર્વાસુદેવાર્ચનં દમઃ ।
આસન પદ્મકાદ્યુક્તં પ્રાણાયામો મરુજ્જયઃ ॥ ૧,૨૨૬.૧૩॥

પ્રત્યેકં ત્રિવિધઃ સોઽપિ પૂરકુમ્ભકરેચકૈઃ ।
લઘુર્યો દશમાત્રસ્તુ દ્વિગુણઃ સ તુ મધ્યમઃ ॥ ૧,૨૨૬.૧૪॥

ત્રિગુણાભિસ્તુ માત્રાભિરુત્તમઃ સ ઉદાહૃતઃ ।
જપધ્યાનયુતૌ ગર્ભો વિપરીતસ્ત્વર્ભકઃ ॥ ૧,૨૨૬.૧૫॥

પ્રથમે નજયેત્સ્વપ્નં મધ્યમેન ચ વેપથુમ્ ।
વિપાકં હિ તૃતીયેન જાતાન્દોષાસ્ત્વનુક્રમાત્ ॥ ૧,૨૨૬.૧૬॥

આસનસ્થન્તુયુઞ્જીત કૃત્વા ચ પ્રણવં હૃદી ।
પાર્ષ્ણિભ્યાં લિઙ્ગવૃષણૌ સ્પર્શન્નકાગ્રમાનસઃ ॥ ૧,૨૨૬.૧૭॥

રજસા તમસો વૃત્તિં સત્ત્વેન રજસસ્તથા ।
નિરુધ્ય નિશ્ચલો ભૂત્વા સ્થિતો યુઞ્જીત યોગવિત્ ॥ ૧,૨૨૬.૧૮॥

ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યઃ પ્રાણાદીનન્ન એવ ચ ।
નિગૃહ્ય સમવાયેન પ્રત્યાહાર મુપક્રમેત્ ॥ ૧,૨૨૬.૧૯॥

પ્રાણાયામા દશાષ્ટૌ ચ ધારણા સા વિધીયતે ।
દ્વે ધારણે સ્મૃતો યોગો યોગિભિસ્તત્ત્વદર્શિભિઃ ॥ ૧,૨૨૬.૨૦॥

પ્રાઙ્નાડ્યાં હૃદયે ચાત્ર તૃતીયા ચ તથોરસિ ।
કણ્ઠે મુખે ના સિકાગ્રે નેત્રે ભ્રૂમધ્યમૂર્ધસુ ॥ ૧,૨૨૬.૨૧॥

કિઞ્ચિત્તસ્માત્પરસ્મિંશ્ચ ધારણા દશધા સ્મૃતા ।
દશૈતા ધારણાઃ પ્રાપ્ય પ્રાપ્નોત્યક્ષરરૂપતામ્ ॥ ૧,૨૨૬.૨૨॥

યથાગ્નિરગ્નૌ સંક્ષિપ્તસ્તથાત્મા પરમાત્મનિ ।
બ્રહ્મરૂપં મહાપુણ્યમોમિત્યેકાક્ષરં જપેત્ ॥ ૧,૨૨૬.૨૩॥

અકારશ્ચ તથોકારો મકારશ્ચાક્ષરત્રયમ્ ।
એતાસ્તિસ્ત્રસ્તતો માત્રાઃ સત્ત્વરાજસતામસાઃ ॥ ૧,૨૨૬.૨૪॥

નિર્ગુણા યોગિગમ્યાદ્યાર્ધમાત્રા પરા સ્થિતા ।
ગાન્ધારીતિ ચ વિજ્ઞેયા ગાન્ધારસ્વરસંશ્રયા ।
ઇત્યેતદક્ષરં બ્રહ્મ પરમોઙ્કારસંજ્ઞિતમ્ ॥ ૧,૨૨૬.૨૫॥

અહં બ્રહ્મ પરં જ્યોતિઃ સ્થૂલદેહવિવર્જિતમ્ ।
અહં બ્રહ્મ પરં જ્યોતિર્જરામરણવર્જિતમ્ ॥ ૧,૨૨૬.૨૬॥

અહં બ્રહ્મ પરં જ્યોતિઃ પૃથિવ્યા મલવર્જિતમ્ ।
અહં બ્રહ્મ પરં જ્યોતિર્વાય્વાકાશવિવર્જિતમ્ ॥ ૧,૨૨૬.૨૭॥

અહં બ્રહ્મ પરં જ્યોતિઃ સૂક્ષ્મદેહવિવર્જિતમ્ ।
અહં બ્રહ્મપરં જ્યોતિઃ સ્થાનાસ્થાનવિવર્જિતમ્ ॥ ૧,૨૨૬.૨૮॥

અહં બ્રહ્મ પરં જ્યોતિર્ગન્ધમાત્રવિવર્જિતમ્ ।
અહં બ્રહ્મ પરં જ્યોતિઃ શ્રોત્રત્વક્પરિવર્જિતમ્ ॥ ૧,૨૨૬.૨૯॥

અહં બ્રહ્મ પરં જ્યોતિર્જિહ્વાઘ્રાણવિવર્જિતમ્ ।
અહં બ્રહ્મ પરં જ્યોતિઃ પ્રાણાપાનવિવર્જિતમ્ ॥ ૧,૨૨૬.૩૦॥

અહં બ્રહ્મ પરં જ્યોતિર્વ્યાનોદાનવિવર્જિતમ્ ।
અહં બ્રહ્મ પરં જ્યોતિરજ્ઞાનપરિવર્જિતમ્ ॥ ૧,૨૨૬.૩૧॥

અહં બ્રહ્મ પરં જ્યોતિસ્તુરીયં પરમં પદમ્ ।
દેહેન્દ્રિયમનોબુદ્ધિપ્રાણાહઙ્કારવર્જિતમ્ ॥ ૧,૨૨૬.૩૨॥

નિત્યશુદ્ધબુદ્ધમુક્તમહામાનન્દમદ્વયમ્ ।
અહં બ્રહ્મ પરં જ્યોતિર્જ્ઞાનરૂપો વિમુક્તયે ॥ ૧,૨૨૬.૩૩॥

સૂત ઉવાચ ।
ઇત્યષ્ટાઙ્ગો મયા યોગ ઉક્તઃ શૌનક મુક્તિદઃ ।
નિત્યનૈમિત્તિકં ગત્વા લયં પ્રાકૃતબન્ધનાઃ ॥ ૧,૨૨૬.૩૪॥

ઉત્પદ્યન્તે હિ સંસારે નૈકં યાત્વા પરાત્મનામ્ ।
વિમુચ્યતે વિમુક્તશ્ચ જ્ઞાનાદજ્ઞાનમોહિતઃ ॥ ૧,૨૨૬.૩૫॥

તતો નં મ્રિયતે દુઃખી ન રોગી ન ચ વન્ધવાન્ ।

ન પાપૈર્યુજ્યતે યોગી નરકે ન વિપચ્યતે ॥ ૧,૨૨૬.૩૬॥

ગર્ભવાસે સ નો દુઃખી સ સ્યાન્નારાયણોઽવ્યયઃ ।
ભક્ત્યા ત્વનન્યયા લભ્યો ભગવાન્ભુક્તિમુક્તિદઃ ॥ ૧,૨૨૬.૩૭॥

ધ્યાનેન પૂજયા જપ્યૈઃ સમ્યક્સ્તોત્રૈર્યતવ્રતૈઃ ।
યજ્ઞૈર્દાનૈશ્ચિત્તશુદ્ધિસ્તયા જ્ઞાનઞ્ચ લભ્યતે ॥ ૧,૨૨૬.૩૮॥

પ્રણવાદિકમન્ત્રૈશ્ચ જપ્યૈર્મુક્તિં ગતા દ્વિજાઃ ।
ઇન્દ્રોઽપિ પરમં સ્થાનં ગન્ધર્વાપ્સરસો વરાઃ ॥ ૧,૨૨૬.૩૯॥

પ્રાપ્તા દેવાશ્ચ દેવત્વં મુનિત્વં મુનયો ગતાઃ ।
ગન્ધર્વત્વઞ્ચ ગન્ધર્વા રાજત્વઞ્ચ નૃપાદયઃ ॥ ૧,૨૨૬.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
અષ્ટાઙ્ગયોગકથનં નામ ષડ્વિંશત્યધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૭

સૂત ઉવાચ ।
વિષ્ણુભક્તિં પ્રવક્ષ્યામિ યયા સર્વમવાપ્યતે ।
યથા ભક્ત્યા હરિસ્તુષ્યેત્તથા નાન્યેન કેનચિત્ ॥ ૧,૨૨૭.૧॥

મહતઃ શ્રેયસો મૂલં પ્રસવઃ પુણ્યસન્તતેઃ ।
જીવિતસ્ય ફલં સ્વાદુ નિયતં સ્મરણં હરેઃ ॥ ૧,૨૨૭.૨॥

તસ્માત્સેવા બુધૈઃ પ્રોક્તા ભક્તિસાધનભૂયસી ।
તે ભક્તા લોકનાથસ્ય નામકર્માદિકીર્તને ॥ ૧,૨૨૭.૩॥

મુઞ્ચન્ત્યશ્રૂણિ સંહર્ષાદ્યે પ્રહૃષ્ટનૂરુહાઃ ।
જગદ્ધાતુર્મહેશસ્ય દિવ્યાજ્ઞાચરણા વયમ્ ॥ ૧,૨૨૭.૪॥

ઇહ નિત્યક્રિયાઃ કુર્યુઃ સ્નિગ્ધા યે વૈષ્ણવાસ્તુ તે ।
બ્રહ્માક્ષરં ન શ ृણ્વન્વૈ તયા ભગવતેરિતમ્ ॥ ૧,૨૨૭.૫॥

પ્રણામપૂર્વકં ભક્ત્યા યો વદેદ્વૈષ્ણવો હિ સઃ ।
તદ્ભક્તજનવાત્સલ્યં પૂજનં ચાનુમોદનમ્ ॥ ૧,૨૨૭.૬॥

તત્કથાશ્રવણે પ્રીતિરશ્રુનેત્રાઙ્ગવિક્રિયાઃ ।
યેન સર્વાત્મના વિષ્ણૌ ભક્ત્યા ભાવો નિવેશિતઃ ॥ ૧,૨૨૭.૭॥

વિપ્રેભ્યશ્ચ કૃતાત્મત્વાન્મહાભાગવતો હિ સઃ ।
વિશ્વોપકરણં નિત્યં તદર્થં સઙ્ગવર્જનમ્ ।
સ્વયમભ્યર્ચનઞ્ચૈવ યો વિષ્ણુઞ્ચોપજીવતિ ॥ ૧,૨૨૭.૮॥

ભક્તિરષ્ટવિધા હ્યેષા યસ્મિન્મ્લેચ્છોઽપિ વર્તતે ।
સ વિપ્રેન્દ્રો મુનિઃ શ્રીમાન્સ યાતિ પરમાં ગતિમ્ ॥ ૧,૨૨૭.૯॥

તસ્મૈ દેયં તતો ગ્રાહ્યં સ ચ પૂજ્યો યથા હરિઃ ।
સ્મૃતઃ સંભાષિતો વાપિ પૂજિતો વા દ્વિજોત્તમઃ ।
પુનાતિ ભગવદ્ભક્તશ્ચણ્ડાલોઽપિ યદૃચ્છયા ॥ ૧,૨૨૭.૧૦॥

દયાં કુરુ પ્રપન્નાય તવાસ્મીતિ ચ યો વદેત્ ।
અભયં સર્વભૂતેભ્યો દદ્યાદેતદ્વ્રતં હરેઃ ॥ ૧,૨૨૭.૧૧॥

મન્ત્રજાપિસહસ્રેભ્યઃ સર્વવેદાન્તપારગઃ ।
સર્વવેદાન્તવિત્કોટ્યાં વિષ્ણુભક્તો વિશિષ્યતે ॥ ૧,૨૨૭.૧૨॥

એકાન્તિનઃ સ્વવપુષા ગચ્છન્તિ પરમં પદમ્ ।
એકાન્તેન સમો વિષ્ણુસ્તસ્માદેષાં પરાયણઃ ॥ ૧,૨૨૭.૧૩॥

યસ્માદેકાન્તિનઃ પ્રોક્તાસ્તદ્ભાગવતચેતસઃ ।
પ્રિયાણામપિ સર્વેષાં દેવદેવસ્ય સુપ્રિયઃ ॥ ૧,૨૨૭.૧૪॥

આપત્સ્વપિ સદા ભસ્ય ભક્તિરવ્યભિચારિણા ।
યા પ્રીતિરધિકા વિષ્ણોર્વિષયેષ્વનપાયિની ॥ ૧,૨૨૭.૧૫॥

વિષ્ણું સંસ્મરતઃ સા મે હૃદયાન્નોપસર્પતિ ।
દૃઢભક્તોઽપિ વેદાદિસર્વશાસ્ત્રાર્થપારગઃ ॥ ૧,૨૨૭.૧૬॥

યો ન સર્વેશ્વરે ભક્તસ્તં વિદ્યાત્પુરુષાધમમ્ ।
નાધીતવેદશાસ્ત્રોઽપિ ન કૃતોઽધ્વરસમ્ભવઃ ।
યો ભક્તિં વહતે વિષ્ણૌ તેન સર્વં કૃતં ભવેત્ ॥ ૧,૨૨૭.૧૭॥

યજ્વાનઃ ક્રતુમુખ્યાનાં વેદાનાં પારગા અપિ ।
ન તાં યાન્તિ ગતિં ભક્તા યાં યાન્તિ મુનિસત્તમાઃ ॥ ૧,૨૨૭.૧૮॥

યઃ કશ્ચિદ્વૈષ્ણવો લોકે મિથ્યાચારોઽપ્યનાશ્રમી ।
પુનાતિ સકલાંલ્લોકાન્સહસ્રાંશુરિવોદિતઃ ॥ ૧,૨૨૭.૧૯॥

યે નૃશંસા દુરાત્માનઃ પાપાચરરતાસ્તથા ।

તેઽપિ યાન્તિ પરં સ્થાનં નારાયણપરાયણાઃ ॥ ૧,૨૨૭.૨૦॥

દૃઢા જનાર્દને ભક્તિર્યદૈવાવ્યભિચારિણી ।
તદા કિયત્સ્વર્ગસુખં સૈવ નિર્વાણહેતુકા ॥ ૧,૨૨૭.૨૧॥

ભ્રામ્યતાં તત્ર સંસારે નરાણાં કુર્મદુર્ગમે ।
હસ્તાવલમ્બને હ્યેકં યેન તુષ્યેજ્જનાર્દનઃ ।
ન શ ृણોતિ ગુણાન્દિવ્યાન્દેવદેવસ્ય ચક્રિણઃ ।
સ મરો બધિરો જ્ઞેયઃ સર્વધર્મબહિષ્કૃતઃ ॥ ૧,૨૨૭.૨૨॥

નામ્નિ સંકીર્તિતે વિષ્ણોર્યસ્ય પુંસો ન જાયતે ।
શરીરં પુલકોદ્ભાસિ તદ્ભવેત્કુણપોપમમ્ ॥ ૧,૨૨૭.૨૩॥

યસ્મિન્ભક્તિર્દ્વિજશ્રેષ્ઠ મુક્તિરપ્યચિરાદ્ભવેત્ ।
નિવિષ્ટમનસાં પુંસાં સર્વથા વૃજિનક્ષયઃ ॥ ૧,૨૨૭.૨૪॥

સ્વપુરુષમભિવીક્ષ્ય પાશહસ્તં વદતિ યમઃ કિલ તસ્ય કર્ણમૂલે ।
પરિહર મધુસૂદનપ્રાપન્નન્પ્રભુરહમન્યનૃણાં ન વૈષ્ણવાનામ્ ॥ ૧,૨૨૭.૨૫॥

અપિ ચેત્સુદુરાચારો ભજતે મામનન્યભાક્ ।
સાધુરેવ સ મન્તવ્યઃ સમ્યગવ્યવસિતો હિ સઃ ॥ ૧,૨૨૭.૨૬॥

ક્ષિપ્રં ભવતિ ધર્માત્મા શશ્વચ્છાન્તિં સ ગચ્છતિ ।
વિપ્રેન્દ્ર પ્રતિજાનીહિ વિષ્ણુભક્તો ન નશ્યતિ ॥ ૧,૨૨૭.૨૭॥

ધર્માર્થકામઃ કિં તસ્ય મુક્તિસ્તસ્ય કરે સ્થિતા ।
સમસ્તજગતાં મૂલં યસ્ય ભક્તિઃ સ્થિરા હરૌ ॥ ૧,૨૨૭.૨૮॥

દૈવી હ્યેષા ગુણમયી હરેર્માયા દુરત્યયા ।
તમેવ યે પ્રપદ્યન્તે માયામેતાં તરન્તિ તે ॥ ૧,૨૨૭.૨૯॥

કિં યજ્ઞારાધને પુંસા શિષ્યતે હરિમેધસામ્ ।
ભક્ત્યૈવારાધ્યતે વિષ્ણુર્નાન્યત્તત્રોપકારકમ્ ॥ ૧,૨૨૭.૩૦॥

ન દાનૈર્વિવિધૈર્દત્તૈઃ પુષ્પૈર્નૈવાનુલેપનૈઃ ।
તોષમેતિ મહાત્માસૌ યથા ભક્ત્યા જનાર્દનઃ ॥ ૧,૨૨૭.૩૧॥

સંસારવિષવૃક્ષસ્ય દ્વે ફલે હ્યમૃતોપમે ।
કદાચિત્કેશવે ભક્તિસ્તદ્ભક્તૈર્વા સમાગમઃ ॥ ૧,૨૨૭.૩૨॥

પત્રેષુ પુષ્પેષુ ફલેષુ તોયેષ્વકષ્ટલભ્યેષુ સદૈવ સત્સુ ।

ભક્ત્યૈકલભ્યે પુરુષે પુરાણે મુક્ત્યૈકલાભે ક્રિયતે પ્રયત્નઃ ॥ ૧,૨૨૭.૩૩॥

આસ્ફોટયન્તિ પિતરઃ પ્રનૃત્યન્તિ પિતામાહઃ ।
વૈષ્ણવોસ્મત્કુલે જાતઃ સ નઃ સન્તારયિષ્યતિ ॥ ૧,૨૨૭.૩૪॥

અજ્ઞાનિનઃ સુખરે સમધિક્ષિપન્તો યત્પાપિનોઽપિ શિશુપાલસુયોધનાદ્યાઃ ।
મુક્તિં ગતાઃ સ્મરણમાત્રવિધૂતપાપાઃ કઃ સંશયઃ પરમભક્તિમતાં જનાનામ્ ॥ ૧,૨૨૭.૩૫॥

શરમં તં પ્રપન્ના યે ધ્યાનયોગવિવર્જિતાઃ ।
તેઽપિ મૃત્યુમતિક્રમ્ય યાન્તિ તદ્વૈષ્ણવં પદમ્ ॥ ૧,૨૨૭.૩૬॥

ભવોદ્ભવક્લેશશતૈર્હતસ્તથા પરિભ્રમન્નિન્દ્રિયરન્ધ્રકૈર્હયૈઃ ।
નિયમ્યતાં માધવ ! મે મનોહયસ્ત્વદઙ્ઘ્રિશઙ્કૌ દૃઢભક્તિબન્ધને ॥ ૧,૨૨૭.૩૭॥

વિષ્ણુરેવ પરં બ્રહ્મ ત્રિભેદમિહ પઠ્યતે ।
વેદસિદ્ધાન્તમાર્ગેષુ તન્ન જાનન્તિ મોહિતાઃ ॥ ૧,૨૨૭.૩૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ભગવદ્ભક્તિવિવરણં નામ સપ્તવિંશત્યધિકદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૮

સૂતૌવાચ ।
મુક્તિહેતુમનાદ્યન્તમજમવ્યયમક્ષયમ્ ।
યો નમેત્સર્વલોકસ્ય નમસ્યો જાયતે નરઃ ॥ ૧,૨૨૮.૧॥

વિષ્ણુમાનન્દમદ્વૈતં વિજ્ઞાનં સર્વગં પ્રભુમ્ ।
પ્રણમામિ સદા ભક્ત્યા ચેતસા હૃદયાલયમ્ ॥ ૧,૨૨૮.૨॥

યોઽન્તસ્તિષ્ઠન્નશેષસ્ય પશ્યતીશઃ શુભાશુભમ્ ।
તં સર્વસાક્ષિણં વિષ્ણું નમસ્યે પરમેશ્વરમ્ ॥ ૧,૨૨૮.૩॥

શક્તેનાપિ નમસ્કારઃ પ્રયુક્તશ્ચક્રપાણયે ।
સંસારતૃણવર્ગાણામુદ્વેજનકરો હિ સઃ ॥ ૧,૨૨૮.૪॥

કૃષ્ણે સ્ફુરજ્જલધરોદરચારુકૃષ્ણે લોકાધિકારપુરુષે પરમપ્રમેયે ।
એકો હિ ભાવગુણમાત્રદૃઢપ્રણામઃ સદ્યઃ શ્વપાકમપિ સાધયિતું સશક્તઃ ॥ ૧,૨૨૮.૫॥

પ્રણમ્ય દણ્ડબદ્ભૂમૌ નમસ્કારેણ યોઽર્ચયેત્ ।
સ યાં ગતિમવાપ્નોતિ ન તાં ક્રતુશતૈરપિ ॥ ૧,૨૨૮.૬॥

દુર્ગસંસારકાન્તારાકૂપારેઽપિ પ્રધાવતામ્ ।
એકઃ કૃષ્ણે નમસ્કારો મુક્ત્યા તાંસ્તારયિષ્યતિ ॥ ૧,૨૨૮.૭॥

આસીનો વા શયાનો વાતિષ્ઠન્વા યત્ર તત્ર વા ।
નમો નારાયણાયેતિ મન્ત્રૈકશરણો ભવેત્ ॥ ૧,૨૨૮.૮॥

નારાયણેતિ શબ્દોઽસ્તિ વાગસ્તિ વશવર્તિની ।
તથાપિ નરકે મૂઢાઃ પતન્તીતિ કિમદ્ભુતમ્ ॥ ૧,૨૨૮.૯॥

ચતુર્મુખો વા યદિ કોટિવક્ત્રો ભવેન્નરઃ કોઽપિ વિશુદ્ધચેતાઃ ।
સ વૈ ગુણાનામયુતૈકદેશં વદેન્ન વા દેવવરસ્ય વિષ્ણોઃ ॥ ૧,૨૨૮.૧૦॥

વ્યાસાદ્યા મુનયઃ સર્વે સ્તુવન્તો મધુસૂદનમ્ ।
મતિક્ષયાન્નિવર્તન્તે ન ગોવિન્દગુણક્ષયાત્ ॥ ૧,૨૨૮.૧૧॥

અવશેનાપિ યન્નામ્નિ કીર્તિતે સર્વપાતકૈઃ ।
પુમાન્વિમુચ્યતે સદ્યઃ સિંહત્રસ્તો મૃગા યથા ।
બદ્ધઃ પરિકરસ્તેન મોક્ષાય ગમનં પ્રતિ ॥ ૧,૨૨૮.૧૨॥

સ્વપ્નેઽપિ નામ સ્પૃશતોઽપિ પુંસઃ ક્ષયં કરોત્યક્ષયપાપરાશિમ્ ।
પ્રત્યક્ષતઃ કિં પુનરત્ર પુંસા પ્રકીર્તિતે નામ્નિ જનાર્દનસ્ય ॥ ૧,૨૨૮.૧૩॥

નમઃ કૃષ્ણાચ્યુતાનન્તવાસુદેવેત્યુદીરિતમ્ ।
યૈર્ભાવભાવિતૈર્વિપ્રન તે યમપુરં યયુઃ ॥ ૧,૨૨૮.૧૪॥

ક્ષયો ભવેદ્યથા વહ્નેસ્તમસો ભાસ્કરોદયે ।
તથૈવ કલુષૌઘસ્ય નામસંકીર્તનાદ્ધરેઃ ॥ ૧,૨૨૮.૧૫॥

ક્વ નાકપૃષ્ઠગમનં પુનરાયાતિ ન ક્ષયમ્ ।
ગચ્છતાં દૂરમધ્વાનં કૃષ્ણમૂર્છિતચેતસામ્ ॥ ૧,૨૨૮.૧૬॥

પાથેયં પુણ્ડરીકાક્ષનામસંકીર્તનં હરેઃ ।
સંસારસર્પસંદષ્ટવિષચેષ્ટૈકભેષજમ્ ।
કૃષ્ણેતિ વૈષ્ણવં ક્ષાન્તં જપ્ત્વા મુક્તો ભવેન્નરઃ ॥ ૧,૨૨૮.૧૭॥

ધ્યાયન્કૃતે જપેન્મન્ત્રૈસ્ત્રેતાયાં દ્વાપરેઽર્ચયન્ ।
યદાપ્નોતિ તદાપ્નોતિ તદાપ્નોતિ કલૌ સંસ્મૃત્યકેશવમ્ ॥ ૧,૨૨૮.૧૮॥

જિહ્વાગ્રે વર્તતે યસ્ય હરિરિત્યક્ષરદ્વયમ્ ।
સંસારસાગરં તીર્ત્વા સ ગચ્છેદ્વૈષ્ણવં પદમ્ ॥ ૧,૨૨૮.૧૯॥

વિજ્ઞાતદુષ્કૃતિસહસ્રસમાવૃતોऽપિશ્રેયઃ પરન્તુ પરિશુદ્ધિમ ભીપ્સમાનઃ ।
સ્વપ્નાન્તરે ન હિ પુનશ્ચ ભવં સ પશ્યેન્નારાયણસ્તુતિકથાપરમો મનુષ્યઃ ॥ ૧,૨૨૮.૨૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુભક્તિવિવરણં નામાષ્ટાવિંશત્યુત્તરદ્વિશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨૯
સૂત ઉવાચ ।
અશેષલોકનાથસ્ય સારમારાધનં હરેઃ ।
દદ્યાતુ પુરુષસૂક્તેણ યઃ પુષ્પાણ્યપ એવ ચ ॥ ૧,૨૨૯.૧॥

અર્ચિતં સ્યાજ્જગદિદં તેન સર્વં ચરાચરમ્ ।
યો ન પૂજયતે વિષ્ણું તં વિદ્યાદ્બ્રહ્મઘાતકમ્ ॥ ૧,૨૨૯.૨॥

યતઃ પ્રવૃત્તિર્ભૂતાનાં યેન સર્વમિદં તતમ્ ।
તં યો ન ધ્યાયતે વિષ્ણું સ વિષ્ઠાયાં ક્રિમિર્ભવેત્ ॥ ૧,૨૨૯.૩॥

નરકે પચ્યમાનસ્તુ યમેન પરિભાષિતઃ ।
કિન્ત્વયા નાર્ચિતો દેવઃ કેશવઃ ક્લેશનાશનઃ ॥ ૧,૨૨૯.૪॥

ઉદકેનાપ્યભાવેન દ્રવ્યાણામર્ચિતઃ પ્રભુઃ ।
યો દદાતિ સ્વકં લોકં સ ત્વયા કિં ન ચાર્ચિતઃ ॥ ૧,૨૨૯.૫॥

ન તત્કરોતિ સા માતા ન પિતા નાપિ બાન્ધવઃ ।
યત્કરોતિ હૃષીકેશઃ સન્તુષ્ટઃ શ્રદ્ધયાર્ચિતઃ ॥ ૧,૨૨૯.૬॥

વર્ણાશ્રમાચારવતા પુરુષેણ પરઃ પુમાન્ ।
વિષ્ણુરારાધ્યતે પન્થા નાન્યસ્તત્તોષકારકઃ ॥ ૧,૨૨૯.૭॥

ન દાનૈર્વિવિધૈર્દત્તૈર્ન પુષ્પૈર્નાનુલેપનૈઃ ।
તોષમેતિ મહાત્માસૌ યથા ભક્ત્યા જનાર્દનઃ ॥ ૧,૨૨૯.૮॥

સમ્પદૈશ્વર્યમાહાત્મ્યૈઃ સન્તત્યા ન ચ કર્મણા ।
વિમુક્તૈશ્ચૈકતા લભ્યા મૂલમારાધનં હરેઃ ॥ ૧,૨૨૯.૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુપૂજાનિરૂપણં નામૈકોનત્રિંશદુત્તરદ્વિશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૦

સૂત ઉવાચ ।

આલોક્ય સર્વશાસ્ત્રાણિ વિચાર્ય ચ પુનઃ પુનઃ ।
ઇદમેકં સુનિષ્પન્નં ધ્યેયો નારાયણઃ સદા ॥ ૧,૨૩૦.૧॥

કિં તસ્ય દાનૈઃ કિન્તીર્થૈઃ કિં તપોભિઃ કિમધ્વરૈઃ ।
યો નિત્યં ધ્યાયતે દેવં નારાયણમનન્યધીઃ ॥ ૧,૨૩૦.૨॥

ષષ્ટિસ્તીર્થસહસ્રાણિ ષષ્ટિસ્તીર્થશતાનિ ચ ।
નારાયણપ્રણામસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૧,૨૩૦.૩॥

પ્રયશ્ચિત્તાન્યશેષાણિ તપઃ કર્માણિ યાનિ વૈ ।
વિદ્ધિ તેષામશેષાણાં કૃષ્ણાનુસ્મરણં પરમ્ ॥ ૧,૨૩૦.૪॥

કૃતપાપેઽનુરક્તિશ્ચ યસ્ય પુંસઃ પ્રજાયતે ।
પ્રાયશ્ચિત્તન્તુ તસ્યૈકં હરેઃ સંસ્મરણં પરમ્ ॥ ૧,૨૩૦.૫॥

મુહૂર્તમપિ યો ધ્યાયેન્નારાયણમતન્દ્રિતઃ ।
સોઽપિ સ્વર્ગતિમાપ્નોતિ કિં પુનસ્તત્પરાયણઃ ॥ ૧,૨૩૦.૬॥

જાગ્રત્સ્વપ્નસુષુપ્તેષુ યોગસ્થસ્ય ચ યોગિનઃ ।
યા કાચિન્મનસો વૃત્તિઃ સા ભવત્યચ્યુતાશ્રયાત્ ॥ ૧,૨૩૦.૭॥

ઉત્તિષ્ઠન્નિપતન્વિષ્ણું પ્રલપન્વિવિશંસ્તથા ।
ભુઞ્જઞ્જાગ્રચ્ચ ગોવિન્દં માધવં યશ્ચ સંસ્મરેત્ ॥ ૧,૨૩૦.૮॥

સ્વેસ્વે કર્મણ્યભિરતઃ કુર્યાચ્ચિત્તં જનાર્દને ।
એષા શાસ્ત્રાનુસારોક્તિઃ કિમન્યૈર્બહુભાષિતૈઃ ॥ ૧,૨૩૦.૯॥

ધ્યાનમેવ પરો ધર્મો ધ્યાનમેવ પરં તપઃ ।
ધ્યાનમેવ પરં શૌચં તસ્માદ્ધ્યાનપરો ભવેત્ ॥ ૧,૨૩૦.૧૦॥

નાસ્તિ વિષ્ણોઃ પરં ધ્યેયં તપો નાનશનાત્પરમ્ ।
તસ્માત્પ્રધાનમત્રોક્તં વાસુદેવસ્ય ચિન્તનમ્ ॥ ૧,૨૩૦.૧૧॥

યદ્દુર્લભં પરં પ્રાપ્યં મનસો યન્ન ગોચરમ્ ।
તદપ્યપ્રાર્થિતં ધ્યાતો દદાતિ મધુસૂદનઃ ॥ ૧,૨૩૦.૧૨॥

પ્રમાદાત્કુર્વતાં કર્મ પ્રચ્યવેતાધ્વરેષુ યત્ ।
સ્મરણાદેવ તદ્વિષ્ણોઃ સમ્પૂર્ણં સ્યાદિતિ શ્રુતિઃ ॥ ૧,૨૩૦.૧૩॥

ધ્યાનેન સદૃશો નાસ્તિ શોધનં પાપકર્મણામ્ ।
આગામિદેહહેતૂનાં દાહકો યોગપાવકઃ ॥ ૧,૨૩૦.૧૪॥

વિનિષ્પન્નસમાધિસ્તુ મુક્તિમત્રૈવ જન્મનિ ।
પ્રાપ્નોતિ યોગી યોગાગ્નિદગ્ધકર્મા ચ યોઽચિરાત્ ॥ ૧,૨૩૦.૧૫॥

યથાગ્નિરુદ્ધતશિખઃ કક્ષં દહતિ વાનિલઃ ।
તથા ચિત્તસ્થિતે વિષ્ણૌ યોગિના સર્વકિલ્બિષમ્ ॥ ૧,૨૩૦.૧૬॥

યથાગ્નિયોગાત્કનકમમલં સમ્પ્રજાયતે ।
સમ્પ્લુષ્ટો વાસુદેવેન મનુષ્યાણાં સદા મલઃ ॥ ૧,૨૩૦.૧૭॥

ગઙ્ગાસ્નાનસહસ્રેષુ પુષ્કરસ્નાનકોટિષુ ।
યત્પાપં નિલયયાતિ સ્મૃતે નશ્યતિ તદ્ધરૌ ॥ ૧,૨૩૦.૧૮॥

પ્રાણાયામસહસ્નૈસ્તુ યત્પાપં નશ્યતિ ધ્રુવમ્ ।
ક્ષણમાત્રેણ તત્પાપં હરેર્ધ્યાનાત્પ્રણશ્યતિ ॥ ૧,૨૩૦.૧૯॥

કલિપ્રભાવાદ્દુષ્ટોક્તિઃ પાષણ્ડાનાં તથોક્તયઃ ।
ન ક્રામેન્માનસં તસ્ય યસ્ય ચેતસિ કેશવઃ ॥ ૧,૨૩૦.૨૦॥

સા તિથિસ્તદહોરાત્રં સ યોગઃ સ ચ ચન્દ્રમાઃ ।
લગ્નં તદેવ વિખ્યાતં યત્ર સંસ્મર્યતે હરિઃ ॥ ૧,૨૩૦.૨૧॥

સા હાનિસ્તન્મહચ્છિદ્રં સા ચાર્થજડમૂકતા ।
યન્મુહૂર્તં ક્ષણો વાપિ વાસુદેવો ન ચિન્ત્યતે ॥ ૧,૨૩૦.૨૨॥

કલૌ કૃત યુગં તસ્ય કલિસ્તસ્ય કૃતે યુગે ।
હૃદિ નો યસ્ય ગોવિન્દો યસ્ય ચેતસિ નાચ્યુતઃ ॥ ૧,૨૩૦.૨૩॥

યસ્યાગ્રતસ્તથા પૃષ્ઠે ગચ્છતસ્તિષ્ઠતોઽપિ વા ।
ગોવિન્દે નિયતં ચેતઃ કૃતકૃત્યઃ સદૈવ સઃ ॥ ૧,૨૩૦.૨૪॥

વાસુદેવે મનો યસ્ય જપહોમાર્ચનાદિષુ ।
તસ્યાન્તરાયો મૈત્રેય વેવેન્દ્રત્વાદિકં ફલમ્ ॥ ૧,૨૩૦.૨૫॥

અસંત્યજ્ય ચ ગાર્હસ્થ્યં સ તપ્ત્વા ચ મહત્તપઃ ।
છિનત્તિ પૌરુષીં માયાં કેશવાર્પિતમાનસઃ ॥ ૧,૨૩૦.૨૬॥

ક્ષમાં કુર્વન્તિ ક્રુદ્ધેષુ દયાં મૂર્ખેષુ માનવાઃ ।
મુદઞ્ચ ધર્મશીલેષુ ગોવિન્દે હૃદયસ્થિતે ॥ ૧,૨૩૦.૨૭॥

ધ્યાયેન્નારાયણં દેવં સ્નાનદાનાદિકર્મસુ ।
પ્રાયશ્ચિતેતેષુ સર્વેષુ દુષ્કૃતેષુ વિશેષતઃ ॥ ૧,૨૩૦.૨૮॥

લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાભવઃ ।
યેષામિન્દીવરશ્યામો હૃદયસ્થો જનાર્દનઃ ॥ ૧,૨૩૦.૨૯॥

કીટપક્ષિગણાનાઞ્ચ હરૌ સંન્યસ્તચેતસામ્ ।
ઊર્ધ્વા હ્યેવ ગતિશ્ચાસ્તિ કિં પુનર્જ્ઞાનિનાં નૃણામ્ ॥ ૧,૨૩૦.૩૦॥

વાસુદેવતરુચ્છાયા નાતિશીતાતિતાપદા ।
નરકદ્વારશમની સા કિમર્થં ન સેવ્યતે ॥ ૧,૨૩૦.૩૧॥

ન ચ દુર્વાસસઃ શાપો રાજ્યઞ્ચાપિ શચીપતેઃ ।
હન્તું સમર્થં હિ સખે હૃત્કૃતે મધુસૂદને ॥ ૧,૨૩૦.૩૨॥

વદતસ્તિષ્ઠતોઽન્યદ્વા સ્વેચ્છયા કર્મ કુર્વતઃ ।
નાપયાતિ યદા ચિન્તા સિદ્ધાં મન્યેત ધારણામ્ ॥ ૧,૨૩૦.૩૩॥

ધ્યેયઃ સદા સવિતૃમણ્ડલમધ્યવર્તી નારાયણઃ સરસિજાસનસન્નિવિષ્ટઃ ।
કેયૂરવાન્મકરકુણ્ડલવાન્કિરીટી હારી હિરણ્મયવપુર્ધૃતશઙ્ખચક્રઃ ॥ ૧,૨૩૦.૩૪॥

ન હિ ધ્યાનેન સદૃશં પવિત્રમિહ વિદ્યતે ।
શ્વપચાન્નાનિ ભુઞ્જાનો પાપી નૈવાત્ર લિપ્યતે ॥ ૧,૨૩૦.૩૫॥

સદા ચિત્તં સમાસક્તં જન્તોર્વિષયગોચરે ।
યદિ નારાયણેઽપ્યેવં કો ન મુચ્યેત બન્ધનાત્ ॥ ૧,૨૩૦.૩૬॥

સૂત ઉવાચ ।
વિષ્ણુભક્તિર્યસ્ય ચિત્તે કં વા જીવો નમેત્સદા ।
સ તારયતિ ચાત્માનં તદૈવ દુરિતાર્ણવાત્ ॥ ૧,૨૩૦.૩૭॥

તજ્ઞ્જ્ઞાનં યત્ર ગોવિન્દઃ સા કથા યત્ર કાશવઃ ।
તત્કર્મ યત્તદર્થાય કિમન્યૈર્બહુભાષિતૈઃ ॥ ૧,૨૩૦.૩૮॥

સા જિહ્વા યા હરિં સ્તૌતિ તચ્ચિત્તં યત્તદર્પિતમ્ ।
તાવેવ કેવલૌ શ્લાઘ્યૌ યૌ તત્પૂજાકરૌ કરૌ ॥ ૧,૨૩૦.૩૯॥

પ્રણામમીશસ્ય શિરઃ ફલં વિદુસ્તદર્ચનં પાણિફલં દિવૌકસઃ ।
મનઃ ફલં તદ્ગુણકર્મચિન્તનં વચસ્તુ ગોવિન્દગુણસ્તુતિઃ ફલમ્ ॥ ૧,૨૩૦.૪૦॥

મેરુમન્દરમાત્રોઽપિ રાશિઃ પાપસ્ય કર્મણઃ ।
કેશવસ્મરણાદેવ તસ્ય સર્વં વિનશ્યતિ ॥ ૧,૨૩૦.૪૧॥

યત્કિઞ્ચિત્કુરુતે કર્મ પુરુષઃ સાધ્વસાધુ વા ।
સર્વં નારાયણે ન્યસ્ય કુર્વન્નપિ ન લિમ્પતિ ॥ ૧,૨૩૦.૪૨॥

તૃણાદિચતુરાસ્યાન્તં ભૂતગ્રામં ચતુર્વિધમ્ ।
ચરાચરં જગત્સર્વં પ્રસુપ્તં માયયા તવ ॥ ૧,૨૩૦.૪૩॥

યસ્મિન્ન્યસ્તમતિર્ન યાતિ નરકં સ્વર્ગોઽપિ યચ્ચિન્તને વિઘ્નો
યત્ર નવા વિશેત્કથમપિ બ્રાહ્મોઽપિલોકોઽલ્પકઃ ।
મુક્તિશ્ચેતસિ સંસ્થિતો જડધિયાં પુંસાં દદાત્યવ્યયઃ કિઞ્ચિત્રં
યદયં પ્રયાતિ વિલયં તત્રાચ્યુતે કીર્તિતે ॥ ૧,૨૩૦.૪૪॥

અગ્નિકાર્યં જપઃ સ્નાનં વિષ્ણોર્ધ્યાનઞ્ચ પૂજનમ્ ।
ગન્તું દુઃખોદધેઃ કુર્યુર્યે ચ તત્ર નરન્તિ તે ॥ ૧,૨૩૦.૪૫॥

રાષ્ટ્રસ્ય શરણં રાજા પિતરો બાલકસ્ય ચ ।
ધર્મશ્ચ સર્વમર્ત્યાનાં સર્વસ્ય શરણં હરિઃ ॥ ૧,૨૩૦.૪૬॥

યે નમન્તિ જગદ્યોનિં વાસુદેવં સનાતનમ્ ।
ન યેભ્યો વિદ્યતે તીર્થમધિકં મુનિસત્તમ્ ॥ ૧,૨૩૦.૪૭॥

અનર્ઘરત્નપૂજાઞ્ચ કુર્યાત્સ્વાધ્યાયમેવ ચ ।
તમેવોદ્દિશ્ય ગોવિન્દં ધ્યાયન્નિત્યમતન્દ્રિતઃ ॥ ૧,૨૩૦.૪૮॥

શૂદ્રં વા ભગવદ્ભક્તં નિષાદં શ્વપચં તથા ।
દ્વિજજાતિ સમમન્યો ન યાતિ નરકં નરઃ ॥ ૧,૨૩૦.૪૯॥

આદરેણ સદા સ્તૌતિ ધનવન્તં ધનેચ્છયા ।
તથા વિશ્વસ્ય કર્તારં કો ન મુચ્યેત બન્ધનાત્ ॥ ૧,૨૩૦.૫૦॥

યથા પ્રાપ્તવનો વહ્નિર્દહત્યાર્દ્રમપીન્ધનમ્ ।
તથાવિધઃ સ્થિતો વિષ્ણુર્યોગિનાં સર્વકિલ્વિષમ્ ॥ ૧,૨૩૦.૫૧॥

આદીપ્તં પર્વતં યદ્વન્નાશ્રયન્તિ મૃગાદયઃ ।
તદ્વત્પાપનિ સર્વાણિ યોગાભ્યાસરતં નરમ્ ॥ ૧,૨૩૦.૫૨॥

યસ્ય યાવાંશ્ચ વિશ્વાસસ્તસ્ય સિદ્ધિસ્તુ તાવતી ।
એતવાનેવ કૃષ્ણસ્ય પ્રભાવઃ પરિમીયતે ॥ ૧,૨૩૦.૫૩॥

વિદ્વેષાદપિ ગોવિન્દં દમઘોષાત્મજઃ સ્મરન્ ।
શિશુપાલો ગતસ્તત્ત્વં કિં પુનસ્તત્પરાયણઃ ॥ ૧,૨૩૦.૫૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
વિષ્ણુમહાત્મ્યવર્ણનં નામ ત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૧
સૂત ઉવાચ ।
નારસિંહસ્તુતિં વક્ષ્યે શિવોક્તં શૌનકાધુના ।
પૂર્વં માતૃગણાઃ સર્વે શઙ્કરં વાક્યમબ્રુવન્ ॥ ૧,૨૩૧.૧॥

ભગવન્ભક્ષયિષ્યામઃ સદેવાસુરમાનુષમ્ ।
ત્વત્પ્રસાદાજ્જગત્સર્વં તદનુજ્ઞાતુમર્હસિ ॥ ૧,૨૩૧.૨॥

શઙ્કરૌવાચ ।
ભવતીભિઃ પ્રજાઃ સર્વા રક્ષણીયા ન સંશયઃ ।
તસ્માદ્ઘોરતરપ્રાયં મનઃ શીઘ્રં નિવર્ત્યતામ્ ॥ ૧,૨૩૧.૩॥

ઇત્યેવં શઙ્કરેણોક્તમનાદૃત્ય તુ તદ્વચઃ ।
ભક્ષયામાસુરવ્યગ્રાસ્ત્રૈલોક્યં સચરાચરમ્ ॥ ૧,૨૩૧.૪॥

ત્રૈલોક્યે ભક્ષ્યમાણે તુ તદા માતૃગણેન વૈ ।
નૃસિંહરૂપિણં દેવં પ્રદધ્યૌ ભગવાઞ્છિવઃ ॥ ૧,૨૩૧.૫॥

અનાદિનિધનં દેવં સર્વભૂતભવોદ્ભવમ્ ।
વિદ્યુજ્જિહ્વં મહાદંષ્ટ્રં સ્ફુરત્કેસરમાલિનમ્ ॥ ૧,૨૩૧.૬॥

રત્નાઙ્ગદં સમુકુટં હેમકેસરભૂષિતમ્ ।
ખોણિસૂત્રેણ મહતા કાઞ્ચનેન વિરાજિતમ્ ॥ ૧,૨૩૧.૭॥

નીલોત્પલદલશ્યામં રત્નનૂપુરભૂષિતમ્ ।
તેજસાક્રાન્તસકલબ્રહ્માણ્ડોદરમણ્ડપમ્ ॥ ૧,૨૩૧.૮॥

આવર્તસદૃશાકારૈઃ સંયુક્તં દેહરોમભિઃ ।
સર્વપુષ્પૈર્યોજિતાઞ્ચ ધારયંશ્ચ મહાસ્રજમ્ ॥ ૧,૨૩૧.૯॥

સ ધ્યાતમાત્રો ભગવાન્પ્રદદૌ તસ્ય દર્શનમ્ ।
યાદૃશેન રૂપેણ ધ્યાતો રુદ્રૈસ્તુ ભક્તિતઃ ॥ ૧,૨૩૧.૧૦॥

તાદૃશેનૈવ રૂપેણ દુર્નિરીક્ષ્યેણ દૈવતૈઃ ।
પ્રણિપત્ય તુ દેવેશં તદા તુષ્ટાવ શઙ્કરઃ ॥ ૧,૨૩૧.૧૧॥

શઙ્કર ઉવાચ ।
નમસ્તેઽસ્ત જગન્નાથ નરસિંહવપુર્ધર ।
દૈત્યેશ્વરેન્દ્રસંહારિનખશુક્તિવિરાજિત ॥ ૧,૨૩૧.૧૨॥

નખમણ્ડલસભિન્નહેમપિઙ્ગલવિગ્રહ ।
નમોઽસ્તુ પદ્મનાભાય શોભનાય જગદ્ગુરો ।
કલ્પાન્તામ્ભોદનિર્ઘોષ સૂર્યકોટિસમપ્રભ ॥ ૧,૨૩૧.૧૩॥

સહસ્રયમસંત્રાસ સહસ્રેન્દ્રપરાક્રમ ।
હસસ્ત્રધનદસ્ફીત સહસ્રચરણાત્મક ॥ ૧,૨૩૧.૧૪॥

સહસ્રચન્દપ્રતિમ ! સહસ્રાંશુહરિક્રમ ।
સહસ્રરુદ્રતેજસ્ક સહસ્રબ્રહ્મસંસ્તુત ॥ ૧,૨૩૧.૧૫॥

સહસ્રરુદ્રસંજપ્ત સહસ્રાક્ષનિરીક્ષણ ।
સહસ્રજન્મમથન સહસ્રબન્ધનમોચન ॥ ૧,૨૩૧.૧૬॥

સહસ્રવાયુવેગાક્ષ સહસ્રાજ્ઞકૃપાકર ।
સ્તુત્વૈવં દેવદેવેશં નૃસિંહવપુષં હરિમ્ ।
વિજ્ઞાપયામાસ પુનર્વિનયાવનતઃ શિવઃ ॥ ૧,૨૩૧.૧૭॥

અન્ધકસ્ય વિનાશાય યા સૃષ્ટા માતરો મયા ।
અનાદૃત્ય તુ મદ્વાક્યં ભક્ષ્યન્ત્વદ્ભુતાઃ પ્રજાઃ ॥ ૧,૨૩૧.૧૮॥

સૃષ્ટ્વા તાશ્ચ ન શક્તોઽહં સંહર્તુમપરાજિતઃ ।
પૂર્વં કૃત્વા કથં તાસાં વિનાશમભિરોચયે ॥ ૧,૨૩૧.૧૯॥

એવમુક્તઃ સ રુદ્રેણ નરસિહવપુર્હરિઃ ।
સહસ્રહેવીર્જિહ્વાગ્રાત્તદા વાગીશ્વરો હરિઃ ॥ ૧,૨૩૧.૨૦॥

તથા સુરગણાન્સર્વાન્રૌદ્રાન્માતૃગણાન્વિભુઃ ।
સંહૃત્ય જગતઃ શર્મ કૃત્વા ચાન્તર્દધે હરિઃ ॥ ૧,૨૩૧.૨૧॥

નારસિંહમિદં સ્તોત્રં યઃ પઠેન્નિયતેન્દ્રિયઃ ।
મનોરથપ્રદસ્તસ્ય રુદ્રસ્યેવ ન સંશયઃ ॥ ૧,૨૩૧.૨૨॥

ધ્યાયેન્નૃસિંહં તરુણાર્કનેત્રં સિદામ્બુજાતં જ્વલિતાગ્નિવક્ત્રમ્ ।

અનાદિમધ્યાન્તમજ પુરાણં પરાપરેશં જગતાં નિધાનમ્ ॥ ૧,૨૩૧.૨૩॥

જપેદિદં સન્તતદુઃખજાલં જહાતિ નીહારમિવાંશુમાલી ।
સમાતૃવર્ગસ્ય કરોતિ મૂર્તિં યદા તદા તિષ્ઠતિ તત્સમીપે ॥ ૧,૨૩૧.૨૪॥

દેવેશ્વરસ્યાપિ નૃસિંહમૂર્તેઃ પૂજાં વિધાતું ત્રિપુરાન્તકારી ।
પ્રસાદ્ય તં દેવવરં સ લબ્ધ્વા અવ્યાજ્જગન્માતૃગણેભ્ય એવ ચ ॥ ૧,૨૩૧.૨૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
નૃસિંહસ્તોત્રં નામૈકત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૨
સૂત ઉવાચ ।
કુલામૃતં પ્રવક્ષ્યામિ સ્તોત્રં યત્તુ હરોઽબ્રવીત્ ।
પૃષ્ટઃ શ્રીનારદેનૈવ નારદાય તથા શ‍ૃણુ ॥ ૧,૨૩૨.૧॥

નારદ ઉવાચ ।
યઃ સંકારે સદા દ્વન્દ્વૈઃ કામક્રોધૈઃ શુભાશુભૈઃ ।
શબ્દાદિવિષયૈર્બદ્ધઃ પીડ્યમાનઃ સ દુર્મતિઃ ॥ ૧,૨૩૨.૨॥

ક્ષણં વિમુચ્યતે જન્તુર્મૃત્યુસંસારસાગરાત્ ।
ભગવઞ્છ્રોતુમિચ્છામિ ત્વત્તો હિ ત્રિપુરાન્તક ॥ ૧,૨૩૨.૩॥

તસ્ય તદ્વચનં શ્રુત્વા નારદસ્ય ત્રિલોચનઃ ।
ઉવાચ તમૃષિં શમ્ભુઃ પ્રસન્નવદનો હરઃ ॥ ૧,૨૩૨.૪॥

મહેશ્વર ઉવાચ ।
જ્ઞાનામૃતં પરં ગુહ્યં રહસ્યમૃષિસત્તમ ।
વક્ષ્યામિ શ‍ૃણુ દુઃખઘ્નં ભવબન્ધભયામહમ્ ॥ ૧,૨૩૨.૫॥

તૃણાદિ ચતુરાસ્યાન્તં ભૂતગ્રામં ચતુર્વિધમ્ ।
ચરાચરં જગત્સર્વં પ્રસુપ્તં યસ્ય માયયા ॥ ૧,૨૩૨.૬॥

તસ્ય વિષ્ણોઃ પ્રસાદેન યદિ કશ્ચિત્પ્રબુધ્યતે ।
સ નિસ્તરતિ સંસારં દેવાનામપિ દુસ્તરમ્ ॥ ૧,૨૩૨.૭॥

ભોગૈશ્વર્યમદોન્મત્તસ્તતત્ત્વજ્ઞાનપરાઙ્મુખઃ ।
પુત્રદારકુટુમ્બેષુ મત્તાઃ સીદન્તિજન્તવઃ ॥ ૧,૨૩૨.૮॥

સર્વ એકાર્ણવે મગ્ના જીર્ણા વનગજા ઇવ ।
યસ્ત્વાનનં નિબધ્નાતિ દુર્મતિઃ કોશકારવત્ ॥ ૧,૨૩૨.૯॥

તસ્ય મુક્તિં ન પશ્યામિ જન્મકોટિશતૈરપિ ।
તસ્માન્નારદ સર્વેષાં દેવાનાં દેવમવ્યયમ્ ।
આરાધયેત્સદા સમ્યગ્ધ્યાયેદ્વિષ્ણું મુદાન્વિતઃ ॥ ૧,૨૩૨.૧૦॥

યસ્તુ વિશ્વમનાદ્યન્તમજમાત્મનિ સંસ્થિતમ્ ।
સર્વજ્ઞમચલં વિષ્ણું સદા ધ્યાયેત્સમુચ્યતે ॥ ૧,૨૩૨.૧૧॥

દેવં ગર્ભોચિતં વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ।
અશિરીરં વિધાતારં સર્વજ્ઞાનમનોરતિમ્ ।
અચલં સર્વગં વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૨॥

નિર્વિકલ્પં નિરાભાસં નિષ્પ્રપઞ્ચં નિરામયમ્ ।
વાસુદેવં ગુરું વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૩॥

સર્વાત્મકઞ્ચ વૈ યાવદાત્મચૈતન્યરૂપકમ્ ।
શુભમેકાક્ષરં વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૪॥

વાક્યાતીતં ત્રિકાલજ્ઞં વિશ્વેશં લોકસાક્ષિણમ્ ।
સર્વસ્માદુત્તમં વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૫॥

બ્રહ્માદિદેવગન્ધર્વૈર્મુનિભિઃ સિદ્ધચારણૈઃ ।
યોગિભિઃ સેવિતં વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૬॥

સંસારબન્ધનામુક્તિમિચ્છંલ્લોકો હ્યશેષતઃ ।
સ્તુત્વૈવં વરદં વિષ્ણું સદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૭॥

સંસારબન્ધનાત્કોઽપિ મુક્તિમિચ્છન્સમાહિતઃ ।
અનન્તમવ્યયં દેવં વિષ્ણં વિશ્વપ્રતિષ્ઠિતમ્ ।
વિશ્વેશ્વરમજં વિષ્ણું સંદા ધ્યાયન્વિમુચ્યતે ॥ ૧,૨૩૨.૧૮॥

સૂત ઉવાચ ।
નારદેન પુરા પૃષ્ટ એવં સ વૃષભધ્વજઃ ।
યેત્તેન તસ્મૈ વ્યાખ્યાતં તન્મયા કથિતં તવ ॥ ૧,૨૩૨.૧૯॥

તમેવ સતતન્ધ્યાયન્નિર્વ્યયં બ્રહ્મ નિષ્કલમ્ ।
અવાપ્સ્યસિ ધ્રુવં તાત ! શાશ્વતં પદમવ્યયમ્ ॥ ૧,૨૩૨.૨૦॥

અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
ક્ષણમેકાગ્રચિત્તસ્ય કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૧,૨૩૨.૨૧॥

શ્રુત્વા સુરઋષિર્વિષ્ણોઃ પ્રાધાન્યમિદમીશ્વરાત્ ।
સ વિષ્ણું સમ્યગારાધ્ય સિદ્ધઃ પદમવાપ્તવાન્ ॥ ૧,૨૩૨.૨૨॥

યઃ પઠેચ્છૃણુયાદ્વા પિ નિત્યમેવ સ્તવોત્તમમ્ ।
કોટિજન્મકૃતં પાપમપિ તસ્ય પ્રણશ્યતિ ॥ ૧,૨૩૨.૨૩॥

વિષ્ણોઃ સ્તવમિદં દિવ્યં મહાદેવેન કીર્તિતમ્ ।
પ્રયત્નાદ્યઃ પઠેન્નિત્ય મમૃતત્વં સ ગચ્છતિ ॥ ૧,૨૩૨.૨૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે કુલામૃતસ્તોત્રં નામ દ્વાત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૩
સૂત ઉવાચ ।
સ્તોત્રં તત્સં પ્રવક્ષ્યામિ માર્કણ્ડેયન ભાષિતમ્ ।
દામોદરં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૧,૨૩૩.૧॥

શઙ્ખચક્રધરં દેવં વ્યક્તરૂપિણમવ્યયમ્ ।
અધોઽક્ષજં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૧,૨૩૩.૨॥

વરાહં વામનં વિષ્ણું નારસિંહં જનાર્દનમ્ ।
માધવં ચ પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૧,૨૩૩.૩॥

પુરુષં પુષ્કરક્ષેત્રબીજં પુણ્યં જગત્પતિમ્ ।
લોકનાથં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૧,૨૩૩.૪॥

સહસ્રશિરસં દેવં વ્યક્તાવ્યક્તં સનાતનમ્ ।
મહાયોગં પ્રપન્નોઽસ્મિ કિન્નો મૃત્યુઃ કરિષ્યતિ ॥ ૧,૨૩૩.૫॥

ભૂતાત્માનં મહાત્માનં યજ્ઞયોનિમયોનિજમ્ ।
વિશ્વરૂપં પ્રપન્નોઽસ્મિ કિન્નો મૂત્યુઃ કરિષ્યતિ ॥ ૧,૨૩૩.૬॥

ઇત્યુદીરિતમાકર્ણ્ય સ્તોત્રં તસ્ય મહાત્મનઃ ।
અપયાતસ્તતો મૃત્યુર્વિષ્ણુદૂતૈઃ પ્રપીડિતઃ ॥ ૧,૨૩૩.૭॥

ઇતિ તેન જિતો મૃત્યુર્માર્કણ્ડેયેન ધીમતા ।
પ્રસન્ને પુણ્ડરીકાક્ષે નૃસિંહે નાસ્તિદુર્લભમ્ ॥ ૧,૨૩૩.૮॥

મૃત્વષ્ટકમિદં પુણ્યં મૃત્યુપ્રશમનં શુભમ્ ।
માર્કણ્ડેયહિતાર્થાય સ્વયં વિષ્ણુરુવાચ હ ॥ ૧,૨૩૩.૯॥

ઇદં યઃ પઠતે ભક્ત્યા ત્રિકાલં નિયતં શુચિઃ ।
નાકાલે તસ્ય મૃત્યુઃ સ્યાન્નરસ્યાચ્યુતચેતસઃ ॥ ૧,૨૩૩.૧૦॥

હૃત્પદ્મમધ્યે પુરુષં પુરાણં નારાયણં શાશ્વતમપ્રમેયમ્ ।
વિચિન્ત્ય સૂર્યાદતિરાજમાનં મૃત્યું સ યોગિ જિતવાંસ્તથૈવ ॥ ૧,૨૩૩.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે માર્કણ્ડેયકૃતં મૃત્વષ્ટકસ્તોત્રં
નામ ત્રયસ્ત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૪
સૂત ઉવાચ ।
વક્ષ્યેઽહમચ્યુતસ્તોત્રં શ ृણુ શૌનક સર્વદમ્ ।
બ્રહ્મા પૃષ્ટો નારદાય યથોવાચ તથા પરમ્ ॥ ૧,૨૩૪.૧॥

નારદ ઉવાચ ।
યથાક્ષયોઽવ્યયો વિષ્ણુઃ સ્તોતવ્યો વરદો મયા ।
પ્રત્યહં ચાર્ચનાકાલે તથા ત્વં વક્તુમર્હસિ ॥ ૧,૨૩૪.૨॥

તે ધન્યાસ્તે સુજન્માનસ્તે હિ સર્વસુખપ્રદાઃ ।
સફલં જીવિતં તેષાં યે સ્તુવન્તિ સદાચ્યુતમ્ ॥ ૧,૨૩૪.૩॥

બ્રહ્મોવાચ ।
મુને સ્તોત્રં પ્રવક્ષ્યામિઃ વાસુદેવસ્ય મુક્તિદમ્ ।
શ ृણુ યેન સ્તુતઃ સમ્યક્પૂજાકાલે પ્રસીદતિ ॥ ૧,૨૩૪.૪॥

ૐ નમો ભગવતે વાસુદેવાય નમઃ સર્વાપહારિણે ।
નમો વિશુદ્ધદેહાય નમો જ્ઞાનસ્વરૂપિણે ॥ ૧,૨૩૪.૫॥

નમઃ સર્વસુરેશાય નમઃ શ્રીવત્સધારિણે ।
નમશ્ચર્માસિહસ્તાય નમઃ પઙ્કજમાલિને ॥ ૧,૨૩૪.૬॥

નમો વિશ્વપ્રતિષ્ઠાય નમઃ પીતામ્બરાય ચ ।
નમો નૃસિંહરૂપાય વૈકુણ્ઠાય નમોનમઃ ॥ ૧,૨૩૪.૭॥

નમઃ પઙ્કજનાભાય નમઃ ક્ષીરોદશાયિને ।

નમઃ સહસ્રશીર્ષાય નમો નાગાઙ્ગશાયિને ॥ ૧,૨૩૪.૮॥

નમઃ પરશુહસ્તાય નમઃ ક્ષત્રાન્તકારિણે ।
નમઃ સત્યપ્રતિજ્ઞાય હ્યજિતાય નમોનમઃ ॥ ૧,૨૩૪.૯॥

નમસ્ત્રૈ લોક્યનાથાય નમશ્ચક્રધારય ચ ।
નમઃ શિવાય સૂક્ષ્માય પુરાણાય નમોનમઃ ॥ ૧,૨૩૪.૧૦॥

નમો વામનરૂપાય બલિરાજ્યાપહારિણે ।
નમો યજ્ઞવરાહાય ગોવિન્દાય નમોનમઃ ॥ ૧,૨૩૪.૧૧॥

નમસ્તે પરમાનન્દ નમસ્તે પરમાક્ષર ।
નમસ્તે જ્ઞાનસદ્ભાવ નમસ્તે જ્ઞાનદાયક ॥ ૧,૨૩૪.૧૨॥

નમસ્તે પરમાદ્વૈત નમસ્તે પુરુષોત્તમ ।
નમસ્તે વિશ્વકૃદ્દેવ નમસ્તે વિશ્વભાવન ॥ ૧,૨૩૪.૧૩॥

નમસ્તેઽસ્તુ વિશ્વનાથ નમસ્તે વિશ્વકારણ ।
નમસ્તે મધુદૈત્યઘ્ન નમસ્તે રાવણાન્તક ॥ ૧,૨૩૪.૧૪॥

નમસ્તે કંસકેશિઘ્ન નમસ્તે કૈટભાર્દન ।
નમસ્તે શતપત્રાક્ષ નમસ્તે ગરુડધ્વજ ॥ ૧,૨૩૪.૧૫॥

નમસ્તે કાલનેમિઘ્ન નમસ્તે ગરુડાસન ।
નમસ્તે દેવકીપુત્ર નમસ્તે વૃષ્ણિનન્દન ॥ ૧,૨૩૪.૧૬॥

નમસ્તે રુક્મિણીકાન્ત નમસ્તે દિતિનન્દન ।
નમસ્તે ગોકુલાવાસ નમસ્તે ગોકુલપ્રિય ॥ ૧,૨૩૪.૧૭॥

જય ગોપવપુઃ કૃષ્ણ જય ગોપીજનપ્રિય ।
જય ગોવર્ધનાધાર જય ગોકુલવર્ધન ॥ ૧,૨૩૪.૧૮॥

જય રાવણવીરઘ્ન જય ચાણૂરનાશન ।
જય વૃષ્ણિકુલોદ્યોત જય કાલીયમર્દન ॥ ૧,૨૩૪.૧૯॥

જય સત્ય જગત્સાક્ષિન્જય સર્વાર્થસાધક ।
જય વેદાન્તવિદ્વેદ્ય જય સર્વદ માધવ ॥ ૧,૨૩૪.૨૦॥

જય સર્વાશ્રયાવ્યક્ત જય સર્વગ માધવ ।
જય સૂક્ષ્મચિદાનન્દ જય ચિત્તનિરઞ્જન ॥ ૧,૨૩૪.૨૧॥

જયસ્તેઽસ્તુ નિરાલમ્બ જય શાન્ત સનાતન ।
જય નાથ જગત્પુષ્ટ (ત્પૂજ્ય) જય વિષ્ણો નમોઽસ્તુતે ॥ ૧,૨૩૪.૨૨॥

ત્વં ગુરુસ્ત્વં હરે શિષ્યસ્ત્વં દીક્ષામન્ત્રમણ્ડલમ્ ।
ત્વં ન્યાસમુદ્રાસમયાસ્ત્વં ચ પુષ્પાદિસાધનમ્ ॥ ૧,૨૩૪.૨૩॥

ત્વમાધારસ્ત્વં હ્યનન્તસ્ત્વં કૂર્મસ્ત્વં ધરામ્બુજમ્ ।
ધર્મજ્ઞાનાદયસ્ત્વં હિ વેદિમણ્ડલશક્તયઃ ॥ ૧,૨૩૪.૨૪॥

ત્વં પ્રભો છલભૃદ્રામસ્ત્વં પુનઃ સ ખરાન્તકઃ ।
ત્વં બ્રહ્મર્ષિશ્ચદેવસ્ત્વં વિષ્ણુઃ સત્યપરાક્રમઃ ॥ ૧,૨૩૪.૨૫॥

ત્વં નૃસિંહઃ પરાનન્દો વરાહસ્ત્વં ધરાધરઃ ।
ત્વં સુપર્ણસ્તથા ચક્રં ત્વં ગદા શઙ્ખ એવ ચ ॥ ૧,૨૩૪.૨૬॥

ત્વં શ્રીઃ પ્રભો ત્વં મુષ્ટિસત્વં ત્વં માલા દેવ શાશ્વતી ।
શ્રીવત્સઃ કૌસ્તુભસ્ત્વં હિ શાર્ઙ્ગી ત્વં ચ તથેષુધિઃ ॥ ૧,૨૩૪.૨૭॥

ત્વં ખડ્ગચર્મણા સાર્ધં ત્વં દિક્પાલાસ્તથા પ્રભો ।
ત્વં વેધાસ્ત્વં વિધાતા ચ ત્વં યમસ્ત્વં હુતાશનઃ ॥ ૧,૨૩૪.૨૮॥

ત્વં ધનેશસ્ત્વમીશાનસ્ત્વમિન્દ્રસ્ત્વમપાંપતિઃ ।
ત્વં રક્ષોઽધિપતિઃ સાધ્યસ્ત્વં વાયુસ્ત્વં નિશાકરઃ ॥ ૧,૨૩૪.૨૯॥

આદિત્યા વસવો રુદ્રા અશ્વિનૌ ત્વં મરુદ્ગણાઃ ।
ત્વં દૈત્યા દાનવા નાગાસ્ત્વં યક્ષા રાક્ષસાઃ ખગાઃ ॥ ૧,૨૩૪.૩૦॥

ગન્ધર્વાપ્સરસઃ સિદ્ધાઃ પિતરસ્ત્વં મહામરાઃ ।
ભૂતાનિ વિષયસ્ત્વં હિ ત્વમવ્યક્તેન્દ્રિયાણિ ચ ॥ ૧,૨૩૪.૩૧॥

મનોબુદ્ધિરહઙ્કારઃ ક્ષેત્રજ્ઞસ્ત્વં હૃદીશ્વરઃ ।
ત્વં યજ્ઞસ્ત્વં વષટ્કારસ્ત્વમોઙ્કારઃ સમિત્કુશાઃ ॥ ૧,૨૩૪.૩૨॥

ત્વં વેદી ત્વં હરે દીક્ષા ત્વં યૂપસ્ત્વં હુતાશનઃ ।
ત્વં પત્ની ત્વં પુરોડાશસ્ત્વં શાલા સ્રુક્ચ ત્વં સ્રુવઃ ॥ ૧,૨૩૪.૩૩॥

ગ્રાવાણઃ સકલં ત્વં હિ સદસ્યાસ્ત્વં સદાક્ષિણઃ ।
ત્વં સૂર્પાદિસ્ત્વં ચ બ્રહ્મા મુસલોલૂખલે ધ્રુવમ્ ॥ ૧,૨૩૪.૩૪॥

ત્વં હોતા યજમાનસ્ત્વં ત્વં ધાન્યં પશુયાજકઃ ।
ત્વમધ્વર્યુસ્ત્વમુદ્ગાતા ત્વં યજ્ઞઃ પુરુષોત્તમઃ ॥ ૧,૨૩૪.૩૫॥

દિક્પાતાલમહિ વ્યોમ દ્યૌસ્ત્વં નક્ષત્રકારકઃ ।
દેવતિર્યઙ્મનુષ્યેષુ જગદેતચ્ચરાચરમ્ ॥ ૧,૨૩૪.૩૬॥

યત્કિઞ્ચિદ્દૃશ્યતે દેવ બ્રહ્માણ્ડમખિલં જગત્ ।
તવ રૂપમિદં સર્વં દૃષ્ટ્યર્થં સમ્પ્રકાશિતમ્ ॥ ૧,૨૩૪.૩૭॥

નાથયન્તે પરં બ્રહ્મ દૈવૈરપિ દુરાસદમ્ ।
કસ્તજ્જાનાતિ વિમલં યોગગમ્યમતીન્દ્રિયમ્ ॥ ૧,૨૩૪.૩૮॥

અક્ષયં પુરુષં નિત્યમવ્યક્તમજમવ્યયમ્ ।
પ્રલયોત્પત્તિરહિતં સર્વવ્યાપિનમીશ્વરમ્ ॥ ૧,૨૩૪.૩૯॥

સર્વજ્ઞં નિર્ગુણં શુદ્ધમાનન્દમજરં પરમ્ ।
બોધરૂપં ધ્રુવં શાન્તં પૂર્ણમદ્વૈતમક્ષયમ્ ॥ ૧,૨૩૪.૪૦॥

અવતારેષુ યા મૂર્તિર્વિદૂરે દેવ દૃશ્યતે ।
પરં ભાવમજાનન્તસ્ત્વાં ભજન્તિ દિવૌકસઃ ॥ ૧,૨૩૪.૪૧॥

કથં ત્વામીદૃશં સૂક્ષ્મં શક્નોમિ પુરુષોત્તમ ।
અરાધયિતુમીશાન મનોગમ્યમગોચરમ્ ॥ ૧,૨૩૪.૪૨॥

ઇહ યન્મણ્ડલે નાથ પૂજ્યતે વિધિવત્ક્રમૈઃ ।
પુષ્પધૂપાદિભિર્યત્ર તત્ર સર્વા વિભૂતયઃ ॥ ૧,૨૩૪.૪૩॥

સંકર્ષણાદિભેદેન તવ યત્પૂજિતા મયા ।
ક્ષન્તુમર્હસિ તત્સર્વં યત્કૃતં ન કૃતં મયા ॥ ૧,૨૩૪.૪૪॥

ન શક્નોમિ વિભો સમ્યક્કર્તું પૂજાં યથોદિતામ્ ।
યત્કૃતં જપહોમાદિ અસાધ્યં પુરુષોત્તમ ॥ ૧,૨૩૪.૪૫॥

વિનિષ્પાદયિતું ભક્ત્યા અત સ્ત્વાં ક્ષમયામ્યહમ્ ।
દિવા રાત્રૌ ચ સન્ધ્યાયાં સર્વાવસ્થાસુ ચેષ્ટતઃ ॥ ૧,૨૩૪.૪૬॥

અચલા તુ હરે ! ભક્તિસ્તવાઙ્ઘ્રિયુગલે મમ ।
શરીરેણ તથા પ્રીતિર્ન ચ ધર્માદિકેષુ ચ ॥ ૧,૨૩૪.૪૭॥

યથા ત્વયિ જગન્નાથ પ્રીતિરાત્યન્તિકી મમ ।
કિં તેન ન કૃતં કર્મ સ્વર્ગમોક્ષાદિસાધનમ્ ॥ ૧,૨૩૪.૪૮॥

યસ્ય વિષ્ણૌ દૃઢા ભક્તિઃ સર્વકામફલપ્રદે ।

પૂજાં કર્તું તથા સ્તોત્રં કઃ શક્નોતિ તવાચ્યુત ॥ ૧,૨૩૪.૪૯॥

સ્તુતં તુ પૂજિતં મેઽદ્ય તત્ક્ષમસ્વ નમોઽસ્તુ તે ।
ઇતિ ચક્રધરસ્તોત્રં મયા સમ્યગુદાહૃતમ્ ।
સ્તૌહિ વિષ્ણું મુને ભક્ત્યા યદીચ્છસિ પરં પદમ્ ॥ ૧,૨૩૪.૫૦॥

સ્તોત્રેણાનેન યઃ સ્તૌતિ પૂજાકાલે જગદ્ગુરુમ્ ॥ ૧,૨૩૪.૫૧॥

અચિરાલ્લભતે મોક્ષં છિત્વા સંસારબન્ધનમ્ ।
અન્યોઽપિ યો જપેદ્ભક્ત્યા ત્રિસન્ધ્યં નિયતઃ શુચિઃ ॥ ૧,૨૩૪.૫૨॥

ઇદં સ્તોત્રં મુને સોઽપિ સર્વકામમવાપ્નુયાત્ ।
પુત્રાર્થી લભતે પુત્રાન્બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧,૨૩૪.૫૩॥

રોગાદ્વિમુચ્યતે રાગી લભતે નિર્ધનો ધનમ્ ।
વિદ્યાર્થો લભતે વિદ્યાં ભાગ્યં કીર્તિં ચ વિન્દતિ ॥ ૧,૨૩૪.૫૪ ॥ યશઃ
જાતિ સ્મરત્વં મેધાવી યદ્યદિચ્છતિ ચેતસા ।
સ ધન્યઃ સર્વવિત્પ્રાજ્ઞઃ સ સાધુઃ સર્વકર્મકૃત્ ॥ ૧,૨૩૪.૫૫॥

સત્યવાક્યશ્છુચિર્દાતા યઃ સ્તૌતિ પુરુષોત્તમમ્ ।
અસંભાષ્યા હિ તે સર્વે સર્વધર્મબહિષ્કૃતાઃ ॥ ૧,૨૩૪.૫૬॥

યેષાં પ્રવર્તને નાસ્તિ હરિમુદ્દિશ્ય સત્ક્રિયા ।
ન શુદ્ધં વિદ્યતે તસ્ય મનો વાક્ય દુરાત્મનઃ ॥ ૧,૨૩૪.૫૭॥

યસ્ય સર્વાર્થદે વિષ્ણૌ ભક્તિર્નાવ્યભિચારિણી ।
આરાધ્ય વિધિવદ્દેવં હરિં સર્વસુખપ્રદમ્ ॥ ૧,૨૩૪.૫૮॥

પ્રાપ્નોતિ પુરુષઃ સમ્યગ્યદ્યત્પ્રાર્થયતે ફલમ્ ।
કર્મ કામાદિકં સર્વં શ્રદ્દધાનઃ સુરોત્તમઃ ।
અસુરાદિવપુઃ સિદ્ધૈર્દૃયતે યસ્ય નાન્તરમ્ ॥ ૧,૨૩૪.૫૯॥

સકલમુનિભિરાદ્યશ્ચિન્ત્યતે યો હિ શુદ્ધો
 નિખિલહૃદિ નિવિષ્ટો વેત્તિ યઃ સર્વસાક્ષી ।
તમજમમૃતમીશં વાસુદેવં નતોઽસ્મિ
 ભયમરણવિહીનં નિત્યમાનન્દરૂપમ્ ॥ ૧,૨૩૪.૬૦॥

નિખિલભુવનનાથં શાશ્વતં સુપ્રસન્નં
 ત્વતિવિમલવિશુદ્ધં નિર્ગુણં ભાવપુષ્પૈઃ ।

સુખમુદિતસમસ્તં પૂજયામ્યાત્મભાવં
    વિશતુ હૃદયપદ્મે સર્વસાક્ષી ચિદાત્મા ॥ ૧,૨૩૪.૬૧॥

એવં મયોક્તં પરમપ્રભાવમાદ્યન્તહીનસ્ય પરસ્ય વિષ્ણોઃ ।
તસ્માદ્વિચિન્ત્યઃ પરમેશ્વરોઽસૌ વિમુક્તિકામેન નરેણ સમ્યક્ ॥ ૧,૨૩૪.૬૨॥

બોધસ્વરૂપં પુરુષં પુરાણમાદિત્યવર્ણં વિમલં વિશુદ્ધમ્ ।
સઞ્ચિન્ત્ય વિષ્ણું પરમદ્વિતીયં કસ્તત્ર યોગી ન લંય પ્રયાતિ ॥ ૧,૨૩૪.૬૩॥

ઇમં સ્તવં યઃ સતતં મનુષ્યઃ પઠેચ્ચ તદ્વત્પ્રયતઃ પ્રશાન્તઃ ।
સ ધૂતપાપ્મા વિતતપ્રભાવઃ પ્રયાતિ લોકં વિતતં મુરારેઃ ॥ ૧,૨૩૪.૬૪॥

યઃ પ્રાર્થયત્યર્થમશેષસૌખ્યં ધર્મં ચ કામં ચ તથૈવ મોક્ષમ્ ।
સ સર્વમુત્સૃજ્ય પરં પુરાણં પ્રયાતિ વિષ્ણું શરણં વરેણ્યમ્ ॥ ૧,૨૩૪.૬૫॥

વિભું પ્રભું વિશ્વધરં વિશુદ્ધમશેષસંસારવિનાશહેતુમ્ ।
યો વાસુદેવં વિમલં પ્રપન્નઃ સ મોક્ષમાપ્નોતિ વિમુક્તસઙ્ગઃ ॥ ૧,૨૩૪.૬૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
ઽચ્યુતસ્તોત્રં નામ ચતુસ્ત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૩૫

સૂત ઉવાચ વેદાન્તસાઙ્ખ્યસિદ્ધાન્તબ્રહ્મજ્ઞાનં વદામ્યહમ્ ।
અહં બ્રહ્મ પરં જ્યોતિર્વિષ્ણુરિત્યેવ ચિન્તયન્ ॥ ૧,૨૩૫.૧॥

સૂર્યે હૃદ્વ્યોમ્નિ વહ્નૌ ચ જ્યોતિરેકં ત્રિધા સ્થિતમ્ ।
યથા સર્પિઃ શીરસ્થં ગવાં ન કુરુતે બલમ્ ॥ ૧,૨૩૫.૨॥

નિર્ગતં કર્મસંયુક્તં દત્તં તાસાં મહા બલમ્ ।
તથા વિષ્ણુઃ શરીરસ્થો ન કરોતિ હિતં નણામ્ ॥ ૧,૨૩૫.૩॥

વિનારાધનયા દેવઃ સર્વગઃ પરમેશ્વરઃ ।
આરુરુક્ષુમતીનાં તુ કર્મજ્ઞાનમુદાહૃતમ્ ॥ ૧,૨૩૫.૪॥

આરૂઢયોગવૃક્ષાણાં જ્ઞાનં ત્યાગં પરં મતમ્ ।
જ્ઞાતુમિચ્છતિ શબ્દાદીન્રાગો દ્વેષોઽથ જાયતે ॥ ૧,૨૩૫.૫॥

લોભો મોહઃ ક્રોધ એતૈર્યુક્તઃ પાપં નરશ્ચરેત્ ।
હસ્તાવુપસ્થમુદરં વાક્ચતુર્થો ચતુષ્ટયમ્ ॥ ૧,૨૩૫.૬॥

એતત્સુસંયતં યસ્ય સ વિપ્રઃ કથ્યતે બુધૈઃ (ધઃ) ।
પરવિત્તં ન ગૃહ્ણાતિ ન હિંસાં કુરુતે તથા ॥ ૧,૨૩૫.૭॥

નાક્ષક્રીડારતો યસ્તુ હસ્તૌ તસ્ય સુસંયતૌ ।
પરસ્ત્રીવર્જનરતસ્તસ્યોપસ્થં સુસંયતમ્ ॥ ૧,૨૩૫.૮॥

અલોલુપમિદં ભુઙ્ક્તે જઠરં તસ્ય સંયતમ્ ।
સત્યં હિતં મિતં બ્રૂતે યસ્માદ્વાક્તસ્ય સંયતા ॥ ૧,૨૩૫.૯॥

યસ્ય સંયતાન્યેતાનિ તસ્ય કિં તપસાધ્વરૈઃ ।
ઐક્યં યદ્બુદ્ધિમનસોરિન્દ્રિયાણાં ચ સર્વદા ॥ ૧,૨૩૫.૧૦॥

સબીજં વાપિ નિર્બીજં ધ્યાનમેતત્પ્રકીર્તિતમ્ ।
ભ્રુવોર્મધ્યે સ્થિતાં બુદ્ધિં વિષયેષુ યુનક્તિ યઃ ॥ ૧,૨૩૫.૧૧॥

ઇન્દ્રિયાણામુપરમે મનસિ હ્યવ્યવસ્થિતે ॥ ૧,૨૩૫.૧૨॥

સ્વપ્નાન્પશ્યત્યસૌ જીવો બાહ્યાનાભ્યન્તરાનથ ।
જીવો જાગ્રદવસ્થાયામેવમાહુર્વિપાશ્રિતઃ ॥ ૧,૨૩૫.૧૩॥

હૃદિ સ્થિતઃ સ તમસા મોહિતો ન સ્મરત્યપિ ।
યદા તસ્ય કુતો વેતિ સુષુપ્તિરિતિ કથ્યતે ॥ ૧,૨૩૫.૧૪॥

જાગ્રતો યસ્ય નો તન્દ્રા ન મોહો ન ભ્રમસ્તથા ।
ઉત્પદ્યતે ન જાનાતિ શબ્દાર્થવિષયાન્વશી ॥ ૧,૨૩૫.૧૫॥

ઇન્દ્રિયાણિ સમાહૃત્ય વિષયેભ્યો મનસ્તથા ।
બુદ્ધ્યાહઙ્કારમપિ ચ પ્રકૃત્યા બુદ્ધિમેવ ચ ॥ ૧,૨૩૫.૧૬॥

સંયમ્ય પ્રકૃતિં ચાપિ ચિચ્છક્ત્યા કેવલે સ્થિતઃ ।
પશ્યત્યાત્માનિ ચાત્માનમાત્મનાત્મપ્રકાશકમ્ ॥ ૧,૨૩૫.૧૭॥

ચિદ્રૂપમમૃતં શુદ્ધં નિષ્ક્રિયં વ્યાપકં શિવમ્ ।
તુરીયાયામવસ્થાયામાસ્થિતોઽસૌ ન સંશયઃ ॥ ૧,૨૩૫.૧૮॥

શબ્દાદયો ગુણાઃ પઞ્ચ સત્ત્વાદ્યાશ્ચ ગુણાસ્ત્રયઃ ।
પુર્યષ્ટકસ્ય પદ્મસ્ય પત્રાણ્યષ્ટૌ ચ તાનિ હિ ॥ ૧,૨૩૫.૧૯॥

સામ્યાવસ્થા ગુણકૃતા પ્રકૃતિસ્તત્ર કર્ણિકા ।
કર્ણિકાયાં સ્થિતો દેવો દેહી ચિદ્રૂપ એવ હિ ॥ ૧,૨૩૫.૨૦॥

પુર્યષ્ટકં પરિત્યજ્ય પ્રકૃતિઞ્ચ ગુણાત્મિકામ્ ।
યદા યાતિ તદા જીવો યાતિ મુક્તિં ન સંશયઃ ॥ ૧,૨૩૫.૨૧॥

પ્રાણાયામો જપશ્ચૈવ પ્રત્યાહારોઽથ ધારણા ।
ધ્યાનં સમાધિરિત્યેતે ષડ્યોગસ્ય પ્રસાધકાઃ ॥ ૧,૨૩૫.૨૨॥

પાપક્ષયે દેવતાનાં પ્રીતિરિન્દ્રિયસંયમઃ ।
જપધ્યાનયુતો ગર્ભો વિપરીતસ્ત્વગર્ભકઃ ॥ ૧,૨૩૫.૨૩॥

ષટ્ત્રિંશન્માત્રકઃ શ્રેષ્ઠશ્ચતુર્વિંશતિમાત્રકઃ ।
મધ્યો દ્વાદશમાત્રસ્તુ ઓઙ્કારં સતતં જપેત્ ॥ ૧,૨૩૫.૨૪॥

વાચકે પ્રણવે જ્ઞાતે વાચ્યં બ્રહ્મ પ્રસીદતિ ।
(ઓંનમો વિષ્ણવે)।ષષ્ઠાક્ષરશ્ચ જપ્યો ગાયત્રી દ્વાદશાક્ષરી ॥ ૧,૨૩૫.૨૫॥

સર્વેષામિન્દ્રિયાણાં તુ પ્રવૃતિર્વિષયેષુ ચ ।
નિવૃત્તિર્મનસસ્તસ્યાઃ પ્રત્યાહારઃ પ્રકીર્તિતઃ ॥ ૧,૨૩૫.૨૬॥

ઇન્દ્રિયાણીન્દ્રિયાર્થેભ્યઃ સમાહૃત્ય હિતો હિ સઃ ।
સહસા સહ બુદ્ધ્યા ચ પ્રત્યાહારેષુ સંસ્થિતઃ ॥ ૧,૨૩૫.૨૭॥

પ્રાણાયામૈર્દ્વાદશભિર્યાવત્કાલઃકૃતો ભવેત્ ।
યસ્તાવત્કાલપર્યન્તં મનો બ્રહ્મણિ ધારયેત્ ॥ ૧,૨૩૫.૨૮॥

તસ્યૈવ બ્રહ્મણા પ્રોક્તં ધ્યાનં દ્વાદશ ધારણાઃ ।
તુષ્યેત નિયતો યુક્તઃ સમાધિઃ સોઽભીધીયતે ॥ ૧,૨૩૫.૨૮*૧॥

ધ્યાયન્ન ચલતે યસ્ય મનોભિધ્યાયતો ભૃશમ્ ॥ ૧,૨૩૫.૨૯॥

પ્રાપ્યાવધિકૃતં કાલં યાવત્સા ધારણા સ્મૃતા ।
ધ્યેયે સક્તં મનો યસ્ય ધ્યેયમેવાનુપશ્યતિ ॥ ૧,૨૩૫.૩૦॥

નાન્યં પદાર્થં જાનાતિ ધ્યાનમેતત્પ્રકીર્તિતમ્ ।
ધ્યેયે મનો નિશ્ચલતાં યાતિ ધ્યેયં વિચિન્તયન્ ॥ ૧,૨૩૫.૩૧॥

યત્તદ્ધ્યાનં પરં પ્રોક્તં મુનિભિર્ધ્યાનચિન્તકૈઃ ।
ધ્યેયમેવ હિ સર્વત્ર ધ્યાતા તન્મયતાં ગતઃ ॥ ૧,૨૩૫.૩૨॥

પશ્યતિ દ્વૈતરહિતં સમાધિઃ સોઽભિધીયતે ।
મનઃ સઙ્કલ્પરહિતમિન્દ્રિયાર્થાન્ન ચિન્તયેત્ ॥ ૧,૨૩૫.૩૩॥

યસ્ય બ્રહ્મણિ સંલીનં સમાધિસ્થં તદોચ્યતે ।
ધ્યાયતઃ પરમાત્માનમાત્મસ્થં યસ્ય યોગિનઃ ॥ ૧,૨૩૫.૩૪ ॥

મનસ્તન્મયતાં યાતિ સમાધિસ્થઃ સ કીર્તિતઃ ।
ચિત્તસ્ય સ્થિરતા ભ્રાન્તિર્દૌર્મનસ્યં પ્રમાદતા ॥ ૧,૨૩૫.૩૫ ॥

યોગિનાં કથિતા દોષા યોગવિઘ્નપ્રવર્તકાઃ ।
સ્થિત્યર્થં મનસઃ સર્વં સ્થૂલરૂપં વિચિન્તયેત્ ॥ ૧,૨૩૫.૩૬ ॥

તદ્વ્રતં નિશ્ચલીભૂતં સૂચ્યસ્થં સ્થિરતાં વ્રજેત્ ।
ન વિના પરમાત્માનં કિઞ્ચિજ્જગતિ વિદ્યતે ॥ ૧,૨૩૫.૩૭ ॥

વિશ્વરૂપં તમેવૈકમિતિ જ્ઞાત્વા વિમુચ્યતિ ।
ઓઙ્કારં પરમં બ્રહ્મ ધ્યાયેદબ્જસ્થિતં વિભુમ્ ॥ ૧,૨૩૫.૩૮ ॥

ક્ષેત્રક્ષેત્રજ્ઞરહિતં જપેન્માત્રાત્રયાન્વિતમ્ ।
હૃદિ સઞ્ચિન્તયેત્પૂર્વં પ્રધાનં તસ્ય ચોપરિ ॥ ૧,૨૩૫.૩૯ ॥

તમો રજસ્તથા સત્ત્વં મણ્ડલત્રિતયં ક્રમાત્ ।
કૃષ્ણરક્તસિતં તસ્મિન્પુરુષં જીવસંજ્ઞિતમ્ ॥ ૧,૨૩૫.૪૦ ॥

તસ્યોપરિ ગુણૈશ્વર્યમષ્ટપત્રં સરોરુહમ્ ।
જ્ઞાનં તુ કર્ણિકા તત્ર વિજ્ઞાનં કેસરાઃ સ્મૃતાઃ ॥ ૧,૨૩૫.૪૧ ॥

વૈરાગ્યનાલં તત્કન્દો વૈષ્ણવો ધર્મ ઉત્તમઃ ।
કર્ણિકાયાં સ્થિતં તત્ર જીવવન્નિશ્ચલં વિભુ ॥ ૧,૨૩૫.૪૨ ॥

ધ્યાયેદુરસિ સંયુક્તમોઙ્કારં મુક્તિસાધકમ્ ।
ધ્યાયન્યદિ ત્યજેત્પ્રાણાન્યાતિ બ્રહ્મ સ્વસન્નિધિમ્ ॥ ૧,૨૩૫.૪૩ ॥

હરિં સંસ્થાપ્ય દેહાબ્જે ધ્યાયન્યો ગી ચ ભક્તિભાક્ ।
આત્માનમાત્મના કેચિત્પશ્યન્તિ ધ્યાનચક્ષુષઃ ॥ ૧,૨૩૫.૪૪ ॥

સાંખ્યબુદ્ધ્યા તથૈવાન્યે યોગેનાન્યે તુ યોગિનઃ ।
બ્રહ્મપ્રકાશકં જ્ઞાનં ભવબન્ધવિભેદનમ્ ॥ ૧,૨૩૫.૪૫ ॥

તત્રૈકચિત્તતાયોગો મુક્તિદો નાત્ર સંશયઃ ।
જિતેન્દ્રિયાત્મકરણો જ્ઞાનદૃપ્તો હિ યો ભવેત્ ॥ ૧,૨૩૫.૪૬ ॥

સ મુક્તઃ કથ્યતે યોગી પરમાત્મન્યવસ્થિતઃ ।
આસનસ્થાનવિધયો ન યોગસ્ય પ્રસાધકાઃ ॥ ૧,૨૩૫.૪૭ ॥

વિલમ્બજનકાઃ સર્વે વિસ્તરાઃ પરિકીર્તિતાઃ ।
શિશુપાલઃ સિદ્ધિમાપ સ્મરણાભ્યાસગૌરવાત્ ॥ ૧,૨૩૫.૪૮॥

યોગાભ્યાસં પ્રકુર્વન્તઃ પશ્યન્ત્યાત્માનમાત્મના ।
સર્વભૂતેષુ કારુણ્યં વિદ્વેષં વિષયેષુ ચ ॥ ૧,૨૩૫.૪૯॥

ગુપ્તશિશ્નોદરાદિશ્ચ કુર્વન્યોગી વિમુચ્યતે ।
ઇન્દ્રિયૈરિન્દ્રિયાર્થાંસ્તુ ન જાનાતિ નરો યદા ॥ ૧,૨૩૫.૫૦॥

કાષ્ઠવદ્બ્રહ્મસંલીનો યોગી મુક્તસ્તદા ભવેત્ ।
સર્વવર્ણાઃ શ્રિયઃ સર્વાઃ કૃત્વા પાપાનિ ભસ્મસાત્ ॥ ૧,૨૩૫.૫૧॥

ધ્યાનાગ્નિના ચ મેધાવી લભતે પરમાં ગતિમ્ ।
મન્થનાદ્દૃશ્યતે હ્યગ્નિસ્તદ્વદ્ધ્યાનેન વૈ હરિઃ ॥ ૧,૨૩૫.૫૨॥

બ્રહ્માત્મનોર્યદૈકત્વં સ યોગશ્ચોત્તમોત્તમઃ ।
બાહ્યરૂપૈર્ન મુક્તિસ્તુ ચાન્તસ્થૈઃ સ્યાદ્યમાદિભિઃ ॥ ૧,૨૩૫.૫૩॥

સાઙ્ખ્યજ્ઞાનેન યોગેન વેદાન્તશ્રવણેન ચ ।
પ્રત્યક્ષતાત્મનો યા હિ સા મુક્તિરભિધીયતે ।
અનાત્મન્યાત્મરૂપત્વમસતઃ સત્સ્વરૂપતા ॥ ૧,૨૩૫.૫૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બ્રહ્મવિજ્ઞાનસ્વરૂપણં નામ પઞ્ચત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૬
શ્રીભગવાનુવાચ ।
આત્મજ્ઞાનં પ્રવક્ષ્યામિ શ્ૃણુ નારદ તત્ત્વતઃ ।
અદ્વૈતં સાઙ્ખ્યમિત્યાહુર્યોગસ્તત્રૈકચિત્તતા ॥ ૧,૨૩૬.૧॥

અદ્વૈતયોગસમ્પન્નાસ્તે મુચ્યન્તેઽતિબન્ધનાત્ ।
અતીતારબ્ધમાગામિ કર્મ નશ્યતિ બોધતઃ ॥ ૧,૨૩૬.૨॥

સદ્વિચારકુઠારેણ ચ્છિન્નસંસારપાદપઃ ।
જ્ઞાનવૈરાગ્યતીર્થેન લભતે વૈષ્ણવં પદમ્ ॥ ૧,૨૩૬.૩॥

જાગ્રત્સ્વપ્નસુષુપ્તં ચ માયા ત્રિપુરમુચ્યતે ।

અત્રૈવાન્તર્ગતં સર્વં શાશ્વતે નાદ્વયે પદે ॥ ૧,૨૩૬.૪॥

નામરૂપક્રિયાહીનં સર્વં તત્પરમં પદમ્ ।
જગત્કૃત્વેશ્વરોઽનન્તં સ્વયમત્ર પ્રવિષ્ટવાન્ ॥ ૧,૨૩૬.૫॥

વેદાહમેતં પુરુષં ચિદ્રૂપં તમસઃ પરમ્ ।
સોઽહમસ્મીતિ મોક્ષાય નાન્યઃ પન્થા વિમુક્તયે ॥ ૧,૨૩૬.૬॥

શ્રવણં મનનં ધ્યાનં જ્ઞાનાનાં ચૈવ સાધનમ્ ।
યજ્ઞદાનતપસ્તીર્થવેદૈર્મુક્તિર્ન લભ્યતે ॥ ૧,૨૩૬.૭॥

ત્યાગેન કેનચિદ્ધ્યાનપૂજાકર્માદિભિર્યથા ।
દ્વિવિધં વેદવચનં કુરુ કર્મ ત્યજેતિ ચ ॥ ૧,૨૩૬.૮॥

યજ્ઞાદયો વિમુક્તાનાં નિષ્કામાનાં વિમુક્તયે ।
અન્તઃ કરણશુદ્ધ્યર્થમૂચુરેવાત્ર કેચન ॥ ૧,૨૩૬.૯॥

એકેન જન્મના જ્ઞાનન્મુક્તિર્ન દ્વૈતભાવિનામ્ ।
યોગભ્રષ્ટાઃ કુયોગાશ્ચ વિપ્રા યોગિકુલોદ્ભવાઃ ॥ ૧,૨૩૬.૧૦॥

કર્મણા બધ્યતે જન્તુર્જ્ઞાનાન્મુક્તો ભવાદ્ભવેત્ ।
આત્મજ્ઞાનન્ત્વાશ્રયેદ્વૈ અજ્ઞાનં યદતોઽન્યથા ॥ ૧,૨૩૬.૧૧॥

યદા સર્વે વિમુચ્યન્તે કામા યેસ્યહૃદિ સ્થિતાઃ ।
તદામૃતત્વમાપ્નોતિ જીવન્નેવ ન સંશયઃ ॥ ૧,૨૩૬.૧૨॥

વ્યાપકત્વાત્કથં યાતિ કો યાતિ ક્વ સ યાતિ ચ ।
અનન્તત્વાન્નદેશોઽસ્તિ અમૂર્તિત્વાદ્ગતિઃ કુતઃ ॥ ૧,૨૩૬.૧૩॥

અદ્વયત્વાન્ન કોઽપ્યસ્તિ બોધત્વાજ્જડતા કુતઃ ।
એકોદિષ્ટં યદન્યસ્ય મતિવાગ્ગતિસંસ્થિતિ (મ્) ॥ ૧,૨૩૬.૧૪॥

કથમાકાશકલ્પસ્ય ગતિરાગતિસંસ્થિતિ ।
જાગ્રત્સ્વપ્નસુષુમં ચ માયયા પરિકલ્પિતમ્ ॥ ૧,૨૩૬.૧૫॥

વસ્તુ તૈજસકં પ્રાજ્ઞે યત્તુ પુણ્યમખણ્ડકમ્ ।
યથા તે પ્રિયાત્મા નઃ સર્વેષાં ચ તથા પ્રિયઃ ॥ ૧,૨૩૬.૧૬॥

બોધમાર્ગે યથા ચિત્તં સર્વેષાં ચ તથા મતે ।
સર્વદા સર્વભૂતાનાં સર્વસ્ય ચ મહામુને ॥ ૧,૨૩૬.૧૭॥

નાહમત્રાત્મવિજ્ઞાનં તસ્માત્પૂર્ણં નિરન્તરમ્ ।
જાગ્રત્સ્વપ્નં તથા વૃત્તં સૌષુપ્તસુખમેવ ચ ॥ ૧,૨૩૬.૧૮॥

સ્મરણં વિસ્મૃતાર્થસ્ય નાસ્તિ ચેત્કસ્ય જાયતે ।
સત્યમસ્તુ તથા વાણુ અશરીરં પરં તથા ॥ ૧,૨૩૬.૧૯॥

નાસ્તિ ચેત્સુખદુઃખાનાં સર્વેષાં વેદનં કથમ્ ।
સદા સર્વત્ર સર્વજ્ઞઃ સર્વસ્ય હૃદયે ન ચેત્ ॥ ૧,૨૩૬.૨૦॥

સાક્ષિભૂતઃ સમાશ્રિત્ય કો જાનાતિ વિચેષ્ટિતમ્ ।
સત્ય જ્ઞાનાનન્ત ભિન્નં સ્યાન્નસત્યં જ્ઞાનતઃ પૃથક્ ॥ ૧,૨૩૬.૨૧॥

નાનન્ત્યાત્પૃથગાનન્દં નાપ્યમાનન્દતઃ પૃથક્ ।
ત્વમેવ પરમં બ્રહ્મ સત્યજ્ઞાનાદિલક્ષણમ્ ॥ ૧,૨૩૬.૨૨॥

અહં બ્રહ્મ પરં તત્ત્વં જ્ઞાત્વા ત્વખિલવિદ્ભવેત્ ।
યથૈકમૃન્મયે જ્ઞાતે સર્વમેતચ્ચરાચરમ્ ॥ ૧,૨૩૬.૨૩॥

યથૈકહેમમણિના સર્વં હેમમયં ભવેત્ ।
જ્ઞાનં તથૈવમીશેન જ્ઞાનિનાપ્યખિલં જગત્ ॥ ૧,૨૩૬.૨૪॥

યથાન્ધકારદોષેણ રજ્જુઃ સમ્યઙ્નદૃશ્યતે ।
યથા સમોહદોષેણ ચાત્મા સમ્યઙ્નદૃશ્યતે ॥ ૧,૨૩૬.૨૫॥

સર્પધારાદિભિર્ભેદૈરન્યથા વસ્તુકલ્પનમ્ ।
વ્યોમાદિના સરૂપાદ્યૈરન્યથાત્મા પ્રકલ્પ્યતે ॥ ૧,૨૩૬.૨૬॥

પ્રત્યક્ષમપિ યદ્દ્રવ્યન્દુર્દર્શમિતિ ભાષતે ।
વ્યોમાદિના સરૂપાદ્યૈરન્યથા કલ્પિતૈસ્તથા ॥ ૧,૨૩૬.૨૭॥

તથા હિ રજ્જુરુરગઃ શુક્તિઃ કારજતં યથા ।
મૃગતૃષ્ણાપથાયામ્ભસ્તૃપ્તિં વિષ્ણો તથા જગત્ ॥ ૧,૨૩૬.૨૮॥

હાહિષ્ણોદ્વિજા કથિ દ્ભોહમિતિદૃ ।
ગ્રહનાશાત્પુનર્ધ્યાયન્બ્રાહ્મણ્યં મન્યતે યથા ॥ ૧,૨૩૬.૨૯॥

માયાવિષ્ટસ્તથા જીવો દેહોહમિતિ મન્યતે ।
માયાનાશાત્પુનઃ સ્વીયરૂપં બ્રહ્માસ્મિ મન્યતે ॥ ૧,૨૩૬.૩૦॥

ગ્રહનાશાદ્યથા માન્યજનોક્રૂરમવેક્ષતે ।
સ્વરૂપદર્શનાચ્ચાયં માયા નાશન્તયા વિના ॥ ૧,૨૩૬.૩૧॥

અનાદિત્વં સમં દ્વાભ્યાં સ્વરૂપં તદ્વિલક્ષણમ્ ।
એકઃ સત્યં તથા ભાગી વિચારેણ પરં મૃષા ॥ ૧,૨૩૬.૩૨॥

અજોઽપિ હિ સકૃત્પ્રેત્ય સંભવામ્યાત્મમાયયા ।
માયેચ્છયા દ્વિધા સ સ્યાત્પતિઃ પત્ની સુખં જગત્ ॥ ૧,૨૩૬.૩૩॥

અષ્ટાવિંશતિભેદૈસ્તુ ત્રૈગુણ્યં વિદ્યતે પૃથક્ ।
ચતુરશીતિર્લક્ષ્યન્તે નરનાર્યાકૃતીનિ ચ ॥ ૧,૨૩૬.૩૪॥

એષુવિશ્વં પ્રભવતિ ખણ્ડજં માયયા યથા ।
આદાવન્તે ચ સન્ત્યેતે નામરૂપક્રિયાદયઃ ॥ ૧,૨૩૬.૩૫॥

સત્તાવકલ્પનં કાલે ન સન્તિ પરમાર્થતઃ ।
યથા રથાદયઃ સ્વપ્ને સન્તો નૈવ ચ સત્યતઃ ॥ ૧,૨૩૬.૩૬॥

તથા જાગ્રદવસ્થાયાં ભૂતાનિ ન તુ સન્નિધૌ ।
દ્વૈરૂપ્યં માયયા યાતિ જાગ્રત્સ્વપ્નપદજ્ઞ (ક્ષ) યોઃ ॥ ૧,૨૩૬.૩૭॥

એવમેતત્પરં બ્રહ્મ સ્વપ્નજાગ્રત્પદદ્વયે ।
સુષુપ્તમચલં રૂપમદ્વયં પદમુચ્યતે ॥ ૧,૨૩૬.૩૮॥

માયાવિચારસિદ્ધૈવ વિચારેણ વિલીયતે ।
આપાતરહિતા સાપિ કલ્પના કાલવર્તિની ॥ ૧,૨૩૬.૩૯॥

એવં તસ્યા (દાત્યા) ત્મનાદિત્યં સિદ્ધમેકસ્ય સત્યજા ।
સતોસ્તિત્વં વસાતિત્વાદસ્તિત્વાસત્યતાં તતઃ ॥ ૧,૨૩૬.૪૦॥

જ્ઞાનં તતોપ્યનન્તો નઃ પૂર્ણોન્તઃ શુકમાત્મના ।
ન નિત્યભાવાજ્જાતોહમકૃત્વાદમૃતોસ્મ્યહમ્ ।
દીપવદ્ધૃદયે જ્યોતિરહં બ્રહ્માસ્મિ મુક્તયે ॥ ૧,૨૩૬.૪૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
આત્મજ્ઞાનસ્વરૂપવર્ણનં નામ ષટ્ત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૭
શ્રીબગવાનુવાચ ।
ગીતાસારં પ્રવક્ષ્યામિ અર્જુનાયોદિતં પુરા ।

અષ્ટાઙ્ગયોગયુક્તાત્મા સર્વવેદાન્તપારગઃ ॥ ૧,૨૩૭.૧॥

આત્મલાભઃ પરો નાન્ય અત્મદેહાદિવર્જિતઃ ।
હીનરૂપાદિદેહાન્તઃ કરણત્વાદિલોચનઃ ॥ ૧,૨૩૭.૨॥

બિજ્ઞાનરહિતઃ પ્રાણઃ સુષુપ્તૌ હિ પ્રતીયતે ।
નાહમાત્મા ચ દુઃખાદિસંસારાદિસમન્વયાત્ ॥ ૧,૨૩૭.૩॥

વિધૂમ ઇવ દીપ્તાર્ચિરાદીપ્ત (દિત્ય) ઇવ દીપ્તિમાન્ ।
વૈદ્યુતોઽગ્નિરિવાકાશે હૃત્સઙ્ગે આત્મનાત્મનિ ॥ ૧,૨૩૭.૪॥

શ્રોત્રાદીનિ ન પશ્યન્તિ સ્વંસ્વમાત્માનમાત્મના ।
સર્વજ્ઞઃ સર્વદર્શો ચ ક્ષેત્રજ્ઞસ્તાનિ પશ્યન્તિ ॥ ૧,૨૩૭.૫॥

યદા પ્રકાશતે હ્યાત્મા પટે દીપો જ્વલન્નિવ ।
જ્ઞાનમુત્પદ્યતે પુંસાં ક્ષયાત્પાપસ્ય કર્મણઃ ॥ ૧,૨૩૭.૬॥

યથાદર્શતલપ્રખ્યે પશ્યત્યાત્માનમાત્મનિ ।
ઇન્દ્રિયાણીન્દ્રિયાર્થાંશ્ચ મહાભૂતાનિ પઞ્ચકમ્ ॥ ૧,૨૩૭.૭॥

મનોબુદ્ધિરહઙ્કારમવ્યક્તં પુરુષં તથા ।
પ્રસંખ્યાય પરંવ્યાપ્તો વિમુક્તો બન્ધવૈર્ભવેત્ ॥ ૧,૨૩૭.૮॥

ઇન્દ્રિયગ્રામમખિલં મનસાભિનિવેશ્ય ચ ।
મનશ્ચૈવાપ્યહઙ્કારે પ્રતિષ્ઠાપ્ય ચ પાણ્ડવ ॥ ૧,૨૩૭.૯॥

અહં કારં તથા બુદ્ધૌ બુદ્ધિં ચ પ્રકૃતાવપિ ।
પ્રકૃતિં પુરુષે સ્થાપ્ય પુરુષં બ્રહ્મણિ ન્યસેત્ ॥ ૧,૨૩૭.૧૦॥

અહં બહ્મ પરં જ્યોતિઃ પ્રસંખ્યાય વિમુચ્યતે ।
નવદ્વારમિદં ગેહં તિસૃણાં?પઞ્ચસાક્ષિકમ્ ॥ ૧,૨૩૭.૧૧॥

ક્ષેત્રજ્ઞાધિષ્ઠિતં વિદ્વાન્યો વેદ સ વરઃ કવિઃ ।
અશ્વમેધસહસ્રાણિ વાજપેયશતાનિ ચ ।
જ્ઞાનયજ્ઞસ્ય સર્વાણિ કલાં નાર્હન્તિ ષોચ્શીમ્ ॥ ૧,૨૩૭.૧૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
શ્રીમદ્ભગવદ્ગીતાસારનિરૂપણં નામ સપ્તત્રિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૩૮

શ્રીભગવાનુવાચ ।
યમશ્ચ નિયમ।પાર્થ આસનં પ્રાણસંયમઃ ।
પ્રત્યાહારસ્તથા ધ્યાનં ધારણાર્જુન સપ્તમી ॥ ૧,૨૩૮.૧॥

સમાધિરિતિ ચાષ્ટાઙ્ગો યોગ ઉક્તો વિમુક્તયે ।
કર્મણા મનસા વાચા સર્વભૂતેષુ સર્વદા ॥ ૧,૨૩૮.૨॥

હિંસાવિરામકો ધર્મો હ્યાહિંસા પરમં સુખમ્ ।
વિધિના યા ભવેદ્ધિંસા સા ત્વહિંસા પ્રકીર્તિતા ॥ ૧,૨૩૮.૩॥

સત્યં બ્રૂયાત્પ્રિયં બ્રૂયાન્ન બ્રૂયાત્સત્યમપ્રિયમ્ ।
પ્રિયં ચ નાનૃતં બ્રૂયાદેષ ધર્મઃ સનાતનઃ ॥ ૧,૨૩૮.૪॥

યચ્ચદ્રવ્યાપહરણં ચૌર્યાદ્વાથ બલેન વા ।
સ્તેયં તસ્યાનાચરણમસ્તેયં ધર્મસાધનમ્ ॥ ૧,૨૩૮.૫॥

કર્મણા મનસા વાચા સર્વાવસ્થાસુ સર્વદા ।
સર્વત્ર મૈથુનત્યાગં બ્રહ્મચર્યં પ્રચક્ષતે ॥ ૧,૨૩૮.૬॥

દ્રવ્યાણામપ્યનાદાનમાપત્સ્વપિ તથેચ્છયા ।
અપરિગ્રહમિત્યાહુસ્તં પ્રયત્નેન વર્જયેત્ ॥ ૧,૨૩૮.૭॥

દ્વિધા શૌચં મૃજ્જલાભ્યાં બાહ્ય ભાવાદથાન્તરાત્ ।
યદૃચ્છાલાભતસ્તુષ્ટિઃ સન્તોષઃ સુખલક્ષણમ્ ॥ ૧,૨૩૮.૮॥

મનસશ્ચેન્દ્રિયાણાં ચ ઐકાગ્ર્યં પરમં તપઃ ।
શરીરશોષણં વાપિ કૃચ્છ્રચાન્દ્રાયણાદિભિઃ ॥ ૧,૨૩૮.૯॥

વેદાન્તશતરુદ્રીયપ્રણવાદિજપ બુધાઃ ।
સત્ત્વશુદ્ધિકરં પુંસાં સ્વાધ્યાયં પરિચક્ષતે ॥ ૧,૨૩૮.૧૦॥

સ્તુતિસ્મરણપૂજાદિવાઙ્મનઃ કાયકર્મભિઃ ।
અનિશ્ચલા હરૌ ભક્તિરેતદીશ્વરચિન્તનમ્ ।
આસનં સ્વસ્તિકં પ્રોક્તં પદ્મમર્ધાસનં તથા ॥ ૧,૨૩૮.૧૧॥

પ્રાણઃ સ્વદેહજો વાયુરાયામસ્તન્નિરોધનમ્ ।
ઇન્દ્રિયાણાં વિચરતાં વિષયેષુ ત્વસત્સ્વિવ ॥ ૧,૨૩૮.૧૨॥

શ્રીગરુડમહાપુરાણમ્- ૨૩૯

બ્રહ્મોવાચ ।
બ્રહ્મગીતાં પ્રવક્ષ્યામિ યજ્જ્ઞાત્વા મુચ્યતે ભવાન્ ।
અહંબ્રહ્માસ્મિ વાક્યોત્થજ્ઞાનાન્મોક્ષો ભવેન્નૃણામ્ ॥ ૧,૨૩૯.૧॥

વાક્યજ્ઞાનં ભવેજ્જ્ઞાનાદહંબ્રહ્મ પદાર્થયોઃ ।
પદદ્વયાર્થૌ દ્વિવિધૌ વાચ્યૌ લક્ષ્યૌ સ્મતૌ બુધૈઃ ॥ ૧,૨૩૯.૨॥

વાક્યવાચ્યશ્ચ શબલો લક્ષ્યઃ શુદ્ધઃ પ્રકીર્તિતઃ ।
પ્રાણપિણ્ડાત્મકોઃ યનચેતસામતુલં ન યતુ? ॥ ૧,૨૩૯.૩॥

તથા વેદૈરવાગ્રૂપમહંશબ્દેન સેવ્યતે ।
પ્રત્યગ્રૂનં ત્વદ્વિતીયમહંશબ્દેન મન્યતે ॥ ૧,૨૩૯.૪॥

અવ્યયાનન્દચૈતન્યં પરોક્ષસહિતં પરમ્ ।
પ્રાણપિણ્ડાત્મકો યોથ સ દ્વિતીયવિભાગકઃ ॥ ૧,૨૩૯.૫॥

પારોક્ષ્યેપ્રેક્ષણો હ્યત્ર ભાગો લક્ષ્યેત વાહમા ।
તથા બ્રહ્મપદેનૈવ પ્રાણપિણ્ડાત્મકારણામ્ ॥ ૧,૨૩૯.૬॥

નિષ્ઠા પરોક્ષતા ચેતિ પરિત્યાગેન વક્ષ્યતે ।
અદ્વયાનન્દચૈતન્યં પ્રત્યગ્બ્રહ્મપદેન તુ ॥ ૧,૨૩૯.૭॥

અદ્વયાનન્દચૈતન્યં લક્ષયિત્વા સ્થિતસ્ય ચ ।
બ્રહ્માહમસ્મ્યહં બ્રહ્મ ચાહંબ્રહ્મપદાર્થયોઃ ॥ ૧,૨૩૯.૮॥

અહંબ્રહ્માસ્મિવાક્યાચ્ચ સ્વનુભૂતિફલાર્થકમ્ ।
ઐક્યજ્ઞાનં તુ હિ ભવેદ્વેદાન્તાદૂરતો ધ્રુવમ્ ॥ ૧,૨૩૯.૯॥

જ્ઞાનાદજ્ઞાનકાર્યસ્ય નિવૃત્ત્યા મુક્તિરૈક્યતઃ ॥ ૧,૨૩૯.૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશાખ્યે આચારકાણ્ડે
બ્રહ્મગીતાસારવર્ણનં નામૈકોનચત્વારિંશદુત્તરદ્વિશતતમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩૯
શ્રીભગવાનુવાચ ।
સન્નપિ બ્રહ્મ તસ્માત્ખં મરુત્ખાચ્ચ તતોऽનલઃ ॥ ૧,૨૩૯.૧॥

અગ્નેરાપસ્તતઃ પૃથ્વી પ્રપઞ્ચાકૃતિસૂતિકા ।
તતઃ સપ્તદશં લિઙ્ગં પઞ્ચકર્મેન્દ્રિયાણિ ચ ॥ ૧,૨૩૯.૨॥

વાક્પાણિપાદં પાયુશ્ચાપ્યુપસ્થમથ ધીન્દ્રિયમ્ ।
શ્રોત્રં ત્વક્ચક્ષુષી જિહ્વા ઘ્રાણં સ્યાત્પઞ્ચ વાયવઃ ॥ ૧,૨૩૯.૩॥

પ્રાણોપાનઃ સમાનશ્ચ વ્યાનસ્તૂદાન એવ ચ ।
મનોન્તઃ કરણં ધીશ્ચ સ્યાન્મનઃ સંશયાત્મકમ્ ॥ ૧,૨૩૯.૪॥

બુદ્ધિર્નિશ્ચયરૂપા તુ એતત્સૂક્ષ્મસ્વરૂપકમ્ ।
હિરણ્યગર્ભમાત્મીયસૂત્રં તત્કાર્યાલિઙ્ગકમ્ ॥ ૧,૨૩૯.૫॥

પઞ્ચીકૃતાનિ ભૂતાનિ હ્યપઞ્ચીકૃતભૂતતઃ ।
પઞ્ચીકૃતેભ્યો ભૂતેભ્યો બ્રહ્માણ્ડં સમજાયત ॥ ૧,૨૩૯.૬॥

લોકપ્રસિદ્ધં સ્થૂલાખ્યં શરીરં ચરણાદિમત્ ।
પઞ્ચીકૃતાનિ ભૂતાનિ તત્કાર્યં તત્સ્થમેવ ચ ॥ ૧,૨૩૯.૭॥

સર્વં શરીરજાતં ચ પ્રાણિનાં સ્થૂલમીરિતમ્ ।
ત્રિધાહ્રિ પરમાત્મસ્થં શરીરં પ્રોચ્યતે બુધૈઃ ॥ ૧,૨૩૯.૮॥

દેહદ્વયાભિગામી ચ ત્વમથો જીવ એકતઃ ।
સ્વભેદવાક્યાદ્બ્રહ્મૈવ પ્રવિષ્ટં દેહયોર્દ્વયોઃ ॥ ૧,૨૩૯.૯॥

જલાર્ક્વવદ્ઘ્રદરવજ્જીવઃ પ્રાણાદિધારણઃ ।
જાગ્રત્સ્વપ્નસુષુમીનાં સાક્ષી જીવઃ સ ચ સ્મૃતઃ ॥ ૧,૨૩૯.૧૦॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યૈર્વ્યાતિરિક્તશ્ચ નિર્ગુણઃ ।
નિર્ગાતાવયવોસંગો નિત્યશુદ્ધસ્વભાવકઃ ॥ ૧,૨૩૯.૧૧॥

પરમાત્મૈવ યજ્જાગ્રત્સ્વપ્નાદ્યૈર્યસ્ત્રિધા મતઃ ।
અન્તઃ કરણરાશેશ્ચૈવાન્તઃ કરણઃસ્થિતઃ ॥ ૧,૨૩૯.૧૨॥

જાગ્રત્સ્વપ્નસુષુમીશ્ચ પશ્યતો વિકૃતિઃ સદા ।
ફલક્રિયાકારકયોર્જાગ્રદાદીન્વદામ્યહમ્ ॥ ૧,૨૩૯.૧૩॥

ઇન્દ્રિયૈરથ વિજ્ઞાનં જાગ્રત્સ્થાનમુદીરિતમ્ ।
જાગ્રત્સંસ્કારસંભૂતપ્રત્યયો વિષયાર્થિનઃ ॥ ૧,૨૩૯.૧૪॥

સ્વપ્નં સુષુપ્તિઃ કરણોપસંઘાતે ધિયઃ (પ) સ્થિત (તિ) ।
બ્રહ્મણઃ કારણાવસ્થાયાં સ્થિતિઃ કાલકાત્મના ॥ ૧,૨૩૯.૧૫॥

ક્રમતોક્રમતો જીવો જાગ્રદાદિ સ પશ્યતિ ।
સમાધ્યારંભકાલે તુ પૂર્વમેવાવધારયેત્ ॥ ૧,૨૩૯.૧૬॥

મુમુક્ષાવથ સંજાતે અન્તઃ કરણકેવલે ।
વિલાપયેત્ક્ષેત્રજાતં તત્ક્ષેત્રં પરિશેષયેત્ ॥ ૧,૨૩૯.૧૭॥

પઞ્ચીકૃતેભ્યો ભૂતેભ્યો ભાણ્ડાદિ વ્યતિરિક્તકમ્ ।
યથા મૃદો ઘટો ભિન્નો નાસ્તિ તત્કાર્યતસ્તથા ॥ ૧,૨૩૯.૧૮॥

પઞ્ચીકૃતાનિ ભૂતાનિ અપઞ્ચીકૃતભૂતતઃ ।
શંસંતિ વ્યતિરેકેણ શિષ્ટાઃ સૂક્ષ્મશરીરકમ્ ॥ ૧,૨૩૯.૧૯॥

અપઞ્ચીકૃતભૂતેભ્યો ન લિઙ્ગં વ્યતિરિક્તકમ્ ।
પૃથ્વ્યાધારં વિના નાસ્તિ વિના નાસ્તિ ચ તેન સા ॥ ૧,૨૩૯.૨૦॥

તેજશ્ચ વાયુના નાસ્તિ વાયુઃ ખેન વિના ન હિ ।
યદ્બ્રહ્મણા ચ ખં નાસ્તિ શુદ્ધ બ્રહ્મ વિના ચ ખમ્ ॥ ૧,૨૩૯.૨૧॥

શુદ્ધભાવસ્તદા જાગ્રત્સ્વપ્નાદીનામસંભવઃ ।
જીવત્વવર્જિતઃ પ્રાપ્તાત્મચૈતન્યાનુરૂપતઃ ॥ ૧,૨૩૯.૨૨॥

નિત્યં શુદ્ધં બુદ્ધમુક્તં સત્યં બ્રહ્માદ્વિતીયકમ્ ।
તત્ત્વંપદાન્તૌ શિષ્ટૌ ચ તત્કારો બ્રહ્મવાચકઃ ॥ ૧,૨૩૯.૨૩॥

ઉકારશ્ચ અકારશ્ચ મકારોયમૃગદ્વયઃ ।
બ્રહ્માહમસ્મ્યહં બ્રહ્મજ્ઞાનમજ્ઞાનવર્ધનમ્ ॥ ૧,૨૩૯.૨૪॥

અયમાત્મા પરં જ્યોતિશ્ચિન્નામાનન્દરૂપકઃ ।
સત્યં જ્ઞાનમનતં હિ ત્વમસીતિ શ્રુતીરિતમ્ ॥ ૧,૨૩૯.૨૫॥

અહં બ્રહ્માસ્મિ નિર્લેપમહં બ્રહ્માસ્મિ સર્વગમ્ ।
યોસાવાદિત્યપુરુષસોસાવહમનાદિમત્ ।
ગીતાસારોઽર્જુનાયોક્તો યેન બ્રહ્મણિ વૈ લયઃ ॥ ૧,૨૩૯.૨૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે પ્રથમાંશે આચારકાણ્ડે
બ્રહ્મગીતાસારો નામેકોનચત્વારિંશદુત્તરદ્વિશતતમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૪૦

હરિરુવાચ ।

પુરાણં ગારુડં રુદ્ર પ્રોક્તં સારં મયાતવ ।

બ્રહ્માદીનાં શૃણ્વતાં ચ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૧,૨૪૦.૧॥

વિદ્યાકીર્તિપ્રભાલક્ષ્મીજયારોગ્યાદિકારકમ્ ।
યઃ પઠેચ્છૃણુયાદ્ભ્રૂ સર્વવિત્સ દિવં વ્રજેત્ ॥ ૧,૨૪૦.૨॥

બ્રહ્મોવાચ ।
ઇતિ વ્યાસ મયા વિષ્ણોઃ પુરાણં મુક્તિદં શ્રુતમ્ ।
વ્યાસ ઉવાચ ।
શ્રુત્વૈતદ્ગારુડં પુણ્યં બ્રહ્માસ્માનિત્યુવાચ હ ॥ ૧,૨૪૦.૩॥

દક્ષનારદ મુખ્યાદિન્બ્રહ્મ ધ્યાન્હરિં ગતઃ ।
મયાપિ તુભ્યં સૂતેન પુરાણં કથિતં પરમ્ ॥ ૧,૨૪૦.૪॥

યચ્છ્રુત્વા સર્વવિત્પ્રાપ્તકામો બ્રહ્મ ફલં ભવેત્ ।
વિષ્ણુઃ સારતમંપ્રાહ ગરુડં ગારુડં તતઃ ॥ ૧,૨૪૦.૫॥

મહાસારં ધર્મકામધનમોક્ષાદિદાયકમ્ ।
સૂત ઉવાચ ।
શૌનક પ્રવરં પ્રોક્તં પુરાણં ગારુડં તવ ॥ ૧,૨૪૦.૬॥

યદબ્રવીત્પુરા વ્યાસઃ સારં માં ગારુડેરિતમ્ ।
વ્યાસઃ શ્રુત્વા બ્રહ્મણશ્ચ પુરાણં ગારુડં શુભમ્ ।
દેવં ધ્યાયન્વેદમેકં ચતુર્ધા વ્યભજદ્ધરિઃ ॥ ૧,૨૪૦.૭॥

અષ્ટાદશપુરાણાનિ તાનિ માં પ્રાહ વૈ શુકઃ ।
ઇદં તુ ગારુડં શ્રેષ્ઠં મયા તે શૌનકેરિતમ્ ॥ ૧,૨૪૦.૮॥

મુનીનાં શૃણ્વતાં મધ્યે પૃચ્છતઃ સર્વવાચકમ્ ।
યઃ પઠેચ્છણુયાદ્વાપિ શ્રાવયેદ્વા સમાહિતઃ ॥ ૧,૨૪૦.૯॥

સંલિખેલ્લેખયેદ્વાપિ ધારયેત્પુસ્તકે નનુ ।
ધર્માર્થી પ્રાપ્નુયાદ્ધર્મર્થાર્થી ચાર્થમાપ્નુયાત્ ॥ ૧,૨૪૦.૧૦॥

કામા નવાપ્નુયાત્કામી મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ।
યદ્યદિચ્છતિ તત્સર્વં ગારુડશ્રવણાલ્લભેત્ ॥ ૧,૨૪૦.૧૧॥

બ્રાહ્મણો વેદપારસ્ય ગન્તા સ્યાન્નાત્ર સંશયઃ ।
ક્ષત્રિયો ક્ષત્રિયસ્યાપિ રક્ષિતા ભવતીહ ચ ॥ ૧,૨૪૦.૧૨॥

નાન્યસ્ય શ્રવણં હિ સ્યાત્પુરાણં વેદસમિતમ્ ।

વદેદ્યદિ સ મૂઢાત્મા કીર્તિહાનિમવાપ્નુયાત્ ॥ ૧,૨૪૦.૧૩॥

અન્યસ્મૈ ચ વદેદ્વિદ્વાન્બ્રાહ્મણોન્તરિતો ય દિ ।
બ્રાહ્મણાન્તરિતૈ સર્વૈઃ શ્રોતવ્યં ગારુડં ત્વિદમ ॥ ૧,૨૪૦.૧૪॥

યથા વિષ્ણુસ્તથા તાર્ક્ષ્યસ્તાર્ક્ષ્યસ્તોત્રાદ્ધરિઃ સ્તુતઃ ।
ગારુડં વસુરાજશ્ચ શ્રુત્વા સર્વમવાપ હ ॥ ૧,૨૪૦.૧૫॥

વરુરુવાચ ।
નમસ્યામિ મહાબાહું ખગેદ્ર હરિવાહનમ્ ।
વિષ્ણોર્ધ્વસંસ્થાનં વિત્રાસિતમહાસુરમ્ ॥ ૧,૨૪૦.૧૬॥

નમસ્તે નાગદર્પઘ્ન વિનતાનન્દવર્ધન ।
સુપક્ષપાત નિદ્ભ દીનદૈત્યનિરીક્ષિત ॥ ૧,૨૪૦.૧૭॥

પરસ્પરસ્ય શાપેન સુપ્રતીકવિભાવસૂ ।
ગજકચ્છપતાં પ્રાપ્તૌ ભ્રાતરૌચૈવ સંયુતૌ ॥ ૧,૨૪૦.૧૮॥

યદુચ્છ્રિતૌ યોજનાનિ જસ્તદ્વિગુણાયતઃ ।
કૂર્મસ્ત્રિયોજનોત્સોધા શતયોજનવમડલઃ ॥ ૧,૨૪૦.૧૯॥

ન ખાદ્યૌ તૌ ત્વયાનીચૌ ચતુર્ભુજૌ ચ પક્ષિપ? ।
પરસ્પરકૃતાચ્છાપદોષાચ્ચ પરિમોચિતૌ ॥ ૧,૨૪૦.૨૦॥

નિષાદદેશસ્વાદેન દેવં બ્રૂસ્માનિદિતમ્? ।
વિષાદીશસ્તતો મુક્તસ્તત્રાપિ બ્રાહ્મણસ્ત્વયા ॥ ૧,૨૪૦.૨૧॥

વટારોહિણવૃક્ષસ્ય યોજનાનાં શતાયુતા ।
શાખા ભિન્ના ત્વયા યત્ર વાલખિલ્યાઃ સમાસ્થિતાઃ ॥ ૧,૨૪૦.૨૨॥

ત્વયા યત્નકૃતા કૃત્વાનખસ્થૌ ગજકચ્છપૌ ।
નભસ્પપિનિરાલંબે સર્વતઃ પરિવારિતૌ ॥ ૧,૨૪૦.૨૩॥

ત્વયા જિતા રણે દેવાઃ સર્વે શક્રપુરોગમાઃ ।
આહૃતં તત્પુરા સોમં વાહ્નિં નિર્વાપ્ય કાશ્યપે ॥ ૧,૨૪૦.૨૪॥

નાગૌ દૃષ્ટિવિષૌ કૃત્વા રજસા તુ વિચક્ષુષૌ ।
તીક્ષ્ણાગ્રેણ ન સા ભઙ્ક્ત્વાવિક્રવેતૌ મનોહતઃ? ॥ ૧,૨૪૦.૨૫॥

આહૃત્યાપિ ત્વયા સોમં નીતમેવ ન ભક્તિતઃ ।
તેન વિષ્ણોર્ધ્વજસ્થાનં વાહનત્વં ગતો હ્યસિ ॥ ૧,૨૪૦.૨૬॥

ત્વયા નિઃ ક્ષિપ્ય દર્ભેષુ સોમં નાગાશ્ચ વઞ્ચિતાઃ ।
જહાર ચામૃતં પાત્રં શીઘ્રં વૈ બ્રહ્મસૂદન ॥ ૧,૨૪૦.૨૭॥

યત્ર જિહ્વાદ્વિધાભૂતાઃ પન્નગાનાં દ્વિજોત્તમ ।
વિનતા મોચિતા દાસ્યાત્ત્વદ્ધા પૂર્વજિતા રણે ॥ ૧,૨૪૦.૨૮॥

ઉચ્ચૈઃ શ્રવાઃ સ કિંવર્ણઃ શુક્લ ઇત્યેવ ભાષતે ।
કૃષ્ણવર્ણમહં મન્યે પૂર્વદૃષ્ટમુવાચ હ ॥ ૧,૨૪૦.૨૯॥

ત્વયા વજ્રપહારેણ પક્ષમુક્તં પુરા સ્વતઃ? ।
દધીચવજ્રશક્રાણાં માતુરર્થાય નાન્યથા ॥ ૧,૨૪૦.૩૦॥

તસ્ય પક્ષસ્ય દેવેન્દ્રો યદાનીતં હિ દૃષ્ટવાન્ ।
તદા તવ સુપર્ણોતિ નામ સ્થાનં જગત્ત્રયે ॥ ૧,૨૪૦.૩૧॥

ધ્યાનમાત્રાદ્વિનશ્યેત્તુ વિષં સ્થાવરજઙ્ગમમ્ ।
પઠેદ્વા શ◌ૃણુયાદ્યશ્ચ ભુક્તિં મુક્તિમવાપ્નુયાત્ ॥ ૧,૨૪૦.૩૨॥

સૂત ઉવાચ ।
વસુરાજો ગારુડં વૈ શ્રુત્વા સર્વમવાપ્તવાન્ ।
ગરુડો ભગવાન્વિષ્ણુધ્યાંયન્સર્વવાપ્તવાન્ ॥ ૧,૨૪૦.૩૩॥

તદુક્તં ગારુડં પુણ્યં પુરાણં યઃ પઠેન્નરઃ ।
સર્વકામમવાપ્યાથ પ્રાપ્નોતિ પરમાં ગતિમ્ ॥ ૧,૨૪૦.૩૪॥

શ્લોકપાદં પઠિત્વા ચ સર્વપાપક્ષયો ભવેત્ ।
યસ્યેદં વર્તતે ગેહ તસ્ય સર્વં ભવેદિહ ॥ ૧,૨૪૦.૩૫॥

ગારુડં યસ્ય હસ્તે તુ તસ્ય હસ્તગતો નયઃ ।
યઃ પઠેચ્છૃણુયાદેતદ્ભુક્તિં મુક્તિં સમાપ્નુયાત્ ॥ ૧,૨૪૦.૩૬॥

ધર્માર્થકામમોક્ષાંશ્ચ પ્રાપ્નુયાચ્છ્રવણાદિતઃ ।
પુત્રાર્થો લભતે પુત્રાન્કામાર્થો કામમાપ્નુયાત્ ॥ ૧,૨૪૦.૩૭॥

વિદ્યાર્થો લભતે વિદ્યાં જયાર્થો લભતે જયમ્ ।
બ્રહ્મહત્યાદિના પાપી પાપશુદ્ધિમવાપ્નુયાત્ ॥ ૧,૨૪૦.૩૮॥

વન્ધ્યાપિ લભતે પુત્રં કન્યા વિન્દતિ સત્પતિમ્ ।
ક્ષેમાર્થો લભતે ક્ષેમં બોગાર્થો બોગમાપ્નુયાત્ ॥ ૧,૨૪૦.૩૯॥

મઙ્ગલાર્થી મઙ્ગલાનિ ગુણાર્થી ગુણમાપ્નુયાત્ ।
કાવ્યાર્થી ચ કવિત્વં ચ સારાર્થી સારમાપ્નુયાત્ ॥ ૧,૨૪૦.૪૦॥

જ્ઞાનાર્થી લભતે જ્ઞાનં સર્વસંસારમર્દનમ્ ।
ઇદં સ્વસ્ત્યયનં ધન્યં ગારુડં ગરુડેરિતમ્ ॥ ૧,૨૪૦.૪૧॥

નાકાલે મરણં તસ્ય શ્લોકમેકં તુ યઃ પઠેત્ ।
શ્લોકાર્ધપઠનાદસ્ય દુષ્ટશત્રુક્ષયો ધ્રુવમ્ ॥ ૧,૨૪૦.૪૨॥

સૂતાચ્છ્રુત્વા શૌનકસ્તુનૈમિષે મુનિભિઃ ક્રતૌ ।
અહં બ્રહેતિ સંધ્યાયન્મુક્તોભૂદ્ગરુડધ્વજાત્ ॥ ૧,૨૪૦.૪૩॥

ૐ

ઇતિ શ્રીગારુડે મહાપુરાણે પૂર્વખણ્ડે પ્રથમાંશે આચારકાણ્ડે
ગરુડપુરાણમાહાત્મ્યં નામ ચત્વારિંશદુત્તરદ્વિશતતમોऽધ્યાયઃ

શુભં ભૂયાત્ ।

ઇતિ શ્રીગારુડે પ્રથમાંશ આચારકાણ્ડઃ સમાપ્તઃ ।

## શ્રીગરુડમહાપુરાણમ્ ૨

શ્રીગણેશાય નમઃ ।

તત્રાદિમે દ્વિતીયાંશે પ્રેતકાણ્ડો ધર્મકાણ્ડનામારભ્યતે ।
ૐ નમો ભગવતે વાસુદેવાય ।

નારાયણં નમસ્કૃત્ય નરં ચૈવ નરોત્તમમ્ ।
દેવીં સરસ્વતીં ચૈવ તતો જયમુદીરયેત્ ॥ ૨,૧.મંગલાચરણમ્ ॥ ।

ધર્મન્દૃઢબદ્ધમૂલો વેદસ્કન્ધઃ પુરાણશાખાઢ્યઃ ।
ક્રતુકુસુમો મોક્ષફલો મધુસૂદનપાદપો જયતિ ॥ ૨,૧.૧॥

નૈમિષેऽનિમિષક્ષેત્રે શૌનકાદ્યા મુનીશ્વરાઃ ।
કર્મણામન્તરે સૂતં સ્વાસીનમિદમબ્રુવન્ ॥ ૨,૧.૨॥

સૂત જાનાસિ સકલં વસ્તુ વ્યાસપ્રસાદતઃ ।
તેન નઃ સન્દિહાનાનાં સન્દેહં છેત્તુમર્હસિ ॥ ૨,૧.૩॥

યથા તૃણજલૌકેતિ ન્યાયમા શ્રિત્ય કઞ્ચન ।

દેહિનોઽન્યતનુપ્રાપ્તિં કેચિત્ત્વેવં વદન્તિ હિ ॥ ૨,૧.૪॥

કેચિત્પુનર્યાતનાનાં યામીનામુપભોગતઃ ।
પશ્ચાદ્દેહાન્તરપ્રાપ્તિં વદન્તિ કિમુ તત્રસત્ ॥ ૨,૧.૫॥

સૂત ઉવાચ ।
સાધુ પૃષ્ટં મહાભાગાઃ શ ृણુધ્વં ભવતાં પુનઃ ।
સન્દેહો નોપપદ્યેત લોકાર્થં કિલ પૃચ્છતામ્ ॥ ૨,૧.૬॥

તદહં કૃષ્ણગરુડસંવાદદ્વારકં દ્વિજાઃ ।

અપાકરિષ્યે સન્દેહં ભવતાં ભાવિતાત્મનામ્ ॥ ૨,૧.૭॥

નમઃ કૃષ્ણાય મુનયે ય એનં સમુપાશ્રિતાઃ ।
અઞ્જસ્તરન્તિ સંસારસાગરં કુનદીમિવ ॥ ૨,૧.૮॥

એકદા વૈનતેયસ્ય લોકાનાં લોકનસ્પૃહા ।
બભૂવ સોઽથ બભ્રામ તેષુ નામ હરેર્ગૃણન્ ॥ ૨,૧.૯॥

સ પાતાલં ભુવં સ્વર્ગં ભ્રાન્ત્વાલબ્ધશમાશયઃ ।
લોકદુઃખેનાતિદુઃખી પુનર્વૈકુણ્ઠમાગમત્ ॥ ૨,૧.૧૦॥

ન રજો ન તમશ્ચૈવ સત્ત્વં તાભ્યાં ચ મિશ્રિતમ્ ।
યત્ર પ્રવર્તતે નૈવ સત્ત્વમેવ પ્રવર્તતે ॥ ૨,૧.૧૧॥

ન યત્ર માયા નાશશ્ચ ન ચૈ રાગાદયો મલાઃ ।
શ્યામાવદાતાઃ સુરુચઃ શતપત્રવિલોચનાઃ ॥ ૨,૧.૧૨॥

સુરાસુરાર્ચિતા યત્ર ગણા વિષ્ણોઃ સુપેશસઃ ।
પિશઙ્ગવસ્ત્રાભારણા મણિયુઙ્નિષ્કભૂષિતાઃ ॥ ૨,૧.૧૩॥

ચતુર્ભુજાઃ કુણ્ડલિનો મૌલિનો માલિનસ્તથા ।
ભ્રાજિષ્ણુભિર્વિમાનાનાં પઙ્ક્તિભિર્યે મહાત્મનામ્ ॥ ૨,૧.૧૪॥

દ્યોતન્તે દ્યોતમાનાનાં પ્રમદાનાં ચ પઙ્ક્તિભિઃ ।
શ્રીર્યત્ર નાનાવિભવૈર્હરેઃ પાદૌ મુદાર્ચતિ ॥ ૨,૧.૧૫॥

હરિં ગાયતિ દોલાસ્થં ગીયમાનાલિભિઃ સ્વયમ્ ।
દદર્શ શ્રીહરિં તત્ર શ્રીપતિં સાત્વતાં પતિમ્ ॥ ૨,૧.૧૬॥

જગત્પતિં યજ્ઞપતિં પાર્ષદૈઃ પરિષેવિતમ્ ।

સુનન્દનન્દપ્રબલાર્હણમુખ્યૈર્નિરન્તરમ્ ॥ ૨,૧.૧૭॥

ભૃત્યપ્રસાદસુમુખમાયતારુણલોચનમ્ ।
કિરીટિનં કુણ્ડલિનં શ્રિયા વક્ષસિ લક્ષિતમ્ ॥ ૨,૧.૧૮॥

પીતાંશુકં ચતુર્બાહું પ્રસન્નહસિતાનનમ્ ।
અભ્યર્હણાસનાસીનં તાભિઃ શક્તિભિરાવૃતમ્ ॥ ૨,૧.૧૯॥

પ્રધાનપુરુષાભ્યાં ચ મહતા ચાહમા તથા ।
એકાદશોન્દ્રિયૈશ્ચૈવ પઞ્ચભૂતૈસ્તથૈવ ચ ॥ ૨,૧.૨૦॥

સ્વરૂપેરમમાણં તમીશ્વરં વિનતાસુતઃ ।
તદ્દર્શનાહ્લાદયુતસ્વાન્તો હૃષ્યત્તનૂરુહઃ ॥ ૨,૧.૨૧॥

લોચનાભ્યામશ્રુ મુઞ્ચન્પ્રેમમગ્નો નનામ હ ।
નમાગતં નતં સ્વીય વાહનં વિષ્ણુરબ્રવીત્ ।
ભૂમિઃ કા લઙ્ઘિતા પક્ષિંસ્ત્વયેયન્તમનેહસમ્ ॥ ૨,૧.૨૨॥

ગરુડ ઉવાચ ।
તવ પ્રસાદાદ્વૈકુણ્ઠ ત્રૈલોક્યં સચરાચરમ્ ॥ ૨,૧.૨૩॥

મયા વિલોકિતં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
ભૂર્લોકાત્સત્યપર્યન્તં પુરં યામ્યં વિના પ્રભો ॥ ૨,૧.૨૪॥

ભૂર્લોકઃ સર્વલોકાનાં પ્રચુરઃ સર્વજન્તુષુ ।
માનુષ્યં સર્વભૂતાનાં ભુક્તિમુક્ત્યાલયં શુભમ્ ॥ ૨,૧.૨૫॥

અતઃ સુકૃતિનાં લોકો ન ભૂતો ન ભવિષ્યતિ ॥ ૨,૧.૨૬॥

ગાયન્તિ દેવાઃ કિલ ગીતકાનિ ધન્યાસ્તુ યે ભારતભૂમિભાગે ।
સ્વર્ગાપવર્ગસ્ય ફલાર્જનાય ભવન્તિ ભૂયઃ પુરુષાઃ સુરત્વાત્ ॥ ૨,૧.૨૭॥

પ્રેતઃ કૌક્ષિપ્યતે કસ્માત્પઞ્ચરત્નં મુખે કથમ્ ।
અધસ્તાચ્ચાલિતા દર્ભાઃ પાદૌ યામ્યાં વ્યવસ્થિતૌ ॥ ૨,૧.૨૮॥

કિમર્થં પુત્રપૌત્રાશ્ચ તસ્ય તિષ્ઠન્તિ ચાગ્રતઃ ।
કિમર્થં દીયતે દાનં ગોદાનમપિ કેશવ ॥ ૨,૧.૨૯॥

બન્ધુમિત્રાણ્યમિત્રાશ્ચ ક્ષમાપયન્તિ તત્કથમ્ ।
તિલાલોહં હિરણ્યં ચ કર્પાસં લવણં તથા ॥ ૨,૧.૩૦॥

સપ્તધાન્યં ક્ષિતિર્ગાવો દીયન્તે કેનહેતુના ।
કથં હિ મ્રિયતે જન્તુર્મૃતો વૈ કુત્ર ગચ્છતિ ॥ ૨,૧.૩૧॥

અતિવાહશરીરં ચ કથં હિ શ્રયતે તદા ।
શવં સ્કન્ધે વહેત્પુત્રો અગ્નિદાતા ચ પૌત્રકઃ ॥ ૨,૧.૩૨॥

આજ્યેનાભ્યઞ્જનં કસ્માત્કુત એકાહુતિક્રિયા ।
વસુન્ધરા કિમર્થં ચ કુતઃ સ્ત્રીશબ્દકીર્તનમ્ ॥ ૨,૧.૩૩॥

યમસૂક્તં કિમર્થં ચ ઉદીચ્યા દિશમાહરેત્ ।
પાનીયમેકવસ્ત્રેણ સૂર્યબિમ્બનિરીક્ષણમ્ ॥ ૨,૧.૩૪॥

યવસર્ષપદૂર્વાસ્તુ પાષાણે નિમ્બપત્રકમ્ ।
વસ્ત્રં નરશ્ચ નારી ચ વિદધ્યાદધરોત્તરમ્ ॥ ૨,૧.૩૫॥

અન્નાદ્યં ગૃહમાગત્ય ન ભોક્તવ્યં જનૈઃ સહ ।
નવકાંશ્ચૈવ પિણ્ડાંશ્ચ કિમર્થં દદતે સુતાઃ ॥ ૨,૧.૩૬॥

કિમર્થં ચત્વરે દુગ્ધં યાત્રે પક્વે ચ મૃન્મયે ।
કાષ્ઠત્રયં ગણાબદ્ધં કૃત્વા રાત્રૌ ચતુષ્પથે ॥ ૨,૧.૩૭॥

નિશાયાં દીયતે દીપો યાવદબ્દં દિનેદિન ।
દાહોદકં કિમર્થં ચ કિમર્થં ચ જનૈઃ સહ ॥ ૨,૧.૩૮॥

ભગવન્નાતિ વાહશ્ચ નવ પિણ્ડાઃ પ્રદાપયેત્ ।
કથં દેયં પિતૃભ્યશ્ચ વાહસ્યાવાહનં કથમ્ ॥ ૨,૧.૩૯॥

ઇદઞ્ચેત્ક્રિયતે દેવ કસ્માત્પિણ્ડં પ્રદાપયેત્ ।
કિં તત્પ્રદીયતે તસ્ય પિણ્ડદાનાદ્યનન્તરમ્ ॥ ૨,૧.૪૦॥

અસ્થિસઞ્ચયનં ચૈવ ઘટસ્ફોટં તથૈવ ચ ।
દ્વિતીયેઽહ્નિ કુતઃ સ્નાનં ચતુર્થે સાગ્નિકે દ્વિજે ॥ ૨,૧.૪૧॥

દશમે કિં મલસ્નાનં કાર્યં સર્વજનૈઃ સહ ।
કસ્માત્તૈલોદ્વર્તનં ચ સ્કન્ધવાહગૃહં નયેત્ ॥ ૨,૧.૪૨॥

તૈલોદ્વર્તનકં ચાપિ દદ્યુઃ સ્થૂલજલાશયે ।
દશમેઽહનિ યત્પિણ્ડં તદ્દ્યા દામિષેણ તુ ॥ ૨,૧.૪૩॥

પિણાઞ્ચૈકાદશે કસ્માદ્વૃષોત્સર્ગાદિપૂર્વકમ્ ।
ભાજનોપાનહૌ ચ્છત્રં વાસાંસિ ત્વઙ્ગુલીયકમ્ ॥ ૨,૧.૪૪॥

ત્રયોદશેઽહ્નિ દેયં સ્યાત્પદદાનં કિમર્થકમ્ ।
શ્રાદ્ધાનિ ષોડશૈતાનિ અબ્દં યાવત્કુતો ઘટઃ ॥ ૨,૧.૪૫॥

અન્નાદ્યેનોદકેનૈવ ષષ્ટ્યાધિકશતત્રયમ્ ।
દિનેદિને ચ દાતવ્યં ઘટાન્નં પ્રેતતૃપ્તયે ॥ ૨,૧.૪૬॥

પ્રાપ્તે કાલે વૈ મ્રિયતે અનિત્યા માનવાઃ પ્રભો ॥ ૨,૧.૪૭॥

છિદ્રં તુ નૈવ પશ્યામિ કુતો જીવઃ સ નિર્ગતઃ ।
કુતો ગચ્છન્તિ ભૂતાનિ પૃથિવ્યાપો મનસ્તથા ।
તેજો વદસ્વ મે નાથ વાયુરાકાશમેવ ચ ॥ ૨,૧.૪૮॥

કુતઃ કર્મેન્દ્રિયાણીહ પઞ્ચબુદ્ધીન્દ્રિયાણિ ચ ।
વાયવશ્ચૈવ પઞ્ચૈતે કથં ગચ્છન્તિ ચાત્યયમ્ ॥ ૨,૧.૪૯॥

લોભમોહાદયઃ પઞ્ચ શરીરે ચૈવ તસ્કરાઃ ।
તૃષ્ણા કામો હ્યહઙ્કારઃ કુતો યાન્તિ જનાર્દના ॥ ૨,૧.૫૦॥

પુણ્યં વાપ્યથવાપુણ્યં યત્કિઞ્ચિત્સુકૃતં તથા ।
નષ્ટે દેહે કુતો યાન્તિ દાનાનિ વિવિધાનિ ચ ॥ ૨,૧.૫૧॥

સપિણ્ડનં કિમર્થં ચ પૂર્ણે સંવત્સરેઽપિ વા ।
પ્રેતસ્ય મેલનં કેષાં કિંવિધં તત્ર કારયેત્ ॥ ૨,૧.૫૨॥

મૂર્છનાત્પતનાદ્વાપિ વિપત્તિર્યદિ જાયતે ।
યે દગ્ધા યે ત્વદગ્ધાશ્ચ પતિતા યે નરા ભુવિ ॥ ૨,૧.૫૩॥

યાનિ ચાન્યાનિ ભૂતાનિ તેષામન્તે ભવેચ્ચ કિમ્ ।
પાપિનો યે દુરાચારા યે ચાન્યે ગતબુદ્ધયઃ ॥ ૨,૧.૫૪॥

આત્મઘાતી બ્રહ્મહા ચ સ્તેયી વિશ્વાસઘાતકઃ ।
કપિલાયાઃ પિબેચ્છૂદ્રો યઃ પઠેદિદમક્ષરમ્ ॥ ૨,૧.૫૫॥

ધારયેદ્બ્રહ્મસૂત્રં વા કા ગતિસ્તસ્ય માધવ ।
શૂદ્રસ્ય બ્રાહ્મણી ભાર્યા સંગૃહીતા યદા ભવેત્ ॥ ૨,૧.૫૬॥

ભીતોઽહં પાપિનસ્તસ્માત્તન્મે વદ જગત્પ્રભો ।
અન્યચ્ચ શ ૃણુ વિશ્વાત્મન્મયા કૌતુકિના રયાત્ ॥ ૨,૧.૫૭॥

લોકાંલ્લોકયતા લોકે જગાહે વિશ્વમણ્ડલમ્ ।

તત્રાજનિ જનાન્દૃષ્ટ્વા દુઃખેષ્વેવ નિમજ્જતઃ ॥ ૨,૧.૫૮॥

સ્વાન્તે મે દુર્ધરા પીડા તત્પીડાતો ગરીયસી ।
ત્રિદિવે દિતિજાતેભ્યો ભૂમૌ મૃત્યુરુગાદિભિઃ ॥ ૨,૧.૫૯॥

ઇષ્ટવસ્તુવિયો ગૈશ્ચ પાતાલે મામકં ભયમ્ ।
એવં ન નિર્ભયં સ્થાનમન્યદીશ ભવત્પદાત્ ॥ ૨,૧.૬૦॥

અસત્યં સ્વપ્નમાયાવત્કાલેન કવલીકૃતમ્ ।
તત્રાપિ ભારતે વર્ષે બહુદુઃખસ્ય ભાગિનઃ ॥ ૨,૧.૬૧॥

જના દૃષ્ટા મયા રાગદ્વેષમોહાદિવિપ્લુતાઃ ।
કેચિદન્ધાઃ કેકરાક્ષાસ્ખલદ્વાચસ્તુ પઙ્ગવઃ ॥ ૨,૧.૬૨॥

ખઞ્જાઃ કાણાશ્ચ બધિરા મૂકાઃ કુષ્ઠાશ્ચ લોમશાઃ ।
નાનારોગપરીતાશ્ચ ખપુષ્પાચ્ચાભિમાનિનઃ ॥ ૨,૧.૬૩॥

તેષાં દોષસ્ય વૈચિત્ર્યં મૃત્યોર્ગોચરતામપિ ।
દૃષ્ટ્વા પ્રસુમનાઃ પ્રાપ્તઃ કો મૃત્યુશ્ચિત્રતા કથમ્ ॥ ૨,૧.૬૪॥

મૃતિર્યસ્ય વિધાનેન મરણાદપ્યનન્તરમ્ ।
વિધિનાબ્દક્રિયા યસ્ય ન સ દુર્ગતિમાપ્નુયાત્ ॥ ૨,૧.૬૫॥

ઋષિભ્યસ્તુ મયા પૂર્વમિતિ સામાન્યતઃ શ્રુતમ્ ।
જ્ઞાનાય તદ્વિશેષસ્ય પૃચ્છામીદમિતિ પ્રભો ॥ ૨,૧.૬૬॥

મ્રિયમાણસ્ય કિં કૃત્યં કિં દાનં વાસવાનુજ ।
વાહમૃત્યોરન્તરાલે કો વિધિર્દહનસ્ય ચ ॥ ૨,૧.૬૭॥

સદ્યો વિલમ્બતો વા કિં દેહમન્યં પ્રપદ્યતે ।
સંયમન્યાં ક્રમ્યમાણમાવર્ષં કા મૃતિક્રિયા ॥ ૨,૧.૬૮॥

પ્રાયશ્ચિત્તં દુર્મતેઃ કિં પઞ્ચકાદિમૃતસ્ય ચ ।
પ્રસાદં કુરુ મે મોહં છેત્તુમર્હસ્યશેષતઃ ॥ ૨,૧.૬૯॥

સર્વમન્તેમયા પૃષ્ટં બ્રૂહિ લોકહિતાય વૈ ॥ ૨,૧.૭૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશાખ્યે ધર્મકાણ્ડે
(પ્રેતખણ્ડે) શ્રીકૃષ્ણગરુડસંવાદે પ્રશ્નપ્રપઞ્ચો નામ પ્રથમોऽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨
શ્રીકૃષ્ણ ઉવાચ ।
સાધુ પૃષ્ટં ત્વયા ભદ્ર માનુષાણાં હિતાય વૈ ।
શૃણુષ્વાવહિતો ભૂત્વા સર્વમેવૌર્ધ્વદૈહિકમ્ ॥ ૨,૨.૧॥

સમ્યગ્વિભેદરહિતં શ્રુતિસ્મૃતિસમુદ્ધૃતમ્ ।
યન્ન દૃષ્ટં સુરૈઃ સેન્દ્રૈર્યોગિભિર્યોગચિન્તકૈઃ ॥ ૨,૨.૨॥

ગુહ્યદ્ગુહ્યતરં તચ્ચ નાખ્યાતં કસ્યચિત્ક્વચિત્ ।
ભક્તસ્ત્વં હિ મહાભાગ વૈનતેયં બ્રવીમિ તે ॥ ૨,૨.૩॥

અપુત્રસ્ય ગતિર્નાસ્તુ સ્વર્ગો નૈવ ચ નૈવ ચ ।
યેન કેનાપ્યુપાયેન કાર્યં જન્મ સુતસ્ય હિ ॥ ૨,૨.૪॥

તારયેન્નરકાત્પુત્રો યદિ મોક્ષો ન વિદ્યતે ।
સ્કન્ધઃ પુત્રેણ કર્તવ્યો હ્યગ્નિદાતા ચ પૌત્રકઃ ॥ ૨,૨.૫॥

તિલદર્ભૈશ્ચ ભૂમ્યાં વૈ કુટી ઋતુમતી ભવેત્ ।
પઞ્ચ રત્નાનિ વક્ત્રે તુ યેન જીવઃ પ્રરોહતિ ॥ ૨,૨.૬॥

યદા પુષ્પં પ્રનષ્ટં હિ ક્વ તદા ગર્ભધારણમ્ ।
આદરાચ્ચ તતો ભૂમૌ યેન ગર્ભં પ્રધાર્યતે ॥ ૨,૨.૭॥

લેપ્યા તુ ગોમયૈર્ભૂમિસ્તિલાન્દર્ભાન્વિનિઃ ક્ષિપેત્ ।
તસ્યામેવાતુરો મુક્તઃ સર્વં દહતિ કિલ્બિષમ્ ॥ ૨,૨.૮॥

દર્ભતૂલી નયેત્સ્વર્ગમાતુરસ્ય ન સંશયઃ ।
દર્ભાંસ્તત્ર ક્ષિપેદ્વાથ તૂલીગેન્દુકમધ્યતઃ ॥ ૨,૨.૯॥

સર્વત્ર વસુધાપૂતા યત્ર લેપો ન વિદ્યતે ।
યત્ર લેપઃ સ્થિતસ્તત્ર પુનર્લેપેન શુધ્યતિ ॥ ૨,૨.૧૦॥

યાતુધાનાઃ પિશાચાશ્ચ રાક્ષસાઃ ક્રૂરકર્મિણઃ ।
અલેપં હ્યાતુરં મુક્તં વિશન્ત્યેતે વિયોનયઃ ॥ ૨,૨.૧૧॥

નિત્યહોમસ્તથા શ્રાદ્ધં પાદશૌચં દ્વિજે તથા ।
મણ્ડલેન વિના ભૂમ્યામાતુરો મુચ્યતે ન હિ ॥ ૨,૨.૧૨॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ શ્રીર્હુતાશસ્તથૈવ ચ ।

મણ્ડલે ચોપતિષ્ઠન્તિ તસ્માત્કુર્વીત મણ્ડલમ્ ॥ ૨,૨.૧૩॥

અન્યથા મ્રિયતે વાલો વૃદ્ધસ્તાર્ક્ષ્ર્યયુવાથવા ।
યોન્યન્તરં ન ગચ્છેત્સ ક્રીડતે વાયુના સહ ॥ ૨,૨.૧૪॥

મિશ્રિતં લોહિતામિશ્રં તદેવં જન્મ જીયતે ।
તસ્યૈવ વાયુભૂતસ્ય ન શ્રાદ્ધં નોદકક્રિયા ॥ ૨,૨.૧૫॥

મમ સ્વેદસમુદ્ભૂતાસ્તિલાસ્તાર્ક્ષ્ર્ય પવિત્રકાઃ ।
અસુરા દાનવા દૈત્યા વિદ્રવન્તિ તિલૈસ્તથા ॥ ૨,૨.૧૬॥

તિલાઃ શ્વેતાસ્તિલા કૃષ્ણાસ્તિલા ગોમૂત્રસંન્નિભાઃ ।
દહન્તુ તે મે પાપાનિ શરીરેણ કૃતાનિ વૈ ॥ ૨,૨.૧૭॥

એક એવ તિલો દત્તો હેમદ્રોણતિલૈઃ સમઃ ।
તર્પણે દાનહોમેષુ દત્તો ભવતિ ચાક્ષયઃ ॥ ૨,૨.૧૮॥

દર્ભા રોમસમુદ્ભૂતાસ્તિલાઃ સ્વેદેષુ નાન્યથા ।
દેવતા દાનવાસ્તૃપ્તાઃ શ્રાદ્ધેન પિતરસ્તથા ॥ ૨,૨.૧૯॥

પ્રયોગવિધિના બ્રહ્મા વિશ્વં ચાપ્યુપજીવનામ્ ।
અપસવ્યાદિતો બ્રહ્મા પિતરો દેવદેવતાઃ ॥ ૨,૨.૨૦॥

તેન તે પિતરસ્તૃપ્તા અપસવ્યે કૃતે સતિ ।
દર્ભમૂલે સ્થિતો બ્રહ્મા મધ્યે દેવો જનાર્દનઃ ॥ ૨,૨.૨૧॥

દર્ભાગ્રે શઙ્કરં વિદ્યાત્ત્રયો દેવાઃ કુશે સ્મૃતાઃ ।
વિપ્રા મન્ત્રાઃ કશા વહ્નિસ્તુલસી ચ ખગેશ્વર ॥ ૨,૨.૨૨॥

નૈતે નિર્માલ્યતાં યાન્તિ ક્રિયમાણાઃ પુનઃ પુનઃ ।
તુલસી બ્રાહ્મણા ગાવો વિષ્ણુરેકાદશી ખગ ॥ ૨,૨.૨૩॥

પઞ્ચ પ્રવહણાન્યે ભવાબ્ધૌ મજ્જતાં નૃણામ્ ।
વિષ્ણુરેકાદશી ગીતા તુલસી વિપ્રધેનવઃ ॥ ૨,૨.૨૪॥

અસારે દુર્ગસંસારે ષટ્પદી મુક્તિદાયિની ।
તિલાઃ પવિત્રમતુલં દર્ભાશ્ચાપિ તુલસ્યથ ॥ ૨,૨.૨૫॥

નિવારયન્તિ ચૈતાનિ દુર્ગતિં યાન્તમાતુરમ્ ।
હસ્તાભ્યામુદ્ધરેદ્દર્ભાંસ્તોયેન પ્રોક્ષયેદ્ભુવિ ॥ ૨,૨.૨૬॥

મૃત્યુકાલે ક્ષિપેદ્દર્ભાન્કરયોરાતુરસ્ય ચ ।
દર્ભૈસ્તુ ક્ષિપ્યતે યોઽસૌ દર્ભૈસ્તુ પરિવેષ્ટિતઃ ॥ ૨,૨.૨૭॥

વિષ્ણુલોકે સ વૈ યાતિ મન્ત્રહીનોઽપિ માનવઃ ।
તૂલીં કૃત્વા કૃતૌ પાદૌ સંસ્થિતૌ ક્ષિતિપૃષ્ઠતઃ ॥ ૨,૨.૨૮॥

પ્રાયાશ્ચિત્તં વિશુદ્ધાગ્નૌ સંસારેઽસારસાગરે ।
ગોમયેનોપલિમ્પેત્તુ દર્ભાસ્તરણસંસ્થિતે ॥ ૨,૨.૨૯॥

યને દત્તેન દાનેન સર્વં પાપં વ્યપોહતિ ।
લવણં તદ્રસં દિવ્યં સર્વકામપ્રદં નૃણામ્ ॥ ૨,૨.૩૦॥

યસ્માદન્નરસાઃ સર્વે નોત્કટા લવણં વિના ।
પિતૃણાં ચ પ્રિયં ભવ્યં તસ્માત્સ્વર્ગપ્રદં ભવેત્ ॥ ૨,૨.૩૧॥

વિષ્ણુદેહસમુદ્ભૂતો યતોઽયં લવણો રસઃ ।
એતત્સલવણં દાનં તેન શંસન્તિ યોગિનઃ ॥ ૨,૨.૩૨॥

બ્રાહ્મણક્ષત્રિયવિશાં સ્ત્રીણાં શૂદ્રજનસ્ય ચ ।
આતુરસ્ય યદા પ્રાણા ન યાન્તિ વસુધાતલે ॥ ૨,૨.૩૩॥

લવણં તુ તદા દેયં દ્વારસ્યોદ્ઘાટનં દિવઃ ।
અન્યચ્ચ શ‍ૃણુ પક્ષીન્દ્ર મૃત્યો રૂપં પ્રપચ્ચતઃ ॥ ૨,૨.૩૪॥

યસ્ય કાલેન નો યાયાદ્વિયોગઃ પ્રાણદેહયોઃ ।
પ્રાણિનશ્ચ સ્વસમયે મૃત્યુરત્યન્તવિસ્મૃતિઃ ॥ ૨,૨.૩૫॥

યથા વાયુર્જલધરાન્વિકર્ષતિ યતસ્તતઃ ।
તદ્વજ્જલદવત્તાર્ક્ષ્ય કાલસ્યૈવ વશાનુગાઃ ॥ ૨,૨.૩૬॥

સાત્ત્વિકા રાજસાશ્ચૈવ તામસા યે ચ કેચન ।
ભાવાઃ કાલાત્મકાઃ સર્વે પ્રવર્તન્તે હિ જન્તુષુ ॥ ૨,૨.૩૭॥

આદિત્યશ્ચન્દ્રમાઃ શમ્ભુરાપો વાયુઃ શતક્રતુઃ ।
અગ્નિઃ ખં પૃથિવી મિત્ર ઓષધ્યો વસવસ્તથા ॥ ૨,૨.૩૮॥

સરિતઃ સાગરાશ્ચૈવ ભાવાભાવૌ ચ સર્પહન્ ।
સર્વે કાલેન સૃજ્યન્તે સંક્ષિપ્યન્તે યથા પુનઃ ॥ ૨,૨.૩૯॥

કાલેન સંહ્રિયન્તે ચ નૂનં મૃત્યાવુપસ્થિતે ।
દૈવયોગાત્તદા વ્યાધિઃ કશ્ચિદુત્પદ્યતે ખગ ॥ ૨,૨.૪૦॥

વૈકલ્યમિન્દ્રિયાણાં ચ બલૌ જોરંહસાં ભવેત્ ।
યુગપદ્વૃશ્ચિકકોટિશૂકદંશો ભવેદ્યદિ ॥ ૨,૨.૪૧॥

તદાનુમીયતે તેન પીડા મૃત્યુભવા ખગ ।
તતઃ ક્ષણેન ચૈતન્યે વિકલે જડતાં ગતે ॥ ૨,૨.૪૨॥

પ્રિચાલ્યન્તે તતઃ પ્રાણા યામ્યૈર્નિકટવર્તિભિઃ ।
બીભત્સં તુ તદા રૂપં પ્રાણૈઃ કણ્ઠગતૈર્ભવેત્ ॥ ૨,૨.૪૩॥

ફેમુદ્ગિરતે સોઽથ મુખં લાલાકુલં ભવેત્ ।
અઙ્ગુષ્ઠમાત્રપુરુષો હાહા કુર્વંસ્તતસ્તનોઃ ॥ ૨,૨.૪૪॥

તદૈવ નીયતે દ્વતૈર્યામ્યૈર્વીક્ષન્સ્વકં ગૃહમ્ ।
ભૂય એવ હિતે તાત મૃત્યુકાલદશામિમામ્ ॥ ૨,૨.૪૫॥

અષ્મા પ્રકુપિતઃ કાયે તીવ્રવાયુસમીરિતઃ ।
ભિનત્તિ મર્મસ્થાનાનિ દીપ્યમાનો નિરિન્ધનઃ ॥ ૨,૨.૪૬॥

ઉદાનો નામ પવનસ્તતશ્ચોર્ધ્વં પ્રવર્તતે ।
ભક્તાનામબુભુક્ષાણામધોગતિનિરોધકૃત્ ॥ ૨,૨.૪૭॥

યૈર્નાનૃતાનિ ચોક્તાનિ પ્રીતિભેદઃ કૃતો ન ચ ।
આસ્તિકઃ શ્રદ્દધાનશ્ચ સ સુખં મૃત્યુમૃચ્છતિ ॥ ૨,૨.૪૮॥

યો ન કામાન્ન સંરંભાન્ન દ્વેષાદ્ધર્મમુત્સૃજેત્ ।
યથોક્તકારી સૌમ્યશ્ચ સ સુખં મૃત્યુમૃચ્છતિ ॥ ૨,૨.૪૯॥

મોહજ્ઞાનપ્રદાતારઃ પ્રાપ્નુવન્તિ મહત્તમઃ ।
કૂટસાક્ષી મૃષાવાદી યે ચ વિશ્વાસઘાતકાઃ ॥ ૨,૨.૫૦॥

તે મોહં મૃત્યુમૃચ્છન્તિ તથા યે વેદનિન્દકાઃ ।
વિભીષકાઃ પૂતિગન્ધા યષ્ટિમુદ્ગરપાણયઃ ॥ ૨,૨.૫૧॥

આગચ્છન્તિ દુરાત્માનો યમસ્ય પુરુષાસ્તદા ।
પ્રાપ્તે ત્વીદૃક્પથે ઘોરે જાયતે તસ્ય વેપથુઃ ॥ ૨,૨.૫૨॥

ક્રન્દત્યવિરતં સોઽપિ પિતૃમાતૃસુતાનપિ ।
સાસ્ય વાગસ્ફુટા યત્નેનૈકવર્ણા વિભાસતે ॥ ૨,૨.૫૩॥

દૃષ્ટિર્વૈ ભ્રામ્યતે ત્રાસાચ્છ્વાસાચ્છુષ્યતિ ચાનનમ્ ।

સ તતો વેદનાવિષ્ટસ્તચ્છરીરં વિમુઞ્ચતિ ॥ ૨,૨.૫૪॥

અસ્પૃશ્યં કુત્સનીયં ચ તત્ક્ષણાદેવ જાયતે ।
ઉક્તં મૃત્યોઃ સ્વરૂપં તુ પ્રસઙ્ગાદન્યદપ્યથ ॥ ૨,૨.૫૫॥

વૈચિત્ર્યસ્યોત્તરં પ્રશ્ને દ્વિતીયસ્ય વદામિ તે ।
કર્મણાં પ્રાક્તનાનાં તુ તદસત્ત્વેનં ભદેતઃ ॥ ૨,૨.૫૬॥

ભવેદ્ભોગસ્ય વૈચિત્ર્યં ભ્રામ્યતાં પ્રાણિનામિહ ।
દેવત્વમસુરત્વં ચ યક્ષત્વાદિસુખપ્રદમ્ ॥ ૨,૨.૫૭॥

માનુષત્વં પશુત્વં ચ પક્ષિત્વાદ્યતિદુઃખદમ્ ।
કર્મણાં તારતમ્યેન ભવતીહ ખગેશ્વર ॥ ૨,૨.૫૮॥

અત્ર તે કીર્તયિષ્યામિ વિપાકં કર્મણામહમ્ ।
વૈચિત્ર્યસ્ય સ્પુટત્વાયયૈર્જીવઃ સંસરત્યયમ્ ॥ ૨,૨.૫૯॥

મહાપાતકજાન્ઘોરાન્નરકાન્પ્રાપ્ય દારુણાન્ ।
કર્મક્ષયાત્પ્રજાયન્તે મહાપાતકિનઃ ક્ષિતૌ ॥ ૨,૨.૬૦॥

જાયન્તે લક્ષણૈર્યૈસ્તુતાનિ મે શૃણુ સત્તમ ।
મૃગાશ્વસૂકરોષ્ટ્રાણાં બ્રહ્મહા યોનિમૃચ્છતિ ॥ ૨,૨.૬૧॥

કૃમિકીટપતઙ્ગત્વં સ્વર્ણહારી સમાપ્નુયાત્ ।
તૃણગુલ્મતાત્વં ચ ક્રમશો ગુરુતલ્પગઃ ॥ ૨,૨.૬૨॥

બ્રહ્મહા ક્ષયરોગી સ્યાત્સુરાપઃ શ્યાવદન્તકઃ ।
હેમહારી તુ કુનખી દુશ્ચર્મા ગુરુતલ્પગઃ ॥ ૨,૨.૬૩॥

યો યેન સંવસત્યેષાં સ તલ્લિઙ્ગોઽભિજાયતે ।
સંવત્સરેણ પતતિ પતિતેન સહાચરન્ ॥ ૨,૨.૬૪॥

સંલાપસ્પર્શનિઃ શ્વાસસહયાનાશનાસનાત્ ।
યાજનાધ્યાપનાદ્યૌનાત્પાપં સંક્રમતે નૃણામ્ ॥ ૨,૨.૬૫॥

ગત્વા દારાન્પરેષાઞ્ચ બ્રહ્મસ્વમપહૃત્ય ચ ।
અરણ્યે નિર્જને દેશે જાયતે બ્રહ્મરાક્ષસઃ ॥ ૨,૨.૬૬॥

હીનજાતૌ પ્રજાયેત રત્નાનામપહારકઃ ।
પત્રં ચ શાખિનો હૃત્વા ગન્ધાંશ્છુચ્છુન્દરી પુમાન્ ॥ ૨,૨.૬૭॥

મૂષકો ધાન્યહારી સ્યાદ્યાનમુષ્ટ્રઃ ફલં કપિઃ ।
નિર્મન્ત્રભોજનાત્કાકો ગૃધ્રો હૃત્વા હ્યુપસ્કરમ્ ॥ ૨,૨.૬૮॥

મધુદંશઃ ફલં ગૃધ્રો ગાં ગોધાગ્નિં બકસ્તથા ।
સ્યાચ્છ્વેતકુષ્ઠી સ્ત્રીવસ્ત્ર હ્યરુચી રસહારકઃ ॥ ૨,૨.૬૯॥

કાંસ્યહારી તુ હંસઃ સ્યાત્પરસ્વસ્ય ચ હારકઃ ।
અપસ્મારી ગુરોર્હન્તા ક્રૂરકૃદ્ધામનો ભવેત્ ॥ ૨,૨.૭૦॥

ધર્મપત્નીં ત્યજચ્છબ્દવેધી પ્રાણી ભવેત્ક્ષિતૌ ।
દેવવિપ્રસ્વાપહારી પાણ્ડુરઃ પરમાંસભુક્ ॥ ૨,૨.૭૧॥

ભક્ષ્યાભક્ષ્યો ગણ્ડમાલી મહારોગી પ્રજાયતે ।
ન્યાસાપહારી કાણઃ સ્યાસ્ત્રીજીવઃ ખઞ્જકો ભવેત્ ॥ ૨,૨.૭૨॥

કૌમારદારત્યાગી ચ દુર્ભગોઽથૈ કમિષ્ટભુક્ ।
વાતગુલ્મી વિપ્રયોષિદ્ગામી વા જમ્બુકો ભવેત્ ॥ ૨,૨.૭૩॥

શય્યાહર્તા ક્ષપણકઃ પતઙ્ગો વસ્ત્રહારકઃ ।
માત્સર્યાદપિ જાત્યન્ધો કપાલી દીપહારકઃ ॥ ૨,૨.૭૪॥

કૌશિકો મિત્રહન્તા ચ ક્ષયી પિત્રાદિનિન્દકઃ ।
સ્ખલદ્વાગનૃતવાદી કૂટસાક્ષી જલોદરી ॥ ૨,૨.૭૫॥

મશકઃ સોઽથ ચછિન્નોષ્ઠો વિવાહે વિઘ્નકૃદ્ભવેત્ ।
સ્યાદ્વાથ વૃષલઃ સોઽયં ચત્વરે વૈ વિણ્મૂત્રકૃત્ ॥ ૨,૨.૭૬॥

મૂત્રકૃચ્છ્રી દૂષકસ્તુ કન્યાયાઃ ક્લીબતામિયાત્ ।
દ્વીપી સ્યાદ્વેદવિક્રેતા વરાહોઽયાજ્યયાજકઃ ॥ ૨,૨.૭૭॥

યતસ્તતોઽશ્નન્માર્જારો ખદ્યોતો વહદાહકઃ ।
કૃમિઃ પર્યુષિતાદઃ સ્યાન્મત્સરી ભ્રમરો ભવેત્ ॥ ૨,૨.૭૮॥

અગ્ન્યુત્સાદી તુ કુષ્ઠી સ્યાદદત્તાઽદાનતો વૃષઃ ।
સર્પો ગોહારકોઽન્નસ્ય હારકઃ સ્યાદજીર્ણવાન્ ॥ ૨,૨.૭૯॥

જલહારી તુ મત્સ્યઃ સ્યાત્ક્ષીરહારી બલાકિકા ।
અન્નં પર્યુષિતં વિપ્રે પ્રદદત્કુબ્જતાં વ્રજેત્ ॥ ૨,૨.૮૦॥

ફલાનિ હરતે યસ્તુ સન્તતિર્મ્રિયતે ખગ ।
અદત્ત્વા ભક્ષ્યમશ્નાતિ હ્યનપત્યો ભવેન્નરઃ ॥ ૨,૨.૮૧॥

પ્રવજ્યાગમનાદ્રાજન્ભવેન્મરુપિશાચકઃ ।
ચાતકો જલહર્તા સ્યાજ્જન્માન્ધઃ પુંસ્તકં હરન્ ॥ ૨,૨.૮૨॥

પ્રતિશ્રુત્ય દ્વિજેભ્યોઽર્થમદદજ્જમ્બુકો ભવેત્ ।
પરિવાદાદિજાતીનાં લભતે કાચ્છર્પીં તનુમ્ ॥ ૨,૨.૮૩॥

દુર્ભગઃ ફલવિક્રેતા વૃકશ્ચ વૃષલીપતિઃ ।
માર્જારોઽગ્નિં પદા સ્પૃષ્ટ્વા રોગવાન્પરમાંસભુક્ ॥ ૨,૨.૮૪॥

જલપ્રસ્ત્રવણં યસ્તુ ભિન્દ્યાન્મત્સ્યો ભવેન્નરઃ ।
હરેઃ કથાં ન શ ૃણ્વન્તિ યે ન સાધુજનસ્તવમ્ ॥ ૨,૨.૮૫॥

તાન્નરાન્કર્ણમૂલોઽયં વ્યાપ્નુયાન્નેતરાઞ્જનાન્ ।
પરસ્યાનનસંસ્થં યો ગ્રાસં હરિ મન્દધીઃ ॥ ૨,૨.૮૬॥

દેવોપકરણાન્યેનં ગણ્ડમાલિનમીહતે ।
દમ્ભેનાચરતે ધર્મં ગજચર્મા ભવેત્તુ સઃ ॥ ૨,૨.૮૭॥

શિરોઽર્તિપ્રમુખા રોગા યાન્તિ વિશ્વાસઘાતકમ્ ।
લિઙ્ગપીડી શિવસ્વં ચ શિવનિર્માલ્યમેવ ચ ॥ ૨,૨.૮૮॥

સ્ત્રિયોઽપ્યનેન માર્ગેણ હૃત્વા દોષમવાપ્નુયુઃ ।
એતેષામેવ જન્તૂનાં ભાર્યાત્વમુપજાયતે ॥ ૨,૨.૮૯॥

ભોગાન્તે નરકસ્યૈતત્સર્વમિત્યવધારય ।
ખઘ પ્રદર્શ્યમેતત્તુ મયોક્તં તે સમાસતઃ ।
દ્રવ્યપ્રકારા હિ યથા તથૈવ પ્રાણિજાતયઃ ॥ ૨,૨.૯૦॥

એવં વિચિત્રૈર્નિજકર્મભિર્નૃણાં સુખસ્ય દુઃખસ્ય ચ જન્મનામપિ ।
વૈચિત્ર્યમુક્તં શુભકર્મતઃ શુભં તથાશુભાચ્ચાશુભમીરયન્તિ ॥ ૨,૨.૯૧॥

એતત્તે સર્વમાખ્યાતં યત્પૃષ્ટોઽહમિહ ત્વયા ॥ ૨,૨.૯૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે પ્રતકા(ખ)ણ્ડે
શ્રીકૃષ્ણગરુડસંવાદે ઔર્ધ્વદેહિકવિધિકર્મવિપાકયોર્વર્ણનં નામ દ્વિતીયોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩
સૂત ઉવાચ ।

એવમુત્સાહિતઃ પક્ષી સ્વરૂપં નિરયસ્ય તુ ।
પપ્રચ્છનરકાણ્યેવં શ્રુત્વા ચોત્કૂલિતાન્તરઃ ॥ ૨,૩.૧॥

ગરુડ ઉવાચ ।
નરકાણાં સ્વરૂપં મે વદ યેષુ વિકર્મિણઃ ।
પાત્યન્તે દુઃખભૂયિષ્ઠાસ્તેષાં ભેદાંશ્ચ કીર્તય ॥ ૨,૩.૨॥

શ્રીભગવાનુવાચ ।
નરકાણાં સહસ્રાણિ વર્તન્તે હ્યરુણાનુજ ।
શક્યં વિસ્તરતો નૈવ વક્તું પ્રાધાન્યતો બ્રુવે ॥ ૨,૩.૩॥

રૌરવં નામ નરકં મુખ્યં તદ્વૈનિબોધ મે ।
રૌરવે કૂટસાક્ષી તુ યાતિ યશ્ચાનૃતી નરઃ ॥ ૨,૩.૪॥

યોજનાનાં સહસ્રે દ્વે રૌરવો હિ પ્રમાણતઃ ।
જાનુમાત્રપ્રમાણં તુ તત્ર ગર્તં સુદુસ્તરમ્ ॥ ૨,૩.૫॥

તત્રાઙ્ગારચયૌઘેન કૃતં તદ્ધરણીસમમ્ ।
તત્રાગ્નિના સુતીવ્રેણ તાપિતાઙ્ગારભૂમિના ॥ ૨,૩.૬॥

તન્મધ્યે પાપકર્માણં વિમુઞ્ચન્તિ યમાનુગાઃ ।
સ દહ્યમાનસ્તીવ્રેણ વહ્નિના પરિધાવતિ ॥ ૨,૩.૭॥

પદેપદે ચ પાદોઽસ્ય સ્ફુટ્યતે શીર્યતે પુનઃ ।
અહોરાત્રેણોદ્ધરણં પાદન્યાસેન ગચ્છતિ ॥ ૨,૩.૮॥

એવં સહસ્રં વિસ્તીર્ણં યોજનાનાં વિમુચ્યતે ।
તતોઽન્યત્પાપશુદ્ધ્યર્થં તાદૃઙ્નિરયમૃચ્છતિ ॥ ૨,૩.૯॥

રૌરવસ્તે સમાખ્યાતઃ પ્રથમો નરકો મયા ।
મહારૌરવસંજ્ઞં તુ શૃણુષ્વ નરકં ખગ ॥ ૨,૩.૧૦॥

યોજનાનાં સહસ્રાણિ સન્તિ પઞ્ચ સમન્તતઃ ।
તત્ર તામ્રમયી ભૂમિરધસ્તસ્યા હુતાશનઃ ॥ ૨,૩.૧૧॥

તયા તપન્ત્યા સા સર્વા પ્રોદ્યદ્વિદ્યુત્સમપ્રભા ।
વિભાવ્યતે મહારૌદ્રા પાપિનાં દર્શનાદિષુ ॥ ૨,૩.૧૨॥

તસ્યાં બદ્ધકરાભ્યાં ચ પદ્ભ્યાં ચૈવ યમાનુગૈઃ ।
મુચ્યતે પાપકૃન્મધ્યે લુણ્ઠમાનઃ સ ગચ્છતિ ॥ ૨,૩.૧૩॥

કાકૈર્બકૈર્વૃકોલૂકૈર્મશકૈર્વૃશ્ચિકૈસ્તથા ।
ભક્ષ્યમાણૈસ્તથા રૌદ્રૈર્ગતો માર્ગે વિકૃષ્યતે ॥ ૨,૩.૧૪॥

દહ્યમાનો ગતમતિર્ભ્રાન્તસ્તાતેતિ ચાકુલઃ ।
વદત્યસકૃદુદ્વિગ્નો ન શાન્તિમધિગચ્છતિ ॥ ૨,૩.૧૫॥

એવં તસ્માન્નરૈર્મોક્ષસ્ત્વતિક્રાન્તૈરવાપ્યતે ।
વર્ષાયુતાયુતૈઃ પાપં યૈઃ કૃતં દુષ્ટબુદ્ધિભિઃ ॥ ૨,૩.૧૬॥

તથાન્યસ્તુ તતો નામ સોઽતિશીતઃ સ્વભાવતઃ ।
મહારૌરવવદ્દીર્ઘસ્તથાન્ધતમસા વૃતઃ ॥ ૨,૩.૧૭॥

શીતાર્તાસ્તત્ર બધ્યન્તે નરાસ્તમસિ દારુણે ।
પરસ્પરં સમાસાદ્ય પરિરભ્યાશ્રયન્તિ તે ॥ ૨,૩.૧૮॥

દન્તાસ્તેષાં ચ ભજ્યન્તે શીતાર્તિપરિકમ્પિતાઃ ।
ક્ષુત્તૃષાતિબલાઃ પક્ષિન્નથ તત્રાપ્યુપદ્રવાઃ ॥ ૨,૩.૧૯॥

હિમખણ્ડવહો વાયુર્ભિનત્ત્યસ્થીનિ દારુણઃ ।
મજ્જાસૃગસ્થિગલિતમશ્નન્ત્યત્ર ક્ષુધાન્વિતાઃ ॥ ૨,૩.૨૦॥

આલિઙ્ગ્યમાના ભ્રામ્યન્તે પરસ્પરસમાગમે ।
એવં તત્રાપિ સુમહાન્ક્લેશસ્તમસિ માનવૈઃ ॥ ૨,૩.૨૧॥

પ્રાપ્યતે શકુનિશ્રેષ્ઠ યો બહૂકૃતસઞ્ચયઃ ।
નિકૃન્તન ઇતિ ખ્યાતસ્તતોઽન્યો નરકોત્તમઃ ॥ ૨,૩.૨૨॥

કુલાલચક્રાણિ તત્ર ભ્રામ્યન્ત્યવિરતં ખગ ।
તેષ્વાપાદ્યે નિકૃષ્યન્તે કાલસૂત્રેણ માનવાઃ ॥ ૨,૩.૨૩॥

યમાનુમાઙ્ગુલિસ્થેન આપાદતલમસ્તકમ્ ।
ન ચૈષાં જીવિતભ્રંશો જાયતે પક્ષિસત્તમ ॥ ૨,૩.૨૪॥

છિન્નાનિ તેષાં શતશઃ ખણ્ડાન્યૈક્યં વ્રજન્તિ હિ ।
એવં વર્ષસહસ્રાણિ ભ્રામ્યન્તે પાપકર્મિણઃ ॥ ૨,૩.૨૫॥

તાવદ્યાવદશેષં ચ તત્પાપં સંક્ષયં ગતમ્ ।
અપ્રાતષ્ઠં ચ નરકં શૃણુષ્વ ગદતો મમ ॥ ૨,૩.૨૬॥

તત્રસ્થૈર્નારકૈર્દુઃખમસહ્યમનુભૂયતે ।
તાન્યેવ તત્ર ચક્રાણિ ઘટીયન્ત્રાણિ ચાન્યતઃ ॥ ૨,૩.૨૭॥

દુઃખસ્ય હેતુભૂતાનિ પાપકર્મકૃતાં નૃણામ્ ।
ચક્રેષ્વારોપિતાઃ કેચિદ્ભ્રામ્યન્તે તત્ર માનવાઃ ॥ ૨,૩.૨૮॥

યાવદ્વર્ષસહસ્રાણિ ન તેષાં સ્થિતિરન્તરા ।
ઘટીયન્ત્રેષુ બદ્ધા યે બદ્ધા તોયવટી યથા ॥ ૨,૩.૨૯॥

ભ્રામ્યન્તે માનવા રક્તમુદ્ગિરન્તઃ પુનઃ પુનઃ ।
અન્ત્રૈર્મુખવિનિષ્ક્રાન્તૈર્નેત્રૈરન્ત્રાવલમ્બિભિઃ ॥ ૨,૩.૩૦॥

દુઃખાનિ પ્રાપ્નુવન્તીહ યાન્યસહ્યાનિ જન્તુભિઃ ।
અસિપત્રવનં નામ નરકં શ ૃણુ ચાપરમ્ ॥ ૨,૩.૩૧॥

યોજનાનાં સહસ્રં યો જ્વલત્યગ્ન્યાશ ૃતાવનિઃ ।
સપ્તતીવ્રકરાશ્ચૈણ્ડર્યત્ર તીવ્ર સુદારુણે ॥ ૨,૩.૩૨॥

પ્રતપન્તિ સદા તત્ર પ્રાણિનો નરકૌકસઃ ।
તન્મધ્યે ચરણં શીતસ્નિગ્ધપત્રં વિભાવ્યતે ॥ ૨,૩.૩૩॥

પત્રાણિ યત્ર ખણ્ડાનિ ફલાનાં પક્ષિસત્તમ ।
શ્વાનશ્ચ તત્ર સુબલાશ્ચરન્ત્યામિષભોજનાઃ ॥ ૨,૩.૩૪॥

મહાવક્ત્રા મહાદંષ્ટ્રા વ્યાઘ્રા ઇવ મહાબલાઃ ।
તતશ્ચ વનમાલોક્ય શિશિરચ્છાયમગ્રતઃ ॥ ૨,૩.૩૫॥

પ્રયાન્તિ પ્રાણિનસ્તત્ર ક્ષુત્તાપપરિપીડિતાઃ ।
માતર્ભ્રાતસ્તાત ઇતિ ક્રન્દમાનાઃ સુદુઃખિતાઃ ॥ ૨,૩.૩૬॥

દહ્યમાનાઙ્ઘ્રિયુગલા ધરણિસ્થેન વહ્નિના ।
તેષાં ગતાનાં તત્રાપિ અતિ શીતિઃ સમીરણઃ ॥ ૨,૩.૩૭॥

પ્રવાતિ તેન પાત્યન્તે તેષાં ખડ્ગાસ્તથોપરિ ।
છિન્નાઃ પતન્તિ તે ભૂમૌ જ્વલત્પાવકસંચયે ॥ ૨,૩.૩૮॥

લેલિહ્યમાને ચાન્યત્ર તપ્તાશેષમહીતલે ।
સારમેયાશ્ચ તે શીઘ્રં શાતયન્તિ શરીરતઃ ॥ ૨,૩.૩૯॥

તેષાં ખણ્ડાન્યનેકાનિ રુદતામતિભીષણે ।
અસિપત્રવનં તાત મયૈતત્પરિકીર્તિતમ્ ॥ ૨,૩.૪૦॥

અતઃ પરં ભીમતરં તપ્તકુંભં નિબોધ મે ।

સમન્તતસ્તપ્તકુમ્ભા વહ્નિજ્વાલાસમન્વિતાઃ ॥ ૨,૩.૪૧॥

જ્વલદગ્નિચયાસ્તપ્તતૈલાયશ્ચૂર્ણપૂરિતાઃ ।
એષુ દુષ્કૃતકર્માણો યામ્યૈઃ ક્ષિપ્તા હ્યધોમુખાઃ ॥ ૨,૩.૪૨॥

ક્વાથ્યન્તે વિસ્ફુટદ્ગાત્રા ગલન્મજ્જાજલાન્વિતાઃ ।
સ્ફુટત્કપાલેનત્રાસ્થિચ્છિદ્યમાના વિભીષણૈઃ ॥ ૨,૩.૪૩॥

ગૃધ્રૈરુત્પાટ્ય મુચ્યન્તે પુનસ્તેષ્વેવ વેગિતૈઃ ।
પુનશ્ચિમચિમાયન્તે તૈલનૈક્યં વ્રજન્તિ ચ ॥ ૨,૩.૪૪॥

દ્રવીભૂતૈઃ શિરોગાત્રૈઃ સ્નાયુમાંસત્વગાસ્થિભિઃ ।
તતો યામ્યૈર્નરૈરાશુ દર્વ્યાઘટ્ટનઘટ્ટિતાઃ ॥ ૨,૩.૪૫॥

કૃતાવર્તે મહાતૈલે ક્વાથ્યન્તે પાપકર્મિણઃ ।
એષ તે વિસ્તરેણોક્તસ્તપ્તકુમ્ભો મયા ખગ ॥ ૨,૩.૪૬॥

આદિમો રૌરવઃ પ્રોક્તો મહારૌરવકોઽપરઃ ।
અતિશીતસ્તૃતીયસ્તુ ચતુર્થો હિ નિકૃન્તનઃ ॥ ૨,૩.૪૭॥

અપ્રતિષ્ઠઃ પઞ્ચમઃ સ્યાદસિપત્રવનોઽપરઃ ।
સપ્તમસ્તપ્તકુમ્ભસ્તુ સપ્તૈતે નરકા મતાઃ ॥ ૨,૩.૪૮॥

શ્રૂયન્તેન્યાન્યપિ તથા નરકાણિ નરાધમાઃ ।
કર્મણાં તારતમ્યેન તેષુતેષુ પતન્તિ હિ ॥ ૨,૩.૪૯॥

તથા હિ નરકો રોધઃ શૂકરસ્તાલ એવ ચ ।
તપ્તકુમ્ભો મહાજ્વાલઃ શબલોઽથ વિમોહનઃ ॥ ૨,૩.૫૦॥

ક્રિમિશ્ચ ક્રિમભક્ષશ્ચ લાલાભક્ષો વિષઞ્જનઃ ।
અધઃ શિરાઃ પૂયવહો રુધિરાન્ધશ્ચ વિડ્ભુજઃ ॥ ૨,૩.૫૧॥

તથા વૈતરણી સૂ (મૂ) મસિપત્રવનં તથા ।
અગ્નિજ્વાલો મહાઘોરઃ સન્દંશો વાપ્યભોજનઃ ॥ ૨,૩.૫૨॥

તમશ્ચ કાલસૂત્રં ચ લોહશ્ચાપ્યભિદસ્તથા ।
અપ્રતિષ્ઠોઽપ્યવીચિશ્ચ નરકા એવમાદયઃ ॥ ૨,૩.૫૩॥

તામસા નરકાઃ સર્વે યમસ્ય વિષયે સ્થિતાઃ ।
યેષુ દુષ્કૃતકર્માણઃ પતન્તિ હિ પૃથક્પૃથક્ ॥ ૨,૩.૫૪॥

ભૂમેરધસ્તાત્તે સર્વે રૌરવાદ્યાઃ પ્રકીર્તિતાઃ ।
રોધો ગોઘ્નો ભ્રૂણહા ચ અગ્નિદાતા નરઃ પતેત્ ॥ ૨,૩.૫૫॥

સૂકરે બ્રહ્મહા મજ્જેત્સુરાપઃ સ્વર્ણતસ્કરઃ ।
તાલે પતેત્ક્ષત્રહન્તા હત્વા વૈશ્યં ચ દુર્ગતિઃ ॥ ૨,૩.૫૬॥

બ્રહ્મહત્યાં ચ યઃ કુર્યાદ્યશ્ચ સ્યાદ્ગુરુતલ્પગઃ ।
સ્વસૃગામી તપ્તકુમ્ભી તથા રાજભટોऽનૃતી ॥ ૨,૩.૫૭॥

તપ્તલોહેશ્ચ વિક્રેતા તથા બન્ધનરક્ષિતા ।
માધ્વી વિક્રયકર્તાં ચ યસ્તુ ભક્તં પરિત્યજેત્ ॥ ૨,૩.૫૮॥

મહાજ્વાલી દુહિતરં સ્નુષાં ગચ્છતિ યસ્તુ વૈ ।
વેદો વિક્રીયતે યૈશ્ચ વેદં દૂષયતે તુ યઃ ॥ ૨,૩.૫૯॥

ગુરું ચૈવાવમન્યન્તે વાક્ષરૈસ્તાડયન્તિ ચ ।
અગમ્યાગામી ચ નરો નરકં શબલં વ્રજેત્ ॥ ૨,૩.૬૦॥

વિમોહે પતતે શૂરે મર્યાદાં યો ભિનત્તિ વૈ ।
દુરિષ્ટં કુરુતે યસ્તુ કૃમિભક્ષં પ્રપદ્યતે ॥ ૨,૩.૬૧॥

દેવબ્રાહ્મણવિદ્વેષ્ટા લાલાભક્ષે પતત્યપિ ।
કુણ્ડકર્તા કુલાલશ્ચ ન્યાસહર્તા ચિકિત્સકઃ ॥ ૨,૩.૬૨॥

આરામેષ્વગ્નિદાતા ચ એતે યાન્તિ વિષઞ્જને ।
અસત્પ્રતિગ્રહી યસ્તુ તથૈવાયાજ્યયાજકઃ ॥ ૨,૩.૬૩॥

ન ક્ષત્રૈર્જીવતે યસ્તુ નરો ગચ્છેદધોમુખમ્ ।
ક્ષીરં સુરાં ચ માસં લાક્ષાં ગન્ધં રસં તિલાન્ ॥ ૨,૩.૬૪॥

એવમાદીનિ વિક્રીણન્ઘોરે પૂયવહે પતેત્ ।
યઃ કુક્કુટાન્નિબધ્નાતિ માર્જારાન્સૂકરાંશ્ચ તાન્ ।
પક્ષિણશ્ચ મૃગાંશ્છા ગાન્સોऽપ્યેવં નરકં વ્રજેત્ ॥ ૨,૩.૬૫॥

આજાવિકો માહિષિકસ્તથા ચક્રી ધ્વજી ચ યઃ ।
રઙ્ગોપજીવિકો વિપ્રઃ શાકુનિર્ગ્રામયાજકઃ ॥ ૨,૩.૬૬॥

અગારદાહી ગરદઃ કુણ્ડાશી સોમવિક્રયી ।
સુરાપો માંસભક્ષી ચ તથા ચ પશુઘાતકઃ ॥ ૨,૩.૬૭॥

રુધિરાન્ધે પતન્ત્યેતે પતન્ત્યેતે એવમાહુર્મનીષિણઃ ।

ઉપવિષ્ટન્ત્વેકપઙ્ક્ત્યાં વિષં સમ્ભોજયન્તિ યે ॥ ૨,૩.૬૮॥

પતન્તિ નિરયે ઘોરે વિડ્ભુજે નાત્ર સંશયઃ ।
મધુગ્રાહો વૈતરણીમાક્રોશી મૂત્રસંજ્ઞકે ॥ ૨,૩.૬૯॥

અસિપત્રવનેઽસૌચી ક્રોધનશ્ચ એતેદપિ ।
અગ્નિજ્વાલાં મૃગવ્યાધો ભોજ્યતે યત્ર વાયસૈઃ ॥ ૨,૩.૭૦॥

ઇજ્યાયાં વ્રતલોપાચ્ચ સન્દંશે નરકે પતેત્ ।
સ્કન્દન્તે યદિ વા સ્વપ્ને યતિનો બ્રહ્મચારિણઃ ॥ ૨,૩.૭૧॥

પુત્રૈરધ્યાપિતા યે ચ પુત્રૈરાજ્ઞાપિતાશ્ચ યે ।
તે સર્વે નરકં યાન્તિ નિરયં ચાપ્યભોજનમ્ ॥ ૨,૩.૭૨॥

વર્ણાશ્રમવિરુદ્ધાનિ ક્રોધહર્ષસમન્વિતાઃ ।
કર્માણિ યે તુ કુર્વન્તિ સર્વે નિરયવાસિનઃ ॥ ૨,૩.૭૩॥

ઉપરિષ્ટાત્સ્થિતો ઘોર ઉષ્ણાત્મા રૌરવો મહાન્ ।
સુદારુણઃ સુશીતાત્મા તસ્યા ધસ્તામસઃ સ્મૃતઃ ॥ ૨,૩.૭૪॥

એવમાદિક્રમેણૈવ સર્વેઽધોઽધઃ પરિસ્થિતાઃ ।
દુઃખોત્કર્ષશ્ચ સર્વેષુ કર્મસ્વપિ નિમિત્તતઃ ॥ ૨,૩.૭૫॥

સુખોત્કર્ષશ્ચ સર્વત્ર ધર્મસ્યેહનિમિતતઃ ।
પશ્યન્તિનરકાન્દેવા હ્યધોવક્ત્રાન્સુદારુણાન્ ॥ ૨,૩.૭૬॥

નારકાશ્ચાપિ તે દેવાન્સર્વાન્પશ્યન્તિ ઊર્ધ્વગાન્ ।
એતાન્યાન્યાનિ શતશો નરકાણિ વિયદ્ગતે ॥ ૨,૩.૭૭॥

દિનેદિને તુ નરકે પચ્યતે દહ્યતેન્યતઃ ।
શીર્યતે ભિદ્યતેઽન્યત્ર ચૂર્યતે ક્લિદ્યતેન્યતઃ ॥ ૨,૩.૭૮॥

ક્વથ્યતે દીપ્યતેઽન્યત્ર તથા વાતહતોઽન્યતઃ ।
એકં દિનં વર્ષશતપ્રમાણં નરકે ભવેત્ ॥ ૨,૩.૭૯॥

તતઃ સર્વેષુ નિસ્તીર્ણઃ પાપી તિર્યક્ત્વમશ્નુતે ।
કૃમિકીટપતઙ્ગેષુ સ્થાવરૈકશફેષુ ચ ॥ ૨,૩.૮૦॥

ગત્વા વનગજાદ્યેષુ ગોષ્વષુ તથૈવ ચ ।
ખરોઽશ્વોઽશ્વતરો ગૌરઃ શરભશ્ચમરી તથા ॥ ૨,૩.૮૧॥

એતે ચૈકશફાઃ ષટ્ચ શ ृણુ પઞ્ચનખાનતઃ ।
અન્યાસુ બહુપાપાસુ દુઃખદાસુ ચ યો નિષુ ॥ ૨,૩.૮૨॥

માનુષ્યં પ્રાપ્યતે કુબ્જો કુત્સિતો વામનોઽપિ વા ।
ચણ્ડાલપુક્કસાદ્યાસુ નરયોનિષુ જાયતે ॥ ૨,૩.૮૩॥

મુહુર્ગર્ભે વસન્ત્યેવ મ્રિયન્તે ચ મુહુર્મુહુઃ ।
અવશિષ્ટેન પાપેન પુણ્યેન ચ સમન્વિતઃ ॥ ૨,૩.૮૪॥

તતશ્ચારોહિણીં યોનિં શૂદ્રવૈશ્યનૃપાદિકમ્ ।
વિપ્રદેવેન્દ્રતાં ચાપિ કદાચિદધિરોહતિ ॥ ૨,૩.૮૫॥

એવં તુ પાપકર્માણો નિરયેષુ પતન્ત્યધઃ ।
યથા પુણ્યકૃતો યાન્તિ તન્મે નિગદતઃ શ ृણુ ॥ ૨,૩.૮૬॥

તે યમેન વિનિર્દિષ્ટાં યોનિં પુણ્યગતિં નરાઃ ।
પ્રગીતગન્ધર્વગણા નૃત્યોત્સવસમાકુલાઃ ॥ ૨,૩.૮૭॥

હારનૂપુરમાધુર્યૈઃ શોભિતાન્યમલાનિ તુ ।
પ્રયાન્ત્યાશુ વિમાનાનિ દિવ્યગન્ધસ્રગુજ્જ્વલાઃ ॥ ૨,૩.૮૮॥

તસ્માચ્ચ પ્રચ્યુતા રાજ્ઞામન્યેષાં ચ મહાત્મનામ્ ।
જાયન્તે નીરુજાં ગેહે સ દ્વૃત્તિપીરપાલકાઃ ॥ ૨,૩.૮૯॥

ભોગાન્સમ્પ્રાપ્નુવન્ત્યુગ્રાંસ્તતો યાન્ત્યૂર્ધ્વમન્યથા ।
અવરોહિણીં સમ્પ્રાપ્ય પૂર્વવદ્યન્તિ માનવાઃ ॥ ૨,૩.૯૦॥

જાતસ્ય મૃત્યુલોકે વૈ પ્રાણિનો મરણં ધ્રુવમ્ ।
પાપિષ્ઠાનામદોમાર્ગાજ્જીવો નિષ્ક્રમતે ધ્રુવમ્ ॥ ૨,૩.૯૧॥

પૃથિવ્યાં લીયતે પૃથ્વી આપશ્ચૈવ તથાપ્સુ ચ ।
તેજસ્તેજસિ લીયતે સમીરે ચ સમીરણઃ ॥ ૨,૩.૯૨॥

આકાશે ચ તથાકાશં સર્વવ્યાપિ નિશાકરે ।
તત્ર કામસ્તથા ક્રોધઃ કાયે પઞ્ચેન્દ્રિયાણિ ચ ॥ ૨,૩.૯૩॥

એતે તાર્ક્ષ્ય સમાખ્યાતા દેહે તિષ્ઠન્તિ તસ્કરાઃ ।
કામઃ ક્રોધો હ્યહઙ્કારો મનસ્તત્રૈવ નાયકઃ ॥ ૨,૩.૯૪॥

સંહારશ્ચૈવ કાલોઽસૌ પુણ્યપાપેન સંયુતઃ ।
પઞ્ચેન્દ્રિયસમાયુક્તઃ સકલૈર્વિબુધૈઃ સહ ॥ ૨,૩.૯૫॥

પ્રવિશેત્સ નવે દેહે પૃહે દરધે ગુહી યથા ।
શરીરે યે સમાસીનાઃ સર્વે વૈ સપ્ત ધાતવઃ ॥ ૨,૩.૯૬॥

ષાટ્કૌશિકો હ્યયં કાયઃ સર્વે વાતાશ્ચ દેહિનામ્ ।
મૂત્રં પુરીષં તદ્યોગાદ્યે ચાન્યે વ્યાધયસ્તથા ॥ ૨,૩.૯૭॥

પિત્તં શ્લેષ્મા તથા મજ્જા માંસં વૈ મેદ એવ ચ ।
અસ્થિ શુક્રં તથા સ્નાયુર્દેહેન સહ દહ્યતિ ॥ ૨,૩.૯૮॥

એષ તે કથિતસ્તાર્ક્ષ્ય વિનાસઃ સર્વદેહિનમ્ ।
કથયામિ પુનસ્તેષાં શરીરં ચ યથા ભવેત્ ॥ ૨,૩.૯૯॥

એકસ્તમ્ભંસ્નાયુબદ્ધં સ્થૂણાત્રયવિભૂષણમ્ ।
ઇન્દ્રિયૈશ્ચ સમાયુક્તં નવદ્વારં શરીરકમ્ ॥ ૨,૩.૧૦૦॥

વિષયૈશ્ચ સમાક્રાન્તં કામક્રોધસમાકુલમ્ ।
રાગદ્વેષસમાકીર્ણં તૃષ્ણાદુર્ગમતસ્કરમ્ ॥ ૨,૩.૧૦૧॥

લોભજાલપરિચ્છિન્નં મોહવસ્ત્રેણ વેષ્ટિતમ્ ।
સુબદ્ધં માયયા ચૈતલ્લોભેનાધિષ્ઠિતં પુરમ્ ॥ ૨,૩.૧૦૨॥

એતદ્ગુણસમાકીર્ણં શરીરં સર્વદેહિનામ્ ।
આત્માનં યે ન જાનન્તિ તે નરાઃ પશવઃ સ્મૃતાઃ ॥ ૨,૩.૧૦૩॥

એવમેવ સમાખ્યાતં શરીરં તે ચતુર્વિધમ્ ।
ચતુરશીતિલક્ષાણિ નિર્મિતા યોનયઃ પુરા ॥ ૨,૩.૧૦૪॥

ઉદ્ભિજ્જાઃ સ્વેદજાશ્ચૈવ અણ્ડજાશ્ચ જરાયુજાઃ ।
એતત્તે સર્વમાખ્યાતં નિરયસ્ય પ્રપઞ્ચતઃ ॥ ૨,૩.૧૦૫॥

અથયામિ ક્રમપ્રાપ્તં પ્રષ્ટુ વા વર્તતે સ્પૃહા ॥ ૨,૩.૧૦૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ધર્મકાણ્ડે દ્વિતીયાંશે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે નરકતત્પ્રવેશનિર્ગમનાદિવર્ણનં નામ તૃતીયોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪
શ્રીકૃષ્ણ ઉવાચ ।
જ્ઞાનતોऽજ્ઞાનતો વાપિયન્નરૈઃ કલુષં કૃતમ્ ।

તસ્ય પાપસ્ય શુદ્ધ્યર્થં વિધેયા નિષ્કૃતિર્નરૈઃ ॥ ૨,૪.૧॥

ભસ્માદિસ્નાનદશકમાદૌ કુર્યાદ્વિચક્ષણઃ ।
યથાશક્તિ ષડબ્દાદિપ્રત્યામ્નાયાચ્ચરેદપિ ॥ ૨,૪.૨॥

તદર્ધં વા તદર્ધં વા તદર્ધાર્ધમથાપિ વા ।
યથાશક્ત્યા તતઃ કુર્યાદ્દશ દાનાનિ વૈ શ‍ૃણુ ॥ ૨,૪.૩॥

ગોભૂતિલહિરણ્યાજ્યવાસોધન્યગુડાસ્તથા ।
રજતં લવણં ચૈવ દાનાનિ દશ વૈ વિદુઃ ॥ ૨,૪.૪॥

પ્રાયશ્ચિત્તે ત્વાગતા યે તેભ્યો દદ્યાન્નરો દશ ।
તતો યમદ્વારપથે પૂયશોણિતસંકુલે ॥ ૨,૪.૫॥

નદીં વૈતરણીં તર્તું દદ્યાદ્વૈતરણીં ચ ગામ્ ।
કૃષ્ણસ્તની સકૃષ્ણાઙ્ગી સા વૈ વૈતરણી સ્મૃતા ॥ ૨,૪.૬॥

તિલા લોહં હિરણ્યં ચ કર્પાસં લવણં તથા ।
સપ્તધાન્યં ક્ષિતિર્ગાવ એકૈકં પાવનં સ્મૃતમ્ ॥ ૨,૪.૭॥

એતાન્યષ્ટૌ મહાદાનાન્યુત્તમાય દ્વિજાતયે ।
આતુરેણ તુ દેયાનિ પદરૂપાણિ મે શ‍ૃણુ ॥ ૨,૪.૮॥

છત્રો પાનહવસ્ત્રાણિ મુદ્રિકા ચ કમણ્ડલુઃ ।
આસનં ભાજનં પદં ચાષ્ટવિધં સ્મૃતમ્ ॥ ૨,૪.૯॥

તિલાપાત્રં સર્પિઃ પાત્રં શય્યા સોપસ્કરા તથા ।
એતત્સર્વં પ્રદાતવ્યં યદિષ્ટં ચાત્મનોઽપિ તત્ ॥ ૨,૪.૧૦॥

અશ્વો રથશ્ચ મહીષી વ્યઞ્જનં વસ્ત્રમેવ ચ ।
બ્રાહ્મણેભ્યઃ પ્રદાતવ્યં બ્રહ્મપૂર્વમપિ સ્વયમ્ ॥ ૨,૪.૧૧॥

દાના ન્યન્યાન્યપિ ખગ તર્પયેત્સ્વીયશક્તિતઃ ।
પ્રાયાશ્ચિત્તં કૃતં યેન દશ દાનાન્યપિ ક્ષિતૌ ॥ ૨,૪.૧૨॥

દાનં ગોર્વૈતરણ્યાશ્ચ દાનાન્યષ્ટૌ તથાપિ વા ।
તિલપાત્રં સર્પિઃ પાત્રં શય્યાદાનં તથૈવ ચ ॥ ૨,૪.૧૩॥

પદદાનં ચ વિધિવન્નાસૌ નિરયગર્ભગઃ ।
સ્વાતન્ત્ર્યેણાપિ લવણદાનમિચ્છન્તિ સૂરયઃ ॥ ૨,૪.૧૪॥

વિષ્ણુદેહસમુત્પન્નો યતોઽયં લવણો રસઃ ।
આતુરસ્ય યદા પ્રાણા ન યાન્તિ વસુધાતલે ॥ ૨,૪.૧૫॥

લવણં ચ તદા દેયં દ્વારસ્યોદ્ઘાટનં દિવઃ ।
યાનિકાનિ ચ દાનાનિ સ્વયં દત્તાનિ માનવૈઃ ॥ ૨,૪.૧૬॥

તાનિતાનિ ચ સર્વાણિ ઉપતિષ્ઠન્તિ ચાગ્રતઃ ।
પ્રાયશ્ચિત્તં કૃતં યેન સાઙ્ગં ખગ સ વૈ પુમાન્ ॥ ૨,૪.૧૭॥

પાપાનિ ભસ્મસાત્કૃત્વા સ્વર્ગલોકે મહીયતે ।
અમૃતં તુ ગવાં ક્ષીરં યતઃ પતગસત્તમ્ ॥ ૨,૪.૧૮॥

તસ્માદ્દદાતિ યો ધેનુમમૃતત્વં સ ગચ્છતિ ।
દાનાન્યષ્ટૌ તુ દત્ત્વા વૈ ગન્ધર્વનિલયે વસેત્ ॥ ૨,૪.૧૯॥

આલયસ્તત્ર રૌદ્રે હિ દહ્યતે યેન માનવઃ ।
છત્રદાનેન સુચ્છાયા જાયતે પથિ તુષ્ટિદા ॥ ૨,૪.૨૦॥

અસિપત્રવનં ધારમતિક્રામતિ વૈ સુખમ્ ।
અશ્વારૂઢશ્ચ વ્રજતિ દદતે યદ્યુપાનહૌ ॥ ૨,૪.૨૧॥

ભોજનાસનદાનેન સુખં માર્ગે ભુનક્તિ વૈ ।
પ્રદેશે નિર્જલે દાતા સુખી સ્યાદ્વૈ કમણ્ડલોઃ ॥ ૨,૪.૨૨॥

યમદૂતા મહારૌદ્રાઃ કરાલાઃ કૃષ્ણપિઙ્ગલાઃ ।
ન પીડયન્તિ દાક્ષિણ્યાદ્વસ્ત્રાભરણદાનતઃ ॥ ૨,૪.૨૩॥

તિલપાત્રં તુ વિપ્રાય દત્તં પત્રરથ ધ્રુવમ્ ।
નાશયેત્ત્રિવિધં ષાપં વાઙ્મનઃ કાયસમ્ભવમ્ ॥ ૨,૪.૨૪॥

ધૃતપાત્રપ્રદાને રુદ્રલોકે વસેન્નરઃ ।
સર્વોપસ્કરસંયુક્તાં શય્યાં દત્ત્વા દ્વિજાતયે ॥ ૨,૪.૨૫॥

નાનાપ્સરોભિરાકીર્ણં વિમાનમધિરોહતિ ।
ષષ્ટિવર્ષસહસ્રાણિ ક્રીડિત્વા શક્રમન્દિરે ॥ ૨,૪.૨૬॥

ઇન્દ્રલોકાત્પરિભ્રષ્ટ ઇહ લોકે નૃપો ભવેત્ ।
સર્વોપસ્કરણોપેતં યુવાનં દોષવર્જિતમ્ ॥ ૨,૪.૨૭॥

યોઽશ્વં દદાતિ વિપ્રાય સ્વર્ગલોકે ચ તિષ્ઠતિ ।
યાવન્તિ રોમાણિ હયે ભવન્તિ હિ ખગેશ્વર ॥ ૨,૪.૨૮॥

તાવતો રાજિતાંલ્લોકાનાપ્નુવન્તિ હિ પુષ્કલાન્ ।
ચતુર્ભિસ્તુરગૈર્યુક્તં સર્વોપકરણૈર્યુતમ્ ॥ ૨,૪.૨૯॥

રથં દ્વિજાતયે દત્ત્વા રાજસૂયફલં લભ્ત્ ॥ ૨,૪.૩૦॥

દુગ્ધાધિકાં ચ મહિષીં નવમેઘવર્ણાં સન્તુષ્ટતર્ણકવલીં જઘનાભિરામામ્ ।
દત્ત્વા સુવર્ણતિલકાં દ્વિજપુઙ્ગવાય લોકોદયં સ જયતીતિ કિમત્ર ચિત્રમ્ ॥ ૨,૪.૩૧॥

તાલવૃન્તસ્ય દાનેન વાયુના વીજ્યતે પથિ ।
કાન્તિયુક્સુભગઃ શ્રીમાન્ભવત્યમ્બરદાનતઃ ॥ ૨,૪.૩૨॥

રસાન્નોપસ્કરયુતં ગૃહં વિપ્રાય યોઽર્પયેત્ ।
ન હીયતે તસ્ય વંશઃ સ્વર્ગં પ્રાપ્નોત્યનુત્તમમ્ ॥ ૨,૪.૩૩॥

ભવત્યત્ર ખગશ્રેષ્ઠ ફલગૌખલાઘવમ્ ।
શ્રદ્ધાશ્રદ્ધાવિભેદેન દાનગૌરવલાઘવાત્ ॥ ૨,૪.૩૪॥

તતો યેનામ્બુદાનાનિ કૃતાન્યત્ર રસાસ્તથા ।
તદા ખગ તથાહ્લાદમાપદિ પ્રતિપદ્યતે ॥ ૨,૪.૩૫॥

અન્નાનિ યેન દત્તાનિ શ્રદ્ધાપૂતેન ચેતસા ।
સોઽપિ તૃપ્તિમવાપ્નોતિ વિનાપ્યન્નેન વૈ તદા ॥ ૨,૪.૩૬॥

આસન્ને મરણે કુર્યાત્સંન્યાસં ચેદ્વિધાનતઃ ।
આવર્તેત પુનર્નાસૌ બ્રહ્મભૂયાય કલ્પતે ॥ ૨,૪.૩૭॥

આસન્નમરણો મત્યશ્ચેત્તીર્થં પ્રતિનયિતે ।
તીર્થપ્રાપ્તૌ ભવેન્મુક્તિર્મ્રિયતે યદિ માર્ગગઃ ।
પદેપદે ક્રતુસમં ભવેત્તસ્ય ન સંશયઃ ॥ ૨,૪.૩૮॥

ગૃહ્ણીયાચ્ચેદનશનં વ્રતં વિધિવદાગતે ।
મૃત્યૌ ન સોઽપિ સંસારે ભૂયઃ પર્યટતિ દ્વિજ ॥ ૨,૪.૩૯॥

કિં દાનમિતિ તુર્યસ્ય પ્રશ્નસ્યોત્તરમીરિતમ્ ।
દાહમૃત્યોરન્તરે કિમિતિપ્રશ્નોત્તરં શ◌ૃણુ ॥ ૨,૪.૪૦॥

ગતપ્રાણં તતો જ્ઞાત્વા સ્નાત્વા પુત્રાદિરાશુ તમ્ ।
શવં જલેન શુદ્ધેન ક્ષાલયેદવિચારયન્ ॥ ૨,૪.૪૧॥

પરિધાપ્યાહતે વસ્ત્રે ચન્દનૈઃ પ્રોક્ષયેત્તનુમ્ ।

તતો મૃતસ્ય સ્થાને વૈ એકોદ્દિષ્ટં સમાચરેત્ ॥ ૨,૪.૪૨॥

પ્રયોગપૂર્વં દાહસ્ય યોગ્યતાદિર્યથા ભવેત્ ।
આંસનં પ્રાક્ષણ ચ સ્યાન્ન સ્યાદેતચ્ચતુષ્ટયમ્ ॥ ૨,૪.૪૩॥

આવાહનાર્ચન ચૈવ પાન્ત્રાલમ્ભાવગાહને ।
ભવેદ્દાનાન્નસઙ્કુલ્પઃ પિણ્ડદાનં સદા ભવેત્ ॥ ૨,૪.૪૪॥

પદાર્થપઞ્ચકં ન સ્યાદ્રેખા પ્રત્યવનેજનમ્ ।
દદ્યાદક્ષય્યમુદકં ન સ્યાદેતત્ત્રયં પુનઃ ॥ ૨,૪.૪૫॥

સ્વધાવાચનમાશીશ્ચ તિલકં ચ ખગોત્તમ ।
ઘટં દદ્યાત્સમાષાન્નં દદ્યાલ્લોહસ્ય દક્ષિણામ્ ॥ ૨,૪.૪૬॥

પિણ્ડસ્ય ચાલનં પ્રોક્તં નૈવ પ્રોક્તમિદં ત્રિકમ્ ।
પ્રચ્છાદનવિસર્ગૌ ચ સ્વસ્તિવાચનકં તથા ॥ ૨,૪.૪૭॥

એષુ ષટ્સુ વિધિઃ પ્રોક્તઃ શ્રાદ્ધેષુ મલિનેષુ તે ।
ષડેવ મરણસ્થાને દ્વારિ ચાત્વરિકે તથા ॥ ૨,૪.૪૮॥

વિશ્રામે કાષ્ઠચયને તથા સઞ્ચયને ખગ ।
મૃતિસ્થાને શવો નામ ભૂમિસ્તુષ્યતિ દેવતા ॥ ૨,૪.૪૯॥

પાન્થો દ્વારિ ભવેત્તેન પ્રીતા સ્યાદ્વાસ્તુદેવતા ।
ચત્વરે ખેચરસ્તેન તુષ્યેદ્ભૃતાદિદેવતા ॥ ૨,૪.૫૦॥

વિશ્રામે ભૂતસંજ્ઞોઽયં તુષ્ટસ્તેન દિશો દશ ।
ચિતાયાં સાધક ઇતિ સઞ્ચિતૌ પ્રેત ઉચ્યતે ॥ ૨,૪.૫૧॥

તિલદર્ભઘૃતેધાંસિ ગૃહીત્વા તુ સુતાદયઃ ।
ગાથાં યમસ્ય સૂક્તં વાપ્યધીયાના વ્રજન્તિ હિ ॥ ૨,૪.૫૨॥

અહરહર્નીયમાનો ગામશ્વં પુરુષં વૃષમ્ ।
વૈવસ્વતો ન તૃપ્યેત સુરયા ત્વિવ દુર્મતિઃ ॥ ૨,૪.૫૩॥

ઇમાં ગાથમપેતેતિ સૂક્તં વા પથિ સમ્પઠેત્ ।
દક્ષિણસ્યાં દિશ્યરણ્યં વ્રજેયુઃ સર્વબાન્ધવાઃ ॥ ૨,૪.૫૪॥

પથિ શ્રાદ્ધદ્વયં કુર્યાત્પૂર્વોક્તવિધિના ખગ ।
તતઃ શનૈર્ભૂતલે વૈ દક્ષિણાશિરસં શવમ્ ॥ ૨,૪.૫૫॥

સ્થાપયિત્વા ચિતાભૂમૌ પૂર્વોક્તં શ્રાદ્ધમાચરેત્ ।
તૃણકાષ્ઠતિલાજ્યાદિ સ્વયં નિન્યુઃ સુતાદયઃ ॥ ૨,૪.૫૬॥

શૂદ્રાનીતૈઃ કૃતં કર્મ સર્વં ભવતિ નિષ્ફલમ્ ।
પ્રાચીનાવીતિના ભાવ્યં દક્ષિણાભિમુકેન ચ ॥ ૨,૪.૫૭॥

વેદી તત્ર પ્રકર્તવ્યા યથાશાસ્ત્રમથાણ્ડજ ।
પ્રતેવસ્ત્રં દ્વિધા કૃત્વાર્ધેન તં છાદયેત્તતઃ ॥ ૨,૪.૫૮॥

અર્ધં શ્મશાનવાસાર્થં ભૂમાવેવ વિનિઃ ક્ષિપેત્ ।
તતઃ પૂર્વોક્તવિધિના પિણ્ડં પ્રેતકરે ન્યસેત્ ॥ ૨,૪.૫૯॥

આજ્યેનાભ્યઞ્જનં કાર્યં સર્વાઙ્ગેષુ શવસ્ય ચ ।
દાહમૃત્યોરન્તરાલે વિધિઃ પિણ્ડસ્ય તં શ‍ૃણુ ॥ ૨,૪.૬૦॥

પૂર્વોક્તૈઃ પઞ્ચભિઃ પિણ્ડૈઃ શવસ્યાહુતિયોગ્યતા ।
અન્યથા ચોપઘાતાચ્ચ રાક્ષસાદ્યા ભવન્તિ હિ ॥ ૨,૪.૬૧॥

સમૃજ્ય ચોપલિપ્યાથ ઉલ્લિખ્યોદ્ધૃત્ય વેદિકામ્ ।
અભ્યુક્ષ્યોપસમાધાય વહ્નિં તત્ર વિધાનતઃ ॥ ૨,૪.૬૨॥

પુષ્પાક્ષતૈશ્ચ સમ્પૂજ્ય દેવં ક્રવ્યાદસંજ્ઞકમ્ ।
શ્રૌતેન તુ વિધાનેન હ્યાહિતાગ્નિં દહેદ્બુધઃ ॥ ૨,૪.૬૩॥

ચણ્ડાલાગ્નિં ચિતાગ્નિં ચ પતિતાગ્નિં પરિત્યજેત્ ।
ત્વં ભૂતકૃજ્જગદ્યોનિસ્ત્વં લોકપરિપાલકઃ ॥ ૨,૪.૬૪॥

ઉપસંહર તસ્માત્ત્વમેનં સ્વર્ગં નયામૃતમ્ ।
ઇતિ ક્રવ્યાદમભ્યર્ચ્ય શરીરાહુતિમાચરેત્ ॥ ૨,૪.૬૫॥

અર્ધદગ્ધે તથા દેહે દદ્યાદાજ્યાહુતિં તતઃ ।
અસ્માત્ત્વમધિજાતોઽસિ ત્વદયં જાયતાં પુનઃ ॥ ૨,૪.૬૬॥

અસૌ સ્વર્ગાય લોકાય સ્વાહેત્યુક્ત્વા તુ નામતઃ ।
એવમાજ્યાહુતિં દત્ત્વા તિલમિશ્રાં સમન્ત્રકમ્ ॥ ૨,૪.૬૭॥

રોદિતવ્યં તતો ગાઢમેવં તસ્ય સુખં ભવેત્ ।
દાહસ્યાનન્તરં તત્ર કૃત્વા સઞ્ચયનિક્રિયામ્ ॥ ૨,૪.૬૮॥

પ્રેતપિણ્ડં પ્રદદ્યાચ્ચ દાહાર્તિશમનં ખગ ।
તતઃ પ્રદક્ષિણં કૃક્ત્વા ચિતાપ્રસ્થાનવીક્ષકાઃ ॥ ૨,૪.૬૯॥

કનિષ્ઠપૂર્વાઃ સ્નાનાર્થં ગચ્છેયુઃ સૂક્તજાપકાઃ ।
તતો જાલસમીપે તુ ગત્વા પ્રક્ષાલ્ય ચાંશુકમ્ ॥ ૨,૪.૭૦॥

પરિધાય પુનસ્તચ્ચ બ્રૂયુસ્તં પુરુષં પ્રતિ ।
ઉદકં તુ કરિષ્યામઃ સચૈલં પુરુષાસ્તતઃ ॥ ૨,૪.૭૧॥

કુરુધ્વમિત્યેવ વદેચ્છતવર્ષાવરે મૃતે ।
પુત્રાદ્યા વૃદ્ધપૂર્વાસ્તે એકવસ્ત્રાઃ શિખાં વિના ॥ ૨,૪.૭૨॥

પ્રાચીનાવીતિનઃ સર્વે વિશેયુર્મૌનિનો જલમ્ ।
અપનઃ શોશુચદઘમનેન પિતૃદિઙ્મુખાઃ ॥ ૨,૪.૭૩॥

જલાવઘટ્ટનં ચવ ન કુર્યુઃ સ્નાનકારકાઃ ।
તતસ્તટે સમાગત્ય શિખાં બદ્ધ્વા ઋજૂન્કુશાન્ ॥ ૨,૪.૭૪॥

દક્ષિણાગ્રહસ્તયોસ્તુ કૃત્વાથ સતિલં જલમ્ ।
આદાયાઞ્જલિના યામ્યાં દુઃખી પૈતૃકતીર્થતઃ ॥ ૨,૪.૭૫॥

એકવારં ત્રિવારં વા દશવારમથાપિ વા ।
ભૂમાવશ્મનિ વા સર્વે ક્ષિપેયુર્વાગ્યતાઃ ખગ ॥ ૨,૪.૭૬॥

તૃપ્યન્તુ તૃપ્યતાં વાપિ તર્પયામ્યુપતિષ્ઠતામ્ ।
પ્રેતૈતદમુકગોત્રેત્યુક્તેષ્વેવં સમુચ્ચરેત્ ॥ ૨,૪.૭૭॥

જલાઞ્જલૌ કૃતે પશ્ચાદ્વિધેયં દન્તધાવનમ્ ।
ત્યજન્તિ ગોત્રિણઃ સર્વે દિનાનિ નવ કાશ્યપ ॥ ૨,૪.૭૮॥

તત ઉત્તીર્યોદકાદ્વૈ વસ્ત્રાણિ પરિધાય ચ ।
સ્નાનવસ્ત્રં સકૃત્પીડ્ય વિશેયુઃ શુચિભૂતલે ॥ ૨,૪.૭૯॥

અશ્રુપાતં ન કુર્વીત દત્ત્વા દાહજલાઞ્જલિમ્ ।
શ્લેષ્માશ્રુ બાન્ધવૈર્મુક્તં પ્રેતો ભુઙ્ક્તે યતોઽવશઃ ॥ ૨,૪.૮૦॥

અતો ન રોદિતવ્યં હિ ક્રિયાઃ કાર્યાઃ સ્વશક્તિતઃ ।
તતસ્તેષૂપવિષ્ટેષુ પુરાણજ્ઞઃ સુકૃત્સ્વકઃ ॥ ૨,૪.૮૧॥

શોકાપનોદં કુર્વીત સંસારાનિત્યતાં બ્રુવન્ ।
માનુષ્યે કદલીસ્તન્ભે અસારે સારમાર્ગણમ્ ॥ ૨,૪.૮૨॥

કરોતિ યઃ સ સમૂઢો જલબુદ્બુદસન્નિભે ।

પઞ્ચધા સંભૃતઃ કાયો યદિ પઞ્ચત્વમાગતઃ ॥ ૨,૪.૮૩॥

કર્મભિઃ સ્વશરીરોત્થૈસ્તત્ર કા પરિદેવના ।
ગન્ત્રી વસુમતી નાશમુદધિર્દૈવતાનિ ચ ॥ ૨,૪.૮૪॥

ફેનપ્રખ્યઃ કથં નાશં મર્ત્યલોકો ન યાસ્યતિ ।
એવં સંશ્રાવયેત્તત્ર મૃદુશાદ્વલસંસ્થિતાન્ ॥ ૨,૪.૮૫॥

તેઽપિ સંશ્રુત્ય ગચ્છેયુર્ગૃહં બાલપુરઃ સરાઃ ।
વિદશ્યર્નિંબપત્રાણિ નિયતા દ્વારિ વેશ્મનઃ ॥ ૨,૪.૮૬॥

આચમ્ય વહ્નિસલિલં ગોમયં ગૌરસર્ષપાન્ ।
દૂર્વાપ્રવાલં વૃષભમન્યદપ્યથ મઙ્ગલમ્ ॥ ૨,૪.૮૭॥

પ્રવિશેયુઃ સમાલભ્ય કૃત્વાશ્મનિ પદં શનૈઃ ।
શ્રૌતેન તુ વિધાનેન આહિતાગ્નિં દેહદ્વધઃ ॥ ૨,૪.૮૮॥

ઊનદ્વિવર્ષં નિખનેન્ન કુર્યાદુદકં તતઃ ।
યોષિત્પતિવ્રતા યા સ્યાદ્ભર્તારં યાનુગચ્છતિ ॥ ૨,૪.૮૯॥

પ્રયોગ પૂર્વં ભર્તારં નમસ્કૃત્યારુહેચ્ચિતિમ્ ।
ચિતિભ્રષ્ટા તુ યા મોહાત્સા પ્રાજાપત્યમાચરેત્ ॥ ૨,૪.૯૦॥

તિસ્રઃ કોટ્યોર્ધકોટી ચ યાનિ લોમાનિ માનુષે ।
તાવત્કાલં વસેત્સ્વર્ગે ભર્તારં યાનુગચ્છતિ ॥ ૨,૪.૯૧॥

વ્યાલગ્રાહી યથા વ્યાલં બિલાદુદ્ધરતે બલાત્ ।
તદ્વદુદ્ધૃત્ય સા નારી તેનૈવ સહ મોદતે ॥ ૨,૪.૯૨॥

તત્ર સા ભર્તૃપરમા સ્તૂયમાનાપ્સરોગણૈઃ ।
ક્રીડતે પતિના સાર્ધં યાવદિન્દ્રાશ્ચતુર્દશ ॥ ૨,૪.૯૩॥

બ્રહ્મઘ્નો વા કૃઘ્નો વા મિત્રિઘ્નો વા ભવેત્પતિઃ ।
પુનાત્યવિધવા નારી તમાદાય મૃતા તુ યા ॥ ૨,૪.૯૪॥

મૃતે ભર્તરિ યા નારી સમારોહેદ્ધુતાશનમ્ ।
સારન્ધતીસમાચારા સ્વર્ગલોકે મહીયતે ॥ ૨,૪.૯૫॥

યાવચ્ચાગ્નૌ મૃતે પત્યૌ સ્ત્રી નાત્માનં પ્રદાહયેત્ ।
તાવન્ન મુચ્યતે સા હિ સ્ત્રીશરીરાત્કથઞ્ચન ॥ ૨,૪.૯૬॥

માતૃકં પૈતૃકં ચૈવ યત્ર ચૈવ પ્રદીયતે ।
કુલત્રયં પુનાત્યેષા ભર્તારં યાનુગચ્છતિ ॥ ૨,૪.૯૭॥

આર્તાર્તે મુદિતે હૃષ્ટા પ્રોષિતે મલિના કૃશા ।
મૃતે મ્રિયેત યા પત્યૌ સા સ્ત્રી જ્ઞેયા પતિવ્રતા ॥ ૨,૪.૯૮॥

પૃથક્ચિતાં સમારુહ્ય ન પ્રિયા ગન્તુમર્હતિ ।
ક્ષત્રિયાદ્યાઃ સવર્ણાશ્ચ આરોહેયુરપીહ તાઃ ॥ ૨,૪.૯૯॥

ચાણ્ડાલીમવધિં કૃત્વા બ્રાહ્મણીતઃ સમો વિધિઃ ।
અગર્ભિણીનાં સર્વાસામબાલતાઝ્મે(કા)નામપિ ॥ ૨,૪.૧૦૦॥

દહનસ્ય વિધિઃ પ્રોક્તઃ સામાન્યેન મયા ખગ ।
વિશેષમપિ તસ્યાસ્ય કચ્ચિત્કિં શ્રોતુમિચ્છતિ ॥ ૨,૪.૧૦૧॥

ગરુડ ઉવાચ ।
પ્રોષિતે તુ મૃતે સ્વામિન્યસ્થિનાશમુપેયુષિ ।
કથં દાહઃ પ્રકર્તવ્યસ્તન્મે વદ જગત્પતે ॥ ૨,૪.૧૦૨॥

શ્રીકૃષ્ણ ઉવાચ ।
અસ્થીનિ ચેન્ન લભ્યન્તે પ્રોષિતસ્ય નરસ્ય ચ ।
તેષાઞ્ચ હિ ગતિસ્થાનં વિધાનં કથયામ્યહમ્ ॥ ૨,૪.૧૦૩॥

શ ृણુ તાર્ક્ષ્ય પરં ગોપ્યં પત્યુર્દુર્મરણેષુ યત્ ।
લઙ્ઘનૈર્યે મૃતા જીવાં દંષ્ટ્રિભિશ્ચાભિઘાતિતાઃ ॥ ૨,૪.૧૦૪॥

કણ્ઠગ્રહે વિલગ્નાનાં ક્ષીણાનાં તુણ્ડઘાતિનામ્ ।
વિષાગ્નિવૃષવિપ્રેભ્યો વિષૂચ્યા ચાત્મઘાતકાઃ ॥ ૨,૪.૧૦૫॥

પતનોદ્બન્ધનજલૈર્મૃતાનાં શ ृણુ સંસ્થિતિમ્ ।
સર્પવ્યાઘ્રૈઃ શ ृઙ્ગિભિશ્ચ ઉપસર્ગોપલોદકૈઃ ॥ ૨,૪.૧૦૬॥

બ્રાહ્મણૈઃ શ્વાપદૈશ્ચૈવ પતનૈર્વૃક્ષવૈદ્યુતૈઃ ।
નખૈર્લોહૈર્ગિરિઃ પાતૈર્ભિત્તિપાતૈર્ભૃગોસ્તથા ॥ ૨,૪.૧૦૭॥

કટ્વાયામન્તરિક્ષે ચ ચૌરચાણ્ડાલતસ્તથા ।
ઉદક્યાશુનકીશૂદ્રરજકાદિવિભૂષિતાઃ ॥ ૨,૪.૧૦૮॥

ઊર્ધ્વોચ્છિષ્ટાધરોચ્છિષ્ટોભયોચ્છિષ્ટાસ્તુ યે મૃતાઃ ।
શસ્ત્રઘાતૈર્મૃતા યે ચાસ્યશ્વસ્પૃષ્ટાસ્તથૈવ ચ ॥ ૨,૪.૧૦૯॥

તત્તુ દુર્મરણં જ્ઞેયં યચ્ચ જાતં વિધૈં વિના ।
તેન પાપેન નરકાન્ભુક્ત્વા પ્રેતત્વભાગિનઃ ॥ ૨,૪.૧૧૦॥

ન તેષાં કારયેદ્દાહં સૂતકં નોદકક્રિયામ્ ।
ન વિધાનં મૃતાદ્યઞ્ચ ન કુર્યા દૌર્ધ્વદૈહિકમ્ ॥ ૨,૪.૧૧૧॥

ન પિણ્ડદાનં કર્તવ્યં પ્રમાદાચ્ચેત્કરોતિ હિ ।
નોપતિષ્ઠતિ તત્સર્વમન્તરિક્ષે વિનશ્યતિ ॥ ૨,૪.૧૧૨॥

અતસ્તસ્ય સુતૈઃ પૌત્રૈઃ સપિણ્ડૈઃ શુભમિચ્છુભિઃ ।
નારાયણબલિઃ કાર્યો લોકગર્હાભિયા ખગ ॥ ૨,૪.૧૧૩॥

તથા તેષાં ભવેચ્છૌચં નાન્યથેત્યબ્રવીદ્યમઃ ।
કૃતે નારાયણબલાવૌર્ધ્વદૈહિકયોગ્યતા ॥ ૨,૪.૧૧૪॥

તસ્ય સુદ્ધિકરં કર્મ તદ્ભવેન્ન તદન્યથા ।
નારાયણબલિં સમ્યક્તીર્થે સર્વં પ્રકલ્પયેત્ ॥ ૨,૪.૧૧૫॥

કૃષ્ણાગ્રે કારયેદ્વિપ્રૈર્યેન પૂતો ભવેન્નરઃ ।
પૂર્વન્તુ તર્પણં કાર્યં વિપ્રૈઃ પૌરાણવૈદિકૈઃ ॥ ૨,૪.૧૧૬॥

સર્વૌષધ્યક્ષતૈર્મિશ્રૈર્વિષ્ણુમુદ્દિશ્ય તર્પયેત્ ।
કાર્યં પુરુષસૂક્તેન મન્ત્રૈર્વા વૈષ્ણવૈરપિ ॥ ૨,૪.૧૧૭॥

દક્ષિણાભિમુખો ભૂત્વા પ્રેતં વિષ્ણુમિતિ સ્મરન્ ।
અનાદિનિધનો દેવઃ શઙ્ખચક્રગદાધરઃ ॥ ૨,૪.૧૧૮॥

અક્ષયઃ પુણ્ડરીકાક્ષઃ પ્રેતમોક્ષપ્રદો ભવ ।
તર્પણસ્યાવસાને સ્યાદ્વીતરાગો વિમત્સરઃ ॥ ૨,૪.૧૧૯॥

જિતેન્દ્રિયમના ભૂત્વા શુચિષ્માન્ધર્મતત્પરઃ ।
ભક્ત્યા તત્ર પ્રકુર્વીત શ્રાદ્ધાન્યેકાદશૈવ તુ ॥ ૨,૪.૧૨૦॥

સર્વકર્મવિધાને એકૈકાગ્રે સમાહિતઃ ।
તોયવ્રીહિયવાન્દદ્યાદ્ગોધૂમાંશ્ચ પ્રિયઙ્ગવઃ ॥ ૨,૪.૧૨૧॥

હવિષ્યાન્નં શુભં મુદ્રાં છત્રોષ્ણીષે ચ દાપયેત્ ।
દાપયેત્સર્વસંસ્યાનિ ક્ષીરં ક્ષૌદ્રસમાન્વિતમ્ ॥ ૨,૪.૧૨૨॥

વસ્ત્રોપાનહસંયુક્તં દદ્યાદષ્ટવિધં પદમ્ ।
દ્પયેત્સર્વપાપેભ્યો ન કુર્યાત્પઙ્ક્તિવઞ્ચનમ્ ॥ ૨,૪.૧૨૩॥

ભૂમૌ સ્થિતેષુ પિણ્ડેષુ ગન્ધપુષ્પાક્ષતાન્વિતમ્ ।
દાતવ્યં સર્વવિપ્રેભ્યો વેદશાસ્ત્રવિધાનતઃ ॥ ૨,૪.૧૨૪॥

શઙ્ખે ખડ્ગેઽથ વા તામ્રે તર્પણઞ્ચ પૃથક્પૃથક્ ।
ધ્યાનધારણસંયુક્તો જાનુભ્યામવનીં ગતઃ ॥ ૨,૪.૧૨૫॥

ઋચા વૈ દાપયેદર્ઘમર્ઘોદ્દિષ્ટં પૃથક્પૃથક્ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ યમઃ પ્રેતશ્ચ પઞ્ચમઃ ॥ ૨,૪.૧૨૬॥

પૃથક્કુમ્ભે તતઃ સ્થાપ્યાઃ પઞ્ચરત્નસમન્વિતાઃ ।
વસ્ત્રયજ્ઞોપવીતાનિ પૃથઙ્મુદ્રાઃ પદાનિ ચ ॥ ૨,૪.૧૨૭॥

પઞ્ચ શ્રાદ્ધાનિ કુર્વીત દેવતાનાં યથાવિધિ ।
જલધારાં તતઃ કુર્યાત્પિણ્ડેપિણ્ડે પૃથક્પૃથક્ ॥ ૨,૪.૧૨૮॥

શઙ્ખે વા તામ્રપાત્રે વા અલાભે મૃન્મયે પિ વા ।
તિલોદકં સમાદાય સર્વૌષધિમસન્વિતમ્ ॥ ૨,૪.૧૨૯॥

તામ્રપાત્રં તિલૈઃ પૂર્ણં સહિરણ્યં સદક્ષિણમ્ ।
દદ્યાદ્બ્રાહ્મણમુખ્યાય પદદાનં તથૈચ ॥ ૨,૪.૧૩૦॥

યમોદ્દેશેતિલાંલ્લૌહં તતો દદ્યાચ્ચ દક્ષિણામ્ ।
એવં વિષ્ણુબલિં દત્ત્વા યથાશક્ત્યા વિધાનતઃ ॥ ૨,૪.૧૩૧॥

સમુદ્ધરતિ તત્ક્ષિપ્રં નાત્ર કાર્યા વિચારણ નાગદંશાન્મૃતો
યસ્તુ વિશેષસ્તન્તુ મે શ઼ૃણુ ॥ ૨,૪.૧૩૨॥

સુવર્ણભારનિષ્પન્નં નાગં કૃત્વા તથૈવ ગામ્ ।
વિપ્રાય દત્ત્વા વિધિવત્પિતુરાનૃણ્યમાપ્નુયાત્ ॥ ૨,૪.૧૩૩॥

એવં સર્પબલિં દત્ત્વા સર્પદોષાદ્વિમુચ્યતે ।
પશ્ચાત્પુત્તલકં કાર્યં સર્વૌષધિસમન્વિતમ્ ॥ ૨,૪.૧૩૪॥

પલાશસ્ય ચ વૃન્તાનાં વિભાગં શ઼ૃણુ કાશ્યપ ।
કૃષ્ણાજિનં સમાસ્તીર્ય કુશૈશ્ચ પુરુષાકૃતિમ્ ॥ ૨,૪.૧૩૫॥

શતત્રયેણ ષષ્ટ્યા ચ વૃન્તૈઃ પ્રોક્તોઽસ્થિસઞ્ચયઃ ।
વિન્યસ્ય તાનિ વૃન્તાનિ અઙ્ગેષ્વેષુ પૃથક્પૃથક્ ॥ ૨,૪.૧૩૬॥

ચત્વારિંશચ્છિરોભાગે ગ્રીવાયાં દશ વિન્યસેત્ ।

વિંશત્યુરઃ સ્થલે દદ્યાદ્વિંશતિઞ્જઠરે તથા ॥ ૨,૪.૧૩૭॥

બાહુદ્વયે શતં દદ્યાત્કટિદેશે ચ વિંશતિમ્ ।
ઊરુદ્વયે શતઞ્ચાપિ ત્રિંશજ્જઙ્ઘાદ્વયે ન્યસેત્ ॥ ૨,૪.૧૩૮॥

દદ્યાચ્ચતુષ્ટયં શિશ્ને ષડ્દદ્યાદ્વૃષાણદ્વયે ।
દશ પાદાઙ્ગુલીભાગે એવમસ્થીનિ વિન્યસેત્ ॥ ૨,૪.૧૩૯॥

નારિકેલં શિરઃ સ્થાનેં તુમ્બં દદ્યાચ્ચ તાલુકે ।
પઞ્ચરત્નં મુખે દદ્યાજ્જિહ્વાયાં કદલીફલમ્ ॥ ૨,૪.૧૪૦॥

અન્ત્રેષુ નાલિકં તદ્યાદ્વાલુકાઙ્ઘ્રાણે એવ ચ ।
વસાયાં મૃત્તિકાં દદ્યાદ્ધરિતાલમનઃ શિલાઃ ॥ ૨,૪.૧૪૧॥

પારદં રેતસઃ સ્થાને પુરીષે પિત્તલં તથા ।
મનઃ શિલા તથા ગાત્રે તિલપક્વન્તુ સન્ધિષુ ॥ ૨,૪.૧૪૨॥

યવપિષ્ટં યથા માંસે મધુ શોણિતમેવ ચ ।
કેશેષુ ચ જટાજૂટં ત્વચાયાઞ્ચ મૃગત્વચમ્ ॥ ૨,૪.૧૪૩॥

કર્ણયોસ્તાલપત્રઞ્ચ સ્તનયોશ્ચૈવ ગુઞ્જિકાઃ ।
નાસાયાં શતપત્રઞ્ચ કમલં નાભિમણ્ડલે ॥ ૨,૪.૧૪૪॥

વૃન્તાકં વૃષણદ્વન્દ્વે લિઙ્ગે સ્યાદ્ગૃઞ્જનં શુભમ્ ।
ઘૃતં નાભ્યાં પ્રદેયં સ્યાત્કૌ પીને ચ ત્રપુસ્મૃતમ્ ॥ ૨,૪.૧૪૫॥

મૌક્તિકં સ્તનયોર્મૂર્ધ્નિ કુઙ્કુમેવ વિલેપનમ્ ।
કર્પૂરાગુરુધૂપૈશ્ચ શુભૈર્માલ્યૈઃ સુગન્ધિભિઃ ॥ ૨,૪.૧૪૬॥

પરિધાનં પટ્ટસૂત્રંહૃદયે ચૈવ વિન્યસેત્ ।
ઋદ્ધિવૃદ્ધી ભુજૌ દ્વૌ ચ ચક્ષુર્ભ્યાઞ્ચ કપર્દકમ્ ॥ ૨,૪.૧૪૭॥

દન્તેષુ દાડિમીબીજાન્યઙ્ગુલીષુ ચ ચમ્પકમ્ ।
સિન્દૂરં નેત્રકોણે ચ તામ્બૂલાદ્યુપહારકમ્ ॥ ૨,૪.૧૪૮॥

સર્વૌષદિયુતં પ્રેતં કૃત્વા પૂજાં યથોદિતામ્ ।
સાગ્નિકે ચાપિ વિધિના યજ્ઞપાત્રં ન્યસ્યેત્ક્રમાત્ ॥ ૨,૪.૧૪૯॥

સ્ત્રિયઃ પુનન્તુ મ શિર ઇમં મે વરુણેન ચ ।
પ્રેતસ્ય પાવનં કૃત્વા શાલગ્રામશિલોદકૈઃ ॥ ૨,૪.૧૫૦॥

વિષ્ણુમુદ્દિશ્ય દાતવ્યા સુશીલા ગૌઃ પયસ્વિની ।
તિલા લૌહં હિરણ્યઞ્ચ કર્પાસં લવણં તથા ॥ ૨,૪.૧૫૧॥

સપ્તધાન્યં ક્ષિતિર્ગાવ એકૈકં પાવનં સ્મૃતમ્ ।
તિલપાત્રં તતો દદ્યાત્પદદાનં તથૈવ ચ ॥ ૨,૪.૧૫૨॥

કર્તવ્યં વૈષ્ણવં શ્રાદ્ધં પ્રેતમુક્ત્યર્થમાત્મનઃ ।
પ્રેતમોક્ષં તતઃ કુર્યાદ્ધૃદિ વિષ્ણું પ્રકલ્પ્યચ ॥ ૨,૪.૧૫૩॥

એવં પુત્તલકં કૃત્વા દાહયેદ્વિધિપૂર્વકમ્ ।
તચ્છુદ્ધયે તુ સંસ્કર્તા પુત્રાદિર્નિષ્કૃતિં ચરેત્ ॥ ૨,૪.૧૫૪॥

ત્રીન્કૃચ્છ્રાન્ષડ્દ્વાદશ ચ તથા પઞ્ચદશાપિ ચ ।
પ્રાયશ્ચિત્તનિમિત્તાનુસારેણ વિપ્રવત્સ્મૃતઃ ॥ ૨,૪.૧૫૫॥

અશક્તૌ ગોહિરણ્યાદિ પ્રત્યામ્નાયં ચરેદપિ ।
આત્મનોઽનધિકારિત્વે શુદ્ધિમેવં ચરેદ્બુધઃ ॥ ૨,૪.૧૫૬॥

અશુદ્ધેન તુ યદ્દત્તમુદ્દિશ્યાશુદ્ધિમેવ ચ ।
નોપતિષ્ઠતિ તત્સર્વમન્તરિક્ષે વિનશ્યતિ ॥ ૨,૪.૧૫૭॥

શુદ્ધિં સમ્પાદ્ય કર્તવ્યં દહનાદ્યૌર્ધ્વદેહિકમ્ ।
અકૃત્વા નિષ્કૃતિં યસ્તુ કુરુતે દહનાદિકમ્ ॥ ૨,૪.૧૫૮॥

મતિપૂર્વમમત્યા ચ ક્રમાત્તનિષ્કૃતિં શૃણુ ।
કૃત્વાગ્નિમુદકં સ્નાનં સ્પર્શનં વહનં કથામ્ ॥ ૨,૪.૧૫૯॥

રજ્જુચ્છેદાશ્રુપાતઞ્ચ તપ્તકૃચ્છ્રેણ શુધ્યતિ ।
એષામન્યતમં પ્રેતં યો વહેત્તુ દેહત વા ॥ ૨,૪.૧૬૦॥

કટોદકક્રિયાં કૃત્વા કૃચ્છ્રં સાન્તપનં ચરેત્ ।
નિમિત્તે લઘુનિ સ્વલ્પં મહન્મહતિ કલ્પયેત્ ॥ ૨,૪.૧૬૧॥

ગરુડ ઉવાચ ।
કૃચ્છ્રસ્ય તપ્તકૃચ્છ્રસ્ય તથા સાન્તપનસ્ય ચ ।
લક્ષણં બ્રૂહિ મે સ્વામિંસ્ત્રયાણામપિ સુવ્રત ॥ ૨,૪.૧૬૨॥

શ્રીકૃષ્ણ ઉવાચ ।
ત્ર્યહં પ્રાતસ્ત્ર્યહં સાયં ત્ર્યહમદ્યાદયાચિતમ્ ।
ઉપવાસસ્ત્ર્યહઞ્ચૈવ એષ કૃચ્છ્ર ઉદાહૃતઃ ॥ ૨,૪.૧૬૩॥

તપ્તક્ષીરઘૃતામ્બૂનામેકૈકં પ્રત્યહં પિબેત્ ।
એકરાત્રોપવાસશ્ચ તપ્તકૃચ્છ્ર ઉદાહૃતઃ ॥ ૨,૪.૧૬૪॥

ગોમૂત્રં ગોમયં ક્ષીરં દધિ સર્પિઃ કુશોદકમ્ ।
જગ્ધ્વા પરેઽહ્ન્યુપવસેત્કૃચ્છ્રં સાન્તપનઞ્ચરન્ ॥ ૨,૪.૧૬૫॥

મયા તેઽયં સમાખ્યાતો દુર્મૃતસ્ય વિધિઃ ખગ ।
તદા મૃતં વિજાનીયાદ્દીપનિર્વાણમાગતઃ ॥ ૨,૪.૧૬૬॥

અગ્નિદાહં તતઃ કુર્યાત્સૂતકઞ્ચ દિનત્રયમ્ ।
દશાહં ગર્તપિણાડઞ્ચ કર્તવ્યં પ્રેતપૂર્વકમ્ ॥ ૨,૪.૧૬૭॥

એવં વિધિં તતઃ કુર્યાત્તતઃ પ્રેતશ્ચ મુક્તિભાક્ ।
મૃતભ્રાન્ત્યા પ્રતિકૃતેઃ કૃતે દાહે સ વૈ યદિ ॥ ૨,૪.૧૬૮॥

આયાતિ તેન કર્તવ્યં મજ્જનં ઘૃકુણ્ડકે ।
જાતકર્માદિસંસ્કારાઃ કર્તવ્યાઃ પુનરેવ તુ ॥ ૨,૪.૧૬૯॥

ઊઢામેવ સ્વકાં ભાર્યામુદ્વહેદ્વિધિવત્પુમાન્ ।
વર્ષે પઞ્ચદશે પક્ષિન્દ્વાદશે વા ગતે સતિ ॥ ૨,૪.૧૭૦॥

અજ્ઞાતસ્ય પ્રોષિતસ્ય કૃત્વા પ્રતિકૃતિં દહેત્ ।
રજસ્વલાસૂતિકયોર્વિશેષં મરણે શ‍ૃણુ ॥ ૨,૪.૧૭૧॥

સૂતિકાયાં મૃતાયાન્તુ એવં કુર્વન્તિ યાજ્ઞિકાઃ ।
કુમ્ભે સલિલમાદાય પઞ્ચગવ્યં તથૈવ ચ ॥ ૨,૪.૧૭૨॥

પુણ્યાભિરભિમન્ત્ર્યાપો વાચા શુદ્ધિં લભેત્તતઃ ।
શતસૂર્પોદકેનાદૌ સ્નાપયિત્વા યથાવિધિ ॥ ૨,૪.૧૭૩॥

તેનૈવ સ્નાપયિત્વા તુ દાહં કુર્યાત્સ્વગેશ્વર ।
પઞ્ચભિઃ સ્નાપયિત્વા તુ ગવ્યૈઃ પ્રેતાં રજસ્વલામ્ ॥ ૨,૪.૧૭૪॥

વસ્ત્રાન્તરાકૃતિં કૃત્વા દાહયેદ્વિધિપૂર્વકમ્ ।
મૃતસ્ય પઞ્ચકે દાહવિધિં વચ્મિ શ‍ૃણુષ્વ મે ॥ ૨,૪.૧૭૫॥

આદૌ કૃત્વા ધનિષ્ઠાર્ધમેતન્નક્ષત્રપઞ્ચકમ્ ।
રેવત્યન્તં સદા દૂષ્યમશુભં સર્વદા ભવેત્ ॥ ૨,૪.૧૭૬॥

દાહસ્તત્ર ન કર્તવ્યો વિષાદઃ સર્વજન્તુષુ ।
ન જલં દીયતે તેષુ અશુભં સર્વદા ભવેત્ ॥ ૨,૪.૧૭૭॥

પઞ્ચકાનન્તરં સર્વં કાર્યં કર્તવ્યમન્યથા ।
પુત્રાણાં ગોત્રિણાં તસ્ય સન્તાપોઽપ્યુપજાયતે ॥ ૨,૪.૧૭૮॥

ગૃહે હાનિર્ભવત્યેવ ઋક્ષેષ્વેષુ મૃતસ્ય ચ ।
અથ વા ઋક્ષમધ્યે ચ દાહસ્તુ વિધિપૂર્વકઃ ॥ ૨,૪.૧૭૯॥

ક્રિયતે માનુષાણાન્તુ સ વા આહુતિપૂર્વકઃ ।
વિપ્રૈર્વિધિરતઃ કાર્યો મન્ત્રૈસ્તુ વિધિપૂર્વકમ્ ॥ ૨,૪.૧૮૦॥

શવસ્થાનસમીપે તુ ક્ષેપ્તવ્યાઃ પુત્તલાસ્તતઃ ।
દર્ભકૂપ્તાસ્તુ ચત્વાર ઋક્ષમન્ત્રાભિમન્ત્રિતાઃ ॥ ૨,૪.૧૮૧॥

તતો દાહઃ પ્રકર્તવ્યસ્તૈશ્ચ પુત્તલકૈઃ સહ ।
સૂતકાન્તે તદા પુત્રૈઃ કાર્યં શાન્તિકપૌષ્ટિકમ્ ॥ ૨,૪.૧૮૨॥

પઞ્ચકેષુ મૃતો યોઽસૌ ન સતિં લભતે નરઃ ।
તિલાન્ગાઞ્ચ સુવર્ણઞ્ચ તમુદ્દિશ્ય ઘૃતં દદેત્ ॥ ૨,૪.૧૮૩॥

વિપ્રાણાં દાપયેદ્યાનં સર્વવિઘ્નવિનાશનમ્ ।
ભોજનોપાનહૌચ્છત્રં હેમમુદ્રા ચ વાસસી ॥ ૨,૪.૧૮૪॥

દક્ષિણા દીયતે વિપ્રે પાતકસ્ય પ્રમોચનઃ ।
મયાતેઽયં સમાખ્યાતો વિધિઃ પઞ્ચહરઃ સ્થિતઃ ।
સંયમિન્યાં યથાયાનં યથાવર્ષં મૃતક્રિયા ॥ ૨,૪.૧૮૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે પ્રેતકલ્પે શ્રીકૃષ્ણગરુડસંવાદે
દહનવિધિકૃચ્છ્રલક્ષણદગ્ધાગમનરજસ્વલામરણવિધિપઞ્ચકમરણ-
પ્રાયશ્ચિત્તનિરૂપણં નામ ચતુર્થોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫
શ્રીકૃષ્ણ ઉવાચ ।
એવં દગ્ધ્વા નરં પ્રેતં સ્નાત્વા કૃત્વા તિલોદકમ્ ।
અગ્રતઃ સ્ત્રીજનો ગચ્છેદ્વ્રજેયુઃ પૃષ્ઠતો નરાઃ ॥ ૨,૫.૧॥

પ્રાશયેન્નિમ્બપત્રાણિ રુદન્તો નામપૂર્વકમ્ ।
વિધાતવ્યં ચાચમનં પાષાણોપરિ સંસ્થિતે ॥ ૨,૫.૨॥

તે પ્રવિશ્ય ગૃહં સર્વે સુતાદ્યાશ્ચ સપિણ્ડકાઃ ।
ભવેયુર્દશરાત્રં વૈ યત આશૌચકં ખગ ॥ ૨,૫.૩॥

ક્રીતલબ્ધાશનાઃ સર્વે સ્વપેયુસ્તે પૃથક્પૃથક્ ।
અક્ષારલવણાન્નાઃ સ્યુર્નિમજ્જેયુશ્ચ તે ત્ર્યહમ્ ॥ ૨,૫.૪॥

અમાંસભોજનાશ્ચાધઃ શયીરન્બ્રહ્મચારિણઃ ।
પરસ્પરં ન સંસ્પૃષ્ટા દાનાધ્યયનવર્જિતાઃ ॥ ૨,૫.૫॥

મલિનાશ્ચાધોમુખાશ્ચ દીના ભોગવિવર્જિતાઃ ।
અઙ્ગસંવાહનં કેશમાર્જનં વર્જયન્તિ તે ॥ ૨,૫.૬॥

મૃન્મયે પત્રજે વાપિ ભુઞ્જીરંસ્તે ચ ભાજને ।
ઉવાસન્તુ તે કુર્યુરેકાહમથ વા ત્ર્યહમ્ ॥ ૨,૫.૭॥

ગરુડ ઉવાચ ।
આશૌચિન ઇતિ પ્રોક્તમાશૌચસ્ય ચ વૈ પ્રભો ।
લક્ષણં કિં કિયત્કાલં ભાવ્યં વા તદ્યુતૈર્નરૈઃ ॥ ૨,૫.૮॥

શ્ૃકૃષ્ણ ઉવાચ ।
અપનોદ્યન્ત્વિદં કાલાદિભિરાશુ નિષેધકૃત્ ।
પિણ્ડાધ્યયનદાનાદેઃ પુઙ્ગતોઽતિશયો હિ તત્ ॥ ૨,૫.૯॥

દશાહં શાવમાશૌચં સપિણ્ડેષુ વિધીયતે ।
જનનેઽપ્યેવમેવ સ્યાન્નિપુણં શુદ્ધિમિચ્છતામ્ ॥ ૨,૫.૧૦॥

જન્મન્યેકોદકાનાન્તુત્રિરાત્રાચ્છુદ્ધિરિષ્યતે ।
શાવસ્ય શેષાચ્છુધ્યન્તિ ત્ર્યહાદુદકદાયિનઃ ॥ ૨,૫.૧૧॥

આદન્તજનનત્સદ્ય આ ચૌલાન્નૈશિકી સ્મૃતા ।
ત્રિરાત્રમા વ્રતાદેશાદ્દશરાત્રમતઃ પરમ્ ॥ ૨,૫.૧૨॥

આશૌચં તે સમાખ્યાતં સંક્ષેપાત્પ્રકૃતં બ્રુવે ।
જલં ત્રિદિવમાકાશે સ્થાપ્યં ક્ષીરઞ્ચ મૃન્મયે ॥ ૨,૫.૧૩॥

અત્ર સ્નાહિ પિબાત્રેતિ મન્ત્રેણાનેન કાશ્યપ ।
કાષ્ઠત્રયે ગુણૈર્બદ્ધે પ્રીત્યૈ રાત્રૌ ચતુષ્પથે ॥ ૨,૫.૧૪॥

પ્રથમેઽહ્નિ તૃતીયે વા સપ્તમે નવમે તથા ।
અસ્થિસંચયનં કાર્યં દિને તદ્ગોત્રજૈઃ સહ ॥ ૨,૫.૧૫॥

તદૂર્ધ્વમઙ્ગસંસ્પર્શઃ સપિણ્ડાનાં વિધીયતે ।
યોગ્યાઃ સર્વક્રિયાણાં ચ સમાનસલિલાસ્તથા ॥ ૨,૫.૧૬॥

પ્રેતપિણ્ડં બહિર્દદ્યાદ્દર્ભમાત્રવિવર્જિતમ્ ।
પ્રાગુદીચ્યાં ચરું કૃત્વા સ્નાત્વા પ્રયતમાનસઃ ॥ ૨,૫.૧૭॥

ભૂમાવસંસ્કૃતાનાં ચ સંસ્કૃતાનાં કુશેષુ ચ ।
નવભિર્દિવસૈઃ પિણ્ડાન્નવ દદ્યાત્સમાહિતઃ ॥ ૨,૫.૧૮॥

દશમં પિણ્ડમુત્સૃજ્ય રાત્રિશેષે શુચિર્ભવેત્ ।
અસગોત્રઃ સગોત્રો વા યદિ સ્ત્રી યતિ વા પુમાન્ ॥ ૨,૫.૧૯॥

પ્રથમેઽહનિ યો દદ્યાત્સ દશાહં સમાપયેત્ ।
શાલિના સક્તુભિર્વાપિ શાકૈર્વાપ્યથ નિર્વપેત્ ॥ ૨,૫.૨૦॥

પ્રથમેઽહનિ યદ્દ્રવ્યં તદેવ સ્યાદ્દશાહિકમ્ ।
યાવદાશૌચમેકૈકસ્યાઞ્જલેર્દાનમુચ્યતે ॥ ૨,૫.૨૧॥

યદ્વા યસ્મિન્દિને દાનં તસ્મિંસ્તદ્દિનસંખ્યયા ।
દશાહેઽઞ્જલયઃ પક્ષિન્પઞ્ચાશદન્તિમે ॥ ૨,૫.૨૨॥

દ્વિવૃદ્ધ્યા વા ભવેત્પક્ષિન્નઞ્જલીનાં શતં પુનઃ ।
યદાહિ ત્ર્યહમાશૌચં તદા વાઞ્જલયો દશ ॥ ૨,૫.૨૩॥

ત્રયોઽઞ્જલય એવં તુ પ્રથમેઽહનિવૈ તદા ।
ચત્વારસ્તુ દ્વિતીયેઽહ્નિ તૃતીયે સ્યુસ્ત્રયસ્તથા ॥ ૨,૫.૨૪॥

શતાઞ્જલિ યદા પક્ષિન્નાદ્યે ત્રિંશત્તદાહનિ ।
ચત્વારિંશદ્વિતીયેઽહ્નિ ત્રિંશદહ્નિ તૃતીયકે ॥ ૨,૫.૨૫॥

એવં જલસ્યાઞ્જલયો વિભાજ્યાઃ પક્ષયોર્દ્વયોઃ ।
સર્વેષુ પિતૃકાર્યેષુ પુત્રો મુક્યોઽધિકારવાન્ ॥ ૨,૫.૨૬॥

પિણ્ડપ્રસેકસ્તૂષ્ણીઞ્ચ પુષ્પધૂપાદિકં તથા ।
દશમેઽહનિ સમ્પ્રાપ્તે સ્નાનં ગ્રામાદ્બહિશ્ચરેત્ ॥ ૨,૫.૨૭॥

તત્ર ત્યાજ્યાનિ વાસાંસિ કેશશ્મશ્રુનખાનિ ચ ।
વિપ્રઃ શુધ્યત્યપઃ સ્પૃષ્ટ્વા ક્ષત્રિયો વાહનં તથા ॥ ૨,૫.૨૮॥

વૈશ્યઃ પ્રતોદં રશ્મીન્વા શૂદ્રો યષ્ટિં કૃતક્રિયઃ ।
મૃતાદલ્પવયોભિશ્ચ સપિણ્ડૈઃ પરિવાપનમ્ ॥ ૨,૫.૨૯॥

કાર્યન્તુ ષોડશી ષડ્ભિઃ પિણ્ડૈર્દશભિરેવ ચ ।
પ્રથમા મલિના હ્યેતૈરાદશાહં મૃતેર્ભવેત્ ॥ ૨,૫.૩૦॥

દિનાનિ દશ યાન્પિણ્ડાન્કુર્વન્ત્યત્ર સુતાદયઃ ।
પ્રત્યહં તે વિભજ્યન્તે ચતુર્ભાગૈઃ ખગોત્તમ ॥ ૨,૫.૩૧॥

ભાગદ્વયેન દેહઃ સ્યાત્તૃતીયેન યમાનુગાઃ ।
તૃપ્યન્તિ હિ ચતુર્થેન સ્વયમપ્યુપજીવતિ ॥ ૨,૫.૩૨॥

અહોરાત્રૈસ્તુ નવભિર્દેહો નિષ્પત્તિમાપ્નુયાત્ ।
શિરસ્ત્વાદ્યેન પિણ્ડેન પ્રેતસ્ય ક્રિયતે તથા ॥ ૨,૫.૩૩॥

દ્વિતીયેન તુ કર્ણાક્ષિનાસિકં તુ સમાસતઃ ।
ગલાંસભુજવક્ષશ્ચ તૃતીયેન તથા ક્રમાત્ ॥ ૨,૫.૩૪॥

ચતુર્થેન ચ પિણ્ડેન નાભિલિઙ્ગગુદં તથા ।
જાનુજઙ્ઘં તથા પાદૌ પઞ્ચમેન તુ સર્વદા ॥ ૨,૫.૩૫॥

સર્વમર્માણિ ષષ્ઠેન સપ્તમેન તુ નાડયઃ ।
દન્તલોમાન્યષ્ટમેન વીર્યન્તુ નવમેન ચ ॥ ૨,૫.૩૬॥

દશમેન તુ પૂર્ણત્વં તૃપ્તતા ક્ષુદ્વિપર્યયઃ ।
મધ્યમાં ષોડશીં વચ્મિ વૈનતેય શ્ૃણુષ્વ મે ॥ ૨,૫.૩૭॥

વિષ્ણવાદિવિષ્ણુપર્યન્તાન્યેકાદશ તથા ખગ ।
શ્રાદ્ધાનિ પઞ્ચ દેવાનામિત્યેષાં મધ્યષીડશી ॥ ૨,૫.૩૮॥

નિમિત્તં દુર્મતિં કૃત્વા યદિ નારાયણો બલિઃ ।
એકાદશાહે કર્તવ્યો વૃષોત્સર્गોઽપિ તત્ર વૈ ॥ ૨,૫.૩૯॥

એકાદશાહે પ્રેતસ્ય યસ્યાત્સૃજ્યેત નો વૃષઃ ।
પ્રેતત્વં સુસ્થિરં તસ્ય દત્તૈઃ શ્રાદ્ધશતૈરપિ ॥ ૨,૫.૪૦॥

અકૃત્વા યદ્વૃષોત્સર્ગં કૃતં વૈ પિણ્ડપાતનમ્ ।
નિષ્ફલં સકલં વિદ્યાત્પ્રમીતાય ન તદ્ભવેત્ ॥ ૨,૫.૪૧॥

વૃષોત્સર્ગાદૃતે નાન્યત્કિઞ્ચિદસ્તિ મહીતલે ।
પુત્રઃ પત્ન્યથ દૌહિત્રઃ પિતા વા દુહિતાથ વા ॥ ૨,૫.૪૨॥

મૃતાદનન્તરં તસ્ય ધ્રુવં કાર્યો વૃષોત્સવઃ ।

ચતુર્વત્સતરીયુક્તો યસ્યોત્સૃજ્યેત વા વૃષઃ ॥ ૨,૫.૪૩॥

અલઙ્કૃતો વિધાનેન પ્રેતત્વં તસ્ય નો ભવેત્ ।
એકાદશેઽહ્નિ સમ્પ્રાપ્તે વૃષાલાભો ભવેદ્યદિ ॥ ૨,૫.૪૪॥

દર્ભૈઃ પિષ્ટૈસ્તુ સમ્પાદ્ય તં વૃષં મોચયેદ્બુધઃ ।
વૃષોત્સર્જનવેલાયાં વૃષાભાવ (લાભ) કથઞ્ચન ॥ ૨,૫.૪૫॥

મૃત્તિકાભિસ્તુ દર્ભૈર્વા વૃષં કૃત્વા વિમોચયેત્ ।
યદિષ્ટં જીવતસ્તસ્ય દદ્યાદેકાદશેઽહનિ ॥ ૨,૫.૪૬॥

મૃતમુદ્દિશ્ય દાતવ્યં શય્યાધેન્વાદિકં તથા ।
વિપ્રાન્બહૂન્ભોજયીત પ્રેતસ્ય ક્ષુદ્વિશાન્તયે ॥ ૨,૫.૪૭॥

તૃતીયાં ષોડશીં વચ્મિ વૈનતેય શ‍ૃણુષ્વ તામ્ ।
દ્વાદશ પ્રતિમાસ્યાનિ આદ્યં ષાણ્માસિકં તથા ॥ ૨,૫.૪૮॥

સપિણ્ડીકરણં ચૈવ તૃતીયા ષોડશી મતા ।
દ્વાદશાહે ત્રિપક્ષે ચ ષણ્માસે માસિકેઽબ્દિકે ॥ ૨,૫.૪૯॥

તૃતીયાં ષોડશીમેનાં વદન્તિ મતભેદતઃ ।
યસ્યૈતા નિ ન દત્તાનિ પ્રેતશ્રાદ્ધાનિ ષોડશ ॥ ૨,૫.૫૦॥

પિશાચત્વં સ્થિરં તસ્ય દત્તૈઃ શ્રાદ્ધશતૈરપિ ।
એકાદશે દ્વાદશે વા દિને આદ્યં પ્રકીર્તિતમ્ ॥ ૨,૫.૫૧॥

માસાદૌ પ્રતિમાસઞ્ચ શુદ્ધં મૃતતિથૌ ખગ ।
એકેનાહ્ના ત્રિભિર્વાપિ હીનેષુ વિનતાસુત ॥ ૨,૫.૫૨॥

માસષણ્માસવર્ષેષુ ત્રિપક્ષેષુ ભવન્તિ હિ ।
શ્રાદ્ધાન્યથસ્યાત્સાપિણ્ડ્યં પૂર્ણે વર્ષે તદર્ધકે ॥ ૨,૫.૫૩॥

ત્રિપક્ષેઽભ્યુદયે વાપિ દ્વાદશાહેઽથ વા નૃણામ્ ।
આનન્ત્યાત્કુલધર્માણાં પુંસાઞ્ચૈવાયુષઃ ક્ષયાત્ ॥ ૨,૫.૫૪॥

અસ્થિરત્વાચ્છરીરસ્ય દ્વાદશાહે પ્રશસ્યતે ।
સપિણ્ડીકરણેષ્વેવં વિધિં પક્ષીન્દ્ર મે શ‍ૃણુ ॥ ૨,૫.૫૫॥

એકોદ્દિષ્ટવિધાનેન કાર્યં તદપિ કાશ્યપ ।
તિલગન્ધોદકૈર્યુક્તં કુર્યાત્પાત્રચતુષ્ટયમ્ ॥ ૨,૫.૫૬॥

પાત્રં પ્રેતસ્ય તત્રૈકં પિત્ર્યં પાત્રત્રયં તથા ।
સેચયેત્પિતૃપાત્રેષુ પ્રેતપાત્રં ખગ ત્રિષુ ॥ ૨,૫.૫૭॥

ચતુરો નિર્વપેત્પિણ્ડાન્પૂર્વન્તેષુ સમાપયેત્ ।
તતઃ પ્રભૃતિ વૈ પ્રેતઃ પિતૃસામાન્યમશ્નુતે ॥ ૨,૫.૫૮॥

તતઃ પિતૃત્વમાપન્ને તસ્મિન્પ્રેતે ખગેશ્વર ।
શ્રાદ્ધધર્મૈરશેષૈસ્તુ તત્પૂર્વાનર્ચયેત્પિતૄન્ ॥ ૨,૫.૫૯॥

એકચિત્યારોહણે ચ એકાહ્નિ મરણે તથા ।
સાપિણ્ડ્યન્તુ સ્ત્રિયા નાસ્તિ મૃતે ભર્તુઃ સ્ત્રિયો ભવેત્ ॥ ૨,૫.૬૦॥

પાકૈક્યમથ કાલૈક્યં કર્ત્રૈક્યઞ્ચ ભવેત્ખગ ।
શ્રાદ્ધાદૌ સહ દાહે ચ પતિપત્ન્યોર્ન સંશયઃ ॥ ૨,૫.૬૧॥

ભર્તુર્મૃતતિથેરન્યતિથૌ ચિતિમથારુહેત્ ।
તામૃતાહનિ તુ સમ્પ્રાપ્તે પૃથક્પિણ્ડેન યોજયેત્ ॥ ૨,૫.૬૨॥

પ્રત્યબ્દઞ્ચ યુગપત્તુ સમાપયેત્ ॥ ૨,૫.૬૩॥

યસ્ય સંવત્સરાદર્વાક્સપિણ્ડીકરણં ભવેત્ ।
માસિકઞ્ચોદકુમ્ભઞ્ચ દેયં તસ્યાપિ વત્સરમ્ ॥ ૨,૫.૬૪॥

નવશ્રાદ્ધં સપિણ્ડત્વં શ્રાદ્ધાન્યપિ ચ ષોડશ ।
એકેનૈવ તુ કાર્યાણિ સંવિભક્તધનેષ્વપિ ॥ ૨,૫.૬૫॥

પિતામહીભિઃ સાપિણ્ડ્યં તથા માતામહૈઃ સહ ।
ઉક્તં ભર્ત્રાપિ સાપિણ્ડ્યં સ્ત્રિયા વૈષયભેદતઃ ॥ ૨,૫.૬૬॥

નવશ્રાદ્ધસ્ય તે કાલં વક્ષ્યામિ શૃણુ કાશ્યપ ।
મરણાહ્નિ મૃતિસ્થાને શ્રાદ્ધં પક્ષિન્પ્રકલ્પયેત્ ॥ ૨,૫.૬૭॥

દ્વિતીયઞ્ચ તતો માર્ગે વિશ્રામો યત્ર કારિતઃ ।
તતઃ સઞ્ચયનસ્થાને તૃતીયં શ્રાદ્ધમુચ્યતે ॥ ૨,૫.૬૮॥

પઞ્ચમે સપ્તમે તદ્વદષ્ટમે નવમે તથા ।
દશમૈકાદશે ચૈવ નવ શ્રાદ્ધાનિ વૈ ખગ ॥ ૨,૫.૬૯॥

શ્રાદ્ધાનિ નવ ચૈતાનિ તૃતીયા ષોડશી સ્મૃતા ।
એકોદ્દિષ્ટવિધાનેન કાર્યાણિ મનુજૈસ્તથા ॥ ૨,૫.૭૦॥

પ્રથમેઽહ્નિ તૃતીયે વા પઞ્ચમે સપ્તમે તથા ।
નવમૈકાદશે ચૈવ નવશ્રાદ્ધં પ્રકીર્તિતમ્ ॥ ૨,૫.૭૧॥

ઉચ્યન્તે ષડિમાનીહ નવ સ્યુરપિ યાગેતઃ ।
ઉક્તાનિ તે મયા તાનિ ઋષીણાં મતભેદતઃ ॥ ૨,૫.૭૨॥

રૂઢિપક્ષો મમાભીષ્ટો યોગઃ કૈશ્ચિદિહેષ્યતે ।
આદ્યે દ્વિતીયે દાતવ્યસ્તથૈવૈકં પવિત્રકમ્ ॥ ૨,૫.૭૩॥

પ્રેતાય પિણ્ડો દાતવ્યો ભુક્તવત્સુ દ્વિજાતિષુ ।
પ્રશ્નસ્તત્રાભિરણ્યેતિ યજમાનદ્વિજન્મના ॥ ૨,૫.૭૪॥

અક્ષય્યમમુકસ્યેતિ વક્તવ્યં વિરતૌ તથા ।
એકોદ્દિષ્ટં મે નિબોધ ચેત્થમાવત્સરં સ્મૃતમ્ ॥ ૨,૫.૭૫॥

સપિણ્ડીકરણાદૂર્ધ્વં યાનિ શ્રાદ્ધાનિ ષોડશ ।
એકોદ્દિષ્ટવિધાનેન ચરેદ્વા પાર્વણાદૃતે ॥ ૨,૫.૭૬॥

પ્રત્યબ્દં યો યથા કુર્યાત્તથા કુર્યાત્સ તાન્યપિ ।
એકાદશે દ્વાદશેઽહ્નિ પ્રેતો ભુઙ્ક્તે દિનદ્વયમ્ ॥ ૨,૫.૭૭॥

યોષિતઃ પુરુષસ્યાપિ પિણ્ડં પ્રેતેતિ નિર્વપેત્ ।
સાપિણ્ડ્યે તુ કૃતે તસ્ય પ્રેતશબ્દો નિવર્તતે ॥ ૨,૫.૭૮॥

દીપદાનં પ્રકર્તવ્યમાવર્ષન્તુ ગૃહાદ્બહિઃ ।
અન્નં દીપો જલં વસ્ત્રમન્યદ્વાદીયતે ચ યત્ ॥ ૨,૫.૭૯॥

તૃપ્તિદં પ્રેતશબ્દેન સપિણ્ડીકરણાવધિ ।
અબ્દકૃત્યં મયોક્તાન્તે સમાસાદ્વિનતાસુત ॥ ૨,૫.૮૦॥

વૈવસ્વતગૃહે યાનં યથા તત્તુ નિબોધમેઃ ।
ત્રયોદશેઽહ્નિ શ્રવણાકર્મણોનન્તરન્તુ સઃ ॥ ૨,૫.૮૧॥

ત્વગ્ગૃહીતાહિવત્તાર્ક્ષ્ય ગૃહીતો યમકિઙ્કરૈઃ ।
તસ્મિન્માર્ગે વ્રજત્યેકો ગૃહીત ઇવ મર્કટઃ ॥ ૨,૫.૮૨॥

વાય્વગ્રસારિવદ્રૂપં દેહમન્યત્પ્રપદ્યતે ।
તત્પિણ્ડજં પાતનાર્થમન્યત્તુ પિતૃસમ્ભવમ્ ॥ ૨,૫.૮૩॥

તત્પ્રમાણવયોઽવસ્થાસંસ્થાનાં પ્રાગ્ભવો યથા ।
ષડશીતિ સહસ્રાણિ યોજનાનાં પ્રમાણતઃ ॥ ૨,૫.૮૪॥

અધ્વાન્તરાલિકો જ્ઞેયો યમમાનુષલોકયોઃ ।
સાધિકાર્ધક્રોશયુતં યોજનાનાં શતદ્વયમ્ ॥ ૨,૫.૮૫॥

ચત્વારિં શત્તથા સપ્ત પ્રત્યહં યાતિ તત્ર સઃ ।
અષ્ટાચત્વારિંશતા ચ ત્રૈંશતા દિવસૈરિતિ ॥ ૨,૫.૮૬॥

વૈવસ્વતપુરં યાતિ કૃષ્યમાણો યમાનુગૈઃ ।
એવં ક્રમેણ યાતવ્યે માર્ગે પાપરતૈસ્તુ યત્ ॥ ૨,૫.૮૭॥

જાયતે સપ્રપઞ્ચં તચ્છૃણુ ત્વમરુણાનુજ ।
ત્રયોદશદિને દત્તઃ પાશૈર્બદ્ધ્વાતિદારુણૈઃ ॥ ૨,૫.૮૮॥

યમસ્યાઙ્કુશહસ્તો વૈ ભૃકુટીકુટિલાનનઃ ।
દણ્ડપ્રહારસમ્ભ્રાન્તઃ કૃષ્યતે દક્ષિણાં દિશમ્ ॥ ૨,૫.૮૯॥

કુશકણ્ટકવલ્મીકશઙ્કુપાષાણકર્કશે ।
તથા પ્રદીપ્તજ્વલને ક્વચિચ્છ્વભ્રશતોત્કટે ॥ ૨,૫.૯૦॥

પ્રદીપ્તાદિત્યતપ્તે ચ દહ્યમાનઃ સદંશકે ।
કૃષ્યતે યમદૂતૈશ્ચ શિવાવન્નાદભીષણૈઃ ॥ ૨,૫.૯૧॥

પ્રયાતિઃ દારુણે માર્ગે પાપકર્મા યમાલયે ।
કલેવરે દહ્યમાને મહાન્તં ક્ષયમૃચ્છતિ ॥ ૨,૫.૯૨॥

ભક્ષ્યમાણે તથૈવાઙ્ગે ભિદ્યમાને ચ દારુણમ્ ।
છિદ્યમાને ચિરતરં જન્તુર્દુઃખમવાપ્નુતે ॥ ૨,૫.૯૩॥

સ્વેન કર્મવિ પાકેન દેહાન્તરગતોઽપિ સન્ ।
પુરાણિ ષોડશામુષ્મન્માર્ગે તાનિ ચ મે શ ૃણુ ॥ ૨,૫.૯૪॥

યામ્યં સૌરિપુરં નગેદ્રભવનં ગન્ધર્વશૈલાગમૌ ક્રૌઞ્ચં
ક્રૂરપુરં વિચિત્રભવનં બહ્વાપદં દુઃખદમ્ ।
નાનાક્રન્દપુરં સુતપ્તભવનં રૌદ્રં પયોવર્ષણં શીતાઢ્યં
બહુભીતિષોડશપુરાણ્યેતાન્યદૃષ્ટનિ તે ॥ ૨,૫.૯૫॥

તત્ર યામ્ય પુરં ગચ્છન્પુત્રપુત્રેતિ ચ બ્રુવન્ ।
હાહેતિ ક્રન્દતે નિત્યં સ્વકૃતં દુષ્કૃતં સ્મરન્ ॥ ૨,૫.૯૬॥

અષ્ટાદશોદિને તાર્ક્ષ્ય તત્પુર પ્રાપ્નુયાદસૌ ।

પુષ્પભદ્રા નદી યત્ર ન્યગ્રોધઃ પ્રિયદર્શનઃ ॥ ૨,૫.૯૭॥

વિશ્રામેચ્છાં કરોત્યત્ર કારયન્તિ ન તે ભટાઃ ।
ક્ષિતૌ દત્તં સુતૈસ્તસ્ય સ્નેહાદ્વા કૃપયા તથા ॥ ૨,૫.૯૮॥

માસિકં પિણ્ડમશ્નાતિ તતઃ સૌરિપુરં વ્રજેત્ ।
વ્રજન્નેવં પ્રલપતે મુદ્ગરાહતિપીડિતઃ ॥ ૨,૫.૯૯॥

જલાશયો નૈવ કૃતો મયા તદા મનુષ્યતૃપ્ત્યૈ પશુપક્ષિતૃપ્તય ।
ગોતૃપ્તિહેતોર્ન ચ ગોચરઃ કૃતઃ શરીર હે નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૫.૧૦૦॥

તત્ર નામ્ના તુ રાજાસૌ જઙ્ગમઃ કામરૂપધૃક્ ।
ભયાત્તદ્દર્શનાજ્જાતાદ્ભુઙ્ક્તે પિણ્ડં સ શઙ્કિતઃ ॥ ૨,૫.૧૦૧॥

ત્રિપક્ષે જલસંયુક્તં ક્ષિતૌ દત્તં તતો વ્રજેત્ ।
વ્રજન્નેવં પ્રલપતે ખડ્ગાઘાતપ્રપીડિતઃ ॥ ૨,૫.૧૦૨॥

ન નિત્યદાનં ન ગવાહ્નિકં કૃતં પુસ્તં ચ દત્તં ન હિ વેદશાસ્ત્રયોઃ ।
પુરાણદૃષ્ટો ન હિ સેવિતોઽધ્વા શરીર હે નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૫.૧૦૩॥

નગેન્દ્રનગરં ગત્વા ભુક્ત્વા ચાન્નં તથાવિધમ્ ।
માસિ દ્વિતીયે યદ્દત્તં બાન્ધવૈસ્તુ તતો વ્રજેત્ ॥ ૨,૫.૧૦૪॥

વ્રજન્નેવં પ્રલપતે કૃપાણત્સરુતાડિતઃ ।
પરાધાનમભૂત્સર્વમમ મૂર્ખશિરોમણેઃ ॥ ૨,૫.૧૦૫॥

મહતા પુણ્યયોગેન માનુષ્યં લબ્ધવાનહમ્ ।
તૃતીયે માસિ સમ્પ્રાપ્તે ગન્ધર્વનગરે શુભમ્ ॥ ૨,૫.૧૦૬॥

તૃતીયમાસિકં પિણ્ડં તત્ર ભુક્ત્વા બ્રજત્યસૌ ।
વ્રજન્નેવં વિલપતે તદગ્રેણાહતઃ પથિ ॥ ૨,૫.૧૦૭॥

મયા ન દત્તં ન હુતં હુતાશને તપો ન તપ્તં હિમશૈલગહ્વરે ।
ન સેવિતં ગાઙ્ગમહો મહાજલં શરીર હે નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૫.૧૦૮॥

તુર્યે શૈલાગમં માસિ પ્રાપ્નુયાત્તત્ર વર્ષણમ્ ।
તસ્યોપરિ ભવેત્પક્ષિન્પાષાણાનાં નિરન્તરમ્ ॥ ૨,૫.૧૦૯॥

ચતુર્થમાસિકં શ્રાદ્ધં ભુક્ત્વા તત્ર પ્રસર્પતિ ।
સ પતન્નેવ વિલપન્પાષાણાઘતિપીડિતઃ ॥ ૨,૫.૧૧૦॥

ન જ્ઞાનમાર્ગો ન ચ યોગમાર્ગો ન કર્મમાર્ગો ન ચ ભક્તિમાર્ગઃ ।
ન સાધુસઙ્ગાત્કિમપિ શ્રુતં મયા શરીર હે નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૫.૧૧૧॥

તતઃ ક્રૂરપુર માસિ પઞ્ચમે યાતિ કાશ્યપ ।
ભુવિ દત્તં પિણ્ડજલં ભુક્ત્વા ક્રૂરપુરં વ્રજેત્ ॥ ૨,૫.૧૧૨॥

વ્રજન્નેવં વિલપતે પટ્ટિશૈઃ પાતિતઃ પથિ ।
હા માતર્હાપિતર્ભ્રાતઃ સુતા હા હા મમ સ્ત્રિયઃ ॥ ૨,૫.૧૧૩॥

યુષ્માભિર્નોપદિષ્ટોઽહમવસ્થાં પ્રાપ્ત ઈદૃશીમ્ ।
એવં લાલપ્યમાનં તે યમદૂતા વદન્તિહિ ॥ ૨,૫.૧૧૪॥

ક્વ માતા ક્વ પિતા મૂઢ ક્વ જાયા ક્વ સુતઃ સુહૃત્ ।
સ્વકર્મોપાર્જિતે ભુઙ્ક્ષ્વં મૂર્ખ યાતાશ્ચિરં પથિ ॥ ૨,૫.૧૧૫॥

જાનાસિ શમ્બલમલં બલમધ્વગાનાં નોઽશમ્બલઃ પ્રયતતે પરલોકગત્યૈ ।
ગન્તવ્યમસ્તિ તવ નિશ્ચિતમેવ તેન માર્ગેણ યેન ન ભવેત્ક્રયવિક્રયોઽપિ ॥ ૨,૫.૧૧૬॥

ઊનષાણ્માસિકે ક્રૌઞ્ચે ભુક્ત્વા પિણ્ડન્તુ સોદકમ્ ।
ઘટીમાત્રન્તુ વિશ્રમ્ય વિચિત્રનગરં વ્રજેત્ ॥ ૨,૫.૧૧૭॥

વ્રજન્નેવં વિલપતે શૂલાગ્રેણ વિદારિતઃ ॥ ૨,૫.૧૧૮॥

કુત્ર યામિ ન હિ ગામિ જીવિતં હા મૃતસ્ય મરણં પુનર્ન વૈ ।
ઇત્થમેવ વિલપન્પ્રયાત્યસૌ યાતનાર્હધૃતવિગ્રહઃ પતિ ॥ ૨,૫.૧૧૯॥

વિચિત્રનગરે તત્ર વિચિત્રો નામ પારિથિવઃ ।
તત્ર ષણ્માસપિણ્ડેન તૃપ્તઃ સન્વ્રજતે પુરઃ ॥ ૨,૫.૧૨૦॥

વ્રજન્નેવં વિલપતે પ્રાસાગ્રેણ પ્રપીડિતઃ ॥ ૨,૫.૧૨૧॥

માતા ભ્રાતા પિતા પુત્રઃ કોઽપિ મે વર્તતે ન વા ।
યો મામુદ્ધરતે પાપં પતન્તં દુઃખસાગરે ॥ ૨,૫.૧૨૨॥

વ્રજતસ્તત્ર માર્ગે તુ તત્ર વૈતરણી શુભા ।
શતયોજનવિસ્તીર્ણા પૂયશોણિતસંકુલા ॥ ૨,૫.૧૨૩॥

આયાતિ તત્ર દૃશ્યન્તે નાવિકા ધીવરાદયઃ ।
તે વદન્તિ પ્રદત્તા ગૌર્યદિ વૈતરણી ત્વયા ।
નાવમેનાં સમારોહ સુકેનોત્તર વૈ નદીમ્ ॥ ૨,૫.૧૨૪॥

તત્ર યેન પ્રદત્તા ગૌઃ સ સુખેનૈવ તાં તરેત્ ।
અદાયી તત્ર ધૃષ્યેત કરગ્રાહન્તુ નાવિકૈઃ ॥ ૨,૫.૧૨૫॥

ઉખ્યૈઃ કાકૈર્બકોલૂકૈસ્તીક્ષ્ણતુણ્ડૈર્વિતુદ્યતે ।
મનુજાનાં હિતં દાનમન્તે વૈતરણી ખગ ॥ ૨,૫.૧૨૬॥

દત્તા પાપં દહેત્સર્વં મમ લોકન્તુ સા નયેત્ ।
મપ્તમે માસિ સમ્પ્રાપ્તે પુરં બહ્વાપદં મૃતઃ ॥ ૨,૫.૧૨૭॥

વ્રજેત્તુ સોદકં ભુક્ત્વા પિણ્ડં વૈ સપ્તમાસિકમ્ ।
વ્રજન્નેવં વિલપતે પરિઘાહતિપીડિતઃ ॥ ૨,૫.૧૨૮॥

ન દત્તં ન હુતં તપ્તં ન સ્નાતં ન કૃતં હિતમ્ ।
યાદૃશં ચરિતં કર્મ મૂઢાત્મન્ભુઙ્ક્ષ્વ તાદૃશમ્ ॥ ૨,૫.૧૨૯॥

માસ્યષ્ટમે દુઃખદે તુ પરે ભુક્ત્વાથ સોદકમ્ ।
પિણ્ડં પ્રયાત્સયૌ તાર્ક્ષ્ય નાનાક્રન્દપુરં તતઃ ॥ ૨,૫.૧૩૦॥

પ્રયાણે ચ પ્રવદતે મુસલાઘાતપીડિતઃ ।
ક્વ જાયાચટુલૈશ્ચાટુપટુભિર્વચનૈર્મમ ॥ ૨,૫.૧૩૧॥

ભોજનં ભલ્લભલ્લીભિર્મુસલૈશ્ચ ક્વ મારણમ્ ।
નવમે માસિ દત્તં વૈ નાનાક્રન્દપુરે તતઃ ॥ ૨,૫.૧૩૨॥

પિણ્ડમશ્નાતિ કરુણં નાનાક્રન્દાન્કરોત્યપિ ।
દશમે માસિ દત્તં વૈ સુતપ્તભવનં તતઃ ॥ ૨,૫.૧૩૩॥

સરન્નેવં વિલપતે હલાહતિહતઃ પથિ ।
ક્વ સૂનુપેશલકરૈઃ પાદસંવાહનં મમ ॥ ૨,૫.૧૩૪॥

ક્વ દૂતવજ્રપ્રતિમકૈર્મત્પદકર્ષણમ્ ।
દશમે માસિ પિણ્ડાદિ તત્ર ભુક્ત્વા પ્રસર્પતિ ॥ ૨,૫.૧૩૫॥

માસે ચૈકાદશે પૂર્ણે પુરં રૌદ્રં સ ગચ્છતિ ।
ગચ્છન્નેવ વિલપતે યથા પૃષ્ઠે પ્રપીડિતઃ ॥ ૨,૫.૧૩૬॥

ક્વાહં સતૂલીશયને પરિવર્તન્ક્ષણે ક્ષણે ।
ભટહસ્તભ્રષ્ટયષ્ટિકૃષ્ટપૃષ્ઠઃ ક્વ વા પુનઃ ॥ ૨,૫.૧૩૭॥

ક્ષિતૌ દત્તઞ્ચ પિણ્ડાદિ ભુક્ત્વા તત્ર તતો વ્રજેત્ ।
પયોવર્ષણમિત્યેતન્નામકં પુરમણ્ડજ ॥ ૨,૫.૧૩૮॥

વ્રજન્નેવં વિલપતે કુઠારૈર્મૂર્ધ્નિ તાડિતઃ ।
ક્વ ભૃત્યકોમલકરૈર્ગન્ધતૈલાવસેચનમ્ ॥ ૨,૫.૧૩૯॥

ક્વ કીનાશાનુગૈઃ ક્રોધાત્કુઠારૈઃ શિરસિ વ્યથા ।
ઊનાબ્દિકઞ્ચ યચ્છ્રાદ્ધં તત્ર ભુઙ્ક્તે સુદુઃખિતઃ ॥ ૨,૫.૧૪૦॥

સમ્પૂર્ણે તુ તતો વર્ષે શીતાઢ્યં નગરં વ્રજેત્ ।
ગચ્છન્નેવં છુરિકયા ચ્છિન્નજિહ્વસ્તુ રોદિતિ ॥ ૨,૫.૧૪૧॥

પ્રિયાલાપૈઃ ક્વ ચ સસમધુરત્વસ્ય વર્ણનમ્ ।
ઉક્તમાત્રેઽસિપત્રાદિજિહ્વાચ્છેદઃ ક્વ ચૈવ હિ ॥ ૨,૫.૧૪૨॥

વાર્ષિકં પિણ્ડદાનાદિ ભુક્ત્વા તત્ર પ્રસર્પતિ ।
બહુભીતિકરં તત્તત્પિણ્ડજં દેવમાસ્થિતઃ ॥ ૨,૫.૧૪૩॥

પ્રકાશયતિ પાપ્માનમાત્માનઞ્ચ વિનિન્દતિ ।
યોષિદપ્યેવમેતસ્મિન્માર્ગે વૈ પરિદેવતિ ॥ ૨,૫.૧૪૪॥

તતો યામ્યં નાતિદૂરે નગરં સ હિ ગચ્છતિ ।
ચત્વારિંશદ્યોજનાનિ ચતુર્યુક્તાનિવિસ્તૃતમ્ ॥ ૨,૫.૧૪૫॥

ત્રયોદશ પ્રતીહારાઃ શ્રવણા નામ તત્ર વૈ ।
શ્રવણાકર્મતસ્તુષ્યન્ત્યન્યથા ક્રોધમાપ્નુયુઃ ॥ ૨,૫.૧૪૬॥

તતસ્તત્રાશુ રક્તાક્ષં ભિન્નાઞ્જનચયોપમમ્ ।
મૃત્યુકાલાન્તકાદીનાં મધ્યે પશ્યતિ વૈ યમમ્ ॥ ૨,૫.૧૪૭॥

દંષ્ટ્રાકરાલવદનં ભૃકુટીદારુણાકૃતિમ્ ।
વિરૂપૈર્ભીષણૈર્વક્ત્રૈર્વૃતં વ્યાધિશતૈઃ પ્રભુમ્ ॥ ૨,૫.૧૪૮॥

દણ્ડાસક્તમહાબાહું પાશહસ્તં સુભૈરવમ્ ।
તન્નિર્દિષ્ટાં તતો જન્તુર્ગતિં યાતિ શુભાશુભામ્ ॥ ૨,૫.૧૪૯॥

પાપી પાપાં ગતિં યાતિ યથા તે કથિતં પુરા ।
છત્રોપાનહદાતારો યે ચ વેશ્મપ્રદાયકાઃ ॥ ૨,૫.૧૫૦॥

યે તુ પુણ્યકૃતસ્તત્ર તે પશ્યન્તિ યમં તદા ।
સૌમ્યાકૃતિં કુણ્ડલિનં મૌલિમન્તં ધૃતશ્રિયમ્ ॥ ૨,૫.૧૫૧॥

એકાદશે દ્વાદશે હિ ષણ્માસે આબ્દિકે તથા ।

વિપ્રાન્બહૂન્ભોજયેત્તત્ર યન્મહતી ક્ષુધા ॥ ૨,૫.૧૫૨॥

જીવન્પુત્રકલત્રાદિપ્રદિષ્ટમિતરૈઃ ખગ ।
યો ન સાધયતિ સ્વાર્થમેવં પશ્ચાદ્વિખિદ્યતે ॥ ૨,૫.૧૫૩॥

એતત્તે સર્વમાખ્યાતં સંયમિન્યાં યથાગતિ ।
પ્રોક્તમાવર્ષકૃત્યં તે કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૨,૫.૧૫૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે વર્ષકૃત્યયમલોકમાર્ગયાતનાદિનિરૂપણં
નામ પઞ્ચમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬

ગરુડ ઉવાચ ।
અપિ સાધનયુક્તસ્ય તીર્થદાનરતસ્ય ચ ।
અકૃતે તુ વૃષોત્સર્ગે પરલોકગતિર્ન હિ ॥ ૨,૬.૧॥

તસ્માત્કૃષ્ણ વૃષોત્સર્ગઃ કર્તવ્ય ઇતિ મે શ્રુતમ્ ।
કિં ફલં વૃષયજ્ઞસ્ય પુરા કેન કૃતો હરે ॥ ૨,૬.૨॥

અનડ્વાન્કીદૃશઃ પ્રોક્તઃ કસ્મિન્કાલે વિશેષતઃ ।
કો વિધિસ્તસ્ય નિર્દિષ્ટઃ સર્વં મે કૃપયા વદ ॥ ૨,૬.૩॥

શ્રીકૃષ્ણ ઉવાચ ।
ઇતિહાસં મહાપુણ્યં પ્રવક્ષ્યામિ ખગેશ્વર ।
બ્રહ્મપુત્રેણ યત્પ્રોક્તં રાજાનં વીરવાહનમ્ ॥ ૨,૬.૪॥

વિરાધનગરે રાજા વીરવાહનનામકઃ ।
ધર્માત્મા સત્યસન્ધશ્ચ વદાન્યો વિપ્રતુષ્ટિકૃત્ ॥ ૨,૬.૫॥

સ કદાચિદ્વનં વીરો મહાત્માખેટકં ગતઃ ।
કિઞ્ચિત્પ્રષ્ટુમનાસ્તાર્ક્ષ્ય વસિષ્ઠસ્યાશ્રમં યયૌ ॥ ૨,૬.૬॥

નમસ્કૃત્ય મુનિં તત્ર કૃતાસનપરિગ્રહઃ ।
પશ્રયાવનતો રાજા પપ્રચ્છ ઋષિસંસદિ ॥ ૨,૬.૭॥

રાજોવાચ ।
મુને મયા કૃતો ધર્મો યથાશક્તિ પ્રયત્નતઃ ।

યમસ્ય શાસનં શ્રુત્વા બિભેમિ નિતરાં હૃદિ ॥ ૨,૬.૮॥

યમઞ્ચ યમદૂતાંશ્ચ નિરયાન્ઘોરદર્શનાન્ ।
ન પશ્યામિ મહાભાગ તથા વદ દયાનિધે ॥ ૨,૬.૯॥

વસિષ્ઠ ઉવાચ ।
ધર્મા બહુવિધા રાજન્વર્ણ્યન્તે શાસ્ત્રકોવિદૈઃ ।
સૂક્ષ્મત્વાન્ન વિજાનન્તિ કર્મમાર્ગવિમોહિતાઃ ॥ ૨,૬.૧૦॥

દાનં તીર્થં તપો યજ્ઞાઃ સંન્યાસઃ પૈતૃકો મહઃ ।
ધર્મેષુ ગૃહ્યમાણેષુ વૃષોત્સર્ગો વિશેષિતઃ ॥ ૨,૬.૧૧॥

એષ્ટવ્યા બહવઃ પુત્રા યદ્યેકોઽપિ ગયાં વ્રજેત્ ।
યજેત વાશ્વમેધેન નીલં વા વૃષમુત્સૃજેત્ ॥ ૨,૬.૧૨॥

બ્રહ્મહત્યાદિપાપાનિ જ્ઞાનાજ્ઞાનકૃતાનિ ચ ।
નીલોદ્વાહેન શુધ્યેત્તુ સમુદ્રપ્લવનેન વા ॥ ૨,૬.૧૩॥

એકાદશાહે રાજેન્દ્ર યસ્ય નોત્સૃજ્યતે વૃષઃ ।
પ્રેતત્વં નિશ્ચલં તસ્ય કૃતૈઃ શ્રાદ્ધૈસ્તુ કિં ભવેત્ ॥ ૨,૬.૧૪॥

યથાકથઞ્ચિત્કર્તવ્યસ્તીર્થે વા પત્તનેઽથ વા ।
વૃષયજ્ઞૈઃ પ્રમુચ્યતે નાન્યથા સાધનૈઃ ખગ ॥ ૨,૬.૧૫॥

વૃષભં પઞ્ચકલ્યાણં યુવાનં કૃષ્ણકંબલમ્ ।
ગોયૂથમધ્યે નિતરાં વિચરન્તં વિધાનતઃ ॥ ૨,૬.૧૬॥

ચતસૃભિર્વત્સકાભિર્દ્વાભ્યાઞ્ચૈવૈકયા ખગ ।
વિવાહ્ય મઙ્ગલદ્રવ્યૈર્મન્ત્રવત્તં સમુત્સૃજેત્ ॥ ૨,૬.૧૭॥

ઇહ રતીતિ ષડૃગ્ભિર્હેમં કુર્યાદ્દ્વિભાવસોઃ ।
કાર્તિક્યાં માઘવૈશાખ્યાં સંક્રમે પાતપર્વસુ ॥ ૨,૬.૧૮॥

તીર્થે પિત્ર્યેક્ષયાહે ચ વિશેષેણ પ્રશસ્યતે ।
લોહિતો યસ્તુ વર્ણેન મુખે પુચ્છે ચ પાણ્ડુરઃ ॥ ૨,૬.૧૯॥

પીતઃ ખુરવિષાણેષુ સ નીલો વૃષ ઉચ્યતે ।
શ્વેતવર્ણો ભવેદ્વિપ્રો લોહિતઃ ક્ષત્ર ઉચ્યતે ॥ ૨,૬.૨૦॥

પીતવર્ણો ભવેદ્વૈશ્યઃ શૂદ્રઃ કૃષ્ણઃ સ્મૃતો બુધૈઃ ।
યથાવર્ણં સમુદ્દિષ્ટો વર્ણેષુ બ્રાહ્મણાદિષુ ॥ ૨,૬.૨૧॥

અથ વા રક્તવર્ણસ્તુ સર્વેષામેવ શસ્યતે ।
પિતા પિતામહશ્ચૈવ તથૈવ પ્રપિતામહઃ ॥ ૨,૬.૨૨॥

આશાસતે સુતં જાતં વૃષોત્સર્ગં કરિષ્યતિ ।
ધર્મસ્ત્વં વૃષરૂપેણ જગદાનન્દદાયકઃ ॥ ૨,૬.૨૩॥

અષ્ટમૂર્તેરધિષ્ઠાનમતઃ શાન્તિં પ્રયચ્છ મે ।
ગઙ્ગાયમુનયોઃ પેયમન્તર્વેદિ તૃણં ચર ॥ ૨,૬.૨૪॥

ધર્મરાજસ્ય પુરતો વાચ્યં મે સુકૃતં વૃષ ।
દક્ષિણાંસે ત્રિશૂલાઙ્કું વામોરૌ ચક્રચિહ્નિતમ્ ॥ ૨,૬.૨૫॥

ઇતિ સમ્પ્રાર્થ્ય વૃષભં ગન્ધપુષ્પાક્ષતાદિભિઃ ।
વૃષં તત્સતરીયુક્તં પૂજયિત્વા સમુત્સૃજેત્ ॥ ૨,૬.૨૬॥

તસ્માદ્રાજન્વિધાનેન વૃષોત્સર્ગં સમાચર ।
બહુસાધનયુક્તસ્ય નાન્યથા સદ્ગતિસ્તવ ॥ ૨,૬.૨૭॥

આસીત્ત્રેતાયુગે પૂર્વં વિદેહનગરે નૃપ ।
બ્રાહ્મણો ધર્મવત્સેતિ સ્વકર્મનિરતઃ સુધીઃ ॥ ૨,૬.૨૮॥

વિષ્ણુભક્તોઽતિતેજસ્વી યથાલાભેન તુષ્ટિકૃત્ ।
પિતૃપર્વણિ સમ્પ્રાપ્તે કુશાર્થો કાનનં યયૌ ॥ ૨,૬.૨૯॥

અટન્નિતસ્તતસ્તત્ર ચિન્વન્કુશપલાશકમ્ ।
સહસોપેત્ય પુરુષાશ્ચાત્વારશ્ચારુદર્શનાઃ ॥ ૨,૬.૩૦॥

વિભ્રાન્તમનસં ગૃહ્ય પ્રત્યગ્જગ્મુર્વિહાયસા ।
બહુવૃક્ષસમાકીર્ણં ગિરિદુર્ગભયાનકમ્ ॥ ૨,૬.૩૧॥

વનાદ્વનાન્તરં નિન્યુર્નદીનદસમાકુલમ્ ।
સ તત્ર નગરં રાજન્દદર્શ બહુવિસ્તરમ્ ॥ ૨,૬.૩૨॥

ગોપુરદ્વારરચિતં સૌધપ્રાસાદમણ્ડિતમ્ ।
ચત્વરાપણપણ્યાદિનરનારીસમાકુલમ્ ॥ ૨,૬.૩૩॥

તૂર્યદ્વન્દ્વાભિનિર્ઘોષવીણાપટહનાદિતમ્ ।
કાંશ્ચિત્ક્ષુધાર્દિતાન્દીનાન્મલિનાન્વિગતૌજસઃ ॥ ૨,૬.૩૪॥

તતોઽતિતુષ્ટાન્મલિનાન્વસ્ત્રખણ્ડસમાવૃતાન્ ।

અગ્રતો હૃષ્ટપુષ્ટાંશ્ચ સ્વર્ણવસ્ત્રોપશોભિતાન્ ॥ ૨,૬.૩૫॥

તતોऽપિ સુરસંકાશાન્સ દૃષ્ટ્વા વિસ્મિતોऽભવત્ ।
કિં સ્વપ્ન ઉત માયા વૈ મદીયો માનસો ભ્રમઃ ॥ ૨,૬.૩૬॥

સન્દિહાનં દ્વિજં નિન્યુઃ પુરુષા રાજસન્નિધિમ્ ।
સતદ્દર્શ વિપ્રસ્તુ સ્વર્ણપ્રાસાદમન્દિરે ॥ ૨,૬.૩૭॥

સિંહાસનમહાદિવ્યં છત્રચામરવીજિતમ્ ।
તત્રોપ વિષ્ટં રાજાનં કિરીટકનકોજ્જ્વલમ્ ॥ ૨,૬.૩૮॥

મહત્યા ચ શ્રિયા યુક્તં સ્તૂયમાનં સુવન્દિભિઃ ।
રાજાપિ દૃષ્ટ્વા તં વિપ્રં પ્રત્યુત્થાય કૃતાઞ્જલિઃ ॥ ૨,૬.૩૯॥

પૂજયામાસ વિધિવન્મધુપર્કાસ નાદિભિઃ ।
સન્તુષ્ટમનસં દેવમસ્તૌષીત્પરયા મુદા ॥ ૨,૬.૪૦॥

અદ્ય મે સફલં જન્મ પાવિતઞ્ચ કુલં પ્રભો ।
વિષ્ણુભક્તસ્ય ધર્મસ્ય યત્તે દૃગ્ગોચરં ગતઃ ॥ ૨,૬.૪૧॥

નત્વા સ્તુત્વા બહુવિધમુવાચાનુવસન્નૃપઃ ।
યતઃ સમાગતો દેવઃ પુનસ્તત્રૈવ નીયતામ્ ॥ ૨,૬.૪૨॥

ઇતિ શ્રુત્વા વચો રાજ્ઞઃ પપ્રચ્છ દ્વિજપુઙ્ગવઃ ।
બ્રાહ્મણ ઉવાચ ।
કોऽયં દેશ- કુતો લોકા ઉત્તમા મધ્યમાધમાઃ ॥ ૨,૬.૪૩॥

કેન પુણ્યેન તુ ભવાન્પારમેષ્ઠ્યવિભૂષિતઃ ।
કિમર્થમહમાનીતઃ પુનસ્તત્રૈવ નીયતે ॥ ૨,૬.૪૪॥

અપૂર્વમિવ પશ્યામિ સર્વં સ્વપ્નગતો યથા ।
રાજોવાચ ।
સ્વધર્મનિરતો યસ્તુ હરિભક્તિરતઃ સદા ॥ ૨,૬.૪૫॥

વિરક્ત ઇન્દ્રિયાર્થેભ્યઃ સ મે પૂજ્યો ન સંશયઃ ।
તીર્થયાત્રાપરો નિત્યં વૃષોત્સર્ગવિશેષવિત્ ॥ ૨,૬.૪૬॥

સત્યદાનપરો યસ્તુ સ નમસ્યો દિવૌકસામ્ ।
દર્શનાર્થમિહાનીતઃ પૂજાર્હશ્ચ પરન્તપ ॥ ૨,૬.૪૭॥

અનુગૃહાણ માં દેવ ક્ષમસ્વ મમ સાહસમ્ ।

ઇત્યુક્ત્વા દર્શયામાસ મન્ત્રિણાં સંજ્ઞયા ભ્રુવઃ ॥ ૨,૬.૪૮॥

વદિષ્યતિ સમગ્રં તે સ્વયં વક્તું ન સામ્પ્રતમ્ ।
સામન્તઃ સર્વવેદજ્ઞો જ્ઞાત્વા હાર્દં નૃપસ્ય ચ ॥ ૨,૬.૪૯॥

વિપશ્ચિદુવાચ ।
પૂર્વજન્મનિ વૈશ્યોઽયં વિશ્વમ્ભર ઇતિ શ્રુતઃ ।
વિરાધનગરે વિપ્ર દ્વિજદેવવિભૂષિતે ॥ ૨,૬.૫૦॥

વૈશ્યવૃત્ત્યા સદા જીવન્કુટુમ્બપરિપાલકઃ ।
ગવાં શુશ્રૂષકો નિત્યં બ્રાહ્મણાનાઞ્ચ પૂજકઃ ॥ ૨,૬.૫૧॥

પાત્રદાનપરો નિત્યમાતિથેયાગ્નિસેવકઃ ।
ગાર્હસ્થ્યં વિધિવચ્ચક્રે ભાર્યયા સત્યમેધયા ॥ ૨,૬.૫૨॥

સ્માર્તેન લોકાનજયચ્છ્રૌતેન ત હવિર્ભુજઃ ।
કદાચિદ્બન્ધુભિઃ સાકં કૃત્વા તીર્થાનિ ભૂરિશઃ ॥ ૨,૬.૫૩॥

યાવદાયાતિ સદનં દૃષ્ટવાલ્લોમશં પથિ ।
દણ્ડવત્પ્રણિપત્યાશુ કૃતાઞ્જલિપુટં સ્થિતમ્ ॥ ૨,૬.૫૪॥

પપ્રચ્છ વિનયોપેતં કરુણાવારિવારિધિઃ ।
ઋષિરુવાચ ।
કુત આગમ્યતે સાધો બ્રાહ્મણૈર્બન્ધુભિર્યુતઃ ॥ ૨,૬.૫૫॥

દૃષ્ટ્વા ત્વાં ધર્મનિલયં પ્રક્લિન્નં માનસં મમ ।
વિશ્વમ્ભર ઉવાચ ।
શીર્યમાણં શરીરં હિ જ્ઞાત્વા મૃત્યું પુરઃ સ્થિતમ્ ॥ ૨,૬.૫૬॥

ભર્યયા ધર્મચારિણ્યા તીર્થયાત્રાં વિનિર્ગતઃ ।
કૃત્વા તીર્થાનિ વિધિવદ્વિશ્રાણ્ય વિપુલં વસુ ॥ ૨,૬.૫૭॥

યાવદ્બ્રજામ્યહં વેશ્મ ભવાન્દૃષ્ટિપથં ગતઃ ।
લોમશ ઉવાચ ।
તીર્થાનિ સન્તિ ભૂરીણિ વર્ષેઽસ્મિન્ભારતે શુભે ॥ ૨,૬.૫૮॥

યત્ત્વયા હ્યુપચીર્ણાનિ તાનિ સર્વાણિ મે વદ ।
વૈશ્ય ઉવાચ ।
ગઙ્ગા ચ સૂર્ય તનયા મહાપુણ્યા સરસ્વતી ॥ ૨,૬.૫૯॥

દશાશ્વમેધૈરયજદ્યત્ર બ્રહ્મા સુરેશ્વરઃ ।
તીર્થરાજસ્તતઃ કાશી મહાદેવો દયાનિધિઃ ॥ ૨,૬.૬૦॥

મૃતાનાં યત્ર જન્તૂનાં કર્ણે જપતિ તારકમ્ ।
પુલહસ્યાશ્રમં પુણ્યં ફલ્ગુતીર્થઞ્ચ ગણ્ડકી ॥ ૨,૬.૬૧॥

ચક્રતીર્થં નૈમિષઞ્ચ શિવતીર્થમનન્તકમ્ ।
ગોપ્રતારકનાગેશમયોધ્યાબિન્દુસંજ્ઞિતમ્ ॥ ૨,૬.૬૨॥

યત્રાસ્ત મુક્તિદઃ સાક્ષાદ્રામો રાજીવલોચનઃ ।
આગ્નેયં વાયુકૌબેરં કૌમારં ભૂરુહાં પુનઃ ॥ ૨,૬.૬૩॥

સૌકરં મથુરા યત્ર નિત્યં સન્નિહતો હરિઃ ।
પુષ્કરં સત્યતીર્થઞ્ચ જ્વાલતીર્થં દિનેશ્વરમ્ ॥ ૨,૬.૬૪॥

ઇન્દ્રતીર્થં કુરુક્ષેત્રં યત્ર પ્રાચી સરસ્વતી ।
તાપી પયોષ્ણી નિર્વિન્ધ્યા મલયઃ કૃષ્ણવેણિકા ॥ ૨,૬.૬૫॥

ગોદાવરી દણ્ડકઞ્ચ તામ્રચૂડં સદોદકમ્ ।
ધાવાભૂમીશ્વરં દૃષ્ટ્વા શ્રીશૈલઃ પર્વતેશ્વરઃ ॥ ૨,૬.૬૬॥

અસંખ્યલિઙ્ગતીર્થાનિ યત્ર સન્તિ સદા મુને ।
વેઙ્કટાદ્રૌ મહાતેજાઃ શ્રીરઙ્ગાખ્યઃ સ્વયં હરિઃ ॥ ૨,૬.૬૭॥

વેઙ્કટી નામ તત્રૈવ દેવી મહિષમર્દિની ।
ચન્દ્રતીર્થં ભદ્રવટઃ કાવેરીકુટિલાચલૌ ॥ ૨,૬.૬૮॥

અવટોદા તામ્રપર્ણી ત્રિકૂટઃ કોલ્લકો ગિરિઃ ।
વાસિષ્ઠં બ્રહ્મતીર્થઞ્ચ જ્ઞાનતીર્થં મહોદધિઃ ॥ ૨,૬.૬૯॥

હૃષીકેશં વિરાજઞ્ચ વિશાલં નીલપર્વતઃ ।
ભીમકૂટઃ શ્વેતગિરી રુદ્રતીર્થમુમાવનમ્ ॥ ૨,૬.૭૦॥

અવાપ ગિરિજા દેવી તપસા યત્ર શઙ્કરમ્ ।
વારુણં સૂર્યતીર્થઞ્ચ હંસતીર્થં મહોદયમ્ ॥ ૨,૬.૭૧॥

નિમજ્જ્ય યત્ર કાકોલા રાજહંસત્વમાયયુઃ ।
અસુરો યત્ર દેવત્વમવાપ સ્નાનમાત્રતઃ ॥ ૨,૬.૭૨॥

વિશ્વરૂપં વન્દિતીર્થં રત્નેશઃ કુહકાચલઃ ।
નરનારાયણં દૃષ્ટ્વા મુચ્યતે પાપકોટિભિઃ ॥ ૨,૬.૭૩॥

સરસ્વતીદૃષદ્વત્યૌ નર્મદા શર્મદા નૃણામ્ ।
નીલકણ્ઠં મહાકાલં પુણ્યં ચામરકણ્ટકમ્ ॥ ૨,૬.૭૪॥

ચન્દ્રભાગા વેત્રવતી વીરભદ્રં ગણેશ્વરમ્ ।
ગોકર્ણં બિલ્વતીર્થઞ્ચ કર્મકુણ્ડં સતારકમ્ ॥ ૨,૬.૭૫॥

સ્નાનમાત્રેણ યત્રાશુ મુચ્યતે કર્મબન્ધનાત્ ।
અન્યાન્યપિ ચ તીર્થાનિ કૃતાનિ કૃપયા તવ ॥ ૨,૬.૭૬॥

ઉત્પદ્યતે શુભા બુદ્ધિઃ સાધૂનાં યદનુગ્રહઃ ।
એકતઃ સર્વતીર્થાનિ કરુણાઃ સાધવોઽન્યતઃ ॥ ૨,૬.૭૭॥

અનુગ્રહાય ભૂતાનાં ચરન્તિ ચરિતવ્રતાઃ ।
ત્વં ગુરુઃ સર્વર્ણાનાં વિદ્યયા વયસાધિકઃ ॥ ૨,૬.૭૮॥

અતઃ પૃચ્છામ્યહં કિઞ્ચિદાધિભૂતં ચિરન્તનમ્ ।
કિં કુર્યાં કં નુ પૃચ્છેઽહં મનો મેઽતિચલં મુને ॥ ૨,૬.૭૯॥

નિઃ સ્પૃહં બ્રહ્મવિષયે વિષયેષ્વતિલાલસમ્ ।
મનાગપિ ન સહતે વિરહં તિમિરં બ્રુવત્ ॥ ૨,૬.૮૦॥

મોહિતં વિવિધૈર્ભાવૈઃ કર્મણાં ક્ષેત્રમુત્તમમ્ ।
શાન્તિં યથા સમાયાતિ સમ્પન્નમિવ ભૂસુર ॥ ૨,૬.૮૧॥

વિવેકપ્રવણં શુદ્ધં યથા સ્યાત્કૃપયા વદ ।
ઋષિરુવાચ ।
મનસ્તુ પ્રબલં નિત્યં સવિકારં સ્વભાવતઃ ॥ ૨,૬.૮૨॥

વશં નયન્તિ કરિણં પ્રમત્તમપિ હસ્તિપાઃ ।
તથાપિ સાધુસઙ્ગત્યા સાધનૈરપ્યતન્દ્રિતઃ ॥ ૨,૬.૮૩॥

તીવ્રેણ ભક્તિયોગેન વિચારેણ વશં નયેત્ ।
ઇતિહાસં પ્રવક્ષ્યામિ તવ પ્રત્યયકારકમ્ ॥ ૨,૬.૮૪॥

નારદોઽકથયન્મહ્યં સ્વવૃત્તગતજન્મનઃ ।
નારદ ઉવાચ ।
કસ્યચિદ્દ્વિજમુખ્યસ્ય દાસીપુત્રઃ પુરા મુને ॥ ૨,૬.૮૫॥

શિક્ષિતો બાલભાવેઽપિ પાઠિતો નિતરામહમ્ ।

તત્રાપિ સઙ્ગતિર્જાતા મહતાં પુણ્યકર્મણામ્ ॥ ૨,૬.૮૬॥

પ્રાવૃટ્કાલે મમ ગૃહે સ્થિતાનાં ભાગ્યયોગતઃ ।
શુશ્રૂષણાનુવૃત્ત્યા ચ પ્રશ્રયેણ દમેન ચ ॥ ૨,૬.૮૭॥

સન્તોષં પરમં પ્રાપ્ય કૃપયા ત્વિદમબ્રુવન્ ।
મનીષા નિર્મલા યેન જાતા મમ શુભાર્થિની ॥ ૨,૬.૮૮॥

યયા વિષ્ણુમયં સર્વમ્ત્મન્યેવ દદૃશિવાન્ ।
મુનય ઊચુઃ ।
શ‍ૃણુ વત્સ પ્રવક્ષ્યા મો હિતાય તવ બાલક ॥ ૨,૬.૮૯॥

યેન વૈ ધ્રિયમાણેન ઇહામુત્ર સુખં ભવેત્ ।
દેવતિર્યઙ્મનુષ્યાશ્ચ સંસારે વિવિધા જનાઃ ॥ ૨,૬.૯૦॥

નિબદ્ધાઃ કર્મપશૈસ્તે ભુઞ્જન્ભોગાન્પૃથગ્વિધાન્ ।
દેવત્વં યાતિ સત્ત્વેન રજસા ચ મનુષ્યતામ્ ॥ ૨,૬.૯૧॥

તિર્યક્ત્વં તમસા જન્તુર્વાસનાનુગતોઽબુધઃ ।
માતુર્લબ્ધ્વા પુનર્જન્મ મ્રિયતે ચ પુનઃ પુનઃ ॥ ૨,૬.૯૨॥

એવં ગત્વા હ્યસંખ્યાતા યોનીસ્તાઃ કર્મભૂરપિ ।
માનુષ્યં દુર્લભં લબ્ધ્વા કદાચિદ્દૈવયોગતઃ ॥ ૨,૬.૯૩॥

અનુગ્રહેણ મહતાં હરિં જ્ઞાત્વા વિમુચ્યતે ।
રોગગ્રાહં મોહજાલમપારં ભવસાગરમ્ ॥ ૨,૬.૯૪॥

ન પશ્યામિ તિતીર્ષોરન્યદ્રામસ્મરણં વિના ।
નવનીયં યથા દધ્નો જ્યોતિઃ કાષ્ઠાદપિ ક્વચિત્ ॥ ૨,૬.૯૫॥

મન્થનૈઃ સાધનૈરેવં પરં જ્ઞાત્વા સુખી ભવેત્ ।
આત્મા નિત્યોઽવ્યયઃ સત્યઃ સર્વગઃ સર્વભૃન્મહાન્ ॥ ૨,૬.૯૬॥

અપ્રમેયઃ સ્વયઞ્જ્યોતિરગ્રાહ્યો મનસાપિ યઃ ।
સચ્ચિદાનન્દરૂપોઽસૌ સર્વપ્રાણિહૃદિ સ્થિતઃ ॥ ૨,૬.૯૭॥

વિનશ્યત્સ્વપિ ભાવેષુ ન વિનશ્યતિ કર્હિચિત્ ।
આકાશઃ સર્વભૂતેષુ સ્થિતસ્તેજોજલે તથા ॥ ૨,૬.૯૮॥

આત્મા સર્વત્ર નિર્લેપઃ પાર્થિવેષુ યથાનિલઃ ।
ભક્તાનુકમ્પી ભગવાન્સાધૂનાં રક્ષણાય ચ ॥ ૨,૬.૯૯॥

આવિર્ભવતિ લોકેષુગુણીવાङ્ગૈઃ પ્રતીયતે ।
એવંવિવેકત્વયા યો બુદ્ધ્યા સંશીલયેદ્ધૃદિ ॥ ૨,૬.૧૦૦॥

ભક્તિયોગેન સન્તુષ્ટ આત્માનં દર્શયેદજઃ ।
તતઃ કૃતાર્થો ભવતિ સદા સર્વત્ર નિઃ સ્પૃહઃ ॥ ૨,૬.૧૦૧॥

અતોઽહङ્કારમુત્સૃજ્ય સાનુબન્ધે કલેવરે ।
ચરેદસંગો લોકેષુ સ્વપ્નપ્રાયેષુ નિર્મમઃ ॥ ૨,૬.૧૦૨॥

ક્વ સ્વપ્ને નિયતં ધૈર્યમિન્દ્રજાલે ક્વ સત્યતા ।
ક્વ નિત્યતા શરન્મેઘે ક્વ વા સત્યં કલેવરે ॥ ૨,૬.૧૦૩॥

અવિદ્યાકર્મજનિતં દૃશ્યમાનં ચરા ચરમ્ ।
જ્ઞાત્વાચારવશી યોગી તતઃ સિદ્ધિમવાપ્સ્યસિ ॥ ૨,૬.૧૦૪॥

ઇત્યુક્ત્વા તે ગતાઃ સર્વે સાધવો દીનવત્સલાઃ ।
સોઽહં તદુક્તમાર્ગેણ તથૈવાચરમન્વહમ્ ॥ ૨,૬.૧૦૫॥

તતોઽચિરેણાત્મનીદં દૃષ્ટવાનહમદ્ભુતમ્ ।
જ્યોતિર્મયં સદાનન્દં શરચ્છીતાંશુનિર્મલમ્ ॥ ૨,૬.૧૦૬॥

નિષિચ્ય સુખસન્દોહૈર્માં કૃત્વાધિકસસ્પૃહમ્ ।
અન્તર્હિતં મહતેજો યથા સૌદામિની દિવિ ॥ ૨,૬.૧૦૭॥

ભક્ત્યા તદેવ મનસિ ભાવયન્નહમદ્ભુતમ્ ।
કાલે કલેવરં ત્યક્ત્વા ગતવાન્હરિમવ્યયમ્ ॥ ૨,૬.૧૦૮॥

તસ્યેચ્છયા પુનર્બ્રહ્મન્બ્રહ્મણો મેઽભવજ્જનિઃ ।
અનુગ્રહાદ્ભગવતસ્ત્રિષુ લોકેષુ નિઃ સ્પૃહઃ ॥ ૨,૬.૧૦૯॥

આપીડયન્મુહુર્વીણાં ગાયમાનશ્ચરામ્યહમ્ ।
ઇત્યુક્ત્વા મે સ્વાનુભવં યયૌ યાદૃચ્છિકો મુનિઃ ॥ ૨,૬.૧૧૦॥

મમાપિ પરમાશ્ચર્યં સન્તોષશ્ચ મહાનભૂત્ ।
અતસ્તે સાધુસઙ્ગત્યા ભક્ત્યા ચ પરમાત્મનઃ ॥ ૨,૬.૧૧૧॥

વિશુદ્ધં નિર્મલં શાન્તં મનો નિર્વૃતિમેષ્યતિ ।
અનેકજન્મજનિતં પાતકં સાધુસંગમે ॥ ૨,૬.૧૧૨॥

ક્ષિપ્રં નશ્યતિ ધર્મજ્ઞ જલાનાં શરદો યથા ।

વૈશ્ય ઉવાચ ।
પીત્વા તે વાક્યપીયૂષં સ્વાન્તં મે શાન્તિમાગમત્ ॥ ૨,૬.૧૧૩॥

સર્વતીર્થફલં મેઽધ્ય સઞ્જાતં તવ દર્શનાત્ ।
ઇતિ શ્રુત્વા વચસ્તસ્ય પ્રોવાચ ઋપિસત્તમઃ ॥ ૨,૬.૧૧૪॥

લોમશ ઉવાચ ।
હિતાય તવ રાજેન્દ્ર ત્રિવર્ગફલમિચ્છતઃ ।
યત્ત્વયા સુકૃતં ભૂરિવૃષોત્સર્ગં વિના કૃતમ્ ॥ ૨,૬.૧૧૫॥

મન્યેઽકિઞ્ચિત્કરં સર્વં નીહારસલિલં યથા ।
વૃષોત્સર્ગસમં કિઞ્ચિત્સાધનં ન મહીતલે ॥ ૨,૬.૧૧૬॥

અનાયાસેન ગચ્છન્તિ ગતિં તે પુણ્યકર્મણામ્ ।
વૃષોત્સર્ગઃ કૃતો યેન અશ્વમેધસ્ય યાજકઃ ॥ ૨,૬.૧૧૭॥

ઉભૌ સમૌ મયા દૃષ્ટૌ દિવ્યૌ તૌ શક્રસન્નિધૌ ।
અતસ્ત્વં પુષ્કરં ગત્વા વૃષોત્સર્ગં વિધાય ચ ॥ ૨,૬.૧૧૮॥

તતો યાહિ ગૃહં સાધો યેન સર્વં કૃતં ભવેત્ ।
વિપશ્ચિદુવાચ ।
તતઃ સ પુનરાગત્ય કાર્તિક્યાં પુષ્કરે વરે ॥ ૨,૬.૧૧૯॥

વરાહરૂપી ભગવાન્યત્રાસ્તે યજ્ઞપૂરકઃ ।
ચકાર વિધિવત્સર્વં યુદ્કમૃષિસત્તમૈઃ ॥ ૨,૬.૧૨૦॥

ગતાનિ બહુતીર્થાનિ તતો લોમશસંગતિઃ ।
તતોઽધિકતરં જાતં પુણ્યં નીલવિવાહજમ્ ॥ ૨,૬.૧૨૧॥

સભુક્ત્વા વિષયાન્દિવ્યાન્વિમાનવરમાશ્રિતઃ ।
તેન રાજકુલે જન્મ વીરસેનસ્ય ધર્મતઃ ॥ ૨,૬.૧૨૨॥

વીરપઞ્ચાનનાખ્યાતઞ્ચતુર્વર્ગૈકસાધકમ્ ।
પ્રકુર્વતો વૃષોત્સર્ગં તત્ર યે પરિચારકાઃ ॥ ૨,૬.૧૨૩॥

દિવ્યરૂપાભવન્સ્પૃષ્ટા ગોપુચ્છોદકશીકરૈઃ ।
સુરૂપાઃ પુષ્ટવપુષઃ પશ્યન્તો દૂરસંસ્થિતાઃ ॥ ૨,૬.૧૨૪॥

તતો દૂરતરા યે ચ દૃશ્યન્તે મલિના જનાઃ ।
દુર્ભગા મલિના રૂક્ષાઃ કૃશા વિગતવાસસઃ ॥ ૨,૬.૧૨૫॥

વૃષયજ્ઞમપશ્યન્તો યે ચાસૂયાં પ્રકુર્વતે ।
સર્વં નિવેદિતં રાજ્ઞશ્ચરિતં પૂર્વજન્મનઃ ॥ ૨,૬.૧૨૬॥

ધર્મ્યં વિચિત્રમાખ્યાનં શ્રુતં મે યત્પરાશરાત્ ।
અતસ્ત્વં સ્વગૃહં ગચ્છ કૃપાં કૃત્વા મમોપરિ ॥ ૨,૬.૧૨૭॥

શ્રુત્વા વિપશ્ચિદ્વાક્યં સ વિસ્મયં પરમં ગતઃ ।
ગૃહં જગામ વિપ્રોઽસૌ પ્રાપિતો રાજસેવકૈઃ ॥ ૨,૬.૧૨૮॥

વસિષ્ઠ ઉવાચ ।
તસ્માદ્રાજન્વૃષોત્સર્ગં વરિષ્ઠં સર્વકર્મણામ્ ।
સમાચર વિધાનેન યદિ ભીતો યમાદપિ ॥ ૨,૬.૧૨૯॥

વૃષોત્સર્ગસમં કિઞ્ચિત્સાધનં નદિવઃ પરમ્ ।
મયા ધર્મરહસ્યં તે કથિતં રાજસત્તમ ॥ ૨,૬.૧૩૦॥

પતિપુત્રવતી નારી ભર્તુરગ્રે મૃતા યદિ ।
વૃષોત્સર્ગં ન કુર્વીત ગાં દદ્યાચ્ચ પયસ્વિઃ નીમ્ ॥ ૨,૬.૧૩૧॥

શ્રીકૃષ્ણ ઉવાચ ।
શ્રુત્વા વાક્યં વસિષ્ઠસ્ય રાજા મધુપુરીં ગતઃ ।
ચકાર વિધિવત્સર્વં વૃષોત્સર્ગમહં ખગ ॥ ૨,૬.૧૩૨॥

ગૃહં ગત્વા સ આત્માનં કૃતકૃત્યમમન્યત ।
કાલેન નિધનં પ્રાપ્તો નીતો વૈવસ્વતાનુગૈઃ ॥ ૨,૬.૧૩૩॥

સ કાલનગરં હિત્વા ગતો દૂરતરં પથિ ।
શ્રાદ્ધદેવપુરં કુત્રેત્યેવં દૂતાનપૃચ્છત ॥ ૨,૬.૧૩૪॥

પાપિનો યત્ર પાત્યન્તે યામ્યૈ પાપવિશુદ્ધયે ।
યત્ર દેવઃ સ ધર્માધર્મવિચેતનઃ ॥ ૨,૬.૧૩૫॥

ગતં પાપપુરં તત્તુ ન દ્રષ્ટવ્યં ભવાદૃશૈઃ ।
અગ્રે દૃષ્ટ્વા ધર્મરાજમૂચુસ્તે પરમાદરાત્ ॥ ૨,૬.૧૩૬॥

દિવ્યરૂપસ્તદા દેવો દેવગન્ધર્વસંયુતઃ ।
આત્માનં દર્શયા માસ તસ્ય રાજ્ઞો મહાત્મનઃ ॥ ૨,૬.૧૩૭॥

પ્રણમ્ય દણ્ડવદ્રાજા કૃતાઞ્જલિઃ પુરઃ સ્થિતઃ ।
તુષ્ટાવ બહુધા દેવં હર્ષપુરિતમાનસઃ ॥ ૨,૬.૧૩૮॥

ધર્મરાજોઽપિ રાજાનં પ્રશસ્યેદમુવાચ હ ।
નીયતાં દેવલોકાય યત્ર ભોગાઃ સુપુષ્કલાઃ ॥ ૨,૬.૧૩૯ ॥

તદ્વીરવાહનઃ શ્રુત્વા પપ્રચ્છસમવર્તિનમ્ ।
ન જાને કેન પુણ્યેન સ્વર્ગં નયસિ માં વિભો ॥ ૨,૬.૧૪૦ ॥

ધર્મરાજ ઉવાચ ।
ત્વયા કૃતાનિ પુણ્યાનિ દાનં યજ્ઞાઃ સવિસ્તરાઃ ।
મથુરાયાં વૃષોત્સર્ગો વસિષ્ઠવચનાત્કિલ ॥ ૨,૬.૧૪૧ ॥

ધર્મઃ સ્વલ્પોઽપિ નૃપતે યદિ સમ્યગુપાસિતઃ ।
દ્વિજદેવપ્રસાદેન સ યાતિ બહુવિસ્તરમ્ ॥ ૨,૬.૧૪૨ ॥

ઇત્યુક્ત્વા યમુનાભ્રાતા ક્ષણાદન્તર્ધિમાયયૌ ।
વીરબાહુર્દિવં ગત્વા દેવૈઃ સહ મુમોદ હ ॥ ૨,૬.૧૪૩ ॥

શ્રીકૃષ્ણ ઉવાચ ।
મયા તે કથિતં પક્ષિન્વૃષયજ્ઞઃ સુવિસ્તરઃ ।
પ્રાણિનાં કર્મનિર્હારં શ્રુત્વા પાપૈઃ પ્રમુચ્યતે ॥ ૨,૬.૧૪૪ ॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિદૃ ધદૃપ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે વૃષોત્સર્ગમાહાત્મ્યનિરૂપણં નામ ષષ્ઠોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭
ગરુડ ઉવાચ ।
શ્રુતં મે મહાદાખ્યાનં વૃષોત્સર્ગફલં હરે ।
પુનરન્યાં કથાં બ્રૂહિ યત્ર તે મહિમાદ્ભુતઃ ॥ ૨,૭.૧ ॥

શ્રીકૃષ્ણ ઉવાચ ।
અહં તે કથયામ્યદ્ય સંવાદં પરમાદ્ભુતમ્ ।
સન્તપ્તકસ્ય ચ પ્રેતૈસ્તદ્રૂપજ્ઞાપનાય વૈ ॥ ૨,૭.૨ ॥

વિપ્રઃ સન્તપ્તકઃ કશ્ચિત્તપસાદગ્ધકિલ્બિષઃ ।
સંસારાસારતાં જ્ઞાત્વારણ્યષ્વેવ ચચાર હ ॥ ૨,૭.૩ ॥

વૈખાનસમુનિવ્રાતૈઃ પ્રાણિપાતકૃતેક્ષણઃ ।
સ કદાચિત્તીર્થયાત્રામુદ્દિશ્ય સ્માટતિદ્વિજઃ ॥ ૨,૭.૪ ॥

પ્રત્યાકૃષ્ટેન્દ્રિયત્વાચ્ચ બહિર્વૃત્તિનિરોધકઃ ।
સંસ્કારમાત્રગમનો માર્ગભ્રષ્ટો બભૂવ હ ॥ ૨,૭.૫॥

ચલન્નેવં સ્નાનકાલે મધ્યાહ્નેઽથાભિલાષુકઃ ।
જલસ્યોન્મીલ્ય નયને દિશઃ સર્વા ન્યભીલયત્ ॥ ૨,૭.૬॥

સ દદર્શ તદા ગુલ્મૈર્વોરુદ્વૃક્ષશતૈશ્ચિતમ્ ।
ત્વક્સારૈઃ શાખિશાખાભિઃ સંકુલં ગહનંવનમ્ ॥ ૨,૭.૭॥

તત્ર તાલાસ્તમાલાશ્ચ પ્રિયાલાઃ પનસાસ્તથા ।
શ્રીપર્ણી શાલશાખોટસ્યન્દનાસ્તિન્દુકાસ્તથા ॥ ૨,૭.૮॥

સર્જાર્જુનામ્રાતકાશ્ચ શ્લેષ્મા તકભિભીતકૌ ।
પિચુમર્દશ્ચિઞ્ચિણી ચ કર્કન્ધૂકર્ણિકારકાઃ ॥ ૨,૭.૯॥

એતે ચાન્યે ચ બહવો વૃક્ષાસ્તેષુ ન દૃશ્યતે ।
પક્ષિણામપિ વૈ પન્થા મનુષ્યસ્ય કુતઃ પુનઃ ॥ ૨,૭.૧૦॥

તસ્મિન્વને મહાઘોરે સિંહવ્યાઘ્રસમાકુલે ।
તરક્ષુગવયૈરૃક્ષૈર્મહિષૈશ્ચ નિષેવિતે ॥ ૨,૭.૧૧॥

કુઞ્જ રૈરુરુભિર્નાગૈર્મર્કટૈશ્ચ તથામૃગૈઃ ।
શ્વાપદૈશ્ચ તથા ચાન્યૈઃ પિશાચૈ રાક્ષસૈર્વૃતે ॥ ૨,૭.૧૨॥

સન્તપ્તકો દ્વિજઃ કિઞ્ચિદ્ભયસન્ત્રસ્તમાનસઃ ।
કાન્દિશીકઃ સમભવદ્ યદ્ભવિષ્યો યયૌ પુનઃ ॥ ૨,૭.૧૩॥

ઝઙ્કારેષુ ચ ઝિલ્લીનાં ઘૂકાનાં ઘૂત્કૃતેષ્વપિ ।
દત્તકર્ણઃ કુનીલાઙ્ગશ્ચચાલ પદપઞ્ચકમ્ ॥ ૨,૭.૧૪॥

સ તત્ર વટવૃક્ષાગ્રે સ્નાયુવદ્ધં શવં તથા ।
દદર્શ તદ્ભુજશ્ચૈવ પઞ્ચ પ્રેતાન્સુદારુણામ્ ॥ ૨,૭.૧૫॥

શિરાસ્થિચર્મશેષાઙ્ગાન્પૃષ્ઠલગ્નોદરાન્ખગ ।
ત્યક્તાન્નાસિકયા નેત્રકૂપપાતભયાદિવ ॥ ૨,૭.૧૬॥

સૂચીક્રકચકવ્રાતઘાતપાતિતકીકસાન્ ।
વસાક્તનવમસ્તિષ્કસ્વાદનિત્યમહોત્સવાન્ ॥ ૨,૭.૧૭॥

રણત્કોટિમહાદંષ્ટ્રાનસ્થિગ્રન્થ્યવઘટ્ટિતાન્ ।
તાન્દૃષ્ટ્વા ત્રસ્તહૃદયો ગતિમાકુઞ્ચ્ય સંસ્થિતઃ ॥ ૨,૭.૧૮॥

તે વિલોક્યાગતં વિપ્રમટવીં જનવર્જિતામ્ ।
અહં પૂર્વમહં પૂર્વં યામીત્યાક્ત્વા પ્રદુદ્રુવુઃ ॥ ૨,૭.૧૯॥

તેષુ દ્વૌદ્વાવગૃહ્ણીતામસ્ય હસ્તાવથાપરે ।
દ્વૌદ્વૌ પાદાવગૃહ્ણીતાં મૂર્ધાનં પઞ્ચમોઽગ્રહીત્ ॥ ૨,૭.૨૦॥

સ્વજાત્યુચિતવાક્યેન સ્ફુટવર્ણવતાબ્રુવન્ ।
અહં જક્ષામ્યહં ભક્ષામીતિ કર્ષણતત્પરાઃ ॥ ૨,૭.૨૧॥

સહસૈવ સહૈવામું ગૃહાત્વા વ્યગમન્વિયમ્ ।
કિયત્સ્થિતં બટૌ માંસં ક્રિયન્નેતિન્યભાલયન્ ॥ ૨,૭.૨૨॥

તેઽપશ્યન્નિજદંષ્ટ્રાયઃ પાટિતાન્ત્રમિમં શવમ્ ।
અવતીર્ય તતો વ્યોમ્નો ગૃહીત્વા ચરણૈઃ ॥ ૨,૭.૨૩॥

સ્વખણ્ડિતશરીરન્તુ પુનર્વ્યોમૈવ ચક્રમુઃ ।
સ નીયમાનમાત્માનં વિલોક્ય વિયતિ દ્વિજઃ ॥ ૨,૭.૨૪॥

જગામ મનસા માં સ શરણં ભયવિહ્વલઃ ।
નમશ્ચક્રે ચક્રધરં ચેતસા ચિન્મયં સમમ્ ॥ ૨,૭.૨૫॥

વક્રં નક્રં ચક્રપાતેન દૂરે કૃત્વા હૃત્વા તસ્ય દુઃખં મુકુન્દઃ ।
માતઙ્ગં યોઽમૂમુચન્નક્રવક્ત્રાત્પાશંસોઽસૌ કર્મણાં મે લુનાતુ ॥ ૨,૭.૨૬॥

રુદ્ધાઞ્શુદ્ધાન્ભૂપતીન્માગધેન ભીમેનૈનં ઘાતયિત્વા મુરારિઃ ।
નિર્બદ્ધાન્યો ભર્ગયજ્ઞાય મુક્તશ્ચક્રો મેઽસૌ કર્મપાશં લુનાતુ ॥ ૨,૭.૨૭॥

મનસૈવૈહ મામસ્તૌત્સ્તૂયમાનોઽહમુત્થિતઃ ।
અગચ્છં સહસા તત્ર યત્ર પ્રેતૈઃ સ નીયતે ॥ ૨,૭.૨૮॥

દૃષ્ટ્વા તૈર્નોયિમાનન્તુ કૌતુકં મેઽભવત્ખગ ।
પપ્રચ્છ ન કિયન્તં વૈ કાલં તાન્પૃષ્ઠતોઽન્વગામ્ ॥ ૨,૭.૨૯॥

મમ સન્નિધિમાત્રેણ દ્વિજાતિં તઞ્ચ સર્પહન્ ।
તત્કાલં શિવિકાસુપ્તભૂપાલસુખમાવિશત્ ॥ ૨,૭.૩૦॥

મણિભદ્રાસ્તતો મેરું ગચ્છન્દૃષ્ટો મયા પથિ ।
નિકોચ્યાક્ષિ સ્વપાર્શ્વં સ નીતો વૈ યક્ષરાણ્મયા ॥ ૨,૭.૩૧॥

તમવોચં મહાયક્ષં ત્વં હિ પ્રતિભટો ભવ ।

પ્રેતાન્નાશય તદ્ભૂયઃ શવઞ્ચ હર તદ્ગતમ્ ॥ ૨,૭.૩૨॥

ઇત્યુક્તઃ સ મહાઘોરં કૃત્વા રોષં સુદુઃસહમ્ ।
જગ્રાહ પ્રેતરૂપં તત્પ્રેતાનામપિ દુઃખદમ્ ॥ ૨,૭.૩૩॥

સ વિવૃત્ય સ્વકૌ બાહૂ સૃક્કિણી પરિલેલિહન્ ।
ભેદયન્નુરુવાતેન પ્રેતાંસ્તાન્સમુખો યયૌ ॥ ૨,૭.૩૪॥

બાહુભ્યાં દ્વૌ દ્વૌ ચ પદ્ભ્યાં મૂર્ધ્નૈકં ચ સમાહરત્ ।
પ્રેતાનથાપિ સહસા જઘાન દૃઢમુષ્ટિના ॥ ૨,૭.૩૫॥

તે વિવર્ણમુખાઃ સર્વે તં દ્વિજઞ્ચ શવં તથા ।
એકૈકં હસ્તપાદૈશ્ચ ગૃહીત્વા યુદ્ધમારભન્ ॥ ૨,૭.૩૬॥

તે નખૈસ્તલઘાતૈશ્ચ પાદઘાતૈસ્તથૈવ ચ ।
દંષ્ટ્રાઘાતૈશ્ચ સર્વે તમેકં પ્રેતં વ્યદારયન્ ॥ ૨,૭.૩૭॥

તેષાં પ્રહારાન્વિફલાન્કૃત્વા સમ્પ્રતિ તાનથ ।
જીવં ન તુ શવં તેષાં જહ્રે પ્રાણમિવાન્તકઃ ॥ ૨,૭.૩૮॥

હૃતમાત્રે શવે તે તુ પારિયાત્રે ગિરૌ દ્વિજમ્ ।
મુક્ત્વાધમાત્રે પ્રમુદિતા એકં પ્રેતં સુદારુણાઃ ॥ ૨,૭.૩૯॥

સ વાયુગમનઃ પ્રેતઃ પ્રાપ્તસ્તૈઃ ક્ષણમાત્રતઃ ।
અદૃશ્યતાં યયૌ તેઽથ હતાશા વિપ્રમાગમન્ ॥ ૨,૭.૪૦॥

પ્રારબ્ધમાત્રે વિપ્રસ્ય પાટને તત્ર પર્વતે ।
મમ સ્થાનસ્ય વિપ્રસ્ય મહિમ્નૈવ ચ તત્ક્ષણે ॥ ૨,૭.૪૧॥

સદ્યઃ સ્મૃતિઃ સમુત્પન્ના તેષાં પૂર્વસ્ય જન્મનઃ ।
વિપ્રં પ્રદક્ષિણીકૃત્યદ્વિજર્ષભમથાબ્રુવન્ ॥ ૨,૭.૪૨॥

અદ્ય નઃ ક્ષન્તુમર્હેઽસીત્યુક્ત્વા તે સુરદામ્ભિકાઃ ।
ગિરેરિવ પરાવર્તં સમુદ્રસ્યેવ શોષણમ્ ॥ ૨,૭.૪૩॥

તેષાં તદ્વચનં શ્રુત્વાપૃચ્છત્કેયૂયમિત્યથ ।
કિં માયા કિમુ વા સ્વપ્ન ઉતાહો ચિત્તવિભ્રમઃ ॥ ૨,૭.૪૪॥

પ્રેતા ઊચુઃ ।
અવેહિ તત્ત્વમેવૈતત્પ્રેતા વૈ કર્મજા વયમ્ ।
બ્રાહ્મણ ઉવાચ ।

કિંનામાનઃ કિમાચારાઃ કથઞ્ચેમાં દશાં ગતાઃ ॥ ૨,૭.૪૫॥

અવિનીતાઃ કથં પૂર્વં વિનીતાઃ સામ્પ્રતં કથમ્ ।
પ્રેતા ઊચુઃ ।
શ◌ૃણુ વિપ્રેન્દ્ર વક્ષ્યામઃ પ્રશ્નાનામનુપૂર્વશઃ ॥ ૨,૭.૪૬॥

ઉત્તરાણિ મહાયોગિંસ્ત્વદ્દર્શનગતાંહસઃ ।
અહં પર્યુષિતો નામ્ના એષ સૂચીમુખઃ સ્મૃતઃ ॥ ૨,૭.૪૭॥

તૃતીયઃ શીઘ્રગસ્તુર્યોરોધકો લેખકઃ પરઃ ।
બ્રાહ્મણ ઉવાચ ।
પ્રેતાનાં કર્મજાતાનાં કુતો નામ નિરર્થકમ્ ॥ ૨,૭.૪૮॥

નિરુક્તિમેષાં નામ્નાં વૈ પ્રેતા વદત મા ચિરમ્ ।
શ્રીકૃષ્ણ ઉવાચ ।
એવમુક્તાસ્તુ વિપ્રેણ પૃથગુત્તરમબ્રુવન્ ॥ ૨,૭.૪૯॥

પર્યુષિત ઉવાચ ।
કદાચિચ્છ્રાદ્ધકાલે વૈ મયા વિપ્રો નિમન્ત્રિતઃ ॥ ૨,૭.૫૦॥

સ ચ કૃત્વા વિલમ્બેન વૃદ્ધો મદ્ગૃહમાગતઃ ।
અકૃતશ્રાદ્ધકર્માહં તં પાકં ભુક્તવાન્ક્ષુધા ॥ ૨,૭.૫૧॥

અદદામન્નમાકૃષ્ય વિપ્રે પર્યુષિતં કિયત્ ।
તસ્માત્પાપાન્મૃતઃ પાપો યોનિં વૈ કુત્સિતાં ગતઃ ॥ ૨,૭.૫૨॥

યતઃ પર્યુષિતં દત્તં તતઃ પર્યુષિતઃ સ્મૃતઃ ।
સૂચીમુખ ઉવાચ ।
કદાચિદ્બ્રાહ્મણી કાચિત્તીર્થં ભદ્રવટં યયૌ ॥ ૨,૭.૫૩॥

પઞ્ચવર્ષસુતા વૃદ્ધા પુત્રમાત્રૈકજીવિતા ।
અહં ક્ષત્રિયદાયાદસ્તસ્યા રોધમકારિષમ્ ॥ ૨,૭.૫૪॥

વને તુ વિજને તત્ર પાપાધ્વગગતિં ગતઃ ।
તસ્યાઃ સવસ્ત્રં પાથેયં તત્સૂનોર્વસનાનિ ચ ॥ ૨,૭.૫૫॥

ગૃહીતાનિ મયા વિપ્ર શિરસ્યાપીડ્ય મુષ્ટિના ।
તૃષાર્તસ્તત્ક્ષણં બાલઃ પાત્રસંસ્થં જલંપિબન્ ॥ ૨,૭.૫૬॥

તાવન્માત્રોદકે દેશે મયા હુઙ્કૃત્ય વારિતઃ ।

મયાથ સકલં પીતં જલં પાત્રાત્તૃષાવતા ॥ ૨,૭.૫૭॥

બાલોઽપિ ભયસન્ત્રસ્તઃ પિપાસુર્વ્યસુરાપતત્ ।
પુત્રશોકાન્મૃતા માતા કૂપે પ્રાસ્ય નિજં વપુઃ ॥ ૨,૭.૫૮॥

એતસ્માત્પાતકાદ્વિપ્ર પ્રેતત્વં પ્રાપ્તવાનહમ્ ।
સૂચ્યગ્રપ્રાયવિવરમુખઃ પર્વતદેહવાન્ ॥ ૨,૭.૫૯॥

યદ્યપિ પ્રાપ્નુયાં ભક્ષ્યં ભક્ષિતુન્તુ ન શક્યતે ।
મયા ક્ષુધાનલેનાપિ જ્વલતાસ્યં નિકોચિતમ્ ॥ ૨,૭.૬૦॥

અત આસ્યે તુ વિવરં સૂચ્યગ્રેણ સમમમ ।
એતસ્માત્કારણાદ્વિપ્રે નામ્ના સૂચીમુખોઽસ્મ્યહમ્ ॥ ૨,૭.૬૧॥

શીઘ્રગ ઉવાચ ।
પુરાહં વૈશ્યજાતીયઃ સાકં સખ્યા ચ કેનચિત્ ।
વાણિજ્યં કર્તુમગમં દેશમન્યં મહાધનઃ ॥ ૨,૭.૬૨॥

મિત્રં ચ મે બહુધનં તસ્ય લોભો મહાંસ્તતઃ ।
જાતોઽપ્યદૃષ્ટવૈમુખ્યાન્મે નષ્ટં મૂલમપ્યુત ॥ ૨,૭.૬૩॥

તતસ્તસ્માત્તુ નિષ્ક્રાન્તાવાવાં નાવાથ નિમ્નગામ્ ।
માર્ગગાં તર્તુમારબ્ધૌ લોહિતાયતિ ભાસ્કરે ॥ ૨,૭.૬૪॥

સખા સ ચ મદુત્સઙ્ગે સુષ્વાપાધ્વક્લમાકુલઃ ।
અભૂત્તદાતિ પાપસ્ય ક્રૂરા મતિરતીવ મે ॥ ૨,૭.૬૫॥

તમુત્સઙ્ગગતં સૂરે નષ્ટે પૂરેઽક્ષિપં તદા ।
કત્કૃત્યં કુર્વતો નાવિ લોકૈસ્તુ જ્ઞાતમેવ ન ॥ ૨,૭.૬૬॥

તસ્ય યદ્વસ્તુ તત્સર્વં મણિમુક્તાદિકાઞ્ચનમ્ ।
આદાય શીગ્રગસ્તસ્માદ્દેશાત્સ્વગૃહમાગતઃ ॥ ૨,૭.૬૭॥

તત્સર્વં સ્વગૃહે મુક્ત્વા તસ્ય પત્ન્યૈ ન્યવેદયમ્ ।
દસ્યુભિર્મે હતો ભ્રાતા ધનમાચ્છિદ્ય વૈ પથિ ॥ ૨,૭.૬૮॥

પ્રજાવતિ પ્રદ્રુતોઽહં મા રોદીત્યેવમબ્રવમ્ ।
શોકાર્તા સાપિ તત્કાલં મમત્વં ગૃહબન્ધુષુ ॥ ૨,૭.૬૯॥

ત્યક્ત્વા ચાતિ પ્રિયાન્પ્રાણાઞ્જુહાવાગ્નૌ યથાવિધિ ।
તતો નિષ્કણ્ટકં તદ્ધિ વીક્ષ્ય હૃષ્ટો ગતો ગૃહમ્ ॥ ૨,૭.૭૦॥

અભુઞ્જં સર્વમાગત્ય યાવજ્જીવં તુ તદ્ધનમ્ ।
મિત્રં પૂરે હિ નિઃ ક્ષિપ્ય યદહં શીઘ્રમાગતઃ ॥ ૨,૭.૭૧॥

એતસ્માત્કારણાત્પ્રેતઃ શીઘ્રગોઽહં તુ નામતઃ ।
રોધક ઉવાચ ।
અહન્તુ શૂદ્રજાતીયઃ પુરાભૂવં મુનીશ્વર ॥ ૨,૭.૭૨॥

રાજપ્રસાદાપ્તમહાશતગ્રામાધિકારવાન્ ।
વૃદ્ધૌ મે પિતરાવાસ્તાં લઘુરેકઃ સહોદરઃ ॥ ૨,૭.૭૩॥

શીઘ્રં સ ચ મયા ભ્રાતા લુબ્ધેનૈકઃ પૃથક્કૃતઃ ।
આપ્તવાન્પરમં દુઃખં સોન્નવસ્ત્રવિવર્જિતઃ ॥ ૨,૭.૭૪॥

અદત્તાં પિતરૌ ચ્છન્નં કિઞ્ચિત્કિઞ્ચિત્તુ તસ્ય ચ ।
તસ્મૈ પિતૃભ્યાં યદ્દત્તમાપ્તેભ્યસ્તન્મયા શ્રુતમ્ ॥ ૨,૭.૭૫॥

તત્સર્વં તત્ત્વતો જ્ઞાત્વા પિત્રો રોધમકારયમ્ ।
શૂન્યમન્દિર એકસ્મિન્બદ્ધ્વા તુ નિગડૈર્દૃઢૈઃ ॥ ૨,૭.૭૬॥

તતસ્તૌ જહતુઃ પ્રાણાન્દુઃખિતૌ વિષપાનતઃ ।
સોસૌ બાલોઽપિ બભ્રામ પિતૃભ્યાં રહિતો દ્વિજ ॥ ૨,૭.૭૭॥

પુરઃ પત્તનખર્વાંચાન્ખેટાનપિ મૃતઃ ક્ષુધા ।
એતસ્માત્પાતકાદ્વિપ્ર મૃતઃ પ્રેતત્વમાગતઃ ॥ ૨,૭.૭૮॥

રુદ્ધૌ તુ પિતરૌ યસ્માન્નામ્નાહં રોધકસ્તતઃ ।
લેખક ઉવાચ ।
અહં વિપ્ર પુરાભૂવમવન્ત્યાં દ્વિજલસત્તમઃ ॥ ૨,૭.૭૯॥

ભદ્રસ્ય રાજ્ઞો દેવાનાં પૂજનેઽધિકૃતો હ્યહમ્ ।
બહ્વ્યસ્તુ પ્રતિમાસ્તત્ર બભૂવુર્બહુનામિકાઃ ॥ ૨,૭.૮૦॥

હેમ્નસ્તદઙ્ગેષુ બહુ રત્નજાતં બભૂવ હ ।
તાસાં મે કુર્વતઃ પૂજાં પાપા મતિરજાયત ॥ ૨,૭.૮૧॥

અખિલં તીક્ષ્ણલોહેન તાસામઙ્ગં વિશીર્ય ચ ।
ઉલ્લેખનઞ્ચ રત્નાનાં નેત્રાદિભ્યઃ કૃતં મયા ॥ ૨,૭.૮૨॥

તથાકૃતાન્યથાઙ્ગાનિ પ્રતિમાનાં નિરીક્ષ્ય ચ ।

નેત્રાણિ ચ વિરત્નાનિ નૃપશ્ચુક્રોધ વહ્નિવત્ ॥ ૨,૭.૮૩॥

પ્રતિજજ્ઞે નૃપઃ પશ્ચાદેષ બ્રાહ્મણપુઙ્ગવઃ ।
આભ્યો રત્નં સુવર્ણઞ્ચ હૃતં યેન ભવિષ્યતિ ॥ ૨,૭.૮૪॥

જ્ઞાતશ્ચ સ હિ મે વધ્યો ભવિષ્યતિ ન સંશયઃ ।
અહં તત્સકલં જ્ઞાત્વા રાત્રાવસિધરો ગૃહમ્ ॥ ૨,૭.૮૫॥

રાજ્ઞઃ પ્રવિશ્ય રાજાનં પશુમારમમારયમ્ ।
ગૃહીત્વાથ મણીન્સ્વર્ણં નિશીથેઽહં ગતોઽન્યતઃ ॥ ૨,૭.૮૬॥

વ્યાઘ્રેણ મહાતારણ્યે નખટઙ્કૈર્વિટઙ્કિતઃ ।
લેખનાત્પ્રતિમાયા યન્મયા લોહેન કર્તિતમ્ ॥ ૨,૭.૮૭॥

એતસ્માત્પાતકાત્પ્રેતો લેખકો નામતોઽસ્મ્યહમ્ ।
આસીન્નરકભોગાન્તે નઃ પ્રેતત્વમિદં દ્વિજ ॥ ૨,૭.૮૮॥

બ્રાહ્મણ ઉવાચ ।
સંજ્ઞાસ્તાદૃશ્ય આખ્યાતા યથૈતા ભવતા દશાઃ ।
વદન્ત્વાચારમાત્રં મે પ્રેતા આહારમપ્યુત ॥ ૨,૭.૮૯॥

પ્રેતા ઊચુઃ ।
વેદમાર્ગાનુસરણં લજ્જા ધર્મો દમઃ ક્ષમા ।
ધૃતિર્જ્ઞાનં નૈવ યત્ર વયં તત્ર વસામહે ॥ ૨,૭.૯૦॥

તસ્ય પીડાં વપં કુર્મો નૈવ શ્રાદ્ધં ન તર્પણમ્ ।
યસ્ય ગેહે તદઙ્ગાત્તુ માંસઞ્ચ રુધિરં ક્રમાત્ ॥ ૨,૭.૯૧॥

જક્ષામશ્ચ પિબામશ્ચ ઉક્ત આચાર એષ નઃ ।
શૃણુ ચાહારમસ્માકં સર્વલોકવિગર્હિતમ્ ॥ ૨,૭.૯૨॥

દૃષ્ટસ્ત્વયા ચ કિઞ્ચિદ્વૈ બ્રૂમોજ્ઞાતં ત્વયાનઘ ।
વમનં વિડ્ દૂષિકા ચ શ્લેષ્મા મૂત્રાશ્રુણી તથા ॥ ૨,૭.૯૩॥

એતદ્ભક્ષ્યઞ્ચ પાનઞ્ચ મા પૃચ્છાતઃ પરં દ્વિજ ।
લજ્જા નો જાયતે સ્વામિન્નાહારં વદતાં સ્વકમ્ ॥ ૨,૭.૯૪॥

અજ્ઞાનાસ્તામસા મન્દા કાન્દિશીકા વયં વિભો ।
અકસ્માજ્જન્મનાં વિપ્ર સ્મૃતિઃ પ્રાપ્તા તુ પૌર્વિકી ॥ ૨,૭.૯૫॥

વિનીતત્વાવિનીતત્વે જાનીમો નૈવ નઃ પ્રભો ।

શ્રીકૃષ્ણ ઉવાચ ।
એવં વદત્સુ પ્રેતેષુ તથા શ્રુતવતિ દ્વિજે ॥ ૨,૭.૯૬॥

અદર્શયમહં રૂપં તદા તાર્ક્ષ્યેદમેવ વૈ ।
સ તુ દૃષ્ટ્વા દ્વિજશ્રેષ્ઠો હૃદ્ગતં પુરુષં પુરઃ ॥ ૨,૭.૯૭॥

સ્તોત્રૈસ્તુષ્ટાવ પક્ષીશ દણ્ડવત્પ્રણનામ મામ્ ।
તેઽપિ તેપુસ્તતઃ પ્રેતા આશ્ચર્યોત્ફુલ્લચક્ષુષઃ ॥ ૨,૭.૯૮॥

પ્રણયેન સ્ખલદ્વાચઃ ખગ નોચુઃ કિમપ્યુત ।
રજસા ગોરચિત્તાનાં તમસા મૂઢચેતસામ્ ।
કૃપયા યઃ સમુદ્ધારં કુરુષે વૈ નમોઽસ્ત તે ॥ ૨,૭.૯૯॥

એવં દ્વિજાતૌ બ્રુવતિ પ્રભૂ તપ્રભૈશ્ચ મુખ્યાંબરચારિયુક્તૈઃ ।
તદા મદિચ્છાપ્રભવૈર્વિમાનૈઃ ષડ્ભિઃ સમન્તાદ્રુરુચે ગિરિઃ સઃ ॥ ૨,૭.૧૦૦॥

ઇત્થં વિમાનેન મદીયલોકં ગતો દ્વિજરસોઽપ્યથ પઞ્ચમિસ્તૈઃ ।
પ્રેતા યયુઃ સ્વર્ગમગણ્યપુણ્યં સત્સઙ્ગસંસર્ગવશાત્સુપર્ણમ્ ॥ ૨,૭.૧૦૧॥

પ્રેતાઃ સંગવશેન નાકમવન્સન્તપ્તકો બ્રાહ્મણો વિષ્વક્સેન ઇતિ પ્રસિદ્ધવિભવો નામ્ના ગણે મેઽભવત્ ।
એતત્તે સકલં મયા નિગાદિતં યશ્ચૈતદુત્કીર્તયેદ્યશ્ચેદં
શ‌ૃણુયાન્ન સોઽપિ પુરુષઃ પ્રેતત્વમાપ્નોતિ હિ ॥ ૨,૭.૧૦૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે
શ્રીકૃષ્ણગરુડસંવાદે પ્રેતકલ્પે પઞ્ચપ્રેતોપાખ્યાનં નામ સપ્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮
ગરુડ ઉવાચ ।
સ્વામિન્કસ્યાધિકારોઽત્ર સર્વ એવૌર્ધ્વદૈહિકે ।
ક્રિયાઃ કતિવિધાઃ પ્રોક્તા વદૈતત્સર્વમેવ મે ॥ ૨,૮.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
પુત્રઃ પૌત્રઃ પ્રપૌત્રો વા તદ્ભ્રાતા ભ્રાતૃસન્તતિઃ ।
સપિણ્ડસન્તતિર્વાપિ ક્રિયાર્હાઃ ખગ જ્ઞાતયઃ ॥ ૨,૮.૨॥

તેષામભાવે સર્વેષાં સમાનોદકસન્તતિઃ ।
કુલદ્વયેઽપિ ચોચ્છિન્ને સ્ત્રીભિઃ કાર્યાઃ ક્રિયાઃ ખગ ॥ ૨,૮.૩॥

ઇચ્છયોચ્છિન્નબન્ધશ્ચ કારયેદવનીપતિઃ ।
પૂર્વાઃ ક્રિયા મધ્યમાશ્ચ તથા ચૈવોત્તરાઃ ક્રિયાઃ ॥ ૨,૮.૪॥

પ્રતિસંવત્સરં પક્ષિન્નેકોદ્દિષ્ટવિધાનતઃ ।
શ્રાદ્ધં તત્ર પ્રકર્તવ્યં ફલં તસ્ય શ‍ૃણુષ્વ મે ॥ ૨,૮.૫॥

બ્રહ્મેન્દ્રરુદ્રનાસત્યસૂર્યાગ્નિવસુમારુતાન્ ।
વિશ્વેદેવાન્પિતૃ ગણાન્વયાંસિ મનુજાન્પશૂન્ ॥ ૨,૮.૬॥

સરીસૃપાન્માતૃગણાન્યચ્ચાન્યદ્ભૂતસંજ્ઞિતમ્ ।
શ્રાદ્ધં શ્રદ્ધાન્વિતઃ કુર્વન્પ્રીણયત્યખિલં જગત્ ॥ ૨,૮.૭॥

તે તૃપ્તાસ્તર્પયન્ત્યેનં પુત્રદારધનૈસ્તથા ।
અધિકારઃ ક્રિયાભેદઃ સમાસાત્તે નિરૂપિતઃ ॥ ૨,૮.૮॥

ગરુડ ઉવાચ ।
ઉક્તેષ્વેકોઽપિ ચેન્ન સ્યાદધિકારી સુરોત્તમ ।
કર્તવ્યં કિં તદા વિષ્ણો પુરુષેણ વિજાનતા ॥ ૨,૮.૯॥

શ્રીકૃષ્ણ ઉવાચ ।
અધિકારો યદા નાસ્તિ યદિ નાસ્તિ ચ નિશ્ચયઃ ।
જીવિતે સતિ જીવાય દદ્યાચ્છ્રાદ્ધંસ્વયં નરઃ ॥ ૨,૮.૧૦॥

કૃતોપવાસઃ સુસ્નાતઃ કૃષ્ણાસઙ્ગઃ સમાહિતઃ ।
કર્તારમથ ભોક્તારં વિષ્ણું સર્વેશ્વરં યજેત્ ॥ ૨,૮.૧૧॥

સદક્ષિણાશ્ચ સતિલાસ્તિસ્ત્રશ્ચ જલધેનવઃ ।
નિવેદયેત્પિતૃભ્યશ્ચ સ્વધેતિ સુસમાહિતઃ ॥ ૨,૮.૧૨॥

અગ્નયે કવ્યવાહનાય સ્વધા નમ ઇતિ સ્મરન્ ।
સોમાયત્વા પિતૃમતે સ્વધા નમ ઇતિ સ્મરન્ ॥ ૨,૮.૧૩॥

દક્ષિણેન તુ દદ્યાચ્ચ તૃતીયાં દક્ષિણાયુતામ્ ।
યમાયાઙ્ગિરસે ચાથ સ્વધા નમ ઇતિ સ્મરન્ ॥ ૨,૮.૧૪॥

તયોર્મધ્યે તુ નિઃ ક્ષિપ્ય વિપ્રાન્સમન્ત્ર્ય ભો જયેત્ ।
પ્રથમામુત્તરે ન્યસ્ય દ્વિતીયાં દક્ષિણે ન્યસેત્ ॥ ૨,૮.૧૫॥

મધ્યે તૃતીયાં વિન્યસ્ય પશ્ચાદાવાહનાદિકમ્ ।
આવાહનાદિના પૂર્વં વિશ્વેદેવાન્પ્રપૂજયચ ॥ ૨,૮.૧૬॥

વસુભ્યસ્ત્વામહં વિપ્ર રુદ્રેભ્યસ્ત્વામહં તતઃ ।
સૂર્યેભ્યસ્ત્વામહં વિપ્ર ભોજયામીતિ તાન્વદેત્ ॥ ૨,૮.૧૭॥

આવાહનાદિકં શેષં કુર્યાચ્ચ પિતૃશેષવત્ ।
સામ્યાં ધેનું તતો દદ્યાદ્વસૂદ્દેશં દ્વિજાય તુ ॥ ૨,૮.૧૮॥

આગ્નેય્યાં ચાથ રૌદ્રાય યામ્યાં સૂર્યદ્વિજાય તુ ।
વિશ્વેભ્યશ્ચાથ દેવેભ્યસ્તિલપાત્રં નિવેદયેત્ ॥ ૨,૮.૧૯॥

સ્વસ્તીત્યેવ તથાક્ષય્યં જલં દત્ત્વાથ તાન્દ્વિજાન્ ।
વિસર્જયેત્સ્મરન્વિષ્ણું દેવમષ્ટાક્ષરં વિભુમ્ ॥ ૨,૮.૨૦॥

તતઃ કામં કુલેશાનીં શિવં નારાયણં સ્મરેત્ ।
ચતુર્દશ્યાં તતો ગચ્છેદ્યથાપ્રાપ્તાં સરિદ્વરામ્ ॥ ૨,૮.૨૧॥

વસ્ત્રાણિ લોહખણ્ડાનિ જિતં ત ઇતિ સંજપન્ ।
દક્ષિણાભિમુખો વહ્નિં જ્વાલયેત્તત્ર ચ સ્વયમ્ ॥ ૨,૮.૨૨॥

પઞ્ચાશતા કુશૈર્બ્રાહ્મીં કૃત્વા પ્રતિકૃતિં દહેત્ ।
હુત્વા શ્માશાનિકં હોમં પૂર્ણાહુત્યન્તમેવ હિ ॥ ૨,૮.૨૩॥

નિરગ્નિમથ વા ભૂમિં યમં રુદ્રઞ્ચ સંસ્મરેત્ ।
હુત્વા પ્રાધાનિકે સ્થાને પશ્ચાદાવાહયેચ્ચ તમ્ ॥ ૨,૮.૨૪॥

શ્રપયેચ્ચાપરં વહ્નૌ મુદ્ગમિશ્રં ચરું તતઃ ।
તિલતણ્ડુલમિશ્રઞ્ચ દ્વિતીયં સપવિત્રકમ્ ॥ ૨,૮.૨૫॥

ૐ પૃથિવ્યૈ નમસ્તુભ્યમિતિ ચૈકં નિવેદયેત્ ।
ૐ યમાય નમશ્ચેતિ દ્વિતીયં તદનન્તરમ્ ॥ ૨,૮.૨૬॥

ૐ નમશ્ચાથ રુદ્રાય શ્માશાનપતયે નમઃ ।
તતો દીપ્તે સમિદ્ધેઽગ્નૌ ભૂમૌ પ્રકૃતિદારુણે ॥ ૨,૮.૨૭॥

સપ્તભ્યો યમસંજ્ઞેભ્યો દદ્યાત્સપ્ત જલાઞ્જલીન્ ।
યમાય ધર્મરાજાય મૃત્યવે ચાન્તકાય ચ ॥ ૨,૮.૨૮॥

વૈવસ્વતાય કાલાય સર્વપ્રાણહરાય ચ ।
સ્વધાકારનમસ્કારપ્રણવૈઃ સહ સપ્તધા ॥ ૨,૮.૨૯॥

અમુકામુકગૌત્રૈતત્તુભ્યમસ્તુ તિલોદકમ્ ।
પ્રદદ્યાદ્દશ પિણ્ડાંસ્તુ અર્ઘપુષ્પસમન્વિતાન્ ॥ ૨,૮.૩૦॥

ધૂપો દીપો બલિર્ગન્ધઃ સર્વેષામસ્તુ ચાક્ષયઃ ।
દશ પિણ્ડાંસ્તુ દાન્દત્ત્વા વિષ્ણોઃ સૌમ્યં મુખં સ્મરેત્ ॥ ૨,૮.૩૧॥

કુર્યાચ્ચ માસિકં માસિ સપિણ્ડીકરણં તતઃ ।
આશૌચાન્તે તતઃ કુર્યાદાત્મનો વા મરસ્ય તુ ॥ ૨,૮.૩૨॥

કુર્યાદસ્થિરતાં જ્ઞાત્વા શક્ત્યારોગ્યધનાયુષમ્ ।
એતત્તે સર્વમાખ્યાતં જીવચ્છ્રાદ્ધં મયા ખગ ॥ ૨,૮.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણ ગરુડસંવાદે શ્રાદ્ધકર્ત્રાત્મશ્રાદ્ધયોર્નિરૂપણં નામાષ્ટમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯
ગરુડ ઉવાચ ।
ઉક્તમાદ્યાં ક્રિયાં યાવન્નૃપોઽપીતિત્વયાનઘ ।
કસ્યચિત્કેનચિદ્રાજ્ઞા કિમાદ્યા સા કૃતા પુરા ॥ ૨,૯.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
સુપર્ણ શ‍ૃણુ વક્ષ્યામિ યથા રાજ્ઞા ક્રિયા કૃતા ।
આસીત્કૃતયુગે રાજા વાઙ્ગો વૈ બભ્રુવાહનઃ ॥ ૨,૯.૨॥

પૃથિવ્યાશ્ચતુરન્તાયા ગોપ્તા પક્ષીન્દ્ર ધર્મતઃ ।
ચતુર્ભાગાં ભુવં કૃત્સ્નાં સ ભુઙ્ક્તે વસુધાધિપઃ ॥ ૨,૯.૩॥

ન પાપકૃત્કશ્ચિદાસીત્તસ્મિન્રાજ્યં પ્રશાસતિ ।
નાસીચ્ચૌરભયં તાર્ક્ષ્ય ન ક્ષુદ્રભયમેવ હિ ॥ ૨,૯.૪॥

નાસીદ્વ્યાધિભયઞ્ચાપિ તસ્મિઞ્જનપદેશ્વરે ।
સ્વધર્મે રેમિરે ચાસીત્તેજસા ભાસ્કરોપમઃ ॥ ૨,૯.૫॥

અક્ષુબ્ધત્વેઽર્ચલસમઃ સહિષ્ણુત્વે ધરાસમઃ ।
સ કદાચિન્મહાબાહુઃ પ્રભૂતબલવાહનઃ ॥ ૨,૯.૬॥

વનં જગામ ગહનં હયાનાઞ્ચ શતૈર્વૃતઃ ।
સિંહનાદૈશ્ચ યોધાનાં શઙ્ખદુન્દુભિનિઃ સ્વનૈઃ ॥ ૨,૯.૭॥

આસીત્કિલકિલાશબ્દસ્તસ્મિન્ગચ્છતી પાર્થિવે ।

તત્રતત્ર ચ વિપ્રેન્દ્રૈઃ સ્તૂયમાનઃ સમન્તતઃ ॥ ૨,૯.૮॥

નિર્યયૌ પરયા પ્રીત્યા વનં મૃગજિઘાંસયા ।
સ ગચ્છન્દદૃશે ધીમાન્નન્દનપ્રતિમં વનમ્ ॥ ૨,૯.૯॥

બિલ્વાર્કખદિરાકીર્ણં કપિત્થધ્વજસંયુતમ્ ।
વિષમૈઃ પર્વતૈશ્ચૈવ સર્વતશ્ચ સમન્વિતમ્ ॥ ૨,૯.૧૦॥

નિર્જલં નિર્મનુષ્યઞ્ચ બહુયોજનમાયતમ્ ।
મૃગસિંહૈર્મહાઘોરૈર્ન્યૈશ્ચાપિ વનેચરૈઃ ॥ ૨,૯.૧૧॥

તદ્વનં મનુજ વ્યાઘ્રઃ સભૃત્યબલવાહનઃ ।
લીલયા લોડયામાસ સૂદયન્વિવિધાન્મૃગાન્ ॥ ૨,૯.૧૨॥

મૃગસ્ય કસ્યચિત્કુક્ષિં તતો વિવ્યાધ ભૂમિપઃ ।
રાજા મૃગપ્રસઙ્ગેન તમનુ પ્રાવિશદ્વનમ્ ॥ ૨,૯.૧૩॥

એકાકી વૈ હૃતબલઃ ક્ષુત્પિપાસાસમન્વિતઃ ।
સ વનસ્યાન્તમાસાદ્ય મહચ્ચારણ્યમાસદત્ ॥ ૨,૯.૧૪॥

તૃષયા પરયાવિષ્ટોઽન્વિષ્યજ્જલમિતસ્તતઃ ।
સ દૂરાત્પૂરચક્રાહ્વ હંસસારસનાદિતૈઃ ॥ ૨,૯.૧૫॥

સૂચિતં સર આગત્ય સાશ્વ એવ વ્યગાહત ।
પદ્માનાઞ્ચ પરાગેણ ઉત્પલાનાં રજેન ચ ॥ ૨,૯.૧૬॥

સુગન્ધમમલં શીતં પીત્વામ્ભો નિર્જગામ હ ।
માર્ગશ્રમપરિશ્રાન્તસ્તડાગતટમણ્ડપમ્ ॥ ૨,૯.૧૭॥

ન્યગ્રોધં વીક્ષ્ય તસ્યાશુ જટાસ્વશ્વં બબન્ધ હ ।
સ તત્રાસ્તરમાસ્તીર્ય ખેટકાનુપધાય ચ ॥ ૨,૯.૧૮॥

સૂષ્વાપ વાયુના તત્ર સેવ્યામાતસ્તદા ક્ષણમ્ ।
ક્ષણં સુપ્તે નૃપે તત્ર પ્રેતો વૈ પ્રેતવાહનઃ ॥ ૨,૯.૧૯॥

કશ્ચિદત્રાજગામાથ યુક્તઃ પ્રેતશતેન ચ ।
અસ્થિચર્મશિરાશેષશરીરઃ પરિવિભ્રમન્ ॥ ૨,૯.૨૦॥

ભક્ષ્યંપેયં માર્ગમાણો ન બધ્નાતિ ધૃતિં ક્વચિત્ ।
તમપૂર્વં નૃપો દૃષ્ટ્વાકરોદસ્ત્રં શરાસને ॥ ૨,૯.૨૧॥

દૃષ્ટ્વા સોઽપિ ચિરં ભૂપં તસ્થૌ સ્થાણુપિવાગ્રતઃ ।
તમવસ્થિતમાલોક્ય રાજા પ્રાપ્તકુતૂહલઃ ॥ ૨,૯.૨૨॥

પપ્રચ્છ તઞ્ચ કોઽસીતિ કુતો વા વિકૃતિં ગતઃ ।
પ્રેત ઉવાચ ।
પ્રેતભાવો મયા ત્યક્તો ગતિં પ્રાપ્તોઽસ્મ્યહં પરામ્ ॥ ૨,૯.૨૩॥

ત્વત્સંયોગાન્મહાબાહો નાસ્તિ ધન્યતરો મયા ।
બભ્રુવાહન ઉવાચ ।
કિમેતત્દ્વિપિને ઘોરે સર્વત્રાતિભયાનકે ॥ ૨,૯.૨૪॥

દોધૂયમાને વાતેન વાત્યારૂપેણ કોણપ ।
પતઙ્ગા મશકાઃ ક્ષુદ્રાઃ કવન્ધાશ્ચ શિરાંસિ ચ ॥ ૨,૯.૨૫॥

મત્સ્યાઃ કૂર્માઃ કૃકલાસા વૃશ્ચિકા ભ્રમરાહયઃ ।
અધોમુખોર્ધ્વપાદાસ્તે ક્રન્દમાનાઃ સુદારુણમ્ ॥ ૨,૯.૨૬॥

પ્રવાન્તિ વાયવો રૂક્ષા જ્વલન્તો વિદ્યુદગ્નયઃ ।
ઇતસ્તતો ભ્રમન્તીવ વાયુના તૃણસન્તતિઃ ॥ ૨,૯.૨૭॥

દૃશ્યન્તે વિવિધા જીવા નાગાશ્ચ શલભવ્રજાઃ ।
શ્રૂયન્તે બહુધા રાવા ન દૃશ્યન્તે ક્વચિત્ક્વચિત્ ॥ ૨,૯.૨૮॥

દૃષ્ટ્વેદં વિકૃતં સર્વં વેપતે હૃદયમમ ।
પ્રતે ઉવાચ ।
યેષાં નૈવાગ્નિસંસ્કારો ન શ્રાદ્ધં નોદકક્રિયાઃ ॥ ૨,૯.૨૯॥

ષટ્પિણ્ડા દશ ગાત્રાણિ સપિણ્ડીકરણં ન હિ ।
વિશ્વાસઘાતિનો યે ચ સુરાપાઃ સ્વર્ણહારિણઃ ॥ ૨,૯.૩૦॥

મૃતા દુર્મરણાદ્યૈ ચ યે ચાસૂયાપરા જનાઃ ।
પ્રાયશ્ચિત્તવિહીના યે અગમ્યાગમને રતાઃ ॥ ૨,૯.૩૧॥

કર્મભિર્ભ્રામ્યમાણાસ્તે પ્રાણિનઃ સ્વકૃતૈરિહ ।
દુર્લભાહારપાનીયા દૃશ્યન્તે પીડિતા ભૃશમ્ ॥ ૨,૯.૩૨॥

એતેષાં કૃપયા રાજંસ્ત્વં કુરુષ્વૌર્ધ્વદેહિકમ્ ।
યેષાં ન માતા ન પિતા ન પુત્રો ન ચ બાન્ધવાઃ ॥ ૨,૯.૩૩॥

તેષા રાજા સ્વયં કુર્યાત્કર્માણિ તુ યતો નૃપઃ ।

આત્મનશ્ચ શુભં કર્મ કર્તવ્યં પારલૌકિકમ્ ॥ ૨,૯.૩૪॥

વિમુક્તઃ સર્વદુઃખેભ્યો યેનાઞ્જો દુર્ગાતિં તરેત્ ।
ભ્રાતરઃ કસ્ય કે પુત્રાસ્ત્રિયોઽપિ સ્વાર્થકોવિદાઃ ॥ ૨,૯.૩૫॥

ન કાર્યસ્તેષુ વિશ્રમ્ભ સ્વકૃતં ભુજ્યતેયતઃ ।
ગૃહેષ્વર્થા નિવર્ન્તન્તે શ્મશાને ચૈવ બાન્ધવાઃ ॥ ૨,૯.૩૬॥

શરીરં કાષ્ઠામાદત્તે પાપં પુણ્યં સહ વ્રજેત્ ।
તસ્માદાશુ ત્વયા સમ્યગાત્મનઃ શ્રેય ઇચ્છતા ॥ ૨,૯.૩૭॥

અસ્થિરેણ શરીરેણ કર્તવ્યઞ્ચૌર્ધ્વદોહિકમ્ ।
રાજોવાચ ।
કૃશરૂપઃ કરાલાક્ષસ્ત્વં પ્રેત ઇવ લક્ષ્યસે ॥ ૨,૯.૩૮॥

કથયસ્વઃ મમ પ્રીત્યા પ્રેતરાજ યથાતથમ્ ।
તથા પૃષ્ટઃ સ વૈ રાજ્ઞા ઉવાચ સકલં સ્વકમ્ ॥ ૨,૯.૩૯॥

પ્રેત ઉવાચ ।
કથયામિ નૃપશ્રેષ્ઠ સર્વમેવાદિતસ્તવ ।
પ્રેતત્વે કારણં શ્રુત્વા દયાં કર્તુમિહાર્હસિ ॥ ૨,૯.૪૦॥

વૈદિશં નામ નગરં સર્વસમ્પત્સુખાવહમ્ ।
નાનાજનપદાકીર્ણં નાનારત્નસમાકુલમ્ ॥ ૨,૯.૪૧॥

નાનાપુષ્પવનાકીર્ણં નાનાપુણ્યજનાવૃતમ્ ।
તત્રાહં ન્યવસં ભૂપ દેવાર્ચનરતઃ સદા ॥ ૨,૯.૪૨॥

વૈશ્યજાતિઃ સુદેવોઽહં નામ્ના વિદિતમસ્તુ તે ।
હવ્યેન તર્પિતા દેવાઃ કવ્યેન પિતરો મયા ॥ ૨,૯.૪૩॥

વિવિધૈર્દાનયોગૈશ્ચ વિપ્રાઃ સન્તર્પિતા મયા ।
આહારશ્ચ વિહારશ્ચ મયા વૈ સુનિવેશિતઃ ॥ ૨,૯.૪૪॥

દીનાનાથવિશિષ્ટેભ્યો મયા દત્તમનેકધા ।
તત્સર્વં નિષ્ફલં જાતં મમ દૈવાદુપાગતમ્ ॥ ૨,૯.૪૫॥

ન મેઽસ્તિ સન્તતિસ્તાત ન સુહૃન્ન ચ બાન્ધવાઃ ।
ન ચ મિત્રં હિતસ્તાદૃગ્યઃ કુર્યાદૌર્ધ્વદૈહિકમ્ ॥ ૨,૯.૪૬॥

પ્રેતત્વં સુસ્થિરં તેન મમ જાતં નૃપોત્તમ ।

એકાદશં ત્રિપક્ષઞ્ચ ષાણ્માસિકમથાબ્દિકમ્ ॥ ૨,૯.૪૭॥

પ્રતિમાસ્યાનિ ચાન્યા નિ હ્યેવં શ્રાદ્ધાનિ ષોડશ ।
યસ્યૈતાનિ ન દીયન્તે પ્રેતશ્રાદ્ધાનિ ભૂપતે ॥ ૨,૯.૪૮॥

પ્રેતત્વં સુસ્થિરં તસ્યઃ દત્તૈઃ શ્રાદ્ધશતૈરપિ ।
એવં જ્ઞાત્વા મહારાજ પ્રેતત્વાદુદ્ધરસ્વ મામ્ ॥ ૨,૯.૪૯॥

વર્ણાનાઞ્ચૈવ સર્વેષાં રાજા બન્ધુરિહોચ્યતે ।
તન્માં તારય રાજેન્દ્ર મણિરત્નં દદામિ તે ॥ ૨,૯.૫૦॥

યથા મમ શુભાવાપ્તિર્ભવેન્નૃપવરોત્તમ ।
તથા કાર્યં મહીપાલ દયાં કૃત્વા મયિ પ્રભો ॥ ૨,૯.૫૧॥

સપિણ્ડૈર્વા સગોત્રૈર્વા નિષ્ઠુરૈર્ન કૃતો હિમે ।
વૃષોત્સર્ગસ્તતો દુષ્ટં પ્રેતત્વં પ્રાપ્તવાનહમ્ ॥ ૨,૯.૫૨॥

ક્ષુત્તૃષાવિષ્ટદેહશ્ચ ભક્ષ્યં પાનં ન ચાપ્નુયામ્ ।
અતો વિકૃતિરેષા વૈ કૃશાત્વાદિરમાંસકા ॥ ૨,૯.૫૩॥

ક્ષુત્તૃઙ્જન્યં મહાદુઃખમનુભવામિ પુનઃ પુનઃ ।
અકલ્યાણં હિ પ્રેતત્વં વૃષોત્સર્ગં વિના કૃતમ્ ॥ ૨,૯.૫૪॥

તસ્માદ્રાજન્દયાસિન્ધો પ્રાર્થયામિ તવાગ્રતઃ ।
રાજોવાચ ।
વર્તતે મત્કુલે પ્રેત ઇતિ જ્ઞેયં કથં નરૈઃ ॥ ૨,૯.૫૫॥

તન્મમાચક્ષ્વ હિ પ્રેત પ્રેતત્વાન્મુચ્યતે કથમ્ ।
પ્રેત ઉવાચ ।
લિઙ્ગેન પીડયા પ્રેતોઽનુમાતવ્યો નરૈઃ સદા ॥ ૨,૯.૫૬॥

વક્ષ્યામિ પીડાસ્તા રાજન્યા વૈ પ્રેતકૃતા ભુવિ ।
ઋતુઃ સ્યાદફલઃ સ્ત્રીણાં યદા વંશો ન વર્ધતે ॥ ૨,૯.૫૭॥

મ્રિયન્તે ચાલ્પવયસઃ સા પીડા પેતસમ્ભવા ।
અકસ્માદ્વૃત્તિહરણમપ્રતિષ્ઠા જનેષુ વૈ ॥ ૨,૯.૫૮॥

અકસ્માદ્ગૃહદાહઃ સ્યાત્સા પીડા પ્રેતસમ્ભવા ।
સ્વગેહે કલહો નિત્યં સ્યાચ્ચ મિથ્યાભિશંસનપ ॥ ૨,૯.૫૯॥

ગજયક્ષ્માદિસમ્ભૂતિઃ સા પીડા પ્રેતસમ્ભવા ।

અપિ સ્વયં ધનં મુક્તં પ્રયત્નાદનવે પથિ ॥ ૨,૯.૬૦॥

નૈવ લભ્યેત નશ્યેતઃ સા પીડા પ્રેતસમવા ।
સુવૃષ્ટૌ કૃષિનાશઃ સ્યાદ્વાણિજ્યાદ્વૃત્તિનાશનમ્ ॥ ૨,૯.૬૧॥

કલત્રં પતિકૂલં સ્યાત્સા પીડા પ્રેતસમ્ભવા ।
એવન્તુ પીડયા રાજન્પ્રેતજ્ઞાનં ભવેન્નૃણામ્ ॥ ૨,૯.૬૨॥

વૃષોત્સર્ગો યદિ ભવેત્પ્રેતત્વાન્મુચ્યતે તદા ।
તસ્માન્નપ ત્વમપ્યેવં વૃષોત્સર્ગં કુરુ પ્રભો ॥ ૨,૯.૬૩॥

મામુદ્દિશ્ય નૃપેઽપ્યત્રાધિકારોઽત્યનુકમ્પયા ।
રાજપુત્રો હતઃ કશ્ચિન્મયૈવાપ્તસ્તતો મયા ॥ ૨,૯.૬૪॥

કુરુષ્વ ત્વં ગૃહીત્વા મે તદ્ધનેન વૃષોત્સવમ્ ।
કાર્તિક્યાં પૌર્ણમાસ્યાં વાઽશ્વયુઙ્મધ્યેઽથવા નૃપ ॥ ૨,૯.૬૫॥

રેવતીયુક્તદિવસે કૃષીષ્ઠા મે વૃષોત્સવમ્ ।
પુણ્યાન્વિપ્રાન્સમાહૂય વહ્નિં સ્થાપ્ય વિધાનતઃ ॥ ૨,૯.૬૬॥

મન્ત્રૈર્હેમસ્તથા કાર્યઃ ષડ્ભિર્નૃપ વિધાનતઃ ।
બહૂન્વિપ્રાન્ભોજયેથાસ્તદ્રત્નાપ્તધનેન વૈ ।
એવં કૃતે મહીપાલ મમ મુક્તિર્ભવિષ્યતિ ॥ ૨,૯.૬૭॥

શ્રીકૃષ્ણ ઉવાચ ।
તથેતિ પ્રતિજગ્રાહ મણિં રાજા તતઃ ખગ ॥ ૨,૯.૬૮॥

ક્રિયાધિકારસ્તસ્યૈવ યો ધનગ્રાહકો ભવેત્ ।
કુર્વતોસ્તુ તયોર્વાર્તામેવં પ્રેતમહીક્ષિતોઃ ॥ ૨,૯.૬૯॥

ઝણત્કારસ્તુ ઘણ્ટાનાં ભેરીણાં ભાઙ્કૃતિસ્તથા ।
જાતસ્તદા રાજસેના ચતુરઙ્ગા સમાપતત્ ॥ ૨,૯.૭૦॥

તસ્યામાગતમાત્રાયાં પ્રેતશ્ચાદૃશ્યતાં ગતઃ ।
તસ્માદ્વનાદ્વિનિઃ સૃત્ય રાજાપિ પુરમાગમત્ ॥ ૨,૯.૭૧॥

સ કાર્તિક્યાં પૂર્ણિમાયાં પ્રેતમુદ્દિશ્ય સંવ્યધાત્ ।
વૃષોત્સર્ગં વિધાનેન તન્મણ્યાપ્તધનેન ચ ॥ ૨,૯.૭૨॥

પ્રેતોઽપ્યયં સપદિલબ્ધસુવર્ણદેહઃ કર્માન્ત આગત ઇતિ પ્રણનામ ભૂપમ્ ।
દેવ ત્વદીયમહિમાયમિતિ સ્તુવન્સ યાતો દિવં ગરુડ ભૂપતિના કૃતજ્ઞઃ ॥ ૨,૯.૭૩॥

એતત્તે સર્વમાખ્યાતં યથા ભૂપતિનાપિ સઃ ।
ઉદ્ધૃતઃ પ્રેતભાવાદ્ધૈ કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૨,૯.૭૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે રાજકૃતવૃષોત્સર્ગક્રિયાદિનિરૂપણં નામ નવમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦
ગરુડ ઉવાચ ।
સપિણ્ડીકરણ જાતે આબ્દિકે ચ સ્વકર્મભિઃ ।
દેવત્વં વા મનુષ્યત્વં પક્ષિત્વં વાપ્નુયુર્નરાઃ ॥ ૨,૧૦.૧॥

તેષાં વિભિન્નાહારાણાં શ્રાદ્ધં વૈ તૃપ્તિદં કથમ્ ।
યદપ્યન્યૈર્દ્વિજૈર્ભુક્તં હૂયતે યદિ વાનલે ॥ ૨,૧૦.૨॥

શુભાશુભાત્મકૈઃ પ્રેતસ્તદ્દત્તં ભુજ્યતે કથમ્ ।
શ્રાદ્ધસ્યાવશ્યકત્વન્તુ આમાવાસ્યાદિષુ શ્રુતમ્ ॥ ૨,૧૦.૩॥

શ્રીભગવાનુવાચ ।
પ્રેતાનાં શૃણુ પક્ષીન્દ્ર યથા શ્રાદ્ધન્તુ તૃપ્તિદમ્ ।
દેવો યદપિ જાતોઽયં મનુષ્યઃ કર્મયોગતઃ ॥ ૨,૧૦.૪॥

તસ્યાન્નમમૃતં ભૂત્વા દેવત્વેઽપ્યનુયાતિ ચ ।
ગાન્ધર્વ્યે ભોગરૂપેણ પશુત્વે ચ તૃણં ભવેત્ ॥ ૨,૧૦.૫॥

શ્રાદ્ધં હિ વાયુરૂપેણ નાગત્વેઽપ્યનુગચ્છતિ ।
ફલં ભવતિ પક્ષિત્વે રાક્ષસેષુ તથામિષમ્ ॥ ૨,૧૦.૬॥

દાનવત્વે તથા માંસં પ્રેતત્વેરુધિરં તથા ।
મનુષ્યત્વેઽન્નપાનાદિ બાલ્યે ભોગરસો ભવેત્ ॥ ૨,૧૦.૭॥

ગરુડ ઉવાચ ।
કથં કવ્યાનિ દત્તાનિ હવ્યાનિ ચ જનૈરિહ ।
ગચ્છન્તિ પિતૃલોકં વા પ્રાપકઃ કોઽત્ર ગદ્યતે ॥ ૨,૧૦.૮॥

મૃતાનામપિ જન્તૂનાં શ્રાદ્ધમાપ્યાયનં યદિ ।
નિર્વાણસ્ય પ્રદીપસ્ય તૈલં સંવર્ધયેચ્છિખામ્ ॥ ૨,૧૦.૯॥

મૃતાશ્ચ પુરુષાઃ સ્વામિન્સ્વકર્મજનિતાં ગતિમ્ ।
ગાહન્તઃ કે કથં સ્વસ્ય સુતસ્ય શ્રેય આપ્નુયુઃ ॥ ૨,૧૦.૧૦॥

શ્રીભગવાનુવાચ ।
શ્રુતેઃ પ્રત્યક્ષતસ્તાર્ક્ષ્ય પ્રામાણ્યં બલવત્તરમ્ ।
શ્રુત્યા તુઃ બોધિતાર્થસ્ય પીયૂષત્વાદિરૂપતા ॥ ૨,૧૦.૧૧॥

નામગોત્રં પિતૃણાં વૈ પ્રાપકં હવ્યકવ્યયોઃ ।
શ્રાદ્ધસ્ય મન્ત્રાસ્તદ્વત્તુ પ્રાપકાશ્ચૈવ ભક્તિતઃ ॥ ૨,૧૦.૧૨॥

અચેતનાનિ ચૈતાનિ પ્રાપયન્તિ કથન્ત્વિતિ ।
સુપર્ણ નાવગન્તવ્યં પ્રાપકં વચ્મિ તેઽપરમ્ ॥ ૨,૧૦.૧૩॥

અગ્નિષ્વાત્તાદયસ્તેષા માધિપત્યે વ્યવસ્થિતાઃ ।
કાલે ન્યાયાગતં પાત્રે વિધિના પ્રતિપાદિતમ્ ॥ ૨,૧૦.૧૪॥

અન્નં નયન્તિ તત્રૈતે જન્તુર્યત્રાવતિષ્ઠતે ।
નામ ગોત્રઞ્ચ મન્ત્રાશ્ચ દત્તમન્નં નયન્તિ તે ॥ ૨,૧૦.૧૫॥

અપિ યોનિશતં પ્રાપ્તાંસ્તાંસ્તૃપ્તિરુપતિષ્ઠતિ ।
તેષાં લોકાન્તરસ્થાનાં વિવિધૈર્નામગોત્રકૈઃ ॥ ૨,૧૦.૧૬॥

અપસવ્યં ક્ષિતૌ દર્ભે દત્તાઃ પિણ્ડાસ્ત્રયસ્તુ વૈ ।
યાન્તિ તાંસ્તર્પયન્ત્યેવં પ્રેતસ્થાનસ્થિતાન્પિતૄન્ ॥ ૨,૧૦.૧૭॥

અપ્રાપ્તયાતનાસ્થાનાઃ શ્રેષ્ઠા યે ભુવિ પઞ્ચધા ।
નાનારૂપાસ્તુ જાતા યે તિર્યગ્યોન્યાદિજાતિષુ ॥ ૨,૧૦.૧૮॥

યદાહારા ભવન્ત્યેતે પિતરો યત્ર યોનિષુ ।
તાસુતાસુ તદાહારઃ શ્રાદ્ધા અવતિષ્ઠતિ ॥ ૨,૧૦.૧૯॥

યથા ગોષુ પ્રનષ્ટાસુ વત્સો વિન્દતિ માતરમ્ ।
તથાન્નં નયતે વિપ્ર જન્તુર્યત્રાવતિષ્ઠતે ॥ ૨,૧૦.૨૦॥

પિતરઃ શ્રાદ્ધમોક્તારો વિશ્વેર્દેવૈઃ સદા સહ ।
એતે શ્રાદ્ધં સદા ભુક્ત્વા પિતૄન્સન્તર્પયન્ત્યતઃ ॥ ૨,૧૦.૨૧॥

વસુરુદ્રાદિતિસુતાઃ પિતરઃ શ્રાદ્ધદેવતાઃ ।
પ્રીણયાતે મનુષ્યાણાં પિતૄઞ્શ્રાદ્ધેષુ તર્પિતાઃ ॥ ૨,૧૦.૨૨॥

આત્માનં ગુર્વિણી ગર્ભમપિ પ્રીણાતિ વૈ યથા ।

દોહદેન તથા દેવાઃ શ્રાદ્ધૈઃ સ્વાંશ્ચ પિતૄન્નૃણામ્ ॥ ૨,૧૦.૨૩॥

હૃષ્યન્તિ પિતરઃ શ્રુત્વા શ્રાદ્ધકાલમુપસ્થિતમ્ ।
અન્યોન્યં મનસા ધ્યાત્વા સમ્પતન્તિ મનોજવમ્ ॥ ૨,૧૦.૨૪॥

બ્રાહ્મણૈઃ સહ ચાશ્નન્તિ પિતરો હ્યન્તરિક્ષગાઃ ।
વાયુભૂતાશ્ચ તિષ્ઠન્તિ ભુક્ત્વા યાન્તિ પરાં ગતિમ્ ॥ ૨,૧૦.૨૫॥

નિમન્ત્રિતાસ્તુ યે વિપ્રાઃ શ્રાદ્ધપૂર્વદિનેઃ ખગ ।
પ્રવિશ્ય પિતરસ્તેષુ ભુક્ત્વા યાન્તિ સ્વમાલયમ્ ॥ ૨,૧૦.૨૬॥

શ્રાદ્ધકર્ત્રા તુ યદ્યેકઃ શ્રાદ્ધે વિપ્રો નિમન્ત્રિતઃ ।
ઉદરસ્થઃ પિતા તસ્ય વામપાર્શ્વે પિતામહઃ ॥ ૨,૧૦.૨૭॥

પ્રપિતામહો દક્ષિણતઃ પૃષ્ઠતઃ પિણ્ડભક્ષકઃ ।
શ્રાદ્ધકાલે યમઃ પ્રેતાન્પિતૄંશ્ચાપિ યમાલયાત્ ॥ ૨,૧૦.૨૮॥

વિસર્જયતિ માનુષ્યે નિરયસ્થાંશ્ચ કાશ્યપ ।
ક્ષુધાર્તાઃ કીર્તયન્તશ્ચ દુષ્કૃતઞ્ચ સ્વયઙ્કૃતમ્ ॥ ૨,૧૦.૨૯॥

કાઙ્ક્ષન્તિ પુત્રપૌત્રેભ્યઃ પાયસં મધુસંયુતમ્ ।
તસ્માત્તાંસ્તત્ર વિધિના તર્પયેત્પાયસેન તુ ॥ ૨,૧૦.૩૦॥

ગરુડ ઉવાચ ।
સ્વામિન્કેનાપિ તે દૃષ્ટા આગતાઃ પિતરો દ્વિજ ।
લોકાદમુષ્માદાગત્ય ભુઞ્જન્તો ભુવિ માનદ ॥ ૨,૧૦.૩૧॥

શ્રીભગવાનુવાચ ।
ગરુત્મઞ્છૃણુ વક્ષ્યામિ યથા દૃષ્ટાસ્તુ સીતયા ।
પિતરો વિપ્રદેહે વૈ શ્વશુરાદ્યાસ્ત્રયઃ ક્વચિત્ ॥ ૨,૧૦.૩૨॥

ગૃહીત્વા પિતુરાજ્ઞાં વૈ રામો વનમુપાગમત્ ।
તતઃ પુષ્કરયાત્રાર્થં રામોઽયાત્સીતયા સહ ॥ ૨,૧૦.૩૩॥

તીર્થં ચાપિ સમાગત્ય શ્રાદ્ધં પ્રારબ્ધ વાંસ્તુ સઃ ।
ફલં પક્વન્તુ જાનક્યા સિદ્ધં રામે નિવેદિતમ્ ॥ ૨,૧૦.૩૪॥

સ્નાતપ્રિયોક્તવાક્યાત્તુ સુસ્નાતા નમપાલયત્ ।
નભોમધ્યગતે સૂર્યે કાલે કુતુપ આગતે ॥ ૨,૧૦.૩૫॥

અયાતા ઋઃષયઃ સર્વે યે રામેણ નિમન્ત્રિતાઃ ।

તાન્મુનીનાગતાન્દૃષ્ટ્વા વૈદેહી જનકાત્મકા ॥ ૨,૧૦.૩૬॥

રામાજ્ઞયાન્નમાદાય પરિવેષ્ટુમુપાગતા ।
અપાસર્પત્તતો દૂરે વિપ્રમધ્યે તુ સંસ્થિતા ॥ ૨,૧૦.૩૭॥

ગુલ્મૈરાચ્છાદ્ય ચાત્માનં નિગૂઢં સા સ્થિતા તદા ।
એકાન્તે તુ તદા સીતાં જ્ઞાત્વા રાઘવનન્દનઃ ॥ ૨,૧૦.૩૮॥

વિમૃશ્ય સુચિરં કાલમિદં કિમિતિ સત્વરમ્ ।
કિઞ્ચિત્ક્વચિદ્ગતા સાધ્વી ત્રપાયાઃ કારણેન હિ ॥ ૨,૧૦.૩૯॥

કિં વા ન ભોજયન્વિપ્રાન્સી તામન્વેષયામ્યહમ્ ।
વિમૃશન્નેવમેવં સ સ્વયં વિપ્રાનભોજયત્ ॥ ૨,૧૦.૪૦॥

ગતેષુ દ્વિજમુખ્યેષુ પ્રિયાં રામોઽબ્રવીદિદમ્ ।
કથં તલાસુ લીના ત્વં મુનીન્દૃષ્ટ્વા સમાગતાન્ ॥ ૨,૧૦.૪૧॥

તત્સર્વં મમ તન્વઙ્ગિ કારણં વદ મા ચિરમ્ ।
એવમુક્તા તદા ભર્ત્રા સીતા સાધોમુખી સ્થિતા ।
મુઞ્ચન્તી ચાશ્રુસંઘાતં રાઘવં વાક્યમબ્રવીત્ ॥ ૨,૧૦.૪૨॥

સીતોવાચ ।
શ ૃણુ ત્વં નાથ યદ્દૃષ્ટમાશ્ચર્યમિહ યાદૃશમ્ ॥ ૨,૧૦.૪૩॥

પિતા તવ મયા દૃષ્ટો બ્રાહ્મણાગ્રે તુ રાઘવઃ ।
સર્વાભરણસંયુક્તોદ્વૌ ચાન્યૌ ચ તથાવિધૌ ॥ ૨,૧૦.૪૪॥

દૃષ્ટ્વા ત્વત્પિતરઞ્ચાહમપક્રાન્તા તવાન્તિકાત્ ।
વલ્કલાજિનસંવીતા કથં રાજ્ઞઃ પુરઃ પ્રભો ॥ ૨,૧૦.૪૫॥

ભવામિ રિપુવીરઘ્ન સત્યમેતદ્દુહાહૃતમ્ ।
સ્વહસ્તેન કથં દેયં રાજ્ઞે વા ભોજનં મયા ॥ ૨,૧૦.૪૬॥

દાસાનામપિ યે દાસા નોપભુઞ્જન્તિ કર્હિચિત્ ।
તૃણપાત્રે કથં તસ્મૈ અન્નં દાતું હિ શક્નુયામ્ ॥ ૨,૧૦.૪૭॥

યાહં રાજ્ઞા પુરા દૃષ્ટા સર્વાભરણભૂષિતા ।
સા સ્વેદમલદિગ્ધાઙ્ગી કથં યાસ્યામિ ભૂપતિમ્ ।
અપકૃષ્ટાસ્મિ તેનાહં ત્રપયા રઘુનન્દન ।
શ્રીભાગવાનુવાચ ॥ ૨,૧૦.૪૮॥

ઇતિ શ્રુત્વા પ્રિયાવાક્યં રામો વિસ્મિતમાનસઃ ॥ ૨,૧૦.૪૯॥

આશ્ચર્યમિતિ તજ્જ્ઞાત્વા તદા સ્વસ્થાનમાગમત્ ।
સીતયા પિતરો દૃષ્ટા યથા તત્તે નિવેદિતમ્ ॥ ૨,૧૦.૫૦॥

અપરં શ્રાદ્ધમાહાત્મ્યં કિઞ્ચિચ્છૃણુ સમાસતઃ ।
અમાવસ્યાદિને પ્રાપ્તે ગૃહદ્વારે સમાસ્થિતાઃ ॥ ૨,૧૦.૫૧॥

વાયુભૂતાઃ પ્રવાઞ્છન્તિ શ્રાદ્ધં પિતૃગણા નૃણામ્ ।
યાવદસ્તમયં ભાનોઃ ક્ષુત્પિપાસાસમાકુલાઃ ॥ ૨,૧૦.૫૨॥

તતશ્ચાસ્તં ગતે સૂર્યે નિરાશા દુઃખસંયુતાઃ ।
નિઃ શ્વસન્તશ્ચિરં યાન્તિ ગર્હયન્તસ્તુ વંશજમ્ ॥ ૨,૧૦.૫૩॥

તસ્માચ્છ્રાદ્ધં પ્રયત્નેન અમાયાં કર્તુમર્હતિ ।
યદિ શ્રાદ્ધં પ્રકુર્વન્તિ પુત્રાદ્યાસ્તસ્ય બાન્ધવાઃ ॥ ૨,૧૦.૫૪॥

ઉદ્ધૃતા યે ગયાશ્રાદ્ધે બ્રહ્મલોકઞ્ચ તૈઃ સહ ।
ભજન્તે ક્ષુત્પિપાસા વા ન તેષાં જાયતે ક્વચિત્ ॥ ૨,૧૦.૫૫॥

તસ્માચ્છ્રાદ્ધં પ્રયત્નેન સમ્યક્કુર્યાદ્વિચક્ષણઃ ।
તસ્માચ્છ્રાદ્ધં ચરેદ્ભક્ત્યા શાકૈરપિ યથાવિધિ ॥ ૨,૧૦.૫૬॥

કુર્વીત સમયે શ્રાદ્ધં કુલે કશ્ચિન્ન સીદતિ ।
આયુઃ પુત્રાન્યશઃ સ્વર્ગં કીર્તિં પુષ્ટિં બલં શ્રિયમ્ ॥ ૨,૧૦.૫૭॥

પશૂન્સૌરવ્યં ધનં ધાન્યં પ્રાપ્નુયાત્પિતૃપૂજનાત્ ।
દેવકાર્યાદપિ સદા પિતૃકાર્યં વિશિષ્યતે ॥ ૨,૧૦.૫૮॥

દેવતાભ્યઃ પિતૃણાં હિ પૂર્વમાપ્યાયનં શુભમ્ ।
યે યજન્તિ પિતૃન્દેવાન્બ્રાહ્મણાંશ્ચ હુતાશનમ્ ॥ ૨,૧૦.૫૯॥

સર્વભૂતાન્તરાત્માનં મામેવ હિ યજન્તિ તે ।
સ્માર્તેન વિધિના શ્રાદ્ધં કૃત્વા સ્વવિભવોચિતમ્ ॥ ૨,૧૦.૬૦॥

આબ્રાહ્મસ્તમ્બપર્યન્તં જગત્પ્રીણાતિ માનવઃ ।
અન્નપ્રકિરણં યત્તુ મનુષ્યૈઃ ક્રિયતે ભુવિ ॥ ૨,૧૦.૬૧॥

તેન તુપ્તિમુપાયાન્તિ યે પિશાચત્વમાગતાઃ ।
યચ્ચામ્બુઃ સ્નાનવસ્ત્રેભ્યો ભૂમૌ પતતિ ખેચર ॥ ૨,૧૦.૬૨॥

તેન યે તરુતાં પ્રાપ્તાસ્તેષાં તૃપ્તિઃ પ્રજાયતે ।
યાનિ ગન્ધામ્બૂનિ ચૈવ પતન્તિ ધરણીતલે ॥ ૨,૧૦.૬૩॥

તેન ચાપ્યાયનં તેષાં યે દેવત્વમુપાગતાઃ ।
યે ચાપિ સ્વકુલાદ્બાહ્યાઃ ક્રિયાયોગ્યા હ્યસંસ્કૃતાઃ ॥ ૨,૧૦.૬૪॥

વિપન્નાસ્તે તુ વિકિરસમાર્જનજલાશિનઃ ।
ભુક્ત્વા ચાચમનં યચ્ચ જલં યચ્ચાઙ્ઘ્રિ સેવિતમ્ ॥ ૨,૧૦.૬૫॥

બ્રાહ્મણાનાં તથૈવાન્યત્તેન તૃપ્તિં પ્રયાન્તિ વૈ ।
પિશાચત્વમનુપ્રાપ્તાઃ કૃમિકીટત્વમેવ યે ॥ ૨,૧૦.૬૬॥

ઉદ્ધૃતેષ્વન્નપિણ્ડેષુ ભુવિ યે ચાન્નકાઙ્ક્ષિણઃ ।
તૈરેવાપ્યાયનં તેષાં યે મનુષ્યત્વમાગતાઃ ॥ ૨,૧૦.૬૭॥

એવં વૈ ક્રિયમાણાનાં તેષાં ચૈવ દ્વિજન્મનામ્ ।
કશ્ચિજ્જલાન્નવિક્ષેપઃ શુચિરુચ્છિષ્ટ એવ વા ॥ ૨,૧૦.૬૮॥

તેનાન્નેન કુલે તેષાં યે વૈ જાત્યન્તરં ગતાઃ ।
ભવત્યાપ્યાયનં તેષાં સમ્યક્શ્રાદ્ધે કૃતે સતિ ॥ ૨,૧૦.૬૯॥

અન્યાયોપાર્જિતૈર્દ્રવ્યૈર્યચ્છ્રાદ્ધં ક્રિયતે નરૈઃ ।
તતૃપ્યન્તિ તેન ચણ્ડાલાઃ પુક્કસાદ્યુપયોનિષુ ॥ ૨,૧૦.૭૦॥

એવં સમ્પ્રાપ્યતે પક્ષિન્યદ્દત્તમિહ બાન્ધવૈઃ ।
શ્રાદ્ધં કુર્વદ્ભિરન્નામ્વુશાકૈસ્તૃપ્તિર્હિ જાયતે ॥ ૨,૧૦.૭૧॥

એતત્તે સર્વમાખ્યાતં યન્માં ત્વં પરિપૃચ્છસિ ।
સદ્યો દેહાન્તરપ્રાપ્તિર્વિલંબેનાવનીતલે ॥ ૨,૧૦.૭૨॥

પૃષ્ટવાનસિ તત્તેઽહં પ્રવક્ષ્યામિ સમાસતઃ ।
સદ્યો વિલમ્બતશ્ચૈવોભયથાપિ કલેવરમ્ ॥ ૨,૧૦.૭૩॥

યતો હિ મર્ત્યઃ પ્રાપ્નોતિ તદ્વિશેષઞ્ચ મે શ◌ૃણુ ।
અધૂમકજ્યોતિરિવાઙ્ગુષ્ઠમાત્રઃ પુમાંસ્તતઃ ॥ ૨,૧૦.૭૪॥

દેહમેકં સદ્ય એવ વાયવીયં પ્રપદ્યતે ।
યથા નૃણજલૌકા હિ પશ્ચાત્પાદં તદોદ્ધરેત્ ॥ ૨,૧૦.૭૫॥

સ્થિતિરગ્ર્યસ્ય પાદસ્ય યદા જાતા દૃઢા ભવેત્ ।
એવં દેહી પૂર્વદેહં સમુત્સૃજતિ તં યદા ॥ ૨,૧૦.૭૬॥

ભોગાર્થમગ્રે સ્યાદ્દેહો વાયવીય ઉપસ્થિતઃ ।
વિષયગ્રાહકં યદ્વન્મ્રિયમાણસ્ય ચેન્દ્રિયમ્ ॥ ૨,૧૦.૭૭॥

નિર્વ્યાપારં તચ્ચ દેહે વાયુનૈવ સ ગચ્છતિ ।
શરીરં યદવાપ્નોતિ તચ્ચાપ્યુત્ક્રમ્યતિ સ્વયમ્ ॥ ૨,૧૦.૭૮॥

ગૃહીત્વા સ્વં વિનિર્યાતિ જીવો ગર્ભ ઈવાશયાત્ ।
ઉત્ક્રામન્તં સ્થિતં વાપિ ભુઞ્જાનં વા ગુણાન્વિતમ્ ॥ ૨,૧૦.૭૯॥

વિમૂઢા નાનુપશ્યન્તિ પશ્યન્તિ જ્ઞાનચક્ષુષઃ ।
આતિવાહિકમિત્યેવં વાયવીયં વદન્તિ હિ ॥ ૨,૧૦.૮૦॥

એવં તુ યાતુધાનાનાં તમેવ ચ વદન્તિ હિ ।
સુપર્ણ ઈદૃશો દેહો નૃણાં ભવતિ પિણ્ડજઃ ॥ ૨,૧૦.૮૧॥

પુત્રાદિભિઃ કૃતાશ્ચેત્સ્યુઃ પિણ્ડા દશ દશાહિકાઃ ।
પિણ્ડજેન તુ દેહેન વાયુજશ્ચૈકતાં વ્રજેત્ ॥ ૨,૧૦.૮૨॥

પિણ્ડજો યદિ નૈવ સ્યાદ્વાયુજોઽર્હતિ યાતનામ્ ।
દેહિનોઽસ્મિન્યથા દેહે કૌમારં યૌવનં જરા ।
તથા દેહાન્તરપ્રાપ્તિઃ પક્ષીન્દ્રેત્યવધારય ॥ ૨,૧૦.૮૩॥

વાસાંસિ જીર્ણાનિ યથા વિહાય નવાનિ ગૃહ્ણાતિ નરોપરાણિ ।
તથા શરીરાણિ વિહાય જીર્ણાન્યન્યાનિ સંયાતિ નવાનિ દેહી ॥ ૨,૧૦.૮૪॥

નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહતિ પાવકઃ ।
ન ચૈનં ક્લેદયન્ત્યાપો ન શોષયતિ મારુતઃ ॥ ૨,૧૦.૮૫॥

વાયવીયાં તનું યાતિ સદ્ય ઇત્યુક્તમેવ તે ।
પ્રાપ્તિર્વિલંબતો યસ્ય તં દેહં ખલુ મે શૃણુ ॥ ૨,૧૦.૮૬॥

ક્વચિદ્વિલંબતો દેહં પિણ્ડજં સ સમાપ્નુયાત્ ।
અથો ગતો યામ્યલોકં સ્વીયકર્માનુસારતઃ ॥ ૨,૧૦.૮૭॥

ચિત્રગુપ્તસ્યવાક્યેન નિરયાણિ ભુનક્તિ સઃ ।
યાતનાઃસમવાપ્યાથ પશુપક્ષ્યાદિકીં તનુમ્ ॥ ૨,૧૦.૮૮॥

યા ગૃહ્ણાતિ નરઃ સા સ્યાન્મોહેન મમતાસ્પદમ્ ।
શુભાશુભં કર્મફલં ભુક્ત્વા મુચ્યતે માનવઃ ॥ ૨,૧૦.૮૯॥

ગરુડ ઉવાચ ।
તીર્ત્વા દુઃખભવામ્ભોધિં ભવન્તં કથમાપ્નુયાત્ ।
બહુપાતકયુક્તોઽપિ તદ્વદસ્વ દયાનિધે ॥ ૨,૧૦.૯૦॥

ભૂયો દુઃખસ્ય સંસર્ગો નરસ્ય ન ભવેદ્યથા ।
બ્રૂહિ શુશ્રૂષમાણસ્ય પૃચ્છતો મે રમાપતે ॥ ૨,૧૦.૯૧॥

શ્રીકૃષ્ણ ઉવાચ ।
સ્વેસ્વે કર્મણ્યભિરતઃ સંસિદ્ધિં લભતે નરઃ ।
સ્વકર્મનિરતઃ સિદ્ધિં યથા વિન્દતિ તચ્છૃણુ ॥ ૨,૧૦.૯૨॥

કર્મવિભ્રષ્ટકાલુષ્યો વાસુદેવાનુચિન્તયા ।
બુદ્ધ્યા વિશુદ્ધયા યુક્તો ધૃત્યાત્માનં નિયમ્ય ચ ॥ ૨,૧૦.૯૩॥

શબ્દાદીન્વિષયાંસ્ત્યક્ત્વા રાગદ્વેષૌ વ્યુદસ્ય ચ ।
વિરક્તસેવી લબ્ધ્વાશી યતવાક્કાયમાનસઃ ॥ ૨,૧૦.૯૪॥

ધ્યાનયોગપરો નિત્યં વૈરગ્યં સમુપાશ્રિતઃ ।
અહઙ્કારં બલં દર્પં કામં ક્રોધં પરિગ્રહમ્ ॥ ૨,૧૦.૯૫॥

વિમુચ્ય નિર્મમઃ શાન્તો બ્રહ્મભૂયાય કલ્પતે ।
અતઃ પરં નૃણાં કૃત્યં નાસ્તિ કશ્યપનન્દન ॥ ૨,૧૦.૯૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીદૃધર્મદૃપ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે શ્રાદ્ધસ્ય તૃપ્તિદત્વાદિનિરૂપણં નામ દશમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧
ગરુડ ઉવાચ ।
માનુષત્વં લભેત્કસ્માન્મૃત્યુમાપ્નોતિ તત્કથમ્ ।
મ્રિયતે કઃ સુરશ્રેષ્ઠ દેહમાશ્રિત્ય કુત્રચિત્ ॥ ૨,૧૧.૧॥

ઇન્દ્રિયાણિ કુતો યાન્તિ હ્યસ્પૃશ્યઃ સ કથં ભવેત્ ।
ક્વ કર્માણિ કૃતાનીહ કથં ભુઙ્ક્તે પ્રસર્પતિ ॥ ૨,૧૧.૨॥

પ્રસાદં કુરુ મે મોહં છેત્તુમર્હસ્યશેષતઃ ।
કાશ્યપોઽહં સુરશ્રેષ્ઠ વિનતાગર્ભ સંભવઃ ।
યમલોકં કથં યાન્તિ વિષ્ણુલોકં ચ માનવાઃ ॥ ૨,૧૧.૩॥

શ્રીકૃષ્ણ ઉવાચ ।
પરસ્ય યોષિતં હૃત્વા બ્રહ્મસ્વમપહૃત્ય ચ ॥ ૨,૧૧.૪॥

અરણ્યે નિર્જને દેશે જાયતે બ્રહ્મરાક્ષસઃ ।
હીનજાતૌ પ્રજાયેત રત્નાનામપહારકઃ ॥ ૨,૧૧.૫॥

યંયં કામમભિધ્યાયેત્સ તલ્લિઙ્ગોઽભિજાયતે ।
નૈનં છિન્દન્તિ શસ્ત્રાણિ નૈનં દહતિ પાવકઃ ॥ ૨,૧૧.૬॥

ન ચૈનં ક્લેદયન્ત્યાપો ન શોષયતિ મારુતઃ ।
વાક્ચક્ષુર્નાસિકા કર્ણૌ ગુદં મૂત્રસ્ય સઞ્ચરઃ ॥ ૨,૧૧.૭॥

અણ્ડજાદિકજન્તૂનાં છિદ્રાણ્યેતાનિ સર્વશઃ ।
આનાભેર્મૂર્ધપર્યન્તમૂર્ધ્વચ્છિદ્રાણિ ચાષ્ટ વૈ ॥ ૨,૧૧.૮॥

સન્તઃ સુકૃતિનો મર્ત્યા ઊર્ધ્વચ્છિદ્રેણ યાન્તિ વૈ ।
મૃતાહે વાર્ષિકં યાવદ્યથોક્તવિધિના ખગ ॥ ૨,૧૧.૯॥

કુર્યાત્સર્વાણિ કર્માણિ નિર્ધનોઽપિ હિ માનવઃ ।
દેહે યત્ર વસેજ્જન્તુસ્તત્ર ભુઙ્ક્તે શુભાશુભમ્ ॥ ૨,૧૧.૧૦॥

મનોવાક્કાયજાન્દોષાંસ્તથાં ભુઙ્ક્તે ખગેશ્વર ।
મૃતઃ સ સુખમાપ્નોતિ માયાપાશૈર્ન બધ્યતે ।
પાશબદ્ધો નરો યસ્તુ વિકર્મનિરતો ભવેત્ ॥ ૨,૧૧.૧૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાહે ઊર્ધ્વાધોગતિજ્ઞાપકોત્ક્રમણદ્વારનિરૂપણં નામૈકાદશોઽધ્યાઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨
શ્રીકૃષ્ણ ઉવાચ ।
એવં તે કથિતસ્તાર્ક્ષ્ય જીવિતસ્ય વિનર્ણયઃ ।
માનુષાણાં હિતાર્થાય પ્રેતત્વવિનિવૃત્તયે ॥ ૨,૧૨.૧॥

ચતુરશીતિલક્ષાણિ ચતુર્ભેદાશ્ચ જન્તવઃ ।
અણ્ડજાઃ સ્વેદજાશ્ચૈવ ઉદ્ભિજ્જાશ્ચ જારાયુજાઃ ॥ ૨,૧૨.૨॥

એકવિંશતિલક્ષાણિ અણ્ડજાઃ પરિકીર્તિતાઃ ।
સ્વેદજાશ્ચ તથા પ્રોક્તા ઉદ્ભિજ્જાશ્ચ ક્રમેણ તુ ॥ ૨,૧૨.૩॥

જરાયુજાસ્તથા પ્રોક્તા મનુષ્યાદ્યાસ્તથા પરે ।
સર્વેષામેવ જન્તૂનાં માનુષત્વં હિ દુર્લભમ્ ॥ ૨,૧૨.૪॥

પઞ્ચેન્દ્રિયનિધાનત્વં મહાપુણ્યૈરવાપ્યતે ।
બ્રાહ્મણાઃ ક્ષત્રિયા વૈશ્યાઃ શૂદ્રાસ્તત્પરજાતયઃ ॥ ૨,૧૨.૫॥

રજકશ્ચર્મકારશ્ચ નટો બુરુડ એવ ચ ।
કૈવર્તમેદભિલ્લાશ્ચ સપ્તૈતે હ્યન્ત્યજાઃ સ્મૃતાઃ ॥ ૨,૧૨.૬॥

મ્લેચ્છતુમ્બવિભેદેન જાતિભેદાસ્ત્વનેકશઃ ।
જન્તૂનામેવ સર્વેષાં જાતિભેદાઃ સહસ્રશઃ ॥ ૨,૧૨.૭॥

જન્તૂનામેવ સર્વેષાં ભેદાશ્ચૈવ સહસ્રશઃ ।
આહારો મૈથુનં નિદ્રા ભયં ક્રોધસ્તથૈવ ચ ॥ ૨,૧૨.૮॥

સર્વેષા મેવ જન્તૂનાં વિવેકો દુર્લભઃ પરઃ ।
એકપાદાદિરૂપેણ દેહભેદાસ્ત્વનેકશઃ ॥ ૨,૧૨.૯॥

કૃષ્ણસારો મૃગો યત્ર ધર્મદશઃ સ ઉચ્યતે ।
બ્રહ્માદ્યા દેવતાઃ સર્વાસ્તત્ર તિષ્ઠન્તિ સર્વશઃ ॥ ૨,૧૨.૧૦॥

ભૂતાનાં પ્રાણિનઃ શ્રેષ્ઠાઃ પ્રાણિનાં મતિજીવિનઃ ।
મતિમત્સુ નરાઃ શ્રેષ્ઠા નરેષુ બ્રાહ્મણાઃ સ્મૃતાઃ ॥ ૨,૧૨.૧૧॥

માનુષ્યં યઃ સમાસાદ્ય સ્વર્ગમેક્ષૈકસાધકમ્ ।
તયોર્ન સાધયેદેકં તેનાત્મા વઞ્ચિતો ધ્રુવમ્ ॥ ૨,૧૨.૧૨॥

ઇચ્છતિ શતી સહસ્રં સહસ્રી લક્ષમીહતે કર્તુમ્ ।
લક્ષાધિપતી રાજ્યં રાજાપિ સકલાં ધરાં લબ્ધુમ્ ॥ ૨,૧૨.૧૩॥

ચક્રધરોઽપિ સુરત્વં સુરભાવે સકલસુરપતિર્ભવિતુમ્ ।
સુરપતિરૂર્ધ્વગતિત્વં તથાપિ નનિવર્તતે તૃષ્ણા ॥ ૨,૧૨.૧૪॥

તૃષ્ણયા ચાભિભૂતસ્તુ નરકં પ્રતિપદ્યતે ।
તૃષ્ણામુક્તાસ્તુ યે કેચિત્સ્વર્ગવાસં લભન્તિ તે ॥ ૨,૧૨.૧૫॥

આત્માધીનઃ પુમાંલ્લોકે સુખી ભવતિ નિશ્ચિતમ્ ।
શબ્દઃ સ્પર્શશ્ચ રૂપં ચ રસો ગન્ધશ્ચ તદ્ગુણાઃ ॥ ૨,૧૨.૧૬॥

તથા ચ વિષયાધીનો દુઃખી ભવતિ નિશ્ચિતમ્ ॥ ૨,૧૨.૧૭॥

કુરઙ્ગમતાઙ્ગપતઙ્ગભૃઙ્ગમીના હતાઃ પઞ્ચભિરેવ પઞ્ચ ।
એકઃ પ્રમાદી સ કથં ન હન્યતે યઃ સેવતે પઞ્ચભિરેવ પઞ્ચ ॥ ૨,૧૨.૧૮॥

પિતૃમાતૃમયો બાલ્યે યૌવને દયિતામયઃ ।
પુત્રપૌત્રમયશ્ચાન્તે મૂઢો નાત્મમયઃ ક્વચિત્ ॥ ૨,૧૨.૧૯॥

લોહદારુમયૈઃ પાશૈઃ પુમાન્બદ્ધો વિમુચ્યતે ।
પુત્રદારમયૈઃ પાશૈર્નૈવ બદ્ધો વિમુચ્યતે ॥ ૨,૧૨.૨૦॥

એકઃ કરોતિ પાપાનિ ફલં ભુઙ્ક્તે મહાજનઃ ।
ભોક્તારો વિપ્રયુજ્યન્તે કર્તા દોષેણ લિપ્યતે ॥ ૨,૧૨.૨૧॥

કોઽપિ મૃત્યું ન જયતિ બાલો વૃદ્ધો યુવાપિ વા ।
સુખદુઃખાદિકો વાપિ પુનરાયાતિ યાતિ ચ ॥ ૨,૧૨.૨૨॥

સર્વેષાં પશ્યતામેવ મૃતઃ સર્વં પરિત્યજેત્ ।
એકઃ પ્રજાયતે જન્તુરેક એવ પ્રલીયતે ॥ ૨,૧૨.૨૩॥

એકોઽપિ ભુઙ્ક્તે સુકૃતમેક એવ ચ દુષ્કૃતમ્ ।
મૃતં શરીરમુત્સૃજ્ય કાષ્ઠલોષ્ટસમક્ષિતૌ ॥ ૨,૧૨.૨૪॥

બાન્ધવા વિમુખા યાન્તિ ધર્મસ્તમનુગચ્છતિ ।
ગૃહેષ્વર્થા નિવર્તન્તે શ્મશાનાન્મિત્રબાન્ધવાઃ ॥ ૨,૧૨.૨૫॥

શરીરં વહ્નિરાદત્તે સુકૃતં દુષ્કૃતં વ્રજેત્ ।
શરીરં વહ્નિના દગ્ધં પુણ્યં પાપં સહ સ્થિતમ્ ॥ ૨,૧૨.૨૬॥

શુભં વા યદિ વા પાપં ભુઙ્ક્તે સર્વત્ર માનવઃ ।
યદનસ્તમિતે સૂર્યે ન દત્તં ધનમર્થિનામ્ ॥ ૨,૧૨.૨૭॥

ન જાને તસ્ય તદ્વિત્તં પ્રાતઃ કસ્ય ભવિષ્યતિ ।
રારટીતિ ધનં તસ્ય કો મે ભર્તા ભવિષ્યતિ ॥ ૨,૧૨.૨૮॥

ન દત્તં દ્વિજમુખ્યેભ્યઃ પરોપકૃતયે તથા ।
પૂર્વજન્મકૃતાત્પુણ્યાદ્યલ્લબ્ધં બહુ ચાલ્પકમ્ ॥ ૨,૧૨.૨૯॥

તદીદૃશં પરિજ્ઞાય ધર્માર્થે દીયતે ધનમ્ ।
ધનેન ધાર્યતે ધર્મઃ શ્રદ્ધાપૂતેન ચેતસા ॥ ૨,૧૨.૩૦॥

શ્રદ્ધાવિરહિતો ધર્મો નેહામુત્ર ચ તત્ફલમ્ ।
ધર્માચ્ચ જાયતે હ્યર્થો ધર્માત્કામોઽપિ જાયતે ॥ ૨,૧૨.૩૧॥

ધર્મ એવાપવર્ગાય તસ્માદ્ધર્મં સમાચરેત્ ।
શ્રદ્ધયા સાધ્યતે ધર્મો બહુભિર્નાર્થરાશિભિઃ ॥ ૨,૧૨.૩૨॥

અકિઞ્ચના હિ મુનયઃ શ્રદ્ધાવન્તો દિવં ગતાઃ ।
અશ્રદ્ધયા હુતં દત્તં તપસ્તમં કૃતં ચ યત્ ।
અસદિત્યુચ્યતે પક્ષિન્પ્રેત્ય ચેહ ન તત્ફલમ્ ॥ ૨,૧૨.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાદ્પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે મૃતસ્ય ધર્મમાત્રાનુયાયિત્વનિરૂપણં નામ દ્વાદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩
ગરુડ ઉવાચ ।
કર્મણા કેન દેવેશ પ્રેતત્વં નૈવ જાયતે ।
પૃથિવ્યાં સર્વજન્તૂનાં તદ્બ્રૂહિ પરમેશ્વર ॥ ૨,૧૩.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
અથ વક્ષ્યામિ સંક્ષેપાત્ક્ષયાહાદૌર્ધ્વદૈહિકમ્ ।
ક્વહસ્તેનૈવ કર્તવ્યં મોક્ષકામૈસ્તુ માનવૈઃ ॥ ૨,૧૩.૨॥

સ્ત્રીણામપિ વિશેષેણ પઞ્ચવર્ષાધિકે શિશૌ ।
વૃષોત્સર્ગાદિકં કર્મ પ્રેતત્વવિનિવૃત્તયે ।
વૃષોત્સર્ગાદૃતે નાન્યત્કિઞ્ચિદસ્તિ મહીતલે ॥ ૨,૧૩.૩॥

જીવન્વાપિ મૃતો વાપિ વૃષોત્સર્ગં કરોતિ યઃ ।
પ્રેતત્વં ન ભવેત્તસ્ય વિના દાનમખવ્રતૈઃ ॥ ૨,૧૩.૪॥

ગરુડ ઉવાચ ।
કસ્મિન્કાલે વૃષોત્સર્ગં જીવન્વાપિ મૃતોઽપિ વા ।
કુર્યાત્સુરવરશ્રેષ્ઠ બ્રૂહિ મે મધુસૂદન ॥ ૨,૧૩.૫॥

કિં ફલં તુ ભવેદન્તે કૃતૈઃ શ્રાદ્ધૈસ્તુ ષોડશૈઃ ॥ ૨,૧૩.૬॥

શ્રીકૃષ્ણ ઉવાચ ।
અકૃત્વા તુ વૃષોત્સર્ગં કુરુતે પિણ્ડપાતનમ્ ।
નોપતિષ્ઠતિ તચ્છ્રેયો દાતુઃ પ્રેતસ્ય નિષ્ફલમ્ ॥ ૨,૧૩.૭॥

એકાદશાહે પ્રેતસ્ય યસ્ય નોત્સૃજ્યતે વૃષઃ ।

પ્રેતત્વં સુસ્થિરં તસ્ય દત્તૈઃ શ્રાદ્ધશતૈરપિ ॥ ૨,૧૩.૮॥

ગરુડ ઉવાચ ।
સર્પાદ્ધિ પ્રાપ્તમૃત્યૂનામગ્નિદાહાદિ ન ક્રિયા ।
જલેન શ ृङ्गિણા વાપિ શસ્ત્રાદ્યૈર્મ્રિયતે યદિ ॥ ૨,૧૩.૯॥

અસન્મૃત્યુમૃતાનાં ચ કથં શુદ્ધિર્ભવત્પ્રભો ।
એતન્મે સંશયં દેવ ચ્છેત્તુમર્હસ્યશેષતઃ ॥ ૨,૧૩.૧૦॥

શ્રીકૃષ્ણ ઉવાચ ।
ષણ્માસૈર્બ્રાહ્મણઃ શુધ્યેદ્યુગ્મે સાર્ધે તુ બાહુજઃ ।
સાર્ધમાસેન વૈશ્યસ્તુ શૂદ્રો માસેન શુધ્યતિ ॥ ૨,૧૩.૧૧॥

દત્ત્વા દાનાન્યશેષાણિ સુતીર્થે મ્રિયતે યદિ ।
બ્રહ્મચારી શુચિર્ભૂત્વા ન સ યાતીહ દુર્ગતિમ્ ॥ ૨,૧૩.૧૨॥

વૃષોત્સર્ગાદિકં કૃત્વા યતિધર્મં સમાચરેત્ ।
યતિત્વે મૃત્યુમાપ્નોતિ સ ગચ્છેદ્બ્રહ્મશાખ્વતમ્ ॥ ૨,૧૩.૧૩॥

વિકર્મ કુરુતે યસ્તુ શિષ્ટાચારવિવર્જિતઃ ।
વૃષોત્સર્ગાદિકં કૃત્વા ન ગચ્છેદ્યમશાસનમ્ ॥ ૨,૧૩.૧૪॥

પુત્રો વા સોદરો વાપિ પૌત્રો બન્ધુજનસ્તથા ।
ગોત્રિણશ્ચાર્થભાગી ચ મૃતે કુર્યાદ્વૃષોત્સવમ્ ॥ ૨,૧૩.૧૫॥

પુત્રાભાવે તુ પત્ની સ્યાદ્દૌહિત્રો દુહીતાપિ વા ।
પુત્રેષુ વિદ્યમાનેષુ વૃષં નાન્યેન કારયેત્ ॥ ૨,૧૩.૧૬॥

ગરુડ ઉવાચ ।
પુત્રા યસ્ય ન વિદ્યન્તે નરા નાર્યઃ સુરેશ્વર ।
એતન્મે સંશયં દેવ ચ્છેતુમર્હસ્યશેષતઃ ॥ ૨,૧૩.૧૭॥

શ્રીકૃષ્ણ ઉવાચ ।
અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગો નૈવ ચ નૈવ ચ ।
તસ્માત્કેનાપ્યુપાયેન પુત્રસ્ય જનનં ચરેત્ ॥ ૨,૧૩.૧૮॥

યાનિ કાનિ ચ દાનાનિ સ્વયં દત્તાનિ માનવૈઃ ।
તાનિતાનિ ચ સર્વાણિ તૂપતિષ્ઠન્તિ ચાગ્રતઃ ॥ ૨,૧૩.૧૯॥

વ્યઞ્જનાનિ વિચિત્રાણિ ભક્ષ્યભોજ્યાનિ યાનિ ચ ।

સ્વહસ્તેન પ્રદત્તાનિ દેહાન્તે ચાક્ષયં ફલમ્ ॥ ૨,૧૩.૨૦॥

ગોભૂહિરણ્યવાસાંસિ ભોજનાનિ પાદનિ ચ ।
યત્રયત્ર વસેજ્જન્તુસ્તત્રતત્રોપતિષ્ઠતિ ॥ ૨,૧૩.૨૧॥

યાવત્સ્વસ્થં શરીરં હિ તાવદ્ધર્મં સમાચરેત્ ।
અસ્વસ્થઃ પ્રેરિતશ્ચાન્યૈર્નાકિઞ્ચિત્કર્તુમર્હતિ ॥ ૨,૧૩.૨૨॥

જીવતોઽપિ મૃતસ્યેહ ન ભૂતં ચૌર્ધ્વદૈહિકમ્ ।
વાયુભૂતઃ ક્ષુધાવિષ્ટો ભ્રમતે ચ દિવાનિશમ્ ॥ ૨,૧૩.૨૩॥

કૃમિઃ કીટઃ પતઙ્ગો વા જાયતે મ્રિયતે પુનઃ ।
અસદ્ગર્ભે ભવેત્સોઽપિ જાતઃ સદ્યો વિનશ્યતિ ॥ ૨,૧૩.૨૪॥

યાવત્સ્વસ્થમિદં શરીરમરુજં યાવજ્જરા દૂરતો યાવચ્ચેન્દ્રિયશક્તિરપ્રતિહતા યાવત્ક્ષયો નાયુષઃ ।
આત્મશ્રેયસિ તાવદેવ વિદુષા કાર્યઃ પ્રયત્નો મહાન્સન્દીપ્તે ભવને
તુ કૂપખનનં પ્રત્યુદ્યમઃ કીદૃશઃ ॥ ૨,૧૩.૨૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે વૃષોત્સર્ગદાનધર્મપુત્રાદિપ્રશંસનં નામ ત્રયોદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪
ગરુડ ઉવાચ ।
આર્તેન મ્રિયમાણેન યદ્દત્તં તત્ફલં વદ ।
સ્વસ્થાવસ્થેન દત્તેન વિધિહીનેન વા વિભો ॥ ૨,૧૪.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
એકા ગૌઃ સ્વસ્થચિત્તસ્ય હ્યાતુરસ્ય ચ ગોશતમ્ ।
સહસ્રં મ્રિયમાણસ્ય દત્તં વિત્તવિવર્જિતમ્ ॥ ૨,૧૪.૨॥

મૃતસ્યૈવ પુનર્લક્ષં વિધિપૂતં ચ તત્સમમ્ ।
તીર્થપાત્રસમાયોગાદેકા ગૌર્લક્ષપુણ્યદા ॥ ૨,૧૪.૩॥

પાત્રે દત્તે ખગશ્રેષ્ઠ અહન્યહનિ વર્ધતે ।
દાતુર્દાનમપાપાય જ્ઞાનિનાં ચ પ્રતિગ્રહઃ ॥ ૨,૧૪.૪॥

વિષશીતાપહો મન્ત્રવહ્નિઃ કિં દોષભાજનમ્ ।
દાતવ્યં પ્રત્યહં પાત્રે નિમિત્તેષુ વિશેષતઃ ॥ ૨,૧૪.૫॥

નાપાત્રે વિદુષા કિઞ્ચિદાત્મનઃ શ્રેય ઇચ્છતા ।
અપાત્રે જાતુ ગૌર્દત્તા દાતારં નરકં નયેત્ ॥ ૨,૧૪.૬॥

કુલૈકવિંશતિયુતં ગ્રહીતારં ચ પાતયેત્ ।
દેહાન્તરં પરિપ્રાપ્ય સ્વહસ્તેન કૃતં ચ યત્ ॥ ૨,૧૪.૭॥

ધનં ભૂમિગતં યદ્વત્સ્વહસ્તેન નિવેશિતમ્ ।
તદ્વત્ફલમવાપ્નોતિ હ્યહં વચ્મિ ખગેશ્વર ॥ ૨,૧૪.૮॥

અપુત્રોઽપિ વિશેષેણ ક્રિયાં ચૈવાન્ધ્વદૌહિકીમ્ ।
પ્રકુર્યાન્મોક્ષકામશ્ચ નિર્ધનશ્ચ વિશેષતઃ ॥ ૨,૧૪.૯॥

સ્વલ્પેનાપિ હિ વિત્તેન સ્વયં હસ્તેન યત્કૃતમ્ ।
અક્ષયં યાતિ તત્સર્વં યથાજ્યં ચ હુતાશને ॥ ૨,૧૪.૧૦॥

એકા ચૈકસ્ય દાતવ્યા શય્યા કન્યા પયસ્વિની ।
સા વિક્રીતા વા દહત્યાસપ્તમં કુલમ્ ॥ ૨,૧૪.૧૧॥

તસ્માત્સર્વં પ્રકુર્વીત ચઞ્ચલે જીવિતે સતિ ।
ગૃહીતદાનપાથેયઃ સુખં યાતિ મહાધ્વનિ ॥ ૨,૧૪.૧૨॥

અન્યથા ક્લિશ્યતે જન્તુઃ પાથેયરહિતઃ પથિ ।
એવં જ્ઞાત્વા ખગશ્રેષ્ઠ વૃષયજ્ઞં સમાચરેત્ ॥ ૨,૧૪.૧૩॥

અકૃત્વા મ્રિયતે યસ્તુ અપુત્રો નૈવ મુક્તિભાક્ ।
અપુત્રોઽપિ હિ યઃ કુર્યાત્સુખં યાતિ મહાપથે ॥ ૨,૧૪.૧૪॥

અગ્નિહોત્રાધિભિર્યજ્ઞૈર્દાનૈશ્ચ વિવિધૈરપિ ।
ન તાં ગતિમવાપ્નોતિ વૃષોત્સર્ગેણ યા ગતિઃ ॥ ૨,૧૪.૧૫॥

યજ્ઞાનાં ચૈવ સર્વેષાં વૃષયજ્ઞસ્તથોત્તમઃ ।
તસ્માત્સર્વપ્રયત્નેન વૃષયજ્ઞં સમાચરેત્ ॥ ૨,૧૪.૧૬॥

ગરુડ ઉવાચ ।
કથયસ્વ પ્રસાદેન ક્ષયાહં ચૌર્ધ્વદૈહિકમ્ ।
કસ્મિન્કાલે તિથૌ કસ્યાં વિધિના કેન તદ્ભવેત્ ॥ ૨,૧૪.૧૭॥

કૃત્વા કિં ફલમાપ્નોતિ એતન્મે વદ સામ્પ્રતમ્ ।
ત્વત્પ્રસાદેન ગોવિન્દ મુક્તે ભવતિ માનવઃ ॥ ૨,૧૪.૧૮॥

શ્રીકૃષ્ણ ઉવાચ ।

કાર્તિકાદિષુ માસેષુ યામ્યાયતગતે રવૌ ।
શુક્લપક્ષે તથા પક્ષિન્દ્વાદશ્યાદિતિથૌ શુભે ॥ ૨,૧૪.૧૯॥

શુભે લગ્ને મુહૂર્તે વા શુચૌ દેશે સમાહિતઃ ।
બ્રાહ્મણં તુ સમાહૂય વિધિજ્ઞં શુભલક્ષણમ્ ॥ ૨,૧૪.૨૦॥

જપહોમૈસ્તથા દાનૈઃ કુર્યાદ્દેહસ્ય શોધનમ્ ।
પુણ્યેઽભિજિત્સુનક્ષત્રે ગ્રહાન્દેવાન્સમર્ચયેત્ ॥ ૨,૧૪.૨૧॥

હોમં કુર્યાદ્યથાશક્તિ મન્ત્રૈશ્ચ વિવિધૈરપિ ।
ગ્રહાણાં સ્થાપનં કુર્યાત્પૂર્વં ચૈવ ખગેશ્વર ॥ ૨,૧૪.૨૨॥

માતૃણાં પૂજનં કાર્યં વસોર્ધારાં ચ પાતયેત્ ।
વહ્નિં સંસ્થાપ્ય તત્રૈવ પૂર્ણં હોમં તુ કારયેત્ ॥ ૨,૧૪.૨૩॥

શાલગ્રામં ચ સંસ્થાપ્ય વૈષ્ણવં શ્રાદ્ધમાચરેત્ ।
વૃષં સમ્પૂજ્ય તત્રૈવ વસ્ત્રાલઙ્કારભૂષણૈઃ ॥ ૨,૧૪.૨૪॥

ચતસ્રો વત્સતર્યશ્ચ પૂર્વં સમધિવાસયેત્ ।
પ્રદક્ષિણં તતઃ કુર્યાદ્ધોમાન્તે ચ વિસર્જનમ્ ॥ ૨,૧૪.૨૫॥

ઇમં મન્ત્રં સમુચ્ચાર્ય ઉત્તરાભિમુખઃ સ્થિતઃ ।
ધર્મ ત્વં વૃષરૂપેણ બ્રહ્મણા નિર્મિતઃ પુરા ॥ ૨,૧૪.૨૬॥

તવોત્સર્ગપ્રભાવાન્મામુદ્ધરસ્વભવાર્ણવાત્ ।
અબિષિચ્ય શુભૈર્મન્ત્રૈઃ પાવનૈર્વિધિપૂર્વકમ્ ॥ ૨,૧૪.૨૭॥

તનક્રીડન્તિમન્ત્રેણ વૃષોત્સર્ગં તુ કારયેત્ ।
અભિષિઞ્ચેત્તતો નીલં રુદ્રકુમ્ભો દકેન તુ ॥ ૨,૧૪.૨૮॥

નાભિમૂલે સમાસ્થાય તદમ્બુ મૂર્ધનિ ન્યસેત્ ।
અન્ન (આત્મ) શ્રાદ્ધં તતઃ કુર્યાદ્દદ્યાદ્દાનં દ્વિજોત્તમે ॥ ૨,૧૪.૨૯॥

ઉદકેચૈવ ગન્તવ્યં જલં તત્ર પ્રદાપયેત્ ।
યદિષ્ટં જીવતસ્ત્વાસીત્તચ્ચ દદ્યાત્સ્વશક્તિતઃ ॥ ૨,૧૪.૩૦॥

ન્યૂનં સમ્પૂર્ણતાં યાતિ વૃષોત્સર્ગે કૃતે સતિ ।
સુતૃપ્તો દુસ્તરે માર્ગે મૃતો યાતિ ન સંશયઃ ॥ ૨,૧૪.૩૧॥

યમલોકં ન પશ્યન્તિ સદા દાનરતા નરાઃ ।
યાવન્ન દીયતે જન્તોઃ શ્રાદ્ધં ચૈકાદશાહિકમ્ ॥ ૨,૧૪.૩૨॥

સ્વદત્તં પરદત્તં વા નેહામુત્રોપતિષ્ઠતિ ।
ત્રયોદશા તથા સપ્ત પઞ્ચ ત્રીણી ક્રમેણ તુ ॥ ૨,૧૪.૩૩॥

પદદાનાનિ કુર્વીત શ્રદ્ધાભક્તિસમન્વિતઃ ।
તિલપાત્રાણિ કુર્વીત સપ્ત પઞ્ચ યથાક્રમમ્ ॥ ૨,૧૪.૩૪॥

બ્રાહ્મણાન્ભોજયેત્પશ્ચાદેકાં ગાં ચ પ્રદાપયેત્ ।
વૃષં હિ શન્નોદેવીતિ વેદોક્તવિધિના તતઃ ॥ ૨,૧૪.૩૫॥

ચતસૃભિર્વત્સતરીભિઃ પરિણયનમાચરેત્ ।
વામે ચક્રં પ્રદાતવ્યં ત્રિશૂલં દક્ષિણે તથા ॥ ૨,૧૪.૩૬॥

મૂલ્યં દદ્યાદ્વૃષસ્યાપિ તં વૃષં ચ વિસર્જયેત્ ।
એકોદ્દિષ્ટવિધાનેન સ્વાહાકારેણ વુદ્ધિમાન્ ॥ ૨,૧૪.૩૭॥

કુર્યાદેકાદશાહં ચ દ્વાદશાહં ચ યત્નતઃ ।
સપિણ્ડીકરણાદર્વાક્કુર્યાચ્છ્રાદ્ધાનિ ષોડશ ॥ ૨,૧૪.૩૮॥

બ્રાહ્મણાન્ભોજયિત્વા તુ પદદાનાનિ દાપયેત્ ।
કાપોસોપરિ સંસ્થાપ્ય તામ્રપાત્રે તથાચ્યુતમ્ ॥ ૨,૧૪.૩૯॥

વસ્ત્રેણાચ્છાદ્ય તત્રસ્થમર્ઘં દદ્યાચ્છુભૈઃ ફ્લૈઃ ।
નાવમિક્ષુમયીં કૃત્વા પટ્ટસૂત્રેણ વેષ્ટયેત્ ॥ ૨,૧૪.૪૦॥

કાંસ્યપાત્રે ઘૃતં સ્થાપ્ય વૈતરણ્યા નિમિત્તતઃ ।
નાવારોહણં કુર્યાત્પૂજયેદ્ગરુડધ્વજમ્ ॥ ૨,૧૪.૪૧॥

આત્મવિત્તાનુસારેણ તચ્ચ દાનમનન્તકમ્ ।
ભવસાગરમગ્નાનાં શોકતાપાર્તિદુઃખિનામ્ ॥ ૨,૧૪.૪૨॥

ધર્મપ્લવવિહીનાનાં તારકો હિ જનાર્દનઃ ।
તિલા લોહં હિરણ્યં ચ કાર્પાસં લવણં તથા ॥ ૨,૧૪.૪૩॥

સપ્તધાન્યં ક્ષિતિર્ગાવો હ્યેકૈકં પાવનં સ્મૃતમ્ ।
તિલપાત્રાણિ કુર્વીત શય્યાદાનં ચ દાપયેત્ ॥ ૨,૧૪.૪૪॥

દીનાનાથવિશિષ્ટેભ્યો દદ્યાચ્છક્ત્યા ચ દક્ષિણામ્ ।
એવં યઃ કુરુતે તાર્ક્ષ્ય પુત્રવાનપ્યપુત્રવાન્ ॥ ૨,૧૪.૪૫॥

સ સિદ્ધિં સમવાપ્નોતિ યથા તે બ્રહ્મચારિણઃ ।

નિત્યં નૈમિત્તિકં કુર્યાદ્યાવજ્જીવતિ માનવઃ ॥ ૨,૧૪.૪૬॥

યઃ કશ્ચિત્ક્રિયતે ધર્મસ્તત્ફલં ચાક્ષયં ભવેત્ ।
તીર્થયાત્રાવ્રતાદીનાં શ્રાદ્ધં સંવત્સરસ્ય હિ ॥ ૨,૧૪.૪૭॥

દેવતાનાં ગુરૂણાં ચ માતાપિત્રોસ્તથૈવ ચ ।
પુણ્યં દેયં પ્રયત્નેન પ્રત્યહં વર્ધતે ખગ ॥ ૨,૧૪.૪૮॥

અસ્મિન્યજ્ઞેઃ હિયઃ કશ્ચિદ્ભૂરિદાનં પ્રયચ્છતિ ।
તત્તસ્ય ચાક્ષયં સર્વં વેદિકાયાં યથા કિલ ॥ ૨,૧૪.૪૯॥

યથા પૂજ્યતમા લોકે યતયો બ્રહ્મચારિણઃ ।
તથૈવ પ્રતિપૂજ્યન્તે લોકે સર્વે ચ નિત્યશઃ ॥ ૨,૧૪.૫૦॥

વરદોઽહં સદા તસ્ય ચતુર્વક્ત્રસ્તથા હરઃ ।
તે યાન્તિ પરમાંલ્લોકાનિતિ સત્યં વચો મમ ॥ ૨,૧૪.૫૧॥

ઉત્સૃષ્ટો વૃષભો યત્ર પિબત્યપો જલાશયે ।
શ઼ૃઙ્ગેણાલિખતે વાપિ ભૂમિં નિત્યં પ્રહર્ષિતઃ ॥ ૨,૧૪.૫૨॥

પિતૃણામન્નપાનં ચ પ્રભૂતમુપતિષ્ઠતિ ।
પૌર્ણમાસ્યામમાયાં વા તિલપાત્રાણિ દાપયેત્ ॥ ૨,૧૪.૫૩॥

સંક્રાન્તીનાં સહસ્રાણિ સૂર્યપર્વશતાનિ ચ ।
દત્ત્વા યત્ફલમાપ્નોતિ તદ્વૈ નીલવિસર્જને ॥ ૨,૧૪.૫૪॥

વત્સતર્યઃ પ્રદાતવ્યા બ્રાહ્મણેભ્યઃ પદાનિ ચ ।
તિલપાત્રાણિ દેયાનિ શિવભક્તદ્વિજેષુ ચ ॥ ૨,૧૪.૫૫॥

ઉમામહેશ્વરં ચૈકં પરિધાપ્ય પ્રિદાપયેત્ ।
અતસીપુષ્પસઙ્કાશં પીતવાસસમચ્યુતમ્ ॥ ૨,૧૪.૫૬॥

યે નમસ્યન્તિ ગોવિન્દં ન તેષાં વિદ્યતે ભયમ્ ।
પ્રેતત્વાન્મોક્ષમિચ્છન્તો યે કરિષ્યન્તિ સત્ક્રિયામ્ ॥ ૨,૧૪.૫૭॥

યાસ્યન્તિ તે પરાંલ્લોકાનિતિ સત્યં વચો મમ ।
એતત્તે સર્વમાખ્યાતં મયા ચૈવોર્ધ્વદૈહિકમ્ ॥ ૨,૧૪.૫૮॥

યચ્છ્રુત્વા સર્વપાપેભ્યો મુચ્યતે નાત્ર સંશયઃ ।
શ્રુત્વા મહાત્મ્યમતુલં ગરુડો હર્ષમાગતઃ ।
માનુષાણાં હિતાર્થાય પુનઃ પ્રપચ્છકેશવમ્ ॥ ૨,૧૪.૫૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે ગોદાનવૃષોત્સર્ગદશદાનભૂરિદાનાદિનિરૂપણં નામ ચતુર્દશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫

ગરુડ ઉવાચ ।

બગવન્બ્રૂહિ મે સર્વં યમલોકસ્ય નિર્ણયમ્ ।
જન્તોઃ પ્રયાણમારભ્ય માહાત્મ્યં વર્ત્મવિસ્તરમ્ ॥ ૨,૧૫.૧॥

શ્રીભગવાનુવાચ ।

શ ૃણુ તાર્ક્ષ્ય પ્રવક્ષ્યામિ યમમાર્ગસ્ય નિર્ણયમ્ ।
પ્રયાણકાનિ સર્વાણિ નગરાણિ ચ ષોડશ ॥ ૨,૧૫.૨॥

ષાડશીતિસહસ્રાણિ યોજનાનાં પ્રમાણતઃ ।
યમલોકસ્ય ચોર્ધ્વં વૈ અન્તરા માનુષસ્ય ચ ॥ ૨,૧૫.૩॥

કુકૃતં દુષ્કૃતં વાપિ ભુક્ત્વા લોકે યથાર્જિતમ્ ।
કર્મયોગાદ્યદા કશ્ચિદ્વ્યાધિરુત્પદ્યતે ખગ ॥ ૨,૧૫.૪॥

નિમિત્તમાત્રં સર્વેષાં કૃતકર્માનુસારતઃ ।
યસ્ય યો વિહિતો મૃત્યુઃ સ તં ધ્રુવમવાપ્નુયાત્ ॥ ૨,૧૫.૫॥

કર્મયોગાદ્યદા દેહી મુઞ્ચત્યત્ર નિજં વપુઃ ।
તદા ભૂમિગતં કુર્યાદ્ગોમયેનોપલિપ્ય ચ ॥ ૨,૧૫.૬॥

તિલાન્દર્ભાન્વિકીર્યાથ મુખે સ્વર્ણં વિનિઃ ક્ષિપેત્ ।
તુલસીંસન્નિધૌ કૃત્વા શાલગ્રામશિલાં તથા ॥ ૨,૧૫.૭॥

સેતુ (એવં) સામાદિસૂક્તૈસ્તુ મરણં મુક્તિદાયકમ્ ।
શલાકાસ્વર્ણવિક્ષપૈઃ પ્રતપ્રાણિગૃહેષુચ ॥ ૨,૧૫.૮॥

એકા વક્ત્રે તુ દાતવ્યા ઘ્રાણયુગ્મે તથા પુનઃ ।
અક્ષ્ણોશ્ચ કર્ણયોશ્ચૈવ દ્વેદ્વે દેયે યથાક્રમમ્ ॥ ૨,૧૫.૯॥

અથ લિઙ્ગે તથા ચૈકા ત્વેકાં બ્રહ્માણ્ડકેક્ષિપેત્ ।
કરયુગ્મે ચ કણ્ઠે ચ તુલસીં ચ પ્રદાપયેત્ ॥ ૨,૧૫.૧૦॥

વસ્ત્રયુગ્મં ચ દાતવ્યં કઙ્કુમૈશ્ચાક્ષતૈર્યજેત્ ।

પુષ્પમાલાયુતં કુર્યાદન્યદ્વારેણ સન્નયેત્ ॥ ૨,૧૫.૧૧॥

પુત્રસ્તુ બાન્ધવૈઃ સાર્ધં વિપ્રસ્તુ પુરવાસિભિઃ ।
પિતુઃ પ્રેતં સ્વયં પુત્રઃ સ્કન્ધમારોપ્ય બાન્ધવૈઃ ॥ ૨,૧૫.૧૨॥

ગત્વા શ્મશાનદેશે તુ પ્રાઙ્મુખશ્ચોત્તરામુખમ્ ।
અદગ્ધપૂર્વા યા ભૂમિશ્ચિતાં તત્રૈવ કારયેત્ ॥ ૨,૧૫.૧૩॥

શ્રીખણ્ડતુલસીકાષ્ઠસમિત્પાલાશસંભૃતામ્ ।
વિકલેન્દ્રિયસઙ્ઘાતે ચૈતન્યે જડતાં ગતે ॥ ૨,૧૫.૧૪॥

પ્રચલન્તિ તતઃ પ્રાણા યામ્યૈર્નિકટવર્તિભિઃ ।
એકીભૂતં જગત્પશ્યેદ્દૈવી દૃષ્ટિઃ પ્રજાયતે ॥ ૨,૧૫.૧૫॥

બીભત્સં દારુણં રૂપં પ્રણૈઃ કણ્ઠં સમાશ્રિતૈઃ ।
ફેનમુદ્ગિરતે કોઽપિ મુખં લાલાકુલં ભવેત્ ॥ ૨,૧૫.૧૬॥

દુરાત્માનશ્ચ તાડ્યન્તે કિઙ્કરૈઃ પાશબન્ધનૈઃ ।
સુખેન કૃતિનસ્તત્ર નીયન્તે નાકનાયકૈઃ ॥ ૨,૧૫.૧૭॥

દુઃખેન પાપિનો યાન્તિ યમમાર્ગે ચ દુર્ગમે ।
યમશ્ચતુર્ભુજો ભૂત્વા શઙ્ખચક્રગદાદિભૃત્ ॥ ૨,૧૫.૧૮॥

પુણ્યકર્મરતાન્સમ્યક્શુભાન્મિત્રવદાચરેત્ ।
આહૂય પાપિનઃ સર્વાન્યમો દણ્ડેન રજ્જયેત્ ॥ ૨,૧૫.૧૯॥

પ્રલયામ્બુદનિર્ઘોષસ્ત્વઞ્જનાદ્રિસમપ્રભઃ ।
મહિષસ્થો દુરારાધ્યો વિદ્યુત્તેજઃ સમદ્યુતિઃ ॥ ૨,૧૫.૨૦॥

યોજનત્રયવિસ્તારદેહો રૌદ્રોઽતિભીષણઃ ।
લોહદણ્ડધરો ભીમઃ પાશપાણિર્દુરાકૃતિઃ ॥ ૨,૧૫.૨૧॥

વક્રનેત્રોઽતિભયદો દર્શનં યાતિ પાપિનામ્ ।
અઙ્ગુષ્ઠમાત્રઃ પુરુષો હાહા કુર્વન્કલેવરાત્ ॥ ૨,૧૫.૨૨॥

તદૈવ નીયતે દૂતૈર્યામ્યૈર્વીક્ષન્સ્વકં ગૃહમ્ ।
નિર્વિચેષ્ટં શરીરં તુ પ્રાણૈર્મુક્તં જુગુપ્સિતમ્ ॥ ૨,૧૫.૨૩॥

અસ્પૃશ્યં જાયતે તૂર્ણં દુર્ગન્ધં સર્વનિન્દિતમ્ ।
ત્રિધાવસ્થા હિ દેહસ્ય કૃમિવિડ્ભસ્મસંજ્ઞિતા ॥ ૨,૧૫.૨૪॥

કો ગર્વઃ ક્રિયતે તાર્ક્ષ્ય ક્ષણવિધ્વંસિભિર્નરૈઃ ।
દાનં વિત્તાદૃતા વાચઃ કીર્તિધર્મૌ તથાયુષઃ ॥ ૨,૧૫.૨૫॥

પરોપકરણં કાયાદસતઃ સારમુદ્ધૃતમ્ ।
તસ્યૈવં નીયમાનસ્ય દૂતાઃ સન્તર્જયન્તિ હિ ॥ ૨,૧૫.૨૬॥

દર્શયન્તો ભયં તીવ્રં નરકાય પુનઃ પુનઃ ।
શીઘ્રં પ્રચલ દુષ્ટાત્મન્ગતોઽસિત્વં યમાલયે ॥ ૨,૧૫.૨૭॥

કુંભીપાકાદિનરકાંસ્ત્વાં નેષ્યામશ્ચ મા ચિરમ્ ।
એવં વાચસ્તદા શૃણ્વન્બન્ધૂનાં રુદિતં તથા ॥ ૨,૧૫.૨૮॥

ઉચ્ચૈર્હાહેતિ વિલપન્નીયતે યમકિઙ્કરૈઃ ।
સ્થાને શ્રાદ્ધં પ્રકુર્વીત તથા ચૈકાદશેઽહનિ ॥ ૨,૧૫.૨૯॥

મૃસ્યોત્ક્રાન્તિસમયાત્ષટ્પિણ્ડાન્ક્રમશો દદેત્ ।
મૃતસ્થાને તથા દ્વારે ચત્વરે તાર્ક્ષ્ય કારણાત્ ॥ ૨,૧૫.૩૦॥

વિશ્રામે કાષ્ઠચયને તથા સઞ્ચયને ચ ષટ્ ।
શૃણુ તત્કારણં તાર્ક્ષ્ય ષટ્પિણ્ડપરિકલ્પને ॥ ૨,૧૫.૩૧॥

મૃતસ્થાને શવો નામ તેન નામ્ના પ્રદીયતે ।
તેન દત્તેન તૃપ્યન્તિ ગૃહવાસ્ત્વધિદેવતાઃ ॥ ૨,૧૫.૩૨॥

તેન ભૂમિર્ભવેત્તુષ્ટાતદધિષ્ઠાતૃદેવતા ।
દ્વારે તુ પિણ્ડં દેયં ચ પાન્થમિત્યભિધાય તુ ॥ ૨,૧૫.૩૩॥

દત્તેન તેન પ્રીણન્તિ દ્વારસ્થા ગૃહદેવતાઃ ।
ચત્વરે ખેચરો નામ તમુદ્દિશ્ય પ્રદાપયેત્ ॥ ૨,૧૫.૩૪॥

ન ચોપઘાતં કુર્વન્તિ ભૂતાદ્યા દેવયોનયઃ ।
વિશ્રામે ભૂતસંજ્ઞોઽયં તેન તત્ર પ્રદાપયેત્ ॥ ૨,૧૫.૩૫॥

પિશાચા રાક્ષસા યક્ષા યે ચાન્યે દિશિ વાસિનઃ ।
તસ્ય હોતવ્યદેહસ્યનૈવાયોગ્યત્વકારકાઃ ॥ ૨,૧૫.૩૬॥

ચિતાપિણ્ઢપ્રભૃતિતઃ પ્રેતત્વમુપજાયતે ।
ચિતાયાં સાધકં નામ વદન્ત્યેકે ખગેશ્વર ॥ ૨,૧૫.૩૭॥

કેચિત્તં પ્રેતમેવાહુર્યથા કલ્પવિદો બુધાઃ ।
તદાદિ તત્રતત્રાપિ પ્રેતનામ્ના પ્રદીયતે ॥ ૨,૧૫.૩૮॥

ઇત્યેવં પઞ્ચભિઃ પિણ્ડૈઃ શવસ્યાહુતિયોગ્યતા ।
અન્યથા ચોપઘાતાય પૂર્વોક્તાસ્તે ભવન્તિ હિ ॥ ૨,૧૫.૩૯॥

ઉત્ક્રામે પ્રથમં પિણ્ડં તથા ચાર્ધપથેપિ ચ ।
ચિતાયાં તુ તૃતીયં સ્યાત્ત્રયઃ પિણ્ડાશ્ચ કલ્પિતાઃ ॥ ૨,૧૫.૪૦॥

વિધાતા પ્રથમે પિણ્ડે દ્વિતીયે ગરુડધ્વજઃ ।
તૃતીયે યમદૂતાશ્ચ પ્રયોગઃ પરિકીર્તિતઃ ॥ ૨,૧૫.૪૧॥

દત્તે તૃતીયે પિણ્ડેઽસ્મિન્દેહદોષૈઃ પ્રમુચ્યતે ।
આધારભૂતજીવશ્ચજ્વલનૈર્જ્વાલયેચ્ચિતામ્ ॥ ૨,૧૫.૪૨॥

સમૃજ્ય ચોપલિપ્યાથ ઉલ્લિખ્યોદ્ધૃત્ય વેદિકામ્ ।
અભ્યુક્ષ્યોપસમાધાય વહ્નિં તત્રઃ વિધાનતઃ ॥ ૨,૧૫.૪૩॥

પુષ્પાક્ષતૈશ્ચ સમ્પૂજ્ય દેવં ક્રવ્યાદસંજ્ઞકમ્ ।
ત્વં ભૂતકૃજ્જગદ્યોને ત્વં લોકપરિપાલકઃ ॥ ૨,૧૫.૪૪॥

ઉપસંહારકસ્તસ્માદેનં સ્વર્ગં મૃતં નય ।
ઇતિ ક્રવ્યાદમભ્યર્ચ્ય શરીરાહુતિમાચરેત્ ॥ ૨,૧૫.૪૫॥

અર્ધદગ્ધે તથા દેહે દદ્યાદાજ્યાહુતિં તતઃ ।
લોમભ્યઃ સ્વોતિવાક્યેન કુર્યાદ્ધોમં યથાવિધિ ॥ ૨,૧૫.૪૬॥

ચિતામારોપ્ય તં પ્રેતં હુનેદાજ્યાહુતિં તતઃ ।
યમાય ચાન્તકાયેતિ મૃત્યવે બ્રહ્મણે તથા ॥ ૨,૧૫.૪૭॥

જાતવેદોમુકે દેયા એકા પ્રેતમુખે તથા ।
ઊર્ધ્વં તુ જ્વાલયેદ્વહ્નિં પૂર્વભાગે ચિતાં પુનઃ ॥ ૨,૧૫.૪૮॥

અસ્માત્ત્વમધિજાતોઽસિ ત્વદયં જાયતાં પુનઃ ।
અસૌ સ્વર્ગાય લોકાય સ્વાહા જ્વલતિ પાવકઃ ॥ ૨,૧૫.૪૯॥

એવમાજ્યાહુતિં દત્ત્વા તિલમિશ્રાં સમન્ત્રકામ્ ।
તતો દાહઃ પ્રકર્તવ્યઃ પુત્રેણ કિલ નિશ્ચિતમ્ ॥ ૨,૧૫.૫૦॥

રોદિતવ્યં તતો ગાઢમેવં તસ્ય સુખં ભવેત્ ।
દાહસ્યાનન્તરં તત્ર કૃત્વા સઞ્ચયનક્રિયામ્ ॥ ૨,૧૫.૫૧॥

પ્રેતપિણ્ડં પ્રદદ્યાચ્ચ દાહાર્તિશમનં ખગ ।

તાવદ્ભૂતાઃ પ્રતીક્ષન્તે તં પ્રેતં બાન્ધવાર્થિનમ્ ॥ ૨,૧૫.૫૨॥

દાહસ્યાનન્તરં કાર્યં પુત્રૈઃ સ્નાનં સચૈલકમ્ ।
તિલોદકં તતો દદ્યાન્નામગોત્રેણ તિષ્ઠતુ ॥ ૨,૧૫.૫૩॥

તતો જનપદૈઃ સર્વૈર્દાતવ્યા કરતાલિકા ।
વિષ્ણુર્વિષ્ણુરિતિ બ્રૂયાદ્ગુણૈઃ પ્રેતમુદીરયેત્ ॥ ૨,૧૫.૫૪॥

જનાઃ સર્વે સમાસ્તસ્ય ગૃહમાગત્ય સર્વશઃ ।
દ્વારસ્ય દક્ષિણે ભાગે ગોમયં ગૌરસર્ષપાન્ ॥ ૨,૧૫.૫૫॥

નિધાય વરુણં દેવમન્તર્ધાય સ્વવેશ્મનિ ।
ભક્ષયેન્નિમ્બપત્રાણિ ઘૃતં પ્રાશ્ય ગૃહં વ્રજેત્ ॥ ૨,૧૫.૫૬॥

કેચિદ્દુગ્ધેન સિઞ્ચન્તિ ચિતાસ્થાનં ખગેશ્વર ।
અશ્રુપાતં ન કુર્વીત દદ્યાદસ્મૈ જલાઞ્જલીન્ ॥ ૨,૧૫.૫૭॥

શ્લેષ્માશ્રુ બાન્ધવૈર્મુક્તં પ્રેતો ભુઙ્ક્તે યતોઽવશઃ ।
અતો ન રોદિતવ્યં હિ ક્રિયાઃ કાર્યાઃ સ્વશક્તિતઃ ॥ ૨,૧૫.૫૮॥

દુગ્ધં ચ મૃન્મયે પાત્રે તોયં દદ્યાદ્દિનત્રયમ્ ।
સૂર્યે ચાસ્તં ગતે તાર્ક્ષ્ય વલભ્યાં ચત્વરેઽપિ વા ॥ ૨,૧૫.૫૯॥

બદ્ધઃ સમૂઢહૃદયો દેહમિચ્છન્કૃતાનુગઃ ।
શ્મશાનં ચત્વરં ગેહં વીક્ષન્યામ્યૈઃ સ નીયતે ॥ ૨,૧૫.૬૦॥

ગર્તે પિણ્ડા દશાહં ચ દાતવ્યાશ્ચ દિનેદિને ।
જલાઞ્જલીઃ પ્રદાતવ્યાઃ પ્રેતમુદ્દિશ્ય નિત્યશઃ ॥ ૨,૧૫.૬૧॥

તાવદ્વૃદ્ધિશ્ચ કર્તવ્યા યાવત્પિણ્ડં દશાહિકમ્ ।
પુત્રેણ હિ ક્રિયા કાર્યા ભાર્યયા તદભાવતઃ ॥ ૨,૧૫.૬૨॥

તદભાવે ચ શિષ્યેણ તદભાવે સહોદરઃ ।
શ્મશાને ચાન્યતીર્થે વા જલં પિણ્ડં ચ દાપયેત્ ॥ ૨,૧૫.૬૩॥

ઓદનાનિ ચ સક્તૂંશ્ચ શાકમૂલફલાદિના ।
પ્રથમેઽહનિ યદ્દદ્યાત્તદ્દદ્યાદુત્તરેઽહનિ ॥ ૨,૧૫.૬૪॥

દિનાનિ દશ પિણ્ડાંશ્ચ કુર્વન્ત્યત્ર સુતાદયઃ ।
પ્રત્યહં તે વિભજ્યન્તે ચતુર્ભાગાઃ ખગેશ્વર ॥ ૨,૧૫.૬૫॥

ભાગદ્વયં તુ દેહાર્થં પ્રીતિદં ભૂતપઞ્ચકે ।
તૃતીયં યમદૂતાનાં ચતુર્થં ચોપજીવ્યતિ ॥ ૨,૧૫.૬૬॥

અહોરાત્રૈસ્તુ નવભિઃ પ્રેતો નિષ્પત્તિમાપ્નુયાત્ ।
જન્તોર્નિષ્પન્નદેહસ્ય દશમે વલવત્ક્ષુધા ॥ ૨,૧૫.૬૭॥

ન વિધિર્નૈવ મન્ત્રશ્ચ ન સ્વધાવાહનાશિષઃ ।
નામ ગોત્રં સમુચ્ચાર્ય યદ્દત્તં તદ્દશાહિકમ્ ॥ ૨,૧૫.૬૮॥

દગ્ધે દેહે પુનર્દેહમેવમુત્પદ્યતે ખગ ।
પ્રથમેઽહનિ યઃ પિણ્ડસ્તેન મૂર્ધા પ્રજાયતે ॥ ૨,૧૫.૬૯॥

ગ્રીવા સ્કન્ધૌ દ્વિતીયે ચ તૃતીયે હૃદયં ભવેત્ ।
ચતુર્થેન ભવેત્પૃષ્ઠં પઞ્ચમે નાભિરેવ ચ ॥ ૨,૧૫.૭૦॥

ષટ્સપ્તમે કટી ગુહ્યમૃરૂ ચાપ્યષ્ટમે તથા ।
તાલૂ પાદૌ ચ નવમે દશમેઽહ્નિ ક્ષુધા ભવેત્ ॥ ૨,૧૫.૭૧॥

દેહં પ્રાપ્તઃ ક્ષુધાવિષ્ટો ગૃહે દ્વારે ચ તિષ્ઠતિ ।
દશમેઽહનિ યઃ પિણ્ડસ્તં દદ્યાદામિષેણ તુ ॥ ૨,૧૫.૭૨॥

યતો દેહે સમુત્પન્ને પ્રેતોઽતીવ ક્ષુધાન્વિતઃ ।
અતસ્ત્વામિષબાહ્યેન ક્ષુધા તસ્ય ન નશ્યતિ ॥ ૨,૧૫.૭૩॥

એકાદશે દ્વાદશાહે પ્રેતો ભુઙ્ક્તે દિનદ્વયમ્ ।
યોષિતઃ પુરુષાસ્યાપિ પ્રેતશબ્દં સમુચ્ચરેત્ ॥ ૨,૧૫.૭૪॥

દીપમન્નં જલં વસ્ત્રં યત્કિઞ્ચિદ્વસ્તુ દીયતે ।
પ્રેતશબ્દેન તદ્દેયં મૃસ્યાનન્દદાયકમ્ ॥ ૨,૧૫.૭૫॥

ત્રયોદશેઽહ્નિ સ પ્રેતો નીયતે ચ મહાપથે ।
પિણ્ડજં દેહમાશ્રિત્ય દિવા નક્તં બુભુક્ષિતઃ ॥ ૨,૧૫.૭૬॥

શીતોષ્ણશઙ્કુક્રવ્યાદવહ્નિમાર્ગસ્તુ પાપિનામ્ ।
ક્ષુધા તૃષ્ણાત્મિકા ચૈવ સવ્વ સૌમ્યં કૃતાત્મનામ્ ॥ ૨,૧૫.૭૭॥

માર્ગે ચૈતાનિ દુઃખાનિ અસિપત્રવનાન્વિતે ।
ક્ષુત્પિપાસાર્દિતો નિત્યં યમદૃતૈઃ પ્રપીડિતઃ ॥ ૨,૧૫.૭૮॥

અહન્યહનિ વૈ પ્રેતો યોજનાનાં શતદ્વયમ્ ।
ચત્વારિંશત્તથા સપ્ત અહોરાત્રેણ ગચ્છતિ ॥ ૨,૧૫.૭૯॥

ગૃહીતો યમપાશૈશ્ચ હાહેતિ રુદિતે તુ સઃ ।
સ્વગૃહં તુ પરિત્યજ્ય યામ્યં પુરમનુવ્રજેત્ ॥ ૨,૧૫.૮૦॥

ક્રમેણ યાતિ સ પ્રેતઃ પુરં યામ્યં શુભાશુભમ્ ।
અતીત્ય તાનિતાન્યેવ માર્ગે પુરવરાણિ ચ ॥ ૨,૧૫.૮૧॥

યામ્યં સૌરિપુરં નગેન્દ્રભવનં ગન્ધર્વશૈલાગમૌ ।
ક્રૌઞ્ચં ક્રૂરપુરં વિચિત્રભવનં બહ્વાપદં દુઃખદમ્ ॥ ૨,૧૫.૮૨॥

નાનાક્રન્દપુરં સુતપ્રભવનં રૌદ્રં પયોવર્ષણં શીતાઢ્યં
બહુધર્મભીતભવનં યામ્યં પુરં ચાગ્રતઃ ॥ ૨,૧૫.૮૩॥

ત્રયોદશેઽહ્નિ સ પ્રેતો ગૃહીતો યમકિઙ્કરૈઃ ।
તસ્મિન્માર્ગે બ્રજત્યેકો ગૃહીત ઇવ મર્કટઃ ॥ ૨,૧૫.૮૪॥

તથવ સ વ્રજન્માર્ગે પુત્રપુત્રેતિ ચ બ્રુવન્ ।
હાહેતિ ક્રન્દતે નિત્યં કીદૃશં તુ મયા કૃતમ્ ॥ ૨,૧૫.૮૫॥

માનુષ્યં લભ્યતે કસ્માદિતિ બ્રૂતે પ્રસર્પતિ ।
મહતા પુણ્યયોગેન માનુષ્યં જન્મ લભ્યતે ॥ ૨,૧૫.૮૬॥

ન તત્પ્રાપ્ય પ્રદત્તં હિ યાચકેભ્યઃ સ્વકં ધનમ્ ।
પરાધીનં તદભવદિતિ બ્રૂતે (રૌતિ) સગદ્ગદઃ ॥ ૨,૧૫.૮૭॥

કિઙ્કરૈઃ પીડ્યતેઽત્યર્થં સ્મરતે પૂર્વદૈહિકમ્ ॥ ૨,૧૫.૮૮॥

સુખસ્ય દુઃખસ્ય ન કોઽપિ દાતા પરો દદાતીતિ કુબુદ્ધિરેષા ।
પુરા કૃતં કર્મ સદૈવ ભુજ્યતે દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૧૫.૮૯॥

મયા ન દત્તં ન હુતં હુતાશને તપો ન તપ્તં હિમશૈલગહ્વરે ।
ન સેવિતં ગાઙ્ગમહો મહાજલં દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૧૫.૯૦॥

ન નિત્યદાનં ન ગાવાહ્નિકં કૃતં ન વેદદાનં ન ચ શાસ્ત્રપુસ્તકમ્ ।
પુરા નદૃષ્ટં ન ચ સેવિતોઽધ્વા દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૧૫.૯૧॥

જલાશયો નૈવ કૃતો હિ નિર્જલે મનુષ્યહેતોઃ પશુપક્ષિહેતવે ।
ગોતૃપ્તિહેતોર્ન કૃતં હિ ગોચરં દેહિન્ક્વચિન્નસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૧૫.૯૨॥

મયા ન ભુક્તં પતિસઙ્ગસૌખ્યં વહ્નિપ્રવેશો ન કૃતો મૃતે સતિ ।
તસ્મિન્મૃતે તદ્વ્રતપાલનં વા દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૧૫.૯૩॥

માસોપવાસૈર્ન વિશોષિતં વપુશ્ચાન્દ્રાયણૈર્વા નિયમૈશ્ચ સંહતૈઃ ।
નારીશરીરં બહુદુઃખભાજનં લબ્ધં મયા પૂર્વકૃતૈર્વિકર્મભિઃ ॥ ૨,૧૫.૯૪॥

ઉક્તાનિ વાચ્યાનિ મયા નરાણામતઃ શ‍ૃણુષ્વાવહિતોઽપિ પક્ષિન્ ।
સ્ત્રીણાં શરીરં પ્રતિલભ્ય દેહી બ્રવીતિ કર્માણિ કૃતાનિ પૂર્વમ્ ॥ ૨,૧૫.૯૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મદૃપ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે યમલોકવિસ્તારતન્માહાત્મ્યતદ્યાનનિરૂપણં નામ પઞ્ચદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૬
શ્રીભગવાનુવાચ ।
એવં વિલપતસ્તસ્ય પ્રેતસ્યૈવં ખગેશ્વર ।
ક્રન્દમાનસ્ય નિતરાં પીડિતસ્ય ચ કિઙ્કરૈઃ ॥ ૨,૧૬.૧॥

સપ્તદશ દિનાન્યેકો વાયુમાર્ગે વિકૃષ્યતે ।
અષ્ટાદશે ત્વહોરાત્રે પૂર્વં યામ્યપુરં વ્રજેત્ ॥ ૨,૧૬.૨॥

તસ્મિન્પુરવરે રમ્યે પ્રેતાનાં ચ ગણો મહાન્ ।
પુષ્પભદ્રા નદી તત્રન્યગ્રોધઃ પ્રિયદર્શનઃ ॥ ૨,૧૬.૩॥

પુરે સ તત્ર વિશ્રામં પ્રાપ્યતે યમકિઙ્કરૈઃ ।
જાયાપુત્રાદિકં સૌખ્યં સ્મરેત્તત્ર સુદુઃખિતઃ ॥ ૨,૧૬.૪॥

રુદતે કરુણૈર્વાક્યૈ સ્તૃષાર્તઃ શ્રમપીડિતઃ ।
સ્વધનં સ્વકલત્રાણિ ગૃહં પુત્રાઃ સુખાનિ ચ ॥ ૨,૧૬.૫॥

ભૃત્યમિત્રાણિ ચાન્યચ્ચ સર્વં શોચતિ વૈ તદા ।
ક્ષુધાર્તસ્ય પુરે તસ્મિન્કિઙ્કરૈસ્તસ્ય ચોચ્યતે ॥ ૨,૧૬.૬॥

કિઙ્કરા ઊચુઃ ।
ક્વ ધનં ક્વ સુતા જાયા ક્વ ગૃહં ક્વ ત્વમીદૃશઃ ।
સ્વકર્મોપાર્જિતં ભુઙ્ક્ષ્વ ચિરં ગચ્છ મહાપથે ॥ ૨,૧૬.૭॥

જાનાસિ શંબલવશં બલમધ્વગાનાં નો શંબલઃ પ્રયતતે પરલોકપાન્થ ।
ગન્તવ્યમસ્તિ તવ નિશ્ચિતમેવ તેન માર્ગેણ યત્ર ભવતઃ ક્રયવિક્રયૌ ન ॥ ૨,૧૬.૮॥

યમદૂતોદિતં વાક્યં પક્ષિન્નૈવં ત્વયા શ્રુતમ્ ।

એવમુક્તસ્તતઃ સર્વૈર્હન્યમાનઃ સ મુદ્ગરૈઃ ॥ ૨,૧૬.૯॥

અત્ર દત્તં સુતૈઃ પાત્રે (ત્રૈઃ) સ્નેહાદ્વા કૃપયાથ વા ।
માસિકં પિણ્ડમશ્નાતિ તતઃ સૌરિપુરં વ્રજેત્ ॥ ૨,૧૬.૧૦॥

તત્ર નામ્ના તુ રાજા વૈ જઙ્ગમઃ કાલરૂપધૃક્ ।
તં દૃષ્ટ્વા ભયભીતસ્તુ વિશ્રામે કુરુતે મતિમ્ ॥ ૨,૧૬.૧૧॥

ઉદકં ચાન્નસંયુક્તં ભુઙ્ક્તે તસ્મિન્પુરે ગતઃ ।
ત્રૈપક્ષિકે તુ યદ્દત્તં તત્પુરં સ વ્યતિક્રમેત્ ॥ ૨,૧૬.૧૨॥

નગેન્દ્રનગરે રમ્યે પ્રેતો યાતિ દિવાનિશમ્ ।
ગચ્છન્વનાનિ રૌદ્રાણિ દૃષ્ટ્વા ક્રન્દતિ તત્ર સઃ ॥ ૨,૧૬.૧૩॥

ભીષણૈઃ ક્લિશ્યમાનસ્તુ રુદતે ચ પુનઃ પુનઃ ।
માસદ્વયાવસાને તુ તત્પુરં સોઽતિગચ્છતિ ॥ ૨,૧૬.૧૪॥

ભુક્ત્વા ચાન્નં જલં પીત્વા યદ્દત્તં વાન્ધવૈરિહ ।
ક્લિશ્યમાનસ્તતઃ પાશૈર્નીયતે યમકિઙ્કરૈઃ ॥ ૨,૧૬.૧૫॥

તૃતીયે માસિ સમ્પ્રાપ્તે ગન્ધર્વનગરં શુભમ્ ।
તૃતીયં માસિકં ભુક્ત્વા તત્ર ગચ્છત્યસૌ પુરઃ ॥ ૨,૧૬.૧૬॥

શૈલાગમં ચતુર્થે સ માસે પ્રાપ્નોતિ વૈ પુરમ્ ।
પાષાણાસ્તત્ર વર્ષન્તિ પ્રેતસ્યોપરિ સંસ્થિતાઃ ॥ ૨,૧૬.૧૭॥

ચતુર્થમાસિકે શ્રાદ્ધં ભુક્તે તત્ર સુખી ભવેત્ ॥ ૨,૧૬.૧૮॥

તતો યાતિ પુરં પ્રેતઃ ક્રૂરં માસે તુ પઞ્ચમે ।
ઇહ દત્તં સુતૈર્ભુઙ્ક્તે પ્રેતો વૈ તત્પુરે સ્થિતઃ ।
ષષ્ઠે માસિ તતઃ પ્રેતો યાતિ ક્રૌઞ્ચાભિધં પુરમ્ ॥ ૨,૧૬.૧૯॥

તત્ર દત્તેન પિણ્ડેન શ્રાદ્ધેનાપ્યાયિતઃ પુરે ।
મુહૂર્તાર્ધં તુ વિશ્રમ્ય કમ્પમાનઃ સુદુઃખિતઃ ॥ ૨,૧૬.૨૦॥

તત્પુરં સ વ્યતિક્રમ્ય તર્જિતો યમકિઙ્કરૈઃ ।
પ્રયાતિ ચિત્રનગરં વિચિત્રો યત્ર પાર્થિવઃ ॥ ૨,૧૬.૨૧॥

યમસ્યૈવાનુજઃ સૌરિર્યત્ર રાજ્યં પ્રશાસ્તિ હિ ।
માસૈસ્તુ પઞ્ચભિઃ સાર્ધૈરૂપષાણ્માસિકં ભવેત્ ॥ ૨,૧૬.૨૨॥

ઊનષાણ્માસિકં તત્ર ભુઙ્ક્તે યામ્યસમાહતઃ ।
માર્ગે પુનઃ પુનસ્તસ્ય બુભુક્ષા પીડયત્યલમ્ ॥ ૨,૧૬.૨૩॥

સન્તિષ્ઠતે મૃતે કોઽપિ મદીયઃ સુતબાન્ધવઃ ।
સૌખ્યં યો મે જનયતિ પતતઃ શોકસાગરે ॥ ૨,૧૬.૨૪॥

એવં માર્ગે વિલપતિ વાર્યમાણશ્ચ કિઙ્કરૈઃ ।
આયાન્તિ સમુખાસ્તત્ર કૈવર્તાસ્તુ સહસ્રશઃ ॥ ૨,૧૬.૨૫॥

વયં તે તર્તુકામાય મહાવૈતરણીં નદીમ્ ।
શતયોજનવિસ્તીર્ણાં પૂયશોણિતસંકુલામ્ ॥ ૨,૧૬.૨૬॥

નાનાઝષસમાકીર્ણાં નાનાપક્ષિગણૈર્વૃતામ્ ।
વયં ત્વાં તારયિષ્યામઃ સુખેનેતિ વદન્તિ તે ॥ ૨,૧૬.૨૭॥

અન્તરં દેહિ ભો પાન્થ બહુલા ચેદ્રુચિસ્તવ ।
તેન તત્ર પ્રદત્તા ગૌસ્તયા નાવા પ્રસર્પતિ ।
મનુજાનાં હિતં દાનમન્તે વૈતરણી સ્મૃતા ॥ ૨,૧૬.૨૮॥

પરાપાપં દહેત્સર્વં વિષ્ણુલોકં ચ સા નયેત્ ।
ન દત્તા ચેત્ખગશ્રેષ્ઠ તાં સમેત્ય સમજ્જતિ ॥ ૨,૧૬.૨૯॥

સ્વસ્થાવસ્થે શરીરેઽત્ર વૈતરણ્યા વ્રતં ચરેત્ ।
દેયા ચ વિદુષે ધેનુસ્તાં નદીં તર્તુમિચ્છતા ॥ ૨,૧૬.૩૦॥

અવદન્મજ્જમાનસ્તુ નિન્દત્યાત્માનમાત્મના ।
પાથેયાર્થં મયા કિઞ્ચિન્ન પ્રદત્તં દ્વિજાયચ ॥ ૨,૧૬.૩૧॥

ન દત્તં ન હુતં જપ્તં ન સ્નાતં ન કૃતં સ્તુતમ્ ।
યાદૃશં કર્મ ચરિતં મૂઢ ભુઙ્ક્ષ્વેતિ તાદૃશમ્ ॥ ૨,૧૬.૩૨॥

તદૈવ હૃદિ સમૂઢસ્તાડિતો ભાષતે ભટૈઃ ।
વૈતરણ્યાઃ પરતટે ભુઙ્ક્તે દત્તં ઘટાદિકમ્ ॥ ૨,૧૬.૩૩॥

ઊનષાણ્માસિકશ્રાદ્ધં ભુક્ત્વા ગચ્છતિ ચાગ્રતઃ ।
તાર્ક્ષ્ય તત્ર વિશેષેણ ભોજયીત દ્વિજાઞ્છુભાન્ ॥ ૨,૧૬.૩૪॥

ચત્વારિંશત્તથા સપ્ત યોજનાનિ શતદ્વયમ્ ।
પ્રયાતિ પ્રત્યહં તાર્ક્ષ્ય અહોરાત્રેણ કર્શિતઃ ॥ ૨,૧૬.૩૫॥

સપ્તમે માસિ સમ્પ્રાપ્તે પુરં બહ્વાપદં વ્રજેત્ ।

તત્ર ભુક્ત્વ પ્રદત્તં યચ્છ્રાદ્ધં સપ્તમમાસિકમ્ ॥ ૨,૧૬.૩૬॥

અષ્ટમે માસિ સમ્પ્રાપ્તે નાનાક્રન્દપુરં વ્રજેત્ ।
નાનાક્રન્દગણાન્દૃષ્ટ્વા ક્રન્દમાનાન્સુદારુણમ્ ॥ ૨,૧૬.૩૭॥

સ્વયં ચ શૂન્યહૃદયઃ સમાક્રન્દતિ દુઃખિતઃ ।
તન્માસિકં ચ યચ્છ્રાદ્ધં ભુક્ત્વા તત્ર સુખી ભવેત્ ॥ ૨,૧૬.૩૮॥

વિહાય તત્પુરં પ્રેતો યાતિ તપ્તપુરં પ્રતિ ।
સુતપ્તનગરં પ્રાપ્ય નવમે માસિ સોઽશ્નુતે ।
દ્વિજભોજ્યં પિણ્ડદાનં કૃતં શ્રાદ્ધં સુતેન યત્ ॥ ૨,૧૬.૩૯॥

માસિ વૈ દશમે પ્રાપ્તે રૌદ્રં સ્થાનં સ ગચ્છતિ ।
દશમે માસિ યદ્દત્તં તદ્ભુક્ત્વા ચ પ્રયાતિ સઃ ॥ ૨,૧૬.૪૦॥

દશૈકમાસિકં ભુક્ત્વા પયોવર્ષણમૃચ્છતિ ।
મેઘાસ્તત્ર પ્રવર્ષન્તિ પ્રેતાનાં દુઃખદાયકાઃ ॥ ૨,૧૬.૪૧॥

(તતઃ પ્રચલિતો પોતો બહુર્ઘમતૃષાર્દિતઃ) ।
દ્વાદશે માસિ યચ્છ્રાદ્ધં તત્ર ભુઙ્ક્તે સુદુઃ શિતઃ ॥ ૨,૧૬.૪૨॥

કિઞ્ચિન્ન્યૂને તતો વર્ષે સાર્ધે ચૈકાદશેઽથ વા ।
યાતિ શીતપુરં તત્ર શીતં યત્રાતિદુઃખદમ્ ॥ ૨,૧૬.૪૩॥

શીતાર્તઃ ક્ષુધિતઃ સોઽથ વીક્ષતે હિ દિશો દશ ।
તિષ્ઠેત્તુ બાન્ધવઃ કોઽપિ યો મે દુઃખં વ્યપોહતિ ॥ ૨,૧૬.૪૪॥

કિઙ્કરાસ્તં વદન્ત્યેવં ક્વ તે પુણ્યં હિ તાદૃશમ્ ।
શ્રુત્વા તેષાં તુ તદ્વાક્યં હા દૈવ ઇતિ ભાષતે ॥ ૨,૧૬.૪૫॥

દૈવં હિ પૂર્વસુકૃતં તન્મયા નૈવ સઞ્ચિતમ્ ।
એવં સઞ્ચિન્ત્ય બહુશો ધૈર્યમાલમ્બતે પુનઃ ॥ ૨,૧૬.૪૬॥

ચત્વારિંશદ્યોજનાનિ ચતુર્યુક્તાનિ વૈ તતઃ ।
ધર્મરાજપુરં રમ્યં ગન્ધર્વાપ્સરાકુલમ્ ॥ ૨,૧૬.૪૭॥

ચતુરશીતિલક્ષૈશ્ચ મૂર્તામૂર્તૈરધિષ્ઠિતમ્ ।
ત્રયોદશ પ્રતીહારા ધર્મરાજપુરે સ્થિતાઃ ॥ ૨,૧૬.૪૮॥

શુભાશુભં તુ યત્કર્મ તે વિચાર્ય પુનઃ પુનઃ ।
શ્રવણા બ્રહ્મણઃ પુત્રા મનુષ્યાણાં ચ ચેષ્ટિતમ્ ।

કથયન્તિ તદા લોકે પૂજિતાઃ પૂજિતાઃ સ્વયમ્ ॥ ૨,૧૬.૪૯॥

નરૈસ્તુષ્ટૈશ્ચ પુષ્ટૈશ્ચ યત્પ્રોક્તં ચ કૃતં ચ યત્ ।
સર્વમાવેદયન્તિ સ્મ ચિત્રગુપ્તે યમે ચ તત્ ॥ ૨,૧૬.૫૦॥

દૂરાચ્છ્રવણવિજ્ઞાના દૂરાદ્દર્શનગોચરાઃ ।
એવઞ્ચેષ્ટાસ્તુ તે હ્યષ્ટૌ સ્વર્ભૂપાતાલચારિણઃ ॥ ૨,૧૬.૫૧॥

તેષાં પત્ન્યસ્તથૈ વોગ્રા શ્રવણ્યઃ પૃથગાહ્વયાઃ ।
એવં તેષાં શક્તિરસ્તિ યર્ત્યે મર્ત્યાધિકારિણઃ ॥ ૨,૧૬.૫૨॥

વ્રતૈર્દાનૈસ્તવૈર્યશ્ચ પૂજયેદિહ માનવઃ ।
જાયન્તે તસ્ય તે સૌમ્યાઃ સુખમૃત્યુપ્રદાયિનઃ ॥ ૨,૧૬.૫૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે પ્રેતયાત્રાદિનિરૂપણં નામ ષોડશોઽધ્યાયઃ

---

શ્રીગરુડમાહાપુરાણમ્- ૧૭

ગરુડ ઉવાચ ।
એકો મે સંશયો દેવ હૃદયે સમ્પ્રબાધતે ।
શ્રમણાઃ કસ્ય પુત્રાશ્ચ કથં યમપુરે સ્થિતાઃ ॥ ૨,૧૭.૧॥

માનુષૈશ્ચ કૃતં કર્મ કસ્માજ્જાનન્તિ તે પ્રભો ।
કથં શ‍ૃણ્વન્તિ તે સર્વે કસ્માજ્જ્ઞાનં સમાગતમ્ ॥ ૨,૧૭.૨॥

કુત્ર ભુઞ્જન્તિ દેવેશ ક્ષથયસ્વ પ્રસાદતઃ ।
પક્ષિરાજવચઃ શ્રુત્વા ભગવાન્વાક્યમબ્રવીત્ ॥ ૨,૧૭.૩॥

શ્રીકૃષ્ણ ઉવાચ ।
શ‍ૃણુષ્વ વચનં સત્યં સર્વેષાં સૌખ્યદાયકમ્ ।
તદહં કથયિષ્યામિ શ્રવણાનાં વિચેષ્ટિતમ્ ॥ ૨,૧૭.૪॥

એકીભૂતં યદા સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
ક્ષીરોદસાગરે પૂર્વં મયિ સુપ્તે જગત્પતૌ ॥ ૨,૧૭.૫॥

નાભિસ્થોજસ્તપસ્તેપે વર્ષાણિ સુબહૂન્યપિ ।
એકીભૂતં જગત્સૃષ્ટં ભૂતગ્રામચતુર્વિધમ્ ॥ ૨,૧૭.૬॥

બ્રહ્મણા નિર્મિતં પૂર્વં વિષ્ણુના પાલિતં તદા ।

રુદ્રઃ સંહારમૂર્તિશ્ચ નિર્મિતો બ્રહ્મણા તતઃ ॥ ૨,૧૭.૭॥

વાયુઃ સર્વગતઃ સૃષ્ટઃ સૂર્યસ્તેજોભિવૃદ્ધિમાન્ ।
ધર્મરાજસ્તતઃ સૃષ્ટશ્ચિત્રગુપ્તેન સંયુત) ॥ ૨,૧૭.૮॥

સૃષ્ટ્વૈતદાદિકં સર્વં તપસ્તેપે તુ પદ્મજઃ ।
ગતાનિ બહુવર્ષાણિ બ્રહ્મણો નાભિપઙ્કજે ॥ ૨,૧૭.૯॥

યોયો હિ નિર્મિતઃ પૂર્વં તત્તત્કર્મ સમાચરેત્ ।
કસ્મિંશ્ચિત્સમયે તત્ર બ્રહ્મા લોકસમન્વિતઃ ॥ ૨,૧૭.૧૦॥

રુદ્રો વિષ્ણુસ્તથા ધર્મઃ શાસયન્તિ વસુન્ધરામ્ ।
ન જાનીમો વયં કિઞ્ચિલ્લોકકૃત્યમિહોચ્યતામ્ ॥ ૨,૧૭.૧૧॥

ઇતિ ચિન્તાપરાઃ સર્વે દેવા વિમમૃશુસ્તદા ।
સંચિન્ત્ય બ્રહ્મણો મન્ત્રં વિબુધૈઃ પ્રેરિતસ્તદા ॥ ૨,૧૭.૧૨॥

ગૃહીત્વા પુષ્પપત્રાણિ સોસૃજદ્દ્વાદશાત્મજાન્ ।
તેજોરાશીન્વિશાલાક્ષાન્બ્રહ્મણો વચનાત્તુ તે ॥ ૨,૧૭.૧૩॥

યોયં વદતિ લોકેસ્મિઞ્છુભં વા યદિ વાશુભમ્ ।
પ્રાપયન્તિ તતઃ શીઘ્રં બ્રહ્મણઃ કર્ણગોચરમ્ ॥ ૨,૧૭.૧૪॥

દૂરાચ્છ્રવણવિજ્ઞાનં દૂરાદ્દર્શનગોચરમ્ ।
સર્વે શૃણ્વન્તિ યત્પક્ષિંસ્તેનૈવ શ્રવણા મતાઃ ॥ ૨,૧૭.૧૫॥

સ્થિત્વા ચૈવ તથાકાશે જન્તૂનાં ચેષ્ટિતં ચ યત્ ।
તજ્જ્ઞાત્વા ધર્મરાજાગ્રે મૃત્યુકાલે વદન્તિ ચ ॥ ૨,૧૭.૧૬॥

ધર્મં ચાર્થં ચ કામં ચ મોક્ષં ચ કથયન્તિ તે ।
એકો હિ ધર્મમાર્ગશ્ચ દ્વિતીયશ્ચાર્થમાર્ગકઃ ॥ ૨,૧૭.૧૭॥

અપરઃ કામમાર્ગશ્ચ મોક્ષમાર્ગશ્ચતુર્થકઃ ।
ઉત્તમા ધમમાર્ગેણ વૈનતેય પ્રયાન્તિ હિ ॥ ૨,૧૭.૧૮॥

અર્થદાતા વિમાનૈસ્તુ અશ્વૈઃ કામપ્રદાયકઃ ।
હંસયુક્તવિમાનૈશ્ચ મોક્ષાકાઙ્ક્ષી વિસર્પતિ ॥ ૨,૧૭.૧૯॥

ઇતરઃ પાદચારેણ ત્વસિપત્રવનાનિ ચ ।
પાષાણૈઃ કણ્ટકૈઃ ક્લિષ્ટઃ પાશબદ્ધોઽથ યાતિ વૈ ॥ ૨,૧૭.૨૦॥

યઃ કશ્ચિન્માનુષે લોકે શ્રવણાન્પૂજયેદિહ ।
વર્ધન્યા જલપાત્રેમ પક્વાન્નપરિપૂર્ણયા ॥ ૨,૧૭.૨૧॥

શ્રવણાન્પૂજયેત્તત્ર મયા સહ ખગેશ્વર ।
તસ્યાહં તત્પ્રદાસ્યામિ યત્સુરૈરપિ દુર્લભમ્ ॥ ૨,૧૭.૨૨॥

સંભોજ્ય બ્રાહ્મણાન્ભક્ત્યા ત્વેકાદશ શુભાગ્છુચીન્ ।
દ્વાદશં સકલત્રં ચ મમ પ્રીત્યૈ પ્રપૂજયેત્ ॥ ૨,૧૭.૨૩॥

દેવૈઃ સર્વૈશ્ચ સમ્પૂજ્ય સ્વર્ગં યાન્તિ સુખેપ્સયા ।
તૈઃ પૂજિતૈરહ તુષ્ટશ્ચિત્રગુપ્તેન ધર્મરાટ્ ॥ ૨,૧૭.૨૪॥

તૈસ્તુષ્ટૈર્મત્પુરં યાન્તિ લોકા ધર્મપારાયણાઃ ।
શ્રવણાનાં ચ માહાત્મ્યમુત્પત્તિં ચેષ્ટિતં શુભમ્ ॥ ૨,૧૭.૨૫॥

શ્ૃણોતિ પક્ષિશાર્દૂલ સ ચ પાપૈર્ન લિપ્યતે ।
ઇહ લોકે સુખં ભુક્ત્વા સ્વર્ગલોકે મહીયતે ॥ ૨,૧૭.૨૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રવણમહાત્મ્યનિરૂપણં નામ સપ્તદસોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮
શ્રીકૃષ્ણ ઉવાચ ।
શ્રવણાનાં વચઃ શ્રુત્વા ક્ષણં ધ્યાત્વા પુનસ્તતઃ ।
યત્કૃતં તુ મનુષ્યૈશ્ચપુણ્યં પાપમહર્નિશમ્ ॥ ૨,૧૮.૧॥

તત્સર્વં ચ પરિજ્ઞાય ચિત્રગુપ્તો નિવેદયેત્ ।
ચિત્રગુપ્તસ્તતઃ સર્વં કર્મ તસ્મૈ વદત્યથ ॥ ૨,૧૮.૨॥

વાચૈવ યત્કૃતં કર્મ કૃતં ચૈવ તુ કાયિકમ્ ।
માનસં ચ તથા કર્મ કૃતં ભુઙ્ક્તે શુભાશુભમ્ ॥ ૨,૧૮.૩॥

એવં તે કથિતસ્તાર્ક્ષ્ય પ્રેતમાર્ગસ્ય નિર્ણયઃ ।
વિશ્રાન્તિ દાનિ સર્વાણિ સ્થાનાનિ કથિતાનિ તે ॥ ૨,૧૮.૪॥

તમુદ્દિશ્ય દદાત્યન્નં સુખં યાતિ મહાધ્વનિ ।
દિવા રાત્રૌ તમુદ્દિશ્ય સ્થાને દીપપ્રદો ભવેત્ ॥ ૨,૧૮.૫॥

અન્ધકારે મહાઘોરે શ્વપૂર્ણે લક્ષ્યવર્જિતે ।

દીપ્તેઽધ્વનિ ચ તે યાન્તિ દીપો દત્તશ્ચ યૈર્નરૈઃ ॥ ૨,૧૮.૬॥

કાર્તિકે ચ ચતુર્દશ્યાં દીપદાનં સુખાય વૈ ।
અથ વક્ષ્યામિ સંક્ષેપાદ્ધમમાર્ગસ્ય નિષ્કૃતિમ્ ॥ ૨,૧૮.૭॥

વૃષોત્સર્ગસ્ય પુણ્યેન પિતૃલોકં સ ગચ્છતિ ।
એકાદશાહપિણ્ડેન શુદ્ધદેહો ભવેત્તતઃ ॥ ૨,૧૮.૮॥

ઉદકુમ્ભપ્રદાનેન કિઙ્કરાસ્તૃપ્તિમાપ્નુયુઃ ॥ ૨,૧૮.૯॥

શય્યાદાનાદ્વિમાનસ્થો યાતિ સ્વર્ગેષુ માનવઃ ।
તદહ્નિ દીયતે સર્વં દ્વાદશાહે વિશેષતઃ ॥ ૨,૧૮.૧૦॥

પદાનિ સર્વવસ્તૂનિ વરિષ્ઠાનિ ત્રયોદશે ।
યો દદાતિ મૃતસ્યેહ જીવન્નપ્યાત્મહેતવે ॥ ૨,૧૮.૧૧॥

તદાશ્રિતો મહામાર્ગે વૈનતેય સ ગચ્છતિ ।
એક એવાસ્તિ સર્વત્રે વ્યવહારઃ ખગાધિપ ॥ ૨,૧૮.૧૨॥

ઉત્તમાધમમધ્યાનાં તત્તદાવર્જનં ભવેત્ ।
યાવદ્ભાગ્યં ભવેદ્યસ્ય તાવન્માર્ગેઽતિરિચ્યતે ॥ ૨,૧૮.૧૩॥

સ્વયં સ્વસ્યેન યદ્દત્તં તત્તત્રાધિકરોતિ તમ્ ।
મૃતે યદ્બાન્ધવૈર્દત્તં તદાશ્રિત્ય સુખી ભવેત્ ॥ ૨,૧૮.૧૪॥

ગરુડ ઉવાચ ।
કસ્માત્પદાનિ દેયાનિ કિંવિધાનિ ત્રયોદશ ।
દીયતે કસ્ય દેવેશ તદ્વદસ્વ યથાતથમ્ ॥ ૨,૧૮.૧૫॥

શ્રીભગવાનુવાચ ।
છત્ત્રોપાનહવસ્ત્રાણિ મુદ્રિકા ચ કમણ્ડલુઃ ।
આસનં ભાજનં ચૈવ પદં સપ્તવિધં સ્મૃતમ્ ॥ ૨,૧૮.૧૬॥

આતપસ્તત્ર યો રૌદ્રો દહ્યતે યેન માનવઃ ।
છત્રદાનેન સુચ્છાયા જાયતે પ્રેતતુષ્ટિદા ॥ ૨,૧૮.૧૭॥

અસિપત્રવનં ઘોરં સોઽતિક્રામતિ વૈ ધ્રુવમ્ ।
અશ્વારૂઢાશ્ચ ગચ્છન્તિ દદતે ય ઉપાનહૌ ॥ ૨,૧૮.૧૮॥

આસને સ્વાગતે (ભોજને) ચૈવ દત્તં તસ્મૈ દ્વિજાયતે ।
સુખેન ભુઙ્ક્તે સ પ્રેતઃ પથિ ગચ્છઞ્છનૈઃ શનૈઃ ॥ ૨,૧૮.૧૯॥

બહુધર્મસમાકીર્ણે નિર્વાતે તોયવર્જિતે ।
કમણ્ડલુપ્રદાનેન સુખી ભવતિ નિશ્ચિતમ્ ॥ ૨,૧૮.૨૦॥

મૃતોદ્દેશેન યો દદ્યાદુદપાત્રં તુ તામ્રજમ્ ।
પ્રપાદાનસહસ્રસ્ય તત્ફલં સોઽશ્નુતે ધ્રુવમ્ ॥ ૨,૧૮.૨૧॥

યમદૂતા મહારૌદ્રાઃ કરાલાઃ કૃષ્ણપિઙ્ગલાઃ ।
ન પીડયન્તિ દાક્ષિણ્યાદ્વસ્ત્રાભારણદાનતઃ ॥ ૨,૧૮.૨૨॥

સાયુધા ધાવમાનાશ્ચ ન માર્ગે દૃષ્ટિગોચરાઃ ।
પ્રયાન્તિ યમદૂતાસ્તે મુદ્રિકાયાઃ પ્રદાનતઃ ॥ ૨,૧૮.૨૩॥

ભાજનાસનદાનેન આમાન્નભોજનેન ચ ।
આજ્યયજ્ઞોપવીતાભ્યાં પદં સમ્પૂર્ણતાં વ્રજેત્ ॥ ૨,૧૮.૨૪॥

એવં માર્ગે ગચ્છમાનસ્તૃષાર્તઃ શ્રમપીડિતઃ ।
મહિષીરથ (દુગ્ધ) દાનાચ્ચ સુખી ભવતિ નિશ્ચિતમ્ ॥ ૨,૧૮.૨૫॥

ગરુડ ઉવાચ ।
મૃતોદ્દેશેન યત્કિઞ્ચિદ્દીયતે સ્વગૃહે વિભો ।
સ ગચ્છતિ મહામાર્ગે તદ્દત્તં કેન ગૃહ્યતે ॥ ૨,૧૮.૨૬॥

શ્રીભગવાનુવાચ ।
ગૃહ્ણાતિ વરુણો દાનં મમ હસ્તે પ્રયચ્છતિ ।
અહં ચ ભાસ્કરે દેવે ભાસ્કરાત્સોઽશ્નુતે સુખમ્ ॥ ૨,૧૮.૨૭॥

વિકર્મણઃ પ્રભાવેણ વંશચ્છેદે ક્ષિતાવિહ ।
સર્વે તે નરકં યાન્તિ યાવત્પાપસ્ય સંક્ષયઃ ॥ ૨,૧૮.૨૮॥

કસ્મિંશ્ચિત્સમયે પૂર્ણે મહિષાસનસંસ્થિતઃ ।
નરકાન્વીક્ષ્ય ધર્માત્મા નાનાક્રન્દસમાકુલાન્ ॥ ૨,૧૮.૨૯॥

ચતુરશીતિલક્ષાણાં નરકાણાં સ ઈશ્વરઃ ।
તેષાં મધ્યે શ્રેષ્ઠતમા ઘોરા યા એકવિંશતિઃ ॥ ૨,૧૮.૩૦॥

તામિસ્ત્રં લોહશઙ્કુશ્ચ મહારૌરવશાલ્મલી ।
રૌરવં કુડ્મલં કાલસૂત્રકં પૂતિમૃત્તિકા ॥ ૨,૧૮.૩૧॥

સઙ્ઘાતં લોહતોદં ચ સવિષં સમ્પ્રતાપનમ્ ।

મહાનરકકાલોલઃ સજીવનમહાપથઃ ॥ ૨,૧૮.૩૨॥

અવીચિરન્ધતા મિસ્રઃ કુમ્ભોપાકસ્તથૈવ ચ ।
અસિપત્રવનં ચૈવ પતનશ્ચૈકવિંશતિઃ ॥ ૨,૧૮.૩૩॥

યેષાં તુ નરકે ઘોરે બહ્વબ્દાનિ ગતાનિ વૈ ।
સન્તાતર્નૈવ વિદ્યતે દૂતત્વં તે તુ (પ્રેત્ય) યાન્તિ હિ ॥ ૨,૧૮.૩૪॥

યમેન પ્રેષિતાસ્તે વૈ માનુષસ્ય મૃતસ્ય તુ ।
દિનેદિને પ્રગૃહ્ણન્તિ દત્તમન્નાદ્યપાનકમ્ ॥ ૨,૧૮.૩૫॥

પ્રેતસ્યૈવ વિલુણ્ઠન્તિ મધ્યે માર્ગે બુભુક્ષિતાઃ ।
માસાન્તે ભોજનં પિણ્ડમેકે યચ્છન્તિ તત્ર વૈ ॥ ૨,૧૮.૩૬॥

તૃપ્તિં પ્રયાન્તિ તે સર્વે પ્રત્યહં ચૈવ વત્સરમ્ ।
એવમાદિકૃતૈઃ પુણ્યૈઃ ક્રમાત્સૌરિપુરં વ્રજેત્ ॥ ૨,૧૮.૩૭॥

તતઃ સંવત્સરસ્યાન્તે પ્રત્યાસન્ને યમાલયે ।
બહુભીતકરે પ્રેતો હસ્તમાત્રં સમુત્સૃજેત્ ॥ ૨,૧૮.૩૮॥

દિવસૈર્દશભિર્જાતં તં દેહં દશપિણ્ડજમ્ ।
જામદગ્ન્યસ્યેવ રામં દૃષ્ટ્વા તેજઃ પ્રસર્પતિ ॥ ૨,૧૮.૩૯॥

કર્મજં દેહમાશ્રિત્ય પૂર્વદેહં સમુત્સજેત્ ।
અઙ્ગુષ્ઠમાત્રો વાયુશ્ચ શમીપત્રંસમારુહેત્ ॥ ૨,૧૮.૪૦॥

વ્રજંસ્તિષ્ઠન્પદૈકેન યથૈવૈકેન ગચ્છતિ ।
યથા તૃણજલૌકેવ દેહી કર્માનુગોઽવશઃ ॥ ૨,૧૮.૪૧॥

વાસાંસિ જીર્ણાનિ યથા વિહાય નવાનિ ગૃહ્ણાતિ નરોઽપરાણિ ।
તથા શરીરાણિ વિહાય જીર્ણાન્યન્યાનિ સંયાતિ નવાનિ દેહી ॥ ૨,૧૮.૪૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે
ધર્મદૃપ્રેતદૃશ્રીકૃષ્ણગરુડ સંવાદે
વૃષોત્સર્ગનાનાદાનફલયમલોકગમનકર્મજદેહપ્રાપ્તિનિરૂપણં
નામાષ્ટાદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯
શ્રીભગવાનુવાચ ।

વાયુભૂતઃ ક્ષુધાવિષ્ટઃ કર્મજં દેહમાશ્રિતઃ ।
તે દેહં સ સમાસાદ્ય યમેન સહ ગચ્છતિ ॥ ૨,૧૯.૧॥

ચિત્રગુપ્તપુરં તત્ર યોજનાનાં તુ વિંશતિઃ ।
કાયસ્થાસ્તત્ર પશ્યન્તિ પાપપુણ્યાનિ સર્વશઃ ॥ ૨,૧૯.૨॥

મહાદાનેષુદત્તેષુ ગતસ્તત્ર સુખી ભવેત્ ।
યોજનાનાં ચતુર્વિંશત્પુરં વૈવસ્વતં શુભમ્ ॥ ૨,૧૯.૩॥

લોહં લવણકાર્પાસં તિલપાત્રં ચ યૈર્નરૈઃ ।
દત્તં તેનૈવ તૃપ્યન્તિ યમસ્ય પુરચારિણઃ ॥ ૨,૧૯.૪॥

ગત્વા ચ તત્ર તે સર્વે પ્રતીહારં વદન્તિ હિ ।
ધર્મધ્વજપ્રતીહારસ્તત્ર તિષ્ઠતિ સર્વદા ॥ ૨,૧૯.૫॥

સપ્તધાન્યસ્ય દાનેન પ્રીતો ધર્મધ્વજો ભવેત્ ।
તત્ર ગત્વા પ્રતીહારો બ્રૂતે તસ્ય શુભાશુભમ્ ॥ ૨,૧૯.૬॥

ધર્મરાજસ્ય યદ્રૂપં સન્તઃ સુકૃતિનો જનાઃ ।
પશ્યન્તિ ચ દુરાત્માનો યમરૂપં સુભીષણમ્ ॥ ૨,૧૯.૭॥

તં દૃષ્ટ્વા ભયભીતસ્તુ હાહેતિ વદતે જનઃ ।
કૃતં દાનં ચ યૈર્મર્ત્યૈસ્તેષાં નાસ્તિ ભયં ક્વચિત્ ॥ ૨,૧૯.૮॥

પ્રાપ્તં સુકૃતિનં દૃષ્ટ્વા સ્થાનાચ્ચ લતિ સૂર્યજઃ ।
એષ મે મણ્ડલં ભિત્ત્વા બ્રહ્મલોકં પ્રયાસ્યતિ ॥ ૨,૧૯.૯॥

દાનેન સુલભો ધર્મો યમમાર્ગઃ સુખાવહઃ ।
એષ માર્ગો વિશાલોઽત્ર ન કેનાપ્ય નુગમ્યતે ।
દાનપુણ્યં વિના વત્સ ન ગચ્છેદ્ધર્મમન્દિરમ્ ॥ ૨,૧૯.૧૦॥

તસ્મિન્માર્ગે તુ રૌદ્રે વૈ ભીષણા યમકિઙ્કરાઃ ।
એકૈકસ્ય પુરસ્યાગ્રે તિષ્ઠત્યેકસહસ્રકમ્ ॥ ૨,૧૯.૧૧॥

પચન્તિ પાપિનં પ્રાપ્ય ઉદકે યાતનાકરાઃ ।
ગૃહ્ણન્તિ માસમાસાન્તે પાદશેષં તુ તદ્ભવેત્ ॥ ૨,૧૯.૧૨॥

ઔર્ધ્વદૈહિકદાનાનિ યૈર્ન દત્તાનિ કાશ્યપ ।
મહાકષ્ટેન તે યાન્તિ તસ્માદ્દેયાનિ શક્તિતઃ ।
અદત્ત્વા પશુવધાન્તિ ગૃહીતો વન્ધબન્ધનૈઃ ॥ ૨,૧૯.૧૩॥

એવં કૃતેન સમ્પશ્યેત્સ નરઃ ભૂતકર્મણા ।
દૈવિકીં પૈતૃકીં યોનિં માનુષીં વાથ નારકીમ્ ॥ ૨,૧૯.૧૪॥

ધર્મરાજસ્ય વચનાન્મુક્તિર્ભવતિ વા તતઃ ।
માનુષ્યં તત્ત્વતઃ પ્રાપ્ય સ પુત્રઃ પુત્રતાં વ્રજેત્ ॥ ૨,૧૯.૧૫॥

યથાયથા કૃતં કર્મ તાન્તાં યોનિં વ્રજેન્નરઃ ।
તત્તથૈવ ચ ભુઞ્જાનો વિચરેત્સર્વલોકગઃ ॥ ૨,૧૯.૧૬॥

અશાશ્વતં પરિજ્ઞાય સર્વલોકોત્તરં સુખમ્ ।
યદા ભવતિ માનુષ્યં તદા ધર્મં સમાચરેત્ ॥ ૨,૧૯.૧૭॥

કૃમયો ભસ્મ વિષ્ઠા વા દેહાનાં પ્રકૃતિઃ સદા ।
અન્ધકૂપે મહારૌદ્રે દીપહસ્તઃ પાતેત્તુ વૈ ॥ ૨,૧૯.૧૮॥

મહાપુણ્યપ્રભાવેણ માનુષ્યં જન્મ લભ્યતે ।
યસ્તત્પ્રાપ્ય ચરેદ્ધર્મં સ ગચ્છેત્પરમાં ગતિમ્ ॥ ૨,૧૯.૧૯॥

અપિ જાનન્વૃથા ધર્મં દુઃખમાયાતિ યાતિ ચ ॥ ૨,૧૯.૨૦॥

જાતીશતેન લભતે કિલ માનુષત્વં તત્રાપિ દુર્લભતરં ખગ ભો દ્વિજત્વમ્ ।
યસ્તત્ર પાલયતિ લાલયતિ વ્રતાનિ તસ્યામૃતં ભવતિ હસ્તગતં પ્રસાદાત્ ॥ ૨,૧૯.૨૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે યમમન્દિરપ્રવેશતદાજ્ઞાલબ્ધમનુષ્યાદિ
દેહાન્તરપ્રાપ્તિનિરૂપણં નામૈકોનવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૦
ગરુડ ઉવાચ ।
યે કેચિત્પ્રેતરૂપેણ કુત્ર વાસં લભન્તિ તે ।
પ્રેતલોકાદ્વિનિર્મુક્તાઃ કથં કુત્ર વ્રજન્તિ તે ॥ ૨,૨૦.૧॥

ચતુર્યુક્તાશીતિ લક્ષૈર્નરકૈઃ પર્યુપાસિતાઃ ।
યમેન રક્ષિતાસ્તત્ર ભૂતૈશ્ચૈવ સહસ્રશઃ ॥ ૨,૨૦.૨॥

વિચરન્તિ કથં લોકે નરકાચ્ચ વિનિર્ગતાઃ ।
ગરુડોદીરિતં શ્રુત્વા લક્ષ્મીનાથોઽબ્રવીદિદમ્ ॥ ૨,૨૦.૩॥

શ્રીકૃષ્ણ ઉવાચ ।

પક્ષિરાજ શ ૃણુષ્વ ત્વં યત્ર પ્રેતાશ્ચરન્તિ વૈ ।
પરાર્થદારગ્રહણાચ્છ (બ) લાદ્દ્રોહાન્નિશાચરાઃ ॥ ૨,૨૦.૪॥

તથૈવ સર્વપાપિષ્ઠઃ સ્વાત્મજાન્વેષણે રતાઃ ।
વિચરન્ત્યશરીરાસ્તે ક્ષુત્પિપાસાર્દિતા ભૃશમ્ ॥ ૨,૨૦.૫॥

બન્દીગૃહવિ નિર્મુક્તા યેભ્યો નશ્યન્તિ જન્તવઃ ।
તે વ્યવસ્યન્તિ ચ પ્રેતા વધોપાયં ચ બન્ધુષુ ॥ ૨,૨૦.૬॥

પિતૃદ્વદારાણિ રુન્ધન્તિ તન્માર્ગોચ્છેદકાસ્તથા ।
પિતૃભા ગાન્વિગૃહ્ણન્તિ પાન્થેભ્યસ્તસ્કરા ઇવ ॥ ૨,૨૦.૭॥

સ્વં વેશ્મ પુનરાગત્ય મિત્રસ્થાને વિશન્તિ તે ।
તત્ર સ્થિતા નિરીક્ષન્તે રોગશોકાદિબન્ધનાઃ ॥ ૨,૨૦.૮॥

પીડયન્તિ જ્વરીભૂય એકાન્તરમિષેણ તુ ।
તૃતીયકજ્વરા ભૂત્વા શીતવાતાદિપીડયા ॥ ૨,૨૦.૯॥

અન્યાંશ્ચ વિવિધાન્રોગાઞ્છિરોઽર્તિં ચ વિષૂચિકામ્ ।
ચિન્ત યન્તિ સદા તેષામુચ્છિષ્ટાદિસ્થલસ્થિતાઃ ॥ ૨,૨૦.૧૦॥

આત્મજાનાં છલાલ્લોકા ભૂતસઙ્ઘૈશ્ચ રક્ષિતાઃ ।
પિબન્તિ તે ચ પાનીયં ભોજનોચ્છિષ્ટયોજિતમ્ ॥ ૨,૨૦.૧૧॥

એવં પ્રેતાઃ પ્રવર્તન્તે નાનાદોષૈર્વિકર્મિણઃ ॥ ૨,૨૦.૧૨॥

ગરુડ ઉવાચ ।
કથં કુર્વન્તિ તે પ્રેતાઃ કેન રૂપેણ કસ્ય કિમ્ ।
જ્ઞાયતે કેન વિધિના જલ્પન્તિ ન વદન્તિ વા ॥ ૨,૨૦.૧૩॥

એનં છિન્ધિ મનોમોહં મમ ચેદિચ્છસિ પ્રિયમ્ ।
કલિકાલે હૃષીકેશ પ્રેતત્વં જાયતે બહુ ॥ ૨,૨૦.૧૪॥

શ્રીવિષ્ણુરુવાચ ।
સ્વકુલં પીડયેત્પ્રેતઃ પરચ્છિદ્રેણ પીડયેત્ ।
જીવન્સ દૃશ્યતે સ્નેહી મૃતો દુષ્ટત્વમાપ્નુયાત્ ॥ ૨,૨૦.૧૫॥

રુદ્રજાપી ધર્મરતો દેવતાતિથિપૂજકઃ ।
સત્યવાક્પ્રિયવાદી ચ ન પ્રેતૈઃ સ હિ પીડ્યતે ॥ ૨,૨૦.૧૬॥

સર્વક્રિયાપરિભ્રષ્ટો નાસ્તિકો ધર્મનિન્દકઃ ।

અસત્યવાદનિરતો નરઃ પ્રેતૈઃ સ પીડ્યતે ।
કલૌ પ્રેતત્વમાપ્નોતિ તાર્ક્ષ્યાશુદ્ધક્રિયાપરઃ ॥ ૨,૨૦.૧૭॥

કૃતાદૌ દ્વાપરાન્તે ચ ન પ્રેતો નૈવ પીડનમ્ ।
બહૂનામેકજાતાનામેકઃ સૌખ્યં સમશ્નુતે ॥ ૨,૨૦.૧૮॥

એકો દુષ્કૃતકર્મા ચ એકઃ સન્તતિમાઞ્જનઃ ।
એકઃ સમ્પીડ્યતે પ્રેતૈરેકઃ સુતધનાન્વિતઃ ॥ ૨,૨૦.૧૯॥

એકસ્ય પુત્રનાશઃ સ્યાદેકો દુહિતૃમાન્ભવેત્ ।
વિરોધો બન્ધુભિઃ સાર્ધં પ્રેતદોષેણ કાશ્યપ ॥ ૨,૨૦.૨૦॥

સન્તતિર્દૃશ્યતે નૈવ સમુત્પન્ના વિનશ્યતિ ।
પશુદ્રવ્યવિનાશશ્ચ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૧॥

પ્રકૃતેઃ પરિવર્તઃ સ્યાદ્વિદ્વેષઃ સહ બન્ધુભિઃ ।
અકસ્માદ્વ્યસનપ્રાપ્તિઃ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૨॥

નાસ્તિક્યં વૃત્તિલોપશ્ચ મહાલોભસ્તથૈવ ચ ।
સ્યાદ્ધન્તકલહો નિત્યં સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૩॥

પિતૃમાતૃનિહન્તા ચ દેવબ્રાહ્મણનિન્દકઃ ।
ઇત્યાદોષમવાપ્નોતિ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૪॥

નિત્યકર્મવિનિમુક્તો જપહોમવિવર્જિતઃ ।
પરદ્રવ્યાણાં ચ હર્તા સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૫॥

સુવૃષ્ટૌ કૃષિનાશશ્ચ વ્યવહારો વિનશ્યતિ ।
લોકે કલહકારી ચ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૬॥

માર્ગે જઙ્ગમ્યમાનં તં પીડયેદ્વાતમણ્ડલી ।
પ્રેતપીડા તુ સા જ્ઞેયા સત્યંસત્યં ખગેશ્વર ॥ ૨,૨૦.૨૭॥

હીનજાત્યા ચ સમ્બન્ધો હીનકર્મ કરોતિ યઃ ।
અધર્મે રમતે નિત્યં સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૮॥

વ્યસનૈર્દ્રવ્યનાશઃ સ્યાદુપક્રાન્તં વિનશ્યતિ ।
ચૌરાગ્નિરાજભિર્હાનિઃ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૨૯॥

મહારોગોપલબ્ધિશ્ચ બાલકાનાં ચ પીડનમ્ ।
જાયા સમ્પીડ્યતે યચ્ચ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૦॥

શ્રુતિસ્મૃતિપુરાણેષુ ધર્મશાસ્ત્રસમુદ્ભવે ।
અભાવો જાયતે ધર્મે સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૧॥

દેવતીર્થદ્વિજાનાં તુ નિન્દાંયઃ કુરુતે નરઃ ।
પ્રત્યક્ષં વા પરોક્ષં વા સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૨॥

સ્વવૃત્તિહરણં યચ્ચ સ્વપ્રતિષ્ઠાહતિસ્તથા ।
વંશચ્છેદઃ નદૃશ્યેત પ્રેતદોષાદ્વિનાન્યથા ॥ ૨,૨૦.૩૩॥

સ્ત્રીણાં ગર્ભવિનાશઃ સ્યાન્ન પુષ્પં દૃશ્યતે તથા ।
બાલાનાં મરણં યત્ર સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૪॥

ભાવશુદ્ધ્યા ન કુરુતે શ્રાદ્ધં સાંવત્સરાદિકમ્ ।
સ્વયમેવ ન કુર્વીત સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૫॥

તીર્થે ગત્ત્વા પરાસક્તઃ સ્વકૃત્યં ચ પરિત્યજેત્ ।
ધર્મકાર્યે ન સમ્પત્તિઃ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૬॥

દમ્પત્યોઃ કલહશ્ચૈવ ભોજને કોપસંયુતઃ ।
પરદ્રોહે મતિશ્ચૈવ સા પીડા પ્રેતસંભવા ॥ ૨,૨૦.૩૭॥

પુષ્પં યત્ર ન દૃશ્યેન ફલં તથા ।
વિરહો ભાર્યયા યત્ર સા પીડા પ્રેતસગ્ભવા ॥ ૨,૨૦.૩૮॥

યેષાં વૈ જાયતે ચિહ્નં સદોચ્ચાટપરં નૃણામ્ ।
સ્વક્ષેત્રે નિષ્ફલં તેજઃ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૩૯॥

સ્વગોત્રઘાતકશ્ચૈવ હન્તિ શત્રુમિવાત્મજમ્ ।
ન પ્રીતિર્નાપિ સૌખ્યં ચ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૪૦॥

પિતૃવાક્યં ન કુરુતે સ્વપત્નીં ચ ન સેવતે ।
સદા ક્રૂરમતિર્વ્યગ્રઃ સા પીડા પ્રેતસમ્ભવા ॥ ૨,૨૦.૪૧॥

વિકર્મા જાયતે પ્રેતો હ્યવિધિક્રિયયા તથા ।
તત્કાલદુષ્ટસંસર્ગાદ્વૃષોત્સર્ગાદૃતે તથા ॥ ૨,૨૦.૪૨॥

દૃષ્ટગૃત્યુવશાદ્વાપિ અદગ્ધવપુષસ્તથા ।
પ્રેતત્વં જાયતે તાર્ક્ષ્ય પીડ્યન્તે યેન જન્તવઃ ॥ ૨,૨૦.૪૩॥

એવં જ્ઞાત્વા ખગશ્રેષ્ઠ પ્રેતમુક્તિં સમાચરેત્ ।

યો વૈ ન મન્યતે પ્રેતાન્મૃતઃ પ્રેતત્વમાપ્નુયાત્ ॥ ૨,૨૦.૪૪॥

પ્રેતદોષઃ કુલે યસ્ય સુખં તસ્ય ન વિદ્યતે ।
મતિઃ પ્રીતી રતિર્બુદ્ધિર્લક્ષ્મીઃ પઞ્ચવિનાશનમ્ ॥ ૨,૨૦.૪૫॥

તૃતીયે પઞ્ચમે પુંસિ વંશચ્છેદો હિ જાયતે ।
દરિદ્રો નિર્ધનશ્ચૈવ પાપકર્મા ભવેભવે ॥ ૨,૨૦.૪૬॥

યે કેચિત્પ્રેતરૂપા વિકૃતમુખદૃશો રૌદ્રરૂપાઃ કરાલા મન્યન્તે
નૈવ ગોત્રં સુતદુહિતૃપિતૄન્ભ્રાતૃજાયાં વધૂં વા ।
કૃત્વા કામ્યં ચ રૂપં સુખગતિરહિતા ભાષમાણા યથેષ્ટં હા
કષ્ટં ભોક્તુકામા વિધિવશપતિતાઃ સંસ્મરન્તિ સ્વપાકમ્ ॥ ૨,૨૦.૪૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે પ્રેતાવાસતદ્બાધાપ્રકારનિરૂપણં નામ વિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧
ગરુડ ઉવાચ ।
મુક્તિં યાન્તિ કથં પ્રેતાસ્તદહં પ્રષ્ટુમુત્સુકઃ ।
યન્મુક્તૌ ચ મનુષ્યાણાં ન પીડા જાયતે પુનઃ ॥ ૨,૨૧.૧॥

એતૈશ્ચ લક્ષણૈર્દેવ પીડોક્તા પ્રેતજા ત્વયા ।
તેષાં કદા ભવેન્મુક્તિઃ પ્રેતત્વં ન કથં ભવેત્ ॥ ૨,૨૧.૨॥

પ્રેતત્વે હિ પ્રમાણં ચ કતિ વર્ષાણિ સંખ્યયા ।
ચિરં પ્રેતત્વમાપન્નઃ કથં મુક્તિમવાપ્નુયાત્ ॥ ૨,૨૧.૩॥

શ્રીકૃષ્ણ ઉવાચ ।
મુક્તિં પ્રાયન્તિ તે પ્રેતાસ્તદહં કથયામિ તે ।
યદૈવ મનુજોઽવૈતિ મમ પીડા કૃતા ત્વિયમ્ ॥ ૨,૨૧.૪॥

પૃચ્છાર્થં હિતમન્વિચ્છન્દૈ વજ્ઞે વિનિવદયેત્ ।
સ્વપ્ને દૃષ્ટઃ શુભો વૃક્ષઃ ફલિતશ્ચૂતચમ્પકઃ ॥ ૨,૨૧.૫॥

વિપ્રો વા વૃષભો દેવો ભ્રમતે તીર્થગો યદિ ।
એવં દૃષ્ટો યદા સ્વપ્નો મૃતઃ કોઽપિસ્વગોત્રજઃ ॥ ૨,૨૧.૬॥

સ્વપ્ને સત્યં પરિજ્ઞાય દૃષ્ટં પ્રેતપ્રભાવતઃ ।

અદ્ભુતાનિ પ્રદૃશ્યન્તે પ્રેતદોષાદ્વિનિશ્ચિતમ્ ॥ ૨,૨૧.૭॥

તીર્થસ્નાને મતિર્યાવચ્ચિત્તં ધર્મપરાયણમ્ ।
ધર્માપાયં પ્રકુરુતે પ્રેતપીડા તદા વ્રજેત્ ॥ ૨,૨૧.૮॥

તદા તત્ર વિનાશાય ચિત્તભઙ્ગં કરોતિ સા ।
શ્રેયાંસિ બહુવિઘ્નાનિ સમ્ભવન્તિ પદેપદે ॥ ૨,૨૧.૯॥

અશ્રેયસિ પ્રવૃત્તિ ચ પ્રેરયન્તિ પુનઃ પુનઃ ।
ઉચ્ચાટનં ચ ક્રૂરત્વં સર્વં પ્રેતકૃતં ખગ ॥ ૨,૨૧.૧૦॥

સર્વવિઘ્નાનિ સન્ત્યજ્ય મુક્ત્યુપાયં કરોતિ યઃ ।
તસ્ય કર્મફલં સાધુ પ્રેતવૃત્તિશ્ચ શાશ્વતી ॥ ૨,૨૧.૧૧॥

સ ભવેત્તેન મુક્તસ્તુ દત્તં શ્રેયસ્કરં પરમ્ ।
સ્વયં તૃપ્યતિ ભોઃ પક્ષિન્યસ્યોદ્દેશેન દીયતે ॥ ૨,૨૧.૧૨॥

શ ृણુ સત્યમિદં તાર્ક્ષ્ય યદ્દદાતિ ભુનક્તિ સઃ ।
આત્માનં શ્રેયસા યુઞ્જ્યાત્પ્રેતસ્તૃપ્તિં ચિરં વ્રજેત્ ॥ ૨,૨૧.૧૩॥

તે તૃપ્તાઃ શુભમિચ્છન્તિ નિજબન્ધુષુ સર્વદા ।
અજ્ઞાતયસ્તુ યે દુષ્ટાઃ પીડયન્તિ સ્વવંશજાન્ ॥ ૨,૨૧.૧૪॥

નિવારયન્તિ તૃપ્તાસ્તે જાયમાનાનુકમ્પકાઃ ।
પશ્ચાત્તે મુક્તિમાયન્તિ કાલે પ્રાપ્તે સ્વપુત્રતઃ ।
સદા બન્ધુષુ યચ્છન્તિ વૃદ્ધિમૃદ્ધિં ખગાધિપ ॥ ૨,૨૧.૧૫॥

દર્શનાદ્ભાષણાદ્યસ્તુ ચેષ્ટાતઃ પીડનાદ્ગતિમ્ ।
ન પ્રાપયતિ મૂઢાત્મા પ્રેતશાપૈઃ સ લિપ્યતે ॥ ૨,૨૧.૧૬॥

અપુત્રકોઽપશુશ્ચૈવ દરિદ્રો વ્યાધિતસ્તથા ।
વૃત્તિહીનશ્ચ હીનશ્ચ ભવેજ્જન્મનિજન્મનિ ॥ ૨,૨૧.૧૭॥

એવં બ્રુવન્તિ તે પ્રેતાઃ પુનર્યામ્યં સમાશ્રિતાઃ ।
તત્રસ્થાનાં ભવેન્મુક્તિઃ સ્વકાલે કર્મસંક્ષયે ॥ ૨,૨૧.૧૮॥

ગરુડ ઉવાચ ।
નામ ગોત્રં ન દૃશ્યેત પ્રતીતિર્નૈવ જાયતે ।
કેચિદ્વદન્તિ દૈવજ્ઞાઃ પીડાં પ્રેતસમુદ્ભવામ્ ॥ ૨,૨૧.૧૯॥

ન સ્વપ્નશ્ચૈષ્ટિતં નૈવ દર્શનં ન કદાચન ।

કિં કર્તવ્યં સુરશ્રેષ્ઠ તત્ર મે બ્રૂહિ નિશ્ચિતમ્ ॥ ૨,૨૧.૨૦॥

શ્રીભગવાનુવાચ ।
સત્યં વાપ્યનૃતં વાપિ વદન્તિ ક્ષિતિદેવતાઃ ।
તદા સઞ્ચિન્ત્ય હૃદયે સત્યમેતદ્વિજેરિતમ્ ॥ ૨,૨૧.૨૧॥

ભાવભક્તિં પુરસ્કૃત્ય પિતૃભક્તિપરાયણઃ ।
કૃત્વા કૃષ્ણબલિં ચૈવ પુરશ્ચરણ પૂર્વકમ્ ॥ ૨,૨૧.૨૨॥

જપહોમૈસ્તથા દાનૈઃ પ્રકુર્યાદ્દેહસોધનમ્ ।
કૃતેન તેન વિઘ્નાનિ વિનશ્યન્તિ ખગેશ્વર ॥ ૨,૨૧.૨૩॥

ભૂતપ્રેતપિશાચૈર્વા સ ચેદન્યૈઃ પ્રપીડ્યતે ।
પિત્રુદ્દેશેન વૈ કુર્યાન્નારાયણબલિં તદા ।
વિમુક્તઃ સર્વપીડાભ્ય ઇતિ સત્યં વચો મમ ॥ ૨,૨૧.૨૪॥

પિતૃપીડા ભવેદ્યત્ર કૃત્યૈરન્યૈર્ન મુચ્યતે ।
તસ્માત્સર્વપ્રયત્નેન પિતૃભક્તિપરો ભવેત્ ॥ ૨,૨૧.૨૫॥

નવમે દશમે વર્ષે પિક્ષુદ્દેશેન વૈ પુમાન્ ।
ગાયત્રીમયુતં જપ્ત્વા દશાંશેન ચ હોમયેત્ ॥ ૨,૨૧.૨૬॥

કૃત્વા કૃષ્ણબલિં પૂર્વં વૃષોત્સર્ગાદિકાઃ ક્રિયાઃ ।
સર્વોપદ્રવહીનસ્તુ સર્વસૌખ્યમવાપ્નુયાત્ ।
ઉત્તમં લોકમાપ્નોતિ જ્ઞાતિપ્રાધાન્યમેવ ચ ॥ ૨,૨૧.૨૭॥

પિતૃમા તૃસમં લોકે નાસ્ત્યન્યદ્દૈવતં પરમ્ ।
તસ્માત્સર્વપ્રયત્નેન પૂજયેત્પિતરૌ સદા ॥ ૨,૨૧.૨૮॥

હિતાનામુપદેષ્ટા હિ પ્રત્યક્ષં દૈવતં પિતા ।
અન્યા યા દેવતા લોકે ન દેહપ્રભવો હિ તાઃ ॥ ૨,૨૧.૨૯॥

શરીરમેવ જન્તૂનાં સ્વર્ગમોક્ષૈકસાધનમ્ ।
દેહો દત્તો હિ યેનૈવં કોઽન્યઃ પૂજ્યતમસ્તતઃ ॥ ૨,૨૧.૩૦॥

ઇતિ સઞ્ચિન્ત્યહૃદયે પક્ષિન્યદ્યત્પ્રયચ્છતિ ।
તત્સર્વમાત્મના ભુઙ્ક્તે દાનં વેદવિદો વિદુઃ ॥ ૨,૨૧.૩૧॥

પુન્નામનરકાદ્યસ્માત્પિતરં ત્રાયતે સુતઃ ।
તસ્માત્પુત્ર ઇતિ પ્રોક્ત ઇહ ચાપિ પરત્ર ચ ॥ ૨,૨૧.૩૨॥

અપમૃત્યુમૃતૌ સ્યાતાં પિતરૌ કસ્યચિત્ખગ ।
વ્રતતીર્થાવિવાહાદિશ્રાદ્ધં સંવત્સરં ત્યજેત્ ॥ ૨,૨૧.૩૩॥

સ્વપ્નાધ્યાયમિમં યસ્તુ પ્રેત લિઙ્ગનિદર્શકમ્ ।
યઃ પઠેચ્છૃણુયાદ્વાપિ પ્રેતચિહ્નં ન પશ્યતિ ॥ ૨,૨૧.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે સ્વપ્નાધ્યાયો નામૈકવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨
ગરુડ ઉવાચ ।
સમ્ભવન્તિ કથં પ્રેતાઃ કેન તેષાં ગતિર્ભવેત્ ।
કીદૃક્તેષાં ભવેદ્રૂપં ભોજનં કિં ભવેત્પ્રભો ॥ ૨,૨૨.૧॥

સુપ્રીતાસ્તે કથં પ્રેતાઃ ક્વ તિષ્ઠન્તિ સુરેશ્વર ।
પ્રસન્નઃ કૃપયા દેવ પ્રશ્નમેનં વદસ્વ મે ॥ ૨,૨૨.૨॥

શ્રીભગવાનુવાચ ।
પાપકર્મરતા યે વૈ પૂર્વકર્મવશાનુગાઃ ।
જાયન્તે તે મૃતાઃ પ્રેતાસ્તાઞ્છૃણુષ્વ વદામ્યહમ્ ॥ ૨,૨૨.૩॥

વાપીકૂપતડાગાંશ્ચ આરામં સુરમન્દિરમ્ ।
પ્રપાં સદ્મ સુવૃક્ષાંશ્ચ તથા ભોજનશાલિકાઃ ॥ ૨,૨૨.૪॥

પિતૃપૈતામહં ધર્મં વિક્રીણાતિ સ પાપભાક્ ।
મૃતઃ પ્રેતત્વમાપ્નોતિ યાવદાભૂતસમ્પ્લવમ્ ॥ ૨,૨૨.૫॥

ગોચરં ગ્રામસીમાં તડાગારામગહ્વરમ્ ।
કર્ષયન્તિ ચ યે લોભાત્પ્રેતાસ્તે વૈ ભવન્તિ હિ ॥ ૨,૨૨.૬॥

ચણ્ડાલાદુદકાત્સર્પાદ્બ્રાહ્મણાદ્વૈદ્યુતાગ્નિતઃ ।
દંષ્ટ્રિભ્યશ્ચ પશુભ્યશ્ચ મરણં પાપકર્મિણામ્ ॥ ૨,૨૨.૭॥

ઉદ્બન્ધનમૃતા યે ચ વિષશસ્ત્રહતાશ્ચ યે ।
આત્મોપઘાતિનો યે ચ વિષૂચ્યાદિહતાસ્તથા ॥ ૨,૨૨.૮॥

મહારોગૈર્મૃતા યે ચ પાપરોગૈશ્ચ દસ્યુભિઃ ।
અસંસ્કૃતપ્રમીતા યે વિહિતાચારવર્જિતાઃ ॥ ૨,૨૨.૯॥

વૃષોત્સર્ગાદિલુપ્તાશ્ચલુપ્તમાસિકપિણ્ડકાઃ ।
યસ્યાનયતિ શૂદ્રોગ્નિં તૃણકાષ્ઠહવીંષિ સઃ ॥ ૨,૨૨.૧૦॥

પતનાત્પર્વતાનાં ચ ભિત્તિપાતેન યે મૃતાઃ ।
રજસ્વલાદિદોષૈશ્ચ ન ચ ભૂમૌ મતાશ્ચ યે ॥ ૨,૨૨.૧૧॥

અન્તરિક્ષે મૃતા યે ચ વિષ્ણુસ્મરણવર્જિતાઃ ।
સૂતકૈઃ શ્વાદિસમ્પર્કૈઃ પ્રેતભાવા ઇહ ક્ષિતૌ ॥ ૨,૨૨.૧૨॥

એવમાદિભિરન્યૈશ્ચ કુમૃત્યુવશગાશ્ચ યે ।
તે સર્વે પ્રેતયોનિસ્થા વિચરન્તિ મરુસ્થલે ॥ ૨,૨૨.૧૩॥

માતરં ભગિનીં ભાર્યાં સ્નુષાં દુહિતરં તથા ।
અદૃષ્ટદોષાં ત્યજતિ સ પ્રેતો જાયતેધ્રુવમ્ ॥ ૨,૨૨.૧૪॥

ભ્રાતૃધ્રુગ્બ્રહ્મહા ગોઘ્નઃ સુરાપો ગુરુતલ્પગઃ ।
હેમક્ષૌમહરસ્તાર્ક્ષ્ય સ વૈ પ્રેતત્વમાપ્નુયાત્ ॥ ૨,૨૨.૧૫॥

ન્યાસાપહર્તા મિત્રધ્રુક્પરદારરતસ્તથા ।
વિશ્વાસઘાતી ક્રૂરસ્તુ સ પ્રેતો જાયતે ધ્રુવમ્ ॥ ૨,૨૨.૧૬॥

કુલમાર્ગાંશ્ચ સન્ત્યજ્ય પરધર્મરતસ્તથા ।
વિદ્યાવૃત્તવિહીનશ્ચ સ પ્રેતો જાયતેધ્રુવમ્ ॥ ૨,૨૨.૧૭॥

અત્રૈવોદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
યુધિષ્ઠિરસ્ય સંવાદં ભીષ્મેણ સહ સુવ્રત ।
તદહં કથયિષ્યામિ યચ્છ્રુત્વા સૌખ્યમાપ્નુયાત્ ॥ ૨,૨૨.૧૮॥

યુધિષ્ઠિર ઉવાચ ।
કેન કર્મવિપાકેન પ્રેતત્વમુપજાયતે ।
કેન વા મુચ્યતે કસ્માત્તન્મે બ્રૂહિ પિતામહ ।
યચ્છ્રુત્વા ન પુનર્મોહમેવં યાસ્યા મિ સુવ્રત ॥ ૨,૨૨.૧૯॥

ભીષ્મ ઉવાચ ।
યેનૈવ જાયતે પ્રેતો યેનૈવ સ વિમુચ્યતે ।
પ્રાપ્નોતિ નરકં ઘોરં દુસ્તરં દૈવતૈરપિ ॥ ૨,૨૨.૨૦॥

સતતં શ્રવણાદ્યસ્ય પુણ્યશ્રવણકીર્તનાત્ ।
માનવા વિપ્રમુચ્યન્તે આપન્નાઃ પ્રેતયોનિષુ ॥ ૨,૨૨.૨૧॥

શ્રૂયતે હિ પુરા વત્સ બ્રાહ્મણઃ શંસિતવ્રતઃ ।
નામ્ના સન્તપ્તકઃ ખ્યાત સ્તપોઽર્થે વનમાશ્રિતઃ ॥ ૨,૨૨.૨૨॥

સ્વાધ્યાયયુક્તો હોમેન યો (યા) ગયુક્તો દયાન્વિતઃ ।
યજન્સ સકલાન્યજ્ઞાન્યુક્ત્યા કાલં ચ વિક્ષિપન્ ॥ ૨,૨૨.૨૩॥

બ્રહામચર્યસમાયુક્તો યુક્તસ્તપસિ માર્દવે ।
પરલોકભયોપેતઃ સત્યશૌચૈશ્ચ નિર્મલઃ ॥ ૨,૨૨.૨૪॥

યુક્તોઽહિ ગુરુવાક્યેન યુક્તશ્ચાતિથિપૂજને ।
આત્મયોગે સદોદ્યુક્તઃ સર્વદ્વન્દ્વવિવર્જિતઃ ॥ ૨,૨૨.૨૫॥

યોગાભ્યાસે સદા યુક્તઃ સંસારવિજિગીષયા ।
એવંવૃત્તઃ સદાચારો મોક્ષકાઙ્ક્ષી જિતેન્દ્રિયઃ ॥ ૨,૨૨.૨૬॥

બહૂન્યબ્દાનિ વિજને વને તસ્ય ગતાનિ વૈ ।
તસ્ય બુદ્ધિસ્તતો જાતા તીર્થાનુગમનં પ્રતિ ॥ ૨,૨૨.૨૭॥

પુણ્યૈસ્તીર્થજલૈરેવ શોષયિષ્યે કલેવરમ્ ।
સ તીર્થેત્વરિતં સ્નાત્વા તપસ્વી ભાસ્કરોદયે ।
કૃતજાપ્યનમસ્કારો હ્યધ્વાનં પ્રત્યપદ્યત ॥ ૨,૨૨.૨૮॥

એકસ્મિન્દિવસે વિપ્રો માર્ગભ્રષ્ટો મહાતપાઃ ।
દદર્શાધ્વનિ ગચ્છન્સ પઞ્ચ પ્રેતાન્સુદારુણાન્ ॥ ૨,૨૨.૨૯॥

અરણ્યે નિર્જને દેશે સંકટે વૃક્ષવર્જિતે ।
પઞ્ચૈતાન્વિકૃતાકારાન્દૃષ્ટ્વા વૈ ઘોરદર્શનાન્ ।
ઈષત્સન્ત્રસ્તહૃદયોઽતિષ્ઠદુન્મીલ્ય લોચને ॥ ૨,૨૨.૩૦॥

અવલમ્બ્ય તતો ધૈર્યં ભયમુત્સૃજ્ય દૂરતઃ ।
પપ્રચ્છ મધુરાભાષી કે યૂયં વિકૃતાનનાઃ ॥ ૨,૨૨.૩૧॥

કિઞ્ચાશુભં કૃતં કર્મ યેન પ્રાપ્તાઃ સ્થ વૈકૃતમ્ ।
કથં વા ચૈકતઃ કર્મ પ્રસ્થિતાઃ કુત્ર નિશ્ચિતમ્ ॥ ૨,૨૨.૩૨॥

પ્રેતરાજ ઉવાચ ।
સ્વૈઃ સ્વૈસ્તુ કર્મભિઃ પ્રાપ્તં પ્રેતત્વં હિ દ્વિજોત્તમ ।
પરદ્રોહરતાઃ સર્વે પાપમૃત્યુવશં ગતાઃ ॥ ૨,૨૨.૩૩॥

ક્ષુત્પિપાસાર્દિતા નિત્યં પ્રેતત્વં સમુપાગતાઃ ।

હતવાક્યા હતશ્રીકા હત સંજ્ઞા વિચેતસઃ ॥ ૨,૨૨.૩૪॥

ન જાનીમો દિશં તાત વિદિશં ચાતિદુઃખિતાઃ ।
ક્વ નુ ગચ્છામહે મૂઢાઃ પિશાચાઃ કર્મજા વયમ્ ॥ ૨,૨૨.૩૫॥

ન માતા ન પિતાસ્માકં પ્રેતત્વં કર્મભિઃ સ્વકૈઃ ।
પ્રાપ્તાઃ સ્મ સહસા જાતદુઃખોદ્વેગસમાકુલમ્ ॥ ૨,૨૨.૩૬॥

દર્શનેન ચ તે બ્રહ્મન્મુદિતાપ્યાયિતા વયમ્ ।
મુહૂર્તન્તિષ્ઠ વક્ષ્યામિ વૃત્તાન્તં સર્વમાદિતઃ ॥ ૨,૨૨.૩૭॥

અહં પર્યુષિતો નામ એષ સૂચીમુખસ્તથા ।
શીઘ્રગો રોઘ (હ) કશ્ચૈવ પઞ્ચમો લેખકઃ સ્મતૃતઃ ॥ ૨,૨૨.૩૮॥

એવં નામ્ના ચ સર્વે વૈ સમ્પ્રાપ્તાઃ પ્રેતતાં વયમ્ ।
બ્રાહ્મણ ઉવાચ ।
પ્રેતાનાં કર્મજાતાનાં કથં વૈ નામસમ્ભવઃ ।
કિઞ્ચિત્કારણમુદિશ્ય યેન બ્રૂયાઃ સ્વનામકાન્ ॥ ૨,૨૨.૩૯॥

પ્રેતરાજ ઉવાચ ।
મયા સ્વાદુ સદા ભુક્તં દત્તં પર્યુષિતં દ્વિજ ॥ ૨,૨૨.૪૦॥

શીઘ્રં ગચ્છતિ વિપ્રેણ યાચિતઃ ક્ષુધિતેન વૈ ।
એતત્કારણમુદ્દિશ્ય નામ પર્યુષિતં મમ ॥ ૨,૨૨.૪૧॥

શીઘ્રં ગચ્છતિ વિપ્રેણ યાચિતઃ ક્ષુધિતેન વૈ ।
એતત્કારણમુદ્દિશ્ય શીઘ્રગોઽયં દ્વિજોત્તમ ॥ ૨,૨૨.૪૨॥

સૂચિતા બહવોઽનેન વિપ્રા અન્નાધિકાઙ્ક્ષયા ।
એતત્કારણમુદ્દિશ્ય એષ સૂચિમુખઃ સ્મૃતઃ ॥ ૨,૨૨.૪૩॥

એકાકી મિષ્ટમશ્નાતિ પોષ્યવર્ગમૃતે સદા ।
બ્રાહ્મણાનામભાવેન રોધ (હ) કસ્તેન ચોચ્યતે ॥ ૨,૨૨.૪૪॥

પુરાયં મૌનમાસ્થાય યાચિતો વિલિખેદ્ભુવમ્ ।
તેન કર્મવિપાકેન લેખકો નામ ચોચ્યતે ॥ ૨,૨૨.૪૫॥

પ્રેતત્વં કર્મભાવેન પ્રાપ્તં નામાનિ ચ દ્વિજ ।
મેષાનનો લેખકોઽયં રોધ (હ) કઃ પર્વતાનનઃ ॥ ૨,૨૨.૪૬॥

શીઘ્રગઃ પુશુવક્ત્રશ્ચ સૂચકઃ સૂચિવક્ત્રવાન્ ।

દુઃખિતા નિતરાં સ્વમિન્પશ્ય રૂપવિપર્યયમ્ ॥ ૨,૨૨.૪૭॥

કૃત્વા માયામયં રૂપં વિચરામો મહીતલે ।
સર્વે ચ વિકૃતાકારા લમ્બોષ્ઠા વિકૃતાનનાઃ ॥ ૨,૨૨.૪૮॥

બૃહચ્છરીરિણો રૌદ્રા જાતાઃ સ્વેનૈવ કર્મણા ।
એતત્તે સર્વમાખ્યાતં પ્રેતત્વે કારણં મયા ॥ ૨,૨૨.૪૯॥

જ્ઞાનિનોઽપિ વયં સર્વે જાતાઃ સ્મ તવ દર્શનાત્ ।
યત્ર તે શ્રવણે શ્રદ્ધા તત્પૃચ્છ કથયામિ તે ॥ ૨,૨૨.૫૦॥

બ્રાહ્મણ ઉવાચ ।
યે જીવા ભુવિ જીવન્તિ સર્વેઽપ્યાહારમૂલકાઃ ।
યુષ્માકમપિચાહારં શ્રોતુમિચ્છામિ તત્ત્વતઃ ॥ ૨,૨૨.૫૧॥

પ્રેતા ઊચુઃ ।
યદિ તે શ્રવણે શ્રદ્ધા આહારાણાં દ્વિજોત્તમ ।
અસ્માકં તુ મહીભાગ શૃણુત્વં સુસમાહિતઃ ॥ ૨,૨૨.૫૨॥

બ્રાહ્મણ ઉવાચ ।
કથયન્તુ મહાપ્રેતા આહારં ચ પૃથક્પૃથક્ ।
ઇત્યુક્તાં બ્રાહ્મણેનેમમૂચુઃ પ્રેતાઃ પૃથકપૃથક્ ॥ ૨,૨૨.૫૩॥

પ્રેતા ઊચુઃ ।
શૃણુ ચાહારમસ્માકં સર્વસત્ત્વવિગર્હિતમ્ ।
યચ્છ્રુત્વા ગર્હસે બ્રહ્મન્ભૂયોભૂયશ્ચ ગર્હિતમ્ ॥ ૨,૨૨.૫૪॥

શ્લેષ્મમૂત્રપુરીષોત્થં શરીરાણાં મલૈઃ સહ ।
ઉચ્છિષ્ટૈશ્ચૈવ ચાન્યૈશ્ચ પ્રેતાનાં ભોજનં ભવેત્ ॥ ૨,૨૨.૫૫॥

ગૃહાણિ ચાપ્યશૌચાનિ પ્રકીર્ણોપસ્કરાણિ ચ ।
મલિનાનિ પ્રસૂતાનિ પ્રેતા ભુઞ્જન્તિ તત્ર વૈ ॥ ૨,૨૨.૫૬॥

નાસ્તિ સત્યં ગૃહે યત્ર ન શૌચં ન ચ સંયમઃ ।
પતિતૈર્દસ્યુભિઃ સઙ્ગઃ પ્રેતા ભુઞ્જન્તિ તત્ર વૈ ॥ ૨,૨૨.૫૭॥

બલિમન્ત્રવિહીનાનિ હોમહીનાનિ યાનિ ચ ।
સ્વાધ્યાય વ્રતહીનાનિ પ્રેતા ભુઞ્જન્તિ તત્ર વૈ ॥ ૨,૨૨.૫૮॥

ન લજ્જા ન ચ મર્યાદા યદાત્ર સ્ત્રીજિતો ગૃહી ।

ગુરવો યત્ર પૂજ્યા ન પ્રેતા ભુઞ્જન્તિ તત્ર વૈ ॥ ૨,૨૨.૫૯॥

યત્ર લોભસ્તથા ક્રોધો નિદ્રા શોકો ભયં મદઃ ।
આલસ્યં કલહો નિત્યં પ્રેતા ભુઞ્જન્તિ તત્ર વૈ ॥ ૨,૨૨.૬૦॥

ભર્તૃહીના ચ યા નારી પરવીર્યં નિષેવતે ।
બીજં મૂત્રસમાયુક્તં પ્રેતા ભુઞ્જન્તિ તત્તુ વૈ ॥ ૨,૨૨.૬૧॥

લજ્જા મે જાયતે તાત વદતો ભોજનં સ્વકમ્ ।
યત્સ્ત્રીરજો યોનિગતં પ્રેતા ભુઞ્જન્તિ તત્તુ વૈ ॥ ૨,૨૨.૬૨॥

નિર્વિણ્ણાઃ પ્રેતભાવેન પૃચ્છામિ ત્વાં દૃઢવ્રત ।
યથા ન ભવિતા પ્રેતસ્તન્મે વદ તપોધન ।
નિત્યં મૃત્યુર્વરં જન્તોઃ પ્રેતત્વં મા ભવેત્ક્વચિત્ ॥ ૨,૨૨.૬૩॥

બ્રાહ્મણ ઉવાચ ।
ઉપવાસપરો નિત્યં કૃચ્છ્રચાન્દ્રાયણે રતઃ ।
વ્રતૈશ્ચ વિવિધૈઃ પૂતો ન પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૬૪॥

એકાદશ્યાં વ્રતં કુર્વઞ્જાગરેણ સમન્વિતમ્ ।
અપરૈઃ સુકૃતૈઃ પૂતો ન પ્રેતો ન પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૬૫॥

ઇષ્ટ્વા વૈ વાશ્વમેધાદીન્દદ્યાદ્દાનાનિ યો નરઃ ।
આરામોદ્યાનવાપ્યાદેઃ પ્રપાયાશ્ચૈવ કારકઃ ॥ ૨,૨૨.૬૬॥

કુમારીં બ્રાહ્મણાનાં તુ વિવાહયતિ શક્તિતઃ ।
વિદ્યાદોઽભયદશ્ચૈવ ન પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૬૭॥

શૂદ્રાન્નેન તુ ભુક્તેન જઠરસ્થેન યો મૃતઃ ।
દુર્મૃત્યુના મૃતો યશ્ચ સ પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૬૮॥

અયાજ્યયાજકશ્ચૈવ યાજ્યાનાં ચ વિવર્જકઃ ।
કારુભિશ્ચ રતો નિત્યં સ પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૬૯॥

કૃત્વા મદ્યપસમ્પર્કં મદ્યપસ્ત્રીનિષેવણમ્ ।
અજ્ઞાનાદ્ભક્ષયન્માંસં સ પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૭૦॥

દેવદ્રવ્યં ચ બ્રહ્મસ્વં ગુરુદ્રવ્યં તથૈવ ચ ।
કન્યાં દદાતિ શુલ્કેન સ પ્રેતો જાયતે નરઃ ॥ ૨,૨૨.૭૧॥

માતરં ભગિનીં ભાર્યાં સ્નુષાં દુહિતરં તથાઃ ।

અદૃષ્ટદોષાસ્ત્યજતિ સ પ્રેતો જાદૃ ॥ ૨,૨૨.૭૨॥

ન્યાસાપહર્તા મિત્રધ્રુક્પરદારરતઃ સદા ।
વિશ્વાસઘાતી કૂટશ્ચ સ પ્રેદૃ ॥ ૨,૨૨.૭૩॥

ભ્રાતૃધ્રુગ્બ્રહ્મહા ગોઘ્નઃ સુરાપો ગુરુતલ્પગઃ ।
કુલમાર્ગં પરિત્યજ્ય હ્યનૃતોક્તૌ સદા રતઃ ।
હર્તા હેમ્નશ્ચ ભૂમેશ્ચ સ પ્રેદૃ ॥ ૨,૨૨.૭૪॥

ભીષ્મ ઉવાચ ।
એવં બ્રુવતિ વૈ વિપ્રે આકાશે દુન્દુભિસ્વનઃ ।
અપતત્પુષ્પવર્ષં ચ દેવર્મુક્તં દ્વિજોપરિ ॥ ૨,૨૨.૭૫॥

પઞ્ચ દેવવિમાનાનિ પ્રેતાનામાગતાનિ વૈ ।
સ્વર્ગં ગતા વિમાનૈસ્તે દિવ્યૈઃ સમ્પૃચ્છ્ય તં મુનિમ્ ॥ ૨,૨૨.૭૬॥

જ્ઞાનં વિપ્રસ્ય સમ્ભાષાત્પુણ્યસંકીર્તનેન ચ ।
પ્રેતાઃ પાપવિનિર્મુક્તાઃ પરં પદમવાપ્નુયુઃ ॥ ૨,૨૨.૭૭॥

સૂત ઉવાચ ।
ઇદમાખ્યાનકં શ્રુત્વા કમ્પિતોઽશ્વત્થપત્રવત્ ।
માનુષાણાં હિતાર્થાય ગરુડઃ પૃષ્ટવાન્પુનઃ ॥ ૨,૨૨.૭૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
ભીષ્મ યુધિષ્ઠિરસંવાદે પ્રેતત્વોત્પત્તિતન્મુક્તિપેઞ્ચપ્રેતોપાખ્યાન
નિરૂપણં નામ દ્વાવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩
ગરુડ ઉવાચ ।
કિઙ્કિં કુર્વન્તિ વૈ પ્રેતાઃ પિશાચત્વેવ્યવસ્થિતાઃ ।
વદન્તિ વા કદાચિત્કિં તદ્વદસ્વ સુરેશ્વર ॥ ૨,૨૩.૧॥

શ્રીભગવાનુવાચ ।
તેષાં સ્વરૂપં વક્ષ્યામિ ચિહ્નં સ્વપ્નં યથાતથમ્ ।
ક્ષુત્પિપાસાર્દિતાસ્તે વૈ પ્રવિશેયુઃ સ્વવેશ્મનિ ॥ ૨,૨૩.૨॥

પ્રતિષ્ઠા વાયુદેહેષુ શયાનાંસ્તુ સ્વવંશજાન્ ।
તત્ર યચ્છન્તિ લિઙ્ગાનિ દર્શયન્તિ ખગેશ્વર ॥ ૨,૨૩.૩॥

સ્વપુત્રસ્વકલત્રાણિ સ્વબન્ધુન્તત્ર ગચ્છતિ ।
હયો ગજો વૃષો મર્ત્યોદૃશ્યતે વિકૃતાનનઃ ॥ ૨,૨૩.૪॥

શયાનં વિપરીતં તુ આત્માનં ચ વિપર્યયમ્ ।
ઉત્થિતઃ પશ્યતિ યસ્તુ તદ્વિન્દ્યાત્પ્રેતનિર્મિતમ્ ॥ ૨,૨૩.૫॥

સ્વપ્ને નરૌ હિ નિગડૈર્બધ્યતે બહુધા યદિ ।
અન્નં ચ યાચતે સ્વપ્ને કુવેષઃ પૂર્વજો મૃતઃ ॥ ૨,૨૩.૬॥

સ્વપ્ને યો ભુજ્યમાનસ્ય ગૃહીત્વાન્નં પલાયતે ।
આત્મનસ્તુ પરો વાપિ તૃષાર્તસ્તુ જલં પિબેત્ ॥ ૨,૨૩.૭॥

વૃષભારોહણં સ્વપ્ને વૃષભૈઃ સહ ગચ્છતિ ।
ઉત્પત્ય ગગનં યાતિ તીર્થે યાતિ ક્ષુધાતુરઃ ॥ ૨,૨૩.૮॥

સ્વવાચા વદતે યસ્તુ ગોવૃષદ્વિજાવાજિષુ ।
લિઙ્ગે ગજે તથા દેવે ભૂતે પ્રેતે નિશાચરે ॥ ૨,૨૩.૯॥

સ્વપ્નમધ્યે તુ પક્ષીન્દ્ર પ્રેતલિઙ્ગાન્યનેકધા ।
સ્વકલત્રં સ્વબન્ધું વા સ્વસુતં સ્વપતિં વિભુમ્ ।
વિધ્યમાનં મૃતં પશ્યેત્પ્રેતદોષેણ નિશ્ચિતમ્ ॥ ૨,૨૩.૧૦॥

યાચતે યઃ પરં સ્વપ્ને ક્ષુત્તૃડ્ભ્યાં ચ પરિપ્લુતઃ ।
તીર્થે ગત્વા દહેત્પિણ્ડાન્પ્રેતદૌષૈર્ન સંશયઃ ॥ ૨,૨૩.૧૧॥

નિર્ગચ્છેદ્વા ગૃહાદ્વાપિ સ્વપ્ને પુત્રસ્તથા પશુઃ ।
પિતા ભ્રાતા કલત્રં ચ પ્રેતદોષૈસ્તુ પશ્યતિ ॥ ૨,૨૩.૧૨॥

ચિહ્નાન્યેતાનિ પક્ષીન્દ્ર પ્રાયશ્ચિત્તં નિવેદયેત્ ।
કૃત્વા સ્નાનં ગૃહે તીર્થે શ્રીવૃક્ષે તર્પણં જલૈઃ ॥ ૨,૨૩.૧૩॥

કૃષ્ણધાન્યાનિ પૂજાં ચ પ્રદદ્યાદ્વેદપારગે ।
હોમં કુર્યાદ્યથાશક્તિ સમ્પૂર્ણં વાચયેત્સુધીઃ ॥ ૨,૨૩.૧૪॥

એતદ્ધિ શ્રદ્ધયા યસ્તુ પ્રેતલિઙ્ગનિદર્શનમ્ ।
પઠતે શ઼ૃણુતે વાપિ પ્રેતચિહ્નં વિનશ્યતિ ॥ ૨,૨૩.૧૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે પ્રેતકૃતિતદુક્તિતચ્ચિહ્નતદ્વિમુક્ત્યુપાયનિરૂપણં

નામ ત્રયોવિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૪

ગરુડ ઉવાચ ।

નાકાલે મ્રિયતે કશ્ચિદિતિ વેદાનુશાસનમ્ ।
કસ્માન્મૃત્યુમવાપ્નોતિ રાજા વા શ્રોત્રિયોઽપિ વા ॥ ૨,૨૪.૧॥

યદુક્તં બ્રાહ્મણા પૂર્વમનૃતં તદ્ધિ દૃશ્યતે ।
વેદૈરુક્તં તુ યદ્વાક્યં શતં જીવતિ માનુષે ॥ ૨,૨૪.૨॥

જીવન્તિ માનુષે લોકે સર્વે વર્ણા દ્વિજાતયઃ ।
અન્ત્યજામ્લેચ્છજાશ્ચૈવ ખણ્ડે ભારતસંજ્ઞકે ॥ ૨,૨૪.૩॥

ન દૃશ્યતે કલૌ તચ્ચ કસ્માદ્દેવ સમાદિશ ।
(આધાનાન્મૃત્યુમાપ્નોતિ બાલો વા સ્થવિરો યુબા ॥ ૨,૨૪.૪॥

સધનો નિર્ધનો વાપિ સુકુમારઃ સુરૂપવાન્ ।
અવિદ્વાંશ્ચૈવ વિદ્વાંશ્ચ બ્રાહ્મણસ્ત્વિતરો જનઃ ॥ ૨,૨૪.૫॥

તપોરતો યોગશીલો મહાજ્ઞાની ચ યો નરઃ ।
સર્વજ્ઞાનરતઃ શ્રીમાન્ધર્માત્માતુલવિક્રમઃ ॥ ૨,૨૪.૬ ॥ )
સર્વમેતદશષેણ જાયતે વસુધાતલે ।
કસ્માન્મૃત્યુમવાપ્નોતિ રાજા વા શ્રોત્રિયોઽપિ વા ॥ ૨,૨૪.૭॥

શ્રીભગવાનુવાચ ।
સાધુસાધુ મહાપ્રાજ્ઞ યસ્ત્વં ભક્તોઽસિ મે પ્રિયઃ ।
શ્રૂયતાં વચનં ગુહ્યં નાનાદેશવિનાશનમ્ ॥ ૨,૨૪.૮॥

વિધાતૃવિહિતો મૃત્યુઃ શીઘ્રમાદાય ગચ્છતિ ।
તતો વક્ષ્યામિ પક્ષીન્દ્ર કાશ્યપેય મહાદ્યુતે ॥ ૨,૨૪.૯॥

માનુષઃ શતજીવીતિ પુરા વેદેન ભાષિતમ્ ।
વિકર્મણઃ પ્રભાવેણ શીઘ્રં ચાપિ વિનશ્યતિ ॥ ૨,૨૪.૧૦॥

વેદાનભ્યસનેનૈવ કુલાચારં ન સેવતે ।
આલસ્યાત્કર્મણાં ત્યાગો નિષિદ્ધેઽપ્યાદરઃ સદા ॥ ૨,૨૪.૧૧॥

યત્ર તત્ર ગૃહેઽશ્નાતિ પરક્ષેત્રરતસ્તથા ।

એતૈરન્યૈર્મહાદોષૈર્જાયતે ચાયુષઃ ક્ષયઃ ॥ ૨,૨૪.૧૨॥

અશ્રદ્દધાનમશુચિં નાસ્તિકં ત્યક્તમઙ્ગલમ્ ।
પરદ્રોહાનૃતરં બ્રાહ્મણં યત (મ) મન્દિરમ્ ॥ ૨,૨૪.૧૩॥

અરક્ષિતારં રાજાનં નિત્યં ધર્મવિવર્જિતમ્ ।
ક્રૂરં વ્યસનિનં મૂર્ખં વેદવાદબહિષ્કૃતમ્ ।
પ્રજાપીડનકર્તારં રાજાનં યમશાસનમ્ ॥ ૨,૨૪.૧૪॥

પ્રાપયન્તિ વશં મૃત્યોસ્તતો યાતિ ચ યાતનામ્ ।
સ્વકર્માણિ પરિત્યજ્ય મુખ્યવૃત્તાનિ યાનિ ચ ॥ ૨,૨૪.૧૫॥

પરકર્મરતો નિત્યં યમલોકં સ ગચ્છતિ ।
શૂદ્રઃ કરોતિઃ યત્કિઞ્ચિદ્દ્વિજશુશ્રૂષણં વિના ॥ ૨,૨૪.૧૬॥

ઉત્તમાધમમધ્યે વા યમલોકે સ પચ્યતે ।
સ્નાનં દાનં જપો હોમો સ્વાધ્યાયો દવર્તાચ્ચનમ્ ॥ ૨,૨૪.૧૭॥

યસ્મિન્દિને ન સેવ્યન્તે સ વૃથા દિવસો નૃણામ્ ।
અનિત્યમધ્રુવં દેહમનાધારં રસોદ્ભવમ્ ॥ ૨,૨૪.૧૮॥

અન્નોદકમયે દેહે ગુણાનેતાન્વદામ્યહમ્ ।
યત્પ્રાતઃ સંસ્કૃતં સાયં નૂનમન્નં વિનશ્યતિ ॥ ૨,૨૪.૧૯॥

તદીયરસસમ્પુષ્ટકાયે કા બત નિત્યતા ।
ગતં જ્ઞાત્વા તુ પક્ષીન્દ્ર વપુરર્ધં સ્વકર્મભિઃ ॥ ૨,૨૪.૨૦॥

નરઃ પાપવિનાશાય કુર્વીત પરમૌષધમ્ ।
દેહઃ કિમન્નદાતુઃ સ્વિન્નિષેક્તુર્માતુરેવ વા ॥ ૨,૨૪.૨૧॥

ઉભયોર્વા પ્રભોર્વાપિ બાલનોગ્નેઃ શુનોઽપિ વા ।
કસ્તત્ર પરમો યજ્ઞઃ કૃમિવિડ્ભસ્મસંજ્ઞકે ॥ ૨,૨૪.૨૨॥

કર્તવ્યઃ પરમો યત્નઃ પાતકસ્ય વિનાશને ।
અનેકભવસમ્ભૂતં પાતકં તુ ત્રિધા કૃતમ્ ॥ ૨,૨૪.૨૩॥

યદા પ્રાપ્નોતિ માનુષ્યં તદા સર્વં તપત્યપિ ।
સર્વજન્માનિ સંસ્મૃત્ય વિષાદી કૃતચેતનઃ ॥ ૨,૨૪.૨૪॥

અવેક્ષ્ય ગર્ભવાસાંશ્ચ કર્મજા ગતયસ્તથા ।
માનુષોદરવાસી ચેત્તદા ભવતિ પાતકી ॥ ૨,૨૪.૨૫॥

અણ્ડજાદિષુ ભૂતેષુ યત્રયત્ર પ્રસર્પતિ ।
આધયો વ્યાધયઃ ક્લેશા જરારૂપવિપર્યયઃ ॥ ૨,૨૪.૨૬॥

ગર્ભવાસાદ્વિનિર્મુક્તસ્ત્વજ્ઞાનતિમિરાવૃતઃ ।
ન જાનાતિઃ ખગશ્રેષ્ઠ બાલભાવં સમાશ્રિતઃ ॥ ૨,૨૪.૨૭॥

યૌવને તિમિરાન્ધશ્ચ યઃ પશ્યતિ સ મુક્તિભાક્ ।
આધાનાન્મૃત્યુમાપ્નોતિ બાલો વા સ્થવિરો યુવા ॥ ૨,૨૪.૨૮॥

સધનો નિર્ધનશ્ચૈવ સુકુમારઃ કુરૂપવાન્ ।
અવિદ્વાંશ્ચૈવ વિદ્વાંશ્ચ બ્રાહ્મણાસ્ત્વિતરો જનઃ ॥ ૨,૨૪.૨૯॥

તપોરતો યોગશીલો મહાજ્ઞાની ચ યો નરઃ ।
મહાદાનરતઃ શ્રીમાન્ધર્માત્માતુલવિક્રમઃ ।
વિના માનુપદેહં તુ સુખં દુઃખં ન વિન્દતિ ॥ ૨,૨૪.૩૦॥

પ્રાકૃતૈઃ કર્મપાશૈસ્તુ મૃત્યુમાપ્નોતિ માનવઃ ।
આધાનાત્પઞ્ચ વર્ષાણિ સ્વલ્પપાપૈર્વિપચ્યતે ॥ ૨,૨૪.૩૧॥

પઞ્ચવર્ષાધિકો ભૂત્વા મહાપાપૈર્વિપચ્યતે ।
યોનિં પૂરયતે યસ્માન્મૃતોઽપ્યાયાતિ યાતિ ચ ॥ ૨,૨૪.૩૨॥

મૃતો દાનપ્રભાવેણ જીવન્મર્ત્યશ્ચિરં ભુવિ ।
સૂત ઉવાચ ।
ઇતિ કૃષ્ણવચઃ શ્રુત્વા ગરુડો વાક્યમબ્રવીત્ ॥ ૨,૨૪.૩૩॥

ગરુડ ઉવાચ ।
મૃતે બાલે કથં કુર્યાત્પિણ્ડદાનાદિકાઃ ક્રિયાઃ ।
ગર્ભેષુ ચ વિપન્નાનામાચૂડાકરણાચ્છિશોઃ ॥ ૨,૨૪.૩૪॥

કથં કિં કેન દાતવ્યં મૃતાન્તે કો વિધિઃ સ્મૃતઃ ।
ગરુડોક્તમિતિ શ્રુત્વા વિષ્ણુર્વાક્યમથાબ્રવીત્ ॥ ૨,૨૪.૩૫॥

શ્રીવિષ્ણુરુવાચ ।
યદિ ગર્ભો વિપદ્યતે સ્ત્રવતે વાપિ યોષિતઃ ।
યાવન્માસં સ્થિતો ગર્ભસ્તાવદ્દિનમશૌચકમ્ ॥ ૨,૨૪.૩૬॥

તસ્ય કિઞ્ચિન્ન કર્તવ્યમાત્મનઃ શ્રેય ઇચ્છતા ।

તતો જાતે વિપન્ને તુ આ ચૂડાકરણાચ્છિશોઃ ॥ ૨,૨૪.૩૭॥

દુગ્ધં ભોજ્યં તાશક્તિ બાલાનાં ચ પ્રદીયતે ।
આ ચૂડાત્પઞ્ચવર્ષે તુ દેહદાહો વિધીયતે ॥ ૨,૨૪.૩૮॥

દુગ્ધં તસ્ય પ્રદેયં સ્યાદ્બાલાનાં ભોજનં શુભમ્ ।
પઞ્ચવર્ષાધિકે પ્રેતે સ્વજાતિવિહિતાનિ ચ ॥ ૨,૨૪.૩૯॥

કુર્યાત્કર્માણિ સર્વાણિ ચોદકુમ્ભાદિ પાયસમ્ ।
દાતવ્યં તુ ખગશ્રેષ્ઠ ઋણસમ્બન્ધકસ્તુ સઃ ॥ ૨,૨૪.૪૦॥

જાતસ્ય હિ ધ્રુવો મૃત્યુર્ધ્રુવં જન્મ મૃતસ્ય ચ ।
કર્તવ્યં પક્ષિશાર્દૂલ પુનર્દેહક્ષયાય વૈ ॥ ૨,૨૪.૪૧॥

તસ્મૈ યદ્રોચતે દેયમદત્ત્વા નિર્ધને કુલે ।
સ્વલ્પાયુર્નિર્ધનો ભૂત્વા રતિભક્તિવિવર્જિતઃ ॥ ૨,૨૪.૪૨॥

પુનર્જન્માપ્નુયાન્મર્ત્યસ્તસ્માદ્દેયમૃતે શિશોઃ ।
પુરાણે ગીયતે ગાથા સર્વથા પ્રતિભાતિ મે ॥ ૨,૨૪.૪૩॥

મિષ્ટાન્નં ભોજનં દેયં દાને શક્તિસ્તુ દુર્લભા ।
ભોજ્યે ભોજનશક્તિશ્ચ રતિશક્તિર્વરસ્ત્રિયઃ ॥ ૨,૨૪.૪૪॥

વિભવે દાનશક્તિશ્ચ નાલ્પસ્ય તપસઃ ફલમ્ ।
દાનાદ્ભોગાનવાપ્નોતિ સૌખ્યં તીર્થસ્ય સેવનાત્ ।
સુભાષણાન્મૃતો યસ્તુ સ વિદ્વાન્ધર્મવિત્તમઃ ॥ ૨,૨૪.૪૫॥

અદત્તદાનાચ્ચ ભવેદ્દરિદ્રો દરિદ્રભાવાચ્ચ કરોતિપાપમ્ ।
પાપપ્રભાવાન્નરકં પ્રયાતિ પુનર્દરિદ્રઃ પુનરેવ પાપી ॥ ૨,૨૪.૪૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશાખ્યે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદેઽલ્પાયુર્મરણહે તુબાલાન્ત્યેષ્ટ્યોર્નિરૂપણં નામ
ચતુર્વિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૫
શ્રીવિષ્ણુરુવાચ ।
અતઃ પરં પ્રવક્ષ્યામિ પુરુષસ્ત્રી વિનિર્ણયમ્ ।
જીવન્વાપિ મૃતો વાપિ પઞ્ચવર્ષાધિકોઽપિ વા ॥ ૨,૨૫.૧॥

પૂર્ણે તુ પઞ્ચમે વર્ષે પુમાંશ્ચૈવ પ્રતિષ્ઠિતઃ ।
સર્વેન્દ્રિયાણિ જાનાતિ રૂપારૂપવિપર્યયૌ ॥ ૨,૨૫.૨॥

પૂર્વકર્મવિપાકેન પ્રાણિનાં વધબન્ધનમ્ ।
વિપ્રાદીનન્ત્યજાન્સર્વાન્પાપં મારયતિ ધ્રુવમ્ ॥ ૨,૨૫.૩॥

ગર્ભે નષ્ટે ક્રિયા નાસ્તિ દુગ્ધં દેયં મૃતે શિશૌ ।
પરં ચ પાયસં ક્ષીરં દદ્યાદ્બલવિપત્તિતઃ ॥ ૨,૨૫.૪॥

એકાદશાહં દ્વાદશાહં વૃષં વૃષવિધિં વિના ।
મહાદાનવિહીનં ચ કુમારે કૃત્યમાદિશેત્ ॥ ૨,૨૫.૫॥

કુમારાણાં ચૈવ બાલાનાં ભોજનં વસ્ત્રવેષ્ટનમ્ ।
બાલે વા તરુણે વૃદ્ધે ઘટો ભવતિ વૈ મૃતે ॥ ૨,૨૫.૬॥

ભૂમૌ વિનિઃ ક્ષિપેદ્બાલં દ્વિમાસોનં દ્વિવાર્ષિકમ્ ।
તતઃ પરં ખગશ્રેષ્ઠ દેહદાહો વિધીયતે ॥ ૨,૨૫.૭॥

શિશુરા દન્તજનનાદ્બાલઃ સ્યાદ્યાવદાશિખમ્ ।
કથ્યતે સર્વશાસ્ત્રેષુ કુમારો મૌઞ્જિબન્ધનાત્ ॥ ૨,૨૫.૮॥

શૂદ્રાદીનાં કથં કુર્યાત્સંશયો મૌઞ્જિવર્જનાત્ ।
ગર્ભાચ્ચ નવમં હિત્વા શિશુરામાસષોડશમ્ ॥ ૨,૨૫.૯॥

બાલશ્ચાથ પરઞ્જ્ઞેય આમાસસપ્તવિંશતિ ।
આ પઞ્ચ વર્ષાત્કૌમારઃ પૌગણ્ડો નવહાંયનઃ ॥ ૨,૨૫.૧૦॥

કિશોરઃ ષોડશાબ્દઃ સ્યાત્તતો યૌવનમાદિશેત્ ।
મૃતોઽપિ પઞ્ચમે વર્ષે અવૃતઃ સવૃતોઽપિ વા ॥ ૨,૨૫.૧૧॥

પૂર્વોક્તમેવ કર્તવ્યમીહતે દશપિણ્ડકમ્ ।
સ્વલ્પકર્મપ્રસઙ્ગાચ્ચ સ્વલ્પાદ્વિષયબન્ધનાત્ ॥ ૨,૨૫.૧૨॥

સ્વલ્પાદ્વપુષિ વસ્ત્રાચ્ચ ક્રિયાં સ્વલ્પામપીચ્છતિ ।
યાવદુપચયો જન્તુર્યાવદ્વિષયવેષ્ટિતઃ ॥ ૨,૨૫.૧૩॥

યદ્યદ્યસ્યોપજીવ્યં સ્યાત્તત્તદ્દેયમિહેચ્છતિ ।
બ્રહ્મબીજોદ્ભવાઃ પુત્રા દેવર્ષીણાં ચ વલ્લભાઃ ॥ ૨,૨૫.૧૪॥

યમેન યમદૂતૈશ્ચ શાસ્યન્તે નિશ્ચિતં ખગ ।
બાલો વૃદ્ધો યુબા વાપિ ઘટમિચ્છન્તિ દેહિનઃ ॥ ૨,૨૫.૧૫॥

સુખં દુઃખં સદા વેત્તિ દેહી વૈ સર્વગસ્ત્વિહ ।
પરિત્યજ્ય તદાત્માનં જીર્ણાં ત્વચમિવોરગઃ ॥ ૨,૨૫.૧૬॥

અઙ્ગુષ્ઠમાત્રઃ પુરુષો વાયુભૂતઃ ક્ષુધાન્વિતઃ ।
તસ્માદ્દેયાનિ દાનાનિ મૃતે બાલે સુનિશ્ચિતમ્ ॥ ૨,૨૫.૧૭॥

જન્મતઃ પઞ્ચ વર્ષાણિ ભુઙ્ક્તે દત્તમસંસ્કૃતમ્ ।
પઞ્ચવર્ષાધિકે બાલે વિપત્તિર્યદિ જાયતે ॥ ૨,૨૫.૧૮॥

વૃષોત્સર્ગાદિકં કર્મ સપિણ્ડીકરણં વિના ।
દ્વાદશે હનિ સમ્પ્રાપ્તે કુર્યાચ્છ્રાદ્ધાનિ ષોડશ ॥ ૨,૨૫.૧૯॥

પાયસેન ગુડેનાપિ પિણ્ડાન્દદ્યાદ્યથાક્રમમ્ ।
ઉદકુમ્ભપ્રદાનં ચ પદ (ઉપ) દાનાનિ યાનિ ચ ॥ ૨,૨૫.૨૦॥

ભોજનાનિ દ્વિજે દદ્યાન્મહાદાનાદિ શક્તિતઃ ।
દીપદાનાદિ યત્કિઞ્ચિત્પઞ્ચવર્ષાધિકે સદા ॥ ૨,૨૫.૨૧॥

કર્તવ્યં ચ ખગશ્રેષ્ઠ વ્રતાત્પ્રાક્પ્રેતતૃપ્તયે ।
યદા નક્રિયતે સર્વં મુદ્ગલત્વં સ ગચ્છતિ ॥ ૨,૨૫.૨૨॥

વ્રતાત્પ્રાઙ્ગેવ દેયં તુ તતઃ પિતૃગણસ્ય ચ ।
સ્વાહાકારેણ વૈ કુર્યાદિકોદ્દિષ્ટાનિ ષોડશ ॥ ૨,૨૫.૨૩॥

ઋજુદર્ભૈસ્તિલૈઃ શુક્લૈઃ પ્રાચીનાવીતિ નિશ્ચિતમ્ ।
અપસવ્યં ચ કર્તવ્યં કૃતે યાન્તિ પરાં ગતિમ્ ॥ ૨,૨૫.૨૪॥

પુનશ્ચિરાયુષો ભૂત્વા જાયન્તે સ્વકુલે ધ્રુવમ્ ।
સર્વસૌખ્યપ્રદઃ પુત્રઃ પિત્રોઃ પ્રીતિવિવર્ધનઃ ॥ ૨,૨૫.૨૫॥

આકાશમેકં હિ યથા ચન્દ્રાદિત્યૌ યથૈકતઃ ।
ઘટાદિષુ પૃથક્સર્વં પશ્ય રૂપં ચ તત્સમમ્ ॥ ૨,૨૫.૨૬॥

આત્મા તથૈવ સર્વેષુ પુત્રેષુ વિચરેત્સદા ।
યા યસ્ય પ્રકૃતિઃ પૂર્વં શુક્રશોણિતસઙ્ગમે ॥ ૨,૨૫.૨૭॥

સા (સ) તેન ભાવયોગેન પુત્રાસ્તત્કર્મકારિણઃ ।
પિતૃરૂપં સમાદાય કસ્યચિજ્જાયતે સુતઃ ॥ ૨,૨૫.૨૮॥

પિતૃતઃ કોઽપિ રૂપાઢ્યો ગુણજ્ઞો દાનતત્પરઃ ।

સદૃશઃ કોઽપિ લોકેઽસ્મિન્ન ભૂતો ન ભવિષ્યતિ ॥ ૨,૨૫.૨૯॥

અન્ધાદન્ધો ન ભવતિ મૂકાન્મૂકો ન જાયતે ।
બધિરાદ્બધિરો નૈવ વિદ્યાવાન્વિદુષો ન હિ ।
અનુરૂપા ન દૃશ્યન્તે મદીયં વચનં શ‍ૃણુ ॥ ૨,૨૫.૩૦॥

ગરુડ ઉવાચ ।
ઔરસક્ષેત્રજાદ્યાશ્ચ પુત્રા દશવિધાઃ સ્મૃતાઃ ।
સંગૃહીતઃ સુતો યસ્તુ દાસીપુત્રશ્ચ તેન કિમ્ ॥ ૨,૨૫.૩૧॥

કાઙ્ગાં ગતિમવાપ્નોતિ જાયો મૃત્યુવશં ગતઃ ।
ભવેન્ન દુહિતા યસ્ય ન દૌહિત્રો ન વા સુતઃ ॥ ૨,૨૫.૩૨॥

શ્રાદ્ધં તસ્ય કથં કાર્યં વિધિના કેન તદ્ભવેત્ ।
શ્રીભગવાનુવાચ ।
મુખં દૃષ્ટ્વા તુ પુત્રસ્ય મુચ્યતે પૈતૃકાદૃણાત્ ॥ ૨,૨૫.૩૩॥

પૌત્રસ્ય દર્શનાજ્જન્તુર્મુચ્યતે ચઃ ઋણત્રયાત્ ।
લોકાનન્ત્યં દિવઃ પ્રાપ્તિઃ પુત્રપૌત્ર પ્રપૌત્રકૈઃ ॥ ૨,૨૫.૩૪॥

અન્યક્ષેત્રોદ્ભવાદ્યા યે ભુક્તિમાત્રપ્રદાઃ સુતાઃ ।
કુર્વીત પાર્વણં શ્રાદ્ધમારૈસો વિધિવત્સુતઃ ॥ ૨,૨૫.૩૫॥

કુર્વન્ત્યન્યે સુતાઃ શ્રાદ્ધમે કોદ્દિષ્ટં ન પાર્વણમ્ ।
બ્રાહ્મોઢાજસ્તૂન્નયતિ સંગૃહીતસ્ત્વધો નયેત્ ।
શ્રાદ્ધં સાંવત્સરં કુર્વઞ્જાયતે નરકાય વૈ ॥ ૨,૨૫.૩૬॥

સર્વદાનાનિ દેયાનિ હ્યન્ન દાનાદૃતે ખગ ।
સંગૃહીતઃ સુતઃ કુર્યાદેકોદ્દિષ્ટં ન પાર્વણમ્ ॥ ૨,૨૫.૩૭॥

પ્રત્યબ્દં પિતૃમાતૃભ્યાં શ્રાદ્ધં દત્ત્વા ન લિપ્યતે ।
એકોદ્દિષ્ટં પરિત્યજ્ય પાર્વણં કુરુતે યદિ ॥ ૨,૨૫.૩૮॥

આત્માનં ચ પિતૄંશ્ચૈવ સ નયેદ્યમમન્દિરમ્ ।
સંગૃહીતસ્તુ યઃ કેચિદ્દાસીપુત્રાદયશ્ચ યે ॥ ૨,૨૫.૩૯॥

તીર્થે કુર્યુઃ પિતૃશ્રાદ્ધં દાનં (માસં) દદ્યુર્દ્વિજન્મને ।
સંગૃહીતસુતો ભૂત્વા પાકં વા યઃ પ્રયચ્છતિ ॥ ૨,૨૫.૪૦॥

વૃથા શ્રાદ્ધં વિજાનીયાચ્છૂદ્રાન્નેન યથા દ્વિજઃ ।

ન પ્રીણયતિ તચ્છ્રાદ્ધં પિતામહમુખાન્પિતૄન્ ।
એવં જ્ઞાત્વા સ્વગશ્રેષ્ઠ હીનજાતીન્સુતાંસ્ત્યજેત્ ॥ ૨,૨૫.૪૧॥

(બ્રાહ્મણ્યાં બ્રાહ્મણાજ્જાતશ્ચાણ્ડાલાદધમઃ સ્મૃતઃ) ।
યસ્તુ પ્રવ્રજિતાજ્જાતો બ્રાહ્મણ્યાં શૂદ્રતશ્ચ યઃ ॥ ૨,૨૫.૪૨॥

દ્વાવેતૌ વિદ્ધિ ચાણ્ડાલૌ સગોત્રાદ્યસ્તુ જાયતે ।
સ્વર્યાતિવિહિતાન્પુત્રઃ સમુત્પાદ્ય ખગેશ્વર ॥ ૨,૨૫.૪૩॥

તૈઃ સુવૃત્તૈઃ સુખં પ્રાપ્યં કુવૃત્તૈર્નરકં વ્રજેત્ ।
હીનજાતિસમુદ્ભૂતૈઃ સુવૃત્તૈઃ સુખમેધતે ॥ ૨,૨૫.૪૪॥

કલિકલુષવિમુક્તઃ પૂજિતઃ સિદ્ધસઙ્ઘૈરમરચમરમાલાવીજ્યમાનોઽપ્સરોભિઃ ।
પિતૃશતમપિ બન્ધૂન્પુત્રપૌત્રપ્રપૌત્રાનપિ નરકનિમગ્નાનુદ્ધરેદેક એવ ॥ ૨,૨૫.૪૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધમકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસવાદે મૃતબાલાન્ત્યેષ્ટિભિન્નાભિન્નસુતકૃતાન્ત્યેષ્ટ્યોર્વર્ણનં
નામ પઞ્ચવિંશોઽધ્યાયઃ

---

શ્રીગરુડમાહપુરાણમ્- ૨૬
ગરુડ ઉવાચ ।
સત્યં બ્રૂહિ સુરશ્રેષ્ઠ કૃપાં કૃત્વા મયિ પ્રભો ।
મૃતાનાં ચૈવ જન્તૂનાં કદા કુર્યાત્સપિણ્ડનમ્ ॥ ૨,૨૬.૧॥

સપિણ્ડત્વે કુતો યાન્તિ અસપિણ્ડે કુતો ગતિઃ ।
કેનૈવ સહપિણ્ડત્વં સ્ત્રીપુસોર્વક્તુમર્હસિ ॥ ૨,૨૬.૨॥

સ્ત્રીપુમાંશૌ સહૈકત્વં પાપ્નુતઃ કથમુત્તમમ્ ।
જીવેદ્ભર્તરિ નારીણાં સપિણ્ડીકરણં કુતઃ ॥ ૨,૨૬.૩॥

ભર્તૃલોકં કથં યાન્તિ સ્વર્ગલોકં સુરેશ્વર ।
અગ્ન્યારોહે કથં શ્રાદ્ધં વૃષોત્સર્ગઃ કથં ભવેત્ ॥ ૨,૨૬.૪॥

ઘટદાનં કથં કાર્યં સપિણ્ડીકરણે કૃતે ।
કથયસ્વ પ્રસાદેન હીતાય જગતાં પ્રભો ॥ ૨,૨૬.૫॥

શ્રીભગવાનુવાચ ।
યથાવત્કથયિષ્યામિ સપિણ્ડીકરણં ખગ ।

વર્ષં યાવત્ખગશ્રેષ્ઠ યદાચરતિ માનવઃ ॥ ૨,૨૬.૬॥

સપિણ્ડને તતો વૃત્તે પિતૃલોકં સ ગચ્છતિ ।
તસ્માત્પુત્રેણ કર્તવ્યં સપિણ્ડીકરણં પિતુઃ ॥ ૨,૨૬.૭॥

સંવત્સરે તુ સમ્પૂર્ણે કુર્યાત્પિણ્ડ પ્રવેશનમ્ ।
પિણ્ડપ્રવેશવિધના તસ્ય નિત્યં મૃતાહ્નિકમ્ ॥ ૨,૨૬.૮॥

નિશ્ચિતં પક્ષિશાર્દૂલ વર્ષાન્તે પિણ્ડમેલનમ્ ।
સહપિણ્ડે કૃતે પ્રેતસ્તતો યાતિ પરાં ગતિમ્ ।
તન્નામ સમ્પરિત્યજ્ય તતઃ પિતૃગણો ભવેત્ ॥ ૨,૨૬.૯॥

ત્રિપક્ષે વાપિ ષણ્માસે મેલયેત્પ્રપિતામહૈઃ ।
જ્ઞાત્વા વૃદ્ધિવિવાહાદિ સ્વગોત્રવિહિતાનિ ચ ॥ ૨,૨૬.૧૦॥

વિવાહં નૈવ કુર્વીત મૃતે ચ ગૃહમેધિનિ ।
ભિક્ષુર્ભિક્ષાં ન ગૃહ્ણાતિ યાવત્કુર્યાત્સપિણ્ડનમ્ ॥ ૨,૨૬.૧૧॥

સ્વગોત્રેઽપ્યશુચિસ્તાવદ્યાવત્પિણ્ડં ન મેલયેત્ ।
મેલનાત્પ્રેતશબ્દસ્તુ નિવર્તેત ખગેશ્વર ॥ ૨,૨૬.૧૨॥

આનન્ત્યાત્કુલધર્માણાં પુંસાઞ્ચૈવાયુષઃ ક્ષયાત્ ।
અસ્થિરત્વાચ્છરીરસ્ય દ્વાદશાહઃ પ્રશસ્યતે ॥ ૨,૨૬.૧૩॥

નિરગ્નિકઃ સાગ્નિકો વા દ્વાદશાહે સપિણ્ડયેત્ ॥ ૨,૨૬.૧૪॥

દ્વાદશાહે ત્રિપક્ષે વા ષણ્માસે વત્સરેઽપિ વા ।
સપિણ્ડીકરણં પ્રોક્તમૃષિભિસ્તત્ત્વદર્શિભિઃ ॥ ૨,૨૬.૧૫॥

સપુત્રસ્ય ન કર્તવ્યમેકોદ્દિષ્ટં કદાચન ।
સપિણ્ડીકરણાદૂર્ધ્વં યત્રયત્ર પ્રદીયતે ॥ ૨,૨૬.૧૬॥

તત્રતત્ર ત્રયં કાર્યમન્યથા પિતૃઘાતકઃ ।
ત્રિભિઃ કુર્યાદશક્તશ્ચ પાર્વણં મુનિનોદિતમ્ ॥ ૨,૨૬.૧૭॥

તદ્દિને તદ્દિને કુર્યાત્પિતામહમુખાન્યતઃ ।
અજ્ઞાનાદ્દિનમાસાનાં તસ્માત્પાર્વણમિષ્યતે ॥ ૨,૨૬.૧૮॥

અનુત્પન્નશરીરસ્ય ન દાનં પિતૃભિઃ સહ ।
એતૈઃ ષોડશભિઃ શ્રાદ્ધૈઃ પ્રેતો મુક્તસ્તુ જાયતે ॥ ૨,૨૬.૧૯॥

અપુત્રસ્ય સપિણ્ડત્વં નૈવ કુર્યાત્સ્ત્રિયોઽપિ વા ।
યાવજ્જીવ ચ સદ્ભર્ત્ર્યા ન કુર્યાત્સહપિણ્ડતામ્ ॥ ૨,૨૬.૨૦॥

બ્રાહ્માદિષુ વિવાહેષુ યા વધૂરિહ સંસ્કૃતા ।
ભર્તૃગોત્રેણ કર્તવ્યાસ્તસ્યાઃ પિણ્ડોદકક્રિયાઃ ॥ ૨,૨૬.૨૧॥

આસુરાદિવિવા હેષુ યા વ્યૂઢા કન્યકા ભવેત્ ।
તસ્યાસ્તુ પિતૃગોત્રેણ કુર્યાત્પિણ્ડોદકક્રિયાઃ ॥ ૨,૨૬.૨૨॥

પિતુઃ પુત્રેણ કર્તવ્યં સપિણ્ડીકરણં સદા ।
પુત્રાભાવે તુ પત્ની સ્યાત્પત્ન્યભાવે સહોદરઃ ॥ ૨,૨૬.૨૩॥

ભ્રાતા વા ભ્રાતૃપુત્રો વા સપિણ્ડઃ શિષ્ય એવ વા ।
સપિણ્ડનક્રિયાં કૃત્વા કુર્યાન્નાન્દીમુખં તતઃ ॥ ૨,૨૬.૨૪॥

જ્યેષ્ઠસ્યૈવ કનિષ્ઠેન ભ્રાતૃપુત્રેણ ભાર્યયા ।
સપિણ્ડીકરણં કાર્યં પુત્રહીને નરે ખગ ॥ ૨,૨૬.૨૫॥

ભ્રાતૃણામેકજાતાનામેકશ્ચેત્પુત્રવાન્ભવેત્ ।
સર્વેતે તેન પુત્રેણ પુત્રિણો મનુરબ્રવીત્ ॥ ૨,૨૬.૨૬॥

સર્વેષાં પુત્રહીનાનાં પત્ની કુર્યાત્સપિણ્ડનમ્ ।
ઋત્વિજા કારયેદ્વાપિ પુરોહિતમથાપિ વા ॥ ૨,૨૬.૨૭॥

કૃતચૂડોપનીતશ્ચ પિતુઃ શ્રાદ્ધં સમાચરેત્ ।
ઉચ્ચારયેત્સ્વધાકારં ન તુ વેદાક્ષરાણ્યસૌ ॥ ૨,૨૬.૨૮॥

ભર્ત્રાદિભિસ્ત્રિભિઃ કાર્યં સપિણ્ડીકરણં સ્ત્રિયાઃ ।
પિતૃવ્યભ્રાતૃપુત્રેણ સોદરેણ કનીયસા ॥ ૨,૨૬.૨૯॥

અર્વાક્સંવત્સરાત્સન્ધૌ પૂર્ણે સંવત્સરેઽપિ વા ।
યે સપિણ્ડીકૃતાઃ પ્રેતાસ્તેષાં ન સ્યાત્પૃથક્ક્રિયા ॥ ૨,૨૬.૩૦॥

સપિણ્ડને કૃતે વત્સ પૃથક્ત્વં તુ વિગર્હિતમ્ ।
યસ્તુ કુર્યાત્પૃથક્પિણ્ડં પિતૃહા સોઽભિજાયતે ॥ ૨,૨૬.૩૧॥

સપિણ્ડીકરણે વૃત્તે પૃથક્ત્વં નોપપદ્યતે ।
પૃથક્પિણ્ડે કૃતે પશ્ચાત્પુનઃ કુર્યાત્સપિણ્ડનમ્ ॥ ૨,૨૬.૩૨॥

સપિણ્ડીકરણં કૃત્વા એકોદ્દિષ્ટં કરોતિ યઃ ।
આત્માનં ચ તથા પ્રેતં સ નયેદ્યમશાસનમ્ ॥ ૨,૨૬.૩૩॥

વર્ષં યાવત્ક્રિયા કાર્યા નામગોત્રેણ ધીમતા ।
ઘટાદિ ભોજનં નિત્યં પદદાનાનિ યાનિ ચ ।
સપિણ્ડીકરણે વૃત્તે એકસ્યૈવ તુ દાપયેત્ ॥ ૨,૨૬.૩૪॥

અન્નં પાનીયસહિતં સંખ્યાં કૃત્વાબ્દિકસ્ય ચ ।
દાતવ્યં બ્રાહ્મણે પક્ષિગ્જલપૂર્ણઘટાદિકમ્ ॥ ૨,૨૬.૩૫॥

પિણ્ડાન્તે તસ્ય સકલા વર્ષવૃત્તિઃ સ્વશક્તિતઃ ।
દિવ્યદેહો વિમાનસ્થઃ સુખં યાતિ યમાલયમ્ ॥ ૨,૨૬.૩૬॥

જીવમાને ચ પિતરિ ન હિ પુત્રે સપિણ્ડતા ।
સ્ત્રીણાં સપિણ્ડનં નાસ્તિ તથા ભર્તરિ જીવતિ ॥ ૨,૨૬.૩૭॥

હુતાશં યા સમારૂઢા ચતુર્થેઽહ્નિ પતિવ્રતા ।
તસ્યા ભર્તૃદિને કાર્યં વૃષોત્સર્ગાદિકં ચ યત્ ॥ ૨,૨૬.૩૮॥

પુત્રિકા પતિગોત્રા સ્યાદધસ્તાત્પુત્રજન્મનઃ ।
પુત્રોત્પત્તેઃ પરસ્તાત્સા પિતૃગોત્રં વ્રજેત્પુનઃ ॥ ૨,૨૬.૩૯॥

પતિપત્ન્યોઃ સદૈકત્વં હુતાશં યાધિરોહતિ ।
પુત્રેણૈવ પૃથક્શ્રાદ્ધં ક્ષયાખ્યે તસ્ય વાસરે ॥ ૨,૨૬.૪૦॥

અપુત્રૌ ચેન્મૃતૌ સ્યાતામેકચિત્યાં સમેઽહનિ ।
પૃથક્શ્રાદ્ધાનિ કુર્વીત સાપિણ્ડ્યં પતિના સહ ॥ ૨,૨૬.૪૧॥

પૃથક્પૃથક્ચ પિણ્ડેન દમ્પતી પતિના સહ ।
ન લિપ્યતે મહાદોષૈરેતત્સત્યં વચો મમ ॥ ૨,૨૬.૪૨॥

એકચિત્યાં સમારૂઢૌ દમ્પતી નિધનં ગતૌ ।
એકપાકં પ્રકુર્વીત પિણ્ડાન્દદ્યાત્પૃથક્પૃથક્ ॥ ૨,૨૬.૪૩॥

એકાદશે વૃષોત્સર્ગં પ્રેતશ્રાદ્ધાનિ ષોડશ ।
ઘટાદિપદદાનાનિ મહાદાનાનિ યાનિ ચ ।
વર્ષં યાવત્પૃથક્કુર્યાત્પ્રેતસ્તૃપ્તિં વ્રજેચ્ચિરમ્ ॥ ૨,૨૬.૪૪॥

એકગોત્રે મૃતાનાં તુ સ્ત્રિયા વા પુરુષસ્ય વા ।
સ્થણ્ડિલં ચૈકતઃ કુર્યાદ્ધોમં કુર્યાત્પૃથક્પૃથક્ ॥ ૨,૨૬.૪૫॥

એકાદશેઽહ્નિ યચ્છ્રાદ્ધં પૃથક્પિણ્ડાશ્ચ ભોજનમ્ ।

પાકૈરેન પતિસ્ત્રીણામન્યેષાં ચ વિગર્હિતમ્ ॥ ૨,૨૬.૪૬॥

એકેનૈવ તુ પાકેન શ્રાદ્ધાનિ કુરુતે સુતઃ ।
એકં તુ વિકિરં કુર્યાત્પિણ્ડાન્દદ્યદ્બહૂનપિ ।
તીર્થે ચાપરપક્ષે વા ચન્દ્રસૂર્યગ્રહેઽપિ વા ॥ ૨,૨૬.૪૭॥

નારી ભર્તારમાસાદ્ય કુણપં દહતે યદા ।
અગ્નિર્દહતિ ગાત્રાણિ આત્માનં નૈવ પીડયેત્ ॥ ૨,૨૬.૪૮॥

દહ્યતે ધ્માયમાનાનાં ધાતૂનાં હિ યથા મલમ્ ।
તથા નારી દહેદ્દેહં હુતાશે હ્યમૃતોપમે ॥ ૨,૨૬.૪૯॥

દિવ્યાદૌ દિવ્યદેહસ્તુ શુદ્ધો ભવતિ પૂરુષઃ ।
તપ્તતૈલેન લોહેન વહ્નિના નૈવ દહ્યતે ॥ ૨,૨૬.૫૦॥

તથા સા પતિસંયુક્તા દહ્યતે ન કદાચન ।
અન્તરાત્મા મૃતે તસ્મિન્મૃતોઽપ્યેકત્વમાગતઃ ॥ ૨,૨૬.૫૧॥

ભર્તૃસંગં પરિત્યજ્ય અન્યત્ર મ્રિયતે યદિ ।
ભર્તૃલોકં ન સા યાતિ યાવદાભૂતસમ્પ્લવમ્ ॥ ૨,૨૬.૫૨॥

લક્ષ્મીયુતાન્પરિત્યજ્ય માતરં પિતરં તથા ।
મૃતં પતિમનુવ્રજ્ય સા ચિરં સુખમેધતે ॥ ૨,૨૬.૫૩॥

દિવ્યવર્ષપ્રમાણેન તિસ્રઃ કોટ્યોઽર્દ્ધકોટયઃ ।
તાવત્કાલં વસેત્સ્વર્ગે નક્ષત્રૈઃ સહ સર્વદા ॥ ૨,૨૬.૫૪॥

તદન્તે ચરતે લોકે કુલે ભવતિ ભોગિનામ્ ।
સા હિ લબ્ધમહાપ્રીતિર્ભર્ત્રા સહ પતિવ્રતા ॥ ૨,૨૬.૫૫॥

એવં ન કુરુતે નારી ધર્મોઢા પતિસંગમમ્ ।
જન્મજન્મનિ દુઃખાર્તાદુઃશીલાપ્રિયવાદિની ॥ ૨,૨૬.૫૬॥

વલ્ગુલી ગૃહસોધા વા ગોધા વા દ્વિમુખી ભવેત્ ।
સ્વભર્તારં પરિત્યજ્ય પરપુંસોનુવર્તિની ॥ ૨,૨૬.૫૭॥

તસ્માત્સર્વપ્રયત્નેન સ્વપતિં સ્ત્રી નિષેવતે ।
મનસા કર્મણા વાચા મૃતં જીવન્તમેવ વા ॥ ૨,૨૬.૫૮॥

જીવમાને મૃતે વાપિ કિલ્બિષં કુરુતે તુ યા ।
સ ચ વૈધવ્યમાપ્નોતિ જન્મજન્મનિ દુર્ભગા ॥ ૨,૨૬.૫૯॥

યદ્દેવેભ્યો યત્પિતૃભ્યઃ શ્રદ્ધયૈવ પ્રદીયતે ।
તત્ફલં ભર્તૃપૂજાતઃ કુર્યાદ્ભર્ત્રર્ચનં તતઃ ॥ ૨,૨૬.૬૦॥

એવં કૃતે ખગશ્રેષ્ઠ પિતૃલોકે ચિરં વસેત્ ।
યાવદાદિત્યચન્દ્રૌ ચ તાવદ્દેવસમા દિવિ ॥ ૨,૨૬.૬૧॥

પુનશ્ચિરાયુષો ભૂત્વા જાયન્તે વિપુલે કુલે ।
પતિવ્રતા યથા નારી ભર્તૃદુઃખં ન વિન્દતિ ॥ ૨,૨૬.૬૨॥

સર્વમેતદ્ધિ કથિતં મયા તવ ખગેશ્વર ।
વિશેષં કથયિષ્યામિ મૃતસ્યૈવ સુખપ્રદમ્ ॥ ૨,૨૬.૬૩॥

દ્વાદશાહે કૃતં સર્વં વર્ષં યાવત્સપિણ્ડનમ્ ।
પુનઃ કુર્યાત્સદા નિત્યં ઘટાન્નં પ્રતિમાસિકમ્ ॥ ૨,૨૬.૬૪॥

કૃતસ્ય કરણં નાસ્તિ પ્રેતકાર્યાદૃતે ખગ ।
યઃ કરોતિ નરઃ કશ્ચિત્કૃત્પૂર્વં વિનશ્યતિ ॥ ૨,૨૬.૬૫॥

મૃતસ્યૈવ પુનઃ કુર્યાત્પ્રેતોઽક્ષય્યમવાપ્નુયાત્ ।
પ્રતિમાસં ઘટા દેયા સોદના જલપૂરિતાઃ ॥ ૨,૨૬.૬૬॥

અર્વાક્ચ વૃદ્ધેઃ કરણાચ્ચ તાર્ક્ષ્ય સપિણ્ડનં યઃ કુરુતે હિ પુત્રઃ ।
તથાપિ માસં પ્રતિપિણ્ડમેકમન્નં ચ કુમ્ભં સજલં ચ દદ્યાત્ ॥ ૨,૨૬.૬૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડેદ્વિતીયાંશે ધર્મકાણ્ડે શ્રીકૃષ્ણગરુડસંવાદે
પ્રેતકલ્પે સપિણ્ડનનિરૂપણં નામ ષડ્વિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૭
તાર્ક્ષ્ય ઉવાચ ।
કથં પ્રેતા વસન્ત્યત્ર કીદૃગ્રૂપા ભવન્તિ તે ।
મહાપ્રેતાઃ પિશાચાશ્ચ કૈઃકૈઃ કર્મફલૈર્વિભો ।
સર્વેષામનુકમ્પાર્થં બ્રૂહિ મે મધુસૂદન ॥ ૨,૨૭.૧॥

પ્રેતત્વાન્મુચ્યતે યેન દાનેન ચ શુભે ન ચ ।
તન્મે કથય દેવેશ મમ ચેદિચ્છસિ પ્રિયમ્ ॥ ૨,૨૭.૨॥

શ્રીકૃષ્ણ ઉવાચ ।

સાધુ પૃષ્ટં ત્વયા તાર્ક્ષ્ય માનુષાણાં હિતાય વૈ ।
શ‌ૃણુચાવહિતો ભૂત્વા યદ્વચ્મિ પ્રેતલક્ષણમ્ ॥ ૨,૨૭.૩ ॥

ગુહ્યદ્ગુહ્યતરં હ્યેતન્નાખ્યેયં યસ્ય કસ્યચિત્ ।
ભક્તસ્ત્વં હિ મહાબાહો તેન તે કથયામ્યહમ્ ॥ ૨,૨૭.૪ ॥

પુરા ત્રેતાયુગે તાત રાજાસીદ્બભ્રુવાહનઃ ।
મહોદયપુરે રમ્યે ધર્મનિષ્ઠો મહાબલઃ ॥ ૨,૨૭.૫ ॥

યજ્વા દાનપતિઃ શ્રીમાન્બ્રહ્મણ્યઃ સાધુસમતઃ ।
શીલાચારગુણોપેતો દયાદાક્ષિણ્યસંયુતઃ ॥ ૨,૨૭.૬ ॥

પ્રજાઃ પાલયતે નિત્યં પુત્રાનિવ મહાબલઃ ।
ક્ષત્રધર્મરતો નિત્યં સ દણ્ડ્યાન્દણ્ડયન્નૃપઃ ॥ ૨,૨૭.૭ ॥

સ કદાચિન્મહાબાહુઃ સસૈન્યોમૃગયાં ગતઃ ।
વનં વિવેશ ગહનં નાનાવૃક્ષસમન્વિતમ્ ॥ ૨,૨૭.૮ ॥

શાર્દૂલશતસંજુષ્ટં નાનાપક્ષિનિનાદિતમ્ ।
વનમધ્યે તદા રાજા મૃગં દૂરાદપશ્યત ॥ ૨,૨૭.૯ ॥

તેન વિદ્ધો મૃગોઽતીવ બાણેન સુદૃઢેન ચ ।
બાણમાદાય તં તસ્ય સ વનેઽદર્શનં યયૌ ॥ ૨,૨૭.૧૦ ॥

કક્ષે તચ્છોણિતસ્રાવાત્સ રાજાનુજગામ તમ્ ।
તતો મૃગપ્રસઙ્ગેન વનમન્યદ્વિવેશ સઃ ॥ ૨,૨૭.૧૧ ॥

ક્ષુત્ક્ષામકણ્ઠો નૃપતિઃ શ્રમસન્તાપમૂર્છિતઃ ।
જલસ્થાનં સમાસાદ્ય સાશ્વ એવાવગાહત ॥ ૨,૨૭.૧૨ ॥

પીત્વા તદુ દકં શીતં પદ્મગન્ધાધિવાસિતમ્ ।
તત ઉત્તીર્ય સલિલાદ્વિમલાદ્બભ્રુવાહનઃ ॥ ૨,૨૭.૧૩ ॥

ન્યગ્રોધવૃક્ષમાસાદ્ય શીતચ્છાયં મનોહરમ્ ।
મહાવિટપિનં હૃદ્યં પક્ષિસઙ્ઘાતનાદિતમ્ ॥ ૨,૨૭.૧૪ ॥

વનસ્ય તસ્ય સર્વસ્ય કેતુભૂતમિવોચ્છ્રિતમ્ ।
તં મહાતરુમાસાદ્ય નિષસાદ મહીપતિઃ ॥ ૨,૨૭.૧૫ ॥

અથ પ્રેતં દદર્શાસૌ ક્ષુત્તૃષ્ણાવ્યાકુલેન્દ્રિયમ્ ।
ઉત્કચં મલિનં કુબ્જં (રૂક્ષં) નિર્માંસં ભીમદર્શનમ્ ॥ ૨,૨૭.૧૬ ॥

સ્નાયુબદ્ધાસ્થિચરણં ધાવમાનમિતસ્તતઃ ।
અન્યૈશ્ચ બહુભિઃ પ્રેતૈઃ સમન્તાત્પરિવારિતમ્ ॥ ૨,૨૭.૧૭॥

તં દૃષ્ટ્વા વિકૃતં ઘોરં વિસ્મિતો બભ્રુવાહનઃ ।
પ્રેતોઽપિ દૃષ્ટ્વા તાં ઘોરામટવીમાગતં નૃપમ્ ॥ ૨,૨૭.૧૮॥

તદા હૃષ્ટમના ભૂત્વા તસ્યાન્તિકમુપાગતઃ ।
અબ્રવીત્સ તદા તાર્ક્ષ્ય પ્રેતરાજો નૃપં વચઃ ॥ ૨,૨૭.૧૯॥

પ્રેતભાવો મયા ત્યક્તઃ પ્રાપ્તોઽસ્મિ પરમાં ગતિમ્ ।
ત્વત્સંયોગાન્મહાબાહો નાસ્તિધન્યતરો મમ ॥ ૨,૨૭.૨૦॥

નૃપતિરુવાચ ।
કૃષ્ણવર્ણઃ કરાલાસ્યસ્ત્વં પ્રેત ઇવ લક્ષ્યસે ।
કથયસ્વ મમ પ્રીત્યા યથૈવં ચાસિ તત્ત્વતઃ ॥ ૨,૨૭.૨૧॥

તથા પૃષ્ટઃ સ વૈ રાજ્ઞા પ્રોવાચ સકલં સ્વકમ્ ॥ ૨,૨૭.૨૨॥

પ્રેત ઉવાચ ।
કથયામિ નૃપશ્રેષ્ઠ સર્વમેવાદિતસ્તવ ।
પ્રેતત્વે કારણં શ્રુત્વા દયાં કર્તું મમાર્હસિ ॥ ૨,૨૭.૨૩॥

વૈદિશં નામ નગરં સર્વસમ્પત્સમન્વિતમ્ ।
નાનાજનપદાકીર્ણં નાનારત્નસમાકુલમ્ ।
નાનાપુણ્યસમાયુક્તં નાનાવૃક્ષસમાકુલમ્ ॥ ૨,૨૭.૨૪॥

તત્રાહં ન્યવસં ભૂયો દેવાર્ચનરતઃ સદા ।
વૈશ્યો જાત્યા સુદેવોઽહં નામ્ના વિદિતમસ્તુ તે ॥ ૨,૨૭.૨૫॥

હવ્યેન તર્પિતા દેવાઃ કવ્યેન પિતરસ્તથા ।
વિવિધૈર્દાનયોગૈશ્ચ વિપ્રાઃ સન્તર્પિતા મયા ॥ ૨,૨૭.૨૬॥

આવાહાશ્ચ વિવાહાશ્ચ મયા વૈ સુનિવેશિતાઃ ।
દીનાનાથવિશિષ્ટેભ્યો મયા દત્તમનેકધા ॥ ૨,૨૭.૨૭॥

તત્સર્વં વિફલં તાત મમ દૈવાદુપાગતમ્ ।
યથા મે નિષ્ફલં જાતં સુકૃતં તદ્વદામિ તે ॥ ૨,૨૭.૨૮॥

ન મેઽસ્તિ સન્તતિસ્તાત ન સુહૃન્ન ચ બાન્ધવઃ ।

ન ચ મિત્રં હિ મે તાદૃગ્યઃ કુર્યાદૌર્ધ્વદૈહિકમ્ ॥ ૨,૨૭.૨૯॥

પ્રેતત્વં સુસ્થિરં તેન મમ જાતં નૃપોત્તમ ।
એકાદશં ત્રિપક્ષં ચ ષાણ્માસિકમથાબ્દિકમ્ ।
પ્રતિમાસ્યાનિ ચાન્યાનિ એવં શ્રાદ્ધાનિ ષોડશ ॥ ૨,૨૭.૩૦॥

યસ્યૈતાનિ ન દીયન્તે પ્રેતશ્રાદ્ધાનિ ભૂપતે ।
પ્રેતત્વં સુસ્થિરં તસ્ય દત્તૈઃ શ્રાદ્ધશતૈરપિ ॥ ૨,૨૭.૩૧॥

એવં જ્ઞાત્વા મહારાજ પ્રેતત્વાદુદ્ધરસ્વ મામ્ ।
વર્ણાનાં ચાપિ સર્વેષાં રાજા બન્ધુરિહોચ્યતે ॥ ૨,૨૭.૩૨॥

તન્માં તારય રાજેન્દ્ર મણિરત્નં દદામિ તે ।
યથા મમ શુભાવાપ્તિર્ભવેન્નૃપવરોત્તમ ॥ ૨,૨૭.૩૩॥

તથા કાર્યં મહાબાહો કૃપા યદિ મયીષ્યતે ।
આત્મનશ્ચ કુરુ ક્ષિપ્રં સર્વમેવૌર્ધ્વદૈહિકમ્ ॥ ૨,૨૭.૩૪॥

નૃપતિરુવાચ ।
કથં પ્રેતા ભવન્તીહ કૃતૈરપ્યૌર્ધ્વદૈહિકૈઃ ।
પિશાચાશ્ચ ભવન્તીહ કર્મભિઃ કૈશ્ચ તદ્વદ ॥ ૨,૨૭.૩૫॥

પ્રેત ઉવાચ ।
દેવદ્રવ્યં ચ બ્રહ્મસ્વં સ્ત્રીબાલધનસઞ્ચયમ્ ।
યે હરન્તિ નૃપશ્રેષ્ઠ પ્રેતયોનિં વ્રજન્તિ તે ॥ ૨,૨૭.૩૬॥

તાપસીં ચ સગોત્રાં ચ અગમ્યાં યે ભજન્તિ હિ ।
ભવન્તિ તે મહાપ્રેતા અમ્બુજાનિ હરન્તિ યે ॥ ૨,૨૭.૩૭॥

પ્રવાલવજ્રહર્તારો યે ચ વસ્ત્રાપહારકાઃ ।
તથા હિરણ્યહર્તારઃ સંયુગેઽસન્મુખાગતાઃ ॥ ૨,૨૭.૩૮॥

કૃતઘ્ના નાસ્તિકા રૌદ્રાસ્તથા સાહસિકા નરાઃ ।
પઞ્ચયજ્ઞવિનિર્મુક્તા મહાદાનરતાશ્ચ યે ॥ ૨,૨૭.૩૯॥

સ્વામિદ્રોહકરા મિત્રબ્રાહ્મદ્રોહકરાશ્ચ યે ।
તીર્થપાપકરા રાજઞ્જાયન્તે પ્રેતયોનયઃ ।
એવમાદ્યા મહારાજ જાયન્તે પ્રેતયોનયઃ ॥ ૨,૨૭.૪૦॥

રાજોવાચ ।

કથં મુક્તા ભવન્તીહ પ્રેતત્વાત્ત્વં ચ તેऽપિ ચ ।
કથં ચાપિ મયા કાર્યમૌર્ધ્વદૈહિકમાત્મનઃ ।
વિધિના કેન તત્કાર્યં સર્વમેતદ્વદસ્વ મે ॥ ૨,૨૭.૪૧॥

પ્રેત ઉવાચ ।
શ ૃણુ રાજેન્દ્ર સંક્ષેપાદ્વિધિં નારાયણાત્મકમ્ ।
સચ્છાસ્ત્રશ્રવણં વિષ્ણોઃ પૂજા સજ્જનસંગતિઃ ॥ ૨,૨૭.૪૨॥

પ્રેતયોનિવિનાશાય ભવન્તીતિ મયા શ્રુતમ્ ।
અતો વક્ષ્યામિ તે વિષ્ણુપૂજાં પ્રેતત્વનાશિનીમ્ ॥ ૨,૨૭.૪૩॥

સુવર્ણદ્વયમાહૃત્ય મૂર્તિં ભૂપ પ્રકલ્પયેત્ ।
નારાયણસ્ય દેવસ્ય સર્વાભરણભૂષિતામ્ ॥ ૨,૨૭.૪૪॥

પીતવસ્ત્રયુગાચ્છન્નાં ચન્દનાગુરુચર્ચિતામ્ ।
સ્નાપયેદ્વિવિધૈસ્તોયૈરધિવાસ્ય યજેત્તતઃ ॥ ૨,૨૭.૪૫॥

પૂર્વે તુ શ્રીધરં દેવં દક્ષિણે મધુસૂદનમ્ ।
પશ્ચિમે વાનમં દેવમુત્તરે ચ ગદાધરમ્ ॥ ૨,૨૭.૪૬॥

મધ્યે પિતામહં પૂજ્ય તથા દેવં મહેશ્વરમ્ ।
પૂજયેચ્ચ વિધાનેન ગન્ધપુષ્પાદિભિઃ પૃથક્ ॥ ૨,૨૭.૪૭॥

તતઃ પ્રદક્ષિણીકૃત્ય અગ્નૌ સન્તર્પ્ય દેવતાઃ ।
ધૃતેન દધ્ના ક્ષીરેણ વિશ્વાન્દેવાંસ્તથા નૃપ ॥ ૨,૨૭.૪૮॥

તતઃ સ્નાતો વિનીતાત્મા યજમાનઃ સમાહિતઃ ।
નારાયણાગ્રે વિધિવત્સ્વક્રિયામૌર્ધ્વદૈહિકીમ્ ॥ ૨,૨૭.૪૯॥

આરભેત વિનીતાત્મા ક્રોધલોભવિવર્જિતઃ ।
શ્રાદ્ધાનિ કુર્યાત્સર્વાણિ વૃષસ્યોત્સર્જનં તથા ॥ ૨,૨૭.૫૦॥

ત્રયોદશાનાં વિપ્રાણાં વસ્ત્રચ્છત્રાણ્યુપાનહૌ ।
અઙ્ગુલીયકમુક્તાનિ ભાજનાસનભોજનૈઃ ॥ ૨,૨૭.૫૧॥

સાન્નાશ્ચ સોદકા દેયા ઘટાઃ પ્રેતહિતાય વૈ ।
શય્યાદાનમથો દત્ત્વા ઘટં પ્રેતસ્ય નિર્વપેત્ ॥ ૨,૨૭.૫૨॥

નારાયણેતિ સન્નામ સમ્પુટસ્થં સમર્ચયેત્ ।
એવં કૃત્વાથ વિધિવચ્છુભાશુભફલં લભેત્ ॥ ૨,૨૭.૫૩॥

રાજોવાચ ।
કથં પ્રેતઘટં કુર્યાદ્દ્યાત્કેન વિધાનતઃ ।
બ્રૂહિ સર્વાનુકમ્પાર્થં ઘટં પ્રેતવિમુક્તિદમ્ ॥ ૨,૨૭.૫૪॥

પ્રેત ઉવાચ ।
સાધુ પૃષ્ટં મહારાજ કથયામિ નિબોધ તે ।
પ્રેતત્વં ન ભવેદ્યેન દાનેન સુદૃઢેન ચ ॥ ૨,૨૭.૫૫॥

દાનં પ્રેતઘટં નામ સર્વાશુભવિનાશનમ્ ।
દુર્લભં સર્વલોકાનાં દુર્ગતિક્ષયકારકમ્ ॥ ૨,૨૭.૫૬॥

સન્તપ્તહાટકમયં તુ ઘટં વિધાય બ્રહ્મોશકેશવયુતં સહ લોકપાલૈઃ ।
ક્ષીરાજ્યપૂર્ણવિવરં પ્રણિપત્ય ભક્ત્યા વિપ્રાય દેહિ તવ દાનશતૈઃ કિમન્યૈઃ ॥ ૨,૨૭.૫૭॥

બ્રહ્મા મધ્યે તથા વિષ્ણુઃ શઙ્કરઃ શઙ્કરોઽવ્યયઃ ।
પ્રાચ્યાદિષુ ચ તત્કણ્ઠે લોકપાલાન્ક્રમેણ તુ ॥ ૨,૨૭.૫૮॥

સમ્પૂજ્ય વિધિવદ્રાજન્ધૂપૈઃ કુસુમચન્દનૈઃ ।
તતો દુગ્ધાજ્યસહિતં ઘટં દેયં હિરણ્મયમ્ ॥ ૨,૨૭.૫૯॥

સર્વદાનાધિકઞ્ચૈતન્મહાપાતકનાશનમ્ ।
કર્તવ્યં શ્રદ્ધયા રાજન્પ્રેતત્વવિનિવૃત્તયે ॥ ૨,૨૭.૬૦॥

શ્રીભાગવાનુવાચ ।
એવં સંજલ્પતસ્તસ્ય પ્રેતેન નિયતાત્મનઃ ।
સેનાજગામાનુપદં હસ્ત્યશ્વરથસંકુલા ॥ ૨,૨૭.૬૧॥

તતો બલે સમાયાતે દત્ત્વા રાજ્ઞે મહામણિમ્ ।
નમસ્કૃત્ય પુનઃ પ્રાર્થ્ય પ્રેતોઽદર્શનમીયિવાન્ ॥ ૨,૨૭.૬૨॥

તસ્માદ્વનાદ્વિનિષ્ક્રમ્ય રાજાપિ સ્વપુરં યયૌ ।
સ્વપુરં સ સમાસાદ્ય સર્વં તત્પ્રેતભાષિતમ્ ॥ ૨,૨૭.૬૩॥

ચકાર વિધિવત્પક્ષિન્નૌર્ધ્વદેહાદિકં વિધિમ્ ।
તસ્ય પુણ્યપ્રદાનેન પ્રેતો મુક્તો દિવં યયૌ ॥ ૨,૨૭.૬૪॥

શ્રાદ્ધેન પરદત્તેન ગતઃ પ્રેતોઽપિ સદ્ગતિમ્ ।
કિં પુનઃ પુત્રદત્તેન પિતા યાતીતિ ચાત્ભુતમ્ ॥ ૨,૨૭.૬૫॥

ઇતિહાસમિમં પુણ્યં શ ृણોતિ શ્રાવયેચ્ચ યઃ ।

ન તૌ પ્રેતત્વમાયાતઃ પાપાચારયુતાવપિ ॥ ૨,૨૭.૬૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે શ્રીકૃષ્ણગરુડસંવાદે બભ્રુવાહનપ્રેતસંવાદે પ્રેતત્વહેતુતન્નિવૃત્ત્યુપાયનિરૂપણં નામ સપ્તવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૮
ગરુડ ઉવાચ ।
સર્વેપામનુકમ્પાર્થં બ્રૂહિ મે મધુસૂદન ।
પ્રેતત્વાન્મુચ્યતે યેન દાનેન સુકૃતેન વા ॥ ૨,૨૮.૧॥

શ્ૃકૃષ્ણ ઉવાચ ।
શ્ૃણુ દાનં પ્રવક્ષ્યામિ સર્વાશુ ભવિનાશનમ્ ।
સન્તપ્તહાટકમયં ઘટકં વિધાય બ્રહ્મેશકેશવયુતં સહ લોકપાલૈઃ ।
ક્ષીરાજ્યપૂર્ણવિવિરં પ્રણિપત્ય ભક્ત્યા વિપ્રાય દેહિ તવ દાનશતૈઃ કિમન્યૈઃ ॥ ૨,૨૮.૨॥

ગરુડ ઉવાચ ।
કિમેત્કથિતં દેવ વિસ્તરેણ વદસ્વ મે ।
આમુષ્મિકીં ક્રીયાં દેવ ઉત્ક્રાન્તિસમયાદનુ ॥ ૨,૨૮.૩॥

સંસારે સાધુ મે નાથ બ્રૂહિ કૃત્યં જનાર્દન ।
યથા કાર્યા નરૈઃ સમ્યક્ક્રિયા ચૈવૌર્ધ્વદૈહિકી ॥ ૨,૨૮.૪॥

કથં પ્રેતા મહાકાયા રૌદ્રરૂપા ભયાનકાઃ ।
કમ્ભવન્તિ સુરશ્રેષ્ઠ કર્મભિઃ કૈઃ શુભાશુભૈઃ ॥ ૨,૨૮.૫॥

પિશાચાઃ સમ્ભવન્તીહ કસ્યેદં કર્મણઃ ફલમ્ ।
તન્મે કથય દેવેશ અહમિચ્છામિ વેદિતુમ્ ॥ ૨,૨૮.૬॥

ભૂમ્યાં પ્રક્ષિપ્યતે કસ્માત્પઞ્ચરત્નં કુતો મુખે ।
અધસ્તાચ્ચ તિલા દર્ભાઃ પાદૌ યામ્યાં વ્યવસ્થિતાઃ ॥ ૨,૨૮.૭॥

કિમર્થં મણ્ડલં ભૂમૌ ગોમયેનોપલિપ્યતે ।
કિમર્થં સ્મર્યતે વિષ્ણુઃ વિષ્ણુસૂક્તઞ્ચ પઠ્યતે ॥ ૨,૨૮.૮॥

કિમર્થં પુત્રપુત્રાશ્ચ તસ્ય તિષ્ઠન્તિ ચાગ્રતઃ ।
કિમર્થં દીપદાનઞ્ચ કિમર્થં વિષ્ણુપૂજનમ્ ॥ ૨,૨૮.૯॥

કિમર્થમાતુરો દાનં દદાતિ દ્વિજપુઙ્ગવે ।

બન્ધૂન્મિત્રાણ્યમિત્રાંશ્ચ ક્ષમાપયતિ તત્કથમ્ ॥ ૨,૨૮.૧૦॥

તિલા લોહં હિરણ્યં ચ કાર્પાસં લવણં તથા ।
સપ્તધાન્યં ક્ષિતિર્ગાવો દીયતે કેન હે તુના ॥ ૨,૨૮.૧૧॥

કથં ચ મ્રિયતે જન્તુર્મૃતસ્ય ચ કુતો ગતિઃ ।
અતિવાહશરીરં ચ કથં વિશ્રમતે તદા ॥ ૨,૨૮.૧૨॥

શંવ સ્કન્ધે વહેત્પુત્રો વહ્નિદાતા ચ પૌત્રકઃ ।
કિમર્થં દેવ દેવેશ આજ્યેનાભ્યઞ્જનં કુતઃ ॥ ૨,૨૮.૧૩॥

યમસૂક્તં કિમર્થં ચ ઉદીચીં દિશમાહરેત્ ।
પાનીયમેકવસ્ત્રેણ સૂર્યબિમ્બનિરીક્ષણમ્ ॥ ૨,૨૮.૧૪॥

યવસર્ષપદૂર્વાશ્ચપાષાણે નિમ્બચર્વણમ્ ।
વસ્ત્રં નરશ્ચ નારી ચ વિદધ્યાદધરોત્તરમ્ ॥ ૨,૨૮.૧૫॥

અન્નાદ્યં ગૃહમાગત્ય ભોક્તવ્યં ગોત્રિભિઃ સહ ।
નવકાનિ ચ પિણ્ડાનિ કિમર્થં વિતરેત્સુતઃ ॥ ૨,૨૮.૧૬॥

કિમર્થં ચત્વરે દુગ્ધં પાત્રે પક્વે ચ મૃન્મયે ।
કાષ્ઠત્રયં ગુણે બદ્ધ્વા કૃત્વા રાત્રૌ ચતુષ્પથે ॥ ૨,૨૮.૧૭॥

નિશાયાં દીયતે દીપો યાવદબ્દં દિનેદિને ।
દાહોદકં કિમર્થં ચ સંવાદઃ સ્વજનૈઃ સહ ॥ ૨,૨૮.૧૮॥

ભગવન્નતિવાહસ્ય નવપિણ્ડૈસ્તુ કિં ભવેત્ ।
કથં દેવપિતૃભ્યશ્ચ વાહસ્યાવાહનં કથમ્ ।
ઇદં ચ ક્રિયતે દેવ કસ્માત્પિણ્ડં પ્રદાપયેત્ ॥ ૨,૨૮.૧૯॥

કિં તત્પ્રદીયતે તસ્ય પિણ્ડદાનાદનન્તરમ્ ।
અસ્થિસઞ્ચયનં ચૈવ શય્યાદાનં કિમર્થકમ્ ॥ ૨,૨૮.૨૦॥

દ્વિતીયેઽહ્નિ કુતઃ સ્નાનં ચતુર્થે સાગ્નિકે દ્વિજે ।
દશમે કિં મલસ્નાનં કાર્યં સર્વજનૈઃ સહ ॥ ૨,૨૮.૨૧॥

કસ્માત્તૈલોદ્વર્તનં ચ સ્કન્ધવાહાન્ગૃહં નયેત્ ।
તૈઃ સમુદ્વર્તનં ચાપિ દદ્યુઃ સ્થલજલાશ્રયે ॥ ૨,૨૮.૨૨॥

દેશમેઽહનિ યઃ પિણ્ડસ્તં દદ્યાદામિષેણ તુ ।
પિણ્ડં ચૈકાદશે કસ્માદ્વૃષોત્સર્ગઃ કથં ભવેત્ ॥ ૨,૨૮.૨૩॥

શ્રાદ્ધાનિ ષોડશૈતાનિ અબ્દં યાવત્કુતો વદ ।
અન્નાદિચોદકેનૈવ ષષ્ટ્યધિકશતત્રયમ્ ॥ ૨,૨૮.૨૪॥

દિનેદિને ચ દાતવ્યં ઘટાન્નં પ્રેતતૃપ્તયે ।
પ્રાપ્તે કાલે ચ મ્રિયતે અનિત્યો માનવઃ પ્રભો ॥ ૨,૨૮.૨૫॥

છિદ્રં તુ નૈવ પશ્યામિ કુતો જીવઃ સ નિર્ગતઃ ।
કુતો ગચ્છન્તિ ભૂતાનિ પૃથિવ્યાપો મનસ્તથા ॥ ૨,૨૮.૨૬॥

તેજો વદસ્વ મે નાથ વાયુરાકાશમેવ ચ ।
વાયવશ્ચૈવ પઞ્ચૈતે કથં ગચ્છન્તિ ચાપ્તયે ॥ ૨,૨૮.૨૭॥

લોભમોહાદયઃ પઞ્ચ શરીરે ચૈવ તસ્કરાઃ ।
તૃષ્ણા કામોઽપ્યહઙ્કારઃ કુતો યાન્તિ જનાર્દન ॥ ૨,૨૮.૨૮॥

પુણ્યં વાપ્યથ વાપુણ્યં યત્કિઞ્ચિત્સુકૃતં તથા ।
નષ્ટે દેહે કુતો યાન્તિ દાનાનિ વિવિધાનિ ચ ॥ ૨,૨૮.૨૯॥

સપિણ્ડનં કિમર્થં ચ પૂર્ણે સંવત્સરેઽપિ વા ।
પ્રેતસ્ય મેલનં સાર્ધં કૈઃ સમં તત્ર કો વિધિઃ ॥ ૨,૨૮.૩૦॥

યે દગ્ધા યે ત્વદગ્ધાશ્ચ પતિતા યે નરાભુવિ ।
યાનિ ચાન્યાનિ ભૂતાનિ તેષામન્તે ભવેચ્ચ કિમ્ ॥ ૨,૨૮.૩૧॥

પાપિનો યે દુરાચારા મુદ્ગલત્વં ચ યે ગતાઃ ।
આત્મઘાતી બ્રહ્મહા ચ સ્તેયી વિશ્વાસઘાતકઃ ॥ ૨,૨૮.૩૨॥

કપિલાં યઃ પિબેચ્છૂદ્રો યઃ પઠેદ્વૈદિકાક્ષરમ્ ।
ધારયેદ્વા બ્રહ્મસૂત્રં કા ગતિસ્તસ્ય માધવ ॥ ૨,૨૮.૩૩॥

વિપ્રસ્ય બ્રાહ્મણી ભાર્યા સંગૃહી તા યદા ભવેત્ ।
તસ્માત્પાપાચ્ચ ભીતોઽહં તન્મે વદ જગત્પતે ।
સર્વમેતન્મયા પૃષ્ટો વદ લોકહિતાય વૈ ॥ ૨,૨૮.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે શ્રીકૃષ્ણગરુડસંવાદે ઔર્ધ્વદહિકકર્મકાલક્રિયમાણનાનાદાનાદિફલપ્રશ્નનિરૂપણં નામાષ્ટાવિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૯

શ્રીકૃષ્ણ ઉવાચ ।
સાધુ પૃષ્ટં ત્વયા ભદ્ર માનુષાણાં હિતાય વૈ ।
શૃણુષ્વાવહિતો ભૂત્વા સર્વમેવૌર્ધ્વદૈહિકમ્ ॥ ૨,૨૯.૧॥

કમ્યગ્વિભેદરહિતં શ્રુતિસ્મૃતિસમુદ્ધૃતમ્ ।
યન્ન દૃષ્ટં સુરૈઃ સેન્દ્રૈર્યોગિભિર્યોગચિન્તકૈઃ ॥ ૨,૨૯.૨॥

ગુહ્યાદ્ગુહ્યતરં વત્સ નાખ્યાતં કસ્યચિત્ક્વચિત્ ।
ભક્તસ્ત્વં હિ મહાભાગ સર્વં તે કથયામ્યહમ્ ॥ ૨,૨૯.૩॥

અપુત્રસ્ય ગતિર્નાસ્તિ સ્વર્ગો નૈવ ચ નૈવ ચ ।
યેન કેનાપ્યુપાયેન કાર્યં જન્મ સુતસ્ય ચ ॥ ૨,૨૯.૪॥

તારયેન્નરકાત્પુત્રો યદિ મોક્ષો ન વિદ્યતે ।
દાહઃ પુત્રેણ કર્તવ્યો દેયઃ પૌત્રેણ પાવકઃ ॥ ૨,૨૯.૫॥

તિલૈર્દર્ભૈશ્ચ ભૂમ્યાં વૈ કુટી ધાતુમતી ભવેત્ ।
પઞ્ચરત્નાનિ વક્ત્રે તુ યેન જીવઃ પ્રરોહતિ ॥ ૨,૨૯.૬॥

લિપ્યાત્તુ ગોમયૈર્ભૂમિં તિલાન્દર્ભાંશ્ચ નિઃ ક્ષિપેત્ ।
તસ્યામેવાતુરો મુક્તઃ સર્વં દહતિ પાતકમ્ ॥ ૨,૨૯.૭॥

દર્ભમૂલીનયેત્સ્વર્ગં સંસ્થિતં નાત્ર સંશયઃ ।
દર્ભાંસ્તત્ર હિ યે ભૂમ્યાં તિલયુક્તાન સંશયઃ ॥ ૨,૨૯.૮॥

સર્વત્ર વસુધા પૂતા યત્ર લેપો ન વિદ્યતે ।
યત્ર લેપઃ સ્થિતસ્તત્ર પુનર્લેપેન શુધ્યતિ ॥ ૨,૨૯.૯॥

યાતુધાનાઃ પિશાચાશ્ચ રાક્ષસાઃ ક્રૂરકર્મિણઃ ।
અલિપ્તે આતુરં મુક્તં વિશન્ત્યેતે ન સંશયઃ ॥ ૨,૨૯.૧૦॥

નિત્યહોમં તથા શ્રાદ્ધં વિપ્રાણાં પાદશોધનમ્ ।
મણ્ડલેન વિના ભૂમ્યાં કુર્વન્ત્યેતચ્ચ નિષ્ફલમ્ ॥ ૨,૨૯.૧૧॥

આતુરો મુચ્યતે નૈવ મણ્ડલેન વિના ભુવિ ।
બ્રહ્મા રુદ્રશ્ચ વિષ્ણુશ્ચ શ્રીર્હુતાશન એવ ચ ।
મણ્ડલે ચોપતિષ્ઠન્તસ્તસ્માત્કુર્વીત મણ્ડલમ્ ॥ ૨,૨૯.૧૨॥

અન્યથા મ્રિયતે યસ્તુ બાલો વૃદ્ધો યુવાપિ વા ।
યોન્યન્તરં સ વૈ ગચ્છેત્ક્રીડતે વાયુના સહ ॥ ૨,૨૯.૧૩॥

મિશ્રિતં લોહતામ્રં તુ તથૈવ જન્મ જાયતે ।
તસ્મૈવં વાયુભૂતસ્ય ન શ્રાદ્ધં નોદક ક્રિયા ॥ ૨,૨૯.૧૪॥

મમ સ્વેદસમુદ્ભૂતાસ્તિલાસ્તાર્ક્ષ્ય પવિત્રકાઃ ।
અસુરા દાનવા દૈત્યાસ્તૃપ્યન્તિ તિલદાનતઃ ॥ ૨,૨૯.૧૫॥

તિલાઃ શ્વેતાસ્તિલાઃ કૃષ્ણાસ્તિલા ગોમૂત્રસન્નિભાઃ ।
તે મે દહન્તુ પાપાનિ શરીરેણ કૃતાનિ ચ ॥ ૨,૨૯.૧૬॥

એક એવ તિલદ્રોણો હેમદ્રોણતિલૈઃ સમઃ ।
તર્પણે દાનહોમે ચ દત્તો ભવતિ ચાક્ષયઃ ॥ ૨,૨૯.૧૭॥

દર્ભા મલ્લોમસમ્ભૂતાસ્તિલાઃ સ્વેદસમુદ્ભવાઃ ।
તૃપ્તાઃ સ્યુર્દેવતા દાનૈઃ શ્રાદ્ધેન પિતરસ્તથા ।
પ્રયોગવિધિના બ્રહ્મા વિશ્વઞ્ચાપ્યુપજીવનાત્ ॥ ૨,૨૯.૧૮॥

સવ્યયજ્ઞોપવીતેન બ્રહ્માદ્યાસ્તૃપ્તિમાન્પુયુઃ ।
અપસવ્યેન તૃપ્યન્તિ પિતરો દિવિદેવતાઃ ॥ ૨,૨૯.૧૯॥

અપસવ્યાદિતો બ્રહ્મા દર્ભમધ્યે તુ કેશવઃ ।
દર્ભાગ્રે શઙ્કરં વિદ્યાત્ત્રયો દેવાઃ કુશે સ્થિતાઃ ॥ ૨,૨૯.૨૦॥

વિપ્રા મન્ત્રાઃ કુશા વહ્નિસ્તુલસી ચ ખગેશ્વર ।
નૈતે નિર્માલ્યતાં યાન્તિ ક્રિયમાણાઃ પુનઃ પુનઃ ॥ ૨,૨૯.૨૧॥

કુશાઃ પિણ્ડેષુ નિર્માલ્યાઃ બ્રાહ્મણાઃ પ્રેતભોજને ।
મન્ત્રાઃ શૂદ્રેષુ પતિતાશ્ચિતાયાશ્ચ હુતાશનઃ ॥ ૨,૨૯.૨૨॥

તુલસી બ્રાહ્મણા ગાવો વિષ્ણુરેકાદશી ખગ ।
પઞ્ચ પ્રવહણાન્યેવ ભવાબ્ધૌ મજ્જતાં સતામ્ ॥ ૨,૨૯.૨૩॥

વિષ્ણુરેકાદશી ગીતા તુલસીવિપ્રધેનવઃ ।
અપારે દુર્ગસંકારે ષટ્પદી મુક્તિદાયિની ॥ ૨,૨૯.૨૪॥

તિલાઃ પવિત્રાસ્ત્રિવિધા દર્ભાશ્ચ તુલસીદાલમ્ ।
નિવારયન્તિ ચૈતાનિ દુર્ગતિં યાન્તમાતુરમ્ ॥ ૨,૨૯.૨૫॥

હસ્તાભ્યામુદ્ધૃતૈર્દર્ભૈસ્તોયેન પ્રોક્ષયેદ્ભુવમ્ ।
મૃત્યુકાલે ક્ષિપેદ્દર્ભાનાતુરસ્ય કરદ્વયે ॥ ૨,૨૯.૨૬॥

દર્ભેષુ ક્ષિપ્યતે યોઽસૌ દભસ્તુ પરિવેષ્ટિતઃ ।

વિષ્ણુલોકં સ વૈ યાતિ મન્ત્રહીનોઽપિ માનવઃ ॥ ૨,૨૯.૨૭॥

દર્ભમૂલીગતો ભૂમૌ દર્ભપાણિસ્તુ યો મૃતઃ ।
પ્રાયશ્ચિત્તવિશુદ્ધોઽસૌ સંસારેપારસાગરે ॥ ૨,૨૯.૨૮॥

ગોમયેનોપલિમે તુ દર્ભસ્યાસ્તરણે સ્થિતઃ ।
તત્ર દત્તેન દાનેન સર્વં પાપં વ્યપોહતિ ॥ ૨,૨૯.૨૯॥

લવણં તદ્રસં દિવ્યં સર્વકામપ્રદં નૃણામ્ ।
યસ્માદન્નરસાઃ સર્વે નોત્કટા લવણં વિના ॥ ૨,૨૯.૩૦॥

પિતૃણાં ચ પ્રિયં ભવ્યં તસ્માત્સ્વર્ગપ્રદં ભવેત્ ।
વિષ્ણુદેહસમુદ્ભૂતો યતોઽયં લવણો રસઃ ॥ ૨,૨૯.૩૧॥

વિશેષાલ્લવણં દાનં તેન શંસન્તિ યોગિનઃ ।
બ્રાહ્મણ ક્ષત્રિયવિશાં સ્ત્રીણાં શૂદ્રજનસ્ય ચ ॥ ૨,૨૯.૩૨॥

આતુરાણાં યદા પ્રાણાઃ પ્રયાન્તિ વસુધાતલે ।
લવણં તુ તદા દેયં દ્વારસ્યોદ્ઘાટનં દિવઃ ॥ ૨,૨૯.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે પ્રેતકલ્પે ધર્મકાણ્ડે
શ્રીકૃષ્ણગરુડસંવાદે ઔર્ધ્વદેહિકકર્મણિ
પુત્રદર્ભતિલતુલસીગોભૂલેપતામ્રપાત્રદાના દીનામાવશ્યકત્વનિરૂપણં નામૈકોનત્રિશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૦
શ્રીકૃષ્ણ ઉવાચ ।
શ૰ૃણુ તાર્ક્ષ્ય પરં ગુહ્યં દાનાનાં દાનમુત્તમમ્ ।
પરમં સર્વદાનાનાં પરં ગોપ્યં દિવૌકસામ્ ॥ ૨,૩૦.૧॥

દેયમેકં મહાદાનં કાર્પાસં ચોત્તમોત્તમમ્ ।
યેન દત્તેન પ્રીયન્તે ભૂર્ભુવઃ સ્વરિતિ ક્રમાત્ ॥ ૨,૩૦.૨॥

બ્રહ્માદ્યા દેવતાઃ સર્વાઃ કાર્યાચ્ચ પ્રીતિમાપ્નુયુઃ ।
દેયમેતન્મહાદાનં પ્રેતોદ્ધરણહેતવે ॥ ૨,૩૦.૩॥

ચિરં વસેદ્રુદ્રલોકે તતો રાજા ભવેદિહ ।
રૂપવાન્સુભગો વાગ્મી શ્રીમાનતુલ વિક્રમઃ ।
યમલોકં વિનિર્જિત્ય સ્વર્ગં તાક્ષ્ય સ ગચ્છતિ ॥ ૨,૩૦.૪॥

ગાં તિલાંશ્ચ ક્ષિતં હેમ યો દદાતિ દ્વિજન્મને ।
તસ્ય જન્માર્જિતં પાપં તત્ક્ષણાદેવનશ્યતિ ॥ ૨,૩૦.૫॥

તિલા ગાવો મહાદાનં મહાપાતકનાશનમ્ ।
તદ્દ્વયં દીયતે વિપ્રે નાન્યવર્ણે કદાચન ॥ ૨,૩૦.૬॥

કલ્પિતં દીયતે દાનં તિલા ગાવશ્ચમેદિની ।
અન્યેષુ નૈવ વર્ણેષુ પોષ્યવર્ગે કદાચન ॥ ૨,૩૦.૭॥

પોષ્યવર્ગે તથા સ્ત્રીષુ દાનં દેયમકલ્પિતમ્ ।
આતુરે વોપરાગે ચ દ્વયં દાનં વિશિષ્યતે ।
આતુરે દીયતે દાનં તત્કાલે ચોપતિષ્ઠતિ ॥ ૨,૩૦.૮॥

જીવતસ્તુ પુનર્દત્તમુપતિષ્ઠત્યસંસ્કૃતમ્ ।
સત્યંસત્યં પુનઃ સત્યં યદ્દત્તં વિકલેન્દ્રિયે ॥ ૨,૩૦.૯॥

યચ્ચાનુ મોદતે પુત્રસ્તચ્ચ દાનમનન્તકમ્ ।
અતો દદ્યાત્સ પુત્રો વા યાવજ્જીવત્સસૌ ચિરમ્ ।
અતિવાહસ્તથા પ્રેતો ભોગાંશ્ચ લભતે યતઃ ॥ ૨,૩૦.૧૦॥

અસ્વસ્થા તુરકાલે તુ દેહપાતે ક્ષિતિસ્થિતે ।
દેહે તથાતિવાહસ્ય પરતઃ પ્રીણનં ભવેત્ ॥ ૨,૩૦.૧૧॥

પઙ્ગાવન્ધે ચ કાણે ચ હ્યર્ધોન્મીલિતલોચને ।
તિલેષુ દર્ભાન્સંસ્તીર્ય દાનમુક્તં તદક્ષયમ્ ॥ ૨,૩૦.૧૨॥

તિલા લૌહં હિરણ્યઞ્ચ કાર્પાસં લવણં તથા ।
સપ્તધાન્યં ક્ષિતિર્ગાવ એકૈકં પાવનં સ્મૃતમ્ ॥ ૨,૩૦.૧૩॥

લોહદાનાદ્યમસ્તુષ્યેદ્ધર્મ રાજસ્તિલાર્પણાત્ ।
લવણે દીયમાને તુ ન ભયં વિદ્યતે યમાત્ ॥ ૨,૩૦.૧૪॥

કર્પાસસ્ય તુ દાનેન ન ભૂતેભ્યો ભયં ભવેત્ ।
તારયન્તિ નરં ગાવસ્ત્રિવિધાશ્ચૈવ પાતકાત્ ॥ ૨,૩૦.૧૫॥

હેમદાનાત્સુખં સ્વર્ગે ભૂમિદાનાન્નૃપો ભવેત્ ।
હેમભૂમિપ્રદાનાચ્ચ ન પીડા નરકે ભવેત્ ॥ ૨,૩૦.૧૬॥

સર્વેઽપિ યમદૂતાશ્ચ યમરૂપા વિભીષણાઃ ।
સર્વે તે વરદા યાન્તિ સપ્તધાન્યેન પ્રીણિતાઃ ॥ ૨,૩૦.૧૭॥

વિષ્ણોઃ સ્મરણમાત્રેણ પ્રાપ્યતે પરમા ગતિઃ ।
એતત્તે સર્વમાખ્યાતં મર્ત્યૈર્યા ગતિરાપ્યતે ॥ ૨,૩૦.૧૮॥

તસ્માત્પુત્રં પ્રશંસન્તિ દદાતિ પિતુરાજ્ઞયા ।
ભૂમિષ્ઠં પિતરં દૃષ્ટ્વા હ્યર્ધોન્મીલિતલોચનમ્ ॥ ૨,૩૦.૧૯॥

તસ્મિન્કાલે સુતો યસ્તુ સર્વદાનાનિ દાપયેત્ ।
ગયાશ્રાદ્ધાદ્વિશિષ્યેત સ પુત્રઃ કુલનન્દનઃ ॥ ૨,૩૦.૨૦॥

સ્વસ્થાનાચ્ચલિતશ્ચાસૌ વિકલસ્ય પિતુસ્તદા ।
પુત્રૈર્યત્નેન કર્તવ્યા પિતરં તારયન્તિ તે ॥ ૨,૩૦.૨૧॥

કિં દત્તૈર્બહુભિર્દાનૈઃ પિતુરન્ત્યેષ્ટિમાચરેત્ ।
અશ્વમેધો મહાયજ્ઞઃ કલાં નાર્હતિ ષોડશીમ્ ॥ ૨,૩૦.૨૨॥

ધર્માત્મા સ નુ પુત્રો વૈ દેવૈરપિ સુપૂજ્યતે ।
દાપયેદ્યસ્તુ દાનાનિ હ્યાતુરં પિતરં ભુવિ ॥ ૨,૩૦.૨૩॥

લોહદાનઞ્ચ દાતવ્યં ભૂમિયુક્તેન પાણિના ।
યમં ભીમઞ્ચ નાપ્નોતિ ન ગચ્છેત્તસ્ય વેશ્મનિ ॥ ૨,૩૦.૨૪॥

કુઠારો મુસલો દણ્ડઃ ખડ્ગશ્ચ ચ્છુરિકા તથા ।
એતાનિ યમહસ્તેષુ દૃશ્યાનિ પાપકર્મિણામ્ ॥ ૨,૩૦.૨૫॥

તસ્માલ્લોહસ્ય દાનન્તુ બ્રાહ્મણાયાતુરો દદેત્ ।
યમાયુધાનાં સન્તુષ્ટ્યૈ દાનમેતદુદાહૃતમ્ ॥ ૨,૩૦.૨૬॥

ગર્ભસ્થાઃ શિશવો યે ચ યુવાનઃ સ્થવિરાસ્તથા ।
એભિર્દાનવિશેષૈસ્તુ નિર્દહેયુઃ સ્વપાતકમ્ ॥ ૨,૩૦.૨૭॥

છુરિણઃ શ્યામશબલૌ ષણ્ડામર્કા ઉદુમ્બરાઃ ।
શબલા શ્યામદૂતા યે લોહદાનેન પ્રીણિતાઃ ॥ ૨,૩૦.૨૮॥

પુત્રાઃ પૌત્રાસ્તથા બન્ધુઃ સગોત્રાઃ સુહૃદસ્તથા ।
દદતે નાતુરે દાનં બ્રહ્મઘ્નૈસ્તુ સમા હિ તે ॥ ૨,૩૦.૨૯॥

પઞ્ચત્વે ભૂમિયુક્તસ્ય શૃણુ તસ્ય ચ યા ગતિઃ ।
અતિવાહઃ પુનઃ પ્રેતોવર્ષોર્ધ્વં સુકૃતં લભેત્ ॥ ૨,૩૦.૩૦॥

અગ્નિત્રયં ત્રયો લોકાસ્ત્રયો વેદાસ્ત્રયોડમરાઃ ।
કાલત્રયં ત્રિસન્ધ્યં ચ ત્રયો વર્ણાસ્ત્રિશક્તયઃ ॥ ૨,૩૦.૩૧॥

પાદાદૂર્ધ્વં કટિં યાવત્તાવદ્બ્રહ્યાધિતિષ્ઠતિ ।
ગ્રીવાં યાવદ્ધરિર્નાભેઃ શરીરે મનુજસ્ય ચ ॥ ૨,૩૦.૩૨॥

મસ્તકે તિષ્ઠતીશાનો વ્યક્તાવ્યક્તો મહેશ્વરઃ ।
એકમૂર્તેસ્ત્રયો ભાગા બ્રહ્મા વિષ્ણુહેશ્વરાઃ ॥ ૨,૩૦.૩૩॥

અહં પ્રાણઃ શરીરસ્થો ભૂતગ્રામચતુષ્ટયે ।
ધર્માધર્મે મતિં દદ્યાત્સુખદુઃખે કૃતાકૃતે ॥ ૨,૩૦.૩૪॥

જન્તોર્વુદ્ધિં સમાસ્થાય પૂર્વમર્માધિવાસિતામ્ ।
અહમેવ તથા જીવાન્પ્રેરયામિ ચ કર્મસુ ।
સ્વર્ગં ચ નરકં મોક્ષં પ્રયાન્તિ પ્રાણિનો ધ્રુવમ્ ॥ ૨,૩૦.૩૫॥

સ્વર્ગસ્થં નરકસ્થં વા શ્રાદ્ધે વાપ્યાયનં ભવેત્ ।
તસ્માચ્છ્રાદ્ધાનિ કુર્વીત ત્રિવિધાનિ વિચક્ષણઃ ॥ ૨,૩૦.૩૬॥

મત્સ્યં કર્મં ચ વારાહં નારસિંહઞ્ચ વામનમ્ ।
રામં રામં ચ કૃષ્ણં ચ બુદ્ધં ચૈવ સકલ્કિનમ્ ।
એતાનિ દશ નામાનિ સ્મર્તવ્યાનિ સદા બુધૈઃ ॥ ૨,૩૦.૩૭॥

સ્વર્ગં જીવાઃ સુખં યાન્તિ ચ્યુતાઃ સ્વર્ગાચ્ચ માનવાઃ ।
લબ્ધ્વા સુખં ચ વિત્તં ચ દયાદાક્ષિણ્યસંયુતાઃ ।
પુત્રપૌત્રૈર્ધનૈરાઢ્યા જીવેયુઃ શરદાં શતમ્ ॥ ૨,૩૦.૩૮॥

આતુરે ચ દદેદ્દાનં વિષ્ણુપૂજાઞ્ચ કારયેત્ ।
અષ્ટાક્ષરં તથા મન્ત્રં જપેદ્વા દ્વાદશાક્ષરમ્ ॥ ૨,૩૦.૩૯॥

પૂજયેચ્છુક્લપુષ્પૈશ્ચ નૈવેદ્યૈર્ઘૃતપાચિતૈઃ ।
તથા ગન્ધૈશ્ચ ધૂપૈશ્ચ શ્રુતિસ્મૃતિમનૂદિતૈઃ ॥ ૨,૩૦.૪૦॥

વિષ્ણુર્માતા પિતા વિષ્ણુર્વિષ્ણુઃ સ્વજનબાન્ધવાઃ ।
યત્ર વિષ્ણું ન પશ્યામિ તેન વાસેન કિં મમ ॥ ૨,૩૦.૪૧॥

જલે વિષ્ણુઃ સ્થલે વિષ્ણુર્વિષ્ણુઃ પર્વતમસ્તકે ।
જ્વાલામાલાકુલે વિષ્ણુઃ સર્વં વિષ્ણુમયં જગત્ ॥ ૨,૩૦.૪૨॥

વયમાપો વયં પૃથ્વી વયં દર્ભા વયં તિલાઃ ।
વયં ગાવો વયં રાજા વયં વાયુર્વયં પ્રજાઃ ॥ ૨,૩૦.૪૩॥

વયં હેમ વયં ધાન્યં વયં મધુ વયં ઘૃતમ્ ।
વયં વિપ્રા વયં દેવા વયં શમ્ભુશ્ચ ભૂર્ભુવઃ ॥ ૨,૩૦.૪૪॥

અહં દાતા અહં ગ્રાહી અહં યજ્વા અહં ક્રતુઃ ।
અહં હર્તા અહં ધર્મો અહં પૃથ્વી હ્યહં જલમ્ ॥ ૨,૩૦.૪૫॥

ધર્માધર્મે મતિં દદ્યાં કર્મભિસ્તુ શુભાશુભૈઃ ।
યત્કર્મ ક્રિયતે ક્વાપિ પૂર્વજન્માર્જિતં ખગ ॥ ૨,૩૦.૪૬॥

ધર્મે મતિમહં દદ્યામધર્મેઽપ્યહમેવ ચ ।
યાતનાં કુરુતે સોઽપિ ધર્મે મુક્તિં દદામ્યહમ્ ॥ ૨,૩૦.૪૭॥

મનુજાનાં હિતા તાર્ક્ષ્ય અન્તે વૈતરણી સ્મૃતા ।
તયાવમત્ય પાપૌઘં વિષ્ણુલોકં સ ગચ્છતિ ॥ ૨,૩૦.૪૮॥

બાલત્વે યચ્ચ કૌમારે યચ્ચ પરિણતૌ ચ યત્ ।
સર્વાવસ્થાકૃતં પાપં યચ્ચ જન્માન્તરેષ્વપિ ॥ ૨,૩૦.૪૯॥

યન્નિશાયાં તથા પ્રાતર્યન્મધ્યાહ્નાપરાહ્નયોઃ ।
સન્ધ્યયોર્યત્કૃતં કર્મ કર્મણા મનસા ગિરા ॥ ૨,૩૦.૫૦॥

દત્ત્વા વરાં સકૃદપિ કપિલાં સર્વકામિકામ્ ।
ઉદ્ધરેદન્તકાલે સ આત્માનં પાપસઞ્ચયાત્ ॥ ૨,૩૦.૫૧॥

ગાવો મમાગ્રતઃ સન્તુ પૃષ્ઠતઃ પાર્શ્વતસ્તથા ।
ગાવો મે હૃદયે સન્તુ ગવાં મધ્યે વસામ્યહમ્ ॥ ૨,૩૦.૫૨॥

યા લક્ષ્મીઃ સર્વભૂતાનાં યા ચ દેવે વ્યવસ્થિતા ।
ધેનુરૂપેણ સા દેવી મમ પાપં વ્યપોહતુ ॥ ૨,૩૦.૫૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે નાનાદાનનિરૂપણં નામ ત્રિંસોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૧
શ્રીવિષ્ણુરુવાચ ।
યે નરાઃ પાપસંયુક્તાસ્તે ગચ્છન્તિ યમાલયમ્ ।
નૃણાં મત્સાક્ષિકં દત્તમનન્તફલદં ભવેત્ ॥ ૨,૩૧.૧॥

યાવદ્રજઃ પ્રમાણાબ્દંસ્વર્ગે તિષ્ઠતિ ભૂમિદઃ ।

અશ્વારૂઢાશ્ચ તે યાન્તિ દદતે યે હ્યુપાનહૌ ॥ ૨,૩૧.૨॥

આતપે શ્રમયોગેન ન દહ્યન્તે ચ કુત્રચિત્ ।
છત્રદાનેન વૈ પ્રેતા વિચરન્તિ સુખં પથિ ॥ ૨,૩૧.૩॥

યમુદ્દિશ્ય દદાત્યન્નં તેન ચાપ્યાયિતો ભવેત્ ॥ ૨,૩૧.૪॥

અન્ધકારે મહાઘોરે અમૂર્તે લક્ષ્યવર્જિતે ।
ઉદ્દ્યોતેનૈવ તે યાન્તિ દીપદાનેન માનવાઃ ॥ ૨,૩૧.૫॥

આશ્વિને કર્તિકે વાપિ માઘે મૃતતિથાવપિ ।
ચતુર્દશ્યાઞ્ચ દીયેત દીપદાનં સુખાય વૈ ॥ ૨,૩૧.૬॥

પ્રત્યહઞ્ચ પ્રદાતવ્યં માર્ગે સુવિષમે નરૈઃ ।
યાવત્સંવત્સરં વાપિ પ્રેતસ્ય સુખલિપ્સયા ॥ ૨,૩૧.૭॥

કુલે દ્યોતતિ શુદ્ધાત્મા પ્રકાશત્વં સ ગચ્છતિ ।
જ્યોતિર્મયોઽસૌ પૂજ્યોઽસૌ દીપદાનપ્રદો નરઃ ॥ ૨,૩૧.૮॥

પ્રાઙ્મુખોદઙ્મુખં દીપં દેવાગારે દ્વિજાતયે ।
કુર્યાદ્યામ્યમુખં પિત્રે અદ્ભિઃ સઙ્કુલ્પ્ય સુસ્થિરમ્ ॥ ૨,૩૧.૯॥

સર્વોપહારયુક્તાનિ પદાન્યત્ર ત્રયોદશ ।
યો દદાતિ મૃતસ્યેહ જીવન્નપ્યાત્મહેતવે ।
સ ગચ્છતિ મહામાર્ગે મહાકષ્ટવિવર્જિતઃ ॥ ૨,૩૧.૧૦॥

આસનં ભાજનં ભોજ્યં દીયતે યદ્વિજાયતે ।
સુખે ન ભુઞ્જમાનસ્તુ દેન ગચ્છત્યલં પથિ ॥ ૨,૩૧.૧૧॥

કમણ્ડલુપ્રદાનેન તૃષિતઃ પિબતે જલમ્ ॥ ૨,૩૧.૧૨॥

ભાજનં વસ્ત્રદાનઞ્ચ કુસુમઞ્ચાઙ્ગુલીયકમ્ ।
એકાદશા હે દાતવ્યં પ્રેતોદ્ધરણહેતવે ॥ ૨,૩૧.૧૩॥

ત્રયોદશ પદાનીત્થં પ્રેતસ્ય શુભમિચ્છતા ।
દાતવ્યાનિ યથાશક્ત્યા પ્રેતોઽસૌ પ્રીણિતો ભવેત્ ॥ ૨,૩૧.૧૪॥

ભોજના નિ તિલાંશ્ચૈવ ઉદકુમ્ભાંસ્ત્રયોદશ ।
મુદ્રિકાં વસ્ત્રયુગ્મઞ્ચ તયા યાતિ પરાં ગતિમ્ ॥ ૨,૩૧.૧૫॥

યોઽશ્વં નાવં ગજં વાપિ બ્રાહ્મણે પ્રતિપાદયેત્ ।

સ મહિમ્નોઽનુસારેણ તત્તત્સુખમુપાશ્નુતે ॥ ૨,૩૧.૧૬॥

નાનાલોકાન્વિચરતિ મહિષીઞ્ચ દદાતિ યઃ ।
યમપુત્રસ્ય યા માતા મહિષી સુગતિપ્રદા ॥ ૨,૩૧.૧૭॥

તામ્બૂલં કુસુમં દેયં યામ્યાનાં હર્ષવર્ધનમ્ ।
તેન સમ્પ્રીણિતાઃ સર્વે તસ્મિન્ક્લેશં ન કુર્વતે ॥ ૨,૩૧.૧૮॥

ગો-ભૂ-તિલ-હિરણ્યાનિ દાનાન્યાહુઃ સ્વશક્તિતઃ ॥ ૨,૩૧.૧૯॥

મૃતોદ્દેશેન યો દદ્યાજ્જલપાત્રઞ્ચ મૃન્મયમ્ ।
ઉદપાત્રસહસ્રસ્ય ફલમાપ્નોતિ માનવઃ ॥ ૨,૩૧.૨૦॥

યમદૂતા મહારૌદ્રાઃ કરાલાઃ કૃષ્ણપિઙ્ગલાઃ ।
ન ભીષયન્તિ તં યામ્યા વસ્ત્રદાને કૃતે સતિ ॥ ૨,૩૧.૨૧॥

માર્ગે હિ ગચ્છમાનસ્તુ તૃષ્ણાર્તઃ શ્રમપીડિતઃ ।
ઘટાન્નદાનયોગેન સુખી ભવતિ નિશ્ચિતમ્ ॥ ૨,૩૧.૨૨॥

શય્યા દક્ષિણયા યુક્તા આયુધામ્બરસંયુતા ।
હૈમશ્રીપતિના યુક્તા દેયા વિપ્રાય શર્મણે ।
તથા પ્રેતત્વમુક્તોઽસૌ મોદતે સહ દૈવતૈઃ ॥ ૨,૩૧.૨૩॥

એતત્તે કથિતં તાર્ક્ષ્ય દાનમન્ત્યેષ્ટિકર્મજમ્ ।
અધુના કથયિષ્યેઽહમન્યદેહપ્રવેશનમ્ ॥ ૨,૩૧.૨૪॥

જાતસ્ય મૃત્યુલોકે વૈ પ્રાણિનો મરણં ધ્રુવમ્ ।
મૃતિઃ કુર્યાત્સ્વધર્મેણ યાસ્યતશ્ચ પરન્તપ ॥ ૨,૩૧.૨૫॥

પૂર્વકાલે મૃતાનાઞ્ચ પ્રાણિનાઞ્ચ ખગેશ્વર ।
સૂક્ષ્મોભૂત્વા ત્વસૌ વાયુર્નિર્ગચ્છત્યાસ્યમણ્ડલાત્ ॥ ૨,૩૧.૨૬॥

નવદ્વારૈ રોમભિશ્ચ જનાનાં તાલુરન્ધ્રકે ।
પાપિષ્ઠાનામપાનેન જીવો નિષ્ક્રામતિ ધ્રુવમ્ ॥ ૨,૩૧.૨૭॥

શરીરઞ્ચ પતેત્પશ્ચાન્નિર્ગતે મરુતીશ્વરે ।
વાતાહતઃ પતત્યેવ નિરાધારો યથા દ્રુમઃ ॥ ૨,૩૧.૨૮॥

પૃથિવ્યાં લીયતે પૃથ્વી આપશ્ચૈવ તથાપ્સુ ચ ।
તેજસ્તેજસિ લીયતે સમીરણઃ સમીરણે ।
આકાશે ચ તથા કાશઃ સર્વવ્યાપી ચ શઙ્કરે ॥ ૨,૩૧.૨૯॥

તત્ર કામસ્તથા ક્રોધઃ કાયે પઞ્ચેન્દ્રિયાણિ ચ ।
એતે તાર્ક્ષ્ય સમાખ્યાતા દેહે તિષ્ઠન્તિ તસ્કરાઃ ॥ ૨,૩૧.૩૦॥

કામઃ ક્રોધો હ્યહઙ્કારો મનસ્તત્રૈવ નાયકઃ ।
સંહારકશ્ચ કાલોઽયં પુણ્યપાપસમન્વિતઃ ॥ ૨,૩૧.૩૧॥

જગતશ્ચ સ્વરૂપન્તુ નિર્મિતં સ્વેન કર્મણા ।
પુનર્દેહાન્તરં યાતિ સુકૃતૈર્દુષ્કૃતૈર્નરઃ ॥ ૨,૩૧.૩૨॥

પઞ્ચેન્દ્રિયસમાયુક્તં સકલૈર્વિષ્યૈઃ સહ ।
પ્રવિશેત્સ નવં દેહં ગૃહે દગ્ધે યથા ગૃહી ॥ ૨,૩૧.૩૩॥

શરીરે યે સમાસીના સમ્ભવેત્સર્વધાતવઃ ।
ષાટ્કૌશિકો હ્યયં કાયો માતા પિત્રોશ્ચ ધાતવઃ ॥ ૨,૩૧.૩૪॥

સમ્ભવેયુસ્તથા તાર્ક્ષ્ય સર્વે વાતાશ્ચ દેહિનામ્ ।
મૂત્રં પુરીષં તદ્યોગા યે ચાન્યે વ્યાધયસ્તથા ॥ ૨,૩૧.૩૫॥

અસ્થિ શુક્રં તથા સ્નાયુઃ દેહેન સહ દહ્યતે ।
એષ તે કથિતસ્તાર્ક્ષ્ય વિનાશઃ સર્વદેહિનામ્ ॥ ૨,૩૧.૩૬॥

કથયામિ પુનસ્તેષાં શરીરઞ્ચ યથા ભવેત્ ।
એકસ્તમ્ભં સ્નાયુબદ્ધં સ્થૂણાદ્વયસમુદ્ધૃતમ્ ॥ ૨,૩૧.૩૭॥

ઇન્દ્રિયૈશ્ચ સમાયુક્તં નવદ્વારં શરીરકમ્ ।
વિષયૈશ્ચ સમાક્રાન્તં કામ-ક્રોધસમાકુલમ્ ॥ ૨,૩૧.૩૮॥

રાગ-દ્વેષસમાકીર્ણં તૃષ્ણાદુર્ગસુદુસ્તરમ્ ।
લોભજાલસમાયુક્તં પુરં પુરુષસંજ્ઞિતમ્ ॥ ૨,૩૧.૩૯॥

એતદ્ગુણસમાયુક્તં શરીરં સર્વદેહિનામ્ ।
તિષ્ઠન્તિ દેવતાઃ સર્વા ભુવનાનિ ચતુર્દશ ॥ ૨,૩૧.૪૦॥

આત્માનં યે ન જાનન્તિ તે નરાઃ પશવઃ સ્મૃતાઃ ।
એવમેતન્મયાખ્યાતં શરીરં તે ચતુર્વિધમ્ ॥ ૨,૩૧.૪૧॥

ચતુરશીતિલક્ષાણિ નિર્મિતા યોનયઃ પુરા ।
ઉદ્ભિજ્જાઃ સ્વેદજાશ્ચૈવ અણ્ડજાશ્ચ જરાયુજાઃ ॥ ૨,૩૧.૪૨॥

એતત્તે સર્વમાખ્યાતં યત્પૃષ્ટોઽહં ત્વયાનઘ ॥ ૨,૩૧.૪૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે પ્રેતકલ્પે શ્રીકૃષ્ણગરુડસંવાદે
દાનફ લાન્યદેહપ્રવેશાદિનિરૂપણં નામૈ કત્રિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૩૨
તાર્ક્ષ્ય ઉવાચ ।
કથમુત્પદ્યતે જન્તુર્ભૂતગ્રામે ચતુર્વિધે ।
ત્વચા રક્તં તથા માંસં મેદો મજ્જાસ્થિ જીવિતમ્ ॥ ૨,૩૨.૧॥

પાદૌ પાણી તથા ગુહ્યં જિહ્વા-કેશ-નખાઃ શિરઃ ।
સન્ધિમાર્ગાશ્ચ બહુશો રેખા નૈકવિધાસ્તથા ॥ ૨,૩૨.૨॥

કામઃ ક્રોધો ભયં લજ્જા મનો હર્ષઃ સુખાસુખમ્ ।
ચિત્રિતં છિદ્રિતઞ્ચાપિ નાનાજાલેન વેષ્ટિતમ્ ॥ ૨,૩૨.૩॥

ઇન્દ્રજાલમિદં મન્યે સંસારેઽસારસાગરે ।
કર્તા કોઽત્ર હૃષીકેશ સંસારે દુઃખસંકુલે ॥ ૨,૩૨.૪॥

શ્રીવિષ્ણુરુવાચ ।
કથયામિ પરં ગોપ્યં કોશસ્યાસ્ય વિનિર્ણયમ્ ।
યસ્ય વિજ્ઞાનમાત્રેણ સર્વજ્ઞત્વં પ્રજાયતે ॥ ૨,૩૨.૫॥

સાધુ પૃષ્ટં ત્વયા લોકે સદયં જીવકારણમ્ ।
વૈનતેય શ◌ૃણુષ્વ ત્વમેકાગ્રકૃતમાનસઃ ॥ ૨,૩૨.૬॥

ઋતુકાલે ચ નારીણાં વર્જ્યં દિનચતુષ્ટયમ્ ।
યતસ્તસ્મિન્બ્રહ્મહત્યાં પુરા વૃત્રસમુત્થિતામ્ ॥ ૨,૩૨.૭॥

બ્રહ્મા શક્રાત્સમુત્તાર્ય ચતુર્થાંશેન દત્તવાન્ ।
તાવન્નાલોક્યતે વક્ત્રં પાપં યાવદ્વપુઃ સ્થિતમ્ ॥ ૨,૩૨.૮॥

પ્રથમેઽહનિ ચાણ્ડાલી દ્વિતીયે બ્રહ્મઘાતિની ।
તૃતીયે રજકી જ્ઞેયા ચતુર્થેઽહનિ શુધ્યતિ ॥ ૨,૩૨.૯॥

સપ્તાહાત્પિતૃદેવાનાં ભવેદ્યોગ્યા કૃતાર્ચને ।
સપ્તાહમધ્યે યો ગર્ભસ્તત્સમ્ભૂતિર્મલિમ્લુચા ॥ ૨,૩૨.૧૦॥

નિષકસમયે પિત્રોર્યાદૃક્ચિત્તવિકલ્પના ।

તાદૃગ્ગર્ભસમુત્પત્તિર્જાયતે નાત્ર સંશયઃ ॥ ૨,૩૨.૧૧॥

યુગ્માસુ પુત્રા જાયન્તે સ્ત્રિયોઽયુગ્માસુ રાત્રિષુ ।
પૂર્વસપ્તમમુત્સૃજ્ય તસ્માદ્યુગ્માસુ સંવિશેત્ ॥ ૨,૩૨.૧૨॥

ષોડશર્તુર્નિશાઃ સ્ત્રીણાં સામાન્યાત્સમુદાહૃતઃ ।
યા ચતુર્દશમી રાત્રિર્ગર્ભસ્તિષ્ઠતિ તત્ર ચેત્ ॥ ૨,૩૨.૧૩॥

ગુણભાગ્યનિધિઃ પુત્રસ્તત્ર જાયેત ધાર્મિકઃ ।
સા નિશા તત્ર સામાન્યૈર્ન લભ્યેત ખગાધિપ ॥ ૨,૩૨.૧૪॥

પ્રાયશઃ સમ્ભવત્યત્ર ગર્ભસ્ત્વષ્ટાહમધ્યતઃ ।
પઞ્ચમેઽહનિ નારીણાં કાર્યં માધુર્યભોજનમ્ ॥ ૨,૩૨.૧૫॥

કટુક્ષારઞ્ચ તીક્ષ્ણઞ્ચ ત્યાજ્યમુષ્ણઞ્ચ દૂરતઃ ।
તત્ક્ષેત્રમોષધીપાત્રં બીજઞ્ચાપ્યમૃતાયિતમ્ ॥ ૨,૩૨.૧૬॥

તસ્મિન્નુપ્ત્વા નરઃ સ્વામી સમ્યક્ફલમવાપ્નુયાત્ ।
તસ્યાશ્ચૈવાતપો વર્જ્યં શીતલં કેવલં ચરેત્ ॥ ૨,૩૨.૧૭॥

તામ્બૂલપુષ્પશ્રીખણ્ડૈઃ સંયુક્તઃ શુચિવસ્ત્રભૃત્ ।
ધર્મમાદાય મનસિ સુતલ્પં સંવિશેત્પુમાન્ ॥ ૨,૩૨.૧૮॥

નિષેકસમયે યાદૃઙ્નરચિત્તવિકલ્પના ।
તાદૃક્સ્વભાવસમ્ભૂતિર્જન્તુર્વિશતિ કુક્ષિગઃ ॥ ૨,૩૨.૧૯॥

શુક્રસોણિતસંયોગે પિણ્ડોત્પત્તિઃ પ્રજાયતે ।
વર્ધતે જઠરે જન્તુસ્તારાપતિરિવામ્બરે ॥ ૨,૩૨.૨૦॥

ચૈતન્યં બીજરૂપં હિ શુક્રે નિત્યં વ્યવસ્થિતમ્ ।
કામશ્ચિત્તઞ્ચ શુક્રઞ્ચ યદા હ્યેકત્વમાપ્નુયુઃ ॥ ૨,૩૨.૨૧॥

તદા દ્રાવમવાપ્નોતિ યોષાગર્ભાશયે નરઃ ।
રક્તાધિક્યે ભવેન્નારી શુક્રાધિક્યે ભવેત્પુમાન્ ॥ ૨,૩૨.૨૨॥

શુક્રસોણિતયો સામ્યે ગર્ભાઃ ષણ્ડત્વમાપ્નુયુઃ ।
અહોરાત્રેણ કલિલં બુદ્બદં પઞ્ચભિર્દિનૈઃ ॥ ૨,૩૨.૨૩॥

ચતુર્દશે ભવેન્માંસં મિશ્રધાતુસમન્વિતમ્ ।
ઘનં માંસઞ્ચ વિંશાહે ગર્ભસ્થો વર્ધતે ક્રમાત્ ॥ ૨,૩૨.૨૪॥

પઞ્ચવિંશતિમે ચાહ્નિ બલં પુષ્ટિશ્ચ જાયતે ।
તથા માસે તુ સમ્પૂર્ણે પઞ્ચતત્ત્વં નિધારયેત્ ॥ ૨,૩૨.૨૫॥

માસદ્વયે તુ સઞ્જાતે ત્વચા મેદશ્ચ જાયતે ।
મજ્જાસ્થીનિ ત્રિભિર્માસૈઃ કેશાઙ્ગુલ્યશ્ચતુર્થકે ॥ ૨,૩૨.૨૬॥

કર્ણૌ ચ નાસિકે વક્ષો જાયેરન્માસિ પઞ્ચમે ।
કણ્ઠરન્ધ્રોદરં ષષ્ઠે ગુહ્યાદિર્માસિ સપ્તમે ॥ ૨,૩૨.૨૭॥

અઙ્ગપ્રત્યઙ્ગસમ્પૂર્ણો ગર્ભો માસૈરથાષ્ટભિઃ ।
અષ્ટમે ચલતે જીવો ધાત્રીગર્ભે પુનઃ પુનઃ ।
નવમેમાસિ સમ્પ્રાપ્તે ગર્ભસ્થૌજૌ દૃઢં ભવેત્ ॥ ૨,૩૨.૨૮॥

ચિકિત્સા જાયતે તસ્ય ગર્ભવાસપરિક્ષયે ।
નારી વાથ નરો વાથ નપુંસ્ત્વં વાભિજાયતે ॥ ૨,૩૨.૨૯॥

શક્તિત્રયં વિશાલાક્ષં ષાટ્કૌશિકસમાયુતમ્ ।
પઞ્ચેન્દ્રિયસમોપેતં દશનાડીવિભૂષિતમ્ ॥ ૨,૩૨.૩૦॥

દશપ્રાણગુણોપેતં યો જાનાતિ સ યોગવિત્ ।
મજ્જાસ્થિશુક્રમાંસાનિ રોમ રક્તં બલં તથા ॥ ૨,૩૨.૩૧॥

ષાટ્કૌશિકમિદં પિણ્ડં સ્યાજ્જન્તોઃ પાઞ્ચભૌતિકમ્ ।
નવમે દશમે માસિ જાયતે પાઞ્ચભૌતિકઃ ॥ ૨,૩૨.૩૨॥

સૂતિવાતૈઃ સમાકૃષ્ટઃ પીડયા વિહ્વલીકૃતઃ ।
પુષ્ટો નાડ્યાઃ સુષુમ્ણાયા યોષિદ્ગર્ભસ્થિતસ્ત્વરન્ ॥ ૨,૩૨.૩૩॥

ક્ષિતિર્વારિ હવિર્ભોક્તા પવનાકાશમેવ ચ ।
એભિર્ભૂતૈઃ પીડિતસ્તુ નિબદ્ધઃ સ્નાયુબન્ધનૈઃ ॥ ૨,૩૨.૩૪॥

મૂલભૂતા ઇમે પ્રોક્તાઃ સપ્ત નાડ્યન્તરે સ્થિતાઃ ।
ત્વચાસ્થિનાડ્યો રોમાણિ માંસઞ્ચૈવાત્ર પઞ્ચમમ્ ॥ ૨,૩૨.૩૫॥

એતે પઞ્ચ ગુણાઃ પ્રોક્તા મયા ભૂમેઃ ખગેશ્વર ।
યથા પઞ્ચ ગુણાશ્ચાપસ્તથા તચ્છૃણુ કાશ્યપ ॥ ૨,૩૨.૩૬॥

લાલા મૂત્રં તથા શુક્રં મજ્જાર રક્તઞ્ચ પઞ્ચમમ્ ।
આપઃ પઞ્ચગુણાઃ પ્રોક્તા જ્ઞાતવ્યાસ્તે પ્રયત્નતઃ ॥ ૨,૩૨.૩૭॥

ક્ષુધા તૃષા તથા નિદ્રા આલસ્યં કાન્તિરેવ ચ ।

તેજઃ પઞ્ચગુણં પ્રોક્તં તાર્ક્ષ્ય સર્વત્રયોગિભિઃ ॥ ૨,૩૨.૩૮॥

રાગદ્વેષૌ તથા લજ્જા ભયં મોહસ્તથૈવ ચ ।
ઇત્યેતત્કથિતં તાર્ક્ષ્ય વાયુજં ગુણપઞ્ચકમ્ ॥ ૨,૩૨.૩૯॥

આકુઞ્ચનં ધાવનઞ્ચ લઙ્ઘનઞ્ચ પ્રસારણમ્ ।
નિરોધઃ પઞ્ચમઃ પ્રોક્તો વાયોઃ પઞ્ચ ગુણાઃ સ્મૃતાઃ ॥ ૨,૩૨.૪૦॥

ઘોષશ્ચિન્તા ચ ગામ્ભીર્યં શ્રવણં સત્યસંક્રમઃ ।
આકાશસ્ય ગુણાઃ પઞ્ચ જ્ઞાત વ્યાસ્તાર્ક્ષ્ય યત્નતઃ ॥ ૨,૩૨.૪૧॥

શ્રોત્રં ત્વક્ચક્ષુષી જિહ્વા નાસા બુદ્ધીન્દ્રિયાણિ ચ ।
પાણી પાદૌ ગુદં પ્રાક્ચ ગુહ્યં કર્મેન્દ્રિયાણિ ચ ॥ ૨,૩૨.૪૨॥

ઇડાચ પિઙ્ગલા ચૈવ સુષુમ્ણા ચ તૃતીયકા ।
ગાન્ધારી ગજજિહ્વા ચ પૂષા ચૈવ યસા તથા ॥ ૨,૩૨.૪૩॥

અલમ્વુશા કુહૂશ્ચૈવ શઙ્ખિની દશમી સ્મૃતા ।
પિણ્ડ મધ્યે સ્થિતા હ્યેતાઃ પ્રધાના દશ નાડયઃ ॥ ૨,૩૨.૪૪॥

પ્રાણાપાનૌ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
નાગઃ કૂર્મશ્ચ કૃકરો દેવદત્તો ધનઞ્જયઃ ॥ ૨,૩૨.૪૫॥

ઇત્યેતે વાયવઃ પ્રોક્તા દશ દેહેષુ સુસ્થિતાઃ ।
કેવલં ભુક્તમન્નઞ્ચ પુષ્ટિદં સર્વદેહિનામ્ ॥ ૨,૩૨.૪૬॥

નયતે પ્રાણદો વાયુઃ શરીરે સર્વસન્ધિષુ ।
આહારો ભુક્તમાત્રસ્તુ વાયુના ક્રિયતે દ્વિધા ॥ ૨,૩૨.૪૭॥

સ પ્રવિશ્ય ગુહે સમ્યક્પૃથગન્નં પૃથગ્જલમ્ ।
ઊર્ધ્વમગ્નેર્જલં કૃત્વા તદન્નઞ્ચ જલોપરિ ॥ ૨,૩૨.૪૮॥

અગ્નેશ્ચાધઃ સ્વયં પ્રાણસ્તમગ્નિઞ્ચ ધમેચ્છનૈઃ ।
વાયુના ધમ્યમાનોઽગ્નિઃ પૃથક્કિટ્ટં પૃથગ્રસમ્ ॥ ૨,૩૨.૪૯॥

મલૈર્દ્વાદશભિઃ કિટ્ટં ભિન્નં દેહાત્પૃથગ્ભવેત્ ।
કર્ણાક્ષિનાસિકા જિહ્વા દન્તનાભિવપુર્ગુદમ્ ॥ ૨,૩૨.૫૦॥

નખા મલાશ્રયા હ્યેતે વિણ્મૂત્રઞ્ચેત્યનન્તકમ્ ।
શુક્રશોણિતસંયોગાદેતત્ષાટ્કૌશિકં સ્મૃતમ્ ॥ ૨,૩૨.૫૧॥

રોમ્ણાં કોટ્યસ્તથા તિસ્રોઽપ્યર્ધકોટિ સમન્વિતાઃ ।
દ્વાત્રિંશદ્દશનાઃ પ્રોક્તાઃ સામાન્યાદ્વિનતાસુત ॥ ૨,૩૨.૫૨॥

સપ્ત લક્ષાણિ કેશાઃ સ્યુર્નખાઃ પ્રોક્તાસ્તુ વિંશતિઃ ।
માંસં પલસહસ્રૈકં સામાન્યાદ્દેહસંસ્થિતમ્ ॥ ૨,૩૨.૫૩॥

રક્તં પલશતં તાર્ક્ષ્ય બુદ્ધમેવ પુરાતનૈઃ ।
પલાનિ દશ મેદશ્ચ ત્વચા ચૈવ તુ તત્સમા ॥ ૨,૩૨.૫૪॥

પલદ્વાદશકં મજ્જા મહારક્તં પલત્રયમ્ ।
શુક્રં દ્વિકુડવં જ્ઞેયં શોણિતં કુડવં સ્મૃતમ્ ॥ ૨,૩૨.૫૫॥

શ્લેષ્માણશ્ચ ષડૂર્ધ્વઞ્ચ વિણ્મૂત્રં તત્પ્રમાણતઃ ।
અસ્થ્નાં હિ હ્યધિકં પ્રોક્તં ષષ્ટ્યુત્તરશતત્રયાત્ ॥ ૨,૩૨.૫૬॥

એવં પિણ્ડઃ સમાખ્યાતો વૈભવં સમ્પ્રચક્ષ્મહે ।
સુખં દુઃખં ભયં ક્ષેમં કર્મણૈવ હિ પ્રાપ્યતે ॥ ૨,૩૨.૫૭॥

અધોમુખં ચોર્ધ્વપાદં ગર્ભાદ્વાયુઃ પ્રકર્ષતિ ।
તલે તુ કરયોર્ન્યસ્ય વર્ધતે જાનુપાર્શ્વયોઃ ॥ ૨,૩૨.૫૮॥

અઙ્ગુષ્ઠૌ ચોપરિ ન્યસ્તૌ જાન્વારેથ કરાઙ્ગુલી ।
જાનુપૃષ્ઠે તથા નેત્રે જાનુમધ્યે ચ નાસિકા ॥ ૨,૩૨.૫૯॥

એવં વૃદ્ધિં ક્રમાદ્યાતિ જન્તુઃ સ્ત્રીગર્ભસંસ્થિતઃ ।
કાઠિન્યમસ્થીન્યાયાન્તિ ભુક્તપીતેન જીવતિ ॥ ૨,૩૨.૬૦॥

નાડી વાપ્યાયની નામ નાભ્યાં તત્ર નિબધ્યતે ।
સ્ત્રીણાં તથાન્ત્રસુષિરે સ નિબદ્ધઃ પ્રજાયતે ॥ ૨,૩૨.૬૧॥

ક્રામન્તિ ભુક્તપીતાનિ સ્ત્રીણાં ગર્ભોદરે તથા ।
તૈરાપ્યાયિતદેહોઽસૌ જન્તુર્વૃદ્ધિમુપૈતિ ચ ॥ ૨,૩૨.૬૨॥

સ્મૃત્યસ્તત્ર પ્રયાન્ત્યસ્ય બહ્વ્યઃ સંસારભૂતયઃ ।
તતો નિર્વેદમાયાતિ પીડ્યમાન ઇતસ્તતઃ ॥ ૨,૩૨.૬૩॥

પુનર્નૈવં કરિષ્યામિ ભુક્તમાત્ર ઇહોદરાત્ ।
તથાતથા યતિષ્યામિ ગર્ભં નાપ્નોમ્યહં યથા ॥ ૨,૩૨.૬૪॥

ઇતિ સઞ્ચિન્તયઞ્જીવો સ્મૃત્વા જન્મશતાનિ વૈ ।
યાનિ પૂર્વાનુભૂતાનિ દેવભૂતાત્મજાનિ વૈ ॥ ૨,૩૨.૬૫॥

તતઃ કાલક્રમાજ્જન્તુઃ પરિવર્ત્યત્વધોમુખઃ ।
નવમે દશમે વાપિ માસિ સંજાયતે તતઃ ॥ ૨,૩૨.૬૬॥

નિષ્ક્રમ્યમાણો વાતેન પ્રાજાપત્યેન પીડ્યતે ।
નિષ્ક્રમતે ચ વિલપંસ્તદા દુઃખનિપીડિતઃ ॥ ૨,૩૨.૬૭॥

નિષ્ક્રામંશ્ચોદરાન્મૂર્છામસહ્યાં પ્રતિપદ્યતે ।
પ્રાપ્નોતિ ચેતનાં ચાસૌ વાયુસ્પર્શસુખાન્વિતઃ ॥ ૨,૩૨.૬૮॥

તતસ્તં વૈષ્ણવી માયા સમાસ્કન્દતિ મોહિની ।
તયા વિમોહિતાત્માસૌ જ્ઞાનભ્રંશમવાપ્નુતે ॥ ૨,૩૨.૬૯॥

ભ્રષ્ટજ્ઞાનં બાલભાવે તતો જન્તુઃ પ્રપદ્યતે ।
તતઃ કૌમારકાવસ્થાં યૌવનં વૃદ્ધતામપિ ॥ ૨,૩૨.૭૦॥

પુનશ્ચ તદ્વન્મરણં જન્મ પ્રાપ્નોતિ માનવઃ ।
તતઃ સંસારચક્રેઽસ્મિન્ભ્રામ્યતે ઘટયન્ત્રવત્ ॥ ૨,૩૨.૭૧॥

કદાચિત્સ્વર્ગમાપ્નોતિ કદાચિન્નિરયં નરઃ ।
સ્વર્ગં ચ નિરયં ચૈવ સ્વકર્મફલમશ્નુતે ॥ ૨,૩૨.૭૨॥

કદાચિદ્ભુક્તકર્મા ચ ભુવં સ્વલ્પેન ગચ્છતિ ।
સ્વર્લોકે નરકે ચૈવ ભુક્તપ્રાયે દ્વિજોત્તમાઃ ॥ ૨,૩૨.૭૩॥

નરકેષુ મહદ્દુઃખમેતદ્યત્સ્વર્ગવાસિનઃ ।
દૃશ્યતે નાત્ર મોદન્તે પાત્યમાનાસ્તુ નારકૈઃ ॥ ૨,૩૨.૭૪॥

સ્વર્ગેઽપિ દુઃખમતુલં યદારોહણકાલતઃ ।
પ્રભૃત્યહં પતિષ્યામીત્યેતન્મનસિ વર્તતે ॥ ૨,૩૨.૭૫॥

નાર કાંશ્ચૈવ સમ્પ્રેક્ષ્ય મહદ્દુઃખમવાપ્યતે ।
એવં ગતિમહં ગન્તેત્યહર્નિશમનિર્વૃતઃ ॥ ૨,૩૨.૭૬॥

ગર્ભવાસે મહદ્દુઃખં જાયમાનસ્ય યોનિજમ્ ।
જાતસ્ય બાલભાવેઽપિ વૃદ્ધત્વે દુઃખમેવ ચ ॥ ૨,૩૨.૭૭॥

કામેર્ષ્યાક્રોધસમ્બન્ધાદ્યૌવનેઽપિ ચ દુઃસહમ્ ।
દુઃસ્વપ્નં યા વૃદ્ધતા ચ મરણે દુઃખમુત્કટમ્ ॥ ૨,૩૨.૭૮॥

કૃષ્યમાણશ્ચ યામ્યૈઃ સ નરકેઽપિ ચ યાત્યધઃ ।

પુનશ્ચ ગર્ભાજ્જન્મ સ્યાન્મરણં દુષ્કરં તથા ॥ ૨,૩૨.૭૯॥

એવં સંસારચક્રેઽસ્મિજ્જન્તવો ઘટયન્ત્રવત્ ।
ભ્રામ્યન્તે પ્રાક્તનૈર્બધૈર્બદ્ધા વિધ્યન્તિ ચાસકૃત્ ॥ ૨,૩૨.૮૦॥

નાસ્તિ પક્ષિન્સુખં કિઞ્ચિત્ક્ષેત્રે દુઃખશતાકુલે ।
વિનતાસુત મોક્ષાય યતિતવ્યં તતો નરૈઃ ॥ ૨,૩૨.૮૧॥

એતત્તે સર્વમાખ્યાતં યથા ગર્ભસ્ય સંસ્થિતિઃ ।
કથયામિ ક્રમપ્રશ્નં પૃષ્ટં વા વર્તતે સ્પૃહા ॥ ૨,૩૨.૮૨॥

ગરુડ ઉવાચ ।
મધ્યે કૃતમહાપ્રશ્નદ્વયસ્યાપ્તં મયોત્તરમ્ ।
પ્રશ્નસ્યાપિ તૃતીયસ્ય ઉત્તરં ચ વિધીયતામ્ ॥ ૨,૩૨.૮૩॥

શ્રીકૃષ્ણ ઉવાચ ।
મ્રિયમાણસ્ય કિં કૃત્યમિતિ ત્વં પૃષ્ટવાનસિ ।
શ ૃણુ તત્રોત્તરં તૂક્તં કથયામિ સમાસતઃ ॥ ૨,૩૨.૮૪॥

આસન્નમરણં જ્ઞાત્વા પુરુષં સ્નાપયેત્તતઃ ।
ગોમૂત્રગોમયસુમૃત્તીર્થોદકકુશોદકૈઃ ॥ ૨,૩૨.૮૫॥

વાસસી પરિધાર્યાથ ધૌતે તુ શુચિ ની શુભે ।
દર્ભાણ્યાદૌ સમાસ્તીર્ય દક્ષિણાગ્રાન્વિકીર્ય ચ ॥ ૨,૩૨.૮૬॥

તિલાન્ગોમયલિપ્તાયાં ભૂમૌ તત્ર નિવેશયેત્ ॥ ૨,૩૨.૮૭॥

પ્રાગુદક્શિરસં વાપિ મુખે સ્વર્ણં વિનિઃ ક્ષેપેત્ ।
શાલગ્રામશિલા તત્ર તુલસી ચ ખગેશ્વર ॥ ૨,૩૨.૮૮॥

વિધેયા સન્નિધૌ સર્પિર્દીપં પ્રજ્વાલયેત્પુનઃ ।
નમો ભગવતે વાસુદેવાયેતિ જપસ્તથા ॥ ૨,૩૨.૮૯॥

આદૌ તુ પ્રણવં કૃત્વા પૂજાદાને તતઃ સ્મૃતે ।
સમભ્યર્ચ્ય હૃષીકેશં પુષ્પધૂપાદિભિસ્તતઃ ॥ ૨,૩૨.૯૦॥

પ્રણિપાતૈઃ સ્તવૈઃ પુણ્યૈર્ધ્યા નયોગેન પૂજયેત્ ।
દત્ત્વા દાનં ચ વિપ્રેભ્યો દીનાનાથેભ્ય એવ ચ ॥ ૨,૩૨.૯૧॥

પુત્રે મિત્રે કલત્રે ચ ક્ષેત્રધાન્યધનાદિષુ ।
નિવર્તયેન્મમત્વં ચ વિષ્ણોઃ પાદૌ હૃદિ સ્મરન્ ॥ ૨,૩૨.૯૨॥

ઉચ્ચૈઃ પુરુષસૂક્તં ચ યદિ શ્રેષ્ઠાપદસ્તદા ।
પુત્રાદ્યાઃ પ્રપઠેયુસ્તે મ્રિયમાણે નિજે જને ॥ ૨,૩૨.૯૩॥

એતત્તે સર્વમાખ્યાતં કૃત્યં મૃત્યાવુપસ્થિતે ।
ફલમપ્યસ્ય કૃત્સ્નસ્ય સમાસાત્તે વદામ્યહમ્ ॥ ૨,૩૨.૯૪॥

સ્નાનેન શુચિતાપ્રાપ્તિરપાવિત્ર્યહૃતિસ્તતઃ ।
તતો વિષ્ણોઃ સ્મૃતિસ્તસ્ય જ્ઞાનાત્સર્વફલપ્રદા ॥ ૨,૩૨.૯૫॥

દર્ભતૂલી નયેત્સ્વર્ગમાતુરં તુ ન સંશયઃ ।
તિલૈર્દર્ભૈશ્ચ નિઃ ક્ષિપ્તૈઃ સ્નાનં ક્રતુમયં ભવેત્ ॥ ૨,૩૨.૯૬॥

બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ શ્રીર્હુતાશસ્તથૈવ ચ ।
મણ્ડલે ચોપતિષ્ઠન્તિ તસ્માત્કુર્વીત મણ્ડલમ્ ॥ ૨,૩૨.૯૭॥

પ્રાગુદગ્વા કૃતેનેહ શિરસા લોકમુત્તમમ્ ।
વ્રજતે યદિ પાપસ્યાલ્પત્વં પુંસો ભવેત્ખગ ॥ ૨,૩૨.૯૮॥

પઞ્ચરત્ને મુખે મુક્તે જિવે જ્ઞાનં પ્રરોહતિ ।
તુલસી બ્રાહ્મણા ગાવો વિષ્ણુરેકાદશી ખગ ॥ ૨,૩૨.૯૯॥

પઞ્ચ પ્રવહણાન્યેવ ભવાબ્ધૌ મજ્જતાં નૃણામ્ ।
વિષ્ણુરેકાદશી ગીતા તુલસી વિપ્રધેનવઃ ॥ ૨,૩૨.૧૦૦॥

અસારે દુર્ગસંસારે ષટ્પદી ભક્તિદાયિની ।
નમો ભગવતે વાસુદેવાયેતિ જપન્નરઃ ॥ ૨,૩૨.૧૦૧॥

ઓઙ્કારપૂર્વં સાયુજ્યં પ્રાપ્નુયાન્નાત્ર સંશયઃ ।
પૂજયાપિ ચ મલ્લોકપ્રાપ્તિરારાદ્દિવં વ્રજેત્ ॥ ૨,૩૨.૧૦૨॥

બન્ધાભાવે મમત્વેતુ જ્ઞાનં પુરુષસૂક્તતઃ ।
યસ્યયસ્યાધિકત્વં તુ સાધનેષ્વેષુ કાશ્યપ ॥ ૨,૩૨.૧૦૩॥

તત્તત્ફલસ્યાપ્યાધિક્યં ભવતીત્યવધારય ।
દાતવ્યાનિ યથાશક્ત્યા પ્રીતોઽસૌ સર્વદા ભવેત્ ॥ ૨,૩૨.૧૦૪॥

એતત્તે સર્વમાખ્યાતં સ્નાનાદિષુ ફલં મયા ।
બ્રહ્માણ્ડે યે ગુણાઃ સન્તિ શરીરે તે વ્યવસ્થિતાઃ ॥ ૨,૩૨.૧૦૫॥

પાતાલભૂધરા લોકાસ્તથાન્યે દ્વીપસાગરાઃ ।

આદિત્યાદિગ્રહાઃ સર્વે પિણ્ડમધ્યે વ્યવસ્થિતાઃ ॥ ૨,૩૨.૧૦૬॥

પાદાધસ્તુ તલં જ્ઞેયં પાદોર્ધ્વં વિતલં તથા ।
જાનુભ્યાં સુતલં વિદ્ધિ સક્થિદેશે મહાતલમ્ ॥ ૨,૩૨.૧૦૭॥

તથા તલાતલઞ્ચોરૌ ગુહ્યદેશે રસાતલમ્ ।
પાતાલં કટિસંસ્થન્તુ પાદાદૌ લક્ષયેદ્બુધઃ ॥ ૨,૩૨.૧૦૮॥

ભૂર્લોકં નાભિમધ્યે તુ ભુવર્લોકં તદૂર્ધ્વતઃ ।
સ્વર્ગલોકં હૃદયે વિદ્યાત્કણ્ઠદેશે મહસ્તથા ॥ ૨,૩૨.૧૦૯॥

જનલોકં વક્ત્રદેશે તપોલોકં લલાટકે ।
સત્યલોકં મહારન્ધ્રે ભુવનાનિ ચતુર્દશ ॥ ૨,૩૨.૧૧૦॥

ત્રિકોણે સંસ્થિતો મેરુરધઃ કોણે ચ મન્દરઃ ।
દક્ષિણે ચેવ કૈલાસો વામભાગે હિમાચલઃ ॥ ૨,૩૨.૧૧૧॥

નિષધશ્ચોર્ધ્વભાગે ચ દક્ષિણે ગન્ધમાદનઃ ।
મલયો (રમણો) વામરેખાયાં સપ્તૈતે કુલપર્વતાઃ ॥ ૨,૩૨.૧૧૨॥

અસ્થિસ્થાને સ્થિતો જમ્બૂઃ શાકો મજ્જાસુ સંસ્થિતઃ ।
કુશદ્વીપઃ સ્થિતો માંસે ક્રૌઞ્ચદ્વીપઃ શિરાસ્થિતઃ ॥ ૨,૩૨.૧૧૩॥

ત્વચાયાં શાલ્મલિદ્વાપો પ્લક્ષઃ રોમણાં ચ સઞ્ચયે ।
નખસ્થઃ પુષ્કરદ્વીપઃ સાગરાસ્તદનન્તરમ્ ॥ ૨,૩૨.૧૧૪॥

ક્ષારોદશ્ચ તથા મૂત્રે ક્ષારે ક્ષીરોદસાગરઃ ।
સુરોદધિશ્ચ શ્લેષ્મસ્થઃ મજ્જાયાં ઘૃતસાગરઃ ॥ ૨,૩૨.૧૧૫॥

રસોદધિં રસે વિદ્યાચ્છોણિતે દધિસગરમ્ ।
સ્વાદુલં લમ્બિકાસ્થાને ગર્ભોદં શુક્રસંસ્થિતમ્ ॥ ૨,૩૨.૧૧૬॥

નાદચક્રે સ્થિતઃ સૂર્યો બિન્દુચક્રે ચ ચન્દ્રમાઃ ।
લોચનસ્થઃ કુજો જ્ઞેયો હૃદયે ચ બુધઃ સ્મૃતઃ ॥ ૨,૩૨.૧૧૭॥

વિષ્ણુસ્થાને ગુરું વિદ્યાચ્છુક્રે શુક્રો વ્યવસ્થિતઃ ।
નાભિસ્થાને સ્થિતો મન્દો મુખે રાહુઃ સ્થિતઃ સદા ॥ ૨,૩૨.૧૧૮॥

પાયુ (દ) સ્થાને સ્થિતઃ કેતુઃ શરીરે ગ્રહમણ્ડલમ્ ।
વિભક્તઞ્ચ સમાખ્યાતમાપાદતલમસ્તકમ્ ॥ ૨,૩૨.૧૧૯॥

ઉત્પન્ના યે હિ સંસારે મ્રિયન્તે તે ન સંશયઃ ।
બુભુક્ષા ચ તૃષા રૌદ્રા દાહોદ્ભૂતા ચ મૂર્છના ॥ ૨,૩૨.૧૨૦॥

યત્ર પીડાસ્ત્વિમા રૌદ્રાસ્તા વૈ વૃશ્ચિકદંશજાઃ ।
વિનાશઃ પૂર્ણકાલે ચ જાયતે સર્વદેહિનામ્ ॥ ૨,૩૨.૧૨૧॥

અગ્રે અગ્રે હિ ધાવન્તિ યમલોકગતસ્યવૈ ।
તપ્તવાલુકમધ્યેન પ્રજ્વલદ્વહ્નિમધ્યતઃ ॥ ૨,૩૨.૧૨૨॥

કેશગ્રાહૈઃ સમાક્રાન્તા નીયન્તે યમકિઙ્કરૈઃ ।
પાપિષ્ઠાસ્ત્વધમાસ્તાર્ક્ષ્ય દયાધર્મવિવર્જિતાઃ ॥ ૨,૩૨.૧૨૩॥

યમલોકે વસન્ત્યેતે કુટ્યાં જન્મ ન વિદ્યતે ।
એવં સઞ્જાયતે તાર્ક્ષ્ય મર્ત્યે જન્તુઃ સ્વકર્મભિઃ ॥ ૨,૩૨.૧૨૪॥

ઉત્પન્ના યે હિ સંસારે મ્રિયન્તે તે ન સંશયઃ ।
આયુઃ કર્મ ચ વિત્તઞ્ચ વિદ્યા નિધનમેવ ચ ॥ ૨,૩૨.૧૨૫॥

પઞ્ચૈતાનિ હિ સૃજ્યન્તે ગર્ભસ્થસ્યૈવ દેહિનઃ ।
કર્મણા જાયતે જન્તુઃ કર્મણૈવ પ્રલીયતે ॥ ૨,૩૨.૧૨૬॥

સુખં દુઃખં ભયં ક્ષેમં કર્મણૈવાભિપદ્યતે ।
અધોમુખં ચોર્ધ્વપાદં ગર્ભાદ્વાયુઃ પ્રકર્ષતિ ॥ ૨,૩૨.૧૨૭॥

જન્મતો વૈષ્ણવી માયા સમોહયતિ સત્વરમ્ ।
સ્વકર્મકૃતસમ્બન્ધો જન્તુર્જન્મ પ્રપદ્યતે ॥ ૨,૩૨.૧૨૮॥

સુકૃતાદુત્તમો ભોગભોગ્યવાન્સુકુલે ભવેત્ ।
યથાયથા દુષ્કૃતં તત્કુલે હીને પ્રજાયતે ॥ ૨,૩૨.૧૨૯॥

દરિદ્રો વ્યાધિતો મૂર્ખઃ પાપકૃદ્દુઃખભાજનમ્ ।
અતઃ પરં કિમર્થં તે કથયામિ ખગેશ્વર ॥ ૨,૩૨.૧૩૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીદૃ ધર્મદૃપ્રેતદૃશ્રીકૃષ્ણગરુડસંવાદે જન્તૂત્પત્તિતદ્વધાત્વાદિવિભાગભુવનાદિવિભાગવર્ણનં નામ દ્વાત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૩
ગરુડ ઉવાચ ।
ઉત્પત્તિલક્ષણં જન્તોઃ કથિતં મયિ પુત્રકે ।

યમલોકઃ કિયન્માત્રસ્ત્રૈલોક્યે સચરાચરે ।
વિસ્તરં તસ્ય મે બ્રૂહિ અધ્વા ચૈવ કિયાન્સ્મૃતઃ ॥ ૨,૩૩.૧॥

કૈશ્ચ પાપૈઃ કૃતૈર્દેવ કેન વા શુભકર્મણા ।
ગચ્છન્તિ માનવાસ્તત્ર કથયસ્વ વિશેષતઃ ॥ ૨,૩૩.૨॥

શ્રીભગવાનુવાચ ।
ષટશીતિસહસ્રાણિ યોજનાનાં પ્રમાણતઃ ।
યમલોકસ્ય ચાધ્વાનમન્તરા માનુષસ્ય ચ ॥ ૨,૩૩.૩॥

ધ્માતતામ્રમિવાતપ્તો જ્વલદ્દુર્ગો મહાપથઃ ।
તત્ર ગચ્છન્તિ પાપિષ્ઠા માનવા મૂઢચેતસઃ ॥ ૨,૩૩.૪॥

કણ્ટકાશ્ચ સુતીક્ષ્ણા વૈ વિવિધા ઘોરદર્શનાઃ ।
તૈસ્તુવાલુક્ષિતિર્વ્યાપ્તા હુતાશશ્ચ તથોલ્બણઃ ॥ ૨,૩૩.૫॥

વૃક્ષચ્છાયા ન તત્રાસ્તિ યત્ર વિશ્રમતે નરઃ ।
ગૃહીતઃ કાલપાશૈશ્ચ કૃતૈઃ કર્મભિરુલ્બણૈઃ ॥ ૨,૩૩.૬॥

તસ્મિન્માર્ગે ન ચાન્નાદ્યં યેન પ્રાણાન્પ્રપોષયેત્ ।
ન જલં દૃશ્યતે તત્ર તૃષા યેન વિલીયતે ॥ ૨,૩૩.૭॥

ક્ષુધયા પીડિતો યાતિ તૃષ્ણયા ચ મહાપથે ।
શીતેન કમ્પતે ક્વાપિ યમમાર્ગેઽતિદુર્ગમે ॥ ૨,૩૩.૮॥

યદ્યસ્ય યાદૃશં પાપં સ પન્થાસ્તસ્ય તાદૃશઃ ।
સુદીનાઃ કૃપણા મૂઢા દુઃખૈર્વ્યાપ્તાસ્તરન્તિ તમ્ ॥ ૨,૩૩.૯॥

રુદન્તિ દારુણં કેચિત્કેચિદ્દ્રોહં વદન્તિ ચ ।
આત્મકર્મકૃતૈર્દોષૈઃ પચ્યમાના મુહુર્મુહુઃ ॥ ૨,૩૩.૧૦॥

ઈદૃગ્વિધઃ સ વૈ પન્થા વિજ્ઞેયો દારુણઃ ખગ ।
વિતૃષ્ણા યે નરા લોકે સુખં તસ્મિન્વ્રજન્તિ તે ॥ ૨,૩૩.૧૧॥

યાનિયાનિ ચ દાનાનિ દત્તાનિ ભુવિ માનવૈઃ ।
તાનિતાન્યુપતિષ્ઠન્તિ યમલોકે પુરઃ પથિ ॥ ૨,૩૩.૧૨॥

પાપિનો નોપતિષ્ઠન્તિ દાહશ્રાદ્ધજલાઞ્જલિ ।
ભ્રમન્તિ વાયુભૂતાસ્તે યે ક્ષુદ્રાઃ પાપકર્મિણઃ ॥ ૨,૩૩.૧૩॥

ઈદૃશં વર્ત્મ તદ્રૌદ્રં કથિતં તવ સુવ્રત ।

પુનશ્ચ કથયિષ્યામિ યમમાર્ગસ્ય યા સ્થિતિઃ ॥ ૨,૩૩.૧૪॥

યામ્યનૈરૃતયોર્મધ્યે પુરં વૈવસ્વતસ્ય તુ ।
સર્વં વજ્રમયં દિવ્યમભેદ્યં તત્સુરાસુરૈઃ ॥ ૨,૩૩.૧૫॥

ચતુરશ્રં ચતુર્દ્વારં સપ્તપ્રાકારતોરણમ્ ।
સ્વયં તિષ્ઠતિ વૈ યસ્યાં યમો દૂતૈઃ સમન્વિતઃ ॥ ૨,૩૩.૧૬॥

યોજનાનાં સહસ્રં વૈ પ્રમાણેન તદુચ્યતે ।
સર્વરત્નમયં દિવ્યં વિદ્યુજ્જ્વાલાર્કતૈજસમ્ ॥ ૨,૩૩.૧૭॥

તદ્ગૃહં ધર્મરાજસ્ય વિસ્તીર્ણં કાઞ્ચનપ્રભમ્ ।
યોજનાનાં પઞ્ચશતપ્રમાણેન સમુચ્છ્રિતમ્ ॥ ૨,૩૩.૧૮॥

વૃતં સ્તમ્ભસહસ્રૈસ્તુ વૈદૂર્યમણિમણ્ડિતમ્ ।
મુક્તાજાલગવાક્ષં ચ પતાકાશતભૂષિતમ્ ॥ ૨,૩૩.૧૯॥

ઘણ્ટાશતનિનાદાઢ્યં તોરણાનાં શતૈર્વૃતમ્ ।
એવમાદિભિરન્યૈશ્ચ ભૂષણૈર્ભૂષિતં સદા ॥ ૨,૩૩.૨૦॥

તત્રસ્થો ભગવાન્ધર્મ આસને તુ સમે શુભે ।
દશયો જનવિસ્તીર્ણે નીલજીમૂતસન્નિભે ॥ ૨,૩૩.૨૧॥

ધર્મજ્ઞો ધર્મશીલશ્ચ ધર્મયુક્તો હિતો યમઃ ।
ભયદઃ પાપયુક્તાનાં ધાર્મિકાણાં સુખપ્રદઃ ॥ ૨,૩૩.૨૨॥

મન્દમારુ તસંયોગૈરુત્સવૈર્વિવિધૈસ્તથા ।
વ્યાખ્યાનૈર્વિવિધૈર્યુક્તઃ શઙ્ખવાદિત્રનિઃ સ્વનૈઃ ॥ ૨,૩૩.૨૩॥

પુરમધ્યપ્રવેશે તુ ચિત્રગુપ્તસ્ય વૈ ગૃહમ્ ।
પઞ્ચવિંશતિસંખ્યાનાં યોજનાનાં સુવિસ્તરમ્ ॥ ૨,૩૩.૨૪॥

દશોચ્છ્રિતં મહાદિવ્યં લોહપ્રાકારવેષ્ટિતમ્ ।
પ્રતોલીશતસંચારં પતતાકાશતશોભિતમ્ ॥ ૨,૩૩.૨૫॥

દીપિકાશતસઙ્કીર્ણં ગીતધ્વનિસમાકુલમ્ ।
વિચિત્રચિત્રકુશલૈશ્ચિત્રગુપ્તસ્ય વૈ ગૃહમ્ ॥ ૨,૩૩.૨૬॥

મણિમુક્તામયે દિવ્યે આસને પરમાદ્ભુતે ।
તત્રસ્થો ગણયત્યાયુર્માનુષેષ્વિતરેષુ ચ ॥ ૨,૩૩.૨૭॥

ન મુહ્યતિ કદાચિત્સ સુકૃતે દુષ્કૃતેઽપિ વા ।
યથૈનોપાર્જિતં યાવત્તાવદ્ધૈ વેત્તિ તસ્ય તત્ ॥ ૨,૩૩.૨૮॥

દશાષ્ટદોષરહિતં કૃત કર્મ લિખત્યસૌ ।
ચિત્રગુપ્તાલયાતાચ્યાં જ્વરસ્યાસ્તિ મહાગૃહમ્ ॥ ૨,૩૩.૨૯॥

દક્ષિણે ચાપિ શૂલસ્ય લતાવિસ્ફોટકસ્ય ચ ।
પશ્ચિમે કાલ પાશસ્ય અજીર્ણસ્યારુચેસ્તથા ॥ ૨,૩૩.૩૦॥

મધ્યપીઠોત્તરે જ્ઞેયો તથા ચાન્યા વિષચિકા ।
ઐશાન્યાં વૈ શિરોઽર્તિશ્ચ આગ્નેય્યાઞ્ચૈવ મૃકતા ॥ ૨,૩૩.૩૧॥

અતિસારશ્ચ નૈરૃત્યાં વાયવ્યાં દાહસંજ્ઞકઃ ।
એભિઃ પરિવૃતો નિત્યં ચિત્રગુપ્તઃ સ તિષ્ઠતિ ॥ ૨,૩૩.૩૨॥

યત્કર્મ કુરુતે કશ્ચિત્તત્સર્વં વિલખત્યસૌ ।
ધર્મરાજગૃહદ્વારિ દૂતાસ્તાર્ક્ષ્ય તથા નિશિ ।
તિષ્ઠન્તિ પાપકર્માણઃ પચ્યમાના નરાધમાઃ ॥ ૨,૩૩.૩૩॥

યમદૂતૈર્મહાપાશૈર્હન્યમાનાશ્ચ મુદ્ગરૈઃ ।
વધ્યન્તે વિવિધૈઃ પાપૈઃ પૂર્વકર્મકૃતૈર્નરાઃ ॥ ૨,૩૩.૩૪॥

નાનાપ્રહારણાગ્રૈશ્ચ નાનાયન્ત્રૈસ્તથા પરે ।
છિદ્યન્તે પાપકર્માણઃ ક્રકચૈઃ કાષ્ઠવદ્વિધા ॥ ૨,૩૩.૩૫॥

અન્યે જ્વલદ્ભિરઙ્ગારૈર્વેષ્ટિતાઃ પરિતો ભૃશમ્ ।
પૂર્વકર્મવિપાકેન ધ્માયન્તે લોહપિણ્ડવત્ ॥ ૨,૩૩.૩૬॥

ક્ષિપ્ત્વાન્યે ચ ધરાપૃષ્ઠે કુઠારેણાવકર્તિતાઃ ।
ક્રન્દમાનાશ્ચ દૃશ્યન્તે પૂર્વકર્મવિપાકતઃ ॥ ૨,૩૩.૩૭॥

કેચિદ્ગુડમયૈઃ પાકૈસ્તૈલપાકૈસ્તથા પરે ।
પીડ્યન્તે યમદૂતૈશ્ચ પાપિષ્ઠાઃ સુભૃશં નરાઃ ॥ ૨,૩૩.૩૮॥

ક્ષણાન્નિ પ્રાર્થયન્ત્યન્યે દેહિદેહીતિ કોટિશઃ ।
યમલોકે મયા દૃષ્ટા મમસ્વં ભક્ષિતં ત્વયા ॥ ૨,૩૩.૩૯॥

ઇત્યેવં બહુશસ્તાર્ક્ષ્ય નરકાઃ પાપિનાં સ્મૃતાઃ ।
કર્મભિર્બહુભિઃ પ્રોક્તૈઃ સર્વશાસ્ત્રેષુ ભાષિતૈઃ ।
દાનોપકારં વક્ષ્યામિ યથા તત્ર સુખં ભવેત્ ॥ ૨,૩૩.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે યમલોકવિસ્તૃતિદ્વર્ણનં નામ ત્રયસ્ત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૪
શ્રીકૃષ્ણ ઉવાચ ।
શ‍ૃણુ તાર્ક્ષ્ય યથાન્યાયં ધર્માધર્મસ્ય લક્ષણમ્ ।
સુકૃતં દુષ્કૃતં નૃણામગ્રે ધાવતિ ધાવતામ્ ॥ ૨,૩૪.૧॥

કૃતે તપઃ પ્રશંસન્તિ ત્રેતાયાં જ્ઞાનસાધનમ્ ।
દ્વાપરે યજ્ઞદાને ચ દાનમેકં કલૌ યુગે ॥ ૨,૩૪.૨॥

ગૃહસ્થાનાં સ્મૃતો ધર્મ ઉત્તમાનાં વિચક્ષણૈઃ ।
ઇષ્ટાપૂર્તે સ્વશક્ત્યા હિ કુર્વતાં નાસ્તિ પાતકમ્ ॥ ૨,૩૪.૩॥

વૃક્ષસ્તુ રોપિતો યેન ખનિકૂપજલાશયાઃ ।
યમમાર્ગે સુખં તસ્ય વ્રજતો નિતરાં ભવેત્ ॥ ૨,૩૪.૪॥

અગ્નિતાપપ્રદાતારે યૈઃ શીતપીડિતે દ્વિજે ।
તપ્યમાનાઃ સુખં યાન્તિ સર્વ કામૈઃ પ્રપૂરિતાઃ ॥ ૨,૩૪.૫॥

સુવર્ણમણિમુક્તાદિ વસ્ત્રાણ્યાભરણાનિ ચ ।
તેન સર્વમિદં દત્તં યેન દત્તા વસુન્ધરા ॥ ૨,૩૪.૬॥

યાનિયાનિ ચ ભૂતાનિ દત્તાનિ ભુવિ માનવૈઃ ।
યમલોકપથે તાનિ તિષ્ઠન્ત્યેષાં સમીપતઃ ॥ ૨,૩૪.૭॥

વ્યઞ્જનાનિ વિચિત્રાણિ ભક્ષ્યભોજ્યાનિ યાનિ ચ ।
દદાતિ વિધિના પુત્ર પ્રેતે તદ્ઉ પતિષ્ઠતિ ॥ ૨,૩૪.૮॥

આત્મા વૈ પુત્રનામાસ્તિ પુત્રસ્ત્રાતા યમાલયે ।
તારયેત્પિતરં ઘોરાત્તેન પુત્રઃ પ્રવક્ષ્યતે ॥ ૨,૩૪.૯॥

અતો દેયઞ્ચ પુત્રેણ શ્રાદ્ધમાજી વિતાવધિ ।
અતિવાહસ્તદા પ્રેતો ભોગાન્વૈ લભતે હિ સઃ ॥ ૨,૩૪.૧૦॥

દહ્યમાનસ્ય પ્રેતસ્ય સ્વજનૈર્યો જલાઞ્જલિઃ ।
દીયતે પ્રેતરૂપોઽસૌ પ્રીતો યાતિ યમાલયે ॥ ૨,૩૪.૧૧॥

અપક્વે મૃન્મયે પાત્રે દુગ્ધં દત્તં દિનત્રયમ્ ।

કાષ્ઠત્રયં ગુણૈર્બદ્ધ્વા પ્રીત્યૈ રાત્રૌ ચતુષ્પથે ॥ ૨,૩૪.૧૨॥

પ્રથમેઽહ્નિ દ્વિતીયે ચ તૃતીયે ચ તથા ખગ ।
આકાશસ્થં પિબેદ્દુગ્ધં પ્રેતો વાયુવપુર્ધરઃ ॥ ૨,૩૪.૧૩॥

ચતુર્થે સઞ્ચયઃ કાર્યઃ ચતુર્થે?વાપિ સાગ્નિકે ।
અસ્થિસઞ્ચયનં કાર્યં દદ્યાદાપાઞ્જલિં તતઃ ॥ ૨,૩૪.૧૪॥

ન પૂર્વાહ્ને ન મધ્યાહ્ને નાપરાહ્ને ન સન્ધિષુ ।
યાતે પ્રથમયામે તુ દદ્યાદાપજલાઞ્જંલીન્ ॥ ૨,૩૪.૧૫॥

પુત્રેણ દત્તે તે સર્વે ગોત્રિણો હિતબાન્ધવાઃ ।
સ્વજાત્યૈઃ પરજાત્યૈશ્ચ દેયો નદ્યાં જલાઞ્જલિઃ ॥ ૨,૩૪.૧૬॥

ગન્તવ્યં નૈવ વિપ્રેણ દાતું શીઘ્રં જલાઞ્જલિમ્ ।
નિવૃત્તાશ્ચ યદા નાર્યો લોકાચારઃ સદાભવેત્ ॥ ૨,૩૪.૧૭॥

પઞ્ચત્વઞ્ચ ગતે શૂદ્રે યઃ કાષ્ઠં નયતે ચિતામ્ ।
અનુવ્રજેદ્યદા વિપ્રસ્ત્રિરાત્રમશુચિર્ભવેત્ ॥ ૨,૩૪.૧૮॥

ત્રિરાત્રે ચ તતઃ પૂર્ણે નદીં ગચ્છેત્સમુદ્રગામ્ ।
પ્રાણાયામશતં કૃત્વા ઘૃતં પ્રાશ્ય વિશુધ્યતિ ॥ ૨,૩૪.૧૯॥

શૂદ્રો ગચ્છતિ સર્વત્ર વૈશ્યસ્ત્રિષુ દ્વયોઃ પરઃ ।
ગચ્છતિ સ્વીયવર્ણેષુ દાતું પ્રેતે જલાઞ્જલિમ્ ॥ ૨,૩૪.૨૦॥

દત્તે જલાઞ્જલૌ પશ્ચાદ્વિદધ્યાદ્દન્તધાવનમ્ ।
ત્યજન્તિ ગોત્રિણઃ સર્વે દિનાનિ નવ કાશ્યપ ॥ ૨,૩૪.૨૧॥

જલાઞ્જલિં તથા દાતું ગચ્છન્તિ દ્વિજસત્તમાઃ ।
યત્ર સ્થાને મૃતો યસ્તુ અધ્વન્યપિ ગૃહેઽપિ વા ।
વિશ્રેષસ્તુ તતઃ સ્થાનાન્ન ક્વચિદ્વિહિતો બુધૈઃ ॥ ૨,૩૪.૨૨॥

સ્ત્રીજનશ્ચાગ્રતો ગચ્છેત્પૃષ્ઠતો નવસઞ્ચયઃ ।
આચમનં વિધાતવ્યં પાષાણોપરિ સંસ્થિતૈઃ ॥ ૨,૩૪.૨૩॥

યવાંશ્ચ સર્ષપાન્દૂર્વાઃ પૂર્ણપાત્રે વિલોકયેત્ ।
પ્રાશયેન્નિમ્બપત્રાણિ સ્નેહસ્નાનં સમાચરેત્ ॥ ૨,૩૪.૨૪॥

ગોત્રિભિર્ન ચ કર્તવ્યં ગૃહાન્નઞ્ચ ન ભોજયેત્ ।
ભુઞ્જીત મૃન્મયે પાત્રે ઉત્તાનઞ્ચ વિવર્જયેત્ ॥ ૨,૩૪.૨૫॥

મૃતકસ્ય ગુણા ગ્રાહ્યા યમગાથાં સમુદ્ગિરેત્ ।
શુભાશુભે ચ ધ્યાતવ્યે પૂર્વકર્મોપસઞ્ચિતે ॥ ૨,૩૪.૨૬॥

લબ્ધેનૈવ ચ દેહેન ભુઙ્ક્તે સુકૃતદુષ્કૃતે ।
વાયુરૂપો ભ્રમત્યેવ વાયુરૂર્ધ્વં સ ગચ્છતિ ॥ ૨,૩૪.૨૭॥

દશાહકર્મક્રિયયા કુટી નિષ્પાદ્યતે ધ્રુવમ્ ।
નવકૈઃ ષોડશશ્રાદ્ધૈઃ પ્રયાતિ હિ કુટીં નરઃ ॥ ૨,૩૪.૨૮॥

તિલૈર્દર્ભૈશ્ચ ભૂમ્યાં વૈ કુટી ધાતુમયી ભવેત્ ।
પઞ્ચ રત્નાનિ વક્ત્રે તુ યેન જીવઃ પ્રરોહતિ ॥ ૨,૩૪.૨૯॥

યદા પુષ્પં પ્રનષ્ટં હિ તદા ગર્ભં ન ધારયેત્ ।
આદરાચ્ચ તતો ભૂમૌ તિલદર્ભાન્વિનિઃ ક્ષિપેત્ ॥ ૨,૩૪.૩૦॥

પશુત્વે સ્થાવરત્વે ચ યત્ર ક્વાપિ સ જાયતે ।
તત્રૈવ જન્તુરુત્પન્નઃ શ્રાદ્ધં તત્રોપતિષ્ઠતિ ॥ ૨,૩૪.૩૧॥

ધન્વિના લક્ષ્યમુદ્દિશ્ય મુક્તો બાણસ્તદાપ્નુયાત્ ।
યથા શ્રાદ્ધં યમુદ્દિશ્ય કૃતં તસ્યોપતિષ્ઠતિ ॥ ૨,૩૪.૩૨॥

યાવન્નોત્પાદિતો દેહસ્તાવચ્છ્રાદ્ધૈર્ન પ્રીણનમ્ ।
ક્ષુધાવિભ્રમમાપન્નો દશાહેન ચ તર્પિતઃ ॥ ૨,૩૪.૩૩॥

પિણ્ડદાનં ન યસ્યાભૂદાકાશે ભ્રમતે તુ સઃ ।
દિનત્રયં વસંસ્તોયે અગ્નાવપિ દિનત્રયમ્ ।
આકાશે વસતે ત્રીણિ દિનમેકન્તુ વાસકે ॥ ૨,૩૪.૩૪॥

દગ્ધે દેહે ચ વહ્નૌ ચ જલેનૈવ તુ તર્પિતઃ ।
સ્નેહસ્નાનં જલેનૈવ પૂપકૈઃ કૃશરૈર્ગૃહે ॥ ૨,૩૪.૩૫॥

પ્રથમેઽહ્નિ તૃતીયે ચ પઞ્ચમે સપ્તમેઽપિ વા ।
નવમૈકાદશે ચૈવ શ્રાદ્ધં નવકમુચ્યતે ॥ ૨,૩૪.૩૬॥

ગૃહદ્વારે શ્મશાને વા તીર્થે દેવાલયેઽપિ વા ।
યત્રાદ્યો દીયતે પિણ્ડસ્તત્ર સર્વાન્સમાપયેત્ ॥ ૨,૩૪.૩૭॥

એકાદશાહે યચ્છ્રાદ્ધં તત્સામાન્યમુદાહૃતમ્ ।
ચતુર્ણામેકવર્ણાનાં શુદ્ધ્યર્થં સ્નાનમુચ્યતે ॥ ૨,૩૪.૩૮॥

કૃત્વા ચૈકાદશાહઞ્ચ પુનઃ સ્નાત્વા શુચિર્ભવેત્ ।
દદ્યાદ્વિપ્રાય યઃ શય્યાં યથોક્તં પ્રેતમોક્ષદામ્ ॥ ૨,૩૪.૩૯॥

ન ભવેત્યદા સ ગોત્રો પરોઽપિ વિધિમાચરેત્ ।
ભાર્યા વા પુરુષઃ કશ્ચિત્તુષ્ટશ્ચ કુરુતે સ્ત્રિયઃ ॥ ૨,૩૪.૪૦॥

પ્રથમેઽહનિ યઃ પિણ્ડો દીયતે વિધિપૂર્વકમ્ ।
અન્નાદ્યેન ચ તેનૈવ સર્વશ્રાદ્ધાનિ કારયેત્ ॥ ૨,૩૪.૪૧॥

અમન્ત્રં કારયેચ્છ્રાદ્ધં દશાહં નામગોત્રતઃ ।
શ્રાદ્ધં કૃતન્તુ યૈર્વસ્ત્રૈસ્તાનિ ત્યક્ત્વા ગૃહં વિશેત્ ॥ ૨,૩૪.૪૨॥

અસગોત્રઃ સગોત્રો વા યદિ સ્ત્રી યદિ વા પુમાન્ ।
પ્રથમેઽહનિ યઃ કુર્યાત્સ દશાહં સમાપયેત્ ॥ ૨,૩૪.૪૩॥

જીવસ્ય દશભિઃ પિણ્ડૈર્દેહો નિષ્પાદ્યતે ધ્રુવમ્ ।
વૃદ્ધિશ્ચ દશભિર્માસૈર્ગર્ભસ્થસ્ય યથા ભવેત્ ॥ ૨,૩૪.૪૪॥

આશૌચં યાવદેતસ્ય તાવત્પિણ્ડોદકક્રિયા ।
ચતુર્ણામપિ વર્ણાનામેષ એવ વિધિઃ સ્મૃતઃ ॥ ૨,૩૪.૪૫॥

યત્ર ત્રિરાત્રમાશૌચં તત્રાદૌ ત્રીન્પ્રદાપયેત્ ।
ચતુરસ્તુ દ્વિતીયેઽહ્નિ તૃતીયે ત્રીંસ્તથૈવ ચ ॥ ૨,૩૪.૪૬॥

પૃથક્ષરાવયોર્દદ્યાદેકાહં ક્ષીરમમ્બુ ચ ।
એકોદ્દિષ્ટન્તુ વૈ શ્રાદ્ધં ચતુર્થેઽહનિ કારયેત્ ॥ ૨,૩૪.૪૭॥

પ્રથમેઽહનિ યઃ પિણ્ડસ્તેન મૂર્ધા પ્રજાયતે ।
ચક્ષુઃ શ્રોત્રઞ્ચ નાસા ચ દ્વિતીયેઽહ્નિ પ્રજાયતે ॥ ૨,૩૪.૪૮॥

ગણ્ડૌ વક્ત્રં તથા ગ્રીવા તૃતીયેઽહનિ જાયતે ।
હૃદયં કુક્ષિરુદરં ચતુર્થે તદ્વદેવ હિ ॥ ૨,૩૪.૪૯॥

કટિપૃષ્ઠં ગુદઞ્ચાપિ પઞ્ચમેઽહનિ જાયતે ।
ષષ્ઠે ઊરૂ ચ વિજ્ઞેયે સપ્તમે ગુલ્ફસમ્ભવઃ ॥ ૨,૩૪.૫૦॥

અષ્ટમે દિવસે પ્રાપ્તે જઙ્ઘે ચ ભવતોઽણ્ડજ ।
પાદૌ ચ નવમે જ્ઞેયૌ દશમે બલવત્ક્ષુધા ॥ ૨,૩૪.૫૧॥

એકાદશાહે યઃ પિણ્ડસ્તં દદ્યાદામિષેણ તુ ।
સિદ્ધાન્નં તસ્ય દાતવ્યં કૃશરાઃ પૂપકાઃ પયઃ ।

પ્રક્ષાલ્ય વિપ્રચરણાવર્ઘ્યં ધૂપઞ્ચ દીપકમ્ ॥ ૨,૩૪.૫૨॥

દ્વાદશ પ્રતિમાસ્યાનિ શ્રાદ્ધાન્યૈકાદશે તથા ।
ત્રિપક્ષઞ્ચાપિ ષણ્માસે દ્વે શ્રાદ્ધાનિ ચ ષોડશ ॥ ૨,૩૪.૫૩॥

પ્રતિ માસં પ્રદાતવ્યં મૃતાહે યા તિથિર્ભવેત્ ।
સ માસઃ પ્રથમો જ્ઞેય ઇતિ વેદવિદો વિદુઃ ॥ ૨,૩૪.૫૪॥

શવહસ્તે ચ યચ્છ્રાદ્ધં મૃતિસ્થાને દ્વિજાસને ।
તદેવ પ્રથમં શ્રાદ્ધં તત્સ્યાદેકાદશેઽહનિ ॥ ૨,૩૪.૫૫॥

સા તિથિર્માસિકે શ્રાદ્ધે મૃતો યસ્મિન્દિને નરઃ ।
રિક્તયોશ્ચ ત્રિપક્ષે ચ સા તિથિર્નાદ્રિયેત વૈ ॥ ૨,૩૪.૫૬॥

પૌર્ણમાસ્યાં મૃતો યોઽસૌ ચતુર્થી તસ્ય ચોનકા ।
ચતુર્થ્યાન્તુ મૃતો યસ્તુ નવમી તસ્ય ચોનકા ॥ ૨,૩૪.૫૭॥

નવમ્યાઞ્ચ મૃતો યશ્ચ રિક્તા તસ્ય ચતુર્દશી ।
એતા રિક્તાશ્ચ વિજ્ઞેયા અન્ત્યેષ્ટૌ કુશલેન ચ ॥ ૨,૩૪.૫૮॥

એકાદશાહે યચ્છ્રાદ્ધં નવકં તત્પ્રકીર્તિતમ્ ।
ચતુષ્પથે ત્યજેદન્નં પુનઃ સ્નાનં સમાચરેત્ ॥ ૨,૩૪.૫૯॥

એકાદશાહાદારભ્ય ઘટસ્યાન્નં જલાન્વિતમ્ ।
દિનેદિને ચ દાતવ્યમબ્દં યાવદ્દ્વિજોત્તમે ॥ ૨,૩૪.૬૦॥

માનુષસ્ય શરીરે તુ વિદ્યતે હ્યસ્થિસઞ્ચયઃ ।
તત્સંખ્યઃ સર્વદેહેષુ ષષ્ટ્યધિકશતત્રયમ્ ॥ ૨,૩૪.૬૧॥

ઉદકુમ્ભેન પુષ્ટાનિ તાન્યસ્થીનિ ભવન્તિ હિ ।
એતસ્માદ્દીયતે કુમ્ભઃ પ્રીતિઃ પ્રેતસ્ય જાયતે ॥ ૨,૩૪.૬૨॥

યસ્મિન્દિને મૃતો જન્તુરટવ્યાં વિષમેઽપિ વા ।
યદા તદા ભવેદ્દાહઃ સૂતકં મૃતવાસરાત્ ॥ ૨,૩૪.૬૩॥

તિલપાત્રં તથાન્નાદ્યં ગન્ધધપાદિકઞ્ચ યત્ ।
એકાદશાહે દાતવ્યં તેન શૂદ્ધો દ્વિજો ભવેત્ ॥ ૨,૩૪.૬૪॥

ક્ષત્રિયો દ્વાદશાહે તુ વૈશ્યઃ પઞ્ચદશે તથા ।
શુદ્ધિઃ શૂદ્રસ્ય માસેન મૃતકે જાતસૂતકે ॥ ૨,૩૪.૬૫॥

માસત્રયે ત્રિરાત્રં સ્યાત્ષણ્માસેન તુ પક્ષિણી ।
અહઃ સંવત્સરાદર્બ્વાક્પૂર્ણે દત્ત્વોદકં શુચિઃ ।
અનેનૈવા નુસારેણ શુદ્ધિઃ સ્યાત્સાર્વવર્ણિકી ॥ ૨,૩૪.૬૬॥

એકાદશાહપ્રભૃતિ પુરતઃ પ્રતિવત્સરમ્ ।
વિશ્વેદેવાંસ્તુ સમ્પૂજ્ય પિણ્ડમેકઞ્ચ નિર્વપેત્ ॥ ૨,૩૪.૬૭॥

યથા તારાગણાઃ સર્વે ચ્છાદ્યન્તે રવિરશ્મિભિઃ ।
એવં પ્રચ્છાદ્યતે સર્વં ન પ્રેતો ભવતિ ક્વચિત્ ॥ ૨,૩૪.૬૮॥

શય્યાદાનં પ્રશંસન્તિ સર્વદૈવ દ્વિજોત્તમાઃ ।
અનિત્યં જીવનં ય્સમાત્પશ્ચાત્કો નુ પ્રદાસ્યતિ ॥ ૨,૩૪.૬૯॥

તાવદ્બન્ધુઃ પિતા તાવદ્યાવજ્જીવતિ માનવઃ ।
મૃતે મૃત ઇતિ જ્ઞાત્વા ક્ષણાત્સ્નેહો નિવર્તતે ॥ ૨,૩૪.૭૦॥

આત્મૈવ હ્યાત્મનો બન્ધુરેવં જ્ઞાત્વા મુહુર્મુહુઃ ।
જીવન્નપીતિ સઞ્ચિન્ત્ય સ્વીયં હિતમનુસ્તમરેત્ ॥ ૨,૩૪.૭૧॥

મૃતાનાં કઃ સુતો દદ્યાદ્વિજેશય્યાં સતૂલિકામ્ ।
એવં જાનન્નિદં સર્વં સ્વહસ્તેનૈવ દાપયેત્ ॥ ૨,૩૪.૭૨॥

તસ્માચ્છય્યાં સમાસાદ્ય સારદારુમયીં દૃઢામ્ ।
દન્તાદિરુચિરાં રમ્યાં હેમપટ્ટૈ રલङ્કૃતામ્ ।
તસ્યાં સંસ્થાપ્ય હૈમઞ્ચ હરિં લક્ષ્મ્યા સમન્વિતમ્ ॥ ૨,૩૪.૭૩॥

ધૃતપૂર્ણઞ્ચ કલશં પરિકલ્પયેત્ ।
વિજ્ઞેયો ગરુડ પ્રીત્યૈ સ નિદ્રાકલશો બુધૈઃ ॥ ૨,૩૪.૭૪॥

તામ્બૂલકુङ્કુમક્ષોદકર્પૂરાગુરુચન્દનમ્ ।
દીપિકોપાનહચ્છત્રચામરાસનભાજનમ્ ॥ ૨,૩૪.૭૫॥

પાર્શ્વેષુ સ્થાપયેચ્છક્ત્યા સપ્તધાન્યાનિ ચૈવહિ ।
શયનસ્થસ્ય ભવતિ યચ્ચાન્યદુપકારકમ્ ॥ ૨,૩૪.૭૬॥

ભૃઙ્ગારકરકાદર્શં પઞ્ચવર્ણં વિતાનકમ્ ।
શય્યામેવંવિધાં કૃત્વા બ્રાહ્મણાય નિવેદયેત્ ॥ ૨,૩૪.૭૭॥

સપત્નીકાય સમ્પૂજ્ય સ્વર્લોકસુખદાયિનીમ્ ।
વસ્ત્રૈઃ સુશોભનૈઃ પૂજ્ય ચૈલકં પરિધાપયેત્ ॥ ૨,૩૪.૭૮॥

કર્ણકણ્ઠાઙ્ગુલીબાહુભૂષણૈશ્ચિત્રભૂષણૈઃ ।
ગૃહોપકરણૈર્યુક્તં ગૃહં ધેન્વા સમન્વિતમ્ ॥ ૨,૩૪.૭૯॥

તતોઽર્ઘઃ સમ્પ્રદાતવ્યઃ પઞ્ચરત્નફલાક્ષતૈઃ ॥ ૨,૩૪.૮૦॥

યથા ન કૃષ્ણશયનં શૂન્યં સાગરકન્યયા ।
શય્યા મમાપ્યશૂન્યાસ્તુ તથા જન્મનિજન્મનિ ॥ ૨,૩૪.૮૧॥

દત્ત્વૈવં તલ્પમમલં ક્ષમાપ્ય ચ વિસર્જયેત્ ।
તથા ચૈકાદશાહે તુ વિધિરેષ પ્રકીર્તિતઃ ॥ ૨,૩૪.૮૨॥

દદાતિ યો હિ ધર્માર્થે બાન્ધવો બાન્ધવે મૃતે ।
વિશેષમત્ર પક્ષે તુ કથ્યમાનં મયા શ◌ૃણુ ॥ ૨,૩૪.૮૩॥

ઉપયુક્તઞ્ચ તસ્યાસીત્યત્કિઞ્ચિત્સ્વગૃહે પુરા ।
તસ્ય યદ્ગાત્રસં લગ્નં વસ્ત્રં ભાજનવાહનમ્ ।
યદભીષ્ટઞ્ચ તસ્યાસીત્તત્સર્વં પરિકલ્પયેત્ ॥ ૨,૩૪.૮૪॥

સ્થાપયેત્પુરુષં હૈમં શય્યોપરિ શુભં બુધઃ ।
પૂજયિત્વા પ્રદાતવ્યા મૃતશય્યા યથોદિતા ॥ ૨,૩૪.૮૫॥

પુરન્દરગૃહે સર્વં સૂર્યપુત્રાલયે તથા ।
ઉપતિષ્ઠેત્સુખં જન્તોઃ શય્યાદાનપ્રભાવતઃ ॥ ૨,૩૪.૮૬॥

પીડયન્તિ ન તં યામ્યાઃ પુરુષા ભીષણાનનાઃ ।
ન ઘર્મેણ ન શીતેન બાધ્યતે સ નરઃ ક્વચિત્ ॥ ૨,૩૪.૮૭॥

શય્યાદાનપ્રભાવેણ પ્રેતો મુચ્યતે બન્ધનાત્ ।
અપિઃ પાપસમાયુક્તઃ સ્વર્ગલોકં સ ગચ્છતિ ॥ ૨,૩૪.૮૮॥

વિમાનવરમારૂઢઃ સેવ્યમાનોઽપ્સરોગણૈઃ ।
આભૂતસમ્પ્લવં યાવત્તિષ્ઠેત્પાતકવર્જિતઃ ॥ ૨,૩૪.૮૯॥

નવકં ષોડશશ્રાદ્ધં શય્યા સાંવત્સરં તથા ।
ભર્તુર્યા કુરુતે નારી તસ્યાઃ શ્રેયો હ્યનન્તકમ્ ॥ ૨,૩૪.૯૦॥

ઉપકારાય સા ભર્તુર્જીવન્તી ન મૃતા તથા ।
ઉદ્ધરેજ્જીવમાના સા સતી સત્યવતી પ્રિયમ્ ॥ ૨,૩૪.૯૧॥

સ્ત્રિયા દધ્યન્નશયને હેમકુઙ્કુમમઞ્જનમ્ ।
વસ્ત્રભૂષા તથા શય્યા સર્વમેતદ્ધિ દાપયેત્ ॥ ૨,૩૪.૯૨॥

ઉપકારકરં સ્ત્રીણાં યદ્ભવોદિહ કિઞ્ચન ।
ભૂષણં ગાત્રલગ્નઞ્ચ વસ્તુ ભોગ્યાદિકઞ્ચ યત્ ॥ ૨,૩૪.૯૩॥

તત્સર્વં મેલયિત્વા તુ સ્વેસ્વે સ્થાને નિયોજયેત્ ।
પૂજયેલ્લોકપાલાંશ્ચ ગ્રહાન્દેવીં વિનાયકમ્ ॥ ૨,૩૪.૯૪॥

તતઃ શુક્લામ્બરધરો ગૃહીતકુસુમાઞ્જલિઃ ।
ઇમમુચ્ચારયેન્મન્ત્રં વિપ્રસ્ય પુરતો બુધઃ ॥ ૨,૩૪.૯૫॥

પ્રેતસ્ય પ્રતિમા હ્યેષા સર્વોપકરણૈર્યુતા ।
સર્વરત્નસમાયુક્તા તવ વિપ્રનિવેદિતા ॥ ૨,૩૪.૯૬॥

આત્મા શમ્ભુઃ શિવા ગૌરી શક્રઃ સુરગણૈઃ સહ ।
તસ્માચ્છય્યાપ્રદાનેન સૈષ આત્મા પ્રસીદતુ ॥ ૨,૩૪.૯૭॥

આચાર્યાય પ્રદાતવ્યા બ્રાહ્મણાય કુટુમ્બિને ।
ગૃહીતે બ્રાહ્મણસ્તત્ર કોઽદાદિતિ ચ કીર્તયેત્ ॥ ૨,૩૪.૯૮॥

તતઃ પ્રદક્ષિણીકૃત્ય પ્રણિપત્ય વિસર્જયેત્ ।
વિધિનાનેન વૈ પક્ષિન્દાનમેકસ્ય દાપયેત્ ॥ ૨,૩૪.૯૯॥

બહુભ્યો ન પ્રદેયાનિ ગૌર્ગૃહં શયનં સ્ત્રિયઃ ।
વિભક્તદક્ષિણા હ્યેતે દાતારં પાતયન્તિ હિ ॥ ૨,૩૪.૧૦૦॥

એવં યો વિતરેત્તાર્ક્ષ્ય શ◌ૃણુ તસ્ય ચ યત્ફલમ્ ।
સાગ્રં વર્ષશતં દિવ્યં સ્વર્ગલોકે મહીયતે ॥ ૨,૩૪.૧૦૧॥

યત્પુણ્યન્તુ વ્યતીપાતે કાર્તિક્યામયનદ્વયે ।
દ્વારકાયાન્તુ યત્પુણ્યં ચન્દ્રસૂર્યગ્રહે તથા ॥ ૨,૩૪.૧૦૨॥

પ્રયાગે નૈમિષે યચ્ચ કુરુક્ષેત્રે તર્થાબુદે ।
ગઙ્ગાયાં યમુનાયાઞ્ચ સિન્ધુસાગરસંગમે ॥ ૨,૩૪.૧૦૩॥

તેષુ યદ્દીયતે દાનં તસ્માદપ્યધિકન્ત્વિદમ્ ।
એતચ્છય્યાપ્રદાનસ્ય નાપ્નોતિ ષોડશીં કલામ્ ॥ ૨,૩૪.૧૦૪॥

યત્રાસૌ જાયતે પ્રાણી ભુઙ્ક્તે તત્રૈવ તત્ફલમ્ ।
કર્મક્ષયે ક્ષિતૌ યાતિ માનુષઃ શુભદર્શનઃ ॥ ૨,૩૪.૧૦૫॥

મહાધની ચ ધર્મજ્ઞઃ સર્વશાસ્ત્રવિશારદઃ ।

પુનઃ સ યાતિ વૈકુણ્ઠં મૃતોઽસૌ નરપુઙ્ગવઃ ॥ ૨,૩૪.૧૦૬॥

દિવ્યં વિમાનમારુહ્ય અપ્સરોભિઃ સમાવૃતઃ ।
અહોઽસૌ હવ્યકવ્યેષુ પિતૃભિઃ સહ મોદતે ॥ ૨,૩૪.૧૦૭॥

અષ્ટકાસુ કૃતં શ્રાદ્ધમમાવાસ્યાદિને તથા ।
મઘાસુ પિતૃપર્વાણિ યાનિયાનિ ચ તેષુ ચ ॥ ૨,૩૪.૧૦૮॥

શ ૃણુ તાર્ક્ષ્ય યથાન્યાયં પ્રેતત્વે પિતરો યદિ ।
નોપતિષ્ઠન્તિ શ્રાદ્ધાનિ સપિણ્ડીકરણં વિના ॥ ૨,૩૪.૧૦૯॥

સપિણ્ડીકરણં કાર્યં પૂર્ણે વર્ષે ન સંશયઃ ।
આદ્યન્તુ શવશુદ્ધ્યર્થં કૃત્વા ચૈવાક્ષ ષોડશીમ્ ॥ ૨,૩૪.૧૧૦॥

પિતૃપાઙ્ક્તિવિશુધ્ર્યં શતાર્ધેન? તુ યોજયેત્ ।
વૃદ્ધિં પ્રાપ્યાગ્રતઃ કુર્યાચ્છૂદ્રસ્ય સ્વચ્છયૈવ હિ ॥ ૨,૩૪.૧૧૧॥

સામ્પ્રતં સાગ્નિકે કાર્યં દ્વાદશાહે સપિણ્ડનમ્ ।
ન ચાસૌ કુરુતે યાવત્પ્રેત એવ સ વહ્નિમાન્ ।
દ્વાદશાહે તતઃ કાર્યં સાગ્નિકેન સપિણ્ડનમ્ ॥ ૨,૩૪.૧૧૨॥

અસ્થિપોક્ષે ગયાશ્રાદ્ધં શ્રાદ્ધઞ્ચાપરપક્ષિકમ્ ।
અબ્દમધ્યે ન કુર્વીત સપિણ્ડીકરણં વિના ॥ ૨,૩૪.૧૧૩॥

સપત્ન્યો યદિ બહ્વ્યઃ સ્યુરેકા પુત્રવતી ભવેત્ ।
સર્વાસ્તાઃ પુત્રવત્યઃ સ્યુસ્તેનૈકેનાત્મજેન હિ ॥ ૨,૩૪.૧૧૪॥

નાસપિણ્ડોગ્નિમાન્પુત્રઃ પિતૃયજ્ઞં સમાચરેત્ ।
સમાચારાદ્ભવેત્પાપી પિતૃહા ચાપિ જાયતે ॥ ૨,૩૪.૧૧૫॥

મૃતે ભર્તરિ યા નારી પ્રાણાંશ્ચૈવ પરિત્યજેત્ ।
ભર્ત્રૈવ હિ સમં તસ્યાઃ પ્રકુર્વીત સપિણ્ડનમ્ ॥ ૨,૩૪.૧૧૬॥

અસ્થાનિકાપિ યા વ્યૂઢા વૈશ્યા વા ક્ષત્રિયાપિ વા ।
યાઃ પત્ન્યો વૈ પિતુઃ કશ્ચિત્કુર્યાત્પુત્રઃ સપિણ્ડનમ્ ॥ ૨,૩૪.૧૧૭॥

વિપ્રેણૈવ યદા શૂદ્રા પરિણીતા પ્રમાદતઃ ।
એકોદ્દિષ્ટન્તુ તચ્છ્રાદ્ધ સા તુ તેનૈવ યુજ્યતે ॥ ૨,૩૪.૧૧૮॥

અન્યે તુ દશ યે પુત્રા જાતા વર્ણ ચતુષ્ટયે ।
તે તાસુતાસુ યોક્ત્વયાઃ સપિણ્ડીકરણે સદા ॥ ૨,૩૪.૧૧૯॥

અન્વષ્ટકાસુ યચ્છ્રાદ્ધ યચ્છ્રાદ્ધં વૃદ્ધિહેતુકમ્ ।
પિતુઃ પૃથક્પ્રદાવ્યં સ્ત્રિયાઃ પિણ્ડં સપિણ્ડને ॥ ૨,૩૪.૧૨૦॥

પિતામહ્યા સમં માતુઃ પિતુઃ સહપિતામહૈઃ ।
સપિણ્ડીકરણં કાર્યમિતિ તાર્ક્ષ્ય મતં મમ ॥ ૨,૩૪.૧૨૧॥

અપુત્રાયાં મૃતાયાં તુ પતિઃ કુર્યાત્સપિણ્ડનમ્ ।
માત્રાદિતિસૃભિઃ સાર્ધમેવં ધર્મેણ યોજયેત્ ॥ ૨,૩૪.૧૨૨॥

પુત્રો નાસ્તિ ન ભર્તા ચ સ્ત્રીણાં તાર્ક્ષ્ય સપિણ્ડનમ્ ।
કારયેદ્વૃદ્ધિસમયે ભ્રાતૃદાયાદદેવરૈઃ ॥ ૨,૩૪.૧૨૩॥

પતિપુત્રવિહીનાનાં ગોત્રી નાસ્તિ ન દેવરઃ ।
એકોદ્દિષ્ટેન દાતવ્યં પરેણ સહ ભ્રાતૃભિઃ ॥ ૨,૩૪.૧૨૪॥

અજ્ઞાનાદ્વિધ્નતો વાપિ ન કૃતઞ્ચેત્સપિણ્ડનમ્ ।
નવકં ષોડશશ્રાદ્ધમાબ્દિકં કારયેત્તતઃ ॥ ૨,૩૪.૧૨૫॥

અદાહે ન ચ કર્તવ્યં સદાહે કારયેદ્બુધઃ ।
દર્ભપુત્તલકં કૃત્વા વહ્નિના દાહયેચ્છવમ્ ॥ ૨,૩૪.૧૨૬॥

પિતુઃ પુત્રેણ કર્તવ્યં ન કુર્બ્વીત પિતા સુતે ।
અતિસ્નેહાન્ન કર્તવ્યં સપિણ્ડીકરણં સતે ॥ ૨,૩૪.૧૨૭॥

બહવોઽપિ યદા પુત્રા વિધિમેકઃ સમાચરેત્ ।
નવશ્રાદ્ધં સપિણ્ડત્વં શ્રાદ્ધાન્યન્યાનિ ષોડશ ॥ ૨,૩૪.૧૨૮॥

એકેનૈવ તુ કાર્યાણિ અવિભક્તધનેષ્વપિ ।
અન્ત્યેષ્ટિં કુરુતે હ્યેકો મુનિભિઃ સમુદાહૃતમ્ ॥ ૨,૩૪.૧૨૯॥

વિભક્તૈશ્ચ પૃથક્કાર્યા ક્રિયા સાંવત્સરાદિકા ।
એકૈકેન ચ કર્તવ્યા પુત્રેણ ચ સ્વયંસ્વયમ્ ॥ ૨,૩૪.૧૩૦॥

યસ્યૈતાનિ ન દત્તાનિ પ્રેતશ્રાદ્ધાનિ ષોડશ ।
પિશાચત્વંસ્થિરં તસ્ય કૃતૈઃ શ્રાદ્ધશતૈરપિ ॥ ૨,૩૪.૧૩૧॥

ભ્રાતા વા ભ્રાતૃપુત્રો વા સપિણ્ડઃ શિષ્ય એવ વા ।
સપિણ્ડીકરણં કુર્યાત્પુત્રહીને ખગેશ્વર ॥ ૨,૩૪.૧૩૨॥

સર્વેષાં પુત્રહીનાનાં પત્ની કુર્યાત્સપિણ્ડનમ્ ।

ઋત્વિજં કરાયેદ્વાથ પુરોહિતમથાપિ વા ॥ ૨,૩૪.૧૩૩॥

મૃતે પિતર્યબ્દમધ્યે હ્યુપરાગો યદા ભવેત્ ।
પાર્વણં ન સુતૈઃ કાર્યં શ્રાદ્ધં નાન્દીમુખં ન ચ ॥ ૨,૩૪.૧૩૪॥

તીર્થશ્રાદ્ધં ગયાશ્રાદ્ધં શ્રાદ્ધમન્યચ્ચ પૈતૃકમ્ ।
અબ્દમધ્યે ન કુર્વીત મહાગુરુવિપત્તિષુ ॥ ૨,૩૪.૧૩૫॥

યમકે ચ ગજચ્છાયામન્વાદિષુ યુગાદિષુ ।
પિતૃપિણ્ડો ન દાતવ્યઃ સપિણ્ડીકરણં વિના ॥ ૨,૩૪.૧૩૬॥

યજ્ઞપુરુષસ્ય યદ્દાનં દેવાદીનાઞ્ચ યત્તથા ।
અપૂર્ણેઽપ્યબ્દમધ્યેપિ કર્તવ્યમિતિ કે ચ ન ॥ ૨,૩૪.૧૩૭॥

પિતૃભ્યોઽપિ હિ યદ્દત્તમર્ઘપિણ્ડવિવર્જિતમ્ ।
કર્તવ્યં તચ્ચ વૈ સર્વમેષ એવ વિધિઃ સ્મૃતઃ ॥ ૨,૩૪.૧૩૮॥

દેવાનાં પિતરો દેવા પિતૃણામૃષયસ્તથા ।
ઋષીણાં પિતરો દેવાઃ પિતા જયતિ તેન વૈ ॥ ૨,૩૪.૧૩૯॥

પિતૃદેવમનુષ્યાણાં યજ્ઞનથો વિભુર્ભવેત્ ।
યજ્ઞનાથસ્ય યદ્દત્તં તદ્દત્તં સર્વદેહિનામ્ ॥ ૨,૩૪.૧૪૦॥

મૃતે પિતર્યબ્દમધ્યે યઃ શ્રાદ્ધં કારયેત્સુતઃ ।
સપ્તજન્મકૃતા ધર્માથીયતે નાત્ર સંશયઃ ॥ ૨,૩૪.૧૪૧॥

પ્રેતીભૂતાસ્તુ પિતરો લુપ્તપિણ્ડોદકક્રિયાઃ ।
ભ્રમન્તિ વાયુના સર્વે ક્ષુત્તૃડ્ભ્યાં પરિપીડિતાઃ ॥ ૨,૩૪.૧૪૨॥

પિતરિ પ્રેતતાપન્ને લુપ્યતે પૈતૃકી ક્રિયા ।
અથ માતુર્વિપત્તિઃ સ્યાત્પિતૃકાર્યં ન લુપ્યતે ॥ ૨,૩૪.૧૪૩॥

મૃતા માતા પિતા તિષ્ઠેજ્જીવન્તી ચ પિતામહી ।
સપિણ્ડનન્તુ કર્તવ્યં પિતામહ્યા સહૈવ તુ ॥ ૨,૩૪.૧૪૪॥

સત્યંસત્યં પુનઃ સત્યં શ્રૂયતાં વચનં મમ ।
ન પિણ્ડો મિલિતો યેષાં મૃતાનાન્તુ નૃણાં ભુવિ ॥ ૨,૩૪.૧૪૫॥

ઉપતિષ્ઠેન્ન વે તેષાં પુત્રૈર્દત્તમનેકધા ।
હન્તકારસ્તદુદ્દેશે શ્રાદ્ધં નૈવ જલાઞ્જલિઃ ॥ ૨,૩૪.૧૪૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે ઔર્ધ્વદેહિકાદિનિરૂપણં નામ ચતુસ્ત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૫
તર્ક્ષ્ય ઉવાચ ।
અપરં મમ સન્દેહં કથયસ્વ જનાર્દન ।
પુરુષસ્ય ચ કસ્યાપિ મતા પઞ્ચત્વમાગતા ॥ ૨,૩૫.૧॥

પિતામહી જીવતિ ચ તથા ચ પ્રપિતામહી ।
વૃદ્ધપ્રપિતામહી તદ્વન્માતૃસક્તઃ પિતા તથા ॥ ૨,૩૫.૨॥

પ્રમાતામહશ્ચ તથા વૃદ્ધપ્રમાતામહસ્તથા ।
કેન સા મેલ્યતે માતા એતત્કથય મે પ્રભો ॥ ૨,૩૫.૩॥

શ્રીકૃષ્ણ ઉવાચ ।
પુનરુક્તં પ્રવક્ષ્યામિ સપિણ્ડીકરણં ખગ ।
ઉમા લક્ષ્મીશ્ચ સાવિત્રીત્યતાભિર્મેલયેદ્ધ્રુવમ્ ॥ ૨,૩૫.૪॥

ત્રયઃ પિણ્ડભુજો જ્ઞેયાસ્ત્યજાકાશ્ચ ત્રયઃ સ્મૃતાઃ ।
ત્રયઃ પિણ્ડાનુલેપાશ્ચ દશમઃ પઙ્ક્તિસંન્નિધઃ ॥ ૨,૩૫.૫॥

ઇત્યેતે પુરુષાઃ ખ્યાતાઃ પિતૃમાતૃકુલેષુ ચ ।
તારયેદ્યજમાનસ્તુ દશ પૂર્વાન્દશાવરાન્ ॥ ૨,૩૫.૬॥

સપિણ્ડઃ સ ભવેદાદૌ સપિણ્ડીકરણે કૃતે ।
અન્ત્યસ્તુ ત્યાજકો જ્ઞેયો યો વૃદ્ધપ્રપિતામહઃ ॥ ૨,૩૫.૭॥

અન્તિમસ્ત્યાજકો જ્ઞેયો લેપકઃ પ્રથમો ભવેત્ ।
લેપકસ્ત્વન્તિમો યસ્તુ સ ભવેત્પઙ્ક્તિસન્નિધઃ ॥ ૨,૩૫.૮॥

યજમાનો ભવેદેકો દશ પૂર્વે દશાવરે ।
ઇત્યેતે પિતરો જ્ઞેયા એકવિંશતિ સંખ્યકાઃ ॥ ૨,૩૫.૯॥

વિધિના કુરુતે યસ્તુ સંસારે શ્રાદ્ધમુત્તમમ્ ।
જાયતેઽત્ર ન સન્દેહઃ શૃણુ તસ્યાપિ યત્ફલમ્ ॥ ૨,૩૫.૧૦॥

પિતા દદાતિ પુત્રાન્વૈ વિચ્છિન્નસન્તતિઃ ખગ ।
હોમદાતા ભવેત્સોઽપિ યસ્તસ્ય પ્રપિતામહઃ ॥ ૨,૩૫.૧૧॥

કૃતે શ્રાદ્ધે ગુણા હ્યેતે પિતૃણાં તર્પણે સ્મૃતાઃ ।
દદ્યાદ્વિપુલમન્નાદ્યં વૃદ્ધસ્તુ પ્રપિતામહઃ ॥ ૨,૩૫.૧૨॥

યસ્ય પુંસશ્ચ મર્ત્યે વૈ વિચ્છિન્ના સન્તતિઃ ખગ ।
સ વસેન્નરકે ઘોરે પઙ્કે મગ્નઃ કરી યથા ॥ ૨,૩૫.૧૩॥

યોન્યન્તરેષુ જાયતે યત્ર વૃક્ષસરીસૃપાઃ ।
ન સન્તતિં વિના સોઽત્ર મુચ્યતે નરકાદ્ધ્રુવમ્ ॥ ૨,૩૫.૧૪॥

આચાર્યસ્તસ્ય શિષ્યો વા યો દૂરેઽપિ હિ ગાત્રેજઃ ।
નારાયણબલિં કુર્યાત્તસ્યાદ્દેશેન ભક્તિતઃ ॥ ૨,૩૫.૧૫॥

વિશુદ્ધઃ સર્વપાપેભ્યો મુક્તઃ સ નરકાદ્ધ્રુવમ્ ।
નિવસેન્નાકલોકે ચ નાત્ર કાર્યા વિચારણા ॥ ૨,૩૫.૧૬॥

આદૌ કૃત્વા ધનિષ્ઠાઞ્ચ એતન્નક્ષત્રપઞ્ચકમ્ ।
રેવત્યન્તં સદા દૂષ્યમશુભં સર્વદા ભવેત્ ॥ ૨,૩૫.૧૭॥

દાહ (બલિ) સ્તત્ર ન કર્તવ્યો વિપ્રદિસર્વજાતિષુ ।
દીયતે ન જલં તત્ર અશુભં જાયતે ધ્રુવમ્ ।
લોકયાત્રા ન કર્તવ્યા દુઃખાર્તઃ સ્વજનો યદિ ॥ ૨,૩૫.૧૮॥

પઞ્ચકાનન્તરં તસ્ય કર્તવ્યં સર્વમન્યથા ।
પુત્રાણાં ગોત્રિણાં તસ્ય સન્તાપોઽપ્યુપજાયતે ॥ ૨,૩૫.૧૯॥

ગૃહે હાનિર્ભવેત્તસ્ય ઋક્ષેષ્વેષુ મૃતશ્ચ યઃ ।
અથવા ઋક્ષમધ્યેઽપિ દાહસ્તસ્ય વિધીયતે ॥ ૨,૩૫.૨૦॥

ક્રિયતે માનુષાણાન્તુ સદ્ય આહુતિકારણાત્ ।
સદ્યાહુતિકરં પુણ્યં તીર્થે તદ્દાહ ઉત્તમઃ ॥ ૨,૩૫.૨૧॥

વિપ્રૈર્નિયમતઃ કાર્યઃ સમન્ત્રો વિધિપૂર્વકઃ ।
શવસ્ય ચ સમીપે તુ ક્ષિપ્યન્તે પુત્તલાસ્તતઃ ॥ ૨,૩૫.૨૨॥

દર્ભમયાશ્ચ ચત્વારો વિપ્રા મન્ત્રાભિમન્ત્રિતાઃ ।
તતો દાહઃ પ્રકર્તવ્યઃ તૈશ્ચ પુત્તલકૈઃ સહ ॥ ૨,૩૫.૨૩॥

સૂતકાન્તે તતઃ પુત્રઃ કુર્યાચ્છાન્તિકમુત્તમમ્ ॥ ૨,૩૫.૨૪॥

પઞ્ચકેષુ મૃતો યોઽસૌ ન ગતિં લભતે નરઃ ।
તિલાન્ગાશ્ચ સુવર્ણં ચ તમુદ્દિશ્ય ઘૃતં દદેત્ ॥ ૨,૩૫.૨૫॥

વિપ્રાણાં દીયતે દાનં સર્વોપદ્રવનાશનમ્ ।
સૂતકાન્તે ચ સત્પુત્રૈઃ સ પ્રેતો લભતે ગતિમ્ ॥ ૨,૩૫.૨૬॥

ભાજનોપાનહૌ ચ્છત્રં હેમમુદ્રાચ વાસસી ।
દક્ષિણા દીયતે વિપ્ર સર્વપાતકમોચની ॥ ૨,૩૫.૨૭॥

બાલવૃદ્ધાતુરાણાઞ્ચ મૃતાનાં પઞ્ચકેષુ હિ ।
વિધાનં યો ન કુર્વીત વિઘ્નસ્તસ્ય પ્રજાયતે ॥ ૨,૩૫.૨૮॥

અષ્ટાદશૈવ વસ્તૂનિ પ્રેતશ્રાદ્ધે વિવર્જયેત્ ।
આશિષો દ્વિગુણાન્દર્ભાન્પ્રણવાન્નૈકપિણ્ડતામ્ ॥ ૨,૩૫.૨૯॥

અગ્નૌકરણમુચ્છિષ્ટં શ્રાદ્ધં વૈ વૈશ્વદૈવિકમ્ ।
વિકિરં ચ સ્વધાકારં પિતૃશબ્દં ન ચોચ્ચરેત્ ॥ ૨,૩૫.૩૦॥

અનુશબ્દં ન કુર્વીત નાવાહનમથોલ્મુકમ્ ।
આસીમાન્તં ન કુર્વીત પ્રદક્ષિણવિસર્જનમ્ ॥ ૨,૩૫.૩૧॥

ન કુર્યાત્તિલહોમઞ્ચ દ્વિજઃ પૂર્ણાહુતિં તથા ।
ન કુર્યાદ્વૈશ્વદેવં ચેત્કર્તા ગચ્છત્યધોગતિમ્ ॥ ૨,૩૫.૩૨॥

મલિનશ્રાદ્ધસંજ્ઞાનં પૂર્વષોડશકં તથા ।
સ્થાને દ્વારે ચાર્ધમાર્ગે ચિતાયાં શવહસ્તકે ॥ ૨,૩૫.૩૩॥

શ્મશાનવાસિભૂતેભ્યઃ પઞ્ચમં પ્રતિવેશ્યકમ્ ।
ષષ્ઠં સઞ્ચયને પ્રોક્તં દશ પિણ્ડા દશાહિકાઃ ।
શ્રાદ્ધષોડશકઞ્ચૈતત્પ્રથમં પરિકીર્તિતમ્ ॥ ૨,૩૫.૩૪॥

અન્યચ્ચ ષોડશં મધ્યે દ્વિતીયં તાર્ક્ષ્ય મે શ‍ૃણુ ।
કર્તવ્યાનીહ વિધિના શ્રાદ્ધાન્યેકાદશૈવ તુ ॥ ૨,૩૫.૩૫॥

બ્રહ્મવિષ્ણુશિવાદ્યઞ્ચ તથાન્યચ્છ્રાદ્ધપઞ્ચકમ્ ।
એવં ષોડશકં પ્રાહુરેતત્તત્ત્વવિદો જનાઃ ॥ ૨,૩૫.૩૬॥

દ્વાદશ પ્રતિમાસ્યાનિ શ્રાદ્ધમેકાદશે તથા ।
ત્રિપક્ષસમ્ભવઞ્ચૈવ દ્વે રિક્તે ખગ ષોડશ ॥ ૨,૩૫.૩૭॥

આદ્યં શવવિશુદ્ધ્યર્થં કૃત્વાન્યચ્ચ ત્રિષોડશમ્ ।
પિતૃપાઙ્ક્તિવિશુદ્ધ્યર્થં શતાર્દ્ધેન તુ યોજયેત્ ॥ ૨,૩૫.૩૮॥

શતાર્ધેન વિહીનો યો મિલિતઃ પઙ્ક્તિભાઙ્ન હિ ।
ચત્વારિંશત્તથૈવાષ્ટશ્રાદ્ધં પ્રેતત્વનાશનમ્ ॥ ૨,૩૫.૩૯॥

સકૃદૂનશતાર્ધેન સમ્ભવેત્પઙ્ક્તિસન્નિધિઃ ।
મેલનીયઃ શતાર્ધેન સન્ધિઃ શ્રાદ્ધેન તત્ત્વતઃ ॥ ૨,૩૫.૪૦॥

(અથ શવાવિધિઃ) ।
શવસ્ય શિબિકાયાં કરચરણબન્ધનં તત્ર કર્તવ્યમ્ ।
એવં ચેન્ન વિધાનં વિધીયતે તત્પિશાચપરિભવનમ્ ॥ ૨,૩૫.૪૧॥

સંજાયતે રજન્યાઞ્ચ શવનિર્ગમને રાષ્ટ્રં ભયશૂન્યમ્ ।
શવં ન મુઞ્ચેત મુચ્યતે ચેત્દુઃસ્પર્શાદ્દુર્ગતિર્ભવેત્ ॥ ૨,૩૫.૪૨॥

ગ્રામમધ્યે સ્થિતે પ્રેતે શ્રુતે ભુઙ્ક્તે યદૃચ્છયા ।
તદન્નં માંસવજ્જ્ઞેયં તત્તોયં રુધિરોપમમ્ ॥ ૨,૩૫.૪૩॥

તામ્બૂલં દન્તકાષ્ઠઞ્ચ ભોજનં ઋતુસેવનમ્ ।
ગ્રામમધ્યે સ્થિતે પ્રેતે વર્જયેત્પિણ્ડપાતનમ્ ॥ ૨,૩૫.૪૨ ॥ ૩૫.૪૪
સ્નાનં દાનં જપો હોમસ્તર્પણં સુરપૂજનમ્ ।
ગ્રામમધ્યે સ્થિતે પ્રેતે શુદ્ધ્યર્થં જ્ઞાતિધર્મતઃ ॥ ૨,૩૫.૪૩ ॥ ૩૫.૪૫
જ્ઞાતિસમ્બન્ધિનામેવં વ્યવહારઃ ખગેશ્વર ।
વિલુપ્ય જ્ઞાતિધર્મઞ્ચ પ્રેતપાપેન લિપ્યતે ॥ ૨,૩૫.૪૪ ॥ ૩૫.૪૬

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીદૃ ધદૃપ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે સપિણ્ડનશવવિધ્યોર્નિરૂપણં નામ પઞ્ચત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૬
તાર્ક્ષ્યૌવાચ ।
કસ્માદનશનં પુણ્યમક્ષય્યગતિદાયકમ્ ।
સ્વગૃહન્તુ પરિત્યજ્ય તીર્થે વૈ મ્રિયતે યદિ ॥ ૨,૩૬.૧॥

અપ્રાપ્ય તીર્થં મ્રિયતે ગૃહે વા મૃત્યુ માગતઃ ।
બૂત્વા કુટીચરો યસ્તુ સ કાં ગતિમવાપ્નુયાત્ ॥ ૨,૩૬.૨॥

સંન્યાસં કુરુતે યસ્તુ તીર્થે વાપિ ગૃહેઽપિ વા ।
કથં તસ્ય પ્રકર્તવ્યમપ્રાપ્તનિધનેઽપિ વા ॥ ૨,૩૬.૩॥

નિયમે ચેત્કૃતે દેવ ચિત્તભઙ્ગો હિ જાયતે ।

કેન તસ્ય ભવેત્સિદ્ધિઃ કૃતેનાપ્યકૃતેન વા ॥ ૨,૩૬.૪॥

શ્રીકૃષ્ણ ઉવાચ ।
કૃત્વા નિરશનં યો વૈ મૃત્યુમાપ્નોતિ કોઽપિ ચેત્ ।
માનુષીં તનુમુત્સૃજ્ય મમ તુલ્યો વિરાજતે ॥ ૨,૩૬.૫॥

યાવન્ત્યહાનિ જીવેત્વ્રતે નિરશને કૃતે ।
ક્રતુભિસ્તાનિ તુલ્યાનિ સમગ્રવદક્ષિણૈઃ ॥ ૨,૩૬.૬॥

તીર્થે ગૃહે વા સંન્યાસં નીત્વા ચેન્મ્રિયતે યદિ ।
પ્રત્યહં લભતે સોઽપિ પૂર્વોક્તં દ્વિગુણં ફલમ્ ॥ ૨,૩૬.૭॥

મહારોગોપપત્તૌ ચ ગૃહીતેઽનશને કૃતે ।
પુનર્ન જાયતે રોગો દેવવદ્ધિ વિરાજતે ॥ ૨,૩૬.૮॥

ય આતુરઃ સન્સન્ન્યાસં ગૃહ્ણાતિ યદિ માનવઃ ।
પુનર્ન જાયતે ભૂમૌ સંસારે દુઃખસાગરે ॥ ૨,૩૬.૯॥

અહન્યહનિ દાતવ્યં બ્રાહ્મણાનાઞ્ચ ભોજનમ્ ।
તિલપાત્રં યથાશક્તિ દીપદાનં સુરાર્ચનમ્ ॥ ૨,૩૬.૧૦॥

એવં વૃત્તસ્ય દહ્યન્તે પાપાન્યુચ્ચાવચાનિ ચ ।
મૃતો મુક્તિમવાપ્નોતિ યથા સર્વે મહર્ષયઃ ॥ ૨,૩૬.૧૧॥

તસ્માદનશનં નૃણાં વૈકુણ્ઠપદદાયકમ્ ।
તસ્માત્સ્વસ્થે ચોત્તરે વા સાધયેન્મોક્ષલક્ષણમ્ ॥ ૨,૩૬.૧૨॥

પુત્રદ્રવ્યાદિ સન્ત્યજ્ય તીર્થં વ્રજતિ યો નરઃ ।
બ્રહ્માદ્યા દેવતાસ્તસ્ય ભવેયુસ્તુષ્ટિપુષ્ટિદાઃ ॥ ૨,૩૬.૧૩॥

યસ્તીર્થસમુખો ભૂત્વા વ્રતે હ્યનશને કૃતે ।
ચેન્મ્રિયેતાન્તરાલેઽપિ ઋષીણાં મણ્ડલે વસેત્ ॥ ૨,૩૬.૧૪॥

વ્રતં નિરશન કૃત્વા સ્વગૃહેઽપિ મૃતો યદિ ।
સ્વકુલાનિ પરિત્યજ્ય એકાકી વિચરેદ્દિવિ ॥ ૨,૩૬.૧૫॥

અન્નઞ્ચૈવ તથા તોયં પરિત્યજ્ય નરો યદિ ।
પીતમત્પાદતોયશ્ચ ન પુનર્જાયતે ક્ષિતૌ ॥ ૨,૩૬.૧૬॥

કૃત્યાસીનન્તત્તીર્થગતં રક્ષન્તિ વનદેવતાઃ ।
યમદૂતા વિશેષેણ ન યામ્યાસ્તસ્ય પાર્શ્વગાઃ ॥ ૨,૩૬.૧૭॥

તીર્થસેવી નરો યસ્તુ સર્વકિલ્બિષવર્જિતઃ ।
તત્ર મ્રિયતે દહ્યેત તત્તીર્થફલભાગ્ભવેત્ ॥ ૨,૩૬.૧૮॥

સેવિતેઽપિ સદા તથિ હ્યન્યત્ર મ્રિયતે યદિ ।
શુભે દેશે કુલે ધીમાન્સ ભવેદ્વેદવિદ્દ્વિજઃ ॥ ૨,૩૬.૧૯॥

કૃત્વા નિરશનં તાર્ક્ષ્ય પુનર્જીવતિ માનવઃ ।
બ્રાહ્મણાન્સ સમાહૂય સર્વસ્વં યત્પરિત્યજેત્ ॥ ૨,૩૬.૨૦॥

ચાન્દ્રાયણં ચરેત્કૃત્સ્નમનુજ્ઞાતશ્ચ તૈર્દ્વિજૈઃ ।
અનૃતં ન વદેત્પશ્ચાદ્ધર્મમેવ સમાચરેત્ ॥ ૨,૩૬.૨૧॥

તીર્થે ગત્વા ચ યઃ કોઽપિ પુનરાયાતિ વૈ ગૃહમ્ ।
અનુજ્ઞાતઃ સ વૈ વિપ્રૈઃ પ્રાયશ્ચિત્તમથાચરેત્ ॥ ૨,૩૬.૨૨॥

દત્ત્વા વા સ્વર્ણદાનાનિ ગો-મહી-ગજ-વાજિનઃ ।
તીર્થં યદિ લભેદ્યસ્તુ મૃત્યુકાલે સ ભાગ્યવાન્ ॥ ૨,૩૬.૨૩॥

ગૃહાત્પ્રચલિતસ્તીર્થં મરણે સમુપસ્થિતે ।
પદેપદે તુ ગોદાનં યદિ હિંસા ન જાયતે ॥ ૨,૩૬.૨૪॥

ગૃહે તુ યત્કૃતં પાપં તીર્થસ્નાનેન શુધ્યતિ ।
કુરુતે તત્ર પાપઞ્ચેદ્વજ્રલેપસમં હિ તત્ ॥ ૨,૩૬.૨૫॥

ક્લિશ્યેત્સ નાત્ર સન્દેહો યાવચ્ચન્દ્રાર્કતારકમ્ ।
તત્ર દત્તાનિ દાનાનિ જાયન્તે ચાક્ષયાણિ વૈ ॥ ૨,૩૬.૨૬॥

આતુરે સતિ દાતવ્યં નિર્ધનૈરપિ માનવૈઃ ।
ગાવસ્તિલા હિરણ્યઞ્ચ સપ્તધાન્યં વિશેષતઃ ॥ ૨,૩૬.૨૭॥

દાનવન્તં નરં દૃષ્ટ્વા હૃષ્ટાઃ સર્વે દિવૌકસઃ ।
ઋષિભિઃ સહ ધર્મણ ચિત્રગુપ્તેન સર્વદા ॥ ૨,૩૬.૨૮॥

આત્માયત્તં ધનં યાવત્તાવદ્વિપ્રે સમર્પયેત્ ।
પરાધીનં મૃતે સર્વં કૃપયા કઃ પ્રદાસ્યતિ ॥ ૨,૩૬.૨૯॥

પિત્રુદ્દેશેન યઃ પુત્રૈર્ધનં વિપ્રકરેઽર્પિતમ્ ।
આત્માનં સધનં તેન ચક્રે પુત્રપ્રપૌત્રકૈઃ ॥ ૨,૩૬.૩૦॥

પિતુઃ શતગુણં દત્તં સહસ્રં માતુરુચ્યતે ।

ભગિન્યા શતસાહસ્રં સોદર્યે દત્તમક્ષયમ્ ॥ ૨,૩૬.૩૧॥

યદિ લોભાન્ન યચ્છન્તિ પ્રમાદાન્મોહતોઽપિ વા ।
મૃતાઃ શોચન્તિ તે સર્વે કદર્યાઃ પાપિનસ્ત્વિતિ ॥ ૨,૩૬.૩૨॥

અતિક્લેશેન લબ્ધસ્ય પ્રકૃત્યા ચઞ્ચલસ્ય ચ ।
ગતિરેકૈવ વિત્તસ્ય દાનમન્યા વિપત્તયઃ ॥ ૨,૩૬.૩૩॥

મૃત્યુઃ શરીગોપ્તારં વસુરક્ષં વસુન્ધરા ।
દુશ્ચારિણીવ હસતિ સ્વપતિં પુત્રવત્સલમ્ ॥ ૨,૩૬.૩૪॥

ઉદાસે ધાર્મિકઃ સૌમ્યઃ પ્રાપ્યાપિ વિપુલં ધનમ્ ।
તૃણવન્મન્યતે તાર્ક્ષ્ય આત્માનં વિત્તમપ્યથ ॥ ૨,૩૬.૩૫॥

ન ચૈવોપદ્રવાસ્તસ્ય મોહજાલો ન ચૈવ હિ ।
મૃત્યુકાલે ન ચ ભયં યમદૂતસમુદ્ભવમ્ ॥ ૨,૩૬.૩૬॥

સમાઃ સહસ્રાણિ ચ સપ્ત વૈ જલે દશૈકમગ્નૌ પવને ચ ષોડશ ।
મહાહવે પષ્ટિરશીતિર્ગોગૃહે અનાશકે કાશ્યપ ચાક્ષયા ગતિઃ ॥ ૨,૩૬.૩૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદેઽનશનમૃત ગતિનિરૂપણં નામ ષટ્ત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૭
તાર્ક્ષ્ય ઉવાચ ।
ઉદકુમ્ભપ્રદાનં મે કથયસ્વ યથાતથમ્ ।
વિધિના કેન કર્તવ્યા કૃતિરેષા જનાર્દન ॥ ૨,૩૭.૧॥

કિંલક્ષણાઃ કેન પૂર્ણાઃ કસ્ય દેયા જનાર્દન ।
કસ્મિન્કાલે પ્રદાતવ્યા પ્રેતતૃપ્તિપ્રસાધકાઃ ॥ ૨,૩૭.૨॥

શ્રીકૃષ્ણ ઉવાચ ।
સત્યં પુનઃ પ્રવક્ષ્યામિ ઉદકુમ્ભપ્રદાનકમ્ ।
પ્રેતોદ્દેશેન દાતવ્યા અન્નપાનીયસંયુતાઃ ।
વિશેષેણ મહાપક્ષિન્પ્રેતમુક્તિપ્રદાયકાઃ ॥ ૨,૩૭.૩॥

દ્વાદશાહે ચ ષણ્માસે ત્રૈપક્ષે વાપિ વત્સરે ।
ઉદકુમ્ભાઃ પ્રદાતવ્યા માર્ગે તસ્ય સુખાય વૈ ॥ ૨,૩૭.૪॥

અહન્યહનિ દાતવ્યા ઉદકુમ્ભાસ્તિલૈર્યુતાઃ ।
સુલિપ્તે ભૂમિભાગે તુ પક્કાન્નજલપૂરિતાઃ ॥ ૨,૩૭.૫॥

પ્રેતસ્ય તત્ર દાતવ્યં ભાજનઞ્ચ યદૃચ્છયા ।
સુપ્રીતસ્તેન દત્તેન પ્રેતો યામ્યૈઃ સ ગચ્છતિ ॥ ૨,૩૭.૬॥

દ્વાદશાહે વિશેષેણ ઉદકમ્ભાન્પ્રદાપયેત્ ।
વિધિના તત્ર સઙ્કલ્પ્ય ઘટાન્દ્વાદશસંખ્યકાન્ ॥ ૨,૩૭.૭॥

એકાષિ બર્ધની તત્ર પક્વાન્નફલપૂરિતા ।
વિષ્ણુમુદ્દિશ્ય દાતવ્યા સંકલ્પ્ય બ્રાહ્મણે શુભે ॥ ૨,૩૭.૮॥

એકો વૈ ધર્મરાજાય તેન તુષ્ટેન મુક્તિભાક્ ।
ચિત્રગુપ્તાય ચૈકં તુ ગતસ્તત્ર સુખી ભવેત્ ॥ ૨,૩૭.૯॥

ષોડશાદ્યાઃ પ્રદાતવ્યા માષાન્નજલપૂરિતાઃ ॥ ૨,૩૭.૧૦॥

ઉત્ક્રાન્તિશ્રાદ્ધમારભ્ય શ્રાદ્ધષોડશોડશકસ્ય તુ ।
ષોડશબ્રાહ્મણાનાન્તુ એકૈકં વિનિવદયેત્ ॥ ૨,૩૭.૧૧॥

એકાદશાહાત્પ્રભૃતિ દેયો નિત્યં દૃઢાક્ષયઃ ।
પક્વાન્નજલપૂર્ણો હિ યાવત્સંવત્સરં દિનમ્ ॥ ૨,૩૭.૧૨॥

જલપાત્રાણિ વૃદ્ધાનિ દત્તાનિઘટકાનિ ચ ।
એકા વૈ વર્ધની તત્ર તસ્યાં પાત્રન્તુ વંશજમ્ ॥ ૨,૩૭.૧૩॥

વસ્ત્રેણાચ્છાદયેત્તાન્તુ પૂજયિત્વા સુગન્ધિભિઃ ।
બ્રાહ્મણેભ્યો વિશેષેણ જલપૂર્ણાનિ દાપયેત્ ॥ ૨,૩૭.૧૪॥

અહન્યહનિ સઙ્કલ્પ્ય વિધિપૂર્વં ખગેશ્વર ।
બ્રાહ્મણાય કુલીનાય વેદવૃત્તયુતાય ચ ॥ ૨,૩૭.૧૫॥

વિદ્યાવૃત્તવતે દેયં મૂર્ખે તન્ન કદાચન ।
સમર્થો વેદવૃત્તાઢ્યસ્તારણે તરણેઽપિ ચ ॥ ૨,૩૭.૧૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે દ્વિતીયાંશે પ્રેતકલ્પે ધર્મકાણ્ડે
સોદકુમ્ભશ્રાદ્ધનિરૂપણં નામ સપ્તત્રિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૮
તાર્ક્ષ્ય ઉવાચ ।

દાનતીર્થાર્થિતં મોક્ષં સ્વર્ગઞ્ચ વદ મે પ્રભો ।
કેન મોક્ષમવાપ્નોતિ કેન સ્વર્ગે વસેચ્ચિરમ્ ॥ ૨,૩૮.૧॥

કેન ગચ્છતિ તેજસ્તુ સ્વર્લોકાત્સત્યલોકતઃ ।
માનુષ્યં કેન લભતે નરકેશુ નિમજ્જતિ ॥ ૨,૩૮.૨॥

એતન્મે વદનિશ્ચિત્ય ભક્તાનાં મોક્ષદાયક ।
બ્રૂહિ કસ્મિન્મૃતે સ્વર્ગે પુનર્જન્મ ન વિદ્યતે ॥ ૨,૩૮.૩॥

શ્રીવિષ્ણુરુવાચ ।
માનુષ્યં ભારતે વર્ષે ત્રયોદશસુ જાતિષુ ॥ ૨,૩૮.૪॥

તત્પ્રાપ્ય મ્રિયતે ક્ષેત્રે પુનર્જન્મ ન વિદ્યતે ।
અયોધ્યા મથુરા માયા કાશી કાઞ્ચી અવન્તિકા ॥ ૨,૩૮.૫॥

પુરી દ્વારવતી જ્ઞેયા સપ્તૈતા મોક્ષદાયિકાઃ ।
સન્ન્યસ્તમિતિ યો બ્રુયાત્પ્રાણૈઃ કણ્ઠગતૈરપિ ॥ ૨,૩૮.૬॥

મૃતો વિષ્ણુપુરં યાતિ ન પુનર્જાયતે ક્ષિતૌ ।
સકૃદુચ્ચરિતં યેન હરિરિત્યક્ષરદ્વયમ્ ॥ ૨,૩૮.૭॥

બધ્દઃ પરિકરસ્તેન મોક્ષાય ગમનં પ્રતિ ।
કૃષ્ણકૃષ્ણેતિ કૃષ્ણેતિ યો માં સ્મરતિ નિત્યશઃ ॥ ૨,૩૮.૮॥

જલ ભિત્ત્વા યથા પદ્મં નરકાદુધ્દરામ્યહમ્ ।
શાલગ્રામજિલા યત્ર યત્ર દ્વારવતી શિલા ॥ ૨,૩૮.૯॥

ઉભયોઃ સઙ્ગમો યત્ર મુક્તિસ્તત્ર ન સંશયઃ ।
શાલગ્રામશિલા યત્ર પાપદોષક્ષયાવહા ॥ ૨,૩૮.૧૦॥

તત્સન્નિધાનમરણાન્મુક્તિર્જન્તોઃ સુનિશ્ચતા ।
રોપણાત્પાલનાત્સેકાદ્ધ્યાનસ્પર્શનકીર્તનાત્ ।
તુલસી દહતે પાપં નૃણાં જન્માર્જિતં ખગ ॥ ૨,૩૮.૧૧॥

જ્ઞાનહૃદે સત્યજલે રાગદ્વેષમલાપહે ।
યઃ સ્નાતો માનસે તીર્થે ન સ લિપ્યેત પાતકૈઃ ॥ ૨,૩૮.૧૨॥

ન કાષ્ઠે વિદ્યતે દેવો ન શિલાયાં કદાચન ।
ભાવે હિ વિદ્યતે દેવસ્તસ્માદ્ભાવં સમાચરેત્ ॥ ૨,૩૮.૧૩॥

પ્રાતઃ પ્રાતઃ પ્રપશ્યન્તિ નર્મદાં મત્સ્યઘાતિનઃ ।

ન તે શિવપુરીં યાન્તિ ચિત્તવૃત્તિર્ગરીયસી ॥ ૨,૩૮.૧૪॥

યાદૃક્ચિત્તપ્રતીતિઃ સ્યાત્તાદૃક્કર્મફલં નૃણામ્ ।
પરલોકગતિસ્તાદૃક સૂચીસૂત્રવિચારવત્ ॥ ૨,૩૮.૧૫॥

બ્રાહ્મણાર્થે ગવાર્થે ચ સ્ત્રીણાં બલવધેષુ ચ ।
પ્રાણત્યાગપરો યસ્તુ સ વૈ મોક્ષમવાપ્નુયાત્ ॥ ૨,૩૮.૧૬॥

અનાશકે મૃતૌ યસ્તુ સ વૈ મોક્ષમવાપ્નુયાત્ ।
અનાશકે મૃતો યસ્તુ સ મુક્તઃ સર્વબન્ધનૈઃ ॥ ૨,૩૮.૧૭॥

દત્ત્વા દાનાનિ વિપ્રેભ્યસ્તતો મોક્ષમવાપ્નુયાત્ ।
એતે વૈ મોક્ષમાર્ગાશ્ચ સ્વર્ગમાર્ગાસ્તથૈવ ચ ॥ ૨,૩૮.૧૮॥

ગોગ્રહે દેશવિધ્વંસે મરણં રણતીર્થયોઃ ।
ઉત્તમાધમમધ્યસ્ય બાધ્યમાનસ્ય દેહિનઃ ।
આત્માનં તત્ર સન્ત્યજ્ય સ્વર્ગવાસં લભેચ્ચિરમ્ ॥ ૨,૩૮.૧૯॥

જીવિતં મરણઞ્ચૈવ દ્વયં શિક્ષેત પણ્ડિતઃ ।
જીવિતં દાનભોગાભ્યાં મરણં રણતીર્થયોઃ ॥ ૨,૩૮.૨૦॥

હરિક્ષેત્રે કુરુક્ષેત્રે ભૃગુક્ષેત્રે તથૈવ ચ ।
પ્રભાસે શ્રીસ્થલે ચૈવ અર્બુદે ચ ત્રિપુષ્કરે ॥ ૨,૩૮.૨૧॥

ભૂતેશ્વરે મૃતો યસ્તુ સ્વર્ગે વસતિ માનવઃ ।
બ્રહ્મણો દિવસં યાવત્તતઃ પતતિ ભૂતલે ॥ ૨,૩૮.૨૨॥

વર્ષવૃત્તિન્તુ યો દદ્યાદ્બ્રાહ્મણે દોષવર્જિતે ।
સર્વં કલં સ મુદ્ધૃત્ય સ્વર્ગલોકે મહીયતે ॥ ૨,૩૮.૨૩॥

કન્યાં વિવાહયેદ્યસ્તુ બ્રાહ્મણં વેદપારગમ્ ।
ઇન્દ્રલોકે વસેત્સોઽપિ સ્વકુલૈઃ પરિવેષ્ટિતઃ ॥ ૨,૩૮.૨૪॥

મહાદાનાનિ દત્વા ચ નરસ્તત્ફલમાપ્નુયાત્ ॥ ૨,૩૮.૨૫॥

વાપી કૂપતડાગાનામારામસુરસદ્મનામ્ ।
જીર્ણોદ્ધારં પ્રકુર્વાણઃ પૂર્વકર્તુઃ ફલં લભેત્ ।
જીર્ણોદ્ધારેણ વા તેષાં તત્પુણ્યં દ્વિગુણં ભવેત્ ॥ ૨,૩૮.૨૬॥

શીતવા તાતપહરમપિ પર્ણકુટીરકમ્ ।
કૃત્વા વિપ્રાય વિદુષે પ્રદદાતિ કુટુમ્બિને ॥ ૨,૩૮.૨૭॥

તિસ્રઃ કોટ્યોર્ધકોટી ચ નરઃ સ્વર્ગે મહીયતે ॥ ૨,૩૮.૨૮॥

યા સ્ત્રી સવર્ણા સંશુબા મૃતં પતિમનુવ્રજેત્ ।
સા મૃતા સ્વર્ગમાપ્નોતિ વર્ષાણાં રોમસંખ્યતા ॥ ૨,૩૮.૨૯॥

પુત્રપૌત્રાદિકં ત્યક્ત્વા સ્વપતિં યાનુગચ્છતિ ।
સ્વર્ગં લભેતાં તૌ ચોભૌ દિવ્યસ્ત્રીભિરલઙ્કૃતૌ ॥ ૨,૩૮.૩૦॥

કૃત્વા પાપાન્યનેકાનિ ભર્તૃદ્રોહમતિઃ સદા ।
પ્રક્ષાલયતિ સર્વાણિ યા સ્વં પતિમનુવ્રજેત્ ॥ ૨,૩૮.૩૧॥

મહાપાપસમાચારો ભર્તા ચેદુષ્કૃતી ભવેત્ ।
તસ્યાપ્યનુવ્રતા નારી નાશયેત્સર્વકિલ્બિષમ્ ॥ ૨,૩૮.૩૨॥

ગ્રાસમાત્રં નિયમતો નિત્યદાનં કરોતિ યઃ ।
ચતુશ્ચામરસંયુક્તવિમાનેનાધિગચ્છતિ ॥ ૨,૩૮.૩૩॥

યત્કૃતં હિ મનુષ્યેણ પાપમામરણાન્તિકમ્ ।
તત્સર્વં નાશમાયાતિ વર્ષવૃત્તિપ્રદાનતઃ ॥ ૨,૩૮.૩૪॥

ભૂતં ભવ્યં બવિષ્યચ્ચ પાપં જન્મત્રયાર્જિતમ્ ।
પક્ષાલયતિ તત્સર્વં વિપ્રકન્યોપનાયનાત્ ॥ ૨,૩૮.૩૫॥

દશકૂપસમા વાપિ દશવાપીસમં સરઃ ।
સરો ભિર્દશભિસ્તુલ્યા યા પ્રપા નિર્જલે વને ॥ ૨,૩૮.૩૬॥

યા વાપી નિર્જલે દેશે યદ્દાનં નિર્ધને દ્વિજે ।
પ્રાણિનાં યો દયાં ધત્તે સ ભવેન્નાકનાયકઃ ॥ ૨,૩૮.૩૭॥

એવમાદિભિરન્યૈશ્ચ સુકૃતૈઃ સ્વર્ગભાગ્ભવેત્ ।
સ તત્સર્વં ફલં પ્રાપ્ય પ્રતિષ્ઠાં પરમાં લભેત્ ॥ ૨,૩૮.૩૮॥

ફલ્ગુ કાર્યં પરિત્યજ્ય સતતં ધર્મવાન્ભવેત્ ।
દાનં દમો દયા ચેતિ સારમેતત્ત્રયં ભુવિ ॥ ૨,૩૮.૩૯॥

દાનં સાધોર્દરિદ્રસ્ય શૂન્યલિઙ્ગસ્ય પૂજનમ્ ।
અનાથપ્રેતસંસ્કારઃ કોટિયજ્ઞફલપ્રદઃ ॥ ૨,૩૮.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે ઉત્તમલોકગત્યાગતિમોક્ષમાનુષ્યહેતુનિરૂપણં

નામાષ્ટાત્રિંશત્તમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩૯

તાર્ક્ષ્ય ઉવાચ ।

સૂતકાનાં વિધિં બ્રૂહિ દયાં કૃત્વા મયિપ્રભો ।
વિવેકાય હિ ચિત્તસ્ય માનવાનાં હિતાય ચ ॥ ૨,૩૯.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
મૃતે જન્મની પક્ષીન્દ્ર સૂતકં સ્યાચ્ચતુર્વિધમ્ ।
ચતુર્ણામપિ વર્ણાનાં સામાન્યતે વિવર્જિતમ્ ॥ ૨,૩૯.૨॥

ઉભયત્ર દશાહાનિ કુલસ્યાન્નં વિવર્જિયેત્ ।
દાનં પ્રતિગ્રહો હોમઃ સ્વાધ્યાયશ્ચ નિવર્તતે ॥ ૨,૩૯.૩॥

દેશં કાલં તથાત્માનં દ્રવ્યં દ્રવ્યપ્રયાજનમ્ ।
ઉપપત્તિંમ્વસ્થાઞ્ચ જ્ઞાત્વાં કર્મ સમાચરેત્ ॥ ૨,૩૯.૪॥

ગુહાવહ્નિપ્રવેસે ચ દેશાન્તરમૃતેષુ ચ ।
સ્નાનં સચેલં કર્તવ્યં સદ્યઃ શૌચં વિધીયતે ॥ ૨,૩૯.૫॥

આમગર્ભાશ્ચ યે જીવા યે ચ ગર્ભાદ્વિનિઃ સૃતાઃ ।
ન તેષામગ્નિસંસ્કારો નાશૌચં નોદકક્રિયા ॥ ૨,૩૯.૬॥

શિલ્પિનઃ કારવો વૈદ્યા દાસીદાસાસ્તથૈવ ચ ।
રાજાનઃ શ્રોતિયાશ્ચૈવ સદ્યઃ શૌચાઃ પ્રકીર્તિતાઃ ॥ ૨,૩૯.૭॥

સત્રી ચ (વ્રતી) મન્ત્રપૂતશ્ચ આહિતાગ્નિર્નૃપસ્તથા ।
એતેષાં સૂતકં નાસ્તિ યસ્ય ચેચ્છન્તિ પાર્થિવાઃ ॥ ૨,૩૯.૮॥

પ્રસવે ચ સપિણ્ડાનાં ન કુર્યાત્સઙ્કરં દ્વિજઃ ।
દશાહાચ્છુધ્યતે માતા અવગાહ્ય પિતા શુચિઃ ॥ ૨,૩૯.૯॥

વિવાહોત્સવયજ્ઞેષુ અન્તરા મૃતસૂતકે ।
પૂર્વસઙ્કુલ્પિતં વિત્તં ભોજ્યં તન્મનુરબ્રવીત્ ॥ ૨,૩૯.૧૦॥

સર્વેષામેવમાશૌચં માતાપિત્રોસ્તુ સૂતકમ્ ।
સૂકતં માતુરેવસ્યાદુપસ્પૃશ્ય પિતા શુચિઃ ॥ ૨,૩૯.૧૧॥

અન્તર્દશાહે સ્યાતાઞ્ચેત્પુનર્મરણજન્મની ।

તાવત્સ્યાદશુચિર્વિપ્રો યાવત્તત્સ્યાદનિર્દશમ્ ॥ ૨,૩૯.૧૨॥

ઉદિતે નિયમે દાને આર્તે વિપ્રે નિવેદયેત્ ।
તથૈવ ઋષિભિઃ પ્રોક્તં યથાકાલં ન દુષ્યતિ ॥ ૨,૩૯.૧૩॥

મૃન્મયેન તુ પાત્રેણ તિલૈર્મિશ્રજલૈઃ સહ ।
મૃત્તિકયા તથાન્તે ચ નરઃ સ્નાત્વા શુચિર્ભવેત્ ॥ ૨,૩૯.૧૪॥

દાનં પરિષદે દદ્યાત્સુવર્ણં ગોવૃષં દ્વિજે ।
ક્ષત્રિયો દ્વિગુણં ચૈવ વૈશ્યસ્તુ ત્રિગુણં તથા ॥ ૨,૩૯.૧૫॥

ચતુર્ગુણન્તુ શૂદ્રેણ દાતવ્યં બ્રાહ્મણે ધનમ્ ।
એવ મનુક્રમેણૈવ ચાતુર્વર્ણ્યં વિશુધ્યતિ ॥ ૨,૩૯.૧૬॥

સપ્તાષ્ટમાન્તરૈ શીર્ણે ગૃહ્યસંસ્કારવર્જિતે ।
અહસ્તુ સૂતકં તસ્ય ત્વબ્દાનાં સંખ્યયા સ્મૃતમ્ ॥ ૨,૩૯.૧૭॥

બ્રાહ્મણાર્થે વિપન્ના યે નારીણાં ગોગ્રહેષુ ચ ।
આહવેષુ વિપન્નાનામેકરાત્રમશૌચકમ્ ॥ ૨,૩૯.૧૮॥

ન તેષામશુભં કિઞ્ચિદ્વિપ્રાણાં શુભકર્મણિ ।
અનાથપ્રેતસંસ્કારં યે કુર્વન્તુ નરોત્તમઃ ॥ ૨,૩૯.૧૯॥

ન તેષામશુભઙ્કિઞ્ચિદ્વિપ્રેણ સહકારિણા ।
જલાવગાહનાત્તેષાં સદ્યઃ શુદ્ધિરુદાહૃતા ॥ ૨,૩૯.૨૦॥

વિનિવૃત્તા યદા શૂદ્રા ઉદકાન્તમુપસ્થિતાઃ ।
તદાવિપ્રેણદ્રષ્ટવ્યા ઇતિ વેદવિદોવિદુઃ ॥ ૨,૩૯.૨૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીદ્ ધદ્પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે સૂતકકાલાદિનિરૂપણં નામૈ કોનચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૦
તાર્ક્ષ્ય ઉવાચ ।
ભગવન્બ્રાહ્મણાઃ કેચિદપમૃત્યુવશં ગતાઃ ।
કથં તેષાં ભવેન્માર્ગઃ કિં સ્થાનં કા ગતિર્ભવેત્ ॥ ૨,૪૦.૧॥

કિઞ્ચ યુક્તં ભવેત્તેષાં વિધાનં વાપિ કીદૃશમ્ ।
તદહં શ્રોતુમિચ્છામિ બ્રૂહિ મે મધુસૂદન ॥ ૨,૪૦.૨॥

શ્રીકૃષ્ણ ઉવાચ ।
પ્રેતીભૂતાદ્વિજાતીનાં સમ્ભૂતે મૃત્યુવૈકૃતે ।
તેષાં માર્ગગતિસ્થાનં વિધાનં કથયામ્યહમ્ ॥ ૨,૪૦.૩॥

શ‍ૃણુ તાર્ક્ષ્ય પરં ગોપ્યં જાતે દુર્મરણે સતિ ।
લઙ્ઘનૈર્યે મૃતા વિપ્રા દંષ્ટ્રિભિશ્ચાભિઘાતિતાઃ ॥ ૨,૪૦.૪॥

કણ્ઠગ્રાહ વિમગ્નાનાં ક્ષીણાનાં તુણ્ડઘાતિનામ્ ।
વિષાગ્નિવૃષવિપ્રેભ્યો વિષૂચ્યા ચાત્મઘાતકાઃ ॥ ૨,૪૦.૫॥

પતનોદ્બન્ધનજલૈર્મૃતાનાં શ‍ૃણુ સંસ્થિતિમ્ ।
યાન્તિ તે નરકેઘોરે યે ચ મ્લેચ્છાદિભિર્હતાઃ ॥ ૨,૪૦.૬॥

શ્વશ‍ૃગાલાદિસંસ્પૃષ્ટા અદગ્ધાઃ કૃમિસંકુલાઃ ।
ઉલ્લઙ્ઘિતા મૃતા યે ચ મહારોગૈશ્ચ પીડિતાઃ ॥ ૨,૪૦.૭॥

અભિસસ્તાસ્તથાવ્યઙ્ગા યે ચ પાપાન્નપોષિતાઃ ।
ચણ્ડાલાદુદકાત્સર્પાદ્બ્રાહ્મણાદ્વૈદ્યુતાગ્નિતઃ ॥ ૨,૪૦.૮॥

દષ્ટ્રિભ્યશ્ચ પશુભ્યશ્ચ વૃક્ષાદિપતનાન્મૃતાઃ ।
ઉદક્યામૂતકીશૂદ્રારજકીસઙ્ગદૂષિતાઃ ॥ ૨,૪૦.૯॥

તેન પાપેન નરકાન્મુક્તાઃ પ્રેતત્વભાગિનઃ ।
ન તેષાં કારયેદ્દાહં સૂતકં નોદકક્રિયામ્ ॥ ૨,૪૦.૧૦॥

ન વિધાનં મૃતાદ્યં ચ ન કુર્યાદૌર્ધ્વદૈહિકમ્ ।
તેષાં તાર્ક્ષ્ય પ્રકુર્વીત નારાયણબલિક્રિયામ્ ॥ ૨,૪૦.૧૧॥

સર્વલોકહિતાર્થાય શ‍ૃણુ પાપભયાપહામ્ ।
ષણ્માસં બ્રાહ્મણે દાહસ્ત્રિમાસં ક્ષત્રિયે મતઃ ॥ ૨,૪૦.૧૨॥

સાર્ધ માસં તુ વૈશ્યસ્ય સદ્યઃ શૂદ્રે વિધીયતે ।
ગઙ્ગાયાં યમુનાયાઞ્ચ નૈમિષે પુષ્કરેઽથ ચ ॥ ૨,૪૦.૧૩॥

તડાગે જલપૂર્ણે વા હ્રદે વા વિમલોદકે ।
વાપ્યાં કૂપે ગવાં ગોષ્ઠે ગૃહે વા પ્રતિમાલયે ॥ ૨,૪૦.૧૪॥

કૃષ્ણાગ્રે કારયેદ્વિપ્ર બલિં નારાયણાહ્વયમ્ ।
પ્રેતાય તર્પણં કાર્યં મન્ત્રૈઃ પૌરાણવૈદિકૈઃ ॥ ૨,૪૦.૧૫॥

સર્વૌષધ્યક્ષતૈર્મિશ્રૈર્વિષ્ણુમુદ્દિશ્ય તર્પયેત્ ।

કાર્યં પુરુષસૂક્તેન મન્ત્રૈર્વા વૈષ્ણવૈરપિ ॥ ૨,૪૦.૧૬॥

દક્ષિણાભિમુખો ભૂત્વા પ્રેતં વિષ્ણુરિતિ સ્મરેત્ ।
અનાદિનિધનો દેવઃ શઙ્ખચક્રગદાધરઃ ॥ ૨,૪૦.૧૭॥

અવ્યયઃ પુણ્ડરીકાક્ષઃ પ્રેતમોક્ષપ્રદો ભવેત્ ।
તર્પણસ્યાવસાને ચ વીતરાગો વિમત્સરઃ ॥ ૨,૪૦.૧૮॥

જિતેન્દ્રિયમના ભૂત્વા શુચિપ્માન્ધર્મતત્પરઃ ।
દાનધર્મરતઃ શાન્તઃ પ્રણમ્ય વાગ્યતઃ શુચિઃ ॥ ૨,૪૦.૧૯॥

યજમાનો ભબેત્તત્ર શુચિર્વન્ધુસમન્વિતઃ ।
ભક્ત્યા તત્ર પ્રકુર્વીત શ્રાદ્ધત્યેકાદશૈવ તુ ॥ ૨,૪૦.૨૦॥

સર્વકર્મવિપાકેન એકૈકાગ્રે સમાહિતઃ ।
તોયવ્રીહિયવાન્ષષ્ટ્યા ગોધૂમાંશ્ચ પ્રિયઙ્ગુકાન્ ॥ ૨,૪૦.૨૧॥

હવિષ્યાન્નં શુભં મુદ્રાં છત્રોષ્ણીષે ચ ચલેકમ્ ।
દાપયેત્સર્વસસ્યાનિ ક્ષીરક્ષૌદ્રયુતાનિ ચ ॥ ૨,૪૦.૨૨॥

વસ્ત્રોપાનહસંયુક્તં દદ્યાદષ્ટવિધં પદમ્ ।
દાપયેત્સર્વવિપ્રેભ્યો ન કુર્યાત્પઙ્ક્તિબન્ધનમ્ ॥ ૨,૪૦.૨૩॥

ભૂમૌ સ્થિતેષુ પિણ્ડેષુ ગન્ધપુષ્પાક્ષતાન્વિતમ્ ।
શઙ્ખપાત્રે તથા તામ્રે તર્પણઞ્ચ પૃથક્પૃથક્ ॥ ૨,૪૦.૨૪॥

ધ્યાનધારણસંયુક્તો જાનુભ્યામવનિં ગતઃ ।
દાતવ્યં સર્વવિપ્રેભ્યો વેદશાસ્ત્રવિધાનતઃ ॥ ૨,૪૦.૨૫॥

ઋચા વૈ દાપયેદર્ઘ્યમેકોદ્દિષ્ટે પૃથક્પૃથક્ ।
આપોદેવીર્મધુમતીરાદિપીઠે પ્રકલ્પિતમ્ ॥ ૨,૪૦.૨૬॥

ઉપયામગૃહીતોઽસિ દ્વિતીયેઽર્ઘં નિવેદયેત્ ।
યેનાપાવકચક્ષુષા તૃતીયે ચ કસલ્પિતમ્ ॥ ૨,૪૦.૨૭॥

યે દેવાસશ્ચતુર્થે તુ સમુદ્રં ગચ્છ પઞ્ચમે ।
અગ્નિર્જ્યોતિ સ્તથા ષષ્ઠે હિરણ્યગર્ભઃ સપ્તમે ॥ ૨,૪૦.૨૮॥

યમાય ત્વાષ્ટમે જ્ઞેયં યજ્જગ્રન્નવમે તથા ।
તશમે યાઃ ફલિનીતિ પિણ્ડે ચૈકાદશે તતઃ ॥ ૨,૪૦.૨૯॥

ભદ્રં કર્ણેભિરિતિ ચ કુર્યાત્પિણ્ડવિસર્જનમ્ ।
કૃત્વૈકાદશદેવત્યં શ્રાદ્ધં કુર્યાત્પરેઽહનિ ॥ ૨,૪૦.૩૦॥

વિપ્રાનાવાહયેત્પઞ્ચ ચતુર્વેદવિશારદાન્ ।
વિદ્યાશીલગુણોપેતાન્સ્વ કીયાઞ્છીલસત્તમાન્ ।
અભ્યઙ્ગાન્સપ્રશસ્તાંશ્ચ ન ત્વજર્યાન્કદાચન ॥ ૨,૪૦.૩૧॥

વિષ્ણુઃ સ્વર્ણમયઃ કાર્યો રુદસ્તામ્રમયસ્તથા ।
બ્રહ્મા રૂપ્યમયસ્તદ્વદ્યમો લોહમયો ભવેત્ ॥ ૨,૪૦.૩૨॥

સીસકં તુ ભવેત્પ્રેતં ત્વથ વા દર્ભકં તથા ।
શન્નોદેવીતિ મન્ત્રેણ ગોવિન્દં પશ્ચિમે ન્યસેત્ ॥ ૨,૪૦.૩૩॥

અગ્ન આયાહીતિ રુદ્રમુત્તરત્રૈવ વિન્યસેત્ ।
અગ્નિમીળએતિ મન્ત્રેણ પૂર્વેણૈવ પ્રજાપતિમ્ ॥ ૨,૪૦.૩૪॥

ઇષેત્વોર્જેતિ મન્ત્રેણ દક્ષિણે સ્થાપયેદ્યમમ્ ।
મધ્યે મણ્ડલકં કૃત્વા સ્થાપ્યો દર્ભમયો નરઃ ॥ ૨,૪૦.૩૫॥

બ્રહ્મા વિષ્ણુસ્તથા રુદ્રો યમઃ પ્રેતશ્ચ પઞ્ચમઃ ।
પૃથક્કુમ્ભે તતઃ સ્થાપ્યાઃ પઞ્ચરત્નસમન્વિતાઃ ॥ ૨,૪૦.૩૬॥

વસ્ત્રયજ્ઞોપવીતાનિ પૃથઙ્મુદ્રાપરાણિ ચ ।
જપં કર્યાત્પૃથક્તત્ર બ્રહ્માદૌ દેવતાસુ ચ ॥ ૨,૪૦.૩૭॥

પઞ્ચ શ્રાદ્ધાનિ કુર્વીત દેવતાનાં યથાવિધિ ।
જલધારાં તતો દદ્યત્પીઠેપીઠે પૃથક્પૃથક્ ॥ ૨,૪૦.૩૮॥

શઙ્ખે વા તામ્રપાત્રે વા અલાભે મૃન્મયેઽપિ વા ।
તિલોદકં સમાદાય સર્વૌષધિસમન્વિતમ્ ॥ ૨,૪૦.૩૯॥

આસનોપાનહૌ ચ્છત્રં મુદ્રિકા ચ કમણ્ડલુઃ ।
ભાજનં ભાજનાધારં વસ્ત્રાણ્યષ્ટવિધં પદમ્ ॥ ૨,૪૦.૪૦॥

તામ્રપાત્રં તિલૈઃ પૂર્ણં સહિરણ્યં સદક્ષિણમ્ ।
દદ્યાદ્બ્રાહ્મણમુખ્યાય વિધિયુક્તં ખગેશ્વર ॥ ૨,૪૦.૪૧॥

ઋગ્વેદપારગે દદ્યાજ્જાતસસ્યાં વસુન્ધરામ્ ।
યજુર્વેદમયે વિપ્રે ગાઞ્ચ દદ્યાત્પયસ્વિનીમ્ ॥ ૨,૪૦.૪૨॥

સામગાય શિવોદ્દેશાત્પ્રદદ્યાત્કલધૌતકમ્ ।

યમોદ્દેશાત્તિલાંલ્લોહં તતો દદ્યાચ્ચ દક્ષિણામ્ ॥ ૨,૪૦.૪૩॥

પશ્ચાત્પુત્તલકં કાર્યં સર્વૌષધિસમન્વિતમ્ ।
પલાશસ્ય ચ વૃન્તાનાં વિભાગં શૃણુ કાશ્યપ ॥ ૨,૪૦.૪૪॥

કૃષ્ણાજિનં સમાસ્તીર્ય કુશૈશ્ચ પુરુષાકૃતિમ્ ।
શતત્રયેણ ષષ્ટ્યા ચ વૃન્તૈઃ પ્રોક્તોઽસ્થિસઞ્ચયઃ ॥ ૨,૪૦.૪૫॥

વિન્યસ્ય તાનિ વૃન્તાનિ અઙ્ગેષ્વેષુ પૃથક્પૃથક્ ।
ચત્વારિંશચ્છિરોદેશે ગ્રીવાયાં દશ વિન્યસેત્ ॥ ૨,૪૦.૪૬॥

વિંશત્યુરઃ સ્થલે દદ્યાદ્વિંશતિં જઠરેઽપિ ચ ।
બાહુયુગ્મે શતં દદ્યાત્કટિ દેશે ચ વિંશતિમ્ ॥ ૨,૪૦.૪૭॥

ઊરુદ્વયે શતઞ્ચાપિ ત્રિંશજ્જઙ્ઘાદ્વયે ન્યસેત્ ।
દદ્યાચ્ચતુષ્ટયં શિશ્ને ષડ્દદ્યાદ્વૃષણદ્વયે ।
દશ પાદાઙ્ગુલીભાગે એવમસ્થીનિ વિન્યસેત્ ॥ ૨,૪૦.૪૮॥

નારિકેલં શિરઃ સ્થાને તુમ્બં દદ્યાચ્ચ તાલુકે ।
પઞ્ચરત્નં મુખે દદ્યાજ્જિહ્વાયાં કદલીફલમ્ ॥ ૨,૪૦.૪૯॥

અન્ત્રેષુ નાલકં દદ્યાદ્બાલકં પ્રાણ એવ ચ ।
વસાયીં મેદકં દદ્યાદ્ગોમૂત્રેણ તુ મૂત્રકમ્ ॥ ૨,૪૦.૫૦॥

ગન્ધકં ધાતવો દેયો હરિતાલં મનઃ શિલા ।
રેતઃ સ્થાને પારદઞ્ચ પુરીષે પિત્તલં તથા ॥ ૨,૪૦.૫૧॥

મનઃ શિલાં તથા ગાત્રે તિલકલ્કઞ્ચ સન્ધિષુ ।
યવપિષ્ટં તથા માંસે મધુ વૈ ક્ષૌદ્રમેવ ચ ॥ ૨,૪૦.૫૨॥

કેશેષુ વૈ વટજટાત્વચિ દદ્યાન્મૃગત્વચમ્ ।
કર્ણયોસ્તાલપત્રઞ્ચ સ્તનયોશ્ચૈવ ગુઞ્જિકાઃ ॥ ૨,૪૦.૫૩॥

નાસાયાં શતપત્રં ચ કમલં નાભિમણ્ડલે ।
વૃન્તાકં વૃષણદ્વન્દ્વે લિઙ્ગે સ્યાદ્ગૃઞ્જનં શુભમ્ ॥ ૨,૪૦.૫૪॥

ઘૃતં નાભ્યાં પ્રદેયં સ્યાત્કૌપીને ચ ત્રપુ સ્મૃતમ્ ।
મૌક્તિકં સ્તનયોર્મૂર્ધ્નિ કુઙ્કુમેન વિલેપનમ્ ॥ ૨,૪૦.૫૫॥

કર્પૂરાગુરુધૂપૈશ્ચ શુભૈર્માલ્યૈઃ સુગન્ધિભિઃ ।
પરિધાનં પટ્ટસૂત્રં હૃદયે રુક્મકં ન્યસેત્ ॥ ૨,૪૦.૫૬॥

ઋદ્ધિવૃદ્ધી ભુજૌ દ્વૌ ચ ચક્ષુષોશ્ચ કપર્દકૌ ।
સિન્દૂરં નેત્રકોણે ચ તામ્બૂલાદ્યુપહારકૈઃ ॥ ૨,૪૦.૫૭॥

સર્વૌષધિયુતં પ્રેતં કૃત્વા પૂજા યથોદિતા ।
સાગ્નિકે (કૈશ્ચા) ચાપિ વિધિના યજ્ઞપાત્રં ન્યસેત્ક્રમાત્ ॥ ૨,૪૦.૫૮॥

શિરોમે શ્રીરિતિ ઋચા પુનન્તુ વરુણેતિ ચ ।
પ્રેતસ્ય પાવનં કૃત્વા શાલિશાલશિલોદકૈઃ ॥ ૨,૪૦.૫૯॥

વિષ્ણુમુદ્દિશ્ય દાતવ્યા સુશીલાગૌઃ પયસ્વિની ॥ ૨,૪૦.૬૦॥

(તિલા લોહં હિરણ્યં ચ કાર્પાસં લવણં તથા ।
સપ્તધાન્યં ક્ષિતિર્ગાવ એકૈકં પાનં સમૃતમ્ ॥ ૨,૪૦.૬૧॥

તિલપાત્રં તતો દત્ત્વા પદદાનં તથૈવ ચ ॥ ૨,૪૦.૬૧*૧॥

મહાદાનાનિ દેયાનિ તિલપાત્રં તથેતિ ચ ।
તતો વૈતરણી દેયા સર્વાભરણભૂષિતા ॥ ૨,૪૦.૬૨॥

કર્તવ્યં વૈષ્ણવં શ્રાદ્ધં પ્રેતમુક્ત્યર્થ માત્મવાન્ ।
પ્રેતમોક્ષં તતઃ કુર્યાદ્ધૃદિ વિષ્ણું પ્રકલ્પ્ય ચ ॥ ૨,૪૦.૬૩॥

ૐ વિષ્ણુરિતિ સંસ્મૃત્ય પ્રેતં તન્મૃત્યુમેવ ચ ।
અગ્નિદાહં તતઃ કુર્યાત્સૂતકન્તુ દિનત્રયમ્ ॥ ૨,૪૦.૬૪॥

દશાહકર્ત્રા પિણ્ડાશ્ચ કર્તવ્યાઃ પ્રેતભુક્તયે ।
સર્વં વર્ષવિધિં કુર્યાદેવં પ્રેતશ્ચ મુક્તિભાક્ ॥ ૨,૪૦.૬૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદેઽપમૃત્યૌ સુખદુઃખલાભાલાભનિરૂપણં
નામ ચત્વારિંશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૧
શ્રીવિષ્ણુરુવાચ ।
વૃષોત્સર્ગં પ્રકુર્વીત વિધિપૂર્વં ખગેશ્વર ।
કાર્તિકાદિષુ માસેષુ પૌર્ણમાસ્યાં શુભે દિને ॥ ૨,૪૧.૧॥

વિવાહોત્સર્જનં શ્રાદ્ધં નાન્દીમુખમુપક્રમેત્ ।

કુર્યાદ્ભુવશ્ચ સંસ્કારાનગ્નિસ્થાપનમેવ ચ ॥ ૨,૪૧.૨॥

વાપ્યાં કૂપે ગવાં ગોષ્ઠે સ્થાપ્યાગ્નિં વિધિવત્તતઃ ।
વિવાહવિધિના સર્વં કુર્યાદ્બ્રાહ્મણવાચનમ્ ॥ ૨,૪૧.૩॥

પાત્રાસાદનં શ્રપણમુપયમનકુશાદિકમ્ ।
પુર્યુક્ષણાન્તે હોમં ચ કર્યા દ્વૈ બ્રાહ્મણેન તુ ॥ ૨,૪૧.૪॥

આઘારાવાજ્યભાગૌ ચ ચક્ષુષી ચ પ્રદા પયેત્ ।
પ્રથમેઽહરિતિ મન્ત્રેણ હોતવ્યાશ્ચ ષડાહુતીઃ (તયઃ) ॥ ૨,૪૧.૫॥

આઘારાવાજ્યભાગૌ તુ પાયસેનાઙ્ગદેવતાઃ ।
અગ્નયે રુદ્રાય શર્વાય પશુપતયે ઉગ્રાય શિવાય ।
ભવાય મહાદેવાયેશાનાય યમાય ચ ॥ ૨,૪૧.૬॥

પિષ્ટકેન સકૃદ્ધોમં પૂષાગા ઇતિ મન્ત્રતઃ ।
ઉભયોઃ સ્વિષ્ટિકૃદ્ધોમશ્ચરુણા પાયસેન ચ ॥ ૨,૪૧.૭॥

પ્રથમં વ્યાહૃતિહોમઃ પ્રાયશ્ચિત્તં પ્રજાપતિઃ ।
સંસ્રવપ્રાશનં કુર્યાત્પ્રણીતાપરિમોક્ષણમ્ ॥ ૨,૪૧.૮॥

પવિત્રપ્રતિપત્તિશ્ચ બ્રાહ્મણે દક્ષૈણા તતઃ ।
ષડઙ્ગરુદ્રજાપ્યેન પ્રોતો મોક્ષમવાપ્નુયાત્ ॥ ૨,૪૧.૯॥

એકવર્ણં વૃષઞ્ચૈવ સકૃદ્વત્સતરીં ખગ ।
સ્નાપયિત્વા તતઃ કુર્યાત્સર્વાલઙ્કારભૂષિતમ્ ॥ ૨,૪૧.૧૦॥

પ્રતિષ્ઠાપ્ય ચ તદ્યુગ્મં પ્રેતો મોક્ષમવાપ્નુયાત્ ।
પુચ્છેચ તર્પણં કાર્યમુચ્છ્રિતે મન્ત્રપૂર્વકમ્ ।
બ્રાહ્મણાન્ભોજયેત્પશ્ચાદ્દક્ષિણાભિશ્ચ તોષયેત્ ॥ ૨,૪૧.૧૧॥

તતઃ શ્રાદ્ધં સમુદ્દિષ્ટમેકોદ્દિષ્ટં યથાવિધિ ।
જલમન્નં તથા દેયં પ્રેતોદ્ધરણહેતવે ॥ ૨,૪૧.૧૨॥

દ્વાદશાહે તતઃ કુર્યાન્માસેમાસે પૃથક્પથક્ ।
એવં વિધિઃ સમાયુક્તઃ પ્રેતમોક્ષે કરોતિ હિ ॥ ૨,૪૧.૧૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે વૃષોત્સર્ગનિરૂપણં નામૈ કચત્વારિંશત્તમોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૪૨

શ્રીવિષ્ણુરુવાચ ।

યથા ધેનુસહસ્રેષુ વત્સો વિન્દતિ માતરમ્ ।
તથા પૂર્વકૃતં કર્મ કર્તારમનુગચ્છતિ ॥ ૨,૪૨.૧॥

આદિત્યો વરુણો વિષ્ણુર્બ્રહ્મા સોમો હુતાશનઃ ।
શૂલપાણિશ્ચ ભગવાનભિનન્દતિ ભૂમિદમ્ ॥ ૨,૪૨.૨॥

નાસ્તિ ભમિસમં દાનં નાસ્તિ ભમિસમો નિધિઃ ।
નાસ્તિ સત્યસમો ધર્મો નાનૃતાત્પાતકં પરમ્ ॥ ૨,૪૨.૩॥

અગ્નેરપત્યં પ્રથમં સુવર્ણં ભૂર્વૈષ્ણવી સૂર્યસુતાશ્ચ ગાવઃ ।
લોકત્રયં તેન ભવેત્પ્રદત્તં યઃ કાઞ્ચનં ગાં ચ મહીં ચ દદ્યાત્ ॥ ૨,૪૨.૪॥

ત્રીણ્યાહુરતિદાનાનિ ગાવઃ પૃથ્વી સરસ્વતી ।
નરકાદુદ્ધરન્ત્યેતે જપપૂજનહોમતઃ ॥ ૨,૪૨.૫॥

કૃત્વા બહૂનિ પાપાનિ રૌદ્રાણિ વિપુલાનિ ચ ।
અપિ ગોચર્મમાત્રેણ ભૂમિદાનેન શુધ્યતિ ॥ ૨,૪૨.૬॥

હરન્તમપિ લોભેન નિરુધ્યૈનં નિવારયેત્ ।
સ યાતિ નરકે ઘોરે યસ્તં ન પરિરક્ષતિ ॥ ૨,૪૨.૭॥

અકર્તવ્યં ન કર્તવ્યં પ્રાણૈઃ કણ્ઠગતૈરપિ ।
કર્તવ્યમેવ કર્તવ્યમિતિ ધર્મવિદો વિદુઃ ॥ ૨,૪૨.૮॥

આકારપ્રવર્તને પાપં ગોસહસ્રવધૈઃસમમ્ ।
વૃત્તિચ્છેદે તથા વૃત્તેઃ કરણં લક્ષધેનુકમ્ ॥ ૨,૪૨.૯॥

વરમેકાપ્યપહૃતા ન તુ દત્તં ગવાં શતમ્ ।
એકાં હૃત્વા શતં દત્ત્વા ન તેન સમતા ભવેત્ ॥ ૨,૪૨.૧૦॥

સ્વયમેવ તુ યો દત્ત્વા સ્વયમેવ પ્રબાધતે ।
સ પાપી નરકં યાતિ યાવદાભૂતસમ્પ્લવમ્ ॥ ૨,૪૨.૧૧॥

ન ચાશ્વમેધેન તથા વિધિવદ્દક્ષિણાવતા ।
અવૃત્તિકર્શિતે દીને બ્રાહ્મણે ગક્ષિતે યથા ॥ ૨,૪૨.૧૨॥

ન તદ્ભવતિ વેદેષુ યજ્ઞે સુબહુદક્ષિણે ।

યત્પુણ્યં દુર્બલે ત્રસ્તે બ્રાહ્મણે પરિરક્ષિતે ॥ ૨,૪૨.૧૩॥

બ્રહ્મસ્વૈશ્વસુપુષ્ટાનિ વાહનાનિ બલાનિ ચ ।
યુદ્ધકાલે વિશીર્યન્તે સૈકતાઃ સેતવો યથા ॥ ૨,૪૨.૧૪॥

સ્વદત્તાં પરદત્તાં વા યો હરેચ્ચ વસુન્ધરામ્ ।
ષષ્ટિવર્ષસહસ્રાણિ વિષ્ઠાયાં જાયતે કૃમિઃ ॥ ૨,૪૨.૧૫॥

બ્રહ્મસ્વં પ્રણયાદ્ભુક્તં દહત્યાસપ્તમં કુલમ્ ।
તદેવ ચૌર્યરૂપેણ દહત્યાચન્દ્રતારકમ્ ॥ ૨,૪૨.૧૬॥

લોહચૂર્ણાશ્મચૂર્ણાનિ કદાચિજ્જરયેત્પુમાન્ ।
બ્રહ્મસ્વન્ત્રિષુ લોકેષુ કઃ પુમાઞ્જરયિષ્યતિ ॥ ૨,૪૨.૧૭॥

દેવદ્રવ્યવિનાશેન બ્રહ્મસ્વહરણેન ચ ।
કુલાન્યકુલતાં યાન્તિ બ્રાહ્મણાતિક્રમેણ ચ ॥ ૨,૪૨.૧૮॥

બ્રાહ્મણાતિ ક્રમો નાસ્તિ વિપ્રે વિદ્યાવિવર્જિતે ।
જ્વલન્તમગ્નિમુત્સૃજ્ય ન હિ ભસ્મનિ હૂયતે ॥ ૨,૪૨.૧૯॥

સંક્રાન્તૌ યાનિ દાનાનિ હવ્યકવ્યાનિ યાનિ ચ ।
સપ્તકલ્પક્ષયં યાવદ્દદાત્યર્કઃ પુનઃ પુનઃ ॥ ૨,૪૨.૨૦॥

પ્રતિગ્રહાધ્યાપનયાજનેષુ પ્રતિગ્રહં સ્વેષ્ટતમં વદન્તિ ।
પ્રતિગ્રહાચ્છુધ્યતિ જાપ્યહોમં ન યાજનં કર્મ પુનન્તિ વેદાઃ ॥ ૨,૪૨.૨૧॥

સદા જાપી સદા હોમી પરપાકવિવર્જિતઃ ।
રત્નપૂર્ણામપિ મહીં પ્રતિગૃહ્ણન્ન લિપ્યતે ॥ ૨,૪૨.૨૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે ભૂદાનાદિનિરૂપણં નામ દ્વિચત્વારિંશતમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૩
શ્રીવિષ્ણુરુવાચ ।
જલાગ્નિબન્ધનભ્રષ્ટા પ્રવ્રજ્યાનાશકચ્યુતાઃ ।
ઐન્દવાભ્યાં વિશુધ્યન્તિ દત્ત્વા ધેનું તથા વૃષમ્ ॥ ૨,૪૩.૧॥

ઊનદ્વાદશવર્ષસ્ય ચતુર્વર્ષાધિકસ્ય ચ ।
પ્રાયશ્ચિત્તં ચરેન્માતા પિતા વાન્યોઽપિ બાન્ધવઃ ॥ ૨,૪૩.૨॥

અતો બાલનરસ્યાપિ નાપરાધો ન પાતકમ્ ।
રાજદણ્ડો ન તસ્યાસ્તિ પ્રાયશ્ચિત્તં ન વિદ્યતે ॥ ૨,૪૩.૩॥

રક્તસ્ય દર્શને દૃષ્ટે આતુરા સ્ત્રી ભવેદ્યદિ ।
ચતુર્થેઽહ્નિ પદાદીંશ્ચ ત્યક્ત્વા સ્નાત્વા વિશુધ્યતિ ॥ ૨,૪૩.૪॥

આતુરે સ્નાન ઉત્પન્ને દશકૃત્વો હ્યનાતુરઃ ।
સ્નાત્વાસ્નાત્વાસ્પૃશેદેનં તતઃ શુધ્યેત્સ આતુરઃ ॥ ૨,૪૩.૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે શુદ્ધિનિરૂપણં નામ ત્રિચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૪
શ્રીવિષ્ણુરુવાચ ।
સ્વેચ્છયા તાર્ક્ષ્ય મરણં શ‍ૃઙ્ગિદંષ્ટ્રિસરીસૃપઃ ।
ચાણ્ડાલાદ્યાત્મઘાતૈશ્ચ વિષાદ્યૈસ્તાડનૈસ્તથા ॥ ૨,૪૪.૧॥

જલાગ્નિપાતવાતૈશ્ચ નિરાહારાદિભિસ્તથા ।
યેષામેવ ભવેન્મૃત્યુઃ પ્રોક્તાસ્તે પાપકર્મિણઃ ॥ ૨,૪૪.૨॥

પાષણ્ડ્યનાશ્રમાશ્ચૈવ મહાપાતકિનસ્તથા ।
સ્ત્રિયશ્ચ વ્યભિચારિણ્ય આરૂઢપતિતાસ્તથા ॥ ૨,૪૪.૩॥

ન તેષાં સ્યાન્નવ શ્રાદ્ધં ન સંસ્કારઃ સપિણ્ડનમ્ ।
શ્રાદ્ધાનિ ષોડશોક્તાનિ ન ભવન્તિ ચ તાન્યપિ ॥ ૨,૪૪.૪॥

વેતનં યત્ક્ષિપેદપ્સુ ગૃહ્યાગ્નિશ્ચ ચતુષ્પથે ।
પાત્રાણિનિર્દહેદગ્નૌ સાગ્નિકે પાપકર્મણિ ॥ ૨,૪૪.૫॥

પૂર્ણે સંવત્સરે તેષામિત્થં કાર્યં દયાલુભિઃ ।
એકાદશીં સમાસાદ્ય શુક્લપક્ષે ચ કાશ્યપ ॥ ૨,૪૪.૬॥

વિષ્ણું યમં ચ સમ્પૂજ્ય ગન્ધપુષ્પાક્ષતાદિભિઃ ।
દશ પિણ્ડાન્ઘૃતાક્તાંશ્ચ દર્ભેષુ મધુસંયુતાન્ ॥ ૨,૪૪.૭॥

યજ્ઞોપવીતિ સતિલાન્ધ્યાયન્વિષ્ણું યમં તથા ।
દક્ષિણાભિમુખસ્તૂષ્ણીમેકૈકં નિર્વપેત્તુતાન્ ॥ ૨,૪૪.૮॥

ઉદ્ધૃત્ય મિશ્રિતાન્પશ્ચાત્તીર્થેઽભ્મઃ સુ વિનિઃ ક્ષિપેત્ ।

ક્ષિપન્સંકીર્તયેન્નામ ગોત્રં ચ મૃતકસ્ય ચ ॥ ૨,૪૪.૯॥

પુનરપ્યર્ચયેદ્વિષ્ણું યમં કુસુમચન્દનૈઃ ।
ધૂપદીપૈઃ સનૈવેદ્યૈર્ભક્ષ્યભોજ્યસમન્વિતૈઃ ॥ ૨,૪૪.૧૦॥

તસ્મિન્નુપવસેદહ્નિ વિપ્રાંશ્ચૈવ નિમન્ત્રયેત્ ।
કુલવિદ્યાતપોયુક્તાન્સાધુશીલસમન્વિતાન્ ॥ ૨,૪૪.૧૧॥

નવ સપ્તાથવા પઞ્ચ સ્વસામર્થ્યાનુસારતઃ ।
અપરેઽહનિ મધ્યાહ્ને યમં વિષ્ણું તથાર્ચયેત્ ॥ ૨,૪૪.૧૨॥

ઉદઙ્મુખાંસ્તથા વિપ્રાંસ્તાન્સમ્યગુપવેશયેત્ ।
આવાહનાર્ઘદાનાદૌ વિષ્ણું યમસમન્વિતમ્ ॥ ૨,૪૪.૧૩॥

યજ્ઞોપવીતી કુર્વીત પ્રેતનામ પ્રકીર્તયેત્ ।
પ્રેતં યમં ચ વિષ્ણું ચ સ્મરન્શ્રાદ્ધં સમાપયેત્ ॥ ૨,૪૪.૧૪॥

અન્યેભ્યશ્ચાપિ સર્વેભ્યઃ પિણ્ડદાનાર્થમુદ્ધરેત્ ।
પૃથગ્વા દશ પિણ્ડાંશ્ચ પઞ્ચ દદ્યાત્ક્રમેણ તુ ॥ ૨,૪૪.૧૫॥

પ્રથમં વિષ્ણવે દદ્યાદ્બ્રહ્મણે ચ શિવાય ચ ।
સભૃત્યાય શિવાયાથ પ્રેતાયાપિ ચ પઞ્ચમમ્ ॥ ૨,૪૪.૧૬॥

નામ ગોત્રં સ્મરેત્તસ્ય વિષ્ણુશબ્દં પ્રકીર્તયેત્ ।
નમસ્કારશિરસ્કન્તુ પઞ્ચમં પિણ્ડમુદ્ધરેત્ ॥ ૨,૪૪.૧૭॥

ગોભૂમિપિણ્ડદાનાદ્યૈઃ શક્ત્યા પ્રેતં સ્મરંશ્ચ તમ્ ।
તિલૈસ્તિલાંસ્તુ વિપ્રાણાં દર્ભયુક્તેષુ પાણિષુ ॥ ૨,૪૪.૧૮॥

દદ્યાદન્નં દ્વિજાનાં ચ તામ્બૂલં દક્ષિણાં તથા ।
એવં શિષ્ટતમં વિપ્રં હરિણ્યેન પ્રપૂજયેત્ ॥ ૨,૪૪.૧૯॥

નામ ગોત્રં સ્મરન્દદ્યાદ્વિષ્ણુપ્રીતોસ્ત્વિતિ બ્રુવન્ ।
અનુવ્રજ્ય દ્વિજાન્પશ્ચાત્ત્યક્તામ્ભો દક્ષિણામુખઃ ॥ ૨,૪૪.૨૦॥

કીર્તયન્નામગોત્રે તુ ભુવિ પ્રીતોસ્ત્વિતિ ક્ષિપેત્ ।
મિત્રબન્ધુજનૈઃ સાર્ધં શેષં ભુઞ્જીત વાગ્યતઃ ।
પ્રતિસંવત્સરાદિ સ્યાદેકોદ્દિષ્ટવિધાનતઃ ॥ ૨,૪૪.૨૧॥

એવં કૃતે ગમિષ્યન્તિ સ્વર્લોકં પાપકર્મિણઃ ।
સપિણ્ડીકરણાદૌ તુ કૃતે ચૈવાપ્નુવન્તિતે ॥ ૨,૪૪.૨૨॥

અથ કશ્ચિત્પ્રમાદેન મ્રિયતે હ્યુદકાદિભિઃ ।
સંસારપ્રમુખસ્તસ્ય સર્વં કુર્યાદ્યથાવિધિ ॥ ૨,૪૪.૨૩॥

પ્રમાદાદિચ્છયા મર્ત્યો ન ગચ્છેત્સર્પસમુખઃ ।
પક્ષયોરુભયોર્નાગં પઞ્ચમીષુ પ્રપૂજયેત્ ॥ ૨,૪૪.૨૪॥

કુર્યાત્પિષ્ટમયીં લેખાં નાગાનામાકૃતિં ભુવિ ।
અર્ચયેત્તાં સિતૈઃ પુષ્પૈઃ સુગન્ધૈશ્ચન્દનેનચ ॥ ૨,૪૪.૨૫॥

પ્રદદ્યાદ્ધૂપદીપન્તુ તણ્ડુલાંશ્ચ સિતાન્ક્ષિપેત્ ।
આમપિષ્ટં તથૈવાન્નં ક્ષીરઞ્ચ વિનિવેદયેત્ ॥ ૨,૪૪.૨૬॥

ઉપસ્થાય વદેદેવં મુઞ્ચન્મુદ્રાંશુકાનિ ચ ।
મધુરં તદ્દિનેઽશ્રીયાદ્દ્વિશ્રાદ્ધં સમાપયેત્ ॥ ૨,૪૪.૨૭॥

સૌવર્ણં શક્તિતો નાગં તતો દદ્યાદ્દ્વિજોત્તમે ।
ધેનું દત્ત્વા તતો બ્રૂયાત્પ્રીયતાં નાગરાડિતિ ॥ ૨,૪૪.૨૮॥

યથાવિભવ્યં કુર્વીત કર્માણ્યન્યાનિ પૂર્વવત્ ।
સ્વશાખોક્તવિધાનેન ઇત્થં કુર્યાદ્યથાતથમ્ ।
પ્રેતત્વાન્મોચયેત્તાંસ્તુ સ્વર્ગમાર્ગં નયેત્ચ ॥ ૨,૪૪.૨૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશાખ્યે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે દુર્મરણે કાર્યાકાર્યક્રિયાદિનિરુપણં નામ ચતુશ્ચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૫
શ્રીવિષ્ણુરુવાચ ।
પ્રત્યબ્દં શ્રાદ્ધમેવં તે કથયામિ ખગેશ્વર ।
પ્રત્યબ્દં પાર્વણેનૈવ કુર્યાતાં ક્ષેત્રજોરસૌ ॥ ૨,૪૫.૧॥

વિધિનાચેતરૈરેવમેકોદ્દિષ્ટં ન પાર્વણમ્ ॥ ૨,૪૫.૨॥

અનગ્રેશ્ચ સુતૌ સ્યાતામનગ્રી ક્ષેત્રજોરસૌ ।
એકોદ્દિષ્ટં ન કુર્યાતાં પ્રત્યબ્દં તૌ તુ પાર્વણમ્ ॥ ૨,૪૫.૩॥

યદા ત્વન્યતરઃ સાગ્નિઃ પુત્રો વાપ્યથવા પિતા ।
પ્રત્યબ્દં પાર્વણં તત્ર કુર્યાતાં ક્ષેત્રજૌરસૌ ॥ ૨,૪૫.૪॥

અનગ્નયઃ સાગ્નયો વા પુત્રા વા પિતરોઽપિ વા ।
એકોદ્દિષ્ટં સુતૈઃ કાર્યં ક્ષયાહ ઇતિ કેચન ॥ ૨,૪૫.૫॥

દર્શકાલે ક્ષયો યસ્ય પ્રેતપક્ષેઽથ વા પુનઃ ।
પ્રત્યબ્દં પાર્વણં કાર્યં તસ્ય સર્વૈઃ સુતૈરપિ ॥ ૨,૪૫.૬॥

એકોદ્દિષ્ટમપુત્રાણાં પુંસાં સ્યાદ્યોપિતામપિ ।
એકોદ્દિષ્ટે કુશા ગ્રાહ્યાઃ સમૂલા યજ્ઞકર્મણિ ।
બહિર્લૂનાઃ સફુલ્લનાઃ શ્રાદ્ધં વૃદ્ધિમૃતે સદા ॥ ૨,૪૫.૭॥

કર્તવ્યે પાર્વણે શ્રાદ્ધે આશૌચં યદિ જાયતે ।
આશૌચાવગમે કુર્યાચ્છ્રાદ્ધં હિ તદનન્તરમ્ ॥ ૨,૪૫.૮॥

એકોદ્દિષ્ટે તુ સમ્પ્રાપ્તે યદિ વિઘ્નઃ પ્રજાયતે ।
માસેન્યસ્મિન્તિથૌ તસ્યાં કુર્યાચ્છ્રાદ્ધં તદૈવ હિ ॥ ૨,૪૫.૯॥

તૂષ્ણીં શ્રાદ્ધાન્તુ શૂદ્રસ્ય ભાર્યાયાસ્તત્સુતસ્ય ચ ।
કન્યાયાશ્ચ દ્વિજાતીનામનુપેતદ્વિજસ્ય ચ ॥ ૨,૪૫.૧૦॥

એકકાલે ગતા સૂનાં બહૂનામથ વા દ્વયોઃ ।
તન્ત્રેણ શ્રપણં કુર્યાચ્છ્રાદ્ધં કુર્યાત્પૃથક્પૃથક્ ॥ ૨,૪૫.૧૧॥

દદ્યાત્પૂર્વં મૃતસ્યાદૌ દ્વિતીયસ્ય તતઃ પુનઃ ।
તૃતીયસ્ય તતઃ કુર્યાત્સંનિપાતે ત્વયં વિધિઃ (ક્રમઃ) ॥ ૨,૪૫.૧૨॥

પ્રત્યબ્દમેવં યઃ કુર્યાદ્યથાતથમતન્દ્રિતઃ ।
તારયિત્વા પિતૄન્સર્વાન્પ્રાપ્નોતિ પરમાં ગતિમ્ ॥ ૨,૪૫.૧૩॥

ન જ્ઞાયતે મૃતાહશ્ચેત્પ્રસ્થાનદિનમેવ ચ ।
માસશ્ચેત્સ્યાત્પરિજ્ઞાતસ્તદ્દર્શે સ્યાન્મૃતાહિકમ્ ॥ ૨,૪૫.૧૪॥

યદા માસો ન વિજ્ઞાતો વિજ્ઞાતં દિનમેવ ચ ।
તદા માર્ગશિરે માસિ માઘે વા તદ્દિનં ભવેત્ ॥ ૨,૪૫.૧૫॥

દિનમાસાવવિજ્ઞાતૌ મરણસ્ય યદા પુનઃ ।
પ્રસ્થાનદિનમાસૌ તુ ગ્રાહ્યૌ શ્રાદ્ધે મયોદિતૌ ॥ ૨,૪૫.૧૬॥

પ્રસ્થાનસ્યાપિ ન જ્ઞાતૌ દિનમાસૌ યદા પુનઃ ।
મૃતવાર્તાશ્રુતૌ ગ્રાહ્યૌ પૂર્વપ્રોક્તક્રમેણ તુ ॥ ૨,૪૫.૧૭॥

પ્રવાસમન્તરેણાપિ સ્યાતાં તૌ વિસ્મૃતૌ યદા ।

તદાનીમપિ તૌ ગ્રાહ્યૌ પૂર્વવત્તુ મૃતાહિકે ॥ ૨,૪૫.૧૮॥

ગૃહસ્થે પ્રોષિતે યચ્ચ કશ્ચિત્તુ મ્રિયતે ગૃહે ।
આસૌચાપગમે યત્ર પ્રારબ્ધે શ્રાદ્ધકર્મણિ ॥ ૨,૪૫.૧૯॥

પ્રત્યાગતશ્ચેજ્જાનાતિ તત્ર વૃત્તં ગૃહી તથા ।
આશૌચં ગૃહિણસ્તેષાં ન દ્રવ્યાદેસ્તદા ભવેત્ ॥ ૨,૪૫.૨૦॥

પુત્રાદિના યદારબ્ધં શ્રાદ્ધં તત્ત્વેન વાખિલમ્ ।
સમાપનીયં તત્રાપિ શ્રાદ્ધં ગૃહીતુ દૂરતઃ ॥ ૨,૪૫.૨૧॥

દાત્રા બોક્ત્રા ચ ન જ્ઞાતં સૂતકં મૃતકં તથા ।
ઉભયોરપિ તદ્દોષં નારોપયતિ કર્હિચિત્ ॥ ૨,૪૫.૨૨॥

યદા ત્વન્યતરજ્ઞાતં સૂતકં મૃતકં તથા ।
ભોક્તુરેવ તદા દોષો નાન્યો દાતા પ્રદુષ્યતિ ॥ ૨,૪૫.૨૩॥

ઇત્યુક્તેન પ્રકારેણ યઃ કુર્યાન્મૃતવાસરમ્ ।
અવિજ્ઞાતમૃતાહસ્ય સતતં તારયત્યસૌ ॥ ૨,૪૫.૨૪॥

નિત્યશ્રાદ્ધેઽથ ગન્ધાદ્યૈર્દ્વિજાનભ્યર્ચ્ય ભક્તિતઃ ।
સર્વાન્પિતૃગણાન્સમ્યક્સહૈવોદ્દિશ્ય યોજયેત્ ॥ ૨,૪૫.૨૫॥

આવાહનં સ્વધાકારો પિણ્ડાગ્નૌકરણાદિકમ્ ।
બ્રહ્મચર્યાદિનિયમા વિશ્વદેવાસ્તથૈવ ચ ॥ ૨,૪૫.૨૬॥

નિત્યશ્રાદ્ધે ત્યજેદેતાન્ભોજ્યમન્નં પ્રકલ્પયેત્ ।
દત્ત્વા તુ દક્ષિણાં શક્ત્યા નમસ્કારૈર્વિસર્જયેત્ ॥ ૨,૪૫.૨૭॥

દેવાનુદ્દિશ્ય વિશ્વાદીન્યદ્દ્યાદ્દ્વિજભોજનમ્ ।
તન્નિત્યશ્રાદ્ધવત્કાર્યં દેવશ્રાદ્ધં તદુચ્યતે ॥ ૨,૪૫.૨૮॥

માતૃશ્રાદ્ધન્તુ પૂર્વેણ કર્માદૌ પૈતૃકં તથા ।
ઉત્તરેઽહનિ વૃદ્ધૌ સ્યાન્માતામહગણસ્ય તુ ॥ ૨,૪૫.૨૯॥

શ્રાદ્ધત્રયં પ્રકુર્વીત વૈશ્વદેવન્તુતાન્ત્રિકમ્ ॥ ૨,૪૫.૩૦॥

માતૃભ્યઃ કલ્પયેત્પૂર્વં પિતૃભ્યસ્તદનન્તરમ્ ।
માતામહેભ્યશ્ચ તથા દદ્યાદિત્થં ક્રમેણ તુ ॥ ૨,૪૫.૩૧॥

માતૃશ્રાદ્ધે તુ વિપ્રાણામભાવે સુકુલોદ્ભતાઃ ।

પતિપુત્રાન્વિતાઃ સાધ્વ્યો યોષિતોઽષ્ટૌ ચ ભાવયેત્ ॥ ૨,૪૫.૩૨॥

ઇષ્ટાપૂર્તાદિકે શ્રાદ્ધં કુર્યાદાભ્યુદયં તથા ।
ઉત્પાતાદિનિમિત્તેષુ નિત્ય શ્રાદ્ધવદેવ તુ ॥ ૨,૪૫.૩૩॥

નિત્યં દૈવઞ્ચ વૃદ્ધિઞ્ચ કામ્યં નૈમિત્તિકં તથા ।
શ્રાદ્ધાન્યુક્તપ્રકારેણ કુર્વન્સિદ્ધિમવાપ્નુયાત્ ।
ઇતિ તે કથિતં તાર્ક્ષ્ય કિમન્યત્પરિપૃચ્છસિ ॥ ૨,૪૫.૩૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
શ્રીકૃષ્ણગરુડસંવાદે પ્રત્યાબ્દિકાદિશ્રાદ્ધનિરૂપણં નામ પઞ્ચચત્વારિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૬
તાર્ક્ષ્ય ઉવાચ ।
સુકૃતસ્ય પ્રભાવેણ સ્વર્ગો નાનાવિધો નણામ્ ।
ભોગાઃ સૌખ્યાતિ રૂપઞ્ચ બલં બુદ્ધિઃ પરાક્રમઃ ॥ ૨,૪૬.૧॥

સત્યં પુણ્યવતાં દેવ જાયતેઽત્ર પરત્ર ચ ।
સત્યંસત્યં પુનઃ સત્યં વેદવાક્યં ન ચાન્યથા ॥ ૨,૪૬.૨॥

ધર્મો જયતિ નાધર્મઃ સત્યં જયાતે નાનૃતમ્ ।
ક્ષમા જયતિ ન ક્રોધો વિષ્ણુર્જયતિ નાસુરઃ ॥ ૨,૪૬.૩॥

તદ્વત્સત્યં મયા જ્ઞાતં સુકૃતાચ્છોભનં ભવેત્ ।
યતોત્કૃષ્ટતમં પુણ્યં તથોત્કૃષ્ટતરોનરઃ ॥ ૨,૪૬.૪॥

એવન્તુ શ્રોતુમિચ્છામિ જાયન્તે પાપિનો યથા ।
યેન કર્મવિપાકેન યથા નિયમભાગ્ભવેત્ ॥ ૨,૪૬.૫॥

યાંયાં યોનિમવાપ્નોતિ યથારૂપશ્ચ જાયતે ।
તન્મે વદ સુરશ્રેષ્ઠ સમાસેનાપિ કાઙ્ક્ષિતમ્ ॥ ૨,૪૬.૬॥

શ્રીકૃષ્ણ ઉવાચ ।
શુભાશુભફલૈસ્તાર્ક્ષ્ય ભુક્તભોગા નરાસ્ત્વિહ ।
જાયન્તે લક્ષણૈર્યૈસ્તુતાનિ મે શ ृણુ કાશ્યપ ॥ ૨,૪૬.૭॥

ગુરુરાત્મવતાં શાસ્તા રાજા શાસ્તા દુરાત્મનામ્ ।
ઇહ પ્રચ્છન્નપાપાનાં શાસ્તા વૈવસ્વતો યમઃ ॥ ૨,૪૬.૮॥

પ્રાયશ્ચિત્તેષ્વચીર્ણેષુ યમલોકા હ્યનેકધા ।
યાતનાભિર્વિમુક્તા યે યાન્તિ તે જીવસન્તતીમ્ ॥ ૨,૪૬.૯॥

ગત્વા માનુષભાવે તુ પાપચિહ્ના ભવન્તિ તે ।
તાન્યહં તવ ચિહ્નાનિ કથયિષ્યે ખગોત્તમ ॥ ૨,૪૬.૧૦॥

સોઢ્વા વૈ યાતનાઃ સર્વા ગત્વા વૈવસ્વતક્ષયમ્ ।
નિસ્તીર્ણયાતનાસ્તે તુ લોકમાયાન્તિ ચિહ્નિતાઃ ॥ ૨,૪૬.૧૧॥

ગદ્ગદોઽનતવાદી સ્યાન્મૂકશ્ચૈવ ગવાનૃતે ।
બ્રહ્મહા જાયતે કુષ્ઠી શ્યાવદન્તશ્ચ મદ્યપઃ ॥ ૨,૪૬.૧૨॥

કુનખી સ્વર્ણહરણાદ્દુશ્ચર્મા ગુરુતલ્પગઃ ।
સંયોગી હીનયોનિઃ સ્યાદ્દરિદ્રોઽદત્તદાનતઃ ॥ ૨,૪૬.૧૩॥

અયાજ્યયાજકો યાતિ ગ્રાહમસૂકરતાં દ્વિજઃ ।
ખરો વૈ બહુયાજી સ્યાત્કાકો નિર્મન્ત્રભોજનાત્ ॥ ૨,૪૬.૧૪॥

અપરીક્ષિતભોક્તારો વ્યાઘ્રાઃ સ્યુર્નિર્જને વને ।
બહુતર્જકો માર્જરઃ ખદ્યોતઃ કક્ષદાહકઃ ॥ ૨,૪૬.૧૫॥

પાત્રે વિદ્યાપ્રદાતા યો બલીવર્દો ભવેત્તસઃ ।
અન્નં પર્યુષિતં વિપ્રે પ્રદદત્કુક્કરો ભવેત્ ॥ ૨,૪૬.૧૬॥

માત્સર્યાદપિ જાત્યન્ધો જન્માન્ધઃ પુસ્તકં હરન્ ।
ફલાન્યાહરતોઽપત્યં મ્રિયતે નાત્ર સંશયઃ ॥ ૨,૪૬.૧૭॥

મૃતો વાનરતાં યાતિ તન્મુખો ગણ્ડવાન્ભવેત્ ।
અદત્ત્વા ભક્ષ્યમશ્નાતિ અનપત્યો ભવેત્તુ સઃ ॥ ૨,૪૬.૧૮॥

હરન્વસ્ત્રં ભવેદ્ગોધા ગરદઃ પવનાશનઃ ।
પ્રવજ્યાગમનાદ્રાજન્ભવેન્મરુપિશાચકઃ ॥ ૨,૪૬.૧૯॥

ચાતકો જલહર્તા સ્યાદ્ધાન્યહર્તા ચ મૂષિકઃ ।
અપ્રાપ્તયૌવનાં સેવન્ભવેત્સર્પ ઇતિ શ્રુતિઃ ॥ ૨,૪૬.૨૦॥

ગુરુદારાભિલાષી ચ કૃકલાસો ભવેદ્ધ્રુવમ્ ।
જલપ્રસ્ત્રવણં યસ્તુ ભિન્દ્યાન્મત્સ્યો ભવેન્નરઃ ॥ ૨,૪૬.૨૧॥

અવિક્રેયક્રયાચ્ચૈવ બકો ગૃધ્રો ભવેન્નરઃ ।
અયોનિગો વૃકો હિ સ્યાદુલૂકઃ ક્રયવઞ્ચનાત્ ॥ ૨,૪૬.૨૨॥

મૃતસ્યૈકાદશાહે તુ ભુઞ્જાનશ્વાભિજાયતે ।
પ્રતિશ્રુત્ય દ્વિજેભ્યોઽર્થમદદજ્જમ્બુકો ભવેત્ ॥ ૨,૪૬.૨૩ ॥

રાજ્ઞારિં ગત્વા ભવેદ્દંષ્ટ્રી તસ્કરો વિઙ્વરાહકઃ ।
શારિવા ફલવિક્રેતા વૃષશ્ચ વૃષલીપતિઃ ॥ ૨,૪૬.૨૪ ॥

માર્જરોઽગ્નિં પદા સ્પૃષ્ટ્વા રોગવાન્પરમાંસભુક્ ।
ઉદક્યાગમનાત્ષણ્ડો દુર્ગન્ધશ્ચ સુગન્ધહૃત્ ॥ ૨,૪૬.૨૫ ॥

યદ્વા તદ્વાપિ પારક્યં સ્વલ્પં વા હરતે બહુ ।
હૃત્વા વૈ યોનિમાપ્નોતિ તિરશ્ચાં નાત્ર સંશયઃ ॥ ૨,૪૬.૨૬ ॥

એવમાદીનિ ચિહ્નાનિ અન્યાન્યપિ ખગેશ્વર ।
સ્વકર્મવિતતાન્યેવ? દૃશ્યન્તે યૈસ્તુ માનવૈઃ ॥ ૨,૪૬.૨૭ ॥

એવં દુષ્કૃતકર્મા હિ ભુક્ત્વા ચ નરકાન્ક્રમાત્ ।
જાયતે કર્મશેષેણ ઉક્તાસ્વેતાસુ યોનિષુ ॥ ૨,૪૬.૨૮ ॥

તતો જન્મશતં મર્ત્યે સર્વજન્તુષુ કાશ્યપ ।
જાયતે નાત્ર સન્દેહઃ સમીભૂતે શુભાશુભે ॥ ૨,૪૬.૨૯ ॥

સ્ત્રીપુંસયો પ્રસઙ્ગેન નિરુદ્ધે શુક્રસોણિતે ।
સમુપેતઃ પઞ્ચભૂતૈર્જાયતે પાઞ્ચભૌતિકઃ ॥ ૨,૪૬.૩૦ ॥

ઇન્દ્રિયાણિ મનઃ પ્રાણા જ્ઞાનમાયુઃ સુખં ધૃતિઃ ।
ધારણા પ્રેરણં દુઃખં મિથ્યાહઙ્કાર એવ ચ ॥ ૨,૪૬.૩૧ ॥

પ્રયતાકૃતિવર્ણસ્તુ રાગદ્વેષૌ ભવાભવૌ ।
તસ્યેદમાત્મનઃ સર્વમનાદેરાદિમિચ્છતઃ ॥ ૨,૪૬.૩૨ ॥

સ્વકર્મ બદ્ધસ્ય તદા ગર્ભવૃદ્ધિર્ભવેદિતિ ।
પુરા યથા મયા પ્રોક્તં તવ જન્તોર્હિ લક્ષણમ્ ॥ ૨,૪૬.૩૩ ॥

એવં પ્રવર્તિતં ચક્રં ભૂતગ્રામે ચતુર્વિધે ।
સમુત્પત્તિર્વિનાશશ્ચ જાયતે તાર્ક્ષ્ય દેહિનામ્ ॥ ૨,૪૬.૩૪ ॥

સ્વધર્મેણૈવોર્ધ્વગતિરધર્મેણાપ્યધોગતિઃ ।
જાયતે સર્વવર્ણાનાં સ્વધર્મચલનાત્ખગ ॥ ૨,૪૬.૩૫ ॥

દેવત્વે માનુષત્વે ચ દાનભોગાદિકાઃ ક્રિયાઃ ।

યા દૃશ્યન્તે વૈનતેય તત્સર્વં કર્મજં ફલમ્ ॥ ૨,૪૬.૩૬॥

અકર્મવિહિતે ઘોરે કામક્રોધાર્જિતેऽશુભે ।
પતેદ્વૈ નરકે ભૂયો તસ્યોત્તારો ન વિદ્યતે ॥ ૨,૪૬.૩૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે
જીવસ્ય શુભાશુભગતિનિરૂપણં નામ ષટ્ચત્વારિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૭
ગરુડ ઉવાચ ।
ભગવન્દેવદેવેશ કૃપયા પરયા વદ ।
દાનં દાનસ્ય માહાત્મ્યં વૈતરણ્યાઃ પ્રમાણકમ્ ॥ ૨,૪૭.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
યા સા વૈતરણી નામ યમમાર્ગે મહાસરિત્ ।
અગાધા દુસ્તરા પાપૈર્દૃષ્ટમાત્રા ભયાવહા ॥ ૨,૪૭.૨॥

પૂયશોણિતતોયાઢ્યા માંસકર્દમસકુંલા ।
પાપિનઞ્ચાગતાન્દૃષ્ટ્વા નાનાભયસમાવૃતા ॥ ૨,૪૭.૩॥

ક્વાથ્યતે સત્વરં તોયં પાત્રમધ્યે ઘૃતં યથા ।
ક્રિમિભિઃ સઙ્કુલં પૂયં વજ્રતુણ્ડૈઃ સમાવૃતમ્ ॥ ૨,૪૭.૪॥

શિશુમારૈશ્ચ મકરૈર્વજ્રકર્તરિકાયુતૈઃ ।
અન્યૈશ્ચ જલજીવૈશ્ચ હિંસકૈર્માંસભેદિભિઃ ॥ ૨,૪૭.૫॥

ઉદ્યાન્તિ દ્વાદશાદિત્યાઃ પ્રલયાન્તે તથા હિ તે ।
તપન્તિ તત્ર વૈ મર્ત્યાઃ ક્રન્દ માનાસ્તુ પાપિનઃ ॥ ૨,૪૭.૬॥

હા ભ્રાતઃ પુત્ર તાતેતિ પ્રલપન્તિ મુહુર્મુહુઃ ।
વિચરન્તિ નિમજ્જન્તિ ગ્લાનિં ગચ્છન્તિ જન્તવઃ ॥ ૨,૪૭.૭॥

ચતુર્વિધૈઃ પ્રાણિગણૈર્દૃષ્ટા વ્યાપ્તા મહાનદી ।
તરન્તિ ગોપ્રદાનેન ત્વન્યથા ચ પતન્તિ તે ॥ ૨,૪૭.૮॥

માં નરા યેऽવમન્યન્તે ચાચાર્યં ગુરુમેવ ચ ।
વૃદ્ધાનન્યાંશ્ચાપિ મૂઢાસ્તેષાં વાસસ્તુ તત્ર વૈ ॥ ૨,૪૭.૯॥

પતિવ્રતાં સાધુશીલામૂઢાં ધર્મેષુ નિશ્ચલામ્ ।

પરિત્યજન્તિ યે મૂઢાસ્તેષાં વાસસ્તુ સન્તતમ્ ॥ ૨,૪૭.૧૦॥

વિશ્વાસપ્રતિપન્નાનાં સ્વામિમિત્રતપસ્વિનામ્ ।
સ્ત્રીબાલવિકલાદીનાં વધં કૃત્વા પતન્તિ હિ ।
પચ્યન્તે તત્ર મધ્યે તુ ક્રન્દમાનાસ્તુ પાપિનઃ ॥ ૨,૪૭.૧૧॥

શાન્તં બુભુક્ષિતં વિપ્રંયો વિઘ્નાયોપસર્પતિ ।
ક્રિમિભિર્ભક્ષ્યતે તત્ર યાવદાભૂતસમ્પ્લવમ્ ॥ ૨,૪૭.૧૨॥

બ્રાહ્મણાય પ્રતીશ્રુત્ય યમાર્થં ન દદાતિ તમ્ ।
આહૂય નાસ્તિ યો બ્રૂયાત્તસ્ય વાસસ્તુ તત્ર વૈ ॥ ૨,૪૭.૧૩॥

અગ્નિદો ગરદશ્ચૈવ કૂટસાક્ષી ચ મદ્યપઃ ।
યજ્ઞવિધ્વંસકશ્ચૈવ રાજ્ઞીગામી ચ પૈશુનઃ ॥ ૨,૪૭.૧૪॥

કથાભઙ્ગકરશ્ચૈવ સ્વયન્દત્તા પહારકઃ ।
ક્ષેત્રસેતુવિભેદી ચ પરદારપ્રધર્ષકઃ ॥ ૨,૪૭.૧૫॥

બ્રાહ્મણો રસવિક્રેતા તથા યો વૃષલીપતિઃ ।
ગોધનસ્ય તૃષાર્તસ્ય વાપ્યા ભેદં કરોતિ યઃ ॥ ૨,૪૭.૧૬॥

કન્યાવિદૂષકશ્ચૈવ દાનં દત્ત્વાનુતાપકઃ ।
શૂબદ્રસ્તુ કપિલાપાયી બ્રાહ્મણો માંસભોજનઃ ॥ ૨,૪૭.૧૭॥

એતે વસન્તિ સતતં મા વિચારં કૃથાઃ ક્વચિત્ ।
કૃપણો નાસ્તિકઃ ક્ષુદ્રઃ સ તસ્યાં નિવસેત્ખગ ॥ ૨,૪૭.૧૮॥

સદામર્ષો સદા ક્રોધી નિજવાક્યપ્રમાણકૃત્ ।
પરોક્ત્યુચ્છેદકો નિત્યં વૈતરણ્યા વસેચ્ચિરમ્ ॥ ૨,૪૭.૧૯॥

યસ્ત્વહઙ્કારવાન્પાપી સ્વવિકત્થનકારકઃ ।
કૃતઘ્નો ગર્ભસન્તાપી વૈતરણ્યાં સ મજ્જતિ ॥ ૨,૪૭.૨૦॥

કદાપિ ભાગ્યયોગેન તરણેચ્છા ભવેદ્યદિ ।
સાનુકૂલા ભવેદ્યેન તદાકર્ણય કાશ્યપ ॥ ૨,૪૭.૨૧॥

અયને વિષુવે પુણ્યે વ્યતીપાતે દિનોદયે ।
ચન્દ્રસૂર્યોપરાગે વા સંક્રાન્તૌ દર્શવાસરે ॥ ૨,૪૭.૨૨॥

અન્યેષુ પુણ્યકાલેષુ દીયતે દાનમુત્તમમ્ ।
યદા તદા ભવેદ્વાપિ શ્રાદ્ધા દાનં પ્રતિ ધ્રુવમ્ ॥ ૨,૪૭.૨૩॥

તદૈબ દાનકાલઃ સ્યાદ્યતઃ સમ્પત્તિરસ્થિરા ।
અનિત્યાનિ શરીરાણિ વિભવો નૈવ શાશ્વતઃ ॥ ૨,૪૭.૨૪॥

નિત્યં સન્નિહિતો મૃત્યુઃ કર્તવ્યો ધર્મસંગહઃ ।
કૃષ્ણાં વા પાટલાં વાપિ કુર્યાદ્વૈતરણીં શુભામ્ ॥ ૨,૪૭.૨૫॥

સ્વર્ણશ‌ૃઙ્ગીં રૌપ્યખુરાં કાંસ્યપાત્રોપદોહનીમ્ ।
કૃષ્ણવસ્ત્રયુગાચ્છન્નાં સપ્તધાન્યસમન્વિતામ્ ॥ ૨,૪૭.૨૬॥

કાર્પાસદ્રોણશિખરે આસીનં તામ્રભાજને ।
યમં હૈમં પ્રકુર્વીત લોહદણ્ડસમન્વિતમ્ ।
ઇક્ષુદણ્ડમયં બદ્ધ્વા પ્લવં સુદૃઢબન્ધનૈઃ ॥ ૨,૪૭.૨૭॥

ઉડુપોપરિ તાં ધેનું સૂર્યદેહસમુદ્ભવામ્ ।
કૃત્વા પ્રકલ્પયેદ્વિપ્રશ્છત્રોપાનહસંયુતમ્ ॥ ૨,૪૭.૨૮॥

અઙ્ગુલીયકવાસાંસિ બ્રાહ્મણાય નિવેદયેત્ ।
ઇમમુચ્ચારયેન્મન્ત્રં સંગૃહ્ય સજલાન્કુશાન્ ॥ ૨,૪૭.૨૯॥

યમદ્વારે મહાઘોરે શ્રુત્વા વૈતરણીં તદીમ્ ।
તર્તુકામો દદામ્યેનાં તુભ્યં વૈતરણીં નમઃ ॥ ૨,૪૭.૩૦॥

ગાવો મે અગ્રતઃ સન્તુ ગાવો મે સન્તુ પાર્શ્વતઃ ।
ગાવો મે હૃદયે સન્તુ ગવાં મધ્યે વસામ્યહમ્ ॥ ૨,૪૭.૩૧॥

વિષ્ણુરૂપ દ્વિજશ્રેષ્ઠ મામુદ્ધર મહીસુર ।
સદક્ષિણા મયા દત્તા તુભ્યં વૈતરણી નમઃ ॥ ૨,૪૭.૩૨॥

ધર્મરાજગ્ચ સર્વેશં વૈતરણ્યાખ્યધેનુકામ્ ।
સર્વં પ્રદક્ષિણીકૃત્ય બ્રાહ્મણાય નિવેદયેત્ ॥ ૨,૪૭.૩૩॥

પુચ્છં સંગૃહ્ય ધેન્વાશ્ચ અગ્રે કૃત્વા તુ વૈ વ્દિજમ્ ।
ધેનુકે ત્વં પ્રતીક્ષસ્વ યમદ્વારે મહાભયે ॥ ૨,૪૭.૩૪॥

ઉત્તારણાય દેવેશિ વૈતરણ્યે નમોઽસ્તુ તે ।
અનુવ્રજેત્તુ ગચ્છન્તં સર્વં તસ્ય ગૃહં નયેત્ ॥ ૨,૪૭.૩૫॥

એવં કૃતે વૈનતેય સા સરિત્સુતરા ભવેત્ ।
સર્વાન્કામાનવાપ્નોતિ યો દદ્યાદ્ભુવિ માનવઃ ॥ ૨,૪૭.૩૬॥

સુકૃતસ્ય પ્રભાવેણ સુખઞ્ચેહ પરત્ર ચ ।
સ્વસ્થે સહસ્રગુણિતમાતુરે શતસમિતમ્ ॥ ૨,૪૭.૩૭॥

મૃતસ્યૈવ તુ યદ્દાનં પરોક્ષે તત્સમં સ્મૃતમ્ ।
સ્વહસ્તેન તતો દેયં મૃતે કઃ કસ્ય દાસ્યતી ॥ ૨,૪૭.૩૮॥

દાનધર્મવિહીનાનાં કૃપણૈર્જીવેતક્ષિતૈઃ ।
અસ્થિરેણ શરીરેણ સ્થિરં કર્મ સમાચરેત્ ॥ ૨,૪૭.૩૯॥

અવશ્યમેવ યાસ્યન્તિ પ્રાણાઃ પ્રાઘુણિ (ઘૂર્ણિ) કા ઇવ ॥ ૨,૪૭.૪૦॥

ઇતીદમુક્તં તવ પક્ષિરાજ વિડમ્બનં જન્તુગણસ્ય સર્વમ્ ।
પ્રેતસ્ય મોક્ષાય તદૌદ્ધ્વન્દૈહિકં હિતાય લોકસ્ય ચરેચ્છુભાય તુ ॥ ૨,૪૭.૪૧॥

સૂત ઉવાચ ।
એવં વિપ્રાઃ સમાદિષ્ટો વિષ્ણુના પ્રભવિષ્ણુના ।
ગરુડ પ્રેતચરિતં શ્રુત્વા સન્તુષ્ટિમાગતઃ ॥ ૨,૪૭.૪૨॥

વ્રતતીર્થાદિકં સર્વં પુનઃ પપ્રચ્છ કેશવમ્ ।
ધ્યાત્વા મનસિ સર્વેશં સર્વકારણકારણમ્ ॥ ૨,૪૭.૪૩॥

ઋષયઃ સર્વમેવૈતજ્જન્તૂનાં પ્રભવાદિકમ્ ।
મરણં જન્મ ચ તથા પ્રેતત્વઞ્ચૌર્ધ્વદૈહિકમ્ ॥ ૨,૪૭.૪૪॥

મયા પ્રોક્તં વૈ મુક્ત્યૈ નિદાનં ચૈવ સર્વશઃ ।
લાભસ્તેષાં જયસ્તેષાં કુતસ્તેષાં પરાજયઃ ।
યેષામિન્દીવરશ્યામો હૃદયસ્થો જનાર્દનઃ ॥ ૨,૪૭.૪૫॥

ધર્મો જયતિ નાધર્મઃ સત્યં જયતિ નાનૃતમ્ ।
ક્ષમા જયતિ ન ક્રોધો વિષ્ણુર્જયતિ નાસુરાઃ ॥ ૨,૪૭.૪૬॥

વિષ્ણુર્માતા પિતા વિષ્ણુર્વિષ્ણુઃ સ્વજનબાન્ધવાઃ ।
યેષામેવ સ્થિરા બુદ્ધિર્ન તેષાં દુર્ગતિર્ભવેત્ ॥ ૨,૪૭.૪૭॥

મઙ્ગલં ભગવાન્વિષ્ણુર્મઙ્ગલં ગરુડધ્વજઃ ।
મઙ્ગલં પુણ્ડરીકાક્ષો મઙ્ગલાયતનં હરિઃ ॥ ૨,૪૭.૪૮॥

હરિર્ભાગીરથી વિપ્રા વિપ્રા ભાગીરથી હરિઃ ।
ભાગીરથી હરિર્વિપ્રાઃ સારમેતજ્જગત્રયે ॥ ૨,૪૭.૪૯॥

ઇતિ સૂતમુખોદ્ગીર્ણાં સર્વશાસ્ત્રાર્થમણ્ડિતામ્ ।

વૈષ્ણવિં વાક્સુધાં પીત્વા ઋષયસ્તુષ્ટિમાયયુઃ ॥ ૨,૪૭.૫૦॥

પ્રશશંસુસ્તથાન્યોન્યં સૂતં સર્વાર્થદર્શિનમ્ ।
પ્રહર્ષમતુલં પ્રાપુર્મુનયઃ શૌનકાદયઃ ॥ ૨,૪૭.૫૧॥

અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાં ગતોऽપિ વા ।
યઃ સ્મરેત્પુણ્ડરીકાક્ષં સ બાહ્યાભ્યન્તરં શુચિઃ ॥ ૨,૪૭.૫૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીદૃ ધર્મકાદૃપ્રેતદૃશ્રીકૃષ્ણગરુડસંવાદે
કર્મવિપાકાદિનિરૂપણં નામ સપ્તચત્વારિંશોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૮
તાર્ક્ષ્ય ઉવાચ ।
યે મર્ત્યલોકે નિવસન્તિ માનવાસ્તે સર્વજાતૌ નિધનં પ્રયાન્તિ ।
કાલે સ્વકીયે નિજપુણ્યસંખ્યયા વદન્તિ લાક કથસ્વ તન્મે ॥ ૨,૪૮.૧॥

ગચ્છન્તિ માર્ગેણ સુદુસ્તરેણ વિધાતૃનિષ્પાદિતવર્ત્મનિ સ્થિતાઃ ।
કેનૈવ પુણ્યેન મુદં પ્રયાન્તિ તિષ્ઠન્તિ કેનૈવ કુલં બલં વયઃ ॥ ૨,૪૮.૨॥

સૂત ઉવાચ ।
શ્રુત્વાથ દેવો ગરુડં ત્વવોચત્સ્મૃત્વા વપુઃ કર્મભયઞ્ચ રૂપમ્ ।
સૃષ્ટા ધરા યેન ચરાચરં જગત્સ યેન શસ્તા વિહિતો યમો વિભુઃ ॥ ૨,૪૮.૩॥

શ્રીભગવાનુવાચ ।
ધર્માર્થકામં ચિરમોક્ષસઞ્ચયમન્યં દ્વિતીયં યમમાર્ગગામિનામ્ ।
પ્રવિશ્યચાઙ્ગુષ્ઠસમે સ તત્ર વૈ તં પ્રાપ્ય દેહં સ્વમન્દિરમ્? ॥ ૨,૪૮.૪॥

ગૃહીતપાશો રુદતે પુનઃ પુનર્દેશે સુપુણ્યે દ્વિજ દેહસંસ્થિતઃ ।
દેવેન્દ્રપૂજા પિતૃદેવતૃપ્તિદં મોહાન્ન ચેષ્ટં ન ચ પુત્રસન્તતિઃ ॥ ૨,૪૮.૫॥

ન મેऽસ્તિ બન્ધુર્યમમાર્ગગામિનો મયા ન કૃત્યં દ્વિજદેહલિપ્સયા ।
સમ્પ્રાપ્ય વિપ્રત્વમતીવ દુર્લભં નાધીતવાન્વેદપુરાણસંહિતાઃ ।
પ્રાપ્તં સુરત્નં કરસંસ્થિતં ગતં દેહન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૪૮.૬॥

યઃ ક્ષત્રિયો બાહુબલેન સંયુગે લલાટદેશાદ્રુધિરં મુખે પપૌ ।
તત્સોમપાનં હિ કૃતં મહામખે જીવન્મૃતઃ સોऽપિ હિ યાતિ મુક્તિક્ ॥ ૨,૪૮.૭॥

સ્થાનાન્યનેકાનિ કૃતાનિ તાનિ પીતાન્યનેકાન્યપિ ગર્હિતાનિ ।

શસ્ત્રં ગૃહીત્વા સમરે રિપૂણાં યઃ સમુખં યાતિ સ મુક્તપાપઃ ॥ ૨,૪૮.૮॥

ક્ષત્રાન્વયો વાપિ વિશોન્વયો વા શૂદ્રાન્વયો વાપિ હિ નીચવર્ણઃ ।
સંગ્રામદેવદ્વિજબાલઘાતી સ્ત્રીવૃદ્ધહા દીનતપસ્વિહન્તા ॥ ૨,૪૮.૯॥

ઉપદ્રુતેષ્વેષુ પરાઙ્મુખો યઃ સ્યુસ્તસ્ય દેવાઃ સકલાઃ પરાઙ્મુખાઃ ।
તિલોદકં નૈવ પિબન્તિ પૂર્વે હુતં ન ગૃહ્ણાતિ હુતાશનોઽપિ તત્ ॥ ૨,૪૮.૧૦॥

દ્વેષાદ્ભયાદ્વા સમરે સમાગતે શસ્ત્રં ગૃહીત્વા પરસૈન્યસમુખઃ ।
ન યાતિ પક્ષીન્દ્ર મૃશ્ચ પશ્ચાત્ક્ષાત્રં બલં તસ્ય ગતં તથૈવ ।
દ્વિજાય દત્ત્વા કનકં મહીમિમાં ભૂયઃ સ પશ્ચાદ્ભવતીહ લોકે ॥ ૨,૪૮.૧૧॥

દાનં પ્રદત્તં ગ્રહણે દ્વિજેન્દ્રે સ્નાનં કૃતં તેન સદા સુતીર્થે ।
ગત્વા ગયાયાં પિતૃપિણ્ડદાનં કૃતં સદા યો મ્રિયતે તુ યુદ્ધે ॥ ૨,૪૮.૧૨॥

યઃ ક્ષાત્રદેહન્તુ વિહાય શોચતે રણાઙ્ગણે સ્વામિવધે ચ ગોગ્રહે ।
સ્ત્રીબાલઘાતે પથિ સાર્થહેતવે મયા સ્વકોશં ન હતં ન પાતિતમ્ ॥ ૨,૪૮.૧૩॥

વૈશ્યઃ સ્વકર્માણિ વિશોચતે તદા ગૃહીતપાશો ન મયાપિ સઞ્ચિતમ્ ।
સત્યં ન ચોક્તં ક્રય વિક્રયેણ મોહાદ્વિમૂઢેન કુટુમ્બહેતવે ॥ ૨,૪૮.૧૪॥

શૂદ્રં વપુઃ પ્રાપ્ય યશસ્કરં સદા દાનં દ્વિજેભ્યો ન કૃતં દ્વિજાર્ચનમ્ ।
ૠદ્દઘ્ત્દદ્વડ્ઢ ઢધ્દદૃશ્દદૃધ્ડ્ઢશ્ડ્ડ્ઢધ્દ
જલાશયો નૈવ કૃતો ધરાતલે અસંસ્કૃતો વિપ્રવરો ન સંસ્કૃતઃ ॥ ૨,૪૮.૧૫॥

ત્યક્ત્વા સ્વકર્માણિ મદેન સુસ્થિતં મયા સુતીર્થે સ્વવપુર્ન ચોજ્ઝિતમ્ ।
ધર્મોર્જિતો નૈવ ન દેવપૂજનં કૃતં મયા ચૈવ વિમુક્તિહેતવે ॥ ૨,૪૮.૧૬॥

દેહં સમાસાદ્ય તથૈવ પિણ્ડજં વર્ણાંસ્તથૈવાન્ત્યજમ્લેચ્છસંજ્ઞિતાન્ ।
મરુન્મયં દેહમિમે વિશન્તિ નૈવેહમાનાઃ પથિ ધર્મસંકુલે ॥ ૨,૪૮.૧૭॥

પરસ્પરં ધર્મકૃન્તં સ્વકીયં સમ્પાદ્ય લક્ષ્યં પથિ સઞ્ચરન્તસ્વમ્ ।
પક્ષીન્દ્ર વાક્યાનિ શૃણુષ્વ તાનિ મનોરમાણિ પ્રવદન્તિ યાનિ ॥ ૨,૪૮.૧૮॥

સારા હિ લોકેષુ ભવેત્રિલોકી દ્વીપેષુ સર્વેષુ ચ જમ્બુકાખ્યમ્ ।
દેશેષુ સર્વેષ્વપિ દેવદેશઃ જીવેષુ સર્વેષુ મનુષ્ય એવ ॥ ૨,૪૮.૧૯॥

વર્ણાશ્ચ ચત્વાર ઇહ પ્રશસ્તાઃ વર્ણેષુ ધર્મિષ્ઠનરાઃ પ્રશસ્તાઃ ।
ધર્મેણ સૌખ્યં સમુપૈતિ સર્વં જ્ઞાનં સમાપ્નોતિ મહાપથે સ્થિતઃ ॥ ૨,૪૮.૨૦॥

દેહં પરિત્યજ્ય યદા ગતાયુઃ પક્ષિન્સ્થિતોઽહં કૃમિકીટસંસ્થિતઃ ।

સરીસૃપોઽહં મશકો વિનિર્મિતશ્ચતુષ્પદોઽહં વનસૂકરોઽહમ્ ॥ ૨,૪૮.૨૧॥

સર્વં વિજાનાતિ હિ ગર્ભસંસ્થિતો જાતશ્ચ સદ્યસ્તદિદઞ્ચ વિસ્મરેત્ ।
યચ્ચિન્તિતં ગર્ભસમાગતેન વૈ બાલો યુવા વૃદ્ધવયા બભૂવ ॥ ૨,૪૮.૨૨॥

મોહાદ્વિનાષ્ટં યદિ ગર્ભચિન્તિતં સ્મૃતં પુનર્મૃત્યુગતે ચદેહે ।
તસ્મિન્પ્રનષ્ટે હૃદિ ચિન્તિતં ગતં સ્મૃતં પુનર્ગર્ભગતે ચ દેહે ॥ ૨,૪૮.૨૩॥

તસ્મિન્પ્રનષ્ટે હૃદિ ચિન્તિતં પુનર્મયા સ્વકોશે પરવઞ્ચનં કૃતમ્ ।
ધૂતૈશ્છલેનાપિ ચ ચૌર્યવૃત્ત્યા ધર્મં વ્યતિક્રમ્ય શરીરરક્ષણે ॥ ૨,૪૮.૨૪॥

કૃચ્છ્રેણ લક્ષ્મીઃ સમુપાર્જિતા સ્વયં મયા ન ભુક્તં મનસેપ્સિતં ધનમ્ ।
તામ્બૂલમન્નં મધુરં સગોરસં દત્ત્વાગ્નિદેવાતિથિબન્ધુવર્ગે ॥ ૨,૪૮.૨૫॥

સોમગ્રહે સૂર્યસમાગમેપિ વા ન સેવિતં તીર્થવરિષ્ઠમુત્તમમ્ ।
કોશં સ્વકીયં મલમૂત્રપૂરિતં દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૪૮.૨૬॥

મયા ન દૃષ્ટા ન નતા ન પૂજિતા ત્રૈવિક્રમી મૂર્તિરિહ સ્થિતા ભુવિ ।
પ્રભાસનાથો ન ચ ભક્તિસંસ્તુતો દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૪૮.૨૭॥

ગત્વા વરિષ્ઠે ભુવિ તીર્થસન્નિધૌ ધનં ન દત્તં વિદુષાં કરે મયા ।
આપ્લુત્ય દેહં વિધિના દ્વિજે ગુરૌ દિહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૪૮.૨૮॥

ન માતૃપૂજા ન ચ વિષ્ણુશઙ્કરૌ ગણેશચણ્ડ્યૌ ન ચ ભાસ્કરોઽપિ વા ।
યચ્ચોપચારૈર્બલિયુક્તચન્દનૈર્દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૪૮.૨૯॥

લબ્ધા મયા માનવદેવતોપમા મોહાદ્ધતા સર્વમિદઞ્ચ પાર્થિવ ।
ગતિં ન વીક્ષેત સ વૈ વિમૂઢધીર્દેહિન્ક્વચિન્નિસ્તર યત્ત્વયા કૃતમ્ ॥ ૨,૪૮.૩૦॥

એતાનિ પક્ષિન્મનસા વિચિન્ત્ય વાક્યાનિ ધર્માર્થયશસ્કરાણિ ।
મુક્તિં સમાયાન્તિ મનુષ્યલોકે વસન્તિ યે ધર્મરતાઃ સુદેશે ॥ ૨,૪૮.૩૧॥

ઇતિ બ્રુવાણૈર્યમધૂતવર્ગૈર્વિહન્યતે કાલમયૈશ્ચ મુદ્ગરૈઃ ।
હા દૈવ હા દૈવ ઇતિ સ્મરન્વૈ ધનં ન દત્તં સ્વયમર્જિતં યત્ ॥ ૨,૪૮.૩૨॥

ન ભૂમિદાનં ન ચ ગોપ્રદાનં ન વારિદાનં ન ચ વસ્ત્રદાનમ્ ।
ફલં સતામ્બૂલવિલેપનં વા ત્વયા ન દત્તં ભુવિ શોચસે કથમ્ ॥ ૨,૪૮.૩૩॥

પિતા મૃતસ્તે ચ પિતામહઃ સા યયા ધૃતો વાપ્યુદરે સ્વકીયે ।
મૃતોઽપ્યસૌ બન્ધુજનઃ સમસ્તો દૃષ્ટં ત્વયા સર્વમિદં ગતાયઃ ॥ ૨,૪૮.૩૪॥

કોશં ત્વદીયં જ્વલિતઞ્ચ વહ્નિના પુત્રૈર્ગૃહીતો ધનધાન્ય સઞ્ચયઃ ।
સુભાષિતં ધર્મચયં કૃતઞ્ચ યત્તદેવ ગચ્છેત્તવ પૃષ્ઠસંસ્થમ્ ॥ ૨,૪૮.૩૫॥

ન દૃશ્યતે કોઽપિ મૃતઃ સમાગતો રાજા યતિર્વા દ્વિજપુઙ્ગવોઽપિ વા ।
યો વૈ મૃતઃ સાહસિકઃ સ મર્ત્યકો નાશં યોઽપિ ધરાતલે સ્થિતઃ ॥ ૨,૪૮.૩૬॥

એવં ગણાસ્તે બ્રુવતે સકિન્નરા ધૈર્યં સમાલમ્બ્ય વિપાદપૂરિતઃ ।
શ્રુત્વા ગણાનાં વચનં મહાદ્ભુતં બ્રવીતિ પક્ષીન્દ્ર મનુષ્યતાં ગતઃ ॥ ૨,૪૮.૩૭॥

દાનપ્રભાવેણ વિમાનસંસ્થિતો ધર્મઃ પિતા માતૃદયાનુરૂપિણી ।
વાણી કલત્રં મધુરાર્થભાષિણી સ્નાનં સુતીર્થે ચ સુબન્ધવર્ગઃ ॥ ૨,૪૮.૩૮॥

કરાર્પિતં યત્સુકૃતં સમસ્તં સ્વર્ગસ્તદા સ્યાત્તવ કિઙ્કરોપમઃ ।
યો ધર્મવાન્પ્રાપ્સ્યતિ સોઽતિસૌખ્યં પાપી સમસ્તં વિવિધઞ્ચ દુઃખમ્ ॥ ૨,૪૮.૩૯॥

યો ધર્મશીલો જિતમાનરોષો વિદ્યાવિનીતો ન પરોપતાપી ।
સ્વદારતુષ્ટઃ પરદારદૂરઃસ વૈ નરો નો ભુવિ વન્દનીયઃ ॥ ૨,૪૮.૪૦॥

મિષ્ટાન્નદાતા ચરિતાગ્નિહોત્રો વેદાન્તવિચ્ચન્દ્રસહસ્રજીવી ।
માસોપવાસી ચ પતિવ્રતા ચષડ્જીવલોકે મમ વન્દનીયાઃ ॥ ૨,૪૮.૪૧॥

એવં સમાચારયુતો નરોઽપિ વાપીં સકૂપાં સજલં તડાગમ્ ।
પ્રપાશુભં હૃદ્ગૃહદેવમન્દિરં કૃતં નરેણૈવ સ ધર્મોત્તમઃ ॥ ૨,૪૮.૪૨॥

વર્ષાશનં વેદવિદે ચ દત્તં કન્યાવિવાહસ્ત્વૃણમોચનં દ્વિજે ।
ભૂમિઃ સુકૃષ્ટાપિ તૃષાર્તિહેતોસ્તદેવમેતં સુકૃતત્સમસ્તમ્ ॥ ૨,૪૮.૪૩॥

અધ્યાયમેનં સુકૃતસ્ય સારં શ◌ૃણોતિ ગાયત્યપિ ભાવશુદ્ધ્યા ।
સ વૈ કુલીનઃ સ ચ ધર્મયુક્તો વિશ્વાલયં યાતિ પરં સ નૂનમ્ ॥ ૨,૪૮.૪૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે શ્રીકૃષ્ણગરુડસંવાદે મનુષ્યસ્ય સુખદુઃખપ્રાપકધર્માધર્મનિરૂપણં નામાષ્ટચત્વારિંશત્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪૯

ગરુડ ઉવાચ ।

શ્રુતા મયા દયાસિન્ધો હ્યજ્ઞાનાજ્જીવસંસૃતિઃ ।

અધુના શ્રોતુમિચ્છામિ મોક્ષોપાયં સનાતનમ્ ॥ ૨,૪૯.૧॥

ભગવન્દેવદેવેશ શરણાગતવત્સલ ।

અસારે ઘોરસંસારે સર્વદુઃખમલીમસે ॥ ૨,૪૯.૨॥

નાનાવિધશરીરસ્થા અનન્તા જીવરાશયઃ ।
જાયન્તે ચ મ્રિયન્તે ચ તેષામન્તો ન વિદ્યતે ॥ ૨,૪૯.૩॥

સદા દુઃખાતુરા એવ ન સખી વિદ્યતે ક્કચિત્ ।
કેનોપાયેન મોક્ષેશ મુચ્યન્તે વદ મે પ્રભો ॥ ૨,૪૯.૪॥

શ્રીભગવાનુબાચ ।
શ‌ૃણુ તાર્ક્ષ્ય પ્રવક્ષ્યામિ યન્માં ત્વં પરિપૃચ્છસિ ।
યસ્ય શ્રવણમાત્રેણ સંસારાન્મુચ્યતે નરઃ ॥ ૨,૪૯.૫॥

અસ્તિ દેવઃ પરબ્રહ્મસ્વરૂપો નિષ્કલઃ શિવઃ ।
સર્વજ્ઞઃ સર્વકર્તા ચ સર્વેશો નિર્મલોઽદ્વયઃ ॥ ૨,૪૯.૬॥

સ્વયઞ્જ્યોતિરનાદ્યન્તો નિર્વિકારઃ પરાત્પરઃ ।
નિર્ગુણઃ સચ્ચિદાનન્દસ્તદંશા જીવસંજ્ઞકાઃ ॥ ૨,૪૯.૭॥

અનાદ્યવિદ્યોપહતા યથાગ્નૌ વિસ્ફુલિઙ્ગકાઃ ।
દેહાદ્યુપાધિસમ્ભિન્નાસ્તે કર્મભિરનાદિભિઃ ॥ ૨,૪૯.૮॥

સુખદુઃખપ્રદૈઃ પુણ્યપારૂપૈર્નિયન્ત્રિતાઃ ।
તત્તજ્જાતિયુતં દેહમાયુર્ભોગઞ્ચ કર્મજમ્ ॥ ૨,૪૯.૯॥

પ્રતિજન્મ પ્રપદ્યન્તે તેષામપિ પરં પુનઃ ।
સસૂક્ષ્મલિઙ્ગશરીરમામોક્ષાદક્ષરં ખગ ॥ ૨,૪૯.૧૦॥

સ્થાવરાઃ કૃમયશ્ચાજાઃ પક્ષિણઃ પશવો નગઃ ।
ધાર્મિકાસ્ત્રિદશાસ્તદ્વન્મોક્ષિણશ્ચ યથાક્રમમ્ ॥ ૨,૪૯.૧૧॥

ચતુર્વિધશરીરાણિ ધૃત્વા મુક્ત્વા સહસ્રશઃ ।
સુકૃતાન્મા નવો ભૂત્વા જ્ઞાની ચેન્મોક્ષમાપ્નુયાત્ ॥ ૨,૪૯.૧૨॥

ચતુરશીતિલક્ષેષુ શરીરેષુ શરીરિણામ્ ।
ન માનુષં વિનાન્યત્ર તત્ત્વજ્ઞાનન્તુ લભ્યતે ॥ ૨,૪૯.૧૩॥

અત્ર જન્મસહસ્રાણાં સહસ્રૈરપિ કોટિભિઃ ।
કદાચિલ્લભતે જન્તુર્માનુષ્યં પુણ્યસઞ્ચયાત્ ॥ ૨,૪૯.૧૪॥

સોપાનભૂતં મોક્ષસ્ય માનુષ્યં પ્રાપ્ય દુર્લભમ્ ।
યસ્તાર યતિ નાત્માનં તસ્માત્પાપતરોઽત્ર કઃ ॥ ૨,૪૯.૧૫॥

નરઃ પ્રાપ્યેતરજ્જન્મ લબ્ધ્વા ચેન્દ્રિયસૌષ્ઠવમ્ ।
ન વેત્ત્યાત્મહિતં યસ્તુ સ ભવેદ્બ્રહ્મઘાતકઃ ॥ ૨,૪૯.૧૬॥

વિના દેહેન કસ્યાપિ પુરુષાર્થો ન વિદ્યતે ।
તસ્માદ્દેહં ધનં રક્ષેત્પુણ્યકર્માણિ સાધયેત્ ॥ ૨,૪૯.૧૭॥

રક્ષેચ્ચસર્વદાત્માનમાત્મા સર્બ્વસ્ય ભાજનમ્ ।
રક્ષણે યત્નમાતિષ્ઠેજ્જીવન્ભદ્રાણિ પશ્યતિ ॥ ૨,૪૯.૧૮॥

પુનર્ગ્રામઃ પુનઃ ક્ષેત્ર પુનર્વિત્તં પુનર્ગૃહમ્ ।
પુનઃ શુભાશુભં કર્મ ન શરીરં પુનઃ પુનઃ ॥ ૨,૪૯.૧૯॥

શરીરરક્ષણોપાયાઃ ક્રિ યન્તે સર્વદા બુધૈઃ ।
નેચ્છન્તિ ચ પુનસ્ત્યાગમપિ કુષ્ઠાદિરોગિણઃ ॥ ૨,૪૯.૨૦॥

તદ્ગોપિતં સ્યાદ્ધર્માર્થં ધર્મો જ્ઞાનાર્થમેવ ચ ।
જ્ઞાનં તુ ધ્યાનયોગાર્થમચિરાત્પ્રવિમુચ્યતે ॥ ૨,૪૯.૨૧॥

આત્મૈવ યદિ નાત્માનમહીતેભ્યો નિવારયેત્ ।
કોઽન્યો હિતકરસ્તસ્માદાત્માનં સુખયિષ્યતિ ॥ ૨,૪૯.૨૨॥

ઇહૈવ નરકવ્યાધેશ્ચિકિત્સાં ન કરોતિ યઃ ।
ગત્વા નિરૌષધં દેશં વ્યાધિસ્થઃ કિં કરિષ્યતિ ॥ ૨,૪૯.૨૩॥

વ્યાઘ્રીવાસ્તે જરા ચાયુર્યાતિ ભિન્નઘટામ્બુવત્ ।
નિઘ્નન્તિ રિપુવદ્રોગાસ્તસ્માચ્છ્રેયઃ સમભ્યસેત ॥ ૨,૪૯.૨૪॥

યાવન્નાશ્રયતે દુઃખં યાવન્નાયાન્તિ ચાપદઃ ।
યાવન્નેન્દ્રિયવૈકલ્યં તાવચ્છ્રેયઃ સમભ્યસેત્ ॥ ૨,૪૯.૨૫॥

યાવત્તિષ્ઠતિ દેહોઽયં તાવત્તત્ત્વં સમભ્યસેત્ ।
સન્દીપ્તકોશભવને કૂપં ખનતિ દુર્મતિઃ ॥ ૨,૪૯.૨૬॥

કાલો ન જ્ઞાયતે નાનાકાર્યૈઃ સંસારસમ્ભવૈઃ ।
સુખં દુઃખં જનો હન્ત ન વેત્તિ હિતમાત્મનઃ ॥ ૨,૪૯.૨૭॥

જાતાનાર્તાન્મૃતાનાપદ્ભ્રષ્ટાન્દૃષ્ટ્વા ચ દુઃખિતાન્ ।
લોકો મોહસુરાં પીત્વા ન બિભેતિ કદાચન ॥ ૨,૪૯.૨૮॥

સમ્પદઃ સ્વપ્નસંકાશા યૌવનં કુસુમોપમમ્ ।

તડિચ્ચપલમાયુષ્યં કસ્ય સ્યાજ્જાનતો ધૃતિઃ ॥ ૨,૪૯.૨૯॥

શતં જીવિતમત્યલ્પં નિદ્રાલસ્યૈસ્તદર્ધકમ્ ।
બાલ્યરોગજરાદુઃખૈરલ્પં તદપિ નિષ્ફલમ્ ॥ ૨,૪૯.૩૦॥

પ્રારબ્ધવ્યે નિરુદ્યોગી જાગર્તવ્યે પ્રસુપ્તકઃ ।
વિશ્વસ્તશ્ચ ભયસ્થાને હા નરઃ કો ન હન્યતે ॥ ૨,૪૯.૩૧॥

તોયફેનસમે દેહે જીવેનાક્રમ્ય સંસ્થિતે ।
અનિત્યાપ્રયસવાસે કથ તિષ્ઠતિ નિર્ભયઃ ॥ ૨,૪૯.૩૨॥

અહિતે હિતસંજ્ઞઃ સ્યાદધ્રુવે ધ્રુવસંજ્ઞકઃ ।
અનર્થે ચાર્થવિજ્ઞાનઃ સ્વમર્થં યો ન વેત્તિ સઃ ॥ ૨,૪૯.૩૩॥

પશ્યન્નપિ પ્રસ્ખલતિ શ◌ૃણ્વન્નપિ ન બુધ્યતિ ।
પઠન્નપિ ન જાનાતિ દેવમાયાવિમોહિતઃ ॥ ૨,૪૯.૩૪॥

તન્નિમજ્જજ્જગદિદં ગમ્ભીરે કાલસાગરે ।
મૃત્યુરોગજરાગ્રાહૈર્ન કશ્ચિદપિ બુધ્યતે ॥ ૨,૪૯.૩૫॥

પ્રતિક્ષણભયં કાલઃ ક્ષીયમાણો ન લક્ષ્યતે ।
આમકુંભ ઇવાંભઃ સ્થો વિશીર્ણો ન વિભાવ્યતે ॥ ૨,૪૯.૩૬॥

યુજ્યતે વેષ્ટનં વાયોરાકાશસ્ય ચ ખણ્ડનમ્ ।
ગ્રથનઞ્ચ તરઙ્ગાણામાસ્થા નાયુષિ યુજ્યતે ॥ ૨,૪૯.૩૭॥

પૃથિવી દહ્યતે યેન મેરુશ્ચાપિ વિશીર્યતે ।
શુષ્યતે સાગરજલં શરીરસ્ય ચ કા કથા ॥ ૨,૪૯.૩૮॥

અપત્યં મે કલત્રં મે ધનં મે બાન્ધવાશ્ચ મે ।
જલ્પન્તમિતિ મર્ત્યાજં હન્તિ કાલવૃકો બલાત્ ॥ ૨,૪૯.૩૯॥

ઇદં કૃતમિદં કાર્યમિદમન્યત્કૃતાકૃતમ્ ।
એવમીહાસમાયુક્તં કૃતાન્તઃ કુરુતે વશમ્ ॥ ૨,૪૯.૪૦॥

શ્વઃ કાર્યમદ્ય કુર્વીત પૂર્વાહ્ને ચાપરાહ્નિકમ્ ।
ન હિ મૃત્યુઃ પ્રતીક્ષેત કૃતં વાપ્યથ વાકૃતમ્ ॥ ૨,૪૯.૪૧॥

જરાદર્શિતપન્થાનં પ્રચણ્ડવ્યાધિસૈનિકમ્ ।
અધિષ્ઠિતો મૃત્યુશત્રું ત્રાતારં કિં ન પશ્યતિ ॥ ૨,૪૯.૪૨॥

તૃષ્ણાસૂચીવિનિર્ભિન્નં સિક્તં વિષયસર્પિષા ।
રાગદ્વેષાનલે પક્વં મૃત્યુરશ્નાતિ માનવમ્ ॥ ૨,૪૯.૪૩॥

બાલાંશ્ચ યૌવનસ્થાંશ્ચ વૃદ્ધાન ગર્ભગતાનપિ ।
સર્વાનાવિશતે મૃત્યુરેવમ્ભૂમિદં જગત્ ॥ ૨,૪૯.૪૪॥

સ્વદેહમપિ જીવોઽયં મુક્ત્વા યાતિ યમાલયમ્ ।
સ્ત્રીમાતૃપિતૃપુત્રાદિસમ્બન્ધઃ કેન હેતુના ॥ ૨,૪૯.૪૫॥

દુઃખમૂલં હિ સંસારઃ સ યસ્યાસ્તિ સ દુઃખિતઃ ।
તસ્ય ત્યાગઃ કૃતો યેન સ સુખી નાપરઃ ક્વચિત્ ॥ ૨,૪૯.૪૬॥

પ્રભવં સર્વદુઃખાનામાલયં સકલાપદામ્ ।
આશ્રયં સર્વપાપાનાં સંસારં વર્જયેત્ક્ષણાત્ ॥ ૨,૪૯.૪૭॥

લોહદારુમયૈઃ પાશૈઃ પુમાન્બદ્ધો વિમુચ્યતે ।
પુત્રદારમયૈઃ પાશૈર્મુચ્યતે ન કદાચન ॥ ૨,૪૯.૪૮॥

યાવતઃ કુરુતે જન્તુઃ સમ્બન્ધાન્મનસઃ પ્રિયાન્ ।
તાવન્તોઽસ્ય નિખન્યન્તે હૃદયે શોકશઙ્કવઃ ॥ ૨,૪૯.૪૯॥

વઞ્ચિતાશેષવિત્તૈસ્તૈર્નિત્યં લોકો વિનાશિતઃ ।
હા હન્ત વિષયાહારૈર્દેહસ્થેન્દ્રિયતસ્કરૈઃ ॥ ૨,૪૯.૫૦॥

માંસલુબ્ધો યથા મત્સ્યો લોહશઙ્કું ન પશ્યતિ ।
સુખલુબ્ધસ્તથા દેહી યમબાધાં ન પશ્યતિ ॥ ૨,૪૯.૫૧॥

હિતાહિતં ન જાનન્તો નિત્યમુન્માર્ગગામિનઃ ।
કુક્ષિપૂરણનિષ્ઠા યે તે નરા નારકાઃ ખગ ॥ ૨,૪૯.૫૨॥

નિદ્રાભીમૈથુનાહારાઃ સર્વેષાં પ્રાણિનાં સમાઃ ।
જ્ઞાનવાન્માનવઃ પ્રોક્તો જ્ઞાનહીનઃ પશુઃ સ્મૃતઃ ॥ ૨,૪૯.૫૩॥

પ્રભાતે મલમૂત્રાભ્યાં ક્ષુત્તૃડ્ભ્યાં મધ્યગે રવૌ ।
રાત્રૌ મદનનિદ્રાભ્યાં બાધ્યન્તે મૂઢમાનવાઃ ॥ ૨,૪૯.૫૪॥

સ્વદેહધનદારાદિનિરતાઃ સર્વજન્તવઃ ।
જાયન્તે ચ મ્રિયન્તે ચ હા હન્તાજ્ઞાનમોહિતાઃ ॥ ૨,૪૯.૫૫॥

તસ્માત્સઙ્ગઃ સદા ત્યાજ્યઃ સચેત્ત્યક્તું ન શક્યતે ।
મહદ્ભિઃ સહ કર્તવ્યઃ સન્તઃ સઙ્ગસ્ય ભેષજમ્ ॥ ૨,૪૯.૫૬॥

સત્સઙ્ગશ્ચ વિવેકશ્ચ નિર્મલં નયનદ્વયમ્ ।
યસ્ય નાસ્તિ નરઃ સોઽન્ધઃ કથં ન સ્યાદમાર્ગગઃ ॥ ૨,૪૯.૫૭॥

સ્વસ્વવર્ણાશ્રમાચારનિરતાઃ સર્વમાનવાઃ ।
ન જાનન્તિ પરં ધર્મં વૃથા નશ્યન્તિ દામ્ભિકાઃ ॥ ૨,૪૯.૫૮॥

કિમાયાસપરાઃ કેચિદ્વ્રતચર્યાદિસંયુતાઃ ।
અજ્ઞાનસંવૃતાત્માનઃ સઞ્ચરન્તિ પ્રચારકાઃ ॥ ૨,૪૯.૫૯॥

નામમાત્રેણ સન્તુષ્ટાઃ કર્મકાણ્ડરતા નરાઃ ।
મન્ત્રોચ્ચારણહોમાદ્યૈર્ભ્રામિતાઃ ક્રતુવિસ્તરૈઃ ॥ ૨,૪૯.૬૦॥

એકભુક્તોપવાસાદ્યૈર્નિયમૈઃ કાયશોષણૈઃ ।
મૂઢાઃ પરોક્ષમિચ્છન્તિ મમ માયાવિમોહિતાઃ ॥ ૨,૪૯.૬૧॥

દેહદણ્ડનમાત્રેણ કા મુક્તિરવિવેકિનામ્ ।
વલ્મીકતાડનાદેવ મૃતઃ કિન્નુ મહોરગઃ ॥ ૨,૪૯.૬૨॥

જટાભારાજિનૈર્યુક્તા દામ્ભિકા વેષધારિણઃ ।
ભ્રમન્તિ જ્ઞાનિવલ્લોકે ભ્રામયન્તિ જનાનપિ ॥ ૨,૪૯.૬૩॥

સંસારજસુખાસક્તં બ્રહ્મજ્ઞોઽસ્મીતિવાદિનમ્ ।
કર્મબ્રહ્મોભયભ્રષ્ટં તં ત્યજેદન્ત્યજં યથા ॥ ૨,૪૯.૬૪॥

ગૃહારણ્યસમા લોકે ગતવ્રીડા દિગમ્બરાઃ ।
ચરન્તિ ગર્દભાદ્યાશ્ચ વિરક્તાસ્તે ભવન્તિ કિમ્ ॥ ૨,૪૯.૬૫॥

મૃદ્ભસ્મોદ્ધૂલનાદેવ મુક્તાઃ સ્યુર્યદિ માનવાઃ ।
મૃદ્ભસ્મવાસી નિત્યં શ્વા સ કિં મુક્તો ભવિષ્યતિ ॥ ૨,૪૯.૬૬॥

તૃણપર્ણોદકાહારાઃ સતતં વનવાસિનઃ ।
જમ્બૂકાખુમૃગાદ્યાશ્ચ તાપસાસ્તે ભવન્તિ કિમ્ ॥ ૨,૪૯.૬૭॥

આજન્મમરણાન્તઞ્ચ ગઙ્ગાદિતટિનીસ્થિતાઃ ।
મણ્ડૂકમત્સ્યપ્રમુખા યોગિનસ્તે ભવન્તિ કિમ્ ॥ ૨,૪૯.૬૮॥

પારાવતાઃ શિલાહારાઃ કદાચિદપિ ચાતકાઃ ।
ન પિબન્તિ મહીતોયં વ્રતિનસ્તે ભવન્તિ કિમ્ ॥ ૨,૪૯.૬૯॥

તસ્માન્નિત્યાદિકં કર્મ લોકરઞ્જનકારકમ્ ।

મોક્ષસ્ય કારણં સાક્ષાતત્ત્વજ્ઞાન ખગેશ્વર ॥ ૨,૪૯.૭૦॥

ષર્દ્શનમહાકૂપે પતિતાઃ પશવઃ ખગ ।
પરમાર્થં ન જાનન્તિ પશુપાશનિયન્ત્રિતાઃ ॥ ૨,૪૯.૭૧॥

વેદશાસ્ત્રાર્ણવૈર્ઘોરૈરુહ્યમાના ઇતસ્તતઃ ।
ષડૂર્મિનિગ્રહગ્રસ્તાસ્તિષ્ઠન્તિ હિ કુતાર્કિકાઃ ॥ ૨,૪૯.૭૨॥

વેદાગમપુરાણજ્ઞઃ પરમાર્થં ન વેત્તિ યઃ ।
વિડમ્બકસ્ય તસ્યૈવ તત્સર્વં કાકભાષિતમ્ ॥ ૨,૪૯.૭૩॥

ઇદં જ્ઞાનમિદં જ્ઞેયમિતિ ચિન્તાસમાકુલાઃ ।
પઠન્ત્યહર્નિશં શાસ્ત્રં પરતત્ત્વપરાઙ્મુખાઃ ॥ ૨,૪૯.૭૪॥

વાક્યચ્છન્દોનિબન્ધેન કાવ્યાલઙ્કારશોભિતાઃ ।
ચિન્તયા દુઃખિતા મૂઢાસ્તિષ્ઠન્તિ વ્યાકુલેન્દ્રિયાઃ ॥ ૨,૪૯.૭૫॥

અન્યથા પરમં તત્ત્વં જનાઃ ક્લિશ્યન્તિ ચાન્યથા ।
અન્યથા શાસ્ત્રસદ્ભાવો વ્યાખ્યાં કુર્વન્તિ ચાન્યથા ॥ ૨,૪૯.૭૬॥

કથયન્ત્યુવન્મનીભાવં સ્વયં નાનુભવન્તિ ચ ।
અહઙ્કારસ્તાઃ કેચિદુપદેશાદિવાર્જિતાઃ ॥ ૨,૪૯.૭૭॥

પઠન્તિ વેદશાસ્ત્રાણિ બોધયન્તિ પરસ્પરમ્ ।
ન જાનન્તિ પરં તત્ત્વં દર્વી પાકરસં યથા ॥ ૨,૪૯.૭૮॥

શિરો વહતિ પુષ્પાણિ ગન્ધં જાનાતિ નાસિકા ।
પઠન્તિ વેદશાસ્ત્રાણિ દુર્લભો ભાવબોધકઃ ॥ ૨,૪૯.૭૯॥

તત્ત્વમાત્મસ્થમજ્ઞાત્વા મૂઢઃ શાસ્ત્રેષુ મુહ્યતિ ।
ગોપઃ કક્ષાગતે ચ્છાગે કૂપં પશ્યતિ દુર્મતિઃ ॥ ૨,૪૯.૮૦॥

સંસારમોહનાશાય શાબ્દબોધો ન હિ ક્ષમઃ ।
ન નિવર્તેત તિમિરં કદાચિદ્દીપવાર્તયા ॥ ૨,૪૯.૮૧॥

પ્રજ્ઞાહીનસ્ય પઠનં યથાન્ધસ્ય ચ દર્પણમ્ ।
અતઃ પ્રજ્ઞાવતાં શાસ્ત્રં તત્ત્વજ્ઞાનસ્ય લક્ષણમ્ ॥ ૨,૪૯.૮૨॥

ઇદં જ્ઞાનમિદં જ્ઞેયં સર્વન્તુ શ્રોતુમિચ્છતિ ।
દિવ્યવર્ષસહસ્રાચ્ય શાસ્ત્રાન્તં નૈવ ગચ્છતિ ॥ ૨,૪૯.૮૩॥

અનેકાનિ ચ શાસ્ત્રાણિ સ્વલ્પાયુર્વિઘ્નકોટયઃ ।
તસ્માત્સારં વિજાનીયાત્ક્ષીરં હંસ ઇવામ્ભસિ ॥ ૨,૪૯.૮૪॥

અભ્યસ્ય વેદશાસ્ત્રાણિ તત્ત્વં જ્ઞાત્વાથ બુદ્ભિમાન્ ।
પલાલમિવ ધાન્યાર્થી સર્વશાસ્ત્રાણિ સન્ત્યજેત્ ॥ ૨,૪૯.૮૫॥

યથામૃતેન તૃપ્તસ્ય નાહારેણ પ્રયોજનમ્ ।
તત્ત્વજ્ઞસ્ય તથા તાર્ક્ષ્ય ન શાસ્ત્રેણ પ્રયોજનમ્ ॥ ૨,૪૯.૮૬॥

ન વેદાધ્યયનાન્મુક્તિર્ન શાસ્ત્રપઠનાદપિ ।
જ્ઞાનાદેવ હિ કૈવલ્યં નાન્યથા વિનતાત્મજઃ ॥ ૨,૪૯.૮૭॥

નાશ્રમઃ કારણં મુક્તેર્દર્શનાનિ ન કારણમ્ ।
તથૈવ સર્વકર્માણિ જ્ઞાનમેવ હિ કારણમ્ ॥ ૨,૪૯.૮૮॥

મુક્તિદા ગુરુવાગેકા વિદ્યાઃ સર્વા વિડમ્બિકાઃ ।
શાસ્ત્રભારસહસ્રેષુ હ્યેકં સઞ્જીવનં પરમ્ ॥ ૨,૪૯.૮૯॥

અદ્વૈતં હિ શિવં પ્રોક્તં ક્રિયયાપરિવર્જિતમ્ ।
ગુરુવક્ત્રેણ લભ્યેત નાધીતાગમકોટિભિઃ ॥ ૨,૪૯.૯૦॥

આગમોક્તં વિવેકોત્થં દ્વિધા જ્ઞાનં પ્રચક્ષતે ।
શબ્દબ્રહ્માગમમયં પરં બ્રહ્મ વિવેકજમ્ ॥ ૨,૪૯.૯૧॥

અદ્વૈતં કેચિદિચ્છન્તિ દ્વૈતમિચ્છન્તિ ચાપરે ।
સમં તત્ત્વં ન જાનન્તિ દ્વૈતાદ્વૈતવિવર્જિતમ્ ॥ ૨,૪૯.૯૨॥

દ્વે પદે બન્ધમોક્ષાય નમમેતિ મમેતિ ચ ।
મમેતિ બધ્યતે જન્તુર્નમમેતિ પ્રમુચ્યતે ॥ ૨,૪૯.૯૩॥

તત્કર્મ યન્ન બન્ધાય સા વિદ્યા યા વિમુક્તિદા ।
આયાસાયાપરં કર્મ વિદ્યાન્યા શિલ્પનૈપુણમ્ ॥ ૨,૪૯.૯૪॥

યાવત્કર્માણિ દીપ્યન્તે યાવત્સંસારવાસના ।
યાવદિન્દ્રિયચાપલ્યં તાવત્તત્ત્વકથા કુતઃ ॥ ૨,૪૯.૯૫॥

યાવદ્દેહાભિમાનશ્ચ મમતા યાવદેવ હિ ।
યાવત્પ્રયત્નવેગોઽસ્તિ યાવત્સંકલ્પકલ્પના ॥ ૨,૪૯.૯૬॥

યાવન્નો મનસઃ સ્થૈર્યં ન યાવચ્છાસ્ત્રચિન્તનમ્ ।
યાવન્ન ગુરુકારુણ્યં તાવત્તત્ત્વકથા કુતઃ ॥ ૨,૪૯.૯૭॥

તાવત્તપો વ્રતં તીર્થં જપહોમાર્ચનાદિકમ્ ।
વેદશાસ્ત્રાગમકથા યાવત્તત્ત્વં ન વિન્દતિ ॥ ૨,૪૯.૯૮॥

તસ્માત્સર્વપ્રયત્નેન સર્વાવસ્થાસુ સર્વદા ।
તત્ત્વનિષ્ઠો ભવેત્તાર્ક્ષ્ય યદીચ્છેન્મોક્ષમાત્મનઃ ॥ ૨,૪૯.૯૯॥

ધર્મજ્ઞાનપ્રસૂનસ્ય સ્વર્ગમોક્ષફલસ્ય ચ ।
તાપત્રયાદિસન્તપ્તશ્છાયાં મોક્ષતરોઃ શ્રયેત્ ॥ ૨,૪૯.૧૦૦॥

તસ્માજ્જ્ઞાનેનાત્મતત્ત્વં વિજ્ઞેયં શ્રીગુરોર્મુખાત્ ।
સુખેન મુચ્યતે જન્તુર્ઘોરસંસારબન્ધનાત્ ॥ ૨,૪૯.૧૦૧॥

તત્ત્વજ્ઞસ્યાન્તિમં કૃત્યં શ‌ૃણુ વક્ષ્યામિ તેઽધુના ।
યેન મોક્ષમવાપ્નોતિ બ્રહ્મ નિર્વાણસંજ્ઞકમ્ ॥ ૨,૪૯.૧૦૨॥

અન્તકાલે તુ પુરુષ આગતે ગતસાધ્વસઃ ।
છિન્દ્યાદસંગશસ્ત્રેણ સ્પૃહાં દેહેઽનુ યા ચ તમ્ ॥ ૨,૪૯.૧૦૩॥

ગૃહાત્પ્રવ્રાજિતો ધીરઃ પુણ્યતીર્થજલાપ્લુતઃ ।
શુચૌ વિવિક્ત આસીનો વિધિવત્કલ્પિતાસને ॥ ૨,૪૯.૧૦૪॥

અભ્યસેન્મનસા શુદ્ધં ત્રિવૃદ્બ્રહ્માક્ષરં પરમ્ ।
મનો યચ્છેજ્જિતશ્વાસો બ્રહ્મ બીજમવિસ્મરન્ ॥ ૨,૪૯.૧૦૫॥

નિયચ્છેદ્વિષયેભ્યોઽક્ષાન્મનસા બુદ્ધિ સારથિઃ ।
મનઃ કર્મભિરાક્ષિપ્તં શુભાર્થે ધારયેદ્ધિયા ॥ ૨,૪૯.૧૦૬॥

અહં બ્રહ્મ પરં ધામ બ્રહ્માહં પરમં પદમ્ ।
એવં સમીક્ષ્ય ચાત્માનમાત્મન્યાધાય નિષ્કલે ॥ ૨,૪૯.૧૦૭॥

ઓમિત્યેકાક્ષરં બ્રહ્મ વ્યાહરન્મામનુસ્મરન્ ।
યઃ પ્રયાતિ ત્યજન્દેહં સ યાતિ પરમાં ગતિમ્ ॥ ૨,૪૯.૧૦૮॥

ન યત્ર દામ્ભિકા યાન્તિ જ્ઞાનવૈરાગ્યવર્જિતાઃ ।
સુધિયસ્તાં ગતિં યાન્તિ તાનહં કથયામિ તે ॥ ૨,૪૯.૧૦૯॥

નિર્માનમોહા જિતસંગદોષા અધ્યાત્મનિત્યા વિનિવૃત્તકામાઃ ।
દ્વન્દ્વૈર્વિમુક્તાઃ સુખદુઃખસંજ્ઞૈર્ગચ્છન્ત્યમૂઢાઃ પદમવ્યયં તત્ ॥ ૨,૪૯.૧૧૦॥

જ્ઞાનહ્રદે સત્યજલે રાગદ્વેષમલાપહે ।

યઃ સ્નાતિ માનસે તીર્થે સ વૈ મોક્ષમવાપ્નુયાત્ ॥ ૨,૪૯.૧૧૧॥

પ્રૌઢવૈરાગ્યમાસ્થાય ભજતે મામનન્યભાક્ ।
પૂર્ણદૃષ્ટિઃ પ્રસન્નાત્મા સ વૈ મોક્ષમવાપ્નુયાત્ ॥ ૨,૪૯.૧૧૨॥

ત્યક્ત્વા ગૃહં ચ યસ્તીર્થે નિવસેન્મરણોત્સુકઃ ।
મુક્તિક્ષેત્રેષુ મ્રિયતે સ વૈ મોક્ષમવાપ્નુયાત્ ॥ ૨,૪૯.૧૧૩॥

અયોધ્યા મથુરા માયા કાશી કાઞ્ચી અવન્તિક ।
પુરી દ્વારવતી જ્ઞેયાઃ સપ્તૈતા મોક્ષદાયિકાઃ ॥ ૨,૪૯.૧૧૪॥

ઇતિ તે કથિતં તાર્ક્ષ્ય મોક્ષધર્મં સનાતનમ્ ।
જ્ઞાનવૈરાગ્યસહિતં શ્રુત્વા મોક્ષમવાપ્નુયાત્ ॥ ૨,૪૯.૧૧૫॥

મોક્ષં ગચ્છન્તિ તત્ત્વજ્ઞા ધાર્મિકાઃ સ્વર્ગતિં નરાઃ ।
પાપિનો દુર્ગતિં યાન્તિ સંસરન્તિ ખગાદયઃ ॥ ૨,૪૯.૧૧૬॥

સૂત ઉવાચ ।
સ્વપ્રશ્નોત્તરરાદ્ધાન્તમેવં ભગવતો મુખાત્ ।
શ્રુત્વા હૃષ્ટતનુસ્તાર્ક્ષ્યો નનામ જગદીશ્વરમ્ ॥ ૨,૪૯.૧૧૭॥

સન્દેહો મે મહાન્નષ્ટો ભવદ્વાક્યવિરોચનાત્ ।
ઇત્યુક્ત્વા વિષ્ણુમામન્ત્ર્ય સ ગતઃ કશ્યપાશ્રમમ્ ॥ ૨,૪૯.૧૧૮॥

સદ્યો દેહાન્તરં યાતિ યથા યાતિ વિલમ્બતઃ ।
અનયોરુભયોશ્ચૈવ ન વિરોધસ્તથૈવ વઃ ॥ ૨,૪૯.૧૧૯॥

સર્વમાખ્યાતવાંસ્તાત શ્રુતો ભગવતો યથા ।
મારીચોઽપિ મુદં લેભે શ્રુત્વા વાક્યં રમાપતેઃ ॥ ૨,૪૯.૧૨૦॥

અપાકૃતસ્તુ સન્દેહો બ્રાહ્મણા ભવતાં મયા ।
ઉક્તં સુપર્ણસંજ્ઞન્તુ પુરાણં પરમાદ્ભુતમ્ ॥ ૨,૪૯.૧૨૧॥

ઇદમાપ હરેસ્તાર્ક્ષ્યસ્તાર્ક્ષ્યાદાપ તતો ભૃગુઃ ।
ભૃગોર્વસિષ્ઠઃ સમ્પ્રાપ વામદેવસ્તતઃ પુનઃ ॥ ૨,૪૯.૧૨૨॥

પરાશરમુનિઃ પ્રાપ તસ્માદ્વ્યાસસ્તતો હ્યહમ્ ।
મયા તુ ભવતાં પ્રોક્તં પરં ગુહ્યં હરેરિદમ્ ॥ ૨,૪૯.૧૨૩॥

ય ઇદં શ‍ૃણુયાન્મર્ત્યો યો વાપ્યભિદધાતિ ચ ।
ઇહામુત્ર ચ લોકે સ સર્વત્ર સુખમાપ્નુયાત્ ॥ ૨,૪૯.૧૨૪॥

વ્રજતઃ સંયમન્યાં યદ્દુઃખમત્ર નિરૂપિતમ્ ।
અસ્ય શ્રવણતઃ પુણ્યં તન્મુક્તો જાયતે તતઃ ॥ ૨,૪૯.૧૨૫॥

અત્રોક્તકર્મપાકાદિશ્રવણાચ્ચ નૃણામિહ ।
વૈરાગ્યમાવહેદ્યસ્માત્તસ્માચ્છ્રોતવ્યમેવ ચ ॥ ૨,૪૯.૧૨૬॥

ભજત જિતહૃષીકાઃ કૃષ્ણમેનં મુનીશં સમજનિ બત યસ્માદ્ગીઃ સુધાસારધારા ।
પૃષતમપિ યદીયં વર્ણરૂપં નિપીય શ્રુતિપુટચુલુકેન પ્રાપ્નુયાદાત્મનૈક્યમ્ ॥ ૨,૪૯.૧૨૭॥

વ્યાસ ઉવાચ ।
ઇતિ સૂતમુખોદ્ગીર્ણાંસર્વશાસ્ત્રાર્થમણ્ડિતામ્ ।
વૈષ્ણવીં વાક્સુધાં પીત્વા ઋષયસ્તુષ્ટિમાયયુઃ ॥ ૨,૪૯.૧૨૮॥

પ્રશશંસુસ્તથાન્યોન્યં સૂતં સર્વાર્થદર્શિનમ્ ।
પ્રહર્ષમતુલં પ્રાપુર્મુનયઃ શૌનકાદયઃ ॥ ૨,૪૯.૧૨૯॥

ઇતિ હરિવચનાનિ સૂતવાચા ખગપતિસંશયભેદકાનિ યાનિ ।
સ મુનિરપિ નિશમ્ય શૌનકેન્દ્રો બહુતરમાનયતિ સ્મ ચાત્મનિ સ્વમ્ ॥ ૨,૪૯.૧૩૦॥

અપૂજયંસ્તે મુનયસ્તદાનીમુદાખાગ્ભિર્મુહુરેવ સૂતમ્ ।
ધન્યોઽસિ સૂત ત્વમિહેત્યુદૈરયન્વ્યસર્જયંસ્તં ચ નિવર્તિતેઽધ્વરે ॥ ૨,૪૯.૧૩૧॥

પુરાણં ગારુડં પુણ્યં પવિત્રં પાપનાશનમ્ ॥

શૃણ્વતાં કામનાપૂરં શ્રોતવ્યં સર્વદૈવ હિ ॥ ૨,૪૯.૧૩૨॥

શ્રુત્વા દાનાનિ દેયાનિ વાચકાયાખિલાનિ ચ ।
પૂર્વોક્તશયનાદીનિ નાન્યથા સફલં ભવેત્ ॥ ૨,૪૯.૧૩૩॥

પુરાણં પૂજયેત્પૂર્વં વાચકં તદનન્તરમ્ ।
વસ્ત્રાલઙ્કારગોદાનૈર્દક્ષિણાભિશ્ચ સાદરમ્ ॥ ૨,૪૯.૧૩૪॥

અન્નદાનૈર્હેમદાનૈર્ભમિદાનૈશ્ચ ભૂરિભિઃ ।
પૂજયેદ્વાચકં ભક્ત્યા બહુપુણ્યફલાપ્તયે ॥ ૨,૪૯.૧૩૫॥

યશ્ચેદં શૃણુયાન્મર્ત્યો યથાપિ પરિકીર્તયેત્ ।
વિહાય યાતનાં ઘોરાં ધૂતપાપો દિવં વ્રજેત્ ॥ ૨,૪૯.૧૩૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે શ્રીકૃષ્ણગરુડસંવાદે દ્વિતીયાંશે
ધર્મકાણ્ડે પ્રેતકલ્પે મોક્ષોપાયનિરૂપણં નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ

ઇતિ શ્રીગારુડે મહાપુરાણે દ્વિતીયો ધર્મકાણ્ડઃ સમાપ્તઃ

---

શ્રીગરુડમહાપુરાણમ્ ૩

શ્રીગણેશાય નમઃ ।
શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
શ્રીદત્તાત્રેયાય નમઃ ।
શ્રીવેદવ્યાસાય નમઃ ।
શ્રીહયગ્રીવાય નમઃ ।
અથ ગારુડે બ્રહ્મકાણ્ડસ્તૃતીય આરભ્યતે ।
ૐ મલ્લાનામશનિર્નૃણાં નરવરઃ સ્ત્રીણાં સ્મરો મૂર્તિમાન્ગોપાનાં
સ્વજનોઽસતાં ક્ષિતિભૃતાં શાસ્તા સ્વપિત્રોઃ શિશુઃ ।
મૃત્યુર્ભોજપતેર્વિધાતૃવિહિત સ્તત્ત્વં પરં યોગિનાં વૃષ્ણીનાં
ચ પતિઃ સદૈવ શુશુભે રઙ્ગેઽચ્યુતઃ સાગ્રજઃ ॥ ૩,૧.૧॥

નમો નારાયણાયેતિ તસ્મૈ વૈ મૂલરૂપિણે ।
નમસ્કૃત્ય પ્રવક્ષ્યામિ નારાયણકથામિમામ્ ॥ ૩,૧.૨॥

શૌનકાદ્યા મહાત્માનો હ્યૃષયો બ્રહ્મવાદિનઃ ।
નૈમિષાખ્યે મહાપુણ્યે તપસ્તેપુર્મહત્તરમ્ ॥ ૩,૧.૩॥

જિતેન્દ્રિયા જિતાહારાઃ સંતઃ સત્યપરાયણાઃ ।
યજન્તઃ પરયા ભક્ત્યા વિષ્ણુમાદ્યં જગદ્ગુરુમ્ ॥ ૩,૧.૪॥

ગૃણન્તઃ પરમં બ્રહ્મ જગચ્ચક્ષુર્મહૌજસઃ ।
સર્વશાસ્ત્રાર્થતત્ત્વજ્ઞાસ્તેપુર્નૈમિષ કાનને ॥ ૩,૧.૫॥

યજ્ઞૈર્યજ્ઞપતિં કેચિજ્જ્ઞાનૈર્જ્ઞાનાત્મકં પરમ્ ।
કેચિત્પરમયા ભક્ત્યા નારાયણમપૂજયન્ ॥ ૩,૧.૬॥

એકદા તુ મહાત્માનઃ સમાજં ચક્રુરુત્તમાઃ ।
ધર્માર્થકામમોક્ષાણામુપાયં જ્ઞાતુમિચ્છવઃ ॥ ૩,૧.૭॥

ષડ્વિંશતિસહસ્રાણિ મુનીનામૂર્ધ્વરેતસામ્ ।
તેષાં શિષ્યપ્રશિષ્યાણાં સંખ્યા વક્તું ન શક્યતે ॥ ૩,૧.૮॥

મુનયો ભાવિતાત્માનો મિલિતાસ્તે મહોજસઃ ।

લોકાનુગ્રહકર્તારો વીતરાગા વિમત્સરાઃ ॥ ૩,૧.૯॥

કથં હરૌ મનુષ્યાણાં ભક્તિરવ્યભિચારિણી ।
કેન સિધ્યેત્તુ સકલં કર્મ ત્રિવિધમાત્મનઃ ॥ ૩,૧.૧૦॥

ઇત્યેવં પ્રષ્ટુમાત્માનમુદ્યતાન્પ્રેક્ષ્ય શૌનકઃ ।
સાંજ લિર્વાક્યમાહ સ્મ વિનયાવનતઃ સુધીઃ ॥ ૩,૧.૧૧॥

શૌનક ઉવાચ ।
આસ્તે સિદ્ધાશ્રમે પુણ્યે સૂતઃ પૌરાણિકોત્તમઃ ।
સ એતદખિલં વેત્તિ વ્યાસશિષ્યો યતીશ્વરઃ ॥ ૩,૧.૧૨॥

તસ્માત્તમેવ પૃચ્છામ ઇત્યેવં શૌનકો મુનિઃ ।
અથ તે ઋષયો જગ્મુઃ પુણ્યં સિદ્ધાશ્રમં તતઃ ॥ ૩,૧.૧૩॥

પપ્રચ્છુસ્તે સુખાસીનં નૈમિષારણ્યવાસિનઃ ।
ઋષય ઊચુઃ ।
વયં ત્વતિથયઃ પ્રાપ્તાસ્ત્વાતિથેયોઽસિ સુવ્રત ॥ ૩,૧.૧૪॥

સ્નાનદાનોપચારેણ પૂજયિત્વા યથાવિધિ ।
કેન વિષ્ણુઃ પ્રસન્નઃ સ્યાત્સ કથં પૂજ્યતે નરૈઃ ॥ ૩,૧.૧૫॥

મુક્તિસાધનભૂતં ચ બ્રૂહિ તત્ત્વવિનિર્ણયમ્ ।
સૂત ઉવાચ ।
શૃણુધ્વમૃષ્યઃ સર્વે હરિં તત્ત્વવિનિર્ણયમ્ ॥ ૩,૧.૧૬॥

નત્વા વિષ્ણું શ્રિયં વાયું ભારતીં શેષસંજ્ઞકમ્ ।
દ્વૈપાયનં ગુરું કૃષ્ણં પ્રવક્ષ્યામિ યથામતિ ॥ ૩,૧.૧૭॥

નાસ્તિ નારાયણસમં ન ભૂતં ન ભવિષ્યતિ ।
એતેન સત્યવાક્યેન સર્વાર્થાન્સાધયામ્યહમ્ ॥ ૩,૧.૧૮॥

શૌનક ઉવાચ ।
કિમર્થં નમનં વિષ્ણોર્ગ્રન્થાદૌ મુનિસત્તમ ।
કર્તવ્યં બ્રૂહિ મે બ્રહ્મન્કૃપયા મમ સુવ્રત ॥ ૩,૧.૧૯॥

તતઃ શ્રિયં તતો વાયું ભારતીં ચ તતઃ પરમ્ ।
અન્તે વ્યાસં કિમર્થં ચ ત્વં નમસ્કૃતવાનસિ ।
સૂતસૂત મહાભાગ બ્રૂહિ કારણમત્ર ચ ॥ ૩,૧.૨૦॥

સૂત ઉવાચ ।
આદૌ વન્દ્યઃ સર્વવેદૈકવેદ્યો વેદે શાસ્ત્રે સેતિહાસે પુરાણે ।
સત્તાં પ્રાયો વિષ્ણુરેવૈક એવ પ્રકાશતેઽતો નમ્ય એકો હરિર્હિ ॥ ૩,૧.૨૧॥

સર્વત્ર મુખ્યસ્ત્વધિકોન્યતોઽપિ સ એવ નમ્યો ન ચ શઙ્કરાદ્યાઃ ।
નમન્તિ યેઽવિનયાચ્છઙ્કરં તુ વિનાયકં ચણ્ડિકાં રેણુકાં ચ ॥ ૩,૧.૨૨॥

તથા સૂર્યં ભૈરવં માતારશ્ચ તથા વાણીં ગિરિજાં વૈ શ્રિયં ચ ।
સર્વેપિ તે વૈષ્ણવા નૈવ લોકે ન તદ્ભક્તા વેતિ ચાર્યા વદન્તિ ॥ ૩,૧.૨૩॥

ન પાર્થિક્યાન્નમનં કાર્યમેવ પ્રીણન્તિ નૈતા દેવતાઃ પૂજનેન ।
પૂજાં ગૃહીત્વા દેવતાશ્ચૈવ સર્વાઃ કિઞ્ચિદ્દત્વા ફલદાનેન તાંશ્ચ ॥ ૩,૧.૨૪॥

સંતર્પ્ય તુષ્ટૈઃ સ્વમનોનુ સારાત્તૈઃ કારિતાં કામ્યપૂજાં તથૈવ ।
નિવેદયિત્વા પરદેવતાયાં વિષ્ણૌ હરૌ શ્રીપુરુષાદિવન્દ્યે ॥ ૩,૧.૨૫॥

ઇહાપરત્રાપિ સુખેતરાણિ દાસ્યન્તિ પશ્ચાદધરં વૈ તમશ્ચ ।
અતો હ્યેતે નૈવ પૂજ્યા ન નમ્યા મોક્ષેચ્છુભિર્બ્રાહ્મણાદ્યૈર્દ્વિજેન્દ્ર ॥ ૩,૧.૨૬॥

તથૈવ સર્વાશ્રમિભિશ્ચ નિત્યં મહાવિપત્તાવપિ વિપ્રવર્યાઃ ।
શ્રીકામ્ય યા યે તુ ભજન્તિ નિત્યં શ્રીબ્રહ્મરુદ્રેદ્રયમાદિદેવાન્ ॥ ૩,૧.૨૭॥

ઇહેવ ભુઞ્જન્તિ મહચ્ચ દુઃખં મહાપદઃ કુષ્ઠભગન્દરાદીન્ ।
નમન્તિ યેઽવૈષ્ણવાન્બ્રહ્મરુદ્રવાયુ પ્રતીકાન્નૈવ તે વિષ્ણુભક્તાઃ ॥ ૩,૧.૨૮॥

અભિપ્રાયં ત્વત્ર વક્ષ્યે મુનીન્દ્રાઃ પરં ગોપ્યં હૃદિ ધાર્યં હિ તદ્ધિ ।
વાયોઃ પ્રતીકં પૂજ્યમેવેહ વિપ્રા ન બ્રહ્મરુદ્રાદિપ્રતીકમેવ ॥ ૩,૧.૨૯॥

પૂજાકાલે દેવદેવસ્ય વિષ્ણોર્વાયોઃ પ્રતીકં યોગ્યભાગે નિધાય ।
અન્તર્ગતં તસ્ય વાયોર્હરિં ચ લક્ષ્મીપતિં પૂજયિત્વા હિ સમ્યક્ ॥ ૩,૧.૩૦॥

પશ્ચાદ્વાયોઃ સુપ્રતીકં ચ સમ્યઙ્નિર્માલ્યશેષેણ હરેઃ સમર્ચયેત્ ।
પૃથક્ચ સ્રગ્ધૂપવિલેપનાદિપૂજાં પ્રકુર્વન્તિ ચ યે વિમૂઢઃ ॥ ૩,૧.૩૧॥

તેષાં દુઃખમિહ લોકે પરત્ર ભવિષ્યતે નાત્ર વિચાર્યમસ્તિ ।
પ્રાયશ્ચિત્તં સ્વસ્તિ વિપ્રાઃ કથઞ્ચિત્તત્કુર્વન્તુ સ્મરણં નામ વિષ્ણોઃ ॥ ૩,૧.૩૨॥

પાષણ્ડરુદ્રાદિકસં પ્રતિષ્ઠિતાન્હરેર્વાયોઃ શઙ્કરસ્ય પ્રતીકાન્ ।
નમન્તિ યે ફલબુદ્ધ્યા વિમૂઢાસ્તેષાં ફલં શાશ્વતં દુઃખમેવ ॥ ૩,૧.૩૩॥

વાયોઃ પ્રતીકં યદિ વિપ્રવર્યૈઃ પ્રતિષ્ઠિતં ચેન્નમનં હિ કાર્યમ્ ।

નૈવેદ્યશેષેણ હરેશ્ચ વિષ્ણોઃ પૂજા કૃતા ચેન્ન હિ દોષલેશઃ ॥ ૩,૧.૩૪॥

ગુરુર્હિ મુખ્યો હનુમજ્જનિર્મહાન્નામાઙ્ઘ્રિભક્તો હનુમાન્સદૈવ ।
એવં વિદિત્વા પરમં હરિં ચ પુત્રં પુનર્મુખ્યદેવસ્ય વાયોઃ ॥ ૩,૧.૩૫॥

નમસ્કારો નાન્યથા વિપ્રવર્યા આધીયતાં હૃદિ સર્વૈ રહસ્યમમ્ ।
યે વૈષ્ણવા વૈષ્ણ વદાસભૃત્યાઃ સર્વેપિ તે સર્વદા વિષ્ણુમેવ ॥ ૩,૧.૩૬ ।
નમન્તિ યે વૈ પ્રતિપાદયન્તિ તથૈવ પુણ્યાનિ ચ સાત્ત્વિકાનિ ।
નમન્તિ યે વાસુદેવં હરિં ચ સમ્યક્સ્વશક્ત્યા પ્રતિપાદયન્તિ ॥ ૩,૧.૩૭॥

પ્રવૃત્તિમાર્ગેણ ન પૂજયન્તિ હ્યાપત્કાલે પરદૈવં તદન્યમ્ ।
તે વૈષ્ણવા વૈષ્ણવદાસભૃત્યા અન્યે ચ સર્વેઽવૈષ્ણવમાત્રકાઃ સ્મૃતાઃ ॥ ૩,૧.૩૮॥

ઉપક્રમૈરુપસંહારસ્ય લિઙ્ગૈર્હરિં ગુરું હ્યન્તરેણૈવ યાન્તિ ।
તાનેવાહુઃ સત્પુરાણાનિ વિપ્રાઃ કલૌ યુગે નાભ્યસૂયન્તિ સર્વે ॥ ૩,૧.૩૯॥

યતો હિતાન્યે પ્રતિપાદયન્તિ પ્રવૃત્તિધર્માન્સ્વસ્વવર્ણાનુરૂપાન્ ।
અતો હ્યસૂયન્તિ સદા વિમૂઢાઃ કલૌ હિ વિપ્રાઃ પ્રચુરા હિ તેપિ ॥ ૩,૧.૪૦॥

ન ચાસ્તિ વિષ્ણોઃ સદૃશં ચ દૈવતં ન ચાસ્તિ વાયોઃ સદૃશો ગુરુશ્ચ ।
ન ચાસ્તિ તીર્થં સદૃશં વિષ્ણુપદ્યાઃ ન વિષ્ણુભક્તેન સમોસ્તિ ભક્તઃ ॥ ૩,૧.૪૧॥

અન્યાનિ વિષ્ણોઃ પ્રતિપાદકાનિ સર્વાણિ તે સાત્ત્વિકાનીતિ ચાહુઃ ।
શ્રાવ્યાણિ તાન્યેવ મનુષ્યલોકે શ્રાવ્યાણિ નાન્યાનિ ચ દુઃખદાનિ ॥ ૩,૧.૪૨॥

કલૌ યુગે સર્વ પુરાણમધ્યે ત્રીણ્યેવ મુખ્યાનિ હરિપ્રિયાણિ ।
મુખ્યં પુરાણં હિ કલૌ નૃણાં ચ શ્રેયસ્કરં ભાગવતં પુરાણમ્ ॥ ૩,૧.૪૩॥

પૂર્વં હિ સૃષ્ટિઃ પ્રતિપાદ્યતે ત્ર યતો હ્યતો ભાગવતં પરં સ્મૃતમ્ ।
યસ્મિન્પુરાણે કથયન્તિ સૃષ્ટિં હ્યાદૌ વિષ્ણોર્બ્રહ્મરુદ્રાદિકાનામ્ ॥ ૩,૧.૪૪॥

નાનાર્થમેવં કથયન્તિ વિપ્ર નીચોચ્ચરૂપં જ્ઞાનમાહુર્મહાન્તઃ ।
તેનૈવ સિદ્ધં પ્રવદન્તિ સર્વં હ્યતઃ પરં ભાગવતં પુરાણમ્ ॥ ૩,૧.૪૫॥

તતઃ પરં વિષ્ણુપુરાણમાહુસ્તતઃ પરં ગારુડસંજ્ઞકં ચ ।
ત્રીણ્યેવ મુખ્યા નિ કલૌ નૃણાં તુ તથા વિશેષો ગારુડે કિઞ્ચિદસ્તિ ॥ ૩,૧.૪૬॥

શ઼ૃણુધ્વં વૈ તં વિશેષં ચ વિપ્રાસ્ત્ર્યંશૈર્યુક્તં ગારુડાખ્યં પુરાણમ્ ।
આદ્યાંશં વૈ કર્મકાણ્ડં વદન્તિ દ્વિતીયાંશં ધર્મકાણ્ડં તમાહુઃ ॥ ૩,૧.૪૭॥

તૃતીયાંશં બ્રહ્મકાણ્ડં વદન્તિ તેષાં મધ્યે ત્વન્તિમોયં વરિષ્ઠઃ ।

તૃતીયાંશશ્રવણાત્પુણ્યમાહુસ્તુલ્યં પુણ્યં ભાગવતસ્ય વિપ્રાઃ ॥ ૩,૧.૪૮॥

તૃતીયાંશે પઠિતે વેદતુલ્યં ફલં ભવેન્નાત્ર વિચાર્યમસ્તિ ।
તૃતીયાંશશ્રવણાદેવ વિપ્રાઃ ફલં પ્રોક્તં પઠતોપ્યર્થમેવમ્ ॥ ૩,૧.૪૯॥

તૃતીયાંશશ્રવણાદર્થતશ્ચ પુણ્યં ચાહુઃ પઠતો વૈ દશાંશમ્ ।
તતો વરં મત્સ્યપુરાણમાહુસ્તતો વરં કૂર્મપૂરાણમાહુઃ ॥ ૩,૧.૫૦॥

તથૈવ વૈ વાયુપુરાણમાહુસ્ત્રીણ્યેવ ચાહુઃ સાત્ત્વિકાનીતિ લોકે ।

તત્રાપિ કિઞ્ચિદ્વેદિતવ્યં ભવેચ્ચ પુરાણષટ્કે સત્ત્વરૂપે મુનીન્દ્રાઃ ॥ ૩,૧.૫૧॥

સત્ત્વાધમે માત્સ્યકૌર્મે તથાહુર્વાયુ ચાહુઃ સાત્ત્વિકં મધ્યમં ચ ।
વિષ્ણોઃ પુરાણં ભાગવતં પુરાણં સત્ત્વોત્તમં ગારુડં ચાહુરાર્યાઃ ॥ ૩,૧.૫૨॥

સ્કાન્દં પાદ્મં વામનં વૈ વરાહં તથાગ્નેયં ભવિષ્યં પર્વસૃષ્ટૌ ।
એતાન્યાહૂ રાજસાનીતિ વિપ્રાસ્તત્રૈકદેશઃ સાત્ત્વિકસ્તામસશ્ચ ॥ ૩,૧.૫૩॥

રજઃ પ્રાચુર્યાદ્રાજસાનીતિ ચ હુઃ શ્રાવ્યાણિ નૈતાનિ મુમુક્ષુભિઃ સદા ।
તેષાં મધ્યે સાત્ત્વિકાંશાશ્ચ સંતિ તેષાં શ્રુતેર્ગારુડીયં ફલં ચ ॥ ૩,૧.૫૪॥

બ્રહ્માણ્ડલૈઙ્ગ્યે બ્રહ્મવૈવર્તકં વૈ માર્કણ્ડેયં બ્રાહ્મમાદિત્યકં ચ ।
એતાન્યા હુસ્તામસાનીતિ વિપ્રાસ્તત્રૈકદેશઃ સાત્ત્વિકો રાજસશ્ચ ॥ ૩,૧.૫૫॥

શ્રાવ્યાણિ નૈતાનિ મનુષ્યલોકે તત્ત્વેચ્છુભિસ્તામસાનીત્યતો હિ ।
તેષુ સ્થિતાઃ સાત્ત્વિકાંશા મુનીન્દ્રાસ્તેષાં શ્રુતિર્ગારુડૈકાઙ્ઘ્રિતુલ્યા ॥ ૩,૧.૫૬॥

અલ્પાન્યુપપુરાણાનિ વદન્ત્યષ્ટાદશાનિ ચ ।
વિષ્ણુધર્મોતરં ચૈવ તન્ત્રં ભાગવતં તથા ॥ ૩,૧.૫૭॥

તત્ત્વસારં નારસિંહં વાયુપ્રોક્તં તથૈવ ચ ।
તથા હંસપુરાણં ચ ષડેતાનિ મુનીશ્વરાઃ ॥ ૩,૧.૫૮॥

સાત્ત્વિકાન્યેવ જાનીધ્વં પ્રાયશો નાત્ર સંશયઃ ।
એતેષાં શ્રવણાદેવ ગારુડાર્ધફલં શ્રુતમ્ ॥ ૩,૧.૫૯॥

ભવિષ્યોત્તરનામાનં બૃહન્નારદમેવ ચ ।
યમનારદસંવાદં લઘુનારદમેવ ચ ॥ ૩,૧.૬૦॥

વિનાયકપુરાણં ચ બૃહદ્બ્રહ્માણ્ડમેવ ચ ।
એતાનિ રાજસાન્યાહુઃ શ્રવણાદ્ભુક્તરુત્તમા ॥ ૩,૧.૬૧॥

ગારુડાત્પાદતુલ્યં ચ ફલં ચાહુર્મનીષિણઃ ।
પુરાણં ભાગવતં શૈવં નન્દિપ્રોક્તં તથૈવ ચ ॥ ૩,૧.૬૨॥

પાશુપત્યં રૈણુકં ચ ભૈરવં ચ તથૈવ ચ ।
એતાનિ તામસાન્યાહુર્હરિતત્ત્વાર્થવેદિનઃ ॥ ૩,૧.૬૩॥

એતેષાં શ્રવણાદ્વિપ્રાગારુડાઙ્ઘ્યર્ધ્મેવ ચ ।
સર્વેષ્વપિ પુરાણેષુ શ્રેષ્ઠં ભાગવતં સ્મૃતમ્ ॥ ૩,૧.૬૪॥

વેદૈસ્તુલ્ય સમ પાઠે શ્રવણે ચ તદર્ધકમ્ ।
અર્થતઃ શ્રવણે ચાસ્ય પુણ્યં દશગુણં સ્મૃતમ્ ॥ ૩,૧.૬૫॥

વક્તુઃ સ્યાદ્દ્વિગુણં પુણ્યં વ્યાખ્યાતુશ્ચ તથાધિકમ્ ।
અનન્તવેદૈઃસામ્યમાહુર્મહાન્તઃ ભારાન્મહત્ત્વાદ્ભારતસ્યાપિ વિપ્રાઃ ॥ ૩,૧.૬૬॥

વેદોભ્યોસ્ય ત્વર્થતશ્ચાધિકત્વં વદન્તિ બૈ વિષ્ણુરહસ્યવેદિનઃ ॥ ૩,૧.૬૭॥

તત્ર શ્રેષ્ઠાં ગીતિકામાહુરાર્યાસ્તથૈવ વિષ્ણોર્નામસાહસ્રક ચ ।
તયોસ્તત્ર શ્રવણાદ્ભારતસ્ય દશાધિકં ફલમાહુર્મહાન્તઃ ॥ ૩,૧.૬૮॥

દૈત્યાઃ સર્વ વિપ્રકુલેષુ ભૂત્વા કૃતે યુગે ભારતે ષટ્સહસ્ર્યામ્ ।
નિષ્કાસ્ય કાંશ્ચિન્નવનિર્મિતાનાં નિવેશનં તત્ર કુર્વન્તિ નિત્યમ્ ॥ ૩,૧.૬૯॥

મત્વા હરિં ભગવાન્વ્યાસરૂપી ચક્રે તદા ભાગવતં પુરાણમ્ ।
તથા સમાખ્યાય ચ વૈષ્ણવં તત્તતઃ પરં ગારુડાખ્યં સ ચક્રે ॥ ૩,૧.૭૦॥

અતો હિ ગારુડં મુખ્યં પુરાણં શાસ્ત્રસમતમ્ ।
ગારુડેન સમં નાસ્તિ વિષ્ણુધર્મપ્રદર્શને ॥ ૩,૧.૭૧॥

યથા સુરાણાં પ્રવરો જનાર્દનો યથાયુધાનાં પ્રવરઃ સુદર્શનમ્ ।
યથાશ્વમેધઃ પ્રવરઃ ક્રતૂનાં છિન્નેષુ ભક્તેષુ તથૈવ રુદ્રઃ ॥ ૩,૧.૭૨॥

નદીષુ ગઙ્ગા જલજેષુ પદ્મમચ્છિન્નભક્તેષુ તથૈવ વાયુઃ ।
તથા પુરાણેષુ ચ ગારુડં ચ મુખ્યં તદાહુર્હરિતત્ત્વદર્શને ॥ ૩,૧.૭૩॥

ગારુડાખ્યપુરાણે તુ પ્રતિપાદ્યો હરિઃ સ્મૃતઃ ।

અતો હરિર્નમસ્કાર્યો ગમ્યો યોગ્યો હરિઃ સ્મૃતઃ ॥ ૩,૧.૭૪॥

ભાગ્યાત્મકત્વાચ્છ્રીદેવ્યા નમનં નદનુ સ્મૃતમ્ ।

પરો નરોત્તમો વા સ સાધકેશોઽપિ ચ સ્મૃતઃ ॥ ૩,૧.૭૫॥

અતો નમ્યો વાયુરપિ પુરાણાદૌ દ્વિજોત્તમાઃ ।
ભારતી વાક્યરૂપત્વાન્નમ્યા વાયોરનન્તરમ્ ॥ ૩,૧.૭૬॥

ઉપસાધકો નરઃ પ્રોક્તો યતોતસ્તદનન્તરમ્ ।
નમ્ય ઇત્યચ્યતે સદ્ભિસ્તારતમ્યેન સર્વદા ॥ ૩,૧.૭૭॥

અતો વ્યાસં નમસ્કુર્યાદ્ગ્રન્થકર્તૃત્વહેતુતઃ ।
શૌનક ઉવાચ ।
વ્યાસસ્ય નમનં હ્યન્તે કથં કાર્યં મહાત્મનઃ ॥ ૩,૧.૭૮॥

અન્તે ચ વન્દને તસ્ય કારણં બ્રૂહિ સુવ્રત ।
સૂત ઉવાચ ।
વિષ્ણોરનન્તરં વ્યાસનમનં મુખ્યમેવ હિ ॥ ૩,૧.૭૯॥

હરિરેવ યતો વ્યાસો વાચ્યચક્રસ્વરૂપકઃ ।
વ્યાસો નૈવ સમત્વેન પ્રોક્તો ભગવતો હરેઃ ॥ ૩,૧.૮૦॥

તત્રાપિ કારણં વક્ષ્યે સાદરેણ મુનીશ્વરાઃ ।
વ્યાસસ્તુ કશ્ચન ઋષિઃ પુરાણે તામસે સ્મૃતઃ ॥ ૩,૧.૮૧॥

ઇતિ જ્ઞાના વલંબેન દૈત્યા દૈત્યાનુગૈઃ સમાઃ ।
પ્રવિશન્તિ હ્યન્ધતમ ઇતિ ત્વન્તે નમસ્કૃતઃ ॥ ૩,૧.૮૨॥

યદિદં પરમં ગોપ્યં હૃદિ ધાર્યં ન સંશયઃ ।
પરાણાં નમ્યમેવોક્તં પ્રતિપાદ્યં યતોત્ર હિ ॥ ૩,૧.૮૩॥

સમાસવ્યાસભાવાદ્ધિ પરાણાં તત્પ્રતીયતે ।
વાસ્તવં તં ન જાનીયુરુપજીવ્યો યતો હરિઃ ॥ ૩,૧.૮૪॥

હરિર્વ્યાસસ્ત્વેક એવ વ્યાસસ્તુ હરિવત્સ્મૃતઃ ।
ઉપજીવ્યતદીશત્વે તયોરેવ ન સંશયઃ ॥ ૩,૧.૮૫॥

ઈશકોટિપ્રવિષ્ટત્વાચ્છ્રિયઃ સ્વામિત્વમીરિતમ્ ।
ત્રયાણામુપજીવ્યત્વાત્સેવ્યત્વાત્સ્વામિતા સ્મૃતાઃ ॥ ૩,૧.૮૬॥

વાય્વાદીનાં ત્રયાણાં ચ સેવ્યત્વાત્સેવ્યતા સ્મૃતા ।
ભૂભારહરણે વિષ્ણોઃ પ્રધાનાઙ્ગં હિ મારુતિઃ ॥ ૩,૧.૮૭॥

વાક્યરૂપા ભારતી તુ દ્વિતીયાઙ્ગં હિ સા સ્મૃતા ।
તૃતીયાઙ્ગ હરેઃ શેષો ન નમ્યાઃ સામ્યતો હરેઃ ॥ ૩,૧.૮૮॥

પ્રતિપાદ્યા મુખ્યતયા નમ્યા એવ સમીરિતાઃ ।
અવાન્તરાશ્ચ વાચ્યાદ્યા ન નમ્યાસ્તેન તે સ્મૃતાઃ ॥ ૩,૧.૮૯॥

ભીષ્મદ્રોણાદિનામાનિ ભીમાદિષ્વેવ મુખ્યતઃ ।
વાચકાનિ યતો નિત્યં તન્નમ્યાસ્તે મુનીશ્વરાઃ ॥ ૩,૧.૯૦॥

પરાણામેવ નમ્યત્વં પ્રતિપાદ્યત્વમેવ હિ ।
એતત્સર્વં મયાખ્યાતં કિમન્યચ્છ્રોતુમિચ્છથ ॥ ૩,૧.૯૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે સૂતશૌનકસંવાદે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
સાત્ત્વિકાદિપુરાણવિભાગનમ્યાનમ્યદેવવિભાગાદિવિષયનિરૂપણં નામ પ્રથમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨
શ્રીશૌનક ઉવાચ ।
કથં સસર્જ ભગવાંસ્તત્તત્તત્ત્વાભિમાનિનઃ ।
સૃષ્ટિક્રમં ન જાનામિ દેવાનાં હ્યન્તરં મુને ॥ ૩,૨.૧॥

શૌનકેનૈવ મુક્તસ્તુ સૂતો વચનમબ્રવીત્ ।
શૂત ઉવાચ ।
સમ્યગ્વ્યવસિતા બુદ્ધિસ્તવ બ્રહ્મર્ષિસત્તમ ॥ ૩,૨.૨॥

એવમેવ કૃતઃ પ્રશ્નો હરૌ તુ ગરુડેન વૈ ।
યદુક્તવાન્હરિસ્તસ્મૈતદ્વક્ષ્યામિ તવાનઘ ।
ગરુડ ઉવાચ ।
સૃષ્ટિં વ્રૂહિ મહાભાગ સચ્ચિદાનન્દવિગ્રહ ॥ ૩,૨.૩॥

સૃષ્ટૌ જ્ઞાતે તવોત્કર્ષો જ્ઞાતપ્રાયો ભવિષ્યતિ ।
બ્રહ્માદીનાં તારતમ્યજ્ઞાનં મમ ભવિષ્યતિ ॥ ૩,૨.૪॥

મોક્ષોપાયમ્યઃ સ વોક્ત મિતતરત્તસ્ય સાધનમ્ ।
ગરુડેનૈવ મુક્તસ્તુ કૃષ્ણો વચનમબ્રવીત્ ॥ ૩,૨.૫॥

શ્ૃકૃષ્ણ ઉવાચ મૂલરૂપે હ્યતો જ્ઞેયો વિષ્ણુત્વાદ્વિષ્ણુરવ્યયઃ ॥ ૩,૨.૬॥

અવતારમિદં પ્રોક્તં પૂર્ણત્વાદેવ સુવ્રત ।
અનેકો હ્યેકતાં પ્રાપ્ય સંશેતે પ્રલયાય વૈ ॥ ૩,૨.૭॥

તત્રાપિ ચ વિશેષોસ્તિ જ્ઞાતવ્યં તત્ત્વમેવ સઃ ॥ ૩,૨.૮॥

ભેદેન દર્શનાદ્વાપિ ભેદાભેદેન દર્શનાત્ ।
વિષ્ણોર્ગુણાનાં રૂપાણાં તદઙ્ગાનાં સુખાદિનામ્ ।
તત્રૈવ દશનાદ્વાપિ ક્ષિપ્રમેવ તમો વ્રજેત્ ॥ ૩,૨.૯॥

પુરુષાન્તરમારભ્ય કલ્પિતા યે દ્વિજોત્તમ ।
હરિરૂપાસ્તુ તે જ્ઞેયા એકીભૂતા હિ તેન તે ॥ ૩,૨.૧૦॥

પ્રલેય સમનુપ્રાપ્તે જીવાઃ સ યાન્તિ મામકાઃ ।
વિરાજૃપે હરેઃ સંતિ તદા તે ચ હ્યનેકધા ॥ ૩,૨.૧૧॥

એકીભાવં પ્રાપ્નુવન્તિ મૂલેન પ્રલયે દ્વિજ ।
બિંબેન તુ સ્વયં વિષ્ણુરેકીભાવં વ્રજેદ્યદિ ॥ ૩,૨.૧૨॥

પ્રતિબિંબઃ કથં જીવો ભવેન્નારાયણસ્ય ચ ।
તદધીનસ્તત્સદૃશો હરેર્જીવો ન સંશયઃ ॥ ૩,૨.૧૩॥

પ્રતિબિંબસ્ય શબ્દાર્થો હ્યયમેવમુદાહૃતઃ ।
તસ્માચ્ચ બિંબરૂપાણામેકીભાવં ન ચિન્તયેત્ ॥ ૩,૨.૧૪॥

કૃષ્ણરામાદિવચ્ચૈવ ત્વેકી ભાવો વિવક્ષિતઃ ।
બિંબાનાં મૂલરૂપસ્ય ભેદો નાત્ર વિવક્ષિતઃ ॥ ૩,૨.૧૫॥

તત્રાપિ ચ વિશેષોસ્તિ જ્ઞાતવ્યસ્તત્ત્વમિચ્છુભિઃ ।
એકાંશેન તુ બિંબૈસ્તુ ચૈકીભાવં વ્રજન્તિ તે ॥ ૩,૨.૧૬॥

એકાંશેન તુ જીવત્વે સંસ્થિતા નાત્ર સંશયઃ ।
બિંબમૂલં ન જાનન્તિ તે જના હ્યસુરાઃ સ્મૃતાઃ ॥ ૩,૨.૧૭॥

એક એવ હરિઃ પૂર્વં હ્યવિદ્યાવશતઃ સ્વયમ્ ।
અનેકો ભવતિ હ્યારાદાદર્શપ્રતિર્બિંબવત્ ॥ ૩,૨.૧૮॥

એવં વદન્તિ યે મૂઢા સ્તેપિ યાન્ત્યધરં તમઃ ।
ઉપાધિર્દ્વિવિધઃ પ્રોક્તઃ સ્વરૂપો બાહ્ય એવ ચ ॥ ૩,૨.૧૯॥

બાહ્યોપાધિર્લયે યાતિ મુક્તાવન્યસ્ય સંશ્થિતિઃ ।
સર્વોપાધિવિ નાશે હિ પ્રતિબિંબઃ કથં ભવેત્ ॥ ૩,૨.૨૦॥

ચિદ્રૂપાખ્યો હ્યુપાધિસ્તુ મોક્ષે યેપ્યધિકારિણઃ ।
દુઃખરૂપો હ્યુપાધિસ્તુ તમસો યેધિકારિણઃ ॥ ૩,૨.૨૧॥

મિશ્રરૂપો હ્યુપાધિસ્તુ નિત્યસંસારિણાં મતઃ ।

બાહ્યોપાધિર્લિઙ્ગદેહઃ સર્વેષાં નાત્ર સંશયઃ ॥ ૩,૨.૨૨॥

દૈત્યાઃ દુઃખાયતે યસ્માત્તસ્માદુઃખી હરિઃ સ્વયમ્ ।
તત્તદ્દુઃખસ્વરૂપત્વાદ્દૈત્યાનાં બિંબરૂપકઃ ॥ ૩,૨.૨૩॥

દૈત્યસ્થિતાનાં બિંબાનાં મૂલરૂપસ્ય વૈ પ્રભોઃ ।
પરસ્પરં તથા ભેદં હ્યન્તરં વા ન ચિન્તયેત્ ॥ ૩,૨.૨૪॥

શ્રીભૂદુર્ગાદિરૂપાણાં તથા સીતાદિરૂપિણામ્ ।
અન્યોન્યં નાણુમાત્રં ચ ભેદો બાહ્યાન્તરેપિ ચ ॥ ૩,૨.૨૫॥

ચિન્તનીયઃ કથમપિ જ્ઞાત્વા યાન્ત્યધરં તમઃ ।
પ્રતિબિંબસ્થિતો બિંબઃ સ્ત્રીરૂપો હ્યસ્તિ સર્વદા ॥ ૩,૨.૨૬॥

પ્રલયે સમનુપ્રાપ્તે લક્ષ્મ્યા સહ ખગોત્તમ ।
એકીભાવં નાપ્નુવન્તિ વિંબેન સહ સંસ્થિતાઃ ॥ ૩,૨.૨૭॥

બિંવસ્થિતાનાં રૂપાણાં લક્ષ્મ્યાશ્ચ વિનતાસુત ।
ભેદસ્તુ નાણુમાત્રં ચ શઙ્કનીયઃ કથઞ્ચન ॥ ૩,૨.૨૮॥

યદા હિ શેતે પ્રલયાર્ણવે વિભુર્જીવાંશ્ચ સર્વાનુદરે નિવેશ્ય ।
મુક્તાંશ્ચ બ્રહ્મેન્દ્રમરુદ્ગણાદીન્પ્રાપ્તવ્યમુક્તીંશ્ચ સુતૌ? ચ સંસ્થિતાન્ ॥ ૩,૨.૨૯॥

પ્રાપ્તાન્ધકૂપાદિસમસ્તજીવાંસ્તથૈવ પ્રાપ્તવ્યકલીનથાપરાન્ ।
તથૈવ નિત્યં સૃતિસંસ્થિતાઞ્જનાનચેતનાનૃક્ષરૂપાદિજીવાન્ ॥ ૩,૨.૩૦॥

એવં જનાઞ્જઠરે સંનિધાય સમ્યક્શેતે હ્યંભસિ વૈ સ કલ્પે ।
લક્ષ્મીસ્તુ સા સર્વવેદાત્મિકા ચ ભક્ત્યા હરૌ નિત્યસંવર્ધિતાપિ ॥ ૩,૨.૩૧॥

અત્યાદરં દર્શયતીવ સા તુ ઈડે વિષ્ણું ભક્તિસંવર્ધિતાપિ ।
ચેષ્ટાદિરૂપેણ તદા ન કિઞ્ચિદાસીદ્વિના વિષ્ણુમથ શ્રિયં ચ ॥ ૩,૨.૩૨॥

પર્યઙ્કરૂપેણ વભૂવ દેવી વાસસ્વરૂપેણ રમા વિરેજે ।
સર્વં રમા સૈવ તદૈવ ચાસીત્સૈકા દેવી બહુરૂપા બભાષે ॥ ૩,૨.૩૩॥

ત્વમુત્કૃષ્ટઃ સર્વદેવોત્તમત્વાન્ન ત્વત્સમઃ કશ્ચિદેવાધિકો વા ।
ત્વં બ્રહ્મ એકો ન ચતુર્મુખશ્ચ નાહં રુદ્રો ન બૃહસ્પતિશ્ચ ॥ ૩,૨.૩૪॥

વિષ્ણાવેવ બ્રાહ્મશબ્દો હિ મુખ્યો હ્યન્યેષ્વમુખ્યો બ્રાહ્મરુદ્રાદિકેષુ ।
અનન્તગુણપૂર્ણત્વાદ્બ્રહ્મેતિ હરિરુચ્યતે ॥ ૩,૨.૩૫॥

ગુણાદિપૂર્ણતાભાવાન્નાન્યે બ્રહ્મેત્યુદાહૃતાઃ ।
દેશાનન્ત્યં ગુણતઃ કાલતો વા નાસ્ત્યાનન્ત્યં ક્વાપિ દેશે ચ કાલે ॥ ૩,૨.૩૬॥

યદા નન્ત્યં કિમુ વક્તવ્યમત્ર ગુણાનન્ત્યં નાસ્તિ બ્રહ્માદિકેષુ ।
યદ્યપ્યહં દેશતઃ કાલતશ્ચ સમસ્તદા વાસુદેવેન સાર્ધમ્ ॥ ૩,૨.૩૭॥

તથાપિ મે ગુણતો નાસ્ત્યનન્તં તતો ધર્મા ગુણતોનન્તતશ્ચ ।
સંતિ શ્રુતાવવિરુદ્ધાશ્ચ દેવે ચિન્ત્યા હ્યચિન્ત્યા બહુધા તે હ્યનન્તાઃ ॥ ૩,૨.૩૮॥

અતો ગુણાંસ્તવ દેવસ્ય વિષ્ણો સ્તોતું સદા સ્મો ન હરેઃ કદાપિ ।
નાહં ન કેશૌ ન ચ ગીર્ન રુદ્રો ન દક્ષકન્યા ન ચ મેનકાસુતા ॥ ૩,૨.૩૯॥

ન વૈ બિડૌજા ન ચ વા પુલોમજા ન ચેધ્મવાહો ન યમો ન ચાન્યઃ ।
ન નારદો નાપિ ભૃગુર્વસિષ્ઠો ન વિઘ્નપો નાપિ બલ્યાદયશ્ચ ॥ ૩,૨.૪૦॥

ન વૈ વિરાટો નાપિ ભીમઃ શનિશ્ચ ન પુષ્કરો ન કશેરુસ્તથૈવ ।
ન કિન્નરાઃ પિતરો નૈવ દેવા ગન્ધર્વમુખ્યા નાપિ વા તુષ્યસંજ્ઞાઃ ॥ ૩,૨.૪૧॥

ન વૈ ક્ષિતીશા ન ચ માનુષાશ્ચ વિષ્ણોર્ન જાનન્તિ કિમત્ર ચાન્યે ।
મત્તોધમઃ કોચિગુણેન બ્રહ્મા સમો હિ તસ્ય બ્રહ્મણો માતરિશ્વ ॥ ૩,૨.૪૨॥

તૌ વૈ વિરાગે હરિભક્તિભાવે ધૃતિસ્તિતિપ્રાણબલેષુયોગે ।
બુદ્ધૌ સમાનૌ સંસૃતૌ મોક્ષકાલે પરસ્પરાધારસમન્વિતૌ ચ ॥ ૩,૨.૪૩॥

અન્નાભિમાનં બ્રહ્મ ચાહુર્મુરારિં જીવાભિમાનં વાયુમાહુર્મહાન્તઃ ।
ન શક્તોસૌ બ્રહ્મદેવો વિવસ્તું વાયું વિના સંસૃતાવેવ નિત્યમ્ ॥ ૩,૨.૪૪॥

ન તં વિના માતરિશ્વા ચ વસ્તુમન્યોન્યમાપ્તિઃ કાલતો ન્યૂનતા ચ ।
યદા મહત્તત્ત્વનિ યામકોભૂદ્બ્રહ્માણ્ડાન્તસ્થૂલસૃષ્ટૌ મહાત્મા ॥ ૩,૨.૪૫॥

તદા વાયુર્નાશકદ્વૈ મહાત્મા બાહ્યે સૃષ્ટૌ કાલભેદેન ચાસ્તિ ।
સરસ્વતી ભારતી બ્રહ્મણસ્તુ સંવત્સરાનન્તરં સંબભૂવ ॥ ૩,૨.૪૬॥

યદા દશાબ્દાઃ સમતીતા મહાત્મા તદા વાયુઃ સમભૂલ્લોકપૂજ્યઃ ।
કિઞ્ચિન્ન્યૂનત્વં સ્થૂલસૃષ્ટૌ મહાત્મન્નૈતાવતા વાનયોઃ સૌમ્યહાનિઃ ॥ ૩,૨.૪૭॥

સરસ્વતી વત્સરાત્સંબભૂવ હ્યનન્તરં બ્રહ્મણો જન્મકાલાત્ ।
ગિરઃ સકાશાત્કાલતો ન્યૂનતાસ્તિ વાયોસ્તદા હ્યધમત્ત્વે ક્ષતિઃ કા ॥ ૩,૨.૪૮॥

વાયોરનન્તરં વાણી હ્યભૂત્સંવત્સરાત્પરમ્ ।
યાવત્પશ્ચાજ્જનિસ્તાવત્પૂર્વદેહક્ષયો ભવેત્ ॥ ૩,૨.૪૯॥

શેષસ્ત્વિન્દ્રો રુદ્ર એતે ત્રયશ્ચ સમા હ્યેતે જ્ઞાનબલાદિકેષ્વપિ તથાપિ
તેષાં કાલતો ન્યૂનતાસ્તિ કાલોઽપિ તેષાં દ્વિવ્યેસહસ્રવર્ષમ્ ॥ ૩,૨.૫૦॥

અનન્તરુદ્રો બ્રહ્મવાયૂ યથા વા તથા જ્ઞેયો નૈવ હાનિઃ સ્વરૂપે ।
સ્થૂલસ્ય સૃષ્ટૌ બાહ્યસૃષ્ટૌ મહાત્મન્કાલાન્ન્યૂનત્વં સ મયા નૈવ ચિન્ત્યઃ ॥ ૩,૨.૫૧॥

તેષાં સકાશાદ્વારુણી પાર્વતી ચ સૌપર્ણીનામ્ની તિસ્ત્ર એતા મહાત્મન્ ।
દશાબ્દેભ્યોનન્તરં સંબભૂવુઃ સરસ્વતી ભારતીવચ્ચ બોધ્યા ॥ ૩,૨.૫૨॥

ઇન્દ્રો વરો રુદ્રભાર્યાદિકેભ્ય એવં જ્ઞાનં સર્વદા દેહ્યમન્દમ્ ।
એવં જ્ઞાનં યસ્ય ભવેચ્ચ લોકે સ વૈ જ્ઞાની વેદવેદ્યઃ સ એવ ॥ ૩,૨.૫૩॥

ન વૈ જ્ઞાનીત્યન્તરં યો ન વેદ સ વેદવાદી ન ચ વેદપાઠકઃ ॥ ૩,૨.૫૪॥

વેદાક્ષરાણિ યાવન્તિ પઠિતાનિ દ્વિજાતિભિઃ ।
તાવન્તિ હરિનામાનિ પ્રિયાણિ ચ હરેઃસદા ॥ ૩,૨.૫૫॥

મમ સ્વામી હરિર્નિત્યં દાસોહં સર્વદા હરેઃ ।
બ્રહ્માદ્યા દેવતાઃ સર્વા ગુરવો મે યથાક્રમમ્ ॥ ૩,૨.૫૬॥

એતેષાં ચ હરિઃ સ્વામી વેદે સર્વત્ર ગીયતે ।
એવં જાનંસ્તુ યો વેદાન્સમ્પઠેત્સ દ્વિજોત્તમઃ ॥ ૩,૨.૫૭॥

સ વેદપાઠકો જ્ઞેયસ્તદન્યે વેદવાદિનઃ ।
વેદભારભરાક્રાન્તઃ સ વૈ બ્રાહ્મણગર્દભઃ ॥ ૩,૨.૫૮॥

જ્ઞાનાભિમાની વેદમાની ઉભૌ તુ પરસ્પરં હ્યૂચતુઃ સર્વદૈવ ।
જલં વેદો યત્ર વાસો મુરારેરાચાર્યાણાં સંગદોષાદ્દ્વિજાનામ્ ॥ ૩,૨.૫૯॥

મહાપરાધાઃ સંતિ લોકે મહાત્મન્સહસ્રશઃ શતશઃ કોટિશશ્ચ ।
હરિશ્ચ તાન્ક્ષમતે સર્વદૈવ નામત્રયસ્મરણાદ્વૈ કુપાલુઃ ॥ ૩,૨.૬૦॥

સર્વાપરાધાદ્રહિતં દાનમાનૈર્યુક્તં સદા તારતમ્યાચ્ચ હીનમ્ ।
દૃષ્ટ્વાપરાધં તસ્ય વિષ્ણુર્મહાત્મા હાહાકારં કુરુતે ક્રોધબુદ્ધ્યા ॥ ૩,૨.૬૧॥

ઉત્તિષ્ઠ ગોવિન્દ સુવેદવેદ્ય સોવ્યાત્કૃતાખ્યો મયિ સમ્યક્પ્રસીદ ।
ભો કેશવોત્તિષ્ઠ સુખસ્વરૂપ સૃષ્ટૌ વ્યયે વર્તયિતું સમર્થઃ ॥ ૩,૨.૬૨॥

સૃષ્ટ્વા બ્રહ્માણં પ્રેરયેત્પૂજ્યસૃષ્ટૌ સૃષ્ટ્વા રુદ્રં પ્રેરયેત્સંહૃતૌ ચ ।
પ્રાપ્તવ્યયોગ્યાન્બ્રહ્મશેષાદિદેવાન્દૃષ્ટ્વાદૃષ્ટ્વા દેહિ મોક્ષં ચ સમ્યક્ ॥ ૩,૨.૬૩॥

હરે મુરારે સ્વાપહીનાદ્ય તિષ્ઠ કલ્પા દિકાનન્તરજ્ઞાન (રં બુદ્ધિ) (જાન) હીનાત્ ।
સમ્યગ્દૃષ્ટ્વા કર્મદૃષ્ટ્યા મહાત્મલ્લંબ્ધં તમો દાહિ દુઃખસ્વરૂપમ્ ॥ ૩,૨.૬૪॥

દૈત્યાદિકાન્દુઃખમતીન્હ યસ્માત્તમસ્યન્ધેસર્વદા ચિત્સ્વરૂપી ।
તસ્માદાહુર્દુઃસ્વરૂપી હરિસ્ત્વં દુઃખસ્વરૂપાત્ત્વં ચ દુઃખી હરે ત્વમ્ ॥ ૩,૨.૬૫॥

ઉત્તિષ્ઠ નારાયણ વાસુદેવ હ્યુત્તિષ્ઠ કૃષ્ણાચ્યુત માધવેતિ ।
ઉત્તિષ્ઠ વૈકુણ્ઠ દયાર્દ્રમૂર્તે ઉત્તિષ્ઠ લક્ષ્મીશ નમોનમસ્તે ॥ ૩,૨.૬૬॥

ઉત્તિષ્ઠ મધ્વેશ સરસ્વતીશ ઉત્તિષ્ઠ રુદ્રેશ તથાંબિકેશ ।
ઉત્તિષ્ઠ ચન્દ્રેશ તથા શચીશ વિપ્રેશ ભક્તેશ ગવેશ નિત્યમ્ ॥ ૩,૨.૬૭॥

શાસ્ત્રપ્રિયોત્તિષ્ઠ ઋચિ પ્રિયસ્ત્વં યજુઃ પ્રિયોત્તિષ્ઠ નિદાનમૂર્તે ।
સામપ્રિયસ્ત્વં ચ તથા મુરારે અથર્વવેદપ્રિય સર્વદા ત્વમ્ ॥ ૩,૨.૬૮॥

ગદ્યપ્રિયસ્ત્વં ચ પુરાણમૂર્તે સ્તુતિપ્રિયોત્તિષ્ઠ વિચિત્રમૂર્તે ।
સુગાયનપ્રીતિકરસ્ત્વમેવ હ્યુતિષ્ઠ શીઘ્રં કમલા પતિસ્ત્વમ્ ॥ ૩,૨.૬૯॥

એવં સ્તુતો વિષ્ણુરજઃ પુરાણો હ્યતિત્વરાવાનુત્થિતો નિત્યબદ્ધઃ ॥ ૩,૨.૭૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે કૃષ્ણગરુડસંવાદે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
બ્રહ્માવિષ્ણુમહેશ્વરાદિદેવતાતારમ્યનિરૂપણં નામ દ્વિતીયોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૩
શ્રીકૃષ્ણ ઉવાચ ।
બભૂવેચ્છા મમ દેવસ્ય વિષ્ણોઃ સ્રષ્ટું સૃજ્યાન્મોક્ષયોગ્યાંશ્ચ મોક્તુમ્ ।
ઇચ્છાશક્તિઃ સર્વદૈવાસ્તિ વિષ્ણોસ્તથાપિ તદ્વ્યાહરણં ચ લૌકિકમ્ ॥ ૩,૩.૧॥

તદા હરિર્જગૃહે લૌકિકં ચ તમઃ પાનં તેન રૂપેણ ચક્રે ।
તદ્રૂપમાહુઃ પ્રાકૃતં વૈ તદજ્ઞા હ્યન્ધં તમઃ પ્રવિશન્ત્યેવ સર્વે ॥ ૩,૩.૨॥

અવતારા મહાવિષ્ણોઃ સર્વે પૂર્ણાઃ પ્રકીર્તિતાઃ ।
પૂર્ણં ચ તત્પરં રૂપં પૂર્ણાત્પૂર્ણાઃ સમુદ્ગતાઃ ॥ ૩,૩.૩॥

પરાવરત્વં તેષાં તુ વ્યક્તિમાત્રવિશેષતઃ ।
ન દેશકાલસામર્થ્યાત્પારાવર્યં કથઞ્ચન ॥ ૩,૩.૪॥

પૂર્વરૂપં ચ પૂર્ણં ચ પૂર્ણં પદવિતારગમ્? ।

રૂપં તદાત્મન્યાદાય પૂર્ણમેવાવશિષ્યતે ॥ ૩,૩.૫॥

લૌકિકવ્યવહારોયં ભૂભારક્ષપણાદિકઃ ।
તસ્ય દૃષ્ટિં વિના નાન્યો લયઃ કૃષ્ણાદિના ક્વચિત્ ॥ ૩,૩.૬॥

તત્ત્વે પીડા ન કર્તવ્યા તયા દુઃખાનિ વિન્દતિ ।
અત્યન્તપીડનાત્તસ્ય રોગસ્તસ્ય ન સંશયઃ ॥ ૩,૩.૭॥

જ્ઞાતવ્યાંશે તુ પીડા તુ કર્તવ્યા ગુરુણા સહ ।
તમન્તેવાસિનં ચાહુઃ સ એવ ચુ ગુરુઃ સ્મૃતઃ ॥ ૩,૩.૮॥

યે કુર્વન્તિ હરેસ્તત્ત્વવિચારં તુ પરસ્પરમ્ ।
તાવેવ ગુરુશિષ્યૌ તુ વિનતાનન્દસંયુત ॥ ૩,૩.૯॥

ગુરુણાપિ સમં હાસ્યં કર્તવ્યં કુટિલં વિના ।
હર્ષામર્ષયુતઃ શિષ્યો ગુરુઃ કૌટિલ્યસંયુતઃ ॥ ૩,૩.૧૦॥

ઉભૌ તૌ નિરયં યાતો યાવદાચન્દ્રતારકમ્ ।
સાક્ષાદ્ધરિઃ પુરુષઃ પિઙ્ગલાક્ષઃ સ્વમાયાયાં ગુણમય્યાં મહાત્મા ।
સ્વપૌરુષેણૈવ સુમઙ્ગલેન અધાત્તુ વીર્યં ભગવાન્વીર્યવાંશ્ચ ॥ ૩,૩.૧૧॥

ગરુડ ઉવાચ ।
વીર્યસ્વરૂપં બ્રૂહિ મે વાસુદેવ વીર્યે ત્વદીયે સંશયો મે વિભાતિ ।
કિં વીર્યમીશસ્ય સ્વરૂપભૂતં કિં વા વિભિન્નં વદ સાધુ વેત્સિ ॥ ૩,૩.૧૨॥

શ્રીકૃષ્ણ ઉવાચ ।
યદ્વીર્યમાધત્ત હરિઃ સ્વયં પ્રભુર્માયાભિધાયાં વિનતાતનૂજ ।
તદ્વીર્યમાહુર્નૃહરેઃ સ્વરૂપં વિપશ્ચિતો નિશ્ચિતતત્ત્વદર્શિનઃ ॥ ૩,૩.૧૩॥

ભિન્નં તદાહુઃ પ્રાકૃતમેવ ચાહુઃ સ્વનાભિપદ્માદિકવચ્ચ બોધ્યમ્ ।
નૈતાવતા જ્ઞાનરૂપસ્ય વિષ્ણોર્ન વીર્યહાનિરિતિ ચિન્તનીયમ્ ॥ ૩,૩.૧૪॥

વીર્યસ્વરૂપી ભગવાન્વા સુદેવઃ સર્વત્ર દેશેપિ ચ સર્વકાલે ।
સર્વાર્થવાન્યદિ ન સ્યાત્ખગેન્દ્ર તર્હીશ્વરઃ પુરુષો નૈવ સ સ્યાત્ ॥ ૩,૩.૧૫॥

અચિન્ત્યવીર્યૈશ્ચિન્ત્યવીર્યૈર્દ્વિરૂપઃ સ્ત્રીરૂપમેકં પુરુષં તથા પરમ્ ।
ઉભે રૂપે વીર્યવતી ખગેન્દ્ર તયોરભેદશ્ચિન્તનીયો હિ સમ્યક્ ॥ ૩,૩.૧૬॥

સ્ત્રીરૂપવાન્યદિ ન સ્યાત્ખગેંદ્રસ્ત્રીણાં કથં પ્રતિબિંબત્વમેવ ॥ ૩,૩.૧૭॥

સ્ત્રીરૂપમસ્માદ્બ્રહ્મજં (દ્વાસ્તવં) ચિન્તનીયં સ્વરૂપમેતન્નાન્યથા ચિન્તનીયમ્ ।

સ્ત્રીરૂપવન્નૈવ વિચિન્તનીયં નપુંસકં ત્બસ્ય જન્યં હિ વિદ્ધિ ॥ ૩,૩.૧૮॥

નપુંસકં નવૈવ સ્વરૂપભૂતમતો હરૌ નાસ્તિ વિચિન્તનીયમ્ ।
સ્ત્રીબિંબભૂતે હરિરૂપે ખગેન્દ્ર શ્રીરૂપમસ્તીતિ વિચિન્તનીયમ્ ॥ ૩,૩.૧૯॥

ગરુડ ઉવાચ ।
સ્ત્રિયા સ્ત્રિયશ્ચ સંયોગં વ્યર્થમહુર્મનીષિણઃ ।
સ્ત્રીરૂપભૂતે વિંબે તુ સ્ત્રીરૂપાઃ સન્તિ સર્વદા ॥ ૩,૩.૨૦॥

સ્થિતૌ તત્ર નિમિત્તં ચ બ્રૂહિ કૃષ્ણ મમ પ્રભો ॥ ૩,૩.૨૧॥

શ્રીકૃષ્ણ ઉવાચ ।
સ્ત્રીબિંબભૂતસ્ત્રીરૂપે લક્ષ્મીર્ન સ્યાત્ખગેશ્વર ।
નિત્યાવિયોગિની દેવી કથં સ્યાત્પરમાત્મનઃ ॥ ૩,૩.૨૨॥

હરેરનન્તરૂપાણાં સ્ત્રીરૂપાણાં ખગેશ્વર ।
અનન્તાનન્તરૂપેણ નિત્યં શુશ્રૂષણે રતા ॥ ૩,૩.૨૩॥

અતો લક્ષ્મ્યા વિયોગસ્તુ શઙ્કનીયઃ કથઞ્ચન ।
નારાયણો નામ હરિઃ સ્વતન્ત્રઃ શ્રિયા વિના નાસ્તિ કદાપિ તાર્ક્ષ્ય ।
હરેર્મુકુન્દસ્ય પદારવિન્દે શુશ્રૂષમાણા પરમાદરેણ ॥ ૩,૩.૨૪॥

હરિં વિના શ્રીરપિ દેશકાલે નાસ્તીતિ મોક્ષેચ્છુભિરેવ વેદ્યમ્ ।
યસ્યામધાદ્વીર્યમનુક્ષણં ચ સા મામિકા ચેન્દ્રજાલા ત્મિકેતિ ॥ ૩,૩.૨૫॥

વદન્તિ યે અસુરા મૂઢરૂપા અધમતઃ પ્રવિશન્ત્યેવ સર્વે ।
માયા નામ પ્રકૃતિસ્ત્વેમાહુઃ સુસૂક્ષ્મરૂપા ન તુ ચેન્દ્રજાલિકા ॥ ૩,૩.૨૬॥

તસ્યાભિમાનઃ શ્રીરિતિ વેદિતવ્યો વીર્યાધાનં તત્ર તેષાં ચ મેલઃ ।
કાર્યોન્મુખં મેલનં ચાહુરાર્યા ઇતો રૂપં નાહુરાચ્યાશ્ચ વિષ્ણોઃ ॥ ૩,૩.૨૭॥

સાનાદિ નિત્યા સત્યરૂપા ચ વિષ્ણોર્મિથ્યા રૂપા સા કથં સ્યાત્ખગેન્દ્ર ।
સત્યા તનુઃ પ્રકૃતેસ્તન્નિગૂઢા સત્યત્વમાહુર્વ્યવહારાર્થરૂપમ્ ॥ ૩,૩.૨૮॥

વ્યવહારરૂપા સત્યતા ચેત્પ્રકૃત્યાસ્તદા કથં સ્યાદ્યદનાદિભૂતા ।
અનાદિનિત્યા યદિ ન સ્યાત્ખગેન્દ્ર સુશૂક્ષ્મરૂપેણ ન કારણં સ્યાત્ ॥ ૩,૩.૨૯॥

સૂક્ષ્મેણ રૂપેણ ચ કારણં સ્યાત્તર્હિ પ્રપઞ્ચસ્ય ચ કારણં વદ ।
અવિદ્યાયા વશતો વિષ્ણુરેવ નાનારૂપૈર્દૃશ્યતે વિષ્ણુરેવ ॥ ૩,૩.૩૦॥

શાસ્ત્રજ્ઞાનાન્નાશમેતિ હ્યવિદ્યા ન સંશયો હરિણા ચૈક્યમેતિ ।

એવં બ્રૂષે યદિ વાદત્ખગેન્દ્ર વક્ષ્યેહં તે તત્ર યુક્તિં શ‍ૃણુ ત્વમ્ ॥ ૩,૩.૩૧॥

સર્વજ્ઞરૂપસ્ય હિ મે મુરારેઃ કથં હરેર્ઘટતે હ્યજ્ઞતા ચ ।
સૂર્યે યથા તમો નાસ્તિ તથા નારાયણે હરૌ ।
અજ્ઞાનં નાસ્તિ પક્ષીદ્ર કથં તત્ત્વં બ્રવીષ્યહો ॥ ૩,૩.૩૨॥

અતો નાહં બ્રાહ્મણસ્ત્વાદિકાલાદુપાધિસંબન્ધવશાદજ્ઞતાચેત્ ।
સર્વજ્ઞોસૌ કુત્ર પક્ષીન્દ્ર વિષ્ણુરલ્પજ્ઞજીવો જ્ઞાનશૂન્યશ્ચ કુત્ર ॥ ૩,૩.૩૩॥

વિરુદ્ધયોશ્ચાનયોઃ સર્વદૈવ કથં ચૈક્યં સંવાદિષ્યન્તિ વેદાઃ ।
દેશે કાલે સર્વદા દુઃખહીનો જગત્કર્તા પૂર્ણશક્તિઃ સદૈવ ॥ ૩,૩.૩૪॥

જીવઃ સદા સ્વલ્પકર્તાસ્તિ પૂર્ણઃ સંસારરૂપે દુઃખરૂપે ચ નિત્યમ્ ।
વિરુદ્ધયોશ્ચાનયોરૈક્યમાહુરીશસ્ય માયાવશતો માયિનશ્ચ ॥ ૩,૩.૩૫॥

યે વૈષ્ણવા વૈષ્ણવદાસવશ્યાસ્તેષાં દ્રોહં સર્વદા સંચરેદ્યઃ ।
હરિપ્રીતિસ્તેન ભવેન્ન નિત્યમાનન્દવૃદ્ધિસ્તેન ભવેન્ન મુક્તૌ ॥ ૩,૩.૩૬॥

માયી સદા માયિભૃત્યસ્તથાપિ ભેદજ્ઞાનાન્નિન્દ્યતે કાર્યતે ચ ।
તેનાપિ તેષાં દુઃખવૃદ્ધિર્ભવેચ્ચ હ્યધં તમઃ પુનરાવૃત્તિહીનમ્ ॥ ૩,૩.૩૭॥

ખગેન્દ્રાતઃ પ્રકૃતિઃ સૂક્ષ્મરૂપા સા નિત્યા સા સત્યભૂતા સદૈવ ।
એવં સ્વયં કાલવાય્વાદિકાનાં પરા (રમા)ણવઃ સત્યરૂપાશ્ચ સન્તિ ॥ ૩,૩.૩૮॥

પરા (માણૂ)નાં લક્ષણં વેદિતવ્યં જ્ઞાનેચ્છુભિર્નાન્યથા વેદિતવ્યમ્ ।
પદાર્થાનાં પાર્થિવાનાં ખગેન્દ્ર વિશેષાણાં ચરમાખ્યો વિશેષઃ ॥ ૩,૩.૩૯॥

સ એવઃ સ્યાત્પરમાણુર્દ્વિજેન્દ્ર યોન્ત્યોવિ (વ) શેષોવયવશ્ચ સ સ્મૃતઃ ॥ ૩,૩.૪૦॥

ગરુડ ઉવાચ ।
હે કૃષ્ણ હે માધવ સાત્ત્વતાં પતે પદાર્થાનાં ચરમાંશઃ પરાણુ ॥ ૩,૩.૪૧॥

ઇતિ પ્રોક્તં તત્ર મે સંશયોસ્તિ યોન્ત્યો વિશેષઃ સ તુ નાંશયુક્તઃ ।
યો હ્યંશયુક્તો ન તુ સોંત્યો વિશેષ એવં મમાભાતિ વચસ્તુ તથ્યમ્ ॥ ૩,૩.૪૨॥

શ્રીકૃષ્ણ ઉવાચ ।
ય એવ લોકે સંસ્થિતા માનુષાસ્તુ વિશેષાણાં દર્શને શક્તિયુક્તાઃ ।
તથાપિ તે યસ્ય ચાંશિત્વમેવ વિશેષં વૈ નૈવ દ્રષ્ટું સમર્થાઃ ॥ ૩,૩.૪૩॥

તમેવાહુશ્ચરમાંશં વિશેષં યે ચૈવમાહુર્મુનયસ્તેન ચાન્યે ।
યે કાણાદા ગૌતમાદ્યાઃ ખગેન્દ્ર નિરંશકં પરમાણું વદન્તિ ॥ ૩,૩.૪૪॥

અનન્તાંશૈઃ સંયુતત્વેપિ તાંશ્ચ નિરંશિનો ભ્રાન્તિદૃષ્ટ્યા વદન્તિ ।
તસ્માત્પરા (રમા) ણોઃ પરમાણુત્વમસ્તિ તદંશાનાં વિનતાગર્ભજાત ॥ ૩,૩.૪૫॥

પરા (રમા) ણૂનામેકદેશે ખગેન્દ્ર તન્નો સંતિ પ્રાણિનાં રાશયશ્ચ ।
પ્રત્યેકશ સંતિ રૂપા હરેશ્ચ હ્યતશ્ચ તત્પરમાણોરણીયઃ ॥ ૩,૩.૪૬॥

યો વા ત્વણીયાન્પરમસ્ય વિષ્ણોઃ સ એવ રૂપો મહતો મહીયાન્ ।
તેષામન્યોન્યં ન વિશેષોસ્તિ કશ્ચિદચિન્ત્યરૂપે ચ વિચિન્તનીયઃ ॥ ૩,૩.૪૭॥

કાલકોટિવિહીનત્વં કાલાનન્ત્યં વિદુર્બુધાઃ ।
દેશકોટિવિહીનત્વં દેશાનન્ત્યં વિદુર્બુધાઃ ॥ ૩,૩.૪૮॥

ગુણાનામપ્રમેયત્વે ગુણાનન્ત્યં વિદુર્બુધાઃ ।
આનન્ત્યં ત્રિવિધં નિત્યં હરેર્નાન્યસ્ય કસ્યચિત્ ॥ ૩,૩.૪૯॥

તસ્ય સર્વસ્વરૂપેષુ ચાનન્ત્યં તુ ત્રિલક્ષણમ્ ।
તથાપિ દેશતસ્તસ્ય પરિચ્છેદોઽપિ યુજ્યતે ॥ ૩,૩.૫૦॥

પરિચ્છેદસ્તથા વ્યાપ્તેરેકરૂપેપિ યુજ્યતે ।
તસ્યાચિન્ત્યાદ્ભુતૈશ્વર્યં વ્યવહારાર્થમેવ ચ ॥ ૩,૩.૫૧॥

ગુણતઃ કાલતશ્ચૈવ પરિચ્છેદો ન કુત્રચિત્ ।
વ્યાપ્તત્વં દેશતો હ્યસ્તિ સર્વભૂતેષુ યદ્યપિ ॥ ૩,૩.૫૨॥

ન ચ ભેદઃ ક્વચિત્તસ્ય હ્યણુમાત્રેપિ યુજ્યતે ।
તથાપિ વિદ્યતેણુત્વં તસ્માદૈશ્વર્યયોગતઃ ॥ ૩,૩.૫૩॥

તસ્માદ્વિદ્ધ્યવતારાર્થં વ્યાપ્તત્વં ચાપિ ભણ્યતે ।
યત્તસ્ય વ્યાપકં રૂપં પરં નારાયણં વિદુઃ ॥ ૩,૩.૫૪॥

અતશ્ચ પરમાણૂનાં પાર્થિવાઽનન્ત્યવાદિનામ્ ।
ભેદઃ પરસ્પરં જ્ઞેયસ્તથેશસ્ય મહાત્મનઃ ॥ ૩,૩.૫૫॥

જડેશયોર્જડાનાં ચ જીવાનાં ચ પરસ્પરમ્ ।
તથૈવ જડજીવાનાં નિત્યં ભેદો જડેશયોઃ ॥ ૩,૩.૫૬॥

પઞ્ચ ભેદા ઇમે નિત્યં સર્વાવસ્થાસુ સર્વશઃ ।
એતાદૃશ્યાં તુ માયાયાં વીર્યમાધત્ત વીર્યવાન્ ॥ ૩,૩.૫૭॥

પુરુષાખ્યો હરિસ્તસ્માત્ત્રિગુણાનસૃજત્પ્રભુઃ ॥ ૩,૩.૫૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે તૃતીયાંશે બ્રહ્મકાણ્ડે
ભગવદ્વીર્યસ્વરૂપતદાધાનદ્વારકગુણત્રય સૃષ્ટિજડેશભેદાદિનિરૂપણં નામ તૃતીયોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૪
શ્રીકૃષ્ણ ઉવાચ ।
યથા સસર્જ ભગવાંસ્ત્રીન્ગુણાન્પ્રકૃતેસ્તદા ।
લક્ષ્મીસ્ત્રિરૂપા સંભૂતા શ્રીર્ભૂર્દુર્ગેતિ સંજ્ઞિતા ॥ ૩,૪.૧॥

સત્ત્વાભિમાનિની શ્રીસ્તુ ભૂર્દેવી રજમાનિની ।
તમોભિમાનિની દુર્ગા હ્યેવમાહુર્મનીષિણઃ ॥ ૩,૪.૨॥

અન્તરં ન વિજાનીયાદ્રૂપાણાં ચ પરસ્પરમ્ ।
ગુણાનાં ચૈવ સંબન્ધાદ્દુર્ગાદીનાં ખગેશ્વર ॥ ૩,૪.૩॥

અન્તરં યે વિજાનન્તિ તે યાન્ત્યન્ધન્તમઃ પરમ્ ।
પુરુષસ્તુ ત્રિરૂપોભૂદ્વિષ્ણુર્બ્રહ્મા ભવેતિસઃ ॥ ૩,૪.૪॥

સત્ત્વેન લોકાન્વર્ધયિતું વિષ્ણુઃ સાક્ષાદ્ધરિઃ સ્વયમ્ ।
સૃષ્ટિં કર્તું ચ રજસા બ્રહ્મણિ પ્રાવિશદ્ધરિઃ ॥ ૩,૪.૫॥

આદ્યો બ્રહ્મા સ વિજ્ઞેયો ન તુ સાક્ષાદ્ધરિઃ સ્વયમ્ ।
તમસાપિ સમાન્હન્તું રુદ્રે ચ પ્રાવિશદ્ધરિઃ ॥ ૩,૪.૬॥

રુદ્રે સ્થિતો રુદ્રસંજ્ઞો ન રુદ્રસ્તુ હરિઃ સ્વયમ્ ।
વિષ્ણુરેવ હરિઃ સાક્ષાત્તાવુભૌન હરી સ્મૃતૌ ॥ ૩,૪.૭॥

આવિષ્ટરૂપૌ વિજ્ઞેયૌ બ્રહ્મરુદ્રાભિધાયકૌ ।
એવં જ્ઞાત્વા મોક્ષમેતિ નાન્યથા તુ કથઞ્ચન ॥ ૩,૪.૮॥

વિષ્ણુબ્રહ્માદિરૂપાણામૈક્યં જાનન્તિ યે દ્વિજાઃ ।
તે યાન્તિ નરકં ઘોરં પુનરાવૃત્તિવર્જિતમ્ ॥ ૩,૪.૯॥

ગુણત્રયં પ્રવિષ્ટસ્તુ પુરુષો હરિરવ્યયઃ ।
કાર્યોન્મુખં યથા ભૂયાત્ક્ષોભયામાસ વૈ તથા ॥ ૩,૪.૧૦॥

જાતક્ષોભાદ્ભગવતો મહાનાસીદ્ગુણત્રયાત્ ।
ગુણત્રયે વિદ્યમાનાદ્ભાગાદેવ ન સંશયઃ ॥ ૩,૪.૧૧॥

મહતો બ્રહ્મવાયૂ ચ જજ્ઞાતે ખાભિમાનિનૌ ।
તસ્ય સંવત્સરાત્પશ્ચાદ્યમલૌ સંબભૂવતુઃ ॥ ૩,૪.૧૨॥

રજઃ પ્રધાનં યત્તત્વં મહત્તત્ત્વમિતીરિતમ્ ।
સર્ગં ત્વિમં વિજાનીયાદ્ગુણવૈષમ્યનામકમ્ ॥ ૩,૪.૧૩॥

ગરુડ ઉવાચ ।
મહત્તત્ત્વસ્વરૂપસ્ય જ્ઞાનાર્થં દેવકીસુત ।
ત્વયોક્તા ગુણવૈષમ્યનામિકા સૃષ્ટિરુત્તમા ॥ ૩,૪.૧૪॥

ગુણવૈષમ્યશબ્દાર્થં મમ બ્રૂહિ મહાપ્રભો ।
શ્રીકૃષ્ણ ઉવાચ ।
ગુણવૈષમ્યશબ્દાર્થજ્ઞાપનાય ખગેશ્વર ॥ ૩,૪.૧૫॥

અપિક્ષિતં ચ તત્રાદૌ ગુણસામ્યં ન સંશયઃ ।
સમ્યગ્જ્ઞાપયિતું તત્ર ખાદૌ તાવત્સ્વગેશ્વર ॥ ૩,૪.૧૬॥

રાશિભૂતં ગુણાનાં તુ દર્શયિષ્યે સ્થિતિં ચ વૈ ।
રાશીભૂતસ્ય તસમઃ સકાશાદ્વિનતાસુત ॥ ૩,૪.૧૭॥

રાશીભૂતં રજો જ્ઞેયન્દ્વિગુણં તત્તુ નાન્યથા ।
રાશીભૂતસ્ય રજસઃ સકાશાદ્વિનતાસુત ॥ ૩,૪.૧૮॥

રાશીભૂતં તથા સત્ત્વં દ્વિગુણં સમુદાહૃતમ્ ।
મૂલપ્રકૃતિજા હ્યેતે ન મૂલા પ્રકૃતિઃ સ્મૃતા ॥ ૩,૪.૧૯॥

યતઃ પ્રકૃતિરૂપાણાં પરિચ્છેદો ન વિદ્યતે ।
અતઃ પ્રકૃતિજા જ્ઞેયા ન મૂલાસ્તે ખગેશ્વર ॥ ૩,૪.૨૦॥

એવં તવ ગુણાનાઞ્ચ પરિમાણં ખગેશ્વર ।
ઉક્તં સ્વરૂપં તેષાં તુ તવ સમ્યક્ખગેશ્વર ॥ ૩,૪.૨૧॥

તત્ર રાશિત્રયે સત્ત્વં કેવલં સમુદાહૃતમ્ ।
રજસ્તમોભ્યાં ગરુડ હ્યવિમિશ્રં હ્યતસ્તુ તત્ ॥ ૩,૪.૨૨॥

કેવલં સત્ત્વમિત્યુક્તં ન તુ શ્રેષ્ઠત્વતઃ પ્રભો ।
સૃષ્ટિકાલે કેવલં સ્યાત્પ્રલયે મિશ્રિતં ભવેત્ ॥ ૩,૪.૨૩॥

સર્વદાપ્યવિમિશ્રં ચ સત્ત્વરાશિં ખગેશ્વર ।
સર્વદાપિ વિમિશ્રં ચ સત્ત્વરાશિં દ્વિજોત્તમ ॥ ૩,૪.૨૪॥

યે વિજાનન્તિ તે સર્વે વિશન્તિ હ્યધરં તમઃ ।
રજસ્તમોગુણૌ વીન્દ્ર ઇતરાભ્યાં વિમિશ્રિતૌ ॥ ૩,૪.૨૫॥

સૃષ્ટૌ પ્રલયકાલેપિ મિશ્રાવેવ ખગેશ્વર ।
રાશિભૂતેપિ રજસિ રજોભાગાચ્છતાધિકમ્ ॥ ૩,૪.૨૬॥

સત્ત્વં ચ મિશ્રિતં જ્ઞેયં નાન્યથા પક્ષિસત્તમ ।
રજસઃ શતભાગાનાં મધ્યે તુ વિનતાસુત ॥ ૩,૪.૨૭॥

ય એકો ભાગ ઉદ્દિષ્ટસ્તાવત્પરિમિતં તમઃ ।
રાશિભૂતેપિ રજસિ મિશ્રિતં પરિકીર્તિતમ્ ॥ ૩,૪.૨૮॥

રજોરાશિસ્થિતિસ્ત્વેવં તાત વ્યાપ્તં તમોગુણૈઃ ।
રાશિભૂતેપિ તમસિ સત્ત્વં ચ વિનતાસુત ॥ ૩,૪.૨૯॥

તમઃ સકાશાદ્ગરુડ દશભાગાધિકેન ચ ।
મિશ્રિતં ભવતીત્યેવં જ્ઞાતવ્યં નાત્ર સંશયઃ ॥ ૩,૪.૩૦॥

તમસો દશભાગાનાં મધ્યે તુ વિનતાસુત ।
ય એકો ભાગ ઉદ્દિષ્ટસ્તાવત્પરિમિતં રજઃ ॥ ૩,૪.૩૧॥

રાશિભૂતેપિ તમસિ મિશ્રિતં ભવતિ ધ્રુવમ્ ।
તમોરાશિસ્થિતિસ્ત્વેવં જ્ઞાતવ્યા પક્ષિસત્તમ ॥ ૩,૪.૩૨॥

ગરુડ ઉવાચ ।
રશિભૂતેપિ રજસિ રાશિભૂતે તમસ્યપિ ।
સત્ત્વાંશા હ્યધિકાઃ સંતીત્યેવમુક્તં મયાનઘ ॥ ૩,૪.૩૩॥

તત્ર મે સંશયો હ્યસ્તિ શ◌ૃણુ ત્વં સાત્ત્વતાં પતે ।
યદ્રાશ્યાં યદ્રા શિભાગા હ્યધિકાઃ સંતિ યાવતા ॥ ૩,૪.૩૪॥

તાવતા વ્યવહારઃ સ્યાત્ક્ષીરનીરમિવ પ્રભો ।
શ્રુત્વા સ ગરુડેનોક્તં ભગવાન્પુરુષોત્તમઃ ॥ ૩,૪.૩૫॥

ઉવાચ પર મપ્રીત્યા સંસ્તુવન્ગરુડં હરિઃ ।
શ્રીકૃષ્ણ ઉવાચ ।
રજોરાશ્યા તમોરાશ્યા સત્ત્વરાશ્યધિકા સદા ॥ ૩,૪.૩૬॥

મિશ્રિતં ચાપિ પક્ષીન્દ્ર ન સત્તવમિતિ કીર્ત્યતે ।
રજોરાશિસ્તમોરાશિરિત્યેવં વિબુધા વિદુઃ ॥ ૩,૪.૩૭॥

વિષં તુ ચરુદુગ્ધસ્થં વિષમિત્યુચ્યતે યથા ।
એવં મયોક્તા ગરુડ ગુણાનાં નિજસંસ્થિતિઃ ॥ ૩,૪.૩૮॥

સામ્યાવસ્થાં ગુણાનાં ચ શૃણ્વિદાનીં ખગેશ્વર ।
રાશીકૃતાચ્ચ રજસઃ જન્યં યચ્ચ કગેશ્વર ॥ ૩,૪.૩૯॥

મહત્તત્ત્વે પ્રવિષ્ટં ચ યદ્રજઃ પરિકીર્તિતમ્ ।
પ્રલયે સમનુપ્રાપ્તે મહત્તત્ત્વે સ્થિતં રજઃ ॥ ૩,૪.૪૦॥

દ્વાદશાંશેન તુ હ્યદ્ધા વિભક્તં ભવતિં પ્રભો ।
રાશીભૂતે હિ સત્ત્વે તુ દશભાગેન મિશ્રિતમ્ ॥ ૩,૪.૪૧॥

સમ્યક્ભવતિ પક્ષીન્દ્ર તથૈકાંશેન ચાણ્ડજ ।
તમોરાશ્યા મિશ્રિતં ચ ભવત્યેવ ન સંશયઃ ॥ ૩,૪.૪૨॥

અન્યેનૈકેન ભાગેન રજોરાશ્યા ખગેશ્વર ।
મિશ્રિતં ભવતીત્યેવં જ્ઞાતવ્યં નાન્યથા ક્વચિત્ ॥ ૩,૪.૪૩॥

ગુણત્રયેપિ ભગવાન્મહત્તત્ત્વસ્ય ચાણ્ડજ ।
એવં લયસ્તુ જ્ઞાતવ્યો હૃદિ તત્ત્વાર્થવોદિભિઃ ॥ ૩,૪.૪૪॥

એવં ગુણત્રયાણાં ચ મિશ્રિતત્ત્વાત્ખગેશ્વર ।
ગુણસામ્યમિતિ પ્રાહુરેવં જાનીહિ વૈ ખગ ॥ ૩,૪.૪૫॥

અન્યથા યે વિજાનન્તિ તે યાન્તિ હ્યધરં તમઃ ।
ગરુડ ઉવાચ ।
રાશીકૃતગુણાનાં ચ ત્રયાણાં પરમેશ્વર ॥ ૩,૪.૪૬॥

વિશાલાનાં પરં બ્રહ્મન્પ્રલયે ગુણસામ્યતા ।
કથં બ્રૂહિ મહાભાગ એતત્તત્ત્વં સમાસતઃ ॥ ૩,૪.૪૭॥

શ્રીકૃષ્ણ ઉવાચ ।
રાશીભૂતગુણાનાં તુ ત્રયણામપિ સત્તમ ।
તદા વિમિશ્રિતત્વેન હ્યવસ્થાનં વિદુર્બુધાઃ ॥ ૩,૪.૪૮॥

ઇદાનીં ગુણવૈષમ્યં શૃણુ સમ્યઙ્મમ પ્રિય ।
સૃષ્ટિકાલે તુ સમ્પ્રાપ્તે યત્પૂર્વં પ્રલયે ખગ ॥ ૩,૪.૪૯॥

દશભાગૈશ્ચ સત્ત્વે તુ મિશ્રિતં યદ્ર જસ્તથા ।
તમસ્યપ્યેકભાગેન પ્રવિષ્ટં યત્તુ તદ્રજઃ ॥ ૩,૪.૫૦॥

રજસ્યપ્યેકભાગેન પ્રવિષ્ટં યચ્ચ તદ્રજઃ ।
એવં દ્વાદશભાગૈશ્ચ પ્રવિષ્ટં સર્વશો રજઃ ॥ ૩,૪.૫૧॥

સત્ત્વસ્તૈર્દશભાગૈશ્ચ તથૈકેન રજોંશિના ।
એવમેકાદશૈર્ભાગૈસ્તમસ્થાંશેન વૈ વ્દિજ ॥ ૩,૪.૫૨॥

મિશ્રિતં ભવતિ હ્યદ્ધા મહત્તત્ત્વં તદા સ્મૃતમ્ ।
એતદન્યો વિશેષશ્ચ મન્તધ્યો વિનતાસુત ॥ ૩,૪.૫૩॥

એકાંશસ્તામસો જ્ઞેયો મહત્તત્ત્વે ન સંશયઃ ।
એવં ત્રયોદશૈર્ભાગૈર્મિશ્રિતં તચ્ચ સત્તમ ॥ ૩,૪.૫૪॥

એવમેતદ્વિજાનીયાન્નાન્યથા તુ કથઞ્ચન ।
ગરુડ ઉવાચ ।
ચતુર્મુખાચ્છ્રુતં પૂર્વં ભગવન્સાત્ત્વતાં પતે ॥ ૩,૪.૫૫॥

ચતુર્ભાગાત્સમુત્પન્નં મહત્તત્ત્વમિતિ પ્રભો ।
તત્રૈકાંશસ્તમઃ પ્રોક્તઃ ત્રિભાગો રજ એવ ચ ॥ ૩,૪.૫૬॥

તદાહુર્બ્રહ્મણો રૂપં ગુણવૈષમ્યનામકમ્ ।
ચતુર્ભાગાત્મકં પ્રોક્તં મહત્તત્ત્વં શ્રુતં મયા ॥ ૩,૪.૫૭॥

ત્રયોદશાંશૈઃ સંભૂતમિતિ પ્રોક્તં ત્વયાનઘ ।
તદેતત્સંશયં છિન્ધિ કૃપાલો ભક્તવત્સલ ॥ ૩,૪.૫૮॥

શ્રીકૃષ્ણ ઉવાચ ।
બ્રહ્મોક્તમ્ય મયોક્તસ્ય વિવાદો નાસ્તિ સર્વથા ।
મૂલસત્ત્વે મિશ્રિતં ચ દશભાગેન યદ્રજઃ ॥ ૩,૪.૫૯॥

તત્સર્વં ચ મિલિત્વૈવ ત્વેકો ભાગસ્તુ કીર્તિતઃ ।
મૂલે રજસિ યચ્ચોક્તો રજોભાગઃ ખગેશ્વર ॥ ૩,૪.૬૦॥

ભાગે દ્વિતીયે વિજ્ઞેયસ્તદ્રજો નાત્ર સંશયઃ ।
મૂલે તમસિ યચ્ચોક્તો રજોભાગસ્તથૈવ ચ ॥ ૩,૪.૬૧॥

તૃતીયભાગો વિજ્ઞેયો નાત્ર કાર્યા વિચારણા ।
તથા મૂલે ચ તમસિ હ્યેકો ભાગસ્તમઃ સ્મૃતઃ ॥ ૩,૪.૬૨॥

એવં ત્રિભાગો રજસઃ એકાંશસ્તમસઃ સ્મૃતઃ ।
તદાહુર્બ્રહ્મણો દેહં ગુણવૈષમ્યનામકમ્ ॥ ૩,૪.૬૩॥

ગરુડ ઉવાચ ।
મહત્તત્ત્વસ્ય ચત્વારો ભાગાસ્તેષુ રજસ્ત્રયઃ ।
તમસસ્ત્વેક એવેતિ ત્વયોક્તં ગરુડધ્વજ ॥ ૩,૪.૬૪॥

રજોભાગાત્મકો દેહોઃ બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
ઇતિ પ્રતીયતે બ્રહ્મન્વચનાત્તવ માધવ ॥ ૩,૪.૬૫॥

શુદ્ધસત્ત્વાત્મકો દેહો બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
એવં હિ શ્રૂયતે કૃષ્ણ સંશયો મેત્ર બાધતે ॥ ૩,૪.૬૬॥

તમેવં સંશયં છિન્ધિ યદ્ધિ તચ્છ્રોતુમર્હતિ ।
શ્રીકૃષ્ણ ઉવાચ ।
ત્રિભાગભૂતે રજસિ તથા દ્વાદશધાપિ ચ ॥ ૩,૪.૬૭॥

રજસોપેક્ષયા સત્ત્વં દશાંશાધિકમેવ ચ ।
પ્રવિષ્ટમસ્તીતિ ખગ જ્ઞાતવ્યં તચ્છૃણુ દ્વિજ ॥ ૩,૪.૬૮॥

તમસોપેક્ષયા સત્ત્વં દશાંશાધિકમેવ વૈ ।
પ્રવિષ્ટમસ્તીતિ ખગ વક્તવ્યં નાત્ર સંશયઃ ॥ ૩,૪.૬૯॥

તમસોપેક્ષયા તત્ર તમ એકાદશં સ્મૃતમ્ ।
એકાંશસ્તુ રજો જ્ઞેયમેવમાહુર્મનીષિણઃ ।
એવં ચ મિલિતાન્ભાગાન્વક્ષ્યે શ્ૃણુ મહામતે ॥ ૩,૪.૭૦॥

મહત્તત્ત્વસમુત્પત્તા ઉપાદાનં ખગેશ્વર ।
ત્રયોદશાંશા વિજ્ઞેયા દ્વાદશાશં રજઃ સ્મૃતમ્ ॥ ૩,૪.૭૧॥

એકાંશસ્તમસો જ્ઞેયસ્તત્ર ભાગાચ્છૃણુ દ્વિજા ।
આદૌ તુ દ્વાદશાંશેષુ ભાગાન્વક્ષ્યામિ તચ્છૃણુ ॥ ૩,૪.૭૨॥

એકાંશસ્તમસો જ્ઞેયસ્તદ્દશાં શાધિકં રજઃ ।
તચ્છતાંશાધિકં સત્ત્વમેવમાહુર્મનીષિણઃ ॥ ૩,૪.૭૩॥

એકાંશતમસિ હ્યેવં વિભાગાચ્છૃણુ સત્તમ ।
એકાંશસ્તુ રજો જ્ઞેયસ્તમો હ્યેકા દશાધિકમ્ ॥ ૩,૪.૭૪॥

તમોભાગાસ્તુ વિજ્ઞેયાસ્તદ્દશાંશાધિકઃ સ્મૃતઃ ।
સત્ત્વભાગ ઇતિ જ્ઞેયો મહત્તત્ત્વે ખગેશ્વર ॥ ૩,૪.૭૫॥

સત્ત્વાંશો બહુલો યસ્માચ્છુદ્ધસત્ત્વં ચતુર્મુખઃ ।

ઉત્પત્તિર્મહતશ્ચોક્તા એવં ચ વિનતાસુત ॥ ૩,૪.૭૬॥

તજ્જ્ઞાનાન્મોક્ષમાપ્નોતિ નાન્યથા તુ કથઞ્ચન ॥ ૩,૪.૭૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે કૃષ્ણ ગરુડસંવાદે તૃતીયાંશે બ્રહ્મકાણ્ડે ગુણવૈષમ્યભેદબ્રહ્મદેહસ્વરૂપગુણસામ્યનિરૂપણં નામ ચતુર્થોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૫

એતાદૃશે મહત્તત્ત્વે લક્ષ્મ્યા સહ હરિઃ સ્વયમ્ ।
પ્રવિવેશ મહાભાગ ક્ષોભયામાસ વૈ હરિઃ ॥ ૩,૫.૧॥

અહન્તત્ત્વમભૂત્તસ્માજ્જ્ઞાનદ્રવ્યક્રિયાત્મકમ્ ।
અહઙ્કારસમુત્પત્તાવેકાંશસ્તમસિ સ્મૃતઃ ॥ ૩,૫.૨॥

તદ્દશાંશાધિકરજસ્તદ્દશાંશાધિકં પ્રભો ।
સત્ત્વમિત્યુચ્યતે સદ્ભિર્હ્યેતદાત્મા ત્વહં સ્મૃતમ્ ॥ ૩,૫.૩॥

અહન્તત્ત્વાભિમાની તુ આદૌ શેષો બભૂવહ ।
સહસ્રાબ્દાચ્ચ પશ્ચાત્તૌ જાતૌ ખગહરૌ દ્વિજ ॥ ૩,૫.૪॥

અહન્તત્ત્વે ખગ હ્યેષુ પ્રવિષ્ટો હરિરવ્યયઃ ।
ક્ષોભયામાસ ભગવાલ્લઙ્ક્ષ્મ્યા સહ હરિઃ સ્વયમ્ ॥ ૩,૫.૫॥

વૈકારિકસ્તામસશ્ચ તૈજસશ્ચેત્યહં ત્રિધા ।
ત્રિધા બભૂવ રુદ્રોઽપિ યતસ્તેષાં નિયામકઃ ॥ ૩,૫.૬॥

વૈકારિકસ્થિતો રુદ્રો વૈકારિક ઇતિ સ્મૃતઃ ।
તામસે તુ સ્થિતો રુદ્રસ્તામસો હ્યભિધીયતે ॥ ૩,૫.૭॥

તૈજસે તુ સ્થિતો રુદ્રો લોકે વૈ તૈજસઃ સ્મૃતઃ ।
તૈજસે તુ હ્યહન્તત્ત્વે લક્ષ્મ્યા સહ હરિઃ સ્વયમ્ ॥ ૩,૫.૮॥

વિશિત્વા ક્ષોભયામાસ તદાસૌ દશધા ત્વભૂત્ ।
શ્રોત્રં ચક્ષુઃ સ્પર્શનં ચ રસનં ઘ્રાણમેવ ચ ॥ ૩,૫.૯॥

વાક્પાણિપાદં પાયુશ્ચ ઉપસ્થેતિ દશ સ્મૃતાઃ ।
વૈકારિકે હ્યહન્તત્ત્વે પ્રવિશ્ય ક્ષોભયદ્ધરિઃ ॥ ૩,૫.૧૦॥

મહત્તત્ત્વાદિમા અદાવિન્દ્રિયાણાં ચ દેવતાઃ ।
એકાદશવિધા આસન્ક્રમેણ તુ ખગેશ્વર ॥ ૩,૫.૧૧॥

મનોભિમાનિ ની હ્યાદૌ વારુણી ત્વભવત્તદા ।
અનન્તરં ચ સૌપર્ણી ગૌરોજાપિ તથૈવ ચ ॥ ૩,૫.૧૨॥

શેષાદનન્તરાસ્તાસાં દશવર્ષાદનંરમ્ ।
ઉત્પત્તિરિતિ વિજ્ઞેયં ક્રમેણ તુ ખગેશ્વર ॥ ૩,૫.૧૩॥

મનોભિમાનિનાવન્યાવિન્દ્રકામૌ પ્રજજ્ઞતુઃ ।
તાર્ક્ષ્ય હ્યનન્તરૌ જ્ઞેયૌ મુક્તૌ સંસાર એવ ચ ॥ ૩,૫.૧૪॥

તતસ્ત્વગાત્મા હ્યભવત્સોહં કારિક ઈરિતઃ ।
તતઃ પાણ્યાત્મકાશ્ચૈવ જજ્ઞિરે પક્ષિસત્તમ ॥ ૩,૫.૧૫॥

શચી રતિશ્ચાનિરુદ્ધસ્તથા સ્વાયંભુવો મનુઃ ।
બૃહસ્પતિસ્તથા દક્ષ એતે પાણ્યાત્મકાઃ સ્મૃતાઃ ॥ ૩,૫.૧૬॥

દક્ષસ્યાનન્તરં જજ્ઞે પ્રવાહો નામ ચાણ્ડજ ।
સ એવોક્તશ્ચાતિંવાહો યાપયત્યાત્મચોદિતઃ ॥ ૩,૫.૧૭॥

હસ્તાદનન્તરં જ્ઞેયો ન તુ શચ્યાદિવત્સ્મૃતઃ ।
તતોભવન્મહાભાગ ચક્ષુરિદ્રિયમાત્મનઃ ॥ ૩,૫.૧૮॥

સ્વાયંભુવમનોર્ભાર્યા શતરૂપા યમસ્તથા ।
ચન્દ્રસૂર્યૌ તુ ચત્ત્વારશ્ચક્ષુરિન્દ્રિયમાનિનઃ ॥ ૩,૫.૧૯॥

ચન્દ્રઃ શ્રોત્રાભિમાનીતિ તથા જ્ઞેયઃ ખગેશ્વર ।
જિહ્વેન્દ્રિયાત્મા વરુણઃ સૂર્યસ્યાનન્તરોભવત્ ॥ ૩,૫.૨૦॥

વાગિન્દ્રિયાભિમાનિન્યો હ્યભવન્વરુણાદનુ ।
દક્ષપત્ની પ્રસૂતિશ્ચ ભૃગુરગ્નિસ્તર્થવ ચ ॥ ૩,૫.૨૧॥

તત્ર વૈતે મહાત્માનો વાગિન્દ્રિયનિયામકાઃ ।
યે ક્રવ્યાદાદયશ્ચોક્તાસ્તેનન્તત્ત્વનિયામકાઃ ॥ ૩,૫.૨૨॥

સામ્યત્વાચ્ચ તથૈવોક્તિર્ન તુ તત્ત્વાભિમાનિતઃ ।
ઉપસ્થમાનિનો વીન્દ્ર બભૂવુસ્તદનન્તરમ્ ॥ ૩,૫.૨૩॥

વિશ્વામિત્રો વસિષ્ટોત્રિર્મરીચિઃ પુલહઃ ક્રતુઃ ।
પુલસ્ત્યોઙ્ગિરસશ્ચૈવ તથા વૈવસ્વતો મનુઃ ॥ ૩,૫.૨૪॥

મન્વાદયોનન્તસંખ્યા ઉપસ્થાત્માન ઈરિતાઃ ।

પાયોશ્ચ માનિનો વીન્દ્ર જજ્ઞિરે તદનન્તરમ્ ॥ ૩,૫.૨૫॥

સૂર્યેષુ દ્વાદશસ્વેકો મિત્રસ્તારા ગુરોઃ પ્રિયા ।
કોણાધિપો નિરૃતિશ્ચ પ્રવહપ્રિયા ॥ ૩,૫.૨૬॥

ચત્ત્વાર એતે પક્ષીન્દ્ર વાયુતત્ત્વાભિમાનિનઃ ।
ઘ્રાણાભિમાનિનઃ સર્વે જજ્ઞિરે દ્વિજસત્તમ ॥ ૩,૫.૨૭॥

વિષ્વવસેનો વાયુપુત્રૌ હ્યશ્વિનૌ ગણપસ્તથા ।
વિત્તપઃ સપ્ત વસવ ઉક્તો હ્યાગ્નિસ્તથાષ્ટમઃ ॥ ૩,૫.૨૮॥

સત્યાનાં શ‍ૃણુ નામાનિ દ્રોણઃ પ્રાણો ધ્રુવસ્તથા ।
અર્કે દોષસ્તથા વસ્કઃ સપ્તમસ્તુ વિભાવસુઃ ॥ ૩,૫.૨૯॥

દશરુદ્રાસ્તથા જ્ઞેયા મૂલરુદ્રો ભવઃ સ્મૃતઃ ।
દશ રુદ્રસ્ય નામાનિ શ‍ૃણુષ્વ દ્વિજસત્તમ ॥ ૩,૫.૩૦॥

રૈવન્તેયસ્તથા ભીમો વામદેવો વૃષાકપિઃ ।
અજૈકપાદહિર્વુધ્ન્યો બહુરૂપો મહાનિતિ ॥ ૩,૫.૩૧॥

દશ રુદ્રા ઇતિ પ્રોક્તાઃ ષડાદિત્યાઞ્છૃણુ દ્વિજ ।
ઉરુક્રમસ્તથા શક્રો વિવસ્વાન્વરુણસ્તથા ॥ ૩,૫.૩૨॥

પર્જન્યોતિબાહુરેત ઉક્તાઃ પૂર્વં દ્વિજોત્તમ ।
પર્જન્યવ્યતિરિક્તાસ્તુ પઞ્ચૈવોક્તા ન સંશયઃ ॥ ૩,૫.૩૩॥

ગઙ્ગાસમસ્તુ પર્જન્ય ઇતિ ચોક્તઃ ખગેશ્વર ।
સવિતા હ્યર્યમા ધાતા પૂષા ત્વષ્ટા તથા ભગઃ ॥ ૩,૫.૩૪॥

ચત્વારિંશત્તથા સપ્ત મહતઃ પરિકીર્તિતાઃ ।
દ્વાવુક્તાવિતિ વિજ્ઞેયો પ્રવહોતિવહસ્તથા ॥ ૩,૫.૩૫॥

તથા દશવિધા જ્ઞેયા વિશ્વેદેવાઃ ખગેશ્વર ।
શ‍ૃણુ નામાનિ તેષાં તુ પુરૂરવાર્દ્રવસંજ્ઞકૌ ॥ ૩,૫.૩૬॥

ધૂરિલોચનસંજ્ઞૌ દ્વૌ ક્રતુદક્ષેતિસંજ્ઞકૌ ।
દ્વૌ સત્યવસુસંજ્ઞૌ ચ કામકાલકસંજ્ઞકૌ ॥ ૩,૫.૩૭॥

એવં દશવિધા જ્ઞેયા વિશ્વેદેવાઃ પ્રકીર્તિતાઃ ।
તથા ઋભુગણશ્ચોક્તસ્તથા ચ પિતરસ્ત્રયઃ ॥ ૩,૫.૩૮॥

 દ્યાવા પૃથિવ્યૌ વિજ્ઞેયૌ એતે ચ ષડશીતયઃ ।
દેવાઃ પ્રજજ્ઞિરે સર્વે નાસિકદ્રિયમાનિનઃ ॥ ૩,૫.૩૯॥

આકાશસ્યાભિમાની તુ ગણપઃ સુદાહૃતઃ ।
ઉભયત્રાભિ માનીતિ જ્ઞેયં તત્ત્વાર્થવેદિભિઃ ॥ ૩,૫.૪૦॥

વિષ્વક્સેનં વિના સર્વે જયાદ્યા વિષ્ણુપાર્ષદાઃ ।
અભવન્સમહીનાશ્ચ વિષ્વક્સેનાદનન્તરમ્ ॥ ૩,૫.૪૧॥

એતેપિ નાસિકાયાશ્ચ અવાન્તરનિયામકાઃ ।
અતસ્તે તત્ત્વમાનિભ્યો હ્યવરાસ્તે પ્રકીર્તિતાઃ ॥ ૩,૫.૪૨॥

સ્પર્શતત્ત્વાભિમાની તુ અપાનશ્ચેત્યુદાહૃતઃ ।
રૂપાભિમાની સંજજ્ઞે વ્યાનો નામ મહાન્પ્રભો ॥ ૩,૫.૪૩॥

રસાત્મક ઉદાનશ્ચ સમાનો ગન્ધનામકઃ ।
અપાં નાથાશ્ચ ચત્વારો મરુતઃ પરિકીર્તિતાઃ ॥ ૩,૫.૪૪॥

જયાદ્યનન્તરાન્વક્ષ્યે સમુત્પન્નાન્ખગેશ્વર ।
પ્રધાનાગ્રે પ્રથમજઃ પાવકઃ સમુદાહૃતઃ ॥ ૩,૫.૪૫॥

ભૃગોર્મહર્ષેઃ પુત્રશ્ચ ચ્યવનઃ સમુદાહૃતઃ ।
બૃહસ્પતેશ્ચ પુત્રસ્તુ ઉતથ્યઃ પરિકીર્તિતઃ ॥ ૩,૫.૪૬॥

રૈવતશ્ચાક્ષુષશ્ચૈવ તથા સ્વારોચિષઃ સ્મૃતઃ ।
ઉત્તમો બ્રહ્મસાવર્ણી રુદ્રસાવર્ણિરેવ ચ ॥ ૩,૫.૪૭॥

દેવસાવર્ણિસાવર્ણિરિન્દ્રસાવર્ણિરેવચ ।
તથૈવ દક્ષસાવર્ણિર્ધર્મભાવર્ણિરેવ ચ ॥ ૩,૫.૪૮॥

એકાદશવિધા હ્યેવં મનવઃ પરિકીર્તિતાઃ ।
પિતૃણાં સપ્તકં ચૈવેત્યાદ્યાઃ સંજજ્ઞિરે ખગ ॥ ૩,૫.૪૯॥

તદનન્તરમુત્પન્નાસ્તેભ્યો નીચાઃ શ‍ૃણુ દ્વિજ ।
વરુણસ્ય પત્ની ગઙ્ગા પર્જન્યાખ્યો વિભાવસુઃ ॥ ૩,૫.૫૦॥

યમભાર્યા શ્યામલા તુ હ્યનિરુદ્ધપ્રિયા વિરાટ્ ।
બ્રહ્માણ્ડમાનિની સૈવ હ્યુષાનામ્ના સુશબ્દિતા ॥ ૩,૫.૫૧॥

રોહિણી ચન્દ્રભાર્યોક્તા સૂર્યભાર્યા તુ સંજ્ઞકા ।
એતા ગઙ્ગાદિષટ્સંખ્યા જજ્ઞિરે વિનતાસુત ॥ ૩,૫.૫૨॥

ગઙ્ગાદ્યનન્તરં જજ્ઞે સ્વાહા વૈ મન્ત્રદેવતા ।
સ્વાહાનામાગ્નિભાર્યોક્તા ગઙ્ગાદિભ્યોધમા શ્રુતા ॥ ૩,૫.૫૩॥

સ્વાહાનન્તરજો જ્ઞેયો જ્ઞાનાત્મા બુધનામકઃ ।
બુધસ્તુ ચન્દ્રપુત્રો યઃ સ્વાહાયા અધમઃ સ્મૃતઃ ॥ ૩,૫.૫૪॥

ઉષા નામ તથા જજ્ઞે બુધસ્યાનન્તરં ખગ ।
ઉષાનામા ભિમાની તુ હ્યશ્વિભાર્યા પ્રકીર્તિતા ॥ ૩,૫.૫૫॥

બુધાધમા સા વિજ્ઞેયા નાત્ર કાર્યા વિચારણા ।
તતઃ શનૈશ્ચરો જજ્ઞે પૃથિવ્યાત્મેતિ વિશ્રુતઃ ॥ ૩,૫.૫૬॥

ઉષાધમસ્તુ વિજ્ઞેયસ્તતો જજ્ઞેથ પુષ્કરઃ ।
કર્માભિમાની વિજ્ઞેયઃ શનૈશ્ચર ઇતીરિતઃ ॥ ૩,૫.૫૭॥

તત્ત્વાભિમાનિનો દેવાનેવં સૃષ્ટ્વા હરિઃ સ્વયમ્ ।
પ્રવિવેશ સ દેવેશસ્તત્ત્વેષુ રમયા સહા ॥ ૩,૫.૫૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે તૃતીયાંશે બ્રહ્મકાણ્ડે
તત્ત્વાભિમાનિ દેવતોત્પત્તિતત્તારતમ્યનિરૂપણં નામ પઞ્ચમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૬
શ્રીકૃષ્ણ ઉવાચ ।
તત્રતત્ર સ્થિતાસ્તત્ત્વે તત્તત્તત્ત્વાભિમાનિનઃ ।
સ્વેસ્વે હ્યાયતને સ્વાઙ્ગે તદર્થં ચ ખગેશ્વર ॥ ૩,૬.૧॥

હરિં નારાયણં સમ્યક્સ્તોતું સમુપચક્રિરે ।
ચિન્ત્યાચિન્ત્યગુણે વિષ્ણૌ વિરુદ્ધાઃ સંતિ સદ્ગુણાઃ ॥ ૩,૬.૨॥

એકૈકશોહ્યનન્તાસ્તે તદ્ગુણાનાં સ્તુતૌ મમ ।
ક્વ શક્તિરિતિ બુદ્ધ્યા સા વ્રીડયાવનતાબ્રવીત્ ॥ ૩,૬.૩॥

શ્રીરુવાચ ।
નતાસ્મિ તે નાથ પદારવિન્દં ન વેદ ચાન્યચ્ચરણાદૃતે તવ ।
ત્વયીશ્વરે સંતિ ગુણાઃ શ્રુતાસ્તુ તથાશ્રુતાઃ સંતિ ચ દેવદેવ ॥ ૩,૬.૪॥

સમ્યક્સૃષ્ટં સ્વાયતનં ચ દત્વા ગોવિન્દ દામોદર માં ચ પાહિ ।

સ્તુત્યા મદીયશ્ચ સુખકપૂર્ણઃ પ્રિયો જનો નાસ્તિ તથા ત્વદન્યઃ ॥ ૩,૬.૫॥

બ્રહ્મોવાચ ।
લક્ષ્મીપતે સર્વજગન્નિવાસ ત્વં જ્ઞાનસિંધુઃ ક્વ ચ વિશ્વમૂર્તે ।
અહં ક્વ ચાજ્ઞસ્તવ વૈ શક્તિરસ્તિ હ્યજ્ઞોહં વૈ હ્યલ્પશક્તિર્મમાસ્તિ ॥ ૩,૬.૬॥

લક્ષ્મ્યાશ્ચૈવ જ્ઞાનવૈરાગ્યભક્તિ હ્યત્યલ્પમદ્ધા મયિ સર્વદૈવ ।
તવ પ્રસાદાદસ્તિ જગન્નિવાસ તત્ર સ્વામિત્વં નાસ્તિ વિષ્ણો સદૈવ ॥ ૩,૬.૭॥

ન દેહિ ત્વં સર્વદા મે મુરારે અહમમત્વં પ્રાપ્યમેતાવદેવ ।
ગમ્યજ્ઞાનં યોગ્યગુણે રમેશ પ્રમાદો વા નાસ્તિનાસ્ત્યદ્ય નિત્ય ॥ ૩,૬.૮॥

તન્મે હૃષીકાણિ પતન્ત્યસત્પથે પદારવિન્દે તુ પતન્તુ સર્વદા ।
લક્ષ્મ્યા હ્યહં કોટિગુણેન હીનઃ સ્તોતું સામર્થ્યં નાસ્તિ મે સુપ્રસીદ ॥ ૩,૬.૯॥

ઇતિ સ્તવં વિષ્ણુગુણાન્વિધાતા તાર્ક્ષ્યસ્થિતઃ પ્રાગ્જલિસ્તસ્ય ચાગ્રે ।
તદા વાયુર્દેવદેવો મહાત્મા દૃષ્ટ્વા વિષ્ણુ ભક્તિસંવર્ધિતાત્મા ॥ ૩,૬.૧૦॥

સ્નહોત્થરાવઃ સ્ખલિતાક્ષરસ્તં મુગ્ચન્કણાન્પ્રાગ્જલિરાબભાષે ।
વાયુરુવાચ ।
એતે હિ દેવાસ્તવ ભૃત્યભૂતાઃ પદારવિન્દં પરમં સુદુર્લભમ્ ॥ ૩,૬.૧૧॥

ચતુર્વિધાન્પુરુષાર્થાન્રમેશ સમ્પ્રાર્થયે તચ્ચ સદાપિ દેવ ।
દૃષ્ટ્વા હરેઃ સૈવ માયૈવ તાવત્સુકારણં કિઞ્ચિદન્યન્ન ચાસ્તિ ॥ ૩,૬.૧૨॥

અતો નાહં પ્રદયોઽપિ ભૂમન્ભવત્પદાંભોજનિષવણોત્સુકઃ ।
લોકસ્ય કૃષ્ણાદ્વિમુખસ્ય કર્મણા અપુણ્યશીલસ્ય સુદુઃખિતસ્ય ॥ ૩,૬.૧૩॥

અનુગ્રહાર્થં ચ તવાવતારો નાન્યશ્ચ કિઞ્ચિત્પુરુષાર્થસ્તવેશ ।
ગોભૂસુરાણાં ચ મહીરુહાણાં તથા સુરાણાં પ્રવરાવતારૈઃ ॥ ૩,૬.૧૪॥

ક્ષેમોપકારાણિ ચ વાસુદેવ ક્રીડન્વિધત્તે ન ચ કિઞ્ચિદન્યત્ ।
મનો ન તૃપ્યત્યપિ શંસતાં નઃ સુકર્મમૌલેશ્ચરિતામૃતાનિ ॥ ૩,૬.૧૫॥

અચ્છિન્નભક્તસ્ય હિ મે મુકુન્દ સદા ભક્તિં દેહિ પાદારવિન્દે ।
સદા તદેવાસ્તુ ન કિઞ્ચિદન્યદ્યત્ર ત્વમાસીઃ પુરુષે દેવદેવ ॥ ૩,૬.૧૬॥

અહં ચ તત્રાસ્મિ તવ પ્રસાદાદ્યત્રાસ્મ્યહં તત્ર ભવાન્મહાપ્રભો ।
વ્યંસિર્મમેયં ચ શરીરમધ્યે ચતુર્મુખશ્ચૈવ ન ચૈતતદન્યૈઃ ॥ ૩,૬.૧૭॥

મદીયનિદ્રા તવ વન્દનં પ્રભો મદીયયામાચરણં પ્રદક્ષિણમ્ ।

મદીયવ્યાખ્યાહરણં સ્તુતિઃ સ્યાદેવં વિદિત્વા ચ સમર્પયામિ ॥ ૩,૬.૧૮॥

મદ્બ્રુદ્ધિયોગ્યં ચ પદાર્થજાતં દૃષ્ટ્વા હરેઃ પ્રતિમા એવ તચ્ચ ।
ઇત્થં મત્વાહં સર્વદા દેવદેવ તત્રસ્થિતાન્હરિરૂપાન્ભજિષ્યે ॥ ૩,૬.૧૯॥

યચ્ચન્દનં યત્તુ પુષ્પં ચ ધૂપં વસ્ત્રં ચ યદ્ભક્ષ્યભોજ્યાદિકં ચ ।
એતત્સર્વં વિષ્ણુપ્રીત્યર્થમેવેત્યેતદ્વ્રતં સર્વદા વૈ કરિષ્યે ॥ ૩,૬.૨૦॥

અવૈષ્ણવાન્દૂષયિષ્યે સદાહં સદ્વૈષ્ણવાન્પા (લ્લાં) લયિષ્યે મુરારે ।
વિષ્ણુદ્રુહાં છેદયિષ્યે ચ જિહ્વાં તચ્છ્રણવતાં પૂરયિષ્યે ત્રપૂલ્કાઃ ॥ ૩,૬.૨૧॥

એતાદૃશી શક્તિર્મમાસ્તિ દેવ તવ પ્રસાદાદ્બ્ર લિનોઽપિ વિષ્ણો ।
અથાપિ નાહં સ્તવને સમર્થઃ લક્ષ્મ્યા હ્યહં કોટિગુણૈર્વિહીનઃ ॥ ૩,૬.૨૨॥

એતત્સ્તોત્રં હ્યર્થયેચ્ચૈવ યા નઃ તત્ર પ્રીતિર્હ્યક્ષયા મે સદા સ્યાત્ ।
સ્તોત્રં હ્યેતત્પાઠયન્તીહ લોકે તે વૈષ્ણવાસ્તે ચ હરિપ્રિયાશ્ચ ॥ ૩,૬.૨૩॥

કુર્વન્તિ યે પઠનં નિત્યમેવ સમર્પયિષ્યતિ સદા હરૌ ચ ।
તેષાં હરિઃ પ્રીયતે કેશવોલં હરૌ પ્રસન્ને કિમલભ્યમસ્તિ ॥ ૩,૬.૨૪॥

એવં સ્તુત્વા વલદેવો મહાત્મા તૂષ્ણીં સ્થિતઃ પ્રાઞ્જલિરગ્રતો હરેઃ ।
સરસ્વત્યુવાચ ।
કો વા રસજ્ઞો ભગવન્મુરારે હરે ગુણસ્તવનાત્કીર્તનાદ્વા ॥ ૩,૬.૨૫॥

અલંબુદ્ધિં પ્રાપ્નુયાદ્દેવદેવ બ્રહ્માદિભિઃ સર્વદા સ્તૂયમાન ।
યઃ કર્ણનાડીં પુરુષસ્ય યાતો ભવપ્રદાં દેહરતિં છિનત્તિ ॥ ૩,૬.૨૬॥

ન કેવલં દેહરતિં છિનત્ત્યસદ્ગૃહક્ષેત્રભાર્યાસુતેષુ નિત્યમ્ ।
પશ્વાદિરૂપેષુ ધનાદિકેષુ અનર્ઘ્યરત્નેષુ પ્રિયં છિનાત્તિ ॥ ૩,૬.૨૭॥

અનં તવેદપ્રતિપાદિતોઽપિ લક્ષ્મીર્ન વૈ વેદ તવ સ્વરૂપમ્ ।
ચતુર્મુખો નૈવ વેદ ન વાયુરસૌ ન વેત્તીતિ કિમત્ર ચિત્રમ્ ॥ ૩,૬.૨૮॥

એતાદૃશસ્ય સ્તવને ક્વાસ્તિ શક્તિર્મમ પ્રભો બ્રહ્મવાય્વોઃ સકાશાત્ ।
શતૈર્ગુણૈઃ સર્વદા ન્યૂનતાસ્તિ અતો હરે દયયા માં ચ પાહિ ॥ ૩,૬.૨૯॥

એવં સ્તુત્વા હરિં સા તુ તૂષ્ણીમાસ ખગશ્વર ।
ભારતી તુ તદા સ્તોતું હરિં સમુપચક્રમે ॥ ૩,૬.૩૦॥

ભારત્યુવાચ ।
બ્રહ્મેશ લક્ષ્મીશ હરે મુરારે ગુણાંસ્તવ શ્રદ્દધાનસ્ય નિત્યમ્ ।

તથા સ્તુવન્તોસ્ય વિવર્ધમાનાં મતિં ચ નિત્યં વિષયેષ્વસત્સુ ॥ ૩,૬.૩૧॥

કુર્વન્તિ વૈરાગ્યમમુત્ર લોકે તતઃ પરં ભક્તિદૃઢાં તથૈવ ।
તતઃ પરં ચૈવ હરેઃ પ્રસન્નતાં કુર્વન્તિ નિત્યં તવ દેવદેવ ॥ ૩,૬.૩૨॥

તેનાપરોક્ષં ચ ભવેચ્ચ તસ્ય અતો ગુણાનાં સ્તવને ચ મે રતિઃ ।
સા તુ પ્રજાતા પુરુષસ્ય નિત્યં સંસારદુઃખં તુ તદાચ્છિનત્તિ ॥ ૩,૬.૩૩॥

વિચ્છિન્નદુઃખસ્ય તદાધિકારિણ આનન્દરૂપાખ્યફલં દદાતિ ।
હરેર્ગુણાનસ્તુવતાં ચ પાપં તેષાં હિ પુણ્યં ચ તથા ક્ષિણોતિ ॥ ૩,૬.૩૪॥

એવં વિદિત્વા પરમો ગુરુર્મમ વાયુર્દયાલુર્મમ વલ્લભશ્ચ ।
હરેર્ગુણાન્સર્વગુણપ્રસારાન્મમૈવ યોગ્યાન્સુખમુખ્યભૂતાન્ ॥ ૩,૬.૩૫॥

ઉદ્ધૃત્ય પુણ્યેભ્ય ઇવાર્તબન્ધુઃ શિવશ્ચ નો દ્રુહ્યતિ પુણ્યકીર્તિમ્ ।
તવ પ્રસાદાચ્ચ શ્રિયઃ પ્રસાદાદ્વાયોઃ પ્રસાદાચ્ચ મમાસ્તિ નિત્યમ્ ॥ ૩,૬.૩૬॥

યદ્યત્કરોત્યેવ સદૈવ વાયુસ્તત્તત્કરોત્યેવ સદૈવ નિત્યમ્ ।
વાયોર્વિરોધં ન કરોતિ દેવઃ સ તદ્વિરોધં ચ કરોતિ નિત્યમ્ ॥ ૩,૬.૩૭॥

હરેર્વિરોધં ન કરોતિ વાયુર્વાયોર્વિરોધં ન કરોતિ વિષ્ણુઃ ।
વાયોઃ પ્રસાદાન્મમનાસ્તિ કિઞ્ચિદતાનભાવશ્ચ તવ પ્રસાદાત્ ॥ ૩,૬.૩૮॥

યથૈવ મૂલં ચ તથાવતારે દુઃખાદિકં નાસ્તિ સમીરણસ્ય ।
વાયુસ્તથાન્યે ચ ઉભૌ મુકુન્દસ્તથાવતારેષુ ન દુઃખરૂપૌ ॥ ૩,૬.૩૯॥

અશક્તવદ્દૃશ્યતે વાયુદેવઃ યુગાનુસારાંલ્લોકધર્માંસ્તુ રક્ષન્ ।
નરાવતારે તત્ર દેવે મુરારે હ્યશક્તતા નેતિ વિચં તનીયમ્ ॥ ૩,૬.૪૦॥

અવતારરૂપે યમદુઃખાદિકં ચ ન ચિન્તનીયં જ્ઞાનિભિર્દેવદેવ ।
અહં કદાચિત્સુખનાશપ્રદેશે દૈત્યાંસ્તથા મારયિતું ગતોઽસ્મિ ॥ ૩,૬.૪૧॥

નૈતાવતા મમ વાયોશ્ચ નિત્યં દુઃખાતનં નૈવ સંચિતનીયમ્ ।
એતાદૃશોહં સ્તવનેનુ કાસ્તિ શક્તિર્ગુણાનાં મધુસૂદન પ્રભો ।
વાયોઃ સકાશાચ્ચ ગુણેન હીના સંસારરૂપે મુક્તરૂપે ચ દેવ ॥ ૩,૬.૪૨॥

એવં સ્તુત્વા ભારતી તુ તૂષ્ણીમાસ ખગેશ્વર ।
તદનન્તરજઃ શેષઃ પ્રાઞ્જલિઃ પ્રાહ કેશવમ્ ॥ ૩,૬.૪૩॥

શેષ ઉવાચ ।
નાહં ચ જાને તવ પાદમૂલં રુદ્રો ન વેત્તિ ગરુડો ન વેદ ।

અહં વાણ્યાઃ શતગુણાંશહીનો દત્ત્વા હ્યાયતનં પાહિ માં વાસુદેવ ॥ ૩,૬.૪૪॥

એવં સ્તુત્વા સશેષસ્તુ તૂષ્ણીમાસ ખગેશ્વર ।
તદનન્તરજો વીશઃ સ્તોતું સમુપચક્રમે ॥ ૩,૬.૪૫॥

ગરુડ ઉવાચ ।
તવ પદોઃ સ્તુતિં કિં કરોમ્યહં મમ પદાંબુજે હ્યર્પિતં મનઃ ।
કથમહં મુખે પક્ષિયોનિજઃ કથમેવઙ્ગુણા નીડિતું ક્ષમઃ ॥ ૩,૬.૪૬॥

એવં સ્તુત્વા તુ ગરુડસ્તૂષ્ણીમાસ નયાન્વિતઃ ।
તદનન્તરજો રુદ્રસ્તોતું સમુપચક્રમે ॥ ૩,૬.૪૭॥

રુદ્ર ઉવાચ ।
યા વૈ તવેશ ભગવન્ન વિદામ ભૂમન્ભક્તિર્મમાસ્તુ શિવપાદસરોજમૂલે ।
છન્નાપિ સા નનુ સદા ન મમાસ્તિ દેવ તેનાદ્બહં તવ વિરુદ્ધમતઃ કરોમિ ॥ ૩,૬.૪૮॥

સર્વાન્ન બુદ્ધિસહિતસ્ય હરે મુરારે કા શક્તિરસ્તિ વચને મમ મૂઢબુદ્ધેઃ ।
વાણ્યા સદા શતગુણેન વિહીનમેનં માં પાહિ ચેશ મમ ચાયતનં ચ દત્ત્વા ॥ ૩,૬.૪૯॥

એવં સ્તુત્વા સ રુદ્રસ્તુ તૂષ્ણીમાસ દ્વિજોત્તમઃ ।
શેષાનન્તરજા દેવી વારુણી વાક્યમબ્રવીત્ ॥ ૩,૬.૫૦॥

વારુણ્યુવાચ ।
લક્ષ્મીપતે બ્રહ્મપતે મનોઃ પતેગિરઃ પતે રુદ્રપતે નૃણાં પતે ।
ગુણાંસ્તવ સ્તોતુમહં સમર્થા ન પાર્વતી નાપિ સુપર્ણપત્ની ॥ ૩,૬.૫૧॥

શેષાદહં દશગુણૈર્વિહીના માં પાહિ નિત્યં જગતામધીશ ॥ ૩,૬.૫૨॥

એવં સ્તુત્વા વારુણી તુ તૂષ્ણીમાસ ખગેશ્વર ।
તદનન્તરજા બ્રાહ્મી સૌપર્ણી હ્યુપચક્રમે ॥ ૩,૬.૫૩॥

સૌપર્ણ્યુવાચ ।
સ્તોતું ગુણાંસ્તવ હરે જગદી શવાચા શ્રોતું હરે તવ કથાં શ્રવણે ન શક્તિઃ ।
યસ્તત્ત્વનું સ્મરતિ દેવ તવ સ્વરૂપં કો વૈ નુ વેદ ભુવિ તં ભગવત્પદાર્થમ્ ॥ ૩,૬.૫૪॥

અતો ગુણસ્તવને નાસ્તિ શક્તિર્વીન્દ્રાહદં દશગુણૈરવરા ચ નિત્યમ્ ॥ ૩,૬.૫૫॥

એવં સ્તુત્વા તુ સૌપર્ણી તૂષ્ણીમાસ ખગેશ્વર ।
રુદ્રાનન્તરજા સ્તોતું ગિરિજા તૂપચક્રમે ॥ ૩,૬.૫૬॥

પાર્વત્યુવાચ ગોવિન્દ નારાયણ વાસુદેવ ત્વયા હિ મે કિઞ્ચિદપિ પ્રયોજનમ્ ।

નાસ્ત્યેવ સ્વામિન્ન ચ નામ વાચા સૌભાગ્યરૂપઃ સર્વદા એક એવ ॥ ૩,૬.૫૭॥

નારાયણેતિ તવ નામ ચ એકમેવ વૈરાગ્યભક્તિવિભવે પરમં સમર્થામ્ ।
અસંખ્યબ્રહ્માદિકહત્યનાશાને ગુર્વઙ્ગનાકોટિવિનાશને ચ ॥ ૩,૬.૫૮॥

નામાધિકારિણી ચાહં ગુણાનાં ચ મહાપ્રભો ।
સ્તવને નાસ્તિ મે શક્તી રુદ્રાદ્દશગુણૈરહમ્ ॥ ૩,૬.૫૯॥

અવરા ચ સદાસ્મ્યેવ નાત્ર કાર્યા વિચારણા ।
એવં સ્તુત્વા સા ગિરિજા સ્તૂષ્ણીમાસ ખગેશ્વર ॥ ૩,૬.૬૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે શ્રીકૃષ્ણગરુડસંવાદે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
તત્ત્વાભિમાનિતત્તદ્દેવતાકૃતવિષ્ણુસ્તુતિતત્તદ્દેવતાતારતમ્યનિરૂપણં નામ ષષ્ઠોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૭
શ્રીકૃષ્ણ ઉવાચ ।
પાર્વત્યાનન્તરોત્પન્ન ઇન્દ્રો વચનમબ્રવીત્ ।
ઇન્દ્ર ઉવાચ ।
તવ સ્વરૂપં હૃદિ સંવિજાનન્સમુત્સુકઃ સ્યાત્સ્તવને યસ્તુ મૂઢઃ ।
અજાનતઃ સ્તવનં દેવદેવ તદેવાહુર્હેલનં ચક્રપાણે ॥ ૩,૭.૧॥

તથાપિ તદ્ધૈ તવ નામ પૂર્વં ભવેત્તદા પુણ્યકરં ભવેદિતિ ।
રુદ્રાદિ કાનાં સ્તવને નાસ્તિ શક્તિસ્તદા વક્તવ્યં મમ નાસ્તીતિ કિં વા ॥ ૩,૭.૨॥

ગુણાંશતો દશભી રુદ્રતો વૈ સદા ન્યૂનો મત્સમઃ કામદેવઃ ।
જ્ઞાને બલે સમતા સર્વદાસ્તિ તથાઃ કામઃ કિં ચ દૂતઃ સદૈવ ॥ ૩,૭.૩॥

એવં સ્તુત્વા દેવદેવો હરિં ચ તૂષ્ણીં સ્થિતઃ પ્રાઞ્જલિર્નમ્રભૂર્ધા ।
તદનન્તરજો બ્રહ્મા અહઙ્કારિક ઊચિવાન્ ॥ ૩,૭.૪॥

અહઙ્કારિક ઉવાચ ।
નમસ્તે ગણપૂર્ણાય નમસ્તે જ્ઞાનમૂર્તયે ।
નમોઽજ્ઞાનવિદૂરાય બ્રહ્મણેનં તમૂર્તયે ॥ ૩,૭.૫॥

ઇન્દ્રાદહં દશગુણૈઃ સર્વદા ન્યૂન ઉક્તો ન જનિ ત્વાં સર્વદા હ્યપ્રમેય ।
તથાપિ માં પાહિ જગદ્ગુરો ત્વં દત્ત્વા દિવ્યં હ્યાયતનં ચ વિષ્ણો ॥ ૩,૭.૬॥

આહઙ્કારિક એવં તુ સ્તુત્વા તૂષ્ણીંબભૂવ હ ।

તદનન્તરજા સ્તોતું શચી વચનમબ્રવીત્ ॥ ૩,૭.૭॥

શચ્યુવાચ ।
સંચિન્તયામિ અનિશં તવ પાદપદ્મં વજ્રાઙ્કુશધ્વજસરોરુહલાઞ્છનાઢ્યમ્ ।
વાગીશ્વરૈરપિ સદા મનસાપિ ધર્તું નો શક્યમીશ તવ પાદરજઃ સ્મરામિ ॥ ૩,૭.૮॥

આહઙ્કારિકપ્રાણાચ્ચ ગુણૈશ્ચ દશભિઃ સદા ।
ન્યૂનભૂતાં ચ માં પાહિ કૃપાલો ભક્તવત્સલ ॥ ૩,૭.૯॥

એવં સ્તુત્વા શચી દેવી તૂષ્ણીં ભગવતી હ્યભૂત્ ।
તદનન્તરજા સ્તોતું રતિઃ સમુપચક્રમે ॥ ૩,૭.૧૦॥

રતિરુવાચ ।
સંચિન્તયામિ નૃહરેર્વદનારવિન્દં ભૃત્યાનુકંપિતધિયા હિ ગૃહીતમૂર્તિમ્ ।
યચ્છ્રીનિકેતમજરુદ્રરમાદિકૈશ્ચ સંલાલિતં કુટિલકુન્તલવૃન્દજુષ્ટમ્ ॥ ૩,૭.૧૧॥

એતાદૃશં તવ મુખં નુવિતું ન શક્તિઃ શચ્યા સમાપિ ભગવન્પરિપાહિ નિત્યમ્ ।
કૃત્વા સ્તુતિં રતિરિયં પરમાદરેણ તૂષ્ણીં સ્થિતા ભગવતશ્ચ સમીપ એવ ॥ ૩,૭.૧૨॥

રત્યનન્તરજો દક્ષઃ સ્તોતું સમુપચક્રમે ॥ ૩,૭.૧૩॥

દક્ષ ઉવાચ ।
સંચિન્તયે ભગવતશ્ચરણોદતીર્થં ભક્ત્યા હ્યજેન પરિષિક્તમજાદિવન્દ્યમ્ ।
યચ્છૌચનિઃ સૃતમજપ્રવરાવતારં ગઙ્ગાખ્યતીર્થમભવત્સરિતાં વરિષ્ઠમ્ ॥ ૩,૭.૧૪॥

રુદ્રોઽપિ તેનવ વિધૃતેન જટાકલાપપૂતેન પાદરજસા હ્યશિવઃ શિવોભૂત્ ।
એતાદૃશં તે ચરણં કરુણેશ વિષ્ણો સ્તોતું શક્તિર્મમ નાસ્તિ કૃપાવતાર ।
રત્યા સમઃ શ્રુતિગતો ન ગતોઽસ્મિ મોક્ષમેતાદૃશં ચ પરિપાહિ નિદાનમૂર્તે ॥ ૩,૭.૧૫॥

એવં સ્તુત્વા સ દક્ષસ્તુ તૂષ્ણી મેવ બભૂવ હ ।
તદનન્તરજઃ સ્તોતું બૃહસ્પતિરુપાક્રમીત્ ॥ ૩,૭.૧૬॥

બૃહસ્પતિરુવાચ ।
સંચિન્તયામિ સતતં તવ ચાનનાબ્જં ત્વં દેહિ દુષ્ટવિષયેષુ વિરક્તિમીશ ॥ ૩,૭.૧૭॥

એતેષુ શક્તિર્યદિ વૈ સ જીવો કર્તા ચ ભોક્તા ચ સદા ચ દાતા ।
યોષાં ચ પુત્રસુહૃદૌ ચ પશૂંશ્ચ સર્વમેવં વિનશ્યતિ યતો હિ તદાશુ છિન્ધિ ॥ ૩,૭.૧૮॥

સંસારચક્રભ્રમણેનૈવ દેવ સંસારદુઃખમનુભૂયેહાગતોઽસ્મિ ।
શક્તિર્ન ચાસ્તિ નવને મમ દેવદેવ સત્યા સમં ચ સતતં પરિપાહિ નિત્યમ્ ॥ ૩,૭.૧૯॥

એવં શ્રુત્વા ચ પરમં તૂષ્ણીમેવ સ્થિતો મુનિઃ ।
તદનન્તરજસ્તોતું હ્યનિરુદ્ધોપચક્રમે ॥ ૩,૭.૨૦॥

અનિરુદ્ધ ઉવાચ ।
એવં હરેસ્તવ કથાં રસિકાં વિહાય સ્ત્રીણાં ભગે ચ વદને પરિમુહ્ય નિત્યમ્ ।
વિષ્ઠાન્ત્રપૂરિતબિલે રસિકો હિ નિત્યં સ્થાયી ચ સૂકરવદેવ વિમૂઢબુદ્ધિઃ ॥ ૩,૭.૨૧॥

મજ્જાસ્થિપિત્તકફરફલાદિપૂર્ણે ચર્માન્ત્રવેષ્ટિતમુખે પતિતં હ પીતમ્ ।
આસ્વાદને મમ ચ પાપગતેર્મુરારે માયાબલં તવ વિભો પરમં નિમિત્તમ્ ॥ ૩,૭.૨૨॥

સંસારચક્રે ભ્રમતશ્ચ નિત્યં સુદુઃખરૂપે સુખલેશવર્જિતે ।
મલં વમન્તં નવભિશ્ચ દ્વારૈઃ શરીરમારુહ્ય સુમૂઢબુદ્ધિઃ ॥ ૩,૭.૨૩॥

નમામિ નિત્યં તવ તત્કથામૃતં વિહાયદેવ શ્રુતિમૂલનાશનમ્ ।
કુટુંબપોષં ચ સદા ચ કુર્વન્દાનાદ્યકુર્વન્નિવસન્ગૃહે ચ ॥ ૩,૭.૨૪॥

દૂરે ચ સંસારમલં ત્વિદં કુરુ દેહિ હ્યદો દિવ્યકથામૃતં સદા ।
એતાદૃશોહં તવ સદ્ગુણૌઘં સ્તોતું સમર્થો નાસ્મિ શચીસમશ્ચ ॥ ૩,૭.૨૫॥

એવં સ્તુત્વાનિરુદ્ધસ્તુ તૂષ્ણીમાસ ખગેશ્વર ।
તદનન્તરજઃ સ્તોત્રં મનઃ સ્વાયંભુવોબ્રવીત્ ॥ ૩,૭.૨૬॥

સ્વાયંભુવ ઉવાચ ।
સ્તોતું હ્યનુપ્રવિશતોઽપિ ન ગર્ભદુઃખં તસ્માદહં પરમપૂજ્યપદં ગતસ્તે ॥ ૩,૭.૨૭॥

મનોર્ભાર્યા માનવી ચ યમઃ સંયમિનીપતિઃ ।
દિશાભિમાની ચન્દ્રસ્તુ સૂર્યશ્ચક્ષુર્નિયામકઃ ।
પરસ્પરસમા હ્યેતે મુક્ત્વા સંસારમેવ ચ ॥ ૩,૭.૨૮॥

પ્રવાહાદ્વિગુણોનશ્ચેત્યેવં જાનીહિ ચાણ્ડજ ।
સૂર્યાનન્તરજઃ સ્તોતું વરુણઃ સમ્પ્રચક્રમે ॥ ૩,૭.૨૯॥

વરુણ ઉવાચ ।
ત્વદ્વિચ્છયા રચિતે દેહગેહે પુત્રે કલત્રેપિ ધને દ્રવ્યજાતૌ ।
મમાહમિત્યલ્પધિયા ચ મૂઢા સંસારદુઃખે વિનિમજ્જન્તિ સર્વે ॥ ૩,૭.૩૦॥

અતો હરે તાદૃશીં મે કુબુદ્ધિં વિનાશ્ય મે દેહિ તે પાદદાસ્યમ્ ।
અહં મનોઃ પાદપાદાર્ધભૂતગુણેન હીનઃ સર્વદા વૈ મુરારે ॥ ૩,૭.૩૧॥

એવં સ્તુત્વા તુ વરુણઃ પ્રાઞ્જલિઃ સમુપસ્થિતઃ ।

વરુણાનન્તરોત્પન્નો નારદો હ્યસ્તુવદ્ધરિમ્ ॥ ૩,૭.૩૨॥

નારદ ઉવાચ ।
યન્નામધેયશ્રવણાનુકીર્તનાત્સ્વાદ્વન્યતત્ત્વં મમ નાસ્તિ વિષ્ણો ।
પુનીહ્યતશ્ચૈવ પરોવરાયાન્યજ્જિહ્વાગ્રે વર્તતે નામ તસ્ય ॥ ૩,૭.૩૩॥

યજ્જિહ્વાગ્રે હરિનામૈવ નાસ્તિ સ બ્રાહ્મણો નૈવ સ એવ ગોખરઃ ।
અહં ન જાને ચ તવ સ્વરૂપં ન્યૂનો હ્યહં વરુણાત્સર્વદૈવ ॥ ૩,૭.૩૪॥

એવં સ્તુત્વા નારદો વૈ ખગેન્દ્રસ્તૂષ્ણીમભૂદ્દેવદેવસ્ય ચાગ્રે ।
યો નારદાનન્તરં સંબભૂવ ભૃગુર્મહાત્મા સ્તોતુમુપપ્રચક્રમે ॥ ૩,૭.૩૫॥

ભૃગુરુવાચ ।
કિમાસનં તે ગરુડાસનાય કિં ભૂષણં કૌસ્તુભભૂષણાય ।
લક્ષ્મીકલત્રાય કિમસ્તિ દેયં વાગીશ કિં તે વચનીયમસ્તિ ।
અતો ન જાને તવ સદ્ગુણાંશ્ચ હ્યહં સદા વરુણા ત્પાદહીનઃ ॥ ૩,૭.૩૬॥

એવં સ્તુત્વા હરિં દેવં ભૃગુસ્તૂષ્ણીં બભૂવ હ ।
તદનન્તરજો હ્યગ્નિરસ્તાવીત્પુરુષોત્તમમ્ ॥ ૩,૭.૩૭॥

અગ્નિરુવાચ ।
યત્તેજસાહં સુસમિદ્ધતેજા હવ્યં વહામ્યધ્વરે આજ્યસિક્તમ્ ॥ ૩,૭.૩૮॥

યત્તેજસાહં જઠરે સમ્પ્રવિશ્ય પચન્નન્નં સર્વદા પૂર્ણશક્તિઃ ।
અતો ન જાને તવ સદ્ગુણાંશ્ચ ભૃગોરહં સર્વદૈવં સમોઽસ્મિ ॥ ૩,૭.૩૯॥

તદનન્તરજા સ્તોતું પ્રસૂતિરુપચક્રમે ॥ ૩,૭.૪૦॥

પ્રસૂતિરુવાચ ।
યન્નામાર્થવિચારણેપિમુનયો મુહ્યતિ વૈ સર્વદા ત્વદ્ભીતા અપિ દેવતા હ્યવિરતં સ્ત્રીભિઃ સહૈવ સ્થિતાઃ ।
માન્ધાતૃધ્રુવનારદાશ્ચ ભૃગવો વૈવસ્વતાદ્યાખિલાઃ પ્રેમ્ણા વૈ
પ્રણમામ્યહં હિતકૃતે તસ્મૈ નમો વિષ્ણવે ॥ ૩,૭.૪૧॥

અતો ન જાને તવ સદ્ગુણાન્સદા એવં વિધા કા મમ શક્તિરસ્તિ ।
સ્તુત્વા હ્યેવં પ્રસૂતિસ્તુ તૂષ્ણીમાસીત્ખગેશ્વર ॥ ૩,૭.૪૨॥

અગ્નિર્વાગાત્મકો બ્રહ્મપુત્રો ભૃગુ ઋષિસ્તથા ।
તદ્ભાર્યા વૈ પ્રસૂતિસ્તુ ત્રય એતે સમાઃ સ્મૃતાઃ ॥ ૩,૭.૪૩॥

વરુણાત્પાદહીનાશ્ચ પ્રવહાદ્વિગુણાધમાઃ ।

દક્ષાચ્છતાવરા જ્ઞેયા મિત્રાત્તુ દ્વિગુણાધિકાઃ ॥ ૩,૭.૪૪॥

પ્રસૂત્યનન્તરં જાતો વસિષ્ઠો બ્રહ્મનન્દનઃ ।
વિનયાવનતો ભૂત્વા સ્તોતું સમુપચક્રમે ॥ ૩,૭.૪૫॥

વસિષ્ઠ ઉવાચ ।
નમોઽસ્તુ તસ્મૈ પુરુષાય વેધસે નમોનમોઽસદ્વૃજિનચ્છિદે નમઃ ।
નમોનમો સ્વાઙ્ગભવાય નિત્યં નતોઽસ્મિ હેનાથ તવાઙ્ઘ્રિપઙ્કજમ્ ॥ ૩,૭.૪૬॥

માં પાહિ નિત્યં ભગવન્વાસુદેવ હ્યગ્રેરહં સર્વદા ન્યૂન એવ ।
મિત્રાદહં સર્વદા કિઞ્ચિદૂનઃ સ્તુત્વા દેવ સોભવત્તત્ર તૂષ્ણીમ્ ॥ ૩,૭.૪૭॥

યો વસિષ્ઠાનન્તરજો મરીચિર્બ્રહ્મનન્દનઃ ।
હરિન્તુષ્ટાવ પરયા ભક્ત્યા નારાયણં ગુરુમ્ ॥ ૩,૭.૪૮॥

મરીચિરુવાચ ।
દેવેન ચાહં હતધીર્ભવનપ્રસઙ્ગાત્સર્વાશુભોપગમનાદ્વિમુખેદ્રિયશ્ચ ।
કુર્વે ચ નિત્યં સુખલેશલવાદિના ત્વદ્દરં મનસ્ત્વશુભકર્મ સમાચરીષ્યે ॥ ૩,૭.૪૯॥

એતાદૃશોહં ભગવાનનન્તઃ સદા વસિષ્ઠસ્ય સમાન એવ ॥ ૩,૭.૫૦॥

એવં સ્તુત્વા મરીચિસ્તુ તૂષ્ણીમાસ તદા ખગ ।
તદતન્તરજોહ્યત્રિરસ્તાવીત્પ્રાઞ્જલિર્હરિમ્ ॥ ૩,૭.૫૧॥

આવિર્ભવજ્જગત્પ્રભવાયાવતીર્ણં તદ્રક્ષણાર્થમનવદ્યઞ્ચ તથાવ્યયાય ।
તત્ત્વાર્થમૂલમવિકારિ તવ સ્વરૂપં હ્યાનન્દસારમત એવ વિકારશૂન્યમ્ ॥ ૩,૭.૫૨॥

ત્રૈગુણ્યશૂન્યમખિલેષુ ચ સંવિભક્તં તત્ર પ્રવિશ્ય ભગવન્ન હિ પશ્યતીવ ।
અતો મરારેસ્તવ સદ્ગુણાંશ્ચ સ્તોતું ન શક્નોમિ મરીચેતુલ્યઃ ॥ ૩,૭.૫૩॥

એવં સ્તુત્વા હ્યત્રિરપિતૂષ્ણીમાસ તદા ખગ ।
તદનન્તરજઃ સ્તોતુમઙ્ગિરા વાક્યમબ્રવીત્ ॥ ૩,૭.૫૪॥

અઙ્ગિરા ઉવાચ ।
દ્રષ્ટું ન શક્નોમિ તવ સ્વરૂપં હ્યનન્તબાહૂદરમસ્તકં ચ ।
અનન્તસાહસ્રકિરીટજુષ્ટં મહાર્હનાનાભરણૈશ્ચ શોભિતમ્ ।
એતાદૃશં રૂપમનન્તપારં સ્તોતું હ્યશક્તસ્તુ સમોઽસ્મિ ચાત્રેઃ ॥ ૩,૭.૫૫॥

એવં સ્તુત્વા હ્યઙ્ગિરાશ્ચ તૂષ્ણીમાસ ખગેશ્વર ।
તદનન્તરજઃ સ્તોતું પુલસ્ત્યો વાક્યમબ્રવીત્ ॥ ૩,૭.૫૬॥

પુલસ્ત્ય ઉવાચ ।
યો વા હરિસ્તુ ભગવાન્સ (સ્વ) ઉપાસકાનાં સંદર્શયેદ્ભુવનમઙ્ગલમઙ્ગલં ચ ।
(લશ્ચ) યસ્મૈ નમો ભગવતે પુરુપાય તુભ્યં યો વાવિતા નિરયભાગગમપ્રસઙ્ગે ॥ ૩,૭.૫૭॥

એતાદૃશાંસ્તવ ગુણાન્નવિતું ન શક્તં માં પાહિ ભગવન્સદૃશો હ્યઙ્ગિરસા ચ ॥ ૩,૭.૫૮॥

એવં સ્તુત્વા પુલસ્ત્યોઽપિ સ્તૂષ્ણીમેવ વભૂવ હ ।
તદનન્તરજઃ સ્તોતું પુલહો વાક્યમબ્રવીત્ ॥ ૩,૭.૫૯॥

પુલહ ઉવાચ ।
નિષ્કામરૂપરિહિતસ્ય સમર્પિતં ચ સ્નાનાવરોત્તમપયઃ ફલપુષ્પભોજ્યમ્ ।
આરાધનં ભગવતસ્તવ સત્ક્રિયાશ્ચ વ્યર્થં ભવેદિતિ વદન્તિ મહાનુભાવાઃ ॥ ૩,૭.૬૦॥

તસ્મૈ સદા ભગવતે પ્રણમામિ નિત્યં નિષ્કામયા તવ સમર્પણમાત્રવુદ્ધ્યા ।
વૈકુણ્ઠનાથ ભગવન્સ્તવને ન શક્તિઃ સોહં પુલસત્યસદૃશોઽસ્મિન સંશયોત્ર ॥ ૩,૭.૬૧॥

એવં સ્તુત્વા તુ પુલહસ્તૂષ્ણીમાસ તદા ખગ ।
તદનન્તરજઃ સ્તોતું ક્રતુઃ સમુપચક્રમે ॥ ૩,૭.૬૨॥

ક્રતુરુવાચ ।
પ્રાણપ્રયાણસમયે ભગવંસ્તવૈવ નામાનિ સંસૃતિજદુઃખવિનાશકાનિ ।
યેનૈકજન્મશમલં સહસૈવ હિત્વા સંયાતિ મુક્તિમમલાં તમહં પ્રપદ્યે ॥ ૩,૭.૬૩॥

યે ભક્ત્યા વિવશા વિષ્ણો નામમાત્રૈકદજલ્પકાઃ ।
તેપિ મુક્તિં પ્રયાન્ત્યાશુ કિમુત ધ્યાયિનઃ સદા ॥ ૩,૭.૬૪॥

એવં સ્તુત્વા ક્રતુરપિ તૂષ્ણીમાસ ખગેશ્વર ।
તદનન્તરજઃ સ્તોતું મનુર્વૈવસ્વતોબ્રવીત્ ॥ ૩,૭.૬૫॥

વૈવલસ્વત ઉવાચ ।
સોહં હિ કર્મકરણે નિરતઃ સદૈવ સ્ત્રીણાં ભોગે ચ નિરતશ્ચ ગુદે પ્રમત્તઃ ।
જિહ્વેન્દ્રિયે ચ નિરતસ્તવ દર્શને ચ સમ્યગ્વિરાગસહિતઃ પરમો દરેણ ॥ ૩,૭.૬૬॥

માંસાસ્થિમજ્જરુધિરૈઃ સહિતે ચ દેહે ભક્તિં સદૈવ ભગવન્નપિ તસ્કરે ચ ।
ગુર્વગ્નિબાડબગવાદિષુ સત્સુ દુઃખાત્સમ્યગ્વિરક્તિમુપયામિ સહસ્વ નિત્યમ્ ॥ ૩,૭.૬૭॥

લોકાનુવાદશ્રવણે પરમા ચ શક્તિર્નારાયણસ્ય નમને ન ચ મેસ્તિ શક્તિઃ ।
લોકાનુયાનકરણે પરમા ચ શક્તિઃ ક્ષેત્રાદિમાર્ગગમને પરમા હ્યશક્તિઃ ॥ ૩,૭.૬૮॥

વૈશ્યાદિકેષુ ધનિકેષુ પરા ચ શક્તિઃ સદ્બ્રાહ્મણેષ્વપિ ન શક્તિરહો મુરારે ॥ ૩,૭.૬૯॥

વૈવસ્વતમનુર્દેવં સ્તુત્વા તૂષ્ણીં બભૂવ હ ।
તદનન્તરજઃ સ્તોતું વિશ્વામિત્રોપચક્રમે ॥ ૩,૭.૭૦॥

વિશ્વામિત્ર ઉવાચ ।
ન ધ્યાતે ચરણાંબુજે ભગવતો સંધ્યાપિ નાનુષ્ઠિતા જ્ઞાનદ્વારકપાટપાટનપટુર્ધર્મોપિનોપાર્જિતઃ ।
અન્તર્વ્યાકૃમલાભિઘાતકરણે પટ્વી શ્રુતા તે કથા નો દેવ શ્રવણેન
પાહિ ભગવન્મામત્રિતુલ્યં સદા ॥ ૩,૭.૭૧॥

વિશ્વામિત્રઋષિસ્ત્વેવં સ્તુત્વા તૂષ્ણીં બભૂવ હ ।
ભૃગુનારદક્ષાંશ્ચ વિહાય બ્રહ્મપુત્રકાઃ ॥ ૩,૭.૭૨॥

સપ્તસંખ્યા વસિષ્ઠાદ્યા વિશ્વામિત્રસ્તથૈવ ચ ।
વૈવસ્વતમનુસ્ત્વેતે પરસ્પરસમાઃ સ્મૃતાઃ ॥ ૩,૭.૭૩॥

વહ્નેરપ્યવરા નિત્યં કિઞ્ચિન્મિત્રાદ્ગુણાધિકાઃ ।
તદનન્તજસ્તોત્રં વક્ષ્યે શ ૃણુ ખગેશ્વર ॥ ૩,૭.૭૪॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
કૃષ્ણગરુડસંવાદે દેવાદિસ્તુતિતત્તારતમ્યનિરૂપણં નામ સપ્તમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૮
ક્રતોરનન્તરં જાતો મિત્રો (શ્રો) નામ ખગેશ્વર ।
નારાયણં જગદ્યોનિં સ્તોતું સમુપચક્રમે ॥ ૩,૮.૧॥

મિત્ર ઉવાચ ।
નતોસ્મ્યજ્ઞસ્ત્વચ્ચરણારવિન્દં ભવચ્છિદં સ્વસ્ત્યયનં ભવચ્છિદે ।
વેદ સ્વયં ભગવાન્વાસુદેવો નાહં નાગ્નિર્ન ત્રિદેવા મુનીન્દ્રાઃ ॥ ૩,૮.૨॥

અથાપરે ભાગવતપ્રધાના યદા ન જાનીયુરથાપરે કુતઃ ।
માં પાહિ નિત્યં પરતોપ્યધીશ વિશ્વામિત્રાન્ન્યૂન એવેતિ નિત્યમ્ ।
અહં પર્જન્યાદ્વિગુણ એવ નિત્યમતો મમ સ્તવને નાસ્તિ શક્તિઃ ॥ ૩,૮.૩॥

એવં સ્તુત્વા હરિં મિત્રસ્તૂષ્ણીમાસ તદા ખગ ।
તદનન્તરજા તારા સ્તોતું સમુપચક્રમે ॥ ૩,૮.૪॥

તારોવાચ
અનન્યેન તુ ભાવેન ભક્તિં કુર્વન્તિ યે દૃઢામ્ ।
ત્વત્કૃતે ત્યક્તકર્માણસ્ત્યક્તસ્વજનબાન્ધવાઃ ॥ ૩,૮.૫॥

ત્વદાશ્રયાં કથાં શ્રુત્વા (દૃષ્ટ્વા) શ ृण્વન્તિ કથયન્તિ ચ ।
તથૈતે સાધવો વિષ્ણો સર્વસંગવિવર્જિતાઃ ॥ ૩,૮.૬॥

તન્મધ્યે પતિતાં પાહિ સદા મિત્રસમાં પ્રભો ।
તારાનન્તરજઃ પ્રાહ નિરૃતિશ્ચ ખગેશ્વર ॥ ૩,૮.૭॥

નિરૃતિરુવાચ ।
યોગેન ત્વય્યર્પિતયા ચ ભક્ત્યા સંયાન્તિ લોકાઃ પરમાં ગતિં ચ ।
આસેવયા સર્વગુણાધિકાનાં જ્ઞાનેન વૈરાગ્યયુતેનદવે ॥ ૩,૮.૮॥

ચિત્તસ્ય નિગ્રહેણૈવ વિષ્ણોર્યાન્તિ પરં પદમ્ ।
અતો માં પાહિ દયયા સદા તારાસમં પ્રભો ।
તદનન્તરજા સ્તોતું પ્રાવહી તં પ્રચક્રમે ॥ ૩,૮.૯॥

પ્રવાહ્યુવાચ ।
સુતાઃ પ્રસંગેન ભવન્તિ વીર્યાત્તવ પ્રસાદાત્પરમાઃ સમ્પદશ્ચ ।
યા હ્યુત્તમશ્લોકરસાયનાઃ કથાસ્તત્સેવનાદાસ્ત્વપવર્ગવર્ત્મનિ ॥ ૩,૮.૧૦॥

ભક્તિર્ભવેત્સર્વદા દેવદેવ સદાપ્યહં નિરૃતેઃ સામ્યમેવ ।
સહર્ભાષ્યિકોમિત્રઃ ત્વયીતારઃ પ્રકીર્તિતાઃ ॥ ૩,૮.૧૧॥

કોણાધિપો નિરૃતિશ્ચ પ્રાવહી પ્રવહપ્રિયા ।
ચત્વાર એતે પર્જન્યાત્રિગુણાઃ પરિકીર્તિતાઃ ॥ ૩,૮.૧૨॥

તદનન્તરજાન્વક્ષ્યે તાઞ્છૃણુ ત્વં ખગેશ્વર ।
પ્રવાહભાર્યાનન્તરજો વિષ્વક્સેનોથપાર્ષદઃ ।
વાયુપુત્રો મહાભાગઃ હરિં સ્તોતું પ્રચક્રમે ॥ ૩,૮.૧૩॥

વિષ્વક્સેન ઉવાચ ।
ભગવાન્મોક્ષદઃ કૃષ્ણઃ પૂર્ણાનન્દો સદાયદિ ।
યદિ સ્યાત્પરમા ભક્તિર્હ્ય પરોક્ષત્વસાધના ॥ ૩,૮.૧૪॥

તથા સ્વગુરુમારભ્ય બ્રહ્માન્તેષુ ચ સાધુષુ ।
તદ્યોગ્યતાનુસારેણ ભક્તિર્નિષ્કપટા યદિ ॥ ૩,૮.૧૫॥

તુલસ્યાદિષુ જીવેષુ યદિ સ્યાત્પ્રીતિરણ્ડજ ।
સંસ્મૃતિશ્ચ તદા નાશી ભૂયાદેવ ન સંશયઃ ॥ ૩,૮.૧૬॥

એવં સ્તુત્ત્વા મહાભાગો વિષ્વક્સેનો મહાપ્રભો ।
તૂષ્ણીં બભૂવ ગરુડ પ્રાઞ્જલિર્નમ્રકન્ધરઃ ।
મિત્રાદહં ન્યૂન એવ નાત્ર કાર્યા વિચારણા ॥ ૩,૮.૧૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
કૃષ્ણગરુડસંવાદે વિષ્ણુસ્તુતિર્દેવતારમ્યાદિ અષ્ટમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૯
શ્રીગરુડ ઉવાચ ।
અજાનજસ્વરૂપં ચ બ્રૂહિ કૃષ્ણ મહામતે ।
તદન્યાંશ્ચ ક્રમેણેવ વક્તું કૃષ્ણ ત્વમર્હસિ ॥ ૩,૯.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
અજાનાખ્યા દેવતાસ્તુ તત્તદ્દેવકુલે ભવાઃ ।
અજાનદેવતાસ્તા હિ તેભ્યોગ્યાઃ કર્મદેવતાઃ ॥ ૩,૯.૨॥

વિરાધશ્ચારુદેષ્ણશ્ચ તથા ચિત્રરથસ્તથા ।
ધૃતરાષ્ટ્રઃ કિશોરશ્ચ હૂહૂર્હાહાસ્તથૈવ ચ ॥ ૩,૯.૩॥

વિદ્યાધરશ્ચોગ્રસેનો વિશ્વાવસુપરાવસૂ ।
ચિત્રસેનશ્ચ ગોપાલો બલઃ પઞ્ચદશ સ્મૃતાઃ ॥ ૩,૯.૪॥

એવમાદ્યશ્ચ ગન્ધર્વાઃ શતસંખ્યાઃ ખગેશ્વર ।
અજાનજસમા જ્ઞેયા મુક્તૌ સંસાર એવ ચ ॥ ૩,૯.૫॥

અજ્ઞાનજાસ્તુ મે દેવાઃ કર્મજેભ્યઃ શતાવરાઃ ।
ધૃતાચી મેનકા રંભા ઉર્વશી ચ તિલોત્તમા ॥ ૩,૯.૬॥

સુકેતુઃ શબરી ચૈવ મઞ્જુઘોષા ચ પિઙ્ગલા ।
ઇત્યાદિકં યક્ષરત્નં સહ સમ્પરિકીર્તિતમ્ ॥ ૩,૯.૭॥

અજાનજસમા હ્યેતે કર્મજેભ્યઃ શતાવરાઃ ।
વિશ્વામિત્રો વસિષ્ઠશ્ચ નારદશ્ચ્યવનસ્તથા ॥ ૩,૯.૮॥

ઉતથ્યશ્ચ મુનિશ્ચૈતાન્દ્રાજપિત્વા ખગેશ્વર ।
ઋષયશ્ચ મહાત્માનો હ્યજાનજસમાઃ સ્મૃતાઃ ॥ ૩,૯.૯॥

શતર્ચિઃ કશ્યપો જ્ઞેયો મધ્યમશ્ચ પરાશરઃ ।

પાવમાન્યઃ પ્રગાથશ્ચ ક્ષુદ્રસૂક્તશ્ચ દેવલઃ ॥ ૩,૯.૧૦॥

ગૃત્સમદો હ્યાસુરિશ્ચ ભરદ્વાજોથ મુદ્ગલઃ ।
ઉદ્દાલકો હ્યૃ શ‍ૃઙ્ગઃ શઙ્ખઃ સત્યવ્રતસ્તથા ॥ ૩,૯.૧૧॥

સુયજ્ઞશ્ચૈવ બાભ્રવ્યો માણ્ડૂકશ્ચૈવ બાષ્કલઃ ।
ધર્માચાર્યસ્તથાગસ્ત્યો દાલ્ભ્યો દાર્ઢ્યચ્યુતસ્તથા ॥ ૩,૯.૧૨॥

કવષો હરિતઃ કણ્વો વિરૂપો મુસલસ્તથા ।
વિષ્ણુવૃદ્ધશ્ચ આત્રેયઃ શ્રીવત્સો વત્સલેત્યપિ ॥ ૩,૯.૧૩॥

ભાર્ગવશ્ચાપ્નવાનશ્ચ માણ્ડૂકેયસ્તથૈવ ।
મણ્ડ્કશ્ચૈવ જાબચલિઃ વીતિહવ્યસ્તથૈવ ચ ॥ ૩,૯.૧૪॥

ગૃત્સમદઃ શૌનકશ્ચ ઇત્યાદ્યા ઋષયઃ સ્મૃતાઃ ।
એતેષાં શ્રવણાદેવ હરિઃ પ્રીણાતિ સર્વદા ॥ ૩,૯.૧૫॥

બ્રુવે દ્વ્યષ્ટસહસ્રં ચ શ‍ૃણુ તાર્ક્ષ્ય મમ સ્ત્રિયઃ ।
અગ્નિપુત્રાસ્તુ યદ્દ્વ્યષ્ટસહસ્રઞ્ચ મમ સ્ત્રિયઃ ।
અજાનજસમા હ્યેતા (તે) નાત્ર કાર્યા વિચારણા ॥ ૩,૯.૧૬॥

ત્વષ્ટુઃ પુત્રી કશેરૂશ્ચ તાસાં મધ્યે ગુણાધિકા ।
તદનન્તરજાન્વક્ષ્યે શ‍ૃણુ સમ્યક્ખગેશ્વર ॥ ૩,૯.૧૭॥

આજાનેભ્યસ્તુ પિતરઃ સપ્તભ્યોન્યે શતાવરાઃ ।
તથાધિકા હિ પિતર ઇતિ વેદવિદાં મતમ્ ॥ ૩,૯.૧૮॥

તદનન્તરાજાન્વક્ષ્યે શ‍ૃણુ ત્વં દ્વિજસત્તમ ।
અષ્ટાભ્યો દેવગન્ધર્વા અષ્ટોત્તરશતં વિના ॥ ૩,૯.૧૯॥

તેભ્યઃ શતગુણાનન્દા દેવપ્રેષ્યાસ્તુ મુખ્યતઃ ।
સ્વમુકેનેવ દેવૈશ્ચ આજ્ઞાપ્યાઃ સર્વદા ગણાઃ ॥ ૩,૯.૨૦॥

આખ્યાતા દેવગન્ધર્વાસ્તેભ્યસ્તે ચ શતાવરાઃ ।
તેભ્યસ્તુ ક્ષિતિપા જ્ઞેયા અવરાશ્ચ શતૈર્ગુણૈઃ ॥ ૩,૯.૨૧॥

તેભ્યઃ શતગુણાજ્ઞેયા માનુષેષૂત્તમા ગણાઃ ।
એવં પ્રાસંગિકાનુક્ત્વા પ્રકૃતં હ્યનુસરામ્યહમ્ ।
એવં બ્રહ્માદયો દેવા લક્ષ્મ્યાદ્યા અપિ સર્વશઃ ॥ ૩,૯.૨૨॥

સ્તુત્વા તૂષ્ણીં સ્થિતાઃ સર્વે પ્રાઞ્જલીકૃત્ય ભો દ્વિજ ॥ ૩,૯.૨૩॥

ઇતિ સ્તુતશ્ચ દેવેશો ભગવાન્હરિરવ્યયઃ ।
તેષામાયતનં દાતું મનસા સમચિન્તયત્ ॥ ૩,૯.૨૪॥

ઇદં પવિત્રમારોગ્યં પુણ્યં પાપપ્રણાશનમ્ ।
હરિપ્રસાદજનકં સ્વરૂપસુખસાધનમ્ ॥ ૩,૯.૨૫॥

ઇદં તુ સ્તવનં વિપ્રા ન પઠન્તીહ માનવાઃ ।
ન શ‍ૃણ્વન્તિ ચ યે નિત્યં તે સર્વે ચૈવ માયિનઃ ॥ ૩,૯.૨૬॥

નસ્મરન્તોન્તરં નિત્યં યે ભુઞ્જન્તિ નરાધમાઃ ।
તૈર્ભુક્તા સતતં વિષ્ઠા સદા ક્રિમિશતૈર્યુતા ॥ ૩,૯.૨૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
દેવકૃતવિષ્ણુસ્તુતિદેવતાતારતમ્યનિરૂપણં નામ નવમોऽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૦
ગરુડ ઉવાચ ।
દેવૈરેવં સ્તુતો વિષ્ણુર્ભગવાન્સાત્ત્વતાં પતિઃ ।
કીદૃશં હ્યાશ્રયં દત્ત્વૈષાં વિવેશ મહાપ્રભુઃ ॥ ૩,૧૦.૧॥

એતદ્વેદિતુમિચ્છામિ કૃષ્ણકૃષ્ણ મહાપ્રભો ।
સમ્યગ્બ્રૂહિ દયાલો ત્વં યદિ મચ્છ્રોત્રમર્હતિ ॥ ૩,૧૦.૨॥

શ્રીકૃષ્ણ ઉવાચ ।
તેષુ તત્ત્વેષુ ભગવાન્સ વિવેશ મહાપ્રભુઃ ।
ક્ષોભયામાસ ભગવાન્સંબન્ધવિધુરો હરિઃ ॥ ૩,૧૦.૩॥

અદૌ સસર્જ ભગવાન્બ્રહ્માણ્ડં કન કાત્મકમ્ ।
પઞ્ચાશત્કોટિવિસ્તીર્ણં યોજનાનાં સમન્તતઃ ॥ ૩,૧૦.૪॥

તદૂર્ધ્વમણ્વવયવસ્તાવાન્કનકરૂપકઃ ।
વર્તતે તત ઊર્ધ્વં તુ પઞ્ચાશત્કોટિભૂતલમ્ ॥ ૩,૧૦.૫॥

એવં કોટિશતં તસ્યાવયવઃ પરિકીર્તિતઃ ।
તતશ્ચ સપ્તાવરણૈઃ સમતાત્પરિધીકૃતમ્ ॥ ૩,૧૦.૬॥

કબન્ધાવરણં હ્યાદ્યં કોટ્યા દશસહસ્રકમ્ ।

દ્વિતીયા વરણં જ્ઞેયં પાવકસ્ય મહાત્મનઃ ॥ ૩,૧૦.૭॥

અપાં દશગુણૈર્યુક્તં સમન્તાત્પરિધી (ખી) કૃતમ્ ।
તૃતીયાવરણં જ્ઞેયં હરસ્યૈવ મહાત્મનઃ ॥ ૩,૧૦.૮॥

દશાધિકં પાવકાચ્ચ સમન્તાત્પરિવારિતમ્ ।
ચતુર્થાવરણં જ્ઞેયં નભસોઽપિ મહાપ્રભો ॥ ૩,૧૦.૯॥

હરાદ્દશગુણૈરેવં સમન્તાત્પરિવારિતમ્ ।
પઞ્ચમાવરણં જ્ઞેયમહઙ્કારાખ્યમેવચ ॥ ૩,૧૦.૧૦॥

વ્યોમ્નો દશગુણૈરેવં સમન્તાત્પરિવારિ તમ્ ।
ષષ્ઠમાવરણં પ્રોક્તં મહત્તત્ત્વં ખગેશ્વર ॥ ૩,૧૦.૧૧॥

અહઙ્કારાદ્દશગુણં સમન્તાત્પરિવારિતમ્ ।
સપ્તમાવરણં પ્રોક્તં ત્રિગુણાવરણં પ્રભો ॥ ૩,૧૦.૧૨॥

મહત્તત્ત્વાદ્દશગુણૈરધિકં પરિકીર્તિતમ્ ।
મહત્તત્ત્વાનન્તરં ચ તમો હ્યાવરણં સ્મૃતમ્ ॥ ૩,૧૦.૧૩॥

મહત્તત્ત્વાત્પઞ્ચગુણૈરધિકં પરિકીર્તિતમ્ ।
તસ્માચ્ચ દ્વિગુણં જ્ઞેયંરજો હ્યાવરણં સ્મૃતમ્ ॥ ૩,૧૦.૧૪॥

તતશ્ચ દ્વિગુણં જ્ઞેયં સત્ત્વાવરણમુત્તમમ્ ।
ત્રયશ્ચૈવં મિલિત્વા તુ એકાવરણમીરિતમ્ ॥ ૩,૧૦.૧૫॥

અવ્યાકૃતાખ્યમાકાશં તદનન્તરમીરિતમ્ ।
મર્યાદારહિતશ્ચૈવં તત્રાસ્તે હરિરવ્યયઃ ॥ ૩,૧૦.૧૬॥

અષ્ટમાવરણં વ્યોમ્નોરં તરા વિરજા નદી ।
પઞ્ચયોજનવિસ્તીર્ણા સમન્તાત્પરીધીકૃતા ॥ ૩,૧૦.૧૭॥

અસ્તિ પુણ્યતમા જ્ઞેયા લોકસંસારનાશિની ।
એવં ચતુર્મુખેનૈવ તદા હૃષ્યં તિ ચાણ્ડજ ॥ ૩,૧૦.૧૮॥

તે સર્વે વિરજાનદ્યાં સમ્યક્સ્નાત્વા વિસર્જ્ય ચ ।
લિઙ્ગદેહં તતઃ પશ્ચાન્મોક્ષં વિન્દન્તિ તે હરેઃ ॥ ૩,૧૦.૧૯॥

અપરોક્ષદૃશામેવં બ્રહ્મણા સહ ગામિનામ્ ।
વિરજાતરણં વિદ્ધિ નાન્યેષાં વિનતાસુત ॥ ૩,૧૦.૨૦॥

અપરોક્ષદૃશાં બ્રહ્મન્વ્યાસાદીનાં ખગેશ્વર ।
વિરજાતરણં નાસ્તિ ભોક્તવ્યત્વાચ્ચ કર્મણઃ ॥ ૩,૧૦.૨૧॥

વિરિઞ્ચેનૈવ સાકં તુ કલ્પેસ્મિન્નધિકારિણામ્ ।
તેષાં તુ નિયમેનૈવ સર્વપ્રારબ્ધસંક્ષયઃ ॥ ૩,૧૦.૨૨॥

ભવત્યેવં ન સંદેહો નાન્યેષાં સર્વસંક્ષયઃ ।
અતસ્તુ વિરજાતરણં તેષામેવ ભવેત્પટો ॥ ૩,૧૦.૨૩॥

વિરજાતરણં નાસ્તિ તેષાં ત (તયોસ્ત)ત્સંગિનાં તથા ।
સર્વારબ્ધક્ષયો નાસ્તિ યતસ્તેષાં ખગાધિપ ॥ ૩,૧૦.૨૪॥

અતશ્ચ સર્વથા નાસ્તિ વિરજાતરણં પ્રભો ।
પ્રલયે વિરજાનદ્યા લયો નાસ્તિ ખગેશ્વર ॥ ૩,૧૦.૨૫॥

લક્ષ્મ્યાત્મિકા તુ સા જ્ઞેયા લિઙ્ગદેહવિદારિણી ।
બ્રહ્મત્વયોગ્યા ઋજવો નામ દેવાઃ પ્રકીર્તિતાઃ ॥ ૩,૧૦.૨૬॥

તેપિ પ્રત્યેકશઃ સંતિ હ્યનન્તાશ્ચ પૃથગ્ગણાઃ ।
પૃથક્પૃથક્ચ તૈઃ સાકં મોક્ષયોગ્યાઃ ખગેશ્વર ॥ ૩,૧૦.૨૭॥

જીવાઃ સંતિ હ્યનેકે ચ પ્રતિકલ્પે સૃજન્તિ તે ।
દ્વાત્રિંશલ્લક્ષણૈઃ સમ્યગ્યુક્તા વાયુત્વયોગ્યકાઃ ॥ ૩,૧૦.૨૯ ॥ ૧૦.૨૮
અષ્ટાવિંશલ્લક્ષણૈશ્ચ ગિરીશપદયોગિનઃ ।
ચતુર્વિંશતિમારભ્યાષોડશાચ્ચ સુરાઃ સ્મૃતાઃ ॥ ૩,૧૦.૨૯॥

અષ્ટકા ઋષયઃ પ્રોક્તાસ્તદૂનાશ્ચક્રવર્તિનઃ ।
શતજન્મ સમારભ્ય બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૩,૧૦.૩૦॥

અપરોક્ષમિતિ પ્રોક્તં તથા હ્યારબ્ધસંક્ષયઃ ।
એકેન શતકલ્પેન વાયુત્વં યાતિ ભો દ્વિજ ॥ ૩,૧૦.૩૧॥

શતજન્મનિ બ્રહ્મત્વં યાતિ પશ્ચાદ્ધરેઃ પદમ્ ।
ચત્વારિંશદ્બ્રહ્મકલ્પં સમારભ્ય ખગેશ્વર ॥ ૩,૧૦.૩૨॥

રુદ્રસ્યાપ્યાપરોક્ષ્યં સ્યાત્તથા પ્રારબ્ધસંક્ષયઃ ।
એકચત્વારિંશકલ્પે શેષત્વં યાતિ સુવ્રત ॥ ૩,૧૦.૩૩॥

બ્રહ્મણા સહ મોક્ષં ચ યાતિ સમ્યઙ્ન ચાન્યથા ।
કલ્પવિંશતિમારભ્ય બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૩,૧૦.૩૪॥

ઇન્દ્રસ્યાપ્યાપરોક્ષ્યં સ્યાત્તથા પ્રારબ્ધસંક્ષયઃ ।
બ્રહ્મણૈવ સહાયાતિ હરિં નારાયણં પરમ્ ॥ ૩,૧૦.૩૫॥

ગરુડ ઉવાચ ।
પઞ્ચાશીતિબ્રહ્મકલ્પં સમારભ્ય મહાપ્રભો ।
રુદ્રસ્યાપ્યાપરોક્ષ્યં સ્યાત્તથા પ્રારબ્ધસંક્ષયઃ ॥ ૩,૧૦.૩૬॥

ઇતિ શ્રુતં મયા બ્રહ્મન્બ્રહ્મણોક્તં હરેઃ પ્રિયાત્ ।
ઇત્થં ત્વયોક્તં શ્રીકૃષ્ણ સંશયોબાધતે મમ ॥ ૩,૧૦.૩૭॥

અતો મે સંશયં છિન્ધિ યથા ન સ્યાત્તથા પુનઃ ।
ઇતિ તદ્વચનં શ્રુત્વા કૃષ્ણો વચનમબ્રવીત્ ॥ ૩,૧૦.૩૮॥

શ્રીકૃષ્ણ ઉવાચ ।
બ્રહ્મોક્તસ્ય મયોક્તસ્ય વિવાદો નાસ્તિ સર્વથા ।
સંદેહસ્ત્વજ્ઞદૃષ્ટીનાં જ્ઞાનિનાં નાસ્તિ સર્વથા ॥ ૩,૧૦.૩૯॥

અશીતિહ્યષ્ટકા પ્રોક્તા અષ્ટપઞ્ચ ખગેશ્વર ।
ચત્વારિંશદ્બ્રહ્મકલ્પ એવં પ્રાહ ચતુર્મુખઃ ॥ ૩,૧૦.૪૦॥

તત્ત્વાનાં બહુગોપ્યત્વાત્તથોક્તં બ્રહ્મણા પુરા ।
અભિપ્રાયસ્ત્વેવમેવ જ્ઞાતવ્યો નાત્ર સંશયઃ ॥ ૩,૧૦.૪૧॥

પઞ્ચા શીતિબ્રહ્મકલ્પં યે વિજાનન્તિ ભો દ્વિજ ।
તેન્ધં તમઃ પ્રવિશન્તિ સત્યંસત્યં મયોદિતમ્ ॥ ૩,૧૦.૪૨॥

વિરજાનન્તરં વિપ્રં તથા વ્યાકૃતમંબરમ્ ।
અનન્તપારં તદપિ લક્ષ્મીસ્તસ્યાભિમાનિની ॥ ૩,૧૦.૪૩॥

સંખ્યાનુગણનં નામ યસ્ય નાસ્તિ મહાપ્રભો ।
ન દાનં જાતિપ્રોક્તં સર્વદા નાસ્તિ સંશયઃ ॥ ૩,૧૦.૪૪॥

અણ્ડાભિમાની બ્રહ્મા તુ વિરાડાખ્યો હ્યભૂત્તદા ।
એવં મતં સ નિર્માય ભગવાન્હરિખ્યયઃ ॥ ૩,૧૦.૪૫॥

વિશેષાત્તત્ર ગરુડ દેવૈસ્તત્ત્વાભિમાનિભિઃ ।
અધશ્ચોર્ધ્વં તદાક્રમ્ય હરિસ્તિષ્ઠતિ સર્વદા ॥ ૩,૧૦.૪૬॥

એવં પ્રાકૃતસર્ગોક્તિર્વૈકૃતં શ◌ૃણુ પક્ષિરાટ્ ॥ ૩,૧૦.૪૭॥

ગરુડ ઉવાચ ।

સૃષ્ટિરુક્તા ત્વયા પૂર્વં શ્રુતા સમ્યઙ્મયા હરે ॥ ૩,૧૦.૪૮॥

કિં નામ પ્રાકૃતં જ્ઞેયં તથા કિં વૈકૃતં પ્રભો ।
એતદ્વિસ્તીર્ય મે બ્રૂહિ શ્રોતું કૌતૂહલં હિ મે ॥ ૩,૧૦.૪૯॥

શ્રીકૃષ્ણ ઉવાચ ।
અવ્યક્તાદ્યાઃ પૃથિવ્યન્તા અણ્ડાચ્ચ બહિરુદ્ભવાઃ ।
તે સર્વે પ્રાકૃતાઃ પ્રોક્તાસ્તેષાં જ્ઞાનાદ્વિમચ્યતે ॥ ૩,૧૦.૫૦॥

બ્રહ્માડં વિકૃતં જ્ઞેયં બ્રહ્માણ્ડાન્તઃ ખગેશ્વર ।
યા સૃષ્ટિરુચ્યતે સદ્ભિઃ સૈવોક્તા વિકૃતેતિ ચ ॥ ૩,૧૦.૫૧॥

સૃષ્ટિશ્ચ પ્રલયશ્ચૈવ સંસારો ભક્તિરેવ ચ ।
દેવતા ઋષિમુખ્યાશ્ચ લોકા ભૂરાદયસ્તથા ॥ ૩,૧૦.૫૨॥

અનાદ્યનન્તકાલીનાઃ સર્વદૈકપ્રકારકાઃ ।
જગત્પ્રવાહઃ સત્યોઽયં નૈવ મિથ્યા કથઞ્ચન ॥ ૩,૧૦.૫૩॥

યત્ત્વેતદન્યથા બ્રૂયુઃ સર્વહન્તાર એવ તે ।
જગત્પ્રવાહઃ સત્યોઽયં હરિસેવેતિસાથા ॥ ૩,૧૦.૫૪॥

સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુત્યતે ।
વેદાચ્છાસ્ત્રં પરં નાસ્તિ ન દેવઃ કેશવાત્પરઃ ॥ ૩,૧૦.૫૫॥

સર્વોત્કૃષ્ટં કેશવં ચ વિહાયાન્યમુપાસતે ।
તેષામન્ધં તમો જ્ઞેયં પિતૃણાં ગરુણામપિ ॥ ૩,૧૦.૫૬॥

ઇદાનીં શ ૃણુ પક્ષીન્દ્ર વૈકૃતં સર્ગમુત્તમમ્ ।
સમ્યગ્જાનાતિ યો લોકે સ યાતિ પરમં પદમ્ ॥ ૩,૧૦.૫૭॥

ઇતિ શ્રીગારુડે મહાપુરાણે શ્રીકૃષ્ણગરુડસંવાદે દ્વિતીયાંશે ધર્મકાણ્ડે પ્રેતકલ્પે બ્રહ્માણ્ડાદિવૈકૃતૈકદેશપ્રાકૃતસૃષ્ટિનિરૂપણં નામ દશમોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૧
શ્રીકૃષ્ણ ઉવાચ ।
પુરુષાખ્યો હરિઃ સાક્ષાદ્ભગવાન્પુરુષોત્તમઃ ।
શિશ્યેત્વણ્ડોદક વિષ્ણુર્નૃણાં સાહસ્રવત્સરમ્ ।
લક્ષ્મીશ્ચોદકરૂપેણ શય્યારૂપેણ ભોણ્ડજા ॥ ૩,૧૧.૧॥

વિદ્યા તરઙ્ગરૂપેણ વાયુરૂપેણ ભોણ્ડજ ॥ ૩,૧૧.૨॥

તમોરૂપેણ સૈવાસી ન્નાન્યદાસીત્કથઞ્ચન ।
અસીદ્ગર્ભોદકે ચૈવ નાન્યદાસીત્કથઞ્ચન ॥ ૩,૧૧.૩॥

લક્ષ્મીસ્તુષ્ટાવ ચ હરિં ગર્ભોદે પક્ષિસત્તમ ।
લક્ષ્મીધરાભ્યાં રૂપાભ્યાં પ્રકૃતિર્હરિણા તથા ॥ ૩,૧૧.૪॥

શેત શ્રુતિસ્વરૂપેણ સ્તૌતિ ગર્ભોદકે હરિમ્ ।
નારાયણ નમસ્તેऽસ્તુ શ ૃણુ વિજ્ઞાપનં મમ ॥ ૩,૧૧.૫॥

અજાં જહિ મહાભાગ યોગ્યાનાં મુક્તિમાવહ ।
અજા તુ પ્રકૃતિઃ પ્રોક્તા ચાપરા પ્રકૃતિઃ પરા ॥ ૩,૧૧.૬॥

શતતોવરા તુ બ્રહ્માણી બ્રહ્મપત્ની વરાનના ।
ઉમા શચ્યવરા તસ્યા અવરાઃ સમ્પ્રકીર્તિતાઃ ॥ ૩,૧૧.૭॥

એતાસાં હનનં નૈવ પ્રાર્થયામઃ સદા હરે ।
અસ્તિ પ્રતિનૃષુ બ્રહ્મ પ્રકૃતી દ્વે વ્યવસ્થિતે ॥ ૩,૧૧.૮॥

એકા તુ નિત્યસંસારા ત્વજશબ્દાભિધાયિકા ।
દ્વિતીયા તુ તમોऽપોહ્યા અજશબ્દાભિધાયિકા ॥ ૩,૧૧.૯॥

અત એવ ત્વજે જ્યેષ્ઠે ઇતિ લોકે પ્રકીર્તિતે ।
સુખદુઃખપ્રદા ચૈવ અપરા દુઃખદૈવ તુ ॥ ૩,૧૧.૧૦॥

મોક્ષાધિકારિણામેવ જ્ઞાનૈશ્વર્યાદયો ગણાઃ ।
તેષામાચ્છાદિકા હોકા તમોઙ્ગા સા પ્રકીર્તિતા ॥ ૩,૧૧.૧૧॥

જીવં પ્રતિ મહાવિષ્ણું પાહ્યાચ્છાદયતિ પ્રભો ।
સા પરા પ્રકૃતિર્જ્ઞેયા પરમાચ્છાદિકા સ્મૃતા ॥ ૩,૧૧.૧૨॥

એવં સા પરમા દુષ્ટા હોકા તમોઙ્ગા તુ પ્રકીર્તિતા ।
જીવવર્ગેષ્વેવ ખગ બ્રહ્માદેર્નાસ્તિ સા ક્વચિત્ ॥ ૩,૧૧.૧૩॥

પિશાચવત્સમુદ્દિષ્ટા જીવસ્યેત્યધિકારિણઃ ।
પ્રેરિકા તુ તયોર્દેવ્યો સ્ત્વહમાદ્યા સુખાત્મિકા ॥ ૩,૧૧.૧૪॥

તત્ર વિષ્ણો મહાભાગ સગુણાચ્છાદકો હિતઃ ।
પરમાચ્છાદિકાં દુષ્ટાં વ્યામુચ્યૈવ મહાપ્રભો ॥ ૩,૧૧.૧૫॥

મોક્ષં દેહિ મહાદેવ ત્વદ્ભક્તાનાં મહાપ્રભો ।
પરમાચ્છાદિકા હ્યસ્માન્નિત્ય સંસારિણો યતઃ ॥ ૩,૧૧.૧૬॥

અત એવ ચ નિત્યત્વાત્તસ્માત્તદપસારણમ્ ।
કુરુ દેવ મહાભાગ ઇતિ વિજ્ઞાયતાં મમ ॥ ૩,૧૧.૧૭॥

એવં સ્તુતો હરિઃ કૃષ્ણો સુપ્રબુદ્ધોऽપિ સર્બદા ।
ઉદ્બુદ્ધવન્મહા વિષ્ણુરભૂદજ્ઞપરીક્ષયા ॥ ૩,૧૧.૧૮॥

તસ્ય નાભેરભૂત્પદ્મં સૌવર્ણં ભુવનાશ્રયમ્ ।
તત્પ્રાકૃતં ચ વિજ્ઞેયં ભૂદેવી ત્વભિમાનિની ॥ ૩,૧૧.૧૯॥

અનન્તસૂર્યવચ્ચૈવ પ્રકાશકરમીરિતમ્ ।
ચિદાનન્દમયો વિષ્ણુસ્તસ્માદ્ભિન્નો ન સંશયઃ ॥ ૩,૧૧.૨૦॥

વિષ્ણોઃ સ્વરૂપભૂતં ચ યે વિજાનન્તિ તે નરાઃ ।
તે યાન્તિ હ્યધરં લોકં તથા તત્સંગિસંગિનઃ ॥ ૩,૧૧.૨૧॥

કિરીટાદિકવચ્ચૈવ જ્ઞાતવ્યં ચ ખગેશ્વર ।
કિરીટાદ્યા અપિ હરેર્દ્વિધા સંતિ ન સંશયઃ ॥ ૩,૧૧.૨૨॥

સ્વરૂપા હ્યસ્વરૂપાશ્ચ સ્વસ્વરૂપનિ દર્શને ।
ગૃહીતા ઇતિ વિજ્ઞેયા ન સ્વરૂપાઃ ખગેશ્વર ॥ ૩,૧૧.૨૩॥

ભ્માણ્ડં હ્યસૃજત્તત્ર સર્વલોકવિધાયકમ્ ।
પ્રલયે મુક્તિહીનશ્ચ સુપ્ત ઇત્યુચ્યતે બુધઃ ॥ ૩,૧૧.૨૪॥

તસ્ય સમિવસ્ત્રિવં ચ ન જ્ઞાતવ્યા ખગેશ્વર ।
પ્રલયોऽપિ મહાભાગ બ્રહ્મવાય્વોર્ન ચાસ્તિ હિ ॥ ૩,૧૧.૨૫॥

વૃત્તિરૂપં પરં જ્ઞાનં પાદ્યાર્ઘ્યં નાત્ર સંશયઃ ।
ઇન્દ્રિયાણામુપરતિઃ સુપ્તિરિત્યુચ્યતે બુધૈઃ ॥ ૩,૧૧.૨૬॥

બ્રહ્મવાય્વોશ્ચ પાસગ્નિ વાસ્તવં સ્યાત્ખગેશ્વર ।
કથં તર્હિ તયોર્વર્તે હ્યવિલત્યત્વમુચ્યતે ॥ ૩,૧૧.૨૭॥

તસ્માત્તદ્વાસ્તવં નાસ્તિ બ્રહ્મવાય્વોઃ ખગેશ્વર ।
સ્વપ્નાવસ્થાયાઃ સદૃશી હ્યવસ્થા સુપ્તિસંજ્ઞિકા ॥ ૩,૧૧.૨૮॥

બ્રહ્મણ્યમુખ્યયા વૃત્ત્યા હ્યસ્તીત્યેવં નિબોધ મે ।
અતો ન વાસ્તવમિદમઙ્ગીકાર્યં ખગેશ્વર ॥ ૩,૧૧.૨૯॥

વાસ્તવં યે વિજાનન્તિ તેષાં નિત્યં ધનં તપઃ ।
શ્રીગરુડ ઉવાચ ।
સુપ્તિસ્ત્વજ્ઞાનકાર્યત્વાત્સુપ્તિર્નાસ્તીત્યુદીરિતા ॥ ૩,૧૧.૩૦॥

યદા હિ કારણં ચાસ્તિ તદા કાર્યમિતિ પ્રભો ।
ઇત્યભિપ્રાયગર્ભેણ ત્વં સમાધાસ્ય તે યદિ ॥ ૩,૧૧.૩૧॥

તર્હિ તસ્ય મહાભાગ કથં બ્રૂહિ ભયાદિકમ્ ।
ભયાદિકં હ્યસ્તુ નામ કા વાસ્માકં ક્ષતિર્ભવેત્ ॥ ૩,૧૧.૩૨॥

એવમુક્તસ્તુ ગોવિન્દોઽબ્રવીત્તત્રાપિ કારણમ્ ।
ભયં ત્વજ્ઞાનકાર્યં સ્યાત્કાર્યાકારણમત્ર હિ ॥ ૩,૧૧.૩૩॥

પ્રીયતે મત્વા બ્રહ્મ તસ્માત્સુપ્તિશ્ચ તત્ર હિ ।
અજ્ઞાદિકં યદિ બ્રહ્મ તસ્ય ન સ્યાત્કથઞ્ચન ॥ ૩,૧૧.૩૪॥

કથં સુખી પ્રદૃશ્યેત ન કથઞ્ચિત્કરિષ્યતિ ।
કથં વા મુક્તિપર્યન્તં જ્ઞાનવ્યક્તિર્વદસ્વ મે ॥ ૩,૧૧.૩૫॥

યદ્યજ્ઞાનં તસ્ય સત્યં ન સ્યાત્તર્હિ મહાપ્રભો ।
અત્યાદરાત્કથં બ્રહ્મઞ્છ્રવણં કુરુતે વદ ॥ ૩,૧૧.૩૬॥

ઇતિ તસ્ય વચઃ શ્રુત્વા કૃષ્ણો વચનમબ્રવીત્ ।
ભયં ચ વાસ્તવં તસ્ય ન જાનીહિ મહામતે ॥ ૩,૧૧.૩૭॥

દૃશ્યતે મદ્ભયં તસ્ય હરિપ્રીત્યર્થમેવ ચ ।
ભયાકામવતીવાનમુવાસ્તવમીરિતમ્ ॥ ૩,૧૧.૩૮॥

પ્રાપ્તપ્રાબ્ધલેશસ્ત તસ્ય નાસ્તિ ખગેશ્વર ।
દુઃખાજ્ઞાનાદિકં કિઞ્ચિત્કથં તસ્મિન્ભવિષ્યતિ ॥ ૩,૧૧.૩૯॥

વિષ્ણોરાજ્ઞાનુસારેણ ભયાયાનુકરોત્યસૌ ।
તેન પ્રીણાતિ ચ હરિસ્તસ્ય નાસ્ત્યત્ર સંશયઃ ॥ ૩,૧૧.૪૦॥

શ ૃણોતિ સતતં બ્રહ્મા ન ચિન્ત્યાત્તાવતાજ્ઞતા ।
કદાચિદ્દૃશ્યતે બ્રહ્મા દુઃખી ન ચ ખગેશ્વર ॥ ૩,૧૧.૪૧॥

યદ્બ્રહ્મ ચ ન જાનીયાદ્ધરિપ્રીત્યર્થમેવ ચ ।
દુઃખિવદ્દૃશ્યતે બ્રહ્મા આજ્ઞાનાં મોહનાય ચ ॥ ૩,૧૧.૪૨॥

યોગ્યતામનતિક્રમ્ય યાવજ્જ્ઞાનં ચ તિષ્ઠતિ ।
બ્રહ્મણસ્તાવદેવાસ્તિ નાત્ર કાર્યા વિચારણા ॥ ૩,૧૧.૪૩॥

જ્ઞાનસ્ય વ્યક્તતા નામ વિદ્યમાનસ્ય ચાદરાત્ ।
જ્ઞાનસ્યાસાદનં ચૈવ જ્ઞાનવ્યક્તિરિતિ સ્મૃતા ॥ ૩,૧૧.૪૪॥

અતો જ્ઞાનાદિકં નાસ્તિ બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
પદ્માદ્ધિરણ્મ યાજ્જાતો બ્રહ્મા તુ ચતુરાનનઃ ॥ ૩,૧૧.૪૫॥

સર્વદાઽલોચનાયુક્તસ્તેન સ્વાલોચનં કૃતમ્ ।
અજ્ઞાનાં મોહનાર્થાય હરિપ્રીત્યર્થમેવ ચ ॥ ૩,૧૧.૪૬॥

સંકલ્પોઽપિ તથૈવાસ્તિ ન હ્યજ્ઞાનાત્કૃતસ્તથા ।
કો વા માં સૃષ્ટવાનત્ર ઇતિ હ્યાલોચ્ય સ પ્રભુઃ ॥ ૩,૧૧.૪૭॥

તં વિચારયિતું બ્રહ્મા પદ્મનાડીં વિવેશ હ ॥ ૩,૧૧.૪૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે દ્વિતીયાંશે ધર્મકાણ્ડે
શ્રીકૃષ્ણગરુડસંવાદેઽજ્ઞાનહેતુનિરૂપણં નામૈકાદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૨
શ્રીકૃષ્ણ ઉવાચ ।
નાડીં સમાવિશ્ય મહાનુભાવઃ શ્રીવિષ્ણુભક્તો ત્વથ પુષ્કરસ્થઃ ।
વિચારયામાસ ગુરું સ્વમૂલં નારાયણં નિર્ગુણમદ્વિતીયમ્ ॥ ૩,૧૨.૧॥

એતાવતા હરિભક્તસ્ય તસ્યાપ્યચ્છિન્નભક્તસ્ય ચતુર્મુખસ્ય ।
વિચારકાલે ચ વિચિન્તનીયો હ્યજ્ઞાનલેશસ્તુ ખગેશ્વરેશ્વર ॥ ૩,૧૨.૨॥

યથાસ્તિ વિષ્ણોર્મનઃ સઙ્કલ્પ એવ તથૈવ સોઽપિ પ્રકરોતિ નિત્યમ્ ।
આલોચને તસ્ય સદાસ્તિ ભૂમન્સ્વયોગ્યતામનતિક્રમ્ય ચૈવ ॥ ૩,૧૨.૩॥

હરેઃ સ્વરૂપે ચ તથા પ્રપઞ્ચઃ સ્વસ્મિન્સ્વરૂપે ચ ખગાસ્તિ જ્ઞાનમ્ ।
યથાપિ નિત્યં પરિચારવારિ ચ અજ્ઞાતવદ્દૃશ્યતે વિષ્ણુના ચ ॥ ૩,૧૨.૪॥

હરેઃ પ્રીત્યર્થં કુરુતે સૌ કદાચ્ચિત્તત્રાપિ કશ્ચિદ્વિશેષોઽસ્તિ વીન્દ્ર ।
શ ૃણુષ્વ સમ્યઙ્નિગૃહીતચિત્તો યથા પ્રોવાચ સ વિજાનાતિ દેવઃ ॥ ૩,૧૨.૫॥

સદા ત્વદોષં પ્રવિશેષેશ્ચ મુક્તવેદાસ્તથા વા પવિજાનન્તિ નિત્યમ્ ।
તસ્ય સ્વરૂપં ન તથા હરિં ચ સ્વયોગ્યતામનતિક્રમ્ય વેધાઃ ॥ ૩,૧૨.૬॥

હરેઃ સ્વરૂપં ન વિજાનાતિ સર્વં સ્વયો ગ્યરૂપં સર્વદા વેત્તિ વિષ્ણોઃ ।
તત્રાજ્ઞાનં નાસ્તિ કિઞ્ચિદ્વિજેન્દ્ર યાવત્સ્વરૂપં ચ તથૈવ લક્ષ્મ્યાઃ ॥ ૩,૧૨.૭॥

વેધા ન જાનાતિ કુતસ્તદન્યે તયોઃ સ્વરૂપંન વિજાનાતિ સર્વમ્ ।
તથાપિ વેદાનેકદેશેન વેદ જાનાતિ લક્ષ્મીર્હરિરૂપં ચ યાવત્ ॥ ૩,૧૨.૮॥

તાવન્ન જાનાતિ વિધિઃ ખગેન્દ્ર જ્ઞાને વિધાતુશ્ચ સ્વયોગ્યભૂતે ।
અતો વિરિઞ્ચસ્ય ન ચિન્તનીયો હ્યજ્ઞાનલેશઃ ક્વાપિ દેશે ચ કાલે ॥ ૩,૧૨.૯॥

નાડીં સમાવિશ્ય તદા વિરિઞ્ચો ન વેદ નારાયણમેકવચ્ચ ।
તદા શ ૃણોત્તં કમલાસનં પ્રભુસ્તપસ્તપ દ્વ્યક્ષરં સાદરેણ ॥ ૩,૧૨.૧૦॥

અભિપ્રાયં તસ્ય સમ્યગ્વિદિત્ત્વા તપઃ કુરુ ત્વં હરિતુષ્ટ્યર્થમેવ ।
તપોઽકરોદ્ધરિપાદૈક નિષ્ઠો હરેઃ પ્રીત્યર્થં દિવ્યસહસ્રવર્ષમ્ ॥ ૩,૧૨.૧૧॥

તતો હરિઃ પ્રાદુરાસીત્ખગેન્દ્ર વરં દાતું ભક્તવરસ્ય દિવ્યમ્ ।
સદા વિષ્ણું દેવદેવો દદર્શ ચતુર્ભુજં તં જલજાયતાક્ષમ્ ॥ ૩,૧૨.૧૨॥

શ્રીવત્સલક્ષ્મં ગલશોભિકૌસ્તુભં સમ્પશ્યન્તં સુપ્રસન્નાર્દ્રદૃષ્ટ્યા ।
દૃષ્ટ્વા હરિં બ્રહ્મ નારાયણં ચ પુરઃ સ્થિતં ભક્તવશ્યં દયાલુમ્ ॥ ૩,૧૨.૧૩॥

સમર્ચયામાસ મહાવિભૂત્યા ભક્ત્યા હરેઃ પાદતીર્થં દધાર ।
અસ્તૌન્મહાભાગવતપ્રધાનો હરિં ગુરું ભક્તિવિવર્ધિતાત્મા ॥ ૩,૧૨.૧૪॥

બ્રહ્મોવાચ ।
રમેશ લોકેશ જગન્નિવાસ તવ સ્વરૂપં ન વિજાનાતિ દેવી ।
તવ પ્રસાદાત્સુવિજાનાતિ દેવી ગુણાન્વેદોક્તાન્સર્વદા વીન્દ્ર સર્વાન્ ॥ ૩,૧૨.૧૫॥

તથાપિ સા ન વિજાનાતિ દેવી સાકલ્યેનાશેષિતઃ સદ્ગુણાંશ્ચ ।
યદ્યપ્યનુક્તં પઞ્ચભિર્નાસ્તિ વેદૈસ્તથાપિ દેવેઽત્ર વિશેષ આસ્તે ॥ ૩,૧૨.૧૬॥

તત્ત્વેચ્છવઃ પ્રવિજાનન્તિ નિત્યં વેદે સૂક્તાન્ક્વાપ્યનુક્તાંશ્ચ સર્વાન્ ।
આદૌ જાનન્ત્યત્ર વેદા મુરારે ઋગાદયઃ સુષ્ઠુ ચત્વાર એવ ॥ ૩,૧૨.૧૭॥

વેદા હ્યેતે વેદયન્તીતિ દેવ તથા પુરાણં ભારતં પઞ્ચરાત્રમ્ ।
ક્રમાદિતો વિચિન્ત્ય સા વિષ્ણુગુણાન્સ્વયોગ્યાન્સદા વિજાનાતિ રમાપિ દેવી ॥ ૩,૧૨.૧૮॥

વિશેષતો હ્યુક્તગુણા નૃગાદિષુ સ્વયોગ્યભૂતાન્સંવિજાનાતિ દેવી ।
સામાન્યતઃ પ્રવિજાનાતિ દેવી હરેર્ગુણાન્ન વિશેષાચ્ચ નિત્યમ્ ॥ ૩,૧૨.૧૯॥

અહં વિજાનામિ રમાપ્ર સાદાત્તવ પ્રસાદાચ્ચ ગુણાન્સદૈવ ।

સ્વયોગ્યભૂતાઞ્છ્રુતિપૂક્તાન્ગુણાંશ્ચ કાંશ્ચિદ્વિજાનાતિ હરેર્ન કશ્ચિત્ ॥ ૩,૧૨.૨૦॥

તવ પ્રસાદાચ્ચ મમ પ્રસાદાત્કાલાન્તરે તાંશ્ચ જાનાતિ શેષઃ ।
દુષ્કર્મલેશાન્ન તિરોહિતાન્ગુણાન્ચાનેવ પૂર્વં વિદિતાન્સ્વયોગ્યાન્ ॥ ૩,૧૨.૨૧॥

તાનેવ જ્ઞાત્વા પુનરેવ શેષસ્તિરો હિતાંલ્લબ્ધગુણસ્તતઃ સ્મૃતઃ ।
સદા સ્વયોગ્યાંશ્ચ હરેર્ગુણાંશ્ચ ઉમાપતિશ્ચાપિ તવ પ્રસાદાત્ ॥ ૩,૧૨.૨૨॥

યદા વિજાનાતિ હરે મુરારે અપ્રાપ્તલબ્ધેતિ તદોચ્યતે હરઃ ।
મમાપિ લોકં ચ યદા મુરારે તદા વિજાનાતિ તવ સ્વરૂપમ્ ॥ ૩,૧૨.૨૩॥

ગોવિન્દ નિત્યાવ્યય ચિત્સુપૂર્ણ તવ પ્રસાદાન્નાસ્તિ શતેષુ તન્મમયેયે
હિ દેવાશ્ચ શરીરધારિણસ્તે જ્ઞાનહીના વિષયેષુ નિષ્ઠાઃ ॥ ૩,૧૨.૨૪॥

યેયે દેવા વિષયેષુ નિષ્ઠાસ્તેતે દેવા બહિરર્થભાવાઃ ।
યેયે દેવા બહિરર્થભાવા મોક્ષા દન્યે પ્રલપન્તઃ સદૈવ ॥ ૩,૧૨.૨૫॥

તવ સ્વરૂપે ચ જગત્સ્વરૂપે તવાસમાનં નાસ્તિ વિષ્ણો સદૈવ ।
યતસ્તવ પ્રાકૃતો નાસ્તિ દેહો યતો જ્ઞાનં નાસ્તિ નાસ્ત્યે વ નિત્યમ્ ॥ ૩,૧૨.૨૬॥

પૂર્ણાનન્દજ્ઞાનદેહોઽપિ નિત્યં સદા શરીરી ભાષ્યતે ભક્તિમદ્ભિઃ ।
યતસ્તવ પ્રાકૃતો નાસ્તિ દેહો હ્યતોઽપિ નિત્યમશરીરીતિ ચ સ્મૃતઃ ॥ ૩,૧૨.૨૭॥

નતોઽહં સર્વદાસ્મિઞ્શરીરેઽહમમેત્યભિમાનેન શૂન્યઃ ।
અત્તોઽપ્યહં ત્વશરીરી સદૈવ તથૈવ નિત્યં બહિરર્થૈશ્ચ શૂન્યઃ ॥ ૩,૧૨.૨૮॥

સ્વભોગભાર્યાસત્યલોકાદિભોગઃ સ્વયોગ્યભોગો વસ્ત્રમાલ્યાદિભોગઃ ।
એતે હિ સર્વે બહિરર્થસંજ્ઞકાઃ નૈસર્ગકામાઃ સર્વદા મે હિ વિષ્ણો ॥ ૩,૧૨.૨૯॥

તથાપ્યહં કામહીનો હિ નિત્યં રુદ્રાદયઃ કામવન્તો યતોતઃ ।
શરીરિણસ્તે બહિરર્થભાવા અજ્ઞાનવન્તોઽપિ ચ સંસ્મૃતાઃ ખગ ॥ ૩,૧૨.૩૦॥

સ્વદારભોગે કેવલાં પ્રીતિમેવં હરેરેવં સર્વદાહં કરોતિ ।
સ્તમ્બાસ્ત્રાદીન્ધારિયિષ્યે સદૈવ વિષ્ણોઃ પ્રીત્યર્થં નૈવ ગાત્રાર્થમેવ ॥ ૩,૧૨.૩૧॥

નિત્યાનન્દાદન્યકામો ન મેસ્તિ અતઃ સદા બહિરર્થૈશ્ચ શૂન્યઃ ।
મમાપિ ભાર્યા બહિરર્થશૂન્યા અમૂઢભાવા મૂઢવતીવ દૃશ્યતે ॥ ૩,૧૨.૩૨॥

અમૂઢભૂતા જ્ઞાનિનાં સર્વદૈવ તથાજ્ઞાનાં જ્ઞાનહીનેતિ ભાતિ ।
યાવજ્જ્ઞાનં ચાસ્તિ મે વાસ્તુદેવ તાવજ્જ્ઞાનં વાસુદેવસ્ય ચાસ્તિ ॥ ૩,૧૨.૩૩॥

યાવજ્જ્ઞાનં વાસુદેવસ્ય ચાસ્તિ તાવજ્જ્ઞાનં જ્ઞાનવતામૃજૂનામ્ ।
ક્રમેણૈવાજ્ઞાનિનાં વાનૃજૂનામસ્પષ્ટરૂપો જ્ઞાનગતો વિશેષઃ ॥ ૩,૧૨.૩૪॥

સૌરિપ્રકાશે ચ યથૈવ દર્શનં તથા મમ જ્ઞાનગતો વિશેષઃ ।
દીપપ્રકાશે ચ યથૈવ દર્શનં તથા જ્ઞાનં વાસુદેવસ્ય ચાસ્તિ ॥ ૩,૧૨.૩૫॥

અસ્પષ્ટપરૂપા ન્યૂનતા હ્યસ્તિ વાયૌ તથા જ્ઞાનં નૈવ સંચિન્તનીયમ્ ।
એતાદૃશી જ્ઞાનશક્તિર્મુરારેર્વાય્વાદીનાં મોક્ષપર્યન્તમસ્તિ ॥ ૩,૧૨.૩૬॥

જ્ઞાનં ત્વૃજૂનાં મોક્ષકાલે પિપગ્ચવાય્વાદીનાં પ્રલયેનાદ્રાદીર્ન ।
વાયોર્મમ પ્રલયે સૃષ્ટિકાલે તથા ગાયત્ર્યા નાસ્તિનાસ્ત્યેવ મોહઃ ॥ ૩,૧૨.૩૭॥

ગાયત્રીવદ્ભારત્યા દેવદેવ જ્ઞાતવ્યમેવં હરિતત્ત્વવેદિભિઃ ।
મમાજ્ઞાનં દૃશ્યતે યત્ર કુત્ર દૈત્યાદીનાં મોહનાર્થં સદૈવ ॥ ૩,૧૨.૩૮॥

તેન પ્રીતિર્દેવદેવસ્ય વિષ્ણર્ભવિષ્યતીત્યેવ વિનિશ્ચિતાત્મા ।
પ્રશ્નાદિકં ત્વજ્ઞવત્સર્વદૈવં કરિષ્યેહં મોહનાયાધમાનામ્ ॥ ૩,૧૨.૩૯॥

સૂર્યોદયે નાસ્તિ યથા તમશ્ચ તથાજ્ઞાનં નાસ્તિનાસ્ત્યેવ દેવ ।
કરોમ્યહં શ્રવણં સર્વદૈવ હરિપ્રીત્યર્થં નિશ્ચતાર્થં સતાં હિ ॥ ૩,૧૨.૪૦॥

શતજન્મગતાનાં ત્વનૃજૂનાં પૂર્વમેવ તુ ।
અપરોક્ષાભાવ એવ હ્યજ્ઞાનં સમુદીરિતમ્ ॥ ૩,૧૨.૪૧॥

અપરોક્ષાનન્તરં તુ નાસ્ત્યજ્ઞાનં ન સંશયઃ ।
શતજન્મસુ દેવેશ અપરોક્ષેણ સર્વદા ॥ ૩,૧૨.૪૨॥

પૂર્ણજ્ઞાનં મમાસ્ત્યેવ નાત્ર કાર્યા વિચારણા ।
શતજન્મસુ પૂર્વં તુ પરોક્ષેણ મમ પ્રભો ॥ ૩,૧૨.૪૩॥

પૂર્ણં જ્ઞાનં સદાપ્યસ્તીત્યેવમાહુર્મહર્ષયઃ ।
સંજ્ઞાજન્મગતાયાશ્ચ સરસ્વત્યા મહાપ્રભો ॥ ૩,૧૨.૪૪॥

નાજ્ઞાનં ચિન્તનીયં હિ બ્રહ્મય્વોશ્ચ દેવ હિ ।
અત્ર કશ્ચિદ્વિશેષોસ્તિ જ્ઞાતવ્યસ્તત્વમિચ્છુભિઃ ॥ ૩,૧૨.૪૫॥

અવતારેષુ ભારત્યાઃ કદાચિજ્જ્ઞાનપૂર્વકમ્ ।
સર્વદા જ્ઞાનરૂપા સા સર્વદુઃખવિવર્જિતા ॥ ૩,૧૨.૪૬॥

દૈત્યાનાં મોહનાર્થાય અંશે દુઃખીવ દૃશ્યતે ।
તસ્યા દુઃખાદિકં કિઞ્ચિન્નાસ્તિનાસ્ત્યેવ સર્વથા ॥ ૩,૧૨.૪૭॥

અપરોક્ષતિરોભાવ ઈષત્કાલે પ્રદૃશ્યતે ।
તાવન્માત્રેણ વાણ્ગાનં તસ્યાં નૈવાહિતં ચ યત્ ॥ ૩,૧૨.૪૮॥

મૂલરૂપે તુ નાસ્ત્યેવ ભારત્યા જ્ઞાનવિસ્મૃતિઃ ।
ભારત્યાસ્તુ યથા નાસ્તિ સરસ્વત્યાસ્તુ કિં પુનઃ ॥ ૩,૧૨.૪૯॥

અંશાવતરણં નાસ્તિ સરસ્વત્યાઃ કદાચન ।
અંશાવતરણં નાસ્તિ મમાપિ મધુસૂદન ॥ ૩,૧૨.૫૦॥

તથૈવ જ્ઞાનમસ્ત્યેવ હરેર્નારાયણસ્ય ચ ।
વાયોરંશાવતારોસ્તિ યથા મૂલે તથૈવ ચ ॥ ૩,૧૨.૫૧॥

બલજ્ઞાના દિકં સર્વં ચિન્તનીયં ન સંશયઃ ।
તથાપિ વાયૌ દૃશ્યન્તે બલજ્ઞાનાદિવ્યક્તયઃ ॥ ૩,૧૨.૫૨॥

અવતારેષુ વાયોસ્તુ સમ્યક્ષક્ત્યાત્મનાસ્તિ હિ ।
અપરોક્ષતિરોભાવૌ નાંશાવતરણેષ્વપિ ॥ ૩,૧૨.૫૩॥

બલજ્ઞાનાદિકં યાવન્મૂલરૂપે પ્રદૃશ્યતે ।
ત્રેતાયુગસ્વરૂપે ચ ન દર્શયતિ તાદૃશમ્ ॥ ૩,૧૨.૫૪॥

ત્રેતાયુગસ્વરૂપે ચ યાદૃક્ષ્યાદર્શયત્પ્રભો ।
દ્વાપરસ્થે સ્વરૂપે તત્તદ્દર્શયતિ તાદૃશમ્ ।
ત્રેતાયુગસ્વરૂપે ચ યાદૃક્ષ્યાદર્શયત્પ્રભો ॥ ૩,૧૨.૫૫॥

દ્વાપરસ્થે વાયુરૂપે યાદૃગ્વા દર્શયત્પ્રભુઃ ।
વાયુઃ કલિયુગે રૂપે તદ્દર્શયતિ તાદૃશમ્ ॥ ૩,૧૨.૫૬॥

તથા દર્શયતે વાયુર્દૈત્યાનાં મોહનાય ચ ।
અવતારેષુ વાયોશ્ચ અન્તરં યે વિદુઃ પ્રભો ॥ ૩,૧૨.૫૭॥

તેઽધં તમઃ પ્રવિશન્તે તે દૈત્યા ન ચ તે સુરાઃ ।
વાયાવપ્યન્તરં નાસ્તિ હરિતત્ત્વવિનિર્ણયે ॥ ૩,૧૨.૫૮॥

નિન્દાં કુર્વન્તિ યે વિષ્ણોર્જિહ્વાછેદં કરોમ્યહમ્ ।
તદર્થમેવ વાયોશ્ચ અવતારઃ સદા ભુવિ ॥ ૩,૧૨.૫૯॥

ગુણપૂર્ણસ્ય વિષ્ણોસ્તુ નિર્ગુણત્વવિચિન્તનમ્ ।
જાતાનન્દાદિપૂર્ણાઙ્ખ્યં સોહમિત્યાદિચિન્તનમ્ ॥ ૩,૧૨.૬૦॥

ચિદાનન્દાત્મકે દેહે ઉત્પત્ત્યાદિવિચિન્તનમ્ ।
અચ્છેદ્યાભેદ્યગાત્રેષુ ચ્છેદભેદાદિચિન્તનમ્ ॥ ૩,૧૨.૬૧॥

દેવ્યા નિત્યાવિયોગિન્યા વિયોગાદિવિચિન્તનમ્ ।
ક્લેશશોકાદિશૂન્યસ્ય હરેઃ ક્લેશાદિચિન્તનમ્ ॥ ૩,૧૨.૬૨॥

વ્યાસરામાદિરૂપેષ્વનૃષિવિપ્રત્વચિન્તનમ્ ।
કૃષ્ણરામાદિરૂપેષુ અન્તરસ્ય વિચિન્તનમ્ ॥ ૩,૧૨.૬૩॥

રામકૃષ્ણાદિરૂપેષુ અન્તરસ્ય વિચિન્તનમ્ ।
રામકૃષ્ણાદિરૂપેષુ પરાજયવિચિન્તનમ્ ॥ ૩,૧૨.૬૪॥

સન્તાનાર્થં તુ કૃષ્ણે ન શિવપૂજાદિચિન્તનમ્ ।
રામેણ દુઃખયુક્તેન લિઙ્ગસ્ય સ્થાપનં કૃતમ્ ॥ ૩,૧૨.૬૫॥

પઞ્ચધાતુમયે કૃષ્ણે હરિરૂપવિચિન્તનમ્ ।
સ્વયં વ્યક્તસ્થલે ચાપિ ચિદા નન્દત્વકલ્પનમ્ ॥ ૩,૧૨.૬૬॥

પિતૃમાતૃદ્વિજાતીનાં હરિરૂપત્વચિન્તનમ્ ।
અસ્વતન્ત્રેણ રુદ્રેણ હરેરૈક્યદિચિન્તનમ્ ॥ ૩,૧૨.૬૭॥

વિષ્ણોઃ સૂર્યેણ સાકં ચ અભેદા દિવિચિન્તનમ્ ।
સર્વોત્તમઃ સૂર્ય એવ વિષ્ણ્વાદ્યાસ્તસ્ય કિઙ્કરાઃ ॥ ૩,૧૨.૬૮॥

ઇત્યાદિચિન્તનં દોષો હરિનિન્દેતિ ચોચ્યતે ।
અસ્વયં વ્યક્તિલિઙ્ગેષુ અશ્વત્થતુલસીષુ ચ ॥ ૩,૧૨.૬૯॥

શાલગ્રામં વિહાયૈવ નમનં યે પ્રકુર્વતે ।
તે સર્વે હરિનિન્દાયામવિકારિણ એવ હિ ॥ ૩,૧૨.૭૦॥

મોક્ષાધિકારિણો યે તુ અજ્ઞાનાત્પરમેશ્વરમ્ ।
પાર્થક્યનયનં યેષુ કુર્વન્તિ યર્હિ વા પ્રભો ॥ ૩,૧૨.૭૧॥

તર્હિ તેષાં હિ કાલેષુ દુઃખં યાતિ ન સંશયઃ ।
અતઃ પ્રાર્થક્યનયનં યે કુર્વન્ત્યેષુ સર્વદા ॥ ૩,૧૨.૭૨॥

તે સર્વે ત્વબુધા જ્ઞેયા નાત્ર કાર્યા વિચારણા ।
અસ્વયંવ્યક્તલિઙ્ગેષુ નમનં યે પ્રકુર્વતે ॥ ૩,૧૨.૭૩॥

તે સર્વે હ્યસુરા જ્ઞેયા નાન્યથા તુ કથઞ્ચન ।
વિહાય શૂન્યમશ્વત્થં નમનં યે પ્રકુર્વતે ॥ ૩,૧૨.૭૪॥

દ્વિમાસહીનાં તુલસીમપ્રસૂતાં ચ ગાં નવામ્ ।
તે સર્વે હ્યસુરા જ્ઞેયા નાત્ર કાર્યા વિચારણા ॥ ૩,૧૨.૭૫॥

ગુલ્માદ્યાશ્ચ મનુષ્યાન્તાસ્તે જ્ઞેયા બ્રહ્મબાહવઃ ।
અસ્મચ્છતાયુઃ પર્યન્તમેક એવ કલિઃ સ્મૃતઃ ॥ ૩,૧૨.૭૬॥

કલૌ સંતિ કલ્પમાનં કલેરન્તે સંતિ ચ ।
તસ્મિન્દિને બ્રહ્મરૂપે ગચ્છન્તિ ચ તમોન્તિકમ્ ॥ ૩,૧૨.૭૭॥

તત્ર સ્થિત્વા લોકમાર્ગં પ્રતીક્ષન્તે ન સંશયઃ ।
સાધકૈર્વિષ્ણુકાર્યાણાં વાયુદાસૈઃ પ્રપીડિતાઃ ॥ ૩,૧૨.૭૮॥

શતવર્ષાનન્તરં ચ સર્વેષાં કલિના સહ ।
વાયોર્ગદાપ્રહારેણ લિઙ્ગભઙ્ગો ભવિષ્યતિ ॥ ૩,૧૨.૭૯॥

તમોન્ધં પ્રવિશન્ત્યેતે તારતમ્યેન સર્વશઃ ।
તમસ્યન્ધેપિ સંસારે નાત્ર કાર્યા વિચારણા ॥ ૩,૧૨.૮૦॥

સર્વેષામુત્તમોન્તે યઃ કલિરેવ ન સંશયઃ ।
દૂષકો વિષ્ણુભક્તાનાં તત્સમો નાસ્તિ સર્વદા ॥ ૩,૧૨.૮૧॥

સંસારે વાન્ધતમસિ સર્વત્ર હરિદૂષકઃ ।
મિથ્યાદાને જ્ઞાનબુદ્ધિર્દુઃખે ચ સુખબુદ્ધિમાન્ ॥ ૩,૧૨.૮૨॥

તસ્માત્કલિસમો લોકે શિવભક્તો ન કુત્રચિત્ ।
દુર્યોધનઃ સ એવોક્તો દુઃખાનન્ત્યસ્વરૂપવાન્ ॥ ૩,૧૨.૮૩॥

તસ્માચ્છતગુણાંશેન કલિભાર્યા તુ સર્વદા ।
અલક્ષ્મીરિતિ વિખ્યાતા સા લોકે મન્થરા સ્મૃતા ॥ ૩,૧૨.૮૪॥

તસ્માદ્દશગુણાંશોનો વિપ્રચિત્તિસ્તુ સર્વદા ।
જરાસંધઃ સ એવોક્તઃ કાલનેમિસ્તતઃ પરમ્ ॥ ૩,૧૨.૮૫॥

તસ્માચ્છતગુણાંશોનઃ સ તુ કંસેતિ વિશ્રુતઃ ।
તસ્માત્પઞ્ચગુણૈર્હીનૌ મધુકૈટભસંજ્ઞકૌ ॥ ૩,૧૨.૮૬॥

તાવેવ હંસહિડંબકૌ જ્ઞેયૌ તૌ ચ જનાર્દન ।
વિપ્રચિત્તિસમો જ્ઞેયો ભૌમો વૈ ભૂતલે સ્મૃતઃ ॥ ૩,૧૨.૮૭॥

તસ્માદષ્ટ ગુણૈરુચ્યો હરિણ્યકશિપુઃ સ્મૃતઃ ।

તસ્માચ્ચ ત્રિગુણૈર્હીનો હિરણ્યાક્ષો મહાસુરઃ ॥ ૩,૧૨.૮૮॥

મણિમાંસ્તત્સમો જ્ઞેયઃ કિઞ્ચિદૂનો બકઃ સ્મૃતઃ ।
તસ્માદ્વિંશદ્ગુણૈર્હીનસ્તારકાખ્યો મહાસુરઃ ॥ ૩,૧૨.૮૯॥

તસ્માત્ષડ્ગુણતો હીનઃ શંબરો લોકકણ્ટકઃ ।
શંબરસ્ય સમો જ્ઞેયઃ શાલ્વો દૈત્યેષુ ચાધમઃ ॥ ૩,૧૨.૯૦॥

શંબરાત્તુ દ્વિગુણતો હિડિંબો ન્યૂન ઉચ્યતે ।
બાણસ્તતોઽધમો જ્ઞેયઃ સ તુ કીચકનામતઃ ॥ ૩,૧૨.૯૧॥

દ્વાપારખ્યો મહાહાસોબાણાસુરસમઃ સ્મૃતઃ ।
તસ્માદ્દશગુણૈર્હીનો નમુચિદૈત્યસત્તમઃ ॥ ૩,૧૨.૯૨॥

નમુચેસ્તુસમૌ જ્ઞેયૌ પાક ઇલ્વલ ઇત્યુભૌ ।
તસ્માચ્ચતુર્ગુણૈર્હીનો વાતાપિર્દાનવાધમઃ ॥ ૩,૧૨.૯૩॥

તસ્માત્સાર્ધગુણૈર્હીનો ધેનુકો નામ દૈત્યરાટ્ ।
ધેનુકાદર્ધગુણતઃ કેશી દૈત્યસ્તુ ચાવરઃ ॥ ૩,૧૨.૯૪॥

કેશીદૈત્યસમો જ્ઞેયસ્તૃણાવર્તો મહાસુરઃ ।
તસ્માદ્દશગુણૈર્હીનો હંસો નામરમાપતે ॥ ૩,૧૨.૯૫॥

ત્રિરિકસ્તુ સમો જ્ઞેયસ્તત્સમઃ પૌરુકસ્મૃતઃ ।
વેતઃ સ એવ વિજ્ઞેયઃ પૂર્વજન્મનિ સત્તમ ॥ ૩,૧૨.૯૬॥

તસ્માદેકગુણૈર્હીનૌ કુંભાણ્ડકકુપર્ણકૌ ।
દુઃશાસનસ્તુ વિજ્ઞેયો જરાસંધસમઃ પ્રભો ॥ ૩,૧૨.૯૭॥

કંસેન તુલ્યો વિજ્ઞેયો વિકર્ણો દૈત્યસત્તમઃ ।
કુંભકર્ણાચ્છતગુણૈર્હીનૌ ક્રધ્યેતિ વિશ્રુતઃ ॥ ૩,૧૨.૯૮॥

તસ્માચ્છતગુણૈર્હીનઃ શતધન્વા મહાસુરઃ ।
સમાનસ્તસ્ય વિજ્ઞેયઃ કર્મારિર્દૈત્યસત્તમઃ ॥ ૩,૧૨.૯૯॥

કાલકેયસ્તુ વિજ્ઞેયઃ સદા વેનસમો મતઃ ।
અધમાનાં તુ દૈત્યાનામુત્તમૈઃ સામ્યમુચ્યતે ॥ ૩,૧૨.૧૦૦॥

તત્રાવેશાચ્ચ વિજ્ઞેયં દેવાનાં નાત્ર સંશયઃ ।
તસ્માચ્છતગુર્ણૈહીનશ્ચિત્તમાનસુરો મહાન્ ॥ ૩,૧૨.૧૦૧॥

તચ્છરીરાભિમાની તુ તસ્માચ્છતગુણૈર્વરઃ ।
તસ્માચ્છતગુણૈર્હીનો હસ્તમાનસુરો મહાન્ ॥ ૩,૧૨.૧૦૨॥

તસ્માચ્છતગુણૈર્હીનઃ પાદમાનસુરો મહાન્ ।
નેત્રેન્દ્રિયાભિમાની તુ તસ્માચ્છતગુણો વરઃ ॥ ૩,૧૨.૧૦૩॥

ચક્ષુરિન્દ્રિયમાની તુ તસ્માચ્છતગુણો વરઃ ।
તસ્માચ્છગુણૈર્હીનઃ સ્પર્શમાનસુરો મહાન્ ॥ ૩,૧૨.૧૦૪॥

તસ્માચ્છતગુર્ણૈહીનશ્ચણ્ડમાનસુરો મહાન્ ।
તસ્માચ્છતગુર્ણૈર્હીનઃ શિશ્નમાનસુરો મહાન્ ॥ ૩,૧૨.૧૦૫॥

તસ્માચ્છતગુણૈર્હીનઃ કર્મમાનસુરઃ સ્મૃતઃ ।
કલ્પાદ્યૈઃ પ્રેરિતાઃ સર્વે રુદ્રાદ્યા અધિકારિણઃ ॥ ૩,૧૨.૧૦૬॥

કદાચિત્સુવિરુદ્ધં ચ કુર્વન્તિ તવ સત્તમ ।
કદાપ્યહં ચ વાયુશ્ચ વિરુદ્ધં નાચરેવ ભોઃ ॥ ૩,૧૨.૧૦૭॥

મૂલેષ્વંશાવતારેષુ રુદ્રાદીના મહાપ્રભો ।
બુદ્ધિર્વિનશ્યતે યસ્માત્તસ્માચ્છિન્ના હિ તેઽખિલાઃ ॥ ૩,૧૨.૧૦૮॥

મહીપતે ચ મદ્બુદ્ધિસ્તસ્માદચ્છિન્નસંજ્ઞિકઃ ।
એતાદૃશોપ્યહં દેવ ન ચ શક્તિસ્તુ નસ્તવે ॥ ૩,૧૨.૧૦૯॥

મહ્યમચ્છિન્નભક્તાય દયાં કુરુ મહાપ્રભો ।
ઇતિ સ્તુત્વા હરિં બ્રહ્મા સ્થિતઃ પ્રાગ્જ લિરગ્રતઃ ॥ ૩,૧૨.૧૧૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે દ્વિતીયાંશે ધર્મકાણ્ડે શ્રીકૃષ્ણગરુડસંવાદે
બ્રહ્મસ્તુતિવર્ણનં નામ દ્વાદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૩
શ્રીકૃષ્ણ ઉવાચ ।
ઇતિ સ્તુતઃ સ ભગવાન્સ્વપૂત્રેણ દયાનિધિઃ ।
મેધગંભીરયા વાચા પ્રોવાચ મધુસૂદનઃ ॥ ૩,૧૩.૧॥

સૃજ બ્રહ્મન્નિમાન્દેવાન્મત્પ્રસાદાત્ક્રમેણ ચ ।
યથા વૈ પ્રાક્ક્ષણેતદ્વત્સૃજ સર્વં મહાપ્રભો ॥ ૩,૧૩.૨॥

નાસ્તિ પ્રયોજનં તેન તવ મત્પ્રીતયે સૃજ ।

એવમુક્તસ્તુ હારિણા બ્રહ્મા સ્તુત્વા હરિં પરમ્ ॥ ૩,૧૩.૩॥

સૃષ્ટિં કર્તું મનો દધ્રે પ્રીણયન્નેવ માધવમ્ ।
મહત્તત્વાત્મકો બ્રહ્મા વાયું જીવભિમાનિનમ્ ॥ ૩,૧૩.૪॥

આદૌ સસર્જ ગરુડ પુરુષાત્મા સ એવ ચ ।
તતો દક્ષિણહસ્તાત્તુ બ્રહ્માણીં ભારન્તી તથા ॥ ૩,૧૩.૬ ॥ ૧૩.૫
અસૃજત્તે મહાભાગે અવ્યક્તસ્ય નિયામિકે ।
વામહસ્તાત્સત્યપુત્રો મહત્તત્વાત્મકોઽનલઃ ॥ ૩,૧૩.૬॥

બ્રહ્મણો દક્ષિણાદ્ધસ્તાદહઙ્કારાત્મકો હરઃ ।
આદૌ શેષસ્તતો જજ્ઞે ગરુડતદનન્તરમ્ ॥ ૩,૧૩.૭॥

તદનન્તરજો રુદ્રઃ સ એવં સૃષ્ટવાન્પ્રભુઃ ।
સ્વોત્પત્ત્યનન્તરં બ્રહ્મા દશવર્ષાન્મહાપ્રભુઃ ॥ ૩,૧૩.૮॥

વાયુમુત્પાદ્રયામાસ વત્સરાનન્તરે પ્રભુઃ ।
ગાયત્રીં જનયામાસ વાયોરુત્પત્ત્યનન્તરમ્ ॥ ૩,૧૩.૯॥

સંવત્સરાનન્તરે તુ ભારતીમસૃજત્પ્રભુઃ ।
ભારત્યનન્તરં શેં દિવ્યસાહસ્રવત્સરાત્ ॥ ૩,૧૩.૧૦॥

અનન્તરં સંબભૂવ ગરુડસ્તુ તતઃ પરમ્ ।
દિવ્યસાહસ્રવર્ષાત્તુ તથા રુદ્રઞ્ચ સૃષ્ટવાન્ ॥ ૩,૧૩.૧૧॥

શેષસ્યાનન્તરં દેવીં વારુણીં ચ મહાપ્રભુઃ ।
દશવર્ષાનન્તરં તુ હ્યસૃજત્કમલાસનઃ ॥ ૩,૧૩.૧૨॥

ગરુડાનન્તરં દેવીં સૌપર્ણીમસૃજત્પ્રભુઃ ।
દશવર્ષાનન્તરં ચ પાર્વતીં ચ તથૈવ સઃ ॥ ૩,૧૩.૧૩॥

પાર્વત્યનન્તરં ચન્દ્રં મનસ્તત્ત્વનિયામકમ્ ।
દશવર્ષાનન્તરં તુ વાસવં હ્યસૃજત્તતઃ ॥ ૩,૧૩.૧૪॥

અભિમાની દક્ષિણસ્ય બાહોશ્ચ પરમેષ્ઠિનઃ ।
દશવર્ષાનન્તરં તુ શચી તામસૃજત્પ્રભુઃ ॥ ૩,૧૩.૧૫॥

ઇન્દ્રસ્યાનન્તરં કામં ત્રિંશદ્વર્ષાદનન્તરમ્ ।
અસૃજદ્વામબાહોશ્ચમનસ્તત્વાભિમાનિનમ્ ॥ ૩,૧૩.૧૬॥

તદનન્તરજાં દેવીં દશવર્ષાદનન્તરમ્ ।

રતિં સ જનયામાસ કામભાર્યાં મહાપ્રભુઃ ॥ ૩,૧૩.૧૭॥

કામસ્યાપ્યભિમાની તુ સ એવ પરિકીર્તિતઃ ।
બ્રહ્માહઙ્કારિકં પ્રાણં કાર્યોત્પત્તેરનન્તરમ્ ॥ ૩,૧૩.૧૮॥

દશવર્ષાનન્તરં તુ નિર્મમે નાસિક તતઃ ।
તસ્ય ભાર્યાં નાસિકસ્યઃ પઞ્ચવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૧૯॥

નિર્મમે નાસિકાં વામાં બ્રહ્મા લોકપિતામહઃ ।
અહઙ્કારાદનુ બ્રહ્મા સજ્ઞાનં ચ બૃહસ્પતિમ્ ॥ ૩,૧૩.૨૦॥

નિર્મમે ચ વર્ષયુગ્મપઞ્ચવર્ષાદનન્તરમ્ ।
પઞ્ચવર્ષાનન્તરં તુ તારાં ભાર્યાં વિનિર્મમે ॥ ૩,૧૩.૨૧॥

ગુરોરનન્તરં બ્રહ્મા પઞ્ચવિંશાદનન્તરમ્ ।
સ્વાયંભુવં મનું ચૈવ નિર્મમે મનસા વિભુઃ ॥ ૩,૧૩.૨૨॥

પઞ્ચવર્ષાનન્તરં તુ શતરૂપાં વિનિર્મમે ।
શતરૂપાનન્તરં તુ વિંશદ્વર્ષદિનાન્તરમ્ ॥ ૩,૧૩.૨૩॥

દક્ષઃ શિષ્યાત્મકો જજ્ઞે દક્ષિણાઙ્ગુષ્ઠતઃ પ્રભોઃ ।
પઞ્ચવર્ષાનન્તરં તુ વામાઙ્ગુષ્ઠાચ્ચતુર્મુખઃ ॥ ૩,૧૩.૨૪॥

પ્રસૂતિમસૃજદ્બ્રહ્મા સૃષ્ટ્યર્થં પરમાદરાત્ ।
દક્ષસ્યાનન્તરં બ્રહ્મા પઞ્ચવિંશાદનન્તરમ્ ॥ ૩,૧૩.૨૫॥

નિર્મમે હ્યનિરુદ્ધં ચ મધ્યમાઙ્ગુલિપર્વતઃ ।
પઞ્ચવર્ષાનન્તરં તુ સસર્જ ભગવાનજઃ ॥ ૩,૧૩.૨૬॥

વિરાજસંજ્ઞકાં ભાર્યાં મધ્યમાઙ્ગુલિપર્વતઃ ।
અનિરુદ્ધાનન્તર તુ શતવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૨૭॥

નિર્મમે પ્રવહં વાયું કનિષ્ઠાઙ્ગુલિપર્વતઃ ।
દશવર્ષાનન્તરં તુ પ્રવાહીં નિર્મમે પ્રભુઃ ॥ ૩,૧૩.૨૮॥

કનિષ્ઠાઙ્ગુલિપર્વાચ્ચ વામદેવં ન સંશયઃ ।
પ્રવહાનન્તરં તબ્રહ્મા શતવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૨૯॥

યમં વિનિર્મમે પૃષ્ઠાદષ્ટવર્ષાદનન્તરમ્ ।
તદ્ભાર્યાં શામલાં દેવીં તસ્માદેવ મહાપ્રભુઃ ॥ ૩,૧૩.૩૦॥

યમસ્યાનન્તરં ચન્દ્રં ત્રિંશદ્વર્ષાદનન્તરમ્ ।
અસૃજદ્દક્ષિણાચ્છ્રોત્રાચ્છ્રોત્રતત્ત્વનિયામકમ્ ॥ ૩,૧૩.૩૧॥

નવવર્ષાનન્તરં તુ રોહિણીસમૃજત્પ્રભુઃ ।
વામશ્રોત્રાચ્ચ ગરુડં વામશ્રોત્રાભિમાનિનમ્ ॥ ૩,૧૩.૩૨॥

ચન્દ્રસ્યાનન્તરં સૂર્યં વિંશદ્વર્ષાદનન્તરમ્ ।
સમ્યગ્વિનિર્મમે બ્રહ્મા દક્ષિણાક્ષ્ણશ્ચ દેવતામ્ ॥ ૩,૧૩.૩૩॥

વામાક્ષ્ણો નિર્મમે સંજ્ઞાં ષડ્વર્ષાનન્તરં પ્રભુઃ ।
સૂર્યસ્યાનન્તરં બ્રહ્મા શતવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૩૪॥

રસનેન્દ્રિયાચ્ચ વરુણં નિર્મમે તસ્ય માનિનમ્ ।
વિંશદ્વર્ષાનન્તરં તુ તસ્માદેવેદ્રિયાત્પ્રભુઃ ॥ ૩,૧૩.૩૫॥

ગઙ્ગાં વિનિર્મમે બ્રહ્મા રસનેન્દ્રિયદેવતામ્ ।
વરુણસ્યાનન્તરં તુ દશવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૩૬॥

ઉત્સંગાન્નિર્મમે બ્રહ્મા નારદં ભગવત્પ્રિયમ્ ।
નારદસ્યાનન્તરં તુ ષષ્ટિવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૩૭॥

અગ્નિં વિનિર્મમે બ્રહ્માત્વગિન્દ્રિયતઃ પ્રભુઃ ।
અતો વાગભિમાની સં પઞ્ચવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૩૮॥

સ્વાહાં વિનિર્મમે બ્રહ્મા તામાહુર્મન્ત્રદેવતામ્ ।
અગ્નેરનન્તરં વીન્દ્ર ભૃગું બ્રહ્મર્ષિસત્તમમ્ ॥ ૩,૧૩.૩૯॥

દશવર્ષાનન્તરં તુ ભ્રુવોર્મધ્યાદ્વિનિર્મમે ।
સંવત્સરાનન્તરં તુ ભૃગુભાર્યાં વિનિર્મમે ॥ ૩,૧૩.૪૦॥

ભૃગોરનન્તરં બ્રહ્મા શતવર્ષાદનન્તરમ્ ।
કશ્યપઞ્જનયામાસ મનસા ચ સ્વયં પ્રભુઃ ॥ ૩,૧૩.૪૧॥

સંવત્સરાનન્તરં તુ અદિતિં નિર્મમે પ્રભુઃ ।
કશ્યપાનન્તરં ચાત્રિં દશવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૪૨॥

અત્રેરનન્તરં બ્રહ્મા દશવર્ષાદનન્તરમ્ ।
અજીજનદ્ભરદ્વાજં વસિષ્ઠ તદનતરમ્ ॥ ૩,૧૩.૪૩॥

દશવર્ષાનન્તરં તુ તેષાં ભાર્યાઃ ક્રમેણ તુ ।
સંવત્સરાનન્તરેણ અસૃજત્કમલાસનઃ ॥ ૩,૧૩.૪૪॥

વસિષ્ઠસ્યાનન્તરં તુ ગૌતમં હ્યસૃજત્પ્રભુઃ ।
દશવર્ષાનન્તરેણ જમદગ્નિં તતોઽસૃજત્ ॥ ૩,૧૩.૪૫॥

દશવર્ષાનન્તરેણ મનુર્વૈવસ્વતોઽભવત્ ।
મનોરનન્તરં જજ્ઞે શતવર્ષાદનન્તરમ્ ॥ ૩,૧૩.૪૬॥

વિષ્વક્સેનો મહાભાગો વાયુપુત્રો મહાબલઃ ।
તસ્માચ્ચતુર્દશે વર્ષે ગણપો હ્યભવદ્વિભોઃ ॥ ૩,૧૩.૪૭॥

તદનન્તરજો વીન્દ્ર અષ્ટવર્ષાદનન્તરમ્ ।
ધનપો હ્યભવત્તત્ર તદ્ભાર્યા વત્સરે પરે ॥ ૩,૧૩.૪૮॥

વિષ્વક્સેનાનન્તરં તુ દશવર્ષાદનન્તરમ્ ।
જયાદીન્ભ ગવદ્ભક્તાન્સૃષ્ટવાન્કમલાસનઃ ॥ ૩,૧૩.૪૯॥

જયાદ્યાનન્તરં બ્રહ્મા વલ્લાદ્યાઃ કર્મદેવતાઃ ।
શતવર્ષાનન્તરં તુ સૃષ્ટવાઞ્છિવવાહનમ્ ॥ ૩,૧૩.૫૦॥

કર્મદેવાનન્તરં તુ ત્રિંશદ્વર્ષાદનન્તરમ્ ।
પર્જન્યમસૃજબ્રહ્મા મન્ત્રયન્ત્રાભિમાનિનમ્ ॥ ૩,૧૩.૫૧॥

પર્જન્યાનન્તરં બ્રહ્મા દશવર્ષાદનન્તરમ્ ।
પુષ્કરં જનયામાસ કર્મતત્ત્વાભિમાનિનમ્ ॥ ૩,૧૩.૫૨॥

એવં વિનિર્મમે બ્રહ્મા મત્પ્રસાદાત્ખગેશ્વર ।
એવં જ્ઞાત્વા મોક્ષમેતિ નાન્યથા તુ કથઞ્ચન ॥ ૩,૧૩.૫૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે શ્રીકૃષ્ણગરુડસંવાદે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
દેવોત્પત્તિનિરૂપણં નામ ત્રયોદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૪
શ્રીગરુડ ઉવાચ ।
અવતારાન્હરે બ્રૂહિ તથા લક્ષ્મ્યા દિવૌકસામ્ ।
ગુણાનામન્તર બ્રૂહિ શિષ્યસ્ય મમ સવ્રત ॥ ૩,૧૪.૧॥

શ્રીકૃષ્ણ ઉવાચ ।
યો મૂલરૂપી ભગવાનનન્તો બ્રહ્માદિભિઃ પુર્ણગુણઃ સ્વતન્ત્રઃ ।

પુરાતનઃ પૂર્ણતનુર્મદાત્મા ન તાદૃશાઃ સંતિ કદાપિ વીદ્ર ॥ ૩,૧૪.૨॥

પાદશ્ચ પૂર્ણઃ પાદતલં ચ પૂર્ણં નખાશ્ચ પૂર્ણાઃ કટિકણ્ઠૌ ચ પૂર્ણૌ ।
ઊરૂ ચ પૂર્ણે ઉદરં ચ પૂર્ણં લબ્ધ્વાપિ પૂર્ણાગ્જગૃહે તથાપ્યુરઃ ॥ ૩,૧૪.૩॥

સ્કન્ધઃ સુપૂર્ણાઃ સકલાશ્ચ બાહવઃ પૂર્ણાઃ કેશાઃ શ્મશ્રુદન્તાશ્ચ પૂર્ણાઃ ।
લોમાનિ પૂર્ણાનિ તથૈવ રોમકૂપાશ્ચ પૂર્ણાસ્તુ તથૈવ શિશ્નઃ ॥ ૩,૧૪.૪॥

અણ્ડશ્ચ પૂર્ણો હ્યણ્ડરોમાણિ કક્ષાશ્ચક્ષુશ્ચ શ્રોત્રે સર્વ એતે ચ પૂર્ણાઃ ।
કિં વર્ણયે મૂલરૂપં હરેશ્ચ યાવદ્બલં પૂર્ણં સમગ્રદેહે ॥ ૩,૧૪.૫॥

તાવદ્બ્રલં હ્યેકરોમાદિકેષુ સંતિત્વિમે હિ યતઃ સ એવ પૂર્ણઃ ।
સ એવ તુ સર્વસ્ય કર્તા સ એવ હર્થા સ તુ સારાંશભોક્તા ॥ ૩,૧૪.૬॥

અસારાંશં નૈવ ભોક્તા હરિસ્તુ સારાન્વક્ષ્યે શ‍ૃણુ પક્ષીન્દ્ર સમ્યક્ ।
દ્રાક્ષેક્ષુસારં નારિકેલસ્ય સારં ચૂતસ્ય સારં પનસસ્યાપિ સારમ્ ॥ ૩,૧૪.૭॥

નારઙ્ગસારં ક્રમુકસ્યાપિ સારં ખર્જૂરસારં કદલીફલસ્ય ।
નારાયણો બીજરૂપસ્ય સારં ગૃહ્ણાતિ નિત્યં ભક્તવર્યો દયાલુઃ ॥ ૩,૧૪.૮॥

તામ્બૂલસારં ખદિરસ્ય સારં પુષ્પસ્ય સારં ચન્દનસ્યાપિ સારમ્ ।
ગોધૂમસારં યવાનાં ચ સારં માષસ્ય સારં હરેણોશ્ચ સારમ્ ॥ ૩,૧૪.૯॥

શુદ્ધં તથા વ્રીહિનીવારસારં શ્યામાકસારં શુદ્ધધાન્યસ્ય સારમ્ ॥ ૩,૧૪.૧૦॥

નિષિદ્ધાન્સર્વશાકસ્ય સારાંસ્તથા નિપિદ્ધાલ્લાંવણસ્વાપિ સારાન્ ।
ગૃહ્ણાતિ વિષ્ણુઃ પરમાદરેણ અન્નસ્ય સારં ભક્ષ્યભોજ્યસ્ય સારમ્ ॥ ૩,૧૪.૧૧॥

સૂપસ્ય સારં પરમાન્નસ્ય સારં દુગ્ધસ્ય સારં દધિતક્રસ્ય સારમ્ ।
ઘૃતસ્ય સારં રામઠસ્યાપિ સારં ગૃહ્ણાતિ વિષ્ણુઃ સર્ષપસ્યાપિ સારમ્ ॥ ૩,૧૪.૧૨॥

મરીચસારં જીરકસ્યાપિ સારં તથા હવિર્ઘૃતપક્વસ્ય સારમ્ ।
તૈલેષુ પક્વસ્ય ચ ભર્જિતસ્ય ગુડસ્ય સારં નવનીતસ્ય સારમ્ ॥ ૩,૧૪.૧૩॥

લવઙ્ગસારં શર્કરાયાશ્ચ સારમિત્યાદિસારાન્વાસુદેવસ્તુ ભુક્તે ।
લક્ષ્મીપતિઃ સર્વજગન્નિવા સસ્તસ્યાજ્ઞયા વાસુદેવોઽપિ નિત્યમ્ ॥ ૩,૧૪.૧૪॥

તચ્છેષસારાનપિ ચાવનીશો મહાત્મનોંશાચ્છૃણુ શિષ્યવર્ય ।
એવં વિમૂઢા વાસુદેવસ્ય ભક્તાઃ કિં વક્તવ્યં વિષ્ણુભક્તા હિ લોકે ॥ ૩,૧૪.૧૫॥

કલ્યાણાસ્તે સારભોક્તાર એવ નૈષાં ભવેત્તેન દુઃખાભિવૃદ્ધિઃ ।

ભુઞ્જન્તિ યે વૈશ્વદેવં વિહાય દુષ્ટાંસ્તાન્વૈ ભુક્તિચિન્તાંશ્ચ વિદ્ધિ ॥ ૩,૧૪.૧૬॥

વક્ષ્યે વિશેષં વૈશ્વદેવે ખગેન્દ્ર ગોપ્યં નો વદાન્યત્ર વિદ્વાન્ ।
સૂર્યાદીનાં યે ચ દાને ચ દદ્યુર્વિના વાયોરન્તરસ્થં હરિં ચ ॥ ૩,૧૪.૧૭॥

તે વૈ સદા સારભોક્તાર એવ જ્ઞેયાસ્ત્વતો વિષ્ણુરેકો મહાત્મા ।
સારાંશભોક્તા ન તુ સર્વસ્ય ભોક્તા ભુનક્તિ સર્વં ત્વવિરુદ્ધશક્તિઃ ॥ ૩,૧૪.૧૮॥

વક્ષ્યે હ સારાન્પુનરન્યાન્ખગેન્દ્ર શૃણુષ્વ ગુહ્યં પરમાદરેણ ।
દ્રાક્ષાદયઃ સર્વ એવ ત્વસારાઃ કાલાદિદુષ્ટા ભાવદુષ્ટાઃ પદાર્થાઃ ॥ ૩,૧૪.૧૯॥

અતિપક્વાનન્તરં તુ તથા દિનચતુષ્ટયે ।
અસારાઃ કલુષા જ્ઞેયાસ્તથા જંબૂફલં સ્મૃતમ્ ॥ ૩,૧૪.૨૦॥

માસસ્યાનન્તરં વીન્દ્ર ત્વસારં પનસં સ્મૃતમ્ ।
ષણ્માસાનન્તરં વીન્દ્ર ખર્જૂરં તિક્તવત્સ્મૃતમ્ ॥ ૩,૧૪.૨૧॥

આર્દ્રં પૂતં નારિકેલં સ્ફોટનાનન્તરં પ્રભો ।
અહોરાત્રાનન્તરં તુ અસારં પરિકીર્તિતમ્ ॥ ૩,૧૪.૨૨॥

શુષ્કભૂતં નારિકેલં ખજૂરં તુ યથા તથા ।
પક્ષસ્યાનન્તરં ચૂતમસારં પરિકીર્તિતમ્ ॥ ૩,૧૪.૨૩॥

વર્ષસ્યાનન્તરં વીન્દ્ર પૂગીફલમુદાહૃતમ્ ।
ઘટિકાનન્તરં વીન્દ્ર તાંબૂલં પરિકીર્તિતમ્ ॥ ૩,૧૪.૨૪॥

યામસ્યાનન્તરં ચાન્નં સૂપાન્નં પાયસં તથા ।
ભક્ષ્યં ચ ક્વથિતં વીન્દ્ર અસારં પરિકીર્તિતમ્ ॥ ૩,૧૪.૨૫॥

ત્રિપક્ષાનન્તરં વીન્દ્ર તૈલપક્વં તથા સ્મૃતમ્ ।
ચતુર્યામાનન્તરં ચ ત્વસારં ઘૃતપક્વકમ્ ॥ ૩,૧૪.૨૬॥

ત્રિયામાનન્તરં શાકા નિઃ સારાઃ પરિકીર્તિતાઃ ।
જંબીરં શૃઙ્ગબેરે ધાત્રી કર્પૂરં ચ ચૂતકમ્ ॥ ૩,૧૪.૨૭॥

વત્સરાનન્તરં વીન્દ્ર નિઃ સારં પરિકીર્તિતમ્ ।
પર્પટઃ પક્ષમાત્રેણ નિઃ સારઃ પરિકીર્તિતઃ ॥ ૩,૧૪.૨૮॥

તુલસી સર્વદા સારા એકાદશ્યામપિ દ્વિજ ।
આર્દ્રા વાપ્યથવા શુષ્કા સાર્દ્રા સારવતી સ્મૃતા ॥ ૩,૧૪.૨૯॥

એકાદશ્યાં તુ તુલસી સારા ગ્રાહ્યા મનીષિભિઃ ।
ત્વચા નાસેંદ્રિયેણાપિ ન તુ જિહ્વેન્દ્રિયેણ ચ ॥ ૩,૧૪.૩૦॥

એકાદશ્યાં હરેરન્નં નિઃ સારં પરિકીર્તિતમ્ ।
એકાદશ્યાં હરેસ્તીર્થં મનુષ્યાણાં ખગેશ્વર ॥ ૩,૧૪.૩૧॥

એકવારે ચ સારં સ્યાદ્વિવારે ચ તતોધિકમ્ ।
એકાદશ્યાં મહાભાગ તીર્થં ગન્ધાદિમિશ્રિતમ્ ॥ ૩,૧૪.૩૨॥

અસારમિતિ સમ્પ્રોક્તં તથા સ્વાદૂદમિશ્રિતમ્ ।
એકાદશ્યાં હરેઃ સારં ક્ષીરં સર્પિર્મધૂદકમ્ ॥ ૩,૧૪.૩૩॥

નિઃ સારં મનુજેન્દ્રાણામિતિ વેદવિદાં મતમ્ ।
આષાઢમાસે ગરુડ શાકો નિઃ સાર ઉચ્યતે ॥ ૩,૧૪.૩૪॥

માસિ ભાદ્રપદે વીન્દ્ર હ્યસારં દધિ ચોચ્યતે ।
ક્ષીરં તુ હ્યાશ્વિને માસે નિઃ સારં પરિકીર્તિતમ્ ॥ ૩,૧૪.૩૫॥

ઊર્ધ્વપુણ્ડ્રગદાહીના નાર્યસારેતિ ગીયતે ।
હરિભક્તિવિહીના યે હ્યસુરાઃ પરિકીર્તિતાઃ ॥ ૩,૧૪.૩૬॥

હરિનામવિહીનં તુ મુખં નિઃ સારમુચ્યતે ।
હરિનૈવેદ્યહીનસ્તુ પાકો નિઃ સાર ઉચ્યતે ॥ ૩,૧૪.૩૭॥

ત્રિદિનૈશ્ચાતસીપુષ્પં નિઃ સારં પરિકીર્તિતમ્ ।
પ્રહરં મલ્લિકા સારં જાતી તુ પ્રહરાર્ધકમ્ ॥ ૩,૧૪.૩૮॥

ત્રિયામં શતપત્રં સ્યાત્કરવીરમહર્નિશમ્ ।
ઘટિકાવધિ સારં સ્યાત્પારિજાતં ખગેશ્વર ॥ ૩,૧૪.૩૯॥

ત્રિવર્ષં કેસરં ફલ્ગ સારમિત્યુચ્યતે બુધૈઃ ।
કસ્તૂરી દશવર્ષં તુ કર્પૂરં વર્ષમાત્રકમ્ ॥ ૩,૧૪.૪૦॥

સસારમિતિ સમ્પ્રોક્તં ચન્દનં સર્વદા સ્મૃતમ્ ।
શુદ્ધન્નિઃ સારભૂતાંશ્ચ વક્ષ્યે શ ૃણુ ખગેશ્વર ॥ ૩,૧૪.૪૧॥

તુષા મેધ્યા આરનાલં પુણ્યકં ભિઃ સટા તથા ।
ઉપોદ્દ્રજી અલાબૂશ્ચ બૃહત્કોશાતકી તથા ॥ ૩,૧૪.૪૨॥

વૃન્તાકં ચુક્રશાકશ્ચ બિલ્વમૌદુંવરં તથા ।
પલાઞ્જુર્લશુનં વૃન્તં કલઞ્જં ચ તથા દ્વિજા ॥ ૩,૧૪.૪૩॥

એતત્સર્વત્ર કાલે ચ નિઃ સારમિતિ કીર્તિતમ્ ।
એકાદશ્યાં વૈશ્વદેવં શ્રાદ્ધં તર્પણમેવ ચ ॥ ૩,૧૪.૪૪॥

મન્ત્રેણ પ્રેતદહનમસારં પરિકીર્તિતમ્ ।
હવિર્નારાયણો દેવો એતાંશ્ચ હ્યશુભાન્ન સાન્ ॥ ૩,૧૪.૪૫॥

ન ગૃહ્ણાતિ ન ગૃહ્ણાતિ ન ગૃહ્ણાતિ હરિઃ સ્વયમ્ ।
તથાપિ સર્વં જાનાતિ જીવાનાં પાપકર્મણામ્ ॥ ૩,૧૪.૪૬॥

આસ્વાદનં કારયતિ સ્વયં નાસ્વાદતે હરિઃ ।
અસારભોજનં ચૈવ જીવાનાં કર્મજં ફલમ્ ॥ ૩,૧૪.૪૭॥

અમુખ્યભોજિનો જીવાઃ કુન્ત્યાદ્યા મુખ્યભોજિનઃ ।
શુભાનિ ચ પિબેદ્વિષ્ણુરશુભં નો પિબેદ્વિભુઃ ॥ ૩,૧૪.૪૮॥

કો વદેત્તસ્ય ચેષ્ટાં તુ પૂર્ણાનન્દો હરિઃ સ્વયમ્ ।
ન તેન સદૃશઃ કોઽપિ દેશે કાલે ચ વિદ્યતે ।
તસ્યાવતારાન્વક્ષ્યહં શૃણુ પક્ષીન્દ્રસત્તમ ॥ ૩,૧૪.૪૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
વૈશ્વદેવાર્થકસારાસારવસ્તુવિવેકો નામ ચતુર્દશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૫
શ્રીકૃષ્ણ ઉવાચ ।
અથાવતા રાન્પુરુષાખ્યો હરિશ્ચ ગતો ધ્યાનં કર્તુમીશો મહાત્મા ।
પ્રાદુર્બભૂવાખિલસદ્ગુણાર્ણવઃ સ એવ વિષ્ણુઃ સ ચ બીજભૂતઃ ॥ ૩,૧૫.૧॥

યો બીજભૂતઃ પુરુષાખ્ય વિષ્ણુઃ સ એવાભૂદ્વાસુદેવો મહાત્મા ।
સૃષ્ટિં કર્તું પુરુષાખ્યસ્ય વાયોર્માયાખ્યાયાં મૂલરૂપો યથાઽસ ॥ ૩,૧૫.૨॥

યો વાસુદેવસ્તુ સ એવ જાતઃ સંકર્ષણાખ્યો ખિલસદ્ગુણાત્મા ।
સૃષ્ટિં કર્તું સૂત્રભૂતસ્ય વાયોર્જયાખ્યાયં પૂર્ણસંવિત્પરાત્મા ॥ ૩,૧૫.૩॥

સ એવં સંકર્ષણનામધેયઃ પ્રદ્યુમ્નનામા ચ સ એવ વિશ્રુતઃ ।
સરસ્વતીભારતીસર્જનાર્થં સ એવ દેવ્યા મૂલરૂપો બભૂવ ॥ ૩,૧૫.૪॥

સૃષ્ટ્વા યુક્તં ષોડશભિઃ કલાભિર્મહત્તત્ત્વં સૂક્ષ્મરૂપં સ એવ ।

સાહઙ્કારં ક્રીડયામાસ દેવઃ શ ૃણુ ત્વં વૈ ષોડશાખ્યાઃ કલાશ્ચ ॥ ૩,૧૫.૫॥

ભૂતાનિ કર્મેન્દ્રિયપઞ્ચકાનિ જ્ઞાનેન્દ્રિયાણીહ તથા મનશ્ચ ।
તતો બભૂવ હ્યનિરુદ્ધસંજ્ઞકો જીવાંશ્ચ સંગૃહ્ય સુપૂર્ણશક્તિઃ ॥ ૩,૧૫.૬॥

સોયં વિરિઞ્ચ્યાદિસમસ્તદેવાન્સ્થૂલેન દેહેન સસર્જ નાથઃ ।
તથા સ વિષ્ણુઃ પુરુષાભિધસ્તુ સનત્કુમારત્વમવાપ વીન્દ્ર ॥ ૩,૧૫.૭॥

અનન્યસાધ્યં બ્રહ્મચર્યં ચ કર્તું દશેન્દ્રિયાણાં શોષણાર્થં સદૈવ ।
સનન્દનાદૌ પઠિતઃ કુમારસ્તસ્માન્નાન્યો નાત્ર વિચાર્યમસ્તિ ॥ ૩,૧૫.૮॥

સ એવ વિષ્ણુઃ સૂકરત્વં હ્યવાપ ક્ષોપણીમુદ્ધર્તું દૈત્યવપુર્નિહન્તુમ્ ।
હિરણ્યાક્ષં સજ્જનાનાં ખગેન્દ્ર તથા ભૂમેઃ સ્થાપનાર્થં ચ દેવઃ ॥ ૩,૧૫.૯॥

તતો હરિર્મદ્વિદાસત્વમાપાનૃષેર્ભાર્યાયાં યામિન્યાં યો મહાત્મા ।
તત્રાવતારે પઞ્ચરાત્રં સમગ્રમુપાદેષ્ટું નાપ દાનં સ્વતન્ત્રઃ ॥ ૩,૧૫.૧૦॥

સ એવ વિષ્ણુઃ સમભૂદ્બ્રદર્યાં નારાયણાખ્યઃ શમલાપહશ્ચ ।
તપસ્તમું શિક્ષયિતું ત્વૃષીણાં તિરસ્કર્તું હ્યપ્સરસાં સહસ્રમ્ ॥ ૩,૧૫.૧૧॥

તતો હરિઃ કપિલત્વં હ્યવાપ્ય તિરોહિતાન્કાલબલેન તત્ત્વાન્ ।
ચતુર્વિંશતિં સંશયં ચોદ્ધરિષ્યન્નુપાદિશચ્ચાસુરયે મહાત્મા ॥ ૩,૧૫.૧૨॥

સ એવ દતઃ સમભૂદ્રમેશોનસૂયાયામત્રિરૂપઃ પરાત્મા ।
આન્વીક્ષિકિં નામ સુતર્કવિદ્યામલર્કનામ્ને પ્રદદાત્તાં મહાત્મા ॥ ૩,૧૫.૧૩॥

સ એવ વંશેપ્યભવદ્રવેશ્ચ આકૂત્યાં યઃ સચ્ચિદાનન્દરૂપઃ ।
સ્વાયંભુવં યત્તુ મન્વન્તરં ચ દેવૈઃ સાકં પાલયામાસ વીન્દ્ર ॥ ૩,૧૫.૧૪॥

સ એવ વિષ્ણુઃ સ ઉરુક્રમોભૂદાગ્નીધ્રપુત્ર્યાં મેરુદેવ્યાં ચ નાભેઃ ।
વિદ્યારતાનાં માનિનાં સર્વદૈવમત્યાશ્ચર્યં દર્શયિતું ચ વીન્દ્ર ॥ ૩,૧૫.૧૫॥

તતો હરિર્જગૃહે કૂર્મરૂપં સુરાસુરાણામુદધિં વિમથ્નતામ્ ।
પૃષ્ઠે ધર્તું મન્દરં પર્વતં ચ બ્રહ્માણ્ડં વા ધર્તુમીશો મહાત્મા ॥ ૩,૧૫.૧૬॥

તતો હરિઃ પ્રાદુરભૂન્મહાત્મા ધન્વન્તરિર્નામ હરિન્મણિદ્યુતિઃ ।
અપથ્યદોષાન્પરિહર્તુમેવ હસ્તે ગૃહીત્વા પૂર્ણકુભં સુધાભિઃ ॥ ૩,૧૫.૧૭॥

તતો હરિર્જગૃહે શ્રીવપુશ્ચ યન્મોહિનીતિ પ્રવદન્તિ લોકે ।
ઉદ્ધૃત્તાનાં દિતિજાનાં મહાત્મા સમ્યક્તેષાં વઞ્ચયિતું હરિર્બલમ્ ॥ ૩,૧૫.૧૮॥

તતો હરિઃ પ્રાદુરભૂન્મહાત્મા નૃસિંહનામા ભગવાનનન્તઃ ।
દૈત્યો હિરણ્યકશિપુશ્ચ તથોરુદેશે સંસ્થાપિતઃ કરજૈર્દારિતશ્ચ ॥ ૩,૧૫.૧૯॥

તતો હરિર્ભગવાન્વામનોભૂદદિત્યાં વૈ કશ્યપાદ્વદેવઃ ।
ઇન્દ્રાયેદં દાતુકામઃ ખગેન્દ્ર તદર્થં વૈ પાવિતું સોવિતું ચ ॥ ૩,૧૫.૨૦॥

તતો હરિર્જમદગ્નેઃ સુતોભૂલ્લોકે સર્વે પર્શુરામં વદન્તિ ।
બ્રહ્મદ્વિષાં ક્ષત્રિયાણાં ચ વીન્દ્ર ભૂમિં નિઃ ક્ષત્રાં કર્તુકામો મહેશઃ ॥ ૩,૧૫.૨૧॥

તતોભવદ્વ્યાસરૂપી સ વિષ્ણુશ્ચતુર્વારં રાઘવાસ્યાપિ પૂર્ણઃ ।
પરાશરાત્સત્યવત્યાં બભૂવ પૈલાદિભિર્વેદભાગાંશ્ચ કર્તુમ્ ॥ ૩,૧૫.૨૨॥

તતો હરી રઘુવંશેવતીર્ણઃ કૌસલ્યાયાં રાઘવઃ સૂર્યવંશે ।
સમુદ્રાદોર્વિગ્રહં કર્તુમીશો હં તું ભૂમ્યાં રાવણાદીંશ્ચ વીન્દ્ર ॥ ૩,૧૫.૨૩॥

તતો હરિર્વ્યાસરૂપી બભૂવ અષ્ટાવિંશે દ્વપરે જ્ઞાનરૂપી ।
પરાશરાત્સત્યવત્યાં મહાત્મા સ્વયં વેદાન્સંવિભક્તું ચ દેવઃ ॥ ૩,૧૫.૨૪॥

તતો હરિઃ કૃષ્ણરૂપી બભૂવ દેવક્યાં વૈ વસુદેવાત્સ વિષ્ણુઃ ।
કંસાદીન્વૈ નિતરાં હન્તુકામઃ સમ્યક્પાતું પાણ્ડવાંશ્ચાપિ વીન્દ્ર ॥ ૩,૧૫.૨૫॥

તતઃ કલૌ સમ્પ્રવૃત્તે હરિસ્તુ સમોહનાર્થં ચાસુરાણાં ખગેન્દ્ર ।
નામ્ના બુદ્ધો કીકટેષુ પ્રજાતો વેદપ્રમાણં નિરાકર્તુમેવ ॥ ૩,૧૫.૨૬॥

તતો હરિઃ કલ્કિસંજ્ઞશ્ચ વીન્દ્ર ઉત્પત્સ્યતે યુગયોર્મધ્યસંધૌ ।
દસ્યુપ્રાયાન્ભૂમિપાન્વૈ નિહન્તું નામ્ના હરિર્વિષ્ણુગુપ્તસ્ય ગેહે ॥ ૩,૧૫.૨૭॥

કેશવાદ્યાશ્ચતુર્વિંશતિર્વૈ સંકર્ષણાદયઃ ।
વિશ્વાદય સહસ્રં ચ પરાદ્યા અમિતાઃ સ્મૃતાઃ ॥ ૩,૧૫.૨૮॥

અવતારા હ્યસંખ્યાતા વિષ્ણોર્નારાયણસ્ય ચ ।
સ્વયં નારાયણાસ્તે તે નાણુમાત્રં વિભિદ્યતે ॥ ૩,૧૫.૨૯॥

બલતોરૂપતશ્ચાપિ ગુણતશ્ચ કથઞ્ચન ।
અનન્તોનન્તગુણતઃ પૂર્ણો વિષ્ણુર્ન ચાન્યથા ॥ ૩,૧૫.૩૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
વિષ્ણોરવતારનિરૂપણં નામ પઞ્ચદશોડધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૧૬

શ્રીકૃષ્ણ ઉવાચ ।
મહાલક્ષ્મ્યાઃ સ્વરૂપં ચ અવતારાન્ખગેશ્વર ।
શ ૃણુ સમ્યઙ્મહાભાગ તજ્જ્ઞાનસ્ય વિનિર્ણયમ્ ॥ ૩,૧૬.૧॥

ઈશાદન્યસ્ય જગતો હ્યાત્મો લોચન એવ તુ ।
વિષયીકુરુતે તત્સ્યાજ્જ્ઞાનં લક્ષ્મ્યાઃ પ્રકીર્તિતમ્ ॥ ૩,૧૬.૨॥

નિત્યાવિયોગિની દેવી હરિપાદૈકસંશ્રયા ।
નિત્યમુક્તા નિત્યબુદ્ધા મહાલક્ષ્મીઃ પ્રકીર્તિતા ॥ ૩,૧૬.૩॥

મૂલસ્ય ચ હરેર્ભાર્યા લક્ષ્મીઃ સમ્પ્રકીર્તિતા ।
પુંસો હિભાર્યા પ્રકૃતિઃ પ્રકૃતેશ્ચા ભિમાનિની ॥ ૩,૧૬.૪॥

સૃષ્ટિં કર્તું ગુણાન્વીન્દ્ર પુરુષેણ સહ પ્રભો ।
તમઃ પાનં તથા કર્તું પ્રકૃત્યાખ્યા તદાભવત્ ॥ ૩,૧૬.૫॥

વાસુદેવસ્ય ભાર્યા તુ માયા નામ્ની પ્રકીર્તિતા ।
સંકર્ષણસ્ય ભાર્યા તુ જયેતિ પરિકીર્તિતા ॥ ૩,૧૬.૬॥

અનિરુદ્ધસ્ય ભાર્યા તુ શાન્તા નામ્નીતિ કીર્તિતા ।
કૃતિઃ પ્રદ્યુમ્નભાર્યાપિં સૃષ્ટિં કર્તું બભૂવહ ॥ ૩,૧૬.૭॥

વિષ્ણુપત્ની કીર્તિતા ચ શ્રીદેવી સત્ત્વમાનિની ।
તમોભિમાનિની દુર્ગા કન્યકેતિ પ્રકીર્તિતા ॥ ૩,૧૬.૮॥

કૃષ્ણાવતારે કન્યેવ નન્દપુત્રાનુજા હિ સા ।
રજોભિમાનિભૂદેવી ભાર્યા સા સૂકરસ્ય ચ ॥ ૩,૧૬.૯॥

વેદાભિમાનિની વીન્દ્ર અન્નપૂર્ણા પ્રકીર્તિતા ।
નારાયણસ્ય ભાર્યા તુ લક્ષ્મીરૂપા ત્વજા સ્મૃતા ॥ ૩,૧૬.૧૦॥

યજ્ઞાખ્યસ્ય હરેર્ભાર્યા દક્ષિણા સમ્પ્રકીર્તિતા ॥ ૩,૧૬.૧૧॥

જયન્તી વૃષભસ્યૈવ પત્ની સમ્પરિકીર્તિતા ।
વિદેહપુત્રી સીતા તુ રામભાર્યા પ્રકીર્તિતા ॥ ૩,૧૬.૧૨॥

રુક્મિણીસત્યભામા ચ ભાર્યે કૃષ્ણસ્ય કીર્તિતે ।
ઇત્યાદિકા હ્યનન્તાશ્ચાપ્યાવતારાઃ પૃથગ્વિધાઃ ॥ ૩,૧૬.૧૩॥

રમાયાઃ સંતિ વિપ્રેન્દ્ર ભેદહીનાઃ પરસ્પરમ્ ।
અનન્તાનન્તગુણકાદ્વિષ્ણોર્ન્યૂનાઃ પ્રકીર્તિતાઃ ॥ ૩,૧૬.૧૪॥

અથ બ્રહ્મા ચ વાયુશ્ચ શ્રિયઃ કોટિગુણાધમૌ ।
વક્ષ્યે ચ બ્રહ્મણો રૂપં શ‍ૃણુ પક્ષીન્દ્રસત્તમ ॥ ૩,૧૬.૧૫॥

વાસુદેવાત્સમુત્પન્નો માયાયાં ચ ખગેશ્વર ।
સ એવ પુરુષોનામ વિરિઞ્ચ ઇતિ કીર્તિતઃ ॥ ૩,૧૬.૧૬॥

અનિરુદ્ધાત્તુ શાન્તાયાં મહત્તત્ત્વતનુસ્ત્વભૂત્ ।
તદા મહાન્વિરિઞ્ચેતિ સંજ્ઞામાપ ખગેશ્વર ॥ ૩,૧૬.૧૭॥

રજસાત્ર સમુત્પન્નો માયાયાં વાસુદેવતઃ ।
વિધિસંજ્ઞો વિરિઞ્ચઃ સ જ્ઞાતવ્યઃ પક્ષિસત્તમ ॥ ૩,૧૬.૧૮॥

બ્રહ્માણ્ડાન્તઃ પદ્મનાભો યો જાતઃ કમલાસનઃ ।
સ ચર્તુમુખસંજ્ઞાં ચાપ્યવાપ ખગસત્તમ ॥ ૩,૧૬.૧૯॥

એવં ચત્વારિરૂપાણિ બ્રહ્મણઃ કીર્તિતાનિ ચ ।
વાયોર્નામાનિ વક્ષ્યેહં શ‍ૃણુ પક્ષીન્દ્રસત્તમ ॥ ૩,૧૬.૨૦॥

સંકર્ષણાચ્ચ ગરુડ જયાયાં યો વભૂવ હ ।
સ વાયુઃ પ્રથમો જ્ઞેયો પ્રધાન ઇતિ કીર્તિતઃ ॥ ૩,૧૬.૨૧॥

લોકચેષ્ટાપ્રદત્વાત્સ સૂત્રનામ્નાપિ કીર્તિતઃ ।
બદરીસ્થસ્ય વિષ્ણોશ્ચ ધૈર્યેણ સ્તવનાય સઃ ॥ ૩,૧૬.૨૨॥

ધૃતિરૂપં યયૌ વાયુસ્તસ્માદ્ધૃતિરિતિ સ્મૃતઃ ।
યોગ્યાનાં હરિભક્તાનાં ધૃતિરૂપેણ સંસ્થિતઃ ॥ ૩,૧૬.૨૩॥

યતો હૃદિ સ્થિતો વાયુસ્તતો વૈ ધૃતિસંજ્ઞકઃ ।
સર્વેષાં ચ દૃદિ સ્થિત્વા સ્મરતે સર્વદા હરિમ્ ॥ ૩,૧૬.૨૪॥

અતો વાયુઃસ્થિતિર્નામ બભૂવ ખગસત્તમ ।
અથવા વાયુરેવૈકઃ શ્વેતદ્વીપગતં હરિમ્ ॥ ૩,૧૬.૨૫॥

સદા સ્મરતિ વૈ વીન્દ્ર અતોસૌ સ્મૃતિસંજ્ઞકઃ ।
સર્વેષાં ચ હૃદિસ્થિત્વા જ્ઞાતો વિષ્ણોરુદીરણાત્ ॥ ૩,૧૬.૨૬॥

અતો મે મુક્તિનામાભૂદ્વાયુરેવ ન સંશયઃ ।
જ્ઞાનદ્વારેણ ભક્તાનાં મુક્તિદો મદનુજ્ઞયા ॥ ૩,૧૬.૨૭॥

યતો સૌ વાયુરેવૈકો મુક્તિનામા ભૂવહ ।

વિષ્ણૌ ભક્તિં વર્ધ્યતિ ભક્તાનાં હૃદિ સંસ્થિતઃ ॥ ૩,૧૬.૨૮॥

અતોસૌ વિષ્ણુભક્તશ્ચ કીર્તિતો નાત્ર સંશયઃ ।
એષોસૌ સર્વજીવાનાં ચિત્તસંજ્ઞાનમેવ ચ ॥ ૩,૧૬.૨૯॥

ચિત્તરૂપો યતો વાયુરતશ્ચિત્તમિતિ સ્મૃતઃ ।
પ્રભુઃ પ્રભૂણાં ગરુડ સોદરાણાં ચ સર્વશઃ ॥ ૩,૧૬.૩૦॥

અતસ્તુ વાયુરેવૈકો મહાપ્રભુરિતિ સ્મૃતઃ ।
સર્વેષાં ચ હૃહિ સ્થિત્વા બલં પશ્યતિ સત્તમ ॥ ૩,૧૬.૩૧॥

અતો બલમિતિ હ્યાખ્યામવાપ વિનતાસુત ।
સર્વેષાં ચ હૃદિ સ્થિત્વા પુત્રપૌત્રાદિકૈર્જનૈઃ ॥ ૩,૧૬.૩૨॥

યાજનં કુરુતે નિત્યમતોસૌ યષ્ટૃસંજ્ઞકઃ ।
અનન્તકલ્પમારભ્ય વાયુપર્યન્તમેવ ચ ॥ ૩,૧૬.૩૩॥

વક્રત્વં નાસ્તિ યોગસ્ય ઋજુર્યોગ્ય ઇતિ સ્મૃતઃ ।
યોગસ્ય વક્રતા નામ કામ્યતા હરિપૂજને ।
ઈશરુદ્રાદિકાનાં ચ કામ્યેન હરિપૂજનમ્ ॥ ૩,૧૬.૩૪॥

કસ્યચિત્ત્વથ પક્ષીન્દ્ર હ્યતસ્ત્વનૃજવઃ સ્મૃતાઃ ॥ ૩,૧૬.૩૫॥

ઋષ્યાદીનાં ચ મધ્યેપિ કામ્યેન હરિપૂજનમ્ ।
અતો ન ઋજવો જ્ઞેયા મનુષ્યાણાં ચ કા કથા ॥ ૩,૧૬.૩૬॥

યાવત્કામ્યસપર્યાં વૈ ન જહાતિ નરોત્તમઃ ।
તથા ઋષ્યાદયશ્ચૈવ મોક્ષસ્ય પરિપન્થિનીમ્ ॥ ૩,૧૬.૩૭॥

અનાદિકાલમારભ્ય કર્મજન્યા ચ વાસના ।
મોક્ષાધિકારિણઃ સર્વે કુર્વતે કસ્ય પૂજનમ્ ॥ ૩,૧૬.૩૮॥

નષ્ટપ્રાયં ચ તત્સર્વં ગુરોઃ સંજ્ઞાનબોધકાત્ ।
પ્રાપ્યયોગં સમાચર્ય અન્તે મોક્ષમવાપ્નુયાત્ ॥ ૩,૧૬.૩૯॥

કામ્યેન પૂજનં વિષ્ણોરૈશ્વર્યં પ્રદદાતિ ચ ।
જ્ઞાનં ચ વિપરીતં સ્યાત્તેન યાત્યધરં તમઃ ॥ ૩,૧૬.૪૦॥

તદેવ વિપરીતં ચેજ્જ્ઞાનાય પરિકીર્તિતમ્ ।
શિલાયાં વિષ્ણુબુદ્ધિસ્તુ વિષ્ણુબુદ્ધિર્દ્વિજે તથા ॥ ૩,૧૬.૪૧॥

સલિલે તીર્થબુદ્ધિસ્તુ રોણુકાયાં તથૈવ ચ ।
શિવે સૂર્યે પણ્મુખે ચ વિષ્ણુબુદ્ધિઃ ખગેશ્વર ॥ ૩,૧૬.૪૨॥

ઇત્યાદ્યમખિલં જ્ઞાનં વિપરીતમિતિ સ્મૃતમ્ ।
શિલાદ્યેષુ ચ સર્વેષુ ઐક્યેનવ વિચિન્તનમ્ ॥ ૩,૧૬.૪૩॥

વિષ્ણુબુદ્ધિરિતિ પ્રોક્તં ન તુ તત્રસ્થવેદનમ્ ।
અનાદ્યનન્તકાલેપિ કામ્યેન હરિપૂજનમ્ ॥ ૩,૧૬.૪૪॥

યતો નાસ્તિ તતો વાયુરૃજુર્યોગ્યઃ પ્રકીર્તિતઃ ।
અન્યેષાં સર્વદા નાસ્તિ અતો ન ઋજવઃ સ્મૃતાઃ ॥ ૩,૧૬.૪૫॥

હરિં દર્શયતે વાપિ અપરોક્ષેણ સર્વદા ।
મોક્ષાધિકારિણાં કાલે અતઃ પ્રજ્ઞેતિ કથ્યતે ॥ ૩,૧૬.૪૬॥

પરોક્ષેણાપિ સર્વેષાં હરિં દર્શયતે સદા ।
અતો વાયુઃ સદા વીન્દ્ર જ્ઞાનમિત્યેવ કીર્તિતઃ ॥ ૩,૧૬.૪૭॥

હિતાહિતોપદેષ્ટૃત્વાદ્ભક્તાનાં હૃદયે સ્થિતઃ ।
તતશ્ચ ગુરુસંજ્ઞાં ચાપ્યવાપ સ ચ મારુતઃ ॥ ૩,૧૬.૪૮॥

યોગિનાં હૃદયે સ્થિત્વા સધ્યાયતિ હરિં પરમ્ ।
પાર્થક્યેનાપિ તં ધ્યાયન્મહાધ્યાતેતિ સ સ્મૃતઃ ॥ ૩,૧૬.૪૯॥

યદ્યોગ્યતાનુસારેણ વિજાનાતિ પરં હરિમ્ ।
રુદ્રાદૌ વિદ્યમાનાંશ્ચ ગુણાઞ્જાનાતિ સર્વદા ॥ ૩,૧૬.૫૦॥

અતો વૈ વિજ્ઞાનામાસૌ પ્રોક્તો હિ ખગસત્તમ ।
કામ્યાનાં કર્મણાં ત્યાગાદ્વિરાગ ઇતિ સ સ્મૃતઃ ॥ ૩,૧૬.૫૧॥

અથવાયોગિનાં નિત્યં હૃદિ સ્થિત્વા સ મારુતઃ ।
વૈરાગ્યં સંજનયતિ વિરાગ ઇતિ સ સ્મૃતઃ ॥ ૩,૧૬.૫૨॥

દેવાનાં પુણ્યપાપાભ્યાં સુખમેવોત્તરોત્તરમ્ ।
તત્સુખં તૂત્તરેષાં ચ વાયુપર્યન્તમેવ ચ ॥ ૩,૧૬.૫૩॥

દેવાનાં ચ ઋષીણાં ચ ઉત્તમાનાં નૃણાં તથા ।
સુખાંશં જનયેદ્વાયુર્યતોતઃ સુખસંજ્ઞકઃ ॥ ૩,૧૬.૫૪॥

ભુનક્તિ સર્વદા વીદ્રં તત્ર મુખ્યસ્તુ મારુતઃ ।
દુઃખશોકાદિકં કિઞ્ચિદ્દેવાનાં ભવતિ પ્રભો ॥ ૩,૧૬.૫૫॥

તચ્ચાસુરાવેશવશાદિત્યવેહિ ન સંશયઃ ।
તજ્જીવસ્ય ભવેત્કિઞ્ચિદ્દૈત્યાનાં ક્રમશો ભવેત્ ॥ ૩,૧૬.૫૬॥

યતઃ કલિશ્ચાધિકઃ સ્યાદતો દુઃખીતિ સ સ્મૃતઃ ।
દૈત્યાનાં પુણ્યપાપાભ્યાં દુઃખ મેવોત્તરોત્તરમ્ ॥ ૩,૧૬.૫૭॥

તદ્દુઃખમુત્તરેષાં ચ કલિપર્યન્તમેવ ચ ।
ભુનક્તિ સર્વદા વીન્દ્ર તતઃ કલિરિતિ સ્મૃતઃ ॥ ૩,૧૬.૫૮॥

સુખહર્ષાદિકં કિં ચિદ્દૈત્યાનાં ભવતિ પ્રભો ।
દેવાવેશો ભવેત્તસ્ય નાત્ર કાર્યા વિચારણા ॥ ૩,૧૬.૫૯॥

દેવાનાં નિરયો નાસ્તિ દૈત્યાનાં વિનતાસુત ।
સુખસ્વરૂપં તન્નાસ્તિ વિષયોત્થમપિ દ્વિજ ॥ ૩,૧૬.૬૦॥

વિષયોત્થં કિઞ્ચિદપિ દેવાવેશાદુદીરિતમ્ ।
તમો નાસ્ત્યેવ દેવાનાં દુઃખં નાસ્તિ સ્વરૂપતઃ ॥ ૩,૧૬.૬૧॥

વિષયોત્થં મહાદુઃખં દેવાનાં નાસ્તિ સર્વદા ।
દુઃખશોકાદિકં કિં ચિદસુરાવેશતો ભવેત્ ॥ ૩,૧૬.૬૨॥

અતઃ કલિઃ સદા દુઃખી સુખી વાયુસ્તુ સર્વદા ।
મનુષ્યાણા મૃષીણાં ચ સુખં દુઃખં ખગેશ્વર ॥ ૩,૧૬.૬૩॥

ભવેત્તત્પુણ્યિપાપાભ્યાં પુણ્યભોગી ચ મારુતઃ ।
કષ્ટભઙ્ગઃ કલિલયો નાત્ર કાર્યા વિચારણા ॥ ૩,૧૬.૬૪॥

પ્રાણાદિસુખપર્યન્તા અંશા એકોનવિંશતિઃ ।
પ્રવિષ્ટાઃ સંતિ લોકેષુ પૃથક્સંતિ ખગેશ્વર ॥ ૩,૧૬.૬૫॥

મારુતરેવતારાંશ્ચ શ‌ૃણુ પક્ષીન્દ્રસત્તમ ।
ચતુર્દશસુ ચન્દ્રેષુ દ્વિતીયૌયો વિરોચનઃ ॥ ૩,૧૬.૬૬॥

સ વાયુરિતિ સમ્પ્રોક્ત ઇન્દ્રાદીનાં ખગેશ્વર ।
હરિતત્ત્વેષુ સર્વેષુ સ વિષ્વગ્યાવ્યતેક્ષણઃ ॥ ૩,૧૬.૬૭॥

અતો રોચનનામાસૌ મરુદંશઃ પ્રકીર્તિતઃ રામાવતારે હનુમાન્નામકાર્યાર્થસાધકઃ ।
સ એવ ભીમસેનસ્તુ જાતો ભૂમ્યાં મહાબલઃ ॥ ૩,૧૬.૬૮॥

કૃષ્ણાવતારે વિજ્ઞેયો મરુદંશઃ પ્રકીર્તિતઃ ॥ ૩,૧૬.૬૯॥

મણિમાન્નામ દૈત્યસ્તુ સંરાખ્યો ભવિષ્યતિ ।
સર્વેષાં સંકરં યસ્તુ કરિષ્યતિ ન સંશયઃ ॥ ૩,૧૬.૭૦॥

તેન સંકરનામાસૌ ભવિષ્યતિ ખગેશ્વર ।
ધર્માન્ભાગવતાન્સર્વાન્વિનાશયતિ સર્વથા ॥ ૩,૧૬.૭૧॥

તદા ભૂમૌ વાસુદેવો ભવિષ્યતિ ન સંશયઃ ।
યજ્ઞાર્થૈઃ સદૃશો યસ્ય નાસ્તિ લોકે ચતુર્દશે ॥ ૩,૧૬.૭૨॥

અતઃ સ પ્રજ્ઞયા પૂર્ણો ભવિષ્યતિ ન સંશયઃ ।
અવતારાસ્ત્રયો વાયોર્મતં ભાગવતાભિધમ્ ॥ ૩,૧૬.૭૩॥

સ્થાપનં દુષ્ટદમનં દ્વયમેવ પ્રયોજનમ્ ।
નાન્યત્પ્રયોજનં વાયોસ્તથા વૈરોચનાત્મકે ॥ ૩,૧૬.૭૪॥

અવતારત્રયે વીન્દ્ર દુઃખં ગર્ભાદિસંભવમ્ ।
નાસ્તિ નાસ્ત્યેવ વાયોસ્તુ તથા વૈરોચનાદિકે ॥ ૩,૧૬.૭૫॥

શુક્રશોણિતસંબન્ધો હ્યવતારચતુષ્ટયે ।
નાસ્તિ નાસ્ત્યેવ પક્ષીન્દ્ર યતો નાસ્ત્યશુભં તતઃ ॥ ૩,૧૬.૭૬॥

પૂર્વં ગર્ભં સમાશોષ્ય સમયે પ્રભવસ્ય ચ ।
પ્રાદુર્ભવતિ દેવેશી હ્યવતારચતુષ્ટયે ॥ ૩,૧૬.૭૭॥

ત્રયોવિંશતિરૂપાણાં વાયોશ્ચૈવ ખગેશ્વર ।
રૂપૈરૃજુસ્વરૂપૈશ્ચ બ્રહ્મણઃ પરમેષ્ઠિનઃ ॥ ૩,૧૬.૭૮॥

સત્યમેવ ન સંદેહો નિત્યાનન્દસુખાદિષુ ।
એવમેવ વિજાનીયાન્નાન્યથા તુ કથઞ્ચન ॥ ૩,૧૬.૭૯॥

એતસ્ય શ્રવણાદેવ મોક્ષં યાન્તિ ન સંશયઃ ।
તદનન્તરજાન્વક્ષ્યે શૃણુ પક્ષીન્દ્રસત્તમ ॥ ૩,૧૬.૮૦॥

કૃતૌ પ્રદ્યુમ્નતશ્ચૈવ સમુત્પન્ને ખગેશ્વર ।
સ્ત્રિયૌ દ્વે યમલે ચૈવ તયોર્મધ્યે તુ યધિકા ॥ ૩,૧૬.૮૧॥

વાણીતિસંજ્ઞકાં વીન્દ્ર બ્રહ્માણીસંજ્ઞકાં વિદુઃ ।
પુરુષાખ્યવિરિઞ્ચસ્ય ભાર્યા સાવિત્રિકા મતા ।
ચતુર્મુખસ્ય ભાર્યા તુ કીર્તિતા સા સરસ્વતી ॥ ૩,૧૬.૮૨॥

એવં ત્રિરૂપં વિજ્ઞેયં વાણ્યાશ્ચ ખગસત્તમ ।
વક્ષ્યેઽવતારાન્ભારત્યાઃ સમાહિતમનાઃ શ ृણુ ॥ ૩,૧૬.૮૩॥

સર્વવેદાભિમાનિત્વાત્સર્વવેદાત્મિકા સ્મૃતા ।
મહાધ્યાતુશ્ચ વાયોસ્તુ ભાર્યાસા પરિકીર્તિતા ॥ ૩,૧૬.૮૪॥

જ્ઞાનરૂપસ્ય વાયોસ્તુ ભાર્યા સા પરિકીર્તિતા ।
સદા સુખસ્વરૂપત્વાદ્ભારતી તુ સુખાત્મિકા ॥ ૩,૧૬.૮૫॥

સુખસ્વરૂપ વાયોસ્તુ ભાર્યા સા પરિકીર્તિતા ।
ગુરુસ્તુ વાયુરેવોક્તસ્તસ્મિન્ભક્તિયુતા સતી ॥ ૩,૧૬.૮૬॥

તતસ્તુ ભારતી નિત્યા ગુરુભક્તિરિતિ સ્મૃતા ।
મહાગુરોર્હિ વાયોશ્ચ ભાર્યા વૈ પરિકીર્તિતા ॥ ૩,૧૬.૮૭॥

હરૌ સ્નેહયુતત્વાચ્ચ હરિપ્રીતિરિતિ સ્મૃતા ।
ધૃતિરૂપસ્ય વાયોશ્ચ ભાર્યા સા પરિકીર્તિતા ॥ ૩,૧૬.૮૮॥

સર્વમન્ત્રાભિમાનિત્વાત્સર્વમન્ત્રાત્મિકા સ્મૃતા ।
મહાપ્રભોશ્ચ વાયોશ્ચ ભાર્યા વૈ સા પ્રકીર્તિતા ॥ ૩,૧૬.૮૯॥

ભુજ્યન્તે સર્વભોગાસ્તુ વિષ્ણુપ્રીત્યર્થમેવચ ।
અતસ્તુ ભારતી જ્ઞેયા ભુજિનામ્ના પ્રકીર્તિતા ॥ ૩,૧૬.૯૦॥

ચિત્રરૂપસ્ય વાયોસ્તુ ભાર્યા સા પરિકીર્તિતા ।
રોચનેન્દ્રસ્ય ભાર્યા ચ શ્રદ્ધાખ્યા પરિકીર્તિતા ॥ ૩,૧૬.૯૧॥

હનુમાંશ્ચ તદા જજ્ઞે ત્રેતાયાં પક્ષિસત્તમ ।
તદા શિવાખ્યવિપ્રાચ્ચ જજ્ઞે સા ભારતી સ્મૃતા ॥ ૩,૧૬.૯૨॥

ન કેવલં ભારતી સાશચ્યાદ્યૈશ્ચૈવ સંયુતા ।
તસ્મિન્સંજનિતાઃ સર્વાઃ પ્રાપુર્યોગં સ્વભર્તૃભિઃ ॥ ૩,૧૬.૯૩॥

અન્યગેતિ ચ વિજ્ઞેયા કન્યા તન્મતિસંજ્ઞિકા ।
ત્રેતાન્તે સૈવ પક્ષીન્દ્ર શચ્યાદ્યૈશ્ચૈવ સંયુતા ॥ ૩,૧૬.૯૪॥

દમયન્ત્યનલાજ્જાતા ઇન્દ્રસેનેતિ ચોચ્યતે ।
નલં નન્દયતે યસ્માત્તસ્માચ્ચ નલનન્દિની ॥ ૩,૧૬.૯૫॥

તત્ર સ્વભર્તૃસંયોગં નૈવ ચાપ ખગેશ્વર ।
તત્રાન્યગાત્વં વિજ્ઞેયં પુરુષસ્થેન વાયુના ॥ ૩,૧૬.૯૬॥

કિઞ્ચિત્કાલં તથા સ્થિત્વા કન્યૈવ મૃતિ માપ સા ।
શચ્યાદિસંયુતા સૈવ દ્રુપદસ્ય મહાત્મનઃ ॥ ૩,૧૬.૯૭॥

વેદિમધ્યાત્સમુદ્ભૂતા ભીમસેનાર્થમેવ ચ ।
તત્રાન્યગાત્વં નાસ્ત્યેવ યોગશ્ચ સહ ભર્તૃભિઃ ॥ ૩,૧૬.૯૮॥

કેવલા ભારતી જ્ઞેયા કાશિરાજસ્ય કન્યકા ।
કાલી નામ્ના તુ સા જ્ઞેયા ભીમસેનપ્રિયા સદા ॥ ૩,૧૬.૯૯॥

વાચ્યાદિભિઃ સંયુતૈવદ્રૌપદી દ્રુપદાત્મજા ।
દેહં ત્યક્ત્વાવિશિષ્ટૈવ કારટીગ્રામસંજ્ઞકે ॥ ૩,૧૬.૧૦૦॥

સંકરસ્ય ગૃહે વીન્દ્ર ભવિષ્યતિ કલૌ યુગે ।
વાયોસ્તૃતીયરૂપાર્થં સા કન્યૈવ મૃતિં ગતા ॥ ૩,૧૬.૧૦૧॥

ઇત્યાદ્યા વાયુભાર્યાશ્ચ બ્રહ્મભાર્યાશ્ચ સતમ ।
સ્વભર્તૃભ્યાં ચ પક્ષીન્દ્ર ગુણૈશ્ચૈવ શતાધમાઃ ॥ ૩,૧૬.૧૦૨॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
મહાલક્ષ્મ્યવતારાદિનિરૂપણં નામ ષોડશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૭
ગરુડ ઉવાચ ।
ચતુર્જન્મસુ વૈ કૃષ્ણ શચ્યાદ્યૈઃ સહ ભારતી ।
એકદેહ વિશિષ્ટૈવ ભુવિ જાતેતિ ચોક્તવાન્ ॥ ૩,૧૭.૧॥

કારણં બ્રૂહિ મે બ્રહ્મન્શિષ્યાય તવ સુવ્રત ।
ગરુડેનૈવમુક્તસ્તમુવાચ મધુસૂદનઃ ॥ ૩,૧૭.૨॥

શ્રીકૃષ્ણ ઉવાચ ।
વિશિષ્ટદેહસં પ્રાપ્તૌ ભારત્યાઃ પક્ષિસત્તમ ।
વક્ષ્યામિ કારણં વીન્દ્ર સાવધાનમનાઃ શ ृણુ ॥ ૩,૧૭.૩॥

પુરા કૃતયુગે વીન્દ્ર રુદ્રભાર્યા ચ પાર્વતી ।
ઇન્દ્રભાર્યા શચી દેવી યમ ભાર્યાચ શામલા ॥ ૩,૧૭.૪॥

અશ્વિભાર્યા ઉષા દેવી ભર્તૃભિઃ સહિતા ખગ ।

બ્રહ્મલોકં યયુસ્તત્ર બ્રહ્માણં દદૃશુસ્તદા ॥ ૩,૧૭.૫॥

હાવં ભાવં વિલાસં ચ દર્શયામાસુરઞ્જસા ।
દૃષ્ટ્વા તા ઉદ્ધતા બ્રહ્મા શશાપ ખગસત્તમ ॥ ૩,૧૭.૬॥

ઉદ્ધતાશ્ચ યતો યૂયં માનુષીં યોનિમાપ્સ્યથ ।
તત્ર સ્વભર્તૃસંયોગમવાપ્સ્યથ ખગેશ્વર ॥ ૩,૧૭.૭॥

એવં શપ્તાસ્તુ તાઃ સર્વા આજગ્મુર્મેરુપર્વતમ્ ।
તત્રોપવિષ્ટં બ્રહ્માણં વઞ્ચયામાસુરઞ્જસા ॥ ૩,૧૭.૮॥

તૂષ્ણીમેવ સ્થિતે વીન્દ્ર વઞ્ચયન્ત્યઃ સ્થિતાઃ પુનઃ ।
તતસ્તૂષ્ણીં સ્થિતં વીન્દ્ર વઞ્ચયામાસુરઞ્જસા ॥ ૩,૧૭.૯॥

ત્રિવારાનન્તરં બ્રહ્મા શપ્તવાંસ્તા મહાપ્રભુઃ ।
ત્રિવારં વઞ્ચનં યસ્માદેકવારં ચ દર્શનમ્ ॥ ૩,૧૭.૧૦॥

કિં ચાશ્રુત્વાતઃ પશ્ચાચ્ચતુર્જન્મસુ ભૂતલે ।
એકદેહાન્માનુષત્વં ભવિષ્યતિ ન સંશયઃ ॥ ૩,૧૭.૧૧॥

દ્વિતીયે જન્મનિ તથા અન્યગાત્વમવાપ્સ્યથ ।
તૃતીયે જન્મનિ તથા ભર્તૃસંયોગ માપ્સ્યથ ॥ ૩,૧૭.૧૨॥

જન્મન્યાદ્યે ચતુર્થે ચ નાન્યગાત્વમવાપ્સ્યથ ।
તથા સ્વભર્તૃસંયોગં નાવાપ્સ્યથ ચ સર્વશઃ ॥ ૩,૧૭.૧૩॥

એવં શપ્તાસ્તુ તાઃ સર્વા બ્રહ્મણા પક્ષિસત્તમ ।
તદા વિચારયામાસુર્મિલિત્વા મેરુમૂર્ધનિ ॥ ૩,૧૭.૧૪॥

બ્રહ્મશાપસ્ત્વનિર્વાય ઉપાયૈઃ શતશોઽપિ ચ ।
નીચૈઃ સમાગમો નિન્દ્યસ્તથૈવ ચ વિપત્તિદઃ ॥ ૩,૧૭.૧૫॥

ઉત્તમેન ચ સંગેન દૈવેનાપ્યર્થદો ભવેત્ ।
દેવાનામુત્તમો વાયુસ્તદર્થં સંગમાચરેત્ ॥ ૩,૧૭.૧૬॥

વિચાર્યૈવમુમાદ્યા ભારત્યાઃ સેવાં તુ ચક્રિરે ।
સહસ્રવત્સરાન્તે સા ભારતી તોષિતાબ્રવીત્ ॥ ૩,૧૭.૧૭॥

મત્સેવાં ચ કિમર્થં વૈ હ્યાચરિષ્યન્તિ સુવ્રતાઃ ।
તસ્યાં રક્તાશ્ચ તા દેવ્યસ્ત્વબ્રુવન્સ્વચિકીર્ષિતમ્ ॥ ૩,૧૭.૧૮॥

પુરા વયં તુ શપ્તાઃ સ્મ બ્રહ્મણા ક્રોધરૂપિણા ।
એકદેહાન્માનુષત્વમવાપ્સ્યથ વરાઙ્ગનાઃ ॥ ૩,૧૭.૧૯॥

ચતુર્થજન્મન્યપ્યેવં દ્વિતીયે જન્મનિ પ્રભો ।
સમાપ્સ્યથાન્યગાત્વં ચેત્યેવં શપ્તા હ ભામિનિ ॥ ૩,૧૭.૨૦॥

અસ્માકં વાયુના દેવેનાન્યગાત્વં ન દોષભાક્ ।
અતસ્ત્વયૈકદેહત્વમિચ્છામો દેવિ જન્મસુ ॥ ૩,૧૭.૨૧॥

ઇત્યુક્તા તાભિરથ ચ તથૈત્યુક્ત્વા દ્વિજોત્તમ ।
સા પાર્વત્યાદિભિર્યુક્તા ભારતીત્યભવદ્ભુવિ ॥ ૩,૧૭.૨૨॥

શિવનામ્નો દ્વિજસ્યૈવ ગૃહે સા તુ કુમારિકા ।
કર્મૈક્યાર્થં તપશ્ચક્રે વિષ્ણોશ્ચ શિવસંજ્ઞિનઃ ॥ ૩,૧૭.૨૩॥

તપસા તોષિતા વિષ્ણુઃ શિવ સંજ્ઞો મહાપ્રભુઃ ।
વરં પ્રાદાત્તૃતીયેસ્મિન્કૃષ્ણજન્મનિ ભો સ્ત્રિયઃ ॥ ૩,૧૭.૨૪॥

સમ્યક્ત્વભર્તૃસંયોગો ભવિષ્યતિ વિના ભવમ્ ।
યતોનયા ચ પાર્વત્યા પ્રેરિતા એવ સર્વશઃ ॥ ૩,૧૭.૨૫॥

વિલાસં દર્શયામાસ બ્રહ્મણઃ પરમેષ્ઠિનઃ ।
અતઃ સા પાર્વાતી શ્રેષ્ઠા બ્રહ્મદેહે ન સંશયઃ ॥ ૩,૧૭.૨૬॥

કૃષ્ણદેહેપિ તસ્યાસ્તુ ન ભવિષ્યતિ સંગમઃ ।
અન્યગાત્વં દ્વિતીયેસ્મિન્ભવિષ્યતિ ન સંશયઃ ॥ ૩,૧૭.૨૭॥

રુદ્રાન્તઃ સ્થો હરિશ્ચૈવ વહં દત્ત્વા સ્ત્રિયાં પ્રભુઃ ।
અન્તર્ધાનં યયૌ શ્રીમાન્સ્વલોકં ગતવાનભૂત્ ॥ ૩,૧૭.૨૮॥

વિસૃજ્ય તાશ્ચ તં દેહં બભૂવુર્નલકન્યકાઃ ।
ઇન્દ્રસેનેતિ સંજ્ઞાં ચ લબ્ધ્વા તાશ્ચ તપોવનમ્ ॥ ૩,૧૭.૨૯॥

યયુસ્તત્ર ચરન્ત્યસ્તા દદૃશુર્મુદ્ગલં ત્વૃષિમ્ ।
તસ્ય દર્શનમાત્રેણ બભૂવુઃ કામમોહિતાઃ ॥ ૩,૧૭.૩૦॥

મુદ્ગલસ્યાભિમાનં હિ નાશયિત્વા ચ મારુતઃ ।
રમયામાસ તત્રસ્થા ભારત્યાદિવરાઙ્ગનાઃ ॥ ૩,૧૭.૩૧॥

તદ્દેહેન વિસૃષ્ટા સા બભૂવ દ્રૌપદીતિ ચ ।
યસ્માત્સા દ્રુપદાજ્જાતા તસ્માત્સા દ્રૌપદી સ્મૃતા ॥ ૩,૧૭.૩૨॥

વેદિમધ્યાત્સમુદ્ભૂતા તસ્માત્સાયોનિજા સ્મૃતા ।
કૃષ્ણવર્ણા યતસ્તસ્માત્સા કૃષ્ણા ભૂતલે સ્મૃતા ॥ ૩,૧૭.૩૩॥

કૃષ્ણાદેહપિ ભારત્યા અભિમાનઃ સદા સ્મૃતઃ ।
શચ્યાદેરભિમાનસ્તુ તસ્મિન્દેહે કદાચન ॥ ૩,૧૭.૩૪॥

યસ્યાઃ સ્વભર્તૃસંયોગકાલે ચ ખગસત્તમ ।
અભિમાનસ્તદૈવ સ્યાત્તસ્યા એવ ન ચાન્યથા ॥ ૩,૧૭.૩૫॥

એતાસાં રમણે કાલે ઉમાયાઃ પક્ષિસત્તમ ।
અભિમાનશ્ચ નાસ્ત્યેવ સ્વાપ એવ રતાઃ સદા ॥ ૩,૧૭.૩૬॥

પાર્થસ્ય રમણે કાલે દ્રૌપદ્યાશ્ચ કલેવરે ।
ભારત્યાશ્ચ તથા શચ્યા અભિમાનદ્વયં સ્મૃતમ્ ॥ ૩,૧૭.૩૭॥

ઉમાદેઃ શ્યામ લાદેશ્ચ અભિમાનક્ષતિસ્તદા ।
સર્વાસાં સ્વાપ એવ સ્યાન્નાત્ર કાર્યા વિચારણા ॥ ૩,૧૭.૩૮॥

અર્જુનં વીરરૂપેણ પ્રવિષ્ટો વાયુરેવ ચ ।
ભારતીં રમતે નિત્યં શામલાં ચ યુધિષ્ઠિરઃ ॥ ૩,૧૭.૩૯॥

સુંદરેણ ચ રૂપેણ પ્રવિષ્ટો નકુલે મરુત્ ।
રમતે ભારતીં નિત્યં નકુલશ્ચાપ્યુષાં ખગ ॥ ૩,૧૭.૪૦॥

નીતિરૂપેણ ચાવિષ્ટો સહદેવે ચ મારુતઃ ।
દ્રૌપદીં રમતે નિત્યં સહદેવોત્પયુષાં ખગ ॥ ૩,૧૭.૪૧॥

શચ્યાદ્યા દ્રૌપદીદેહે નાપુઃ સંગં ચ મારુતઃ ।
તાસામતોન્યગામિત્વં કૃષ્ણાદેહે ન ચિન્તયેત્ ॥ ૩,૧૭.૪૨॥

ધર્માદિદેહસંગં ચ ભારત્યા નૈવ ચિન્તયેત્ ।
મનુજસ્ય ચ દેહસ્ય તાસાં સંગં ચિન્તયેત્ ॥ ૩,૧૭.૪૩॥

અપરોક્ષવતીનાં તુ તાસાં લેપો ન સર્વથા ।
અથવા મુદ્ગલસ્યેવ રતિકાલે ખગેશ્વર ॥ ૩,૧૭.૪૪॥

રમણં ચક્રુરેવં તા અતો દોષો ન વિદ્યતે ।
એકસ્મિન્દિવસે વીન્દ્ર ધર્મો વાયુશ્ચ તાવુભૌ ॥ ૩,૧૭.૪૫॥

રમણં ચક્રતુઃ સમ્યક્કૃષ્ણાદેહેઽપિ માનદ ।

તથાપ્યનન્યાગામિત્વં ચિન્તનીયં ન સંશયઃ ॥ ૩,૧૭.૪૬॥

સુરાણાં સુરભોગ્યાશ્ચ ભોગં જાનન્તિ દેવતાઃ ।
ન જાનન્ત્યેવ મર્ત્યાંસ્તુ તેષુ દેહેષુ તે પુનઃ ॥ ૩,૧૭.૪૭॥

નીરક્ષીરવિવિકં ચ હંસો વેત્તિ ન ચાપરઃ ।
અતઃ સ્વભર્તૃસંયોગં કૃષ્ણાદેહેન ચિન્તયેત્કૃષ્ણાદેહેન્યગામિત્વં
નૈવ ચિન્ત્યં ખગેશ્વર ॥ ૩,૧૭.૪૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
ભારત્યા વિશિષ્ટદેહ સમ્પ્રાપ્ત્યૈ કારણનિરૂપણં નામ સપ્તદશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૮
શ્રીકૃષ્ણ ઉવાચ ।
અથાનન્તરજાન્વક્ષ્યે શ‍ૃણુ પક્ષીન્દ્રસત્તમ ।
શ‍ૃણુ તાન્સાવધાનેન શ્રુત્વા તાનવધારય ॥ ૩,૧૮.૧॥

પુરુષાખ્યવિરિઞ્ચાનુજાતઃ શેષો મહાબલઃ ।
હરે રમાયાશ્ચ યસ્ય સ્વસ્મિન્નિદ્રાં પ્રકુર્વતઃ ॥ ૩,૧૮.૨॥

શયનાર્થમભૂદેષ તેન કૃત્યં હરેર્ન તુ ।
સર્વદા હરિદાસોહં સર્વદા હરિપૂજકઃ ॥ ૩,૧૮.૩॥

હરે સદા નમામિ ત્વાં બહુ જન્મનિ જન્મનિ ।
એવં બુદ્ધ્વા તુ ગરુડો હ્યભૂચ્ચ શયનં હરેઃ ॥ ૩,૧૮.૪॥

સૂત્રનામ્નસ્તથા વાયોઃ સદાયં વિનતાસુત ।
કાલનામા ચ ગરુડો વાહનાર્થં હરેરભૂત્ ॥ ૩,૧૮.૫॥

તતો મહત્તત્ત્વતનોર્વિરિઞ્ચાત્તુ ખગેશ્વર ।
અહં કારાત્મકો રુદ્રઃ સમભૂત્સોવિતું હરિમ્ ॥ ૩,૧૮.૬॥

ત્રય એતે મહાભાગ પરસ્પરસમાઃ સ્મૃતાઃ ।
ગાયત્રીભારતીભ્યાં તે ત્રયઃ શતગુણા વરાઃ ॥ ૩,૧૮.૭॥

શેષઃ સ એવ વિજ્ઞેયો ભક્તો નારાયણસ્ય ચ ।
વિષ્ણોર્વાયોરનન્તસ્ય ત્રિભિરંશૈર્યુતઃ સદા ॥ ૩,૧૮.૮॥

સુમિત્રાંશો દશરથાજ્જાતો યો લક્ષ્મણઃ ખગ ।

સોઽપિ શેષસ્તુ વિજ્ઞેયો વાય્વનન્તાંશસંયુતઃ ॥ ૩,૧૮.૯॥

રામસ્ય સેવાં કર્તું સા સીતા ભૂમ્યાં ખગાધિપ ।
બલભદ્રસ્તુ રોહિણ્યાં વસુદેવાદભૂત્ખગ ॥ ૩,૧૮.૧૦॥

સોયમેપ તુ વિજ્ઞેયસ્ત્વંશદ્વયસમન્વિતઃ ।
આવિષ્ટઃ શુક્લકૃષ્ણે હરિણા રોહિણીસુતઃ ॥ ૩,૧૮.૧૧॥

ત્રય એતે માહાભાગાવતારાઃ ફણિનઃ સ્મૃતાઃ ।
ન વીન્દ્રાસ્યાવતારોસ્તિ ભૂમ્યાં ચાજ્ઞા તથા હરેઃ ॥ ૩,૧૮.૧૨॥

રુદ્રાવતારાન્વક્ષ્યેહં તાઞ્છૃણુ ત્વં સમાહિતઃ ।
યોહઙ્કારાત્મકો રુદ્રઃ સ એવાભૂત્ખગેશ્વર ॥ ૩,૧૮.૧૩॥

સદાશિવ ઇતિ ત્વાખ્યામવાપ સ વિનાશકઃ ।
તમોભિમાની સ જ્ઞેયસ્ત્વશિવત્વાત્સદાશિવઃ ॥ ૩,૧૮.૧૪॥

કપાલમાલામશિવાં સદા ધારયતે યતઃ ।
અતઃ સદાશૈવો જ્ઞેયો ન ચ ભાગવતઃ શિવઃ ॥ ૩,૧૮.૧૫॥

ગજાજિનં ચાપવિત્રં યતો ધારયતે હરઃ ।
લોકાનમઙ્ગલાન્સર્વાન્હરતે ચ સદા હરઃ ॥ ૩,૧૮.૧૬॥

હર્યાજ્ઞયા સદા લોકાન્વિપયાસક્તચેતસઃ ।
વિમુખાન્કુરુતે યસ્માદ્વિષ્ણોસ્તસ્માત્સદાશિવઃ ॥ ૩,૧૮.૧૭॥

કદાચિદસુરાવેશાદ્વિરુદ્ધં કુરુતે હરઃ ।
અતઃ સદાશિવો જ્ઞેયો ન ચ ભાગવતઃ શિવઃ ॥ ૩,૧૮.૧૮॥

સોયં શ્મશાનવસતિં કર્તુમૈચ્છદ્યતો હરઃ ।
અતઃ સદાશિવો જ્ઞેયો ન ચ ભાગવતઃ શિવઃ ॥ ૩,૧૮.૧૯॥

દશવર્ષં તપઃ કર્તું વિવેશ લવણાંભસિ ।
અતો રુદ્રસ્તપઃ સંજ્ઞામવાપ ચ ખગોત્તમ ॥ ૩,૧૮.૨૦॥

વ્યાસપુત્રઃ શુકઃ પ્રોક્તો વાયોરાવેશસંયુતઃ ।
રુદ્રાવતારો વિજ્ઞેયો જ્ઞાનાર્થમભવદ્ભુવિ ॥ ૩,૧૮.૨૧॥

અત્રિપત્ન્યનુસૂયાયાં જજ્ઞે રુદ્રો મહાતપાઃ ।
દુર્વાસાસ્તુ સ વિજ્ઞેયો માનભઙ્ગાય ભૂભૃતામ્ ॥ ૩,૧૮.૨૨॥

દ્રોણાજ્જાતો દ્રૌણિસંજ્ઞો રુદ્ર એવ પ્રકીર્તિતઃ ।
પ્રારબ્ધં ભોક્તુકામોસૌ પરપક્ષપ્રકાશકઃ ॥ ૩,૧૮.૨૩॥

ઈશાનકોણે સંસ્થિતો યસ્તુ રુદ્રો હ્યવાપ વૈ વામદેવેતિ સંજ્ઞામ્ ।
સ્વવામભાગે સંસ્થિતં ચૈવ વાયુસ્તં યોગ્યભક્તં સેવતે સર્વદૈવ ॥ ૩,૧૮.૨૪॥

અતો રુદ્રો વામદેવેતિ સંજ્ઞા મવાપ શિષ્ટત્વમથોત્તમત્વમ્ ।
કાલાત્મકત્વં ચ બલાત્મકત્વમવાપ રુદ્રો ન તુ સુંદરત્વતઃ ॥ ૩,૧૮.૨૫॥

સદા રુદ્રો ત્રિપુરસ્થાંશ્ચ દૈત્યાન્વિષ્ણુદ્રુહો હન્તુ કામો મહાત્મા ।
અઘોરરૂપં ધૃપવાન્રુદ્ર એવ તતસ્ત્વઘોરેતિ સ આપ સંજ્ઞામ્ ॥ ૩,૧૮.૨૬॥

સેવાં કર્તું ત્વિચ્છતો દૈત્યસંઘાન્કિઞ્ચિત્કાલં તપસા ક્લિશ્યમાનાન્ ।
વરાન્દાતું સદ્ય એવાભિજાતઃ સદ્યોજાતેત્યેવ સંજ્ઞામવાપ ॥ ૩,૧૮.૨૭॥

ઉરોઃ પુત્રસ્તુ ઔર્વશ્ચ રુદ્ર એવ પ્રકીર્તિતઃ ।
ઇત્યકૃષ્ટવાચિત્વાદ્રુસ્તુરોદનવાચકઃ ॥ ૩,૧૮.૨૮॥

ઉરૂ રુદ્રો હ્યતઃ પ્રોક્તસ્તત્પુત્રશ્ચૌર્વસંજ્ઞકઃ ।
રુદ્રમુર્વરિતં કર્તુમૌર્વોભૂદ્રુદ્ર એવ સઃ ॥ ૩,૧૮.૨૯॥

ગરુડ ઉવાચ ।
રોદનં કુરુતે કસ્માદુરુસંજ્ઞો હરે હરઃ ।
રુદમુર્વરિતં કસ્માત્કુરુતે ઔર્વાકારકઃ ॥ ૩,૧૮.૩૦॥

એતદ્વિસ્તાર્ય મેબ્રૂહિ પૌત્રાય તવ સુવ્રત ।
ઇત્યુક્તસ્તેન સ હરિરુવાચ કરુણાનિધિઃ ॥ ૩,૧૮.૩૧॥

શ્રીકૃષ્ણ ઉવાચ ।
દૃષ્ટ્વા સ્વબિંબં સુગુણૈસ્તુ પૂર્ણં સંકર્ષણાખ્યં નતપાદપદ્મ્ ।
શ્રીબ્રહ્મશેષૈર્જિષ્ણુકામૈસ્તથાન્યૈર્ભારત્યા વૈ સ્વસ્તિ પૈશ્ચાપિ નિત્યમ્ ॥ ૩,૧૮.૩૨॥

દૃષ્ટ્વા હરિં પુલકાઙ્ગસ્તુ રુદ્રઃ સભાષ્પચક્ષૂ રુદ્ધકણ્ઠશ્ચ હૃષ્ટઃ ।
અનાદ્યનન્તબ્રહ્મકલ્પેષુ નૈવ કૃતં યયા સ્મરણં સર્વદૈવ ॥ ૩,૧૮.૩૩॥

પાદારવિન્દે સુનખૈર્વિભૂષિતે દૃષ્ટે મયા કેન પુણ્યેન દેવ ।
દૃષ્ટ્વાદૃષ્ટ્વા પાદપદ્મં મુરારેઃ પુનઃ પુના રુદ્ધકણ્ઠો બભૂવ ॥ ૩,૧૮.૩૪॥

રુરોદ રુદ્રો ભયકંપિતાઙ્ગઃ કથં પુનર્દર્શનં મે પ્રભોઃ સ્યાત્ ।
મુકુન્દ નારાયણ વિશ્વમૂર્તે વાગિન્દ્રિયેણ સ્તવનં મે કથં સ્યાત્ ॥ ૩,૧૮.૩૫॥

મદ્દર્શનં સર્વદા પાપુયુક્તં તથા મદ્વાક્સર્વદા પાપયુક્તા ।
મદ્દર્શનં સર્વદા સ્ત્રીષુ સક્તમભૂચ્ચ તે દર્શનં મે હ્યસક્તમ્ ॥ ૩,૧૮.૩૬॥

આસક્તતા પુત્રદારાદિકાનાં સમ્યક્ષક્તિસ્તવને નાસ્તિ વિષ્ણોઃ ।
વિષ્ણુસ્તુતૌ નાવકાશોસ્તિ વાચો દૃષ્ટોહં ત્વં કેન પુણ્યેન દેવ ॥ ૩,૧૮.૩૭॥

અનન્તકર્ણેશ સુચન્દ્રસંજ્ઞ શ્રોત્રેણ નિત્યં ન કથા શ્રુતા તે ।
શ્રુતા મયા બહુધા લોકવાર્તા દૃષ્ટો મયા ત્વં કેન પુણ્યેન દેવ ॥ ૩,૧૮.૩૮॥

દૃષ્ટ્વાદૃષ્ટ્વા પાદપીઠં હરેશ્ચ પુનઃ પુના રુદ્ધકુઠો બભૂવ ।
રુરોદ રુદ્રો ભયકંપિતાઙ્ગઃ કથં પુનઃ શ્રવણં સ્યાત્કથાયાઃ ॥ ૩,૧૮.૩૯॥

ત્વમીશ વૈકુણ્ઠ સુવાયુસંજ્ઞસ્ત્વદર્પિતં ગન્ધપુષ્પાદિકં ચ ।
સદા ન લિપ્તં ચ ભુજૈર્વિલિપ્તં તન્મૂત્રવિષ્ઠાદિમકર્દમામ્બુભિઃ ॥ ૩,૧૮.૪૦॥

સ્ત્રીણાં કુચોદૈશ્ચ કચોદકૈશ્ચકક્ષોદકૈર્ગાત્રજલૈર્મુકુન્દ ।
અનર્પિતૈર્વસ્ત્રગન્ધાદિકૈશ્ચ દૃષ્ટો મયા કેન પુણ્યેન દેવ ॥ ૩,૧૮.૪૧॥

સ્પૃષ્ટ્વાસ્પૃષ્ટ્વા હરિનિર્માલ્યગન્ધં પુનઃ પુના રુદ્ધકણ્ઠો બભૂવ ।
રુરોદ રુદ્રો ભયકંપિતાઙ્ગઃ કથં પુનઃ સ્પર્શનં સ્યાત્સદા મે ॥ ૩,૧૮.૪૨॥

નૃસિંહ નાસાસ્થિત નાસિકેશ મન્નાસયા ક્વાપિ સુપદ્મસૌરભમ્ ।
નાઘ્રાતમિત્થં પુનરાઘ્રાતમેવ હ્યનર્પિતં ગન્ધપુષ્પાદિકં ચ ॥ ૩,૧૮.૪૩॥

સુનાસિકં સુષ્ઠુદન્તં મુરારે દૃષ્ટં મુખં કેન પુણ્યેન દેવ ।
ઘ્રાત્વા ઘ્રાત્વા વિષ્ણુનિર્માલ્યગન્ધં પુનઃ પુના રુદ્ધકણ્ઠો બભૂવ ॥ ૩,૧૮.૪૪॥

રુરોદ રુદ્રો ભયકંપિતાઙ્ગો જિઘ્રામિ નિર્માલ્યમિદં કથં તે ।
જિહ્વાસ્થિતો જિહ્વ સંજ્ઞો મુરારે જિહ્વેન્દ્રિયેણાપિ તથાર્પિતં ચ ॥ ૩,૧૮.૪૫॥

નૈવેદ્યશેષં તુલસીવિમિશ્રિતં વિશેષતઃ પાદજલેન સિક્તમ્ ।
યો સ્નાતિ નિત્યં પુરતો મુરારેઃ પ્રાપ્નોતિ યજ્ઞાયુતકોટિપુણ્યમ્ ॥ ૩,૧૮.૪૬॥

એતાદૃશં તવ નૈવેદ્યશેષં ન ભુક્તં વૈ સર્વદાદિત્યરૂપમ્ ।
અનર્પિતં તવ દેવસ્ય વિષ્ણોર્ભુક્તં મયા બહુવારં મુકુન્દ ॥ ૩,૧૮.૪૭॥

પાદારવિન્દે નાર્પિતં ભક્ષ્યભોજ્યં દૃષ્ટો મયા કેન પુણ્યેન દેવ ।
ભુક્ત્વાભુક્ત્વા હરિનૈરવેદ્યજાતં સુખં ત્વદીયં રમયા લાલિતં ચ ॥ ૩,૧૮.૪૮॥

ધુભ્વાશ્રયં તવ મૂર્ધાનમાહુઃ કિરીટયુક્તં કુટિલૈઃ કુન્તલૈશ્ચ ।
અનેકજન્માર્જિતપુણ્યસંચયૈર્દૃષ્ટં મયા સજ્જનસંગમાચ્ચ ॥ ૩,૧૮.૪૯॥

અનેકજન્માર્જિતપાપસંચયૈરદર્શનં યાસ્યતિ દેવદેવ ।
એવં સુભક્ત્યા ચ રુરોદ રુદ્રો દૃષ્ટ્વા હરિં સુર્વગુણૈઃ સમ્પૂર્ણમ્ ॥ ૩,૧૮.૫૦॥

પાદારવિન્દં તવ વિશ્વમૂર્તે યોગીશ્વરૈર્હૃદયે સંગૃહીતમ્ ।
દૃષ્ટં મયા દયયા વાસુદેવ દ્રક્ષ્યે કથં પુનરિત્થં રુરોદ ॥ ૩,૧૮.૫૧॥

દૃષ્ટં મયા ત્વરિવલે ભવિનાશિશઙ્ખચક્રાદિકૈસ્ત્રિજગતાપિ ચ દેવ પૂર્ણમ્ ।
એતાદૃશં ત્વદુદરં ચ કથં રમેશ દ્રક્ષ્યે પુનઃ પુનરહં ત્વિતિ સંરુરોદ ॥ ૩,૧૮.૫૨॥

આનન્દપૂર્ણ નખપૂર્ણ સુકેશપૂર્ણ લોમાદિપૂર્ણ ગુણપૂર્ણ સુઘોણપૂર્ણ ।
વક્ષઃ સ્થલં તવ વિભોસ્તુ વિશાલભૂતં સદ્ભૂષણં વિમલકૌસ્તુભશોભિ લક્ષ્મ્યા ॥ ૩,૧૮.૫૩॥

સુકોમલં શ્રીતુલસ્યાસ્તથૈવ સુપુષ્પિતં ચન્દ નૈશ્ચર્ચિતં ચ ।
એતાદૃશં તવ વક્ષઃ સ્થલં ચ દૃષ્ટં મયા તવ કારુણ્યદૃષ્ટ્યા ॥ ૩,૧૮.૫૪॥

પુનઃ પુનર્દર્શનં મે કથં સ્યાદેવં રુદ્રઃ સ ચ ભક્ત્યા રુરોદ ।
અતસ્તૂરુર્નામ સમ્પ્રાપ્ય રુદ્રસ્તત્પુત્રોભૂદ્ધૌર્વસંજ્ઞઃ સ એવ ॥ ૩,૧૮.૫૫॥

યસ્માદ્રુદં ચોર્વરિતં વૈ ચકાર તસ્માત્સ રુદ્રસ્ત્વૌર્વસંજ્ઞો બભૂવ ।
ઔર્વસ્તુ લોકાન્મોક્ષયોગ્યાંશ્ચ દૃષ્ટ્વા હ્યત્યન્તં વૈ વિષયેષ્વેવ નિષ્ઠાન્ ॥ ૩,૧૮.૫૬॥

સ્તૂદ્વૈવ ચૌર્વો વિષ્ણુપાદારવિદં સ્મૃત્વાસ્મૃત્વા રુદ્ધકણ્ઠો બભૂવ ।
તે પાપિષ્ઠાઃ પાપરૂપાન્ભજન્તો દિનેદિને દુર્વિષયાન્કદિન્દ્રિયૈઃ ॥ ૩,૧૮.૫૭॥

કદા ચૈતાન્હેયબુદ્ધ્યા વિમુઞ્ચે ન જાનેહં ચેતિ સમ્યગ્રુરોદ ।
એતે હિ મૂર્ખા વિષયાનર્થલબ્ધ્યૈ કુર્વન્તિ યત્નં પરમાદરેણ ॥ ૩,૧૮.૫૮॥

કદિન્દ્રિયાર્થં હિ ધનાદિકં ચ ત્યજન્તિ ચ સર્વે વિષયેષુ નિષ્ઠાઃ ।
ત્વન્માયયા મોહિતાન્નષ્ટબુદ્ધીન્કદા ચૈતાન્મુઞ્ચસે વિશ્વમૂર્તે ॥ ૩,૧૮.૫૯॥

સ્મૃત્વાસ્મૃત્વા વાસુદેવસ્ય માયાં રુરોદ ચૌર્વો ભયકંપિતાઙ્ગઃ ।
અતીવ કષ્ટેન ચ લોકવૃત્ત્યા શ્રિતા દૈન્યં સ્વીયકાર્યં વિહાય ॥ ૩,૧૮.૬૦॥

અતીવ દૈન્યેન ધનાદિકં ચ સમ્પાદ્ય સર્વેઽપિ સુપાપશીલાઃ ।
કષ્ટાર્જિતં દ્રવ્યધનાદિકં ચ ત્યજન્તિ સર્વે પશવો વ્યર્થમેવ ॥ ૩,૧૮.૬૧॥

સત્પાત્રભૂતે વિષ્ણુબુદ્ધ્યા કદાપિ ત્યજન્તિ નૈતે માયયા વૈ મુરારેઃ ।
એષામાયુર્વ્યર્થમાહુર્મહાન્તઃ કથં નષ્ટા ઇતિ સમ્યગ્રુરોદ ॥ ૩,૧૮.૬૨॥

એષામાયુર્વ્યર્થમેવં ગતં ચ એષાં દૃષ્ટ્વા યૌવનં તુ ધ્રુવં ચ ।

સ્કન્ધસ્થમૃત્યુર્હસતે કૃષ્ણ વિષ્ણો તં વૈ ન જાનન્તિ વિમૂઢચેતસઃ ॥ ૩,૧૮.૬૩॥

ગૃહં મદીયં શતવર્ષં ચ જીવેત્પુત્રા મદીયા શવતવર્ષં તથૈવ ।
અહં ચ જીવે શતવર્ષં સુખેન મદીયભાર્યાપિ સુલક્ષણાઽસ્તે ॥ ૩,૧૮.૬૪॥

ગાવશ્ચ મે સંતિ સદુગ્ધપૂર્ણા મિત્રાણિ મે સંતિ મુદા હિ યુક્તાઃ ।
દાસ્યે સુતં વારણાર્થં તુ વધ્વૈ પુત્રીં વિવાહાર્થમહં દદામિ ॥ ૩,૧૮.૬૫॥

દાસ્યે ચાહં સત્સુ પુત્રીં ધનં વા દાસ્યે ચાહં ધનિકેષ્વેવ નિત્યમ્ ।
અદૃષ્ટશૂન્યાન્ભગવાન્વાસુદેવો દૃષ્ટ્વાદૃષ્ટ્વા હસતે સર્વદૈવ ॥ ૩,૧૮.૬૬॥

નાહં કરિષ્યે શ્રવણં કથાયા મદ્ભાગ્યના શશ્ચ ભવિષ્યતીતિ ।
નાહં હરિં પૂજયિષ્યે સદૈવ પુત્રાદિનાશશ્ચ ભવિષ્યતીતિ ॥ ૩,૧૮.૬૭॥

કાલેકાલે દિષ્ટનામા હરિસ્તુ ફલપ્રદો વાસુદેવોઽખિલસ્ય ।
એતાદૃશાન્મૂર્ખજનાંશ્ચ દૃષ્ટ્વા રુરોદ ચૌર્વો વાસુદેવૈકનિષ્ઠઃ ॥ ૩,૧૮.૬૮॥

અતસ્ત્વૌર્વો રુદ્રરૂપી ખગેન્દ્ર જાનીહિ નિત્યં કૃષ્ણસુશિક્ષિતાર્થઃ ।
યદા સતી દક્ષપુત્રી ખગેન્દ્ર દક્ષાધ્વરે સ્વશરીરં વિસૃજ્ય ॥ ૩,૧૮.૬૯॥

જજ્ઞે પુનર્મેનકાયાં હિમાદ્રેસ્તદા રુદ્રસ્ત્વૌર્વસંજ્ઞા મવાપ ।
ઊર્ધ્વરેતા ભવેત્યુક્ત્વા ઊર્ધ્વરેતા બભૂવ હ ॥ ૩,૧૮.૭૦॥

પાણિગ્રાહં રુદ્રદેવો મહાત્મા યદા હિમાદ્રેઃ કન્યકાયાશ્ચકાર ।
તસ્યાં પરં લંપટઃ સંબભૂવ અતો રુદ્રઃ પરસંજ્ઞામવાપ ॥ ૩,૧૮.૭૧॥

સદાશિવાદ્યા દશ રુદ્રભ્રાતરઃ સૌમિત્રેયો હૌહિણેયસ્ત્રયશ્ચ ।
સમા એતે મોક્ષકાલે સૃતૌ ચ શતૈર્ગુણૈર્ન્યૂનભૂતાશ્ચ તાભ્યામ્ ॥ ૩,૧૮.૭૨॥

ગરુડ ઉવાચ ।
આનન્દનિર્ણયં બ્રૂહિ કૃષ્ણ પૂર્ણદયાનિધે ।
નિર્ણેતું જ્ઞાનિનાં યદ્વજ્જ્ઞાપનાર્થં તથા મમ ॥ ૩,૧૮.૭૩॥

બ્રૂહિ શિષ્યાય દયયા ઉદ્ધર્તું માં ચ સર્વદા ।
પૂર્ણકામસ્ય તે કૃષ્ણ કા સ્પૃહા વિદ્યતે પ્રભો ॥ ૩,૧૮.૭૪॥

એવમુક્તો હૃષીકેશઃ પક્ષીશેન મહાત્મના ।
ઉવાચ કૃપયા કૃષ્ણઃ પ્રસન્નઃ કમલેક્ષણઃ ॥ ૩,૧૮.૭૫॥

શ્રીકૃષ્ણ ઉવાચ ।
ગાયત્ર્યાશ્ચ શતાનન્દ એકાનન્દસ્તુ વેધસઃ એતાદૃશઃ શતાનન્દો બ્રહ્મણઃ પરિકીર્તિતઃ ॥ ૩,૧૮.૭૬॥

શેષાદેશ્च શતાનન્દઃ સરસ્વત્યાઃ ખગોત્તમ ।
એકાનન્દસ્તુ વિજ્ઞેયો ભારત્યા વિનતાસુત ॥ ૩,૧૮.૭૭॥

એવં તુ નિર્ણયો જ્ઞેય આનન્દસ્ય સદા ખગ ।
એવમુક્તં મયા સર્વં કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૩,૧૮.૭૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
રુદ્રરોદનહેત્વાનનન્તાનન્દતારતમ્યનિરૂપણં નામાષ્ટાદશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૧૯
ગરુડ ઉવાચ ।
ત્વયોક્તં કૃષ્ણ ગોવિન્દ રુદ્રાચ્છતગુણાદપિ ।
બ્રહ્માણી ભારતી ચોભે અધિકે દેવસત્તમ ॥ ૩,૧૯.૧॥

મયા શ્રુતં વિરિઞ્ચેન ઉમાપર્યન્તમેવ ચ ।
અનન્તાંશૈર્વિહીનત્વં વિરિઞ્ચોક્તં સુરાધિપ ॥ ૩,૧૯.૨॥

સહસ્રાંશૈર્વિહીનત્વં ત્વયોક્તં કૃષ્ણ માધવ ।
સર્વેષાં ચૈવ પૂર્વેષામવેક્ષ્યૈવ હરે વિભો ॥ ૩,૧૯.૩॥

જ્ઞાનાનન્દબલાદીનાં વાયુપર્યન્તમેવ ચ ।
સહસ્રાંશૈર્વિહીનત્વં જ્ઞાનાદીનાં મહેશ્વર ॥ ૩,૧૯.૪॥

નિર્ણયં બ્રૂહિ ગોવિન્દ સર્વજ્ઞોઽસિ ન સંશયઃ ।
ગરુડેનૈવમુક્તસ્તુ વાસુદેવોબ્રવીદ્ધ્રુવમ્ ॥ ૩,૧૯.૫॥

શ્રીકૃષ્ણ ઉવાચ ।
આનન્દાંશૈર્વિહીનત્વમપેક્ષ્યૈવ ખગાધિપ ।
ઉત્તરેષામુત્તરેષાં યોગાદેવમિતિ સ્ફુટમ્ ॥ ૩,૧૯.૬॥

પરિમાણે શતગુણે આનન્દે સ્ફુટતાવશાત્ ।
અનન્તગુણવત્ત્વં ચ બ્રહ્મણા સમુદીરિતમ્ ॥ ૩,૧૯.૭॥

સહસ્રગુણિતત્વં ચ વાયુના સમુદીરિતમ્ ।
યથાનન્દે તથા જ્ઞાને વિષ્ણૌ ભક્તૌ બલાધિકે ॥ ૩,૧૯.૮॥

સર્વે ગુણૈઃ શતગુણાઃ ક્રમેણોક્તા નુ તેઽખિલાઃ ।

ભારત્યાશ્ચ શતં જ્ઞાનં સુખં ભક્તિબલાધિકે ॥ ૩,૧૯.૯॥

એવં જ્ઞાનં સુવિજ્ઞેયં મારુતેસ્તુ બલાદિકમ્ ।
એવં જ્ઞાનં શતં જ્ઞેયં મારુતે નાત્ર સંશયઃ ॥ ૩,૧૯.૧૦॥

ભારત્યાશ્ચ શતં જ્ઞાનં બલં ચ સમુદાહૃતમ્ ।
એવમેવ ચ વાયોશ્ચ જ્ઞાનં ચૈવમિતિ સ્ફુટમ્ ॥ ૩,૧૯.૧૧॥

યથા દીપાચ્છતગુણા અગ્નિજ્વાલા ન દીપવત્ ।
સ્ફુટીભવેદ્યથૈવાગ્નિર્બહુલોઽપિ ન સૂર્યવત્ ॥ ૩,૧૯.૧૨॥

યથૈવ સૂર્યાદ્દ્વિગુણશ્ચન્દ્રો નૈવ સ્ફુટીભવેત્ ।
આનન્દતારતમ્યં ચ યથોક્તં તુ મયા તવ ॥ ૩,૧૯.૧૩॥

તથૈવ જાનીહિ ખગ નાન્યથા તુ કથઞ્ચન ।
અહં વિજાનામિ મયિ સ્થિતાન્ગુણાન્સર્વૈર્વિશેષૈશ્ચ ખગેન્દ્ર સંયુતાન્ ॥ ૩,૧૯.૧૪॥

સુસૂક્ષ્મરૂપાંશ્ચ સદા ખગેન્દ્ર મયાપ્યદૃષ્ટો નાસ્તિ નાસ્ત્યેવ કશ્ચિત્ ॥ ૩,૧૯.૧૫॥

સર્વાવતારેષ્વપિ વિદ્યમાનં હરિં વિજાનાતિ રમાપિ દેવી ॥ ૩,૧૯.૧૬॥

હરેર્ગુણાન્સર્વવિશેષસંયુતાનખણ્ડરૂપાન્સા વિજાનાતિ દેવી ।
સુસૂક્ષ્મરૂપાન્સા વિજાનાતિ દેવી બ્રહ્માદિભ્યો મત્પ્રસાદાધિકં ચ ॥ ૩,૧૯.૧૭॥

સ્વાત્મસ્વરૂપં પ્રવિજાનાતિ દેવી સુસૂક્ષ્મરૂપં સુવિશેષૈશ્ચ યુક્તમ્ ।
સ્વાન્યં પ્રપઞ્ચં પ્રવિજાનાતિ લક્ષ્મીસ્તથાપ્યશેષૈઃ સુવિશેષૈશ્ચ યુક્તમ્ ॥ ૩,૧૯.૧૮॥

બ્રહ્માપિ પશ્યેત્સર્વગં વાસુદેવં વાય્વાદિભ્યો હ્યધિકાન્સદ્ગુણાંશ્ચ ।
શ્રોત્રં ન જાનાતિ હરેર્ગુણાંશ્ચ સુસૂક્ષ્મરૂપાંશ્ચ વિશેષસંયુતાન્ ॥ ૩,૧૯.૧૯॥

સ્પષ્ટસ્વરૂપેણ યથા વિદુઃ સુરા મુક્ત્વા બ્રહ્માણં ન તથા તેપ્યમુક્તાઃ ।
સ્વાત્માનમન્યચ્ચ સદા વિશેષર્યુક્તં વિજાનાતિ વિધિશ્ચ મારુતઃ ॥ ૩,૧૯.૨૦॥

વાણી વિજાનાતિ હરેર્ગુણાંશ્ચ સ્વયંભુવો નૈવ તાવદ્વિશેષાન્ ।
ત્રૈગુણ્યરૂપાત્પરતઃ સદૈવ પશ્યેદ્વિષ્ણું કૃષ્ણરૂપં ખગેન્દ્ર ॥ ૩,૧૯.૨૧॥

શેષો રુદ્રો વીન્દ્ર એતૈશ્ચ સર્વે તમો માત્રે પ્રવિજાનન્તિ સંસ્થમ્ ।
વાણીદૃષ્ટાન્સવિશેષાન્ગુણાંસ્તે જાનન્તિ નો સત્યમેવોક્તમઙ્ગ ॥ ૩,૧૯.૨૨॥

ઉમા સુપર્ણા વારુણી ચેતિ તિસ્રઃ સહૈવ તઃ પ્રવિજાનન્તિ સુસ્થમ્ ।
હરેર્વિશેષાનરુદ્ર દૃષ્ટાન્ખગેન્દ્ર જાનન્તિ નૈતાઃ ક્વાપિ દેશે ચ કાલે ॥ ૩,૧૯.૨૩॥

ઇન્દ્રાદયઃ પ્રવિજાનન્તિ વીન્દ્ર અહઙ્કારે વ્યાપ્તરૂપં હરિં ચ ।
દક્ષાદ્યા વૈ બુદ્ધિતત્ત્વે સ્થિતં તં જાનન્તિ તે સોમસૂર્યાદયશ્ચ ॥ ૩,૧૯.૨૪॥

વિષ્ણું હરિં ભૂતતત્ત્વે સ્થિતં ચ યે ચાન્યે ચ પ્રવિજાનન્તિ નિત્યમ્ ।
અન્યે ચ પશ્યન્તિ યથા સ્વયોગ્યમણ્ડાન્તરસ્થં હરિરૂપં ખગેન્દ્ર ॥ ૩,૧૯.૨૫॥

કેચિત્પ્રપશ્યન્તિ હરેશ્ચ રૂપં ત્વદીયહૃત્સ્થં હૃદિ કેચિત્સદૈવ ।
એવંપ્રકારં પ્રવિજાનીહિ વીન્દ્ર હ્યથો શ઼ૃણુ ત્વમમ ભાર્યાઃ ષડેતાઃ ॥ ૩,૧૯.૨૬॥

રુક્મિણ્યાદ્યાઃ ષણ્મહિષ્યો મમશ્રીર્નીલા ચ યા મમ ભાર્યા ખગેન્દ્ર ।
સર્ગે પૂર્વસ્મિન્હવ્યવાહસ્ય પુત્રી તાસ્તા ભજે સદ્ય એવા વિશેષાત્ ॥ ૩,૧૯.૨૭॥

કન્યૈવ સા કૃષ્ણપત્ની ચ કામાંસ્તાંસ્તાન્ભજેન્મનસા ચિન્તિતાંશ્ચ ।
અતીવ યત્નં કવ્યવાહં ખગેન્દ્ર પિતૃષ્વેકઃ સર્વદા વૈ ચકાર ॥ ૩,૧૯.૨૮॥

તથૈવ સા નૈવ ભર્તારમાપ યતસ્તુ સા કૃષ્ણનિષ્ઠૈકચિત્તા ॥ ૩,૧૯.૨૯॥

તદાબ્રવીત્કવ્યવાહશ્ચ પુત્રરિં પતિં કિમર્થં નેચ્છસિ મૂઢબુદ્ધે ।
તદાબ્રવીત્કવ્યવાહં ચ પુત્રી હરિં વિના સર્વગુણોપપન્ને ।
જન્મન્યસ્મિન્ભર્તૃતા નાસ્તિ દેવ યતો ભર્તા હરિરેવૈક એવ ॥ ૩,૧૯.૩૦॥

યતો લોકે સુસ્ત્રિયઃ સર્વ એવ સંદા જ્ઞેયા વિધવાસ્તે હિ નિત્યમ્ ।
અનાદિ નિત્યં ભુવનૈકસારં સુસુંદરં મોક્ષદં કામદં ચ ॥ ૩,૧૯.૩૧॥

એતાદૃશં ન વિજાનન્તિ યાસ્તુ સર્વાસ્તા વૈ વિધવાઃ સર્વદૈવ ।
નિમિત્તભૂતં ભર્તૃરૂપં ચ જીવં દૈવોપેતં હરિભક્ત્યા વિહીનમ્ ॥ ૩,૧૯.૩૨॥

સુકશ્મલં નવરન્ધ્રૈઃ સ્ત્રવન્તં દુર્ગન્ધયુક્તં સર્વદા કુત્સિતં ચ ।
એતાઃ દૃશે ભર્તૃજીવે નુ તાત પ્રયોજનં નાસ્તિ કૃષ્ણં વિહાય ॥ ૩,૧૯.૩૩॥

દેવસ્ત્રિયો નિજભર્તૃન્વિહાયુ તત્ર સ્થિતં પ્રીણયન્ત્યેવ નિત્યમ્ ।
અતશ્ચ તાઃ સધવાઃ સર્વદૈવ લોકૈર્વન્દ્યા નાત્ર વિચાર્યમસ્તિ ॥ ૩,૧૯.૩૪॥

ભર્તાસ્તે હરિભક્તા યદિ સ્યુરાસાં સ્ત્રીણાં જન્મસાફલ્યમેવ ।
અનેકજન્માર્જિતપુણ્યસંચયૈસ્તદ્ભર્તારો હરિભક્તા ભવેયુઃ ॥ ૩,૧૯.૩૫॥

યદ્ભર્તારો હરિભક્તા ન સંતિ તાભિસ્ત્યાજ્યં સ્વીયગાત્રં ભૃશં હિ ।
સ્વભર્તૃતં કૃષ્ણરૂપં હરિં ચ સ્મૃત્વા સમ્યગ્યદિ ગાત્રં ત્યજેયુઃ ॥ ૩,૧૯.૩૬॥

તદા નૈવ હ્યાત્મહત્યાદિદોષાઃ સ્ત્રીણામેવં નિર્ણયોયં હિ શાસ્ત્રે ।
યદ્ભર્તારો ન વિજાનન્તિ વિષ્ણું તાસાં સંગો નૈવ કાર્યઃ કદાપિ ॥ ૩,૧૯.૩૭॥

અનેક જન્માર્જિતપુણ્યસંચયાત્તદ્ભર્તારો વિષ્ણુભક્તા ભવેયુઃ ।
કલૌ યુગે દુર્લભા વિષ્ણુભક્તા હરેભક્તિર્દુર્લભા સર્વદૈવ ॥ ૩,૧૯.૩૮॥

હરેઃ કથા દુર્લભા મર્ત્યલોકે હરેર્દીક્ષા દુર્લભા દુર્લભા ચ ।
હરેસ્તત્ત્વે નિર્ણયો દુર્લભો હિ હરેર્દાસૈઃ સંગમો દુર્લભશ્ચ ॥ ૩,૧૯.૩૯॥

પ્રદક્ષિણં દુર્લભં વૈ મુરારેર્નમસ્કારો દુર્લભો વૈ કલૌ ચ ।
તદ્ભક્તાનાં પાલનં દુર્લભં ચ સદ્વૈષ્ણવાનાં દુર્લભં હ્યન્નદાનમ્ ॥ ૩,૧૯.૪૦॥

તન્ત્રોક્તપૂજા દુર્લભા વૈ મુરારેર્નામગ્રહો દુર્લભશ્ચવ વિષ્ણોઃ ।
સુવૈષ્ણવાનાં પુજનં દુર્લભં હિ સદ્વૈષ્ણવાનાં ભાષણં દુર્લભં ચ ॥ ૩,૧૯.૪૧॥

શાલગ્રામસ્પર્શનં દુર્લભં ચ સદ્વૈષ્ણવાનાં દર્શનં દુર્લભં હિ ।
ગોસ્પર્શનં દુર્લભં મર્ત્યલોકે સદ્વાયનં દુર્લભં સદ્ગુરુગ્ચ ॥ ૩,૧૯.૪૨॥

સદ્ભાર્યાઃ સત્પુત્રકા દુર્લભા હિ શેષાચલસ્થસ્ય હરેશ્ચ દર્શનમ્ ।
સુદુર્લભં રઙ્ગનાથસ્ય તીરે કાવેર્યા વૈ દર્શનં વિષ્ણુપદ્યાઃ ॥ ૩,૧૯.૪૩॥

કાઞ્ચીક્ષેત્રે વરદરાજસ્ય સેવા સુદુર્લભા દર્શનં ચૈવ લોકે ।
સુદુર્લભં દર્શનં રામસેતોઃ સુદુર્લભા મધ્વશાસ્ત્રે ચ શક્તિઃ ॥ ૩,૧૯.૪૪॥

ભીમાતીરે સંસ્થિતસ્યાપિ વિષ્ણોઃ સુદુર્લભં દર્શનં ચાહુરાર્યાઃ ।
રેવાતીરે સંસ્થિતસ્યાપિ વિષ્ણોર્ગયાક્ષેત્રે વિષ્ણુપાદસ્ય ચૈવ ॥ ૩,૧૯.૪૫॥

તથા બદ્રૌ સંસ્થિત સ્યાપિ વિષ્ણોઃ સુદુર્લભં મર્ત્યલોકે સ્થિતાનામ્ ।
શેષાચલે શ્રીનિવાસાશ્રમે ચ તપસ્વિનો દુર્લભા મર્ત્યલોકે ॥ ૩,૧૯.૪૬॥

પ્રયાગાખ્યે માધવસ્યાપિ નિત્યં સુદર્શનં દુર્લભં વૈ નૃણાં હિ ॥ ૩,૧૯.૪૭॥

અતો નેચ્છામિ ભર્તારં કૃષ્ણાદન્યં કદાચન ।
એવમુક્ત્વા સા પિતરં યયૌ શેષાચલં પ્રતિ ॥ ૩,૧૯.૪૮॥

કપિલાખ્યમહાતીર્થે આરુરોહ મહાગિરિમ્ ।
તત્રસ્થં શ્રીનિવાસં ચ દૃષ્ટ્વા નત્વા મહાસતી ॥ ૩,૧૯.૪૯॥

ત્રિદિનં સમુપોષ્યાથ ગત્વા પાપવિનાશનમ્ ।
તત્રસ્નાત્વા વિવાહાર્થમેકાન્તં પ્રયયાવથ ॥ ૩,૧૯.૫૦॥

તસ્યા ઉત્તરદિગ્ભાગે ક્રોશયુગ્મે મહાતલે ।
ગર્તભૂતે ચ એકાન્તે ચચાર તપ ઉત્તમમ્ ॥ ૩,૧૯.૫૧॥

ધ્યાત્વા નારાયણં દેવં તત્રાસીચ્ચ કુમારિકા ।
દિવ્યવર્ષસહસ્રાન્તે સ્તોતું સમુપચક્રમે ॥ ૩,૧૯.૫૨॥

કુમાર્યુવાચ ।
ત્વમેવ માતા ચ પિતા ત્વમેવ ભર્તા ચ સખાત્વમેવ ।
ત્વમેવ પુત્રશ્ચ ગુરુર્ગરીયાન્મિત્રં સ્વસા ત્વં મમ વલ્લભશ્ચ ॥ ૩,૧૯.૫૩॥

અનાદ્યનન્તેષ્વપિ જન્મસુ પ્રભો વિચાર્યમાણા ન વિજાનેપ્યહં ચ ।
એતૈ હિ સર્વે ચ નિમિત્તમાત્રતઃ પિત્રાદયસ્ત્વં હ્યનિમિત્તમાત્રતઃ ॥ ૩,૧૯.૫૪॥

અતો મુરારેશ્ચ તવૈવ ભાર્યા ભૂયાસમિત્યેવ તદા વ્રતં મે ।
દુઃસંગમાત્રાદિસમાગમં ન સંસિદ્ધિરિત્યેવ વદાન્યમૂર્તે ॥ ૩,૧૯.૫૫॥

ત્વદ્દૂષકાણાં તવ દાસવર્ય વિદૂષકાણાં દર્શનં છિન્ધિ દેવ ।
ગુરુદ્રુહાં દર્શનં છિન્ધિ વિષ્ણો ભક્તદ્રુહાં મિત્રતાં છિન્ધિ કૃષ્ણ ॥ ૩,૧૯.૫૬॥

તવ ધ્રુગ્ભિર્ભાષણં છિન્ધિ દેવ ત્વં સંગમં દેહિ પદારવિન્દે ।
શ્રીશૈલવાસાય નમોનમસ્તે નમોનમઃ શ્રીનિવાસાય તુભ્યમ્ ॥ ૩,૧૯.૫૭॥

સ્વામિન્પરાવર રમેશ નિદાનમૂર્તે કાલો મહાનપિ ગતશ્ચ નિદર્શનન્તે ।
અનન્તજન્માર્જિતસાધનૈશ્ચ ત્વદ્દર્શનં સ્યાચ્ચ ચતુર્ભુજસ્ય ॥ ૩,૧૯.૫૮॥

કથં મમ સ્યાત્તવ દર્શનં પ્રભો સર્વૈશ્ચ દોષૈશ્ચ સુસંગતાયાઃ ।
દાસ્યાસ્પદાયાસ્તવ દાસદાસ્યાઃ પ્રસીદ દેવેશ જગન્નિવાસ ॥ ૩,૧૯.૫૯॥

એવં સ્તુતસ્તથા વિષ્ણુઃ શ્રીનિવાસો દયાનિધિઃ ।
પ્રાદુરાસીદ્વરદરાટ્ભક્ત્યા તસ્યા જનાર્દનઃ ॥ ૩,૧૯.૬૦॥

વરં વરય ભદ્રં તે વરદોહમિહાગતઃ ।
હરિણોદીરિતં વાક્યં શ્રુત્વા પ્રાહ સ્મિતાનના ॥ ૩,૧૯.૬૧॥

ઉવાચ પરયા ભક્ત્યા શ્રીનિવાસં જગત્પ્રભુમ્ ।
અહં હિ ભાર્યા ભૂયાસં તવ માધવ સુંદર ॥ ૩,૧૯.૬૨॥

ઇતિ તસ્યા વચઃ શ્રુત્વા શ્રીનિવાસોઽબ્રવીદ્વચઃ ।
શ્રીભગવાનુવાચ ।
અહં કુમારિ સુભગે કૃષ્ણજન્મનિ ભૂતલે ॥ ૩,૧૯.૬૩॥

ભવામિ તવ ભર્તાહં નાત્ર કાર્યા વિચારણા ।

એવમુક્તા સુતા કન્યા પુરણ્યરાશિં હરિં પરમ્ ॥ ૩,૧૯.૬૪॥

ઉવાચ પરમપ્રીતા હર્ષગદ્ગદયા ગિરા ।
કન્યોવાચ ।
કૃષ્ણજન્મન્યહં પત્ની ભૂયાસં પ્રથમેહનિ ॥ ૩,૧૯.૬૫॥

સંસ્કારાત્પ્રથમં ચાહમં ગનાભ્યઃ સમાવૃણે ।
ઓમિત્યુક્તઃ પુનર્વાક્યમુવાચ મધુસૂદનઃ ॥ ૩,૧૯.૬૬॥

શ્રીભગવાનુવાચ ।
કુમાર્યા વિધૃતત્વાચ્ચ મત્પ્રદાનાચ્ચ ભામિનિ ।
તેષાં મનોભીષ્ટસિદ્ધિર્ભવિષ્યતિ ન સંશયઃ ॥ ૩,૧૯.૬૭॥

ઇતિ તસ્યૈ વરં દત્ત્વા તત્રૈવાન્તરધીયત ।
દેહં તત્રૈવ સંત્યજ્ય કુમારી ચૈવ પુત્રિકા ॥ ૩,૧૯.૬૮॥

કુમ્ભ કસ્ય ગૃહે જાતા નીલા નામ્ના તુ સા સ્મૃતા ।
કુંભકસ્તુ મહાભાગ નન્દશોભસ્ય શાલકઃ ॥ ૩,૧૯.૬૯॥

કલ્પવાહઃ સ વિજ્ઞેયઃ પિતૃણાં પ્રથમઃ સ્મૃતઃ ।
તસ્ય ગત્વા ગૃહમહં વૃષભાચલવાસિનઃ ।
શિવસ્ય વરતશ્ચૈવ ત્વજેયઃ ખગસત્તમ ॥ ૩,૧૯.૭૦॥

દિતિજાન્વિનિહત્યૈવ નીલા પ્રાપ્તા ખગેશ્વર ।
તતો નાગ્નિજિતો રાજ્ઞો ગૃહે જાતા કુમારિકા ॥ ૩,૧૯.૭૧॥

નાગ્નિજિત્કવ્યવાહોભૂત્કન્યા નીલાહ્વયાભવત્ ।
તસ્યાઃ સ્વયંવરે ચાહં ગોવૃષાન્સપ્તસંખ્યકાન્ ॥ ૩,૧૯.૭૨॥

શિવસ્ય વરતશ્ચૈવાપ્યવધ્યાન્દેવમાનુષૈઃ ।
બદ્ધ્વા વૃષાન્નૃપાઞ્જિત્વા પ્રાપ્તા નીલા મહાખગ ॥ ૩,૧૯.૭૩॥

કુંભકસ્ય સુતા નીલા દેહસ્થાઃ પ્રાવિશન્ભૃશમ્ ।
એકાવયવતો યસ્માત્તસ્માત્તત્રૈવ સાવિશત્ ॥ ૩,૧૯.૭૪॥

ભૂમૌ દ્વિધા સમ્પ્રજાતા કુમાર્યેવ ન સંશયઃ ।
ભદ્રાજન્મ પ્રવક્ષ્યામિ શ ૃણુ પક્ષીન્દ્રસત્તમ ॥ ૩,૧૯.૭૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
નીલાવિવાહનિર્ણયો નામૈકોનવિંશોઽધ્યાયઃ

શ્રીગરુડમહાપુરાણમ્- ૨૦

શ્રીકૃષ્ણ ઉવાચ ।

યા પૂર્વસર્ગે નલસંજ્ઞસ્ય વીન્દ્ર પુત્રી ભૂત્વા વિષ્ણુપત્ની સકામા ।

પ્રદક્ષિણં ભ્રમણં વૈ ચકાર ગુણેન ભદ્રા ભદ્રસંજ્ઞા બભૂવ ॥ ૩,૨૦.૧॥

કન્યાભાવે સંસ્થિતાં ભદ્રસંજ્ઞાં પિતા નલસ્ત્વબ્રવીત્તાં સ પશ્યન્ ।

ભદ્રે કિમર્થં ગાત્રપીડાં કરોષિ ફલં હિ તન્નન્દિનિ મે વદસ્વ ॥ ૩,૨૦.૨॥

ભદ્રોવાચ ।

શ઼ૃણુત્વં મે તાત નમસ્ક્રિયાદેઃ ફલં વક્તું કા સમર્થા ભવેચ્ચ ॥ ૩,૨૦.૩॥

તથાપ્યહં તવ વક્ષ્યામિ તાત યથાશક્ત્યા શ઼ૃણુ સમ્યગ્ઘિતાય ।

સદા હરિમર્મ નાથો દયાલુરહં હરેસ્તવ દાસાનુદાસી ।

માં પાહિ વિષ્ણોસ્તવ વન્દે પદે ઇત્યુક્ત્વા પ્રણામં ચાકરોદ્દણ્ડરૂપમ્ ॥ ૩,૨૦.૪॥

હરેઃ પ્રણામં ત્વિતિ કર્તવ્યશૂન્યં વ્યર્થં તમાહુર્જ્ઞાનિનસ્તચ્છૃણુ ત્વમ્ ।

રમેશ મધ્વેશ સરસ્વતીશેત્યેવં વદન્પ્રણમેદ્વિષ્ણુદેવમ્ ॥ ૩,૨૦.૫॥

યથા પ્રસન્નો વન્દનાદ્દેવદ્દેવ સ્તથા ન તુષ્ટઃ પૂજનાત્કર્મતશ્ચ ।

યથા નામસ્મરણાદ્વન્દનાદ્વા પાપાન્નિયચ્છેતુ તથા ન ચાન્યૈઃ ॥ ૩,૨૦.૬॥

દેહં તુ યે પોષયન્ત્યેવ તાત હરેઃ પ્રણામૈઃ શૂન્યભૂતં ચ પુષ્ટમ્ ।

તદેવમાહુર્વ્યર્થમેવેતિ તાત તત્પોષકાણાં નરકે દુઃખમાહુઃ ॥ ૩,૨૦.૭॥

યમોઽપિ તં તત્ર ઉલૂખલે તુ નિધાય પિષ્ટં સુખલૈઃ કરોતિ ।

યો વા પરં ન કરોત્યેવ તાત પ્રદક્ષિણં દેવદેવસ્ય વિષ્ણોઃ ॥ ૩,૨૦.૮॥

તસ્યૈવ પાદૌ તલયન્ત્રે નિધાય યમશ્ચ નિત્યં પ્રકરોતિ પિષ્ટમ્ ।

એષાં જિહ્વા હરિકૃષ્ણેતિ નામ ન વક્તિ નિત્યં વ્યર્થભૂતાં વદન્તિ ॥ ૩,૨૦.૯॥

તેષાં જિહ્વા યમલોકે યમસ્તુ નિષ્કાસ્ય પિષ્ટં પ્રકરોતિ નિત્યમ્ ।

કાશીનિવાસેન ચ કિં પ્રયોજનં કિં વા પ્રયાગે મરણેન તાત ॥ ૩,૨૦.૧૦॥

કિં વારણાગ્રે મરણેન સૌખ્યં કિં વા મખાદેઃ સમનુષ્ઠિતેન ।

સમસ્તતીર્થેષ્વટનેન કિં કિમધીતશાસ્ત્રેણ સુતીક્ષ્ણબુદ્ધ્યા ॥ ૩,૨૦.૧૧॥

યેષાં જિહ્વાગ્રે હરિનામૈવ નાસ્તિ યેષાં ગાત્રૈર્નમનં નાપિ વિષ્ણોઃ ।

યેષાં પદ્ભ્યાં નાસ્તિ હરેઃ પ્રદક્ષિણં તેષાં સર્વં વ્યર્થમાહુર્મહાન્તઃ ॥ ૩,૨૦.૧૨॥

હર્યર્પણાદ્રિહિતં નામ કસ્માત્પ્રદક્ષિણં નમનં ચાહુરર્ઘ્યમ્ ।
અતો વિષ્ણોર્નમનં કાર્યમેવ હરેર્નામસ્મરણં તાત કાર્યમ્ ॥ ૩,૨૦.૧૩॥

જન્મ હ્યેતદ્દુર્લભં નશ્વરં તુ યથા જલસ્થં તત્તથૈવ ।
નો વિસ્વાસં કુરુ ગાત્રે ત્વદીયે જીવેષ્વપિ સ્વઃ પરશ્ચેતિ તાત ॥ ૩,૨૦.૧૪॥

સદ્યઃ કૃતં નમનં ન ત્વદીયં સદ્યઃ કૃતં સ્મરણં ન ત્વદીયમ્ ।
કદા પ્રાપ્સ્યે મરણં તન્ન જાને ન વિશ્વાસં કુરુ ગાત્રે મહાત્મન્ ॥ ૩,૨૦.૧૫॥

એતચ્છ્રુત્વા નલો વીન્દ્ર પુત્રીવાક્યં સુનિર્મલમ્ ।
નમસ્કારં ચ કૃતવાન્યથાશક્ત્યા પ્રદક્ષિણમ્ ॥ ૩,૨૦.૧૬॥

સાપિ પ્રદક્ષિણં ચક્રે નમસ્કારં સદા હરેઃ ।
એવં બહુદિનં કૃત્વા ધ્યાત્વા નારાયણં પરમ્ ॥ ૩,૨૦.૧૭॥

કલેવરં ચ તત્યાજ મરણે હરિચિન્તયા ।
મત્પિતુર્વસુદેવસ્ય ભગિન્યા ઉદરે ખગ ॥ ૩,૨૦.૧૮॥

કૈકેયીતિ ચ નામ્ના સા ત્વભવદ્ભદ્રસંજ્ઞકા ।
યસ્માદ્ભદ્રગુણૈર્યુક્તા ભદ્રા સા ભદ્રનામિકા ॥ ૩,૨૦.૧૯॥

તસ્યાત્મજૈશ્ચ કૈકેયૈઃ પઞ્ચભિઃ ખગસત્તમ ।
પ્રત્યાહૃતામિમાં ભદ્રાં પ્રાપ્તવાન્ખગસત્તમ ॥ ૩,૨૦.૨૦॥

વક્ષ્યેહં મિત્રવિન્દાયાઃ પાણિગ્રહણકારણમ્ ।
સાવધાનમના ભૂત્વા શ‌ૃણુ પક્ષીન્દ્ર સત્તમ ॥ ૩,૨૦.૨૧॥

મિત્રવિન્દોવાચ ।
યાન્પૂર્વસર્ગેપ્યવૃણોન્નિકામતો હ્યગ્રીષોમાન્નામિકા મિત્રવિન્દા ।
મિત્રં હરિં પ્રાપ્તુકામા સદૈક તત્રોપાયં ચિન્તયામાસદેવી ॥ ૩,૨૦.૨૨॥

હરિપ્રાપ્તૌ સાધનાઃ સંતિ તેષુ મુખ્યં કચિચ્ચિન્તયામાસ દેવી ।
તેષાં મધ્યે શ્રવણં શ્રેષ્ઠમાહુઃ પુરાણાનાં સાત્ત્વિકાનાં સદાપિ ॥ ૩,૨૦.૨૩॥

વિષ્ણોરુત્કર્ષો વર્તતે યત્ર વાયોસ્તથોત્કર્ષઃ સજ્જનાનાં પુરાણે ।
શ્રાદ્ધં સદા વિષ્ણુબુદ્ધ્યા સદૈવ નાન્યચ્છ્રાવ્યં સાધનં તત્ર ચૈવ ॥ ૩,૨૦.૨૪॥

યસ્મિન્દિને શ્રવણં નાસ્તિ વિષ્ણોસ્તેષાં જન્મ વ્યર્થમાહુઃ કથાયામ્ ।
સ્નાન જપઃ પઞ્ચયજ્ઞં વ્રતં ચ ઇષ્ટાપૂર્તે કૃચ્છ્રચાન્દ્રો ચ દત્તમ્ ॥ ૩,૨૦.૨૫॥

સર્વં વ્યર્થં વૈષ્ણવાનાં ચ દીક્ષા કથાં વિના સમ્યગનુષ્ઠિતાં વૈ ।

યૈર્ન શ્રુતં ભાગવતં પુરાણં સસમ્પ્રદાયૈર્ગુરુભિઃ સંયુતૈશ્ચ ॥ ૩,૨૦.૨૬॥

યૈર્ન શ્રુતં ભાગવતં પુરાણં યૈર્ન શ્રુતં બ્રહ્મકાણ્ડં પુરાણમ્ ।
તેષાં જન્મ વ્યર્થમાહુર્મમહાન્તસ્તસ્માચ્છ્રાવ્યા હરિવાર્તા સદૈવ ॥ ૩,૨૦.૨૭॥

ન યત્ર ગોવિન્દકથામહાનદી ન યત્ર નારાયણપાદસંશ્રયઃ ।
ન યત્ર વિષ્ણોઃ સતતં વચોસ્તિ ન સંવસેત્તત્ક્ષણમાત્રં કથઞ્ચિત્ ॥ ૩,૨૦.૨૮॥

યસ્મિન્ગ્રામે ભાગવતં ન શાસ્ત્રં ન વર્તતે ભાગવતા રસજ્ઞાઃ ।
યસ્મિન્ગૃહે નાસ્તિ ગીતાર્થસારઃ યસ્મિન્ગ્રામે નામ સહસ્રકં વા ॥ ૩,૨૦.૨૯॥

તયો રસજ્ઞા યત્ર ન સન્તિ તત્ર ન સંવસેત્ક્ષણમાત્રં કથઞ્ચિત્ ।
યસ્મિન્દિને દિવ્યકથા ચ વિષ્ણોર્ન વાસ્તિ જન્તોસ્તસ્ય ચાયુર્વૃથૈવ ॥ ૩,૨૦.૩૦॥

ગર્ભે ગતે નાત્ર વિચાર્યમસ્તિ તન્મન્યતે દુર્લભં મર્ત્યલોકે ।
કર્ણં કલ્પૈર્ભૂષિતં સુંદરં ચ ન સુંદરં ચાહુરાર્યા રસજ્ઞાઃ ॥ ૩,૨૦.૩૧॥

વિષ્ણોઃ કથાખ્યાભરણૈશ્ચ યુક્તં તદેવ કર્ણં સુંદરં ચાહુરાર્યાઃ ।
તસ્માત્સદા ભાગવતાર્થસારં શ ૃણ્વન્તિ યે સતતં વાચયન્તિ ॥ ૩,૨૦.૩૨॥

તેષાં જન્મ સ્વસ્થમાહુર્મહાન્તો મહત્ફલં ચાસ્તિ તથૈવ તેષામ્ ।
સોષ્ણીષકઞ્ચુકયુતાશ્ચ હરેઃ કથાં વૈ શ ૃણ્વન્તિ યેપિ ચ પઠન્તિ સદૈવ મર્ત્યાઃ ॥ ૩,૨૦.૩૩॥

સર્વેપિ તે પૂજનીયા હિ લોકે ન વૈ શિશ્ને ચોદરે ચૈવ સક્તાઃ ।
યે દાક્ષિણ્યાદર્થલોભાદ્વદન્તિ સદા પુરાણં ભગવત્તત્ત્વસારમ્ ॥ ૩,૨૦.૩૪॥

પ્રચ્છાદયન્તે તત્ત્વગોપ્યાનિ યે તુ તેષાં ગતિઃ સૂર્યસૂનુઃ સદૈવ ।
યે ધર્મકાણ્ડે કર્મકાણ્ડે સદૈવ ઉત્પાદયન્તે સુરુચિં તત્ર નિત્યમ્ ॥ ૩,૨૦.૩૫॥

મૌલ્યેન યે કથયેયુઃ પુરાણં તેષાં ગતિઃ સૂર્ય સુનઃ સદૈવ ।
મૌલ્યેન યે ભાગવતં પુરાણં શ ૃણ્વન્તિ વૈ હરિશાસ્ત્રાર્થતત્ત્વમ્ ॥ ૩,૨૦.૩૬॥

મૌલ્યેન વેદાધ્યયનં પ્રકુર્વતે તેષાં ગતિઃ સૂર્યસૂનુઃ સદૈવ ।
યદૃચ્છયા પ્રાપ્તધનેન યે તુ સંતુષ્ટાસ્તે હ્યત્ર યોગ્યાઃ સદૈવ ॥ ૩,૨૦.૩૭॥

ધનાર્જને યે ત્વતિતૃષ્ણાભિયુક્તાસ્તેષાં ન વૈ ભાગવતેધિકારઃ ।
મત્વા લોકે હરિરેવતિ નિત્યમન્તર્યામી નાસ્તિ તદન્ય ઈશઃ ॥ ૩,૨૦.૩૮॥

એવં સદા યે પ્રવિચિન્તયન્તિ યોગક્ષેમં બિભૃયાદ્વિષ્ણુરેષામ્ ।
સદ્વૈષ્ણવાનામશુભં નાસ્તિ નાસ્તિ પ્રદૃશ્યતે સંશયજ્ઞાનરૂપાત્ ॥ ૩,૨૦.૩૯॥

કર્માનુસારેણ હરિર્દદાતિ ફલં શુભાનામશુભસ્ય ચૈવ ।
અતસ્તદર્થં નૈવ યત્નં ચ કુર્યાદ્ધનાર્થં વૈ હરિતત્ત્વે ચ કુર્યાત્ ॥ ૩,૨૦.૪૦॥

અતઃ સ્નાત્વા દિવ્યમન્ત્રં જપિત્વા વિસર્જયિત્વા વિષ્ણુનિર્માલ્યગન્ધમ્ ।
શુચિર્ભૂત્વા ભાગવતં પુરાણં સંશ્રાવયેત્સર્વવેત્તાપિ નિત્યમ્ ॥ ૩,૨૦.૪૧॥

કર્માનુસારેણ ધનાર્જનં ચ વેદાર્જનં શાસ્ત્રસમાર્જનં ચ ।
ભવિષ્યતિ શ્રવણં ચાપિ વિષ્ણોરત્યાદરાચ્છ્રવણં દુર્ઘટં ચ ॥ ૩,૨૦.૪૨॥

અત્યાદરાદ્ભાગવતસ્ય સારમાસ્વાદયેદ્દુર્ઘટં મર્ત્યલોકે ।
આસ્વાદ્ય તદ્ભાગવતં પુરાણમાનન્દબાષ્પૈર્યુક્તતા દુર્ઘટા ચ ॥ ૩,૨૦.૪૩॥

શ્રુત્વા તત્ત્વા નાં નિર્ણયં ધારણં ચ સુદુર્ઘટં ચાહુરાર્યાઃ સમસ્તમ્ ।
શ્રુત્વા તત્ત્વાનાં ધારણાનન્તરં ચ કામક્રુધોર્જારણં દુર્ઘટં ચ ॥ ૩,૨૦.૪૪॥

શ્રુત્વા તત્ત્વાનાં ધારણાનં તરં ત તથા યોગે દુર્ઘટં સંગતં ચ ॥ ૩,૨૦.૪૫॥

શ્રુત્વા તત્ત્વાનાં ધારણાનન્તરં ચ કામક્રુધોર્જારણં દુર્ઘટં ચ ।
એતે દોષા જ્ઞાનપૂતાનપીહ કુર્વન્તિ સંદેહયુતાન્સદૈવ ॥ ૩,૨૦.૪૬॥

અતો હ્યહં શ્રવણં સત્કથાયાઃ સદા કરિષ્યે નાત્ર વિચાર્યમસ્તિ ।
તેનાપ્યહં હરિનામાભિવાઞ્છા નિશ્ચિત્ય ચિત્તં શ્રવણે વૈ ચકાર ।
આદેહમેવં શ્રવણં ચ કૃત્વા ત્યક્ત્વા દેહં ભૂતલે સમ્પ્રજાતા ॥ ૩,૨૦.૪૭॥

નિવસ્તું વસુદેવસ્ય ભગિન્યા ઉદરે ખગ ।
સુમિત્રા સંજ્ઞકાયાં ચ જાતા વૈ મિત્રવિન્દિકા ॥ ૩,૨૦.૪૮॥

શ્રવણેન હરિં મિત્રં પ્રાપ્તા સા મિત્રવિન્દિકા ।
અતઃ સા મિત્રવિન્દેતિ સંજ્ઞયા સંબભૂવ હ ॥ ૩,૨૦.૪૯॥

સ્વયંવરે મિત્રવિન્દા રાજ્ઞાં મધ્યે તુ ભામિની ।
મમાંસે વ્યસૃજન્માલાં તાં ગૃહીત્વા ખગેશ્વર ।
વિધૂય નૃપતીન્સર્વાન્પુરીં પ્રાપ્તાઃ ખગેશ્વર ॥ ૩,૨૦.૫૦ ॥ ॥ ૫૧॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
ભદ્રાકૃતભગવત્પતિત્વપ્રાપકતપશ્ચર્યાદિનિરૂપણં નામ વિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૧
શ્રીકૃષ્ણ ઉવાચ ।

કાલિન્ધા અપિ ચોત્પત્તિં પ્રવક્ષ્યામિ ખગેશ્વર ।
વિવસ્વાન્નામ સૂર્યોભત્તસ્ય પુત્રી વ્યજાયત ॥ ૩,૨૧.૧॥

કાલિન્દીસંજ્ઞકા વીન્દ્ર યમુના યાનુજા સ્મૃતા ।
કૃષ્ણપત્નીત્વકામેન ચચાર તપ ઉત્તમમ્ ॥ ૩,૨૧.૨॥

તપ આલોચનં પ્રોક્તં તત્ત્વાનાં ચ વિનિર્ણયઃ ।
પૂર્વાર્જિતાનાં પાપાનામનુતાપસ્તપઃ સ્મૃતમ્ ॥ ૩,૨૧.૩॥

પ્રાયો નામ તપઃ પ્રોક્તં ચિત્તનિગ્રહ ઉચ્યતે ।
પ્રાયશ્ચિત્તમિતિ પ્રોક્તં ન તુ ક્ષૌરં ખગેશ્વર ॥ ૩,૨૧.૪॥

અનુતાપયુતં ભૂતં તચ્છણુ ત્વં ખગેશ્વર ।
પૂર્વં ન જપ્તં દિવ્યમન્ત્રં મુકુન્દ તપ્તં સદા ક્લેશદાવાનલેન ॥ ૩,૨૧.૫॥

ન વૈ સ્મૃતં હરિનામામૃતં ચ સદા સ્મૃતં હરિદોષાદિકં ચ ।
ન તુ સ્મૃતં હરિતત્ત્વામૃતં ચ સમ્યક્શ્રુતં લોલવાર્તાદિકં ચ ॥ ૩,૨૧.૬॥

ન પૂજિતં હરિપાદારવિન્દં સુપૂજિતાઃ પુત્રમિત્રાદિકાશ્ચ ।
ન વન્દિતં હરિપાદારવિન્દં સુવન્દિતો મિત્રપાદઃ સુઘોરઃ ॥ ૩,૨૧.૭॥

ન દૃષ્ટં વૈ ધૂપધૂમ્રૈરુપેતં હરેર્વક્ત્રં કુન્તલૈઃ સંવૃતં ચ ।
પુત્રાદિકં લાલિતં વૈ મુકુન્દ ન લાલિતં તવ વક્ત્રં મુરારે ॥ ૩,૨૧.૮॥

સુલાલિતં ભૂષણૈઃ પુત્રમિત્રં ન લાલિતં સર્વપાપાપહારિ ।
ન ભુક્તં વૈ હરિનૈરવેદ્યશેષં મિત્રાલયે ષડ્રસાન્નં ચ ભુક્તમ્ ॥ ૩,૨૧.૯॥

સુપુષ્પગન્ધા નાર્પિતા તે મુરારે સમર્પિતાઃ પુત્રમિત્રાદિકેભ્યઃ ।
સન્તપ્તોહં પુત્રમિત્રાદિકેષુ કદા દ્રક્ષ્યે તવ વક્ત્રં મુકુન્દ ॥ ૩,૨૧.૧૦॥

અવૈષ્ણવાન્નૈઃ શિગ્રુશાકાદિકૈશ્ચ હ્યનર્પિતાન્નૈશ્ચ તથાપ્યસંસ્કૃતૈઃ ।
તથાપ્યભક્ષ્યૈ રસના ચ દગ્ધા કદા દ્રક્ષ્યે તવ વક્ત્રં મુકુન્દ ॥ ૩,૨૧.૧૧॥

અષ્ટાક્ષરીપૂજયા દિવ્યતીર્થૈર્વિષ્ણોઃ પુરા ભ્રામિતૈઃ શઙ્ખતીર્થૈઃ ।
ન પાવિતં મચ્છરીરં મુરારે કદા દ્રક્ષ્યે તવ વ ક્ત્રં મુકુન્દ ॥ ૩,૨૧.૧૨॥

અનર્પિતૈર્ગન્ધપુષ્પાદિકૈશ્ચ અનર્પિતૈર્ભૂષણૈર્વસ્ત્રજાતૈઃ ।
અવૈષ્ણવાનાં દિગ્ધગન્ધાદિદોષૈર્ગાત્રં દગ્ધં કદા હ્યુદ્ધરિષ્યે મુકુન્દ ॥ ૩,૨૧.૧૩॥

દગ્ધૌ ચ પાદૌ મમ વાસુદેવ ન ગચ્છન્તૌ ક્ષેત્રપથં હરેશ્ચ ।
નેત્રે ચ દગ્ધે મમ સર્વદાપિ નાલોકિતં તવ દેવ પ્રતીકમ્ ॥ ૩,૨૧.૧૪॥

દગ્ધૌ ચ હસ્તૌ મમ વાસુદેવ ન પૂજિતં તવ વિષ્ણોઃ પ્રતીકમ્ ।
મયા કૃતં પાપજાતં મુરારે કદા દ્રક્ષ્યે તવ વક્રં મુકુન્દ ॥ ૩,૨૧.૧૫॥

મદીયદોષાન્ગણયન્ન પૂર્ણ દયાં કુરુ ત્વં સુધ્દ્ધદાસ્યાન્મુકુન્દ ।
યાવન્તિ લોમાનિ મદીયગાત્રે સંતિ પ્રભો સર્વદોર્ષર્વિદૂર ॥ ૩,૨૧.૧૬॥

તાવન્તિ પાપાનિ મદીયગાત્રે કદા દ્રક્ષ્યે તવ વક્ત્રં મુકુન્દ ।
અનન્તદેહે પતિપુત્રૈર્ગૃહૈશ્ચ મિત્રૈર્ધનૈઃ પશુભૃત્યાદિકૈશ્ચ ॥ ૩,૨૧.૧૭॥

સુખં નામં હ્યપુમાત્રં મુકુન્દ સેવા મુક્તા તવ દેવસ્ય વિષ્ણોઃ ।
ઇતઃ પરં પુત્રમિત્રાદિકં ચ યાસ્યે નાહં તવ દાસી ભવામિ ॥ ૩,૨૧.૧૮॥

યેયે બ્રૂયુઃ પુત્રમિત્રાદિકૈશ્ચ સમ્યક્સુખં જાયતે મર્ત્યલોકે ।
તેષામાસ્યે મૂત્રવિષ્ઠાદિકં ચ સમ્યક્સદા પતિતં ચેતિ જાને ॥ ૩,૨૧.૧૯॥

મિત્રાદીનાં યત્કૃતં દ્રવ્યજાતં વૃથા ગતં મલરૂપં ચ જાતમ્ ।
સદ્વૈષ્ણવાનાં યત્કૃતં દ્રવ્યજાતં હરિપ્રાપ્તેઃ કારણં સ્યાત્સદૈવ ॥ ૩,૨૧.૨૦॥

એતાદૃશં તત્તુ જાતં મુકુન્દ અલં હ્યલં તેન દુઃખં ચ ભુક્તમ્ ।
સંગં દત્તાત્સજ્જનાનાં સદા ત્વં વિના ચ ત્વં દુર્જનાનાં ચ સંગાત્ ॥ ૩,૨૧.૨૧॥

સંગૈઃ સદા દુર્જનાનાં મુરારે ગાત્રં દગ્ધં ન વિરાગેણ યુક્તમ્ ।
એતાદૃશાહં કાં ગાતિં વા મુકુન્દ યાસ્યે ન જાને દયયા માં ચ પાહિ ॥ ૩,૨૧.૨૨॥

એતાદૃશો હ્યનુતાપઃ ખગેન્દ્ર પ્રાયશ્ચિત્તં ન ચ ક્ષૌરાદિકં ચ ।
ભાનોઃ કન્યા હ્યનુતાપં ચ કૃત્વા વિચારયામાસ હરેઃ સુતત્ત્વમ્ ॥ ૩,૨૧.૨૩॥

સર્વોત્તમો હરિરેકઃ સદૈવ યતઃ પૂર્ણઃ સર્વગુણૈસ્તતશ્ચ ।
સૃષ્ટૌ યસ્માજ્જયતે વિશ્વજાતમતો હરિઃ સર્વગુણૈશ્ચ પૂર્ણઃ ॥ ૩,૨૧.૨૪॥

યો દેવાનામાદ્ય અકાર એવ યતો બ્રહ્માદ્યા નૈવ પૂર્ણાઃ સમસ્તાઃ ।
લક્ષ્મીપ્રસાદાચ્ચિરપુણ્યેન જાતો યથાયોગ્યં પૂર્ણગુણો વિરિઞ્ચઃ ॥ ૩,૨૧.૨૫॥

ન લક્ષ્મીવદ્ગુણપૂર્ણો વિરિઞ્ચો ન વિષ્ણુવદ્ગુણપૂર્ણા રમાપિ ।
ન વાયુવદ્ભારતી ચાપિ પૂર્ણા ન શેષવદ્વારુણી ચાપિ પૂર્ણા ॥ ૩,૨૧.૨૬॥

ન વૈ રુદ્રવત્પાર્વતી પૂર્ણરૂપા હ્યન્યેષ્વેવં નૈવ પૂર્ણાઃ સદૈવ ।
આલોચનામેવમેષા હિ કૃત્વા તપશ્ચક્રે યમુનાયાશ્ચ તીરે ॥ ૩,૨૧.૨૭॥

તદાચાહં યમુનાયાશ્ચ તીરં પાર્થેન સાકં મૃગયાં ગતઃ ખગ ।

દૃષ્ટ્વા ચ તાં તત્ર તપશ્ચરન્તીં તદાબ્રુવં મત્સખાયં ચ પાર્થમ્ ॥ ૩,૨૧.૨૮॥

હે પાર્થ શીઘ્રં વ્રજ કન્યાસમીપં ત્વં પૃચ્છ કસ્માદત્ર તપઃ કરોષિ ।
એવં પ્રોક્તસ્તત્સમીપં સ ગત્વા પૃષ્ટ્વા ચૈતત્કારણં શીઘ્રમેવ ॥ ૩,૨૧.૨૯॥

આગત્ય મામવદત્ફાલ્ગુનોયં સર્વં વૃત્તાંન્તં ત્વસૌ મત્સમીપે ।
તતસ્ત્વહં સુમુહૂર્તે ચ તસ્યાઃ પાણિગ્રહં કૃતવાંસ્તત્ર સમ્યક્ ॥ ૩,૨૧.૩૦॥

તસ્યાશ્ચ તાપાત્સંતતં મદ્વિચારાત્પ્રસન્નોહં સતતં સુપ્રસન્નઃ ।
પૂર્ણાનન્દે રમમાણાસ્ય નિત્યં તયા ચ મે કિં સુખંસ્યાત્ખગેન્દ્ર ॥ ૩,૨૧.૩૧॥

મયા વિવાહોનુગ્રહાર્થં હિ તસ્યા અઙ્ગીકૃતો ન તુ સૌખ્યાય વીન્દ્ર ।
તથા વક્ષ્યે લક્ષ્મણાયાશ્ચ રૂપં પાણિગ્રાહે કારણં ચાપિ વીન્દ્રા ॥ ૩,૨૧.૩૨॥

શ‍ૃણુષ્વ તત્તવ વક્ષ્યામિ ગોપ્યં સચ્છિષ્યકે નાસ્તિ ગોપ્યં ગુરોશ્ચ ॥ ૩,૨૧.૩૩॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
ભગવતઃ કાલિન્દ્યા વિવાહે હેતુનિરૂપણં નામૈકવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૨
શ્રીકૃષ્ણ ઉવાચ ।
યા લક્ષ્મણા પૂર્વસર્ગે ખગેન્દ્ર પુત્રી હ્યભૂદ્વહ્નિવેદસ્ય વેત્તુઃ ।
સુલક્ષણૈઃ સંયુતત્વાદ્યતઃ સા સુલક્ષ્મણેતિ પ્રથિતા ખગેન્દ્ર ॥ ૩,૨૨.૧॥

યથા લક્ષ્મીર્લક્ષણૈઃ સા સુપૂર્ણા યથા હરિર્લક્ષણૈર્વૈ સુપૂર્ણઃ ।
યથા વાયુર્લક્ષણૈઃ પૂર્ણ એવ યથા ગાયત્રી લક્ષણૈઃ સા સુપૂર્ણા ॥ ૩,૨૨.૨॥

યથા રુદ્રાદ્યા લક્ષણૈર્વૈ પ્રપૂર્ણા રુદ્રાદિલ્લક્ષ્મણા ચૈવ પૂર્ણા ।
ગુણેનૈવં ધર્મતઃ કિઞ્ચિદેવ તથાનુસંધાનાદ્ધ્રિયતે નામ ચાપિ ॥ ૩,૨૨.૩॥

તસ્મા દાહુર્લક્ષ્મણેત્યેવ સર્વે તલ્લક્ષણં શ‍ૃણુ ચાદૌ ખગેન્દ્ર ।
નારાયણે પૂર્ણગુણે રમેશે દ્વાત્રિંશત્સંખ્યાનિ સુલક્ષણાનિ ॥ ૩,૨૨.૪॥

સંત્યેવ પક્ષીન્દ્ર વદામ્યનુ ક્રમાન્મત્તઃ શ્રુત્વા મોક્ષમાપ્નોતિ નિત્યમ્ ।
યઃ સમપાદઃ ષણ્ણવત્યઙ્ગુલોઙ્ગશ્ચતુર્હસ્તઃ પુરુષસ્તીક્ષ્ણદન્તઃ ॥ ૩,૨૨.૫॥

ય એતત્સર્વં મિલિતં ચૈકમેવ હરેર્વિષ્ણોર્લક્ષણં ચાહુરાર્યાઃ ।
મુખં સ્નિગ્ધં વર્તુલં પુષ્ટિરૂપં દ્વિતીયં તલ્લક્ષણં ચાહુરાર્યાઃ ॥ ૩,૨૨.૬॥

હનુર્યસ્યાનુન્નતં ચાસ્તિ વીન્દ્ર તલ્લક્ષણં પ્રાહુરાર્યાસ્તૃતીયમ્ ।

યદ્ન્તા વૈ તીક્ષ્ણસૂક્ષ્માશ્ચ સંતિ તલ્લક્ષણં ચાહુરાર્યાશ્ચતુર્થમ્ ॥ ૩,૨૨.૭॥

યસ્યાધરે રક્તિમા ત્વસ્તિ વીન્દ્ર તલ્લક્ષણં પઞ્ચમં ચાહુરાર્યાઃ ।
યસ્ય હસ્તા અતિરક્તાઃ ખગેન્દ્ર તલ્લક્ષણં પ્રાહુરાર્યાશ્ચ પષ્ઠમ્ ॥ ૩,૨૨.૮॥

યસ્મિન્નખાઃ સંતિ રક્તાઃ સુશોભાસ્તલ્લક્ષણં સપ્તમં ચાહુરાર્યાઃ ।
યસ્મિન્કપોલે રક્તિમા ત્વસ્તિ વીન્દ્ર તલ્લક્ષણં હ્યષ્ટમં પ્રાહુરાર્યા ॥ ૩,૨૨.૯॥

યસ્મિન્કરે શઙ્ખચક્રાદિરેખા વર્તન્તે તન્નવમં પ્રાહુરાર્યાઃ ।
યસ્યો દરં તન્તુરૂપં સુપુષ્ટં વલિત્રયૈરઙ્કિતં સુંદરં ચ ॥ ૩,૨૨.૧૦॥

તલ્લક્ષણં દશમં પ્રાહુરાર્યા એકાદશં નિમ્નનાભિં તદાહુઃ ।
ઊરુદ્વયં યસ્ય ચ માંસલં વૈ તલ્લક્ષણં દ્વાદશં પ્રાહુરાર્યાઃ ॥ ૩,૨૨.૧૧॥

કટિર્હિ દીર્ઘા પૃથુલાસ્તિ યસ્ય ત્રયોદશં લક્ષ્મ તદાહુરાર્યાઃ ।
યસ્યાસ્તિ મુષ્કો સુપરિક્ષિતો વૈ ચતુર્દશં લક્ષ્મ તદાહુરાર્યાઃ ॥ ૩,૨૨.૧૨॥

સમુન્નતં શિશ્નમથો હિ લક્ષ્મ યસ્યાસ્તિ તત્પઞ્ચદશં વદન્તિ ।
સુતામ્રકં પાદતલં ખગેન્દ્ર તલ્લક્ષણં ષોડશં પ્રાહુરાર્યાઃ ॥ ૩,૨૨.૧૩॥

નિમ્નૌ ચ ગુલ્ફૌ સપ્તદશં તદાહુર્ગ્રી વારૂપં પ્રાહુરષ્ટાદશં ચ ।
એકોનવિંશં ત્વક્ષિપદ્મં સુરક્તં પ્રાહુર્બાહું જાનુ વિંશં તથૈવ ॥ ૩,૨૨.૧૪॥

વિસ્તીર્ણોરશ્ચૈકવિંશં તદાહુઃ સિંહાસ્કન્ધં દ્વ્યુત્તરં વિંશમાહુઃ ।
ત્રયોવિંશં સૂક્ષ્મમાસ્યં તદાહુશ્ચતુર્વિંશં સુપ્રસન્ને ચ દૃષ્ટી ॥ ૩,૨૨.૧૫॥

હ્રસ્વં લિઙ્ગં માર્દવં ચાપિ વીન્દ્ર તલ્લક્ષણં પઞ્ચવિંશં વદન્તિ ।
સમૌ ચ પાદૌ કટિજાનુ ચોરૂ ષડ્વિંશમાહુશ્ચ સમે ચ જઙ્ઘે ॥ ૩,૨૨.૧૬॥

સમાનહસ્તૌ સમકર્ણૌ મિલિત્વા દ્વાત્રિંશત્કં લક્ષણં પ્રાહુરાર્યાઃ ।
દ્વાત્રિંશત્કં લક્ષણં વૈ મુકુન્દે દ્વાત્રિંશત્કં લક્ષણં વૈ રમાયામ્ ॥ ૩,૨૨.૧૭॥

દ્વાત્રિંશત્કં લક્ષણં બ્રહ્મણોઽપિ તદ્ભારત્યાઃ પ્રવદન્ત્યેવ સત્યમ્ ।
તથા ચ શહ્ગા સમમેવ ચક્રિણેત્યેવં સદામા કુરુ નિર્ણયં બ્રુવે ॥ ૩,૨૨.૧૮॥

એકસ્ય વૈ લક્ષણસ્યાપિ વિષ્ણોર્લક્ષ્મીરન્તં નૈવ સમ્યક્પ્રપેદે ।
અતોનન્તૈર્લક્ષણૈઃ સંયુતં ચ હરિં ચાહુર્લક્ષણજ્ઞાઃ સદૈવ ॥ ૩,૨૨.૧૯॥

જાનાતિ લક્ષ્મીર્લક્ષણં વાયુરૂપે સ્વાપેક્ષયા હ્યતિરિક્તં ખગેન્દ્ર ।
સ્વલક્ષણાપેક્ષયા ભારતી તુ શતૈર્ગુણૈરધિકા વેધસોઽપિ ॥ ૩,૨૨.૨૦॥

ખગેન્દ્ર તસ્માલ્લક્ષણે સામ્યચિત્તં વિશ્વાદીનાં સર્વદા મા કુરુષ્વ ।
અષ્ટાવિંશતિં પ્રાહૂ રુદ્રાદિકાનાં ભ્રૂનેત્રયોર્લક્ષણેનૈવ હીનાઃ ॥ ૩,૨૨.૨૧॥

અલક્ષણં મન્યતે યદ્ધિ તસ્ય દુર્લક્ષણં નૈવ તચ્ચિન્તનીયમ્ ।
અષ્ટાવિંશતિં લક્ષણં વૈ હરસ્ય ન ભારતીવચ્ચિન્તનીયં ખગેન્દ્ર ॥ ૩,૨૨.૨૨॥

અતો હરઃ ક્રોધરૂપી સદૈવ તયોરભાવાત્સત્યમુક્તં તથૈતત્ ।
અતો દ્વયં નાસ્તિ રુદ્રે ખગેન્દ્ર શિશ્રોદરે કિઞ્ચિદાધિક્યમસ્તિ ॥ ૩,૨૨.૨૩॥

સપ્તાધિકૈર્વિંશતિલક્ષણૈસ્તુ સમાયુતાઃ સ્વસ્ત્રિયો લક્ષ્મણાદ્યાઃ ।
ષડ્વિંશત્યા લક્ષણૈશ્ચાપિ યુક્તા વારુણ્યાદ્યા પઞ્ચવિંશૈશ્ચ ચન્દ્રઃ ॥ ૩,૨૨.૨૪॥

અર્થશ્ચતુર્વિંશતિભિશ્ચૈવ યુક્તો નાસાવાયોર્દ્વ્યધિકા વિંશતિશ્ચ
લક્ષણૈશ્ચૈકવિંશત્યા શચી યુક્તા ન સંશયઃ ॥ ૩,૨૨.૨૫॥

પ્રવાહા વિંશકૈર્યુક્તા યમ એકોનવિંશકૈઃ ।
પાશ્યષ્ટાદશભિર્યુક્તો દશસપ્તયુતોઽનલઃ ॥ ૩,૨૨.૨૬॥

વૈવસ્વતઃ ષોડશભિમિત્રઃ પઞ્ચદશૈર્યુતઃ ।
ચત્રુર્વિંશૈસ્તુ ધનપઃ પાવકસ્તુ ત્રયોદશૈઃ ॥ ૩,૨૨.૨૭॥

ગઙ્ગા દ્વાદશભિર્યુક્તા બુધ એકાદશૈર્યુતઃ ।
શનિસ્તુ દશસંખ્યાકૈઃ પુષ્કરો નવભિર્યુતઃ ॥ ૩,૨૨.૨૮॥

અથ ષોડશસાહસ્રં ભાર્યારતુ મમ વલ્લભાઃ ।
અષ્ટભિશ્ચૈવ સંયુક્તાઃ સપ્તભિઃ પિતરસ્તથા ॥ ૩,૨૨.૨૯॥

ષડ્ભિશ્ચ દેવગન્ધર્વાઃ પઞ્ચભિસ્તદનન્તરાઃ ।
ચતુર્ભિઃ ક્ષિતિપાઃ પ્રોક્તાસ્ત્રિભિરન્યે ચ સંયુતાઃ ॥ ૩,૨૨.૩૦॥

ઉદરે કિઞ્ચિદાધિક્યે હ્રસ્વે પાદે ચ કર્ણયોઃ ।
શિખાધિક્યં વિના વિપ્ર ભાર્યાયાં ચ શિવસ્ય ચ ॥ ૩,૨૨.૩૧॥

લક્ષ્મણાયાં પઞ્ચ દોષાઃ શિરોગુલ્ફાદિકં વિના ।
નાભ્યાધિક્યે સહૈવાષ્ટૌ દોષાઃ સંત્યતિવાહિકે ॥ ૩,૨૨.૩૨॥

જઙ્ઘાધિક્યે સહૈવાષ્ટૌ દોષાઃ શચ્યાઃ સદા સ્મૃતાઃ ।
એવમેવ હિ દોષાશ્ચાપ્યૂહનીયાઃ ખગેશ્વર ॥ ૩,૨૨.૩૩॥

દુર્લક્ષણૈઃ સદા વીન્દ્ર સંશ્રુતૈસ્તત્ત્વવિદ્ભવેત્ ।
મહોદરો લંબનાભિરીષામાત્રોગ્રદંષ્ટ્રકઃ ॥ ૩,૨૨.૩૪॥

અન્ધકૂપગભીરાક્ષો લંબકર્ણોષ્ઠનાસિકઃ ।
લંબગુલ્ફો વક્રપાદઃ કુનખી શ્યાવદન્તકઃ ॥ ૩,૨૨.૩૫॥

દીર્ઘજઙ્ઘો દીર્ઘશિશ્નસ્ત્વેકાણ્ડશ્ચૈકનાસિકઃ ।
રક્તશ્મશ્રૂ રક્તરોમા વક્રાસ્યઃ સમ્પ્રકીર્તિતઃ ॥ ૩,૨૨.૩૬॥

દગ્ધપર્વ તસંકાશો રક્તપૃષ્ઠઃ કલિઃ સ્મૃતઃ ।
અલોમાંસોઽલોમશિરા રક્તગણ્ડકપોલકઃ ॥ ૩,૨૨.૩૭॥

લલાટે પાણ્ડુતા નિત્યં વામસ્કન્ધે કરે ખગ ।
ક્રૂરદૃષ્ટિર્દૃષ્ટિપાદસ્તથા વૈ ઘર્ઘરસ્વરઃ ॥ ૩,૨૨.૩૮॥

અત્યાશી ચાતિપાનશ્ચ સ્તનૌ શુષ્કફલોપમૌ ।
ઊરૌ નવાઙ્જિકારોમઃ તથા પૃષ્ઠે ચ મસ્તકે ॥ ૩,૨૨.૩૯॥

લલાટે ત્રીણિ દીર્ઘે તુ સમે દ્વૌ સમ્પ્રકીર્તિતૌ ।
સર્પાકારસ્તુ યો મત્સ્યસ્તસ્ય શિશ્ને પ્રકીર્તિતઃ ॥ ૩,૨૨.૪૦॥

પાદત્રાણોપમો મત્સ્યો રસનાગ્રે પ્રકીર્તિતઃ ।
શિશ્નાકારશ્ચ યો મત્સ્યો ગુદે તસ્ય પ્રશસ્યતે ॥ ૩,૨૨.૪૧॥

વૃશ્ચિકાકારમત્સ્યસ્તુ પદોસ્તસ્ય પ્રશસ્યતે ।
શ્વાકારશ્ચાપિ મત્સ્યો વૈ મુખે તસ્ય પ્રકીર્તિતઃ ॥ ૩,૨૨.૪૨॥

હસ્તે તુ બહુરેખાઃ સ્યુર્લોમ નાસાપુટે સ્મૃતમ્ ।
અતિદીર્ઘં તુ ચાઙ્ગુષ્ઠં કનિષ્ઠં ચાતિદીર્ઘકમ્ ॥ ૩,૨૨.૪૩॥

દુર્લક્ષણં ત્વે વમાદિ કલાવસ્તિ હ્યનેકશઃ ।
સુલક્ષણાન્યનેકાનિ મયિ સંતિ ખગેશ્વર ॥ ૩,૨૨.૪૪॥

દ્વાત્રિંશલ્લક્ષણં વિષ્ણોર્બ્રહ્માદ્યાપેક્ષયૈવ તત્ ।
સહાભિપ્રાય ગર્ભેણ બ્રહ્મણોક્તં તવ પ્રભો ॥ ૩,૨૨.૪૫॥

બ્રહ્મોક્તસ્ય મયોક્તસ્ય વિરોધો નાસ્તિ સત્તમ ।
મયોક્તસ્યૈવ સ વ્યાસઃ કંબુગ્રીવઃ પ્રદર્શ્યતે ॥ ૩,૨૨.૪૬॥

રક્તાધરં રક્ત તાલુ ચૈકીકૃત્ય મયોદિતમ્ ।
અતો વિરોધો નાસ્ત્યેવ તથા જ્ઞાનાત્પ્રતીયતે ॥ ૩,૨૨.૪૭॥

સપ્તાધિકૈર્વિંશતિલક્ષણૈસ્તુ સમાયુતા યાઃ સ્ત્રિયો લક્ષ્મણાદ્યાઃ ॥ ૩,૨૨.૪૮॥

ભગે નેત્રે ચ હસ્તે ચ સ્તને કુક્ષૌ તથૈવ ચ ।
ભારત્યપેક્ષયા પઞ્ચભિર્ન્યૂના ત્વસ્તિ લક્ષણૈઃ ॥ ૩,૨૨.૪૯॥

ન રુદ્રવન્ન ચાન્યાનિ લક્ષણાનિ ખગેશ્વર ।
ષડ્વિંશત્યા લક્ષણૈશ્ચાપિ યુક્તા વારુણ્યાઃ ષડ્લક્ષણૈશ્ચૈવ હીના ॥ ૩,૨૨.૫૦॥

કર્ણે કુક્ષૌ નાસિકાકેશપાશે ગુલ્ફે ભગે કિઞ્ચિદાધિક્યમસ્તિ ।
ઇન્દ્રો યુક્તઃ પઞ્ચવિંશત્યા ખગેન્દ્ર સદા હીનો લક્ષણૈઃ સપ્તસંખ્યૈઃ ॥ ૩,૨૨.૫૧॥

હસ્તે પાદે ઉદરે કર્ણયોશ્ચ શિશ્ને ગુલ્ફે ત્વધરોષ્ઠેધિકં ચ ।
ચતુર્વિંશત્યા લક્ષણૈશ્ચાપિ યુક્તો નાસ્તિક્યવાયુસ્તદ્વદેવાષ્ટભિશ્ચ ॥ ૩,૨૨.૫૨॥

નાભ્યાં ગુલ્ફે હનુરર્ઙ્ઘ્યોશ્ચ સ્કન્ધે દ્વિજે નેત્રે ત્વધરોષ્ઠેધિકં ચ ।
ત્રયોવિંશત્યા લક્ષણૈશ્ચાપિ યુક્તા શચી તથા નવદોષૈશ્ચ યુક્તા ॥ ૩,૨૨.૫૩॥

ભગે કેશે હ્યધરોષ્ઠે ચ કર્ણે જઙ્ઘે ગણ્ડે વક્ષસિ ગુલ્ફયોશ્ચ ।
તથોત્તરોષ્ઠે કિઞ્ચિદાધિક્યમસ્તિ એવં વિજાનીહિ ખગેન્દ્રસત્તમ ॥ ૩,૨૨.૫૪॥

દ્વાવિંશત્યા લક્ષણૈઃ સંયુતસ્તુ દશભિર્દોષૈઃ પ્રવહો નામ વાયુઃ ।
તથાઙ્ગુષ્ઠે કિઞ્ચિદાધિક્યમસ્તિ વિંશત્યેકાદશભિર્દોષતોર્કઃ ॥ ૩,૨૨.૫૫॥

તદ્વિંશત્યા લક્ષણૈઃ સંયુતસ્તુ તદા દોષૈર્દ્વાદશભિશ્ચ યુક્તઃ ।
એકોનવિંશત્યા લક્ષણૈશ્ચાપિ યુક્તસ્ત્રયોદશભિસ્તદભાવૈર્યુતોગ્નિઃ ॥ ૩,૨૨.૫૬॥

અષ્ટાદશભિર્લક્ષણૈઃ સંયુતસ્તુ વૈવસ્વતસ્તદભાવૈશ્ચતુર્દશભિઃ ।
મિત્રસ્તુ સપ્તદશભિર્લક્ષણૈઃ સંયુતઃ ખગ ॥ ૩,૨૨.૫૭॥

સદોષૈઃ પઞ્ચદશભિઃ સંયુક્તો નાત્ર સંશયઃ ।
તૈશ્ચ ષોડશભિર્યુક્તો ધનપો નાત્ર સંશયઃ ॥ ૩,૨૨.૫૮॥

તદભાવૈઃ ષોડશભિઃ સંયુક્તઃ સમ્પ્રકીર્તિતઃ ।
તૈઃ પઞ્ચદશભિશ્ચૈવ યુક્તોગ્રેજ્યષ્ઠપુત્રકઃ ॥ ૩,૨૨.૫૯॥

તૈઃ સપ્તદશભિર્દોષૈઃ સંયુક્તો નાત્ર સંશયઃ ।
તૈશ્ચતુર્દશભિશ્ચૈવ ગઙ્ગા સમ્પરિકીર્તિતા ॥ ૩,૨૨.૬૦॥

તથાષ્ટાદશભિર્દોષૈઃ સંયુતા નાત્ર સંશયઃ ।
તૈસ્ત્રયોદશભિશ્ચૈવ સંયુતો બુધ એવ તુ ॥ ૩,૨૨.૬૧॥

દોષૈરેકોનવિંશત્યા સંયુતો નાત્ર સંશયઃ ।

શનિર્વિંશતિદોષેણ યુતો દ્વાદશલક્ષણૈઃ ॥ ૩,૨૨.૬૨॥

લક્ષણૈશ્ચૈકાદશભિઃ પુષ્કરઃ પરિકીર્તિતઃ ।
એકવિંશતિસંખ્યાકૈરસદ્ભાવૈઃ પ્રકીર્તિતઃ ॥ ૩,૨૨.૬૩॥

દશભિર્લક્ષણૈર્યુક્તાઃ પિતરો યે ચિરાઃ ખગ ।
ત્રયોવિંશતિદોષૈશ્ચ સંયુતા નાત્ર સંશયઃ ॥ ૩,૨૨.૬૪॥

અષ્ટભિર્લક્ષણૈર્યુક્તા દેવગન્ધર્વસત્તમાઃ ।
દોષૈશ્ચતુર્વિંશતિભિઃ સંયુક્તાઃ પરિકીર્તિતાઃ ॥ ૩,૨૨.૬૫॥

સપ્તલક્ષણસંયુક્તા ગન્ધર્વા માનુષાતમકાઃ ।
યૈસ્તુ પઞ્ચવિંશતિભિર્દૈષૈઃ સંયુક્તાઃ પ્રકીર્તિતાઃ ॥ ૩,૨૨.૬૬॥

ષડ્ગુણૈઃ ક્ષિતિપા યુક્તા ષડ્વિંશત્યા ચ દોષતઃ ।
તદન્યે પઞ્ચભિર્યુક્તાશ્ચતુર્ભિઃ કેચિદેવ ચ ॥ ૩,૨૨.૬૭॥

ત્રિભિઃ કેચ્ચિત્તતો હીના ન સંતિ ખગસત્તમ ।
યસ્મિન્નરે ક્ષિતિપે વા ખગેન્દ્ર આધિક્યં યદ્દૃશ્યતે લક્ષણસ્ય ॥ ૩,૨૨.૬૮॥

ન તે નરા નૈવ તે વૈ ક્ષિતીશાઃ સર્વે નૈવ હ્યુત્તમાઃ સર્વદૈવ ।
યે દેવા યે ચ દૈત્યાશ્ચ સર્વેપ્યેવં ખગાધિપ ॥ ૩,૨૨.૬૯॥

લક્ષણાલક્ષણૈશ્ચૈવ ક્રમેણોક્તા ન સંશયઃ ।
લક્ષણૈઃ સપ્તવિંશત્યાલક્ષણૈઃ સંયુતાઃ ખગ ॥ ૩,૨૨.૭૦॥

અતઃ સલક્ષણા જ્ઞેયા દ્વાત્રિંશલ્લક્ષણૈર્ન હિ ।
પિતુર્ગૃહે વર્ધમાના સદાપિ સ્વકુટુંબં શ્રેષ્ઠયિતું ખગેન્દ્ર ॥ ૩,૨૨.૭૧॥

ઉવાચ સા પિતરં દીયમાનમન્નાદિકં ત્રમિત્રાદિકેષુ ।
સદાપિ યે ત્વનુસંધાનેન યુક્તા અન્તર્ગતે તત્રતત્ર સ્થિતે ચ ॥ ૩,૨૨.૭૨॥

અજ્ઞાતત્વે ચાન્નપાનાદિકં ચ દત્તં સંતો વ્યર્થમેવં વદન્તિ ।
હરિં વક્ષ્યે તત્રતત્ર સ્થિતં ચં તં વૈ શૃણુ ત્વાદરેણાદ્ય નિત્યમ્ ॥ ૩,૨૨.૭૩॥

બાલો હરિર્બાલરૂપેણ કૃષ્ણઃ ક્ષીરાદિકં નવનીતં ઘૃતં ચ ।
ગૃહ્ણાતિ નિત્યં ભૂષણં વસ્ત્રજાતમેવં દદ્યાત્સર્વદા વિષ્ણુતુષ્ટ્યૈ ॥ ૩,૨૨.૭૪॥

મિત્રૈર્હરિઃ કેશવાખ્યો મુકુન્દો ભુઙ્ક્તે દત્તં ત્વન્નપ્રાનાદિકં ચ ।
પૂર્વં દદ્યાત્સર્વદા વૈ ગૃહસ્થો ધન્યો ભવેદન્યથા વ્યર્થમેવ ॥ ૩,૨૨.૭૫॥

ગૃહ્ણાતિ નિત્યં માધવાખ્યો હરિશ્ચેત્યેવં જ્ઞાત્વા દેયમન્નાદિકં ચ ।
એવં જ્ઞાત્વા દીયમાનેન નિત્યં પ્રીણાતિ વિષ્ણુર્નાન્યથા વ્યર્થમેવ ॥ ૩,૨૨.૭૬॥

ગૃહે નિત્યં વાસુદેવો હરિસ્તુ પ્રીણાતિ નિત્યં તત્ર તિષ્ઠન્સુપર્ણ ।
એવં જ્ઞાત્વા સ્વગૃહં સર્વદૈવ અલઙ્કુર્યાદ્ધાતુરૂપૈઃ સદૈવ ॥ ૩,૨૨.૭૭॥

ગોવિન્દાખ્યસ્તિષ્ઠતિ વષ્ણવાનાં પુત્રૈર્યુતસ્તિષ્ઠતિ વાસુદેવઃ ।
મિત્રે મુકુન્દઃ શાલકે ચાનિરુદ્ધો નારાયણો દ્વિજવર્યે સદાસ્તિ ॥ ૩,૨૨.૭૮॥

ગોષ્ઠે ચ નિત્યં વિષ્ણુરૂપી હરિસ્તુ અશ્વે સદા તિષ્ઠતિ વામનાખ્યઃ ।
સંકર્ષણઃ શૂદ્રવર્ણે સદાસ્તિ વૈશ્યે પ્રદ્યુમ્નસ્તિષ્ઠતિ સર્વદૈવ ॥ ૩,૨૨.૭૯॥

જનાર્દનઃ ક્ષત્રજાતૌ સદાસ્તિ દાશેષુ નિત્યં મહિદાસો હરિસ્તુ ।
મહ્યાં નિત્યં તિષ્ઠતિ સર્વદૈવ હ્યુપેન્દ્રાખ્યો હરિરેકઃ સુપર્ણ ॥ ૩,૨૨.૮૦॥

ગજે સદા તિષ્ઠતિ ચક્રપાણિઃ સદાન્તરે તિષ્ઠતિ વિશ્વરૂપઃ ।
નિત્યં શુનિ તિષ્ઠતિ ભૂતભાવનઃ પિપીલકાયામપિ સર્વદૈવ ॥ ૩,૨૨.૮૧॥

ત્રિવિક્રમો હરિરૂપ્યન્તરિક્ષે સર્વજાતાવનન્તરૂપી હરિશ્ચ ।
હરેર્ન વર્ણોસ્તિ ન ગોત્રમસ્તિ ન જાતિરીશે સર્વરૂપે વિચિત્રે ॥ ૩,૨૨.૮૨॥

એવં જ્ઞાત્વા સર્વદા લક્ષ્મણા તુ હરિં સદા પ્રીણયામાસ દેવી ।
સપર્યયા વૈ ક્રિયમાણયા હરિઃ પતિર્મમસ્ય દિતિ ચિન્તયાના ॥ ૩,૨૨.૮૩॥

તત્યાજ દેહં વિષ્ણુપતિત્વકામા મદ્રેષુ વૈ વીન્દ્ર પુત્રી પ્રજાતા ।
સ્વયંવરે લક્ષ્મણાયા અહં ચ ભિત્ત્વા લક્ષ્યં ભૂપતીન્દ્રાવયિત્વા ॥ ૩,૨૨.૮૪॥

પાણિગ્રહં લક્ષ્મણાયાશ્ચ કૃત્વા ગત્વા પુરીં રમયામાસ દેવી ।
તથૈવાહં જાંબવત્યા વિવાહં મત્પત્નીત્વે કારણં ત્વાં બ્રવીમિ ॥ ૩,૨૨.૮૫॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
લક્ષ્મણાવિવાહહેતુનિરૂપણં નામ દ્વાવિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૩
શ્રીકૃષ્ણ ઉવાચ ।
સોમસ્ય પુત્રી પૂર્વસર્ગે બભૂવ ભાર્યા મદીયા જામ્બવતી મમ પ્રિયા ।
તાસાં મધ્યે હ્યધિકા વીન્દ્ર કિઞ્ચિદ્રુદ્રાદિભ્યઃ પઞ્ચગુણૈર્વિહીના ॥ ૩,૨૩.૧॥

યદાવેશો બલવાન્સ્યાદ્રમાયાં તદાનામસ પ્રિયતે કેશવોલમ્ ।

યદાવેશાદ્ધ્રાસમુપૈતિ કાલે તદા તાસાં સામ્યમાહુર્મહાન્તઃ ॥ ૩,૨૩.૨॥

લક્ષ્મ્યાવેશઃ કિઞ્ચિદસ્ત્યેવ નિત્યમતસ્તાભ્યઃ કિઞ્ચિદાધિક્યમસ્તિ ॥ ૩,૨૩.૩॥

ગરુડ ઉવાચ ।
તાસાં મધ્યે જામ્બવન્તી તુ કૃષ્ણ આરાધનં કીદૃશં સા ચકાર ।
તન્મે બ્રૂહિ કૃપયા વિશ્વમૂર્તે આધિક્યે વૈ કારણં તાભ્ય એવ ॥ ૩,૨૩.૪॥

ગરુડેનૈવમુક્તસ્તુ ભગવાન્દેવકીસુતઃ ।
મેઘગંભીરયા વાચા ઉવાચ વિનતાસુતમ્ ॥ ૩,૨૩.૫॥

શ્રીકૃષ્ણ ઉવાચ ।
યા પૂર્વસર્ગે સોમપુત્રી બભૂવ પિતુર્ગૃહે વર્તમાનાપિ સાધ્વી ।
જન્મ સ્વકીયં સાર્થકં વૈ ચકાર પિત્રા સાકં વિષ્ણુશુશ્રૂષણે ન ચ ॥ ૩,૨૩.૬॥

શુશ્રાવ નિત્યં સત્પુરાણાનિ ચૈવં ચક્રે સદા વિષ્ણુપાદપ્રણામમ્ ।
ચક્રે સદા તારકસ્યાપિ વિષ્ણોઃ પ્રદક્ષિણં સ્મરણં કુર્વતી સા ॥ ૩,૨૩.૭॥

પિત્રા સાકં સા તુ કન્યા ખગેન્દ્ર વૈરાગ્યયુક્તા શ્રવણાત્સંબભૂવ ।
કેશં ચ મિત્રં દ્વિરદાદિકં ચ અનર્ઘ્યરત્નાનિ ગૃહાદિકં ચ ॥ ૩,૨૩.૮॥

સર્વં હ્યેતન્નશ્વરં ચૈવ મેને મમાધીનં હરિણા વૈ કૃતં ચ ।
યેનૈવ દત્તં પુત્રમિત્રાદિકં ચ તેના હૃતં વેદનાં નૈવ ચક્રે ॥ ૩,૨૩.૯॥

અદ્યૈવ વિષ્ણુઃ પરમો દયાલુઃ દયાં મયિ કૃતવાંસ્તે ન સુષ્ઠુ ।
પિત્રા સાકં કન્યકા સા તુ વીન્દ્ર સદાત્મનિ હ્યમલે વાસુદેવે ॥ ૩,૨૩.૧૦॥

એકાન્તત્વં સુષ્ઠુ ભક્ત્યા ગતા સા યદૃચ્છયા સોપપન્નેન દેવી ।
અકલ્પયન્ત્યાત્મનો વીન્દ્ર વૃત્તિં ચકાર યત્સાવધિરાધં પ્રથૈવ ॥ ૩,૨૩.૧૧॥

સા વૈ વિત્તં વિષ્ણુપાદારવિન્દે દુઃખાર્ણવાત્તરાકે સંચકાર ।
વાગીન્દ્રિદ્રિયં ખગ સમ્યક્ચકાર હરેર્ગુણાનાં વર્ણને વા સદૈવ ॥ ૩,૨૩.૧૨॥

હસ્તૌ ચ વિષ્ણોર્ગૃહસમાર્જનાદૌ ચકાર દેવી ગાત્રમલાપહારમ્ ।
શ્રોત્રં ચ ચક્રે હરિસત્કથોદયે મોક્ષાદિમાર્ગે હ્યમૃતોપમે ચ ॥ ૩,૨૩.૧૩॥

નેત્રં ચ ચક્રે પ્રતિમાદિદર્શને અનાદિકાલીનમલાપહરિણી ।
સદ્વૈષ્ણવાનાં સ્પર્શને ચૈવ સંગે નિર્માલ્યગન્ધાનુવિલેપને ત્વક્ ॥ ૩,૨૩.૧૪॥

ઘ્રાણેંદ્રિયં સા હરિપાદસારે ચકાર સંસારવિમુક્તિદે ચ ।
જિહ્વેન્દ્રિયં હરિનૈવેદ્યશેષે શ્રીમત્તુલસ્યાદિવિમિશ્રિતે ચ ॥ ૩,૨૩.૧૫॥

પાદૌ હરેઃ ક્ષેત્રપથાનુસર્પણે શિરો હૃષીકેશપદાભિવન્દને ।
કામં હૃદાસ્યે તુ હરિદાસ્યકામ્યા તથોત્તમશ્લોકજનાશ્ચરન્તિ ॥ ૩,૨૩.૧૬॥

નિષ્કામરૂપે ચ મતિં ચકાર વાગિન્દ્રિયં સ્તવનં સ્વીચકાર ।
એવં સદા કાર્યસમૂહમાત્મના સમર્પયિત્વા પરમેશપાદયોઃ ॥ ૩,૨૩.૧૭॥

તીર્થાટનાર્થં તુ જગામ પિત્રા સાકં હરેઃ પ્રીણનાદ્યર્થમેવ ।
આરાધયિત્વા બ્રાહ્મણાન્વિષ્ણુભક્તાનાદૌ ગૃહે વસ્ત્રસંભૂષણાદ્યૈઃ ॥ ૩,૨૩.૧૮॥

પશ્ચાત્કલ્પં કારયામાસ દેવી વિષ્ણોરગ્રે તીર્થયાત્રાર્થમેવ ।
યાવત્કાલં તીર્થયાત્રા મુકુન્દ તાવત્કાલં તૂર્ધ્વરેતા ભવામિ ॥ ૩,૨૩.૧૯॥

યાવત્કાલં તીર્થયાત્રાં કરિષ્યે તાવદ્દત્તાદ્વૈષ્ણવાનાં ચ સંગમ્ ।
હરેઃ કથાશ્રવણં સ્યાન્મુકુન્દ નાવૈષ્ણવાનાં સંગિનામઙ્ગસંગમ્ ॥ ૩,૨૩.૨૦॥

સુહૃજ્જનૈઃ પુત્રમિત્રાદિકૈશ્ચ દીર્થાટનં નૈવ કુર્યાં મુકુન્દ ।
કુર્વન્તિ યે કામ્યયા તીર્થયાત્રાં તેષાં સંગં કુરુ દૂરે મુકુન્દ ॥ ૩,૨૩.૨૧॥

શાલગ્રામં યે વિહાયૈવ યાત્રાં કુર્વન્તિ તેષાં કિં ફલં પ્રાહુરાર્યાઃ ।
યદા તીર્થાનાં દર્શનં સ્યાત્તદૈવ શાલગ્રામં પુરતઃ સ્થાપયિત્વા ॥ ૩,૨૩.૨૨॥

તીર્થાટનં પાદચૈરૈઃ કૃતં ચેત્પૂર્ણં ફલં પ્રાહુરાર્યાઃ ખગેન્દ્ર ।
પાદત્રાણં પાદરક્ષાં ચ કૃત્વા તીર્થાટનં પાદહીનં તદાહુઃ ॥ ૩,૨૩.૨૩॥

યો વાહને તુરગે ચોપવિષ્ટસ્તીર્થાટનં કુરુતે ચાર્ધહીનમ્ ।
વૃષાદીનાં વાહને પાદમાહુઃ પરાન્નાનાં ભોજને વ્યર્થમાહુઃ ॥ ૩,૨૩.૨૪॥

મહાત્મનાં વેદવિદાં યતીનાં પરાન્નાનાં ભોજને નૈવ દોષઃ ।
સંકલ્પયિત્વા પરમાદરેણ જગામ સા તીર્થયાત્રાર્થમેવ ॥ ૩,૨૩.૨૫॥

આદૌ સ્નાત્વા હરિનિર્માલ્યગન્ધં વિસર્જયિત્વા શ્રવણં વૈ ચકાર ।
પિત્રા સાકં ભોજનં ચાપિ કૃત્વા અગ્રે દિને ક્રોશમેકં જગામ ॥ ૩,૨૩.૨૬॥

તત્ર દ્વિજાન્પૂજયિત્વાન્નપાન રાત્રૌ તત્ત્વં શ્રાવયામાસ દેવી ।
એવં યાત્રાં યે પ્રકુર્વન્તિ નિત્યં તેષાં યાત્રાં સફલાં પ્રાહુરાર્યાઃ ॥ ૩,૨૩.૨૭॥

વિના દયાં તીર્થયાત્રા ખગેન્દ્રવ્યર્થેત્યેવં વીન્દ્ર ચાહુર્મહાન્તઃ ।
દિવા રાત્રૌ યે ન શ઼ૃણ્વન્તિ દિવ્યાં હરેઃ કથાં તીર્થમાર્ગે ખગેન્દ્ર ॥ ૩,૨૩.૨૮॥

વ્યર્થંવ્યર્થં તસ્ય ચાહુર્ગતં વૈ અશ્વાદીનાં વાહનાનાં ચ વિદ્ધિ ।

અશ્વાદીનામપરાધં વદસ્વ ગઙ્ગાદીનાં દર્શનાત્પાપનાશઃ ॥ ૩,૨૩.૨૯॥

ક્ષેત્રસ્થવિષ્ણોર્દર્શનાત્પાપનાશો માર્જારસ્યાપ્યપરાધં વદસ્વ ।
ક્ષેત્રસ્થવિષ્ણોઃ પૂજનાત્પાપનાશઃ પૂજાવતામપરાધં વદસ્વ ॥ ૩,૨૩.૩૦॥

જપાદીનાં કુર્વતાં પાપનાશો વિષ્ણોર્ધ્યાનાત્સદ્ય એવાઘનાશઃ ।
અનુસંધાનાદ્રહિતં સર્વમેવ કૃતં વ્યર્થમેવેતિ ચાહુઃ ॥ ૩,૨૩.૩૧॥

અતો હરેઃ પાપવિનાશિનીં કથાં શ્રુત્વા વિષ્ણોર્ભક્તિમાન્સ્યાત્વગન્દ્ર ।
દૃષ્ટ્વાદૃષ્ટ્વા હરિપાદાઙ્કિતં ચ સ્મૃત્વાસ્મૃત્વા ભક્તિમાન્સ્યાત્ખગેન્દ્ર ॥ ૩,૨૩.૩૨॥

પિત્રા સાકં કન્યકા સાપિ વીન્દ્ર શેષાચલસ્થં શ્રીનિવાસં ચ દ્રષ્ટુમ્ ।
જગામ સા માર્ગમધ્યે હરિં ચ સા ચિન્તયામાસ રમાપતિં ચ ॥ ૩,૨૩.૩૩॥

કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય વક્ષઃ શ્રીવત્સરત્નૈર્ભૂષિતં વિસ્તૃતં ચ ।
કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય તુન્દં વલિત્રયેણાઙ્કિતં સુંદરં ચ ॥ ૩,૨૩.૩૪॥

કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય કણ્ઠં મહર્લોકસ્યાશ્રયં કંબુતુલ્યમ્ ।
કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય નાભિં સદાન્તરિક્ષસ્યાશ્રયં વૈ સુપૂર્ણમ્ ॥ ૩,૨૩.૩૫॥

કદા દ્રક્ષ્યે વદનં વૈ મુરારેર્જનલોકસ્યાશ્રયં સર્વદૈવ ॥ ૩,૨૩.૩૬॥

શિરઃ કદા શ્રીનિવાસસ્ય દ્રક્ષ્યે સત્યસ્ય લોકસ્યાશ્રયં સર્વદૈવ ।
કટિં કદા શ્રીનિવાસસ્ય દ્રક્ષ્યે ભૂર્લોકસ્યાશ્રયં સર્વદૈવ ॥ ૩,૨૩.૩૭॥

કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય ચોરુ તલાતલસ્યાશ્રયં સર્વદૈવ ।
કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય જાનુ સુકોમલં સુતલસ્યાશ્રયં ચ ॥ ૩,૨૩.૩૮॥

કદા દ્રક્ષ્યે શ્રીનિવાસસ્ય જઙ્ઘે રસાતલસ્યાશ્રયેઃ સર્વદૈવ ।
કદા દ્રક્ષ્યે પાદતલં હરેશ્ચ પાતાલલોકસ્યાશ્રયં સર્વદૈવ ॥ ૩,૨૩.૩૯॥

ઇત્થં માર્ગે ચિન્તયન્તી ચ દેવી શેષાચલે શેષદેવં દદર્શ ।
ફણૈઃ સહસ્રૈઃ સુવિરાજમાનં નાનાદ્રુમૈર્વાનરૈર્વાનરીભિઃ ॥ ૩,૨૩.૪૦॥

અનન્ત જન્માર્જિતપુણ્યસંચયાન્મયાદ્ય દૃષ્ટઃ પરમાચલો હિ ।
તદ્દર્શનાદ્વાષ્પકલાકુલેક્ષણા સદ્યઃ સમુત્થાય નનામ મૂર્ધ્ના ॥ ૩,૨૩.૪૧॥

મુખં ચ દૃષ્ટ્વા નમનં ચ કાર્યં પૃષ્ઠાદિભાગે નમનં ન કાર્યમ્ ।
સાપિ દ્વિષટ્કં નમનં ચ ચક્રે શાલગ્રામં સ્થાપયિત્વા પુરોઽસ્ય ॥ ૩,૨૩.૪૨॥

ઇત્થં કાર્યં વૈષ્ણવૈઃ પર્વતસ્ય ત્વં વૈષ્ણવૈર્વિપરીતં ચ કાર્યમ્ ।

મધ્વાન્તઃસ્થઃ પર્વતાગ્રેસ્તિ નિત્યં રમાબ્રહ્માદ્યૈઃ પૂજિતઃ શ્રીનિવાસઃ ॥ ૩,૨૩.૪૩॥

સુસત્તમં પરમં શ્રીનિવાસં દ્રક્ષ્યેઽથાહં હ્યારુરુક્ષેઽચલગ્ચ ।
ઇત્યેવમુક્ત્વા કપિલાખ્યતીર્થે સ્થાનં ચક્રે સા સ્વપિત્રા સહૈવ ॥ ૩,૨૩.૪૪॥

અત્રૈવાસ્તે શ્રીનિવાસો હરિસ્તુ દ્રવ્યેણ રૂપેણ ન ચાન્યથેતિ ।
આદૌસ્નાત્વા મુણ્ડનં તત્ર કૃત્વા તીર્થશ્રાદ્ધં કારયિત્વા સુતીર્થે ॥ ૩,૨૩.૪૫॥

ગોભૂહિરણ્યાદિસમસ્તદાનં દત્ત્વા શૈલં ચારુરોહાથ સાધ્વી ।
શાલગ્રામં સ્થાપયિત્વા સ ચાગ્રે પુનઃ પ્રણામં સાપિ ચક્રે સુભક્ત્યા ॥ ૩,૨૩.૪૬॥

સોપાનાનાં શતપર્યન્તમેવમારુહ્ય સા હ્યુપવિષ્ટા તુ તત્ર ।
શુશ્રાવ સા ભાગવતં પુરાણં શુશ્રાવ વૈવેઙ્કટાદ્રેઃ પ્રશંસામ્ ॥ ૩,૨૩.૪૭॥

જૈગીષવ્યાદ્ગુરુપાદાત્સુભક્ત્યા સુશ્રાવ તત્ત્વં વેઙ્કટાદ્રેશ્ચ સર્વમ્ ॥ ૩,૨૩.૪૮॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
વેઙ્કટેશગિરિયાત્રાક્રમનિરૂપણં નામ ત્રયોવિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૪
જૈગીષવ્ય ઉવાચ ।
કન્યે શ ૃણુ ત્વં વેઙ્કટાખ્યાચલસ્ય સ્મેરાનનાં પુણ્યમારોહણેઽસ્ય ।
શ્રીગીતાયાઃ પઠનં ચૈવ કુર્વન્નારોહણં કુરુતે સર્વલોકઃ ॥ ૩,૨૪.૧॥

પદેપદે શ્રીનિવાસશ્ચ દેવસ્ત્વલં હ્યલં પ્રીયતે ભક્તવર્ગઃ ।
તં પ્રીણયન્મોક્ષમાયાન્તિ સર્વે હરૌ તુષ્ટે કિમલભ્યં ચ કન્યે ॥ ૩,૨૪.૨॥

સોપાનદેશે યઃ પુરાણં શ ૃણોતિ તદા કૃતા સર્વતીર્થાદિયાત્રા ।
તદા દિવા પ્રસ્તુવન્તીહ માર્ગે સદા હરિં શ્રીનિવાસં ગુરું ચ ॥ ૩,૨૪.૩॥

સોપાનાનાં મહિમાનં ચ શ્રુત્વા શાલગ્રામં સ્થાપયિત્વા ચ તત્ર ।
નમસ્કૃત્વા પુનરેવાપિ સા તુ સોપાનાનિ ત્વારુરોહાથ સાધ્વી ॥ ૩,૨૪.૪॥

સોપાનાનાં વીન્દ્ર ચારોહણેન ત્વવૈષ્ણવાનાં હરિતોષો ન ચૈવ ।
તેનૈવ તેષાં સાધનં ભૂય એવ તમસ્યન્ધે પાતયિતું ખગેન્દ્ર ॥ ૩,૨૪.૫॥

સ્થલેસ્થલે એવમેવાપિ કાર્યં જૈગીષવ્યં પુનરેવાહ દેવી ।
કન્યોવાચ ।
જૈગીષવ્યઃ શ્રીનિવાસો હરિસ્તુ બ્રહ્માદીનાં દૃશ્યતે શ્રીનિવાસઃ ॥ ૩,૨૪.૬॥

જૈગીષવ્ય કૃપયા ત્વં વદસ્વ જૈગીષવ્યો હ્યેવમુક્તો હરિં તુ ।
ઉવાચ કન્યાં સોમપુત્રીં સતીં ચ બ્રહ્માદીનાં દૃશ્યતે શ્રીનિવાસઃ ॥ ૩,૨૪.૭॥

અનન્તરૂપોધિકકાન્તકાન્તિમાન્રુદ્રાદીનાં દૃશ્યતે વેઙ્કટેશઃ ।
સસૂર્યલક્ષાધિકકાન્તકાન્તિતો રુદ્રાદીનાં દૃશ્યતે શ્રીનિવાસઃ ॥ ૩,૨૪.૮॥

સહસ્રસૂર્યાધિકકાન્તિકાન્તઃ સવિદ્યુત્ત્વાન્માનુષાણાં રમેશઃ ।
ઋષ્યાદીનાં દૃશ્યતે ચન્દ્રવચ્ચ સન્માનુષાણામપરોક્ષો હરિસ્તુ ॥ ૩,૨૪.૯॥

નક્ષત્રવદ્દૃશ્યતે શ્રીનિવાસઃ સદા ઋષીણામપરોક્ષો હરિસ્તુ ।
સ સૂર્યવદ્દૃશ્યતે શ્રીનિવાસઃ સંસારિણાં વેઙ્કટેશઃ ખગેન્દ્ર ॥ ૩,૨૪.૧૦॥

સંદોહવદ્દૃશ્યતે વૈ પ્રકાશો મિથ્યાવતાં દૃશ્યતે શ્રીનિવાસઃ ।
પાષાણવન્નૈલ્યરૂપપ્રકાશઃ શિલામાત્રે દૃષ્યતે વૈ કલૌ ચ ॥ ૩,૨૪.૧૧॥

નૃણાં સર્વેષાં શ્રીનિવાસો હરિસ્તુ કલૌ સ્વરૂપં શ્રીનિવાસસ્ય દેવી ।
ન માનુષાઃ પ્રવિજાનન્તિ સર્વે યતઃ કલૌ તામસા રાજસાસ્તુ ॥ ૩,૨૪.૧૨॥

તત્સંગિનઃ સાત્ત્વિકાઃ કેચિદેવ હ્યતો ભક્તા દુર્લભા વૈ કલૌ ચ ।
યે દૃશ્યન્તે ભક્તવત્તે ન ભક્તાઃ શિશ્નોદરયોર્ભરણે ચૈવ સક્તાઃ ॥ ૩,૨૪.૧૩॥

કુર્વન્તિ યાત્રાં ચ તદર્થમેવ ભક્તિજ્ઞાનં દુર્લભં વૈ કલૌ ચ ।
ભક્તા યે વૈ ન વિરક્તાઃ સદૈવ તેષાં હરેર્દર્શનં દુર્લભં ચ ॥ ૩,૨૪.૧૪॥

ભક્તસ્વરૂપં તવ વક્ષ્યે ખગેન્દ્ર યો જ્ઞાનપૂર્ણઃ પરમે સ્નિગ્ધ એવ ।
ન ચ દ્વેષૈર્બન્ધુરો ભક્તિયુક્તસ્તવ દ્વેષાઞ્છૃણુ વક્ષ્યે ચ સમ્યક્ ॥ ૩,૨૪.૧૫॥

જીવાભિદા હરિણાપ્રાકૃતેન સ્વતન્ત્રેણ હ્યસ્વતન્ત્રસ્ય નિત્યમ્ ।
જ્ઞાનાનન્દૈઃ પરિપૂર્ણે હરૌ ચ ગુણૈરપૂર્ણો હરિરિત્યેવ ચિન્તા ॥ ૩,૨૪.૧૬॥

શ્રીબ્રહ્મરુદ્રાદિદિવૌકસાં સદા તથા દ્વિજાનાં સમાનાયાશ્ચ ચિન્તા ।
વિષ્ણોઃ સકાશાદ્બ્રહ્મરુદ્રાદિકાનાં સદાધિક્યાલોચનં દ્વેષ એવ ॥ ૩,૨૪.૧૭॥

વિષ્ણોર્ભદ્રે હસ્તપાદાદિકાનાં ભેદજ્ઞાનં દ્વેષમાહુર્મહાન્તઃ ।
અવતારાણા છેદભેદાદિકં ચ તથોચ્યતે મરણસ્યાપિ ચિન્તા ॥ ૩,૨૪.૧૮॥

તદ્ભક્તાનાં દ્વેષણં ચાહુરાર્યાસ્તદ્વાક્યાનાં દૂષણં દ્વેષ એવ ।
નચ દ્વેષૈઃ સંયુતા યે ચ લોકે કન્યે દૃશ્યન્તે ન તુ ભક્તાઃ કદાચિત્ ॥ ૩,૨૪.૧૯॥

કન્યોવાચ ।
જૈગીષવ્ય બ્રૂહિ મે કે ચ ભક્તા ભક્તિં કથં દર્શયામાસુરેતે ।

તેષાં હરિઃ શ્રીનિવાસો મહાત્મા ત્રાતા સદા ભક્તવર્ગે દયાલુઃ ॥ ૩,૨૪.૨૦॥

જૈગીષવ્યસ્ત્વેવમુક્તો મહાત્મા ઉવાચ કન્યાં સંસ્મરન્ભક્તવર્યઃ ।
જૈગીષવ્ય ઉવાચ ।
પ્રહ્લાદાદ્યા શ્રીનિવાસસ્ય ભક્તાઃ કૃત્વા નૃસિંહે ચોત્તમાં ભક્તિમેવ ॥ ૩,૨૪.૨૧॥

અવાપ સામ્રાજ્યમનુત્તમં ચ જ્ઞાનં નૃસિંહાત્સમવાપ પશ્ચાત્ ।
પરાશરઃ શ્રીનિબાસસ્ય ભક્તો ભક્તિં કૃત્વા વ્યાસરૂપં હરિં ચ ॥ ૩,૨૪.૨૨॥

સ્તુત્વા તેન જ્ઞાનતત્ત્વં હ્યવાપ્ય જગામ મોક્ષં ભક્તિસંવર્ધિતાત્મા ।
યો નારદઃ શ્રીનિવાસસ્ય ભક્તો ભક્તિં કૃત્વા ગર્ભવાસે હરૌ ચ ॥ ૩,૨૪.૨૩॥

તયા ભક્ત્યા બ્રહ્મપુત્રત્વમાપ જ્ઞાનપ્રાપ્ત્યા તેન મુક્તિં જગામ ।
યો હ્યંબરીષઃ શ્રીનિવાસસ્ય ભક્તઃ કૃત્વા ભક્તિં પરદેવ હરૌ ચ ॥ ૩,૨૪.૨૪॥

જપ્ત્વા જ્ઞાનં પ્રાપ્ય દુર્વાસકશ્ચાપ્યવાપ મોક્ષં તેન સંવર્ધિતાત્મા ।
મુચુકુન્દો વૈ શ્રીનિવાસસ્ય ભક્તો વૈરાગ્યતો ભક્તિદાર્ઢ્યં ચ કૃત્વા ॥ ૩,૨૪.૨૫॥

તત્ત્વજ્ઞાનં પ્રાપ્ય વિષ્ણોર્મહાત્મા હ્યવાપ મોક્ષં તેન સંવર્ધિતાત્મા ।
સ પુણ્ડરીકઃ શ્રીનિવાસસ્ય ભક્તઃ પિત્રાદિષ્ટો વિષ્ણુભક્તિં ચ કૃત્વા ॥ ૩,૨૪.૨૬॥

હરિપ્રાસાદાજ્જ્ઞાનમનુત્તમં ચાપ્યવાપ મોક્ષં ભક્તિસંવર્ધિતાત્મા ।
બ્રહ્મા ચ વાયુશ્ચ સરસ્વતી ચ જ્ઞાતવ્યાઃ સર્વે ઋજુયોગિનશ્ચ ॥ ૩,૨૪.૨૭॥

અચ્છિન્નભક્તાશ્ચ સદા મુરારેર્ન કામ્યરક્તાઃ શુદ્ધરૂપા હિ તે ચ ।
ગિરીશનાગેશખગેશસંજ્ઞા દેવાઃ શુક્રારૌ ગુરુચન્દ્રેન્દુસૂર્યાઃ ॥ ૩,૨૪.૨૮॥

જલેશોઽગ્નિર્મનુધર્મૌ કુબેરઃ વિઘ્નેશનાસત્યમરુદ્ગણાશ્ચ ।
પર્જન્યમિત્રાદય એવ સર્વે સદા હ્યેતે શ્રીનિવાસસ્ય ભક્તાઃ ॥ ૩,૨૪.૨૯॥

વિશ્વામિત્રો ભૃગુરૌર્વશ્ચ કુત્સો મરીચિરત્રિઃ પુલહઃ ક્રતુશ્ચ ।
શક્તિર્વસિષ્ઠો સૌતમીયો પુલસ્ત્યો ભારદ્વાજઃ શ્રીનિવાસસ્ય ભક્તાઃ ॥ ૩,૨૪.૩૦॥

માન્ધાતા નહુષોંબરીષસગરૌ રાજા પૃથુર્હૈહયો ઇક્ષ્વાકુર્ભરતો યયાતિસુતલૌ ધર્મો વિકુક્ષિસ્તથા ।
ઉત્તાનશ્ચ બિભીષણો દશરથો હ્યેતે મહાજ્ઞાનિનઃ શ્રીમદ્વેઙ્કટનાયકસ્ય
ચ ગુરોર્ભક્તાઃ સદા સંસ્મૃતાઃ ॥ ૩,૨૪.૩૧॥

ભાગીરથી સમુદ્રશ્ચ યમુના ચ સરસ્વતી ।
ગોદાવરી નર્મદા ચ કૃષ્ણા ભીમરથી તથા ॥ ૩,૨૪.૩૨॥

સરયૂફલ્ગુકાવેરીગણ્ડકી કપિલા સ્તથા ।

ઇત્યેતાશ્ચ હરેર્ભક્તાઃ સંતિ ચાત્રૈવ ભામિનિ ॥ ૩,૨૪.૩૩॥

અભિપ્રાયં તત્ર વક્ષ્યે શૃણુ કન્યે મયા સતિ ।
યત્ર પ્રવર્તતે માર્ગે કથા વિષ્ણોર્મહાત્મનઃ ॥ ૩,૨૪.૩૪॥

વર્તન્તે વૈષ્ણવા યત્ર હરિતત્ત્વાર્થબોધકાઃ ।
તત્રૈવ ભક્તાઃ સર્વેપિ સંતિ વિષ્ણોસ્તથૈવ ચ ॥ ૩,૨૪.૩૫॥

યે દેવયાત્રાં પરમાત્મચિન્તયા કુર્વન્તિ તે હરિભક્તાશ્ચ નાન્યે ।
યતો હરૌ પરમે વૈષ્ણવાનાં સર્વં નિષ્ઠામેતિ કૃત્યં ખગેન્દ્ર ॥ ૩,૨૪.૩૬॥

શેષાચલં સમાસાદ્ય હ્યન્નવસ્ત્રાદિભૂષણમ્ ।
યો ન દદ્યાદભક્તઃ સ તતઃ કો નુ પરઃ પશુઃ ॥ ૩,૨૪.૩૭॥

ભક્તા હરેઃ શ્રીનિવાસાચલે ચ ગઙ્ગાદિરૂપેણ ચ તત્રતત્ર ।
તિષ્ઠન્તિ સેવાર્થમુરુક્રમસ્ય તેષાં પૂજા નૈવ કાર્યા ચ દેવિ ॥ ૩,૨૪.૩૮॥

અભિપ્રાયં તત્ર વક્ષ્યે શૃણુ ત્વં તત્ર સ્થલે વસ્ત્રગન્ધાદિધૂપૈઃ ।
પુરાણોક્તા અપિ ભેદેન પૂજ્યા દૃષ્ટ્વા ચ તાન્વન્દયેત્પ્રાજ્ઞ એવ ॥ ૩,૨૪.૩૯॥

સદ્બ્રાહ્મણાન્વન્દયેત્પાદમૂલે હસ્તૌ ચ દ્વૌ સમ્પુટીકૃત્ય દેવિ ।
સાષ્ટાઙ્ગરુપં વન્દનં ચૈવ વિષ્ણોઃ કુર્યાત્તથા ગુરવે વિષ્ણુબુદ્ધ્યા ॥ ૩,૨૪.૪૦॥

ગઙ્ગાદીનાં વન્દનં કાર્યમેવ સાષ્ટાઙ્ગં વૈ તુલસીનાં તથૈવ ।
અશ્વત્થાનાં નમનં કાર્યમેવ ગવાદીનાં નમનં માનસેન ॥ ૩,૨૪.૪૧॥

પૂજા સદા દેવદેવસ્ય વિષ્ણોઃ કાર્યા ભક્ત્યા વૈષ્ણવૈરેવ નાન્યૈઃ ।
યે નામકા જ્ઞાનવન્તઃ સુભક્તાઃ સદૈવ કાર્યા વિષ્ણુપૂજા ચ કન્યે ॥ ૩,૨૪.૪૨॥

યે નામકા જ્ઞાનવન્તઃ સુભક્તાઃ સદૈવં કાર્યા વિષ્ણુપૂજા ચ કન્યે ।
યેનામકા વિષ્ણુભક્તાઃ સદૈવ પૂજા વિષ્ણોર્નૈવ કાર્યાત્ર દેવિ ॥ ૩,૨૪.૪૩॥

મોહાદ્યો વૈ પૂજયેદ્દેવદેવં મહાધર્માદ્યાતિ ચાન્ધં તમો વૈ ।
બ્રહ્માદિનામાનિ હરેર્હિ દેવીં વિષ્ણોઃ સ્વનામાનિ દદૌ દિવૌકસામ્ ॥ ૩,૨૪.૪૪॥

નાદાદ્ધીરઃ કેશવાદીનિ કન્યે સ્વકં પુરં પ્રવિહાયૈવ રાજા ।
એવં મયોક્તં કન્યકે સર્વમેતદેતત્પરં સમ્યગારોહણીયમ્ ॥ ૩,૨૪.૪૫॥

ગોવિન્દ નારાયણ માધવેતિ યૂયં મયા સર્વમારાધિતવ્યમ્ ।
સર્વે મિલિત્વા પુનરેવં ખગેન્દ્ર સમારુહન્વૈકુટાદ્રિં ગૃણન્તઃ ॥ ૩,૨૪.૪૬॥

હરેર્નામાન્યત્ર પૂર્વં ગૃણન્તસ્ત્વાસ્વાદયન્તઃ શ્રીનિવાસસ્ય નામ ।
દ્રષ્ટું સર્વે શ્રીનિવાસં તથૈવ કુર્વન્તસ્તે તલશબ્દં નદન્તઃ ॥ ૩,૨૪.૪૭॥

ઇતિ કૃષ્ણવચઃ શ્રુત્વા તાર્ક્ષ્યઃ કૃષ્ણમુવાચહ કથમાસ્વાદનં ચક્રુરેતદ્વિસ્તીર્યમે વદ ।
શ્રીકૃષ્ણ ઉવાચ ।
ભો શ્રીનિવાસ તવ નામૈવ ચૈતન્નામ સ્વામી નનુ નામૈવ સ્વામી ।
યાં બ્રહ્માદ્યા આશ્રયન્તીત્તિ યસ્માત્તસ્માદ્રમા શ્રીરિતિ નામ ચાપ ॥ ૩,૨૪.૪૮॥

રમાશ્રયત્વાન્નિતરાં સર્વદા ચેત્યતો હરિઃ શ્રીનિવાસાભિધાનઃ ।
ભો શ્રીનિવાસેતિ તુ નર્તયન્તો રોમાઞ્ચમાત્રાસ્તલશબ્દકારિણઃ ॥ ૩,૨૪.૪૯॥

અદ્યૈવ પશ્યામ હરેસ્તવાસ્યં કદા વયં કૃત કૃત્યા ભવામઃ ।
ભોઃ કેશવાદ્યૈવ પદારવિન્દં સંદર્શયિત્વા સુદયાં કુરુષ્વ ॥ ૩,૨૪.૫૦॥

બ્રહ્માણમાહુશ્ચ પુરાણમાહુઃ કશબ્દવાચ્યં સર્વલોકેશમાહુઃ ।
ઈશં ચાહં રુદ્રમિત્યેવ ચાહુસ્તત્પ્રેરકં સૃષ્ટિસંહારકાર્યે ॥ ૩,૨૪.૫૧॥

અતો હરિઃ કેશવનામધેયો ભોઃ કેશવેતિ ચ નર્તયન્તઃ ।
આનન્દવાપીં સંસ્ત્રવન્તોભિ જગ્મુર્નારાયણેતિ પ્રવદન્તો હિ જગ્મુઃ ॥ ૩,૨૪.૫૨॥

અતો દોષાસ્તદ્વિરુદ્ધા ગુણાશ્ચ નારાશ્ચ તેષામાશ્રયત્વાન્મુરારિઃ ।
નારાયણેતિ પ્રવદન્તીહ લોકે નારાનુબન્ધાત્સર્વમુક્તાઃ ખગેન્દ્ર ॥ ૩,૨૪.૫૩॥

નારાઃ પ્રોક્તા આશ્રયત્વાચ્ચ તેષામતોઽપિ નારાયણ એવ વીન્દ્ર ।
મુક્તાશ્ચ યે તુ પ્રપદંનુ જગ્મુરણ્ડોદકં યસ્ય કટાક્ષમાત્રાત્ ॥ ૩,૨૪.૫૪॥

યદુત્પન્નં તેન નારાઃ ખગેન્દ્ર તેષાં સદાપ્યાશ્રયત્વાચ્ચ વીન્દ્ર ।
નારાયણેતિ પ્રવદન્તીહ લોકે હ્યનન્તબ્રહ્માણ્ડવિસર્જકત્વાત્ ॥ ૩,૨૪.૫૫॥

એવં નનૃતુઃ પરિશંસયન્તો ગોવિન્દ નાન્યો હિ ન ચૈવ દર્શનમ્ ।
ગોશબ્દવાચ્યાસ્તુ સમસ્તવાચો ગોભિશ્ચ સર્વૈઃ પ્રતિપાદ્યતે યતઃ ॥ ૩,૨૪.૫૬॥

અતો હિ ગોવિન્દ ઇતિ સ્મૃતઃ સદા ભો વેદવેદ્યેતિ તથા ન નનૃતુઃ ।
આનન્દબાષ્પૈશ્ચ સમન્વિતા હિ હરે મુરારે તવ દર્શનં હિ ॥ ૩,૨૪.૫૭॥

દેહિ પ્રભો વૈ તવદાસદાસાશ્ચતુર્દશે ભુવને સર્વદાપિ ।
યતસ્ત્વમેવં વસતીતિ વાસુશ્ચાત્રૈવ નિત્યં ક્રીડતે સર્વદૈવ ॥ ૩,૨૪.૫૮॥

યતો દેવેત્યેવમાહુર્મહાન્તસ્ત્વતો હરિં વાસુદેવેતિ ચાહુઃ ।
ભો વાસુદેવેતિ નનૃતુઃ સર્વદૈવ ભો માધવેતિ નનૃતુશ્ચૈવ સર્વે ॥ ૩,૨૪.૫૯॥

લક્ષ્મીપતે ચેતિ વદન્તિ સર્વે ધનીતિ શબ્દઃ સ્વાભિવાચી યતો હિ ।
અતોઽપ્યાર્યા માધવેતિ બ્રુવન્તિ લક્ષ્મીપતે પાહિ તથૈવ ભક્તાન્ ॥ ૩,૨૪.૬૦॥

તે વૈ બ્રુવન્તો નનૃતુશ્ચ જગ્મુર્વિષ્ણો સદાસ્માન્પરિપાહિ નિત્યમ્ ।
સર્વત્ર યસ્માદ્વિતતોઽસિ તસ્માદિત્યાદિનામાનિ ગૃણન્ત એવ ।
જગ્મુશ્ચ સર્વે દદૃશુશ્ચ તીર્થં ભક્ત્યોપેતાઃ શ્રીનિવાસં સ્મરન્તઃ ॥ ૩,૨૪.૬૧॥

કન્યોવાચ ।
કિં નામકં તીર્થમિદં મુનીન્દ્ર કિં કાર્યમત્ર પ્રવદાસ્માન્કૃતીશ ।
કસ્મૈ પ્રસન્નો ભગવાઞ્છ્રીનિવાસસ્ત્વસ્મિન્સુતીર્થં વદ વિસ્તરેણ ॥ ૩,૨૪.૬૨॥

જૈગીષવ્ય ઉવાચ ।
કન્યે શ‍ૃણુ ત્વં હ્યભવત્સુબુદ્ધિમાન્પ્રહ્લાદસંજ્ઞો હરિભક્તવર્યઃ ।
નિષ્કામબુદ્ધ્યા તુ યદા જગામ શેષાચલસ્થં શ્રીનિવાસં ચ દ્રષ્ટુમ્ ॥ ૩,૨૪.૬૩॥

અસ્મિંસ્થલે દૈત્યકુમારકાન્પ્રતિ હરેશ્ચ તત્ત્વં પરિપૃષ્ટવાન્પ્રભુઃ ।
નૃસિંહરૂપં શ્રીનિવાસં ભજસ્વ સુદુર્લભં માનુષં જન્મ કન્યે ॥ ૩,૨૪.૬૪॥

તત્રાપિ વિષ્ણોર્નૃહરે સુતત્ત્વં સુદુર્લભં સુષ્ઠુ યાત્રા તથૈવ ।
યસ્યાં યાત્રાયાં યત્ર કુત્રાપિ દેશે હરેઃ કથા વર્તતે દૈત્યવર્યાઃ ॥ ૩,૨૪.૬૫॥

તત્ર સ્થલે હરિરાસ્તે સદૈવ યતો વ્યાપ્તઃ સર્વતો વૈ નૃસિંહઃ ।
એતચ્છ્રુત્વા દૈત્યકુમારકાસ્તે પ્રહ્લાદમૂચુર્ભક્તવર્યં હરેશ્ચ ॥ ૩,૨૪.૬૬॥

વ્યાપ્તો હરિશ્ચેત્કથમત્ર વૈ સખે ન દૃશ્યતે જલરૂપી નૃસિંહઃ ।
સ એવમુક્તો દાનવાનાં સુતૈશ્ચ તુષ્ટાવ વિષ્ણું પરમાદરેણ ॥ ૩,૨૪.૬૭॥

તવ સ્વરૂપં મમ દર્શયસ્વ સ્વયોગ્યરૂપં દાનવાનાં સુતાનામ્ ।
ઇતિ સ્તુતઃ શ્રીનિવાસો હરિસ્તુ તસ્મિન્નન્તર્જલરૂપં સમાયાત્ ॥ ૩,૨૪.૬૮॥

અસ્મિન્સ્નાનં યે પ્રકુર્વન્તિ તીર્થે તેષાં જ્ઞાનં પરમં દૃઢં સ્યાત્ ।
અત્ર સ્નાને માનુષાણાં ચ તાત બુદ્ધિર્ન હિ સ્યાત્કલિકાલે વિશેષાત્ ॥ ૩,૨૪.૬૯॥

દત્ત્વાં વરં દૈત્યવરાય વિષ્ણુરન્તર્દધે જલપૂર્ણે સુકુણ્ડે ।
અદ્યાપ્યાસ્તે જલમધ્યે નૃસિંહઃ પ્રહ્લાદોઽપિ દૈત્યકુમારકૈઃ સહ ॥ ૩,૨૪.૭૦॥

તસ્મિન્સુતીર્થે પરિતસ્તત્રતત્ર જયેતિ શબ્દઃ શ્રૂયતે ચાપરાહ્ણે ।
ઇદં તીર્થં નારસિંહાભિધં ચ કન્યેસ્નાનં હ્યત્ર કાર્યં મનુષ્યૈઃ ॥ ૩,૨૪.૭૧॥

સ્નાનં કૃત્વા તત્ર તીર્થે ચ સમ્યગ્દીપં દત્ત્વા દ્વિજવર્યાય મુખ્યમ્ ।

દ્રષ્ટું પુનઃ શ્રીનિવાસં પ્રજગ્મુર્ગોવિન્દગોવિન્દ ઇતિ બ્રુવન્તઃ ॥ ૩,૨૪.૭૨॥

મુખ્યપ્રાણાધિષ્ઠિતં સ્થાનમાપ્ય અપાવિશત્તત્ર દેવી હ્યુવાચ ।
જૈગીષવ્યઃ શ્રીનિવાસસ્ય વિષ્ણોઃ કથં કાર્યં દર્શનં તદ્વદસ્વ ॥ ૩,૨૪.૭૩॥

જૈગીષવ્યઃ પ્રાહ સંહૃષ્ટચિત્તો બ્રવીમિ તન્ત્રં શ‍ૃણુ કન્યકે ત્વમ્ ।
શ્રુત્વા મત્તઃ કુરુ સર્વં મયોક્તમાદ્યં દ્વારં શ્રીનિવાસસ્ય દૃષ્ટ્વા ॥ ૩,૨૪.૭૪॥

અપરાધસહસ્રાણિ ક્રિયન્તેઽહર્નિશં મયા ।
તાનિ સર્વાણિ મે દેવ ક્ષમસ્વ પુરુષોત્તમ ॥ ૩,૨૪.૭૫॥

માનસાન્વાચિકાન્દોષાન્કાયિ કાનપિ સર્વશઃ ।
વૈષ્ણવદ્વેષહેતૂન્મે ભસ્મસાત્કુરુ માધવ ॥ ૩,૨૪.૭૬॥

આદ્યદ્વારં શ્રીનિવાસસ્ય દેવિ સમ્યક્સ્મરેદ્વિજયં વૈ જયં ચ ।
દક્ષાધ્વરે શ્રીનિવાસસ્ય દેવિ ચણ્ડં પ્રચણ્ડં સંસ્મરેત્સમ્યગેવ ॥ ૩,૨૪.૭૭॥

પાશ્ચાત્યભાગે શ્રીનિવાસસ્ય દેવિ નન્દં સુનન્દં સંસ્મરેદેવ ભક્ત્યા ।
સવ્યદ્વારે શ્રીનિવાસસ્ય કન્યે સ્મરેત્કુમુદાક્ષં કુમુદન્તમેવ ॥ ૩,૨૪.૭૮॥

યશ્ચૈવ દેહં પ્રવિશેદ્ભક્તિપૂર્વં કદા દ્રક્ષ્યે સાદરેણૈવ દેવિ ।
પ્રદક્ષિણદ્વાદશકં ચ કૃત્વા પદે પદે સંસ્મરેચ્છ્રીનિવાસમ્ ॥ ૩,૨૪.૭૯॥

શ્રીસ્વામિતીર્થે સમ્યગાચમ્ય નત્વા સ્નાત્વા નત્વા ભૂવરાહં ચ દેવિ ।
અયુદ્વારં પ્રિવશેદ્ભક્તિપૃર્વં ગોવિન્દગોવિન્દ ઇતિબ્રુવન્વૈ ॥ ૩,૨૪.૮૦॥

પશ્ચાદ્ધરેર્નમનં કાર્યમેવ સાષ્ટાઙ્ગરૂપં પ્રવિશેદ્દેવગેહમ્ ।
પુનર્વિશેદ્વારતઃ સંસ્થિતઃ સ પીઠસ્થદેવાન્માનસા ચિન્તયીત ॥ ૩,૨૪.૮૧॥

મધ્યે પીઠં શ્રીનિવાસં ચ દેવી નારાયણં પ્રણમેત્પૂર્ણમેવ ।
દેવસ્ય સવ્યે પીઠભાગાદ્વહિશ્ચ નમસ્કાર્યં ગુરુદેવાય ચૈવ ॥ ૩,૨૪.૮૨॥

પીઠસ્યાગ્રાચ્ચાપ્યધસ્તાત્પ્રદેશે આગ્નેયકોણે પ્રણમેદ્વૈ ખગેન્દ્ર ।
નૈરૃત્યભાગે વ્યાસદેવાય દેવિ નમસ્કાર્યો વૈષ્ણવઃ સર્વદાપિ ॥ ૩,૨૪.૮૩॥

વાયવ્યકોણે ભક્તિપૂર્વં સુદુર્ગાં નમસ્કુર્યાદ્ભક્તિસંવર્ધિતાત્મા ।
પીઠસ્યોર્ધ્વં હ્યગ્નિકોણેષુ દેવી ધર્માધિભૂતાય નમો યમાય ॥ ૩,૨૪.૮૪॥

પીઠસ્યોર્ધ્વં નૈરૃતસ્યોર્ધ્વકોણે જ્ઞાનાધિપં પ્રણમેદ્વાયુદેવમ્ ।
પીઠસ્યોર્ધ્વં વાયુકોણે ચ સુભ્રૂર્વૈરાગ્યાનામધિપં ચૈવ રુદ્રમ્ ॥ ૩,૨૪.૮૫॥

પીઠસ્યોર્ધ્વં ત્વીશકોણે ચ દેવિ ઐશ્વર્યાણામધિપં ચેન્દ્રદેવમ્ ।
પીઠસ્ય પૂર્વે પ્રણમેન્નૈરૃતિં ચ અર્યામ્ણાનામધિપં ચાત્ર દેવિ ॥ ૩,૨૪.૮૬॥

દેવસ્ય પીઠસ્ય ચ દક્ષિણે ચ દુર્ગાં નમેદુગ્રરૂપાભિધાં ચ ।
પીઠસ્ય કન્યે પ્રણમેત્પશ્ચિમે વૈ આરોગ્યાણા મધિપં કામદેવમ્ ॥ ૩,૨૪.૮૭॥

દેવસ્ય પીઠસ્યોત્તરે રુદ્રદેવમનૈશ્વર્યાણામધિપં સંસ્મરેચ્ચ ।
પીઠસ્ય મધ્યે પ્રણમેદ્વૈ વરાહં સદા કન્યે પરમં પૂરુષાખ્યમ્ ॥ ૩,૨૪.૮૮॥

તસ્યોપરિષ્ટાચ્છક્તિસંજ્ઞાં ચ લક્ષ્મીમાધારરૂપાં પ્રણમેચ્ચૈવ નિત્યમ્ ।
તસ્યોપરિષ્ટાદ્વાયુકૂર્મૌ નમેચ્ચ તસ્યોપરિષ્ટાચ્છેષકૂર્મૌ નમેચ્ચ ॥ ૩,૨૪.૮૯॥

તસ્યોપરિષ્ટાદભિમાનિનીં ભુવો ભૂદેવતાં પ્રણમેચ્ચૈવ સુભ્રૂઃ ।
તસ્યોપરિષ્ટાદ્વરુણં સંસ્મરેચ્ચ ક્ષીરોદધેરધિપં ચૈવ દેવમ્ ॥ ૩,૨૪.૯૦॥

તસ્યોપરિષ્ટાત્પ્રણમેચ્ચૈવ લક્ષ્મીં શ્વેતદ્વીપાખ્યં કન્યકે પૂજયેચ્ચ ।
તસ્યોપરિષ્ટાત્પ્રણમેચ્ચૈવ લક્ષ્મીં મહાદિવ્યાં મણ્ડપસંજ્ઞકાં ચ ॥ ૩,૨૪.૯૧॥

પીઠસ્ય મધ્યે યમસંજ્ઞાં ચ લક્ષ્મીં સમર્ચયેદ્યમમધ્યે ચ દેવીમ્ ।
યમસ્ય દેવસ્ય ચ દક્ષિણે ચ સૂર્યં નમેદ્દીપરૂપં ચ ભદ્રે ॥ ૩,૨૪.૯૨॥

યમસ્ય દેવસ્ય ચ વામભાગે શ્રિયં નમેદ્દીપરૂપાં ચ દેવીમ્ ।
યમસ્ય દેવસ્ય તુ ચાગ્રભાગે હુતાશનં દીપરૂપં નમેચ્ચ ॥ ૩,૨૪.૯૩॥

દેવસ્યાગ્રે ભૂમિનામ્નીં નમેચ્ચ તત્ત્વાભિમાનાં સંસ્મરેચ્ચૈવ નિત્યમ્ ।
પર્યઙ્કરૂપં શ્રીનિવાસસ્ય વિષ્ણોસ્તમોભિમાનાં સન્નમેચ્ચૈવ દુર્ગામ્ ॥ ૩,૨૪.૯૪॥

પૂર્વાદિગં પીઠસોપાનરૂપમાત્માનમેકં પ્રણમેચ્ચ દેવિ ।
દક્ષસ્થદિક્પીઠસોપાનરૂપં જ્ઞાનાત્મકં પ્રણમેચ્ચૈવ કન્યે ॥ ૩,૨૪.૯૫॥

પદ્મસ્ય પૂર્વસ્થદલે ચ દેવિ સ્ત્રીરૂપાખ્યં વિમલાખ્યામિમાં ચ ।
બ્રહ્માદિદેવાન્પ્રણમેચ્ચ દેવિ આગ્નેયકોણસ્થદલે શ઼ૃણુત્વમ્ ॥ ૩,૨૪.૯૬॥

ઉત્કર્ષનામ્નીં પરમાં ચ દેવીં નમેદ્રમાં બ્રહ્મવાયૂ ચ શેષમ્ ।
દક્ષસ્થપદ્મસ્ય દલાષ્ટકે ચ નારાયણાકારશેષાદિકાનામ્ ॥ ૩,૨૪.૯૭॥

સ્ત્રીરૂપેભ્યો નમનં કાર્યમેવ કન્યે મયા પશ્ચિમસ્થે દલે ચ ।
ગોપાખ્યનારાયણબ્રહ્મવાયુવિપ્રાદિકાનાં શેષરુદ્રાદિકાનામ્ ॥ ૩,૨૪.૯૮॥

સ્ત્રીરૂપેભ્યો નમનં કાર્યમેવ ઈશાન કોણસ્થદલેષુ ચૈવ ।
ઈશાનનારાયણમાવિરિઞ્ચવાયુર્વિયચ્છેષસુરાદિકાનામ્ ॥ ૩,૨૪.૯૯॥

સ્ત્રીરૂપેભ્યો નમનં કાર્યમેવ તથૈવ પદ્મસ્ય ચ મધ્યભાગે ।
અનુગ્રહાખ્યા વિષ્ણુલક્ષ્મીશ્ચ દેવી વાયુર્વિયચ્છેષરુદ્રાદિકાનામ્ ॥ ૩,૨૪.૧૦૦॥

સ્ત્રીરૂપાણાં નમનં કાર્યમેવ સુયોગપીઠસ્ય સ્વરૂપ ભૂતમ્ ।
સદા નમેચ્છ્રીમદનન્તસંજ્ઞમેવં ન મેચ્છ્રીનિવાસં ચ દેવમ્ ॥ ૩,૨૪.૧૦૧॥

શ્રીનિવાસસ્ય વામે તુ લક્ષ્મીં ચ પ્રણમેદ્બુધઃ ।
શ્રીનિવાસસ્ય સવ્યે તુ ધરાયૈ પ્રણમેચ્છુભે ॥ ૩,૨૪.૧૦૨॥

પીઠાદ્બહિઃ પૂર્વભાગે કૃપોલ્કં પ્રણમેચ્છુભમ્ ।
મહોલ્કં દક્ષિણે ચૈવ વીરોલ્કં પશ્ચિમે નમેત્ ॥ ૩,૨૪.૧૦૩॥

ઉત્તરે ચ નમઃ કુર્યાદ્યુલ્કાય ચ મહાત્મને ।
ચતુર્ષ્વપિ ચ કોણેષુ સહસ્રોલ્કં નમેત્સુધીઃ ॥ ૩,૨૪.૧૦૪॥

પૂર્વે તુ વાસુદેવાય નમસ્કુર્યાચ્ચ દક્ષિણે ।
સંકર્ષણાય દેવાય પ્રદ્યુમ્નાય ચ પશ્ચિમે ॥ ૩,૨૪.૧૦૫॥

ઉત્તરે હ્યનિરુદ્ધ્યા નમસ્કુર્યાદતન્દ્રિતઃ ।
આગ્નેયે ચ નમસ્કુર્યાત્કન્યે માયાં સદા શુભે ॥ ૩,૨૪.૧૦૬॥

જયાયૈ ચ નમસ્કુર્યાન્નૈરૃત્યે ચાપિ વાયવે ।
કૃત્યે ચૈવ નમસ્કુર્યાદીશાન્યે શાન્તિસંજ્ઞકામ્ ॥ ૩,૨૪.૧૦૭॥

કેશવાય નમઃ પૂર્વે તથા નારાયણાય ચ ।
માધવાય નમસ્કુર્યાન્નૈરૃત્યે ચાપિ વાયવે ॥ ૩,૨૪.૧૦૮॥

આગ્નેયે કન્યકે નિત્યં ભક્ત્યા તુ પ્રયતઃ શુભે ।
ગોવિન્દાય નમસ્કુર્યાદ્દક્ષિણે વિષ્ણવે તથા ॥ ૩,૨૪.૧૦૯॥

મધુસૂદનાય ભોઃ કન્યે નમસ્કુર્યાત્તુ નૈરૃતૌ ।
પશ્ચિમે ત્રિવિક્રમાય વામનાય તથૈવ ચ ॥ ૩,૨૪.૧૧૦॥

વિષ્ણવે શ્રીધરાયાથ નમસ્કુર્યાચ્ચ ભામિતિ ।
ઉત્તરે તુ મહાકન્યે હૃષીકેશાય વૈ નમઃ ॥ ૩,૨૪.૧૧૧॥

તથા વૈ પદ્મનાભાય નમસ્કુર્યાદતન્દ્રિતઃ ।
દામોદરાય ચૈશાન્યે નમસ્કુર્યાચ્ચ ભામિનિ ॥ ૩,૨૪.૧૧૨॥

ચતુર્થાવરણે પૂર્વે મહાકૂર્માય વૈ નમઃ ।

વરાહાય નમસ્કુર્યાદાગ્નેયે કન્યકે શુભે ॥ ૩,૨૪.૧૧૩॥

દક્ષિણે નારસિંહાય વામનાય નમોનમઃ ।
ભાર્ગવાય નમસ્કુર્યાન્નૈરૃત્યે શુદ્ધચેતસા ॥ ૩,૨૪.૧૧૪॥

પશ્ચિમે માધવાયાથ તથા કૃષ્ણાય વૈ નમઃ ।
બુદ્ધાય ચ નમસ્કુર્યાદ્વાયવ્યે કન્યકે શુભે ॥ ૩,૨૪.૧૧૫॥

ઉત્તરે હ્યુલ્કરૂપાય અનન્તાય નમોઽસ્તુ તે ।
ઈશાન્યે વિશ્વરૂપાય નમસ્કુર્યાદતન્દ્રિતઃ ॥ ૩,૨૪.૧૧૬॥

આગ્નેયે વારુણીં ચૈવ ગાયત્રીં ચૈવ નૈરૃતે ।
વાયવ્યે ભારતીં ચૈવ ઈશાન્યે ગિરિજાં નમેત્ ॥ ૩,૨૪.૧૧૭॥

ગિરિજાં વામભાગે તુ સૌપર્ણીં ચૈવ સંનમેત્ ।
પ્રાગિન્દ્રાય નમસ્કુર્યાત્સાયુધાય તથૈવ ચ ॥ ૩,૨૪.૧૧૮॥

સ પરિગ્રહાય શ્રીવિષ્ણોઃ પાર્ષદાય નમોનમઃ ।
આગ્નેયેત્યગ્નયે તુભ્યં સાયુધાયેતિ પૂર્વવત્ ॥ ૩,૨૪.૧૧૯॥

દક્ષિણે તુ યમાયૈવ નૈરૃત્યાં નિરૃતિં યજેત્ ।
પશ્ચિમે વરુણાયૈવ વાયવ્યે વાયવે નમઃ ॥ ૩,૨૪.૧૨૦॥

ઉત્તરે ચ કુબેરાય ઈશાન્યે ચ શિવાય ચ ।
ઈશાનશક્રયોર્મધ્યે બ્રહ્મણે સાયુધાય ચ ॥ ૩,૨૪.૧૨૧॥

નિરૃત્યપ્પતિમધ્યે તુ શેષાય ચ નમોનમઃ ।
એવં કૃત્વા નમસ્કારં પ્રણમેચ્ચ પુનઃ પુનઃ ॥ ૩,૨૪.૧૨૨॥

ઇત્યેતત્સર્વમાખ્યાતં વિધિપૂર્વં તુ દર્શનમ્ ।
ઇતઃ પરન્તુ ગન્તવ્યં દર્શનાર્થં રમાપતે ॥ ૩,૨૪.૧૨૩॥

એવમુક્ત્વા તુ સા દેવી તૈઃ સાર્ધં તુ યયૌ મુદા ।
યદુક્તઃ શ્રીનિવાસસ્ય દર્શનસ્ય વિધિઃ ખગ ।
કસ્યચિન્નૈવ વક્તવ્યો ગોપ્યત્વાચ્ચ કદાચન ॥ ૩,૨૪.૧૨૪॥

સમાગમો દુર્ઘટ એવ વીન્દ્ર સતાં ચ સત્તત્ત્વવિબોધકાનામ્ ।
અનેકજન્માર્જિતપુણ્યસંચયાદભૂદ્ગુરોઃ સંગમ એવ તસ્ય ॥ ૩,૨૪.૧૨૫॥

પયો વિકારં ચ નિજં જહાતિ શેષસ્ય શેષં નલિનસ્ય ષડ્ઙ્ગજમ્ ।
ભાવં ચલં પઙ્કજનાભયોગાત્સત્સંગયોગાદશુભાનિ ન સ્યુઃ ॥ ૩,૨૪.૧૨૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
શ્રીવેઙ્કટેશગિર્યારોહણક્રમતદ્ભક્તતત્પર્વતનામાદિનિરૂપણં નામ ચતુર્વિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૫
સા દ્વારદેશે શ્રીનિવાસસ્ય દેવી સ્વામિપુષ્કરિણીં દદૃશે કૈશ્ચ સાર્ધમ્ ।
સ્વામિન્હરે શ્રીનિવાસેતિ સા તં બ્રહ્માદીનાં તારકં સમ્પ્રદધ્યૌ ॥ ૩,૨૫.૧॥

દેવૈઃ સાર્ધં પાલનાર્થં ચ વિષ્ણુરસ્ત્યેવ નિત્યં પુષ્કરિણ્યાં જલેષુ ।
અતઃ સ્વામિપુષ્કરિણીતિ ચાહુસ્તત્ર સ્નાનં કન્યકાન્યાશ્ચ ચક્રુઃ ॥ ૩,૨૫.૨॥

શુચિર્ભૂત્વા શ્રીનિવાસં ચ દેવાસ્તુમું વિવિશુઃ શુદ્ધભક્ત્યા ખગેન્દ્ર ।
યથોપદિષ્ટં ગુરુણા તથૈવ ચક્રે કન્યાશ્ચ સર્વં ખગેન્દ્ર ॥ ૩,૨૫.૩॥

તદા હરિં દર્શયામાસ તસ્યૈ સ્વકં રૂપં સુપ્રતીકે સુપૂર્ણમ્ ।
સા કન્યકા શ્રીનિવાસસ્ય રૂપં દદર્શ ભક્ત્યા સ્વમનોભિરામમ્ ॥ ૩,૨૫.૪॥

સુવર્ણચિત્રં વસનં વસાનં સોષ્ણીષકં કઞ્ચુકં સંદધાનમ્ ॥ ૩,૨૫.૫॥

મૃગોત્થમદગન્ધેન સુરભીકૃતદિઙ્મુખમ્ ।
પુણ્ડરીકવિશાલાક્ષં કંબુગ્રીવં મહાભુજમ્ ॥ ૩,૨૫.૬॥

હેમયજ્ઞોપવીતાઙ્ગં સાક્ષાત્કન્દર્પસન્નિભમ્ ।
જગન્મોહનસૈન્દર્યં કોમલાઙ્ગં મનોહરમ્ ॥ ૩,૨૫.૭॥

દૃષ્ટ્વા ચ કન્યા મુમુદે રોમાઞ્ચિતસુગાત્રકા ॥ ૩,૨૫.૮॥

તદ્દર્શનાહ્લાદપરિપ્લુતાશયા પ્રેમ્ણાથ રોમાશ્રુકુલાકુલેક્ષણા ।
નનર્ત દેવી પુરતસ્તસ્ય વિષ્ણોઃ સા ધ્વસ્તદોષા પરમાદરેણ ।
આનન્દ માં પાહિ સુખં ચ દત્ત્વા મુકુન્દા માં પાહિ વિમુક્તિદાનાત્ ॥ ૩,૨૫.૯॥

માં પાહિ નિત્યં હ્યરવિન્દનેત્ર પ્રસન્નદૃષ્ટ્યા કરુણાસુધાર્દ્ર ।
ગોવિન્દ ગોવિન્દ સુદુઃખિતાં માં જ્ઞાનાદિદાનેન હિ પાહિ નિત્યમ્ ॥ ૩,૨૫.૧૦॥

જનાર્દન ત્વં હિ સુદુષ્ટસંગાન્કામાદિરૂપાન્સતતં વર્જયિત્વા ।
હરે હરે માં સતતં પાહિ દૈત્યાન્સમાહૃત્ય પ્રબલાન્વિઘ્નરૂપાન્ ॥ ૩,૨૫.૧૧॥

રમેશ માં પાહિ ચતુર્મુખેશ વિશ્વેશ માં પાહિ સરસ્વતીશ ।
રમેશ માં પાહિ નિદાનમૂર્તે વૃન્દારવૃન્દૈર્વન્દિતપાદપદ્મ ॥ ૩,૨૫.૧૨॥

એવં તુ નત્વા પરમાદરેણ તુષ્ટાવ વિષ્ણું પરમં પુરાણમ્ ।
લક્ષ્મ્યા સદા યેઽવિદિતા ગુણાશ્ચ અસંખ્યાતાઃ સંતિ વિષ્ણૌ ચ વીશ ॥ ૩,૨૫.૧૩॥

તેષાં સકાશાદતિબાહુલ્યસંખ્યા ગુણા હરૌ તેઽવિદિતા વૈ રમાયાઃ ।
અતો હરે સ્તવને ક્વાસ્તિ શક્તિસ્તથાપિ યત્નં સ્તવને તે કરિષ્યે ॥ ૩,૨૫.૧૪॥

તવ પ્રસાદાચ્ચ રમાપ્રસાદાદ્વિધિપ્રસાદાત્ભારતીશપ્રસાદાત્ ।
રુદ્રપ્રસાદાત્સ્તવનં તે કરિષ્યે તથાપિ વિષ્ણો મયિ શાન્તિં કુરુષ્વ ॥ ૩,૨૫.૧૫॥

યદિ પ્રસન્નોઽસિ મયિ ત્વમીશ ત્વત્પાદમૂલે દેહિ ભક્તિં સદૈવ ।
ત્વદ્દર્શનાદ્દેવ શુભાશુભં ચ નષ્ટં મદીયં હ્યશુભં ચ નિત્યમ્ ॥ ૩,૨૫.૧૬॥

ત્વન્માયયા નષ્ટમિમં ચ લોકં મદેન મત્તં બધિરં ચાન્ધભૂતમ્ ।
ઐશ્વર્યયોગેન ચ યો હિ મૂકો જાતઃ સદા દીનાગુર્વાદિકેષુ ॥ ૩,૨૫.૧૭॥

મા દેહિ ઐશ્વર્યમનુત્તમં ત્વત્પાદારવિન્દસ્ય વિરુદ્ધભૂતમ્ ।
ત્વં દેવ મે દેહિ સતાં ચ સંગં તવ સ્વરૂપપ્રતિપાદકાનામ્ ॥ ૩,૨૫.૧૮॥

પુત્રાદીનામૈહિકં વાસુદેવ દગ્ધ્વા ચ મે દેહિ પાદારવિન્દે ।
સદ્વૃષણવે ક્રિયમાણં ચ કોપં દગ્ધ્વા ચ મે દેહિ પાદરવિન્દે ॥ ૩,૨૫.૧૯॥

દ્રવ્યાદિકે ક્રિયમાણં ચ લોભં દગ્ધ્વા વૈ મે દેહિ પાદાબ્જમૂલે ।
પુત્રાદિકે ક્રિયમાણં ચ મોહં દગ્ધ્વા ચ મે દેહિ પાદાબ્જમૂલે ॥ ૩,૨૫.૨૦॥

વિદ્યાં પુત્રં દ્રવ્યજાતં મદં ચ દગ્ધ્વા ચ મે દેહિ પાદાબ્જમૂલે ।
સદ્દ્વૈષણવાસહમાનસ્વરૂપં દગ્ધ્વા માત્સર્યં પાહિ માં વેઙ્કટેશ ॥ ૩,૨૫.૨૧॥

મન્ત્રં ચ મે દેહિ નિદાનમૂર્તે યેનૈવ મે સ્યાત્તવ સંગશ્ચ ભૂયઃ ।
નાન્યં વૃણે તવ પાદાબ્જસંગાત્તદેવ મે દેહિ મમ પ્રસન્નઃ ॥ ૩,૨૫.૨૨॥

ઇતીરિતઃ શ્રીનિવાસઃ પ્રસન્ન ઉવાચ દેવો હ્યમૃતસ્ત્રવં ચ ।
અત્રૈવ કન્યે પ્રજપસ્વ મન્ત્રં સુગોપ્યરૂપં પરમાદરેણ ॥ ૩,૨૫.૨૩॥

વક્ષ્યામિ મન્ત્રં પરમાદરેણ શ ૃણ્વદ્ય ભક્ત્યા પરમાદરેણ ।
અન્તઃ સ્થમન્ત્યં હ્યાદ્યસંયુક્તમેવ સબિન્દુ તદ્વત્સ્પર્શકાદ્યેન યુક્તમ્ ॥ ૩,૨૫.૨૪॥

એકારયુક્તં પ્રથમાન્તઃ સ્થયુક્તં સમત્રિકોણે ચોષ્મણા સંયુતં ચ ।
તકારસક્તં સ્વર્શમન્તઃ સ્થયુક્તમાદ્યન્ત ઓંકારસમન્વિતં ચ ॥ ૩,૨૫.૨૫॥

અનેન મન્ત્રેણ તવેપ્સિતં ચ ભવેદ્ધિ કન્યે નાન્ત્ર વિચાર્યમસ્તિ ।
એવં સ ઉક્ત્વા શ્રીનિવાસો હરિસ્તુ પ્રતીકવદ્દર્શયામાસ રૂપમ્ ॥ ૩,૨૫.૨૬॥

નત્વા તુ સા શ્રીનિવાસં ચ દેવી ઉવાસ હ સ્વામિસરઃ સમીપે ।
તસ્મિન્દિને બ્રાહ્મણાદીંશ્ચ સર્વાન્સંતર્પયામાસ ચ ષડ્રસાન્નૈઃ ॥ ૩,૨૫.૨૭॥

સાયઙ્કાલે શ્રીનિવાસસ્ય દૃષ્ટ્વા ઉત્સાહરૂપૈઃ શ્રીનિવાસપ્રતીકૈઃ ।
સાકં ભક્ત્યા સમ્પ્રણમ્યાથ દેવી પ્રદક્ષિણં શ્રીનિવાસસ્ય સુષ્ઠુ ॥ ૩,૨૫.૨૮॥

નનર્ત દેવી સુપ્રતીકસ્ય ચાગ્રે લજ્જાં ત્યક્ત્વા જય દેવેતિ ચોક્ત્વા ।
આનૃત્તકાલે ચ હરેશ્ચ વક્ત્રં દૃષ્ટ્વા ચ દૃષ્ટ્યા તુ પરં નનર્ત ॥ ૩,૨૫.૨૯॥

મમાદ્ય ગાત્રં પાવિતં શ્રીનિવાસ મમાદ્ય નેત્રં સફલં સંબભૂવ ।
મમાદ્ય પાદૌ સાર્થકૌ ચૈવ જાતૌ પ્રદક્ષિણં શ્રીનિવાસેશ કૃત્વા ॥ ૩,૨૫.૩૦॥

હસ્તૌ ચ મે સાર્થકાવદ્ય જાતૌ અગ્રે કૃત્વા હસ્તશબ્દં મુરારેઃ ।
એવં વદન્તી પ્રીણયન્તી ચ દેવં જગામસા સ્તોત્રવચઃ કદમ્બૈઃ ॥ ૩,૨૫.૩૧॥

દેવાસ્તદા દુન્દુંભયો વિનેદિરે તન્મસ્તકે પુષ્પવૃષ્ટિં ચ ચક્રુઃ ।
તસ્મિન્કાલે ઉભયોઃ પાર્શ્વયોશ્ચ નૃત્યં ચક્રુર્દેવતાવારનાર્યઃ ॥ ૩,૨૫.૩૨॥

તથૈવ તાસ્તલશબ્દં ચ કૃત્વા તદા સર્વા નમનં ચાપિ ચક્રુઃ ।
આનન્દશૈલે સર્વદા ત્વિત્થમેવ સા સર્વદા નર્તયન્તી ચ વીન્દ્ર ॥ ૩,૨૫.૩૩॥

આનન્દમગ્ના સાપિ દેવી જગામ સ્વમાશ્રમં જૈગિષવ્યેણ સાર્ધમ્ ।
યાત્રામેવં યે ન કુર્વન્તિ વીન્દ્ર તેષાં ચ સર્વં નિષ્ફલં ચાહુરાર્યાઃ ॥ ૩,૨૫.૩૪॥

ગત્વાશ્રમં જૈગિષવ્યેણ સાર્ધં ગુરું ત્વપૃચ્છદ્વેઙ્કટેશસ્ય મન્ત્રમ્ ।
મન્ત્રસ્યાર્થં બ્રૂહિ મે જૈગિષવ્ય મન્ત્રાવૃત્તિં કુર્વતાં વૈ ફલાય ॥ ૩,૨૫.૩૫॥

જૈગીષ્વ્ય ઉવાચ ।
શૃણુષ્વ ભદ્રે વેઙ્કટે શસ્ય નામ્નસ્ત્વર્થં શ્રુત્વા હૃદયે સંનિધત્સ્વ ॥ ૩,૨૫.૩૬॥

વિતિ હ્યુત્તમવાચી સ્યાદ્યેતિ જ્ઞાનમુદાહૃતમ્ ।
કકારઃ સુખવાચી સ્યાટ્ટેતિ ચિત્તમુદાહૃતમ્ ॥ ૩,૨૫.૩૭॥

ઈશત્વમાત્મવાચિ સ્યાદેવં જ્ઞેયં તુ કન્યકે ।
પૂર્ણજ્ઞાનં સુખં વિત્તં વ્યાપ્તત્વાદ્વ્યઙ્કુટાભિધઃ ॥ ૩,૨૫.૩૮॥

વ્ય (વે) મિન્દ્રિયાદિકં પ્રોક્તં વ્યઙ્ગભૂતં હરૌ યતઃ ।
કટશ્ચ સમુદાયાર્થો વ્યં (વેં) કટશ્ચેન્દ્રિયૌઘકઃ ॥ ૩,૨૫.૩૯॥

સ્વસ્મિન્પ્રેરયતે યસ્માત્તસ્માદ્વ્યઙ્કુટનામકઃ ।

વિષયે પ્રેષયેન્નિત્યમતો વ્યઙ્કુટનામકઃ ॥ ૩,૨૫.૪૦॥

વિશિષ્ટજ્ઞાનરૂપત્વાદ્વ્યેતિ મુક્તાઃ સદા સ્મૃતાઃ ।
મુક્તાનાં ચ સમૂહસ્તુ વ્યઙ્કુટેતિ પ્રકીર્તિતઃ ॥ ૩,૨૫.૪૧॥

સદા મુક્તસમૂહાનામીશત્વાદ્વ્યઙ્કુટાભિધઃ ।
લિઙ્ગદેહમતો જીવો વ્યઙ્કુટેતિ સમાહૃતઃ ॥ ૩,૨૫.૪૨॥

લિઙ્ગાનાં ચૈવ સ્વામિત્વાદ્વ્યઙ્કુટેશેતિ સંજ્ઞિતઃ ।
દૈત્યાનાં ચ સમૂહાસ્તુ જ્ઞાનાદિવિધુરા યતઃ ।
અતો દૈત્યસમૂહસ્તુ વ્યઙ્કુટેતિ પ્રકીર્તિતઃ ॥ ૩,૨૫.૪૩॥

તેષાં સંહરણે ઈશસ્ત્વતો વ્યઙ્કુટનામકઃ ।
આનન્દસ્ય વિરુદ્ધત્વાત્કામક્રોધાદયો ગુણાઃ ॥ ૩,૨૫.૪૪॥

વ્યઙ્કુટા ઇતિ સમ્પ્રોક્તાસ્તેષાં નાશયિતા પ્રભુઃ ।
અતસ્તુ વ્યઙ્કુટેશાખ્ય એવં જ્ઞાત્વા જપં કુરુ ॥ ૩,૨૫.૪૫॥

એવં વ્યઙ્કુટામાહાત્મ્યં શ્રુત્વા દેવી ખગેશ્વર ।
નિદ્રાં ચકાર તત્રૈવ રાત્રૌ પિત્રા સહૈવ ચ ।
બ્રાહ્મે મુહૂર્તે ચોત્થયિ હૃદિ સસ્માર કન્યકા ॥ ૩,૨૫.૪૬॥

(વ્યઙ્કુટેશસ્ય પ્રાતઃ સ્તુતિઃ) ।
શ્રીવ્યઙ્કુટેશશ્ચ નૃસિંહમૂર્તિઃ શ્રીવરદરાજશ્ચ વરાહમૂર્તિઃ ।
શ્રીરઙ્ગશાયી ચ અનન્તશાયી કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૩,૨૫.૪૭॥

શ્રીકૃષ્ણમૂર્તિશ્ચ ગદાધરશ્ચ શ્રીવિષ્ણુપાદસ્તુ પ્રયાગવાસઃ ।
નારાયણઃ શ્રીબદરીનિવાસઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૩,૨૫.૪૮॥

દામોદરો વૈ ત્રિજગન્નિવાસઃ શ્રીપાણ્ડુરઙ્ગશ્ચ નૃસિંહદેવઃ ।
શ્રીરામદેવશ્ચ અમોઘવાસઃ કુદૃ ॥ ૩,૨૫.૪૯॥

શ્રીધર્મપુત્રશ્ચ નૃસિંહમૂર્તિઃ શ્રીપિપ્પલસ્થશ્ચ મુહલ્લવાસઃ ।
કોલાનૃસિંહઃ શૂર્પકારસ્થ સિંહઃ કુર્વન્તુદૃ ॥ ૩,૨૫.૫૦॥

ચતુર્મુખશ્ચારુસરસ્વતી ચ સ્વભારતી શર્વસુપર્ણશેષાઃ ।
અમામહેદ્રશ્ચ શચીમુખાસ્તાઃ કુર્વન્તુ દૃ ॥ ૩,૨૫.૫૧॥

દ્વારાવતી કાશિકાવન્તિકા ચ પ્રયાગકાઞ્ચ્યૌ મથુરાપુરી ચ ।
માયાવતી હસ્તિમતી પુરી ચ કુર્વન્તુ સ દૃ ॥ ૩,૨૫.૫૨॥

ભાગીરથી ચૈવ સરસ્વતી ચ ગોદાવરી સિંધુકૃષ્ણ ચ વેણી ।
કલિન્દકન્યા યમુના ચ નર્મદા કુર્વ દૃ ॥ ૩,૨૫.૫૩॥

વિતસ્તિકાવેરિસતુઙ્ગભદ્રાઃ સુવઞ્જરા ભીમરથી વિપાશા ।
સુતામ્રપર્ણી ચ પિનાકિની ચ કુ દૃ ॥ ૩,૨૫.૫૪॥

સ્વામિપુષ્કરિણી ચૈવ સુવર્ણમુખરી તથા ।
શ્રીપાણ્ડવી તૌબરુશ્ચ કપિલા પાપનાશની ॥ ૩,૨૫.૫૫॥

ગુરુર્વસિષ્ઠઃ ક્રતુરઙ્ગિરાશ્ચ મનુઃ પુલસ્ત્યઃ પુલહશ્ચ ગૌતમઃ ।
રૈભ્યો મરીચિશ્ચ્યવનશ્ચ દક્ષઃ કુર્વન્તુ સર્વે મમ સુપ્રભાતમ્ ॥ ૩,૨૫.૫૬॥

સપ્તાર્ણવાઃ સપ્ત કુલાચલાશ્ચ દ્વીપાશ્ચ સપ્તોપવનાનિ સપ્ત ।
ભૂરાદિકાનિ ભુવનાનિ સપ્ત કુર્વન્તુ સ દૃ ॥ ૩,૨૫.૫૭॥

માન્ધાત્રા નહુષોંબરીષસગરૌ રાજા નલો ધર્મરાટ્પ્રહ્લાદઃ
ક્રતુરાડ્વિભીષણગયૌ વ્યાસો હનૂમાનપિ ।
અશ્વત્થામ કૃપાવુમા દ્રુપદજા શ્રીજાનકી તારકા મન્દોદર્યખિલાઃ
પ્રભાતસુમહં કુર્વન્તુ નિત્યં હરે ॥ ૩,૨૫.૫૮॥

અશ્વત્થસ્ય વનાનિ કિં ચ તુલસીધાત્રીવનાનિ પ્રભો પુન્નાગસ્ય
વનાનિ ચંપકવનાન્યન્યાનિ પુષ્પાણિ ચ ।
મન્દારસ્ય વનાનિ યાનિ ચ હરેઃ સૌગન્ધિકાન્યપ્યહો નિત્યં તાનિ
દિશન્તુ મત્પ્રમુદિતં શ્રીવેઙ્કટેશ પ્રભો ॥ ૩,૨૫.૫૯॥

એવં સ્મૃત્વા શ્રીનિવાસસ્ય દેવી કૃત્વા શૌચં જૈગિષવ્યેણ સાકમ્ ।
સ્નાતું યયૌ પુષ્કરિણીં હરેશ્ચ સ્નાનં સમ્યક્તત્ર ચકાર દેશે ।
સમ્યગ્જપ્ત્વા વ્યઙ્કટેશસ્ય મન્ત્રમુવાચ સા જૈગિષવ્યં ગુરું ચ ॥ ૩,૨૫.૬૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
દેવી કૃતવેઙ્કટેશદર્શનતત્સ્તુત્યાદિવર્ણનં નામ પઞ્ચવિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૬
કન્યોવાચ ।
શ્રીનિવાસઃ કિમર્થં વૈ આગતોત્ર વદસ્વ મે ।
શેષાચલોઽપિ કુત્રા ભૂત્કદાયાતશ્ચ પાપહા ।
સ્વામિપુષ્કરિણી ચાત્ર કિમર્થં હ્યગતા વદ ॥ ૩,૨૬.૧॥

જૈગીષવ્ય ઉવાચ શ ृણુ ભદ્રે મહાભાગે વ્યઙ્કટેશસ્ય ચાગમમ્ ।
આવયોર્દેવિ પાપાનિ વિષમં યાન્તિ ભામિનિ ॥ ૩,૨૬.૨॥

આસીત્પુરા હિરણ્યાક્ષઃ કાશ્યપો દિતિનન્દનઃ ।
સનકાદેશ્ચ વાગ્દણ્ડાદ્વિતીયદ્વારપાલકઃ ॥ ૩,૨૬.૩॥

બભૂવ દૈત્યયોનૌ ચ દેવાનાં કણ્ટકો બલી ।
સંજીવો વિજયઃ પ્રોક્તો હરિભક્તો મહાપ્રભુઃ ॥ ૩,૨૬.૪॥

હરિણ્યાક્ષઃ સ્વયં દૈત્યો હરિભક્તવિદૂષકઃ ।
એતાદૃશો હિરણ્યાક્ષસ્તપસ્તમું સમુદ્યતઃ ॥ ૩,૨૬.૫॥

તદા માતા દિતિર્દેવી હિરણ્યાક્ષમુવાચ સા ।
દિતિરુવાચ ।
વત્સલસ્ત્વં મહાભાગમા તપસ્વાષ્ટહાયનઃ ॥ ૩,૨૬.૬॥

ત્વં મા દદસ્વ દુઃખં મે પાલયિષ્યતિ કોવિદઃ ।
ક્ષણમાત્રં ન જીવામિ ત્વાં વિના જીવનં ન હિ ॥ ૩,૨૬.૭॥

મા તપ ત્વં મહાભાગ મમ જીવનહેતવે ।
એવમુક્તસ્તુ માત્રા સ વિજયોવશતોબ્રવીત્ ॥ ૩,૨૬.૮॥

હિરણ્યાક્ષો માતરં પ્રાહ જાલં હિત્વા વિષ્ણોર્ભજનેઽલં કુરુષ્વ ।
મયિસ્નેહં પુત્રહેતોર્વિરૂઢં સુખદુઃખે ચેહ લોકે પરત્ર ॥ ૩,૨૬.૯॥

યાવત્સ્નેહં મયિ માતઃ કરોષિ તાવત્ક્લેશં શાશ્વતં યાસ્યસિ ત્વમ્ ।
માતશ્ચ તે મયિ પુત્રત્વબુદ્ધિસ્ત્વય્યપ્યેષા માતૃબુદ્ધિર્મમાપિ ॥ ૩,૨૬.૧૦॥

તાતે પૂજ્યે પિતૃબુદ્ધિર્મમાસ્તિ તસ્મિંસ્તુતે ભર્તૃબુદ્ધિર્હિ મિથ્યા ।
નિર્માતિ યસ્માદ્ધરિરેવ સર્વં સમ્યક્પાતા નિયતોઽસૌ મુરારિઃ ॥ ૩,૨૬.૧૧॥

અતો હિ માતા હરિરેવ સર્વદા ત્વન્યાસાં વૈ માતૃતા ચોપચારાત્ ।
નિર્માતૃત્વં યદિ મુખ્યં ત્વયિ સ્યાદ્દ્રોણાદીનાં જનની કા વદસ્વ ॥ ૩,૨૬.૧૨॥

માતૃત્વં વૈ યદિ મુખ્યં ત્વયિ સ્યાદ્ધાત્રાદીનાં જનની કા વદસ્વ ।
યતઃ સદા યાતિ જગત્તતો હરિઃ સદા પિતા વિષ્ણુરજઃ પુરાણઃ ॥ ૩,૨૬.૧૩॥

સદા પિતા મુખ્યપિતા યદિ સ્યાદ્ગર્ભસ્થબાલે પાલકઃ કો વદસ્વ ।
માતાપિત્રોઃ પાલકત્વં યદિ સ્યાત્કૂર્માદીનાં પાલકૌ કૌ વદસ્વ ॥ ૩,૨૬.૧૪॥

માતાપિત્રોઃ પાલકત્વં યદિ સ્યાત્કૃપાદીનાં રક્ષકૌ કૌ વદસ્વ ।

પુન્નામકાન્નારકાદ્દેહ ભજાન્તસ્માત્ત્રાતાપુત્રવિષ્ણુઃ પુરાણઃ ॥ ૩,૨૬.૧૫॥

ન તારકોઽહં નરકાચ્ચ સુભ્રૂર્ન વૈ ભર્તા નાપિ પિત્રાદયશ્ચ ।
ન વૈ માતા નાનુજાદિશ્ચ સર્વઃ સર્વત્રાતા વિષ્ણુરતો ન ચાન્યઃ ॥ ૩,૨૬.૧૬॥

માયાં મદીયાં જ્ઞાનશસ્ત્રેણ છિત્વા ભક્ત્યા હરેઃ સ્મરણં ત્વં કુરુષ્વ ।
યદ્ભક્તિરૂપૂર્વં સ્મરણં નામ વિષ્ણોસ્તત્સર્વથા પાપહરં ચ માતઃ ॥ ૩,૨૬.૧૭॥

યો વા ભક્ત્યા સ્મરણં નામ વિષ્ણોઃ કરોત્યસૌ પાપહરો ભવિષ્યતિ ।
અયં દેહો દુર્લ્લભઃ કર્મભૂમૌ તત્રાપિ મધ્યે ભજનં વિષ્ણુમૂર્તેઃ ॥ ૩,૨૬.૧૮॥

આયુર્ગતં વ્યર્થમેવ ત્વદીયં શીઘ્રં ભજેઃ શ્રીનિવાસસ્ય પાદમ્ ।
ઉપદિશ્યૈવં માતરં પુત્રવર્યો દૈત્યાવેશાત્સોભવદ્વૈ તપસ્વી ॥ ૩,૨૬.૧૯॥

ચતુર્મુખં પ્રીણયિત્વૈવ ભક્ત્યા હ્યવધ્યત્વં પ્રાપ તસ્માન્મહાત્મા ।
તતો ભૂમિં કરવદ્વેષ્ટયિત્વા નિન્યે તદા દૈત્યવર્યો મહાત્મા ॥ ૩,૨૬.૨૦॥

શ્રીમુષ્ટદેશે પ્રાદુરાસીદ્ધરિસ્તુ વારાહવિષ્ણુસ્ત્વજનઃ પુરાણઃ ।
ભિત્ત્વાચાબ્ધિં વિવિશે તં મહાત્મા રસાતલે સંસ્થિતં ભૂતલં ચ ॥ ૩,૨૬.૨૧॥

સ્વદંષ્ટ્રાગ્રે સ્થાપયિત્વાઽજગામ તદાગમાદાગતો દૈત્યવર્યઃ ।
તં કર્ણમૂલે તાડયિત્વા જઘાન પ્રસાદયામાસ ચ પૂર્વવદ્ભુવમ્ ॥ ૩,૨૬.૨૨॥

સુદિગ્ગજાન્સ્થાપયિત્વા ચ વિષ્ણુઃ શ્રીમુષ્ટે વૈ સંસ્થિતઃ શ્રીવરાહઃ ।
તદા હરિશ્ચિન્તયામાસ વિષ્ણુર્ભક્ત્યા મદીયં માનુષં દેહમદ્ય ॥ ૩,૨૬.૨૩॥

આરાધયિષ્યન્તિ ચ માં ક્વ એતે તેષાં દયાં કુત્ર વાહં કરિષ્યે ।
એવં હરિશ્ચિન્તયિત્વા સુકન્યે વૈકુણ્ઠલોકાદચલં શેષ સંજ્ઞમ્ ।
વીન્દ્રસ્કન્ધે સ્થાપયિત્વા સ્વયં ચ સમાગતોભૂદ્ભૂતલં ભૂતલેશઃ ॥ ૩,૨૬.૨૪॥

સુવર્ણમુખરીતીરમારભ્ય ગરુડધ્વજઃ ।
શ્રીકૃષ્ણવેણીપર્યન્તં સ્થાપયા માસ તં ગિરિમ્ ॥ ૩,૨૬.૨૫॥

ગિરેઃ પુચ્છે તુ શ્રીશૈલં મધ્યમેઽહોબલં સ્મૃતમ્ ।
મુખં ચ શ્રીનિવાસસ્ય ક્ષેત્રં ચ સમુદાહૃતમ્ ॥ ૩,૨૬.૨૬॥

અલ્પેન તપસાભીષ્ટં સિધ્યત્યસ્મિન્નહોબલે ।
ગઙ્ગાદિસર્વતીર્થાનિ પુણ્યાનિ હ્યત્ર સંતિ વૈ ॥ ૩,૨૬.૨૭॥

ય એનં સેવતે નિત્યં શ્રદ્ધાભક્તિસમન્વિતઃ ।
જ્ઞાનાર્થી જ્ઞાનમાપ્નોતિ દ્રવ્યાર્થી દ્રવ્યમાપ્નુયાત્ ॥ ૩,૨૬.૨૮॥

પુત્રાર્થી પુત્રમાપ્નોતિ નૃપો રાજ્યં ચ વિન્દતિ ।
યંયં કામયતે મર્ત્યસ્તન્તમાપ્નોતિ સર્વથા ॥ ૩,૨૬.૨૯॥

ચિન્તિતં સાધ્યતે યસ્માત્તસ્માચ્ચિન્તામણિં વિદુઃ ।
પુષ્કરિણ્યાશ્ચ બાહુલ્યાદ્ગિરાવસ્મિન્સરઃ સુ ચ ।
પુષ્કરાદ્રિરિતિ પ્રાહુરેવં તત્ત્વાર્થવેદિનઃ ॥ ૩,૨૬.૩૦॥

શાતકુંભસ્વરૂપત્વાત્કનકાદ્રિં ચ તં વિદુઃ ।
વૈકુણ્ઠાદાગતેનૈવ વૈકુણ્ઠાદ્રિરિતિ સ્મૃતઃ ॥ ૩,૨૬.૩૧॥

અમૃતૈશ્વર્યસંયુક્તો વ્યઙ્કટાદ્રિરિતિ સ્મૃતઃ ।
વ્યઙ્કટેશસ્ય શૈલસ્ય માહાત્મ્યં યાવદસ્તિ હિ ॥ ૩,૨૬.૩૨॥

તાવદ્વક્તું સમગ્રેણ ન સમર્થશ્ચતુર્મુખઃ ।
વ્યઙ્કટાદ્રૌ પરાં ભક્તિં યે કુર્વન્તિ દિનેદિને ।
પઙ્ગર્જઙ્ઘાલ એવ સ્યાદચક્ષુઃ પદ્મલોચનઃ ॥ ૩,૨૬.૩૩॥

મૂકો વાગ્મી ભવેદેવ બધિરઃ શ્રાવકો ભવેત્ ।
વન્ધ્યા સ્યાદ્બહુપુત્રા ચ નિર્ધનઃ સધનો ભવેત્ ॥ ૩,૨૬.૩૪॥

એતત્સર્વં ગિરૌ ભક્તિમાત્રેણૈવ ભવેદ્ધ્રુવમ્ ।
તત્ત્વતો વ્યઙ્કટાદ્રેસ્તુ સ્વરૂપં વેત્તિ કો ભુવિ ॥ ૩,૨૬.૩૫॥

યસ્માદસ્ય ગિરેઃ પુણ્યં માહાત્મ્યં વેત્તિ યઃ પુમાન્ ।
માયાવી પરમાનન્દં ત્યક્ત્વા વૈકુણ્ઠમુત્તમમ્ ।
સ્વામિપુષ્કરિણીતીરે રમયા સહમોદતે ॥ ૩,૨૬.૩૬॥

કલ્યાણાદ્ભુતગાત્રાય કામિતાર્થપ્રદાયિને ।
શ્રીમદ્વ્યઙ્કટનાથાય શ્રીનિવાસાય તે નમઃ ॥ ૩,૨૬.૩૭॥

શ્રીસ્વામિપુષ્કરિણ્યાશ્ચ માહાત્મ્યં શ◌ૃણુ કન્યકે ।
સ્વામિપુષ્કરિણીમધ્યે શ્રીનિવાસોસ્તિ સર્વદા ॥ ૩,૨૬.૩૮॥

સ્નાનં કુર્વન્તિ યે તત્ર તેષાં મુક્તિઃ કરે સ્થિતા ।
તિસ્રઃ કોટ્યોર્ધકોટિશ્ચ તીર્થાનિ ભુવનત્રયે ।
તાનિ સર્વાણિ તત્રૈવ સંતિ તીર્થે હરેઃ સદા ॥ ૩,૨૬.૩૯॥

તત્તીર્થં શ્રીનિવાસાખ્યં સર્વદેવનમસ્કૃતમ્ ।

તદેવ શ્રીનિવાસસ્ય મન્દિરં પરિકીર્તિતમ્ ॥ ૩,૨૬.૪૦॥

તદ્દર્શનાદેવ કન્યે યાન્તિ પાપાનિ ભસ્મસાત્ ।
એકૈકસ્નાનમાત્રેણ સત્સંગો ભવતિ ધ્રુવમ્ ॥ ૩,૨૬.૪૧॥

સત્સંગાજ્જ્ઞાનમાસાદ્ય જ્ઞાનાન્મોક્ષં ચ વિન્દતિ ।
અધિકારિણાં ભવેદેવં વિપરીતમયોગિનામ્ ॥ ૩,૨૬.૪૨॥

તીર્થાનાં સ્નાનમાત્રેણ મોક્ષં યાન્તીતિ યે વિદુઃ ।
તે સર્વે અસુરા જ્ઞેયાસ્તે યાન્તિ હ્યધમાં ગતિમ્ ॥ ૩,૨૬.૪૩॥

શ્રીનિવાસસ્ય તીર્થેસ્મિન્વાયુકોણે ચ કન્યકે ।
આસ્તે વાયુઃ સદા વિષ્ણોઃ પૂજાં કર્તુમનુત્તમામ્ ॥ ૩,૨૬.૪૪॥

વાયુતીર્થં ચ તત્પ્રોક્તં હસ્તદ્વાદશકાન્તરમ્ ।
હસ્તષટ્કપ્રમાણં ચ પશ્ચિમે સમુદાહૃતમ્ ।
ઉત્તરે હસ્તષટ્કં તુ વાયુતીર્થમુદાહૃતમ્ ॥ ૩,૨૬.૪૫॥

યે વૈષ્ણવા વૈષ્ણવદાસવર્યાઃ સ્નાનં સુર્યુસ્તત્ર પૂર્વં સુકન્યે ।
મધ્વાન્તસ્થાઃ શ્રીનિવાસસ્તુ નિત્યમત્ર સ્નાનાત્પ્રીયતાં મે દયાલુઃ ॥ ૩,૨૬.૪૬॥

યે મધ્વતીર્થે સ્નાતુમિચ્છન્તિ દેવિ રુદ્રાદયો વાયુભક્તા મહાન્તઃ ।
સદા સ્નાનં તત્ર કુર્વન્તિ દેવિ પ્રાતઃ કાલે ચોદયાત્પૂર્વમેવ ॥ ૩,૨૬.૪૭॥

યે વાયુતીર્થે વિસૃજન્તિ દેહજં મલં મૂત્રં વમનં શ્લેષ્મકં ચ ।
યેઽપાનશુદ્ધિં લિઙ્ગશુદ્ધિં ચ કન્યે કુર્વન્તિ તે હ્યસુરા રાક્ષસાશ્ચ ॥ ૩,૨૬.૪૮॥

શ‍ૃણ્વન્તિ યે ભાગવતં પુરાણં કિં વર્ણયે તસ્ય પુણ્યં તુ દેવિ ।
યે કૃષ્ણમન્ત્રં તુ જપન્તિ દેવિ હ્યષ્ટા ક્ષરં મન્ત્રવરં સુગોપ્યમ્ ॥ ૩,૨૬.૪૯॥

તેષાં હરિઃ પ્રીયતે કેશવોલં મધ્વાન્તસ્થો નાત્ર વિચાર્યમસ્તિ ।
એવં દાનં તત્ર કુર્વન્તિ યે વૈ દ્વિજાગ્ર્યાણાં વૈષ્ણવાનાં વિદાં ચ ॥ ૩,૨૬.૫૦॥

તેષાં પુણ્યં નૈવ જાનન્તિ દેવા જાનાત્યેવં શ્રીનિવાસો હરિસ્તુ ।
શાલગ્રામં વાયુતીર્થે દદન્તે તેષાં પુણ્યં વેત્તિ સ વ્યઙ્કટેશઃ ॥ ૩,૨૬.૫૧॥

સુદુર્લભો વાયુતીર્થેઽભિષેકો નિષ્કામબુદ્ધ્યા વૈષ્ણવાનાં ચ દેવિ ।
તત્રાપિ તીર્થે લભ્યતે ભાગ્યયોગાદ્ભાગવતસ્ય શ્રવણં વિષ્ણુદાસૈઃ ॥ ૩,૨૬.૫૨॥

તથૈવ તીર્થે દુર્લભં તત્ર દેવિ શાલગ્રામસ્ય દ્વિજવર્યે ચ દાનમ્ ।
જંબૂફલાકારસુનીલવર્ણં મુખદ્વયં ચક્રચતુષ્ટયાન્વિતમ્ ॥ ૩,૨૬.૫૩॥

સુકેસરૈઃ સંયુતં સ્વર્ણચિહ્નધ્વજાં કુશૈર્વજચિહ્નૈર્યવૈશ્ચ ।
જાનાર્દનીં મૂર્તિમાહુર્મહાન્તો દાનં તસ્યા દુર્લભં તત્ર તીર્થે ॥ ૩,૨૬.૫૪॥

અત્યુત્તમં મૂર્તિદાનં તુ ભદ્રે સુદુર્લ્લભં પરમં નાત્ર લોભઃ ।
સુદુર્લભં બહુદોગ્ધ્યાશ્ચ ગૃષ્ટેર્દાનં તથા વસ્ત્રરત્નાદિકાનામ્ ॥ ૩,૨૬.૫૫॥

અત્યુત્તમં દ્રવ્યદાનં ચ દેવિ સ્વાપેક્ષિતં દાનમાહુર્મહાન્તઃ ।
સ્વસ્યાનપેક્ષં ફલદાનં ચ વસ્ત્રાદાનં તસ્ય વ્યર્થમાહુર્મહાન્તઃ ॥ ૩,૨૬.૫૬॥

અત્યુત્તમં ગૃષ્ટિદાનં ચ પુણ્યં નૈવાપ્યતે દુગ્ધદોહાશ્ચ ગાવઃ ।
અત્યુત્તમે વસ્ત્રદાને સુબુદ્ધિઃ સુદુર્ઘટા પરમા વૈ જનાનામ્ ॥ ૩,૨૬.૫૭॥

અત્યુત્તમં ભાગવતસ્ય પુસ્તકં સુદુર્ઘટં વાયુતીર્થં ચ કન્યે ।
અત્યુત્તમં દ્રવ્યદાનં ચ દેવિ સુદુર્ઘટં વાયુતીર્થં નૃણાં હિ ।
સુદુર્લભો વૈષ્ણવૈસ્તત્ત્વવિદ્ભિર્હરેર્વિચારો વાયુતીર્થે ચ કન્યે ॥ ૩,૨૬.૫૮॥

શ્રીનિવાસસ્ય તીર્થસ્ય ઉત્તરસ્યાં દિશિ સ્થિતમ્ ।
ચન્દ્રતીર્થ મિતિ પ્રોક્તં તત્રાસ્તે ચન્દ્રમાઃ સદા ॥ ૩,૨૬.૫૯॥

શ્રીનિવાસસ્ય પૂજાં ચ તત્ર સ્થિત્વા કરોત્યયમ્ ।
તત્ર સ્નાનં પ્રકુર્વન્તિ પુણ્યદેશે ચ કન્યકે ॥ ૩,૨૬.૬૦॥

ગુરુતલ્પાદિપાપેભ્યો મુચ્યન્તે નાત્ર સંશયઃ ।
તત્ર સ્નાત્વા પૂર્વભાગે શાલગ્રામં દદાતિ યઃ ॥ ૩,૨૬.૬૧॥

જ્ઞાનદ્વારા મોક્ષમેતિ નાત્ર કાર્યા વિચારણા ।
દધિવામનમૂર્તેશ્ચ દાનં તત્ર સુદુર્લભમ્ ॥ ૩,૨૬.૬૨॥

બદરીફલમાત્રં તુ વતુલં નીલવર્ણકમ્ ।
પ્રસન્નવદનં સૂક્ષ્મં સુસ્નિગ્ધં કન્યકે શુભે ॥ ૩,૨૬.૬૩॥

ચક્રદ્વયસમાયુક્તં ગૌપૂરૈઃ પઞ્ચભિર્યુતમ્ ।
ચાપબાણસમાયુક્તમનતં કુણ્ડલાકૃતિમ્ ॥ ૩,૨૬.૬૪॥

વનમાલ સુખયુતં મૂર્ધ્નસાહસ્રસંયુતમ્ ।
રૌપ્યબિન્દુસમાયુક્તં સવ્યે ભદ્રાર્ધમાત્રકમ્ ॥ ૩,૨૬.૬૫॥

ચન્દ્રેણ સહિતં દેવિ દધિવામનમુચ્યતે ।
એતાદૃશં કલૌ નૃણાં દુર્લભં બહુભાગ્યદમ્ ।

લક્ષ્મીનારાયણસમાં તાં મૂર્તિં વિદ્ધિ ભામિનિ ॥ ૩,૨૬.૬૬॥

સુદુર્લભં તસ્ય મૂર્તેશ્ચ દાનં તચ્ચન્દ્રતીર્થે શ્રવણં દુર્ઘટં ચ ।
સમ્યક્સ્વરૂપં દધિવામનસ્ય સુદુર્ઘટં શ્રવણં વૈષ્ણવાચ્ચ ॥ ૩,૨૬.૬૭॥

તત્ર સ્નાત્વા વામનસ્ય સ્વરૂપશ્રવણાદ્વિદુર્દાનફલં સમં ચ ।
દશહસ્તપ્રમાણં તુ ચન્દ્રતીર્થમુદાહૃતમ્ ॥ ૩,૨૬.૬૮॥

મધ્યાહ્ને દુર્લભં સ્નાનં નૃણાં તત્ર સુમઙ્ગલે ।
તત્ર સ્થિત્વા ધન્યનરઃ સદા ભજતિ વૈ હરિમ્ ॥ ૩,૨૬.૬૯॥

વરાહમૂર્તિદાનં તુ શાલગ્રામસ્ય દુર્લભમ્ ।
જંબૂફલપ્રમાણં તુ એતદ્વૈ કુક્કુટાણ્ડવત્ ॥ ૩,૨૬.૭૦॥

વદનં વલયાકારં પ્રમાણં ચણકાદિવત્ ।
દેવસ્ય વામભાગે ચ મધ્યદેશં વિહાય ચ ॥ ૩,૨૬.૭૧॥

ચક્રદ્વયસમાયુક્તમૂર્ધ્વદેશે ચ ભામિનિ ।
સુવર્ણબિન્દુના યુક્તં ભૂવરાહાખ્યમુચ્યતે ॥ ૩,૨૬.૭૨॥

પૂજાં કૃત્વા ભૂવરાહસ્ય મર્તેર્દાનં દત્ત્વા શ્રવણં ચાપિ કૃત્વા ।
તત્ર સ્થિતં ભૂવરાહં ચ દૃષ્ટ્વા સ વૈ નરઃ કૃતકૃત્યો હિ લોકે ॥ ૩,૨૬.૭૩॥

તત્ર સ્નાત્વા ભૂવરાહસ્ય મર્તેઃ શૃણોતિ યો લક્ષણં સમ્યગેવ ।
સ તેન પુણ્યં સમુપૈતિ દેવિ સ મુક્તિભાઙ્નાત્ર વિચાર્યમસ્તિ ॥ ૩,૨૬.૭૪॥

ઈશાનકોણે શ્રીનિવાસસ્ય દેવિ રૌદ્રં તીર્થં પરમં પાવનં ચ ।
તત્ર સ્થિત્વા રુદ્રદેવો મહાત્મા પૂજાં કરોતિ શ્રીનિવાસસ્ય નિત્યમ્ ॥ ૩,૨૬.૭૫॥

હસ્તાષ્ટકં તત્પ્રમાણં વદન્તિ તત્ર સ્નાનં વૈષ્ણવૈઃ કાર્યમેવ ।
તત્ર સ્નાત્વા પ્રયતો વૈ મુરારેઃ કથાં દિવ્યાં શૃણુયાદાદરેણ ।
સ્નાનં પાનં તત્ર દાનં ચ કુર્યાલ્લક્ષ્મીનૃસિંહપ્રીયતે દેવિ નિત્યમ્૩,૨૬.૭૬॥

બદરીફલમાત્રં ચ વર્તુલં બિન્દુસંયુતમ્ ॥ ૩,૨૬.૭૭॥

દેવસ્ય વામભાગે તુ ચક્રદ્વયસમન્વિતમ્ ।
સુવર્ણરેખાસંયુક્તં કિઞ્ચિદ્રક્તસમન્વિતમ્ ॥ ૩,૨૬.૭૮॥

વૈશ્યવર્ણં સવદનં પદ્મરેખાદિચિહ્નિતમ્ ।
લક્ષ્મીનૃસિંહં તં વિદ્ધિ ભુક્તિમુક્તિપ્રદાયકમ્ ॥ ૩,૨૬.૭૯॥

એતા દૃશં ગણ્ડિકાયાઃ શિલાયા મૂર્તેર્દાનં દુર્ઘટં વિદ્ધિ વીન્દ્ર ।
તત્ર સ્નાત્વા શ્રીનૃસિંહસ્વરૂપં લક્ષ્મીપતેઃ શ ૃણુયાદ્ભક્તિયુક્તઃ ॥ ૩,૨૬.૮૦॥

મૂર્તેર્દાનાત્ફલમાપ્નોતિ દેવિ સત્યંસત્યં નાત્ર વિચાર્યમસ્તિ ॥ ૩,૨૬.૮૧॥

ઈશાનશક્રયોર્મધ્યે બ્રહ્મતીર્થમુદાહૃતમ્ ।
દુર્લભં માનુષાણાં તુ સ્નાનં સર્વાર્થસાધકમ્ ॥ ૩,૨૬.૮૨॥

શાલગ્રામસ્ય દાનં તુ દુર્લભં તત્ર વૈ નૃણામ્ ।
લક્ષ્મીનારાયણસ્યૈવ મૂર્તેર્દાનં સુદુર્લભમ્ ॥ ૩,૨૬.૮૩॥

સ્થલમૌદુંબરસમં તત્પ્રમાણમુદાહૃતમ્ ।
છત્રાકારં વર્તુલં ચ પ્રસન્નવદનં શુભમ્ ॥ ૩,૨૬.૮૪॥

ચણકપ્રદેશમાત્રં ચ વદનં સમુદાહૃતમ્ ।
સવ્યે દક્ષિણપાર્શ્વે ચ સમયોઃ પુષ્કલાન્વિતમ્ ॥ ૩,૨૬.૮૫॥

ગોયૂથવત્સવર્ણં ચ ચતુશ્ચક્રસમન્વિતમ્ ।
ગોખુરૈશ્ચ સમાયુક્તં સુવર્ણકિણસંયુતમ્ ॥ ૩,૨૬.૮૬॥

વનમાલાભિસંયુક્તં વજ્રપુઙ્ખૈશ્ચ સંયુતમ્ ।
એતાદૃશીં દરેર્મૂર્તિં લક્ષ્મીનારાયણં વિદુઃ ॥ ૩,૨૬.૮૭॥

કલૌ નૃણાં તસ્ય લાભો દુર્લભઃ સંસ્મૃતો ભુવિ ।
દાનં ચ સુતરાં દેવિ દર્લભં કિં વદામિ તે ॥ ૩,૨૬.૮૮॥

બ્રહ્મતીર્થે ચ સંસ્નાય શ્રોતવ્યા વૈ હરેઃ કથા ।
ગણ્ડિકાયાઃ શિલાયાશ્ચ લક્ષ્મીનારાયણસ્ય તુ ॥ ૩,૨૬.૮૯॥

લક્ષણં યો વિજાનાતિ તદા તત્સદૃશં ફલમ્ ।
પ્રાપ્નોત્યેવ ન સંદેહો નાત્ર કાર્યા વિચારણા ॥ ૩,૨૬.૯૦॥

શ્રીનિવાસસ્ય તીર્થસ્ય પૂર્વે સ્યાદિન્દ્રતીર્થકમ્ ।
શ્રીનિવાસસ્ય પૂજાં તુ કર્તુમાસ્તે શચીપતિઃ ॥ ૩,૨૬.૯૧॥

શાલગ્રામશિલાદાનં કર્તવ્યં શ્રોત્રિયાયવૈ ।
શાલગ્રામશિલાદાનં હત્યાકોટિવિનાશનમ્ ॥ ૩,૨૬.૯૨॥

તસ્મિંસ્તીર્થે તુ યો દેવિ સીતારામશિલાભિધામ્ ।
દદાતિ ભૂતલે ભદ્રે ભૂપતેઃ સદૃશો ભવેત્ ॥ ૩,૨૬.૯૩॥

સીતારામશિલા દેવિ દ્વિવિધા સમ્પ્રકીર્તિતા ।
પઞ્ચચક્રયુતા કાચિત્ષટ્ચક્રેણ ચ સંયુતા ॥ ૩,૨૬.૯૪॥

તત્રાપિ ષટ્ચક્રયુતા હ્યુત્તમા સમ્પ્રકીર્તિતા ।
પઞ્ચચક્રયુતાયાશ્ચ ફલં દ્વિગુણમીરિતમ્ ॥ ૩,૨૬.૯૫॥

કુક્કુટાણ્ડપ્રમાણં ચ સુસિગ્ધં નીલવર્ણકમ્ ।
વદનત્રયસંયુક્તં સટ્ચક્રૈઃ કેસરૈર્યુતમ્ ॥ ૩,૨૬.૯૬॥

સ્વર્ણરેખાસમાયુક્તં ધ્વજવજ્રાઙ્કુશૈર્યુતમ્ ।
એતાદૃશં તુ વૈ ભદ્રે સીતારામાભિધં સ્મૃતમ્ ॥ ૩,૨૬.૯૭॥

વદનેવન્દને દેવિ સીતારામસ્ય કોશકમ્ ।
દુર્લભં તુ કલૌ નૃણાં સ્વસામ્રાજ્યપ્રદં શુભમ્ ॥ ૩,૨૬.૯૮॥

ઇન્દ્રતીર્થે મહાદેવિ સીતારામ ભિધાશિલા ।
યા તદ્દાનં દુર્લભં તન્નાલ્પસ્ય તપસઃ ફલમ્ ॥ ૩,૨૬.૯૯॥

દાનસ્ય શક્ત્યભાવે તુ શ્રોતવ્યં લક્ષણં હરેઃ ।
શાલગ્રામ શિલાદાનાદ્યત્ફલં તત્ફલં લભેત્ ॥ ૩,૨૬.૧૦૦॥

આગ્નેયકોણે શ્રીનિવાસસ્ય દેવિ તીર્થં ત્વાસ્તે વહ્નિસંજ્ઞં સુશસ્તમ્ ।
સ વહ્નિદેવઃ શ્રીનિવાસસ્ય પૂજાં કર્તું હ્યાસ્તે સર્વદા તીર્થમધ્યે ॥ ૩,૨૬.૧૦૧॥

યો વા તીર્થે વહ્નિસંજ્ઞે ચ દેવિ ભક્ત્યા સ્નાનં કુરુતેઽજં સ્મરન્હિ ।
જ્ઞાનદ્વારા મોક્ષમાપ્નોતિ દેવિ તત્ર સ્નાનં દુર્લ્લભં વૈ નૃણાં ચ ॥ ૩,૨૬.૧૦૨॥

જ્ઞાત્વા સ્નાનં દુષ્કરં તીર્થરાજે ભક્તિસ્તસ્મિન્દુર્લ્લભા ચૈવ દેવિ ।
શાલગ્રામે તચ્છિલાયાશ્ચ દાનં સુદુર્લભં વાસુદેવાભિધાયાઃ ॥ ૩,૨૬.૧૦૩॥

હ્રસ્વં તથા વર્તુલં નીલવર્ણં સૂક્ષ્મં મુખં મુખચક્રં સુશુદ્ધમ્ ।
સુવેણુયુક્તં વાસુદેવાભિધેયં દાનં કલૌ દુર્લભં તસ્ય ભદ્રે ॥ ૩,૨૬.૧૦૪॥

દાને તસ્યાઃ શક્ત્ય ભાવે ચ દેવિ સ્નાત્વા તીર્થે વાસુદેવાભિધસ્ય ।
સમ્યક્શ્રાવ્યં લક્ષણં વૈ શિલાયાસ્તયોસ્તુલ્યં ફલમાહુર્મહાન્તઃ ॥ ૩,૨૬.૧૦૫॥

દક્ષિણે શ્રીનિવાસસ્ય યમતીર્થં ચ સંસ્મૃતમ્ ।
તત્રાસ્તે યમરાજસ્તુ પૂજાં કર્તું હરેઃ સદા ॥ ૩,૨૬.૧૦૬॥

તત્ર સ્નાનં ચ દાનં ચાપ્યક્ષયં પરમં સ્મૃતમ્ ।
શાલગ્રામશિલાદાનં કાર્યં તત્ર મહામુને ॥ ૩,૨૬.૧૦૭॥

પટ્ટાભિરામસંજ્ઞાયાઃ શિલાયા દાનમિષ્યતે ।
તચ્ચૂતફલવત્સ્થૂલં વદનત્રયસંયુતમ્ ॥ ૩,૨૬.૧૦૮॥

શિરશ્ચક્રેણ રહિતં સપ્તચક્રૈઃ સમન્વિતમ્ ।
નીલવર્ણં સ્વર્ણરેખં ગોશુરાદ્યૈઃ સમન્વિતમ્ ॥ ૩,૨૬.૧૦૯॥

પટ્ટવર્ધનરામં તુ દુર્લભં બહુભાગ્યદમ્ ।
પટ્ટવર્ધનરામં તુ યો દદાતિ ચ તત્ર વૈ ।
પટ્ટાભિષિક્તો ભવતિ નાત્ર કાર્યા વિચારણા ॥ ૩,૨૬.૧૧૦॥

શ્રીનિવાસસ્ય નૈરૃત્યે નૈરૃતં તીર્થમુત્તમમ્ ।
આસ્તે હિ નિરૃતિસ્તત્ર પૂજાં કુર્તું ચ સર્વદા ॥ ૩,૨૬.૧૧૧॥

તત્ર સ્નાનં પ્રકર્તવ્યં પુનર્જન્મ ન વિદ્યતે ।
શાલગ્રામશિલાયાશ્ચઃ પુરુષોત્તમસંજ્ઞિકામ્ ॥ ૩,૨૬.૧૧૨॥

મૂર્તિં દદાતિ યો મર્ત્યઃ સ યાતિ પરમાં ગતિમ્ ।
ઔદુંબરફલાકારં પ્રસન્નવદનં શુભમ્ ॥ ૩,૨૬.૧૧૩॥

ચક્રદ્વ્યસમાયુક્તં શિરશ્ચક્રસમન્વિતમ્ ।
સુવર્ણબિન્દુસંયુક્તં વજ્રાઙ્કુશસમાન્વતમ્ ॥ ૩,૨૬.૧૧૪॥

તન્મૂર્તિદાનં દુર્લભં તત્ર દેવઃ પ્રીણાતિ યસ્માચ્છ્રીનિવાસો મહાત્મા ।
યદા દાનં દુર્ઘટં સ્યાચ્ચ દેવિ તદા શ્રોતવ્યં લક્ષણં તસ્ય મૂર્તેઃ ॥ ૩,૨૬.૧૧૫॥

પાશિનૈરૃતયોર્મધ્યે શેષતીર્થં પરં સ્મૃતમ્ ।
તત્ર સ્નાત્વા શેષમૂર્તિં પ્રદદાતિ દ્વિજાતયે ॥ ૩,૨૬.૧૧૬॥

સ યાતિ પરમં લોકં પુનરાવૃત્તિવર્જિતમ્ ।
ઔદુંબરફલાકારં કુણ્ડલાકૃતિમેવ ચ ॥ ૩,૨૬.૧૧૭॥

શેષવદ્વદનં તસ્ય તસ્મિંશ્ચક્રદ્વયં સ્મૃતમ્ ।
ફલં તમેકચક્રેણ સંયુતં વલ્મિકાન્વિતમ્ ॥ ૩,૨૬.૧૧૮॥

કિઞ્ચિદ્વર્ણસમાયુક્તં શેષમૂર્તિ મતિસ્ફુટમ્ ।
સુપ્તા પ્રબુદ્ધા દ્વિવિધા શેષમૂર્તિરુદાહૃતા ॥ ૩,૨૬.૧૧૯॥

ફણોન્નતા પ્રબુદ્ધા સ્યાત્સપ્તલક્ષફણાન્વિતા ।
તત્રાપિ દુર્લભા સુપ્તા મહાભાગ્યકરીસ્મૃતા ॥ ૩,૨૬.૧૨૦॥

ઇહ લોકે પરત્રાપિ મોક્ષદા નાત્ર સંશયઃ ।
નવચક્રાદુપક્રમ્ય વિંશત્યન્તં ચ યત્ર સઃ ॥ ૩,૨૬.૧૨૧॥

અનન્ત ઇતિ વિજ્ઞેયો હ્યનન્તફલદાયકઃ ।
વિશ્વંભરઃ સ વિજ્ઞેયો વિંશત્યૂર્ધ્વં વરાનને ॥ ૩,૨૬.૧૨૨॥

તત્રાપિ કેસરૈશ્ચૈક્રર્લક્ષણૈશ્ચ સમન્વિતમ્ ।
કલૌ તુ દુર્લભં નણાં તદ્દાનં ચાતિદુર્લભમ્ ॥ ૩,૨૬.૧૨૩॥

સ્નાનં કૃત્વા શેષતીર્થે વિશુદ્ધેનૈવ ચેતસા ।
એતેષાં લક્ષણં શ્રુત્વા પ્રયાતિ પરમાં ગતિમ્ ॥ ૩,૨૬.૧૨૪॥

તતઃ પરં મહાભાગે વારુણં તીર્થમુત્તમમ્ ।
તત્રાસ્તે વરુણો દેવઃ પૂજાં કર્તું હરેઃ સદા ॥ ૩,૨૬.૧૨૫॥

તત્ર સ્નાનં પ્રકર્તવ્યં દાતવ્યં દાનમુત્તમમ્ ।
શિશુમારં ચ મત્સ્યં ચ ત્રિવિક્રમમથાપિ વા ।
દાતવ્યં ભૂતિકામેન તીર્થેસ્મિન્વિરવર્ણિનિ ॥ ૩,૨૬.૧૨૬॥

જંબૂફલસમાકારા પુચ્છે સૂક્ષ્મા સબિન્દુકા ।
ચક્રત્રયા ચ વદને પુચ્છોપરિ સચક્રકા ॥ ૩,૨૬.૧૨૭॥

શ્રીવત્સબિન્દુમાલાઢ્યા મત્સ્યમૂર્તિરુદાહૃતા ।
પુચ્છાદધશ્ચક્રયુતં શિશુમારમુદાહૃતમ્ ॥ ૩,૨૬.૧૨૮॥

વક્રચક્રયુતશ્ચેત્સ્યાત્ત્રિવિક્રમ ઉદાહૃતઃ ।
એતેષાં લક્ષણં શ્રુત્વા વારુણે તીર્થ ઉત્તમે ॥ ૩,૨૬.૧૨૯॥

એતદ્દાનફલં પ્રાપ્ય મોદતે વિષ્ણુમન્દિરે ।
પૂર્વોક્તા મૂર્તયો યસ્મિન્ગૃહે તિષ્ઠન્તિ ભામિનિ ।
ભાગીરથી તીર્થવરા સંનિધત્તે ન સંશયઃ ॥ ૩,૨૬.૧૩૦॥

સ્વામિ પુષ્કરિણીસ્નાનં દુર્ઘટં તુ કલૌ નૃણામ્ ।
તત્ર સ્થિતાનાં તીર્થાનાં સ્નાનં ચાપ્યતિદુર્ઘટમ્ ॥ ૩,૨૬.૧૩૧॥

શાલગ્રામશિલાદાનં દુર્ઘટં ચ તથા સ્મૃતામ્ ।
સ્વામિપુષ્કરિણીતીરે કન્યાદાનં સુદુર્ઘટમ્ ॥ ૩,૨૬.૧૩૨॥

દુર્ઘટં કપિલાદાનં ભક્ષ્યદાનં સુદુર્ઘટમ્ ।
સ્વામિપુષ્કરિણીતીર્થે તીર્થેષ્વન્યેષુ ભામિનિ ॥ ૩,૨૬.૧૩૩॥

સ્નાનં કુરુ યથાન્યા યં શય્યાદાનં તથા કુરુ ।
જૈગીષવ્યેન મુનિના ત્વેવમુક્તા ચ કન્યકા ॥ ૩,૨૬.૧૩૪॥

સ્વામિપુષ્કરિણીસ્નાનં સા ચકાર ધૃતવ્રતા ।
તીર્થેષ્વેતેષુ સુસ્નાતા દાનં ચક્રે સુભામિની ॥ ૩,૨૬.૧૩૫॥

ઉવાસ તત્ર સા દવી ત્રિઃ સપ્તકન્દિનાનિ ચ ।
સ્વામિપુષ્કરણીતીરમહિમાનં શૃણોતિ યઃ ।
સ યાતિ પરમાં ભક્તિં શ્રીનિવાસે જગન્મયે ॥ ૩,૨૬.૧૩૬॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
વ્યઙ્કટગિરિમાહાત્મ્યે સ્વામિપુષ્કરિણ્યાદિતીર્થતત્રત્યદેવતદીયશાલગ્રામલક્ષણ
તદ્દાનાદિવર્ણનં નામ ષડ્વિંશોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૭
શ્રીકૃષ્ણ ઉવાચ ।
સા ગતા સ્નાતુકામાથ નન્દાં પાપનિવારિણીમ્ ।
પપ્રચ્છ તં ગુરું વિપ્રં વિનયાવનતા સુધીઃ ॥ ૩,૨૭.૧॥

કિન્નામેયં નદી વિપ્ર કિં કાર્યં ચાત્ર મે વદ ।
જૈગીષવ્યસ્ત્વેવમુક્તો વાક્યમેતદુવાચ હ ॥ ૩,૨૭.૨॥

જૈગીષવ્ય ઉવાચ ।
શૃણુ ભદ્રે પ્રવક્ષ્યામિ માહાત્મ્યં પાપનાશનમ્ ।
ઇયં નદી મહાભાગે સદા પાપવિનાશિની ॥ ૩,૨૭.૩॥

બ્રહ્મહત્યાદિપાપૌઘો યત્ર સ્નાનેન નશ્યતિ ।
પ્રત્યક્ષં દૃશ્યતે હ્યત્ર સ્નાનં કર્તું સમુદ્યતૈઃ ॥ ૩,૨૭.૪॥

જલં ચાશુભ્રરૂપેણ પાપૈશ્ચ પરિદૃશ્યતે ।
યાવચ્છુભ્રોદકં દેવિ તાવત્સનાનં ચ કારયેત્ ॥ ૩,૨૭.૫॥

યાવચ્છુભ્રોદકં નૈવ તાવત્પાપં ન નશ્યતિ ।
શુદ્ધોદકે સમાયાતે પાપં નષ્ટમિતિ ધ્રુવમ્ ॥ ૩,૨૭.૬॥

કલાવિત્થં વિશાલાક્ષિ મહિમા દૃશ્યતે ભુવિ ।
અત્ર સ્નાનં પ્રકર્તવ્યં દાતવ્યં દાન મુત્તમમ્ ।
તતશ્ચ જ્ઞાનમાસાદ્ય વિવિષ્ણુલોકં સ ગચ્છતિ ॥ ૩,૨૭.૭॥

ગુરુસ્ત્રીગમનાચ્ચેન્દ્ર અહલ્યાયાં ગતો હરિઃ ।
સુરાપાનાચ્ચ શુક્રસ્તુ સુવર્ણહરણાદ્બલિઃ ॥ ૩,૨૭.૮॥

બ્રહ્મહત્યાયાશ્ચ રુદ્રો નાગો દત્તાપહારકઃ ।
સૂતસ્ય હનનાદ્રામો નિર્મુક્તો હ્યત્ર ભામિનિ ॥ ૩,૨૭.૯॥

નાનેન સદૃશં તીર્થં ન ભૂતં ન ભવિષ્યતિ ।
સ્નાનં કુરુ મહાભાગે તેન સિદ્ધિં હ્યવાપ્સ્યસિ ॥ ૩,૨૭.૧૦॥

જૈગીષવ્યેણ મુનિના પિત્રા સહ ચ કન્યકા ।
સ્નાનં ચકાર વિધિવદુદતિષ્ઠચ્ચ ભામિનિ ॥ ૩,૨૭.૧૧॥

યાવચ્ચ પૌરુષં સૂક્તં તાવત્કાલં હિ તિષ્ઠતિ ।
પશ્ચાજ્જપ્ત્વા મહામન્ત્રં વેઙ્કટેશાભિધં પરમ્ ॥ ૩,૨૭.૧૨॥

દ્વિજાતીન્પ્રીણયિત્વા સા વસ્ત્રદ્રવ્યાદિભૂષણૈઃ ।
તસ્માચ્ચ પ્રયયૌ દેવી કમારીતીર્થમુત્તમમ્ ॥ ૩,૨૭.૧૩॥

કુમારીમહિમાનં ચ શ્રુત્વા સ્નાનં ચકાર સા ।
પુનરાવૃત્ય સા દેવી હ્યન્તરા વિરજાનદીમ્ ॥ ૩,૨૭.૧૪॥

દૃષ્ટ્વા પપ્રચ્છ સા દેવી જૈગીષવ્યં ગુરું પ્રભુમ્ ।
કિં સંજ્ઞિકેયં વિપ્રેન્દ્ર કિં કાર્યં હ્યત્ર મે વદ ॥ ૩,૨૭.૧૫॥

જૈગીષવ્યઃ પૃષ્ટ એવ મુવાચ કરુણાનિધિઃ ।
ઇયં ભાગીરથી કન્યે આયાતિ હ્યન્તરેણ તુ ॥ ૩,૨૭.૧૬॥

અતઃ સા પ્રોચ્યતે હ્યન્તર્ગઙ્ગેતિ પરમર્ષિભિઃ ।
કન્યે ત્વસ્યાસ્તુ સલિલં શ્રીનિનિવાસપ્રિયં સદા ॥ ૩,૨૭.૧૭॥

અત્ર સ્નાનં યઃ કરોતિ સ યાતિ પરમાં ગતિમ્ ।
સ્નાનં ચકાર સા કન્યા જલે પરમપાવને ॥ ૩,૨૭.૧૮॥

દાનાદિકં તથા જ્ઞાત્વા જજાપ પરમં મનુમ્ ।
શ્રીનિવાસસમીપં તુ પુનરાગત્ય ભામિની ॥ ૩,૨૭.૧૯॥

અઙ્ગપ્રદક્ષિણં ચક્રે ભક્ત્યા વેઙ્કટનાયકમ્ ।
બ્રાહ્મણાદીન્પ્રીણયિત્વા વસ્ત્રગન્ધાદિભૂષણૈઃ ॥ ૩,૨૭.૨૦॥

પુનઃ પરદિને પ્રાતઃ સ્વામિપુષ્કરિણીજલે ।

સ્નાનં કૃત્વા મહાભાગા યયૌ તુંબુરુસંજ્ઞિકામ્ ॥ ૩,૨૭.૨૧॥

પપ્રચ્છ તં ગુરું દેવી નાથં કિન્નામિકા ત્વયમ્ ।
જૈગીષવ્ય ઉવાચ ।
ઇયં તુંબરુકાભિજ્ઞા નારી વૈ વરવર્ણિની ॥ ૩,૨૭.૨૨॥

પુરા તું બુરુણા સાકં નારદસ્તપસિ સ્થિતઃ ।
અત્ર પ્રાદુરભૂદ્વિષ્ણુર્નારદસ્ય હિતાય ચ ॥ ૩,૨૭.૨૩॥

સ્નાનં યઃ કુરુતે હ્યત્ર સ યાતિ પરમાં ગતિમ્ ।
અત્ર સ્નાનં મનુષ્યાણાં સર્વેષાં દુર્લભં કલૌ ॥ ૩,૨૭.૨૪॥

અત્ર સ્નાનં મનુષ્યાણાં નાલ્પસ્ય તપસઃ ફલમ્ ।
તત્ર સ્નાત્વા ચ પીત્વા ચ દત્ત્વા દાનાન્યકેશઃ ॥ ૩,૨૭.૨૫॥

પુનરાગત્ય સા દેવી શ્રીનિવાસં નનામ હ ।
તસ્મિમન્દિને બ્રાહ્મણાંશ્ચ તર્પયામાસ ભમિનિ ॥ ૩,૨૭.૨૬॥

સ્વામિપુષ્કરિણીં પ્રાપ્ય દીપાન્પ્રાજ્વાલયત્સતી ।
સોપાનેષુ મહાભાગા દીપાવલિભિરઞ્જસા ।
પ્રીણયામાસ દેવેશં શ્રીનિવાસં જગદ્ગુરુમ્ ॥ ૩,૨૭.૨૭॥

પુનઃ પરદિને પ્રાપ્તે શક્તીર્થમનુત્તમમ્ ।
કપિલાખ્યોર્ધ્વદેશે તુ તત્તીર્થં પાવનં સ્મૃતમ્ ॥ ૩,૨૭.૨૮॥

તત્ર સ્નાત્વા મહાભાગા તદૂર્ધ્વં સ્નાપયેત્સ્વયમ્ ।
વિષ્વસેનસરસ્તત્ર સર્વપાપવિનાશનમ્ ॥ ૩,૨૭.૨૯॥

તત ઊર્ધ્વં મહાભાગા યયૌ તત્ર દદર્શ સા ।
પઞ્ચાયુધાનાં તીર્થાનિ તેષુ સ્નાનં ચકાર સા ॥ ૩,૨૭.૩૦॥

તદૂર્ધ્વં ચાગ્નિકુણ્ડં સ્યાદુરારોહં તતોગ્રતઃ ।
તસ્યોપરિ બ્રહ્મતીર્થં બ્રહ્મહત્યાવિમોચનમ્ ॥ ૩,૨૭.૩૧॥

સપ્તર્ષીણાં તદૂર્ધ્વં તુ પુણ્યતીર્થં ચ સત્ફલમ્ ।
દશાધિકફલં તેષા તીર્થાનામુત્તરોત્તરમ્ ॥ ૩,૨૭.૩૨॥

એતેષાં ચૈવ માહાત્મ્યં કો વા વક્તુમિહાર્હતિ ।
ઋષિતીર્થેષુ સા કન્યા ચચાર તપ ઉત્તમમ્ ॥ ૩,૨૭.૩૩॥

મમાવતારપર્યન્તં ચરિત્વા તપ ઉત્તમમ્ ।

યોગધારણ યા દેહં ત્યક્ત્વા જાંબવતો ગૃહે ॥ ૩,૨૭.૩૪॥

જાતા જાંબવતી નામ વવૃધે તસ્ય વેશ્મનિ ।
તસ્યાઃ પિતા જાંબવાન્સ સમાદાત્કન્યકાં તદા ।
રુક્મ્યા અનં તરા સૈષા મમ ભાર્યા ખગેશ્વર ॥ ૩,૨૭.૩૫॥

ઇદં હિ પરમાખ્યાનં વેङ्કટાદ્રેર્મહાગિરેઃ ।
કો વા વર્ણયિતું શક્તો મદન્યઃ પુરુષો ભુવિ ॥ ૩,૨૭.૩૬॥

વેङ्કટેશસ્ય નૈવેદ્યં સદા લક્ષ્મીઃ કરોતિ વૈ ।
બ્રહ્મા પૂજયતે નિત્યમેવં શાસ્ત્રસ્ય નિર્ણયઃ ॥ ૩,૨૭.૩૭॥

નૈવેદ્યભક્ષિણાં પુંસામુપહાસં ન કારયેત્ ।
સ્વસ્ય પ્રાશસ્ત્યભાવે તુ નૈવેદ્યાદિ ગુડાદિકમ્ ।
ગ્રાહ્યમેવ ન સંદેહો અન્યથા નારકી ભવેત્ ॥ ૩,૨૭.૩૮॥

શ્રીનિવાસાત્પરો દેવો ન ભૂતો ન ભવિષ્યતિ ।
સ્વયં ચ પાચયિત્વાત્વં ઘૃતપક્વાદિકં તથા ।
શ્રીનિવાસસ્ય નૈવેદ્યં દત્ત્વા ભોજનમાચરેત્ ॥ ૩,૨૭.૩૯॥

ઇદં તુ પરમં ગોપ્યં તવોક્તં ચ ખગેશ્વર ।
ન કસ્યાપિ ચ વક્તવ્યં ગોપ્યત્વાત્ખગસત્તમ ।
ઇતઃ પરં પ્રવક્ષ્યામિ તારતમ્યં શ ૃણુ પ્રભો ॥ ૩,૨૭.૪૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્ત દ્ તૃ દ્ બ્રહ્મ દ્
કન્યાકૃતનાનાતીર્થયાત્રાદિનિરૂપણં નામ સપ્તવિંશોઽધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૮
યા પૂર્વસર્ગે દક્ષપુત્રી સતી તુ રુદ્રસ્ય પત્ની દક્ષયજ્ઞે સ્વદેહમ્ ।
વિસૃજ્ય સા મેનકાયાં ચ જજ્ઞે ધરાધરાદ્ધેમવતો વૈ સકાશાત્ ॥ ૩,૨૮.૧॥

સા પાર્વતા રુદ્રપત્ની ખગેન્દ્ર યા શેષપત્ની વારુણી નામ પૂર્વા ।
સૈવાગતા બલભદ્રેણ રન્તું દ્વિરૂપમાસ્થાય મહાપતિવ્રતા ॥ ૩,૨૮.૨॥

શ્રીરિત્યાખ્યા ઇન્દિરાવેશયુક્તા તસ્યા દ્વિતીયા પ્રતિમા મેઘરૂપા ।
શેષણ રૂપેણ યદા હિ વીન્દ્ર તપશ્ચચાર વિષ્ણુના સાર્ધમેવ ॥ ૩,૨૮.૩॥

તદૈવ દેવી વારુણી શેષપત્ની તપશ્ચ ક્રે ઇન્દિરાપ્રીતયે ચ ।

તદા પ્રીતા ઇન્દિરા સુપ્રસન્ના ઉવાચ તાં વારુણીં શેષપત્નીમ્ ॥ ૩,૨૮.૪॥

યદા રામો વૈષ્ણવાંશેન યુક્તઃ સમ્પત્સ્યતે ભૂતલે રૌહિણેયઃ ।
મચ્ચાવેશાત્સંયુતા ત્વં તુ ભદ્રે શ્રીરિત્યાખ્યા વલભદ્રસ્ય રન્તુમ્ ॥ ૩,૨૮.૫॥

સમ્પત્સ્યસે નાત્ર વિચાર્યમસ્તીત્યુક્ત્વા સા વૈ પ્રયયૌ વિષ્ણુલોકે ।
શ્રીલક્ષ્મ્યંશાચ્છ્રીરિતીડ્યાં સમાખ્યાં લબ્ધ્વા લોકે શેષપત્ની બભૂવ ॥ ૩,૨૮.૬॥

યદાહીશો વિપુલામુદ્ધરેચ્ચ તદા રામઃ શ્રીભિદાસંગમે ચ ।
કરોતિ તોષત્સર્વદા વૈ રમાયાસ્તસ્યાપ્યાવેશો વ્યંસ્ત્રિતમોનસંગમ્ ॥ ૩,૨૮.૭॥

યા રેવતી રૈવતસ્યૈવ પુત્રી સા વારુણી બલભદ્રસ્ય પત્ની ।
સૌપર્ણનામ્ની બલપત્ની ખગેન્દ્ર યાસ્તાસ્તિસ્રઃ ષડ્ગિષણોશ્ચ સ્ત્રીભ્યઃ ।
દ્વિગુણાધમા રુદ્રશેષાદિકેભ્યો દશાધમા ત્વં વિજાનીહિ પૌત્ર ॥ ૩,૨૮.૮॥

ગરુડ ઉવાચ ।
રામેણ રન્તું સર્વદા વારુણી તુ પુત્રીત્વમાપે રેવતસ્યૈવ સુભ્રૂઃ ।
એવં ત્રિરૂપા વારુણી શેષપત્ની દ્વિરૂપભૂતા પાર્વતી રુદ્રપત્ની ॥ ૩,૨૮.૯॥

નીચાયા જાંબવત્યાશ્ચ શેષસામ્યં ચ કુત્રચિત્ ।
શ્રૂયતે ચ મયા કૃષ્ણ નિમિત્તં બ્રૂહિ મે પ્રભો ॥ ૩,૨૮.૧૦॥

ઉમાયાશ્ચ તથા રુદ્રઃ સદા બહુગુણાધિકઃ ।
એવં ત્વયોક્તં ભગવન્નિશ્ચયાર્થં મમ પ્રભો ॥ ૩,૨૮.૧૧॥

રેવતી શ્રીયુતા શ્રીશ્ચ શેષરૂપા ચ વારુણી ।
સૌપર્ણિ પાર્વતી ચૈવ તિસ્રઃ શેષાશતો વરાઃ ॥ ૩,૨૮.૧૨॥

ઇત્યપિ શ્રૂયતે કૃષ્ણ કુત્રચિન્મધુસૂદન ।
નિમિત્તં બ્રૂહિ મે કૃષ્ણ તવશિષ્યાય સુવ્રત ॥ ૩,૨૮.૧૩॥

શ્રીકૃષ્ણ ઉવાચ ।
વિજ્ઞાય જાંબવત્યાશ્ચ તદન્યેષાં ખગાધિપ ।
ઉત્તમાનાં ચ સામ્યં તુ ઉત્તમાવેશતો ભવેત્ ॥ ૩,૨૮.૧૪॥

અવરાણાં ગુણસ્યાપિ હ્યુત્તમાનામધીનતા ।
અસ્તીતિ દ્યોતનાયૈવ શતાંશાધિકમુચ્યતે ॥ ૩,૨૮.૧૫॥

યથા મયોચ્યતે વીન્દ્ર તથા જાનીહિ નાન્યથા ।
તદનન્તરજાન્વક્ષ્યે શ઼ૃણુ કાશ્યપજોત્તમ ॥ ૩,૨૮.૧૬॥

ચતુર્દશસુ ચેન્દ્રેષુ સપ્તમો યઃ પુરન્દરઃ ।
વૃત્રાદીનાં શરીરં તુ પુરમિત્યુચ્યતે બુધૈઃ ॥ ૩,૨૮.૧૭॥

તં દારયતિ વજ્રેણ યસ્માત્તસ્માત્પુરન્દરઃ ।
ચતુર્દશસુ ચેન્દ્રેષુ મન્ત્રદ્યુમ્નસ્તુ ષષ્ઠકઃ ॥ ૩,૨૮.૧૮॥

મન્ત્રાનષ્ટ મહાવીન્દ્ર દેવો દ્યોતયતે યતઃ ।
મન્ત્રદ્યુમ્નસ્તતો લોકે ઉભાવપ્યેક એવ તુ ॥ ૩,૨૮.૧૯॥

મન્ત્રદ્યુમ્નાવતારોભૂત્કુન્તીપુત્રોર્જુનો ભુવિ ।
વિષ્ણોર્વાયોરનન્તસ્ય ચેન્દ્રસ્ય ખગસત્તમ ॥ ૩,૨૮.૨૦॥

પાર્થશ્ચતુર્ભિઃ સંયુક્ત ઇન્દ્ર એવ પ્રકીર્તિતઃ ।
ચતુર્થેપિ ચ વાયોશ્ચ વિશેષોસ્તિ સદાર્જુન ॥ ૩,૨૮.૨૧॥

વાલિર્નામા વાનરસ્તુ પુરન્દર ઇતિ સ્મૃતઃ ।
ચન્દ્રવંશે સમુત્પન્નો ગાધિરાજો વિચક્ષણઃ ॥ ૩,૨૮.૨૨॥

મન્ત્રદ્યુમ્નાવતારઃ સ વિશ્વામિત્રપિતા સ્મૃતઃ ।
વેદોક્તમન્ત્રા ગાઃ પ્રોક્તા ધિયા સંધારયેદ્યતઃ ॥ ૩,૨૮.૨૩॥

અતો ગાધિરિતિ પ્રોક્તસ્તદર્થં ભૂતલે હ્યભૂત્ ।
ઇક્ષ્વાકુપુત્રો વીન્દ્ર વિકુક્ષિરિતિ વિશ્રુતઃ ॥ ૩,૨૮.૨૪॥

સ એવેન્દ્રાવતારોભૂદ્ધરિસેવાર્થમેવ ચ ।
વિશેષેણ હરિં કુક્ષૌ વિજ્ઞાનાચ્ચ હરિઃ સદા ॥ ૩,૨૮.૨૫॥

અતો વિકુક્ષિનામાસૌ ભૂલોકે વિશ્રુતઃ સદા ।
રામપુત્રઃ કુશઃ પ્રોક્ત ઇન્દ્ર એવ પ્રકીર્તિતઃ ॥ ૩,૨૮.૨૬॥

વાલ્મીકિઋષિણા યસ્માત્કુશેનૈવ વિનિર્મિતઃ ।
અતઃ કુશ ઇતિ પ્રોક્તો જાનકીનન્દનઃ પ્રભુઃ ॥ ૩,૨૮.૨૭॥

ઇન્દ્રદ્યુમ્નઃ પુરેદ્રસ્તુ ગાધી વાલી તથાર્જુનઃ ।
વિકુક્ષિઃ કુશ એવૈતે સપ્ત ચેન્દ્રાઃ પ્રકીર્તિતાઃ ॥ ૩,૨૮.૨૮॥

યઃ કૃષ્ણપુત્રઃ પ્રદ્યુમ્નઃ કામ એવ પ્રકીર્તિતઃ ।
પ્રકૃષ્ટપ્રકાશરૂપત્વાત્પ્રદ્યુમ્ન ઇતિ નામવાન્ ॥ ૩,૨૮.૨૯॥

યા રામભ્રાતા ભરતઃ કામ એવાભવદ્ભુવિ ।
રામાજ્ઞાં ભરતે યસ્માત્તસ્માદ્ભરતનામકઃ ॥ ૩,૨૮.૩૦॥

ચક્રાભિમાનિ કામસ્તુ સુદર્શન ઇતિ સ્મૃતઃ ।
બ્રહ્મૈવ કૃષ્ણપુત્રસ્તુ સાંબો જામ્બવતીસુતઃ ॥ ૩,૨૮.૩૧॥

કામાવતારો વિજ્ઞેયઃ સંદેહો નાત્ર વિદ્યતે ।
યો રુદ્રપુત્રઃ સ્કન્દસ્તુ કામ એવ પ્રકીર્તિતઃ ॥ ૩,૨૮.૩૨॥

રિપૂનાસ્કં દતે નિત્યમતઃ સ્કન્દ ઇતિ સ્મૃતઃ ।
યો વા સનત્કુમારસ્તુ બ્રહ્મપુત્રઃ ખગાધિપ ।
કામાવતારો વિજ્ઞેયો નાત્ર કાર્યા વિચારણા ॥ ૩,૨૮.૩૩॥

સુદર્શનશ્ચ પરમઃ પ્રદ્યુમ્નઃ સાંબ એવ ચ ।
સનત્કુમારઃ સાંબશ્ચષડેતે કામરૂપકાઃ ॥ ૩,૨૮.૩૪॥

તતશ્ચ ઇન્દ્રકામાવપ્યુમાદિભ્યો દશાવરૌ ।
તયોર્મધ્યે તુ ગરુડ કામ ઇન્દ્રાધમઃ સ્મૃતઃ ॥ ૩,૨૮.૩૫॥

પ્રાણસ્ત્વહઙ્કાર એવ અહઙ્કારકસંજ્ઞકઃ ।
ગરુત્મદંશો વિજ્ઞેયઃ કામેન્દ્રાભ્યાં દશાધમઃ ॥ ૩,૨૮.૩૬॥

તદનન્તરજાન્વક્ષ્યે શ ૃણુ વીન્દ્ર સમાહિતઃ ।
શ્રવણાન્મોક્ષમાપ્નોતિ મહાપાપાદ્વિમુચ્યતે ॥ ૩,૨૮.૩૭॥

કામપુત્રોનિરુદ્ધોઽપિ હરેરન્યઃ પ્રકીર્તિતઃ ।
સ એવાભૂદ્ધરેઃ સેવાં કર્તું રામાનુજો ભુવિ ॥ ૩,૨૮.૩૮॥

શત્રુઘ્ન ઇતિ વિખ્યાતઃ શત્રૂન્સૂદયતે યતઃ ।
અનિરુદ્ધઃ કૃષ્ણપુત્રો પ્રદ્યુમ્નાદ્યોઽજનિષ્ટ હ ॥ ૩,૨૮.૩૯॥

સંકર્ષણાદિરૂપૈસ્તુ ત્રિભિરાવિષ્ટ એવ સઃ ।
એવં દ્વિરૂપો વિજ્ઞેયો હ્યનિરુદ્ધો મહામતિઃ ॥ ૩,૨૮.૪૦॥

કામભાર્યા રતિર્યા તુ દ્વિરૂપા સમ્પ્રકીર્તિતા ।
રુગ્મપુત્રી રુગ્મવતી કામભાર્યા પ્રકીર્તિતા ॥ ૩,૨૮.૪૧॥

અતિપ્રકાશયુક્તત્વાત્તસ્માદ્રુગ્મવતી સ્મૃતા ।
દુર્યોધનસ્ય યા પુત્રી લક્ષણા સા રતિઃ સ્મૃતા ॥ ૩,૨૮.૪૨॥

કાષ્ઠા સાંબસ્ય ભાર્યા સા લક્ષણં સંયુનક્ત્યતઃ ।
લક્ષણાભિધયાભૂમૌ દુષ્ટ વીર્યોદ્ભવા હ્યપિ ॥ ૩,૨૮.૪૩॥

એવં દ્વિરૂપા વિજ્ઞેયા કામભાર્યા રતિઃ સ્મૃતા ।
સ્વાયંભુવો બ્રહ્મપુત્રો મનુસ્ત્વાદ્યો ગુરૌ સમઃ ।
રાજધર્મેણ વિષ્ણોશ્ચ જાતઃ પ્રીણયિતું હરેઃ ॥ ૩,૨૮.૪૪॥

બૃહસ્પતિર્દેવાગુરુર્મહાત્મા તસ્યાવતારાસ્ત્રય આસન્ખગેન્દ્ર ।
રામાવતારે ભરતાખ્યો બભૂવ હ્યંભોજજાવેશયુતો બૃહસ્પતિઃ ॥ ૩,૨૮.૪૫॥

દેવાવતારાન્વાનરાંસ્તારયિત્વા શ્રીરામદિવ્યાડચરિતાન્યવાદીત્ ।
અતો હ્યસૌ નારનામા બભૂવ હ્યઙ્ગત્વમાપ્તું રામદેવસ્ય ભૂમ્યામ્ ॥ ૩,૨૮.૪૬॥

કૃષ્ણાવતારે દ્રોણનામા બભૂવ અંભોજજાવેશયુતો બૃહસ્યપતિઃ ।
યસ્માદ્દોણાત્સંભભૂવ ગુરુશ્ચ તસ્માદસૌ દ્રોણસંજ્ઞો બભૂવ ॥ ૩,૨૮.૪૭॥

ભૂભારભૂતાદ્યુદ્ધૃતૌ હ્યઙ્ગભૂતો વિષ્ણોઃ સેવાં કર્તુમેવાસ ભૂમૌ ।
બૃહસ્પતિઃ પવનાવેશપુક્તા સ ઉદ્ધવશ્ચેત્યમિધાનમાપ ॥ ૩,૨૮.૪૮॥

યસ્માદુત્કૃષ્ટો હરિરત્ર સમ્યગતો હ્યસૌ બુધવન્નામ ચાપ ।
સખા હ્યભૂત્કૃષ્ણદેવસ્ય નિત્યં મહામતિઃ સર્વલોકેષુ પુજ્વઃ ॥ ૩,૨૮.૪૯॥

દક્ષિણાઙ્ગુષ્ઠજો દક્ષો બ્રહ્મપુત્રો મહામતિઃ ।
કન્યાં સૃષ્ટ્વા હરેઃ પ્રીણન્નાસ ભૂમા પ્રજાપતિઃ ।
પુત્રાનુદપાદયદ્દક્ષસ્ત્વતો દક્ષ ઇતિ સ્મૃતઃ ॥ ૩,૨૮.૫૦॥

શચીં ભર્યાં દેવરાજસ્ય વિદ્ધિ તસ્યા હ્યવતારં શ ૃણુ સમ્યક્ખગેન્દ્ર ।
રામાવતારે નામ તારા બભૂવ સા વાલિપત્ની શચીસજકા ચ ॥ ૩,૨૮.૫૧॥

રામાન્મૃતે વાલિસંજ્ઞે પતૌ હિ સુગ્રીવસંગં સા ચકારાથ તારા ।
અતો નાગાત્સ્વર્ગલોકં ચ તારા ક્વ વા યાયાદન્તરિક્ષે ન પાપા ॥ ૩,૨૮.૫૨॥

કૃષ્ણાવતારે સૈવ તારા ચ વીન્દ્ર બભૂવ ભૂમૌ વિજયસ્ય પત્ની ।
પિશઙ્ગદેતિ હ્યભિધા સ્યાચ્ચ તસ્યાઃ સામીપ્યમસ્યાસ્ત્વર્જુનવેવ ચાસીત્ ॥ ૩,૨૮.૫૩॥

ઉત્પાદયિત્વા બભ્રુવાહં ચ પુત્રં તસ્યાં ત્યક્ત્વા હ્યર્જુનો વૈ મહાત્મા ।
અતશ્ચોભે વારચિત્રાઙ્ગદે ચ શચીરૂપે નાત્ર વિવાર્યમસ્તિ ॥ ૩,૨૮.૫૪॥

પુલોમજા મન્ત્રદ્યુમ્નસ્ય ભાર્યા યા કાશિકા ગાધિરાજસ્ય ભાર્યા ।
વિકુક્ષિભાર્યા સુમતિશ્ચેતિ સંજ્ઞા કુશસ્ય પત્ની કાન્તિમતીતિ સંજ્ઞા ॥ ૩,૨૮.૫૫॥

એતા હિ સપ્ત હ્યવરાશ્ચ શચ્યા જાનીહિ વૈ નાસ્તિ વિચારણાત્ર ।
શચી રતિશ્ચાનિરુદ્ધો મનુર્દક્ષો બૃહસ્પતિઃ ।

ષડન્યોન્યસમાઃ પ્રોક્તા અહઙ્કારાદ્દશાધમાઃ ॥ ૩,૨૮.૫૬॥

અથ યઃ પ્રવહો વાયુર્મુખ્યવાયોઃ સુતો બલી ।
સ વાયુષુ મહાનદ્ય સ વૈ કોણાધિપસ્તથા ॥ ૩,૨૮.૫૭॥

નાસિકાસુ સ એવોક્તો ભૌતિકસ્તુલ્ય એવ ચ ।
અતિવાહઃ સ એવોક્તઃ યતો ગમ્યો મુમુક્ષુભિઃ ॥ ૩,૨૮.૫૮॥

દક્ષાદિભ્યઃ પઞ્ચગુણાદધમઃ સમ્પ્રકીર્તિતઃ ।
ગરુડ ઉવાચ ।
પ્રવહશ્ચેતિ સંજ્ઞાં સ કિમર્થં પ્રાપ તદ્વદ ॥ ૩,૨૮.૫૯॥

અર્થઃ કશ્ચાસ્તિ તન્નામ્નઃ પ્રતીતસ્તં વદસ્વ મે ।
ગરુડેનૈવમુક્તસ્તુ ભગવાન્દેવકીસુતઃ ।
ઉવાચ પરમપ્રીતઃ સંસ્તૂય ગરુડં હરિઃ ॥ ૩,૨૮.૬૦॥

કૃષ્ણ ઉવાચ ।
પ્રહર્ષેણ હરેસ્તુલ્યાન્સર્વદા વહતે યતઃ ।
અતઃ પ્રવહનામાસૌ કીર્તિતઃ પક્ષિસત્તમ ॥ ૩,૨૮.૬૧॥

સર્વોત્તમો વિષ્ણુરેવાસ્તિ નામ્ના બ્રહ્માદયસ્તદધીનાઃ સદાપિ ।
મયોક્તમેતત્તુ સત્યં ન મિથ્યા ગૃહ્ણામિ હસ્તેનોરગં કોપયુક્તમ્ ॥ ૩,૨૮.૬૨॥

સર્વં નુ સત્યં યદિ મિથ્યા ભવેત્તુ તદા ત્વસૌ માં દશતુહ્યહીન્દ્રઃ ।
એવં બ્રુવન્નુરગં કોપયુક્તં સમગ્રહીન્નાદશત્સોપ્યુરઙ્ગઃ ॥ ૩,૨૮.૬૩॥

એતસ્ય સંધારણાદેવ વીન્દ્ર સ વાયુપુત્રઃ પ્રવહેત્યાપ સંજ્ઞામ્ ।
યો વા લોકે વિષ્ણુમૂર્તિં વિહાય દૈત્યસ્વરૂપા રેણુકાદ્યાઃ કુદેવાઃ ॥ ૩,૨૮.૬૪॥

તેષાં તથા મત્પિતૃણાં ચ પૂજા વ્યર્થા સત્યં સત્યમેતદ્બ્રવીમિ ।
એતત્સર્વં યદિ મિથ્યા ભવેત્તુ તદા ત્વસૌ માં દશતુ હ્યહીન્દ્રઃ ॥ ૩,૨૮.૬૫॥

પિત્ર્યં નયામિ પ્રવિહાયૈવ યે તુ પિત્રુદ્દેશાત્કેવલં યઃ કરોતિ ।
સ પાપાત્મા નરકાન્વૈ પ્રયાતીત્યેતદ્વાક્યં સત્યમેતદ્બ્રવીમિ ॥ ૩,૨૮.૬૬॥

ન શ્રીઃ સ્વતન્ત્રા નાપિ વિધિઃ સ્વતન્ત્રો ન વાયુદેવો નાપિ શિવઃ સ્વતન્ત્રઃ ।
તદન્યે નો ગૌરિપુલોમ જાદ્યાઃ કિં વક્તવ્યં નાત્ર લોકે સ્વતન્ત્રઃ ॥ ૩,૨૮.૬૭॥

બ્રવીમિ સત્યં પુરુષો વિષ્ણુરેવ સત્યં સત્ય ભુજમુદ્ધૃત્ય સત્યમ્ ।
એતત્સર્વં યદિ મિથ્યા ભવેત્તુ તદા ત્વસૌ માં દશતુ હ્યહીન્દ્ર ॥ ૩,૨૮.૬૮॥

જીવશ્ચ સત્યઃ પરમાત્મા ચ સત્યસ્તયોર્ભેદઃ સત્યે એ તત્સદાપિ ।
જડશ્ચસત્યો જીવજડયોશ્ચ ભેદો ભેદઃ સત્યઃ કિં ચ જડૈશયોર્ભિદા ॥ ૩,૨૮.૬૯॥

ભેદઃ સત્યઃ સર્વજીવેષુ નિત્યં સત્યા જડાનાં ચ ભેદા સદાપિ ।
એતત્સર્વં યદિ મિથ્યા ભવેત્તુ તદા ત્વસૌ દશતુ માં હ્યહીન્દ્રઃ ॥ ૩,૨૮.૭૦॥

એવં બ્રુવન્નુરગં કોપયુક્તં સમગ્રહીન્નાદશત્સોપ્યુરઙ્ગઃ ।
એતસ્ય સંધારણાદેવવીદ્રે સા વાયુપુત્રઃ પ્રવહેત્યાપ સંજ્ઞામ્ ॥ ૩,૨૮.૭૧॥

દ્વયં સ્વરૂપં પ્રવિદિત્વૈવ પૂર્વં ત્વં સ્વીકુરુષ્વ દ્વયમેવ નિત્યમ્ ।
સ્નાનાદિકં ચ પ્રકરોતિ નિત્યં પાપી સ આત્મા નૈવ મોક્ષં પ્રયાતિ ॥ ૩,૨૮.૭૨॥

તસ્માદ્દ્વયં પ્રવિચાર્યૈવ નિત્યં સુખી ભવેન્નાત્ર વિચાર્યમસ્તિ ।
એતત્સર્વં યદિ મિથ્યા ભવેત્તુ તદા ત્વસૌ માં દશતુ હ્યહીન્દ્રઃ ॥ ૩,૨૮.૭૩॥

ગરુડ ઉવાચ ।
કિં તદ્દ્વયં દેવદેવેશ કિં વા તત્કારણં કીદૃશં મે વદસ્વ ।
દ્વયોસ્ત્યાગં કીદૃશં મે વદસ્વ ત્યાગાત્સુખં કીદૃશં મે વદસ્વ ॥ ૩,૨૮.૭૪॥

શ્રીકૃષ્ણ ઉવાચ ।
દ્વયં ચાહુસ્ત્વિન્દ્રિયે દ્વે બલિષ્ઠે દેહે હ્યસ્મિઞ્શ્રોત્રનેત્રે સુસૃષ્ટે ।
અવાન્તરે શ્રોત્રનેત્રે ખગેન્દ્ર દ્વયં ચાહુસ્તત્સ્વરૂપં ચ વક્ષ્યે ॥ ૩,૨૮.૭૫॥

શ્રોત્રસ્વભાવો લોક વાર્તાશ્રુતૌ ચ હ્યતીવ મોદસ્ત્વાદરાસ્વાદનેન ।
હરેર્વાર્તાશ્રવણે દુઃખજાલં શ્રોત્રસ્વભાવો જડતા દમશ્ચ ॥ ૩,૨૮.૭૬॥

નેત્રસ્વભાવો દર્શને સ્ત્રીનરાણાં હ્યત્યાદરાન્નાસ્તિ નિદ્રાદિકં ચ ।
હરેર્ભક્તાનાં દર્શને દુઃખરૂપો વિષ્ણોઃ પૂજાદર્શને દુઃખજાલમ્ ॥ ૩,૨૮.૭૭॥

તયોઃ સ્વરૂપં પ્રવિદિત્વૈવ પૂર્વં પુનઃ પુનઃ સ્વીકરોત્યેવ મૂઢઃ ।
શિશ્નં મૌર્ખ્યાચ્ચૈવ કુત્રાપિ યોનૌ પ્રવેશયેત્સર્વદા હ્યાદરેણ ॥ ૩,૨૮.૭૮॥

ભયં ચ લજ્જા નૈવ ચાસ્તે વધૂનાં તથા નૃણાં વનિતાનાં યતીનામ્ ।
સ્વસારં તે હ્યવિદિત્વા દિનેપિ સુવામ યજ્ઞેન સ્વાભાવશ્ચ વીન્દ્ર ॥ ૩,૨૮.૭૯॥

રસાસ્વભાવો ભક્ષણે સર્વદાપિ હ્યનર્પિતસ્યાન્નભક્ષ્યસ્ય વિષ્ણોઃ ।
તથો પહારસ્ય ચ તત્સ્વભાવઃ અભક્ષ્યાણાં ભક્ષણે તત્સ્વભાવઃ ॥ ૩,૨૮.૮૦॥

અલેહ્યલેહસ્ય ચ તત્સ્વભાવઃ પાતું ત્વપેયસ્ય ચ તત્સ્વભાવઃ ।
દ્વયોઃ સ્વરૂપં ચ વિહાય મૂઢઃ પુનઃ પુનઃ સ્વીકરોત્યેવ નિત્યમ્ ॥ ૩,૨૮.૮૧॥

તસ્ય સ્નાનં વ્યર્થમાહુશ્ચ યસ્માત્તસ્માત્ત્યાજ્યં ન દ્વયોઃ કાર્યમેવ ।
અભિપ્રાયં હ્યેતમેવં ખગેન્દ્ર જાનીહિ ત્વં પ્રહસ્યૈવ નિત્યમ્ ॥ ૩,૨૮.૮૨॥

ભાર્યાદ્વયં હ્યવિદિત્વા સ્વરૂપં સ્વીકૃત્ય ચૈકાં પ્રવિહાયૈવ ચૈકામ્ ।
સ્નાનાદિકં કુરુતે મૂઢબૂદ્ધિઃ વ્યર્થં ચાહુર્મોક્ષભોગૌ ચ નૈવ ।
એતત્સર્વં યદિ મિથ્યા ભવેત્તુ તદા ત્વસૌ માં દશતુ હ્યહીન્દ્રઃ ॥ ૩,૨૮.૮૩॥

ગરુડ ઉવાચ ।
ભાર્યાદ્વયં કિં વદ ત્વં મમાપિ તયોઃ સ્વરૂપં કિં વદ ત્વં મુરારે ।
તયોર્મધ્યે ગ્રાહ્યભાર્યાં વદ ત્વમગ્રાહ્યભાર્યાં ચાપિ સમ્યગ્વદ ત્વમ્ ॥ ૩,૨૮.૮૪॥

શ્રીકૃષ્ણ ઉવાચ ।
બુદ્ધિઃ પત્ની સા દ્વિરૂપા ખગેન્દ્ર દુષ્ટા ચૈકા ત્વપરા સુષ્ઠુરૂપા ।
તયોર્મધ્યે દુષ્ટરૂપા કનિષ્ઠા જ્યેષ્ઠા તુ યા સુષ્ઠુબુદ્ધિસ્વરૂપા ॥ ૩,૨૮.૮૫॥

કનિષ્ઠયા નષ્ટતાં યાતિ જીવઃ સુતિષ્ઠન્ત્યા યાતિ યોગ્યાં પ્રતિષ્ઠામ્ ।
કનિષ્ઠાયાઃ શ◌ૃણુ વક્ષ્યે સ્વરૂપં શ્રુત્વા તસ્યાસ્ત્યાગબુદ્ધિં કુરુષ્વ ॥ ૩,૨૮.૮૬॥

જીવં યં વૈ પ્રેરયન્તી કનિષ્ઠા કામ્યં ધર્મં કુરુતે સર્વદાપિ ।
ક્વ બ્રાહ્મણાઃ ક્વ ચ વિષ્ણુર્મહાત્મા ક્વ વૈ કથા ક્વ ચ યજ્ઞાઃ ક્વગાવઃ ॥ ૩,૨૮.૮૭॥

ક્વ ચાશ્વત્થઃ ક્વ ચ સ્નાનં ક્વ શૌચમેતત્સર્વં નામ નાશં કરોતિ ।
મૂઢ પતિં રેણુકાં પૂજયસ્વ માયાદેવ્યા દીપદાનં કુરુષ્વ ॥ ૩,૨૮.૮૮॥

સુભૈરવાદીન્ભજ મૂઢ ત્વમન્ધ હારિદ્રચૂર્ણન્ધારયેઃ સર્વદાપિ ।
જ્યેષ્ઠાષ્ટમ્યાં જ્યેષ્ઠદેવીં ભજસ્વ ભક્ત્યા સૂત્રં ગલબન્ધં કુરુષ્વ ॥ ૩,૨૮.૮૯॥

મરિગન્ધાષ્ટમ્યાં મરિગન્ધં ભજસ્વ તથા સૂત્રં સ્વગલે ધારયસ્વ ।
દીપસ્તંભં સુદિને પૂજયસ્વ તત્સૂત્રમેવ સ્વગલે ધારયસ્વ ॥ ૩,૨૮.૯૦॥

મહાલક્ષ્મીં ચાદ્યલક્ષ્મીં ચ સમ્યક્પૂજાં કુરુ ત્વં હિ ભક્ત્યાથ જીવ ।
લક્ષ્મીસૂત્રં સ્વાગલે ધારયસ્વ મહાલક્ષ્મીવાન્ભવસીત્યુત્તરત્ર ॥ ૩,૨૮.૯૧॥

વિહાય મૌઞ્જીદિવસે ભાગ્યકામઃ સુગુગ્ગુલાન્ધારયસ્વાતિભક્ત્યા ।
સુવાસિનીઃ પૂજયસ્વાશુ ભક્ત્યા ગન્ધૈઃ પુષ્પૈર્ધૂપદીપૈઃ પ્રતોષ્ય ॥ ૩,૨૮.૯૨॥

વરાર્તિક્યં કાંસ્યપાત્રે નિધાય કુર્વાર્તિક્યં દેવતાદેવતાનામ્ ।
પિચુમન્દપત્રાણિ વિતત્ય ભૂમૌ નમસ્વ ત્વં ક્ષમ્યતાં ચેતિ ચોક્ત્વા ॥ ૩,૨૮.૯૩॥

મહાદેવીં પૂજયસ્વાદ્ય ભક્ત્યા સદ્વૈષ્ણવાનાં મા દદસ્વાપ્યથાન્નમ્ ।

સદ્વૈષ્ણવાનાં યદિ વાન્નં દદાસિ ભાગ્યં ચ તે પશ્યતો નાશમેતિ ॥ ૩,૨૮.૯૪॥

સ્વવામહસ્તે વેણુપાત્રે નિધાય દીપં ધૃત્વા સવ્યહસ્તે પતે ત્વમ્ ।
ઉત્તિષ્ઠ ભોઃ પઞ્ચગૃહેષુ ભિક્ષાં કુરુષ્વ સમ્યક્પ્રવિહાયૈવ લજ્જામ્ ॥ ૩,૨૮.૯૫॥

આદૌ ગૃહે ષડ્રસાન્નં ચ કૃત્વા જગદ્ગોપ્યં ભોજનં ત્વં કુરુષ્વ ।
તચ્છેષાન્નં ભોજયિત્વા પતે ત્વં તાસાં ચ રે શરણં ત્વં કુરુષ્વ ॥ ૩,૨૮.૯૬॥

તાસં હસ્તં પુસ્તકે સ્તાપયિત્વા ત્રાહિત્યેવં તન્મુખૈર્વાચયસ્વ ।
ત્વં ખડ્ગદેવં પૂજયસ્વાદ્યભર્તસ્તત્સેવકાન્પૂજયસ્વાદ્ય સમ્યક્ ॥ ૩,૨૮.૯૭॥

તૈઃ સાર્ધં ત્વં શ્વાનશબ્દં કુરુષ્વ હરિદ્રાચૂર્ણંસર્વદા ત્વં દધસ્વ ।
કુરુષ્વ ત્વં ભીમસેનસ્ય પૂજાં પઞ્ચામૃતૈઃ ષોડશભિશ્ચોપચારૈઃ ॥ ૩,૨૮.૯૮॥

તત્કૌપીનં રૌપ્યજં કારયિત્વા સમર્પયિત્વા દીપમાલાં કુરુષ્વ ।
તદ્દાસવર્યાન્ભોજયસ્વાદ્ય ભક્ત્યા ગર્જસ્વ ત્વં ભીમભીમેતિ સુષ્ઠુ ॥ ૩,૨૮.૯૯॥

તદ્દાસવર્યાન્મોદયસ્વ સ્વવસ્ત્રૈર્મદ્યૈર્માંસદ્રવ્યજાલેન નિત્યમ્ ।
મહાદેવં પૂજયસ્વાદ્ય સમ્યગ્મહારુદ્રૈરતિરુદ્રૈશ્ચ સમ્યક્ ॥ ૩,૨૮.૧૦૦॥

હરેત્યુક્ત્વા જઙ્ગમાન્પૂજયસ્વશૈવાગમે નિપુણાઞ્છૂદ્રજાતાન્ ।
શાકંભરીં વિવિસઃ સર્વશાકાન્સુપાચયિત્વા ચ ગૃહે ગૃહે ચ ॥ ૩,૨૮.૧૦૧॥

દદસ્વ ભક્ત્યા પરમાદરેણ સ્વલઙ્કૃત્ય પ્રાસ્તુવંસ્તદ્ગુણાંશ્ચ ।
કુલાદેવં પૂજયસ્વાદ્ય ભક્ત્યા ત્વં દૃગ્ભ્યાં વૈ તદ્દિને શંભુબુદ્ધ્યા ॥ ૩,૨૮.૧૦૨॥

તદ્ભક્તવર્યાન્પૂજયસ્વાદ્ય સમ્યક્તત્પાદમૂલે વન્દનં ત્વં કુરુષ્વ ।
સુપઞ્ચમ્યાં મૃન્મયીં શેષમૂર્તિં પૂજાં કુરુષ્વ ક્ષીરલાજાદિકૈશ્ચ ॥ ૩,૨૮.૧૦૩॥

સુનાગપાશં હિ ગલે ચ બદ્ધ્વા તચ્છેષાન્નં ભોજયેર્ભોઃ પુનસ્ત્વમ્ ।
દિને ચતુર્થે ભોજ યસ્વાદ્ય ભક્ત્યા નૈવેદ્યાન્નં ભોજયસ્વાદ્ય સુષ્ઠુ ॥ ૩,૨૮.૧૦૪॥

ઇત્યાદિકં પ્રેરયિત્વા પતિં સા જીવેન નષ્ટં પ્રિકરોત્યેવ નિત્યમ્ ।
તસ્યાઃ સંગાજ્જીવરૂપઃ પતિસ્ત્વાં સમ્યગ્દષ્ટામિહલોકે પરત્ર ॥ ૩,૨૮.૧૦૫॥

તસ્યાઃ સંગં સુવિદૂરં વિસૃજ્યચેષ્ટ્વા સમગ્રં કુરુ સર્વદા ત્વમ્ ।
સુબુદ્ધિરૂપા ત્વીરયન્તી જગાદ ભજસ્વ વિષ્ણું પરમાદરેણ ॥ ૩,૨૮.૧૦૬॥

હરિં વિનાન્યં ન ભજસ્વ નિત્યં સા રેણુકા ત્વાં તુ ન પાલયિષ્યતિ ।
અદૃષ્ટનામા હરિરિવે હિ નિત્યં ફલપ્રદો યદિ ન સ્યાત્ખગેન્દ્ર ॥ ૩,૨૮.૧૦૭॥

જુગુપ્સિતાં શ્રુત્યનુક્તાં ચ દેવીં પતિદ્રુહાં સર્વદા સેવયિત્વા ।
તસ્યાઃ પ્રસાદાત્કુષ્ઠભગન્દરાદ્યૈર્ભુક્ત્વા દુઃખં સંયમિનીં પ્રયાહિ ॥ ૩,૨૮.૧૦૮॥

તદા કુદવી કુત્ર ગતા વદસ્વમે હ્યતઃ પતે ત્વં ન ભજસ્વ દેવીમ્ ।
પતે ભજ ત્વં બ્રાહ્મણાન્વૈષ્ણવાંશ્ચ સંસારદુઃખાત્તારન્સુષ્ઠુરૂપાન્ ॥ ૩,૨૮.૧૦૯॥

સેવાદિકં પ્રવીહાયૈવ સ્વચ્છં માયાદેવ્યા ભજનાત્કિં વદસ્વ ।
જ્યેષ્ઠાષ્ટમ્યાં જ્યેષ્ઠદેવીં હ્યલક્ષ્મીં લક્ષ્મીતિ બુદ્ધ્યા પૂજયિત્વા ચ સમ્યક્ ॥ ૩,૨૮.૧૧૦॥

તસ્યાઃ સૂત્રં ગલબદ્ધં ચ કૃત્વા નાનાદુઃખં હ્યનુભૂયાઃ પતે ત્વમ્ ।
યદા પતે યમાદૂતૈશ્ચ પાશૈર્બદ્ધ્વા ચ સમ્યક્તાડ્યમાનૈઃ કશાભિઃ ॥ ૩,૨૮.૧૧૧॥

તદા હ્યલક્ષ્મીઃ કુત્ર પલાયતેઽસાવતો મૂલં વિષ્ણુપાદં ભજસ્વ ।
પતે ભજ ત્વં સર્વદા વાયુતત્ત્વં ન ચાશ્રયેસ્ત્વં સૂક્ષ્મસ્કન્દં ચ મૂઢ ॥ ૩,૨૮.૧૧૨॥

તદ્વત્તં ત્વં નવનીતં ચ ભક્ત્યા તદુચ્છિષ્ટં ભક્ષયિત્વા પતે હિ ।
તસ્યાશ્ચ સૂત્રં ગલબદ્ધં ચ કૃત્વા ઇહૈવ દુઃખાન્યનુભૂયાઃ પતે ત્વમ્ ॥ ૩,૨૮.૧૧૩॥

યદા પતે યમદૂતૈશ્ચ પાશૈર્બદ્ધ્વા ચ સમ્યક્તાડ્યમાનઃ કશાભિઃ ।
તદા સ્કન્દઃ કુત્ર પલાયતેઽસાવતો મૂલં વિષ્ણુપાદં ભજસ્વ ॥ ૩,૨૮.૧૧૪॥

દીપસ્તંભં દાપયિત્વા પતે ત્વં સૂત્રં ચ બદ્ધ્વા સ્વગલે ચ ભક્ત્યા ।
તદા બદ્ધ્વા યમદૂતૈશ્ચ પાશૈર્દીપસ્તંભૈસ્તાડ્યમાનસ્તુ સમ્યક્ ॥ ૩,૨૮.૧૧૫॥

દીપસ્તંભઃ કુત્ર પલાયિતોભૂદતો મૂલં વિષ્ણુપાદં ભજસ્વ ।
લક્ષ્મીદિને પૂજયિત્વા ચ લક્ષ્મીં સૂત્રં તસ્યાઃ સ્વગલે ધારય ત્વમ્ ॥ ૩,૨૮.૧૧૬॥

યદા પતે યમદૂતૈશ્ચ પાશૈર્બધ્વા સમ્યક્તાડ્યમાનઃ કશાભિઃ ।
તદા લક્ષ્મીઃ કુત્ર પલાયતેઽસાવતો મૂલં વિષ્ણુપાદં ભજસ્વ ॥ ૩,૨૮.૧૧૭॥

વિવાહમૈઞ્જીદિવસે મૂઢબુદ્ધે જુગુસિતાન્ધારયિત્વા સુભક્ત્યા ।
વરારાર્તિકં કાંસ્યપાત્રે નિધાય કૃત્વાર્તિક્યં ઉદૌદૈતિ શબ્દમ્ ॥ ૩,૨૮.૧૧૮॥

તથૈવ દૃષ્ટ્વા પિચુમન્દસ્ય પત્રં સુનર્તયિત્વા પરમાદરેણ ।
યદા તદા યમદૂતૈશ્ચ પાશૈર્બદ્ધ્વાબદ્ધ્વા તાડ્યમાનશ્ચ સમ્યક્ ॥ ૩,૨૮.૧૧૯॥

તવ સ્વામિન્કુલદેવો મહાત્મન્પલાયિતઃ કુત્ર મે તદ્વદસ્વ ।
સ્વદેહાનાં પૂજયિત્વા ચ સમ્યક્કણ્ઠાભરણૈર્વિધુરાણાં ચ કેશૈઃ ॥ ૩,૨૮.૧૨૦॥

સંતિષ્ઠમાને યમદૂતા બલિષ્ઠા સંતાડ્યમાને મુસલૈર્ભિન્દિપાલૈઃ ।
યદા તદા કુત્ર પલાયિતા સા કેશૈર્વિહીના લંબકર્ણં ચ કૃત્વા ॥ ૩,૨૮.૧૨૧॥

સ્વવામહસ્તે વેણુપાત્રં નિધાય દીપં ધૃત્વા સવ્યહસ્તે ચ મૂઢઃ ।
ગૃહેગૃહે ભૈક્ષચર્યાં ચ કૃત્વા સંતિષ્ઠમાને સ્વગૃહં ચૈવ દેવી ॥ ૩,૨૮.૧૨૨॥

યદા તદા યમદૂતૈશ્ચ મૂઢ દીપૈઃ સહસ્રૈર્દહ્યમાનશ્ચ સમ્યક્ ।
નિર્નાસિકા રેણુકા મૂઢબુદ્ધે પલાયિતા કુત્ર સા મે વદસ્વ ॥ ૩,૨૮.૧૨૩॥

સદા મૂઢ ખડ્ગદેવં ચ ભક્ત્યા તં ભક્તવત્પૂજયિત્વા ચ સમ્યક્ ।
તૈઃ સાર્ધં ત્વં શ્વાનવદ્વર્જયિત્વા સંતિષ્ઠમાને સ્વગૃહે ચૈવ નિત્યમ્ ॥ ૩,૨૮.૧૨૪॥

યદા તદા યમદૂતૈશ્ચ સમ્યક્સંતાડ્યમાનસ્તત્ર શબ્દં પ્રકુર્વન્ ।
સંતિષ્ઠમાને ભક્તવર્યં વિહાય તદા દેવઃ કુત્ર પલાયિતોભૂત્ ॥ ૩,૨૮.૧૨૫॥

સ પાર્થક્યાદ્ભીમસેનપ્રતીકં પઞ્ચામૃતૈઃ પૂજયિત્વા ચ સમ્યક્ ।
સુવ્યઞ્જને ચાન્નકૌપીનમેવ દત્ત્વા મૂઢસ્તિષ્ઠમાને સ્વગેહે ॥ ૩,૨૮.૧૨૬॥

યદા તદા યમદૂતૈશ્ચ સમ્યક્સંતાડ્યમાને યમમાર્ગે ચ મૂઢઃ ।
ભીમઃ સ વૈ કુત્ર પલાયિતોભૂતો મૂલં વિષ્ણુપાદં ભજસ્વ ॥ ૩,૨૮.૧૨૭॥

મહાદેવં પૂજયિત્વા ચ સમ્યખરેત્યુક્ત્વા સ્વગૃહે વિદ્યમાને ।
યદા ગૃહં દહ્યતે વહ્નિના તુ તદા હરઃ કુત્ર પલાયિતોભૂત્ ॥ ૩,૨૮.૧૨૮॥

શાકં ભરીદિવસે સર્વમેવ શાકંભરી સા ચ દેવી મહાત્મન્ ।
પલાયિતા કુત્ર મે ત્વં વદસ્વ કુલાલદેવં પૂજયિત્વા ચ ભક્ત્યા ॥ ૩,૨૮.૧૨૯॥

કાર્પાસં વૈ તેન દત્તં ગૃહીત્વા સંતિષ્ઠમાને યમદૂતૈશ્ચ સમ્યક્ ।
સંહન્યમાનસ્તીક્ષ્ણધારૈઃ કુઠારૈઃ કુલાલદેવં ચ સુદંષ્ટ્રનેત્રમ્ ।
વિહાય વૈ કુત્ર પલાયિતોભૂન્ન જ્ઞાયતેઽન્વેષણાચ્ચાપિ કેન ॥ ૩,૨૮.૧૧૩૦॥

યદા પઞ્ચમ્યાં મૃન્મયીં શેષમૂર્તિં સમ્પૂજ્ય ભક્ત્યા વિદ્યમાને સ્વગેહે ।
તદા બદ્ધ્વા યમદૂતાશ્ચ સમ્યક્સંનહ્યમાને નાગપાશૈશ્ચબદ્ધ્વા ॥ ૩,૨૮.૧૩૧॥

સ્વભક્તવર્યં પ્રવિહાય નાગઃ પલાયિતઃ કુત્ર વૈ સંવદ ત્વમ્ ।
દૂર્વાઙ્કુરૈર્મોદકૈઃ પૂજયિત્વા વિનાયકં પઞ્ચખાદ્યૈસ્તથૈવ ॥ ૩,૨૮.૧૩૨॥

સંતિષ્ઠમાને યમદૂતૈશ્ચ સમ્યક્સંતાડ્યમાને તપ્તદણ્ડૈશ્ચ મૂઢ ।
દન્તં વિહાયૈવ ચ વિઘ્નરાજઃ પલાયિતઃ કુત્ર મે તં વદત્વમ્ ॥ ૩,૨૮.૧૩૩॥

વિવાહકાલે પિષ્ટદેવીં સુભક્ત્યા સમ્પૂજયિત્વા વિદ્યમાનો ગૃહે સ્વે ।
યદા તદા યમદૂતૈશ્ચ બદ્ધ્વા સમ્પીડ્યમાનો યમમાર્ગે સ મૂઢઃ ॥ ૩,૨૮.૧૩૪॥

વિષ્ઠાદેવી પીડ્યમાનં ચ ભક્તં વિહાય સા કુત્ર પલાયિતાભૂત્ ।
વિવાહકાલે રજકસ્ય ગેહં ગત્વા સમ્યક્પ્રાર્થયિત્વા ચ મૂઢઃ ॥ ૩,૨૮.૧૩૫॥

યસ્તંભસૂત્રં કલશે પરીત્ય પૂજાં કૃત્વા વિદ્યમાનો ગૃહે સ્વે ।
યદા તદા યમદૂતશ્ચ સમ્યક્તં સ્તંભસૂત્રં તસ્ય મુખે નિધાય ॥ ૩,૨૮.૧૩૬॥

સંતાડ્યમાને સંતભસૂત્રસ્થદેવી પલાયિતા કુત્ર મે સંવદસ્વ ।
વિવાહકાલે પૂજયિત્વા ચ સમ્યક્ચણ્ડાલદેવીં ભક્તવશ્યાં ચ તસ્યાઃ ॥ ૩,૨૮.૧૩૭॥

તદ્ભક્તવર્યૈઃ શૂર્પમધ્યે ચ તીરે સંસેવયિત્વા વિદ્યમાનો ગૃહેસ્વે ।
યદા તદા યમદૂતૈશ્ચ બદ્ધ્વા સંતાડ્યમાનો યમમાર્ગે મહદ્ભિઃ ॥ ૩,૨૮.૧૩૮॥

ચૂલેદવી ક્વ પલાયિતાભૂત્સુમૂઢબુદ્ધે વિષ્ણુપાદં ભજસ્વ ।
જ્વરાદિભિઃ પીડ્યમાને સ્વપુત્રે ગૃહે સ્થિતં બ્રહ્મદેવં ચ સમ્યક્ ॥ ૩,૨૮.૧૩૯॥

ધૂર્પૈર્દીપૈર્ભક્ષ્યભોજ્યૈશ્ચ પુષ્પૈઃ પૂજાં કૃત્વા વિદ્યમાનશ્ચ ગેહે ।
યદા તદા યમદૂતૈશ્ચ બદ્ધ્વા સંતાડ્યમાને વેણુપાશાદિભિશ્ચ ॥ ૩,૨૮.૧૪૦॥

સ બ્રહ્મદેવઃ ક્વ પલાયિતોભૂત્સુમૂઢબુદ્ધે વિષ્ણુપાદં ભજસ્વ ।
સન્તાનાર્થં બૃહતીં પૂજયિત્વા ગલેન બદ્ધ્વા બૃહતીં વૈ ફલં ચ ॥ ૩,૨૮.૧૪૧॥

સંતિષ્ઠમાને યમદૂતૈશ્ચ બદ્ધ્વા સંતાડ્યમાને બૃહતીકણ્ટકૈશ્ચ ।
તદા દેવી બૃહતી મૂઢબુદ્ધે પલાયિતા કુત્ર મે તદ્વદ ત્વમ્ ॥ ૩,૨૮.૧૪૨॥

ભજસ્વ મૂઢ પરદૈવતં ચ નારાયણં તારકં સર્વદુઃખાત્ ।
સુક્ષુદ્રદેવેષુ મતિં ચ મા કુરુ ન ચ શ◌ૃણુ ત્વં ફલ્ગુવાક્યં તથૈવ ॥ ૩,૨૮.૧૪૩॥

સુક્ષુદ્રદેવાન્ભિન્દિપાલે નિધાય વિસર્જયિત્વા દૂરદેશે મહાત્મન્ ।
સંધાર્ય ત્વં સ્વકુલાચારધર્મં સમ્પાતને નરકં હેતુભૂતમ્ ॥ ૩,૨૮.૧૪૪॥

પુનીહિ ગાત્રં સર્વદા મૂઢબુદ્ધે મન્ત્રાષ્ટકૈર્જન્મતીર્થે પવિત્રે ।
હૃદિ સ્થિતામારૈર્વ્યમુદ્રાં વિહાય કૃત્વાભૂષાં વિષ્ણુમુદ્રાભિરગ્ર્યામ્ ॥ ૩,૨૮.૧૪૫॥

સદા મૂઢો હરિવાર્તાં ભજસ્વ હ્યાયુર્ગતં વ્યર્થમેવં કુબુદ્ધ્યા ।
સદ્વૈષ્ણવાનાં સંગમો દુર્લભશ્ચ ક્ષુબ્ધં જ્ઞાનં તારતમ્યસ્વરૂપમ્ ॥ ૩,૨૮.૧૪૬॥

હરિં ગુરું હ્યનુસૃત્યૈવ સત્યં ગતિં સ્વકીયાં તેન જાનીહિ મૂઢ ।
દગ્ધ્વા દુષ્ટાં બુદ્ધિમેવં ચ મૂઢ સુબુદ્ધિરૂપં મા ભજસ્વૈવ નિત્યમ્ ॥ ૩,૨૮.૧૪૭॥

મયા સાર્ધં સદ્ગુરું પ્રાપ્ય સમ્યગ્વૈરાગ્યપૂર્વં તત્ત્વમાત્રં વિદિત્વા ।
તેનૈવ મોક્ષં પ્રાપ્નુમો નાર્જવૈર્યત્તાર્યા વિષ્ણોઃ સમ્પ્રસાદાચ્ચ લક્ષ્મ્યાઃ ॥ ૩,૨૮.૧૪૮॥

ઇત્યાશયં મનસા સન્નિધાય તથા ચોક્તં ભક્તવર્યો મદીયઃ ।
અતો ભક્તઃ પ્રવહેત્યેવ સંજ્ઞામવાપ વીન્દ્ર પ્રકૃતં તં શ‍ૃણુ ત્વમ્ ॥ ૩,૨૮.૧૪૯॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
તારતમ્યનિરૂપણદ્વારા વિષ્ણોરેવોપાસ્યત્વમિત્યર્થનિરૂપણં નામાષ્ટાવિંશતમોધ્યાયઃ

---

શ્રીગરુડમહાપુરાણમ્- ૨૯
પ્રવહાનન્તરાન્વક્ષ્યે શ‍ૃણુ પક્ષીન્દ્રસત્તમ ।
યો ધર્મો બ્રહ્મણઃ પુત્રો હ્યાદિસૃષ્ટૌ ત્વગુદ્ભવઃ ॥ ૩,૨૯.૧॥

સજ્જનાન્સૌમ્યરૂપેણ ધારણાદ્ધર્મનામકઃ ।
સ એવ સૂર્યપુત્રોભૂદ્યમસંજ્ઞામવાપ સઃ ।
પાપિનાં શિક્ષકત્ત્વાત્સ યમ ઇત્યુચ્યતે બુધૈઃ ॥ ૩,૨૯.૨॥

શ્રીકૃષ્ણ ઉવાચ ।
પ્રહ્લાદાનન્તરં ગઙ્ગા ભાર્યા વૈ વરુણસ્ય ચ ।
પ્રહ્લાદાદધમા જ્ઞેયા મહિમ્ના વરુણાધિકા ॥ ૩,૨૯.૩॥

સ્વરૂપાદધમા જ્ઞેયા નાત્ર કાર્યા વિચારણા ।
જ્ઞાનસ્વરૂપદં વિષ્ણું યમો જાનાતિ સર્વદા ॥ ૩,૨૯.૪॥

અતો ગઙ્ગેતિ સા જ્ઞેયા સર્વદા લોકપાવની ।
ભક્ત્યા વિષ્ણુપદીત્યેવ કીર્તિતા નાત્ર સંશયઃ ॥ ૩,૨૯.૫॥

યા પૂર્વકાલે યજ્ઞલિઙ્ગસ્ય વિષ્ણોઃ સાક્ષાદ્ધરેર્વિક્રમતઃ ખગેન્દ્ર ।
વામસ્ય પાદસ્ય નખાગ્રતશ્ચ નિર્ભિદ્ય ચોર્ધ્વાણ્ડકટાહખણ્ડમ્ ॥ ૩,૨૯.૬॥

તદુદરમતિવેગાત્સમ્પ્રવિશ્યાવહન્તીં જગદઘતતિહન્તુઃ પાદકિઞ્જલ્કશુદ્ધામ્ ।
નિખિલમલનિહન્ત્રીં દર્શનાત્સ્પર્શનાચ્ચ સકૃદવગહનાદ્વા ભક્તિદાં વિષ્ણુપાદે ।
શશિકરવરગૌરાં મીનનેત્રાં સુપૂજ્યાં સ્મરતિ હરિપદોત્થાં મોક્ષમેતિ ક્રમેણ ॥ ૩,૨૯.૭॥

ઇન્દ્રોઽપિ વાયુકરમર્દિતવાયુકૂટબિન્દું ચ પ્રાશ્ય શિરસિ હ્યસહિષ્ણુમાનઃ ।
ભાગીરથી હરિપદાક્રુમિતિ સ્મ નિત્યં જાનન્મહાપરમભાગવતપ્રધાનઃ ।
ભક્ત્યા ચ ખિન્નહૃદયઃ પરમાદરેણ ધૃત્વા સ્વમૂર્ધ્નિ પરમો હ્યશિવઃ શિવોઽભૂત્ ॥ ૩,૨૯.૮॥

ભાગીરથ્યાશ્ચ ચત્વારિ રૂપાણ્યાસન્ખગેશ્વર ।
મહાભિષગ્જનેન્દ્રસ્ય ભાર્યા તુ હ્યભિષેચની ॥ ૩,૨૯.૯॥

દ્વિતીયેનૈવ રૂપેણ ગઙ્ગા ભાર્યા ચ શન્તનોઃ ।
સુષેણા વૈ સુષેણસ્ય ભાર્યા સા વાનરી સ્મૃતા ॥ ૩,૨૯.૧૦॥

મણ્ડૂકભાર્યા ગઙ્ગા તુ સૈવ મણ્ડૂકિની સ્મૃતા ।
એવં ચત્વારી રૂપાણિ ગઙ્ગાયા ઇતિ કિર્તિતમમ્ ॥ ૩,૨૯.૧૧॥

આદિત્યાચ્ચૈવ ગઙ્ગાતઃ પર્જન્યઃ સમુદાહૃતઃ ।
પ્રવર્ષતિ સુવૈરાગ્યં હ્યતઃ પર્જન્યનામકમ્ ॥ ૩,૨૯.૧૨॥

શરંવરાય પઞ્ચજન્યાચ્ચ પઞ્ચ હિત્વા જગ્ધ્વા ગર્વકં ષટ્ક્રમેણ ।
સ્વબાણસ્ય સ્વહૃદિ સંસ્થિતસ્ય ભજેત્સદા નૈવ ભક્તિં વિષં ચ ॥ ૩,૨૯.૧૩॥

લિઙ્ગં પુષ્ટં નૈવ કાર્યં સદૈવ લિઙ્ગં પુષ્ટં કાર્યમેવં સદાપિ ।
યોનૌ સક્તિર્નૈવ કાર્યા સદાપિ યોનૌ મુક્તેઽસંગતો યાતિ મુક્તિમ્ ॥ ૩,૨૯.૧૪॥

વૈરાગ્યમેવં પ્રકારોત્યેવ નિત્યમતઃ પર્જન્યસ્ત્વન્તકઃ પક્ષિવર્ય ।
એતાવતા શરભાખ્યો મહાત્મા સ ચાન્તરો સ તુ પર્જન્ય એવ ॥ ૩,૨૯.૧૫॥

શશ્વત્લેશા યસ્ય ગાત્રે ખગેન્દ્ર પ્રભાસ્યન્તે શરભાખ્યો પયોતઃ ।
યમસ્ય ભાર્યા શ્યામલા યા ખગેન્દ્ર યસ્માત્સદા કલિભાર્યાપિયા ચ ॥ ૩,૨૯.૧૬॥

મત્વા સમ્યક્માનસં યા કરોતિ હ્યતશ્ચ સા શ્યામલાસંજ્ઞકાભૂત્ ।
મલં વક્ષ્યે હરિભક્તેર્વિરોધી સુલોહપાત્રે સન્નિધાનં ચ તસ્ય ॥ ૩,૨૯.૧૭॥

તદ્વૈષ્ણવૈસ્ત્યાજ્યમેવં સદૈવ વસ્ત્રં દગ્ધં સન્ધિજં ચૈવ જન્યમ્ ॥ ૩,૨૯.૧૮॥

ચિકિત્સિતં પરદુઃખં ખગેન્દ્ર દરૈર્ભક્તૈસ્ત્યાજ્યમેવં સદૈવ ॥ ૩,૨૯.૧૮॥

નોચ્ચાશ્ચ તે હરિભક્તેર્વિહીનાસ્તેષાં સંગો નૈવ કાર્યઃ સદાપિ ।
પુરાણસમ્પર્કવિસર્જિનં ચ પુરાણતાલં ચ પુરાણવસ્ત્રમ્ ॥ ૩,૨૯.૧૯॥

સુજીર્ણકન્થાજિનમેખલં ચ યજ્ઞોપવીતં ચ કલિપ્રિયં ચ ।
પ્રિયં ગૃહં ચોર્ણવિતા નકં ચ સમિત્કુશૈઃ પૂરિતં કુત્સિતં ચ ॥ ૩,૨૯.૨૦॥

સર્વં ચેત્કલિભાર્યાપ્રિયં ચ નૈવ પ્રિયં શાર્ઙ્ગપાણેઃ કદાચિત્ ।
કાંસ્યે સુપક્વં યાવનાલસ્ય ચાન્નં તુષઃ પિણ્યાકં તુમ્બબિલ્વે પલાણ્ડુઃ ॥ ૩,૨૯.૨૧॥

દીર્ઘં તક્રં સ્વાદુહીનં કડૂષ્ટણમેતે સર્વે કલિભાર્યાપ્રિયાશ્ચ ।
સુદુર્મુખં નિન્દનં ચાર્યજાનાં સતોવમત્યાત્મજાનાં પ્રસહ્ય ॥ ૩,૨૯.૨૨॥

સુપીડનં સર્વદા ભર્તૃવર્ગે ગૃહસ્થિતવ્રીહિવસ્ત્રાદિચૌર્યાત્ ।
પ્રકીર્ણભૂતાન્મૂર્ધજાન્સંદધાનં કરૈર્યુતં દેવકલિપ્રિયં ચ ॥ ૩,૨૯.૨૩॥

ઇત્યાદિ સર્વં કલિભાર્યાપ્રિયચ્ચ સુનિર્મલં પ્રિકરોત્યેવ સર્વમ્ ।
અતશ્ચ સા શ્યામલેતિ સ્વસંજ્ઞામવાપ સા દેવકી સંબભૂવ ॥ ૩,૨૯.૨૪॥

યુધિષ્ઠિરસ્યૈવ બભૂવ પત્નીસંભાવિતા તત્ર ચ દેવકી સા ।
ચન્દ્રસ્ય ભાર્યા રોહિણી વૈ તદેયમશ્વિન્યાદિભ્યોઽહ્યધિકા સર્વદૈવ ॥ ૩,૨૯.૨૫॥

રોણીં ધૃત્વા રોહતિ યોગ્યસ્થાનં તસ્માચ્ચ સા રોહિણીતિ પ્રસિદ્ધા ।
આદિત્યભાર્યા નામ સંજ્ઞા ખગેન્દ્ર જ્ઞેયા સા નારાયણસ્ય સ્વરૂપા ॥ ૩,૨૯.૨૬॥

સંજાનાતીત્યેવ સંજ્ઞામવાપ સંજ્ઞેતિ લોકે સૂર્ય ભાર્યા ખગેન્દ્ર ।
બ્રહ્મણ્ડસ્ય હ્યભિમાની તુ દેવો વિરાડિતિ હ્યભિધામાપ તેન ॥ ૩,૨૯.૨૭॥

ગઙ્ગાદિષટ્કં સમમેવ નિત્યં પરસ્પરં નોત્તમં નાધમં ચ ।
પ્રધાનાગ્નેઃ પાવિકાન્ચૈવ ગઙ્ગા સદા શુભા નાત્ર વિચાર્યમસ્તિ ॥ ૩,૨૯.૨૮॥

આસાં જ્ઞાનત્પુણ્યમાપ્નોતિ નિત્યં સદા હરિઃ પ્રીયતે કેશવોલમ્ ।
ગઙ્ગાદિભ્યો હ્યવરાહ્યગ્નિજાયા સ્વાહાસંજ્ઞાધિગુણા નૈવ હીના ॥ ૩,૨૯.૨૯॥

સ્વાહાકારો મન્ત્રરૂપાભિમાની સ્વાહેતિ સંજ્ઞામાપ સદૈવ વીન્દ્ર ।
અગ્નેર્ભાર્યાતો બુદ્ધિમાન્સંબભૂવ બ્રહ્માભિમાની ચન્દ્રપુત્રો બુધશ્ચ ॥ ૩,૨૯.૩૦॥

બુદ્ધ્યાહરદ્ધૈ રાષ્ટ્રજાતં ચ સર્વં ધૃતં ત્વતો બુધસંજ્ઞામવાપ ।
એવં ચાભૂદભિમન્યુર્મહાત્મા સુભદ્રાયા જઠરે હ્યર્જુનાચ્ચ ॥ ૩,૨૯.૩૧॥

કૃષ્ણસ્ય ચન્દ્રસ્ય યમસ્ય ચાંશૈઃ સ સંયુતસ્ત્વશ્વિનોર્વૈ હરસ્ય ।
સ્વાહાધમશ્ચન્દ્રપુત્રો બુધસ્તુ પાદારવિન્દે વિષ્ણુદેવસ્ય ભક્તઃ ॥ ૩,૨૯.૩૨॥

નામાત્મિકા ત્વશ્વિભાર્યા ઉષા નામ પ્રકીર્તિતા ।
બુધાધમા સા વિજ્ઞેયા સ્વાહા દશગુણાધમા ॥ ૩,૨૯.૩૩॥

નકુલસ્ય ભાર્યા માગધસ્યૈવ પુત્રી શલ્યાત્મજા સહદેવસ્ય ભાર્યા ।
ઉભે હ્યેતે અશ્વિભાર્યા હ્યુષાપિ ઉપાસતે ષડ્ગુણં વિષ્ણુમાદ્યમ્ ।
અતોઽપ્યુષાસંજ્ઞકા સા ખગેન્દ્ર અનન્તરાચ્છૃણુ વક્ષ્યે મહાત્મન્ ॥ ૩,૨૯.૩૪॥

તતઃ શક્તિઃ પૃથિવ્યાત્મા શનૈશ્ચરતિ સર્વદા ।
અતઃ શનૈશ્ચરો નામ ઉષાયાશ્ચ દશાધમાઃ ॥ ૩,૨૯.૩૫॥

કર્માત્મા પુષ્કરો જ્ઞેયઃ શનરથ યમો મતઃ ।

નયાભિમાની પુરુષઃ કિઞ્ચિન્નમ્રો દશાવરઃ ॥ ૩,૨૯.૩૬॥

હરિપ્રીતિકરો નિત્યં પુષ્કરે ક્રીડતે યતઃ ।
અતસ્તુ પુષ્કલો નામ લોકે સ પરિકીર્તિતઃ ॥ ૩,૨૯.૩૭॥

હરિ પ્રીતિકરાન્ધર્માન્વક્ષ્યે શૃણુ ખગાધિપ ।
પ્રાતઃ કાલે સમુત્થાય સ્મરેન્નારાયણં હરિમ્ ॥ ૩,૨૯.૩૮॥

તુલસીવન્દનં કુર્યાચ્છ્રીવિષ્ણું સંસ્મરેત્ખગ ।
વિણ્મૂત્રોત્સર્ગકાલે ચ હ્યપાનાત્મકકેશવમ્ ॥ ૩,૨૯.૩૯॥

ત્રિવિક્રમં શૌચકાલે ગઙ્ગાપાનકરં હરિમ્ ।
દન્તધાવનકાલે તુ ચન્દ્રાન્તર્યામિણં હરિમ્ ॥ ૩,૨૯.૪૦॥

મુખપ્રક્ષાલને કાલે માધવં સંસ્મરેત્ખગ ।
ગવાં કણ્ડૂયને ચૈવ સ્મરેદ્ગોવર્ધનં હરિમ્ ॥ ૩,૨૯.૪૧॥

સદા ગોદોહને કાલે સ્મરેદ્ગોપાલવલ્લભમ્ ।
અનન્તપુણ્યાર્જિતજન્મકર્મણાં સુપક્વકાલે ચ ખગેન્દ્રસત્તમ ॥ ૩,૨૯.૪૨॥

સ્પર્શે ગવાં ચૈવ સદા નૃણાં વૈ ભવત્યતો નાત્ર વિચાર્યમસ્તિ ।
યસ્મિન્ગૃહે નાસ્તિ સદોત્તમા ચ ગૌર્યઙ્ગણે શ્રીતુલસી ચ નાસ્તિ ॥ ૩,૨૯.૪૩॥

યસ્મિન્ગૃહે દેવમહોત્સવશ્ચ યસ્મિન્ગૃહે શ્રવણં નાસ્તિ વિષ્ણોઃ ।
તત્સંસર્ગાદ્યાતિ દુઃખાદિકં ચ તસ્ય સ્પર્શો નૈવ કાર્યઃ કદાપિ ॥ ૩,૨૯.૪૪॥

ગોસ્પર્શનવિહીનસ્ય ગોદોહનમજાનતઃ ।
ગોપોષણવિહીનસ્ય પ્રાહુર્જન્મ નિરર્થકમ્ ॥ ૩,૨૯.૪૫॥

ગોગ્રાસમપ્રદાતુશ્ચ ગોપુષ્ટિં ચાપ્યકુર્વતઃ ।
ગતિર્નાસ્ત્યેવ નાસ્ત્યેવ ગ્રામચાણ્ડાલવત્સ્મૃતઃ ॥ ૩,૨૯.૪૬॥

વત્સ્યસ્ય સ્તનપાને ચ બાલકૃષ્ણં તુ સંસ્મરેત્ ।
દધિનિર્મન્થને ચૈવ મન્થાધારં સ્મરેદ્ધરિમ્ ॥ ૩,૨૯.૪૭॥

મૃત્તિકાસ્નાન કાલે તુ વરાહં સંસ્મરેદ્ધરિમ્ ।
પુણ્ડ્રાણાં ધારણે ચૈવ કેશવાદીંશ્ચ દ્વાદશ ॥ ૩,૨૯.૪૮॥

મુદ્રાણાં ધારણે ચૈવ શઙ્ખચક્રગદાધરમ્ ।
પદ્મં નારાયણીં મુદ્રાં ક્રુદ્ધોલ્કાદીંશ્ચ સંસ્મરેત્ ॥ ૩,૨૯.૪૯॥

શ્રીરામસંસ્મૃતિં ચૈવ સંધ્યાકાલે ખગોત્તમ ।
અચ્યુતાનન્તગોવિન્દાઞ્છ્રાદ્ધકાલે ચ સંસ્મરેત્ ॥ ૩,૨૯.૫૦॥

પ્રાણાદિકપઞ્ચહોમેચાનિરૂદ્ધાદીંશ્ચ સંસ્મરેત્ ।
અન્નાર્ઘર્પણકાલે તુ વાસુદેવં ચ સંસ્મરેત્ ॥ ૩,૨૯.૫૧॥

અપોશનસ્ય કાલે તુ વાયોરન્તર્ગતં હરિમ્ ।
બસ્ત્રધારણકાકાલે તુ ઉપેન્દ્રં સંસ્મરેદ્ધરિમ્ ॥ ૩,૨૯.૫૨॥

યજ્ઞોપવીતસ્ય ચ ધારણે તુ નારાયણં વામનાખ્યં સ્મરેત્તુ ।
આર્તિક્યકાલે ચ તથૈવ વિષ્ણોઃ સમ્યક્સ્મરેત્પર્શુરામાખ્યવિષ્ણુમ્ ॥ ૩,૨૯.૫૩॥

અપોશનેવૈશ્વદેવસ્ય કાલે તદન્યહોમાદિષુ ભસ્મધારણે ।
સ્મરેત્તુ ભક્ત્યા પરમાદરેણ નારાયણં જામદગ્ન્યાખ્યરામમ્ ॥ ૩,૨૯.૫૪॥

ત્રિવારતીર્થગ્રહણસ્ય કાલે કૃષ્ણં રામં વ્યાસદેવં ક્રમેણ ।
શઙ્ખોદકસ્યોદ્ધરણે ચૈવ કાલે મુકુન્દરૂપં સંસ્મરેત્સર્વદૈવ ॥ ૩,૨૯.૫૫॥

ગ્રાસેગ્રાસે સ્મરણં ચૈવ કાર્યં ગોવિન્દસંજ્ઞસ્ય વિશુદ્ધમન્નમ્ ।
એકૈકભક્ષ્યગ્રહણસ્ય કાલે સમ્યક્સ્મરેદચ્યુતં વૈ ખગેન્દ્ર ॥ ૩,૨૯.૫૬॥

શાકાદીનાં ભક્ષણે ચૈવ કાલે ધન્વન્તરિં સ્મરેચ્ચૈવ નિત્યમ્ ।
તથા પરાન્નસ્ય ચ ભોગકાલે સ્મરેચ્ચ સમ્યક્પાણ્ડુરઙ્ગં ચ વિષ્ણુમ્ ॥ ૩,૨૯.૫૭॥

હૈયઙ્ગવીનસ્ય ચ ભક્ષણે વૈ સમ્યક્સ્મરેત્તાણ્ડવાખ્યં ચ કૃષ્ણમ્ ।
દધ્યન્નભક્ષે પરમં પુરાણં ગોપાલકૃષ્ણં સંસ્મરેચ્ચૈવ નિત્યમ્ ॥ ૩,૨૯.૫૮॥

દુગ્ધાન્નભોગે ચ તથૈવ કાલે સમ્યક્સ્મરેચ્છ્રીનિવાસં હરિં ચ ।
સુતૈલસર્પિઃ ષુ વિપક્વભક્ષસંભોજને સંસ્મરેદ્વ્યઙ્કટેશમ્ ॥ ૩,૨૯.૫૯॥

દ્રાક્ષાસુજમ્બૂકદલીરસાલનારિઙ્ગદાડિમ્બફલાનિ ચારુ ।
સ્મરેત્તુ રમ્ભોત્તમનારિકેલધાત્રીસુભોગે ખલુ બાલકૃષ્ણમ્ ॥ ૩,૨૯.૬૦॥

સુપાનકસ્યૈવ ચ પાનકાલે સમ્યક્સ્મરેન્નારસિંહાખ્યવિષ્ણુમ્ ।
ગઙ્ગામૃતસ્યૈવ ચ પાનકાલે ગઙ્ગાતાતં સંસ્મરેદ્વિષ્ણુમેવ ॥ ૩,૨૯.૬૧॥

પ્રયાણકાલે સંસ્મરેત્તાર્ક્ષ્યવાહં નારાયણં નિર્ગુણં વિશ્વમૂર્તિમ્ ।
પુત્રાદીનાં ચુંબને ચૈવ કાલે સુવેણુહસ્તં સંસ્મરેત્કૃષ્ણમેવ ॥ ૩,૨૯.૬૨॥

સુખઙ્ગકાલે સ્વસ્ત્રિયશ્ચૈવ નિત્યં ગોઽપિ કુચદ્વન્દ્વવિલાસિનં હરિમ્ ।
તાંબૂલકાલે સંસ્મરૈચ્ચૈવ નિત્યં પ્રદ્યુમ્નાખ્યં વાસુદેવં હરિં ચ ॥ ૩,૨૯.૬૩॥

શય્યાકાલે સંસ્મરેચ્ચૈવ નિત્યં સંકર્ષણાખ્યં વિષ્ણુરૂપં હરિં ચ ।
નિદ્રાકાલે સંસ્મરેત્પદ્મનામં કથાકાલે વ્યાસરૂપં હરિં ચ ॥ ૩,૨૯.૬૪॥

સુગાનકાલે સંસ્મરેદ્વેણુગીતં હરિં હરિં પ્રવદેત્સર્વદૈવ ।
શ્રીમત્તુલસ્યાશ્છેદને ચૈવ કાલે શ્રીરામરામેતિ ચ સંસ્મરેત્તુ ॥ ૩,૨૯.૬૫॥

પુષ્પાદીનાં છેદને ચૈવ કાલે સમ્યક સ્મરેદેત્કપિલાખ્યં હરિં ચ ।
પ્રદક્ષિણેગારુડાન્તર્ગતં ચ હરિં સ્મરેત્સર્વદા વૈ ખગેન્દ્ર ॥ ૩,૨૯.૬૬॥

પ્રણમકાલે દેવદેવસ્ય વિષ્ણોઃ શેષાન્તસ્થં સંસ્મરેચ્ચૈવ વિષ્ણુમ્ ।
સુનીતિકાલે સંસ્મરેન્નારસિંહં નારાયણં સંસમરેત્સર્વદાપિ ॥ ૩,૨૯.૬૭॥

પૂર્તિર્યદા ક્રિયતે કર્મણાં ચ સમ્યક્સ્મરેદ્વાસુદેવં હરિં ચ ।
એવં કૃતાનિ કર્માણિ હરિપ્રીતિકરાણિ ચ ॥ ૩,૨૯.૬૮॥

સમ્યક્પ્રકુર્વન્નેતાનિ પુષ્કરો હરિવલ્લભઃ ॥ ૩,૨૯.૬૯॥

એતસ્માદેવ પક્ષીશ કર્મ યત્સમુદાહૃતમ્પુષ્કરાખ્યાનમતુલં શ◌ૃણોતિ શ્રદ્ધયાન્વિતઃ ।
હરિપ્રીતિકરે ધર્મે પ્રીતિયુક્તો ભવેત્સદા ॥ ૩,૨૯.૭૦॥

ઇતિ શ્રીગારુડે મહાપુરાણે ઉત્તરખણ્ડે તૃતીયાંશે બ્રહ્મકાણ્ડે
કૃષ્ણગરુડસંવાદે તત્ત્વરહસ્યં નામૈકોનત્રિંશોધ્યાયઃ

સમાપ્તમિદં ગરુડમહાપુરાણમ્ ।

ઇતિ શ્રીગરુડમહાપુરાણં સમાપ્તમ્ ।

Edited from sansknet.org as provided on GRETIL site.

*garuDapurANa*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*